तद्विलंबे — शिवा आन्ता - इत्येवं शिवः विचारितवान्

१० ,

साध्वी युवती पालन परित्यागे प्रत्यवायः

११ २५–३२ कुमारे गणनायकं शिवः ससार — सोपि तत्रागत्य शिवस्य स्तुतिं चकार (=रुद्रस्य नमकाध्यायस्य श्लोकबद्ध रचना)

११ ५४–१२० कुमारस्य तत्र च गौर्याश्च वियोगो न भवितव्यं — सा गिरिजा मन्दस्मिता अप्रतिनिर्गतापि — तदागमने यो विघ्नः सपरिहारा हि.

११ १–१० गणनाथकृतं शिवस्य स्तुतिश्च. (स्तवराजः)(सप्ताध्यायस्य अर्धश्लोका)

॥ १०–१७ ॥ स्तुतेश्च फलं

१२ २–४ गणनाथकाय शिवाज्ञा उपदेशश्च, गौरीं प्रति यातुं -

५ — पुत्रेण जननी जनकौ पोष्यौ

७–१० तारकासुरवधे षडानन विचारः — तारकासुर अवध्यत्वादि. कमले लीन विष्णु उपदेशो देवानां — गौर्याः शिवस्य च सर्वेशक्तिमत्त्वं.

२३ — २३ — २५ — ५० — ७१ — २३–९३

३१. श्लो० सं० जैमिनि मुनि सूत संवाद
सूत व्यास संवादे
जैगीषव्य सूत संवादे

४ १–२२ " " " हिमाचलेन मेनां प्रबोध्य अंबिका प्रेषणार्थं प्रयत्नः
२३–२५ " " " उपहारादिकं नन्दिकेश्वराय भवान्या प्रेषितं
२६–३८ " " " विलंबं दृष्ट्वा अन्येऽपि गणाः आगताः सत्कृताश्च – हिमवान् अपि अंबां – गुरु पुष्य मध्याह्ने मुहूर्तेऽत्तमे प्रेषणे च्छां प्रकटितवान्
३९–४६ " " " मेनया गिरीशेन सह आमेरु गमनाय गौरीवचनात् प्रस्थानं. देवदुन्दुभिनादादि अनेक उत्सवाः, सिद्धयः उपस्थिताः, रत्नसागर रत्नानि आनिनाय,
४७–६२ " " " अमराणां हर्षः तेषामागमनं च, ऋषीणामप्यागमनं,

५ १–२३ चलति विमाने देवीं प्रत्यनुग्रहकांक्षया मेनया गौरीप्रार्थना.
२४–४२ " " " " देवकृत गौरी स्तुतिः

३२ ६ ५–४९ " " " " स्वर्गे विमानागमने – विमानोच्चलनेन गौरीपदर्शनेन देवकृत गौरी स्तुतिः

७ १–१६ " " " " विमाने गौरीपदर्शने जाते मति, स्वर्ग, ब्रह्मलोकं, विष्णुलोकं चातीत्य, विमानं कैलासं अगमत्
१७–६४ " मेनां हिमवन्तं च गौरी मेरौ कैलासद्वार सन्नद्धं, रत्नवेदिकां, शिवमंदिरं, अनेक रत्नमंदिराणि, सुधाकुल्याः, अखंडमणि मण्डपं, शिवशयनपर्यंकं, सभामण्डपं दर्शयामास.
६५–८२ " " " " इतोऽपि उत्तमं शंकरलयाः सन्ति : तत्र तिष्ठति शंकर तद्दर्शनार्थं मया गौर्या त्वरया गन्तव्यं तत्र भवतां गमने न संभावितं इत्युक्त्वा तत्रत्य उत्कृष्ट सुधा फलाद्यानि भोजयित्वा, उत्कृष्ट वस्त्राभरणानि, रत्नानि, गजान्, तुरंगमान् गाश्च विविधाः ताभ्यां ददौ.
८३–१२१ " " " अन्येऽपि शिवप्रेषिताः गणाः, आगत्य नन्दीश्वरं प्रति विलंबः कथं इति प्रोचुः – तान् अंबा स्वतंत्रा, त्वरयितुं नकस्यापि सामर्थ्यं. – शैलजानामेनापरिवर्ते

८ १ " " " " अंबापि सिंहमारुह्य पश्चात् विमाने स्थिता। प्रमथानां शिवोच्चारण गान वाद्यादिभिः प्रसन्ना, स्वयमपि शिवगानं चकार.
८–१३ " " " " गौरी गानं शिव गानं
१४–२८ " " " " – देवी स्वपरिलकाकिनां पश्य, दिव्य सौन्दर्य विशालान् ससर्ज. तामिस्ताः स्वयमपि गौरीगानं चकार

तृतीयांश पूर्वार्ध - अनुक्रम

अ. श्लो.

अ.	श्लो.	विषय
१	१-३३	नैमिषे मुनि सूत संवादे, शैव महिमा.
"	३४-	सूतः शिवभक्तिं कथं प्राप
"	३७-	सूत व्याससंवादः केदारे
"	४०-६३	शिव रहस्यस्य अत्यन्तं गोप्यतमत्वं
"	५५-६१	परंपरा
२	१-	शिव विद्या महिमा, शिवभक्तिः
	१४-	शिवधर्माः
	२४-२	गायत्री मंत्रार्थः मंत्रे भर्ग = शिव
	२८-३२	" जपस्य शिवः वरदातु प्रवृत्त.
	३३-४८	" मनने - शिव नाम विहीनो मंत्रः निष्फलः, अजप्यश्च.
	४८-७८	" कृत शिवस्तवः वसिष्ठ - (गायत्रीमंत्रे भर्गः = शिवः) गायत्री पूजितलिंग महिमा.
	७९-८८	वेदलोके वेदे पि शिव शब्द युक्तो यो मंत्रमणिः जप्यश्च, मन्तव्यः
	८८-९१	शिवधर्माः
३	१-७	सूतादि व्यास संवादः
		" जैगीषव्य + स्कंद संवादः
	७-	" हिमाचल निलयाद् गौर्याः कैलासगमनाख्यान - शिवस्य सुमेरुतुंगशृंगे नवरत्न विनिर्मित प्रासादे अनेकमंडप मध्ये स्थिते अनेकोटि गणैः, शिवस्य सिंहासने शिवस्य
	८-४९	" समागस्य वर्णनं -
		" शिवस्य गौरी दर्शनेच्छा - शीघ्रदर्शने गौर्याः इच्छा मौलेश्रीशुत्वा शीघ्रतोपि गौरी सन्तोषार्थं विलक्षणोपचाराणि कृतवान्
	५०-७८	" हिमालय प्रति नंदिकेश्वरागमनं सत्कारश्च.
	८०-८०	"
	८१-९३	" नन्दिना आनीत शिवागुलिं प्राप्य गौर्या आनन्दः शिवध्यानंच.

अ॰ चौदह

यत्र वालगिरिः, उदयाचल ... अरुणावासः शोणोनद सालवनं गंधर्वाणां भोरथः अस्ताचलः शालकांडीयः

जंबुनदी, प्रतिष्ठानपुरं, करहटपुरं ... विन्ध्यवासिनी, वेणुवनं, नागनाथशिवालयं, ओंकार नर्मदातीरे, ओंकारकुंडं,

आवरयं घृष्णेश्वरः नैमिषं विशाला बदरी गोदा नर्मदा कृष्णावेणिका नीराप्रयोष्णी कालिंदी प्रजापतेर्वेदी, प्रयागवनं,

चित्रकूटगिरीः ... गया सोमेश्वरालयं, अयोध्या सुधेश्वरालयः ... गोकामुख गंगा अब्धिसंगता कामोदकं

कोंकण

पश्चिमाम्भोधि कोणे गोकर्णं श्रीशैलं यत्र स्कंदः श्रीमद्दक्षिणकैलासः, कांची ... तीरवासी

अरुणाद्रि वृद्धाचलाद्रि अम्रसभा नर्तनमीशस्य, गोपर्वते सह्याद्रिः तुंगाद्रि यतो जाता कुबेरजा तुंगज्योतीरा.

अरुणाद्रि वृद्धाचलाद्रि अम्रसभा, नर्तनमीशस्य, गोपर्वते

वेणुवनः महेन्द्रशिखरः दक्षिणाम्भोनिधौ ताम्रपर्णीनदी. कन्यातीर्थे. शुचीश्वरः गंधमादनशिखर

गजारण्ये पंचनद कुंभेश्वर मध्यार्जुन त्रिकोटिमंगल, मायूरश्वेतकानने, सह्यजासमुद्रसंगम वाञ्छेश्वरः छायवनं,

तेजिनीवनं वटेश्वरः मुकुन्दन्यावनं ब्रह्मेशः वैद्येशः तंजेशः कमलालयः श्रुतिकानन वेदतीर्थे कावेरी तीरनागिरि

भारते खंडा अन्यखंडानि ब्रह्माण्डमिति

भद्राश्व: केतुमाल हरिखंड किंपुरुषखंड देवभूमि मन्दरः इलावर्तः मणिवर्ष

~~...~~ शिव ~~...~~ यो सिंहासन विराजित शोभा वर्णनं.

हिमवान् शिवं स्तौति

शिव व्याख्यानि.

" कैलासदर्शने योग्यता.

25 1-18 — — — — —

28-32 — — —

3?-48 —

43-58 — ...

83

२८ द्वितीयांशानुक्रमे

अ. श्लो. स्कंदजैगीषव्यसंवादे
" कैलास दर्शनं (नंदिकेश्वर दिग्दर्शन)

२३ ३०- " " सुंदरेशस्यालयं, कपर्दीशालयं, पक्षेश्वर०, पापभक्षेश्वर०, वनेश० मतंगेश० पुष्टीश० कुतीश्वर० विनतेश० वसतीश०
३० ३० ३० ३० ३१ ३१ ३१ ३१ ३१ ३१

तलावनं, कुलाचलानां सौधोरु, लिंगकुंभा:, वनधाममहामौलिलिंगं, रत्नभूमि:, सुधासिंधु:, तन्मध्ये मणिद्वीप:, तत्र श्रीपुर:,
३२ ३२ ३२ ३३ ३३ ३३ ३४ ३४

मणिद्वीपेश:, मणिगंगातटं, मणिगंगा, करंजवनं, करंजेशशिवालयं - एवं १०८ प्राकारा: रत्नलिंगालया: तत्रान्तरे स्कन्दभवनं, गणपभवनं,
३५ ३६ ३६ ३६ ३६ ३६ ३८ ३८

स्कन्देश्वर०, विघ्नेश्वर०, देव्या अन्त:सदनं मणिसौधं, सद्योजात: वामदेव: तत्पुरुष: अघोर: ईशान: तत्ररक्षका:, तेषां बाणलिंगानि.
३८ ३८ ३८-४० ४१ ४२

तत्रान्तरे पंचविंशतिमूर्तय:, तत्रान्तरे महादेव्या वसति; नास्मात् प्रसरस्तत्र - महादेव्यास्सखिगणस्तत्र प्रचरन्ति, तत्र अयुतं लिंगानि रुद्राण्या पूजयन्ति.
४४ ४५ ४६ ४६ ४७

तत्रान्तरे महेशस्य मंडपानां चतुष्टयं.
४८

२४ (कैलासादेव सकल भुवनावलोकनं —) श्री २४ हिमालय: दर्दुर सुमाली केतुमाल
माल्यां ओषधेयं धरणीधर:, समुद्रा नदीनदा:, द्वीपा: विपना, अधुना जातानां प्रसाद:, नील: विन्ध्य मेरु दर्दुर सुमाली केतुमाल
प्रस्थो रैवत: शतशृंग: मणिनाभ: पिंगल उदय: अर्बुद मैनाक मधु, अस्ताचल पारियात्र: निषधा, कंकट
हिमालय: भानुमंगा (भागीरथी) अन्य त्रिविक्रम विष्णुपादनिर्गता गंगा द्वारा अवतीर्य। विशंगता अंगवश्य दिशोज
१ भारते लीना, देवस्तुता विसर्जिता, आनंदकाननं आस्था चक्रतीर्थ सरिद्वरा, विश्वेश्वरावस्थानं महत्, अविमुक्तं, विश्वेश्वरलिंग
११ १२ १२-१३ १६
कुरुक्षेत्रं, प्रभास: स्वर्णकोटि पुष्करं गंगाद्वारावनिर्यं, पिंडारकं, कालंजरं, नारायणीतीरे, कुरुभागवतं, कुंभकोणं, श्रीरंगनाथं, ओंकारेश्वरं
पश्चिमे १४ १४ १४ १४ १४ १४ १४ १४ १६ १६ १८ १८
१ शिप्रातीरे महाकाल: कामरूप देवनायकं. कुरव: नारायणस्य भूमिभूमिस्तत्र द्वीप धृतोदधौ, किंपुरुषावास: पुरुषास्सुरगानना, क्षीरोदश्च
१८ १८ १९ १९
मरुभूमि: शाकद्वीप क्रौंचद्वीप, कुशद्वीप शाल्मलि क्षीरोद, देवभूमि इक्ष्वोदे,
२० २१ २१ २१ २१

अ. ओ.

कुल्मवाटी. कंदलेश्वरालयः, मधु क्षीरघृतसर्वाः कुल्याः, देवीश्वरालयः, सालवनं. पश्चिमगोपुरं. उग्रेश्वरालयं. भृंगिसौधं
बाणासुरगृहंमहत्, हरिकेशालयं. स्कन्दालयं, अम्बिकेशालयं, नवरत्नमहाशैलाः सौधोत्तमैर्वृताः, अनन्तमेरुमहाधाम, गर्भेशगर्भभुवनं.
इन्द्रसहस्रकुम्भमण्डपं, कैलासनलिनी तन्मध्य गर्भस्थं माणिमन्तं, कलशेशालयं. कुलशैले चन्द्रकान्तशिलातलं, चन्द्रेश्वरालयं; कुलाचलमहासौधाः,
अयुतलिंगसदनं शैलेशस्यवरालयं, क्षीरोपवापिका रत्नसोपानमण्डपा, क्षीरेश्वरालयं, मधुरेशसद्म —तीरस्थानं पश्चिमे. पूर्वे नदी, दक्षिणे चंडीभृंगी,

२३ ,,

गणेश्वरस्य सदनं, हीरसौधः, पाटलीवनं. पाटलीशागारं, स्वर्णतालीवनं, तालेशशिखरं, दधिकुल्लोलिनी. कुंजिकेशालयं. नागेश्वरालयं,
विधेशालयं, सोमेश्वरालयं. पुन्नाग वनं, बिल्वेश्वरः बिल्ववने. गंधर्वेश्वरः सालवनं महत्. सिद्धेश्वरालयं. रुद्राक्षकाननं. भस्मधारसरः,
भस्मेश्वरालयः, गंधशैलं, गंधेश्वरालयं, चन्दनानां वनं. घृतकुल्या घृतेश्वरधाम शिप्रेशालयं. उत्तरगोपुरं, महावृषभशेखरं.
गरुडोद्गारिरत्नाच्छ मंडपं. पुष्परागोत्थशिखरं अगरुवनं महत्, देवदारुवनं, देवदारेश्वरालयं, ~~[illegible]~~, कालाग्निरुद्रसदनं.

३४

गन्धर्वेश्वरालयं, वेदेश्वरशिखरं महत्, तरुणीशालयं, पद्मगर्भेश्वरालयं, सुधाविपिनं, खर्जूरिकावनं. पूगीवनं पर्णेशालयं,
भैरवेशालयं, मणिखण्डेश्वरालयं, सुधावापी, सुधाधामेश्वरालयं, अमृतेशालयं. पापविनाशनः कूपः, जटेश्वर शिखरं, नन्दनकाननं.
आम्रवनं, आम्रेश्वरालयं अष्टाताष्टकलिंग, शिवप्रासादः. मणिमण्डपं. पिप्पलेशालयं, अशोकवनं महत्, विशोकेशस्य सद्मं, मन्दारकाननं,
शुकेश्वरस्यसदनं, ~~[illegible]~~ ब्रह्मसत्यमहासद्म, प्रासादकेश्वरं, उग्रेशालयं, ईशान सदनं महत्, रुद्रेशालयं, पारिजातवनं महत्,
रत्नप्रासादः गिरिकेशालयं, हरिकेशवनं, सागराख्य सरोवरं. सागरेश्वर, उत्पलेशालयं, कुमुदेशालयं, हंसेश्वरमहाधाम, भद्रेश्वरधाम
मणिज्योतिश्वरः, कामेश्वरः, मधुखण्ड. द्राक्षावल्लीवनं. कैलासगंगा. शान्ताद्रिलिंगानां सौधमाला. कुंभावली. तमालवने. मालीश्वरः

द्वितीयं मातृकर्म

अ.	श्लो.	स्कंद जैगीषव्य संवादे - हिमाचलस्य शिवपार्वतीदर्शनार्थं कैलासे गमनं
१९	१-३२	मेनां प्रति हिमाचलेन कैलास वर्णनं
	३३-३४	देवगंगायां स्नानं
	३५-४३	निवधादि समागमः - मत्स्येकाशी वासादि
	४४-५५	कैलासेऽपि भोजनादि
	४६-८६	मेनां हिमाचलं आगतं ज्ञात्वा शिवः स्कंद देव नन्द्यादीन् प्रेषयत् - ते सर्वेऽपि मिलित्वा आनीत विमाने शिवालयं प्रतस्थतुः
	८८-६९	मार्गे शिवालय महात्म्यं कृष्णा स्वामीत भारस्य तुच्छता वर्णनं
	७०-७३	शिव समागमः सत्कारश्च
२०	१-१२	अन्तःपुरे शिवा मातृ पितृ सन्मानादिः - सन्मानेन च वर्षवासः
	१३-	शिवा हिमवत्पत्नी कैलासाचल दर्शने विमानेन शिवया पित्रादि सह विहारः - कैलासस्य प्रथमावरणं. सागरः २८ मण्डपः २९, विद्युत्स्तम्भः ३०, सहस्रस्तंभमंडपः ३१, केतकवनं ३६, नंदिकेश्वरालयः तल्लिंगानि ३८, दक्षिण प्रकारः नीलमणिकल्पितः ४०, चंडीश्वरालयः ४५, प्रत्याकार लिंगं ४६, भृंगी नालय शिवालयं ५४, पुष्पवनं ५०, उत्तरप्राकारं अनेक तत्र अनेक शिवालयं, सुरत्नपद्मिनी ५१, रत्नपद्म वापिका ५१, मणिधरस्य मंडपं.
२१	१	सुरत्न पद्मिनीस्नान भूषणधारणं - ९ वनस्थली पुष्पवाटिका १२, कासार सार मध्यस्थ मंडपे विहारः १६, फल आहार भोजनं २०, लिंगपूजनं २३, देवीश्वरालयं २८, देवीश्वर लिंगपूजनं ३०, गानं च नाट्यं भोजनं ३५-४२, मणिद्वीपे विहारः ६२, नौकाक्रीडा ६३
२२		शिवेन कैलासेऽपि हिमाचल मेनयोः सत्कारः
	८-१६	हिमाचलकृत शिवस्तुतिः
		शिवा तथा नंदिकेनः विमान वरे हिमालयं मेनां मैनाक विमानं देव संस्थाप्य कैलासं शिवानात् - अनन्त शिवागार युतं कैलासं, कलधौत, नंदिकेश्वरालयं, रत्नगिरिः, मेरुप्रासादः ४८, हस्तावसमोक्षः ४६, कोटिलिंगालयाः ४९; मणि प्राकार दक्षिणे ५०, चण्डीश्वरालयं ५१, गोपुराणि तलानि, सुरत्नपद्मिनी ५२ रत्नस्तंभमंडपाः, कैलासेश्वर ५४, मणिस्तम्भमण्डपः ५६, सभाः सौवर्णी राजती चित्र रत्नप्रधान ६०, सहस्रलिंगालयं ६२, कोटिस्तंभ मण्डपे ६३, सुराध्यवापी ६४, देवगंगा ६५, लिंगतीर्थं ६६, मंडपः, पंचवक्त्रेश्वर ६६ महादेव निसु ताः पंचगंगा ६८ शिवगंगा देवगंगा रत्नगंगा कैलासगंगा ... नीलोत्पलमणिप्रासादः ७१, रत्नशाला ७२, पुष्पवनं ७३

३८

॥ श्रीगणेशायनमः॥ सरस्वत्यै नमः॥ श्रीगुरुभ्यो नमः॥ श्रीअन्नपूर्णासहित काशीविश्वेश्वराभ्यां नमः॥
श्रीकालभैरवाय नमः॥ श्रीढुंढपाणये नमः॥ गौरीशंकर महादेवाय नमः॥उमामहेश्वराभ्यां नमः॥
शिवरहस्यबरियुवद्के प्रारंभः॥ वक्रतुंडाय नमः॥ श्रीढुंढिराजाय नमः॥ ॐ॥ माहेश्वरे पुरा
सत्रे प्रवृत्ते मुनयस्तदा॥ यच्छ्र्‌त्वा गतं सूतं पैप्पलादं हि सत्रिणः॥ १॥ वाजश्रवसमाहुस्तं समवेता
महर्षयः॥ कृष्णाजिनोत्तरासंगा भस्मोद्धूलितविग्रहाः॥२॥ त्रिपुण्ड्र विलसद्भाला रुद्राक्षांगद-
कंकणाः॥ यज्ञेश्वरं महारुद्रं पूजयंतोऽध्वरे रताः॥३॥ लिंगे ऽग्नि होत्रे सूर्ये च रुद्रसूक्त जपादराः॥ पंचा
क्षरावृत्तिपराः शिवनाम परायणाः॥ ४॥ पंचकोशातिगं देवं पंचास्यं परमेश्वरं॥ ध्यायंतः परया
भक्त्या तं पप्रच्छुरकल्मषाः॥५॥ संपूज्यार्घ्यासनैर्भोज्यैः प्रश्रय प्रश्न भाषणैः॥अन्योन्यं कुशल प्रश्नैः
प्रश्रयावनता स्ततदा॥ ६॥ तेषां कुलपतिर्वृद्धः प्राह तं मौनि भार्गवः॥ मौनि भार्गव उवाच॥ पैप्प
लाद सनाथा स्मस्त्वदागमनेनतो वयं॥७॥ माहेश्वरं यतः सत्रं प्रवृत्तं पारमेश्वरं॥ त्वं भक्तो नीव रुद्रस्य
स्कंदनंदीशसंनिभः॥ ८॥जैगीषव्यो मुनिः पूर्वं मूर्धरेता महातपाः॥ शंकराज्ञा प्रभावेन स्कंदोऽयत्रो-
ण

शिवरह० ॥ कृवान् शुभं ॥९॥ पुण्यं शिवरहस्याख्यमिति हासोत्तमोत्तमं ॥ त्रिनेत्रापारचरितं द्वादशांश समन्वितं ॥१०॥ उपासितो त्वया पूर्वं मनोवाक्काय कर्मभिः ॥ भक्त्या त्वनन्यया शंभो स्त्वयि यत्प्रो क्तवान् स्वयं ॥११॥ यस्मिन्देवो हरः प्रीत्या संस्थितेषु मुनिष्वपि ॥ द्वादशांश युतं साक्षात्त रहस्यं शिवसंभवं ॥१२॥ शिवरत्नमहाकोशं तद्देव्या हृदयंगमं ॥ स्कंदाया च षट्सा देवी प्रीत्या तेन प्रदर्शितं ॥१३॥ शंकरस्याज्ञयासूत गुरोर्तेशां भवो तमेजे गीषव्यायत स्मादा स्कंदः स्कंदित तारकः ॥१४॥ इति शुश्रुमवृत्तांतं तन्नोब्रूहि कृपाधिक ॥ सुगोप्यमपि तद्ब्रूहि यतो भक्ता वयं शिवे ॥१५॥ त्रिनेत्रसुचरित्राणां पात्रभूता मुनीश्वराः ॥ मोहश्वरेण सत्रेण शुद्धगात्रा वयं सदा ॥१६॥ सुत्राममान्येल्लोकेपि वांछा नोपात भीतितः ॥ गोत्रे कलत्रे पुत्रे वा मित्रे वा स्नेहवर्जिताः ॥ विरक्तास्तद्वदास्मभ्यं रहस्यं शांभवं मुदा ॥ त्वन्नो ज्ञान प्रदः साक्षात् गुरुः शिव समो मतः ॥१८॥ त्वं नो माता पिता स्माकं वदेव करुणाबलात् ॥ इत्थं स पैप्पलादो हि सूतः पृष्टो मुनीश्वरैः ॥१९॥ उवाच प्रांजलिर्वाक्यं तेषां भक्त्या सुतोषितः ॥ अनन्य शंभु भक्त्या च जानन्यात्रं तानपि ॥२०॥ सूत उवाच ॥ पात्रं कृपायाः परमं महेशितुः सत्रेण दानेस्तपसो पकृद्भिः ॥ पवित्र गात्रावभृथे नदीक्षया वेदान्तसारार्थ विचार निष्ठाः ॥ शृणुध्वमाद्यं प्रथमांशमेतत् यथा गुरुर्मे भगवान् प्रसादमाक् ॥

प्र० अं०

अ० १

१

महेश्वरस्याप्रतिमप्रभावो भावो भवोत्कृष्टहृदोज्झिताशः ॥२२॥ जैगीषव्यमुनिस्ततापतपसा रुद्रं जपंस्तुष्टधीः कष्टानप्य समीक्ष्य संवृतमना वर्षायुतं वायुभुक् ॥ शिष्टः श्रीशिपिविष्टपादकमलध्याने विशिष्टांतरो ॥ वंहिष्ठो हि गरिष्ठमद्भुततरं प्रापप्रसादं हरात् ॥२३॥ इति श्रीशिवरहस्ये प्रथमांशे सूतमुनिप्रश्ने प्रथमोध्यायः ॥१॥ ॥ सूत उवाच ॥ शतमखशिखिवेदशाखा शतमखनुतषण्मुखाप्तबंधुं ॥ नभसुशिखसुखदं महेभवक्त्रं खगगत्ति पंकजजातसंस्तुतं च ॥१॥ उत्फुल्लामलनीरनीरजमहासिंहासनाध्यासिता पारावारजगद्विबोधचतुरा वाणी मनोहारिणी ॥ भो शंभो शिव सांब शंकर महादेवेति तानामृतास्वाना स्वादनवल्लकीमुखरिता नंदोल्लसा पातु नः ॥२॥ पापागाधमहांबुधे जनिजराकल्लोलपारं परं मज्जज्जंतुकदंबकं करुणया पारं परं यो युतः ॥ शंभोः सत्कथया सुधासुरसया सन्नौकथा केवलं संतीर्णं तु करोति जंतुनिवहं सो कर्णधारो गुरुः ॥३॥ कालावच्छेदयुक्तान् विधिहरमुरभित् शक्रसूर्येंदुवायून् सृष्ट्वा तैः क्रीडतो शो जगदुदरदरीमध्यपद्मैकसंस्थः ॥ नीरूपो विश्वरूपः प्रमथगणवरैर्विश्वकर्त्र्या जनन्या हेरंबस्कंदयुक्तो गुरुरमरवरः पोविकः पातु नित्यं ॥४॥ पंचास्यवक्त्रकमले मकरंदमेतत्त्वं च त्वनाशनकरं श्रुतिपंचकं हि ॥ पुण्यं शैवरहस्यसारम-

धुनापेपीयतां मुक्तये॥ पंचास्य ध्यानमूल द्विजवर तिलकाः पंचपापैर्विहीनाः॥५॥ वेदेषु प्रथितं च पंचकतया भू-
तेषु पंच स्वपि॥ कोशैः पंचकतां तिमे कवसतेः शंभोः कृपाकारणं॥ श्रुत्वा जन्मजरादि दुःख निवहैः पंचत्व हीनो
भवेत्॥ स्वस्या स्यांतर वृत्ति पायस वरं त्यक्त्वा खु मूत्रं पिबेत्॥६॥ दुर्मा माया लसितेन पापमति भाग्य या-
त्य हो संसृतिं॥ त्यक्त्वा शंकर नाम बोधित कथा पीयूष पानो झितः॥ शंभो र्भक्ति विवर्जितो नर पशुः स-
त्वे न तुल्यः स्मृतः॥ काम क्रोध जरा विपत्ति मरणैः संसारिं वृजे दूषितः॥७॥ मुनय ऊचुः॥ सकथं तपसा देवं
प्रसाद्य परमेश्वरं॥ जैगीषव्यः सर्व गुरुस्तपो राशिः शिवार्चकः॥८॥ कं काममलभद्भूत तन्नो विस्तरतो वद॥
श्रोतुमिच्छति महती चरित्रे शांभवे हिनः॥९॥ वदा द्य करुणा मूर्तेः शूलिनोः मल सत्कथाः॥ सवा जश्रव सांबा-
क्या ज्ज हर्ष परमेश्वरं॥१०॥ ध्यात्वा स्वहृत्पद्मकोशे जगदागाध बोध दं॥ कथां कलुष चित्तानां तमः कालु
ष्य मुक्तये॥११॥ सूत उवाच॥ वायुर्दैधूयते यद्युदय मुडगणो बभ्रमीति द्रुतं खे॥ वन्हिर्जाज्वल्यते यं सच
सलिलनिधिर्मा धवीं दोधवीति॥ भूर्यं द्वावो भवे॥ [illegible] वीति स्थिर चर भूत येत द्य ता दृक्च सर्वं॥ स्वाम
त्ता शेष सत्ता स्थिति यमनपरं शंमु लीलो त्थ तुक्तं॥१२॥ श्रृणुध्वं मुनयः सर्वे सत्त्रिणः पूतमानसाः॥ जै-

जैगीषव्य तपश्चर्या कारणं तारणं नृणाम् ॥१३॥ स तपोऽतपद् त्युग्रं शांभवं व्रतमास्थितः ॥ हिमवच्छिखरे पूर्णं सं-
वत्सरातकं ॥ अग्निरित्यादिभिर्मंत्रैर्विमृज्यांगानि भस्मना ॥ त्रिपुंड्रं भाले सततं कंठवक्षोरुबाहुषु ॥१४॥
धृतरुद्राक्षकोटीर रुद्राक्षकवचावृतः ॥ पंचाक्षरपरो नित्यं रुद्रावर्तन तत्परः ॥१६॥ ग्रीष्मे पंचाग्निनिरतः
केवलं सलिलाशनः ॥ वर्षास्वाकाशनिलयो हेमंते जलमध्यगः ॥१७॥ फलपर्णाशनो नित्यं वर्षं वनपरायणः
॥कष्टधूमाशनो नित्यं वर्षं लंबदधः शिराः ॥१८॥ एवं तपस्यतस्तस्य जैगीषव्य महामुनेः ॥ वर्षायुतम-
गात्पूर्णं रुद्रविन्यस्तचेतसः ॥ वरेणाछंदयद् ब्रह्मा तं विष्णुः पाकशासनः ॥ तस्य ते चित्तजिज्ञासां कर्तुं देवाव्य-
वस्थिताः ॥२०॥ नानानालोकयद्विप्रो नैव किंचिदथोर्थयत् ॥ गंभीरसागराकारमलक्ष्यं शिववल्लभं ॥
२१॥ जितेंद्रियं जिताहारं ऊर्ध्वरेतसमव्ययं ॥ शिवलिंगार्चनव्यग्रं पंचाक्षरजपादरं ॥२२॥ रुद्रसूक्ता
र्थविज्ञान श्रवणं संयतेंद्रियं ॥ हंसारूढः पद्मसंस्थः शार्ङ्गी धृग्गरुडासनः ॥२३॥ ऐरावतसमारूढः
पाकशास्ताऽमरैर्वृतः ॥ तस्य चित्तं सुविज्ञातुमागतास्ते मुनिं तदा ॥२४॥ ब्रह्मा विष्णुस्तथा शक्रः सुरा
सुरमरुद्गणाः ॥ ध्यायंतं परमेशानं जैगीषव्यं तदा द्विजाः ॥२५॥ स्वं स्वं वाहनमारुह्य स्वस्वालंकारभूषि-

ताः॥ शैवेंद्रं तं सुरेंद्राद्यास्ते दृष्ट्वा विस्मयमागताः॥२६॥ तस्य चित्तपरीक्षार्थं ब्रह्मावाक्यमथाब्रवीत्॥ब्रह्मोवाच॥
वत्सोत्तिष्ठ महाभाग जे गो घव्य महाव्रत॥२७॥अदेयं तव नास्त्येव त्रिलोक्यां त्वत्तपस्यया॥ त्वत्समो न
मुनिर्ब्रह्मन् ऊर्ध्वरेता महातपाः॥२८॥ रुद्राक्षवर्त्तन शीलश्च रुद्रविन्यस्तमानसः॥ब्रह्मो पेंद्रेंद्रलोके
षु विहरस्वाजरामरः॥ भुंक्ष्व भोगान् यथाकामं देवभोग्याननुत्तमान्॥ शक्रस्याप्सरोभिस्त्वं नंद
ने विहराजरः॥२९॥३०॥ पिबस्वामृतमुत्कृष्टं देवैः पेयमनुत्तमं॥विष्णुलोके तथा भोगान् वैष्णवान्
भुंक्ष्व केवलः॥३१॥ नानाविधैर्महायज्ञैः प्राप्यं शक्रसदोखिलैः॥गवां दानैस्तथान्नादिप्रदानैश्च
भूसान्वितैः॥३२॥ देशे काले च पात्रे च गृहवस्त्रादिदानतः॥पानीयशालानिवहे धर्मकाले मुनी-
श्वराः॥३३॥ महाषोडशदानैश्च शुद्धद्रव्यार्जितेन च॥ मंडपादालकरणैर्विप्राणां स्थापनार्चनैः॥३४
उद्यानारामकरणैः छायावृक्षादिरोपणैः॥ कन्यादानैश्च विविधैर्व्रतकृच्छ्रादिभिर्द्विजाः॥३५॥प्राप्या
लोका महीं याहि धन्यैर्मानुष्यवर्त्तिभिः॥ तपस्तवेन भोगांस्त्वं भुंक्ष्व विप्र यथासुखं॥३६॥अयं
शक्रो मराधीशो वरं दातुं तवागतः॥ करींद्रो यस्य वहने चतुर्दंतः सुपांडुरः॥३७॥ यः सर्वयज्ञैर्विप्रेंद्रै

राहूतः सोमपीथिभिः॥ यः सर्वासुरसंहर्ता कुलिशं यस्य चायुधं॥३८॥ अहं सर्वजगत्स्रष्टा भारतीपतिरुत्तमः ॥मत्पुत्राः सृष्टिकर्तारः न कश्चिन्मत्समो द्विज॥३९॥ पुलस्त्यः पुलहोऽत्रिश्च कश्यपो मुनिरेव च॥ अंगिरा नारदो दक्षो वीतिहोत्रो महामुनिः॥४०॥ नव प्रजानां पतयो ये भ्यः सृष्टिर्विनिर्गता॥ चतुर्वक्त्रस्त्वहं साक्षात्वरान्दातुं त्वागतः॥४१॥ ततः प्राहांबुजाभाक्षस्तं मुनिं चातिगर्वितं॥४२॥ श्रीविष्णुरुवाच॥ अहमेवाखिलाराध्यः शंखचक्रगदाधरः॥ मम शार्ङ्गरवं श्रुत्वा दैत्येन्द्रा मूर्छिता भृशं॥४३॥ सिंहकोलाकृतिरहं भूत्वा देवानतो वयम् ॥हिरण्याक्षं च कशिपुं मुरं च मधुकैटभौ॥४४॥ रणे मया हता दैत्या रावणाद्या महाबलाः॥ लक्ष्मीपतिरहं साक्षात् क्षीराब्धिर्निलयं मम॥४५॥ शेषोऽनन्तफणाभोगि मम तल्पं महामुने॥ प्रभाभासितदिक्कुंजको सुभं मम वक्षगं॥४६॥ चक्रं शतदृशारं मे दैत्यासृक्यसृणं करे॥ यत्पक्षघातपवनेरुल्लोलाः क्षुभ्यन्त सागराः॥ का द्रवेयकणारत्नराजि धारोहि वाससनं॥ मन्नाभिकन्दसंभूतः साक्षाल्लोकपितामहः॥४८॥ मदीययशसा व्याप्तं जगदेतच्चराचरं॥ मत्प्रसादेन सर्वेषां सिध्यंत्यखिलसिद्धयः॥४९॥ तादृशं स्वदृशा पश्य त्वत्पुरः स्थितमाशु मां॥ त्यक्त्वा मान्पूरया म्याशु तत्प्रेक्षो घ्रं वरमस्व मे॥५०॥ त्वदीयतपसा विद्वन् प्रसादसुमुखोऽस्म्यहं॥

तदास विष्णुवचसा जैगीषव्यो महामुनिः ॥ ५१ ॥ दृष्ट्वा प्राह्य मरश्रेष्ठान्निष्कामात्तर सुंदरः ॥ कामारि ध्यान नि-
र्धूत निष्काम हृदयो मुनिः ॥ ५२ ॥ जैगीषव्य उवाच ॥ यत्प्रोक्तं तत्तथा विष्णो त्वया पद्मासनेन च ॥ श-
क्रस्यास्य श्रुतं सर्वमैश्वर्यं लोकविस्मयं ॥ ५३ ॥ न विस्मापयितुं शक्यं निष्कामस्य ममांतरं ॥ यथोन्म-
लयितुं शक्यः किं मेरु र्वायुनाऽमुना ॥ ५४ ॥ विष्णो त्वद्वचसा चेतो न विचालयते मम ॥ कैवर्तकन्याका
नोन द्विज दैत्य नृपार्भकाः ॥ ५५ ॥ तथैव तव माऽशक्या ह्यात्म्य वेत्तारो न वयं हरे ॥ हर पादांबुज ध्यान निर्धूत
रजसा वयं ॥ ५६ ॥ शैवेंद्र सुनते ध्यामर्थ विद्यते ते गदाधर ॥ प्राप्त कामा वयं विष्णो नित्यानित्य विवेकिनः
॥ ५७ ॥ यः कामाननुसंदधाति मनसा प्राप्नोति लोकानमून्" ब्रह्मोपेंद्र शतक्रतु प्रभृतिनां वासस्ततो भ्रश्यति ॥
प्राग्जन्मानुभवेन योनिषु चिरं भ्रांतस्ततो विद्यया" विश्वेशस्य कृपावशाच्छतत नुप्रांते विमुक्तो भवेत् ॥ ५८
॥ किं वा ब्रह्मेन्द्र विष्णु प्रभृतिसुर पदैः पुण्यलेशैक लभ्यैः" किं रंभादिक योनि भोग निचयैः स्रक्चंदनाद्यु
त्सवैः ॥ पातांत्ताव धि सुंदरैः किमथमे किं कामना विप्लुतेः" युष्मद्वचनया न चाल्यति मनो निष्कामजाः श्री-
त्रिमाः ॥ ५९ ॥ संसारा पारसार प्रचुरित मनसो नित्यनित्याश्च भोगाः" काम्यंते कामिभिर्यैः सततबहुरसाः

१ पंक्ति २ श्रीशं श्रीशंकरस्यागतिसगतिगति व्योमकेशस्य शंभोः॥ तस्यायं दासदासस्त्रिपुरहर श्रीशिवस्यास्य कर्तुः॥ पातु हेतुः प्रकर्तुः शृणुत सुमनसो नित्यमन्येनजाने॥
६॥ पशुपति वरदानात् ~~...~~ तल से प्राप्त भूते॥ ~~...~~

कातराः पामरास्ते॥ हरपद निरतानां विश्वभूतात्मनां नः करण विषय भोगा नैव लुंपंति विष्णो॥६०॥ ब्रह्माशक्रो भवांश्च प्रकृति परवशायस्य सर्वेश्वरस्य पशुपति वरदानात्किं मम प्राप्तिहेतुः॥ पशुपति चरणाब्ज ध्यान संमानलक्ष संमेन हि खलु भव तृष्णा पारदूरं हरेषः॥६१॥ त्र्यक्षांघ्रि प्रवण प्रसन्न मनसो लुप्तस्य किं मे सुरेंद्र श्रीरंत भवत्परेषु नितरां वांछा न मे जायते॥ किं तच्चाक्षत वीक्षणात् स्थिरचरं विश्वं तु विश्वेश्वरात् जातं तत्र मुहुर्मुहुः प्रविलयं यात्येव यातं भवेत्॥६२॥ रज्जौ कल्पित दंद शूक सदृशं देवान किं चिज्जगव्जातं चापि जनिष्यमाण मपि वा भूतं हि रज्जौ भ्रमः॥ तद्वत्सर्प दृशो पमान मिति या धीर्वै परं मुक्तये साध्वी श्चापि निरंतरं भगवतः शंभोः कृपा याः फलं॥६३॥ न क्वापि स्पृहयंति शंकर कथा पीयूष पानात्परं लिंगा लिंग न पूतभस्म त्रिपुंड्र टिला रुद्राक्ष माला धराः॥ पुण्यानां तत्र रुद्र मध्य विलसन्नाम्नां पदार्थादराः भावा भावुक दिव्य जन्म तपसा भूमंडले पावनाः॥६४॥ मारापार शराग्र कुंठन महा सारैक धीरापलाः सारात्सार विचार धीर धीर हृदया धौरेय धुर्याः सदा॥ पारावार विकार संसृति महा दुःखांबुधे स्तारका विश्वाधीश्वर पूजकास्तु नियतं पापौघ संहारकाः॥६५॥ सूत उवाच॥ जे शैवब्ध सुरवाब्ज निर्मल महोदारो त्कटंते मधुपी-

शिवरह०

त्वा चामरनामका भ घुतृषा स्वानंदितस्वांतराः॥ ऊचुः प्रांजल्य स्तदा द्विजवरं ब्रह्मा महेंद्रो हरिः ज्ञात्वा तस्य विनिश्चयं शिवसमासक्तं मनश्चार्पिते॥ ६६॥ देवा ऊचुः॥ प्राप्ये शान पदांबुजं च सुमना मोक्तस न्मानसः॥ त्वं वै शांभवपुंगवस्त्वह्यदं ज्ञातुं प्रवृत्ता सुराः॥ निष्कामोसि निरंकुशोऽसि भवगवन् प्रो- क्तं हित क्षम्यतां स्वात्मा रामतया त्वयैव सकला भोग्याः संदेवो झिता॥ ६७॥ स्वं स्वं वाहनमाधिरु- ह्य च मुनिं चालिंग्य लिंगार्चकं धन्या स्मेति वदंति कंदरगिरा ध्यानं दधारावृताः॥ शैवोक्ताभृत वाक्यनंदितमनाः स्वांतः प्रशांता मुदा स्वं स्वं स्थानमवापुर्द्विजवरा ब्रह्मेंद्रविष्ण्वादयः॥ इति श्री शिवरहस्ये प्रथमांशे ह्येश्वरांशे जैगीषव्यसुरसंवादो नाम द्वितीयोध्यायः॥ २॥ श्रीकाशीविश्वे श्वरार्पणमस्तु॥ जैगीषव्य उवाच॥ शृणुध्वं शक्रविष्ण्वाद्यायन्मानसमहेतुकं॥ नित्यं सार्वज्ञतातस्य देव देवस्य शूलिनः॥ १॥ यो वेदांतैकसंवेद्यो यं ध्यायंति मुमुक्षवः॥ यस्य निश्वासपवनावेदाश्चत्वार एव हि॥ २॥ यो ब्रह्मविष्णुरुद्राणां जनकः परमेश्वरः॥ सूर्यस्य जनिता वन्हेः सौर्य चंद्रच शाक्रानिलात्मनां॥ तत्रस्य कारणं शंभोः स सर्वस्यापि कारणं॥ यः समाराध्यते विप्रैर्मखे मंत्र क्रियादिभिः॥ ४॥ यस्त्वग्नौ सोमजं सर्वज-

प्र०अं० अ० २

योगिनो, नैव

गत्वा ति सनातनः ॥ असंगः सर्व भूतेषु निर्विकारो विकारिषु ॥ ५ ॥ यं सूक्ष्मबुध्या पश्यंति स्वहृदा वीतरागिणः ॥ योध्या
नेनजपैर्यज्ञैस्तपसा नाशकेनच ॥ ६ ॥ नवेत्ति नेत्राण्यक्षाणि, मनोवाचामगोचरः ॥ यस्माद्भूतानि जायंते येन
जीवंति तान्यपि ॥ ७ ॥ यत्रलीना निकल्पांते स एकः परमेश्वरः ॥ यस्त्वपाणिरनंघ्रिश्चाप्यचक्षुश्चाप्यपाश्रवाः ॥ ८ ॥
सोऽस्तिकेसहिदूरस्थः सबाह्याभ्यंतरेपिच ॥ ससत्यज्ञानमानंदो गुणैर्हीनश्च निर्गुणः ॥ ९ ॥ सस्वतंत्रश्च
पूर्णश्च तेन पूर्णमिदं जगत् ॥ सनित्यश्चेतनानां च पतीनां पतिमीश्वरः ॥ १० ॥ यस्त्वेकः सृजतीशानश्चराचर
मिदं जगत् ॥ यथोर्णनाभिस्तंतून्वै सृजते ग्रसतेपिच ॥ ११ ॥ यस्य रूपापरिज्ञानात् देहमात्मेति मन्यते ॥
40
यस्य रूपापरिज्ञानान्मन आत्मेति मन्यते ॥ यस्य रूपापरिज्ञानात्खानि चात्मेति मन्यते ॥ यस्य रूपापरिज्ञाना
द्भूतान्यात्मेति मन्यते ॥ १२ ॥ यस्य रूपापरिज्ञानात्सर्वमात्मेति मन्यते ॥ यस्याकाशः शरीरं हि आकाशो नैव वे-
त्तितं ॥ यस्य भूमिः स्वरूपं हि तं भूमिर्नैव वेत्ति हि ॥ योमनश्चक्षुरादीनां नियन्ता परमेश्वरः ॥ १४ ॥ यस्य भासा जग-
द्भाति सशशांकानलवायवः ॥ भीत्या भांति चवल्यैव चेतनानां सचेतनः ॥ १५ ॥ यस्य मायाविलसितं जगत्स्थावरजंगमम् ॥
समायी परमेशानस्तस्यवास्यमिदं जगत् ॥ १६ ॥ योऽशरीरो हि लिंगश्च यामिभिः परिदृश्यंते ॥ यस्य विज्ञानमात्रेण

६ सर्वं विज्ञातमेव हि ॥१७॥ ज्ञानमात्मा महद्ब्रह्म ज्ञाते शांतिरनुत्तमा ॥ स एकः परमात्मा हि नेह नानास्ति किंचन ॥ अ· ३
स एको ज्ञानवानीश ईशानीभिः स ईशते ॥ एक एव महान् रुद्रः पुरुषो विश्वतोमुखः ॥१९॥ तमेकं ज्ञानमात्मानं
त्यक्त्वान्यत्त्विदं जगत् ॥ यज्ज्ञानात् हृदयग्रंथिभेदनं जायते नृणाम् ॥२०॥ यस्यैकत्वं हि विज्ञाय शोकं तरति मा
नवः ॥ स एव ज्योतिषां ज्योतिः स एव तपसां तपः ॥२१॥ स एकः सर्वभूतेषु बहुधा भाति मायया ॥ योऽज्ञाग्रस्व
मतुर्याभिः गूढोऽत्मा न प्रकाशते ॥२२॥ योऽदृश्यः सूक्ष्मया बुध्या तत्प्रसादेन केवलं ॥ तपसा विदितव्यः स नान्यथा
कर्मकोटिभिः ॥२३॥ यो वेदादौ स्वरः प्रोक्तो वेदांतेषु प्रतिष्ठितः ॥ य ईशानोऽधिविद्यानां पारदृक् च सनातनः ॥
२४॥ यो भूतसंघे सुप्तेऽपि जागर्ती शो महेश्वरः ॥ यस्मात्प्राणो मनो जज्ञे स हि नात्येति किंचन ॥२५॥ यो ज्योतिर्ज्योति
षां देवो विश्वात्मा विश्वतोमुखः ॥ यो भूमिमत्यतिष्ठच्च यस्माद्ब्रह्माणि जज्ञिरे ॥२६॥ यतो ब्रह्मेशविष्णिवं
द्राः सह देवैश्च जज्ञिरे ॥ यो ब्रह्म ब्रह्मविच्चापि अत्र ब्रह्म समश्नुते ॥२७॥ एष ब्रह्मैष विष्णुश्च एष दे
वो विराजते ॥ एष भूतपतिरीशो एष सेतुर्विधारणः ॥२८॥ एकमेव महादेवं इंद्र मित्रादिभिः सुरैः ॥
नाम [illegible] रूपगुणश्चैव मायया मन्यते जनः ॥२९॥ इदं जगत्पुरा सृष्ट्वा तस्मिन्प्राविश =

देश्वरः॥ व्याकुर्वन्नामरूपे तु व्यवहारीव भासते ॥३०॥ पुरुषो यः परः सूक्ष्मो भोक्ता भोज्यं च यः सदा ॥ योऽखिलो विश्वनेता च यस्मान्नान्यत्परायणं ॥३१॥ अशरीरोऽव्ययात्मा यः शीर्णोऽप्यविनाशकः ॥ यो भापयाशरीरस्य तद्धर्मैर्नैव लिप्यते ॥३२॥ भोगीव भासते देवस्त्वन्नपानादि भोगभाक् ॥ यश्च सर्वक्रियातीतः सर्वेषामपि भासकः ॥३३॥ योऽव्यक्तो व्यक्ततामेत्य जगत्पुष्णाति लीलया ॥ योऽविद्यया संसरति विद्यया च प्रमुच्यते ॥३४॥ योऽन्नाद्याकारोऽखिलाधारः स्वे महिम्नि प्रतिष्ठितः ॥ यं शृण्वन्तोऽपि वेदान्ते मुह्यन्ति यतयः सुराः ॥३५॥ यस्त्वेनं शृणुते देव तस्यैवात्मा प्रकाशते ॥ य आत्मा सर्वभूतस्थो जडानां विदुषामपि ॥३६॥ यो जाग्रज्जन्ममरणे रशीर्यो न हि शीर्यते ॥ यो जागतो दुःखसंघैः सुखैर्वा स्पृश्यते न हि ॥३७॥ यस्मिन् ज्ञातेऽखिलं ज्ञातं न किंचिदवशिष्यते ॥ यमविज्ञाय विश्वेशं दुःखान्तं नाधिगच्छति ॥३८॥ योऽसंगः पुरुषो नित्यः स्थाणुवन्निश्चलोऽगुणः ॥ यो न जीवः शिवश्चापि योऽन्योपाधिविवर्जितः ॥३९॥ पंचकोशातिगो ह्यात्मा सदानंदघनः सुखं ॥ एको द्वितीयरहितो यश्च नैव सर्वो बहिर्विभुः ॥४०॥ यो प्रशान्ति केऽस्मिन् हि दूरस्थ स्तेनावास्यमिदं सुराः ॥ स भूमा सोऽयमानंद आत्मेति जगत्सुराः ॥४१॥ तज्जं तल्लं च तदनं जगदेतत्प्रकाशते ॥

शिवरह० ७

यस्तमःपारगो नित्यं मनोवाचामगोचरः ॥४२॥ यस्यैव शक्तिर्विविधा स्वभा(वा)त्ज्ञानदा सुराः ॥ स एष परमानंदः
सदसत्पपवर्जितः ॥४३॥ लिंगहीनः सदाऽसंगो यो वेदांतैकगोचरः ॥ दृश्यते त्वग्र्यया बुध्या सूक्ष्मया सूक्ष्म
दर्शिभिः ॥४४॥ मुक्तये देहसंघानां सुलभो व्यक्ततां गतः ॥ त्रिनेत्रो नीलकंठश्च उमादेहार्धविग्रहः ॥४
५॥ क्रीडते प्रमथाधीशो हेरंबस्कंदपुत्रवान् ॥ सर्ववासोऽपि भगवान् कैलासाचलमास्थितः ॥४६॥
ब्रह्मणः सृष्टिसामर्थ्यमिंद्रस्याप्यरिनिग्रहः ॥ देवराज्यं भोगभोग्यं सर्वमेशादनुग्रहात् ॥४८॥ यस्य लिं
गार्चने नैव त्रैलोक्यश्रीरवाप्यते ॥ यस्य प्रसा(दा)द्विष्णुत्वं त्वया प्राप्तं सुदर्शनं ॥४७॥ न तत्र सूर्यो देवेशो भाति
चन्द्रो न चानलः ॥ भीत्या भांति च सर्वेपि सोऽन्तरा पुरुषो हरः ॥४९॥ हिरण्यबाहुरीशानो हिरण्यपतिरीश्वरः ॥
कर्मदेवाः सर्व एव ब्रह्मविष्णुमहेश्वराः ॥५०॥ यस्याज्ञावर्तिनः सर्वे सर्वेषां कारणं शिवः ॥ ब्रह्मणश्च शिरश्छिन्नं
देवदेवेन लीलया ॥५१॥ इंद्रस्यास्य भुजस्तंभो येनाकारि दयालुना ॥ यस्य भक्तस्य शापेन दशजन्मानि ते
हे ॥५२॥ सोकरं नारसिंहं तत्स्वरूपं संशिक्षितं हरात् ॥ सर्वं जानामि ते विष्णो ब्रह्मन् शक्र गतव्यथ ॥ यूयं हि
पशवो ज्ञानजृंभिताः पशुपश्शिवः ॥ गच्छ त्वं च यथाकामं मद्दृक्षे नास्ति धार्ष्ट्यता ॥५४॥ भवंतो देवताः सर्वेऽप्यहं शा-

प्र०प्रं० अ०३ ७

७

वं पदाश्रयः॥ इत्युक्त्वा ध्यानमातिष्ठत् जैगीषव्यो महामुनिः॥५५॥ ध्यानानंदेन महता इदमाह तदा द्विजाः॥
॥जैगीषव्य उवाच॥ यच्चक्षन्नद्भुतजगज्जगच्च यद्वर्तते नास्ति परं पदं एवं ये विदुरीश्वरेश्वरं ध्यायंते यांति शंभोः पदं
॥ते लोकान् हि नयांति, यापित महादुःखाभितप्तो पथ्यं सौख्यं चापि समाप्नुवंति भगवन् त्वद्भक्ति सादराः॥५६॥
बाहुभ्यां तव धन्वने च भगवन् कुर्वे नमस्ते मां भीता स्त्र्यनुषः कराग्र विशिखैर्वै हेत्या शरव्यापि च॥ पाहीश,
प्रविमुच्य ज्यामथ धनुष्कोट्योः शरान् संत्यज हेतिं पातय मां विलोकय दयेशा, दूरे निषंगं त्यज॥५७॥ शैवेंद्राः शि-
१२
वसंमताः सुरवराऽपार व्यथाभीतितो न बिभ्यंति न चाप्नुवंति च हरे युष्मद्वरान् किं फलान्॥ किं त्वीशानपदा
रविन्द भजनान्नान्यन्मनश्चिंतितं। क्षुद्रेषु प्रभविष्णवो नहि वयं यातस्व धामं सुराः॥५८॥ हारा एव भवंति
भाग्यनिवहैः श्रीचन्द्रचूडार्चकाः। तेषां त्वत्पदवासनापि सुतरां वाणीश शक्रालयं॥ किं जायेत, गिरींद्र शेखर
गतो मत्तद्विपालिं भिनत्। सिंहः किं तृणमत्ति तद्वद्दिह मे त्वत्तो वराणां स्पृहा॥५९॥ इति श्री शिवरहस्ये प्र
थम माहेश्वरांशे जैगीषव्यासुरसंवादो नाम तृतीयोऽध्यायः॥३॥ श्रीकाशीविश्वेश्वरार्पणमस्तु॥ देवा ऊचुः॥
तव भावमहो ज्ञातुमागता वयमद्य वै॥ स एव सर्वकामानां पूरकोऽस्ति न संशयः॥ किं तवासुकरं विद्वन् त्रि-

८

भुक्तो केषु विद्यते ॥१॥ त्वन्मनो ध्यायति सदा यतः शिव पदांबुजं ॥ येषां मनसि विश्वेश पदांबुजयुगं भवेत् ॥
॥२॥ तेषां किं भुवने श्वर्यैः विनश्वरतरैर्मुने ॥ मतो महेशकृपया दृढ भक्तिर्भवेच्छिवे ॥३॥ यया भक्त्या द्विज
वराः सुरासुरनराअपि ॥ मुक्ताश्च मोचयंत्यन्यान् शैवाः कल्याणको त्तमाः ॥४॥ भक्तिरेव विरूपाक्षे सर्वेषां
मुक्तिदायिनी ॥ भक्त्या संपूजिते लिंगेऽलिंगेपि महेश्वरे ॥५॥ बिल्वपत्रैः सत्फलैर्वा भस्मना वा महद्धि
यं ॥ प्राप्नोति मुक्तिसाम्राज्यं पुनर्भवदायकं ॥६॥ भस्माभिषिक्ता ये भावास्त्रिपुंड्रांकितमस्तकाः ॥ रुद्रा
क्षामलकोटीरधारिणो मालिकाधराः ॥७॥ पंचाक्षरावृत्तिपराः रुद्राध्यायजपादराः ॥ शिवलिंगार्चकाः
शैवाः शिवक्षेत्र निवासिनः ॥८॥ नैवेद्य भोजनाः शंभोः पत्रपुष्पफलार्पकाः ॥ अनन्य स्वांतरा विप्रा मनोवाक्काय
कर्मभिः ॥९॥ शिव ध्यानेन संतृप्ताः सदा शिवकथादराः ॥ गणयंति महाशैवा नान्यान्नन्र कर्म सुरान्मुने ॥१०
॥ तेवेद्दृङ्ज्ञान संविप्र नकस्यापि मुनिष्वपि ॥ त्वद्भावो भव संसक्तो भवनाशाय केवलं ॥११॥ यथा रत्न
निधिं प्राप्य सकिं गृह्णाति लोष्टकम् ॥ यथा मत्तेभकुंभस्थः स किं खरमपेक्षते ॥१२॥ यथैव कल्प
कवनं संप्राप्य किमपेक्षते ॥ यथा मणिमयं हारं प्राप्य किं वा वराटकं ॥१३॥ तथा स्वदीये भोगेषु मुक्तो

रज्यतिकामतः ॥ त्वं कामारिपद ध्यानान्निष्कामोऽसि महामुने ॥ १४ ॥ त्रिनेत्रपादकमलमित्थं त्वन्मानसं मुने ॥
त्वमेव शैवधुर्येषु मूर्धन्यो धन्य एव हि ॥ १५ ॥ तव संदर्शनापारसंहृताखिलपातकाः ॥ जगज्जन्मासिसृष्टा
सुविश्वेशेन नियोजिताः ॥ १६ ॥ नल भामेव विश्रांतिं श्रांताः संसारवर्तिनः ॥ सद्भावे षयिका देवा वयं सर्वे
महामुने ॥ १७ ॥ तव वाक्पंकजोद्भूतमधुसाराश्रितांतराः ॥ वयं विश्रांतिमापन्नाः प्रपन्नाः परमां गतिं ॥ १८ ॥ शै-
वेंद्रांगमहासंगनिर्मुक्ताखिलहृत्तमाः ॥ उत्तमाविध्धिविषंवद्रा देवेषु तव दर्शनात् ॥ १९ ॥ कालकूटमहा
ज्वालानिर्दग्धान्निमहामते ॥ त्र्यंशी तयन्महादेवः पीत्वा हालाहलं विषं ॥ २० ॥ देवानरक्षद्भगवान्हत्वा
त्रिपुरमुल्बणं ॥ कृत्वामां बाणमसुगं धृत्वा मेरुं शरासनं ॥ २१ ॥ मौर्वीं चकाराहिपतिं सारथिं विधिमा
रथनेके महेश्वरः ॥
तनोत् ॥ वेदान् हयान् स्तथा चक्रे चक्रे सूर्यं च चन्द्रकं ॥ २२ ॥ धरामंडलमेतद्धि ससरित्सवनाब्धि
कं सुरासुरान् भटांश्चक्रे कर्षणे वायुमंडलं ॥ २३ ॥ किं स विश्वाधिको देवो विश्वभूतेषु गण्यते ॥ अस्मासु पशुभू-
ते सु देवः पशुपतिः शिवः ॥ २४ ॥ पशून स्मान्निबध्नाति मायापाशेन शंकरः ॥ स एव कृपया जंतून्मोचयत्येव
मृत्युंजयो हि
सर्वदा ॥ २५ ॥ यस्य लिंगं सदाकालं पूजयंति मरुद्गणाः ॥ मृत्युंजयो महादेवः सर्वे वयमतं द्रितं ॥ २६ ॥ ज-

१सा

९३

न्म मृत्युजरादुःखै रभिभूतामहा मुने॥ पुरा मन्नेत्र पद्मेन संपूज्या मं सुदर्शनम्॥२७॥ दैत्येंद्र द्रावकं सा-
क्षात् विश्वेशस्य कृपा बलात्॥ मृकंडु तनयं काल मृत्योः सोऽमोचयच्छिवः॥२८॥ श्वेतं च तं नृपसुत
मरक्षत्काल पाशतः॥ यस्य लिंगस्य यन्मौलिं मूलं ब्रह्मा हमप्यतः॥२९॥ अ छूत्वा परमां शांति माप्त
वंतौ पुरा मुने॥ उपमन्युं मुनिसुतं गाण पत्येन योजयत्॥३०॥ शिलाद तनये साक्षात्स्व सारूप्यं ददौ
कोऽपन भक्ति मत्परं॥ निजभक्त्या...॥
शिवः॥ भृंगीशं च मुनिश्रेष्ठं चंडीशं चाप्य कल्पयत्॥ दैत्ये द्रपुत्रं बाणं च सहस्र भुज मातनोत्॥३२॥
वीरभद्रेण निंदंतं विधिं शिक्षयदीश्वरः॥ ममावतार रूपाणि मत्स्य कूर्म किटी हरिः॥३३॥ नारसिंहादि
रूपाणि हतान्युद्वृजन्मनि मे॥ शारभं रूप मास्थाय पुरा घोरतरं शिवः॥३४॥ शिव भक्तास्तथान्येपि सु
रासुर मुनीश्वराः॥ प्रसादाभि मुखेनैव प्रसादेन नियोजिताः॥३५॥ स्मरांधक गजाद्याश्च शिक्षि
ताश्च पिनाकिना॥ इंद्रस्यास्य प्रसादेन सवज्रस्तंभितो भुजः॥३६॥ नतेन सदृशो देवो यो वेदांते क गो
चरः॥ अनंत महिमा धार स्त्वपरिच्छिन्न विग्रहः॥३७॥ योगी यत्ते सदीशानो वेदे वेदान्त मौलिषु॥ यं य-
जंति महा सत्रे योध्येयो योगिभिः सदा॥३८॥ यं ज्ञाने स्तपसा भक्त्या पूजायां न शनैर्न च॥ अयं योदेवसं-

॥३१॥

प्र० अ०
अ० ४
६

प्यांश्च स्वस्वकामार्थसिद्धये ॥ ३९ ॥ विष्णो विश्वपतिः साक्षात् विश्वेशो विश्वभावनः ॥ न तस्य कार्यं करणं न
क्रियावा महेशितुः ॥ ४० ॥ परास्य शक्तिर्विविधैव सर्वकारणभासते ॥ तन्मायामोहिताः एव वयं सर्वे सुरासुराः
॥ ४१ ॥ जन्ममृत्युजरादुःखैरभिभूतास्य सर्वशः ॥ तस्यैवाज्ञावशादेतज्जगच्चक्रं प्रवर्तते ॥ ४२ ॥ वह्निर्वह-
ति कव्यानि हव्यानि च सुरेष्वपि ॥ उदेति सविता नित्यं किमस्तं याति शासनात् ॥ ४३ ॥ सोमोऽमृतमयः साक्षा
त् उदेत्यौषधिनायकः ॥ नक्षत्राणि भ्रमंत्येव ग्रहाधारा भ्रमंति हि ॥ ४४ ॥ प्रवाति पवनो मंदं मेघा वर्षंति शास
नात् ॥ भूमिर्वहति विश्वं वै लोकाः सर्वे चतुर्दशाः ॥ ४५ ॥ शेषोपि धत्ते शिरसि भुवं पृथ्व्यपराश्रयः ॥ पर्वताः सरि

१८

तो वाप्यः समुद्रास्तस्य शासनात् ॥ ४६ ॥ नोद्वेलतां प्रयांत्येव स्मर शासन शासनात् ॥ ~~यमोपि पापिनां शास्ता यम शा-~~

वा

पालयामिशिरेशाच्च जगत्सासुरमानुषं ॥ ४७ ॥ विधिः सृजति भूतानि रुद्रोंऽते संहरिष्यति ॥ इंद्रः पालयते देवा
न् सोऽसुरान्संहरिष्यति ॥ ४८ ॥ यमोपि पापिनां शास्ता यम शासन शासनात् ॥ कुबेरो धनपो नित्यं वरुणो याद
सां पतिः ॥ ४९ ॥ ईशानो रुद्रसंघानां यक्षाणां निर्ऋतिस्तथा ॥ ॥ विष्णुरुवाच ॥ सर्वं सासुरमानुषं जगदिदं
तस्य शासनाच्छासनादास्तेऽत्यंतभयात्सुरासुरनराभीताः स्तुवंते ऋचा ॥ ५० ॥ साम्ना रुद्रशतैर्महोपनिषदां सा

^पंक्ति ७ – सर्वे स्वीय विमानैर्गणैः श्रेणीभिरणीदृशा ॥ मन्योन्यं पुनरीशपादमनसः संवर्णितं निश्चयं ॥
वाहन ^

राये वाक्ये: शिवंकरस्ता दृक्च वारि ष्ठ एव हि मुने इवाप्धि देवः शिवः ॥५१॥ सूत उवाच ॥ ॥ इत्युक्का प्रययुर्मु-
दा विधि हरीशाक्रस्तथान्ये सुराः नत्वा तं मुनिपुंगवं सुरगणा याताः स्वर्गे हं तदा ॥५२॥ ॥ इति श्री शिव
१० रहस्ये प्रथम माहेश्वरांशे विष्णुवाक्यं नाम चतुर्थोध्यायः ॥४॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्री
शिवाय गुरवे नमः ॥ सूत उवाच ॥ ॥ एवं तपस्यतस्तस्य कालो भूयान वर्तत ॥ वल्मीकावृत गात्रस्य तृणवल्ली
युतस्य च ॥१॥ तस्यैव तपसा लोकाः संतप्ताश्च सुरासुराः ॥ विस्मयं तो मुनिं दृष्ट्वा मुनयः संशितव्रताः ॥२॥ नार-
दो वीणया लोकान्नाम्ना गायन्महेशितुः ॥ आवयन् सततं लोकान् ~~ध्यायन् रुद्र मनन्यधीः ॥ रुद्र ध्यानार्थ~~
~~विज्ञान प्रवीण मनसं तदा ॥५॥ दृष्ट्वा स विस्मयोपेतो~~ धूतपापा न थाकरोत्व ॥३॥ हिमवच्छिखरं दृष्ट्वा जै-
गीषव्यो व्यदृश्यत ॥ वल्मीकस्यांतर दृशा पश्यन्वै नारदो मुनिः ॥४॥ तपसा तापयल्लोकान् ध्यायन् रुद्र
मनन्यधीः ॥ रुद्रध्यानार्थ विज्ञान प्रवीण मनसं तदा ॥५॥ दृष्ट्वा स विस्मयोपेतो नारदस्तम भाषत ॥ नार
द उवाच ॥ जैगीषव्य महाभाग तपसा संशितव्रत ॥६॥ त्वत्तपस्या महातीव्रा तेन लोकाश्च तापिताः ॥ किम १०
र्थ प्राप्यमस्तीह कुर्वाका मस्य सत्तम ॥७॥ त्वादृशानो मुनिश्रेष्ठ दृष्टा वापि श्रुता मया ॥ शाको भारत्र हाचर्यं तवे-

वनिरतंमनः ॥ ८ ॥ उर्ध्वरेतास्त्वमेवासि मुनि संघेषु सुव्रत ॥ तवाद्य दर्शनाद्धि प्रधन्यो स्मि नितरां मुने ॥ ९ ॥
तवेन्दू ब्रह्म लोकेषु वैष्णवे प्रथितं यशः ॥ लोक पाला मराः सर्वे मुनयोऽतीव सुव्रताः ॥ १० ॥ दृष्ट्वा निष्का-
म मत्युग्रां तव दृक्तपसः क्रियां ॥ रुद्रावर्त्तन शीलस्य उग्रविन्यस्त चेतसः ॥ ११ ॥ सनारदस्य वचसा जै-
गीषव्यो महा मुनिः ॥ स्वागतेनाभिनंद्यैनं निषीदेत्यब्रवीन्मुनिं ॥ १२ ॥ उपविष्टे नारदे तु जैगीषव्यो मित
प्रभः ॥ उवाच तं देव मुनिं वीणा सक्त करं सदा ॥ १३ ॥ जैगीषव्य उवाच ॥ लोकांस्त्वया संचरता किं दृष्टं वि
त्र मद्भुतं ॥ तन्मे वद महा भाग कुशलः सर्व संसदि ॥ १४ ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥

४९

त्वया नाविदितं किंचित् त्रिषु लोकेषु विद्यते ॥ सजैगीषव्य वचसा प्राह तं नारदो मुनिः ॥ १५ ॥ नारद उवाच ॥
विष्णोर्लोके ब्रह्मणश्च शक्र संसदि चाप्यहं ॥ गच्छन्पश्यामि पुण्यानां भोक्तारो मुनयो नृपाः ॥ १६ ॥ पुण्यांते
तपमानांश्च नाना योनिषु सत्तमाः भ्रमंतः कर्मणा स्वेन तेजोमात्र शरीरिणः ॥ १७ ॥ तिरस्कृतास्त्वया देवा ब्र-
ह्म विष्णु हरीश्वराः ॥ येषां प्रसादः सर्वेषां स्वर्गानंतश्रिये मुने ॥ १८ ॥ तेपि देवास्त्वया धूताः निष्कामे
नेदमद्भुतं ॥ कामांगनाशपादाब्ज ध्यान निष्कामितं मनः ॥ १९ ॥ तवेदं मान संदृष्ट्वा देवाश्चाश्चर्य मागताः ॥

ब्रह्मविष्णुस्तथा शक्रः सर्वे च मुनयोऽचयं ॥२०॥ एष गच्छामि कैलासं नाना गण निषेवितं ॥ विज्ञाप्तुं ते तपश्चर्यां देवदेवाय शंभवे ॥२१॥ इत्युक्तो त्थित एवासौ नारदो दिव्य दर्शनः ॥ जगाम लोकान विचलन्कैलासं च महामुनिः ॥२२॥ नाना रुद्र गणोपेतं सुर किंनर शोभितं ॥ नंदि भृंगि महाकाल गण नायक कोटिभिः ॥२३॥ रुद्रैश्च रुद्र कन्याभिरप्सरोभिः समावृतं ॥ हेरंब स्कंद सदने(नन्दीशां) र्बाण चंडीश्वरादिभिः ॥२४॥ समावृतं तरुवरैर्नाना पुष्प फलोपगैः ॥ उत्फुल्ल पंकजोत्फुल्ल नीलोत्पल सरोवरैः ॥२५॥ कैलास शिखराकार सौध पंक्तीश्वरालयैः ॥ कनत्कनकरत्नौघ मौलि कुंभ पताककैः ॥२६॥ दोधूय माने नितरां रजद्रुव गणैस्तदा ॥ शुकबर्हिण नादैश्च कोकिलालाप सुंदरैः ॥२७॥ मुरजानक शंखादि मड्डु मर्दल वादनैः ॥ दुंदुभ्याघाततराज्यावा विनादित गुहामुखैः ॥२८॥ वीणा क्वणन्मधुस्वैश्च गंधर्व कृत गायनैः ॥ मुरली सरली लीला विलासाप्सरसां गणैः ॥२९॥ प्रनृत्यत्किंनरानीक सिंजन् मंजीर निःस्वनैः ॥ कैलास शिखरापार सुमहाक्षीन्नारदो मुनिः ॥३०॥ द्वारस्थितं नंदिकेशमपश्यद्वेत्र पाणिनं ॥ जटा मुकुट शोभाढ्यं त्रिपुंड्रां कित मस्तकं ॥३१॥ भस्माभ्यक्तं रुद्र गणैः समं तात्परिवेष्टितं ॥ ददर्श नयनाब्जाभ्यां तेजोराशिमवस्थितं ॥३२॥

तेनाभिप्रश्नकथनेनं दितो नारदो मुनिः॥ उवास द्वारि देवस्य गायन् मधुर वीणया॥३३॥ नामानि देवदेवस्य पावनानि महामुनिः॥ नंदिकेश्वरगतः स्वैरं जगौ रुद्रानुमोदितः॥३४॥ नारद उवाच॥ शिव शिव भव हर देव शासन॥ नर सुरपाहि दयाकटाक्ष सारैः॥ भव भव जनितां रुजं हराशु प्रमथ विधीश्वर वीर धीर पाहि॥३५॥ शिव शिव दहनार्क मित्र सोम॥ प्रकट विलोचन कृत्तिवास शंभो॥ तव शिव कृपया समराधकारे॥ भव भव शमना द्वयं न चैव॥३६॥ हर गिरिसुतया सहोपकंठ॥ प्रबल गराशन नील नीलकंठ॥ हृदि भव यमिनां किलोपकंठ॥ प्रथित महोरग भोग शोभिकंठ॥३७॥ हर हर शमने कभीतिजातं हर हर भो भवजात घोर दुःखं॥ हर हर पापमपाकुरुष्व शंभो हर हर सुरजित्पूजितांघ्रि शंभो॥३८॥ शंभो शंकर चन्द्रशेखर दयासागरामराधीश्वरापापापार भवाब्धि शोषण महाबाडव्य वन्हे शिव॥ कांताकृति शोभितांग कमला कांताघ्रि पूज्यांघ्रिक क्षेमं सर्वजनस्य सत्कुरु विभो जन्मांतदुःखं हर॥३९॥ विश्वेशान विधिप्रचंड शिरसा लग्नं पाणे हराः शूल प्रोथित दक्ष वक्ष हरण त्र्यक्षामराधीश्वर॥ पाहि मंजन मर्भकं तव विभो मायेक लभ्य प्रभो भो भो देव वर प्रसीद भगवन्

दृष्टिं कृपायाः कुरु॥ गानं तन्नारद मुखाद्धीणाक्कणन् मंजुलं॥४०॥ श्रुत्वैव नंदिकेशाद्या गणाः शंभोर्महात्मनः॥ व्याजिज्ञपंस्ते देवाय शंकराय महात्मने॥४१॥ प्रणम्य नंदिकेशोपि पिधाया स्यं करेण वै॥ उवाच देवं वरदं प्रसन्नास्यं त्रिलोचनं॥४२॥ नंदिकेश उवाच॥ शंभो शंकर धूर्जटे त्रिनयनापारव्यथासंहरापारावार महाप्रभाव ● जगतां व्यापार साराद्दर॥ त्वन्नामामृतधारया जगदिदं ग्रामस्त्वे शांतिं कं॥ संप्राप्य प्रमथाधिनाथ पदवीं द्रष्टुं पदाब्जं तव॥४३॥ द्वारे तिष्ठति वारितः सहि मया किं चाज्ञया सुप्रभो॥ देवाज्ञावसरेण तं गमयितुं दिव्यं मुनिं नारदं॥ त्वत्पादांबुज लोल मिष्टमनसं सर्वे विशिष्टां तरां भक्तिज्ञानविरक्तिशक्ति सहितं पादे दिदृक्षुं प्रभोः॥४४॥ नंदिकेशवचः श्रुत्वा कटाक्षाग्रेण शंकरः॥ संज्ञां चक्रे खिलेशानो नारदागमनं प्रति॥४५॥ नारदोपि चदेवेशं नत्वा तुष्टाव हर्षितः॥ शिपिविष्टं महादेव मष्टाकृतिं मनोहरं॥४६॥ नारद उवाच॥ जय जय देव महेश धूर्जटे जय जय विश्वविधानदक्षशिक्ष॥ जय जय विश्रुत वेदगीत कीर्त्ते जय जय भक्तजनार्पितैकसुखे॥४७॥ जय जय भगवन् तपः क्रियाणां फलदो न्मुख पंचवक्त्र शंभो॥ तव शिव भगवन् पदाब्जयुग्मम भिपूज्य स्वहृदा तपैकराशिः॥४८॥ मुनिरास्ते हिमवन्नगोर्ध्वमौलौ तव दिव्यामृतदेह लोकनैकतर्षः॥

५.४— "दृष्ट्वा तं मुनिमेकाग्रमानसं स महेश्वरः" ॥५४॥

इत्थं नारदवाक्येन जातहर्षो महेश्वरः ४९। जेगीषव्यं ययौ द्रष्टुं नानागणवरैर्वृतः ॥ आरुह्य शाङ्करं दिव्यं नानालंकारभूषितं ॥ ५०॥ नानागणमुखोद्गीतवाद्यवृंदकृतारवं ॥ छत्र-चामरहस्तैश्च पताकाविधृतैर्गणैः ॥ ५१॥ उमया स्कंदहेरंबनंदिभृंगिगणावृतः ॥ क्षणेन हिमवन्मौलिमाजगामामरैर्वृतः ॥ ५२॥ मुनिर्गिरिगणमुख्यैश्च मंदस्मितमनोहरः ॥ उद्यच्छशांकधवलधावल्यां गांगकृप्रभः ॥ ५३॥ गंगातुंगतरंगौघमौलिद्युतिविराजितः ॥ दयाकटाक्षामृतसिंधुवर्षैर्वल्मीकभूतं मुनिमावबिं ॥ ततो स्थितो देववरं प्रणम्य तुष्टाव चाद्याकृत्तिमप्रमेयं ॥ जेगीषव्य उवाच ॥ महेश्वर महोपवृत प्रवल तापापहः ॥ प्रपन्नजनरक्षणे क्षणविशिष्टशिष्टेष्टद ॥ विनीतजनवत्सल त्रिपुरमारसंशोषक प्रसीद दयमाधुना भवदवाग्निसंशोषक ॥ ५६॥ क्षपापतिकलाधर पतितपापतापापह प्रचंड गरलाशन त्रिदशमौलिवंद्यांघ्रिक ॥ महोक्षवरवाहनाध्वरसुदक्षदक्षापहा भगाक्षिहर शंकर प्रसभमाशु वीक्षस्व मां ॥ ५७॥ हरामरवरोत्तम प्रबलसौरिगर्वापह मृकंडतनयावनप्रकरशूलदग्धान्धक ॥ फणींद्रमणिकंकणोज्वलितसूर्यसोमानलाविलोचन दयारसैः प्रथितवेदगीताशय ॥ ५८॥ त्रियंबक सदाशिव

शिवरह० त्रिदशनायका शावसायमींद्र हृदयाब्जगोचलित मद्भुना द्रप्रिया। सुकृत्ति वसना मलो ऽछुसित भोगीभोगप्रि यप्रसीद मयि देव पीन मुरहराब्ज नेत्रां घ्रिक॥ ५९॥ रमारमण सायक प्रबल मेरु सद्रन्व कं महीर थांगक विधृत सोम पूषात्मक॥ तुरंग निगमाव्यय विधि सुयत रीक्ष स्वमां दया रसद्दशा नयामद मंडुय सारा दूर॥६०॥ जैगीषव्य स्तुतिं श्रुत्वा संतुष्टः प्राह शंकरः॥ प्रांजलिं विनयोपेतं मुनिं वीक्ष्य स्मरार्दनः ॥६१॥ ईश्वर उवाच॥ त्वं धूर्जटि प्रेमरसो मुमुक्षु र्मोक्षैक तानः श्रुतिशेखरांतः॥ त्वमूर्ध्व रेता मम सुप्रसाद भाक्" त्वं सार भूतो सि मुनीश्वराणां॥ ६२॥ विगलित मद मान लोभ मोह" प्रशमित वृत्तिरु मेशा र्पितसचेताः॥ धृत भसित वरो वराक्ष मालः श्रुतिमूर्धन्य मनो विचार शूरः॥ ६३॥ इति श्री शिवरहस्ये प्रथम माहेश्वर रांशे जैगीषव्य प्रसादकरणं नाम पंचमो ध्यायः॥५॥ श्रीकाशी वि०॥ जैगीषव्य उवाच॥ त्वमेव देवदेवेश पिता माता सखा प्रभुः॥ त्वमेव सर्वं देवेश विश्वेश्वर महेश्वर॥१॥ न जाने गिरिजानेत्र त्वत्तो नान्यं सुरेश्वरात्॥ तस्मात्प्रसीद भगवन् करुणा सागरा धुना॥२॥ प्रपन्नोस्मि पदद्वंद्वं निर्द्वंद्वं ते महेश्वर॥ भ्रातरो स्कन्द हेरंबौ सखायो गणपा मम॥३॥ जगतां जननी गौरी जनि श्री मम शांकरी॥ जग-

प्र०अं० अ०६
१२ १२

त्पिता त्वमेवेश पिता मम महेश्वर ॥ ४ ॥ नान्यं वरं वृणे देव त्वत्पादांबुज भक्तितः ॥ सैव धर्मार्थ कामादि मोक्ष
हेतुर्ममाधुना ॥ ५ ॥ यथा भक्त्या महादेव मुक्ताः सर्वे सुरासुराः ॥ त्वद्भक्त्या एव जंतु मुक्तान्या मोचयं
त्यपि ॥ ६ ॥ त्वद्भक्त्यैव विधिर्विश्वं सृजत्येव महेश्वर ॥ त्वत्तो वेदानधिगतः सत्यलोकाधिपो भवत् ॥
७ ॥ विष्णुस्त्वत्पदद्वंद्वं नेत्राब्जेनसमर्चयत् ॥ दैत्यवृंदैकसंहर्त्री चक्रं प्राप सुदर्शनं ॥ ८ ॥ त्वद्भ
क्त्यैव विरूपाक्ष वैकुंठस्याधिपो भवत् ॥ पद्मसमुद्भापतिश्चापि जातो रुद्र स्त्वदाश्रयात् ॥ ९ ॥ दत्वा
शूलवरं तस्मै रुद्रायामित तेजसे ॥ रुद्राणामधिमुत्ये च त्वया सोप्यभिषेचितः ॥ १० ॥ यस्य शूलानल
ज्वाला दग्धमंते चराचरं ॥ शक्रोमरेंद्रतां प्राप्तस्त्वद्भक्त्यैव हराधुना ॥ ११ ॥ शचीपतित्वंसंप्राप नाना स्वर्गै
क भोगभाक् ॥ धनाधिपत्यं धनदः स्त्वद्भक्त्यैव महेश्वर ॥ १२ ॥ यमोपि त्वत्पदार्चीतो लोकपालोभ
वच्छिव ॥ वरुणो यादसां नाथो सूर्य चन्द्रानलानिलाः ॥ १३ ॥ त्वद्भक्त्यैव विरूपाक्ष लेभिरे दिक्पद
त्वतां ॥ समर्चयंति त्वल्लिंगं भक्त्या सर्वे सुरासुराः ॥ १४ ॥ सहस्र भुजतां प्राप्तो बाणो भक्त्या तवेश्वर ॥ पौल
स्त्य तनयः शंभो रावणो लोक रावणः ॥ १५ ॥ जिग्येसुरान्नृपवरान् त्वद्भक्त्यैव महेश्वर ॥ घटोद्भवेन त्वद्भक्त्या

समुद्रश्चुलुकी कृतः ॥१६॥ दधीचिनापि त्वद्भक्त्या विष्णवे रूप मद्भुतं ॥ दर्शितं मा यिनेशं भो भृगुणा शापितो हरिः ॥१७॥ उपमन्युर्नाच बालेन लब्धः क्षीरैकवारिधिः ॥ त्वद्भक्त्या कालपाशेश्च पाशितो प्राप्तो मृकंडुजः ॥१८॥ जिगाय मृत्युं तरसा श्वेतो पि नृपनंदनः ॥ शिलाशनेन त्वद्भक्त्या पुत्रः प्राप्तो ह्ययोनिजः ॥१९॥ त्वद्भक्त्या नंदिकेशो पि गणपत्य मवाप्तवान् ॥ चंडीश्वरो पि पितरं हतवां स्तव भक्तितः ॥२०॥ मंकणो पि पुरा सिद्धः सिद्धिं प्रापत्व-दर्चनात् ॥ सोमो पि मुक्तवान् राज यक्ष्म तस्त्व त्प्रसादतः ॥२१॥ दक्षो पि दीक्षितो यज्ञे शिक्षितोनुगृहीकृतः ॥ शतर्चना द्यो पि शव्याघ्र पादा द्य स्तपा ॥२२॥ दुर्वासा द्या महा भागा दत्ता त्रेया यादय स्तपा ॥ रामो पि भार्गवः शंभो नृपाणां कुल घातकः ॥२३॥ तथैवान्ये नृपतयः सोम सूर्यान्वयो द्भवाः ॥ आदितेयाश्च दितिजाः गणरुद्रमुनीश्वराः ॥२४॥ भूता भव्या वर्तमानाः भक्त्या त्वद्भक्ति भाविताः ॥ तव भक्त्यैव सर्वेषां स्वर्ग मोक्षौ हि शंकर ॥२५॥ त्वद्भक्ति मेव याचेहं त्वनन्य गति रीश्वर ॥ हिमाद्रौ स्थापिते लिंगे मम जैगीश्वराभिधे ॥२६॥ केदारात्पश्चिमे शंभो तस्मिन्नित्यं त्वमावस ॥ सूत उवाच ॥ इत्युक्तो मुनिना तेन महादेवो गिरींद्रजो ॥२७॥ सुराणां च मुनीनां च शृण्वतां प्राह शंकरः ॥ श्रीईश्वर उवाच ॥ कथा माकर्णय पर्णकर्णा भर्ण विलोचने ॥२८॥

प्रं०ग्रं०
अ० ६

४ पंक्ति ६ - "समार चित्तो ऽर्चनकृद् विभाति ॥ नरो वरो मे स वरोचितः स्यात् ॥"
४ पंक्ति ९ - "सर्वत्रापि शुचौ शुचिः समहिमा तस्याति पारो दिवि ॥"

तूर्णं पूर्णपदप्राप्त्यै भवार्णवनिवासिनां ॥ कृतलिंगमहासद्मा पद्मसद्मापि सद्युगा ॥२९॥ तेषां नित्यं भवेद्देव येर्वा कारि शिवालयः ॥ तपांसि तेन तप्तानि शीर्णपर्णाशनान्मुने ॥३०॥ तेनेष्टाः सकला यागास्तेनाधीतं श्रुतं शिवे ॥ केदारारव्यं त्वत्पितुर्मौलिसंस्थं लिंगं चेत द्रष्टमना मुक्तिबीजं ॥ केदारे स्मिन्नत्वत्पितुश्चारुमौलो भूमानंदं त्वां कुरित्वं च मुक्त्यै ॥ एतल्लिंगात्पश्चिमे चामुनामे नाम्ना स्वेनाप्यर्चितं पश्य लिंगं ॥३२॥ प्रतिष्ठिते येन केनापि लिंगे त्ति ष्ठामी शानि तत्र सदैव तुष्टः ॥ तस्मिन्न सदेवावहितो भवानि नित्यं सुखदोत्तिह भक्त्या ॥३३॥ भवानि मुक्त्यै प्रपिते प्रदोषे प्रकाशने पूजकभावनेपि ॥३४॥ यः कश्चिद्भुवने श्वरि त्रिभुवने उत्तुंगलिंगालयं रम्यं द्वारकपाटतोरणमहाप्राकारसद्गोपुरं ॥३५॥ विद्युत्पुंजसमप्रभामलमहाहेमेककुंभोल्लसत् ॥ कृत्वा जन्मशतार्जितैः शतमहापापैर्नरो मुच्यते ॥३५॥ रम्ये शैलवरे सरित्तटवरे ग्राम्ये पुरे पत्तने ॥ तीर्थे वापि वने गिरींद्रवरजे गंगातटे नर्मदा तीरे वापि महेश्वरेश्वरि महाक्षेत्रे पुलिंगं धरः ॥३६॥ आढ्ये वापि दरिद्रशेखरवरे भक्तिः परं कारणं ॥ कृत्वा चापि शिवालयं सुरपपूतो भूमौ विमुक्तस्ततः ॥ मृद्दारुप्रभवं शिलेष्टककृतं रम्यं सुधाच्छादितं ॥ दिव्यं सन्मणिकल्पितं भवहरं सद्यो विजायेत मे ॥३७॥ कृत्वं चारु शिवा-

शिवरह० लयो त्तम लस त्तुगं हि लिंगं मम॥ प्राप्ति घ्राण्य सुवस्त्र चंदन घनासारैश्च विल्वार्चकः॥ किं मत्तेभ सुहेम भूमि तुरगे गोभिश्च रत्नोद्भवैर्दानै र्यागवरै श्चिराचित महाधर्मैश्च किं वा शिवे॥ ३८॥ योगैर्वा नियमैर्यमैर्व्रत तपस्ती र्थाटने नापि किं कन्यान्नादिक दान तोपि हि वरं लिंगाल यं येकृतं॥३९॥ पातां तावधि सुंदरं कृतमहा धर्मैक जातं शिवे मल्लिंगा लयकल्पकस्य सुतरां पाताद्भयं नास्ति वे॥ यावच्चंद्र सुतारका गण मुमे यावत्सरित्के लका॥ स्तावन्मे गणपोत्तमो हि स भवेत्कैलास मौलौ मम॥ ४०॥ खंडं वा स्फुटितं तथा परकृतं जीर्णं विशीर्णं तथा। तस्योद्धा र मुमे करोति सुकृतैर्यः श्रद्धया केवलं॥ किं वक्ष्यामि सदैव तस्य हृदये नित्यं निवासो मम॥ तस्यां ते वितरामि मु क्ति मखिलां वक्ष्ये रह रहस्यं तव॥ ४१॥ को वा लिंगवरं प्रदोष समये येनार्चि विल्वैः शुभैः॥ एवं चापि चरा चरे त्रिभुवनाध्यक्षता मावहेत्॥ भूमौ पुत्र कलत्र मित्र सहितो धान्यैर्धनैः संयुतः॥ त्यक्तेचापि विमुक्ति मेति नितरां लिंगार्चनाद्दवमे॥ ४२॥ कर्पूरोद्भव खंड ज महाज्वाला लसद्दीपकै तैलैर्वा विविधैर्घृतैः पशुभवै र्गव्येन वा केवलं उद्दीप्तोज्ज्वल दीपजाल मगजे कृत्वैव दीपावलिं॥ पद्मो भोत्तम महं सत्तारक गणाकारावलिं मद्गृहे रम्या मुज्ज्वल वर्तिका मघकुलं ज्वाला कृतं सेनवे॥ ४३॥ धूपैर्वा तगरागरु द्रवमहा सान्द्राणिसव

१५

प्र० पं०
अ० ६

४ क्र. ८ – " भक्तेषु प्रवरो ममैव सदने तद्गोत्रजोऽसौ नरो ॥ भुक्त्वा सर्वसुखं भुवि प्रियतमो यात्येव देवि प्रिये ॥ "

गुग्गल "बिल्व त्वक् कृत युक्त गंध सुभगा मोदैः शिवे केवलं ॥ दग्ध्वा याति पदं ममत्व च कुलं सर्वं कृतार्थो भवेत् ॥ ज्ञानं चापि समाप्नुयात्सु निशितं वेदांतवाद्भवं ॥ ४४ ॥ कर्पूरोद्भवखंडजमहाज्वाला लसद्दीपकै" रुज्वाल्य प्रमथाधिनाथजमहालिंगे तयोर्लिंभिनत् ॥ ४५ ॥ पापाद्रैः कुलिशं भवत्यथ शिवे तद्दीपसनं मयि" प्राप्नोत्येव कुलोन्नतिं वर सुतान् प्राप्नोति शंभोः पदं ॥ गव्यैः कापिलजैस्त्वपेतरगवां सारैः पयोभिर्दधैः ॥ दध्ना चाप्यधिकं फलेन शतशः क्षौद्रेण चाक्षुद्रतां ॥ ४६ ॥ प्राप्नोति क्षुरसेन गंधसलिलैः पुष्योत्थरत्नोदकैः स्वर्णोत्थैरभिषिच्य लिंगममलं प्राप्नोति मुक्तिं शिवे ॥ पुंड्रेक्षुप्रभवैश्च सद्रसवरैर्नानाफलानां गणैः "नारेलांबुरसालसारजरसैर्जंबीरनीरैरपि ॥ ४७ ॥ उत्कोचैः पनसोद्भवैर्मम महालिंगेभिषिच्यादरात् । प्रातः संगवकालतोप्यतितरां सायं विमुक्तो भवेत् ॥ श्रीषमर्त्तौ मम लिंगसंगतमहामौलौ गलंतीश्वरी " धारासारसुपाटलागरुरसैः पुष्पांबुभिः पूरितैः ॥ धाराकल्पनजेन यत्फलमुमे तत्केन वा शक्यते । वक्तुं जन्मशताजितमहापापैर्विमुक्तो भवेत् ॥ ४८ ॥ उत्फुल्लैः कमलैः सितासितवरैः सन्मल्लिका मालती । जातीकुंद सुपाटलैर्बकमहाधत्तूरद्रोणार्कैः ॥ कल्हारैः कुमुदैर्जपादमनकैरुत्फुल्लदाडिंबकैः ॥ ४९ ॥ पुन्नाग

सन्तानवै॥

शिव रह० र्जुन चंपके र्बकुलकै मंदार वल्ही तकै र्नीलोत्पलद्विकचोत्पलैः कुरवकैः सत्कर्णिकारैः शिवं॥ नंद्यावर्त्त शि प्रं०अं० अ० ६

रीष विल्वकुसुमैः रक्ताश्व मारैः शितैर्जंबीर्मूश्च पत्रशुकैः शमिसमे दूर्वापमार्गादिभिः॥ ५०॥ वि

१६ ष्णुक्रांत कुशैश्च काशजनितैरभ्यर्च्य मुक्तां विकैर्प्राज्ञो कृष्ट महेतुकं भगवतः शंभोः कदंबांकुरैः॥ लिं

गे पुण्यतमे प्रदोषसमये पुण्येषु कालेष्वपि मोक्ष्योथ शतार्चनात्रिभृगवो धौम्याग्रजो गौतमः॥ ५१॥

मार्कंडेयदधीचिगर्ग उशना मुंजोकरिः शौनको दूर्वासा जमदग्नि जोंगिरवराः दत्तात्रिजो व्याघ्रपाद॥ जा

बालिश्च दधीचिमित्र जनितौ कुंभोद्भवः शैलजे देवेषु प्रथितौ विधिश्च मुरभिच्छक्रोर्य माग्नि भैरव॥

५२॥ पाशो यक्ष पति र्यमो थ निरतिरीशान मुख्या गणाः स्कंदश्चे भजवक्रको गणवरो नंदीश भृंगीश्व

राः॥ चंडुश्चंडिरिटिः सुभद्रक वरो वीरो महाभैरवः शैवेंद्रा भसितत्रिपुंड्र निटिला रुद्राक्षमालांगदाः॥

५३॥ रुद्रावर्त्तन लोलशील मनसो लिंगार्चका मे शिवे. येन्ये मी मुनयो ग्रहा श्रमरताः श्रांता परं संसृतौ॥

नाना देवत पूजने नकुधियो जानंति मां नो शिवे कानी नस्त्वयमप्युमे विधिवशात्संप्राप्य मे काशिकां

॥ ५४॥ मत्सान्निध्यगतो र्ध्व बाहुरसकृद्व्याचष्ट देवं हरिं तस्मान्नाहैति वक्तुमप्यति तरां श्रोतुंम-

३३

प. ४ – ज्ञानकल्पाप्तये सुमनसो वेदान्तशिक्षारताः॥ शान्ताः शान्तसरेन्द्रियाश्च जनतापारभ्रमा संभ्रमाः॥ येये मकुवरी ममेश्वरी वरैः पाद्याः सदा तैस्त्वया॥

दीयं रहः॥ पुण्यं मुक्तिरहस्यमेतदनघं शिष्येषु मात्रेषु खहो" त्वं सम्यक् प्रति पाद्या शुभ सितोद्धूलने षु मत्प्रेमजे॥ ५५॥ पारावार महांबु मनसा पुण्येषु शैलेषु च। जेगीषव्य मुनींद्र दापय परं शैवं रहस्यं मम, नाख्येयं शिव भक्ति वर्जित मुनो पुण्यं त्विदं मुक्तिदं॥ दत्वा भक्ति विहीन मानसनरे पापं महत्प्रा प्नुयात्किं चाप्नोति वृथा श्रमं मुनि शितं पात्रे यथामे जलं॥५६॥ सूत उवाच॥ देव्या दृष्ट्वा मुखाब्जं चिनयन नयनानंद संदोह बीजं उत्फुल्लामल केरवोपम मुखः श्री पार्वती नायकः॥ दृष्ट्वा चापि मुनिं विशिष्ट मन संशिष्टा द्विशिष्टं तदा अष्टांगाखिल योग जाल निकरैः पूते कसन्मानसं॥५७॥ श्रीईश्वर उवाच॥ पूतोयं मु- वने श्वरि त्रिगता मीशे मुनिः शांकरः" पुत्रस्ते निखिला गमे करसिको भूयात्त्वया लोकितः॥ संप्रत्येव तवान- नाब्ज विकसत्सूयस्य बद्ध क्रतः प्राप्नोतु प्रसभं मदीय महसां सारं जगत्पावनं॥५८॥ स्कंद स्कंदित तारक स्तव शिवे पर्यंक भूतांगकः" शुश्रावाखिल मंगलं त्वयि मया संप्रोक्तमेतच्छुभं॥ षड्भिः स्वैर्वदनच्युतामृ त ~~फलपीन मनसो देवि स्फुटं~~ रसैः पुण्णातु चैनं मुनि" शैवैर्नाद्य रहस्य संभव कथा धारा सुधा शीकरैः॥ ५९॥ जेगीषव्य मुख्याश्च ते मुनिवराः शृण्वंतु शैवं रहः शैवा एव भवंति तच्छुतमहानंदैकबोधाः सदा॥

४ पं.५ संस्तुतो॥ भक्तानां पुरुषार्थसाधनपरः स्वानन्दकैः संयुतः॥

~~संस्तुतः~~

शिवरह० नान्येषां मतिरस्ति शंकरकथापीयूषपानोत्सवे भक्त्युत्थामृतपानपीनमनसो देवि स्फुटं केचन॥६०॥ ग्रं.ग्रं.
वेदांतार्थविचारसारसुगमं शैवं रहस्यं मया देवि दत्तमतस्त्वया बलवता स्नेहेन दत्तं मुने॥ स्कंदाया सुर
१८ शिक्षका यद्दत्तं गच्छाधुना तं प्रति॥ इत्युक्तं गिरिजामनोहरवचः श्रुत्वा मुनिर्निर्ययौ॥६१॥ नत्वा
शंभुपदं जगाम रभसा युक्तो मुनीन्द्रैरपि॥ देवश्चापि मुदा ययौ पशुपतिर्देव्या सुरैर्वेष्टितः॥ कै-
लासं गणकोटिवाद्यनिकरैर्देवैस्तवैः संस्तुतः॥६२॥ इला मिलन्मौलिरयो महात्मा जैगीषव्य
विप्रोऽध्वरराजराजं॥ संपूज्य नत्वाभिजगाम शंभुं स्कंदाय च स्कंद मुदार्पवेदने॥६३॥ इति श्री शि
वरहस्ये माहेश्वरे षष्ठमांशे जैगीषव्यागमनं नाम षष्ठोऽध्यायः॥६॥ श्री काशीविश्वेश्वरार्पणमस्तु
॥ सूत उवाच॥ इत्युक्त्वा प्रययौ देवः कैलासं शंकरालयं॥ नंदिभृंगिगणौघेन सुरासुरसमर्चितः॥
१॥ जगज्जनित्र्या देव्या च महावृषभवाहनः॥ जैगीषव्यो मुनिर्नत्वा महादेवपदांबुजं॥२॥ ध्याय
न्नभिजगामेव स्कंदं क्रौंचविदारणं॥ उपाययौ मुनिवरैः शैवैर्दृढभक्तितत्परैः॥३॥ मार्कंडेयो
पमोद्दल्पो जमदग्निर्भृगुस्तथा॥ दूर्वासाश्च वनो गर्गो वीतहव्यो निकुंभनः॥४॥ गौतमो त्रिर्भरद्वा-

जौदा ल्यो हयशिरा मुनिः ॥ उतथ्योग्नि ध्वजश्चैव दधीचिर्मौनि भार्गवः ॥ ५ ॥ पर्वतो थापि माँडव्यो दंडो व्याघ्रपदो हनुः ॥ ६ ॥ व्यासः पराशरो कुंडः कविरांगिरसोमघुः ॥ उपमन्युर्विश्राखश्च तुहुंडः कवषो ध्रुवः ॥ ७ ॥ जाबालिकश्यपो मित्रो नारदस्तुंबुरुस्तथा वेदगर्भो वीतिहोत्रः कण्वो मेघ्यातिथिर्जनुः ॥ शौनकस्तांडकश्चैव मित्रविंदो नुमित्रकः ॥ ८ ॥ हयग्रीवो पिप्पलादो दत्ताच्रेयो विकत्यनः ॥ अगस्त्यो थानिलाशश्च शतर्चो प्याश्वलायनः ॥ ९ ॥ सनंदः सनकश्चैव कुमारश्च सनातनः ॥ एव माद्याश्च मुनयः शैवेंद्राः शिवसंमताः ॥ १० ॥ अग्निरित्यादिभिर्मंत्रै र्भस्मोद्धूलन तत्पराः ॥ त्रिपायुवेत्त्रिपुंड्रांकारुद्राक्षांगदकंकणाः ॥ ११ ॥ पंचाक्षर जपासक्ताः पंचास्य ध्यानतत्पराः ॥ अथर्वशिरसा देवं पूजयंतिजपंति च ॥ १२ ॥ केचिच्छिवाजपासक्ताः केचित्कैवल्यजापकाः ॥ प्रणवाभ्यासनिरताः केचिज्जाबालजापकाः ॥ १३ ॥ बृहद्रथंतरं वामदेवसमादि जापकाः ॥ संहिताभिस्तथा साम्नां ऋचां च यजुषां तथा ॥ १४ ॥ रुद्राध्याय जपासक्ताः पंचब्रह्मपरायणाः ॥ सर्वे लिंगार्चनपरास्त्रिकालं मुनिसत्तमाः ॥ १५ ॥ पंचरुद्र जपासक्ताः पंचास्य ध्यानतत्पराः ॥ शिवनैवेद्यभोक्तारो नियमाद्बिल्वपूजकाः ॥ वैराग्य भाग्य निरताः नित्यानित्यार्थको विदाः ॥ वेदवेदार्थतत्व-

॥ १६ ॥

शिवरह० ज्ञाः दृढ प्रज्ञामनो षिणः ॥१७॥ तपसा राशयः सर्वे सदाराः शिवतत्पराः ॥ शिवनाम जपासक्ताः सर्वदा शिव चिंत प्र०अं० अ.७
काः ॥१८॥ अग्निहोत्रपराः सर्वे यज्ञा दग्ध किल्विषाः ॥ शिष्य प्रशिष्य सहिता आगतास्तेन भो ध्वना ॥१९॥
स्कंदाश्रमं सरस्वत्यास्तीरे पावन पावनं ॥ नाना स्कंद गणोपेतं देवगंधर्व शोभितं ॥२०॥ नीलाद्रि शिख १८
रे पुण्ये नानातरु वराश्रितं ॥ बर्हि नृत्तारवैश्चैव पुंस्कोकिल विनादितं ॥२१॥ शुकसारिकसंघुष्टं क १८
पोत कुहू कूजितैः ॥ मृदंग मुरजोद्घोषैर्वीणा ताल लयानुगैः ॥२२॥ प्रवृत्त किंनरानीकमुत्फुल्ल कमला क
रैः ॥ स्कंदालयमपश्यंस्ते नाना रत्न विराजितं ॥२३॥ गोपुराट्टाल वलभी वप्र प्राकार शोभितं ॥ सु
वर्णखचिता नेक नवरत्न विराजितैः ॥२४॥ पर्यंका स्तरणैर्दिव्यैः सिंहनाद वरैर्युतं ॥ गंधर्वै नाग ब
कुलै रुपेतं गीतवाद्यनैः ॥२५॥ सिंहासनस्थं वरदं षडक्रं मुकुटोज्वलं ॥ हेम पीतांबर धरं चल चामर
वीराजितं ॥ २६ क्कण त्कनक रत्नैश्च चित्र कुंडल शोभितं ॥ महार्ह रत्न मालादि मुक्ताहार सुकंधरं ॥२७॥
शक्तिहस्तं महाशक्तेस्तनूज मति सुंदरं ॥ दद्दृशु मुनयः सर्वे स्कंदं क्रौंच विदारणं ॥२८॥ प्रणम्य जे
गीषव्याद्याः मुनयः स्कंदमव्ययं ॥ तेन निर्दिष्ट विष्टरेषु विष्टरा मुनयः सुखं ॥२९॥ सूत उवाच ॥ नमस्तु

गायाति समीर गत्या भस्माव धूता दिवल पाप संघः ॥ शरन्न भा भः परिपूर्ण चन्द्र भांस माशु लोके द्रुत नू भवा-
मं ॥३०॥ जैगीषव्य मुखाब्ज लोकन महानंदांबु धे र्मग्नः ॥ स्वस्ये वांतिक मागतं पुर भिदा संप्रेषितं ज्ञात
वान् ॥ पात्रं वीक्ष्य महेश मित्र हृदय ग्रंथा र्थ संबोधने । हृष्टः पुष्ट तनुः प्रकृष्ट वचसा मुग्धेऽप्यबोधयन्मु-
निं ॥३१॥ जैगीषव्यांग संग स्फुट पुलक ततिः शैव वर्यं वडास्यो । नेत्रैर्वा लोकि हृष्टो भसित धवलि
त स्वांग गात्रो मुनींद्रं ॥ मेने मेना तनूजा त्मज वर चरणे धारणे वीत रागं ॥ स्कंद उवाच ॥ त्वदा गमन सं
भ्रमा द्भ्रम ततिः प्रणष्टा मम शिवेन कथितं पुरा शिव रहस्य धर्माभिधं ॥ समुद्गमिव सिंधुभिः शिव
कथा सुधा वारिधौ । समुल्लसति मन्मनस्तदपि बोध हेतु स्त्वयि ॥३३॥ पचेलि म तपः फलै रमित
पुण्य संघार्जितैः । भवान पि समागत स्त्रिपुर वैरि संप्रेषितः ॥ मुनिष्वपि विशेषत स्त्वयि दया महे
शस्य या न कोपि भुवने धुवा प्रमथ नाथ लिंगार्चकः ॥३४॥ इति श्री शिव रहस्ये प्रथम माहेश्वरांशे
जैगीषव्य स्कंद समागमो नाम सप्तमो ध्यायः ॥७॥ ॥ श्री काशी विश्वेश्वरार्पण मस्तु ॥ सूत उवाच ॥
उपोपविविशु र्हृष्टाः षडानन वि लोकनात् ॥ हृष्टा स्तत स्ते शैवेंद्राः प्रष्टु मूर्ति कृपा स्पदाः ॥१॥ ऊचुः

प्रांजलयः सर्वे जैगीषव्य पुरोगमाः ॥ जैगीषव्य उवाच (ऋष उचुः) ॥ स्कंद त्रिपुरसंहर्तृतनूभव सुखास्पद ॥ क्रौंच मत्तगिरिश्रेष्ठ शूरराक्षसानां विदारण ॥ शिवज्ञान सुधांभोधे सर्वशक्तेः खिलाधर ॥३॥ कुमार मारसंकाश प्रपन्नजनवत्सल ॥ शिवांकभूतपर्यंक सर्वभूतहृदंतर ॥४॥ वीरबाहु मुखानेकगणोत्तम निषेवित ॥ शिखिवाहामरेंद्रादि सेनापालानघ प्रभो ॥५॥ प्रणवादि महावाक्य सारासार विचारक ॥ भक्तहृत्पद्मसंदेह तमस्तोम निवारक ॥६॥ ज्ञानोदयो द्युमार्त्तंड प्रचंडतर विक्रम ॥ तव पादांबुजद्वंद्व विलोकन हता शुभाः ॥७॥ जैगीषव्यस्य तपसा दृष्टोस्माभिर्महेश्वरः ॥ तेनाद्य भावयं सर्वे जैगीषव्य पुरःसराः ॥८॥ त्वत्पादाब्ज कंज निष्यंद मकरंद मधुव्रताः ॥ पातुं शिवरहस्याख्य ममृतं भवनाशकं ॥९॥ प्रयाता पुण्य भारेण तव संनिधि मत्यकराः ॥ संतप्तान् भवदावाग्नि मध्यस्थान् धुनाम नीन् ॥१०॥ सुधा सीकरया दृष्ट्या शीतया सुप्रसीदनः ॥ इत्थं मुनीनां वचनं श्रुत्वा स्कंदो हरात्मजः ॥११॥ प्रसन्नचेतास्तानाह शं भवान् हरनंदनः ॥ स्कंद उवाच ॥ जैगीषव्य मुखा यूयं मुनयो भवसत्तमाः ॥१२॥ भवभावैक संपन्ना भक्ताः सर्वे महेश्वरे ॥ भवतां दर्शनेनेव भावनानंदितं मम ॥१३॥

प्र० पं० अ० ८ ९५

९५

मनसः पद्ममुत्फुल्लं मुनेः श्रुत्वा तपः क्रियां ॥ प्रसादेऽपि महादेवात् जैगीषव्यस्य सत्तमः ॥१५॥ शिवाज्ञया
समायातो जैगीषव्यो महामुनिः ॥ भवद्भिः शांभवैः सा धर्मयाज्ञातं हृदे वहि॥ अपात्रभूता भवंतो हि त्रि
नेत्रपद पूजकाः ॥ यद्गोप्यमपि तद्वक्ष्ये रहस्यं शिवहृद्गतं ॥१६॥ शिवांकसंस्थे न मया श्रुतमेतत् पुरा
तनं ॥ द्वादशांश समायुक्तं देव्यै देवेन दर्शितं ॥१७॥ पुण्यं पापहरं चैतत् सर्वश्रुति शिरोगतं ॥ भ
वान्ये च भवे नैव कथितं भवनाशदं ॥१८॥ कथानकं श्रुतिशिरः प्रणवार्थ महाद्भुतं ॥ जैगी
षव्यागमगायूपं शृण्वंतु परमार्थतः ॥१९॥ धर्मकामार्थमोक्षाणां सारभूतमिदं शुभं ॥ श्रुत्वेदं हि कथा
रत्नं शंकरस्य परात्मनः ॥२०॥ श्रोतुमन्यन्नरो चेत यथान्याः प्राकृताः कथाः ॥ सृष्टिस्थित्यंतकथनैः
नृपाणां चरिताश्रयैः ॥२१॥ वर्णाश्रमैक कथनश्रम भारैः कथानकैः ॥ धर्माभासकथाभिः किं यथा-
शंभोः कथारसं ॥२२॥ किमंधःकूपमध्यस्थः तमसा परिवेष्टितः ॥ अन्यानं धान्यारयेत तथैवान्य
कथा मुने ॥२३॥ पुराणेषु प्रकाथितैः किंतु चर्वितचर्वणैः ॥ जन्ममृत्युजराणां च सुराणां
मुनिपुंगव ॥२४॥ कथाः कथं तारयंति जन्ममृत्युजरायुतान् ॥ श्रीमन्मृत्युंजयस्यैव कथा मृत्युवि-

~~कथय तव रहस्यं येन मुक्ता त्रिलोकी॥ निगम शिरसि निष्ठा कागरिष्ठा वदाय॥~~

शिवर॰ वर्जितान्॥२५॥ कुर्वंति जगतां विप्राः शैवाः शिवरहस्यगाः॥ सुधासागर मध्यस्थः सिंधुकूपोदकं पिबे(किन्तु) प्र॰ ग्रं॰ अ॰ ८

त्॥२६॥ कणद्वीणादि निनदं श्रुत्वा काकरवं यथा॥ यथा रत्नाकरं प्राप्य काचखंडमपेक्षते॥२७॥

२० यथा मत्तेभसदृशः किं मलाशनकृत् किटिः॥ यथा मृगेंद्रसदृशो वानरः किं द्विजोत्तमाः॥२८॥

तथा चान्यकथासक्तः त्यक्त्वा शिवकथारसं॥ यथा शिवो महादेवः सर्ववेदांतसंस्तुतः॥२९॥ २०

तथा शिवरहस्याख्यमितिहासवरं मुने॥ शिवकंठमणिश्चायं पापमे(मो)चकमोचकः॥३०॥ पुराकै

लासशिखरे देव्यै देवेन कीर्तितं॥ प्राह देवं विरूपाक्षमंबिका परमेश्वरि॥३१॥ देव्युवाच॥

शंभो विश्वेश भर्ग त्रिनयन पुरह(कार)न्कालांधकारे॥ (पापारे का)कालनेत्र स्मरहर गर(प)कंठ चाहि देवान्द्वि

जांश्च॥ त्रिदश पति पते सूर्यचन्द्राग्निनेत्र॥ प्रार्थ्यं किंचिन्ममास्तिप्रियतम हृदये यद्यपेशाखिलपूर्णा॥

पूर्णार्थप्रद यत्तवमन(सि)सदा भाति मे तत्प्रदेयं॥३२॥ चिरमतु निजजीवध्यं मकृद्धं य एवं कथय

तव रहस्यं येन मुक्ता त्रिलोकी निगम शिरसि निष्ठा कागरिष्ठा वदाय॥३३॥ यदि तव करु

णाब्धेः शीकरासारपात्रं मम शु(श्रुति)चिवर पात्रं त्वं कृतार्थीकुरुष्व॥ तव चरित मशेषं लोकदुःखाप-

नुत्ये" पुरहर कुरु करुणां मामकीने ह्रदयस्व ॥ ३४ ॥ सुगोप्यमपि शंकर प्रमथनाथ विश्वाधिक निधेहि
मयि तत्स्थिरं चिरमपि प्ररूढं त्वयि ॥ त्वदीयदयया परं प्रकटितां तरंगं मम" त्वदीयचरणांबुजे सकल
भक्तिभावे युतम् ॥ ३५ ॥ स्कंद उवाच ॥ इति देव्या वचः श्रुत्वा प्राह कामांगनाशनः" स्वांकसंस्थां महा
देवीं तदंकस्थेन यत्पुरा ॥ मया श्राविकथा सिंधु रहस्यं तद्भवेध्धुना ॥ भावानां भवनाशाय भ-
वभक्ति विवर्धनं ॥ इत्य ॥ ३६ ॥ श्रीईश्वर उवाच ॥ नादेयं तव विद्यते त्रिभुवने शैले द्रजे केवलं"
देहार्धे धिकृतासि विश्वजननी नीरूप रूपस्वया ॥ विश्वं पासि तया ऽसि शक्तिरखिला देवि
त्वया शक्तिमान्" उक्तोहं श्रुतिभिर्नि शींद्रिय इति त्वत्तो स्मि देहं गतः ॥ ३७ ॥ अपाणिपादोहमलुप्त
शक्तिः" पश्याम्यचक्षुश्च शृणोम्यकर्णः ॥ अहं विजानामि समस्तमेतत् सहैव संतं न विजानंति
देवाः ॥ ३७ ॥ ३८ ॥ शीर्णे शीर्णोहमजश्च पुरातनः॥ अमर शरीरहीनो स्मि सदा ह्यसंगः ॥ वेदाश्च वेदांतवचो य-
तो मे" निवृत्त भावा मनसा सहांबिके ॥ ३९ ॥ कथं पामरा वानराकारचेष्टाः" सदा काम लोभादि मात्स-
र्य युक्ताः ॥ वराकाः शरावादि हस्ता भ्रटंति" सुराश्चासुरा भूसुराः किं लभंते ॥ ४० ॥ त्वमेकाकि

नी स्कंद विघ्नेश मुख्याः मदीय प्रकृष्ट प्रभावैक तत्वाः ॥ यतो भाव लभ्यैक मूर्त्तिं महेशं सदा वेद वेदांत वाचां दुरापं ॥ ४१ ॥ विजानासि देवि त्वमाद्यं ममाद्यं सदा शुद्ध बुद्धं चिदानंद रूपं ॥ त्रिनेत्रं गराधार कंठं महांबं प्रपश्यंति योगींद्र मुख्या हरा जाः ॥ ४२ ॥ अहं लोक गुप्तयै मीशानि देहं सृजाम्य च कामं निगृण्हामि चांते ॥ शिवे व्यक्त रूपं सुरा धे दुरापं न जाने पुरे तत् कथं पामरा मां ॥ ४३ ॥ श्रृणु श्रवण भूषणं भवति निगम पार सारं स्फुटं सुगोप्य मपि वर्त्तते हृदि सुगोप्य मे तत्त्वया ॥ अशांभव वरे प्रिते न भाति प्ररूढस्तनूये थैव मरु भूमिगः, शिव रहस्य मेत त्तथा ॥ ४४ ॥ सुशांभव सरोवर प्रतत रक्त पुल्लाब्जिनी विकासने दिवाकरः शिवजनैक तोय प्रदः ॥ हृदंतर तमो गणा स्थित पाप मेघा निलो विशोषयतु दुष्पथ प्रभव काम पंकं सदा ॥ इदं भगवतः पदं ममनये न चाहं मम स्व मप्यत्ति सुखा स्पदं हरं सुखा स्पदं चेत्कृतं ॥ ४५ ॥ परं च पर दुःख दं हृद सुखा स्पदं वा धृतं भजंतु सुधियः सदा श्रवण राशि सन्मंगलं ॥ ४५ ॥ नहीन जन मानस श्रवण मेतदेव स्फुटं ध्रुवं भव ति शैलजे निगम सार भूतं मधु ॥ शिवार्चक जन प्रियं मधुलि तस्त-

एवं प्रिये प्रकृष्टरसभावुका भव भवाब्धिसंशोषकाः ॥ ४६ ॥ इति श्रीशिवरहस्ये प्रथमे माहेश्वरांशे स्कंददर्शनं नामाष्टमोऽध्यायः ॥ ८ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ सूत उवाच ॥ एवमभ्यागतान्नभ्यान् सदस्स्पतिशासनात् ॥ स्कंदास्य विमलोदारान्निर्गच्छंत्यः शिवाश्रयाः ॥ १ ॥ कथाः कूपथदुःश्राव्या नारदोऽथ सुरान्ययौ ॥ चक्षुःश्रवाकथ्यकथाश्रवणार्थं दिवस्पतीन् ॥ २ ॥ ब्रह्मेंद्रविष्णु लोकेशान् तदुदंतकथां कथ ॥ विष्णवे ब्रह्मणे चैव दिक्पालेभ्यो महेश्वरे ॥ ३ ॥ तच्चाकथयदीशेभ्यो जैगीषव्यप्रसादजं ॥ महेश्वरस्य देवस्य श्रुत्वा ते संभ्रमात्सुराः ॥ ४ ॥ कथाश्रवणलोलाक्षा नारदेन समागताः ॥ विनतानंदनारूढो लक्ष्मीपतिरलंकृतः ॥ ५ ॥ धवलाभ्रनिभात्युच्चहंसारूढो विधिस्तदा ॥ अभ्यागात् भारतीनाथो नागारूढो महेश्वरः ॥ ६ ॥ स्वं स्वं वाहनमारुह्य ययुर्देवास्तदा मुदा ॥ तारकारिसदःप्राप्ता नानाभरणभूषिताः ॥ ७ ॥ प्रणम्य ब्रह्मविष्ण्विंद्राः कृतांजलिपुटा जगुः ॥ देवा ऊचुः ॥ स्कंदानंदितवंदारुवृंदवंद्यपदांबुज ॥ शिवभावामरा ध्यक्ष श्रोतुं तव मुखाद्वयं ॥ ८ ॥ शंभोः शंभुजसर्वस्वाः कथाः शिवरहस्यगाः ॥ श्रोतुं प्रवृत्ता मुनिभिर्जैगीषव्येण सादराः ॥ ९ ॥

तस्मात्त्वमवर्तय शुभाः पापतापनिवारकाः ॥ तदासुरमुनींद्राणां वचसानंदनिर्भराः ॥ १० ॥ जगाद संप्रश्रये श्रामं बां विघ्नाद्रिभेदनं ॥ ध्यात्वा स्वहृत्पद्मगतं जैगीषव्यं मुदेक्षत ॥ ११ ॥ शैवेंद्रा नमरेंद्रश्च प्रोत्फुल्लनयनास्यकः ॥ उवाच प्रसभं सभ्यान् सदस्स्पति पूजकान् ॥ १२ ॥ भस्मत्रिपुंड्रनिटिलान् रुद्राक्षांगकंकणान् ॥ शिवपादांबुजव्यग्रचेतसस्तान भाषत ॥ १३ ॥ श्रीस्कंद उवाच ॥ त्वमेव भवभक्तोसि जैगीषव्य शृणुष्व मे ॥ सहैभिर्मुनिभिः सार्धं देवैः शिवरहस्यकं ॥ १४ ॥ देव्यै देवेन कथितं पापतापविशोषणं ॥ एवं संवदतां तेषां सिंदूरारुणगंडभृत् ॥ १५ ॥ वारणेंद्रमहावक्त्रो विघ्नपूगनिवारकः ॥ स्कंदाश्रमं तदा प्राप गणवृंदनिषेवितः ॥ १६ ॥ विमानवरमास्थाय कैलासाचलतस्तथा ॥ नंदी भृंगी महाकालबाणचंडीश्वरादयः ॥ १७ ॥ तुहुंड हुंड सानंद महानंदश्च भैरवः ॥ तुंडः कालाग्निरुद्रश्च ये चान्ये गणपान्तमाः ॥ १८ ॥ सोमनंदी प्रभृतयो गणकोटिवरावृताः ॥ समागता महेशेन प्रेषिता गणनायकाः ॥ १९ ॥ नृत्तकांतजटोद्भासिधूतबालेंदुशेखराः ॥ त्रिपुंड्रविलसत्फाला रुद्राक्षांगदकंकणाः ॥ २० ॥ महाडमरुनादेत्थ हुंकारितदिशामुखाः ॥ तान्दृष्ट्वा सह सोत्तस्थौ मुनिभिश्च सुरासुरैः ॥ २१ ॥ नत्वा द्विरदवक्त्रं तं द-

त्वा ह्यामचमुत्कटं ॥ संपूज्य मोदकापूपदूर्वागंधाक्षतादिभिः ॥२२॥ तारकारिर्गणेंद्रस्तानुपर्यष्वजततगाढहृत् ॥ नंदीश्वरादीन्मुस्नेहं पूजितास्ते महार्हणैः ॥२३॥ निषेदुः स्कंदमभितो मुनींद्राः सुरपा गणाः ॥पश्यंतस्ते प्रांजलयः षडाननवराननं ॥२४॥ ऊचुस्तेनंदिकेशाद्याः स्कंदं क्रौंचनिषूदनं ॥ नंदीश्वर उवाच ॥जेगोषव्यस्य तपसा प्रसन्नोसि न हि ॥२५॥ त्वद्वागमृतनिष्यंदकथाश्रवणलालसान् ॥ अस्मान्संप्रेषयामास त्वदंतिकमुमापतिः ॥२६॥ उमांकसंस्थेन पुरा त्वया श्राविमनोहरं ॥ शैवं शिवायै कथितं रहस्यं पापभेदनं ॥२७॥ द्वादशांशयुतं साक्षात् पशुपाशविमुक्तिदं ॥ वेदस्मृतिपुराणेषु भारतेष्वागमेष्वपि ॥२८॥ पशुधर्माश्च मुनिभिः प्रोक्ताः संसारदायकाः ॥ प्रति धर्मैककथनं विमुक्तिदमुमापतिः ॥२९॥ वेदवेदांतसारोत्थकथाः पापनिकृंतनीः ॥ कथयामास तद्देव्यै रहस्यं श्रुतिसंमितं ॥३०॥ जाबालोपनिषत्सारं साक्षात्स्वरमुखोत्थितं ॥ तदंतिकप्रदेशेपि नैवास्माकमवस्थितिः ॥३१॥ सप्तप्राकारबाह्ये वै संस्थिता गोपुराग्रतः ॥ देव्युत्संगगते नाथ त्वया श्रुतमुत्तमं ॥३२॥ तद्वदास्मभ्यमधुना गोप्यं देवेन कीर्तितं ॥ अपर्णायै मुदा तत्र कैलासे शंकरालये ॥३३॥ हेरंबस्यानुसंगेन गणेंद्राश्च

58

शिवरहःप्रसादिताः॥ सुरेंद्राश्च मुनींद्राश्च जेगीषव्य तपस्यया॥ ३४॥ त्वयि प्रेमास्पदे शंभोः शंभुना प्रेविता वयं॥
जेगीषव्यं पुरस्कृत्य वदास्माकं कृपानिधे॥ ३५॥ निध्यानभूतं सद्वृत्तं शिवधर्मैकसादरं॥ इत्थं नंदीशवा-
क्येन चंद्रोदय इवांबुधिः॥ ३६॥ प्रहर्षमतुलं लेभे नगाधीशसुतासुतः॥ वचसाल्हादयन् सर्वान् गणें-
द्रान मरेश्वरान्॥ ३७॥ मुनीश्वरान् गजेंद्रास्यं जेगीषव्यं महामुनिं॥ उवाच चाग्रजं नत्वा महेशं चां-
बिकामपि॥ ३८॥ गजाननं तदा स्तोत्रैस्तोत्रेणाथ षडाननः॥ कृतांजलिपुटो भूत्वा गणेंद्रसुरभूसुरैः॥
३९॥ स्कंद उवाच॥ पयोदधिपयोभवद्विकचपुष्करैः पुष्करं मदांधकरटित्वचोवसन पुत्रमिंदुप्र-
भं॥ त्रिपुंड्रतिलकोज्वलं द्विरदवक्त्रकुंभोज्वलं महेशजनिमर्चकाः प्रणत विघ्नराजं सुराः॥ ४०॥ सिं-
दूरदूर्वार्चितकुंभमौलिं गंडस्थलीलंबितचामरौघं॥ कर्णावतंसीकृतपद्मकोशं नमामि विघ्नार्त
हरं प्रसन्नं॥ ४१॥ करटजमदधारागंधसंदोहबंधो द्विजदलिकुलमालं कर्णसंवीजितोघैः॥ भजतनिग-
मसारं नागयज्ञोपवीतं पशुपतिवरपुत्रं विघ्नराजं नतोस्मि॥ ४२॥ सृणिपरशुकराब्जं नौमि विज्ञान
हेतुं गणपतिमगजांतः प्रेमधारारसाढ्यं॥ फलकुलगुडमाषमोदकौघप्रियं त्वां पशुपतिवरपुत्रं

नौमि नागेंद्रवक्त्रं ॥४३॥ आखुवाहमज शौरि सुरेशैः सिंधुरेंद्रवदनं मुनिवंद्यं ॥ वेदवृंदनिवहैः स्तुतमा-
द्यं गद्यपद्यनिकरैः प्रणतोस्मि ॥४४॥ सूत उवाच ॥ गजास्यमित्थं संस्तुत्य षडास्यस्तुं दितांतरः ॥ प्राह तान्
प्रमथाधीशान् सुरेशान् भूसुरांस्ततः ॥४५॥ जैगीषव्यं मुनिश्रेष्ठं विशिष्टं शिवसंमतं ॥ स्कंदो गजस्यानु-
मते शिवयोः प्राह तन्मतं ॥४६॥ स्कंद उवाच ॥ ईशानांबुनिधेः सुधीकरगणा ब्रह्मेंद्रनारायणा ॥ स्तेशा-
न्यादिमरुत्प्रचारचलिता स्तत्सूनुजा सृष्टयः ॥ तत्सूनुप्रभवानृपाद्यइमे किंतत्कथाभिः फलं संप्राप्नो
ति विसृष्टयोत्रहि महाभूतादिभिस्तामृषा ॥४७॥ मिथ्याभूतजगत्प्रचारविहितो धर्मोत्रवर्णाश्रमा पारा
वारविचारसारहृदयास्तेषां श्रमः केवलं ॥ किंतच्चर्वितचर्वणेन विदुषां विद्योद्भवो जामतेयं धर्मोत्तम
मामनंति तपसा संवेद्य एकः शिवः ॥४८॥ जैगीषव्यमुखाश्च भूसुरगणाः यूयं गणाः शांकराः ॥ विष्णुब्रह्म
सुरेश्वरा मुनिगणाः श्रीमद्गणेशाग्रतः ॥ वक्ष्येतच्छिवयोरपारचरितं कैलासमत्यादरात्तस्मादप्यति
दुर्धियां च सुधियां श्रीमन्महेशालयं ॥४९॥ इति श्रीशिवरहस्ये माहेश्वरे प्रथमांशे स्कंदशिवगणसं
वादो नाम नवमोध्यायः ॥९॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ स्कंद उवाच ॥ शिवपादारविंदश्रीः या

श्रियं श्रीपतिं विधिं ॥ इंद्रं चन्द्रं सुरानन्यानुन्मादयति सा शिवा ॥ १ ॥ ढुंडिं च नंदिकेशं च तथा भृंगिरिटिं मुनिं ॥ मार्कंडेयं दधीचिं च दूर्वासं जामदग्निकं ॥ २ ॥ ॐ जय जय मंगलतर सुंदरतम मंगलापते ॥ जय जय विश्वविधान संस्थिति निधान शिक्षण चण बंधुतर सिंधु वरकृत्तिवसन मुनिवृंद विनुत नंदित सुरव संहृत सुर नंदित गण पुर मार भव शोषण गरलाशन शमन भयकंपित मुनि पोतक शरणः ॥ अरुणाधिप करुणाकर जनतारण तरणि स्थित सुरकारण मार शोषण त्रिगुण निगम गण पोषण चरण शरणं भव शरणं भव शरणं भव दयया ॥ ३ ॥ निगमागम वचनातिगय मिमानस गगनांतर ~~वियुन~~ स्थिति भवन पवनाशन कर हारक दहनामल नयन मननातिग वृषवाहन गमन भवनाशन वसिता शक सुर भूसुर निकरावन पितृकानन विहृते ॥ दहराकृति कुहरातिग वर भूधर शयन खर शीतज कर संस्थित सुरभेदन शर धारण पुरनाशन निगम व्रज तुरगोत्तम उरगाधिप कृत सिंजित कार्मुक मृग धृक् कुलिशायुध सुरवदेवत भटरक्षण चतुर भव शरणं भव शरणं भव शरणं भव दयया ॥ ४ ॥ दहनानिल तपनामर वर भूसुर जलनायक शमनैः कृत विनति कलिताखिल चरजंगम जगतामवन जननादिकलितो तम चरिते ॥ भरिता नत वर तात जनतात तत्ता हृते ॥ विनतात्मज वहनार्चन

जनिता तुल दयया ॥ विकचांबुज निभलोचनरथ संहन प्रद विधिमौलिजकल्ल कामल शय भूषित भगवन्
॥ पवनानलबल मारण बल शोषण तृण चालन मपि कृते ॥ कृणु ते नहि निखिलागम शिर संस्तुत चरिताभव
शरणं भव शरणं भव शरणं भव दयया ॥ ५ ॥ वरुणालय मथनोद्भव गरलोत्थित महसासुर किंनर हर वल्लज ह-
रि साय कर भसा कवलीकृत गर, संभव नलिनामल शुभकं धर जलदोपम भगवन् ॥ मधु मारण नयना म-
ल नलिनार्चित पद पंकज, लुलितांबुधि चुलकीकृत घट संभव नुति तोषित, यति मानस वर भूषण, मणि
कंकण भवन् ॥ दुरितापह चरिता मल ललितेंदुक लाल कं विमली कृत जगते शरणं भव शरणं भव शर
णं भ दयया ॥ ६ ॥ मख सम्मुख हव नाशन मुख तर्पित हवि भक्षण विबुध व्रजन लिनोत्थित महिमा तिग, परि
पूजन रहितातुल मन्युकृते ॥ मननोत्थित गणगर्जन परितर्जनासुर भर्जन, विधि नंदन कृत शिक्षण, परिपूरत
दुरितांतक गज मारण करण ॥ अगजाधिप, भुजगाधिप शयनार्चित, विधि मौलिज कलित स्रज बलभि
न्मत, भगदैवत नयनांबुज नाश कृते, शरणं भव शरणं भव शरणं भव दयया ॥ ७ ॥ जटिला लक मृग नायक
मद पाटन जनितां बर कटि शोभित, बट संस्थित निगमागम भट गोतम सुरनायक, चुटिताखिल

शिवरह० जगदुद्भव, घट खर्पर, हरि शर कर्षण पुर दाहक भगवन्॥ पटुता कृति निखिल स्थिति कर तुच्छीकृत की भवजलधे माहेश्व-
भव दागम जगदुद्गम, जल दालय वहन, त्रिपुरांतक, शमितांतक, शमितांध्वक शमिताखिलदुःख विभो प्र०अं० अ-१०
शरणं भव शरणं भव शरणं भव दयया॥८॥ पवनाशन मणिकंकण, गरलाशन, मधुसूदन बलनाशन, २५
शमन यमुनानुज भयनाशन, सिकताशन तनया मलगण सत्तम गुणबंधुर हृदयानत, मुनिसत्तम वि
नुत, गण गर्जित वदनायित शशिधामक कृत नेत्रक, उडुनायक शेखर राम खर नायक, कुमुदाकर स-
मुदयज ततलोचन, द्विरदानन सुत हर्षितृत रुणेंदु ललाम मृणा रुपानखजो त्पल कलिकायित, २५
सुर जालक मुकुटि तट घटितांबुज पाद शरणं भव शरणं भव शरणं भव शरणं भव दयया॥९॥ अखिलां
डग, शुकतुंडज घटनोत्थित मधुरायित सुखतं द्विज रससार सपद नाम जमुनि गीत विनोद, कनकांबुज
जनिताखिल जगदग खंडन, यमदंडन कलिताम ल शिरसे॥ मुंड मंडित तउरगेश्वर कृत कुंडल वि-
धि खंडन शिखिखंड लंबर कृत लोचन बडवानल कृत जिह्वक शिखिवाहन कृत, बौधन श्रुति मंडल-
शिरसे॥ पुरदंडन, नगकोदंडज, हरि शर कर्षण खंडल कर भंजन, मुनि मंडल कृत लक्षण खंडप-

रशोतंडुनंदि गणभृंगि चंडिकृत ताल मर्द्दलज धुंधुम ध्वनिजमड्डु घ र्घरि तरंग नाट्य परं जन्हु जावितनीर तीर विक क्षिव त्तिंग शरणं भव शरणं भव शरणं भवद्भयात्॥ १०॥ इत्यष्ट पद्यैः स्वां तरस्थं तुष्टावाष्टाकृतिं हरं॥ स्कंदो नत्वाथ जगतां मातरं स्तोतुमारभत्॥ ११॥ उदार तरंगं भीर पद्यैर्हृद्यैर्महेश्वरीं॥ देव वामांकभास्यां तारकारिः स्वमातरं॥ १२॥ स्कंद उवाच॥ नौमि स्तौमि जगत्प्रसाद घटना संस्थान संपादितां लोकालोकन तत्परां भगवतीं मायां महेशाश्रयां॥ विष्णु ब्रह्म मरुद्गणेश्वर महा साम्राज्य दान क्षमां ईशां काधिकृतां प्रमाद सुखदां कामेन वाचा सदा॥ १॥ इंदुकुंद करि मत्तज बिंब स्फार धार विजिता खिलवृंदां॥ नील मेघ नलिना मल कांतिं केसरींद्र वर भूधर कूर्मां॥ २॥ वक्र दंत गमनाधर केशैः लोचनेन जघनेन कुचाभ्यां॥ पाद पंकजरजः परिभूतान्नागयक्ष सुर मानव कन्यां॥ ३॥ ग्रंबा मे भीरु हा क्षीं सकल सुरक देवैक शक्ति प्रपूर्णां काशीशेशान्न पूर्णां, विधि हरि हरि सत्वं स्तुतां भर्ग कांतां॥ शांतां शांतां तरंगां भजदघ पटली व्याल नागांतकांतां, कांतां देवस्य देवी मगवर वरजां नौमि चिन्नित्य संस्थां॥ ४॥ नलिनजवनितासु पद्म संस्थाकर स्थोः विधिनह गरुत्ता भेभ्या मेरे वीज्यमानां॥ शतमख निज भर्तु भार्यया छत्रवत्या

शितनभसट सिंहस्कंदसिंहासनस्थां ॥५॥ गजमुखशिवाह प्रेमजानंद दृष्टिं विधिकरविधि मुखैः कारिताशेषसृष्टिं ॥ जननमरणतापार्थैकपीयूषवृष्टिं शरणमुपगतो हं मात्तरं मंगलांतां ॥६॥ रक्तबीजतुरगारि धूम्रजाक्षमरारिवरशुंभनिशुंभानू ॥ चंडमुंडवरभांडजमुंडे राजिभूमि कमलेरिवदेवी ॥७॥ कोदंडाकृष्टदंडोञ्चलितवरशरासारधारादिभिर्या तत्ताराम रवर्यसंस्तुतपद्दा सा पातुनः श्रेयसे ॥ सूत उवाच ॥ एवं संस्तुवतस्तस्य स्कंदस्यामलचेतसः ॥ आदुरासीद्वृषारूढो भगवान् गोवृषध्वजः ॥ नीलकंठस्त्रिनेत्रश्च भोगिभोगविभूषणः ॥ कोटिप्रभाकरोद्दासिमयूखावलिभासितः ॥२१॥ दिशामुखतमस्तोममोलिसोमनिवारितः चलच्चामरवातोत्थप्रोतप्रोञ्चलितांबरः ॥२२॥ छत्रछायावारितो घदृ भानुभानुमरीचिमान् ॥ सोमः सहोमया भ्यागात् गणसंघसमावृतः ॥२३॥ सुरासुरकरोन्मुक्तसुमवर्षोघसंततिः ॥ तद्वृषबंधसंबंधमरुदामोदमोदितः ॥२४॥ विकचत्कमलामोदमालया शोभिविग्रहः ॥ बकसंनिभमुक्तादि मालाकलितकंधरः ॥२५॥ फणामणिकृतानेकमाणिक्यवरकंकणः ॥ जंगमाद्रिप्रतीकाशवृषारूढो भ्यगाच्छिवः ॥२६॥ मुनिकिंनरगंधर्वगानधारास्तुतस्तुतिः ॥ दृष्ट्वा देवं तदोत्तस्थो स्कंदः सिंहासना

न्तदा॥२७॥ मुनीन्द्रैश्च सुरेन्द्रैश्च गणेन्द्रैर्गणपेन च। जैगीषव्येन मुनिना प्रणनाम महेश्वरं॥२८॥ दृष्ट्वा न-
मन्तं तं स्कंदं सगणं समुनीन्सुरान्॥ द्विरदास्यं मुनीन्द्रं च जैगीषव्यं कृपांबुधिः॥२९॥ करुणासारयादृष्ट्या
चालुलोके महायशा॥ पुत्रौ गाढं परिष्वज्य मूर्ध्नि चाघ्राय शंकरः३०॥ उवाच सर्वदेवानां संनिधौ स्कंदमी-
श्वरः॥ ईश्वर उवाच॥ वत्सानया तव स्तुत्या संतुष्टोस्मि महायशा॥३१॥ धन्यया मान्यया स्कंद त्वं ममातीव-
वल्लभः॥ त्वया मद्धृदंनांभोजाद्यत् श्रुतं सारमैश्वरं॥३२॥ शैवं शिवरहस्याख्यं वद मोक्षकथाश्रयं॥ गणा-
नां च सुराणां च मुनीनां भावितात्मनां॥३३॥ जैगीषव्यं पुरस्कृत्य मम भक्तं जितेंद्रियं॥ मा दृष्टं माचैत्त
विघ्नं मम भूयात्कथारसे॥३४॥ यतो विघ्नहरस्तेद्य सन्निधौ वर्त्तते गजः॥ इत्युक्ता हेमहादेवी मालो-
क्य च हसन्हरः॥३५॥ ईश्वर उवाच॥ नाना स्थावर जंगमादि जनुभिर्भ्रांतस्य मानुष्यता मानुष्ये सति
विप्रता श्रुतिगता चाचारवत्तापरं॥ इष्टापूर्तविधिक्रियादि शतशो वृत्त्या परं शांभवे॥ लिंगालिंग
न चेत्ता मा सहि भवेन्मुक्तः स्वलिंगः सुखी॥३६॥ श्रुतिशत विधिजाल कर्ममूलास्त्रिगुणगता गत सौख्य
दुःखशीलाः॥ मनसिज सुखमांससक्त संगलीला मनन विचार विवर्जनेजवालाः३७॥ नरसुखमवा

प्य चेंद्र लोकं भव भुवनं समवाप्य मर्त्य लोकं ॥ पुनरपि जननेन कर्म शेषे र्भक्ति मपि घोर तरां समा प्नुवंति ॥ ३८ ॥ महेश्वर

किं वेदै रखिलैः पुराणानिचये रन्यो न्य निंदा परैः किं वा भारत युद्ध कीर्तन मुखैः किं क्षुद्र धर्मा दिभिः ॥

यत्रे शान कथा प्रचार विधुरा भीः सार भूताः कथाः काव्ये नापि किमत्र राम कथया दुःखो त्कटायाः फलं ॥

३९ ॥ सूत उवाच ॥ कृतांजलि पुटा देवी प्राह शंभुं सनातनं ॥ महेशं जगदाधार मना धारं महेश्वरं ॥ ४० ॥

देव्युवाच ॥ त्व त्कृपा पात्र भूतानां शुभं विदधते हर ॥ मत्तः शुश्राव वेदार्थं सारं शैव रहस्यकं ॥ ४१ ॥ स्कंदो

यं स्कंदिता राति र्विनीतो वीत मत्सरः ॥ शंकर श्री कर स्पर्शा ज्जैगीषव्य कुमारको ॥ रहस्यं यत्वया प्रोक्तं मुनी

न्श्रावयतु प्रभो ॥ ४२ ॥ सुर भूसुर संघेषु गणं द्रेषु महेश्वर ॥ प्रसादः क्रियतां मह्य श्रवणाय मुनि र्धृतः ॥

४३ ॥ जैगीषव्यो पि भक्ति मान् तव भक्त स्त्व नन्य धीः ॥ तदा देव्या वचः श्रुत्वा कर पंकज मुत्तमं ॥ ४४ ॥ निदधौ

स्कंद शिर सि जैगीषव्य स्य शंकरः ॥ शंकर श्री कर स्पर्शा ज्जैगीषव्य कुमारको ॥ ४५ ॥ नेमतुः शिव पादा

ब्जं प्रोत्फुल्ल हृदयाननौ ॥ स्कंदः शिव पदाब्जं तत् कराभ्यां संस्पृशन् जगौ ॥ ४६ ॥ अयं मे हस्त मात्रेण स्व

नेत्र कर्मस्तवैः ॥ अभ्य षिंचन्मुदा भक्त्या नान्यं किंचिद मन्यत ॥ ४७ ॥ स्कंदं प्राह महादेवः जैगीषव्यो क्षणस्तव ॥

॥श्रीईश्वर उवाच॥ शिवे किलेयं तोषकृन्मुनीश्वरेषु यस्त्रियो विश्वतः कृपाझरीभरीकुलेन लोकितः॥ कला कुलेन तर्षितोयथेणबाललांछनो त्तथैव जैगीषव्यकः कटाक्षितो भवेन्मम ॥४९॥ प्रसाद्य सर्वान मरान्मुनीन्द्रान् गणेश्वरान् स्कंद मुनी महेश्वरः॥ जगाम गौर्याजगतां विधाता संस्तूयमानो मुनिदेवसंघैः॥५०॥

॥इतिश्री शिवरहस्ये माहेश्वरे प्रथमांशे जैगीषव्य स्कंद प्रसादो नाम दशमो ध्यायः॥१०॥ श्री काशी विश्वेश्वरार्पणमस्तु॥ सूत उवाच॥ शिवदर्शनजानंद संदोहानंदकंदलः॥ प्राह शूरारि रित्थंतं मुनिमालोक्य शंकरं॥१॥ स्कंद उवाच॥ ॥जैगीषव्य शृणु व्याचरहस्याख्यानमुत्तमं॥ शिवरहस्ये देवेन देव्ये कथितकथानकं॥२॥ तद्वक्ष्यामि समासेन शृणु त्वं मुनिभिः सह॥ गणेश्वरैः सुरैश्चैतत्सारो कथयाम्यहं॥३॥ नमस्कृत्वां प्रमेयाय महादेवाय शंभवे॥ देवीं गजाननं देवं शैवाचार्यानकल्मषान्॥४॥ माहेशांशः प्रथमतो नामत्तो मुनिसत्तम॥ जैगीषव्य प्रसादं ते महेशस्य समागमः॥५॥ गणानां देवसंघानां मुनीनांच समागमः॥ मया प्रसादितो देवस्तोत्र वर्येण सत्तम॥६॥ कैलासवर्णनं चैव विचित्रं श्री महेशितुः॥ देव्या महेश संवादः कौतुकेन नगोत्तमे॥७॥ चरित्रं शिवयोस्तत्र विचित्रं भूधरोत्तमे॥ कैलासेश्वर पूजाच महेशेन प्रकल्पनं॥८॥ द्वा-

62

रप्रकाररचना गणानां स्थानकल्पनं ॥ ममदेव्याश्च विप्रेंद्र गणेशस्य महात्मनः ॥९॥ सहस्त्र लिंगाध्यायं चकैलासस्य तपः क्रिया ॥ तत्प्रसादनमीशेन तन्मौलौवसतिस्तथा ॥१०॥ कैलासस्योमयेक श्च शंभुना कल्पितोनगैः ॥ जिज्ञासाचैव देवानां देव्याः प्रादुर्भवात्सुराः ॥११॥ ज्ञानार्थकथनं चैवश्रात्मलिंगस्य पूजनं ॥ माहेशेस्मिन्महेशेनकथा प्रोक्ता शिवेनहि ॥१२॥ दिक्संख्यया मुनिश्रेष्ठ कथितोयं सहस्त्रतः ॥ द्वितीयांशो भवो नाम्ना तस्मिन्प्रोक्ता हरेणहि ॥१३॥ देव्याश्चैव तपश्चर्या मणिद्वीपागमस्तथा ॥ कल्पवाटीरम्यनीपवनद्वीपोपवर्णनं ॥१४॥ चिंतामणिमहासौधवर्णनं श्रीपुरस्यच ॥ तस्मात्कैलासगमनं कामेशस्यवपुर्धरः ॥१५॥ कामेशयाचदेव्याच तत्र नित्यमवस्थितिः ॥ हिमाचलागमश्चैव देव्यास्तत्रगतिर्मुनेः ॥१६॥ दुर्वाससो महिम्नस्य कथनं तत्तपः क्रिया ॥ द्वितीये भवसंज्ञेत्र कीथतं शंकरेणहि ॥१७॥ सहस्त्रत्रिनयेनैव श्लोकसार्धेन शंकरः ॥ हरस्तृतीयो देवेन कथितो शो मुनीश्वराः ॥१८॥ तस्मिन्मुनिप्रार्थनया व्यासेन परिकीर्त्तितं ॥ गायत्र्याश्च तपश्चर्या देव्यागमनमुत्तमं ॥१९॥ गणानां प्रेषणं चैव तीर्थेशमहिमा ततः ॥ श्रीशैलमहिमा चापि मानसार्चनकल्पनं ॥२०॥ जनकस्यच संवादो याज्ञवल्क्येनकुशांकुर ॥ पद्मावत्या

६३

रत्ननिधे संवादः परमाद्भुतः ॥२१॥ तस्योत्तरार्धे चांशस्य पूजारत्ननिधेस्तथा ॥ शिवस्य देवदेवस्य शूलिनः [महादेवस्य] ॥
२२॥ यमलोकस्य वृत्तांत दर्शनं शिवयोस्तथा ॥ संवादे भस्मरुद्राक्षधारणे महिमापि च ॥२३॥ गंगाया नर्म
दायाश्च वरप्राप्त्युपवर्णनं ॥ महेश्वरव्रतस्यैव वर्णनं श्रीमहेशितुः ॥२४॥ शैवार्चनादि कथनं शिवढुंढि
चरित्रकं ॥ त्रयस्त्रिंशत्सहस्रोत्र संख्यया प्रोक्त एव हि ॥२५॥ चतुर्थः शिवसंज्ञोपि अंशः साक्षाच्छिवोदि-
तः ॥ बृहज्ज्वाल धर्मादि कथनं दशकस्य हि ॥२६॥ भस्मरुद्राक्ष महिमा शिवलिंगार्चनस्य च ॥ म
हिमा शिवभक्तानां शैवानां भोजनेपि च ॥२७॥ शिवक्षेत्र निवासस्य कथनं बिल्वपूजनात् ॥ पूजाप्रभाव
कथनं तस्मिन्नंशे प्रकीर्तितं ॥२८॥ चतुःसहस्रतः संख्या देवदेवोदितं शुभं ॥ भर्गनाम्ना पंचमोंशः कथितो
त्र शिवेन हि ॥२९॥ ज्योतिर्लिंगं द्वादशानां महिमा तत्र कीर्तितः ॥ वामदेवोपदेशश्च श्रुतिसिद्धांत कीर्त-
नं ॥३०॥ गंगासागर महात्म्यं प्रभासे पुष्करस्य च ॥३१॥ शिवांये षट्सहस्रोत्र कथितो मुनिसत्तम ॥ शंकरांश-
स्मृतः षष्ठो दिक्संख्या क्रमसंख्यया ॥३२॥ कथितं श्रीमहेशेन तस्मिन् रुद्रोपवर्णनं ॥ शिवलिंगार्चन-
स्यापि भस्मरुद्राक्षधारिणां ॥३३॥ महिमा शांभवानां च कथितो विस्तरेण हि ॥ उग्रो नाम्ना सप्तमोंत्र कथितः

 शंकरेणहि॥३४॥देवस्य देव्या संवादो नाम साहस्र कीर्त्तनं॥अविमुक्त प्रशंसा च शतर्वज तपः क्रिया॥३५॥ माहेश्वरा-
नाम्ना मष्टोत्तराख्यानं महिम्न मथवै हरेः॥ पुष्पदंत महिम्नाख्य कथनं तत्र सत्तम॥३६॥ काट कोटरजा-
 ख्यानं क्षेत्राणां महिमा तथा॥ श्रीशैलस्यारुणाद्रेश्च तथा वृद्धाचलस्य च ॥३८॥ श्री मद्दक्षिण कैलास माहात्म्य म-
पि विस्तरात्॥ पुंडरीक पुरस्यापि कांच्याः श्री महिमाद्भुतः॥३७॥ कुंभघोण प्रशंसा च तथा मध्यार्जुनस्य च॥
चतुर्दश सहस्रेण कथितोत्र शिवेनहि॥३९॥ भीमो ष्टमो महांशेत्र कथितो विस्तरेणहि॥ दिङ्नाग
संख्यया चैव सहस्रेण मुनीश्वर॥४०॥ पाताल लोक लिंगानां महिमा कथनं मुने॥ श्री हाटकेश महिमा शेषस्या
च तपः क्रिया॥४१॥ प्रसादश्च महेशेन तस्य भूभार धारणे॥ सदाशिवांशो नवमस्त स्मिन्नु शंभोः कथान
कं॥४२॥ शिवेनोक्तं महादेव्यै नाम साहस्र मुत्तमं॥ कलौ शैव समाचार प्रमाणेन विमुक्तिदं॥४३॥ महा
शांभव धर्माणां कीर्तनं परि कीर्तनं॥ षड्क्ष संख्यया मेघ सहस्रेणैव कीर्तितं॥४४॥ ईश्वरांशो च द-
शमो दश धर्मानु कीर्तनं॥ बिल्वार्चनं रुद्र जपः पंचाक्षर महोदयः॥४५॥ शिवलिंगार्चनस्यापि भस्म रु-
द्राक्ष कीर्तनं॥ शांभवानां शिव क्षेत्र शैव भक्तार्चनं तथा॥४६॥ शिव नाम्नः स्मृतेश्चापि दशमे महिमा तु यः॥

तस्मिन्प्रकीर्तितो विप्र शंकरस्यास्य संख्यया ॥ ४७ ॥ एकादशो महादेवः प्रोक्तोंशः शंभुना तदा ॥ मन्वन्तरक्रमसंख्यातः
शिवपूजाक्रमात्मकः ॥ ४८ ॥ अभिषेचनिकानां च फलं पुष्पेषु कीर्तनं ॥ भक्तानां दशकानां च कीर्त्तनं पूजनं तथा ॥
४९ ॥ मुनिसंख्यागतं यत्तश्च ईशाना मात्र द्वादशः ॥ शिवनाम्नां सहस्रस्य कीर्तनं तत्र कीर्तितं ॥ ५० ॥ प्रसादं शंकर
स्यापि ममैवानुग्रहात्मकः ॥ शिवरत्नाकरकथा माहात्म्यं मुनितोषणं ॥ ५१ ॥ एतदध्याय साहस्रैः कीर्त्ति
तं श्रीशिवेनवे ॥ देव्यै देवेन कथितं रहस्यं शिवसंमतं ॥ ५२ ॥ यथा शिवसमो देवो नास्ति लोकत्रये
ष्वपि ॥ तथा शिवरहस्यस्य तुल्यमन्यं न विद्यते ॥ ५३ ॥ शैवसार महारत्नकोशोऽयं मुनिसत्तम ॥ पुण्यो-
ऽयं पावनश्चायं भक्तिसारकथाश्रयः ॥ ५४ ॥ संसारायासधर्माणां कथनेन विवर्जितः ॥ वर्णाश्रमश्रमकथा
कथाश्रमविवर्जितः ॥ ५५ ॥ अत्याश्रमोक्तधर्माणामाकरोऽयं महामुने ॥ नानाकथासुधाः शैवाः परमानंद
निर्भराः ॥ ५६ ॥ देव्यै देवेन कथिताः शतसाहस्रतोऽधिकाः ॥ भक्तैः श्राव्योऽयमतुलः इतिहासवरोत्तमः ॥
५७ ॥ शैवासारकथारत्न सर्वस्वोऽयं मुनीश्वराः ॥ स्कंदे गजाननेगोप्यं यथा प्रीतिर्महेशितुः ॥ ५८ ॥ तथाशि
वरहस्येपि गोप्याद्गोप्यमिदं शुभं ॥ न देयं नैव वक्तव्यमादो तेभ्यस्त्वया मुने ॥ ५९ ॥ शपेम तद्द्वयोर्वि-

प्रनोचेन्मूर्ध्नाऽघते पतेत् ॥ वेदांतसार सर्वस्वं शिव भक्ति प्रकाशनं ॥६०॥ देयं भक्ताय विप्राय पुत्राया त्वंत
रागिणे ॥ वक्तव्य मन हंकार चिन्तायात्त गुणायच ॥६१॥ शैवाय शंभोरुत्कर्ष भक्ति युक्ताय ते मुने ॥ संवत्स
रो षितायत्वं भक्तायां ते निवासिते ॥६२॥ त्रिनेत्र चिंता पारायनान्य स्मै सत्य मुच्यते ॥ स्कंद उवाच ॥ जगा
द्जगतांगुरु स्त्रि जगतांजननी त्रीं मुदा जगत्त्रितयजंतु हृत्त्रिविधतापदुःखापहं ॥६३॥ जडाजडजग-
स्थिति प्रलय भाव भावं भवं विशोषयदिदं मुहुः शिवरहस्य रत्नं शुभाम् ॥६४॥ यदादि जगतां पति
प्रमथनाथ नाथास्य तो विनिःसृत मिदं सुधाधिक मधु प्रियं श्रोत्रयोः समस्त जनता मनो मलहरं परं
सर्व तत्त्व देव भवतां वदे भव दवाग्नि संशोषकं ॥ विधुं तुद मुखो त्थितं प्रकट सोम धाम प्रभा विकाशि-
त दिशा मुख प्रथित पांडि मानोपमं ॥ सुधामपि बुधाः परं हवन वक्त्र हव्याशना विधूय सुर लोकगाः
परि पठंति शंभोः कथां ॥ अनाथ जन नाथ ते प्रमथ नाथ नाथोस्म्यहं गिरींद्र वर कन्यका हृदय नाथ पादां
बुजं ॥ मनोरथ पथातिगं प्रथय भक्ति भावं त्वयि क्षमारथ रथांगकं स्फुट सुपाणि बाणासनं हिरण्य
नग कार्मुकं त्रिदश लोक रक्षाकरं दिवाकर निशाकर प्रथित चक्र वेदाश्व कं स्वकं परम व प्रभो

प्र० अ० ३७.१९

३०

सकलविश्वनाथाधुना ॥ ६६ ॥ सएव सुखसंपदां निधिरपारपुण्यास्पदः सएव सुकृतासदाजयति वे-
दमध्येति च ॥ सदाननिचयार्जितप्रभवधर्मसाराधिकः सउत्तम स सागरावसन सर्वरादानकृत ॥ ६७ ॥
क्षणार्धमपि कादरः शिवरहस्यधर्मश्रवाः सएव गणनायकः शिवपदाब्जयुग्मार्चकः ॥ सुरासुरच-
राचरप्रभवनाशरक्षाक्रमैर्नयायुतरणांकणप्रभवयुद्धहेतुःखोत्कटैः श्रमैर्विरसधूर्गतैर्विविधवर्णध-
र्मश्रमैः कथाभिरिह नश्वरं न भवति श्रुतौ शेखरं ॥ ६८ ॥ तुषाद्रिरभिखंडने किमिह लभ्यते तंडुल
स्तथा शिवकथां विना नहि शमाय जंतोर्मनः ॥ शैवानंदरहस्यसागरमहाद्वीपोपमा द्वादश तेंशाः

७९

शाश्वतशंकरेण विदितानामानि तेषां ब्रुवे ॥ ६९ ॥ माहेशः प्रथमस्ततोपि हि भवः हरःश्चतुर्थो शि-
वः भर्गःशंकर उग्र भीमः शिवः ~~७०॥ साहस्रेश्च शतैः सहस्रकिरणाकारैस्तथा शंकरो दिलोका~~
मसदाशिवेश्वरमहादेवेश संज्ञाः क्रमात् ॥ ग्रंथैः पद्ममहाघमोलिभिर्दुरैर्वेदांतसारातिगैः शब्दैः सुंदर-
वाग्विलासमधुरैरध्यायवृंदैः शिवः ॥ ७० ॥ साहस्रैश्च शतैः सहस्रकिरणाकारैस्तथा शंकरो दिलो
कामरवृंदवेदऋतुभिः दिङ्नागतः संख्यया ॥ मद्देक्रामलनीरनीरजसमं नेत्रक्रमं शंकरस्यास्या-

क्षि क्रमशो मुनि क्रम मयो देव्ये शिवेना कथि ॥ ७१॥ ॥ इति श्री शिवरहस्य प्रथम माहेश्वरांशे स्कंदजैगीषव्य संवादे नाम एकादशोध्यायः ॥ ११॥ श्री काशी विश्वेश्वरार्पण मस्तु ॥ सूत उवाच ॥ जैगीषव्याय यत्प्रोक्तं स्कंदेनामित तेजसा ॥ कैलासापार सौधानां गोपुराणां नगस्य च ॥ १॥ प्रमाणं लिंग संधाना मालयानां च निर्मितं ॥ शिवेन निर्मितं साक्षात् मनसेवातुल प्रभं ॥ २॥ स्कन्द उवाच ॥ जैगीषव्य शृणुष्वाद्य कैलास स्थान मुत्तमं ॥ शृणुष्व शैल शिखरैः शंभोरावास मुत्तमं ॥ ३॥ सर्वगस्यापि देवस्य महादेवस्य शूलिनः ॥ महाकैलास मित्युक्तं शिव तत्वार्थ वेदिभिः ॥ ४॥ ईशान गण मुख्यस्य कैलास दक्षिणाश्रमं ॥ श्रयं मुनेर्मेरं द्रूणां निवासो मेरु रुन्नतः ॥ ५॥ प्रविष्टः षोडशाधस्तात् द्वात्रिंशन्मूर्ध्नि विस्तृतः ॥ वृषस्तंभ मयो भाति महाकैलास संनिधौ ॥ ६॥ कैलासादपि पूर्वस्यां पंचाशच्च सहस्रके ॥ योजने प्राक् स्थितो मेरुर्नानासुरगणाश्रयः ॥ ७॥ ज्वलज्ज्वलन संकाशः कनकोत्तम पर्वतः ॥ सहस्र योजनोत्सेधं विद्धि मेरुं सुरालयं ॥ ८॥ षट् षष्टिः कथितो योगिन्नूर्ध्वायामो मेरु मूलतः ॥ लक्ष योजन मानेन कैलासो धरणी धरः ॥ ९॥ कुलाचलाः सप्तशतं प्राकार परिघास्तथा ॥ प्राकारस्यांतरालस्य सप्तद्वीपा ससागरा ॥ १०॥ सप्ताय:

प्र॰ स्क॰ अ-१२

ध्वंसुधांबोधिकल्लोलामलवीजितः॥ कोटियोजनमानेन कैलासो भूधरो महान्॥११॥ राजतो राजतेत्यंतं पंचा
शल्लक्षमानतः॥ सप्तपातालमूलांतः सत्यलोकांतउच्छ्रयः॥१२॥ महाराजतभूभाग चंद्रकोटिसमप्रभः॥ नाग्नि
र्न विद्युन्नो सूर्यस्तत्तेजः सदृसा नहि॥१३॥ चतुर्दश महालोकानुच्छ्रयः शिखरैः स्वयं॥ मध्ये सुधासाग
रस्य फेनमंडोपसंस्थितः॥१४॥ न हरो न हरिर्धाता महेंद्राद्याश्च देवताः॥ न सुपर्णोरगा यक्षा गंधर्वाऽऽदि
तेः सुताः॥१५॥ नवीक्षितुं शक्नुवंति किं पुनर्गंतिरं जसा॥ तत्र भाभिर्हता लोका हराज हरिणां द्विज॥१६॥ तत्ते
जसा प्रतिहताः सूर्येंदुपवनानलाः॥ सुधासागरकल्लोलैः कैलासस्पर्शवायवः॥१७॥ पुनंति लोकानखिला
न् विष्णुब्रह्महरामरान्॥ सुरासुराणां गमनं न तत्र मनसापि हि॥१८॥ न वेदवचनैः शक्यो महाकैलास
पर्वतः॥ तल्लेशलेशमहिमाकः शक्तो वक्तुमप्यणु॥१९॥ सहस्रवदनः शेषः सहस्राक्षो पि नेक्षते॥ किं
पुनर्मानवाः क्षुद्रा वराकास्ते सुरासुराः॥२०॥ शतं कुलाचलामुख्याः प्राकार इव संस्थिताः॥ महद्भिरुच्छ्रितैः
शृंगैः केचिद्दो पुरवत्स्थिताः॥२१॥ तदंतरालेषु परिघाकृतयोब्धयः॥ ततोपि सप्तप्राकारं शंभोरंतर्गृहं
परं॥२२॥ प्राकारभूतास्ते शैला शैलास्तान् शृणुष्व द्विजोत्तम॥ कुमुदः पारियात्रश्च मैनाकः पूर्वदिग्गताः
॥२३॥

दर्दुरो मलयो विंध्यः पश्चिमे योगिपुंगव। उदयास्ताचलौ मुंजो उत्तरस्यां दिशि स्थिताः ॥२४॥ नीलो दक्षिणकैलासो हिमवान् दक्षिणे स्थितः॥ विगाह्यावहिताः सर्वेश्च ब्धिभिः सर्वतो दिशं ॥२५॥ द्वीपाब्धयस्ते परिध्याः सप्त सप्तेव पर्वताः॥ तदंतरांतरालेषु विहरंति दिवौकसः ॥२६॥ गंधर्वाप्सरसः सिद्धा नागयक्षाः सुपर्णकाः॥ किंनराः पुरुषाः पुण्याः विद्याधराः सचारणाः ॥२७॥ मुनयो गणसंघाश्च नानाभूमिकभूमयः॥ ततोपि विष्णुब्रह्माद्या ईशाना रुद्रमूर्तयः ॥२८॥ विहरंति पयोभोंधि प्राकारवरमाश्रिताः॥ चन्द्रकांतमणिप्रोद्यत्प्राकारोस्ति तदंतरे॥ स्वादूदकाब्धितीरे च ततोपि प्रमथाधिपाः ॥२९॥ ततोपि रत्नप्राकारो दशसाहस्रयोजनः॥ तद्रत्नकांतिधाराभिर्मंडितं भुवनत्रयं ॥३०॥ मत्तकोकिलनेत्राभः तत्रास्ते रत्नपर्वतः॥ शतयोजनमुच्छ्रायः पद्मरागनगोत्तमः ॥३१॥ मयूखमालाविततत्तन्मयूखवितिरस्कृतः॥ चन्द्रकांतमणिप्रोद्यत्प्राकारोस्ति तदंतरे ॥३२॥ पंचाशत्सहस्रं च योजनाया मतो द्विज॥ सोमार्क्कशतधाराभिः निर्यत्पीयूषधारवान् ॥३३॥ तत्कांतिसारधाराभीरंजितास्तत्र भूमयः॥ हिमसारमहासारधाराव्यापिनगोत्तमः ॥३४॥ दशसहस्रमानेन तत्रास्ते हरिकोद्यमः॥ इन्द्रनीलामलमणिप्राकारोस्ति तदंतरे ॥३५॥

माहेश्व०
प्र०खं०
अ०१२

३२

३२

पंचाशत्सोपि मानेन नीलोत्पल द्युतिः ॥ तन्नैल्यगर्भसंदर्यधारा धौरेक भूमयः ॥३६॥ तत्रास्ति पर्वतवरः
इंद्रनीलशिलोच्चयः ॥ नीलनीरद संश्लिष्ट विद्युल्लेखान्वितच्छविः ॥३७॥ दश सहस्र विस्तारः परिणा
हे पि तादृशः ॥ रहिन्मणींद्र प्रवरं प्राकारोस्ति तदंतरः ॥३८॥ तन्मणींद्र प्रभा भासि हरिता एव भूमयः
प्रवाल पर्वतस्तत्र विंशत्साहस्र मुन्नतः ॥३९॥ विंबामलल सत्कांति कांतो भूधर नायकः ॥ तदंतरे पि-
प्राकारो गोमेद मणि कल्पितः ॥ त्रिंशत्साहस्र मानेन मधु पिंगल सुंदरः ॥ तत्रोच्च पर्वतो विप्र कुरु-
विंद मणि प्रभः ॥४१॥ पक्ष संख्या सहस्रेण शिखरैश्चापि तादृशः ॥ तस्यां तरे पि प्राकारः पुष्पराग शिला
चितः ॥४२॥ चत्वारिंशत् सहस्राणां योजनोन्नत मानतः ॥ तस्यामलच्छवि गणैः सदृशास्तत्र भूमयः ॥

६७

४३॥ तत्रापि भूधरश्रेष्ठो मुक्तामणि शतेश्चितः ॥ उन्मत्ताखु भुगात्तुंग लोचनामलच्छविः ॥४४॥ तदं-
तरालि पाकारो विंशत्साहस्र मानतः ॥ तत्त्विषाभिस्तत स्सर्वे पीतीभूत दिगंतरः ॥४५॥ वैडूर्यानेक
सूत्रोत्थ धारारस विजृंभिताः ॥ भूमयस्तत्र शोभंते विस्मयानां स्मयप्रदाः ॥४६॥ तत्रास्ति पर्वतवरो
नवल युतच्छविः ॥ क्वचिन्मरकतस्वच्छल हरी हरिताकृतिः ॥४७॥ क्वचिद्विद्रुम संकाशः संध्या-

घननिभः क्वचित् ॥ क्वचिच्चीरकजात्यच्छफलमूलसमच्छविः ॥ ४८ ॥ क्वचिद्वैदूर्यसंज्ञोत्थभाभासितमोहर्वं-दिगंतरः ॥ उन्मत्तकोकिलाक्षाभकुरुविंदनिभः क्वचित् ॥ ४९ ॥ पुष्परागसरागोद्यद्गारुत्कोरुणः क्वचित् ॥ तृणग्राहि महानीलनीलिमाचनभोपमः ॥ ५० ॥ क्वचिद्गोमेदकास्फारमधुधारासमच्छविः ॥ मुक्ताकांतितिरस्कारिश्लक्ष्णनैर्मल्यमायुतः ॥ ५१ ॥ स्वच्छाच्छस्फटिकोपांतबिंबिताखिलदिक्तटः ॥ नानारागमयूखौघइंद्रचापनिभः क्वचित् ॥ ५२ ॥ तत्रास्ति मंडपवरं नानाचित्रविचित्रितं ॥ पद्मरागमणिस्तंभस्तंभपीठमनोहरं ॥ ५३ ॥ सिंहशार्दूलशरभगजहंसशुकाकृतिः ॥ व्यालीशुंडनलिन्यादिचित्रचित्रितविस्मयं ॥ ५४ ॥ एकैकरत्नसंकॢप्तनीलोच्छ्रायेकभासुरं ॥ पंक्तिशस्तंभसाहस्रैः नवरत्नपरिष्कृतैः ॥ ५५ ॥ आपादपीठजश्लक्ष्णसोपानैर्हि सुभित्तिकं ॥ स्वच्छादर्शतलप्रायभूमिभागैकरंजितं ॥ ५६ ॥ ततस्तंभप्रभाज्योत्स्नाप्रभाकरशतप्रभं ॥ न सूर्यचन्द्रौ प्रकाशेते वह्निनक्षत्रविद्युतां ॥ ५७ ॥ तिरस्कृताः प्रभास्तत्र न रात्रिर्न दिवा क्वनु ॥ एवं लक्षस्तंभयुता मंडपास्तत्र कल्पिताः ॥ ५८ ॥ पर्यंतगोपुरोत्तुंगरत्नसौधायुतैर्वृतः ॥ सहस्रलक्षफलकैःस्तंभकुंभैर्युतो मुने ॥ ५९ ॥ गोपु-

प्र० अ० १२

३३

राणां प्रमाणं तु मनसापि न शक्यते ॥ नानारूपधृता शद्दिः मणिकल्पितविग्रहाः ॥ ६० ॥ मूर्त्तयो देवदेवस्य देव्या
वाहनसंयुताः ॥ स्कंदहेरंबनंदीनां सत्यलोकांतमुच्छ्रिताः ॥ ६१ ॥ गोपुराणां तले दिव्ये विस्तारायामलक्ष
कं ॥ लिंगोद्भवसूत पार्श्वे वृषवाहस्ततः परं ॥ ६२ ॥ सिन्धुरत्वक् परीवीतः क्वचित्सांबः सपुत्रकः ॥ स्कंद
हेरंबसहितः क्वचिद्रुद्रगणैर्वृतः ॥ उमार्धविग्रहश्चापि नृत्ताटोपयुतः क्वचित् ॥ वामांगदक्षिणांगोद्यज्जना-
र्दनविधिः क्वचित् ॥ ६४ ॥ देवीपरिणयाकारः क्वचिद्भिक्षाटनाकृतिः ॥ शूलासक्तकरश्चापि मृगपाणिः
पुरारिहा ॥ ६५ ॥ अंधकासुरसंहारो दक्षिणामूर्तिरूपधृक् ॥ मुनीनांज्ञानदः सिद्धिचिन्मुद्रापरिचिन्हितः
॥ ६६ ॥ तत्पूर्ववामदेवाद्याईशानाघोरसंज्ञकाः ॥ बालेंदुमुकुटाः सर्वे कपर्दवरशोभिताः ॥ ६७ ॥ रत्नाभर-
णभूषाढ्या मूर्तयः शंकरस्य हि ॥ द्विकपालपालिकाभिश्च तत्तद्रागमणिप्रभाः ॥ ६८ ॥ कल्पिताः परमेशेन
शिवलीलाविचित्रिताः ॥ पर्यंतस्फाटिकायश्च (भाश्च) वृषानीलविलोचनाः ॥ ६९ ॥ महाशृंगैकमकुटघंटामणिवि-
भूषणाः ॥ गोपुरोर्ध्वगताः सर्वे महाहीरकशृंगकाः ॥ ७० ॥ प्राकाराराजवृषभाः महार्हमणिकल्पिताः (कल्प) ॥ लता
नां कोटिश्चापि (भि) गोपुराणां प्रकल्पनैः ॥ ७१ ॥ गोपुराग्रमहारत्नकलशास्त्यक्त(उत्क)तारकेः ॥ द्योधय मानो ज्वलित समीरण

पताककाः ॥७२॥ तत्र गर्भगृहं शंभोर्नवरत्नचितोज्वलं ॥ तत्रास्ति मणिपीठे च स्वच्छं स्फटिकसंन्निभं ॥७३॥ महालिंगं महाकारं रत्ननागफणान्वितं ॥ महारत्नवने जात फुल्लमालाविभूषितं ॥७४॥ सुवर्णरवचितानेकबिल्वचंपकपूजितं ॥ शंभुना च महादेव्या लोकानुग्रहकाम्यया ॥७५॥ समर्चितं त्रिकाले तु प्रदोषे तु विशेषतः ॥ तत्र स्थ रत्ननिर्यातकांतिभिर्दीपितं तदा ॥७६॥ तत्रातोद्यानि कुर्वंति गणाः शंभोर्महात्मनः ॥ काहलीमुरुजापारमड्डुडिंडिमझर्झराः ॥७७॥ शंखमर्दलभेर्यश्च निःसाणपटहाणकाः ॥ गोमुखास्स्वस्तिकातालाबेणुबीणानिनादिताः ॥७८॥ रुद्रकन्यासहस्राणि नाट्यं कुर्वंति तत्र हि ॥ हावभावमनोज्ञानि पेशलानि च ॥७९॥ यौवनोन्मादधारीणि रणितांघ्रिजनूपुरैः ॥ क्वणद्रत्नजटाटंककपोलामलसत्कृवि ॥८०॥ धूपामोदैर्बहुलगंधगंधाकृतादिशः ॥ नंदिप्रोत्सारितगणास्तत्रास्ते शंकरो बया ॥ ८१॥ पूजितं तं महालिंगं पश्यन् रत्नैः सुपूजितं ॥ रुद्रकन्याकराब्जोत्थ नरव क्वणनद्यदाहितं ॥८२॥ तंत्रीमुखोत्थगांधर्वगानं शृण्वन् सदा बया ॥ शिवशिव शिव शंभो चंद्रमौले मलात्मन् हर हर गुरुभारं शां भवान् मोदयस्व ॥ वितर परममुक्तिं संसृतिर्मा कदाचित् भवतु भवभवाब्धे स्तारकं त्वां प्रपन्नाः ॥८३॥ एवं शंकरनामसारसुधिया

३४

प्र०अं०
अ० १२

३४

ह्लादयन् गणान् शंकरः ॥ पश्येति प्रसभं शिवा वदन जांभोज भ्रमत्वर् पदः ॥ ८४ ॥ ईश्वर उवाच ॥ कैलासे श्वर लिंगमेतदमलं दृष्टं सकृत्पूजितं मामप्याशु सुधार्द्र सार हृदयं कर्तुं प्रवृत्तं शिवे ॥ इत्यंबा वदनं निरीक्ष्य भगवान् प्रोवाच साक्षाच्छिवः तल्लिंगालय दर्शनं च सुकरं पुण्यैरगण्यैरपि ॥ ८५ ॥ नोपश्यंति सुरासुराः प्रमथपाः विष्णुर्विधिर्नेश्वरः पश्यत्येव महेश्वरो गिरिजया स्वं लिंग मत्यादरात् ॥ भोगी भोग फणा मणि प्रविलसल्लिंगैक मौलीलसच्चंद्रसार कर प्रचार जनितानंग प्रभावोज्झितं ॥ ८६ ॥ ॥ इति श्री शिं० प्र० माहेश्वरांशे कैलास वर्णनं नाम द्वादशोध्यायः ॥ १२ ॥ श्री शिवार्पणमस्तु ॥ सूत उवाच ॥ कैलासेश्वर लिंगस्य महादेवः सनातनः ॥ वरिवस्यां स्वयं चक्रे सर्व पूज्योपि शंकरः ॥ १ ॥ मुनय ऊचुः ॥ स कथं सर्व पूज्योपि भगवान् गजा पतिः ॥ कैलासेश्वर लिंगस्य पूजनं कृतवान् वद ॥ २ ॥ सूत उवाच ॥ एवमेव पुरा पृष्टो जैगीषव्येन शांकरिः ॥ तमाह विनयानम्रं देव सेनापतिः पुरा ॥ ३ ॥ स्कंद उवाच साधु पृष्टं त्वया विप्र तत्ते वक्ष्यामि सांप्रतं ॥ देवदेवस्य चरितं शृण्वतामघनाशनं ॥ ४ ॥ सर्व गोप्यो धर्मात्मा सर्वाकारतया स्थितः ॥ लिंगार्चनं हि सर्वेषां विमुक्तिदमिति द्विजाः ॥ ५ ॥ स्वयं करोति भगवान् अंबिकापतिरीश्वरः ॥ भुक्तिदं मुक्तिदं चेति-

शिवर०१ सर्वेषां बोधनायहि ॥६॥ संसार सागरे मग्नान् समुत्थर्तुं महेश्वरः ॥ कार्यं सुरासुरेश्चैवं विष्णुब्रह्ममरुद्गणैः ॥७॥ देवै मुनींद्रैर्गणपैर्द्विजैश्चैवाथ शांकरैः ॥ पूजैव परमं श्रेयः इति दर्शयितुं शिवः ॥८॥ स्वयं देव्या महादेवः पूजां लिंगे करोति हि ॥ तल्लिंगपूजनं देव्या शिवेना कारितं शृणु ॥९॥ प्रातः संगवमध्याह्ने प्रदोषेषु मुनीश्वराः ॥ नंदिकेशादिगणपैः रुद्राणीभिः सदा शिवः ॥१०॥ ~~गंगा नौ तैश्च संभारैर्मनसा कल्पनाद्यैः ॥१२॥~~ पूजाप्रकल्पनं शंभोः शंभुनावरिवस्यया ॥ कैलासेश्वरलिंगस्य पूजनं तच्छृणुष्व मे ॥११॥ सप्तसागरपात्रोत्थरसधारादिभिः शिवः ॥ पूजया भोगमोक्षौ च सर्वेषां च प्रदर्शितुं ॥ करोत्यपचितिः शंभुः कैलासेश्वरपूजनं ॥१३॥ ॥जैगीषव्य उवाच॥ ॥तत्पूजनप्रकारं मे कथय श्रवणे धृतः ॥ एभिर्मुनिवरैर्देवैर्गणेंद्रैश्च विशेषतः ॥१४॥ स्कंद उवाच ॥ शृणु त्वं देवदेवेश कैलासेश्वरपूजनं ॥ यथा कृतं महेशेन शृणु त्वं मुक्तिदायकं ॥१५॥ श्रवणेनापि भक्तानां सर्वेषां मुक्तिदायकं ॥ शृणुष्वैकमना विप्र त्वमेभिर्मुनिभिः सुरैः ॥१६॥ गणोघैर्नंदिकेशाद्यैरंबिकापतिपूजनं ॥ देव्यै देवेन कथितं पृष्टस्त्वे शंकरः स्वयं ॥१७॥ तद्वदेत्यामि समासेन शृणु त्वं पापनाशनं ॥ स्नात्वा कैलासगंगातटमणिकलि-

माहेश्व० प्र०खं० अ०-१३

३५

१ गंगा नौ तैश्च संभारैर्मनसा कल्पनाद्यैः ॥१२॥

"४ पं-२ "किंचित् किंचिदुदंचदंचलद्दृगं भोजावली मालिकां॥ वारं वार मिहार्पयत्यगजया जीवत्क्रयार्थी शिवः॥"
"४ पं-५ "नेत्रानाव्यां चत्वधरे कमलगणगणैः संयुतात्यग्र गंगा॥ तन्मध्ये ब्रह्मगंगा स्फटिक निभजला पंचताः पंचतान्ताः॥ एता या मणि लिंग पंचमुखतः सन्निःसृता मण्डपात्॥ पुण्याः पुण्य तरंग शीतलजलाः क्रूरैकधाख्याः पराः॥"

ते मंडपे शंभुरीशो देव्या नंदीशमुख्यैर्गणवरसहितो भस्मनो धूल्यगात्रं॥ कृत्वा भाल तले त्रिपुंड्र रचनां बाले दुमौलिस्वयं रुद्राक्षामलहार कंठवलयः पंचास्य पंचाक्षरः॥१८॥ तत्रेशानवरस्य पंचवरणं गात्रस्य पंचा (दास्यास्य) ननेशानेस्य ईश्वर लिंग मुद्गततमं तत्वं च वक्त्रेश्वरं॥ तद्धक्त्रमलतो झरि भर रसैः पंचापगा निःसृताः कैलाश (सा) च लनिम्नगा तट महालिंगैक सोपालयाः॥१९॥ (गता लक्ष्मू सोपानकाः) प्राच्यां रत्नाढ्य गंगा शिव तरु गभधा देव गंगा किलाख्ये पश्चात् कैलास गंगा तट परभुवि गा रत्न सोपान युक्ता॥ दिव्यापार शिवालयस्थित महालिंगैक संघाकुला तीरे सुप्रथितो रुमंडप मणी कुम्भैः सुधाब्धि गमाः॥२०॥ नाना बिल्व वनैरपार तरुजैः फुल्ल प्रसूनाकुलैः पक्षीणां विरुतैर्युतार बकुलैः रक्तोद्धदेहेल्लकैः॥ कोकानां च कुलैः सकच्छपमहामीनैर्बकानां कुलैः स्तोकैः पोतक चक्रवाककुरैः पुण्यैश्च सत्सारसैः॥२१॥ ~~स्कंद उवाच~~॥ तत्तीरामल मंडपे मणि महाकुम्भे प्रभु सिंहासने देव्यानंदिगणेश्वरैर्हेरवरः पश्यन् सरित्निर्झरैः॥ लिंगं पंचमुखेश्वरं मधुरिमानेत्रां चलैः शंकरः तद्धक्त्रामल पंकजोद्भवनदीः पुण्यास्तदाहेश्वरः॥२२॥ श्रीईश्वर उवाच॥ प्रालेया चलमिंदुकुंद धवलं गोक्षीर फेन प्रभं भस्माभ्यंगमनंग देह दहन ज्वालावली लोचनं॥ विष्णु ब्रह्म मरुद्गणार्चित पदं ऋग्वेद नादोदयं वंदेहं सकलंकलं

(१) "उरवकै शोणीद्ध पंचानन॥ १"

८०

करहितं स्थाणोर्मुखं पश्चिमं ॥२३॥ गौरं कुंकुमपंकिलं सतिलकं व्यापांडुगंडस्थलं ॥ भ्रूविक्षेपकटाक्ष माहेश्व॰
वीक्षणलसत्संसक्तकर्णोत्पलं ॥ स्निग्धं बिंबफलाधरप्रहसितं नीलालकालंकृतं ॥ वंदे याजुषवेदघोनाद प्र॰ श्रं॰ अ-93
षजनकं वक्त्रं हरस्योत्तरं ॥२४॥ बालार्काग्नितडित्प्रदीप्तकनकप्रस्पर्धितेजोरुणं ॥ गंभीरध्वनिसामवेद
जनकं ताम्राधरं सुंदरं ॥ अर्धेंदुद्युतिलोलसुंदरजटाभारप्रबद्धोरगं ॥ वंदे सिद्धसुरासुरेंद्रनमितं पू-
र्वं मुखं शूलिनः ॥२५॥ कालाभ्रभ्रमरांजनद्युतिनिभं व्यावृत्तपिंगेक्षणं ॥ कर्णोद्भासितभोगिमस्तकमणि
प्रोद्भिन्नदंष्ट्रांकुरं ॥ सर्पप्रोतकपालशुक्तिशकलं व्याकीर्णमाशेखरं ॥ वंदे दक्षिणमीश्वरस्य वदनं चाथर्व
नादोदयं ॥२६॥ व्यक्ताव्यक्तनिरूपितं च परमं शुद्धोंशमत्वाधिकं ॥ तस्मादुत्तरतत्वमक्षरमिदं ध्येयं स
दा योगिभिः ॥ ॐकारादिसमस्तमंत्रजनकं सूक्ष्मातिसूक्ष्मं परं ॥ ध्यायेत्पंचममीश्वरस्य वदनं खव्यापि
तेजोमयं ॥२७॥ एतानि पंचवदनानि महेश्वरस्य ये कीर्तयंति मनुजाः सततं प्रभाते ॥ गच्छंति ते शिवपदं
रुचिरैर्विमानैः ॥ क्रीडंति शंकरगणैः सततं शिवाग्रे ॥२८॥ इत्युक्त्वा निरगात्ततः सुरसरित्तीरात्तदा दोलितैः ॥
हारैस्तैर्भुजगेश्वरप्रकालितै रत्नांकुरस्तान्दुकः ॥ कैलासेश्वरधाम सुंदरमहानंदैकसारास्पदं दृष्ट्वा लिंग

वरं प्रदोषसमये संपूज्य पूजा भरैः ॥ २९ ॥ श्रीविश्वेश्वर उग्र उग्र इनुजारातिप्रियः शंकरः श्रीकंठः कलुषाद्रिपक्षदलनस्वाराडसंगः शिवः ॥ प्रोत्फुल्लसुरपंकजल्लसद्धक्षो भवानीहरः पश्येति प्रसभं प्रदोषमहिमारंभेकपूजाभरं ॥ ३० ॥ श्रीइश्वर उवाच ॥ ॥ कुंभैरंभोधराच्छच्छवि जितधवलैः पूरितैः क्षीरवार्भिः क्रमस्मा च्छवस्त्रैर्गिरिकुलितनये हाटकैराजतैश्च ॥ रत्नोत्कृष्टाच्छरत्नैरपरिमितघनैः कांतिजालप्रपूर्णैर्युक्तैस्तज्जैः परेश्च स्मितशुभगवदने नित्यसेवं करोमि ॥ ३१ ॥ कुंभैः किंच पुनस्तथा मम गणनीतैः सुपूर्णैः प्रियपर्वौघच्छशिसंनिभैः स्फटिकजैः कोट्यावधी संख्यया ॥ तत्क्षीरोत्तममंडसारसुभगैः सिंचामि लिंगे मम कैलासेश्वरनायके जनिजरारोगापहे शंकरि ॥ ३२ ॥ आनीतं मम तत्पयोंबुधिभवं वीरैर्गणेंद्रैः शिवे सद्वृत्तामलधारया जनि मुमे तुष्टः प्रदोषे ष्वहं ॥ कष्टानि प्रसभं हरामि सुकृतां राशिं दिशामीक्षणात्सिंचाल्लिंगसुपूजकाय गिरिजे तस्मादहं पूजये ॥ ३३ ॥ दध्यंभोनिधिसंभवैर्निविडितं तत्खंडमंडं दधि प्रोद्यद्दिंडिममंडलाभमगजे दत्वा स्वलिंगोत्तमे ॥ गोदोह प्रथिते प्रदोषसमये संदाति तावोचके कार्यं पूजने तदेव समये सर्वैः सुरैरित्यहं ॥ ३४ ॥ तल्लिंगं परिपूजया मिव सुधाधृक् धुर्यमौलौः निशं ॥ ~~तन्माज्यामल~~

५ पं-२ तत्राज्यामल गन्धसार सुभगा गन्धीकृतास्ता दिशः ॥

शिवरह: ~~गंधसार सुभगा गंधीकृतास्ता दिशः~~ ॥३५॥ उत्तुंगामलरत्नकुंभविलसत्प्राज्याज्यधारादिभिः। स्वाज्यांभोधिमाहेश
समाहृतैर्मम गणैः संख्यातिगं तद्घृतं ॥३६॥ सिंचामि प्रसभं सुगोघृतघनैः कैलास[ह्] लिंगं मम। मध्वंभो
धिसमाहृतैर्मणिघटैर्माध्वीकसारं मधु ॥ गर्भोद्यन्मणिसारकांतिसुभगैर्गोमेदिकाद्यैः प्रभैः सिंचा   प्र-सं. अ-१३
३८   म्यद्रिवरात्मजे सुमधुराधारे य गर्भे मधु ॥३७॥ धाराकार मदीय लिंगशिरसि हर्षेण पश्यांबिके शैलो
द्दाम शिखाशिलारिता द्रृतुंग गंडो[सारी]पमाः ॥ प्रालेयाचलमौलिसार सुभगाश्चापांडुराः शर्कराः ॥ दत्वा
तन्मम लिंगमौलिविलसच्चंद्रांशु धारासमं ॥३८॥ हर्षोत्फुल्ल विहृदंतरः प्रतिदिनं हृष्यामि पश्या
द्रिजे ॥ कुल्यास्तत्र मनोरमाद्रितनये नारेलनीरोद्भवाः ॥ ताभिः संभृतसद्धृदादिविततैर्लक्षैः प्रवाह
कुलात्तल्लिंगसेकनीरैः प्रवहति मधुजा देव गंगेति नाम्ना ॥ तुंगापौघतरंगभंगसुभगा तस्यां रता
स्तैः सुराः ॥ सर्वे विष्णुपितामहेन्द्रवरुणाश्चानंदमग्ना वृताः ॥ तीर्थं तीर्थ[परं]परेक फलदं ज्ञात्वानुभूया
पितैः सेवंते सततं नितांतमगजे जंतुं पुनः संस्मृतिं ॥ सप्तच्छदाद्य फल शैलवराद्रिकन्ये कुष्मे मयापसु   ३७
गुरुप्रीत[त]रश्च मेरोः" तच्छैः रत्नगार राहितैः शशिखंडमौलि लिंगार्चनस्य फलमेव जनुर्भवानि
॥३९॥

उत्तुंग साल सुरसाल रसाल सारे निष्टप्त हेम झरि सोदर गर्भ जाते॥ तल्लिंग सेचन मुमे सुघटैः करो मिमेम पुंसा

मपि प्रमथ नाथ पदं ददाति॥ ४०॥ देवस्त्री कुच संनिकाशलि कुचा पार गंधजं स्फारा सार महा रसादि कल-

शैः संस्नापयाम्यं विके॥ कैलाशाचल लिंग मौलि विलसल्लिंगे कषद्भूषणं लिंगं त्वे तद पारगंध लुलितैर्नी

रैश्च गंधोदकैः ४१॥ इक्षु सागर महो भिभिरीशे लिंगमौलिरियमेव विशिष्टा॥ सिक्त ये घट सहस्र धारया॥

कारिता गिरिसुते कमनीया॥४२॥ कोशैः काननसंभवैर्मधुझरी सारातिसार स्फुटं निर्यत् पीत तराति कांति

निर्वहे गंधी कृताशा मुखैः॥ तत्कोशा मल राशिभि र्गिरिसुते सच्छन्न मेशं शिरः पश्या मिप्रथिते क्षणः प्र

कटितै पुण्य प्रदोषे मम॥ कस्तूरी घन सार कुंकुम महा पाटी रसारै र्घटैश्चंद्रा सार विलोलि तांबु घटितैः स

त्पाटला मोदितैः॥४३॥ श्रांता मे गण पुंगवा श्च नितरां पुण्ये प्रदोषे मम स्वादू दामल नील धारित घटोद्वा

हे परं शैलजे॥ शंखानां च सहस्रकै मणि चितै र्गो शृंग धारादिभिः क्षीराज्यादि मधु प्रवाह जलधि

लुष्टै श्चतै लैरपि॥४४॥ तद्धौतम पिष्ट लेपन गत श्री चिक्कणा घर्षणैः श्रीपत्रै मृदु सार सूक्ष्म

तृण केरुत्पंच गव्यैरपि सौवर्णो त्तम कुंभ संभव महा धारा सहस्रैः शतै रघ्यैरत्न सुवर्ण कल्पित

१ˣ सं.॥ "घुमु घुमित सुगन्ध गन्धितात्मा मुखवेसुखवैः परि लिप्य लिंगमेतत् ॥ परि हृष्टो नितरां भवामि गौरि ~~त्रिदशालभ्य सुगन्ध यक्षकर्दमैः~~ ॥ मणिजालातत रत्नकूलचित्रैः परिधायामल स्वर्ण सद्दुकूलैः ॥ शिवलिंगं मम शैलराजकन्ये परिपश्यामि सुमन्धि गन्ध वस्त्रैः ॥"

 कुशा गांबूद्भवै रतत्र लैः ४५॥ अष्टांगार्घ्यक कल्पितैः सुमधुरैर्गंगांबुकं भैः शिवे" संसिंच्या रिवलमिं-
दु कुंदज महा पाटी रसत्पाटला" मोदोधांबुद सन्निभैश्च बहुलशैत्यौर्यचिकोद्रायने" धूपैश्चापि महा
मधूत्थ मधु पर्कासार पौरैरपि ॥ प्रदोष समये मया शरददौ चरा कांशुशि" प्रकाशचयसो हृदे विरल

कुड्मलैरंघसां ॥ मदीय रजताचल प्रकट शंकि भारा शिभिः" सुधाकर कलालस ल्लुलित लिंग मौल्य

वेदाश्चत्वार एते प्रथित मम यशः स्तोम धाराः

र्पितैः ॥४६॥ श्रुत्या रव्याः पुरुषा स्ता एत इह ये स्तोत्रानुरागा मम" स्वादु द्वामल नीर संचय विधौ शाखा
शिखाभिः क्रमात् ॥ रुद्राणां स्तव वनेन मामपि शिव संतोषयंतः स्थिताः" मूर्ती स्ते विहिताग्र पंकज करा
निश्वास भूता मम ॥४७॥ घनरस मृगनाभि सार धारा" मृगमद पटली सुपटीर चन्द्र गंधैः" घुमित सु-
गंध गंधिता शा मुख मुखवैः परि लिप्य लिंगमेतत् ॥४८॥ परिहृष्टो नितरां भवामि गौरि" त्रिद-
शालभ्य सुगंध यक्ष कर्दमैः ॥ मणिजाला तत रत्न कूल चित्रैः" परिधायामल स्वर्ण सद्दुकूलैः ॥ शिवलिंगं
मम शैल राज कन्ये" परिपश्यामि सुगंधि गंध वस्त्रैः ॥ परिवीतं भुजगेश संनिवीतं" प्रभया कोटि शशांक सू-
र्यतुल्यं ॥४९॥ गोत्राधिराज तनये विनयेन पश्य" संपश्यदात्म गति सोऽस्य द मेक भास्वत ॥ ब्रह्मांड गोल

पृ. ८ "विश्वेश्वराख्य वर लिंग समान मान ॥ मानन्द सौख्यद मिदं मम सुप्रिये यत् ॥ हन्तुं समग्रजन पातकराशिमेव ॥ सर्वार्थ शाली दमिदं परिपूजयामि ॥"

कमुमे प्र भयान तुल्यं" मल्लिंग गोल्क वरो त्तम रत्न धारा ॥ साव धूत शशि मौलिकला कलाम" तद्दृत मौल्यक लने, न विधिर्न विष्णुः ॥ दर्शने न समु दुःख विराम पूरिता खिल जनो जनिका मं धाम देव मिह, पश्य सुकामं ॥५०॥ यदूल वर्य निचये मुकुटा ति शोभं" यक्षाधिपोप्यग सुते घावि कुंठिताक्षः ॥ फणी फण सह स्रके विधृत चक्र मुक्ता फलैः" प्रभात तस भाव लि, मणि गणा त्त कां त्या युतं ॥ त्रिपुंड्र जि टि लोल्ल सत्ति लकिता क मद्धीरकं" प्र पश्य गिरिकन्यके विमल मौलि लिंगं मम ॥ ५२॥ सह स्र मुख सत्फणि प्रवर मौलि माणिक्य त" द्युती विजित कांति तो मम स्वभोग संवेष्टितेः ॥ फणा छदि कृतं वर क्षवि जि ताद्य सद्छत्रकं" शिवे शिर सि मे सदा दधति लिंग मौलौ मम ॥ ५३॥ नाना मणि द्युति सरावलि भूषितं तन्म लिंग मेव कमला, छ हृ शा प्र पश्य ॥ पुण्ये प्रदोष समये मुदित स्तव या हं" त ल्लिंग मध्य भवने महिमा स्थितो हं ॥ विकसित सित पद्म रत्न कंज माला" नव नीलोत्पलज सहस्र मालिका भिर्मधुबंधुरगंध दिव्य गंधैः" सित मंदारज रक्त मालिका भिः ॥ ५४॥ दिनांत समयोल्लु सन्म धुर गंध जाती सरैः" वसंत कलिका स्फुरन्म धुर गंध मल्ली सरैः ॥ विगुंठित मिदं मम प्रकट सोम धाम प्रभा" शाइं त्थ मग कन्यके विमल द्रोण माला युतं ॥ ५५॥ कदंब वन-

शिवरह० नीपज स्फुरदपारमाला धूरे विलोलवरपीठगं प्रकटमौलिलिंगं शिवे ॥ प्रपश्यन यनांचले विकच मंजरीक मौहम्म०

प्रभैः॥ प्रदोष समये विके नयनजन्मनस्तत्फलं ॥ ५६ ॥ तव त्वरत्न कमले रमले भवानि पुन्नाग नाग नव

चंपक दूर्व यापि ॥ नीलोत्पलै ईमनकैः करवीर जाती द्रोण कैकाशजवकैः कनकैः समर्च्य ॥ सत्पुंडरी

कबकुलै धवकर्णिकारैर्मालूर कुंद जसुमे रति हर्षितो हं ॥ ५७ ॥ राजीवामल मल्लिका सुम सरत्का

धांधकै लेलं बैर्विकसत्सु मो मधुपैः पश्यां विके पूजितं ॥ एतल्लिंगवरं प्रदोष समये बिल्वोदलो

त्तंसकं द्वच्चेरण हि शोभते च नितरां मौलिस्थ चन्द्रांधिकं ॥ ५८ ॥ अगरु तरु जात धूप धूमैः बहु

ला मोद विकासि दिक्समूहैः ॥ मरुदाकुल लं वितो रुधारा विकसत्स्वर्णपथाः प्रचालजालैः ॥

सुवर्ण मणि भाजने शिशुनमो द्यदंभो जिनी प्रियांशुचय संक्रमि प्रकट दीक्षु रत्नांशुभिः ॥ ५९ ॥

मनोरथपथातिगे मम सुलिंगमाला युतैः सु पांडुर शशिच्छवे हिं म तुषार कुंदप्रभैः सुचंद्रवर

खंडके विरचितो रुदीपावलि सुगो घृत सुवर्तिकोज्वल सुदीपजालैरपि ॥ गृहाण तमस्तंति प्र

विदारदत्या द्दरैरखंड तरमंडनैः प्रथितपल्लहंसोपमैः॥ सुतारक गणावली कलित मुक्तजाल॥

मो० प्र०
अ० १३

३२६

गृहाण तमस्तति

३५

प्रभैर्विलोकय गिरींद्रजे मम सुमौलि भासंकरेः ॥६०॥ नानाभक्ष्यमहाद्रिगंधसुरसाश्चामोदितास्तादिशः ॥
सुस्वादन्नजराशिभिश्च घृतजैः सूपप्रवाहैः शिवे ॥ शाकैः शैलनिभैर्मधुप्रमथितैः क्षीरादिदध्योदनैः ॥
प्रालेयाचलसंन्निभैः सुगुडकैर्नैवेदितैः शांकरि ॥६१॥ नारिकेललिकुचैः सुकापित्थैर्मातुलिंगकदली
सुरसालैः खर्जूरैर्बदरीसुगंधमधुरैर्जंबूरसैर्दाडिमनारिंगकैः ॥ कंकोलामलकैः सुरादनफलैः राजादनैर्जा
तिकैर्नैवेद्येक्षुजकांडकैर्गिरिवराज्ञाते मुदे मे भवेत ॥६२॥ तांबूलैः खदिरैर्लवंगसुखदैर्जातिफले
लायुतैर्मुक्ताचूर्णसुपर्णपूगमधुरैः कर्पूरसंवासितैः ॥ उत्फुल्लामलनागवल्लिजदलैः प्रोद्यद्गिरींद्रप्रभैः ॥
74 नैवेद्यं परिकल्पयामि गिरिजे तस्मिन्सुहृद्धे घ्वहं ॥६३॥ वीणानिक्कणमंजुलसुधाधारासमे गी
यनैर्मन्नामामृतमीश्वरेश्वरि मुदा रुद्राणिभिः कल्पितं ॥ शंभो शंकर धूर्जटे त्रिनयनाकालांधकारे
हरः पाहीश प्रमथाधिनाथ महिमन् लिंगाकृते पाहि नः ॥६४॥ रत्नैः कल्पितमर्द्दलध्वनियुतैः शंखो
त्थनादैः शिवे प्रोद्यत्काहलनिस्वनैर्मधुरितं तन्मड्डुडिंडीरवैः ॥ दुंदुभ्याघातनादैर्मम गणवरगास्मोरुनि
श्वासरागे। वेणूरंध्रनिवेवणांगुलिभवैः तालैश्च सज्झाल्लरैः ॥६५॥ तुष्टाहं प्रथिते प्रदोषसमये तल्लिंग

शिवरह० सेकादशो ॥ नान्यत्किंचिदवेदियं त्रिजगतां व्यापारमप्यद्रिजे ॥ रंगे तुंगतरंगभंगचपले नृत्ये महामर्दलैर्वीणावेणुनिनादसाम्यलयतो नृत्यंति लिंगाग्रतः ॥ ६६ ॥ हुंहुंध्याधातनादैर्मम गणवरगास्योरुनिश्वाससंगैर्गानैः साम्नां सुतानैः प्रणिहितमनसा मेनकाकन्यकेते ॥ तेसे गीग्रन्का श्रारैः प्रतिपदमनुरागार्द्रचित्तैक वित्तैः प्रीतो भक्त्या जनानां जनिमृतिहरणायेश संपूजयामि ॥ रुक्माणी गणकोट योत्र सुभगे मंजीरसिंजस्वनैः शंभो शंकर सांब पाहि शिवनमस्तूर्णं प्रसादं कुरु ॥ इत्येवं सुभगा विलासमधुरा हावेश्च भावैरपि ॥ उत्कान्ताधृतरल्लकांति विलसत्पूर्णेन्दुसाम्याननाः ॥ कुंभोद्यत्करिकुंभसंन्निभकुचाः कांचीझणत्स्वना ॥ स्तालैस्थाहति पादपद्मजरवैः कुर्वंति विद्युत्ध्वनिं ॥ ६७ ॥ गणेशकर भास्वता विविधलोकसाम्राज्यधृक् ॥ विविक्तकृतलांछनैः शशिसुवृत्तमुक्तातते ॥ महोडुगणमौक्तिकप्रकरतारपंक्तीततेर्गिरींद्रतनये धृतान्यमितछत्रको यो गणेः ॥ ६८ ॥ पवरटारमणोत्थकामिंता गो ॥ त्थितपक्षाहननाभचामरौ घो ॥ गृह्य गणवृंदैरखिलेश्च सेव्यमानं ॥ मम लिंगालयधूननैः शिवेद्य ॥ ६९ ॥ प्रवालमयदंडिनामलयशीलभूमाकृत ॥ सुपोततरवायुनानगवरारिपाणीजुषा ॥ इह जयेन चमरीमृगप्रचलबालगुच्छात्मना ॥ सुवीजितमुमेतदा मम लिंगमत्याहरात् ॥ ७० ॥

४०

प्र० ४० सं० ३७-९३

धृतैः प्रमथपाणिभिर्वनकलापिपिञ्छोच्चयैः कृतैर्व्यजनकोटिभिः हरितचंद्रकोटंशुभिः॥ मदीयमणिमं-
डपं हरिन्मणिभिराकल्पितं मिवाद्य गिरिजे तदा ग्रथितभाभिराद्दीपितं॥७१॥ प्रमथप्रकरोर्ध्वहस्तसं-
स्थैः मणिवर्यैर्विविधैः सरागलंबैः॥ विलसन्नवरत्नगुच्छसच्छैः ध्रुवदीशानवरागगाः पताकाः॥
७२॥ भृत्युत्काखिलसंस्तवैरहमहं तत्त्वं परं संस्तुवन् त्यानंदविमानसंस्थमपरं स्वानंदकोशस्थितः॥ लिं-
गप्रक्रमणैरहं स इति तल्लिंगप्रणामादरः स्वात्मानं परिचिंतयामि गिरिजे ध्यानंदधाराव्रतः॥७३॥ भृत्यु-
त्थाखिललोकजालमखिलं मत्तो न भिन्नं क्वचित् किं चापि शिवे ममैव मनसः संकल्पजातं जगत्॥ मय्ये-
वागसुते लयं प्रयाति निखिलं एकोऽद्वयोऽहं सदा नानेति प्रसभं वदंति निगमा वाचां मनोदूरगं॥७४॥
अन्यानंदमुमे मदीयममलं जानंति नो योगिनो नो वेदा यतयः सुरासुरगणा विष्णावयोप्यग्रजः॥
ज्ञानं ज्ञेयमिदं जगद्धृत मुमे ज्ञाता न किंचित्स्थिति भूमाहं सुखधामको हि महतां ह्येको न चाणुस्थिरः॥
७५॥ स्वात्मानंदमुमे ममात्मकमिदं लिंगेप्य लिंगोस्म्यहं आकाशादि विदूरगः स्थितिलयोत्पत्तिष्व-
संगोस्म्यहं॥ इत्येवं परमार्थतान्त्रिभुवने तिष्ठामि विख्यातिगः गोप्यं मे हृदयं गिरींद्रतनये तुभ्यं-

शिवस्य मयादर्शितं ॥७६॥ इत्युक्त्वा परमेश्वरस्त्रिजगतां नाथोपि विश्वाकृतिः॥ दृष्ट्वा लिंगमपारबिल्वकुसुमैः संपूजितं मस्तके ॥ दृष्ट्वा तामगजाननर्तं परमानंदप्रमोदेकभूः॥ कैलासाचलमौलिमंडपवरे तल्लिंगसान्निध्यके ॥७७॥ खंडखंडनमहाघनघोषः॥ चंडतांडवललद्द्विधिमुंडः॥ कुंडलीशकृतकुंडलगंडमंडुनिनदो त्पललयां घ्रिः॥ नंदिभृंगिकृतडिंडिमनादैर्मंडितो हि शिवयासहिरंगः॥ ढुंढिराजकृतशंखनिनादैः॥ तुंडयद्धकृततूर्यनिनादैः॥७८॥ जटाजूटविघर्षिताः परिपतंति तारागणाः॥ वमंति रुधिरं मुखैः भुवननागनागानगाः॥ जगन्नटनसंभ्रमाद्भवति हेलया दोलितं॥ हरींद्रविधयः सुराः मुनिजनाः सकंपांगकाः॥७९॥ अष्टावक्रसुगीतसाममुरजो चंडप्रचंडोल्लुतं॥ डिंडीमध्वनिमड्डुमर्दलमहासामाष्टदृष्टारवैः॥ भ्राजन्मज्जमुंडखंडजमहामालालसद्वक्षसं॥ लीलाचालितहस्तकंकणमहानागोर्ध्वमौलीलसत्॥८०॥ वर्षाकालजपाकशामनसमुत्कोदंडदंडप्रभं॥ रत्नाप्लावितकांतिरंगितदृशंनृत्यं तमेक्षच्छिवा॥ उद्यद्भानुमरीचिसंनिभजटासाम्राज्यपादार्पिता॥ लोलानीलसुरत्नपंकजलसद्गंगातरंगोत्थितं॥८१॥ पारावारसुधाघनोत्थनटनाटोपफणामंजुलामानमाखिललोकआ-

पद्टाचि

- १.६ं. अ-93

४१

-४१

लमुमया सद्रत्नरंगांतरे ॥ नृत्यं तं दृहशुः सरुद्रगणपाः कैलासमौलिस्थितं ॥ देवं देवपरंपरानुतपदं पू-
ज्यं च तत्पूजकैः ॥ (झलं झलित) सालझझालितकंकणं पदचलत्क्वणं नूपुरं ॥ किणी किणित सध्वनिं स्फटिकरत्नसं-
न्नेखलं ॥ घुणंघुण कृतारवं पदगरत्नमंजीरकं ॥ चटच्चट रवोत्थित प्रपद पद्मघोषं शिवं ॥ ८२॥
तौर्यत्रिकोत्थित महारवजात घोषं ॥ लोकत्रयो द्रुत सुरासुर किंनराद्यं (रैडच) ॥ मंद स्मिताखिल विमो-
हनवेष भूषं ॥ राजच्छशांक महसा धवलीकृताशं ॥ ८३॥ तन्नील लोहित मुमा जगदादि हेतुं ॥ नृत्यं-
त मिष्टद मुपैति च तुष्टवक्त्रं (भासित) ॥ प्रष्टाकृतिं निखिलकष्टहरं प्रदोषे ॥ पश्यंश्छिवा सुकरुणारससार-
हष्टया ॥ ८४॥ तां वीक्ष्यागमुतां स्मयं निवमहादेवः सकैलासभूकैलासेश्वर पूजया सरसया कष्टानि
संवीजिता सुरसशक्रसदो विमानैः॥२६॥ गोभूमिवस्त्रान्नसुवर्णकुप्यरौप्यप्रदा धान्यमहीसुरत्न
दाः॥ विप्राग्रहारवनरोपणवापिकाभिः पान्थान्व रोग्रकिरणैः श्रमभारखिन्नान्॥२७॥ खिन्नानन्नांगा
न सुख शीतवातैः कन्यान्नपानादि सुपादसेवनैः॥ विश्रामयंति क्षणमंबिके ये शाल्ला सुते यांति शिवस्य
पश्य॥२८॥

99

शिवरह० येते घोररभटाः सुमास्त्रनिबद्धे घोणेरभिघ्नंति तैः धारासारशरेषु सुमुखतः प्राणान्‌ त्यजंति प्रियान्‌॥ ते मीमंड- माहेश्व०
लमाशु सप्रभमुमे तेजोमणेरंतरा यांत्यप्यद्भुतविक्रमार्जितयशास्फोलारिमल्लादिकं तथाः॥२९॥ हीराकार- प्र०१ अ०२९
मुक्ताराकाकृति सुखं भुक्त्वैद्रलोकं गताः पश्यंति क्रमशो महेश्वरि पुनर्नरिस्तरे यात्र धो॥ पश्येतान्सुदति
६५ प्रकृष्टविभवो पांते पुनर्गर्भे गतान्‌ एवं ते क्रमशः श्वभ्रं यांति सुकृते रिष्टैश्च पूर्तैरपि॥३०॥ यमभटकृतपाश-
बद्धहस्ता मुसलविदारितरक्तगंधमत्ताः॥ सरभसमुपयांति चार्त्तरावैर्यमभवनं परिपश्य पापिजालं॥३१॥ तैवै-
कालमुखे व्याररसहते संतप्तभ्राष्ट्रस्थिताः कुंभीपाकमुखे भिवेक्रिमिपुतापारमलानां ह्रदे॥ क्षारापारसुक-
र्दमे व्रणकृते गीन्ने स्तदुत्पक्षिभिः काकैर्गृध्रकदंदशूकविषतः क्लिश्यंति पश्यांबिके॥३२॥ येते नारकि-
णः सदोदररता दारपरे मैथुनाः॥ नानापातकसंयुता गुरुजने शैवे च संदूषकाः॥ स्तेना पांथहराः ६५
परान्ननिरता दुर्धूतदुष्टालयाः पाषण्डा भुजयोः महाथर्सवरैस्तप्तैश्च चक्रैः पुताः॥३३॥ येषां फाले तले
त्रिपुंड्ररहितं ये रुद्रजाप्योज्झिता ये लिंगार्चनसाधनादि विमुखा ये शंभुनाम्नोज्झिताः॥ ये रुद्राक्षवि-
धारणे च विमुखा पंचाक्षरेणोज्झिताः ये मत्क्षेत्रनिवासहीनमनसो भक्तेषु संदूषकाः॥३४॥ मां विश्वापि-

रूमीश्वरं त्रिजगतामाराध्यभूतं शिवं विष्णुब्रह्ममरुद्गणैः सम मुमे पश्यंति तान्‌ पश्य वै ॥ येवै प्रदोष परिपूजनतो विहीनाः ॥
येवा नरा मम निवेदित भुक्तिवर्ज्जाः ॥ ३५ ॥ ते मीकालभयं प्रयांति नरके दुःखाकुलाः पातकाः कल्पे नापि विमुक्तिरे-
व सततं नास्तीति मन्ये शिवे ॥ शिवालय विभंगकाः शिववनादि पुष्पाहराः शिवद्रुह जनार्चकाः मयि सदा विनिंदरताः
॥ ३६ ॥ त एव यम मंदिरांतर निवास लालाभुजो भवंति क्रिमिवर्क्क नरक चिरवैचिच्यके ॥ येरुद्राक्ष विभू
षणाः सितलसद्भस्म त्रिपुंड्रादराः मन्नैवे द्यसुधाशनाः शिव महादेवेति नामादरा ३७ ॥ मल्लिंगार्चन तत्पराश्च
सततं रुद्रार्थ पारीणकाः येरुद्रामल सत्कथा सुर सिकास्ते मद्गणाः शांकरि ॥ भस्म त्रिपुंड्र शिवजाक्षधरास्त-
(१२)
एव हारा भवांबुधि प्रतारक कर्णधाराः रुद्रा ध्याय विचिंतनैकमतयः पंचाक्षरे सादराः ॥ ३८ ॥ तन्मंत्रै
श्च शिवाभिषेक निरता लिंगार्चने तत्परास्त्व हारा मम संमताश्च गिरिजे तेषा मयं वासभूः ॥ श्रुत्युक्ता चारसाराः शे-
रधारा चरण परिकराश्चांतरा ये विहीना हीना चार विचार वर्जितमनः स्वांता दराः शांकराः ॥ ३९ ॥ पारावार
भवोग्रसार विरसे त्यक्ता दराः शैलजे ते यांति प्रसभं ममालयमिदं नान्यं ध्रुवसत्यं ब्रुवे ॥ केलासाचल रूद्रमूर्तय
इमे चंद्रार्धचूडाः शिवे नीलेंदीवर लोचन त्रय युतास्ते नीलकंठाः सदा मत्पार्श्वे गणपा भवंति गिरिजे ते शंकराः

शिवरह० सर्वदा॥४०॥ ॥स्कंद उवाच॥ ॥ यतः सर्वगतीः श्रुत्वा शंकरात्परमेश्वरी॥ प्रणम्या ह महादेवी कैलासवरगोपुरे॥४१॥ माहेश्व०

॥देव्युवाच॥ ॥ असारं सारं भव दंतिवेदाः स्त्रियः प्रजा नं पशवो हिरण्यं॥ गुणत्रयीमध्यगतापरोचना गुण पू०खं०

तिगं त्वां न भजंति केपि॥४२॥ प्रवृत्त्युन्मुखा बालकाः कामयंते सुखा पार बुध्या महादुःख जालं॥ यथा वृक्ष अ०२१

बुध्या महापाशजाले निगृह्णंति मत्स्या जले धीवरेश्च॥४३॥ कथं त्वत्पदाब्जं स्वनिर्वेदविमुक्ताः समायांति

दुःखाकुलाद्दुःखात्से॥ तथा त्वां चिदानंदरूपं च सत्यमसत्यैकलीला भवं त्वेव बालाः॥४४॥ शशेशृंगवार्ता ६६

यथा स्यान्न तथा कूर्मदुग्धं मरौ वाय थापः॥ तथापि प्रविश्वगाः प्रार्थयंतीह कामान्मनोमूलमेतत् मनो नास्ति-

यत्र॥४५॥ भूमा त्वं गिरिजापतिः शिवतरः सोमार्धधारी हर॥ वामार्धाकृतिरप्रमेयविभवस्त्वं सोमधा-

मानन॥४६॥ कामांगारिर कामसक्त हृदयस्त्वं सामचर्मांबरस्त्वाम प्राप्य महेश साम रवत स्तोषप्रदं

शंकरं॥ कामान्प्रार्थयते विमूढहृदया स्तेषां श्रमः केवलं सामागामनन्तोर मापतिल्लसन्ने त्रा धिरोशक्ष-

दा॥४७॥ धामाकारघनस्थितोसि भगवन्त्वं व्योमकेशः सदा॥ धीम्या ग्रार्चितपादपद्मयुगलश्चोमापतिः

शंकरः॥ कामान्मे दिश गोतमादि मुनिभिर्वद्ये स्तुतोदरो प्रभो॥४८॥ ॥इति श्री शिवरहस्य प्रथम माहेश्व-

गंशे शिवगौरी संवादे गतिनिरूपणे एकविंशोध्यायः ॥२१॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥स्कंद उवाच॥
कैलासात्पूर्वतो भागे निष्प्रकनकप्रभः ॥ लक्षत्रयांतरं तस्मात् भ्राति मेरुः सुरालयः ॥१॥ तदग्र वृषभस्तंभे ध्रुवाधा
स्तस्य दक्षिणे ॥ काल चक्रांतराः सर्वे भ्रमंति च दिवानिशं ॥२॥ ध्रुवः सप्तर्षिभिश्चैव राजा चाप चित्रि शंकुना ॥ तदूर्ध्वे
शैलमौलिस्थाः स्मरशासन शासनात् ॥३॥ नाना द्रुमलतोपेतं रम्यपक्षिमृगैर्युतं ॥ सरस्तत्रास्ति विपुलं
मानसाख्यं मनोहरं ॥४॥ उत्फुल्ल हेमकल्हार हेमपंकज भासुरं ॥ तदग्रमौलौ देवानां ब्रह्मविष्णुहरात्मनां ॥
॥५॥ दिक्पालानां च सर्वेषां गंधर्वाप्सरसा कृताः सत्यलोको ब्रह्मणश्च वैकुंठो वैष्णवं पुरं ॥६॥ ऐशेन नीलरु
रुद्रस्य पुराणि क्रमशो मुने ॥ तादृशः कनकाकारो पर्यंते वर्ष भूषितः ॥ कदाचित्क्रीडते माहादेव्या देवो वि
॥७॥ कुमुदाकार वद्भाति भूमेः पर्यंत सागरैः ॥ रत्नसालं वनं तस्य मेरोर्मूर्ध्नि सविस्तरं ॥८॥ तत्रास्ति गोपुरं
शंभोर्मणि माणिक्य भूषितं ॥ कदाचित्क्रीडते माहादेव्या देवो विहरति स्वयं ॥९॥ शतेोस्ति देवदेवनतस्तांतो
भूधरस्य हि ॥ यो वा च कश्चिन्नविशेत्स भवेत्स्त्री वराकृतिः ॥१०॥ वृषस्तंभनिभो मेरुः कैलासस्यास्य तु मा॥
स्कंद उवाच ॥ तस्मिन्देव्या वसन्शंभुः पार्वत्या रुद्रकैर्वृतः ॥११॥ देव्यासरवि भिर्निरतो दिव्यसिंहासने

शिवरह० स्थितः॥ कदाचिद्देवसंघानां पुराणि क्रमशः शिवः॥१२॥ मेरुमौलौ महालिंगं मौर्वीशाख्यं मनोहरं॥ तस्मै माहेश्वं पुरमहासौ धराजत्कलशवेदिकं॥१३॥ तत्र संपूजयंत्येव ब्रह्मविष्णुमहेश्वराः॥ तल्लिंगं बिल्वपत्रैश्च हेमपंकजकैरपि॥१४॥ धूपदीपैश्च ते देवाः नैवेद्यैश्च मनोहरैः॥ प्रदक्षिणप्रणामैश्च स्तुवंति च सुरासुराः॥१५॥ ॥देवा ऊचुः॥ ॥ कुंदामंदमरंदसौभगमहामंदारसन्मालिकालोलोत्तुंगतरंगरंगितमहागंगांबुजोत्करं वं॥ पर्वानंदितशर्वरीरमणतोत्तुंगांगमौलिं शिवं ध्यायामोघमहाघसंसृतिभवं दुःखं विहायादरात्॥१६॥ स्मारत सुंदरतरैः कुरुविंदवृंदरत्नारविंदमरंदकुंदपरागमौलिं॥ मंदारवंदितपदांबुरुहं महेशं सुंदोपसुंदवरदं नगजादिकंदं॥१७॥ मूर्ध्नी धर्मधुपालिझंकृतियुतं त्वन्न्यञ्जयानिर्झरं शैलान्निर्झरसारणीव भवतो दृष्टिर्भवांभोझरीं॥उद्यद्रागमलीमसोझटितिनोनोझंतिपादौ हृदिते धन्या झलझलझंझणियुतोस भगवान्दिवः॥१८॥ ॥सूत उवाच॥ ॥एवं स्तुवंति ते देवा मेरुमौलिस्थितं शिवं॥ गंधर्वाप्सरसः सिद्धाः मुनयो वीतकल्मषाः॥ कैलासे च महादेवः सान्निध्यं तेसदेवहि॥१९॥ दिव्यामणिमयेसौधे निहरत्ते स शंकरः॥ तद्विहारं शृणुष्वाद्य सर्वपापविनाशनं॥२०॥ नानाचित्रविचित्राश्च क्रीडास्ताः परमे शितुः॥ हे व्यास हसुरश्रेष्ठाः

के नवावर्ण्यं ते हिताः॥२१॥ रुद्राण्येन वयो वनो च्चलकुचास्ताः सोम धामाननाः॥ रत्नोत्थामलकांति भूषिततनूवल्यः
प्रभा भासुराः॥२२॥ संबद्धस्तन चेल केशवलयाः सेवाधिकाराधराः॥ राजंते कलधौत सानु शिखरे लीला झणन्नू
पुराः॥२३॥ उद्यत्काय नि भा[illegible] चंपक महा नासा ल सन्मौक्तिकाः॥ ताराकार सुहीर हार वलये स्ताः स्तत्र विद्यु-
ल्लताः॥ रुद्रा श्चापि महेश्वरं त्रिजगता माधार भूतं हरं॥ तत्तत्काल सुसेवनै रनुपमैः श्रांतिं विहायादरात्॥२५
॥ स्नानोद्यन्मणि सुंदरे श्च कलशैः स्रग्गंध धूपार्पणैः॥ दीपैः केश सुधूपनैः पर्यंक विश्राणनैः॥२६॥ छत्रैश्चा
मरवीजनैः प्रपदके राद[illegible] तांबूलकैः॥ वीणाभिः पटवास खड्ग मुकुरैः सेवंति सर्वं शिवां॥ रुद्राण्यो नव कोट
यश्च तरुणा कोट्या दश॥ भैरव्यो थ दिगंबराश्च सततं कोटीभिरन्वास्यते॥२८॥ योगिन्यो थ त्रिकोटयो
प्यपरितस्ते डाकिनी कोटिकं रोहिण्या सहितं दुधामवदनाः सेवंति शंभुं शिवां॥ कैलासे नव शक्तिर-
त्न विलसत्पीठे महातत्त्व वाक्जाते नेकगुरु कोटि विस्तर युते श्री चक्र मध्यं गते॥२९॥ विंदौ चंद्र दिने
श कोटि युगले मंचे चतुः पीठगे पंच ब्रह्म मयेवयं गिरिजया सार्धं हृदा दध्महे॥ शशि प्रसूनैः क-
रैः सितह्सिता यमानो गिरिः प्रभात तसुधांबुधेश्चल तरंग हस्तो श्रया॥३०॥ समुच्चलित नोकमास-

X पंक्ति ४ — श्रीमान् विभु र्नगराज कृताधिभूषः ॥

शिवरह॰ कलरत्नसंक्लृप्तयांसुधांशुशकलालंकोविहरति स्फुटं सोंबया ॥ स्वच्छाद्रिपारदमहाकलधौतशैलसा माहे स्व॰
नुप्रभासमधिकोन्नतपांडुरागं ॥३१॥ चंचद्द्विमाणमुकुटीतटलंबमान सच्चामरौघपरिवीजितक- प्र॰अं॰
र्णतालं ॥ कांत्या स्वया परिमुखंतमिवोद्यतांशुमुक्षाणमद्रितनया परिरक्षि(ति) फालः ॥३२॥ आरुह्यया- अ॰ २२
ति नगराजसुतासहायः ॥ उक्षाधस्तल (पक्ष) पक्षतिप्रचालितो रेवस्य पाद्रांबुजे स्वस्कंधे मणिपादुको
६८ त्तमलसत्सानंदनामा गणः ॥३३॥ पाहीशेति वदन् सदा शिव महादेव प्रभो मां सदा तारानाथक-
लाधरश्रुतिशिरः कोटीरपालोगतः ॥ कैलासमौलिधवलोत्तमशृंगसंस्थलिंगावलिं समभि- ६८
वीक्ष्य महोरुहर्षः ॥ पश्येति तां नगसुतां प्रवदत्यभीक्ष्णं त्र्यक्षोऽक्षताक्षमनसा परिचिंतनीयः
॥ सौवर्णरत्नखचितेमणिजालकॢप्ते श्वेके (क्रैः) महोन्नततलैः शशिधामकुंभं ॥३५॥ देव्यारथं
रथपतिः नाथ तो हि वैदेरारुह्य याति नगमौलिमहो ह्रिजेंद्रः ॥ नानारत्न पुंज प्रभाततततं
मुक्ताछगुच्छान्वितं पालीपालि मरालराजनिकरैर्मुक्तावितानैर्युतं ॥३६॥ भ्राजद्दिव्यपताक
चामरयुतं छत्रैरपारैर्वृतं आरुह्याखिलशैलराजसुतया दिव्यं विमानं हरः ॥ कैलासोत्तम

मौलिपालिषु सदा पश्यन् भयातीश्वरोदे धादीन् रिवलान् विलोकयतिवै तल्लोकलोकानपि ॥ ब्रह्माडौतिकतस्फुरतटी
न्याटोपमौलिः शिवः विश्वं चित्रमपार चित्रकयुतं पुत्रों बयाकेवलः ॥ ईश्वर उवाच ॥ ॥ सुरतरुनिचितो भोगजाल
गर्भाः सुरतरुनिचित्तदेव पुण्यवार्भिः ॥ स्मर भस मप यांति कर्मदेवाः गिरिजे पश्य महाविमानवर्याः ३८ ॥ देवस्त्रीकर-
कंकणोल्लसमणिस्फारप्रभासुरा देवोद्यानिकुंज सीमसु भोगस्वगंधवातैरपि ॥ तत्रत्याकुसुधा धर रसास्वादोदनाके-
वलं ते देवैः सह भोग भाग्य निकरैः पुष्णंति पश्यांबिके ॥ ३९ ॥ विष्णुब्रह्ममरुद्गणैः समम्मुमे मां पश्यतेयोधमः ॥
नाना जालमुखेषु पूय क्रिमिजापारे मलाब्धौ स्थितः ॥ शास्त्रो घ द्विपिनाग गरुक चके ब्धाकल्प बिष्ठाशनः तिष्ठ
/83 त्येवकनिष्ठ निष्ठुर वचो दुष्टः कशा ताडितः ॥ ४० ॥ दुष्टः कष्टज भोग भाक् च फल भाक् मन्निंदना दद्विजे ॥ पश्य नारक
गणं बहु दुःखितं लिंगमंगलदर्शनो झितं ॥ कुंभतैल पचेन नसुप क्क भक्ष्य वर्जिताश्रितेयमएनं ॥ ४१ ॥ रुद्राक्ष
कंठवरकर्णमहोरुहाराः कोटीरकंकणकशोभितबाहुदंडाः ॥ प्रदोष लिंगार्चन लिंग धामसंदर्शनानंदितवृत्तयो-
ये ॥ ४२ ॥ यां त्येव कैलासवरं ममालयं तयेव हारा मम संमताः शिवे ॥ कैलासाचलमौलि संस्थितमहालिंगालयप्रघताः
भ्रांति ते जनमंतिरत्नकलशा नानार्क सोमा इव ॥ ४३ ॥ पत्रत्या मम लिंग मौलिजजटाजूटे तु गंगादयोद्योतते शे-

लशिखाविराजित शिखाकारोद्य शैलो मम॥ पश्याद्रिजे गिरिवरोद्यत लिंगसंघं संपूजितं च विलसन्नवबि-
ल्वपत्रैः॥ तत्रैव गांगजपयोजवरं(नत)स्तमी लन्मौलि(स्थ)चन्द्रजकरैर्विकचोत्पलं च पश्य॥ गणकरसंपुटोत्थशं-
खनादैः मधुरैः मार्दलडिंडिमोत्थनादैः॥ शिवलिंगाग्रगता गणा विरेजुर्मम शैलेपि सदैव घोषयुक्तः
॥४५॥ कैलासोप्ययमद्रिराजतनये मल्लिंगमौलिः सदा जातो मंदर(महेव) दानतश्च सुमहत्तेनापितप्तं तपः॥ त-
त्ताद्दृक्नसुरासुरादिनिकरैस्तत्संमुनीनां गणैः॥ शैवेंद्रैर्मम सद्गुणेरपि शिवे तस्मिन्कृपा मे परा॥४६॥ इत्थं
बावदनं निरीक्ष्य भगवानाह प्रमोदास्पदं कैलासस्य गुणोघवर्णन महादेव्याः पुरः शंकरः॥ रम्यं तत्र
ममालयं करिवरास्य स्यापि वक्ष्ये मुदा तस्याप्यद्भुतमीश्वरस्य समुखे संस्थाप्य(स्थस्य) धर्मस्य हि॥४७॥ ॥
इति श्री शिवरहस्ये प्रथम माहेश्वरांशे कैलासलिंगवर्णनं नाम द्वाविंशोध्यायः॥२२॥ ॥श्रीकाशी
विश्वेश्वरार्पणमस्तु॥ ॥ स्कंद उवाच॥ ॥ शृणुध्वं ब्रह्मविष्णवाद्याः जैगीषव्य गणोत्तमाः॥ तत्रांत
तरोऽस्ति प्राकारो गोमेद मणिकल्पितः॥१॥ गोमेद गोपुरैश्चैव चतुर्दिक्षु विराजितः॥ चतुर्दिशं गोपुराणि ल-
क्षमानेन सत्तमाः॥२॥ वेदिका पट्टिकाभिश्च तोरणालंकृतानि हि॥ राजत्कुंभपताकाग्रैर्वृषभैस्तन्मणि
प्रभैः॥३॥

रुद्रावतार रचितैर्गवाक्षैः स्फटिकैरपि ॥ कुमुदैर्व्यालिपीठैश्च इंद्रकोटियुतान्यपि ॥ ४ ॥ मंडपावलिसंक्लृप्तैः सहस्रायुतशोभनैः ॥ मणिकांचनचित्रैश्च मुक्तावितततोरणैः ॥ ५ ॥ सरोभिः सागराकारैः रत्नसोपानमंडितैः ॥ तत्प्रांतमंडपवरैः सहस्रस्तंभसंयुतैः ॥ ६ ॥ सरोमध्यमणिव्रातमंडपैरुच्छ्रितैरपि ॥ तत्रांतरे तु प्राकारे गोपुरांतर दक्षिणे ॥ ७ ॥ तत्र मत्सदनं दिव्यं नानारत्नचितं शुभं ॥ लक्षस्तंभयुतं सौधं नवरत्नाग्रशृंगकं ॥ ८ ॥ तत्सालभंजिकानिर्यत्रत्नकांतिविभासितं ॥ ततः पश्चाद्दशभूमद्भिर्मणिभिः कृतशेखरं ॥ ९ ॥ गवाक्षितं विचित्रैश्च नवरत्नप्रभाधिकं ॥ हरिन्मणिकृतैश्चैव मयूरवरकुट्टिमैः ॥ १० ॥ शोभितैर्मंडपाग्रैश्च वप्रप्रासादतोरणैः ॥ प्राकारैः सुंदरतरैः गोपुरावलिभासुरैः ॥ ११ ॥ मणिद्वारकपाटैश्च शातकुंभशलाकिकैः ॥ धूपामोदयुतापाररम्योद्यामसुगंधितं ॥ १२ ॥ मणिदीपप्रभाभासिरंजिताखिलदिक्तटं ॥ तत्र दिव्यसुमामोदिवनं चैत्ररथाधिकं ॥ १३ ॥ मण्यालवालकलितं रत्नवेदिविराजितं ॥ नानादेवद्रुमापारवल्लीगुल्मविराजितं ॥ १४ ॥ कौमारं नाम तत्रास्ति सरश्चोत्फुल्लपंकजं ॥ मणिसोपानपालीभिः तत्प्रांतमणिमंडपैः ॥ १५ ॥ क्रीडामृगैः शुकैश्चापि मणिपंजरशारिकैः ॥ तत्र तत्सौधमध्यस्थं मम सौख्याश्रयं ॥ १६ ॥ सिंहासनं रत्नक्लृप्तं पंचयोजनविस्तृतं ॥

तत्राहं समेवितो वीरैः नवलक्षैः रुद्रयुधैः ॥१७॥ सिंहसंहननैर्वीरैः कौमारैरुद्यतायुधैः ॥ मत्तहृत्फूत्काराकारबाहुभिः माहेश-
शक्तिसंयुतैः ॥१८॥ वीरबाहुप्रभृतिभिः पुष्पवस्त्रांगभूषणैः ॥ छत्रचामरहस्तैश्च पार्श्वे संसेवितस्तदा ॥१९॥
महार्हयसनोपेतः नवरत्नविभूषितः ॥ षड्कुब्जप्रमुकुटोद्भासिरत्नकुंडलकांगदः ॥२०॥ रत्नांगुलीयविल-
सत्तलांगुलिपद्मांबुजं ॥ मणिमाणिक्यमंजीररणन्नूपुरमेखलः ॥२१॥ देववल्ल्यासेनया चेंद्राद्यैरपि सेवितः ॥
षड्भिश्च वदनैर्देवं स्तुवन् द्वादशलोचनैः ॥२२॥ पश्यन् यन्नु लिंगं हि कैलासे कौमारेश्वरमीश्वरं ॥ हीरसार-
महाधाराप्राकारे दक्षिणे स्थितं ॥२३॥ तन्नील गोपुरोत्तुंग नील धमा तता दिशः ॥ रुद्रावतारक्रीडाद्दित लशो-
भैकभासुरं ॥२४॥ राजल्ललामवृषभं शंभोः कैलासगोपुरं ॥ पंचलक्षप्रमाणेन कल्पितं विस्तरायतं ॥२५॥ द-
क्षिणे गोपुरप्रांते शंभोः प्राकारमध्यमे ॥ तत्कौमारपुरं मेध्यं नानासौधविराजितं ॥२६॥ कौमारैर्मद्गणश्रेष्ठैः मया च प-
रिपालितं ॥ तत्रमत्पुरमध्यस्थ कौमारेशस्य गोपुरं ॥२७॥ नवरत्नप्रभाभास्वत्प्राकाराट्टालसुंदरं ॥ गर्भागारमहा-
कांतिधगत्स्थगितदिङ्मुखं ॥२८॥ मणिकुंभोद्यतशिखावलीढगगनांगणं ॥ ममेष्टलिंगं तत्रैव देवदेवस्य शू-
लिनः ॥२९॥ त्रिकाले तत्र तल्लिंगं पूजयामि गणैर्वृतः ॥ धूपदीपैश्च नैवेद्यैः पंचामृतनिषेचनैः ॥ ३०॥ बी-

प्र०खं०
प्र० २३

८०

णावेणुमृदंगादि शंखकाहलनिस्वनैः ॥ मधुरोद्दामगीतैश्च कौमारीणां च नर्तनैः ॥ ३१ ॥ हावभावमनोहारि तौर्यत्रिक
मनोहरैः ॥ षड्वक्त्रफालकलितत्रिपुंड्रतिलकोज्ज्वलः ॥ ३२ ॥ भस्मरुद्राक्षवलयः स्रावलिविभूषितः ॥ षड्वक्त्रपंकजरसं-
दिसुधासममहारसैः ॥ ३३ ॥ स्तोमि स्तोत्रवरैः शंभुं तत्स्तुतिं शृणु सत्तम ॥ ॥ स्कंद उवाच ॥ ॥ छन्नस्वर्गविनुता
गमवर्यकर्कार्यमंगदर्वयाचित ॥ मेरुमौर्वीकृतदर्विहस्त कंपहीमांभवकमहेश शर्व सर्व ॥ ३४ ॥ विक्रमाक्र
मितलोकचंक्रमपादमूलमपि नो त्रिविक्रमः ॥ प्रापकूपसदनः किमु भेकः सागरोत्तरणहेतवे हर ॥ ३५ ॥ स्वर्ण
वर्णकृतलोचनकर्णापारहारकमहार्णवसंस्थ ॥ वर्णितागमअपर्णयार्चित पर्णपत्ररथपूज्यपदाब्ज ॥ ३६ ॥ कर्णकुंडल
कृताहिवरेश पारयार्णवभवं सुकर्णधारक ॥ गंधवंधुमधुपावलिभास्वद्द्राजराजशकलामलमौले ॥ ३७ ॥
देवलोकतटिनीगतफुल्लैः नीलकेरवकुलैक सुपूज्य ॥ वाहाजिह्वातिसंख्याकृतनयनयुगं तल्यसंख्यापिताद्दकु ॥
दशयुगललला मंदेवमंदारसालं ॥ कौमारः शंकरगिरां मनसोतिदूरं कर्पूरगौरसुशरीरधृतोरगेंद्र ॥ ३८ ॥ ३९ ॥
मारापहारपुरवर्गहरा गर्व व्यंयेश विश्वेश्वरावदयया तव बालमिष्टं ॥ इत्थं षड्वदनेस्तोमि कौमारे शंमहेश्वरं ॥ ४० ॥
महर्णेनवलक्षेश्च तत्कौमारपुरस्थितैः ॥ ४१ ॥ गोपुरं नीलमणिभिः प्राकारं तस्य कल्पितं ॥ तत्कैलासं महेशस्य शक्ति

४ पंक्ति९ – "सप्तलक्षगणेन्द्रैश्च विघ्नाद्रिकुलिशो महान् ॥६॥"

 हस्ते रुद्रायुधैः ॥४२॥ रक्षामि सर्वदा विप्र प्रशासना च्चंद्रमौलिनः ॥ ॥स्कंद उवाच ॥ ॥तन्नील सार परिकल्पित
गोपुरोद्यत्कुंभावली वितत हेम पताक जालं ॥ शक्रोपला कलित गोवृष भालि राजत् प्राकार सौध विहितो
रुमणींद्र लिंगं ॥ संपूजयन् गणवरैर्भगणेश चूडं कैलास पर्वत वरे निवसामि विप्र ॥४३॥ ॥इति श्री शिवरह
स्य प्रथम माहेश्वरांशे कैलास वर्णने स्कंद कृत स्तुति र्नाम त्रयोविंशोध्यायः ॥२३॥ श्री काशि विश्वेश्वरार्पण
मस्तु ॥ ॥स्कंद उवाच ॥ ॥ पश्चाद्भागे हरिज्ज्योति हरिन्मणि विराजितं ॥ पंचलक्षप्रमाणेन प्राकारं मणि गोपुरं ॥
 १॥ महा मरकतैः कॢप्तं गवाक्षावलिभिर्युतं ॥ अष्टाशीति सहस्राणि योजनैः परिकल्पितं ॥२॥ पश्चाद्भागे तु तज्ज्योति
र्हरिन्मणि निभा दिशः ॥ तत्र गारुत्मत्त मणि कॢप्त मंडप शोभितं ॥३॥ उद्यद्दिन्दु कर स्वच्छ निर्यज्झरिभिरावृतं ॥
तत्राच्छ स्फटिकोद्दाम सिंहासन शतैर्वृतं ॥४॥ धूप दीपादि बहुलं नाना सुमनसावृतं ॥ मणि माणिक्य खचित मंडपे स्वास्तृ
तासने ॥ ५॥ तस्मिन्तिष्ठति विश्वेशः स्वगणै रर्चितांघ्रिकः ॥ नानारत्न चितानेक भूषणैः परि शोभितः ॥ सिंदूर
विलसत्फालो महासिंधुर वक्त्रकः ॥७॥ माणिक्य मकुटोद्भासि फाल चन्द्र विराजितः ॥ शुंडादंड महोच्चंड बृंहितो
नंदितांबरः ॥८॥ कुंभांतर लसन्मुक्ता गुच्छ सच्छायि तास्यकः ॥ कर्ण पत्र मणि व्रात चलत्कर्णाग्र सुच्छविः ॥ ९ ॥ दंत

वलि महारत्नदंतवेष्टनसुंदरः ॥ तदधस्ताल्लसन्मुक्तामणिपत्रविराजितः ॥ १० ॥ सितभस्मत्रिपुंड्रांककुंभमध्यविरा
जितः ॥ सिंदूरतिलकोत्फुल्लवदनानंदशोभितः ॥ ११ ॥ मुक्तागुंफितकर्णाग्रवीजितोड्डीनषट्पदः ॥ स्रवत्कटतटे
द्भासिमदगंधितदिक्तटः ॥ १२ ॥ शिवपादांबुजध्याननंदोन्मीलितलोचनः ॥ गणसंदर्शनानंदसंदोहोन्मील्यलो-
चनः ॥ १३ ॥ महानागनिबद्धोरुपीठगोदरसंयुतः ॥ फुल्लपद्मामलपदः सुरासुरगणानतः ॥ १४ ॥ पाशांकुशरदद्योति
मोदकासक्तसत्करः ॥ रत्नांगदैश्च केयूरैर्भ्राजत्करिकरप्रभः ॥ १५ ॥ पादाक्रांतरणत्सिंजत्कलमंजीरशोभितः ॥

108

दिव्यांगरागसुभगो मणिहारावरावृतः ॥ १६ ॥ पार्श्वद्वयविराजश्रीः सिध्याबुध्याविराजितः ॥ सर्वाभरणभूषाभ्यां
सेवितः पार्श्वयोर्द्वयोः ॥ १७ ॥ गणेंद्रैश्छत्रदंडोद्यन्मणिचामरसत्करैः ॥ सेवितः श्रीगणेशानः तस्मिन्कैलास
मंडपे ॥ १८ ॥ चलच्चामरवातैश्च चलत्कर्णाग्रचामरः ॥ तादृशा गणपास्तस्य पाशांकुशकरास्तदा ॥ १९ ॥
महाबलमहोत्साहा कुठारवरपाणयः ॥ सिंदूरारुणफालाग्राः त्रिपुंड्रपरिशोभिताः २० ॥ रक्षंति ते गणा
स्तत्र प्राकारं तच्च गोपुरं ॥ सप्तलक्षामितबला गणेशा गणपास्तदा ॥ २१ ॥ तत्रैव देवदेवस्य शासनाच्चंद्रमौलि-
नः ॥ गणेशोपि सदा ध्यायन गणेशेश्वरपूजकः ॥ २२ ॥ तत्रेषु लिंगं तस्येन वरप्राकारगोपुरं ॥ नवरत्नचितं

 दिव्यं मणि स्तंभ चितां तरं ॥२३॥ गणेश्वरा स्त्वं तल्लिंगं मणि धाम गतं तदा ॥ प्रोद्यत कुंभ पताकाग्र पवना धूत सांचलं ॥२४॥
स्वपुष्कर धृतो तुंगं पंचामृते रपि ॥ सुधाधारा भिरा सिंच्य चंदना लेपि सुंदरं ॥२५॥ फणामणि महा मौलि रत्नाभरण
शोभितं ॥ सो द्य संपूजय त्येव बिल्व मंदार चंपकैः ॥२६॥ दूर्वा भिः कमलै रीशं धूपै दीपै र्मनोहरैः ॥ नैवेद्यै र्विविधै स्थै-
वतांबूलैः छत्र चामरैः ॥२७॥ गाने र्नाट्य मृदंगाब्ज काहलानां च निःस्वनैः ॥ भस्म रुद्राक्ष संपन्नः स्तौति देवं महेश्वरं ॥
२८॥ गणेश उवाच ॥ ॥ गणेश त्रिगुणा तीत भग णा धीश मस्तक ॥ गर्जन्मेघ गणोद्भूत तडिद्गुण जटा मल ॥२९॥

व्योमकेश भगवन् श्रुति मौलि स्तोम साम विनुता खिल सोम ॥ भूम भौम महिमा गम काम धूम धाम बहुल द्युति कंठ ॥
३०॥ क्षय द्वीर मारा पहारा द्य शंभो वीर धीर सुर शेखर पाद ॥ घोरां धका सुर निबर्हण काल काल कुरां तर त्रिपुर गर्व
हराव्यय शं ॥३१॥ दहन गहन शेखरो सि शंभो निरवद्या खिल लोक मोख्य भूमन ॥ त्रिगुण गति विदूर ईशिताध प्रकटि
तवेद वचोभि रीड्य पाद ॥३२॥ करे कुरंगं स्व कपर्द गंगं हारे भुजंगं यमिह त्सुसंगं ॥ बाल्ला कृतांगं सित भस्म संग मनंग
मातंग हरं भजामि ॥३३॥ इतिस्तौति सदा शंभुं कैलासे शं गणेश्वरः ॥ गणना थो गण वृतः सदाशिव गणाग णीः ॥३४॥
स्कंद उवाच ॥ ॥ तत्याति गोपुरं शंभोः मणि प्राकार मप्य सौ ॥ स्वकीये गल्पैः सार्धं चंद्र चूडस्य शासनात् ॥३५॥

हरिन्मणिकृतं वरं हरितगोपुरं पश्चिमे विराजित तलां कूणेः वृष ललाम शृंग प्रभैः॥ गरुन्मणिरसा प्रभं विततरत्न

मोघो त्तमं वर प्रवर सुंदरं प्रकट वप्र प्राकारकं॥३६॥ स्व बाहु बलमाश्रितो द्विरद वक्त्र जैः सद्गुणैः प्रपातिग णनायकः शि-

वपदाश्रसंसेवकः॥३७॥ ॥ इति श्री शिवरहस्ये माहेश्वरे प्रथमांशे कैलासवर्णने गणेशकृतस्तुतिनाम चतुर्विंशोध्या

यः॥२४॥ श्री काशी विश्वेश्वरार्पणमस्तु॥ ॥ स्कंद उवाच॥ ॥ कैलासांतरतः प्राच्यां पुष्परागविनिर्मितं॥ पंच

लक्ष प्रमाणेन प्राकार वर गोपुरं॥१॥ उद्यद्भानु शताधिक्यं चाकचक्य मनोहरं॥ पुष्पराग मणि द्योत द्रुषभैः समीध

ष्टितं॥२॥ प्राकारं लक्षमानेन मनसा शूलिना कृतं॥ रुद्रावतार चरितैः वेदिका पट्टिकान्वितं॥३॥ राजद्रुमकुंभाग्र

दोधूयितपताककं॥ पुष्पराग मणिज्योतितिरस्कृत शशिद्युतिः॥४॥ तत्रैवांतर्म महारत्न गर्भ मंडपमुत्तमं॥ स्तं

भैश्च दश साहस्रैः समुन्नति मनोहरं॥५॥ शिखाभिर्मणि कूप्ताभिर्वलिभिश्चुं बितांबरं॥ नानारत्न महावे-

दि पीठ विद्रुम पुंजकैः॥६॥ शोभितं रत्न गुच्छ गुच्छ मालालंबित पीठकं॥ तत्र सिंहासने दिव्ये नवरत्न गणे श्रिते॥७॥

धूपदिपादि बहुले मुक्तामाला परिष्कृते॥ वितान द्योति दिक्चक्रे नानारुद्र गणैर्युते॥८॥ षष्टिसाहस्रसंख्याकैर-

हिमह्निमन्युभिरुद्भुतैः॥ त्रिपुंड्र विलसत्फालैः रुद्राक्षवर भूषणैः॥९॥ त्रिशूलाद्यस्त्रकैरेः शुभ्रैः हेति चापशरा

 वैरः॥ जटान्तरनिबद्धेंदुशेखरैरिंदुसमप्रभैः॥१०॥ संमतात्सेवितो नित्यं वृषो धर्माकृतिर्महान्॥ धर्मो धारमहापादो युगनामोरुपादकः॥११॥ संध्यांशसुखरो ह्याम वर्णाश्रमकृतांघ्रिकः॥ मणिमंजीरनिनदनानाधर्मैकशब्दवान्॥१२॥ चतुर्वेदोपवेदोद्यत्वेदांतिमतदंगुकेः॥ पुराणन्यायमीमांसाद्वयतंत्रोरुघंटकः॥१३॥ पुर्वसिद्धांतराधांततत्वशब्दघणाघणः॥ ग्रैवेयशोभितोदारघंटाकलितकंधरः॥१४॥ कैलासोजंगम इव शृंगद्वयविभूषितः॥ सुधामंडलजोत्तुंगसुपांडुरमहाछविः॥१५॥ संस्थितो देवदेवस्य संनिधौ नंदिकेश्वरः॥ पंचलक्षप्रमाणेन गात्रैः कर्पूरसंनिभैः॥१६॥ उद्यत्सुधांशुपूर्णांगो लक्षयोजपृष्टभूः॥ ककुदा दशसाहस्रयोजनोन्नतवृत्तया॥१७॥ मुखे त्रिंशसाहस्रं नेत्रयोर्द्विसहस्रकं॥ कर्णयोः पंचसाहस्रं विषाणोच्चसहस्रकं॥१८॥ नासाविवरमुक्ताढ्यनासापंचसहस्रकं॥ सहस्रयोजनायामलेलिहानाग्रजिह्वकं॥१९॥ पश्यन्ननिमिषेणैव लोचनाभ्यां महेश्वरं॥ स्वपृष्ठास्तृतरत्नाढ्यपल्याणालंबिमौक्तिकं॥२०॥ स्वनासाविवरोत्थानवातोद्धूतमहागिरिं॥ तद्वातोद्धूतवेलाश्च उद्वृत्तोत्तरंगकाः॥२१॥ समुद्राः सरितश्चैव तच्चलत्खुरदारिता॥ भूर्भातिकंपिता शैलैः सागरैश्च विलोलिता॥२२॥ शृंगगिरिमणिभ्राजिमुकुटेनविराजितं॥ कर्णालंबिशशिज्योतिर्धवलालंबिचामरं॥२३॥ पंचाशल्लक्षमानेन पादैः खुरवैर्युतं॥ दशसाहस्रविस्तारैरिं-

प्र० सं० ख० २५

७३

७३

द्रनीलमणिप्रभैः॥२४॥खुराघृष्टमणिव्रातं नादसोहितकंदरं॥सास्नयालंबितास्वच्छ पंचसाहस्रयोजनं॥२५॥हुंकारवमहाभीतत्रैलोक्यतलवासिनं॥कामधेनुगणेश्चैव कोटिभिः परितोवृतं॥२६॥शरच्चंद्रप्रभाभास्वद्गिरिमौलिविदारणं॥लंबिनावृषणेनापि शतयोजनकेनच॥२७॥बालेनत्रिंशत्साहस्रयोजनेनविलंबिना॥चामराग्रमहाकेशपुच्छभारेण शोभितः॥२८॥मुक्तामाणिक्यजालैश्च प्रोथितेनमणिप्रभः॥तत्रास्ति गोपुरं शंभो धर्मतत्रवृषेशितुः॥२९॥प्राकारराजवृषभंतस्यपृष्ठं लिंगमैश्वरं॥कामधेनुधरासूतैः पयोभिरभिषिच्य च॥३०॥गंधैर्बिल्वैश्च मंदारैः पंकजैर्धूपदीपकैः॥नैवेद्यैः पायसापूपतांबूलछत्रचामरैः॥३१॥संपूज्यस्तौति धर्मं शं भस्मरुद्राक्षशोभितः॥भक्त्या त्रिपुंड्रफालांको शशिधृक्शृंगयोर्द्वयोः॥३२॥पश्यन्संस्तौति हृष्टात्मा नादकोलितदिक्तटः॥ ॥धर्मउवाच॥ ॥दक्षपक्षकृतशिक्षमहोक्षोद्वाहिताक्षितिलकंसुरवीक्ष्यं॥कुक्षिगाखिलजगद्भृतवंद्यं पक्षिवाहसुतकायमलुक्ष्णं॥३३॥भूमिमंडलतलातिगमूलं कोलरूपहरिणानविलोकि॥अत्रजांडजगतोविवदंते पादमौलिकलनेतवशंभो॥३४॥सिंधुनिषंगं वृषभं तुरंगं महांगवर्मांबरमुद्यतांगं॥इंद्रूत्तमांगं हयरथांगं भूते महोक्षांगगतंहृदक्षंगं॥३५॥ ॥सूतउवाच॥ ॥इत्थं स्तौति महादेवं धर्मोवृषवपुर्धरः॥सएवधर्मोदेवेशंवहत्यत्यंतभासुरं॥३६॥

(marginal/interlinear corrections: गिरि; दर्वसुधेशे; गंध; मल; च; द्रुत)

108

शिवरह० प्राच्यां तत्रो पुरवरं प्राकारं गणपैर्वृतं ॥ पातितं देव देवस्य स्मर हर्तुश्च शासनात् ॥ ३७॥ श्रीमत्कैलास शृंगे शिववर माहेश्व०
गणपैः सिंधुरास्यानुगैश्च कौमारैर्गणपैर्वृषेंद्र गणपैः रुद्रैः समंताद्वृतं ॥ निखिलजगं विधींद्र विष्णु नो देव संघैः स्तु प्र०अं०
ति गण मुनि वर्यै श्चिंतितं मुचाक्षमंतत् ॥ ३८॥ ॥ श्री ॥ इति श्री शिव रहस्ये माहेश्वर प्रथमांशे कैलास वर्णनवृष अ० २६
स्तुति र्नाम पंच विंशो ध्यायः ॥ २५॥ ॥ श्री काशी विश्वेश्वरार्पण मस्तु ॥ ॥ स्कंद उवाच ॥ ॥ तदुत्तरेस्ति
७४ प्राकारो वैडूर्यमणि रंजितः ॥ वैडूर्यानंतसंत्रे श्च पीतास्तत्र स्थ दिक्तटाः ॥ १॥ तत्र गोपुर मुत्तुंगं वैडूर्य मणि शोभितं ॥ त्रा
पीठ शिखर प्रोत रुद्र चारित्र शोभितं ॥ २॥ पंच लक्ष प्रमाणेन महा वैडूर्य सद्रूपं ॥ पट्टिका देव कोष्टैश्च कापोतैः पालि
पालिकैः ॥ ३॥ मणि कुंभोल्लसच्छ्रुभ्रंतं तु पंच शतां चितं ॥ नवलक्षं रुद्र गणाः शंभोः रुद्यत शस्त्रकाः ॥ ४॥ त्रिपुंड्र विलसत्फा- ७४
लाः कपर्द धृत चंद्रकाः मत्त मातंग संकाशाः युवानो मृष्ट कुंडलाः ॥ ५॥ रक्षंति परितस्तत्र प्राकारं वर गोपुरं ॥ तस्यांतरे हि सु
महान् नाना मणि गणान्वितं ॥ ६॥ देव्यास्तु भवनं श्रीमत्सोध पंक्ति विभूषितं ॥ रम्य माणिक्य खचितं नंत भा पार सहस्रकैः ॥ ७॥
हीरसार महाधारैः पुष्परागालिनो लकैः ॥ वैडूर्यकैश्च गोमेदैः मुक्ता विद्रुम कल्पितैः ॥ ८॥ पुष्पराग मणी कूटैः गोमेद
वलभी युतैः ॥ हरिन्मणि वरा रूढैः मुक्ता मणि मेरोज्वलैः ॥ ९॥ सुप्रवाल लता स्तंभैः कुरुविंदो रुवेदिकैः ॥ तत्र प्राकार

मस्त्येकं चंद्रकांतिशिलान्वितं ॥ विंशत्सहस्त्रमानेन योजनेन प्रकल्पितं ॥ चतुर्द्वार परिक्रूप्त महागोपुर वेदिकैः ॥११॥
रत्नहीरकगोमेद पुष्परागविनिर्मितैः ॥ बालप्रभाकरकैर्मणिभृंगविराजितैः ॥१२॥ देवीक्रीडारसैः सिंहैः पर्यंतावलि
शोभितैः ॥ शरच्चंद्रसमाकारैः स्फटिकोत्तमरंजितैः ॥ विकृतास्यललज्जिह्वैः सदा शोभितकंधरैः ॥ तत्रांतर्भवनं दे-
व्या दशसाहस्त्र कल्पितं ॥१४॥ योजनानां च परितो वनं रत्नविचित्रितं ॥ उद्यदिंदुकरप्रख्यं नानाशिल्पैकसुंदरं ॥
१५॥ तत्र देव्या महापीठं कोटिभास्करसंनिभं ॥ हीरतारगणाकार प्रभावलि विराजितं ॥१६॥ नवरत्नमहासौधम-
ध्यगा भुवनेश्वरी ॥ कमलामोदबहुलपर्यंतसरसोत्तरा ॥१७॥ सौधमध्यमणिक्लृप्तसिंहासनवराश्रया ॥ हरि-
न्मणि महामंचदोलांदोलितविग्रहा ॥१८॥ हल्लीसलास्यललितयोगिनीगणसेविता ॥ कदाचित्सा महादेवी
प्रवालवरपीठगा ॥१९॥ प्रवालवरपीठस्थरत्नपीठवराश्रया ॥ माणिक्यसौधमध्यस्था भूषिता चारुभूषणैः
॥२०॥ कदाचित्पुष्परागोत्थसौधमध्यैकवासिनी ॥ लीलाकुंतकमूताद्धुरविसोमजकुंतका ॥२१॥ हननाच्चतयोरू-
र्ध्वाधोगतिसंचरैः ॥ उदेति सूर्यश्चंद्रश्च अस्तमति उदेत्यपि ॥२२॥ करतालेन संव्यास्तु तस्मिन्सौधवराग्रतः
रत्नसौधवरोद्दामजालकांतारसंचरा ॥२३॥ सुधाकरकरास्फारप्रासादवरकौतुका ॥ पुष्पवाटीपरिवृतरत्नसौ-

माहेश्व० घवराश्रया: ॥२४॥ मुकुरागारमध्यस्थाकराचिद्रुरदा शिवा ॥ पुष्पमंचकमध्यस्था पुष्पराजगृहांतरे ॥२५॥ प्र०ग्रं०

रत्नवीटीकराभास्वद्रत्नकंकणभूषिता ॥ कदंबवनमध्यस्थाहीरसौधवराश्रया ॥२६॥ लीलालालितरत्ना ग्र०२६

द्धकीरवीरकराशिवा ॥ शारिकाव्यक्तकगिरातुष्टानीलजसौधगा ॥२७॥ सुदीपितमहानीलकरभ्राजिमस्त

का ॥ वरभूषणभूषाढ्यारणत्सिंजानपादुका ॥२८॥ पाशांकुशवराभीतिधराश्रीभुवनेश्वरी ॥ रत्नपात्रस्थितानेकफ ७५

लालोकनतत्परा ॥२९॥ पुष्पगुच्छमहाहारआपीडामोदहस्तका ॥२९॥ सुधासुरवरितामोदरत्नपात्रकराक्वचि ७५

त् ॥ मुकुटोद्दामचंद्रांशुराशिमारालका शिवा ॥३०॥ सुरत्नकंतुकास्ताविकेशपाशमनोहरा ॥ योगिनीदर्शिता

नेकरत्नादर्शविलोकिनी ॥३१॥ चंद्रकांतशिलाजालसौधमध्यनिवासिनी ॥ नयनांजनकाकुष्ठरत्नभ्रा

जच्छलालिका ॥३२॥ करमुद्राविनिर्यत्श्रीर्नखकांचितमुद्रिका ॥ हीरभ्राजितलारक्तक्षविकापदभासुरा ॥

३३॥ नीलवेणीचितानेकरत्नसवंतिकातति: ॥ महार्हहेमखचितवसनांचलमौक्तिका ॥३४॥ परिधत्तेंशुकं

देवी मणिभ्राजिगृहांतरं ॥ धूपधूमपरिष्कारगंधर्वधैकसुंदरं ॥३५॥ मणिहर्म्यांतरेपीठेसुमनोगुच्छभा-

सुरे ॥ रत्नांशुदीपकोद्दामप्रभाभासितदिक्तटे ॥३६॥ संस्थितादर्शितानेकरुद्राणीवदनांबुजा ॥ सुचंदनद्रवा

रत्न कंकचिका पृष्ठ

सारवरांगितनुच्छविः ॥३७॥ सुरमंदारपुन्नागकेतकीकुसुमशेखरा ॥ चंपकाशोकदमनैश्चोशीरकसुपाटलैः ॥३८॥
मल्लिकामालतीजातीधम्मिल्लभरशोभिता ॥ कस्तूरीचंद्रगंधाक्तपटवासेनसुंदरा ॥३९॥ मृगनाभिसुगंधोद्यत्कु-
चांतरितभासुरा ॥ निचोलग्रंथितोद्दामभुजावलिविराजिता ॥ ४० ॥ रुक्मिणीकरसिंदूरकृतसीमंतरेखिका ॥
सुरत्नतिलकभ्राजिसोमधामसमानना ॥ ४१ ॥ हस्तांगुलीयविलसत्प्रभाभूषितदिक्ततिः ॥ वैदूर्यसौधमध्यस्था
रुक्मिणीनृत्तदर्शिनी ॥ ४२ ॥ नीलरत्नकृतालावुमणिसारजहीरकैः ॥ ऊर्ध्वबद्धमहातंत्रीवीणावाद्यारताक्वचित् ॥
४३ ॥ गायंतिमधुरोदारं शिवनामैवसुंदरं ॥ शरच्चंद्रकनिकरचामरैर्वीजिताक्वचित् ॥ ४४ ॥ मायूरैर्मेदंडैश्चव्य-
जनैर्वीजिताशिवा ॥ पर्वोत्थशर्वरीनाथतिरस्कारिमणीसरैः ॥ ४५ ॥ भ्राजच्छत्रावृतमुखातांबूलरसमोदिता ॥ वीटि-
कालग्नसुकरापश्यंश्चित्रपटंस्थिता ॥ ४६ ॥ सदाशिवस्यतद्रूपं लिखितं लेखकेशितुः ॥ विद्रुमाभरदच्छादिबिं-
बाकारसुशोभिता ॥ ४७ ॥ रत्नग्रैवेयचिताकलोलमुक्तांशुसत्प्रभा ॥ क्वणत्कंकणिकाभास्वत्रत्नहस्तसरैर्यु-
ता ॥ ४८ ॥ तपनोडुपविभ्राजिताटंकयुगलाधृतिः ॥ उद्यत्कविनिभात्यच्छमुक्तानासावृतास्यका ॥ ४९ ॥ रत्नगं-
गामहासारधारागृहवराश्रया ॥ कटीतटनिबद्धाच्छरत्नकांचिविराजिता ॥ ५० ॥ रणत्पादपंकजोद्दाममणिमंजीर
भासुरा ॥

 रणत्सिंजानमधुरहंसारोवेकसुंदरा॥ ५१॥ मरालराजगमना दिव्यहारावृतांगका॥ बंकिकानागबंधोद्यद्बाहुवल्ली माहेश्व०
विराजिता॥ ५२॥ कूर्परागलललम्मुक्तागुच्छसंछादितप्रबिः॥ भालं बितरत्नालिललामावलिशोभिता॥ ५३॥
सूर्यचंद्रांकितोदारशिरोभूषणभूषिता॥ योगिनीकोटिभिस्तत्र सेविता परमेश्वरी॥ ५४॥ हरिन्मणिमहासोधेमुदि
तासंस्थिता शिवा॥ दिव्योपधानसंक्लृप्तमणिमंचेकुथास्तृते॥ ५५॥ धूपामोदितदिक्चक्रे मणिदीपमनोहरे॥ वि-
तानालंबिमुक्तोघगुच्छसंछादितांतरं॥ ५६॥ पादबाहूपधानेषु स्वास्तृते विहरत्युवा॥ रुद्राणीगानधारीभिःवी-
 णानादानुगैः शिवा॥ ५७॥ शृण्वती शिवनामानि संस्थिता वैद्रुमेगृहे॥ सुवर्णकदलीगुच्छैः हरिन्मणिनिभैर्द्रुमैः॥ ५८॥
तन्मध्येस्फाटिकमणीकृतसौधवराश्रया॥ तमालसालनीपादिवृतेसौधेगरुत्मतः॥ ५९॥ मणिक्लृप्तमहापीठेसंस्थि-
तायुद्ददर्शनो॥ लावकानांमयूराणांकुक्कुटानांमनोहरं॥ ६०॥ मेघसारंगशृंगाद्यैस्फारनारावितदिक्तटं॥ रम्येरत्न
स्त्रिनीतीरबंधोदिक्षुमणीन्द्रकैः॥ ६१॥ सोपानतोरसंक्लृप्तमणिसुंदरमंडपे॥ रत्नपंजरमध्यस्थानरत्नसारीशु-
कान्शिवा॥ ६२॥ पश्यंती दाडिमोजंददातिशुकचक्रके॥ पूगद्रुवेष्टितापारद्राक्षवलितगुच्छके॥ ६३॥ संध्या
वल्लीसुमारक्तचंद्रिकापुष्पशोभिते॥ पर्यंतकुल्यातीराकुमणिबंधसुधापयः॥ ६४॥ पाथोजविलसत्फुल्ल

हल्लकामोदमोदिते॥ धारासारमहायंत्रशोभिते गंधमोदिते॥६५॥ पूगद्रुमौलिसंक्लृप्तादिमणिहर्म्योरुमंचगा॥ क्रीडाशिखंडिविहिततांडवं पश्यती शिवा॥६६॥ महामणींद्रसंक्लृप्तसौधैरुपरिकल्पिते॥ नानाचित्रपटीक्लृप्तपट्टांबरगृहादरा॥६७॥ मुक्तिरस्कारिकाक्लृप्तचतुर्दिक्षु मनोहरे॥ मणिकुंभोद्यते देवी मणिस्तंभविभूषिते॥६८॥ सखीभिः सह सल्लापं कुर्वती संस्थिता क्वचित्॥ रथाकारमहासौधे मणिचक्रे हयैस्तथा॥६९॥ पर्यंतइवतत्सौधे सिंहहंसविराजिते॥ तत्रैवांतर्गृहे देव्याः क्रीडाभवनमीशितुः॥७०॥ श्रीचक्राकारमतुलं तन्मणींद्रमनोहरं॥ सहस्रयोजनायामैर्मणिचित्रगवाक्षकैः॥७१॥ हंसपद्ममहाव्यालीपालीचित्रैर्विचित्रितैः॥ मणिस्तंभमहासारधारारंजितभूतलैः॥७२॥ वितानमालाकलितैः मुक्तागुच्छलिलंबितैः॥ मणिमंचैर्महापादैः लंबिताधस्थितैरपि॥७३॥ तत्र वता महाशय्याः सोपधानमनोहराः॥ चंद्रमंडलसंकाशाः फेनगोक्षीरसप्रभाः॥७४॥ सुमामोदितगंधाढ्या मल्लिकापुष्पसंस्तृताः॥ भ्रमद्दीपगृहभ्राजमणिचित्रविभूषिताः॥७५॥ देवस्य देव्याः क्रीडादिसचित्रोरुकुट्टिमाः॥ धूपवृक्षैर्दीपवृक्षैर्मणिक्लृप्तैः सहस्रशः॥७६॥ तांबूलकल्पपात्रैश्च मणिभृंगारकैः शुभैः॥ धूपपात्रैर्दीपपात्रैः पुष्पतांबूलपात्रकैः॥७७॥ फलपूर्णरत्नपात्रैः मणिकुंभैः सुधायुतैः॥ धूपामोदमणिद्योतिविराजित

१पं.८ देवा भक्तान्येशया ॥-देवः सद्गुणसागरोऽपि सततं निर्मायिको निर्गुणो ॥ भस्मोद्धूलितविग्रहः स्मरहरः श्रीचन्द्रचूडो विभुः ॥ धत्ते देवगणान्स्तु श्रुतिनिचयं धर्मं तथा वाहनं ॥

शि०र०हं० मनुत्तमं ॥७८॥ मणिपुत्तलिकाक्लृप्तचारुचामरवीजनैः ॥ व्यजनादर्शतांबूलधृतपुत्तलिकायुतं ॥७९॥ गणेश्वररहितं माहेश्वं तो देवः सर्वो विरहिता शिवा ॥ तस्मिन्श्रीचक्रमौ धेनु क्रीडतस्तौ शिवौ मुने ॥८०॥ ॥स्कंद उवाच॥ ॥कैला सेनवशक्तिरत्नविलसत्पीठे महातत्त्ववाक् ॥ जातेनेकगकोटिविस्तरयुते श्रीचक्रमध्यं गते ॥ विंदो चंद्रदिनेशकोटियुगले मंचे तथा पीठके पंचब्रह्ममये वयं गिरिजया सार्धं हृदा दध्महे ॥८१॥ कैलासे नवरत्नहेर्म्यविलसन्मंचे सुधांभोनिधौ मध्ये कल्पकवाटिकापरिवृते चिंतामणौ भायुते ॥ सार्धं योजगदंबयारविमयं चैकं सुधावर्षिणो रूपं कंतुकमुत्क्षिपत्यनुदिनं ते नैव रात्रिर्दिवा ॥८२॥ मूर्तयो विधिविष्णुईशमुसराड्दक्षोपुमर्थानपि चत्वार्येव युगानि वेदनिवहं दिव्यं फलानां गणं ॥ कुर्वन्नेव चतुर्दिशात्मकमहो वेचित्र्यचित्रे पटे दिव्यन्ना धर्मशेषभाग्यनिबहेः कृत्वा ग्लहं संमतं ॥८३॥ कृत्वा प्राणिफलापरस्यफलकस्तोमं विधाय चैवेकालं कर्म च पाशकोसहि शिवो दीव्यन्स्सहास्तेंबया ॥८४॥ इति श्रीशिवरहस्ये प्रथममाहेश्वरांशे देवीप्रस्तावर्णनं नाम षड्विंशोध्यायः ॥२६॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ स्कंद उवाच ॥ तत्रैव देव्या सदनं पुनर्न्यन्मनोहरं ॥ गरुत्मतमणीभास्वत्क्लृप्तयोजनविस्तृतं ॥ वलभीगोचिता नेकगवाक्षोद्यतकुंभकं ॥ मणिपो-

प्र.अं. प्र.२६

७७ ७७

ढोज्ज्वलस्तंभकॢप्तविद्रुमपुञ्चकं॥२॥सुरत्नपनसैश्चैव सुरत्नकदलीफलैः॥सुरत्ननारिकेलाढ्यैः क्रमसंघमनोहरं॥
३॥सुरत्नकेतकफलालंबितच्छन्नभूतलं॥पुष्पमालारसास्वादभ्रमद्भृंगसंकुलं॥४॥तस्मिन् दिव्ये महामंचे
पुष्पशय्याविराजिते॥दमनोशीरकायुक्तवितानाच्छादितांबरे॥५॥सुरत्नपंकजलसन्मालिकासमलंकृते॥म-
म्लाने सर्वदा तस्मिन् मुकुरोत्तुंगकुट्टिमे॥६॥रुद्राणीभिः परिवृता नित्यमास्ते महेश्वरी॥६॥सपुष्पालकधम्मि
ल्लास्तारा धिपसमाननाः॥७॥तरुण्यो रूपसंपन्नाः कुंभिकुंभाभसत्कुचाः॥मणिग्रैवेयहाराढ्यमुक्ताखत्नांगदै-
र्युताः॥८॥मुक्तानासावृताः सर्वाश्चंद्रिकाकॢप्तशेखराः॥दिव्यांगरागसुभगाः रणन्मंजीरकांचयः॥९॥
तास्तत्र सौधवर्येषु देव्यो विद्युल्लताइव॥संचरंति महादेवीं सेवंते जघनोन्नताः॥१०॥महार्हवसनो
पेतास्तिलकालंकृताननाः॥तांबूलरागरक्तोष्ठबिंबाधरमनोहराः॥११॥चामरग्राहिधराः काश्चित् काश्चि
च्चंदनधारिणीः॥काश्चित्कालांजिकापाणीः काश्चिच्छत्रधरास्तथा॥१२॥तांबूलं रत्नपीठं च धृत्वांजनकरास्तथा
॥काश्चित्कंकतिहस्तास्ता भूषपेटीधरास्तथा॥१३॥हरिद्राकुंकुमाहस्ताश्चलक्तरसधारिणी॥सिंदूरधरणीका
श्चित्पादुकासत्कसत्कराः॥१४॥रत्नहेमांबरादीनि मणिप्राचन्निचोलकं॥रत्नवीणाकराकाचित् लीलाशुकक-

112

शिवरह॰रास्तथा॥१५॥ हरिन्मणि महापिंछ मयूर वर धारिणीः॥ रत्नादर्शकराः काश्चित्प्रफुल्ल सुम धारिणीः॥१६॥ चंपका-माहेश्व-
दि महा हस्तार रत्न शृंगार सत्कराः॥ खड्ग खेटक निस्त्रिंश च्छर कार्मुक पाणयः॥१७॥ निषंग संगितकराः लीलाकुंतक धारिणीः॥ हल्लीसरास्य रत्नाढ्य दंडमंडितसत्कराः॥१८॥ अक्षपेटी धराः काश्चित् कस्तूरी गंध सत्कराः॥ रत्नपात्र स्थिता पारा गंध गंधित दिक् तटाः॥१९॥ पटवास सुवासेन हार गुच्छ कशे खरैः॥ पात्रैः प्रोघत्कराः काश्चित् रत्न शूल धरास्तथा॥२०॥ शारिका बोधनो युक्ता देवी नाम निसादरं॥ सुधूपवृक्ष धारिण्यो दीपिका धारिणीः पराः॥२१॥ गंधतैलाव सिक्तो घद्दूल कुंभी करास्तथा॥ तांबूल पात्र वितत कराः फलक-रास्तथा॥२२॥ पद्मोत्पलकराः काश्चित् शृंगराग करास्तथा॥ फल जाल युता पार स्वर्ण पात्र लसत्कराः॥२३॥ मणिकुंभ सुधा पूरकराः काश्चिन्मनोहराः॥ एवं सेवंति तां देवीं रुद्राण्याः परितोंबिकां॥२४॥ तत्तत्सेवासभिज्ञा देव्याश्चित्तानुवर्तिनीः॥ प्रासादेषु चरम्येषु मणि सिंहासनेषु च॥२५॥ पुष्प शय्यां तथा काश्चित्कुर्वंति सुकुथावृताः॥ भक्ष्य भोज्यान्न कुशलाः पेय रस वरेतथा॥२६॥ देवीं सेवंति तास्तत्र रुद्राण्यो नवयौवनाः॥ तत्र देव्या महासौधो नवरत्न विचित्रितं॥२७॥ गर्भागारं महेशस्य रम्यं देवीश्वरस्य च॥ प्राकार गोपुरोपेतं

प्र॰ पं॰

प॰ २६

७८

७८

रत्नतोरणमंडितं ॥ २८ ॥ माणिक्य मुखशाहाम रुद्रक्रीडावृषैर्युतं ॥ सुरम्यं रत्नकलश पताकाभ्राजिशेखरं ॥
२९ ॥ तत्र लिंगं सुधापूर धवलीकृत दिङ्मुखं ॥ काकोदर फणाभ्राजि बिल्वालंकृतमस्तकं ॥ ३० ॥ सुधाधामक
खंडोद्यद्रत्न गोलक भूषितं ॥ तद्दृष्ट्वा देवी श्वरं लिंगं पूजयत्यंबिका सदा ॥ ३१ ॥ सुधासागर नीरोत्थकलशैर्नवरत्न
जैः ॥ पंचामृत महाधारागंधामोदैश्च नीकरैः ॥ ३२ ॥ यक्षकर्दमजालेपवेष्टनावर सुंदरं ॥ बिल्व चंपक धत्तूर रत्न
पंकजमालिनः ॥ ३३ ॥ जातीसरावलीशोभि लिंगमोलि मनोहरं ॥ तक्कोलागरु जोद्भूत धूप धूमैः शिवा तदा ॥ ३४ ॥
कुरुविंद मणिज्योतिर्दीपैरुद्योतितांबरं ॥ सुपुंडरीक मालाभिः नवनीलोत्पलस्रजा ॥ ३५ ॥ हरिन्मणिनिभैर्बिल्वैः
सहस्रैः पूजयेच्छिवा ॥ भक्ष्य भोज्यवरान्नानां राशिभिः शैलकन्यका ॥ ३६ ॥ तांबूलैः खदिरासार स्वर्णकर्पूरखं-
डजैः ॥ नीराजनैर्मुखरित शंख काहल मर्दलैः ॥ ३७ ॥ वीणावेणुजमड्डुत्थ दुंदुभ्याघात निस्वनैः ॥ रुद्राणी नर्तनै-
श्चैव योगिनी गण वादनैः ॥ ३८ ॥ त्रिकालं पूजयत्येव त्रिपुंड्र ललितालका ॥ रुद्राक्ष कीलिताधार मुक्तामणि सरोज-
ला ॥ ३९ ॥ सोम शैशचेवासमी साम्बरजे धारिणी शिवा ॥ संस्तुवंती महालिंगं देवी श्वरमतं द्रिता ॥ ४० ॥ कृतांज-
लि पुटा देवी प्रकृष्टं चाष्ट विग्रहं ॥ ४१ ॥ देव्युवाच ॥ हर हर परिपाहि दीनबंधो पुरहर देव दयानिधान धीर ॥

113

पंक्ति ३ - पाठान्तरं - "हरि शर, गिरि" कार्मु

शिवरह: मुरहर परि पूजितांघ्रि पद्म प्रकट सुधाकर शेखरो कबीर ॥ ४१ ॥ करि वर खर चर्मवस्त्र शंभो उरग वरोत्तम हारसार । माहेश्व-
परि पाहि दयानिधान गर्भ त्रिनयन कालकलादि हीन देह ॥ ४२ ॥ श्रुतिवर तुरगोत्तमाद्य शंभो गरगलनी-
ल तमाल पुष्प मोले ॥ भव भय हरकार रणाति गांतकारे गिरि हरि शर कार्मुकात्त पाणे ॥ ४३ ॥ परि पाहि वि-
भो चिशूल पाणे नरहरि कृत्तिवसान बाल पाल ॥ विधि कंधर शोभि हस्त पद्मा नलनय गिरि विदग्ध काम देह ॥ ४४ ॥
इमां देव समाज प्रकट स्तो भगुफादरं ॥ सनंदन सनातनैः कलित वंदनं शंकरं ॥ ४५ ॥ गुनिंदित गुणोत्तमं सुमुनि
वृंद वृंदारकैः ॥ पिचंडिल सुतुंदिले गणवरौघ नृत्तादरं ॥ ४६ ॥ ॥ स्कंद उवाच ॥ ॥ इति संस्तुवते देवी शं परमे
श्वरं ॥ रुद्राणी गणसंवीता योगिनी गणसेविता ॥ ४७ ॥ महाकैलास मध्यस्था देवदेवांक संश्रया ॥ सापि देवं
जन्माता पूजयत्यनिशं शिवं ॥ ४८ ॥ देवदेवं महादेवं गोवृषोत्तम गामिनं ॥ वतंसित सुधा धाम शेखरं श्रुतिसं
स्तुतं ॥ ४९ ॥ जटालकं निटिल गानलनेत्र महेश्वरं ॥ नीलकंठ विरूपाक्षं सोम सूर्यानलाक्षिकं ॥ ५० ॥ कुरंगरं
गितकरं कालकालं कृपानिधिं ॥ भस्माभ्यक्तं त्रिपुंड्रांकं रुद्राक्षवर हारकं ॥ ५१ ॥ महोरग फणारत्न मालाकोलितकं
धरं ॥ उद्यदिंदु कर प्रख्यं कर्पूराभ कलेवरं ॥ ५२ ॥ दिव्य सिंहासनासीनं महाकैलास सोधगं ॥ गणसं-

दमहानंदी श्रृंगी चंडीशसेवितं ॥ ५३ ॥ मकुटोद्दामगंगोत्थरयशोभिमस्तकं ॥ अर्कसोमाग्निनयनं सोमखंडोज्वलालकं ॥ ५४ ॥ उत्फुल्लपुंडरीकाक्षमालाललितकंधरं ॥ देवनंदनमंदारवरमालाविभूषितं ॥ ५५ ॥ खर्वपर्वपरितोदग्धत्रिपुरासुरगोपुरं ॥ अंधकांतकमाशास्यं स्वभक्तजनवत्सलं ॥ ५६ ॥ नमिताशेषदेवादिमकुटोज्वलपादुकं ॥ वामदेवमहासामस्तोमस्तुतमतीं क्रियं ॥ ५७ ॥ रथंतरस्वप्रीतं राजद्राजजनतोषितं ॥ महावैराजराजश्रीराजराजकलाधरं ॥ ५८ ॥ सर्वोपनिषदां सारमेकोभूतमिवेश्वरं ॥ ध्यायंती सा महादेवी स्वमनःपद्मसद्मगं ॥ ५९ ॥ तद्ध्यानसाराभिः स्नाविताननपंकजा ॥ नान्यत्स्मा चिंतयद्देवीजगज्जन्मादिसंस्थितं ॥ ६० ॥ ॥ स्कंद उवाच ॥ ॥ इत्थं ध्यायति चंद्रशेखरपदं चोत्फुल्लहृत्पंकजं देवीनंदननंदने पि गिरिजासापारवश्यांतरा ॥ नान्यत्किंचिदमन्यत त्रिभुवने निस्सारमेतत्त्वहो कृत्य महाक्षमानसपरा स्वात्मानमीशं हृदि ॥ ६१ ॥ ॥ इति श्रीशिवरहस्ये प्रथमभाहेश्वरांशे कैलासवर्णने देवीपूजास्तुतिर्नाम सप्तविंशोध्यायः ॥ २७ ॥ ॥

श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ स्कंद उवाच ॥ ॥ तस्यांतरे च प्राकारो नवरत्नशिलान्वितः ॥ अष्टाशीतिसहस्राणां योजनैश्च प्रकल्पितः ॥ १ ॥ चतुर्दिशं महेशेन मनसैव प्रकल्पितः ॥ ब्रह्मांडगोर्ध्व मौलीसः

शिवरह० प्रोद्यद्भानुसहस्रभाः ॥ न देवा न च गंधर्वा न यक्षोरगराक्षसाः ॥ गणेंद्रैरपि दुष्प्रेक्ष्यो प्राकारो रत्नकल्पितः ॥३॥ मा० हेश्व-
तत्र शैलाः शिवेनैव क्लृप्ता दिक्षु प्रतिष्ठिताः ॥ निषधो हेमकूटश्च विंध्यो मलय दर्दुरौ ॥४॥ मंदरो हिमवांश्चै- प्रकां०
नीलोऽत्रैव
व प्रकाशितः ॥ तेषां तपस्यया शंभुः संतुष्टो नितरां तदा ॥५॥ स्वावासेपि महाशैले महाकैलासपर्वते ॥ तेषां अ०२८
८०
नित्यं निवसतिं ददौ कारुण्यतः शिवः ॥६॥ अन्यत्र ते शिलाः शैलाः कैलासे रत्नसंनिभाः ॥ तत्प्राकारस्याष्ट
कोणे विहिताः शूलपाणिना ॥७॥ पूर्वतो निषधो भाति ~~ऐशान्यां नीलपर्वतः~~ चाग्नेय्यां हेमकूटकः ॥ विंध्योसौ
दक्षिणे भाति मलयो नैरृते स्थितः ॥ वारुण्यां दर्दुरो भाति वायव्यां भाति मंदरः ॥ हिमवानुत्तरे भाति ऐशा
न्यां नीलपर्वतः ॥९॥ अष्टदिक्षु स्थिता एते महाकैलासपर्वते ॥ स्वमौलिभिर्भासयंति दिशां स्तोमं नगोत्तमाः
॥१०॥ तन्मौलिसौधशिखरैः सूर्यचन्द्रातिकांतिकैः ॥ माणिक्यकांतो निषधोरैंद्र्यामिंद्रधनुःप्रभः ॥११॥ इंद्र
गोपनिभो भाति भाभासितदिगंतरः ॥ अभ्रंकषैः स्वशृंगाग्रैर्लेलिहान इवांबरं ॥१२॥ तन्मौलिषु स्थि
तापार रत्नगोपुरभासुरः ॥ नानारुद्रावतारैश्च वृषभैश्चैव शोभितः ॥१३॥ भाति भासितदिक्चक्रो
मुषणंश्च सूर्यकांतिभिः ॥ तच्छैलमौलिजोत्तुंगगजरत्नोरुकुंभगः ॥१४॥ ~~सहस्रसिंधुरोत्कुंभध~~
८०

सहस्रसिंधुरोत्कुंभधरापीठोमितप्रभः ॥ मृतलो महासौधः सहस्रस्तंभमंडितः ॥ १५ ॥ दाडिमीबीजसंकाशः स्वच्छ-
कांतिततोरुभा ॥ सोपानवेदिकोपेतः सहस्रतलमंडितः ॥ १६ ॥ पद्मरागमणिस्तंभकलशैश्चैव शोभितः ॥ ना-
नारत्नमहामालापरिष्कृततदंतरः ॥ १७ ॥ तद्रत्न[illegible]कांत्या[illegible]सैंद्रो दिग्गुर्कं वर्णका ॥ विभाति मंडलं भानो-
स्तत्सौधारूपकांतिभिः ॥ १८ ॥ आरक्तं हि नभो विप्र भाति तच्छैलकांतिभिः ॥ तत्रागरुमहाधूपैर्बहुले
गंधवत्तरैः ॥ १९ ॥ प्रफुल्लवनजापारगंधवर्द्धितमारुतैः ॥ तत्र सिंहासनासीनो देव्या शाकं महेश्वरः ॥ २० ॥ क्री-
//s डत्यत्यंतमुदितो गणवृंदनिषेवितः ॥ तत्राखंडमहास्तंभान् पद्मरागप्रकल्पितान् ॥ २१ ॥ त एव घोतयंतं-
तः कोटिभास्करसप्रभाः ॥ पश्यन्नैंद्रीं दिशं शंभुस्तत्रैवाप्यमरावतीं ॥ २२ ॥ तत्रेंद्रसदनं देवानुन्निंद्रादीन
मरानपि ॥ देवानां नंदनोत्फुल्लकुसुमामोदिमारुतं ॥ २३ ॥ जिघ्रं स्वांगमहाहारकाकोदरसुपारणं ॥ सप्ता-
ब्धिचलनास्फालतरंगावलिमीश्वरः ॥ २४ ॥ फेनबुद्बुदजालेश्च शिवनंदननंदितः ॥ तरंगहस्तेश्च सदान-
मंतइवसागरान् ॥ २५ ॥ तत्तदब्धिमहाद्वीपमंडलं सरितो नगाः ॥ वनानि देवयानं च स्वर्गिणां च गतीस्तथा ॥
२६ ॥ भोगंपातं कर्मिणां च पश्यन् हृष्यति चांबया ॥ निषधे शालयं तत्र मणिकुंभमनोहरं ॥ २७ ॥ निषधो मू-

र्तिमां सत्त्व तं लिंगं पूजयं स्तदा॥ भस्म रुद्राक्ष संपन्नो दिव्यैः पंचामृते स्तदा॥२८॥ गंधैश्चैव च वासोभिर्बि-
ल्व मंदार चंपकैः॥ धूपैर्दीपैश्च नैवेद्यैस्तांबूलैश्च नमं स्तदा॥२९॥ प्रदक्षिणाभिः सततं निषधः संस्तुवन् स्थितः॥
॥ निषध उवाच॥ ॥ निषधेशं भवरोग भेषजं सुनिपुणं सकलेषु च भूतवर्गे॥ विषमाक्षं कलुषैर्विहीन
देहं प्रणमामीश्वर मीमि मायादनंतं॥३०॥ ॥ सूत उवाच॥ ॥ एवं स्तौति सदा देवं निषधः प्राक् दिशि स्थि-
तः॥ हेमकूटस्तथाग्नेयां दिशि मौलो महाप्रभः॥३१॥ गोमेदक महारत्न भासुरोन्नत मस्तकः॥ स्वकांतिभि-
स्तदाग्नेयीं दिशं संभाडूय स्थितः॥३२॥ गोपुराकार शिखरैः स्वमौलिलट संस्थितैः॥ महलीकांतिगैः शृंगैः
महामणिवरांकितैः॥३३॥ रुद्रावतार चितैः गोपुरोत्तम मस्तकैः॥ मणिकुंभैश्च विततैः रत्नमालावलंबितैः॥
३४॥ तत्रैव सौधः सुमहान् गोमेद मणि सुंदरः॥ गोमेद मणिजोत्तुंग महापालीसहस्रगः॥३५॥ सहस्र
पाली पीठस्य स्तंभ विद्रुम पुत्रकः सहस्र पालयस्तत्र वैहत्यवर पीठकं॥३६॥ सहस्रतल संयुक्त मणि
धारा छपालिकः॥ तदाग्नेय महाकोण गोपुरे ष्वंतरा स्थितः॥३७॥ वेदिका पट्टिकोपेतो देवकोष्ठैश्च मंडि-
तः॥ ललामराज कूयभो वलभो परिष्ठितः॥३८॥ बालार्क विततच्छायः स्वच्छांतः स्तंभ कांति कृत॥ तस्मि-

न्मणिमये मंचे लंबमाने च संस्थितः ॥ ३९ ॥ मणिसंखलसंराजद्विताने परिवेष्टिते ॥ कुथोपधानैस्वास्तीर्णे तिष्टतीशः सहांबया ॥ ४० ॥ आग्नेय बहुलामोद बनगंधैश्च सुंदरं ॥ मारुतो वाति धूपानां प्रमोदामोद सुंदरः ॥ ४१ ॥ तमाल सुंदर वन मग्नि लोक विभूषणं ॥ अग्नि सौध गते स्तत्र मेवितं सुमनोहरं ॥ ४२ ॥ अग्नीश्वरा भिदं लिंगं पूजयंतो हि वन्हयः ॥ आग्नेय गणपैश्चैव तत्र लोक वासिभिः ॥ ४३ ॥ पुरा सम र्च्येत ल्लिंगं सर्व भक्षकृता दधात् ॥ विमुक्तः सततं वन्हिः तत्पश्यन् शंकरांबया ॥ ४४ ॥ तत्रत्य लोकनिचयं सप्ताब्धि परिवेष्टितं ॥ दीपान्वनानि सरितः पश्य त्वं बा सम न्वितः ॥ ४५ ॥ हेमकूटो महाशैलः मूर्तिमान् लिंगमैश्वरं ॥ हेम कूटेश्वरं नाम्ना प्रतिष्ठाप्य श्रमापनैः ॥ ४६ ॥ स्तौति देवं महाकूटो भस्म रुद्राक्ष धृङ्नगः ॥ हेमकूट उवाच ॥ पापाद्रिकूट कुलिशोत्तम हेमकूट वाटी कृताखिल सुमेरुज हेमकूट ॥ प्रोद्यत्सुधांशु चयमौलितटोरु भास्वत्कोटीर घोटक कृतागम कूट पाहि ॥ ४७ ॥ इत्थं सदा हेमकूटः स्तौति तत्र महेश्वरं ॥ शैलसौध कवरे परमेश्या चारु चंद्रशकलालक मौलिः ॥ ४८ ॥ नंदि भृंगि गणपैश्च सखिभिः क्रीडति श्रुति शिखामल वाक्यैः ॥ ४९ ॥ इति शिवरहस्ये माहेश्वरांशे कैलास प्रासाद वर्णनं नामाष्टाविंशो ध्यायः ॥ २८ ॥ श्रीका-

श्रीविश्वेश्वरार्पणमस्तु ॥ ॥ स्कंद उवाच ॥ ॥ योपरस्यार्ध पुरा मेरुः विंध्योऽयं चारुकंदरः ॥ यन्मौलिनिलया माहेश्व-
देवी सोयं पर्वतशेखरः ॥१॥ इंद्रनीलमयस्तत्र दक्षिणे भाति भूधरः ॥ लिहन्स्वजिह्वया लोकान् नास्ति सोऽत्यंत
सुंदरः ॥२॥ त्यक्त्वा स्नाभाति जात्यंत दुःखं तत्र घटोद्भवात् ॥ सूर्यातिगगतीभिश्च शृंगैः रंगितदिक्तटः ॥३॥
महेश्वजोन्मादमुदितो विंध्यभूधरः ॥ तन्मौलिगोपुरोत्तुंग शिखरे वृषभैरपि ॥४॥ महानीलगणो घद्र
नीलोकूदिशोदरः ॥ तन्मौलितिलकोद्दाम पुंडरीक सहस्रकैः ॥५॥ दंष्ट्राकराले विकृते धारितः सोधसत्तमः ।
वेदिकापट्टिकोपेतः सहस्रस्तंभमंडितः ॥६॥ तत्रागरु महाधूपैर्ज्वालोज्ज्वलितदीपकैः ॥ सहस्रतलसंयुक्तो
नीलकुंभोज्ज्वलच्छिखः ॥७॥ नीलसारेश्च वृषभैर्मणिनेत्रैश्च शोभितः ॥ स्फटिकेंद्रमहानीलज्वालाकां-
तितकुट्टिमः ॥८॥ नीलनीलोत्पलकृतमालासार विभूषितः ॥ गवाक्षित इवाभाति प्रंबरं तलसुंदरं ॥९॥ त-
स्मिन्सौधोत्तमे मंचे इंद्रनीलोरुपादुके ॥ तस्मिन् मंचोपरिलसन्नीललोहित ईश्वरः ॥१०॥ देव्या सह
स्ते नितरां गणवृंदनिषेवितः ॥ पश्यन्यामीं दिशं शंभुः यमं संयमिनीश्वरं ॥११॥ नारकाणां विचित्रश्च गतयः
स्तत्र शंकरः ॥ क्लिश्यमानान्दह्यमानान् पच्यमानान्महेनसः ॥ प्रशैवानभपापिष्टान् भस्मरुद्राक्षवर्जितान् ॥

प्र०अं०

अ०२९

८२

लिंगार्चनविहीनां श्च शिवनामोज्झितां स्तथा ॥१३॥ रुद्राध्यायजपैर्हीनान् पंचाक्षरविवर्जितान् ॥ शिवनैवेद्यरहितान् मत्वा श्मशानतत्र शंकरः ॥१४॥ सप्त क्षिवेष्टिता पारभूमिभागान् महेश्वरः ॥ नगांश्च सरितः पुण्यान् वनान्युपवनानि च ॥१५॥ क्रीडत्यत्यंतमुदितो देवो देव्या महेश्वरः ॥ विंध्यमौलि महासौधे नीलेंद्रमणिकल्पिते ॥१६॥ विंध्यो विंध्येश्वरं लिंगं तत्र संपूज्य भक्तितः ॥ पंचामृतैः फलरसैश्चंदनैर्धूपदीपकैः ॥१७॥ बिल्वचंपकमंदारकरवीरसुपंकजैः ॥ प्रदक्षिणानतीभिश्च मणिनीराजनैरपि ॥१८॥ संपूज्य विंध्यः संस्तौति भक्त्या विंध्येश्वरं शिवं ॥ ॥ विंध्य उवाच ॥ विंध्ये शबंधु दिवसं न भवेत् कदाचित् त्वत्पादपूजननतिस्तुतिभिर्मभाद्य ॥ वंध्या पितत्पादनिवेदित भोज्यभुक्त्वा द्विंध्योपमं हृदतरं हि सुतं लभेत ॥२०॥ ॥ सूत उवाच ॥ ॥ इत्थं स्तौति सदा विंध्यः विंध्ये शं तत्र शैलराट् ॥ मलयोनेक्रीते भाति राजत्सुंदरशेखरः ॥२१॥ पुष्परागमणि~~कूप सहस्रस्तंभमंडितः ॥ सुरत्नकलशोपेतः सहस्रतल्पमंडितः~~ प्रख्यानानानिर्झरकंधरः ॥ रम्यशृंगाग्रविलसद्गोपुरावलिभासुरः ॥२२॥ रुद्रक्रीडादि सहितो ललामवृषभांचितः ॥ स्वप्रभाभासितोल्लासि सर्वलोकातिगो नगः ॥२३॥ भाति भूमिधरस्तत्र सौधोत्तमविभूषितः ॥

117

शिवरह० महस्रसारसोत्तुंगशिरोभिर्धोरितो महान् ॥२४॥ पुष्परागमणिक्लृप्तसहस्रस्तंभमंडितः ॥ सुरत्नकलशोपे- माहेश्वरां

तः सहस्रतलमंडितः ॥२५॥ परार्घ्यरत्नखचितसिंहासनवराश्रयः ॥ रत्नगुक्त महापुष्पसरालंबितपीठभूः ॥

॥२६॥ तच्चारुभूषणोपेतो देव्या क्रीडति शंकरः ॥ महामलयजोद्भूतचंदनामोदिमारुतैः ॥ चंद्रचंदनलिप्तांगो प्र-श्रं.

महाकल्पकपुष्पधृक् ॥ गुग्गुलुद्दामसुभगधूपामोदितदिक्तटः ॥२८॥ तां नेत्रं तिं दिशं शंभुः पश्यन्निकृ प्र-२६

८३ तिजान् गणान् ॥ कृष्णान्करालान्विकटान्निस्त्रिंशवरधारिणः ॥२९॥ समांबुधीनां कोणानितरं तर्गतभू

मपि ॥ द्वीपांश्च सरितः शैलान्वनानि च महेश्वरः ॥३०॥ मलये नस्वनाम्नावै लिंगं तन्मलयेश्वरं ॥ मणिधाम

गतं तत्र पूजितं सर्वकामदं ॥३१॥ पंचामृतैश्च स्नानैश्च बिल्वमंदारचंपकैः ॥ धूपैर्दीपैश्च नैवेद्यैः प्रणामप्रक्रमादि ८३

भिः ॥३२॥ संस्तुवन्परया भक्त्या गिरिणा मलयेन च ॥ मलयेश महेश शंकर प्रमथाधीश्वर चारुचंद्र

मौले ॥३३॥ त्वयि जातं जगदेतद्देव शंभो प्रलयं याति लये त्वदीयकुक्षौ ॥ ॥स्कंद सूत उवाच ॥ ॥इत्थं स्तोति

सदा देवं मलयः शैलसत्तमः ॥३४॥ दर्दुरः पश्चिमे भाति नानाशृंगवराश्रयः ॥ वैडूर्य

सारसुभगस्तस्त्र छविनाततः ॥३५॥ तन्मौलिगोपुरापारशिखरैरतिभासुरः ॥ रुद्रावतार-

शिवरह० चरिते र्महोक्षगणसंकुलः ॥३६॥ दोधूयमान शृंगाग्र पताकावलि शोभितः ॥ महाशार्दूलसाहस्र धारित माहेश्व[र]
रत्नमणिप्रभः ॥३७॥ सहस्र स्तंभ संयुक्तो वेदिका पङ्क्ति कान्वितः ॥ मुक्ता गुच्छ संछादि वितान वितताम्-
बरः ॥३८॥ धूमामोदेन बहुल गंधनंदित दिक्तटः ॥ वैडूर्य सार गर्भोरु सुंदरां तरकाचितः ॥३९॥
तत्र सिंहासनं दिव्यं पंचयोजन कल्पितं ॥ परार्ध्यास्तरणोपेतं तस्मिन्देव्या महेश्वरः ॥४०॥ विहरत्यं-
तरगणैः वरुणावारुणीश्रितः ॥ दिशं पयोधिनाथेन पालितां यादसां तथा ॥४१॥ वैडूर्य रत्न मुकु-
टतट बंधेंदु शेखरः ॥ मणि कुंडल गंडाग्र भाधवलितांगकः ॥४२॥ वलयाहीश्वरो भासि फणाफ-
णित हस्तकः ॥ कृष्णागरु सुधूपोत्थ धूम सारानुरंजितः ॥४३॥ महार्णव समोपेतः चलच्चामर वीजितः ॥ तद्वै-
डूर्य महाछत्र धार विद्योतितांतरः ॥४४॥ पश्यन्पश्चिम दिङ्नाथं वरुणं तद्गणानपि ॥ पाशहस्तान् हरि
द्वर्णान् करालारुण दंष्ट्रकान् ॥४५॥ तत्र सप्ताब्धि वलयं नदीनद वनानि च ॥ देव भागांश्च
तत्रत्यान्क्षेत्राणि च महेश्वरः ॥४६॥ वि हात्यं बयासार्धं सोधेतस्मिन्पिनाक धृक् ॥ दर्देरेशा
भिदत्तेन पूजितं दिव्य धामगं ॥४७॥ पंचामृता सेचनैश्च गंधैर्बिल्वैश्च पंकजैः ॥ धूपैर्दीपैश्च-

119

नैवेद्यैः नमः प्रक्रमे स्तवैः ॥४८॥ तुष्टाव दर्दुरो देवं दर्दुरेशं महेश्वरं ॥ ॥दर्दुर उवाच॥ ॥पापापार मतंग कुंभ हरणे त्वं शंकरो दर्दुरो॥ भीमोऽहीश्वर कंकणोत्तम लसत्पाणी नखो द्युत्प्रभः॥ सिंहः सर्व सुरेश्वरो हि भगवान्नेंदोः कपर्दोज्वलः॥ सर्वं धाम जरिता गरं जरयिता केशो गुणे वाचकः॥४९॥ ॥इति श्री शिवरहस्ये प्रथम माहेश्वरांशे कैलास सौध वर्णनायां एकोनत्रिंशोऽध्यायः ॥२९॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥श्री॥ श्री॥ श्री॥ श्री॥ श्री ॥श्री॥
ॐ नमः शिवाय ॥ॐ नमः शिवाय॥ ॐ नमः शिवाय ॥ॐ नमः शिवाय॥ ॐ नमः शिवाय ॥श्री॥
ॐ नमः शिवाय॥ ॐ नमः शिवाय ॥ॐ नमः शिवाय॥ ॐ नमः शिवाय॥ ॐ नमः शिवाय ॥श्री॥

॥स्कंद उवाच॥ ॥वायव्यामं दरस्त्वमणि सुंदरकंधरः॥ महेशस्य प्रियो नित्यं सर्व मंदार नंदितः॥१॥
मंदारतरुभिस्तस्य मौलिस्थैर्द्योतितादिशः॥ हरिन्मणि प्रभाधारा परिष्कृतदिगंतरः ॥२॥ सोयुतं योजनायामैः विस्तारो
छ्रायविस्तरः॥ अतुलः सर्व सिखरि शिखाव्रातैक सुंदरः॥३॥ चंदनानंदितमुखःसुमगंधोज्वलच्छिखः॥ रत्नमालतमा
लालि मौलि पालिविराजितः॥४॥ तत्रैव मंदरो दाम शेखरैरमित प्रभैः॥ विभांति तत्र हरिमणि हरितः शाड्वलोपमाः
॥५॥ चकास्ति तद्दिशां चक्रं नाना पक्षि मृगैर्युतं ॥ तन्मौलिगो पुरापार कलशद्योतितांबरः॥६॥ रुद्राक्षवतार
रोचितैः धेनु पोत गणैः शुभैः॥ सहस्र हंस मौलिस्य सौधराज विराजितः॥७॥ वेदिसोपानकोपेतः सहस्रस्तंभ
मंडितः॥ तलैर्वलित पालीभिः वलभीभिर्विचित्रितः॥८॥ तस्यांत मणि पादाछ्छ स्वछ्छ सिंह वरासनं॥ सामा
णि धूप बहुल गंध गंध वहाश्रयः॥९॥ रत्नजाल महासाल जालकावलि कीलितः॥ मंदरोत्थ महानंद सुम
सुंदर मारुतः॥१०॥ दिव्य मंदारजामोद फुल्ल माला वृतोदरः॥ हरिन्मणि महा द्वीप सार धारा वृतांतरः॥११॥
तत्र देव्या हरित्कांत्याश्रमभागस्य पार्श्वगः॥ सेवितो हरितो द्दाम पाद मंचे धि संस्थितः॥१२॥ वायुः सप्तव
शः लोकान् त्रत्यान गण पानपि॥ साग रांतर जान द्वीपान् वनानि सरितो नगान॥१३॥ देवलोकांस्त दादेवो-

दृष्ट्वैतल्लोकं प्रतीक्षयत् ॥ मंदरणार्चितं तत्र लिंगं सुंदरमंदिरे ॥१४॥ नाम्नैव मंदरेशानमिंदुकुंदसमप्रभं ॥ पंचामृतैस्तथा नीरैश्चंदनैर्बिल्वपल्लवैः ॥१५॥ अरविंदमरंदैश्च मंदारतरुजैः सुमैः ॥ धूपैर्दीपैश्च नैवेद्यैर्नमनप्रक्रमैस्तथा ॥१६॥ आनंदसुंदरोदारः स्तवैः संस्तौति भक्तितः ॥ ॥ मंदर उवाच ॥ ॥ श्रीमंदरेश विविधामेगंमौलिवृंदसंदोहनंदितपदांबुजभृंगभावं ॥ संप्रार्थयामि तरुणेंदुकलाललामवंदारवंदितपदांबुजसेवयाहं ॥१८॥ ॥ सूत [above line: स्कंद] उवाच ॥ ॥ इत्थं स्तौति महादेवं मंदारश्चारुकंदरः ॥ ॥ स्कंद उवाच ॥ मम मातामहो दामशेखरैरर्दितादिशः ॥ होरमारमयो भाति हिमवान् गगनातिगः ॥१९॥ हिमसारमहाधाराशशिकांतशिलोपलैः ॥ तत्कांतिकांतितालोकाः नानागोपुरभासुरः ॥२०॥ रुद्रावतारचीरैतैर्वृषस्तोमविराजितः ॥ नियुतं योजनायामः कैलासोत्तरभागगः ॥२१॥ सहेकसीरतटातटभ्राजि [above line: सहस्रनेसृष्टि ससटा त] सुपांडुरः ॥ तत्धौरितमहाहोरप्रासादाथच्छिखाश्रयः ॥२२॥ सहस्रस्तंभसंयुक्तो रम्यसोपानवेदिकः ॥ महाहिमघनीभूतचंद्रस्फटिकपीठकः ॥२३॥ संफुल्लमोदिविपिनसुमगंधितमारुतः ॥ शिलारसमहारीतिगंधमाद्यत्सुमद्रुमः ॥२४॥ तगरागरुसंभोदिबोधिचंदनमस्तकः ॥ कुरवाशोकबकुलचंपको दामगंधितः ॥२५॥ कर्णिकारमहावकुल [above line: तिलकांकितमस्तकः॥] कुटजोद्गम-

मुकुटो वटासट जटाधरः ॥२६॥ त्रिपुंड्रक कृ ताकान्तक्षो लां कोल सुंदरः ॥ महाहिम कराकारा महाहिवरधृ कनगः ॥२७॥ हरमौलि जटा लग्नासि हिमधामा ज्वलत्प्रभः ॥ दिव्य गंगा पयः पूर निर्झरा वृत कंदरः ॥२८॥ स्वकीय मौलि सौधस्तपंकजारस प्रभः ॥ गौरीशंकर पादाब्ज ध्यान निर्धूल हृत्तमाः ॥२९॥ जामातृकन्मका नंद प्रोल्ला शैलेश्वर स्तदा ॥ नितरां हर्षवर्षा श्रुकणान्मुं चन्निवास्थितः ॥३०॥ नील पीताऽरुणा पारशी तानि ये सुकं धरः ॥ तत्र तच्छैल शिखरे महाहीरोपलैः कृते ॥३१॥ हीर जाल कसंच्छन्ने हीरमं चाद्य पादके ॥ पराध्या स्तरणास्तीर्णे तगरी दाम धूपिते ॥३२॥ हीरकांतमणि ज्योत्स्ना निवारित तमोगुणे ॥ महा हीर तमोव्रात कल्प भूषित विग्रहः ॥३३॥ देव्या हीरन्मणित तशरीरवर कांतया ॥ नितरां मंचमध्यस्थो भाति भामिमहेश्वरः ॥३४॥ स्वपितुः शिखरे देवी नितरां तोषवेष भूः ॥ रमत्ये वहि देवेशं यथा कन्या पितृगृहे ॥३५॥ भर्त्रानिसंप्र मोदेत न तथाश्च शुरालये ॥ देव्या विहरतीशानः पश्यन्धन पते र्दिशं ॥३५॥ यक्षो गणोषि तां तत्र तत्रे मैलि विलैः पुरीं ॥ शातकुंभ महाभूमिं उत्तराश्च कुरूं स्तस्या ॥३६॥ देवोद्या नानि पुण्यानि सप्ताब्धि परिवेष्ट नं ॥ स्वर्ण ताल वनं तत्र तत्फलामोदि गंधभूः ॥३७॥ ताम्र पृष्ठां तथा भूमिं सहस्र योजनायतां ॥ सुधासागर

शिवरह॰१ मध्यस्थ मणि द्वीपं शिवप्रियं ॥ नीपापारवनंतच्च रत्ननीपैः समावृतं ॥ हिमशैलामलाकारधारा सौधे महे	माहेश्व॰ अ॰ ३०

२६

श्वरः ॥३९॥ देव्याविहरतिस्वैरं च चामरवीजनैः ॥ रत्नचांपेयमालाभिर्भूषितस्तत्र शंकरः ॥४०॥ गणेंद्रैर्ह

घतलसत्रिशूलकरभासुरैः ॥ हिमाचलेश्वरं लिंगं चंद्रस्फटिकधामगं ॥४१॥ अपारवीरिवश्याभिः हिमशै

लेन चार्चितं ॥ पंचामृतैः फलरसैः सुगंधैर्यक्षकर्दमैः ॥४२॥ बिल्वारविंदकल्हारैश्चंपकैर्बकसंभवैः ॥ धूप

दीपोपहारैश्च प्रणाम प्रक्रमादिभिः ॥४३॥ अस्तौषीत्स्थिमशैलेशं हिमवांश्च कृतांजलिः ॥ ॥हिमवा

नुवाच ॥ ॥परिणत हिमधाम कांतिराजज्जटयालंबितगंगयोरुहासं ॥ मदवदानन पंकजोत्पला

भैः रविसोमानललोचनैर्विलोकया शुभं ॥४४॥ ॥सूत उवाच ॥ ॥ इत्थं हिमाचलस्तौति हिममौ

लिमहेश्वरं ॥ नीलोविभाति चैशान्यां कैलासामलपर्वते ॥४५॥ रम्यसानुशतोपेतः सहस्रशिखरैर्युतः ॥

नीलोपिनामतः शैलः प्रवालमणिभासुरः ॥४६॥ उदारतरगंभीरशिखरालेढितांबरः ॥ ऐशान्यां गोपुरे

२६

भाति रुद्रक्रीडापरीवृतः ॥४७॥ उद्यच्चुमणिसंकाशकलशैरति भासुरः ॥ भूसुराणां च शरणैः सुभा

सुरनगावृतः ॥४८॥ महागोपतिभिर्युक्तो विद्रुमाभोरुणोरुभा ॥ तन्मौलिमणिगात्युच्च प्रवालपरिकल्पितैः ॥

महाशरभसाहस्रैर्धारितः सौधसत्तमः ॥ हृत्तमोनाशकस्तत्र रम्यो भूसुरभासुरः ॥५०॥ तत्र राजंति विविधवेदिसोपानवेदिकाः ॥ सहस्रस्तंभसंयुक्तः प्रवालमणिकल्पितः ॥५१॥ सौधराडग्रमौलिस्थो भात्युद्यत्तरणिप्रभः ॥ सहस्रतलमौलिस्थप्रवालमणिकुंभवान् ॥५२॥ प्रवालवर्तुलात्यच्छमालागुच्छैकशोभितः ॥ तत्रैव सुमनामोदमाद्यद्भृंगकृतषट्पदः ॥५३॥ तत्प्रवालमणिज्योत्स्नानिवारिततमस्तटी ॥ तस्मिन्प्रवालपादाच्छमंचके स्तरणास्तृते ॥५४॥ देव्या विहरति प्रीत्या चंद्रचूडो महेश्वरः ॥ सप्ताब्धिवेष्टिता पारभूमयो द्वीपकानपि ॥५५॥ वनानि सरितः शैला न्देत्राण्यपि महेश्वरः ॥ ईशानलोकं तत्रैव नानारुद्रगणैर्वृतं ॥५६॥ दिव्यंतरिक्षभूमिस्थैर्हेतिपाशधरैर्युतं ॥ वृक्षौषधिष्वथान्ते च पथिशैलेषु येचराः ॥५७॥ ललामराजच्चंद्रार्कैर्जटामुकुटशोभितैः ॥ गणेंद्रै रुद्रेंद्रैरथ कोपारुणितलोचनैः ॥५८॥ ब्रह्मांडदलनैश्चैव आपीतार्णवघोषकैः ॥ युतमीशानमाशास्यं पश्य त्वं बासमन्वितः ॥५९॥ ॥ सूत उवाच ॥ ततः नगवरोद्दामशिखरेषु शिवालयाः ॥ परितः संति तेषां तु नाम्नालिंगोत्तमान्नृप ॥६०॥ शृणुष्व जैगीषव्य त्वं पापभंगायकेवलं ॥ निषधेशो हेमकेशः विंध्ये शोमलयेश्वरः ॥६१॥ दर्दुरेशो मंदरेशः हिमशैलेश्वरो हरः ॥ नीलेश्वरो हि पारेता-

महासौधवराश्रयः ॥६२॥ रम्यगोपुरकोपेता नगास्तत्रव पुर्धराः ॥ पूजयंत्यत्र लिंगानि बिल्वपत्रैर्मनोहरैः ॥६३॥ नीलोपि तत्र नीलेशं पूज्य सेकैः सुमैरपि ॥ धूपदीपैश्च नैवेद्यैस्तौ नीलेश्वरं शिवं ॥६४॥ स्वमौलिमणिजापारधामगं प्रांजलिस्तदा ॥ ॥नील उवाच॥ ॥नीललोहित महागरनीलकंधरामलकपाल भगवन् कृपांबुधे तारयाशु भवसंसृतिजालं ॥६५॥ इत्थं स्तुवंति ते शैला गिरीशं गिरिशं तदा ॥ ॥गिरय ऊचुः ॥ ॥हरहरहर परमेशदेवदेवत्रिपुरयुमांधक जातभीतिनाश ॥ अपगीततनया धवप्रभो नः परिपाहीश्वरदेवसार्वभौम ॥६६॥ भवताभवताप हारिणाव सतानाक शिरस्थसौधमौलौ ॥ वयमप्यमलानगाः शिलाभिर्नगवल्लीतृणपादपौरुधैः ॥६७॥ सुमृगैरपि चंद्रचूडशंभो गतिभाजः सुतरां च धन्यधन्याः ॥ वेदेषु प्रथितोऽसि रुद्र भगवन् मीढुष्टमः शंकरः बभ्रुः शंभुरखंडघोषकरणो उग्रोऽसि भीमोऽसि च ॥ ॥६८॥ अस्माकं त्वधिपोऽसि पाहि दययायाख्याता गिरिशोपि च ॥६९॥ ॥इति श्री शिवरहस्ये प्रथममाहेश्वरांशे शैलकृतस्तुतिर्नाम त्रिंशोऽध्यायः ॥३०॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥स्कंद उवाच ॥

तस्मादत्युत्तमो विप्राः गणाधिष्ण्यादयः सुराः॥ कैलासमौलौ तच्छंभोः नवरत्नपरिष्कृतः॥१॥ प्राकारोलक्ष
माने न आयामोच्छ्राय संयुतः॥ इंद्रगोपकसंकाशः सुधामणिमहोपलः॥२॥ कल्पितोस्ति महेशेन मन्मनसेच्छ
जोत्तमाः॥ नमयो विश्वकर्मापि तत्कैलासवरालयं॥३॥ मनसा कल्पितुं शक्यं किं शिल्पैरखिलैरपि॥ नानार
त्नमणिव्रात भासुरश्चंद्रसुंदरः॥४॥ शाणोल्लीढामलमणि कांतिसारोयमुत्तमः॥ रम्यो गंधर्वनगराकारका
रोयमुन्नतः॥५॥ तत्प्राकारवरोत्तुंग मणींद्रवृषभांचितः॥ अंतरिक्षे रुद्रगणाः तत्र प्राकाररक्षकाः॥६॥ एका
दशसहस्रं वै बाणकार्मुकपाणयः॥ महानिषंगपृष्ठास्ते कपर्दधृतचंद्रकाः॥७॥ सिंहसंहननाः सर्वे युवानो
मृष्टकुंडलाः॥ करिभृंगाभवृत्तोरुभुजदंडवरायुधाः॥८॥ चिंतामणिगणासारगोपुरं कुंभराजितं॥ रुद्राव
तारचरितैः शोभितं सुमनोहरं॥९॥ मौलिसंस्थमहानंदिनंदिताखिलदिक्तटं॥ प्राच्यां तत्रो पुरं शंभोः रक्षं
ति गणाः सदाः॥१०॥ प्राकारं चापि ते सर्वे त्रिशूलोद्यतपाणयः॥ तत्र शंभोर्गणे लिंगं पूजितं सर्वकामदं॥११॥
मणिरुद्रेश्वरं नाम्ना चिंतामणिगणत्रये॥ प्रोद्यत्कुंभेक वसतौ पूजितं तं गणेश्वरैः॥१२॥ संस्तुतं परयात्या
अंतरिक्षे गणेः सदा॥ ॥रुद्रा ऊचुः॥ ॥संसारतापजमहारुजमाशु माशंस चोविनाशय महेश्वर चारुदृष्ट्या॥

शिवर०६१ रुद्रेभवान् श्रुतिशिखामलगीतकीर्तिः पाहीशनोऽखिलवनैर्भिषजां त्वमीशः ॥१३॥ ॥सूत उवाच॥ ॥एवं माहेश्व
स्तुवंति तं देवं मणिरुद्रेश्वरं गणाः ॥ तद्दक्षिणेपि प्राकारं मुक्तारत्नविनिर्मितं ॥ महामणिशिखाकीलकलितं शे
खरान्वितं ॥१५॥ रुद्रावतारैश्चरितैर्वृषभैश्वसमन्वितं ॥ एकादशसहस्रं वै तोमरासिवरायुधाः ॥१६॥ महाबला
महोत्साहा दिव्यास्त्रगणाः शुभाः ॥ जटामुकुटशोभाढ्याः तारानाथकलाधराः ॥१७॥ शिवाज्ञाकारिणः सर्वे
यौवनोन्मत्तविग्रहाः ॥ तत्र संपूजयंत्येव दिव्यं रुद्रेश्वरं हिते ॥१८॥ मणिधाम्नि महालिंगं पूजास्तुतिभिरीश्वरं
॥ ॥रुद्रगणा ऊचुः ॥ दिव्येश्वरत्रिदशवर्गजजातदुःखं संतापवृंदपुरनाशनतो विनीतं ॥ देवेश ते वर
दयारसपात्रमीश त्वस्मान्सदा शिव सदैव सुरक्षितान्तः ॥१९॥ एवं स्तुवंति ते रुद्राः दिव्यरुद्रेश्वरं तदा ॥ गोपुरं
तच्च प्राकारं रक्षंति सततं गणाः ॥२०॥ तत्पश्चान्मणिसंक्लृप्त प्राकारं मणिगोपुरं ॥ रुद्रावतारवीरैस्तैर्लला
मवृषशेखरैः ॥२१॥ प्रोल्लसत्कुंदेश्चैव मणींद्रमुकुटैरपि ॥ तत्र रक्षंति गणपाः हेतिशूलवरायुधाः ॥२२॥ त्रि
पुंड्रावलिफालोरुकपर्दवरमौलयः ॥ बालारुणप्रतिप्रख्यचंचच्चंद्रकलाधराः ॥२३॥ एकादशसहस्रं वै र
क्षंति गणपास्तदा ॥ दक्षाध्वरविनाशाय महेशं ग्राद्विजिः स्तुताः ॥२४॥ सौम्यानाम गणाः श्रेष्ठाः मत्तमातंगवि-
क्रमाः ॥

तत्रते पूजयंत्येव सौम्येशं मणिधामगं ॥२५॥ पूजयंति स्तुवंत्येवं सौम्या नाम गणाः शिवं ॥ ॥सौम्या ऊचुः॥
॥ त्वद्व्योमजात विधयो हरविष्णु संघार दं तिदेव जगतां स्थिति नाशकेपि ॥त्वत्पाद पंकज रजः शिरसाव
हं तः पाहि शर्नोघ दयया सरमाद्रदृष्ट्या ॥२६॥ इत्थं स्तुवंति ते सौम्या महेशं भक्तिभाविताः ॥ उत्तरे भौमकाना
म गणाः शंभोर्महात्मनः ॥२७॥ एकादश सहस्रं तु विकोशीकृतखड्गकाः ॥ दंष्ट्रा कराल वदनाः जटाबद्धेंदु
खंडकाः ॥२८॥ सजलोद्दाम घनभाः सदेहास्ते तुल्यप्रभाः ॥ भस्मदिग्धाः त्रिपुंड्रांकाः रुद्राक्ष वलिभा
सुराः ॥२९॥ खट्वांग ध्वनि कृतास्त डिकूट समारवाः ॥ उरगेंद्राधिक क्रोधा उरगार्यधिका जवे ॥३०॥
शिवाज्ञा कारिणो भौमाः बलवीर्य पराक्रमाः ॥ ततोत्तरे च प्राकारे मणिसारे ज्वलत्प्रभे ॥३१॥ तन्मध्ये गोपुरे
चापि रुद्रक्रीडा वृषैर्युते ॥ मणिराज महारत्नकुंभे जितेभानु सप्रभे ॥३२॥ तिष्ठंति ते परत्वं इति प्राकारं तच्च गो
पुरं ॥ तैश्च भौमेश्वरो नाम्ना मणिधाम गतोर्चितः ॥३३॥ संस्तुतः परया भक्त्या लिंगसंस्थो महेश्वरः ॥ ॥
भौमा ऊचुः ॥ ॥ भौमेश भूरिरथ तुंगरथांगदाने संमोदितो हरिशरांबुज लोचनेन ॥ भूमाति गाखिल
लगतेपरि पाहि सोमधामो त्तमांग ललनांचित चारुदेह ॥३४॥ ॥ स्कंद उवाच ॥ ॥ इति स्तुवंति

X श्लो.८ — सर्वेषां पतिना शिवेन जगतां मात्रा सहाधिष्ठितम् ॥
रक्षन्ति किल भक्तियुक्तमनसा विप्राः शिव प्रीतये ॥

 ते भीमाः महादेवं घृणानिधिं ॥ विंशत्सहस्रं परितः प्राकारमणिगोपुरैः ॥३५॥ शोभितं वृषभैश्चित्रैर्नाना

 शिल्पैकसुंदरैः ॥ मनसाप्यनुमानेन नोपमेय मनोहरैः ॥३६॥ चतुर्दिक्ष्वपि ते रुद्रा ब्रह्मविष्ण्वीन्द्रहंतृकाः ॥

हेतिशूलकराः सर्वे भस्मपांडुरविग्रहाः ॥ ३७॥ रंभोपमानवृत्तोरुबाहुद्वयविराजिताः ॥ वक्षः कपाटपट्टा

भाहिरण्यकवचावृताः ॥ ३८॥ उष्णीषिणो मुकुटिनः उरगेंद्रोरुमौलयः ॥ धावंतः संस्थिताः केचिन्निषण्णास्वाप

काः परे ॥ ३९॥ निषंगिणः कवचिनः शरकार्मुकपाणयः ॥ अत्यंतः शरवर्षैश्च अशेषानुन्नसायकैः ॥४०॥

पीथवृक्षे जले चैव सागरे भूमिसंस्थिताः ॥ विपिने च तथा ग्रामे पुरे खर्वटके तथा ॥४१॥ शिवाराधकारिणः

सर्वे अग्निदीप्ता महौजसः ॥ ॥सूत उवाच ॥ ॥ एवं ते वरगोपुरैश्च सहिता रुद्राश्चतुर्दिक्ष्वपि ॥ प्रा

कारं मणिसारसुंदरतमं राजद्ध्वजैर्धिष्ठितं ॥४२॥ ॥ इति श्रीशिवरहस्ये माहेश्वरप्रथमांशे प्राकारवर्णने

रुद्रगणावेननाम एकत्रिंशोऽध्यायः ॥३१॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥स्कंद उवाच ॥ ॥

तस्यां तरे शिवेनैव मनसा परिनिर्मिताः ॥ विंशत्सहस्रमानेन आयामोच्छ्रायतस्तदा ॥१॥ प्राक्दक्षिणप्रती

च्यां वै चोत्तरे शूलपाणिना ॥ मणिप्रासादिको ज्योतिः कैलासनगमौलिगाः ॥२॥ कलधौतनगोद्दामशिख

रे तिलकायिताः ॥ पुमर्था इवराजंत्यश्च तु वेद शिखोपमाः ॥३॥ रंगस्थानं महेशस्य शंभोः संध्या नट
स्यच ॥४॥ शातकुंभमहाकुंभ सहस्रेणैव शोभिताः ॥ निष्टप्त हेमक्लृप्ता सोम हामेरु गुहोपमाः ॥ तत्तत्कुंभम
हास्तंभ सहस्र परिशोभिताः ॥५॥ सुबद्ध मणि सोपानाः वेदिका पीठिकोज्वलाः ॥ मरालराज पत्न्यश्च
मुक्ता मर्दित चंचुकाः ॥६॥ उत्कोच नील पीताछ रत्नजाल कचित्रिताः ॥ मुक्तागुच्छ वृतापार माला जाल
किंतांतराः ॥७॥ प्रवाल लतिका क्लृप्त स्तंभ विद्रुम पुत्रिकाः ॥ हरिन्मणि कृतापार पाली बद्धोरुहस्तकाः
॥८॥ पुष्पराग महासिंह सटामंडल कीलिताः ॥ गजशुंडोरु धाराछ नीलकुंभोरु मौलिकाः ॥९॥ वैडूर्य
धारासत्रोथन्नागबंध विराजिताः ॥ मौक्तिपालिज हंसालिक पोतकुल सुंदराः ॥१०॥ रत्नोत्कीर्णाछव
लभी वृतारुमणि मौलयः ॥ कुरुविंद महोत्फुल्ल माला जाल वृतांतराः ॥११॥ स्फटिकोत्तम गर्भाछधा
रासोपान कीलिताः ॥ विचित्र मालिका पाली चित्र नील महोपलाः ॥१२॥ बिंबाभ पद्मरागोत्थ केलीपाली
विराजिताः ॥ सुवर्ण परिसंक्लृप्त रंभा पूगीक भासुराः ॥१३॥ हरिन्मरकतोद्दाम गर्भ सप्तच्छदा वृताः ॥ दंति
दंतावली लग्नहंसालि वृष कीलिताः ॥१४॥ कपोत पाली पीठस्थ मणि शार्दूल नाशिकाः ॥ सुवर्णकेतकी

शिवर॰१ गुच्छ तल्लकलाव लिभासुराः ॥१५॥ मणि फान सजाम्रादि फलालि परिलंबिताः ॥ मातुलिंगैश्च ले कुचैः प्रो

९० तमाला वृतांतराः॥ गंध[illegible] ॥१६॥ मणिधारा वृषैः कुंभैः सुपल्लव मुखैर्युताः॥ मंदनो रु वितानाढ्य संघ मो॰२४ अ॰३२

[क्षीरपट] [स्थित]
दित तलांबराः॥१७॥ उद्दरपत्र गुच्छैश्च लंबत्तो लिंब भासुराः॥ गंधबंधानुबंधोद्यत् मंदमारुतसुंदराः॥

॥१८॥ महागरुमहोद्दाम धूप धूम शिखावृताः॥ मणिदीपावली वृत्त भ्रम गृह वशोचिताः॥१९॥ सहस्रदीपपा

त्रैश्च धूपवृंदैश्च लंबिताः ॥मणि सारैश्च विविधवर्ण क्लृप्तोरु कुट्टिमाः॥२०॥ स्फटिकान्ततलाः सर्वाः रम्या

[कीर्तिहि वृषादिभिः]
दर्शक लंबिताः॥ सुवर्ण लेखा विलसन्मणि चित्रविचित्रिताः॥२१॥ नानारूपावतारादि देव्याश्च नटन

[लीलाभिः सम्यक् चित्रित भित्ति का]
तदा॥ शंभोर्गौरां तिलकैर्वृत्त चित्र विचित्रिताः॥२२॥ सुरम्य मणि वेदीभिः संयुता धूपमोदिताः॥

विस्तारायाम बहुलाः सहस्र स्तंभमंडिताः॥२३॥ षण्णवादि महातत्व ज्वाला पारा वृतांतराः॥ राज

ल्ललाम वृषभाः रत्न कुंभ परिष्कृताः॥२४॥ रत्न दंडा युतापार छत्र चामर शोभिताः॥ दोधूयत पता

काग्राः मणिघंटा वृतांबराः॥२५॥ कस्तूरी चंद्र पाटीर सुगंध सुमवर्षिताः॥ मणि दर्पण जोत्तुंग बिंबिताम ९०

ल जालिकाः॥२६॥ मर्द्दलोद्दाम गंभीर नादपूरित दिङ्मुखाः॥ शंख दुंदुभि निःस्वाण पणवानक गोमुखैः॥
॥२७॥

काहला पारनिनदवेणु वीणा रवाकुला: ॥ मणि मंदार बकुल पाटला शोकचंपकै: ॥२८॥ विलंबिताच्छ मालास्ता: तमालतल सुंदरा: ॥ कृतमाल महामाल्य गुच्छ संछादितांबरा: ॥२९॥ कुंद मल्ली ज मुल्ली ज जाजी माला वृतांतरा: ॥ गलन्मधु भरी भार गुच्छ गुच्छ दलि व्रजा: ॥३०॥ कदंब दाम सुभगा दमनो दाम गंधिता: ॥ कुरवा मोदितो शीर मरुवा मोद मोदिता: ॥३१॥ उल्लोर क कृता पार मालांदोलन सुंदरा: ॥ तारतार्कित भूभाग मुक्ता जाला वृता भुव: ॥३२॥ गजहस्त महा ताल झल्लरी नाद हुं कृता: ॥ रत्न मडु जहुंकार गर्भितांतर सुंदरा: ॥३३॥ काहला पार गंभीर नाद पूरित दिङ्मुखा: ॥ नट झं झण झणा रावसिं जन्नं जीर स्वना: ॥३४॥ गोमुखा नक जो द्दाम गण वक्राब्ज कारवा: ॥ शंखा वली कृता पार भूकार रव गर्जिता: ॥३५॥ चतुर्वेद शिखोद्दाम ब्रह्म वक्त्र कृत स्तुति: ॥ वामदेव महा साम रथंतर रवाकुला: ॥३६॥ रथंतरोत्थ भूत्कार मां कृता खिल दिक् तटा: ॥ राजद्राज नहिंकार वैराज वरभूषिता: ॥३७॥ अष्टा वक्त्रोत्थि तात्युच्छ अष्ट दंष्ट्रा रवाकुला: ॥ महा गणेश शुंडाग्र लग्न कुंजोत्थ नादिता: ॥३८॥ षडानन कृतो द्दाम काहला रव सुंदरा: ॥ नंदि भृंगि कृतानेक तलघातो रुमर्दलै: ॥३९॥ धिक्तां धिक् ता मितिर वैर शैव मति वारकै: ॥

तंडुडिंडिमना दोत्थरवसुंदरदिङ्मुखाः ॥५०॥ वाणीपाणिमहावीणा शिवनामालिमूर्छनाः ॥ तंत्रीयंत्र-
तज्ञगांधर्वगीतनादैकवंधुराः ॥५१॥ नारदादिमुनिश्रेष्ठतुंबुरूद्दामगायनाः ॥ हाहाहूहूकृतानेकभरता
दूरशिक्षिताः ॥५२॥ यक्षशिक्षाकलालापरंगत्तुंगतरंगिकाः ॥ रागरागिणिकाक्लृप्तरम्यत्रिस्थायिमूर्छ-
नाः ॥५३॥ तलमर्दलजोद्दामतांधिगिल्युत्तमध्वनिः ॥ बर्हिपिंछमिसुभगस्फाटिकोत्तमभित्तिकाः ॥
॥५४॥ मणिनिःसाणनारावप्रबुद्धवरकोकिलाः ॥ कोकिलाकाकलीरम्यध्वनिध्वननरंजिताः ॥५५॥
रत्नपंजरमध्यस्थशुकशारिकजारवाः ॥ मृदंगघनघोषेण शिखंडीकृततांडवाः ॥५६॥ गायद्गांधर्व-
निकरमुखवीक्षणकृन्मृगाः ॥ रत्नाधारगजासारपुष्करोद्दामबृंहिताः ॥५७॥ पुंड्रेक्षुबंधसुभगस्तंभरंभा-
वृतास्सभाः ॥ मणिवल्लीतोरणादिलंबितांदोलिताः पुनः ॥५८॥ मंदमारुतसंचारवितानचलितालं-
काः ॥ शातकुंभमहाकुंभपूरिकामृतधारिकाः ॥५९॥ सुपल्लवमुखापाररागभृंगारसुंदराः ॥ पूगापा-
रमहासाराः शंभोस्तत्र महासभाः ॥६०॥ क्लृप्तास्तत्र शिवेनैव मनसा मननेनहि ॥ शातकुंभमयीतत्रस-
भाप्राच्यां दिशि स्थिता ॥६१॥ महारत्नसभा शंभोः दक्षिणे च प्रकल्पिता ॥ राजतारजता द्वौ तु शंभोः पश्चात्स-
-भा तदा ॥६२॥

चित्सभा चोत्तरे शंभोः कलधौताचलेस्थिता ॥ एवं चतुर्दिक्स्वपिताः सन्नाहानंदिताः सभाः ॥२३॥ तत्सभावर्णनं वेदैः ब्रह्माविष्णुमहेश्वरैः ॥ मूर्तिमद्भिस्तथा सांगो वेद निश्वास ईश्वरः ॥२४॥ ऋग्वेदस्तु तथा प्राच्यामेकविंशति शाखकैः ॥ स्तौति तस्यां सभायां तु देवदेवं महेश्वरं ॥२५॥ यजुर्वेदस्तथा रत्नसभायां शतशाखकः ॥ स्तौति देवं विरूपाक्षं बध्वांजलिपुटो मुदा ॥२६॥ कलधौतसभायां तु सहस्रवरशाखकः ॥ स्तौति तत्र महादेवं सामवेदो ऽथ सामभिः ॥२७॥ चित्सभायां तथाथर्वः वेदो विंशत्स्वशाखकैः ॥ स्तौति देवं शिरोभिः स्वैरथर्वैरीशतुष्टिदैः ॥२८॥ ॥स्कंद उवाच॥ ॥ सभामुखदिवस्पति प्रकटभानुशीतांशुजं स्फुरत्त्विषिपीशिखिद्युति प्रथितरत्नगर्भोद्भव" प्रकाशकलितास्वहो नटति नृत्तपारंगतः ॥ सभापतिरतींद्रियः प्रमथनाथसंघैर्वृतः" अनंतमहिमारसः श्रुतिशिखाछपाली गतः" सुरेंद्रमकुटीतटीविघटिताछरत्नच्छविः ॥ प्रसन्ननखसंतति र्विधिहरींद्रवेदैस्तुतः ॥६०॥ ॥ इति श्री शिवरहस्ये माहेश्वर प्रथमांशे सभावर्णनं नाम द्वात्रिंशो ध्यायः ॥३२॥ ॥श्री काशीविश्वेश्वरार्पणमस्तु॥ ॥स्कंद उवाच ॥ सनातनसनंदेन सानंदेन महेश्वरः ॥ पार्वती हृदयानंदो देवो यत्र च ताः सभाः ॥१॥ सदसस्पतिरीशानो गणवृंदनिषेवितः ॥ मयाद्रिरदवक्त्रेण-

....पंक्ति ६ वामपाणि समारोपि नखालक्तक रक्तकः॥
....॥ ९ फ मन्ये नोज्ज्वल स्थलकं

शिवगः॥ नंदि भृंगि रिटीश्वरै॥२॥ तंडु हुंड तुहुंडाद्यै र्बाण रावण चंडिकैः॥ देव्या स्तद्गेन टनं साये प्रकर्तु मुद्यतः॥ माहेश्व
९२ ॥३॥ सभासुता सुसर्वा सु सभापति रुमा पतिः॥ सायं सायं प्रदोषे षु महा तांडव पंडितः॥४॥ अ पस्मा रोपरि लस
त्पाद पंकज भासुरः॥ गजेंद्र कृत्ति वसनो जटाजूट तडिद्द्युतिः॥५॥ जटा कुहर गर्भ स्थ गंगा तरंगकः॥ तत्रै
वो त्फुल्ल कल्हार मिश्रा च्छादित मस्तकः॥६॥ गरनील महा कंठः कुंड लीश्वर कुंडलः॥ सोम धाम समा
नास्यः चांपेय रदनासिकः॥७॥ नयन त्रितयो त्फुल्ल पंक जो त्फुल्ल सुंदरः॥ त्रि पुंड्र रेखा सत्फालो
भस्माच्छादित विग्रहः॥८॥ वामेन पाणिनालं बिन खरक्ता म्र लक्तकः॥ धगत्धगि त रत्नाढ्य पदकालं
बिमालिकः॥९॥ महा वीर मणि व्रात मुक्ता रुद्राक्ष मालिकः॥ काको दर फणा रत्न मालाकीलित कंधरः
॥१०॥ रत्न ग्रैवेय सुभग रत्न कंकण सत्करः॥ क्कण त्किं किणि काजाल क्षुद्र घंटालि कांचिकः॥ पाणिना
न्येन डमरुं तथान्येनोज्ज्वल त्प्रभं॥११॥ सप्तजिव्हा ततो ध्वंगशिखा कांपित सत्करं॥ भक्ताभय
करं साक्षा द्दत्तो र्मिक वरांगुलिः॥१२॥ कटीतट परी क्षासि पुंडरी काजिनो ज्ज्वलः॥ तत्सुच्छ गुच्छ ९२
सुभगालंब मान चल द्युतिः॥१३॥ कहल मुंड महा पुंड माला लोलित कंधरः॥ नृत्य झण झणा राव मणि मंजीर

रत्नपात ॥१४॥ साकुं चिंतेन नृत्येन पोषयंतं जगत्त्रयं ॥ महारत्न परिष्कारी पीठसंस्थां महेश्वरीं ॥१५॥ पश्यन्दर दलांभोज संनिभामललोचनैः ॥ सुधाधाम तिरस्कारि दिव्यावदन पंकजं ॥१६॥ नीलालको पतिलकं रत्नताटंक मंडितं ॥ उच्च कविनिभात्य मुक्तानासा मनोरमं ॥१७॥ कंठत्रिवलिगंभीर रत्नग्रैवेयभासुरं ॥ ललचिंचताक सुमगं कंठमंडल मीश्वरः ॥१८॥ उत्तुंगकरि कुंभाभस्वर्ण कुंभकुचां शिवां ॥ त्रिवलीलल लितोदार त्रिगंजे संपुटोदरां ॥१९॥ मृगेंद्र कटि संकाश रत्नकांचित कांचिकां ॥ कनकांबरजापार धारासारा जितांबरां ॥२०॥ चंपकाशोक पुंनाग सौगंधिकलसत्कचां ॥ वेणी मंडल मध्यस्त रत्नसेमति सुंदरां ॥२१॥ अलिकालं बिलं हि शोभि सिंदूर रेखिकां ॥ क्वणन्मणिगणापार कंकणे नाग बंधकैः ॥२२॥ रत्नहस्त सरापार चलद्वलय सत्करां ॥ रत्नांगुलीयविलसद्वलयांगुष्ठवेष्टितां ॥२३॥ पाशांकुशाभयवर धरां श्री भुवनेश्वरीं ॥ महाहीरैक फलक कल्पितांगुष्ठवेष्टनीं ॥२४॥ आरक्तालक्त पादाब्ज रंगरंजित पादुकां ॥ पादांगुलि कृताराव क्वणत्क्वणमधुस्वरां ॥२५॥ मणिमंजीर जारावरुणझ्झणित भूतलां ॥२५॥ पटीरागरु कस्तूरि कर्पूरागंध मेदुरां ॥ पटवासमस्त

127

शिवरह० गंधनंदिता मल दिक् तटं ॥२६॥ सौंदर्य धारा सर्वस्वाकारां ताराधिपाननां ॥ हृल्लकाक्रांत सुकरांतथा माहेश्व-
९३ न्ये नीव लंबिनां ॥२७॥ निर्यत्क्रुटा वांकुरतः पश्यंती माननं विभोः ॥ पश्यन्सभा सुतां देवीं मुदानृत्यति शं अ० ३३
करः ॥२८॥ नंदि भृंगी महाकाल स्कंद हेरंब संवृतः ॥ रम्य वाद्य रवैः सायं वेद घोषैश्च शंकरः ॥२९॥ तत्र
तत्र सभा स्थाने नृत्य त्यंबा समन्वितः ॥ तद्धृणुष्व मुनिश्रेष्ठ गणं दृाः सुरसत्तमाः ॥३०॥ ॥ स्कंद उवाच ॥
राजद्राजकला विराजित जटा राजी रजो घूमसत्तारा मालंकृत वाम भाग मनिशं श्री राजराजार्चितं ॥
नृत्यंतं नृशिरः कपाल कलिका मालां स्फुरक्षद संनृत्यं तं रजंता द्विहे म सदसि श्री धूर्जटिं भावये ॥३१॥
नृत्यत्ब्रह्म कपाल घट्टन पतद्ब्रह्मांड कोटि स्त्रव द्दार्था धारसुपूर पूरित जटा गंगा तरंगोद्धुतं ॥ सेवार्थां
गत विष्णु मुख्य सुरता बद्धांजलि प्रार्थनं नृत्यं तं रजंता द्विहेम सद सि श्री धूर्जटिं भावये ॥३२॥
तं डौवादित डिंडिमेड्मड्डका मारवंड ल्ल वाद्यीत ब्रह्मण्यं बुजलोचने चनमति श्री चंडिकेशेश्वरैः ॥
घंटा डोलन तत्परे सुरनुतं श्री तांडवे पंडितं नृत्यंतं रजं द्विहेमसदसि श्री धूर्जटिं भावये ॥३३॥ शीर्षोव ९३
त्थ कपाल माल मम लं नृत्य ज्ज्वल मंडल भूषा वेष विषाग्नि मिश्रित सुधा धारेषदुष्णार्चिषं ॥ नृत्यंतं

मणी मुदेनि गमवा झूर्धा धिरूढं शिवं ॥ नृत्यं तंर जताद्रिहे मसदसि श्री घूर्जटिं भावये ॥३४॥ पादाबद्ध
हरी शकं कणरणत्कारी घनिःष्पदितं ब्रह्मा घा टिवलं जंगमं बहुमु जालंकार देव्याः पुरः ॥ मंदस्मेर
विराजमान वदनांभोजं नटं तं शिवं कैलासा चलशात कुंभ सदसि श्री शंभु मालोकये ॥३५॥ इत्थंनृ
त्यति देवेशः सायं देव्याः सदाशिवः ॥ कैलासहेमसदसि प्राच्यां गणवरैर्वृतः ॥३६॥ तद्दक्षिणे रत्नकॢ
प्तसदो मध्ये महेश्वरः ॥ नृत्यत्यंत्युबा मुदेदेवो तच्छृणुष्व मुनीश्वर ॥ ३७॥ ॥ स्कंद उवाच ॥ ॥
गंडाडोल्लित कुंडली श्वरमहा श्री कुंडलं तांडवे पांडित्यं घटयंतमंडज मुखे श्चंडेश्वराद्यैर्गणैः ॥
स्तोष्यं तं निगमांतसारवचसा मोघै रमोघैः शिवं नृत्यं तं रजताद्रिरत्न सदसि पश्यामि शंभुं सदा ॥
॥३८॥ तं डुद्धामगिरो जयंति सविधे श्री कैटभारेत्यजं ब्रह्म रवांश्च संहरहरे दूरं परं सारय ॥ इत्थं न
र्तक चक्रवर्ति निकटे नृत्योन्मुखे तादृशं नृत्यं तंरजताद्रि त्नसदसि पश्यामि शंभुं सदा ॥३९॥
नृत्तांडोलच लोशिखा मृतगलत्खंडेंदुसां द्रोच्छयेकांतो मध्नू जत्पांडुर मंडला रुण लसद्रूं दारका
णांगणे ॥ मग्तोन्मग्न वलग्न लग्न निभृते जूटाहि बद्धो च्छ स नृत्यंतं र जताद्रि रत्नसदसि पश्यामि शंभुं सदा ॥
॥४०॥

शिवरह॰१ नृत्तांतस्य पदद्वयोत्लुतिचलत्वेमाद्रिसोमार्य मांमा शेषादिककंपनं विदधतं नृत्यंतमीशास्मितं ॥
देवीपश्यति शंकरं च सुमहत्सानंदनंदोन्मुखं नृत्यंतं रजताद्रिरत्नसदसि पश्यामि शंभुं सदा ॥४१॥

९४ — माहेश्व. अ.३३

यदीशे नृत्यं विदधति भरितानंदसंदोहधाम्नि भूषास्पंदनहानिशंकिहृदयो मंदं विधत्ते पदं ॥ योवासः
शिथिलो भवेदिति करान्नात न्विता निस्पंदतात् ॥ केशाकुंचनतः करोति भगवान् केंदुं च चक्रोत मौनानीतेप्र
समं प्रसन्नहृदयो रात्ने सभायां शिवः ॥४२॥ इत्थं रजतशैले च देवो रत्नसभांतरे ॥ नृत्तं वितनुते देव्याः पुरतः सा
यमीश्वरः ॥४३॥ पश्चात्सभायां रजतकल्पितायां महेश्वरः ॥ नृत्यत्यं बामुखं वीक्ष्य गणवृंदसमन्वितः ॥
॥४४॥ स्कंद उवाच ॥ नृत्यंतं हरिभूषणं विधिशिरोवृंदालिमालालसत्कं मांगाकृतिसत्स्त्रियायुत
पदं केयूरसिंजस्वनं ॥ कृत्वा सामजचर्मवस्त्रकलितं नृत्यंतमाशावसं बद्धाधोगकलेन बालक
लितोत्तंसान्वितं सांबया नृत्यंतं कलधौतमारसदसि ध्यायामि नृत्योन्मुखं ॥४५॥ वागंगुभान्विविधानकृति
समयानंभोजजातेवद त्यानंदांबुधिमग्नचेतसि परे गोविंदपूज्ये हरे ॥ मंदंमंदमरंदपामिरखिलवृं ९४
दारकाणां गणे नृत्यंतं कलधौतसारसदसि शंभोः पदांभोरुहं ॥४६॥ यस्मिन्नृत्यति जंगमाचरमिदं विश्वं

× पंक्ति ५ "यद्भासा प्रविभान्ति भास्कर निशानाथाः यस्सन्ततं ॥ नृत्यन्तं कलधौत सार सदसि ध्यायामि शंभोः पदम् ॥ ४८ ॥
× पंक्ति ६ "फूत्कारकः ॥ साङ्गा सा श्रुतिरित्युपेन्द्र सदृशा स्तस्याश्रयाज्जीविनः ॥

नरी नृत्यति" यस्मा द्भिन्न तया न किंचि दपि वेद्वु वक्तुं न शक्यं बुधैः ॥ तादृक्षं नटनार्भटी कृत रुचं भूषाहि
शेषो ज्ज्वलं" नृत्यं तं कलधौ त सार सदसि ध्याया मि शंभोः पदं ॥४७॥ चेत स्वं भ जय कृतो न पुनरावृत्तिं भजे
न्मानवः ॥ यस्मा च्चित्र त मंन किंचिद धिकं तत्ता दृशं तांडवं ॥ कुर्वं तं करुणां बुधिं त्रिनयनं श्री काल कूटोज्ज्व
लं" नृत्यं तं कलधौत सारस दसि ध्याया मिशंभोः पदं ॥४८॥ यस्मि न्नात्म्यति बभ्रमीति सकलं विश्वं चरा[घा]
चरं" यस्मिन्नु लुति माच रत्य विकलं ब्रह्मां ड मूर्भि[मुद्रीभ] घते" यस्मिन्ना पति ते न शर्म लभ ते कूर्मोपि भग्नास्थि
कः ॥ नृत्ताया सवि सर्गा तो रु नयन श्रोत्रो रथ मुक्ता दिकं मंगं साश्रु ति" यस्य स्वेद जलं महो दधि रपि स्फुर[प्रो]न्मु
णीनां गणां[णः] से वाच्यापि अपि" रोप्या द्रौ कल धौत सार सद सि श्री कंठ माद्यं भजे ॥४९॥ एवं स नृत्य तीशा
नः कैलासे कल धौ तजे ॥ सद सि स्वैर मंबायाः पुरतः शशि शे खरः ॥५०॥ उत्तरे चित्सभा यांतु नृत्यतं
बां विलो कयन् ॥ गणेंद्रैः से वित पदो महा देवो महेश्वरः ॥५१॥ ॥ श्रीस्कंद उवाच ॥ ॥ ह्रीं मत्या[मत्वा] शिव
या हिरण्मय[विराणमयमयं] महं दृ[द्ध] त्पंकज स्थं सदा" ह्रीणानां शिव कीर्तनं हितकरं हेला हृ दंमानिनां ॥ ह्रीवेरादि सुगंध व
[स्त्र]स्तु रुचिरं हेमाद्रि वाणा सनं" ह्रीं कारादिक पाद पीठ ममलं हृद्यं नटेशं भजे ॥५२॥ श्री मज्ज्ञान सभां तरे प्रविलस

च्छ्री पंचवर्णाकृतिं श्रीवाणीविनुतापदाननिचयं श्रीवल्लभेनार्चितं ॥ श्रीविद्यामनुमोदनं प्रित जनश्रीदायकं श्रीधरं श्रीचक्रांतरवासिनं शिवमहं श्रीमन्नटेशं भजे ॥५३॥ नव्यांभोजमुखं ननमज्ज नविधिं नारायणेनार्चितं नागोकानगरीतटीलसितकं नागाजिनालंकृतं ॥ नानारूपकनर्तनादि चतुरं नालीकजान्वेष्टितं नादात्मानमहं नगेंद्रतनयानाथं नटेशं भजे ॥५४॥ मध्यस्थं मधुवैरिमार्गित पदं मद्रूशनाथं प्रभुं मारातीतमतीवमंजुवपुषं मंदारगौरप्रभं ॥ मायातीतमशेषमंगलनिधिं मद्भावनाभावितं मध्ये व्योमसभागुहांतमखिलं काशं नटेशं भजे ॥५५॥ शिष्टैः पूजितपादुकं शिवकरं शीतांशुरेखाधरं शिल्पं भक्तजनावने शिथिलतादोषं शिवायाः प्रियं ॥ शिक्षारक्षणमंबुजासनशिरो संहारशीलं प्रभुं शीतापांगविलोचनं शिवमहं श्रीमन्नटेशं भजे ॥५६॥ वाणीवल्लभवंद्यवैभवयुतं वंदारुचिंतामणिं वाताशाधिपभूषणं वरकृपावारांनिधिं योगिनां ॥ वांछापूर्तिकरं बलारिविनुतं वाहीकृतास्नायकं वामांगात्तवरांगनं मम हृदावासं नटेशं भजे ॥५७॥ यक्षाधीशसखं यम प्रमथनं यामिन्यधीशाननं यज्ञध्वंसकरं यतींद्रविनुतं यज्ञक्रियाधीश्वरं ॥ याज्यं याजकरूपिणं-

*पंक्ति ७ "कुमुद नाथ चूडामणिं ॥ कुरंगवर भूषणं"

यतीन्द्र विपुले यान्यं

यम धनै यैत्नो पलभ्यां धिकं॥ यानी भूत वृषं सदा धुरिम मायतं नटेशं भजे ॥५८॥ मायाश्री विल्व मध्निदंबर महा पंचाक्षरे रं कितां॥ श्लोकान् सप्त पठंति येनुदिवसं चिंतामणिर्नाम कान् ॥ तेषां भाग्यम नेक धायु रध्धिकं विद्यावरान्सत्सु तान्॥ सर्वा भीष्ट मसो ददाति सहसा श्री चित्सभा धीश्वरः ॥५९॥ ॥सूत उवाच॥ तटिन्निभ जटा भटोप हुरिटो ड्य वागर्भ टीं॥ निटालक कृपीटकं भज भजामहे धूर्जटिं ॥ शिवं कटत टारट घम कठोर तुंडा र्मटी॥ चपेटिव रशूलकं करटि चर्म शोभत्पटं ॥६०॥ हठात्कृत शठा सुरमसुख भेद कृत्ती रटद्धि पाठ शर धारिणं कमठ पृष्ठ पादं शिवं ॥ भजामि जठरी धृतत्रि जन्मूल पीठो त्थितं जनार्दन पुटस्तवं हृदि मुनिष्ठि तं योगिनां॥ कुठारवर धारिणं भजत नील कंठं सदा ॥६१॥ उल्को शकाशि तम ह्राशि वरात्त खे टनी लोच्छ ताच्छ सुकरो रु शिरो ध सारं ॥ रक्तः स्मृति प्रजानि ताप गता धि संज्ञापस्मा रमौ लिपद पंकज नृत्त लोलं ॥६२॥ नादोत्थ डंबर महा डमरु प्रकांड॥ मुत्फुल्ल पंकज करानल मौशि तारं ॥ आरात्क्षणे मुर मरारज ताचलस्थं केक्या खुवाहगण पापर मेशमेवं ॥६३॥ नंदीश भृंगि रिटयः सुर नंदिक सोमनं दिचंडी शतुंड वरहुंड भद्रः ॥ श्री बाण रावण गणा नव कोटि चंडा॥ ब्रह्मा हरीश्वर मुखा अमरे

शिवारु॰ द्र संघाः ॥६४॥ स्तंभै र्विद्रुम पुत्रि कौघघटि ते र्हैमै र्महामात्र कैर्भा स्वत्स्वा वरणेश्च शक्तिभिरोपप्रोहै माहेश्व-
९६ डमायामये ॥ रंगे सर्व जगत्करं ड मखिलं यस्ये क्षणाज्जृंभतेः यस्यै वेक्षण तश्च रोदित मिदं तत्रैव लीनं अ॰ ३३
क्षणा त् ॥६५॥ सोऽप्येतादृश रंग मंडपगतः सर्वैश्व भूतैर्वृतो रुद्राणी सहितो गणेश गुहयुक् पार्श्वे सुरेंद्रै
रपि ॥ पाथो जात भवेन श्रीधर भवैर न्वास्यमानः शिवो रुद्राणी गण पैश्च सेवित पदो मोदान्वितो रंगगः
॥६६॥ ईषत्पादत ला हति त्रुटित भूभागा सहिष्णु त्रि ट स्फूर्जत्क पेट शर्म दुर्विधम हा कूर्मस्त वाम्रेडितं॥
अंगुल्य ग्र पतत् तदीयपवनो त्क्षि प्तस्य धाम स्थिर ब्रह्मांडं परमे शितुर्विजयते नृत्तं समस्ताद्भुतं ॥६७॥
नम्रान्माणि गणान्दि शावधिकृते स्वीयान्क पर्दानपि व्योमांते नति कुंचितानपि पुनः पाताल मुख्या
न धो ॥ लोकान्यु समतीत्य स्वीय चरणान् कुर्वन् निरालं बनो नृत्यं केवल मीश्वरो वितनुते देव्यग्रतः
केवलम् ॥६८॥ ॥सूत उवाच ॥ ॥ सभा सुम दसस्पतिः हरि हिरण्य गर्भादिभिः सनंदन सनातनैः हर
सुनंदिनंद्यादिभिः ॥ कराह ति महामोण प्रबल मर्द लाघु त्थितैः सुतान वर कल्पनैर्न टति नृत्यरंगस्थि ९६
तः ॥६९॥ वेदाधो श्वर वेद एव भगवन् भत्या त्वदीयाः सभाः ॥ नौति स्तौति भवंतमेव हित तो देवं सभाधीश्व-
रं ॥

वेदो वेदनवेदरूपमपि ते नो रूपरूपः कथं तस्मादेव महो महेश्वर सदा वाचो निवृत्तस्त्वयि। प्रोवाचावचने न रूपमपि ते ज्ञातुं न शक्यं परैः ॥७०॥ ॥इति श्री शिवरहस्ये माहेश्वर प्रथमांशे सभा सुनृत्तवर्णनं नाम त्रयस्त्रिंशोध्यायः ॥३३॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥~~सर्वं त्रोबितं ॥ ओं~~ ॥स्कंद उवाच ॥ तच्छैलमौलि प्राकारो नानासौधांतरास्थितः ॥ चंद्रोपलशिलासारैः कल्पितोऽस्ति शिवेनहि॥१॥ खंडस्फुटितसंधानरहितोऽखंड एवहि ॥ पूर्वोघच्छवेरीनाथकलानिष्पंदलारकः॥२॥ त्रिंशत्सहस्रमानेन आयामोर्ध्व विराजितः ॥ शुद्धस्फटिकसंक्लृप्तवृषभैः परिशोभितः ॥३॥ इंद्रनीलामलादेश्च विषाणैश्चैव शोभितैः॥ तत्प्राकाराखंडभित्तौ संस्थिता गोपुरेषु च ॥४॥ प्राकारगोपुरं तत्र दशसाहस्र मुच्छ्रितं ॥रुद्रावतारचरितं मणिकुंभवरांचितं ॥५॥ शोभितं पूर्वभागस्थं तत्प्राकारवरस्य च॥दक्षिणे चापि तादृक्तं महास्फटिकसंनिभं ॥६॥ रुद्रावतारक्रीडाभिरचितं वृषभैरपि॥पश्चिमे चापि तेजिष्टं स्फाटिकोपलगोपुरं॥७॥ रुद्रावतारक्रीडाभिर्वृषभैः कलशैरपि॥ शोभितं तत्र तच्छ्रायतिदशसाहस्रमानतः॥८॥ तदुत्तरेपि स्फाटिकघ. वलं गोपुरोत्तमं ॥ रुद्रावतारकलशैः शोभितं वृषभैरपि॥९॥

(४)

महस्त्रलतुभागैश्च शिखरोद्यत्पताककैः ॥ मुक्तागुच्छैः प्रवालाभिर्माला जालकशोभितैः ॥ देवकोष्ठैः कोणकोष्ठैः कपोतैः पालिपल्लिभिः ॥ महावलभिकोद्दामस्तंभविद्रुमपुत्रिकैः ॥११॥ प्राक्संस्थो मंडपस्तत्र व्यायामोच्छ्रायसुंदरः ॥ सिंहशार्दूलशरभमातंगतुरगाकृतिः ॥१२॥ शुकभेरुंडहंसाभैः स्तंभैर्मणिकृतैर्युतः ॥ सिंहमौलिमहापालिकन्यकालिविराजितैः ॥ रत्नयुक्तस्तंभयुक्त आगर्भगृहगोपुरं ॥ विस्तृतो वेदिकामिश्च रक्तपद्मच्छविर्महान् ॥१४॥ स्वच्छादर्शतलाकारमणिसुंदरभित्तिकः ॥ धूपैस्तन्मणिदीपैश्च विद्योदितदिगंतरः ॥१५॥ पटीरसारकर्पूरगंधसारादिसिक्तभूः ॥ सुमनामोदिमंदाररत्नमालापरिष्कृतः ॥ तत्राच्छहरिउद्दाममसृणपत्रच्छदावृतः ॥ तत्राच्छविद्रुमापारमुक्तासरविलंबितः ॥१७॥ अम्लानकुसुमामोदितदंतरकृतांबरः ॥ तत्र तद्भित्तिगानेकनवरत्नकचित्रितैः ॥१८॥ रुद्रावतारक्रीडादितत्तन्मणिसुविग्रहैः ॥ मोक्षलक्ष्मीविलासाख्यो मंडपो माति पूर्वतः ॥१९॥ दक्षिणे प्ययुतस्तंभो नानामणिगणैश्चितः ॥ आगर्भगृहमुत्सेधविस्तृतो गोपुरावधि ॥२०॥ सारूप्यमोक्षदानाख्यो माति रत्नपरिष्कृतः ॥ गोमेदकांतिविलसत्क्षीरघीरावृतांतरः ॥२१॥ सुरत्नमुकुराकारभित्तिरंगैः सुंदरः ॥ तत्रत्यमणिमाणिक्यगणकांतिततांतरः ॥२२॥

कस्तूरी तगरामोद गंध वारि सुपंकिलः ॥ नंदना पार सुमनो माला जालं वृतांतरः ॥२०॥ रंभा पूगी फला लंबि

गुच्छ पालि विराजितः ॥ रत्नो त्कीर्ण गजस्तंभे मरा लावलि शोभितेः ॥२१॥ तद्भित्ति निचिता पाररुद्र क्रीडादि

विग्रहैः ॥ तत्तद्भूषा विशेषेषु योयोरागस्तया तथा ॥२२॥ तत्तन्मणि कृतानेक सुंदरैः शिव विग्रहैः ॥ गुग्गुलुद्ध

म सुभग गंध धूप विधूपितः ॥२३॥ पश्चिमे गर्भ गृहत आगो पुरतला वधि ॥ विस्तृतः सुभगो भाति अयुत

स्तंभ मंडितः ॥२४॥ मालोक्य मोद दाना रव्यो मंडपो युत पादभाक् ॥ तत्र वैडूर्य रचित स्तंभा खंडैक भासुरः

॥२५॥ तत्सूत्रा पार धाराभिः सुपीत तर कांतिमान् ॥ सिंह मौलि माहा पीठ कपोतावलि सुंदरः ॥२६॥ मणिर

त्न चितानेक कृपालि कुवराश्रयः ॥ केसरांबु युता सार मृगमोद युते र्घटैः ॥२७॥ गंधांबु सिक्त तलकः मणि

माला विभूषितः ॥ हीरसार महा मुक्ता मणि हारावलंबितः ॥ तत्र वैडूर्य फलक चितोर्ध्व तलकांतिभिः ॥

निर्यत्कांत्या कांत तरो बिंबिता खिल चित्रकः ॥२९॥ कृष्णागरुमहा रम्य धूप धूम समाकुलः ॥ मणिकृ

प्ताछ भित्ति स्थ दिव्य रुद्र चरित्रकैः ॥३०॥ शोभितो नितरां भाति मणि रत्नालि सुंदरः ॥ सुरत्न केतकी ताली

फला लंबित पद्मकैः ॥३१॥ महा सिंहासनैः पीठै मणि पालि विराजितः ॥ प्रवाल मुक्ता पादैश्च सुरोप्य मणि पट्टकैः ॥३२॥

शिखरः१मंचोर्ध्व मंडपालंबि मुक्ताजालवितानकैः ॥पुष्पशय्या परिकरै रूपधानैर्मनो हरैः ॥३३॥ वासितै र्गंधबहुलशु
मास्तीर्ण पटावृतैः ॥ सुरुद्रवीणा नादैश्च नाडिता दुंदुभी रवैः ॥३४॥ तत्रमंडप सर्वेषु एका कार तयास्थितं ॥प
श्चादागोपुरतल मागर्भ गृह संनिधं ॥३५॥ तदुत्तरे चकास्तीश मंडपो रत्न सुंदरः ॥ आगोपुरं गृहंशं भोर
युतोद्भित पादुकः ॥३६॥ पुष्पराग मणि क्लृप्त उर्ध्वाधस्तल मंडितः ॥ रत्नजालक (+कान्ति) निर्यत्त भातिरंजितदिङ्मु
खः ॥ तत्कांतिकांचितो द्दाम विद्रुमामल पुत्रिकः ॥३७॥ सारंग शुकमातंग कुरंग विहगाकृतिः ॥ स्तंभैः
शोभित भूभाग मणि सारालि कीलितः ॥३८॥ रत्न जाल कीनिर्य (प्रभा तल) तत् भातिरंजितादिङ्मुखः ॥ सुरत्न
व॰ लभी कीर्ण स्वच्छ भित्तिवरांचितः ॥३९॥ तत्ररुद्रावतारादि मणि कल्पित विग्रहैः ॥ शारद (चन्द्र) घनप्रभाजाल
तिरस्कारित लोध्र्यः ॥४०॥ सुरत्नकेतको द्दाम लल लन्तारेल गुच्छकः ॥ गंधकर्पूर पाटीरद्रवासारैकगंध
भूः ॥४१॥ वितानोच्चानि ततलो रत्नरंभा परिष्कृतः ॥ साम्राण्या गरु धूपैश्च नित्यं धूम धुमातरः ॥४२॥ प्र
फुल्लरत्न चांपेय रत्नराजीवरंजितः ॥ नीलरत्नोत्पलोत्फुल्ल पीठालंबि सरै र्वृतः ॥४३॥ (सहस्र) तत्रत्य स्तंभवि
ततपुष्परागमणिप्रभः ॥ तत्रांत मंडप वरं रंजितं मणिकांति भिः ॥४४॥ सुगंध गंध जामोद पत्वासानुमोदितैः ॥

वात पोत समानीतैरम्यगीत तरावृतैः॥ तन्मंडपवरे देव्या दिव्य सिंहासनाश्रयः॥ आस्ते गणैः परिवृतो पश्यन् तद्दृष्टिकौतुकं॥४६॥ तत्र त्वमंडपस्याख्या श्रीमहेशेन कल्पिता॥ सायुज्य लक्ष्मी दानाख्यो रत्न सुंदरकल्पितः॥४७॥ ॥स्कंद उवाच॥ तत्र त्यामलमंडपेषु भगवान्नास्ते सहांबो मुदा भक्तानां निवहेषु तत्र सुकृता पारैश्च भूषादिभिः॥ सस्वापार दयारसैः सुमधुरै दरैर्गणेंद्रैर्वृतः तत्तत्स्थैश्च नवरार्हभूषणवरं भक्तेषु धत्ते शिवः॥४८॥ इति श्री शिवरहस्ये माहेश्वरे प्रथमांशे चतुर्विध पुरुषार्थ मंडपवर्णनं नाम चतुस्त्रिंशोध्यायः॥३४॥ ॥स्कंद उवाच॥ ॥तत्राच्छ मंडपां तस्य गोपुरांतर सुंदरं॥ इंद्रचापनिभं दिव्यं नानामणि विराजितं॥१॥ प्राकारं दश सहस्र योजनायाम विविस्तृतं॥ क्वचित्पूर्वेषु हरितं क्वचिच्च जलसंनिभं॥२॥ कुरुविंदामल मणि भास्वत्कां ततराकृति॥ तडित्कूट निभं चापि नीलांबुद निभं क्वचित्॥३॥ बाल सूर्य कराभासं उद्यदिंदु निभं क्वचित्॥ पलाश शल्मली पुष्प संकाशं क्वचिदेव हि॥४॥ इंद्रनीलामल मणि प्रभा संनिभ कांतिकं॥ इंद्रगोपकसंकाशं मयूरगल सन्निभं॥५॥ पारावत गलाभासं कार्णिकार छवी युतं॥ चंद्र भास्वत्कारा कारं कनत्धी रनि भं क्वचित्॥६॥ गोमेद पुष्परागोच्च वैडूर्य रस संचितं॥ प्रवाल मणि मुक्ताच्छ धारा छवीनिभं क्वचित्॥ ॥७॥

शिवरह०१ तत्प्राकार प्रभाजालैर्नभो विविधभायुतं ॥ मणिमाणिक्यखचितगोपुरालिविराजितं ॥ ८ ॥ रुद्रावतारवीरैर्मणिराजद्रूषैर्युतं ॥ ललामशोभिकलशैश्च तुर्दिक्षु विराजितं ॥ ९ ॥ तत्रांतर्गृहमीशस्य गर्भागारमनोहरं ॥ नवरत्नाखंडक्लृप्तस्तंभपीठविराजितं ॥ १० ॥ तच्चिंतामणिभाजालभासितं गर्भधामकं ॥ तदग्रतो भातिशंभोः सहस्रस्तंभमंडितः ॥ सुमुक्तिमंडपोनाम सर्ववेदशिखास्तुतः ॥ तत्प्रभाभासिता लोकाः ब्रह्मविष्ण्वादयो हराः ॥ १२ ॥ दिक्पालयक्षरक्षौघनागाप्सरसकिंनराः ॥ उरगास्तुरगाश्चैव सारंगाश्चमराः मृगाः ॥ १३ ॥ मयूराः सामजाला वाहरयो शरभास्तथा ॥ भल्लूकभेकखड्गैश्च हरिणा महिषास्तथा ॥ १४ ॥ कल्पितामणिजोत्तुंगस्तंभधारा सुकोटिशः ॥ मणिजालकसंछन्नो रत्नसोपानवेदिकः ॥ १५ ॥ पट्टिकातोरणोपेतो पीठसोपानसंयुतः ॥ तदग्ररत्नकलशैरत्नजालकशोभितः ॥ १६ ॥ रत्नगुच्छमहामालाजालाकीलितसुंदरः ॥ प्रभाकरसहस्राभो इंदुकोटिशतप्रभः ॥ १७ ॥ धूपामोदैर्बहुलोमणिदीपप्रभाततः ॥ वितानतानसुभगो हरिन्मणिमयः सदा ॥ १८ ॥ नंदनानंदितसुममालागुच्छोरुलंबितः ॥ आम्लानारक्तकमलोत्पलमालालसद्ध्वजः ॥ १९ ॥ प्रत्यग्रकेतकीदामगंधोद्धूतपिंजरः ॥ उत्फुल्लचंपकोद्दाममालागंधितदिङ्मुखः ॥ २० ॥

महेश्वर अ० ३५

९९

कदंबबंधुरा माद सुंदरो मणिभासुरः॥ तत्र सिंहासने श्चित्रैः कल्पितो मणि भिः ॥२१॥ पद्मरागामल
मणि कांचितादर्श भित्तिकः॥ पताकाकुंभकोटीभिर्मणिकोटिवृषैश्चितः॥ लिंगाग्रे मंडपो भाति केला
सेश्वर संनिधौ॥ ततांतरे गर्भगृहं कैलासे शस्य सत्तमं॥२३॥ नवरत्न महा पीठं वेदिकातल सुंदरं॥ गर्भको
षैः पट्टिकाभिर्देवकोष्ठै विराजितः॥२४॥ वलभीतल संचारि मराल कुल सुंदरं॥ कपोत पालि पालिस्य
मणिसिंह वृषैर्युतं॥२५॥ दिक्पालैर्ब्रह्म विष्ण्वाद्यै र्दक्षिणामूर्ति विस्मृतं॥ दक्षिणे पश्चिमे चापि प्रागुत्तर
दिशि प्रभाः॥२६॥ लिंगोद्भवांधकाराति त्रिपुरासुर संहृतिः॥ ब्रह्म विष्णुद्भव श्चापि तांडवे शश्च सुंदरः
॥२७॥ करिचर्म परीधानो हेरंब स्कंद संयुतः॥ भिक्षाटनश्च कंकालो शूलासक्त करो हरः॥२८॥ मेखला
वृतकंठोघ्यत् पादांभोजात्त पादुकः॥ जटाजालित सन्मौलि इंदुकुंदशताद्भुभाः॥२९॥ सोमावतंसो नवा
हो गणवृंदयुतः क्वचित्॥ उमया संस्थितः पीठे पश्यन् गौरीं मनोहरः॥३०॥ गौरी प्रसादनपरः पश्यन् तत्र
नु केकरं॥ अर्धेन नारी वपुषा शोभितो हरिहीरभाः॥३१॥ रत्नाहिकुंडलद्योति सोमधामसमाननः॥
व्याघ्ररत्नांबरधरः त्रिपुंड्र तिलको ज्वलः॥३२॥ मणिरिंखसुभूषाढ्यो नाग भूति ज गंध धृक्॥

134

क्वणन्मंजीर पादार्धः शेषार्ध पद पंकजः ॥ गर कंठार्ध को दिव्यमणि कंठार्ध धृक् शिवः ॥ नव चंद्रोत्तमां गोत्तिगं गारय वराश्रयः ॥३४॥ वामदक्षिण भागस्थ लोकेश हरिसेवितः ॥ चंडांशु तनयोद्गीत लिंगालिंग द्विजा वनः ॥३५॥ गंगा तरंग कलित कपर्दैर्णांक शोभितः ॥ मुरवैरि महानेत्र पूजितांघ्रि सरोरुहः ॥३६॥ ब्रह्म मुंडल षंडक कुंडल शोभितः ॥ एवं रुद्रावतारैश्च अखंड मणि कल्पितैः ॥३७॥ चंद्र स्फटिक हारैश्च पुष्पगोमेदनीलजैः ॥ श्रीमहेश महा दिव्य विग्रहैः परितो वृतैः ॥३८॥ देव्या हरिन्मणि निभैः पद्मराग भवैस्तथा ॥ इंद्र विष्णु विधातॄणां दिक्पालानां च मूर्त्तयः ॥ ३९॥ तत्तत्क्षाग मणि क्लृप्ताः कल्पिता मणि गर्भजाः ॥ मधुर स्मित नेत्रास्य तत्तदंगैक भासुराः ॥४०॥ मणि मुक्ता प्रवालादि भूषणा वलि भासुराः ॥ तत्तत्कोण गता त्वद्य राजद्वृषभ भासुराः ॥४१॥ सहस्र दश मानेन योजना याम कल्पिताः ॥ तत्रत्य मूर्तयः सर्वाः पंच योजन मानतः ॥४२॥ कल्पिता श्रीमहेशेन मन्व सैव मनोरमाः ॥ हीर सार घनोत्तुंग पंचाशद्योजनोच्छ्रयं ॥४३॥ कृता याम महाश्लक्ष्ण कोटि भास्कर भाततं ॥ कदली पुष्प संकाशं समुच्छ्राय्योरु मंडलं ॥४४॥ ज्वलदिंदु महावृत्तं ब्रह्मांडोदरदारणं ॥ गर्भगेहं तत्र शंभोर्वेद वेदांत संस्तुतं ॥४५॥ कैलास सार सुभग मणि वेदि विराजितं ॥ तत्रैवांत महापीठे कोटि द्युमणि संनिभं भे ॥४६॥

प्रभाभासि जगज्जालं चंद्राच्छ स्फटिकोज्वलं ॥ आयाम वृत्त गोमुख्य हरिब्रह्मो रूपीठकं ॥४७॥ महा लिंगं महाकाश खंड स्फटिकोज्वलं ॥तल्लिंगसार धाराभिः कैलासो प्यति पांडुरः ॥४८॥ भाविभासित दिक्चक्रं सौधगोपुरमंडितं ॥ अनर्घ्यांबरसंवेष्टा वेष्टितं गंधसुंदरं ॥४९॥ रत्न कल्हार कमल मालाजालैर्विराजितं ॥ सहस्र नीलमणिज नीलोत्पल सरांचितं ॥५०॥ अखंड हरितो द्दाम मणि बिल्वोत्तमांगकं ॥ उत्फुल्ल सूत्र पुष्प वैडूर्य चंपकाच्छ सरैर्युतं ॥५१॥ पुष्पराग मणि क्लृप्त सुपाटल सरावृतं ॥ निष्टप्त हेमजात्यच्छ कर्णिकार सरावृतं ॥५२॥ हीरसार महाधारा मल्लिकाच्छ सरावृतं ॥ गोमेदक मणि स्फारकंटक सरावृतं ॥५३॥ मंदार कुंद बंधूक बक द्रोणार्क रत्नजैः ॥ सरैः रसकीलित सन्मौलि स्फटिकोपल कल्पितैः ॥५४॥ मणि प्रभात ताल्यच्छ शोभितोत्तुंग मौक्तिकं ॥ सहस्रस्य स्त्रो महाशेष फणामणि विराजितं ॥५५॥ पद्मराग महाराग त्रिपुंड्र तिलकोज्वलं ॥ तत्कांति कांचिता लोका तत्धारा सार सागराः ॥५६॥ तत्कैलास महासार पिंड शेखर ओश्वर पूजितं ॥ कैलासेशाख्य ममलं लिंगं मंगलदायकं ॥५७॥ मंगलापतिज प्रेम धारारस विजृंभितं ॥ तल्लिंग महिमा वेदैरपार शिखराश्रयैः ॥५८॥ ब्रह्मविष्ण्वादिभिर्देवैः

हृद्देवा मुनिभिः स्तथा ॥ न शक्यो ज्ञातु मीषड्ढा भूका वेदोक्त यो खिला: ॥५९॥ कैलास शैल मणि धामग दिव्य लिंग कैलास नाम कमहो त्रिजगद्धि चित्रं ॥ तल्लिंग मौलि शकलेंदु कला मरी भिराप्लावितो हि शिखरैरत्र विभाति शैलः ॥६०॥ ॥ इति श्री शिवरहस्ये माहेश्वरे प्रथमांशे कैलास लिंग वर्णनं नाम पंचत्रिंशोध्यायः ॥३५॥

॥ श्री काशी विश्वेश्वरार्पण मस्तु ॥ ॥ स्कंद उवाच ॥ ॥ तल्लिंग जाताः सर्वेपि भुवनानि चतुर्दश ॥ तल्लिंग जात देवाद्या ब्रह्म विष्णु हरामराः ॥१॥ तल्लिंगे संस्थिता लोकाः सप्त द्वीप वना कराः ॥ प्रलयेपि लयं यांति सर्व लोकाः सुरैः सह ॥२॥ लयनाल्लिंग मित्युक्तं लीनं यस्मिन् जगद्भुतं ॥ तस्माल्लिंगं मुने प्रोक्तं तत्कैलासेश्वर संज्ञितं ॥३॥ यतो वाचो निवर्तंते अप्राप्य मनसा सह ॥ भूमौ तच्च महा लिंगं प्रतिष्ठा पुच्छ मेव तत् ॥४॥ एकं ब्रह्मैव तल्लिंग मल्लिंगमपि भूसुराः ॥ तदेव ज्योतिषां ज्योति स्तद्धि चेतन चेतनं ॥५॥ तल्लिंगं सत्यमानंदम खंडैकरसं सदा ॥ तल्लिंग दर्शने वापि न वाक् गच्छति वा मनः ॥६॥ नेति नेति च वेदांतैः तल्लिंगं प्रति पाद्यते ॥ तदेव ब्रह्म लं बिल्ब्विने हेना नास्ति किंचन ॥७॥ ऋतं सत्यं परं ब्रह्म तदात्मा मनसा तिगं ॥ निरिंद्रियं निष्कलंक मसंगम जरं हि तत् ॥८॥ प्रभुं समस्त भूतात्थ सर्वधर्म विवर्जितं ॥

आकाशं तदनाकाशं साकारं च निराकृति॥९॥ कारणं कारणानां च ब्रह्म तल्लिंगमेव च॥ नामरूपातिगं शांतं गुणातीतं गुणास्पदं॥१०॥ अपाणिपादमत्यच्छमानंदघनमद्वयं॥ शिवस्य निर्गुणं रूपं दुर्दर्शमकृतात्मभिः॥ तदेव व्यापकं भाति तल्लिंगं तमसः परं॥ तन्त्रवेदैश्च वेदांते गुरुभिः श्रुतिभिः सदा॥१२॥ न प्राप्यं सर्वदा सर्वैर्द्रष्टुं तच्चाप्यथाश्रितुं॥ तदेव देवदेवस्य निर्गुणं रूपमद्भुतं॥१३॥ निर्गुणं चापि लोकानां दृष्टिगोचरमास्थितं॥ तल्लिंगं सर्वदा शंभुर्देव्या पूजयति स्वयं॥१४॥ बाह्यैराभ्यंतरैश्चैव पूजाभिः परमेश्वरः॥ त्रिनेत्रो नीलकंठश्च चंद्रार्धकृतशेखरः॥१५॥ अहंभावादिरहितो भावाभावविवर्जितः॥ अहं ब्रह्मेवेदमिति तुर्यातीतोऽजरोऽमरः॥१६॥ ध्यानध्येयातिगो भूत्वा स्थितः समाहिमातिगः॥ एवं तं भावयन् देव्या शिव एवाहि केवलः॥१७॥ तमः परो महादेवो देव्या सगुणनिर्गुणः॥ पूजां बाह्योपचाराद्यैः मनोवाचामगोचरः॥१८॥ कल्पयत्येव मनसा सर्वकालेषु शंकरः॥ प्रदोषेषु विशेषेण कैलासे चंद्रशेखरः॥१९॥ तत्पूजां सावधानेन समाहितमनाः शृणु॥ चतुर्देहातिगो भूत्वा सर्वेंद्रियविवर्जितः॥२०॥ अहंभावं परित्यज्य शिवोहं केवलो द्वयः॥ व्याप्येषु व्यापकश्चाहं गुणेषु निर्हितो स्म्यहं॥२१॥

शिवरह० नांतो न चादिः सकलः अहं विश्वं सदैव हि ॥ विश्वातीतोऽहमजरोऽसंगो संगिष्व वी स्थितः ॥२२॥ व्यापको ऽहं सदा पूर्णः गुणजालविवर्जितः ॥ निरूपो विश्वभूतात्मा देहधर्मविवर्जितः ॥२३॥ आकाशो व्यापको ऽशीर्यः शीर्णोऽहमेव स्थितः ॥ सत्यं ज्ञानोऽहमानंदो बोध्य बोधकवर्जितः ॥२४॥ मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितं ॥ मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहं ॥२५॥ इत्येवं भावयन् धीरो बाह्ये लिंगे चयेच्छिवं ॥ धृतभस्मत्रिपुंड्रांकः रुद्राक्षवरभूषणः ॥ २६ ॥ पंचास्य ध्याननिरतः पंचाक्षरपरायणः ॥ प्राङ्मुखो दङ्मुखो वापि स्थितश्चैलकुशासने ॥२७॥ ध्यात्वा स्वहृत्कुतपद्म संस्थं शुद्ध स्फटिकसंनिभं ॥ प्रसन्नास्यं त्रिनयनं त्रिपुंड्र परिशोभितं ॥२८॥ चंद्रार्धमुकुटं देवं नीलग्रीवमुमापतिं ॥ आवाहयेद्बाह्य लिंगे स्फाटिके बाणधातुजे ॥२९॥ मृल्लिंगे सिकतायां च पूजयेत्स्थावरे पिवा ॥ पंचामृतैः पंचगव्यैर्नीरधारादिभिः शिवं ॥३०॥ पंचब्रह्मैः पावमानैः रुद्रैर्वेदसमुद्भवैः ॥ अभिषिच्य प्रयत्नेन साम भिश्च महेश्वरं ॥३१॥ वस्त्रेण वेष्ट्यत लिंगं गंधलेपेन लेपयेत् ॥ अक्षताभिस्तथा रत्नगोलकैर्भूषयेच्छिवं ॥३२॥ बिल्वपत्रैः पंकजैश्च कल्हारैः करवीरकैः ॥ पुष्पैरारण्यकैश्चैव तथान्यैश्च सुगंधिभिः ॥३३॥ धूपदीपैश्च नैवेद्यैस्तांबूलैर्मणिदीपकैः ॥

माहेश्व० अ० ३६

१०२

१२

नीराजनैः छत्र मुख्यैश्चामरैर्व्यजनैरपि ॥ ३४ ॥ प्रणाम स्तोत्र पठनैः प्रदक्षिणकनर्तनैः ॥ पुनः प्रदक्षिणे श्चैव पंचाक्षर जपैस्तथा ॥ ३५ ॥ हृत्पद्मे संनिवेश्येशं पूजोद्वासनमाचरेत् ॥ एवं पूजाविधानेन पूजयेत्परमेश्वरं ॥ ३६ ॥ एककालं द्विकालं वा त्रिकाले योर्चयेन्नरः ॥ स एव लभते ज्ञान मास्यं तद्वरार्चने ॥ ३७ ॥ कैलासेश्वर लिंगमेतदमलं स्वर्गापवर्ग प्रदं तन्नैवाखिल वेद जाल तिलकैः सोतुं न तत्पार्यते ॥ ईशेनापि गजाननेन च मया देव्या गणैर्द्रैरपि विष्णु ब्रह्म हराम रैर्मुनिगणै स्तंत्रैस्तथैवागमैः ॥ ३८ ॥ तल्लेशायुत लेश लेश महिमा कोट्यंश कोट्यंशकं वक्तुं श्रोतुमथेक्षितुं त्रिभुवने नास्तीति मन्ये द्विज ॥ ३९ ॥ ॥ इति श्री शिव रहस्ये माहेश्वरे प्रथमांशे कैलास वर्णने कैलासेश्वर पूजाध्यान कथनं नाम षड्विंशो ध्यायः ॥ २६ ॥ ॥ स्कंद उवाच ॥ ॥ एवं कैलास शैलोहं विहितः शूल पाणिना ॥ मणि प्राकार सौधाश्च गोपुराण्यपि भूसुर ॥ १ ॥ रत्नानां गिरयन्त्रस्त नगणाव सथकल्पनाः ॥ नाना रुद्रावताराणां सभा मंडपनिर्मितिः ॥ २ ॥ तथा नान्यत्र रमते सर्वावासोपि शंकरः ॥ देव्यापि स्कंद हेरंब नंदिकेशादिपिप्रियः ॥ ३ ॥ महेशस्य निवासोयं गिरिशो गिरिशस्य हि ॥ नाविमुक्ते पि रमते न तथा हिम भूधरे ॥ ४ ॥ मंदरे निषधे पीशस्तथा द्रोगंध मादने ॥

137

शिवर०१ तथान्येषु नगेंद्रेषु प्रीतिर्नैव पिनाकिनः ॥५॥ लिंगालयोयं कैलासः रम्यसानुतरूज्वलः ॥ सुरम्यमोण माहेश्व. अ॰ ३७

१०२ शृंगाग्र चारु सुंदरकंदरः ॥६॥ कलधौत प्रभाधूतदिक्तमस्तोमसंततिः ॥ सर्वतीर्थमयः शैलः सर्वलिंगम

योनमः ॥७॥ गणेश्वरोयं कैलासः सर्वदाशिवकासमूः ॥ सर्वक्षेत्रमयः शैलः क्षेत्रेशाश्रयतः सदा ॥८॥ सर्वौष

धिमयश्चायमोषधीशपदाश्रयात् ॥ वनाश्रयोयं कैलासो वनाधिपतिसंश्रयात् ॥९॥ मृगवासोहि सततं

सदा पशुपतिप्रियः ॥ नास्य रूपमहो देवैर्ज्ञातुमेव न शक्यते ॥१०॥ कैलासापारशिखरैः सर्वलोकाः सुपाव

नाः ॥ तन्मौलितलसंस्पृष्टवाताः पवनपावनाः ॥११॥ ब्रह्मादयः स्वलोकस्थाः प्रार्थयंत्यनिलं ततः ॥ विष्णुब्र

ह्मादयो देवा मुनयोपि मुनीश्वराः ॥१३॥ कदास्मान्पावयेद्वायुः कैलासशिखरागतः ॥ अस्माभिर्न तपस्तप्तं कैला

सालोकनाय तु ॥ अंडजानामपि गतिर्निषिद्धा शशिमौलिना ॥ सूर्यचंद्रानलानां तु प्रभा विद्योतनं नहि ॥

॥१४॥ तस्यैव शिखरोद्दामप्रभाभिर्भासिता दिशः ॥ कैलासमौलिसंस्थस्य यत्सुखं क्षणमात्रतः ॥ नहितद्वैष्ण

वे ब्राह्मे कल्पावधि सुखोत्तरं ॥ न चैंद्रे मेरुमौलौ वा नंदने स्वर्गमंडले ॥१५॥ दिक्पालानां पुरौ चेवा सौर्ये १०२

चांद्रमसेऽपि वा ॥ न चतुर्दशलोकेषु तत्सुखांशांशकोटिकं ॥ प्रसादेन विना शंभोर्गमनं तत्र दुर्लभं ॥ =

नकर्मणा न तपसा धर्मैश्च विविधैरपि ॥१९॥ कैलासाचलवार्त्तापि न शक्या गमनं कथं ॥ सुराविष्णवादयः पूर्वे ब्रह्माऽपि भगवत्कृणाः ॥२०॥ मुनयस्तपसा घ्यापि कैलासनगवीक्षणे ॥ कैलास गमने लिप्सां धृत्वा तेमुरसत्तमाः ॥२१॥ शिवप्रसादसिध्यर्थं तप्स्यंति परमंतपः ॥ केचित्पंचाग्निनिरताः समीरणसुपारणाः ॥२२॥ वृंतं शलवणाच्छदाशाश्च केचिद्भारिषु संस्थिताः ॥ कटधूमाशिखापानाः केचिच्चैवोर्ध्वबाहवः ॥२३॥ भस्मछन्ना भस्म संस्थाः केचिद्घोररुद्रजापकाः ॥ भस्मांग बिल्वमूलेषु केचित्पंचाक्षरादराः ॥२४॥ रुद्राक्षवर कोटीराः शिवनाम परायणाः ॥ केचिल्लिंगार्चनपराः त्रिकालं बिल्वपल्लवैः ॥२५॥ एवं तपोभिरत्युग्रैः तप्स्यंति मुनयः सुराः ॥ सदाशिव प्रसादो हि तेषांभावी मुनीश्वराः ॥२६॥ सर्वलोकेषु गंतारः सर्वधर्मपरायणाः ॥ पुनरावृत्तिनः सर्वे न कैलासगता मुने ॥२७॥ यतयोपि निवर्त्तंते ज्ञाननिर्धूतकल्मषाः ॥ शिवप्रसादद्दुर्भ्योऽयं कैलासोऽप्यति दुर्लभः ॥२८॥ मेरुशृंगाग्रकैलासशिखरे वरशांभवाः ॥ पूजया श्रद्धया शंभोरीशानस्य पदं गताः ॥२९॥ सुखिनः संप्रमोदंते स्वर्गकोटिगुणाधिके ॥ महाकैलासगमनमस्माकं किं पुनर्नृणां ॥३०॥ शिवप्रसादहीनानां तत्कथाश्रवणं नहि ॥ अनेककोटिकल्पोत्थतपसा प्राप्य एव तैः ॥३१॥ मेरुमंदारसंकाशरत्नस्वर्णादिदानतः ॥ सत्राति रात्रकलनैर्वेदाध्ययनकोटिभिः ॥३२॥

गवां कोटि प्रदानैर्वा विध्वयात प सा पिवा॥ इष्टा पूर्त्तादि धर्मैर्वा कैलास प्राप्तिरेव न ॥३३॥ शिव प्रसादलभ्योयं प्रसा
दो दुर्लभं नृणां॥ देव्या मया गणेशेन नंद्याद्यै र्गणपैरपि ॥३४॥ कैलास बाह्य प्राकारे तपसा याचिता स्थितिः॥ अनेकयुग
संतप्त तपसा तोषितः शिवः॥३५॥ शिव प्रसादेन वयं तद्बाह्य शिखराश्रया॥ गण्यंते शिकता भूमौ गण्यंते सर्व तारकाः॥
॥३६॥ कैलासा पार शृंग स्थलिंगा नां गण नान हि॥ तत्रैव कोटि लिंगा ना मुत्त मानां श्रुता मया॥३७॥ ततो पि लक्ष लिंगा
नां ततो युत सहस्रकं॥ उत्तमानां च देव्ये तद्द दता श्री शिवे न हि॥३८॥ गण ना गण्यते केन कल्प कोटि शतै रपि॥ अनि
र्वचनमायस्य मायिनः श्री त्रिशूलिनः॥३९॥ को वेद महिमानं तु तत्र तन्मौलि लिंगगं॥ सर्ववेदवेद निश्वासः सर्वज्ञः
शशिशेखरः॥४०॥ ॥स्कंद उवाच॥ ॥शिव संन्निधि रेव संनिधिः विबुधाधीशपदाब्ज रत्न वार्धिः॥ जनिना
शप्रभवा पराध संघः प्लुति जा पार विशेष तोष गाधो॥४१॥ निधि रेवा खिल संपदां युगाधिर्भवभक्ता मलचेत दारिता
खिलाधिः॥ एवं कैलासशैलामल शिखरवरे मौलि कुंभे क जाले स्त त्रा पार शिवा लय स्थित महा लिंगो घ लिंगा
श्रयैः॥४२॥ ईशा पार मनो विलासा जनितै दृष्ट्वा महेशः स्वयं॥ बालार्धा कृति रिंदु मौलि रनला लं का फाला ह्वकः॥
कालारिः कलधौत शैल शिखरं लिंगालि पूर्णं क कगे न॥४३॥ इति श्री शिव रहस्ये माहेश्वरे प्रथमांशे कैलास

वास महिमा नाम सप्तत्रिंशोध्यायः ॥ ३७ ॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ जैगीषव्य उवाच ॥ ॥ =
भगवन् तारकाराते शिवभक्त वरामल ॥ नमामि त्वत्पदांभोजं किं तद्देव्यै शिवोदितं ॥ १ ॥ रहस्यं वा प्रकाशं वा त
न्मे व्याख्यातुमर्हसि ॥ ॥ सूत उवाच ॥ ॥ तदुक्तं संप्रधार्यैव स्कंदो मंदस्मिताधरः ॥ भव भक्तं महाप्राज्ञं सुराणां
शृण्वतां तदा ॥ २ ॥ मुनीनां चासुराणां च गणेशानां च सन्निधौ ॥ प्रोक्तवान्धूर्जटि महादेवं ध्यात्वा हृदय पंकजे ॥ ३ ॥
॥ स्कंद उवाच ॥ ॥ देव्या कैलास जोत्तुंग शिखरे वर गोपुरे ॥ एकाकिना संचरता विस्मिता क्षेण पश्यता ॥ ४ ॥
शिवेनानंदिता देवी प्राह प्रांजलिरीश्वरं ॥ ॥ देव्युवाच ॥ ॥ देवदेव महादेव करुणा वरुणालय ॥ एणांकमौ
ले सर्वज्ञ गंगाजल जटाधर ॥ ६ ॥ भवभर्गा मरेंद्रेंद्र फणामणि विभूषित ॥ वृषध्वजेश कामारे पुरांतक यमांतक
॥ ७ ॥ खट्वांग डमरू दाम घोषपोषित विष्टप ॥ त्रिशूलपाणे भूतेश व्योमकेश दिगंबर ॥ ८ ॥ त्रिजगज्जालनि
र्माण स्थितिनाशकर प्रभो ॥ विस्मयस्तव नास्त्येव त्रैलोक्ये तव शंकर ॥ ९ ॥ लोका लोक्या ब्रह्म विष्णु हरामरख
राः सुराः ॥ तेषामुत्थान संस्थान विनाशनमपीश्वर ॥ १० ॥ त्वदपांगैक संगेन सर्वेषां प्रलयोदयौ ॥ तव कोऽस्मिन्विस्म
ये हेतुः तद्ब्रूहि परमेश्वर ॥ ११ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि गिरींद्र वरनंदिनि ॥ त्वयि गोप्यं न मे

139

किंचित्रेषु लोकेषु विद्यते ॥१२॥ न प्रकाश्यं त्वया देवि रहस्यं मम हृद्गतं ॥ तथापि त्वयि वक्ष्यामि लिंगाध्यायीम
दंशिवे ॥१३॥ कैलासाचलमौलिस्थलिंगमंडलमंबिके ॥ तज्ज्ञातुं नैव शक्यं हि मयैव मनसा ततं ॥१४॥ कोटिलिंगा
कृतिरहं तत्पूजाकल्पकोप्यहं ॥ नतानि देवमुनिभिः गंधर्वैः पूजितान्युमे ॥१५॥ नमद्रुणवरैर्देवि श्रुतानि किमु
दर्शनं ॥ पूजने का कथा देवि अगम्यो मम भूधरः ॥१६॥ तत्पश्यामि प्रसंगेन मनसा विस्मयेन च ॥ मदीक्षणेन सर्वेषां
लिंगानां पूजनं भवेत् ॥१७॥ शिवे पश्य महादेवि यावत्ते दृष्टिसंततिः ॥१७॥ शिवे पश्य महादेवि यावत्ते दृष्टिसं
ततिः ॥ लिंगमंडलमिदं नगात्मजे चंद्रखंडललितोत्तमांगकं ॥ कुंडलीशसुफणाविभूषितं पापजालसुगिरीं
द्रखंडनं ॥१८॥ पुंड्रशोभितकपालमालकं बिल्वचंदनसुपंकजार्चितं ॥ पश्य पश्य गिरिजे नगमौलौ तोषदा
यकमतीव मम मे ष्टं ॥१९॥ कैलासोयमतीवसुंदरमहालिंगालयानां शिवे कोटिभिः परितो वृतो मणिगृहे स्तादृक्षलिंगे
दीप ॥ मालूरोत्तमशाखिशेखरशिखस्तस्यालुपुष्पैः फलैरानम्रच्छदभारपल्लवयुतस्तद्गंधबंधानिलः ॥२०॥
॥ शिखिशिखकुलाग्रपिंछभारैर्मम लिंगालयमार्जनं सदैव ॥ वनवेणूकृवदावमध्यलग्नैः स्तगस्तग
रामोदसुधूपितं सदैव ॥२१॥ मणिगर्भगृहोत्यसुंदरो रुदीपैः सततं दीपितमेव लिंगसंघं ॥ नवबिल्वछद

पुष्पगंधवाहैरभिनो तैश्च सुपूजितानि पश्य ॥२२॥ शीतै रक्तामलवर्णैः ॥ पाटल्लपल्लवैश्च कर्णिकारैः सरसोसु ल्लसत्सरागैः ॥ अरविंदैः कुरुविंद वृंद वर्णैर्नवनीलोत्पल हल्लकैः सुफुल्लैः ॥२३॥ शित रक्तामल वर्ण शीर्णवृंतै रति गंधैर्मकरंद वृंदनीलैः ॥ मंदारै रति सुंदरैर्मम शिवे लिंगालि मौलिः सदा मल्लीफुल्ल सुपुंडरीककुमुदैः स कर्णिकारैः शिवे ॥२४॥ संछन्नानि तरां सदा वन फलैः प्रोद्यत्सु धासारकैः ॥ नैवेद्येषु शिवे सदा प्रकलितं लिंगालयेषूद्यतं ॥ करिपुष्कर शीकरोद्य सारैरभिषिक्तानि स्वमौलि चंद्र सारैः ॥ कस्तूरि कामृग मदां गज घर्षणेन गंधायितानि नगमौलिषु पश्य देवि ॥२६॥ उत्फुल्ल चामर कुलैरभिवीज्यमानं नृत्तं शिखंडि विहितं पिकहंसरागं ॥ सपूज्य पूजितमिदं मम लिंगसंघं पापापहारि सुगति प्रद मुत्तमंच ॥ २७॥ ॥स्कंद उवाच॥ ॥इत्थं कैलासशैलेनवरत कथया स्व धुनी तुल्य या सौ देवीं पश्यन्त योघं दलित शिववरो ह्यामलिंगानि पश्यन् ॥ कालारिर्नियतें दुशेखरखोत्तं सोत्तमांगो महामौलिं स्वधुनयन्त तीव्रकरुणा दृष्ट्या प्रपश्यन्नगं ॥२७॥ ॥इति श्री शिवरहस्ये प्रथमे माहेश्वरांशे कैलास लिंगवर्णनं नामाष्टा त्रिंशोध्यायः ॥३८॥ श्री काशि विश्वेश्वरार्पणमस्तु ॥ ॥श्री ईश्वर उवाच ॥ ॥पश्य लिंगानिमे देवि मणि धाम गतान्युमे ॥ धाम मौलि महाकुंभ धारा

190

शिवरह॰१ व्याप्ता व्योमानि शंकरि ॥ चंद्रचंदनलिप्तानि त्रिपुंड्रोज्वलितानि च ॥ मणिसुंदरमंदारपुष्पमौलीनि शंकरि ॥२॥ बिल्वोत्तमांगसौंदर्यरसगर्भाणि पार्वति ॥ वरकाकोदरानर्घ्यफणाभूषणकान्यपि ॥३॥ नंदनानंदमालाभिश्चंदनालंकृतान्यपि ॥ दावदग्धागरुरसैर्धूपितानि सदांबिके ॥४॥ दीपितानि मणिज्वालाजालकांतीनि पश्युमे ॥ यथा मे देवदेवशि मनो लिंगप्रपूजने ॥५॥ न तथा जगतो जालनिर्माणे मे मनोंबिके ॥ तत्पालने तद्‌दूने वनेनान्यधर्मेषु मे मनः ॥६॥ नगोऽयं मम कैलासः सर्वानंदमयो निधिः ॥ एतस्य तपसा तुष्टः प्रायछम्वरमुत्तमं ॥७॥ तव मौलौ निवत्स्यामि नानालिंगसमाश्रयः ॥ प्रलये नैव नाशस्ते मत्सांनिध्यबलात्तव ॥८॥ इत्युक्तो गिरिराजोऽयं मम मानंदप्रदः सदा ॥ प्रलये सागराः सर्वे कैलासस्य शतोत्तरे ॥९॥ पादमूले स्थितिं देवि यास्यंति च नगा अपि ॥ महर्लोकावधिमहावीचीकल्लोलसंकुलाः ॥१०॥ सप्तभिः पवनैर्वापि चालितास्ते तदा द्विजे ॥ हिमाचले मंदरेपि केदारेश्वरसंज्ञकः ॥११॥ निवत्स्यामि शुमापांगि सदा लिंगाश्रयो हि सः ॥ मेरावपि महादेवि शिखरं मम सुंदरं ॥ तदुत्तरेपि कैलासे नानालिंगैकभासुरं ॥ शिखरं तत्र देवैश्च पूजितानि वसाम्युमे ॥१३॥ एक एवाहमद्वैतः नीरूपोहं महाद्विजे ॥ त्वया के

माहेश्व॰ अ॰३९

२०६

२०६

लास शिखरे तुष्टो वास मरो चयम ॥१४॥ सर्वोवासोप्य हं देवि कैलासे निव साम्यहं ॥ अनंतार्बुदलिंगानि ममकैलास पर्वते ॥१५॥ तत्प्रासाद मणी राग शिखरा द्योति तत्प्रभः ॥ तिरस्कृतार्क चंद्रेंद्राः नतछक्यं हि व र्णितुं ॥१६॥ तत्रापि कोटिलिंगानां गणनाकिल सुंदरि ॥ उत्तमेषु महादेवि तत्रापारेषु पार्वति ॥१७॥ तत्रापि लिंग सहस्रं ममैव प्रीतिदायकं ॥ दर्शनात्स्पर्शनाच्चापि पूजना न्मोक्षदायकं ॥१८॥ विना ज्ञानेन तपसा कर्मणा श्रद्धया शिवे ॥ नयज्ञैर्न व्रताचारैर्योग सांख्यैर्म हेश्वरि ॥१९॥ साग तिर्नैव लभ्येत यथा तल्लिंग पूजया ॥ कैलासाचलमौलिस्थ लिंगानां दर्शनं शिवे ॥२०॥ दुर्लभं सर्व देवानां, नृणां किमुत सुंदरि ॥ कैलासेश्वर मुख्यानि लिंगान्युत्तमानि च ॥२१॥ मणि गर्भ गृहाधार संस्थितान्य गजे मया ॥ प्रोद्यत्कुंभ पताकानि मया संपूजितान्यपि ॥२२॥ प्रातः संगवसायान्हे प्रदोषेषु महेश्वरि ॥ तेषु लिंगावलिं भद्रे श्रुणु वक्ष्यामि सादरं ॥२३॥ कीर्तन श्रवणेनापि पापभेदी निशंकरि ॥ स्वर्गापवर्गदान्याशु नृभिः संकीर्तितान्यपि ॥२४॥ पूर्वतो मम कैलासे नानालिंगाकुलेष्वपि ॥ तथैवोत्तरे दक्षिणे चापि पश्चादपि शुभानने ॥२५॥ तदुत्तरेपि देवेशि नाना ज्योतिर्मयानि च ॥ नशक्यं वर्णितुं देवि देवैः शेषेण भामिनि ॥२६॥ कल्पायुतैरपि शिवे तल्लिंगम हिमानुर्विं ॥ नशक्यं विस्तराद्वक्तुं तन्नामानि

 शृणु प्रिये ॥२७॥ पंचाशदुत्तरे देवि शतद्वयमितं दिशि ॥ ज्ञयितानि महादेवि अपारे ष्वपि सादरं ॥२८॥ कैलासा

पुरशिखरगर्भधामो रुमो लिंगं ॥कुंभमंडलमानाकं लिहल्लिंगं च संस्थितं ॥२९॥ सुधाच्छ स्फटिकवरकल्पितं
योजनोच्छ्रितं ॥ शरच्चंद्राच्छ धवलं प्रभामंडलमंडितं ॥३०॥ रत्नगर्भगृहांतस्थं सुरम्यमणिवेदिकं ॥ मणिप्रभा
ततं रम्यं नील पीठा(ता)रुणप्रभं ॥३१॥ प्रवालपुष्परागादि गोमेदक विडूरकैः ॥ पीठोज्वलं प्रभाकांतं शुद्धस्फटि(लिंग)
कमप्युमे ॥३२॥ चर्चितं चंदनाद्यैस्तु अर्चितं बिल्वपल्लवैः ॥ मंदारकुंदमालाभिरिंदुखंडैकभूषणं ॥३३॥
भुजंगमणि संछन्नं मणिदीपप्रभोज्वलं ॥ दिव्यागरुमहाधूपैर्धूपितं गंधमोदितं ॥३४॥ हरिसार त्रिपुंड्र
(कस्तूरी तिलकांचितम्) कं पद्मरागाच्छ तिलकं ॥ महाकैलासशृंगाग्रसौधशेखरशोभितं ॥३५॥ मणिकुंभोद्यतापारलसत्कांतिततं
वरं ॥ पश्य लिंगकुलं भद्रे मद्दं दर्शनेन च ॥३६॥ तत्सौधकुंभधाराग्र दर्शनेनापि मुक्तयः ॥ प्राप्नुवंति सुरादे
वि नराः श्रवणमात्रतः ॥३७॥ प्रणामं कुरु देवेशि शृणुष्वावहिताभव ॥ लिंगानां नामधेयानि वेदांतोक्तानि शैलजे ॥
॥३८॥ भाति लिंगकुलं भद्रे(मु) त्वं कुरु मिवोच्यतं ॥ पुण्यप्रदं श्रवणतः दर्शनान्मुक्त एव सः ॥३९॥ भूलोके चैव पाताले
स्वर्गे वै सत्यलोकके ॥ नैतादृशानि लिंगानि किं पुनर्भारते भुवि ॥४०॥ भूलोके लिंगादुत्कृष्टं लिंगं पाताललोकगं ॥

पातालात्स्वर्गलोकस्थं ततो विष्णुर्विधीन्द्रगं ॥४१॥ आद्यं मंगलदं देवि केलासेश्वर संज्ञकं ॥ यन्न वेदैर
पि ज्ञातं वेदांते रखिलैरपि ॥४२॥ अत्रैवांते लयं यांति ब्रह्मा विष्णु महेश्वराः ॥ लयनात्सर्व जगतां लिंगमि
त्युच्यते शिवे ॥४३॥ ममैव निर्गुणं साक्षाद्रूपमेतन्महेश्वरि ॥ अस्यैव भासा सर्वेपि भांति लोकाश्चतुर्दश
॥४४॥ अस्यैव चेतना त्सर्वं जगच्चेतयति प्रिये ॥ अस्यैवानंद लेशेन सर्वं प्रियमिवास्थितं ॥४५॥ लिंगमे
तद्धि मधाम सोमधाम प्रभाधिकं ॥ एतद्धि ब्रह्मवेदं शिममैव परमप्रियं ॥४६॥ यतो वाचो निवर्त्तंते अप्राप्यम
नसा सह ॥ स्वच्छ स्फटिकसंशुद्ध माकाशात्मक मुत्तमं ॥४७॥ यतो भूतानि जातानि यत्र संस्थानि सर्व
दा ॥ यत्रैवांते लयं यांति तल्लिंगमिदमद्रिजे ॥४८॥ यतो ब्रह्मेश विष्ण्वींद्राः संप्रजातान गात्मजे ॥ यत्स
त्यं ज्ञान मानंदं ब्रह्म वेदं सनातनं ॥४९॥ सूक्ष्मात्सूक्ष्मतरं साक्षान्नैव स्थूलं न चाणुकं ॥ सर्वेंद्रिय विनि
र्मुक्तं सर्वधर्मविवर्जितं ॥५०॥ अगंधमरसस्पर्शं तत्तद्गंधरसाश्रयं ॥ तदेदं चक्षुषां चक्षुः सर्वप्राणमयं सदा
॥५१॥ सर्वेंद्रियगुणातीतं भूतेषु वितितं सदा ॥ सदा ह्यशीर्णं शीर्णेषु नात्र नानास्ति किंचन ॥५२॥ योस्मि
न्संपूजिते ज्ञाते ध्याते स्वात्मनि शैलजे ॥ लिंगी लिंगाति गो भाति तदिदं लिंगमुत्तमं ॥५३॥ नामरूपा

142

तिगंभाति कैलासेश्वर सन्निरतं ॥ तन्नामानि शृणुष्वार्ये सादरं कमलानने ॥५४॥ बिल्वोरु सुंदरवनच्छ

दिताच्छ शाखासंछिन्न भूतल मुमे मम शैल पालिः ॥५५॥ सत्फुल्ल पुष्पज पचेलिम गंध बंध संदोह गंधवह जात फलं ममेष्टं ॥ उत्फुल्ल पंकज पराग जधूलिपालि रुद्दाम केलि रभियासित सीतवातः ॥५६॥ पुष्णाति गात्र वरमंबिकयास मेतं कैलासशैल सरसी रुह पालि लग्नः ॥ रत्न सालकुल मूलग सौधपुंजा जालपरि सर्पि सुधाब्धौ ॥५७॥ अंडजावि वशिवीरमणी योत्रीडते दिव सनाथ जतापेः ॥त्वमेवु काकिनी सौध जाले स्मदीये विशिष्टासि कांत्या तवाब्जाननेंदुः ॥५८॥ नचैवोप मीते मनाक् शैल कन्ये सदोषा करो नैवते सोमधाम ॥ कैलासाचल मौलि पालि विलसल्लिगानि तुंगानि मे व्याली मौलि जपालि कालि विलसत्पुष्पोत्थ धूली भरैः ॥ कैलो भिर्नग कुंजरोश्रमद जै धौरा भरैः श्राम्य रुध फली कदंब जरजः पुंजालि कालानिच ॥६०॥ इति श्री शिवरहस्ये प्रथमे माहेश्वरांशे कैलास शैल लिंग महिमा नाम एकोनच त्वारिंशोऽध्यायः ॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥श्री ईश्वर उवाच ॥ श्री कैलासेश्वरो देविभू तेशश्चांबिकेश्वरः ॥ सूतेश्वरो गणेशेशः स्कंदेशस्तारकेश्वरः ॥१॥ ॥गंगेश्वरो नंदिकेशो भृंगीशो बाणकेश्वरः ॥

x १०३ - ~~कुक्कुटेश्वर~~ "कलशेशो देविकेशः पञ्चेशो मगधेश्वरः।।"

चंडीश्वरो मुंजिकेशः रत्नेशो गंधकेश्वरः ।।२।। गर्भेश्वरो यवीरेशः ज्येष्ठेशः कुसुमेश्वरः ।। वीरभद्रेश्वरो देवि कंतुकेशः फणीश्वरः ।। सुधेश्वरो गभस्तीशः रुद्रेशो भैरवेश्वरः ।। करवीरेश्वरश्चैव निषधेशो वटेश्वरः ।।४।। कद्रुपेशः काश्यपेशः आर्यकेशो घृणीश्वरः ।।५।। तुंडेशश्च तुहुंडेशो सोरेशो वरुणेश्वरः ।। वरुणेशो वेधुतेशो मोक्षेशो दंडकेश्वरः ।।६।। मंडलीशः कुंडलीशः खंडेशो भांडलीश्वरः ।। गंडेशो गरुडेशश्च चंद्रेशो मारुतेश्वरः ।।७।। विधीश्वरो सुधीशश्च तुंडकेशो मुनीश्वरः ।। उमेश्वरो कपर्दीशो भद्रकर्णेश्वरस्तथा ।।८।। वेगेश्वरो थविष्णवीशो वैराजेशो महेश्वरः ।। अहिर्बुध्नेश्वरश्चैव जमदग्नीश्वरस्तथा ।।९।। विश्वामित्रेश्वरश्चैव रावणेशो बलीश्वरः ।। मनोन्मनीश्वरश्चैव सुधाधामेश्वरो द्विजे ।।१०।। मार्तंडेशो ललंतीशः स्वर्लीनेशो ध्रुवेश्वरः ।। गंधर्वेशोतिविश्वेशः पारिभद्रेश्वरस्तथा ।।११।। गर्भेशो मरुधन्वीशस्तोरणेशो धृतीश्वरः ।। उत्पलेशो महेंद्रेशः स्थाण्वेशो भरितेश्वरः ।।१२।। अनंतेशः कर्दमेशो मृडेशो बभ्रुकेश्वरः ।। वागुरेशो वर्मकेशः पद्मेश्वरस्तथा ।।१३।। आम्रेशो मृगेंद्रेशो हिरण्येशः पक्षीश्वरः ।। आग्नीध्रेशः सन्नतीशो बृहतीशो रणेश्वरः ।।१४।। किरातेशो गजेकेशो वेणुधारेश्वरस्तथा ।। जयंतेशो मध्यमेशः संगमेशो गतीश्वरः ।।१५।।

५ पंक्ति ८ "विरागेशः कृथनेशो धनेश्वरः ॥ उरगेशः कठोरेशो दर्दुरेशो वर्बरीश्वरः ॥ क्षिप्रेश्वरश्च शल्येशो ॥ शारी श्वरः ॥ ककुदेशः"
(दर्दुरः सर्वरीश्वरः)

शिवरः ॥ विघ्नकूर्मेश्वरो देवि त्रिपुरेशो हरीश्वरः ॥ बलप्रमथनेशश्च सर्वभूतदमेश्वरः ॥१६॥ उशीनरेश्वरश्चैव गर्गेशो मंत्रकेश्वरः ॥ तंत्रेश्वरः सामकेशो व्योमकेशो दिप्तीश्वरः ॥ १७॥ कपालमोचनेशानो मणिगर्भेश्वरस्तथा ॥ जातूकर्णेश्वरश्चैव नृगेशः पाटलेश्वरः ॥१८॥ कर्णिकेशश्छत्रकेशः पिंगलेशः शिलेश्वरः ॥ मध्वीश्वरो वामकेशो यौवनेशः स्थिरेश्वरः ॥१९॥ भ्रांतीश्वरो जन्हुकेशो गोमदेशोऽखिलेश्वरः ॥ विशालेशः सिंहकेशो घंटाकर्णेश्वरो द्विजे ॥२०॥ व्याघ्रेशो जंबुकेशश्च ललितेशो द्रुतीश्वरः ॥ वेदेश्वरो डिंडिकेशो कोहलेशो ध्वनीश्वरः ॥२१॥ बिंदुकेशो गंडकीशो नर्मदेशोऽनिलेश्वरः ॥ पिचंडिलीश्वरोऽत्रीशः कनकेशोऽध्वरेश्वरः ॥२२॥ सद्योजातेश्वरश्चैव कुलिशेशः प्लवेश्वरः ॥ सोमेश्वरो वारणेशः शरभेशो जटेश्वरः ॥ २३॥ भागकारेश्वरो मुग्धकेशो रागेश्वरस्तथा ॥ मल्लुकेशो मुकुंदेशो भवानीशः शनीश्वरः ॥२४॥ वृषभेशो धेनुकेशः संवर्त्तेशः कणेश्वरः ॥ अदेश्वरश्च चंद्रेशो मत्स्येशो भानुनेश्वरः ॥२५॥ तुरंगेशो मतंगेशः कणादेशो भगीश्वरः ॥ जलंधरेश्वरश्चैव श्वेताश्वेरोपकेश्वरः ॥ २६॥ रैभ्येशो मुचकुंदेशः कंकणेशः प्रथेश्वरः ॥ विद्याधरेशो नीलेशः कर्दीवेशः प्रभेश्वरः ॥२७॥ महत्तेशश्च कुंतीशः

माहेश्व. अ. ५०

२०९

स्वर्गो शो मलयेश्वरः ॥ मंकणे शो जागती शो विबुधेशो गिरिश्वरः ॥२८॥ चर्वणे शो निघूर्णे शो गोर क्षो नाजकेश्वरः ॥ कंदर्पेशः सूर्यकेशः पुष्टे शस्तुष्ट केश्वरः ॥२९॥ विनायकेश्वरश्चैव मणिकंठे श्वरस्तथा ॥ रंध्रेशः पार्वती शश्च विद्रुमे शोल्लतेश्वरः ॥३०॥ विरंचेशो गर्भे केशः सन्त्रे शो विश्वकेश्वरः ॥ भारभूतेश्व रश्चैव लोकेशः प्राणिकेश्वरः ॥३१॥ अंधकेशो मुक्तिकेशो हरिकेशो ऋषीश्वरः ॥ ३२॥ गारुडेशः पतंगेशो कंन्ये शो धवलेश्वरः ॥ जातुकर्णे श्वरश्चैव गंधमदेश्वरस्तथा ॥३३॥ चक्रेश्वरो रुणे शश्च अदालभेशोव केश्वरः ॥ त्र्यंबकेश्वरश्चैव गौतमेशः खलेश्वरः ॥३४॥ वितंडे शः कंठेशश्च वराहेशः कुलेश्वरः ॥ केदारे शः फलेशश्च किंन्नरे शोमृतेश्वरः ॥३५॥ कैलासशैलामलमौलिवर्य प्रागादिलिंगालयकल्पनं शिवे ॥ ईशानकोणानलकोण संस्थितं कैलास ईसाद्धमृतेश्वरांतं ॥३६॥ प्रोद्यत्स्पताकावलि मौलिकुंभम णींद्धामस्य सुलिंगमंडलं ॥ बिल्वोत्तमांगं फणि भूषणांचितं त्रिपुंड्रसंशोभित फालदेशं ॥३७॥ पश्या द्रिजे लिंगकुलं ममेदं संदर्शनात्पापहरं सदैव ॥ ॥ इति श्री शिवरहस्ये प्रथमे माहेश्वरी शे कैला सप्राकारवर्णनं नाम चत्वारिंशोध्यायः ॥५०॥ ॥ श्री काशीविश्वेश्वरार्पणमस्तु ॥ ॥ईश्वरउवाच॥

शिवरहस्ये एवं लिंगाकुले भद्रे प्राक् कैलासशिखाश्रयं ॥ तथैव दक्षिणे चापि प्रवक्ष्ये शृणु शैलजे ॥१॥ अघोरेशो

थपालेशः कुकुरेशो नलेश्वरः ॥ इंद्रेश्वरो यमेशश्च नैर्ऋतो शोनभेश्वरः ॥२॥ उदावर्तीश्वरश्चैव द

क्षिणावर्तिकेश्वरः ॥ विकुंठेशः कुठारेशो मानवेशः कुलेश्वरः ॥३॥ जापकेशो मौलिकेशः अर्जुनेशः

कनीश्वरः ॥ भगदत्तेश्वरश्चैव नहुषेशो भूतीश्वरः ॥४॥ तंगणेशश्च संधीशो मध्यमेशो गलेश्वरः ॥

विघ्नेश्वरः पंनगेशः ऋथनेशो निशेश्वरः ॥५॥ दिवोदासेश्व रो राधी, रथेशः शौनकेश्वरः ॥ गणभद्रेश्वर

श्चैव शेषेशो वासुकीश्वरः ॥६॥ शंखपालेश्वरश्चैव चित्रगुप्तेश्वरस्तथा ॥ दंडपाणीश्वरश्चैव दुर्गेशः स्वा

मीश्वरः ॥७॥ हंसेश्वरो मयूरेशः चक्रवाकेश्वरस्तथा ॥ मंथानेशो मन्मथेशो रतीशो गंधकेश्वरः ॥८॥

भांडीरीशो वनेशश्च पुरंध्रीशः फलेश्वरः ॥ श्रमणेशस्तारणेशः कृत्तिवासेश्वरस्तथा ॥९॥ जनार्दनेशो

विश्वेशो महाकालेश्वरस्तथा ॥ सरस्वतीशो लक्ष्मीशः शचीशः शक्रकेश्वरः ॥१०॥ पुलहेशः पुलस्त्येशो

वृत्यकालेश्वरस्तथा ॥ भरद्वाजेश्वरश्चैव सागरेशो महेश्वरः ॥११॥ विलेखलेश्वरश्चैव चित्रेशः पादकेश्व

रः ॥ पिंडारेशो वसीशश्च तिलकेशो घृवेश्वरः ॥१२॥ बभ्रेश्वरो र्णवेशश्च क्षमाभृणीशो दलेश्वरः ॥ कांधमे

१ अभ्रेश्वरो, भवेश्वरो

शः कृष्णेशः रमेशः पूर्णकेश्वरः ॥१३॥ गंगाधरेशो मौनेशो कुम्भेश्वरस्तथा ॥ कंदलेशश्च मालेशस्ता
लेशो बिल्वकेश्वरः ॥१४॥ अप्सरेशो मोदकेशो मूषारेशः पथेश्वरः ॥ विराधेशः कोंकणेशः रमसेशः स्थले
श्वरः ॥१५॥ हरिद्रेशः कुंकुमेशो नरकोत्तारणेश्वरः ॥ मुखेश्वरो ज्ञानकेशो भक्तीशो मुक्तिकेश्वरः ॥१६॥
ऋणमोचनेशः कांतीशो धर्मेशः पावनेश्वरः ॥१७॥ पवनेशः कुंजरेशो गोकर्णेशो वटेश्वरः ॥ वटीश्वरः
शालिकेशो वीतिहोत्रेश्वरस्तथा ॥१८॥ विश्वेश्वरश्च भीमेशो शंकरेशोऽमितेश्वरः ॥ पारिजातेश्वरश्चै
व मंदारेशो जेटेश्वरः ॥ त्रिजटेशः शिखंडीशो वह्नीशः फनसेश्वरः ॥ प्रणाम णीश्वरो देविरामेशो ल
क्ष्मणेश्वरः ॥२०॥ अरुंधतीशो वागीशः पद्मगर्भेश्वरस्तथा ॥ हिरन्मणीशो भद्रेशः कुशलीशस्त्रिश्व
रः ॥२१॥ उद्दालकेश्वरो नन्दूचोरेशोऽपर्णकेश्वरः ॥ शांडिल्येशः छागलेशः निरिंद्रेशः कुशेश्वरः ॥२२॥
दूर्वेश्वरो निमित्रेशः कर्कधेशो द्रुणेश्वरः ॥ कुरुविंदेश्वरश्चैव पट्टीशः कुटजेश्वरः ॥२३॥ श्रीशैलेशो
गणेशश्च हरिद्वारेश्वरस्तथा ॥ गंगाद्वारेश्चैव कुरुक्षेत्रेश्वरस्तथा ॥२४॥ सुरापाडेश्वरश्चैव ययाती
शः कुथेश्वरः ॥ वाराणशीश्वरश्चैव अविमुक्तेश्वरस्तथा ॥२५॥ कालहस्तीश्वरश्चैव विष्णुचक्रप्रदेश्वरः ॥

जनकं मम भक्त्या ॥ युक्तियुक्त गुरु सूक्ति सुधा घेरू ल माघ मनघं सततं च ॥५५॥ लभ्यते किल पचेलिम पुण्यैः कस्यचिन्मम कृपा वशतो हि ॥ बंधहृत्दृदयभेदक सुराः अन्यथास्य न पथा न च कर्मणा ॥५६॥ इति श्री शिवरहस्ये प्रथम माहेश्वरांशे सुरोपदेशो नाम पंचाशोध्यायः ॥५०॥ श्री काशी विश्वेश्वरार्पण मस्तु ॥ ॥ ईश्वर उवाच ॥ विभूतीर्मे मवक्ष्यामि शृणुध्वं तु सुरपुंगवा ॥ यज्ज्ञात्वा न पुनर्ज्ञेयं विद्यते सुरसत्तमाः ॥ अहमेको किलाधारः अहं विश्वप्रवर्त्तकः ॥ अहं विविश्व मिदं सर्वं मय्येवांते विशत्यपि ॥२॥ अहं धाता विधाता च मत्तोन्यो नास्ति कश्चन ॥ सृजामीदं ग्रसामीदं भरामीदं सुरोत्तमाः ॥ यथोर्णनाभिः सूत्रांश्च ग्रसति सृजतीत्यपि ॥ तथैवेदं जगज्ज्ञात्वं भवद्भिः सहसत्तमाः ॥४॥ कालात्माहं ब्रह्मदत्र मोदनं मृत्यु पाशदं ॥ अहं जीवं प्रविश्यैव सर्वभूतेषु संस्थितः ॥५॥ सर्वभूतेषु भूतांतर्गुहायां समवस्थितः ॥ सर्वेंद्रियगुणातीतः सर्वेंद्रिय विवर्जितः ॥६॥ मदाधारा इमे लोका लोक्या यूयं सुरासुराः ॥ तपने तापकश्चाहं चंद्रमा हं प्रसादकः ॥७॥ अनिलेचलन श्चाहं ज्वलने ऊष्मको प्यहं ॥ इंद्रेयमे प्रतापोहं लक्ष्मीश्चाधनाधिपे ॥८॥ अशिवनेपि च भैषज्यं मरुतामतरः सदा ॥ विश्वेषां हृदयं

-चाहं वसूनां हुतः सदा ॥९॥ असुराणां सुराणां च संपदा सम वस्थितः ॥ तमसा सात्विकेनैव मुनीनां रजसासुराः ॥१०॥ गुण त्रयोहं विबुधाः गुण हीनोस्मि केवलः ॥ अहं हि निर्गुणः साक्षात्तमः पारप्रतिष्ठितः ॥११॥ अपांरसस्तथैवाहं ज्योतिषां ज्योतिरस्म्यहं ॥ भूताकाशे चेतयिता व्यापकः शब्दगोस्म्यहं ॥ ॥१२॥ पृथिव्यां च तथा गंधो गुणो देवाः सदास्थितः ॥ वायुश्चाहं तथा देवा एषां संधा विसृष्टयः ॥१३॥ चराचरमिदं प्रोक्तं जगत्स्थावरजंगमं ॥ एतेषामानुलोम्येन सृष्टयः स्युः प्रवर्तिताः ॥१४॥ एतेषां प्रतिलोम्येन स्थितौ प्रलय सौस्थिता ॥ एतेषां कार्यकर्त्ता नैव किंचिदहं सुराः ॥१५॥ निर्लिप्तानेव लोपोमे किं तु साक्षी सनातनः ॥ मत्सन्निधानतो देवेह जगन्नैव प्रेरा चेत ॥ अयस्कांतमणेर्यद्वत्सं निधौ लोह सूचयः ॥ चेष्टंति विविधं देवास्तथैवेदं जगद्गतं ॥१७॥ संनिधौ चेष्टते मह्यं सर्वे क्रोडनकाममम ॥ मम रूपपरिज्ञानं भवतामति दुर्लभं ॥१८॥ षड्डूर्मि रहितश्चाहं पंचकृत्य विवर्जितः ॥ ब्रह्माप्यहं सृजामीदं रजसा केवलं जगत् ॥१९॥ विष्णुः पालयिता हं सात्विकं गुणमास्थितः ॥ रुद्रो भूत्वा संहरामि तामसैश्चराचरं ॥२०॥ सदाशिवोहं देवेशाः अनुग्रह करोम्यहं ॥ मन्माया मोहितं चैतत्करोमीश्वर-

शिवरह॰ १ रूपधृक् ॥२१॥ पंचकृत्यपरश्चाहं पंचकोशगतोऽस्म्यहं ॥ पंचप्राणविहीनोऽहं पंचभूतैकवर्तनः॥ माहेश्व॰ ७प्र॰५१

१३२ ॥२२॥ इयं मम परा शक्तिर्विक्षेपावरणात्मिका ॥ यया संमोहिता यूयं जगत्सासुरमानुषं ॥२३॥ स्वधास्तुग-
छत्सुरेंद्राश्च परा शक्तिरियं मम ॥ सृष्टौ स्थितौ तथा नाशे कारणं त्वियमेव हि ॥२४॥ ममैव शक्तिः

एनां प्रणमत क्षिप्रमेतस्याः कृपया सुराः॥

परमा विचित्रज्ञानदायिनी ॥ मत्प्रसादादावरणशक्तिनाशः प्रजायते ॥२५॥ यावत्कर्मविपाको हि
देहिनां भवतां सुराः॥ विक्षेपाख्या च सा शक्तिरनुवर्तेत सत्तमाः ॥२६॥ ममैवांशो जीव एव स्वाज्ञाना-
त्परिजृंभते ॥ नानायोनिशरीरेषु प्रशीर्णो दुःखभागभुक् ॥२७॥ एवं द्विधा देहगेहे वृक्षे पक्षिवदा-
स्थितौ ॥ एकः कर्मात्मकं भुंक्ते फलं वै सुखदुःखयोः ॥२८॥ तथान्यः साक्षिवद्भाति द्वा सुपर्णेति मंत्रतः॥
अत्रैव संसरत्येषः स्वाविद्यातो दिवौकसः ॥२९॥ स्वविद्यया मुच्यते च तपसा केवलेन हि ॥ अहं-
मानतयापन्नः फलभुक् सुखदुःखयोः ॥३०॥ स्वर्गे च नरके चैव सदा वै संप्रवर्तते ॥ मज्ज्ञानान्मुक्ति-
माप्नोति नान्यथा कर्मकोटिभिः॥ जीवोपतंम्रियत्येतन्न जीवो म्रियते सुराः॥ षडूर्मिरहितश्चाहं- १३२
सर्वदेहेषु सत्तमाः ॥३२॥ षट्कौशिक(कोशक)मिदं देहं प्रविश्याखिलभासकः॥ षड्वर्गैरिंद्रियार्थैश्च कामया-

120

-मिचराचरं ॥३३॥ सत्यकामश्च संकल्पः सर्वे लोकान्सृजाम्यहं ॥ संकल्पात्पितरो देवा उपतिष्ठ-
ति मामिह ॥३४॥ न मे शोकोस्ति मोहोस्ति जिघत्सा च पिपासका ॥ अशरीरः शरीरेषु अनवस्थेष्वव-
स्थितः ॥३५॥ महांश्चाहं विभुश्चाहं आत्मा शौर्योहं वीहि ॥ अवस्थात्रय दूरोहं असंगः पुरुषस्त्वहं
॥३६॥ सर्वोकाशः सर्वभासः सर्वो वासोहमीश्वरः ॥ यो मां वेद स वेदेदं यो माम ज्ञानमोहितः ॥३७॥ प-
रादासपरादेहं ज्ञात्वा नंदं विभेति न ॥ शांतिं परां गच्छति च जनकामी भवति स्थिरः ॥३८॥ ब्रह्म मां वेद स
ब्रह्म भवत्येव सुरासुराः ॥ अस्मि ब्रह्मेति मां वेद तस्याहं मोचकोस्मि च ॥३९॥ नांतःप्रज्ञो न च बाह्यः,
प्रज्ञानं ब्रह्म चाप्यहं ॥ एषोंतर्यामी च सदा अमृतो मर्त्यरूपतः ॥४०॥ अहमेव सदा ब्रह्म सोहं साक्षा-
दिवीजितः ॥ अयमात्मा सदा ब्रह्म देशकालेः स्ततोप्यहं ॥४१॥ तत्त्वमेतत्सर्वमसौ त्यादि वाक्येष्वस्म
तः ॥४१॥ अहं वाक्येषु सर्वेषु अहमेवास्मि भासकः ॥४२॥ आनंदं परमं ज्ञात्वा तरत्येव भवार्णवं ॥ उ-
पास्य मामभिज्ञात्वा शोकमोहौ जहाति च ॥४३॥ यूयं मामेव जानीथ अन्यत्सर्वं मृषैवहि ॥ सत्यज्ञान-
मनंतोहमतस्त्वात्सत्यता जगत् ॥४४॥ मत्सत्तयैवहि जडं चेतते विविधं जगत् ॥ महानंदांबुधिः सर्वे-

शिवरह-शीकरं जगदेवोहं ॥४५॥ रसोऽहं सर्वभूतेषु रसतां जानते तु ये ॥ रसास्ते नंदमात्रांच जीवंत्येव सुराः सदा॥ माहेश्व. ५५.५१
१३६ ४६॥ कोवान्यः प्राणिति सदा सदाकाशं विना सुराः॥ नतत्र गच्छति मनो नवाग्गच्छति चेंद्रियं॥४७॥ पर-
मात्माहमेवाद्य सएवाद्य सउच्यते॥ असंगस्त्वरसस्पर्शः अघ्राणो गंध एवोहं॥४८॥ अपाणिपादकायो
दिः पायूपस्थादि वर्जितः॥ प्रमाप्रमेयरहितः तर्कदूरो महेश्वरः॥४९॥ अहं जानामि सर्वं हि न मां जाना-
ति कश्चन॥ परांचि खानि सृणव तस्मान्मां च न पश्यति॥५०॥ मत्प्रसादयुतः कश्चिज्ज्ञानात्येवोहमा-
नवाः॥ द्रष्टाहं दृश्यरहितो दर्शनं चाहमेवोहं॥ षोडशोहं सुरश्रेष्ठाः श्रोता घ्राताहमेवोहं॥ बुद्धेर्बो-
द्धा मनश्चापि प्राण प्राणोहमीश्वरः॥ सर्वा एव कर्ता देहे इंद्रियाण्यहमेवोहं॥ सर्वो मय्ये वलीयंते
नाहं तेषु व्यवस्थितः॥५३॥ एक एवाहमद्वैतश्च तुर्यः शिव एवोहं॥ मज्जं मल्लं च मदनं जगद्वै तं सुरा-
सुराः॥५४॥ भूमाहं परमानंदो मां न जानाति कश्चन॥ एकोहं भुवने जडा जडगीतः स्वैरं हि नाना जगत्॥
नास्त्येव प्रतिभाति किं यदपि वैतन्मार्गतृष्णोपमं॥ तेनाद्वीनभवेत्तमासुरगणा नास्त्येव किंचि जगत्सर्वं-
शंभुतया विभाति सकलं कस्यस्विदेतत्सुराः॥५५॥ इति श्रीशिवरहस्ये षष्ठे माहेश्वरांशे श्रुतिसारनिरूपणं नाम-
एकपंचाशोध्यायः॥५१॥ श्रीकाशीविश्वेश्वरार्पणमस्तु॥
१३६

१ कनिष्ठोहं

॥ ॥ईश्वर उवाच ॥ सोहं नित्याप्यनित्यश्च ब्रह्माब्रह्मा हमेवोह ॥ प्रांचोहं चैव पश्चाच्च दीक्षणो चाहमेव-
वोह ॥१॥ अधश्चोर्ध्व महं लोका दिशश्च विदिशोप्यहं ॥ पुमान्न पुंसकश्चाहं स्त्री चाहं सर्वदेवताः
॥२॥ नैव स्त्री न पुमांश्चाहं नैव चाहं सनातनः ॥ अशरीरः शरीरेषु अशीर्णः शीर्यकेष्वहं ॥३॥ ज्योतिषा-
महमेवास्मि आत्मज्योतिः सदाव्ययः ॥ अनलानिलसूर्येंदुभूतानामन्तरास्म्यहं ॥४॥ मां न जानंति मु-
नीने भूतादिश्चामेहमेवोहि ॥ छंद सामहमेवादिः गार्हपत्योहमेवोहि ॥५॥ दीक्षणाग्न्याहवनीमः सभ्यो-
हं गौरहं सुराः ॥ गौर्यहं च वरिष्ठोहं सनातनः ॥६॥ ऋग्यजुःसामाथर्वाणि मद्गिरोहि सुरेश्वराः ॥ अद्र-
राहं दरीहं च गुह्योहं पुष्करं तथा ॥७॥ अणोरणीयोऽस्मि सुराम हतोहं महांस्तथा ॥ विश्वतश्च सुरेभ्यो-
हं विश्वतोबाहुरीश्वरः ॥८॥ विश्वमोलि र्विश्वपादः सहस्राक्षः सहस्रपात ॥ दशांगुलमिदं सर्व-
मत्यतिष्ठामि भो सुराः ॥९॥ अमृतस्याहमीशानः सर्वेषु पुरुषोत्तरः ॥ व्यपोह्य शीर्षकापालं सर्वेषां संस्थि-
तोस्म्यहं ॥१०॥ एषोत्तराहं पुरुषो हिरण्यश्मश्रुरेवोहि ॥ मनसोहं जवीयांश्च मया वास्यमिदं जगत ॥११॥
मध्ये वलीयते चांते मत्तोन्यन्नास्ति किंचन ॥ अप्राणोस्म्यमनाः शुभ्रो निर्गतांद्वो हमेवोह ॥१२॥

 ॥ नप्रज्ञोहं नचाप्रज्ञो भूतो भप्रज्ञ एवहि ॥ अहं भूतेषु सुप्तेषु जागर्मि सततं सुराः ॥ १३ ॥ अहमव्यक्त-
 एवेशो व्यक्तो भूतहृदि स्थितः ॥ स्थाणुर्निर्गुण एवास्मि कार्यकारण वर्जितः ॥ १४ ॥ द्वराद्वरागोदर्शहितः
परमात्माहमेवेह ॥ अहं च न दिवा रात्रिर्नसन्नासत्सदा शिवः ॥ १५ ॥ आकाश कोशं संवेष्टुं सुकरं यदि
जायते ॥ तदा मां त्वनविज्ञाय दुःखस्यांतो भविष्यति ॥ १६ ॥ वेदैः सर्वैश्च वेद्योहं वेदांतेष्वहमास्थितः
स्वेमहिम्न्यहमेवैक अहमोपनिषत्परः ॥ १७ ॥ वेदादिस्वर एवाहं प्रणवोहं सनातनः ॥ प्रणवादि त्रिमा-
त्रोऽहं सर्वमंत्रात्मकस्त्वहं ॥ १८ ॥ पंचाद्वरमयश्चाहं पंचपातक वर्जितः ॥ नासंगो नैव मे संगोऽप्यहं-
भुवनमेवहि ॥ १९ ॥ विश्वातीतो विश्वधामा विश्वाधिक उमापतिः ॥ भवंतः पशवः सर्वे भवतां पति-
रस्म्यहं ॥ २० ॥ मत्प्रसादाद्भवंतो हि मुक्ता येयत ताधुना ॥ मज्ज्ञानं वेदवाक्येभ्यस्त्वमन्यच्छि त्वं सुरोत्तमाः
॥ २१ ॥ ब्रह्मैवाहं संसारामि विद्ययाविद्यया सुराः ॥ निर्मुक्तो मोचयाम्येव सर्वं सासुरमानुषं ॥ २२ ॥ श्र-
वणायापि लभ्योऽहं कर्मभिर्न सुरासुराः ॥ शृण्वंतोपि यतिश्रेष्ठाः नमां विंदंति केचन ॥ २३ ॥ अतोऽन्य-
दर्तं विबुधाः सर्वे जगदिदं ध्रुवं ॥ कथं भवंतो मन्यंते तद्भवं तु ममाग्रतः ॥ २४ ॥ विभूतिर्मम या प्रोक्ता-

-अत्यपावेदन्यथा ॥ नाविश्वस्तचेतसे देयं ज्ञानं वेदांतवाक्यजं ॥२५॥ दत्वा नरकमाप्नोति सह पूर्वे-
पितामहैः ॥ सर्वोपनिषदां सारं मयैतत्समुदाहृतं ॥२६॥ भवद्भ्यः सम्यगद्युना हृदयग्रंथिभेदनं ॥ नाशि-
ष्यायाप्यभक्ताय नापुत्राय ददेमपि हि ॥२७॥ नद्यादेतदछांभवेद्यो योतभ्यः सुरसत्तमाः ॥ देयमेतत्सुरश्रेष्ठा-
स्तस्य मुक्तिरयत्नतः ॥२८॥ मत्प्रसादेन सर्वेषां मुक्तयस्युः करे स्थिताः ॥ शिरोव्रतं यैश्चीर्णं देयं तेषा-
मिदं सुराः ॥२९॥ शिरोव्रतमिदं देवाः पुरा चीर्णं मयैव हि ॥ अग्निरित्यादिभिर्भस्म गृहीत्वांगानि संस्पृ-
शेत् ॥३०॥ व्रतमेतदिदं देवाः पशुपाशविमोचनं ॥ अत्ययातपसा देवाः मम लिंगार्चने नहि ॥३१॥ भस्म-
त्रिपुंड्रकंठे (कूंटे) श्च पापात्मा नो भवेन्नरः ॥ पंचाक्षरावर्तनैश्च पंचपापप्रणाशनं ॥३२॥ रुद्रं ध्याय जपे-
श्चैव बिल्वमूले विशेषतः ॥ मम क्षेत्रेषु नियतं वासश्च सुरसत्तमाः ॥३३॥ अविमुक्ते निवासश्च तत्रैवांते तनुत्य-
जात् ॥ उमासहाय मन्मूर्ति ध्यानेनैव सुरास्तथा ॥३४॥ एतदेव परं ज्ञानं लभ्यते मत्प्रसादतः ॥ नान्यथा लभ्य-
ते ज्ञानं कर्मोपासनतः सुराः ॥३५॥ इदमखिलरहस्यं वेदजालोत्थसारं कथितमिदमशेषाज्ञाननाशैकहेतुं ॥
हृदि सदय मदीयं भेदनं ज्ञानमाद्यं । जगति नहि विधेयं मूढमर्त्येषु देवाः ॥३६॥ भवशत जनिनाशं मोक्षमार्गप्रदीप-॥

शिवरह० १ -मोपि दुरितशतोत्थैः पापतापैर्विहीनः ॥ ममहि वरद पूजा ध्यानतः प्राप्य मेवं गुरु जन वर बोधैः वेद वाक्यै र्दुरापं ॥ माहेश्व-

२ श्रीः ॥३६॥ किं वीर्यं भवतां सुरा हरि हरोप प्रासनः से ऽर्काः सूर्येंदू ह्यनिला नलाश्च महतो विश्वे विभूते मे ॥ वस्वा- प्र०५१

१२७ दित्य गणाश्च भूमरुद्गणा यूयं कुबेरादयस्तत्पश्यामि बलाबलं मम पुरः संदर्शयंत्वादरात् ॥३८॥ स्कंद उवाच ॥

सीर्षीकृताः इत्युक्त्वा स्थित दिशेश्वरा हरि हराः श्रुत्वा वचः शांकरं देवाग्रेमि हि मानमुत्तममहो प्राक् त्स्य सीर्षु कृताः ॥ गर्वोरी-

कृतमान साः सुरगणाः प्रोचुर्हि नत्वा शिवं स्वं स्वं कार्य मथाधि पत्य जनकं शृण्वं तु तूद्वाक्य जं ॥३९॥ ब्रह्मोवाच ॥

रौघकं सृजामि विविधं जगत्सुरनरादिजं घर्वकं समुद्र गिरि गह्वरं नदनदी वनं चाप्यहं ॥ न मत्समसुरौघकः प्रति-

वदामि शंभो तव प्रसाद सुमुखे मुखे विहित वेद जालो स्म्यहं ॥४० ॥ ॥ विष्णुरुवाच ॥ अहं हि दैत्य प्रवरा-

ननेकानि न कृत्त चक्रार विदारिताजौ ॥ चराचरं विश्व मिदं हि पालये न मत्समः कश्चिदिति प्रभो मतः ॥

॥४१॥ रुद्र उवाच ॥ मच्छूल मूल वर कोटि विलग्न धाराच्छिन्नं तथांते प्रलयाब्धि कोब्धिः ॥ चराचरं विश्व-

मिदं ममास्य गं फलालिव च्चर्वयामीदमिषं ॥४२॥ ॥ इंद्र उवाच ॥ त्रिविष्टपनिविष्टितो सदकरींद्र - १२७

कुंभस्थितः सुरेंद्र वलया वृतः प्रकटरत्न मौलिस्फुरन् प्रपादतलपंकजः कुलिशपाणि रिंद्रो स्म्यहं ॥

मरु जंभ
सवृत्र सुरभंजक प्रमुखवैरिमन्युः प्रभुः प्रपीत वर सोमपा नहि कदाचिदन्यः सुरः ॥ ४३ ॥ वायुरुवाच ॥ ममा-
निल चलाचलाः नदनदीनगाः कामगा विलोलतल्पमर्णवाः प्रतिभवंति लोकाखिलाः ॥ महाद्रुमकुला-
वली प्रपतनोह वायुः सदा सदैव महतां सुरैर्नरवरोदेहस्थितः ॥ ४४ ॥ सूर्य उवाच ॥ प्रचंडकरमंडलो
ममयूख जालैर्जगत् पयोधरपयःकणैरतिसुवृष्टवृष्टसुस्थितेः ॥ दिनोदयदिनांतिमे प्रोषित बीज-
धान्यादि भिर्जगत्परिपुष्णामि वै सकलमार्चिरोदः पथा ॥ ४५ ॥ ॥ अग्निरुवाच ॥ ॥ शिखा शतविदीपितः
सुरगणेषु तृप्ति प्रदो मुखादिषु सुसंस्थितः पितृगणेषु कव्यप्रदः ॥ महार्णवमुखेस्थितो ममशिखा सुपक्कंर
संपवित्रितजगत्त्रय स्तवच फालनेत्रोस्म्यहं ॥ ४६ ॥ यम उवाच ॥ यमोस्म्यहं नरकवर्गगर्वापहः
प्रचंडतरदंडधृक्समदृगोस्मि सर्वत्र वै ॥ ममोत्तमभटारवैः जगति जागताः पातकाः नसंति भयभीतित-
स्तव शिवांघ्रिद त्तेक्षणः ॥ ४७ ॥ ॥ कुबेर उवाच ॥ ॥ धनेश्च धनवर्जितान्परिपुष्णामि त्वत्प्रेरितस्तवा
ब्जपदीमित्रतामुपगतोस्मि यक्षाधिपः ॥ समुच्छ्रीलित वर्णकः प्रथित गीत काष्ठाधिपः किमुत्तरमिदं मम प्रवण
मेतदेवं मनः ॥ ॥ चंद्रमा उवाच ॥ सोमोहं सरसीरुहालिनलिनीमुकुलनेमित्र कस्त्वन्मौलि स्फुरदंबरे-

१७३

शि॰ वर॰ १ ३३८

मधुरिमा कांतिर्जटाजूटगः ॥ पुण्यान्योषधिजालमीश्वर तवाप्याहं प्रकाशास्पदः नेत्रं ते घ्रचवाममीश्व-
रदयापात्रं प्रशाध्य घमां ॥४९॥ वरुण उवाच ॥ ॥ अपांपतिर्नद नदीप्रवर नीरपा राब्धिगाः समुल्लसि-
तकेतनः स्फुरदपारगंगापतिः ॥ अपुण्यजनपाशकृद्गुणवरैश्च संसेवितस्तव प्रपदपूजको भवहरैतदेवा-
स्तु मे ॥५०॥ ॥ सर्वदेवा ऊचुः ॥ ॥ विश्वे ऽश्विनौ मरुतः सर्व एव वयं सहेंद्रेणापि बाम सोमं ॥ तवाज्ञया-
जगतां पालनैरता विभो प्रमथाधिनाथ ॥५१॥ ॥ सूत उवाच ॥ ॥ इति सुरगणवचनं निशम्य शंभुः
प्रणतामरभूरुहोऽभ्युवाच देवान् ॥ तदविनयजातवाक्यहर्षः प्रसभमीदृशवचो प्युदाररूपं ॥५२॥
॥ ईश्वर उवाच ॥ एतन्मे तृणकाकृतिश्च पुरुषः संकल्पजः कल्पितः स्तोमि महिमा रसंसुरवराः
संचोदयं तु द्रुतं ॥ तत्पश्यामि भवत्प्रताप मखिलं देवा स्तरं तु द्रुतं इत्युक्त्वा जगदीश्वरे ह उमया शीघ्रं ति-
रोधत्तवे ॥५३॥ विष्णुब्रह्महरामरेश्वर यमा वाय्वग्नयः सूर्यकाश्चंद्रे शान महत्तवसुर्वरुकाविवे-
शादिक्पालकाः ॥ तस्मिंस्तार्णनरे स्वकायुधवरैः शक्तीगिरी शास्तदानो किंचित्प्रापि चालितुं व ३३८
थ भवन्मोघा अनी शास्तदा ॥५४॥ देव्या चापि समन्वितं गुणगणेरुद्दंड भक्ति प्रभा श्वान म्रात मशेखराः

सुरगणा भक्त्या प्रपन्नाहरं ॥ सम्यक् तुष्टुवुरीड्यं जातवत्या ताथा दिशाः सर्वेशो विश्वेश्वंभुवनेश्वरं त्रि-
भुवनाराध्यं महेशं शिवं ॥५५॥ त्रष्टुं पातुमथात्तुमप्यति बलाद्रष्टुं च सं शोषितुं बद्धुं चालयितुं चंड
मखिलं तस्ता वितुं वाजेक ॥ भाज्यैः पूरयितुं च सोमजकरैर्नै शास्तस्ते सुराः तज्ज्ञानमत्र मुरवा महेश
चरणं भक्त्या प्रपन्नास्तदा ॥५६॥ इति श्रीशिवरहस्ये प्रथमे माहेश्वरांशे देवानां शोधनं नामद्विपंचाशो-
ध्यायः ॥५२॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥जैगीषव्य उवाच ॥ अत्यद्भुत कथा श्रावि चरितं शंकरस्य-
च ॥ तिरोधानं गते देवे किं चक्रुः सुरसत्तमाः ॥१॥ शिखिध्वजनमस्ते स्तु तन्मे विस्तरतो वद ॥ नहि-
तृप्यामि त्वद्वक्त्र सुधा निष्पंद धारया ॥२॥ पुनःपुनश्चर्वणे भूयसी श्रद्धा प्रवर्त्तते ॥ इत्येतद्वचनं श्रुत्वा
शांभवस्य सषण्मुखः ॥३॥ शृण्वतां गणवृंदानां देवानां तु मुनीश्वरं ॥ ॥सूत उवाच ॥ ॥ संबो-
ध्य प्राह तान्विप्रान्देवस्य चरितं तदा ॥४॥ कुमार उवाच ॥ ॥ शृणुष्व चरितोदारं परमं धूर्जटे
मुने ॥ ततस्ते ब्रह्मविष्ण्वाद्याः सेंद्राः सर्वे मरुद्गणाः ॥५॥ सूर्यचंद्राः सवरुणाः करुणासारविग्रहं ॥
तुष्टुवुर्जगदंबां तामुमां शोभित भूषणां ॥६॥ कृतांजलिपुटाः सर्वे ध्यायंतस्ते शिवं तदा ॥ ॥देवा ऊचुः ॥

॥ अयि गिरिनंदिनि नंदितमेदिनि विश्वविनोदिनि नंदिनुते ॥ गिरिवरविंध्यशिरोधिनिवासिनि शंभुविलासिनि विष्णुनुते ॥ ७ ॥ जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ भगवति हे शितिकंठकुटुंबिनि भूरिकुटुंबिनि भूतकृते ॥ ८ ॥ अयि निजहुंकृतिमात्रनिराकृतधूम्रविलोचनधूलिकृते ॥ जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ ९ ॥ समरविशोषितशोणितबीजसमुद्भवशोणितबीजलते ॥ श्रीयुतशुंभनिशुंभमहाहवतर्पितभूतपिशाचरते ॥ १० ॥ जय जय हे महिषासुरमर्दिनि ॥ अयि जगदंबकदंबवनप्रियवासनिवासिनि सौधरते ॥ शिखरिशिरोमणितुंगहिमालयसौधनिजालयमध्यगते ॥ मधुमधुरे मधुकैटभगंजनि जातससंभ्रमब्रह्मनुते ॥ जय जय हे० ॥ ११ ॥ सुरघनघोषिणि [illegible] दुर्मदरोषिणि सन्मखपोषिणि सिंहवहे ॥ जय जय हे० ॥ १२ ॥ धनुरनुषंगमनुक्षणसंगपरिस्फुरदंगकिनटत्कटके ॥ कनकपिशंग [illegible] ॥ त्रिभुवनपोषिणि शंकरतोषिणि कल्मषदूषिणि घोषरते ॥ दनुजविशोषिणि [illegible] ॥ सुरसंघवधूतुरंगबलोद्धतिरंगघटद्रणरंगतटे ॥ ॥ जय जय हे० ॥ १३ ॥

Marginal/interlinear corrections: भक्तजनाश्रितु; दनुज विशोषिणि; दुर्मदशोषिणि; दुर्धरधर्षिणि दुर्मुखहर्षिणि पावरते; रंग; लम; च; “कनकपिशंग ... सुरसंघ ...”; “कौशिकपिशंगमनिंग”; पुष्करभवमोधिनिपोषरते

अयि शिखंड विखंडित तुंड वितुंडित शुंड गजोपकृते ॥ रिपु गज गंड गतोद्भट मंड विदारण चंड पराक्रम
शौंड मृगाधिपते ॥ जय जय हे महिषासुर मर्दि० ॥१४॥ निज भुज दंड विपाटित मुंड निपातित चंड महाधिपते॥
जय जय हे म० ॥८॥१५॥ जय जय देवि नगराज कुलोत्तारिणि कच कुच गमन जघन वदन कंठोदर कटितटोरुद्भ्य-
कर बाहु भूषण विराजिते ॥ सजल जलद नगमातंग पुलिनेंदु शंख करतल सिंह रंभा संभारत्न नीरज मृणाल-
निभे ॥९॥१६॥ तारामल मौक्तिक सर कौलित कंधरे बिंबाधरे ॥ सध्याष्टमी चंद्र समान भ्रूकृते तपनोडुप- नालिक

175

मंडलायित ताटंके ॥१०॥१७॥ उद्यत्कवि मंडल निभ नासा मुक्ता मणि द्योतिते ॥ सर्वाभरण भूषिते त्व माया-
मोहितानरदरद ॥११॥ इति संस्तुत्य ते सर्वे प्रणम्य भुवि दंडवत् ॥ बद्धांजलि करा मौलौ तदा चुस्ते सुरास-
दा ॥१२॥१९॥ देवा ऊचुः ॥ त्वया संमोहिताः सर्वे न जानीमो महेश्वरं ॥ सर्वदेव समं ज्ञात्वा कारणानां च कार-
णं ॥१२॥ पतीनां पतिमीशानं चेतनानां च चेतनं ॥ तस्य विरहात्सर्वे तृणमेत सुरोगतं ॥२१॥ जगत्सृष्टं
त कार्येषु स्फीता त्वपि महेश्वरि ॥ किंचित्कर्तुं मनो शोहि त्वां प्रपन्नाः सदांबिके ॥१४॥२२॥ नमस्तेस्तु जग-
न्मातः प्रसन्ना भवनः सदा ॥ त्वयाऽऽवृतमिदं सर्वं त्वया संपाल्यते जगत् ॥२३॥ त्वय्येवांते लयं याति सेवा-

सुरमानुषं ॥ त्वं शक्तिः परमादेव महेशस्य योगभागिनि ॥१७॥२४॥ त्वत्प्रसादेन सर्वेषां मोहनाशो भवेत् शिवे ॥ सर्वत्ररूपाशक्तिस्त्वं माया,मायी महेश्वरः॥१८॥२५॥ त्वांप्रपन्ना वयंसर्वे मोहितास्तव मायया ॥इत्युक्त्वा ब्रह्मविष्ण्वाद्याः प्रणम्य भुवि दंडवत् ॥१९॥ अथ योगायन भोमध्यं ददृशुः सर्व एव ते ॥नीलतोयदमध्यस्थ विद्युल्लेखेवभासुरां ॥२०॥२७॥ निष्टप्त कनकाभासांसर्वाभरण भूषितां ॥ बालेंदुबद्ध मुकुटां सोमधामसमाननां ॥२१॥नीलेंदीवर नेत्रांतां पवित्राकृति सुंदरां ॥ दृष्ट्वा पुनः प्रणम्येशीं स्तुत्वेति चाब्रुवन् ॥२२॥ देवानांवचनंश्रुत्वा उमोवाचसुरांस्तदा ॥ प्रगल्भधीरमधुरं देवाज्ञानविनाशनं ॥२३॥३०॥ देव्युवाच ॥ एष ब्रह्मेयमात्मा प्रणवपदगतो मातृमात्रादिहीनः॥ मायातस्यत्वहं वै विविध जनकरी शक्तिरस्मीहदेवाः ॥ सर्वेशः शक्तिमांश्च प्रकृतिपरवशो विश्वमेतद्धि विश्वं,विश्वोद्भूता भवंतःसकल भवहरं तं भजध्वंमहेशं ॥ २४॥३१॥ यतो ये हरि ब्रह्म रुद्रेंदु पूर्वा प्रजातास्य यस्मिन्स्थिता एवनूनं ॥भवद्भिस्ततं लोकजालं किलेदं प्रपद्य ध्वमीशं भज ध्वं महेशं ॥२५॥३२॥ शक्तिस्त्वहं यस्य जगत्समग्रं करोमि लीला मिषतो मिषतां भवद्भिः ॥भवप्रसादेन भवेत् मोचनं ममैव शक्तिं शरणं प्रयात ॥२६॥३३॥ नतस्य कार्यं करणं शिवस्य सना-

-तनो नित्य शुद्धः पुराणः ॥ यन्मायया मोहिता स्थ प्रजेशा स्मृत्यैवे तद्धिर हात्सर्व मेवं ॥२७॥ ३४ ॥ ध्येयं भूयात्तार्ण-
कस्योपमा नास्ति सर्वे देवा रुद्र मीशान माराद् ॥ द्रुतं त मिष्टं गगनां तरस्थं सर्वे ह्रिये णो परतं भजध्वं ॥२८॥३५॥
॥स्कंद उवाच॥ इत्युक्त्वा सा जगन्माता तिरो धत्त सुरान्प्रति ॥ देवा देव्युदितं श्रुत्वा सर्वे प्रांजलयस्तदा ॥२९॥ ३६
विभूति भूषितैर्गात्रै स्त्रिपुंड्र परि शोभिताः ॥ कृत्वा व्रतं पाशु पतं कृत लिंगा र्चनाः सुराः ॥३०॥ ३७ रुद्राध्या-
य जपेनैशं पंचाक्षर रताः सदा ॥ पंचास्य ध्यान संसक्ताः संवत्सर मतंद्रिताः ॥३१॥ ३८ अदृष्ट्वैव महादेवं
जगतां जननी मपि ॥ ऊर्ध्व बाहव ईशानं तुष्टुवुः परमेश्वरं ॥ भक्त्या त्वनन्यया देवाः प्रबद्ध करसंपुटाः॥ ३२।३९
रौद्रैः ऋग्वसाम संभूतै स्तथा थर्व शिरोगतैः ॥३३॥४०॥ ॥देवा ऊचुः ॥ प्रणव प्रवणे ष्वुतेषु कृपाणा भीतिवि-
नास्य सुकृते करसार्णवेषु ॥ निर्वाण कारण भवार्णव कर्ण धारत्व द्वाच्य शब्द मभि धातृ गणाश्रयामः॥
३४॥४१॥ त्वामग्नि मीड इति मौलि ऋचा भिधत्ते वेदो दितस्त्वदित रस्त्विष मूर्ज माह ॥ त्वामंध्वसां पतिम-
नुत्तममी शितारं साम्ना दिमे प्यवन हेतु मथाग्नि माह ॥३५॥४२॥ त्वां शं भुवं जलमयीं तनुवंत वेश साक्षाद-
थर्वण गिरि राप्रकटाष्ट मूर्ते ॥ नीरूपवर्ण कथने तव ते निवृत्ता वेदा श्च तत्स्व कमहाशिरव शाख भेदाः ॥३६॥ ४३

शिवरह१ -वाचामनस्त्वतिगतं भगवंतमेवं भक्त्या तवाष्ट गीर्णैते स्तनुभिस्तुवंति ॥३४॥ इति श्री शिवरहस्ये प्रथमांशे माहेश्वरे- देवकृतदेवीस्तवो नाम त्रिपंचाशोध्यायः ॥५३॥ ॥श्री काशीविश्वेश्वरार्पणमस्तु॥ ॥ देवा ऊचुः ॥ ॥यो-

माहेश्व॰ १प्र॰५३ (अथर्वशिरः)

१५१

वै रुद्रः स भगवान् यश्च ब्रह्मा तस्मै वै नमो नमः ॥ यो वै रुद्रः स भगवान् यश्च विष्णुस्तस्मै वै नमो नमः ॥१॥ यो वै-
रुद्रः स भगवान् यश्च रुद्रस्तस्मै वै नमो नमः ॥ यो वै रुद्रः स भगवान् या चोमा तस्मै वै नमो नमः ॥२॥ यो वै रुद्रः स-
भगवान् यश्च विनायकस्तस्मै वै नमो नमः ॥ यो वै रुद्रः स भगवान् यश्च स्कंदस्तस्मै वै नमो नमः ॥३॥ यो वै रुद्रः
स भगवान् यश्चेंद्रस्तस्मै वै नमो नमः ॥ यो वै रुद्रः स भगवान् यश्चाग्निस्तस्मै वै नमो नमः ॥४॥ यो वै रुद्रः स-
भगवान् यश्च वायुस्तस्मै वै नमो नमः ॥ यो वै रुद्रः स भगवान् यश्च सूर्यस्तस्मै वै नमो नमः ॥५॥ यो वै रुद्रः
स भगवान् यश्च वरुणस्तस्मै वै नमो नमः ॥ यो वै रुद्रः स भगवान् यश्च यमस्तस्मै वै नमो नमः ॥६॥ यो वै रुद्रः स भग-
वान् यश्च निरृतिस्तस्मै वै नमो नमो नमः ॥ यो वै रुद्रः स भगवान् यश्च ईशानस्तस्मै वै नमो नमः ॥७॥ यो वै रुद्रः
स भगवान् यश्च कुबेरस्तस्मै वै नमो नमः ॥ यो वै रुद्रः स भगवान् यानि पञ्च नक्षत्राणि तस्मै वै नमो नमः ॥८॥
यो वै रुद्रः स भगवान् ये चाष्टौ ग्रहास्तस्मै वै नमो नमः ॥ यो वै रुद्रः स भगवान् ये द्वादशादित्यास्तस्मै वै नमो नमः
॥९॥

१५१

यो वै रुद्रः स भगवान् ये चाष्टौ वसवस्तस्मै वै नमो नमः ॥ यो वै रुद्रः स भगवान् ये द्वादशादित्यास्तस्मै वै नमो नमः ॥
॥१०॥ यो वै रुद्रः स भगवान् ये चैकादश रुद्रास्तस्मै वै नमो नमः ॥ यो वै रुद्रः स भगवान् या च पृथिवी तस्मै वै-
नमो नमः ॥११॥ यो वै रुद्रः स भगवान् याश्चापस्तस्मै वै नमो नमः ॥ यो वै रुद्रः स भगवान् यच्च तेजस्तस्मै वै नमो-
नमः ॥१२॥ यो वै रुद्रः स भगवान् यश्च वायुस्तस्मै वै नमो नमः ॥ यो वै रुद्रः स भगवान् यच्चाकाशस्तस्मै वै नमो न-
मः ॥१३॥ यो वै रुद्रः स भगवान् यश्च भूस्तस्मै वै नमो नमः ॥ यो वै रुद्रः स भगवान् यश्च भुवस्तस्मै वै नमो नमः ॥
॥१४॥ यो वै रुद्रः स भगवान् यश्च सुवस्तस्मै वै नमो नमः ॥१४॥ यो वै रुद्रः स भगवान् यश्च महस्तस्मै वै नमो नमः ॥
172
यो वै रुद्रः स भगवान् यश्च जनस्तस्मै वै नमो नमः ॥१५॥ यो वै रुद्रः स भगवान् यश्च तपस्तस्मै वै नमो नमः ॥
यो वै रुद्रः स भगवान् यच्च सत्यं तस्मै वै नमो नमः ॥१६॥ यो वै रुद्रः स भगवान् ये च प्राणास्तस्मै वै नमः ॥ यो वै-
रुद्रः स भगवान् यच्च मनस्तस्मै वै नमो नमः ॥१७॥ यो वै रुद्रः स भगवान् ये च सर्वेन्द्रियाणि तस्मै वै नमो नमः ॥
यो वै रुद्रः स भगवान् यश्च कालस्तस्मै वै नमो नमः ॥१८॥ यो वै रुद्रः स भगवान् यश्च मृत्युस्तस्मै वै नमो नमः ॥
यो वै रुद्रः स भगवान् य भूतं तस्मै वै नमो नमः ॥१९॥ यो वै रुद्रः स भगवान् यच्च भविष्यत्तस्मै वै नमो नमः ॥

यो वै रुद्रः सभगवान् यश्च वर्तमानं तस्मै वै नमोनमः॥

ओमादावंते च भूर्भुवस्व स्त्रिरोंकृतिः॥ २०॥ ब्रह्मैव त्वं त्रिधो र्ध्वत्वं गतिः पुंषि महेश्वरः॥ विश्वं च विश्वातीतस्त्वं हुतं प्रहुतमेव च ॥२१॥ कृतं चाकृतमेतेच परमं च परायणं॥ नारायणादि जनको अर्यमणो वरुणस्य हि॥२२॥ जनिता त्वं तथा वायोर्वा वा भूम्यो महेश्वरः॥ सर्वेशः सर्व साक्षी च सर्व एव त्वमेव हि ॥२३॥ अग्राह्यः सर्वभूतेषु सर्वेंद्रियगुणातिगः ॥ अलिंगो, स्वशरीर स्त्वं व्यापकश्च सनातनः ॥२४॥ वामनं त्वां महादेवं सर्वे देवा उपासते॥ त्वत्तो जातं जगच्छंभो स्थितं त्वय्येव लीयते ॥२५॥ त्वत्तो नास्ति पृथक् किंचित् नो भिन्नं परमार्थतः॥ अजां मायां लोहितशुक्ल कृष्णां बहून्समान् जनयंतीं स्वरूपां ॥२६॥ अजस्त्वमेको जुषमाणो नुशेषे जहात्येनां भुक्तभोगामजस्त्वं॥ मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं ॥२७॥ तवावयव संभूते व्याप्तं सर्वमिदं जगत् ॥ नेह नानास्ति किंचिद्वै त्वदधिष्ठितमेव हि ॥२८॥ त्वामवज्ञाय दुर्मेधाः कृतकृत्योभिमन्यते ॥ नसांपरायं प्रविदमबालामूढा वयं केवलं त्वद्धिहीनः॥ किंचित्तृणं चालयितुं च नेशास्त्वन्नो गतिः परमं चासि शंभो ॥ त्वया कृतं लोकमिदं समग्रं कोवा हानं चेतते त्वद्धिहीनः ॥३०॥ एको रुद्रस्त्वं हि सर्वस्य कर्ता विश्वातीतः परमश्चेतकोसि ॥ सर्वभूतातिगश्चात्मा कोशातीतः परात्परः ॥३१॥ महाग्रास स्त्वमेवेश मृत्युस्त्वदुपसेचनः॥

ओदनंतवमूतेश ब्रह्म दत्तं जगत्था ॥३२॥ ब्रह्म पुच्छं प्रतिष्ठा त्वं शांतिरुत्तरमेवच ॥ हृदिस्था देवतास्सर्वा हृदि प्राणाः प्रतिष्ठिताः ॥३३॥ हृदयं पुरुषोसित्वं ति स्त्रो मात्राः परश्चसः ॥ ओंकारः प्रणवो व्यापी अनंतो-ऽनंतविक्रमः ॥३४॥ तारं सूक्ष्मं वैद्युतत्वं शुक्लं सर्वशरीरगं ॥ ईशानो भगवान् रुद्रो महादेवस्त्वमीश्वरः ॥

॥३५॥ परं ब्रह्म परंधाम परःपारः परायणः ॥ शूरो वीरो पुरुषो भूत संस्थो विश्वो विश्वेशः प्राण दश्च्यात्म-यात्मा ॥३६॥ यदुपश्य दुश्रोत्र एवत्वमीश मनसो मनो बुद्धि बोद्धा त्वमेव ॥ पीतः पतीनां पशवो-वयंच अस्मान होपासित आसि देव ॥३७॥ त्वदुद्भवं सर्वमीशस्त्वमेको नानेव भासि पुरुषस्वमायया ॥

170 तिलेषु तैलं दधि नीव सर्पिः आपः स्रोतस्सु त्या स्वरणीषु वह्निः ॥३८॥ एवं प्रोतं त्वय्यद्वितीये महेशत्वज्ञं त्वल्लं त्वदनं चैतदेव ॥ नोविद्यते गुणकर्मादिनामरूपादिशक्तिः ज्ञानशक्त्या विभिन्नः ॥३९॥ हृदयत्वं भूतभव्यः पुराणएको वीरो वेदगणैक वेद्यः ॥ ओंकारादिस्वररूपो महेशो विधामात्वंवरणीयस्तथाणुः ॥४०॥ महान् जेता जिष्णुश्चापराजितो अभ्रावकाशः खंच खंच त्वमेवाविभ्राट् संम्राट् भूमधामा त्वमेव पिता-सिमाता भ्रातृ कश्चादिवैद्यः ॥४१॥ रुजां हरस्त्वं भिषक्पापहीनः अपाणिपादो निर्विकारस्त्वमात्मा ॥

शिवरह.१

स्वयंभानः परएको ज्योतिरेवत्वन्तोन ओजस्विष्ठ तमोस्तिदेवः ॥५२॥ त्वंनोदिवानैवरात्रिस्त्वमीशस्त्वंसीमा-
विश्वतश्च दुरीशः ॥ नवेदांता नापिवेदाश्चतेवैतव ज्ञानं मनसैनाद्य वृत्तं ॥५३॥ आकाशःपृथिवीसलिलं-
चवायुः तेजश्चासि प्रथितंते जगच्च ॥विश्वस्य नेताविश्वभर्त्ता त्वमीशस्तवज्ञानात्सर्वमेवेह विंदेत ॥५४॥
तवाज्ञानान्मोहिताः सर्वएव तव प्रसाद दंवया बोधितास्मः ॥ अवस्थातीतः परमात्मा ब्रह्मैवत्वं संसरस्मा-
दिरूपः ॥५५॥ विशोकोविमृत्यु रजिघत्सोऽपिपासःशरीरे हिनोऽस्य जरःपुराणः ॥ ऋतं सत्यं नाम रूपातिगस्त्वंत-
वामेयरूपं कोहि वेदेदमेव ॥५६॥ ऋचो अदोरे परमस्त्वं महेश नान्यत्त्वत्तोयदूवेदेवमार्त्तं ॥ नान्यदृक्-
त्वां पश्यति,पश्यकस्त्वं, दृष्टेर्द्रष्टा, वाच्य वाचादिहीनः ॥५७॥ विद्याधीशः स्वरएकोमहेशस्त्वमेवत्वं-
वेदयो [illegible]सीशएव ॥ नमस्तेहर सेशोचिषेतेनमस्ते अस्त्वर्चिषे देवदेव विश्वाधीशः शंकरो वेदवेद्यः ॥५८॥
अन्यत्तपं तुहेतयो घोररूपाः भक्तेषु त्वं शिवोभव शत्रूनस्माकं जहिशूलेन शंभो ॥यइमं विश्वं भुवनंया-
सिजुह्वदृषिः प्रथमोवो मनः पद्मसंस्थः ॥५९॥ त्वमाशिषं द्रविणं घोहि शंभो विश्वकर्मा मनसासंमदृ-
श्योधाताविधाता परमेष्य संदृक् ॥ तेषामिष्टानितवपाद पूजया सर्वं लभेते वनीह संशयोत्र ॥६०॥

महेश्व०
अ०५५

१४३

तत्स्वेक एव ॥ ॥ वेदे रुद्रस्त्वं मतो देवपूर्वः॥

त्वं नो माता जनिता चोपनेता भ्राता बंधुः परमो गुरुस्त्वं ॥ त्वं देवेषु प्रथितो नामतस्त्वेक एवेदं रुद्रस्त्वाम-
नाक् पूर्वसुराः ॥५१॥ वेत्तुं च त्वां नूतनाश्चापि शंभो अपूतपूर्ते जगदेकं त्वयात्तं यद्भूतजालं निखिलं वैवि-
सृष्टं ॥ एतादृशं त्वां न विदंति केचि दृष्ट्यां तरेण पीरपश्यंति मूढाः ॥५२॥ माया मोहावृताः शास्त्रजल्पाः
असुसृप्या भोगभाजो भुवः स्वे ॥ यज्ञैर्दानैः कामकामैश्च बालाः दिवः परः पृथिव्यास्त्वं परश्च देवा-
सुरे स्त्वं पुरोगूढगर्भः भूतानां त्वं महिमा गर्भभूतः ॥५३॥ कस्त्वां देवभूतवीर्यौ विहीनं वेदे विश्वं-
पत्रलीनं त्वयीशे ॥ अजस्त्वनाभौ जगदेतदुक्षिचित्रं मध्येऽपि तं यस्मिन्विश्वं भुवनं च त्वमेव ॥ ततो-
गंधर्वा ओषधीशोऽपि शंभो सर्वे द्विया मनसा त्वां नमामः ॥५५॥ हृदा पश्यंति मनसा मनीषिणो ये ब्र-
ह्म मन्वान उपासते त्वां ॥ त्वां ईदृशं गूढमनुप्रविष्टं सहैव संतं न विजानंति देवाः ॥५६॥ विश्वस्य च-
क्षुर्विश्वतश्चक्षुरो ए बाहुर्विश्वस्पातिर्भुवनस्यास्य गोप्ता द्यावाभूमी त्वमेव एवैकरश्मिः सूर्यो भ्राजते-
स्वे सोमतारे ग्रहैश्च ॥ नान्ये जानंति तव मत्या विहीनाः अजातं त्वामीशं शरणं प्रपन्नाः ॥५७॥
॥ सूत उवाच ॥ ॥ इत्थं संस्तुत्य ते सर्वे दंडवत्सुरसत्तमाः ॥ प्रणेमुः परमात्मानं ददृशुर्देवतागणाः ॥
॥५८॥

127

ते जोराशिं महादेवं गगनस्थं सनातनं ॥ वड्वानल वाडवेंद्र मुरैव्य वडवाजानि विडौजसार्चितांघ्रिं ॥ ॥५९॥ बलिनंदन पूज्य बाणलिंग लोलं बलमानच्छेसुबिल्व पल्लवैः ॥ बलप्रमथं नं शिवं बलिबलारि-बाणार्चितं बिलेशय फणामणि विधृत पाणि पद्मांकितं ॥६०॥ बलोत्कट सुरासुरैर्नमित बालचंद्रांग धृक् धृता बल वरांगकं हरि सुबाण मेदन सुरः ॥६१॥ ॥इति श्रीशिवरहस्ये प्रथमे माहेश्वरांशे-देवकृतोपनिषत्स्तुति र्नाम चतुःपंचाशोध्यायः ॥५४॥ ॥श्री काशी विश्वेश्वरार्पणमस्तु॥ ॥

॥स्कंद उवाच॥ ॥ तदा देवा महादेवं गगनस्थं सनातनं ॥ उमया वरदं देवं मंदस्मित मनोहरं ॥१॥ उत्फुल्ल कुंद हल्लक विलसन्माला शोभित कंधरं ॥ सुधांशु शुभ्रां शु कीलाभिर्वि काशित दिशामुखं ॥२॥ कुंदकच्छ शारदाभ्राम घनकांति शरीरकं ॥ त्रिनेत्र शोभि वक्त्रो घं नागकुंडलमंडितं ॥ कुंडलीशफणाभ्राजत्कुंडलाननमंडितं ॥ कपर्द तट बद्धेंदु गंगाप्लावित मौलिकं ॥४॥ शूलामल लसद्वाल मृगपाणि मनोहरं ॥ आशाबद्धकं महात्मानं रत्नकंकण मंडितं ॥५॥ करटि त्वक् कटि तट बद्ध खड्ग विराजितं ॥ देव्या च संयुतं चारु वदन स्मेर कांतया ॥६॥ धम्मिल्ल मल्लिका मोदपंकजोत्तम गंधया ॥

शिंदुरतिलका शोभि फालयाद्य मणि त्विषा ॥८॥ नानालंकार संक्लृप्त तत्तदंकैक शोभया ॥ कोटि-
कंदर्प दर्पघ्नः कोटि सूर्य शताधिकः ॥ कोटि चंद्राधिक तनुस्तनु हीनोपि शंकरः ॥ घनघोषेण देवांस्ता-
नुद्धे घोषो महेश्वरः ॥९॥ गंभीरयाम धुरया वाचा संल्हादयंस्तदा ॥ प्राह तान् प्रमथाधीशः सुराधी-
शान् शिवासखः ॥१०॥ ॥ ईश्वर उवाच ॥ ॥ भोभो सुरोत्तमाः सर्वे ब्रह्म विष्णु महेश्वराः ॥ य-
मानिलानलब्रघ्न मरुतो वसवोश्विनौ ॥११॥ सूर्य चंद्रेंद्र वरुण धनाधीशा दिशाधिपाः ॥ शृण्वंतु परमं
मेघ वचनं सुंदरं सुराः ॥१२॥ कृत यत्ना भवंतो हि अस्मिन्तार्णक कल्पिते ॥ पुरुषे सर्व शक्त्यापि म वह्नि-
रुरु विक्रमैः ॥१३॥ जगत्पालन दक्षैश्च न किंचिदुद भूत्सुराः ॥ दग्धुं स्त्रष्टुं तथा दातुमत्तुं नाशयितुं-
द्रुतं ॥१४॥ ममतेजो विहीनाश्च जडाहंकार मोश्रिताः ॥ मधुक्ति करुणा हीनाः शक्ति हीनास्य सांप्रतं ॥
॥१५॥ इयं ममांकसंस्था या ब्रह्म उमाख्या शक्ति रुत्तमा ॥ विश्व निर्माण रक्षणे यं विचक्षणा ॥१६॥ द-
दशैलेंद्र दुहिता कारणे श्च सुरैस्तुता ॥ नैतस्याः कारणं कार्यमजै वैषा सनातनी ॥१७॥ एतस्याः शक्ति
वैचित्र्यं भवंतः सर्व एव हि ॥ ममैषा परमा मूर्तिरेतस्या विरहे मम ॥१८॥ न किंचिदिह कर्तव्य-

शिवरह० मकर्त्ताऽसंगएवाहि ॥ अहमेको निराधारो मदाधारा त्वियं सुराः ॥१९॥ भवतां कारणं देवाः शिवेयं चित्रकारि- माहेश्वर ७प्र
१५२ णी ॥ एतस्याः शक्तियोगेन शक्तिमानस्मि सर्वथा ॥२०॥ परा मे परमा शक्तिः स्वभावादेव वर्त्तते ॥ कालस्व- ५६
भावं नियतिं इच्छां मे केवदंत्यपि ॥२१॥ भूतसंघं तथैवान्ये ऋषयः परिमोहिताः ॥ एतस्याः शक्तिवैचित्र्यं
श्यामू प, य र्जिताः ॥
जगदेतच्चराचरं ॥२२॥ एनां प्रणमत क्षिप्रमेतस्याः कृपया सुराः ॥ विक्षेपावरणाभ्यां च शक्तिभ्यां वीजि-
तायदि ॥२३॥ तावदेव चिरं देवाः यावद्विक्षेपशक्तितः ॥ न मुक्ता मे परं ज्ञानं प्राप्यापि सुरसत्तमाः ॥२४॥
किंत्वावरणनिर्मुक्ताः भविष्यध्वं कृपाधिकाः ॥ भवतां सर्वथा ज्ञानं मत्प्रसादेन सत्तमाः ॥२५॥ यावदा-
वर्तनं देवास्सज्ज्ञानाश्चाधिकारिणः ॥ प्राप्नुवंतु भवंतो हि वेदवेदांतसंभवं ॥२६॥ ज्ञानं मे पारमैश्वर्यं-
देव्याश्च कृपया सुराः ॥ तदा देवाः शंभुवचो निशम्य परमार्थतः ॥२७॥ जानुभ्यामवनिं गत्वा तुष्टुवु-
र्जगदंबिकां ॥ देवदेवप्रसादाय मत्या बद्धकराः सुराः ॥२८॥ ॥देवा ऊचुः॥ शरच्छशिसमानने-
कमलो वदोत्पल
जितगजेंद्रयाते शिवे सुनीलजलदोपमोज्ज्वलकचे सुबिंबाधरे ॥ सुनीलनयना चलोत्पलसमानने- १५२
त्रां चलेंदयासघने शिवे सदयमद्यनः पालय ॥२९॥ सुरासुरमुनिव्रजैर्नतपदांबुजे शंकरि महेश्वरि महाकगौरि-

कचमल्लि धम्मिल्लके ॥ भवानि भवनाशिनि, हरित भक्त पापव्रजे नमाम पदपंकजं तव विमुक्तिदं केवलं ॥३०॥
कदंबवन संस्थिते मणि कदंब कांतिप्रभे शरच्छशिसुबिंबवक्त्र प्रथितवक्त्र बिंबाधरे ॥ सुगंध तरबंधुरापित
सुगात्रि तांभोरुहा ज्वलन्नयन कोटिके, नत गुहादिहेरंबके ॥३१॥ नगेंद्रकुलकन्यके विधृतसामिसो-
मालके महेश्वरि सुयल्लके असुर जालसंभल्लके ॥ नमाम पदपल्लवं तव सुगल्ल मौलिस्फुरत् सुरोत्तकिरी-
टग ज्वलित पाप मल्लापहं ॥३२॥ कुलाचलकुलं त्वयाति लनकांतमीशे कृतं कुलाचलमपाश्रया कुलि
शिताघसंघे शिवे ॥ कुलीन जनमानसाश्रयण पादपद्मोज्वले प्रसीद पवनान लैर्नतपदां बुजे शंकरि ॥३३॥
॥ सूत उवाच ॥ ॥ देवानां संस्तवं श्रुत्वा प्रहृष्टा परमेश्वरी ॥ प्राह प्रसन्ना गंभीरं देवान्सु मधुरां गिरं ॥
॥३४॥ ॥ देव्युवाच ॥ ॥ स्तुत्या च भवतां देवाः प्रसाद सुमुखा त्वहं ॥ ददामि वांछितं सर्वं शिवज्ञा-
नमिदं सुराः ॥३५॥ मज्ज्ञानेन परां शांतिमधिगच्छत सुव्रताः ॥ अहं मानं परित्यज्य शिव सार्वात्म्यवे-
दिनः ॥३६॥ विमुक्ताः पशवो यूयं मन्मायाशक्ति वैभवैः ॥ अहमेवाखिलाराध्या अहं ध्येयाखिलैरपि ॥
॥३७॥ संविच्च सदसच्चापि अहं विश्वमिदं ध्रुवं ॥ मन्मायया मोहितास्थ अहमेतद्गवां भवं ॥ ३८॥

अहमेव स्वयमिदं वदामि ज्ञानमैश्वरं ॥ अहं विश्वं भुवनं चेतयामि अहं विश्वेभिर्वसुभिश्चराम्यहमादि-
त्यैरुत विश्वदेवैः ॥३९॥ अहमेव वातइव प्रवाम्यारभमाणा भुवनानि विश्वा ॥ अहं दधामि द्रविणं हविष्मते-
सुवीर्याय यजमानाय सुन्वते ॥४०॥ परो दिवाहं परयेना पृथिव्यां परं परा हि मथता पृथिव्यां ॥ एषोंतर्याम्य-
मृतः पुराणः ॥ सदा जनानां हृदये संनिविष्टः ॥४१॥ एनमात्मानं गूढमनु प्रविष्टं हृदा पश्यंति मनसा मनी-
षिणः ॥ एष भूतपतिरेष सेतुर्विधरणो लोकानाम संभेदाय ॥४२॥ एष सुप्तेषु जागर्ति भूतं भूतं पुरुषो-
निर्मिमाणः ॥ एषोंतरादित्ये हिरण्मयः पुरुषो दृश्यते शिवः ॥४३॥ एष धाता विधाता च स्वराट् संम्राट् प्रजा-
पतिः ॥ एषो देवो देव एकः पुराणः संगिश्च संगो गुणनामकर्मभिः ॥४४॥ एष एव हि भूतात्मा भूते भूते व्यव-
स्थितः ॥ एकधा बहुधा चैव दृश्यते जलचंद्रवत् ॥४५॥ जलस्य चलनादेव यथा चलति भास्करः ॥ तथे-
ष सर्वभूतेषु तद्धर्मैर्नैव लिप्यते ॥४६॥ अलिंग आकाशमधर्म एषोनंतोन चादिर्न च मध्यमेषो जगद्
तोयं न जगद्विचित्रं ॥ एषो खिलाधार उरुक्रमः सदा विशेषहीनश्च कविः पुराणः ॥४७॥ एषः स्वतंत्रः पु-
रुषः पुरातनो गूढः परापारपारः ॥ सदुर्दर्शो योगयुक्तेश्च भूयान् सहैव संस्थो भवतां मैनि लिपाः ॥४८॥

न जानंति सर्वे हृदाभासमानं॥ सदाभास्यभासं महोनादिहीनं॥ अहं चाहं प्रकृतिश्चास्मि देवाः न मां जानंते ये सदा दुःखभाजः ॥४९॥ प्रभास्मी हृदे श्रीशशिसूर्यश्च श्रेष्ठो॥ गृहाणां परमास्थितिश्च॥ न चावयो-र्भेदजालं कदाचिन्॥ माया चाहं एष मायी महेशः ॥५०॥ भावग्राह्योऽह्यनीडात्मा भावाभावकरः शिवः ॥ कलाविदं पुरुषं देवमीड्यं॥ ज्ञात्वैनं शांतिमत्यंतमेति ॥५१॥ एष आत्मा तपसा लोकनीयो॥ नान्यैर्धर्मैरस्य लिंगं न चैव ॥ यस्यैष आत्मा वृणुते तनुं स्वां॥ तस्य प्रसादेन हि तस्य लाभः॥५२॥ तस्मै-वलाभान्नपरं लाभमीष्टे॥ जनः सुरा ज्ञानमेतस्य दुर्ज्ञं ॥ पुराविदः कवयो ये मनीषिणो॥ ज्ञात्वा ध्येनं(त्रि) एकं पामहेशं ॥५३॥ तरंति शोकं च पृथक् पृथक् जनाः ॥ न जानंते नित्ययुक्ता गुणेषु॥ तथैं क्रिया धारमनंतरूपं॥ निरूपरूपं परमाकाशमेनं ॥५५॥ विश्वरूपप्रपंचेषु पुरीशयं स्थितं॥ वेदांतसंघैरपि ढुंढिमाणं॥ रसं रसानां परमास्वादनीयं॥ अनास्वादं रसवर्जं सुगुप्तं ॥ ५५॥ तुरीयमिंद्रं सततोदितं गुणैः॥ गुणातीतं विपुलं षंदिव्यप्रकाशधाम ॥ एषोऽनन्तो महिमाधार ईशः॥ भूमा सीमासार एकोऽद्वितीयः ॥५६॥ नान्येऽवास्ति महिमा यस्य प्रतिष्ठा कविः प्रधानो रसवर्जोऽयमात्मा॥ एष ब्रह्मैष एवेंद्र एषः सर्वं चराचरं ॥५७॥

192

शिवर.१ एष आत्मा पहत पाप्मा विरजो विशोको विमृत्युरजिघित्सोऽपिपासः ॥ सत्यकामो गुणाढ्य एष बृहद्धामा माहेश्वर.

१४७ यमीश्वरः ॥५८॥ एषोऽशरीरो विश्वकर्त्ता गुणेशः एषदेवः शीर्यमाणे न शीर्णः ॥ अजोऽजयममृतो वै विशोकः ॥ अ.५२

शोकातिगो जाति धर्मैर्विहीनः ॥५९॥ एषदेवैर्वेदसंघैश्च विप्रैरभिष्टुतोऽप्रतर्क्य इन्द्रियैश्च ॥ एषोऽनं-

तश्चैष ते देहजालैर्ये थ्योर्णनाभिः सृजतेतंतु जालं ॥६०॥ एष आदित्ये तपति तेजसेद्धः एष विप्रैर्मत्व

जालैश्चतुष्टः ॥ यः पाति सोममममृतस्य नाभिः कालातिगः पाति विश्वं सदैव ॥६१॥ अस्माद्भिन्नं नाणुर

स्ती हि किंचित्स एषभर्त्ता मम देवः पुराणः ॥ निरूप रूपोऽप्ययमात्मा महेशो नोत्तम्नो वः शिपिविष्टः शा-

श्वतोऽयं ॥६२॥ न हन्यते हन्यमाने शरीरे दिव्यो देवो एषदेवः पुराणः ॥ तं ब्रह्म वन्त्वा न पुपासते परं बु-

द्धीन्द्रियातीतमनो पमं शिवं ॥६३॥ नांतः प्रज्ञं न बहिः प्रज्ञमीशं नोभयतः प्रज्ञमर्हत्तमं च ॥ विश्वस्यस्रष्टार

मनेकरूपं विश्वस्यैकं परिवेष्टितारं ॥६४॥ गुहाहितं गह्वरेष्ठं पुराणं त्वेव स्याति तं प्रणवं चादिमेकं ॥

महतो महान्तं परमात्म मीशं अणोरणीयांस मिदंतं तं च ॥६५॥ विभ्राजमानं भूतवर्गो प्व संगं से ला-

तिगं स्वप्रभा भासमानं ॥ बालाग्रमात्रं हृदये प्रविष्टं जीवाभासं मन्यमानैश्च मूढैः ॥६६॥

(तम् एनम् उपासते परं (इति पाठान्तरं)

१४७

नत्वेष जीवो, न, शिवश्चादिकर्ता॥ यस्मात्परं नापरमस्ति किंचित्॥ बृहद्ब्रह्म शुक्लं ऋतं सत्यमीशं
प्रमोदं महत् ज्ञानमानंदमेकं॥६७॥ य एनं विदुरमृतास्ते भवंति अथेतरे दुःखमेवाविशंति॥ स एष
परमानंदो आनंदो ब्रह्म तत्परं॥६८॥ अस्यैवानंदमात्रां हि भवंतश्च सुरासुराः॥ अयमेव पराकाष्ठा स
ब्रह्म स शिवः स्वयं॥६९॥ वेदपर्वतजालोत्थ मंत्रैः क्लृप्तो यमेव हि॥ इत्युक्त्वा सा जगन्माता देवानां पश्य
तां तदा॥७०॥ प्राह देवं महादेवमनादिमजमव्ययं॥ ॥स्कंद उवाच॥ ॥इत्थं भावयनेननंदित
मनाः स्वान्ताः सुरास्ते तदा नाना वेदशिरोगतैश्च विविधैर्वाक्यैस्तदा हर्षिताः॥ तां देवी मगजां गिरीशमणी
(83
मानंदधारावृताः॥ पश्यंति श्रुति लोचनैः परिवृतं देवं नभोमध्यगं॥७१॥ इति श्रीशिवरहस्ये प्रथमे माहेश्व
रांशे देव्युपनिषद्वाधो नाम पंचपंचाशोऽध्यायः॥५५॥ श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥सूत उवाच॥
कुदितत्रिलोकं देवेशं महोदस्थं हि पार्श्वगं॥ प्रांजलिर्विनयोपेतान ×चपं× यादिगुणसंपदा॥ प्राह देवी वि
रूपाक्षं विशालाक्षी महेश्वरी॥१॥ देव्युवाच॥ ॥ देवाः किलैते भगवन् प्रसादतो ममैवते ज्ञान महो महार्थ
दं॥ तवाद्यतो पास्य हृदोऽद्य भेदनं समाप्नुवन् देवसंघाः कृतार्थाः॥२॥ भवाननादिः पुरुषः पुरीशयो गुहाहितो

गव्हरेष्टः पुराणः ॥ गुणातिगो गुण भूतप्व संघः अशीर्ये आत्मा परमः पावन स्त्वं ॥३॥ नान्यत्वत्तो भेदभानं
न चास्ति कविर्मनीषी परिभूः स्वयंभूः ॥ तथापित्वोकायन उत्तमोऽसि संसर्ग जै रुद्ध ह सोह देहान् ॥४॥
विभुर्महान् द्यावादिवं रोदसी त्वंच रोदस्योतो रुद्र ईशोऽद्वितीयः ॥ अकामकामो महिमा त्वं हि भूमा सोमा-
स दिव्यो देव एको ऽसि त्वं ॥५॥ अजो व्ययस्तववक्त्रं महेश प्रपन्नाः सर्वे दक्षिणं घोररूपं ॥ एते सर्वे पश-
वः कामकामाः तेषां त्वं पाशं छेत्तुम हस्य तोद्य ॥६॥ पयोनिधिस्त्याग एको नित्यो नित्यानां चेतनानांच
चेताः ॥ पतिः पतीनां प्रथमो विद्युदीशः त्वत्तो बभुर्भुवनस्य गोपाः ॥७॥ मनोवाचा मतिगस्त्वं हि गोप्ता सर्वे
सर्वेषां शर्व सर्वादरुद्रः ॥ बभ्रुर्मधुः पिंगलो विश्वनेता सहस्रभाः सनकाः प्रीति मीयुः ॥८॥ एते प्रसादाभि
मुखास्त्वयातः लोकेषु लोक्याः पालनीया महेश ॥ तवैश्वर्या दत्तकामा भवंतु नान्य त्तेषां त्वत्त एवा खिलेषु
॥९॥ संप्राप्ता स्ते पार मैश्वर्य योगं मुच्यंतु ते ममाया दिपाशैः ॥ स्कंद उवाच ॥ ॥ तदा देव्या वचः श्रुत्वा प्राह दे-
वो घृणानिधिः ॥ प्रणतान मरान्सर्वान् विष्णु ब्रह्मेंद्र पूर्वकान् ॥ हस्त मस्तक संयोगं कृत्वा देव उमाधवः ॥
गिरिश प्राह तो देवान् शक्तिं वै पातयंस्तदा ॥१२॥ ईश्वर उवाच ॥ देव्यानया बोधिता यूय मेवं वेदांत विज्ञान-

सुविनिश्चितार्थाः ॥ मद्ध्यानयोगे न सुरोत्तमाश्चिरं संप्राप्स्यथ ज्ञानमज्ञैर्दुरापं ॥१३॥ न चक्षुषा दृश्यमिदं
च खैः सदा न वेदवादैर्न च शास्त्रतर्कैः ॥ तपसैवानुदृश्योऽहमात्मा गुरुप्रसादेन शिवप्रसादात् ॥१४॥ विश्वं ते
वैपुला ग्रंथयोगः अनादिसिद्धाः कोऽहि वेदमेवं ॥ न सांपरायो भवतां बालका नाम नाथ विद्या विषये
कवर्त्मनां ॥१५॥ सम्मा युयं मया कल्पिते वोऽस्य लोके लोकाधीशा यावदावर्तनं वः ॥ तावद्ज्ञानं प्राप्य मध्ये
विलीना भविष्यथ प्रतिकल्पं सुरेशाः ॥१६॥ समामनु प्रीतपयध्वमद्य सुनिर्वृतास्तपसा केवलेन ॥ विज्ञा-
नतोऽन्यन्न मनसा नो रमंतस्तस्माद्धि दैरोऽद्य एको महेशः ॥१७॥ यज्ञैर्दानैस्तपसा नाशकेनमत्देवासैः
परिधूलनादराः ॥ धृतत्रिपुंड्रा भवपाशमुक्ताः शिरोव्रतेरग्निरित्यादिमंत्रैः ॥१८॥ उद्धूल्य गा-
त्राणि पवित्रभस्मनाऽऽराद्राणि चावर्तयत प्रीतये मे ॥ पंचाक्षरावर्तन जातहर्षाः मल्लिंगसंपूजनमात्रतुष्टाः
॥१९॥ कष्टैर्विहीनाः शिपिविष्टमिष्टैः बिल्वैः समभ्यर्च्य दिने दिने मां ॥ प्रकृष्टमुक्त्यैकभवोत्कटेरताः प्रनष्ट
मोहाः प्रकटाष्टमूर्तिं ॥२०॥ सर्वार्तिघ्नं हृदये संप्रविष्टं ध्यायंत मामेव सदा हृदिस्थितं ॥ संप्राप्य मज्ज्ञानमहो दुरापं
कोऽप्यं कनिष्ठं परितोषपुष्टं ॥२१॥ इष्टं यत्किंचिदपि विष्टपेऽनिवेद्य तद्भुंजत प्रीतियुक्ताः ॥ तेनैवाज्ञान

189

मखंड मिष्ट" मोष्टे, धुना संसृति बंधनाशं ॥२२॥ करोमि. पाशा भवतापसंभवान्स्म नातना न्नेदधा दया मय धहष्टः॥
अहोभवीद्गः परिपूर्णकामः किं विस्मृतो हृदये संप्रोविष्टः ॥ २३॥ मदः पूर्णो पूर्णएवास्मि पूर्णोः पूर्णो पूर्णो नास्य पूर्णत्
मयाहि॥ देव्याः प्रसादेनविमुक्तकामाः" चरंतु तुष्टाः परिपूर्णसिद्धयः ॥२४॥ तथापि किंचित्प्रवदामि वैभवं
कष्टं तदव्यक्तगतं ममाद्य॥ सर्वेषु देवेषु सदैव सर्वदा" लिंगाकृते गिरिमौलौ निविष्टः ॥२५॥ स्थानेषु पूज्योऽह
मनादिरिशो" मदूपलोक्यं भवतां सुदुर्लभं ॥ अहं त्वीलिंगो ऽपिहि लिंग संस्थः" सनातनः पूजनीयो भवीद्गः॥
॥२६॥ तदेवीलिंगं ममीलिंगमेवं" ज्ञातुं न शक्यं दुरधारकं तत् ॥ रूपद्वयं मे परमार्थतः सुराः॥ साकारनीरूपमिदं
हि दृश्यं॥२७॥ त्रिनेत्र मुख्य चन्द्रशिमौलि संयुतं" अंबायुतं नीलकंठं ममाद्यं ॥ ततोपि नीरूपमिदं हि लिंगं
जगत्पवित्री कुरुते, चनोभिः॥२८॥ ततो हि तत्केवल कष्टलभ्यं" तस्माद्भवंतः शरणं प्रयात ॥ कैलासवासो भवतां
सुदुस्तरः" तत्रप्रवेशो नहि, मद्य मेसदा॥२९॥ सर्वावभासो प्यमेक ईशस्तत्रांब पागण संघैश्च युक्तः॥ मुक्तोवि-
जह्रामि सदा स्तमायः कैलासलिंगेषु सदानिविष्टः ॥३०॥ केदार ॐकार मथाविमुक्ते महालये हर कोटौ-
प्रभासे॥ हिमालये श्रीनगमौलि संस्थे तथान्यदेशो त्तम संस्थलिंगे ॥३१॥ संपूज्यनुत्वा श्च भवंतु विज्वराः

रहस्यमेत (कथितं सुरोत्तमाः ॥३२॥ सूत उवाच ॥ ॥ इत्युक्तं गिरिजा मनोहर वचः श्रुत्वा विधींद्रादयो ॥
विष्णवीशान मरुद्गणाः सवरुणा नत्वा महेशं शिवां ॥ जग्मुः स्वाभिमत प्रदेश मखिला देवा मुदा शंकरं प्रा
प्य ज्ञानमहोदयं सुख चिरं मुक्त्यै च लिंगार्चकाः ॥३३॥ हिमालय नगोत्तमे हिम सुधाम मौलि स्फुरत्विम
द्रि वर कन्यका जटिल कांति कांतं प्रभुं ॥ पयोधि सुतया हरिः पयसिजात पुष्पार्चनै र्निनाय दिवसान्मु
मे वर सुलिंग केदारगः ॥३४॥ ओंकारं समवाप्य भारति पतिः सं नर्मदातीरगं पुष्पै र्बिल्व दलार्चनैः
श्रुति गतै र्मंत्रै स्तुवन्मामुने ॥ तस्याखिल पातकं हृदि गतं चाज्ञान मप्यं ततः सृष्टिं प्रस्तुतया स्व
कीय वदनै स्तुष्टा व चाप्ता कृतिं ॥३५॥ रुद्रो विमुक्त पद मोम विमुक्त मेत त्संप्राप्य लिंग निलयं वरगंग
यापि ॥ विश्वेश्वरं त्रिभुवनेश्वर मीप्सितारं त्वामंबिका मगसुतां सुविशाल नेत्रां ॥३६॥ अभ्यर्च्य
पुष्प निकरैः पयसोर सैश्च नीरैश्च सेव्य वर बिल्व दलैः समर्च्य ॥ ले भेप्य लभ्य मपि वेद शिरः प्रतीतं ज्ञा
नं तदा सुविमलं नगराजकन्ये ॥३७॥ इंद्रोप्य थो मरकंटक मेत देव देवं महेश्वर मुमे वर बिल्वपत्रैः ॥
संपूज्य तच्छ्रुति गतं विमलं मदीयं ज्ञानं सदोदित मखंड मवाप्य तुष्टः ॥ ३८॥ यमोपि वर शैलके

विमलगंधमाद्रौ शिवं समर्च्य निजपातकैः श्रुतिगतं चले मे शिवे ॥ विमुक्तहृदयस्तदीत्रिदलबिल्वपत्रैः शिवे स एव सुरवसंपदां प्रवरदक्षिणाशाधिपः ॥ ३९ ॥ श्रीशैलनाथकमुमे प्रथिते प्रदोषे श्रीदंधनाधिपोतिरर्च्य विमुक्तपापः ॥ ज्ञानं च यद पतिरत्नयमाप श्रीव्यपदाश्रयेण विमलं सलभेत्सु मोक्षं ॥ ॥ ५० ॥ तावीशिवनो करहदे पुरंतदाप्य नागेश मर्च्य विविधैर्लभतां सुपुष्पैः ॥ मोक्षं तथैव मिष जामधिपोतथातो वेदं तथा युष मुमे सम् पतुस्तौ ॥ ५१ ॥ वायुः काम दवैघनाथ विपिनाधीशं समभ्यर्च मां बिल्वैः कोमलपुष्पनीरजलवैः संप्राप्य मोक्षं द्रुतं ॥ अग्निः पुष्करमीश्वरं त्रिभुवनाध्यक्षं समभ्यर्च्य वै सर्वभक्षसमुद्भवं प्रथितमप्यंहो विमुक्तो बिके ॥ ५२ ॥ गोकर्णं समवाप्य तु हि महतः पूज्येश्वरं मां शिवे ॥ बिल्वैः कोमलपल्लवैश्च वसवो दित्यास्तवैस्तु प्लुवुः ॥ श्रीमत्र्यंबक मप्यगस्तु ते तेक्षादशार्का हि मां हो मे हेशीरुद्रास्त्व भिपूज्य त्रिदलैश्च बिल्वपत्रैः ॥ ५३ ॥ परिणत हिमधाममंडलोऽपि शंभुं हृदयांभोजसुपंडरीकवासं ॥ गोपर्वते समभिपूज्य तथैव शंभुं मार्तंडकोपि गिरिजे समवापमुक्तिं ॥ ५४ ॥ कांचीं कांचितदिक् तटां दिवि पदस्त्वे काम्रमूले हरं कामादीमपि भोगभाग्यनिकरैः संपूज्य मुक्तिं गताः ॥

अन्ये चापिग्रहास्तथैव मुनयो देवासुरा मानवाः॥ गंधर्वा ऋषयो रगा वरा यक्षगणा मुक्ताः समभ्यर्च्य मां॥४५॥ श्रीकंठे तृण शंकरे सुविहिते रत्नाद्रि मौलिस्थिते॥ श्रीमातृप्रभवे गिरींद्रतनये श्रीकालहस्तीगिरौ॥ जंबूलिंगके वेरजातट्युगे जप्ये तथा कुंभके॥ पुण्ये श्रीधवलार्जुने विधिपुरे श्रीवेदकाब्जे पुरे॥ पुण्ये श्वेतवने मयूरविपिने छायावने शंकरं॥ संपूज्य त्रिदशेश्वरं गिरिजया मुक्तिं परां ते ययुः॥ हालास्यनाथ कमुमे वरशालिवाटिं॥ नाथं च कांतिमति काश्यपुराय ताक्षीं॥४७॥ देवांगना समभिपूज्य हलिं सत्ता स्ये॥ नृत्यंति हेमसासीमवगाह्य तांल्वां॥ मार्कंडेय घटोद्भवौ घट हारं संपूज्य मृत्युं क्षणा॥ द्वौ जिग्ये भुवनेश्वरि त्रिभुवने मत्ता दशूलाहतं॥४८॥ स्कंदः स्वामिगिरौ समर्च्य गणपः तद्दक्षिणार्जतके॥ मामाराध्य गणाश्च भूसुरगणास्तत्र त्यलिंगे पुमां॥ दिव्यातीरनिकेतने मयि सदा नाम्ना महाकालजो॥ सं प्राप्यार्च्य गणत्वमाप सुकृते मुक्तोप्यभून्नृणः॥४९॥ भृंगी नंदिक चंडिकौ बलि सुतः पौलस्त्य हुंडादयो मामाराध्य सदैव तुष्ट वपुषमेतन्मे समाकर्णय॥५०॥ ॥ इति श्री शिवरहस्ये प्रथमे माहेश्वरांशे देवकृत पूजनं नाम षट्पंचासोध्यायः॥ ॥५६॥ श्री काशी विश्वेश्वरार्पमस्तु॥ श्री॥ ईश्वर उवाच॥ ॥ देवैर्गणैर्द्रमुनिभिः स्तुतोहं तत्र तत्रोह॥

तस्त्वं सावधानेन मतः शृणु नगात्मजे ॥१॥ विष्णुब्रह्मादयो देवास्तथैवेगणपामम ॥ मां तुष्टुवुर्महादेवं पद्यैर्गद्यैर्मनोहरैः ॥२॥ ॥विष्णुरुवाच ॥ ॥कनत्कुजद्वा कुठीरगां विहंगसंघमंडितां करिप्रियां गसंगतां मुखाब्जगां तिरंगितां ॥ कपर्दकोटिसंगतां कथासुधातरंगिणीं भजामि शंभुमौलिगां महेश्वरीं नतोस्म्यहं ॥१॥ खरादिखड्ग संहतिप्रपंचबंधनां तकं प्रखास चंद्रहासधृक् ॥ अखंडखंडपरशुं प्रभाविते तर्दकैवनत्खणज्ञपारणस्फुरत्खरादिदुष्टगर्वहत ॥२॥ ॥ब्रह्मोवाच ॥ ॥मनोलिंगं वचोति गंगणातिगं गुणातिगं भुजंगराजभोगगार्चितां घ्रिहृत्पद्मो जगं तरंगिणीतरंगजं प्रफुल्लपद्मनालगं भजामि रत्नरंगगं कुरंगपाणिमीश्वरं ॥३॥ हिरण्यदं महीप्रदं पशुप्रदं सुतप्रदं हराज विष्णुसत्पदप्रदान भोगमोक्षदं ॥ भजामि देवदेवतं गुहाहितं जगद्धृतं प्रभावितं सुभाषितं महाश्रुतीडितं शिवं ॥४॥ ॥रुद्र उवाच ॥ ॥महाहिराजकंकणं धराधृगात्मजासखं ज्वलत्त्रिशूलधारिणं मुनीन्द्रबालपोषणं ॥ कुरंगबालधारिणं सितत्रिपुंड्रधारिणं भजामि सोमधारिणं करीन्द्रकृत्तिधारिणं प्रकृष्टनामघोषणं ॥५॥ सुधांशुखंडदीधितिप्रचंडमौलिमंडलं सुकुंडलीकृताछगंडकुंडलीश्वरं प्रभुं ॥ अखंडदिव्यदीधिमत्सुचंद्रखंड-

देहकं विधातृ मुंड षंडज प्रकाश माल जालकं ॥६॥ भजामि चंड तांडवं घनांड जांडज प्रियं तुहुंड हुंड कोपियं महोरु बाहु दंडकं ॥ ॥इंद्र उवाच ॥ ॥ पुरांतकं स्मरांतकं भगांतकं मखांतकं (भजे) गजां धकांत कांतकं शिवंसदा हृदंबुजे ॥७॥ ॥वायुरुवाच ॥ ॥ सुदक्ष दक्षशिक्षकं महोक्ष वाह कद्रुगं सुपीत वाहन प्रियं मयस्करं यशस्करं तिरस्करं महेन सोम हस्करं नति प्रभं तिरस्कृतं दुरात्मनां ॥ सुमस्करैर् मनोगतं सुतस्करं हविष्करं भजामि शंकरं सदा हृदंतरे सु विस्तरं ॥८॥ ॥अग्निरुवाच ॥ ॥ शुभां गदं शुभास्पदं सुरेषु दत्त सत्पदं महा विभूति धारिणं सुमूर्तिदं सुमोददं ॥ भवादि हीन बोधदं करींद्र चर्म वस्त्रदं प्रचंड सोम मंडल प्रदीप्त शिवं भजे सदा ॥९॥ ॥यम उवाच ॥ ॥ हरं सुसु भक्त तत्परं गरं धरं ज्वलं प्रबुद्ध वैशत्रु संहरं मयस्करं महेश्वरं ॥ हरीशरं महीधरोरु कार्मुकं भजामि भूरथं हरं ॥१०॥ ॥सूर्य उवाच ॥ ॥शरीर भोग संहरं भजामि देव भास्करं हरं च शंकरं सदा परात्परं नटेश्वरं जनार्दनं फणीन्द्र राज हारकं सुमार मार कारकं ॥११॥ ॥ कुबेर उवाच ॥ ॥घनाधिपं गणादि वृंद पाधिपं उमाधिपं वृषाधिपं जगत्सु कारणाधिपं ॥भजामि चित्सुखाधिपं नगाधिपं हृदाधिपं ॥१२॥ ॥ इंद्र उवाच ॥शरच्छ-

* पंक्ति ८-१० पाठान्तरं — "महीन्द्र भूभुजां सुखं, त्रिलोकराजसत्सखं ॥ सुसामजात सन्मुखं, बहिर्मुखैः सुदुर्दृशम् ॥ समस्त दुःख हारकं, हसन्मुखं भजे शिवं ॥ शिखी सखं, सदा शिवो वसत्वशेषतो हृदि ॥१९॥

शिवरह० १५२

शिसमच्छविं महोक्ष पुच्छ चामरं महाछ्छ तरु कल्पक प्रसून गुच्छ मस्तकं ॥ निरीछ्छ जनवल्लभं तडिछ्छ विकर्पदकं हृदि स्थितं शिवमव्ययं सुकच्छ पत्त वेडितं ॥१३॥ ॥ वरुण उवाच ॥ ॥ विशिष्टोद्दिष्टादि शिष्टेष्ट नष्टं गिरिष्टं महिष्टं तथा ज्येष्ट मीशं ॥ भजामीष्ट मष्टाकृतिं भक्ति तुष्टं कनिष्टं चकुष्ठादि कष्टैक नाशं ॥१४॥ ॥ अश्विनावूचतः ॥ ॥ कटिपट कटि त्वचंच डा कुटी रात्सुर पाटी रतटी तटोरु गंगा तट बद्धेन्दुकला सट वटोरु धारा निकटा डंकटको टिडंक हस्तं ॥१५॥ ॥ वसव ऊचुः ॥ ॥ भुजंग राज हारकं महाविषाग्नि धारकं भवांबुधेः सुतारकं भयानकं महेनसां ॥ भजान्त कांतकं महेश्वरत्व दायकं सुरासुरेंद्र नायकं जहा गनार्घकायकं ॥१६॥ ॥ मरुत ऊचुः ॥ ॥ महागिरि खंभुजां सुखान्तरंग मद्रिजा सखं सुसामजात सन्मुखं बहिर्मुखैः सुदुर्मुखं समस्त दुःख दुर्मुखं हसन्मुखं भजे शिवं शिखी सखा सर्वजलं सखं न तत्व शेष सन्मुखं हृदि ॥१७॥ ॥ रुद्रा ऊचुः ॥ ॥ दृगंचलस्फुलिंग लेश भस्मतांग नंग भस्म संगतं ॥ ~~सुचक्र दा शिवकं महोक्षवाह कर्णगं~~ पतंग दृक्समंतरंग मिंदुधामगं विहंगवाहनार्चितं ॥१८॥

मारेश्वर ७२.५७

१५२

\+ पंक्ति २ पाठान्तरं — "दृगंचल स्फुलिंगलेश दग्ध मीनकेतनं ॥ पतंगदृक् समान्तरं, विहंगवाहनार्चितं, ॥ हृदिस्थितं शिवाङ्कं, पयोज राजि मौलिकं ॥, महोक्षवाहवत्सलं भजाम्यधोक्षजार्चितम् ॥२०॥

॥ पंक्ति २-४-पाठान्तरं - "हृदादिहीन मक्षतं, त्वपक्षयादिवर्जितं ॥ क्षपेश मौलि मीक्षणी कृताब्जमित्र कोत्तमं ॥ अलुप्त मक्षताशि दृश्य विग्रहं विलोचनं ॥
विरूप काक्षमीश्वरं भजे सदा हृदन्तरे ॥ २१ ॥"

भजेशमं दंष्ट्रा त शिवांग कं पयो चिंतांग मौलि संगतं ॥ [illegible] समंततं गमिंदुधामगं ४ सुदक्ष दक्ष शिक्षकं महोक्ष
वाह कनगं सुपीत वाह नोप्रियं भजाम्य धोक्ष जार्चितं ॥ हृदक्ष हीन मक्षतं त्वपक्षयाद वीजितं भजामि भक्त जालके
उपेक्षया सुवीजितं ॥ क्षपेश मौलि मीमीक्षणी कृताब्ज मित्र काननं ॥ अलक्ष मक्षताक्ष दृश्य विग्रहं विरूपकाक्ष
मीश्वरं भजे सदा हृदंतरे ॥२१॥ ॥ आदित्या ऊचुः ॥ ॥ गणाधिनाथ नोपिता खिल प्रपंच गाधिजात सं
नुतं दिगाधि गाय कांति थो कृताब्जो दिव्य पादुकं ॥ भजामि [illegible] रात्रिनाथ मौलिकं स्फुरत्सुरं जिनोत्तरंगि
णीदि [illegible] वासनाथ गं सदा ॥२२॥ ॥ गणेश उवाच ॥ ॥ अशेष शोषिताखिल प्रपंचजात शेषकं मुनी
ष्ट जात पोषकं ॥ समुद्र नीर शोषकं प्रकाममिष्ट लोचनं महांबुद प्रकर्षणं तडित्समान घोषणं ॥ भजामि
वेद भाषिणं विधेस्तु सृष्टिकारणं ॥२३॥ ॥ स्कंद उवाच ॥ ॥ घनस्तनयु गार्धकं घनस्तनितनि
म्नमेरुदाघ घृणी युतं सुचक्षुषं ॥ निराकृताघ संगकं घृणायुतं स्वभक्तके धृताक्ष भूति सुप्रियं [illegible]
घनाभ कंठ मंडलं स्वनन्नखा ग्रनिष्कृताद्धि धीज मुंड मंडलं भजा तरंग चिह्नं ॥२४॥ ॥ नंदीश्वर-
उवाच ॥ ॥ चाचरं सुचं करं कपोड योनिधारकं निशाचरांतकं [illegible] चतुर्मुखान्त नीरविंद वेदजालके

पंक्ति ४-६-पाठान्तरं - "घनस्तनयुगार्धकं [illegible] स्तनितनिम्न मेरुदिकं ॥ सुचक्षुषं निराकृताघ संगकं घृणायुतं ॥ धृताक्षभूति सुप्रियं घनाभ कंठमंडलं ॥ विधीज मुण्डमालकं भजेऽतरंग विरुध

* पंक्ति २–५ पाठान्तरः– "चण्डिरुवाच ॥ हरिङ्क्षानमीश्वरं जटाधृतत्रिमार्गगं ॥ नटेनमीश्वरार्चितं कटीभचर्मधारकं ॥ ललाटपट्टपावक तरंगिणी सुहंसकं ॥ वटोरुमूलगं भवे भजे शिवं महोत्कटं ॥२६॥ भृंग्युवाच ॥ मृडं दृढं परीवृढं सुबाढ बाढ हृद्गतं ॥ समूढ व्यूढसन्मुखक्रियासमूहतर्पितं ॥ अनूढकन्यका द्विजं सखं समूढ गूढ हृद्गतं ॥ महाकराम्बुजोत्थित प्रकाम ढक्क वादनम् ॥ २७॥"

शिवरह० १ (शिवम्)॥ सुतं विचारमात्रगोचरं सुपंचवक्त्रगोचरं (तृप्ति) ॥ सुनिश्चलं हृदंतरे सुधामरो भवी जितं ॥ (महोत्कटं भजे शिवं) ॥२५॥

माहेश्व: ७० ५६

१२३ ॥ चंडीउवाच ॥ ॥ हरि-जटातटी निकं कटे भ चर्म धारकं ॥ कपाट हृत्त शीनिकाट हंसकं वटो रुमूलगं शिवं भजे शिवं महोत्कटं ॥२६॥ ॥भृंगी उवाच ॥ ॥ मृडं धृढं परीवृढं सुबाढ गाढ हृद्गतं ॥ समूढ व्यूढसन्मुखं क्रियासमूह तर्पितं ॥ अनूढ कन्यका द्विजा सखं समूढ गूढ हृद्गतं ॥ महाकरांबुजोत्थित प्रकाशढक्क वादकं ॥२७॥ ॥ईश्वर उवाच॥ ॥ गीर्वाणैरमृतार्थिभिः किलशिवे क्षीराब्धि थारार्णवे ॥ कृत्वा वासुकिरज्जु (मंथनं) मज्जनविधौ मंथानमंद्राचलं (था) ॥ तस्माद्प्युदमून्महामणिगणं धेनूगणं पंकजाज्ज्ञाता चौ षधिनायकः सुरतरुः सारंगतीरंगकौ ॥२८॥ धूमोत्कीलितकाल कूटशबल ज्वालादिगंतैंतताः ॥ कांदीशीकृतदेव दैत्यनिवहं दृष्ट्वा हमेको घृणी ॥ तत्पाश्यारिवलदेव संघ विनुतो नीलाञ्छ कंठोभवं ॥२९॥ अंकपट पटुवाक्य मौलि गुंफे स्तटिनी जालकं मौलिरागं हा रिवलाग्रः ॥ करटि त्वक्पट भूत दोपोकं पटि तद्रे हृदब्ज नृत्त टोपः ॥३०॥ संध्या तांडव डंबर व्यसनिनो भर्गस्य चंड भ्रमे प्रोन्नृत्यद्भुज चंड मंडल भुवो मंक्षा निलाः केवलं ॥ येषामुच्चलतां जवेन झटिति व्यूहेषु भुमीभृतां उड्डीनेषु बिडौजसा पुनरसौदं-भोलि शालो भितः ॥३१॥

१२३

॥सर्वदेवा ऊचुः॥ ॥ त्वल्लिंगार्चनतो महेश शरदां जीवेम शंभो शतं त्वन्नामाखि सदा ब्रुवामच विभोभक्ता न्हि नंदामते॥ लिंगं बिल्वदलोत्तमांगमसकृत्पश्येम पुण्याः कथाः शृण्वाम; प्रतिवासरं च विगतेन स्का भवा मो वयं॥३२॥ ॥शेष उवाच॥ ॥वसुधाधर धारकं महेशं वसुधाराधिपमित्रमित्रसंस्थं॥ हिमकर हिम भेष जाक्षि युग्मं, हिमगिरि सुत यानतोस्मि देवमाद्यं॥३३॥ ॥ईश्वर उवाच॥ ॥ पृष्ठेष्ठ लग्न कमठाकृति लोकनाद्यं भूदार धारि तरसातल तोविते दूरं॥ ब्रह्मांड खर्पर मतीत्य गतोर्ध्व मौलिं लोके शदृष्टि विरहान्न मलिंग मेतत॥३४॥ तल्लिंग पूजनमुमेश्रुतिमौलि वाक्यसिद्धांत गर्भित पद प्रमथैर्न भाव्यं॥ तत्कोशिव देव कुरुते ममच प्रसादान्मो वासुरा भवित भक्ति रसाहि केचित॥३५॥ चंडांशु प्रकट प्रदीपित तमस्तोमैक सीमा दिशः खद्योत द्योतने व प्रभवति भवतां देवजालं समग्रं॥ किं निर्नीवाकतरुः सुरद्रुम समो भूयात्तु तोमेशिवे, अज्ञानं किमु वेदजेन सदृशं, विष्ण्वादयः किं समाः॥३६॥ गगनातिग लिंग मोलि मेतत् वर पाताल तलात्त मूलभागं॥ महसा धवली कृता खिला शंभपदाशाप्य समं ममेष्ट वासं॥३७॥

शिवरह० १ गगनगतमपारं तेजसेत्थं जनितानंदभरेण देवसंघाः ॥ अवनितलनिवासमस्तकास्ते परी माहेश्व० अ० ५८

१२८ बध्वांजलयो ददर्शुरीशं ॥३८॥ ॥सूत उवाच॥ सुरकुवलयसोमं सोमधामोत्तमांगं म-

धुरिमगुणसीमा भूमसामादिगीतं ॥ सुमसममृदुकायं भीममीशं च सोमं कुमतिपथविदूरं

कामदं कामनाशं ॥३९॥ कमलामलनेत्रपूज्यपादं कमलारातिजटातटोरुभूषं ॥ कलिता

लकगांगतुंगलीलं कलशोद्भूतमुनिप्रपूजितांघ्रिं ॥४०॥ ॥ इति श्रीशिवरहस्ये प्रथमे माहे-

श्वरांशे सर्वदेवैः कृतस्तुतिर्नामसप्तपंचाशोऽध्यायः ॥५७॥ ॥ श्रीकाशीविश्वेश्वरार्पण-

मस्तु॥ ॥जैगीषव्य उवाच॥ ॥ अहोज्ञानमहानंदधारामृतनिमज्जनैः ॥ सानंदम

गृह्दयाः शिवज्ञानहताशुभाः॥१॥ धन्यावयं न संदेहः स्कंदानंदैकमधुराः॥ किं

तल्लिंगं महेशेन प्रोक्तं तद्वदमेऽधुना ॥२॥ किं तल्लिंगं कश्च तल्लिंगी को वा तल्लिंगपू-

जकः॥ लिंगार्चनेन किं प्राप्यं वद विस्तरतोऽधुना ॥३॥ त्वद्वागमृतधाराभिः पापदा १२८

वानलो मम॥ शांतः प्रशांतं चित्तं च महानंदाब्धिवीचिगं ॥४॥ ॥सूत उवाच॥ ॥

४ पंक्ति १०- स्कन्द उवाच ॥ इत्येवा वचनेन सुन्दरतर स्वान्तेन्दु मौलिस्तदा ॥ वीक्ष्याम्बा मुखपंकजोत्तम लसन्नेत्रालिमालादरः ॥ वेदान्ताम्बुजभास्कर स्त्रिजगतामाधार भूतो हरः ॥ प्राहोत्फुल्ल मनोहार मन्दवदना देवीं मुदा शंकरो ११ ॥ पुनः प्रणम्य सा देवी प्राह कामारिमीश्वरम् ॥ १२ ॥ देव्युवाच ॥ देवदेव महादेव महाकारुणिकोत्तम ॥ किं तल्लिंगं, कश्च लिंगी, लोके लिंगं किमुच्यते ॥ १३ ॥ कथं लिंगं, कश्च लिंगं समर्चयति शंकर ॥ तद्वदेवानुपूर्वेण यदि ते मय्यनुग्रहः ॥१४॥.

जैगीषव्यव चोवीचो संप्लावित हृदंतरः ॥ स्कंदेनं दित मंदा रोमुह्यं तत्पारमेश्वरं ॥५॥ देव्ये देवेन क यितमवादीच्छांमवायतु ॥ ॥स्कंद उवाच ॥ ॥ यथा मुने त्वया पृच्छि प्रश्नोऽयं सर्व दुस्तरः ॥ सं तथैव पृष्टो भगवान् दृष्ट्वा कैलास मौलिगं ॥ कैलासेश्वर लिंगं च प्रणम्य स्तव्य भक्तितः ॥६॥ ॥देव्युवाच ॥ ॥ लिंगं कैलास मौलो जनित तिलि हिता पार तापैक भंगं मौछि ता जैक भृंग रवि शशि शिखि जापार कांतो न्नमांगं ॥ ध्यानानंदैक संगं विविध जनिज रानाशने नाप्य संगं शांतं स्वांतैक संगं कथय भवहरं शांगमध्या न संगं ॥ ७॥ विविध जन विधीन्द्रै विष्णु मिश्रैश्च रुद्रैरमरवर समूहे दैत्य गंधर्व संघैः ॥ मुनिवर गण वृंदैः स्कंद हेरंबकाद्यै नहि खलु भगवन्नेतल्लिंग मेतत्थि दृष्टं ॥ कथमिदमनलाढं पश्यति प्रीति युक्तो यम नियम तपस्या पारदानैर्मखैर्वा ॥ जनि शत तपसा वा प्राप्य मेतन्महेशात्रि भुवन भुवने वा कश्चिदस्तीह द्रष्टुं ॥९॥ कथयाद्य हसि शंभो आः किमेतद्धि चित्रं अहमपि भगवंस्ते ज्ञाशिषं नैव लिंगं ॥१०॥ ॥स्कंद उवाच ॥ ॥ इत्थं देव्या पुरा पृच्छि महेशो भक्त वत्सलः ॥ तस्यैवा कथयत्पुण्यं शिपिविष्टः कथानकं ॥ निविष्ट हृदयो देव्यां अष्ट मूर्तिः प्रहृष्टिमान् ॥१४॥

उवाचाल्हादयन्देवींत च्छृणुष्व गणोत्तमैः॥ सुरेंद्रैश्च मुनींद्रैश्च गोप्यमेतत्सनातनं॥१६॥ नाख्येयं
कस्यचिद्वापि ज्ञानहीनाय शंभवैः॥ ॥ईश्वर उवाच॥ ॥सावधानेन देवेशि लिंगपूजाविधिक्रमं
॥१७॥ शृणु पर्णे प्रणय तो मयोक्तं हृदये धर॥ नाख्येयं कस्यचिद्धापि रहस्यं मम सर्वथा॥१८॥ ल
यनात्सर्वजगतां लिंगमित्युच्यते शिवे॥ नील (लीन) मर्थं गमयति तस्माल्लिंगमुच्यते॥१९॥ लमुक्रीडांच
जगतो गच्छतीतितदुच्यते॥ तस्माल्लिंगं विदुः प्राज्ञाः लिंग (बिरु) हीनं च तत्प्रिये॥२०॥ अर्चनं च प्रवक्ष्या
मि अर्चकं च विशेषतः॥ लिंगं गुणत्रयातीतं ब्रह्मविष्णुमहेश्वरैः॥२१॥ पीठपीठ्यादिरहितं पूज्य
पूजाविवर्जितं॥ ध्यानध्येयादिरहितं निर्गुणं तमसः परं॥२२॥ जगज्जन्मोदयस्थान विनाशनविव
र्जितं॥ ओंकारध्वं सप्रणवं त्रिमात्रापरिवर्जितं॥२३॥ भावाभावादिरहितं भावाभा(व)विवर्जितं॥ बोध्य
बोधादिरहितं व्याप्यव्यापकवर्जितं॥२४॥ ज्ञान ज्ञेय ज्ञानहीनं खंडाखंडविवर्जितं॥ प्रभवाभाव
संहारतिरोधानादिवर्जितं॥२५॥ ध्यानध्येयादिरहितं महाध्यानविदूरगं॥ अलक्ष्यं लक्षणाही
नं गोप्यगोप्यकवर्जितं॥२६॥ न सन्नासन्न चैवासत्सदसच्चैव चैव सत्॥ सत्तामात्रादिरहितं =

केवलं स्वात्मदर्शनं ॥२७॥ भानाभानविहीनं च स्वभासा भासिताखिलं ॥ चेतूचेतकराहित्यं क्षरा
क्षरविवर्जितं ॥२८॥ चराचरविहीनं च प्रमामेयादिवर्जितं ॥ बिंदुनादातिगं साक्षात्सादिसाद्यादिवर्जितं
॥२९॥ बिंबिबिंबातिगं तत्तु प्रतिभासादिवर्जितं ॥ नैव दृश्यं न चादृश्यं ग्राह्य ग्राहकवर्जितं ॥३०॥
न वाग्वाक्यविहीनं च वाचां दूरमनौपमं ॥ न मनो न मनः प्राप्यं न प्राप्यं प्राणबोधकं ॥३१॥ न चक्षू रूप
रहितं तद्दृश्यज्ञानवर्जितं ॥ न श्रोत्रं श्रवणाद्धीनं तदाकाशमनौपमं ॥३२॥ न घ्राणं गंधहीनं च पृ
थिवीपरिवर्जितं ॥ न रसं तद्रूपो हीनं जिह्वास्थानादिवर्जितं ॥३३॥ न पाणिपादपाय्वादि महत्स्थी
नं शिवेहितं तत् ॥ न रूपरसगंधाद्यादि शब्दस्पर्शविवर्जितं ॥३४॥ नैवाकाशमनाकाशमाकाशस्या
पि चेतकं ॥ न भूमिर्भौतिकैर्हीनं नं घनभावविवर्जितं ॥३५॥ न तेजस्तेजसा हीनं सर्वतेजः प्रवर्तकं ॥ न
वायुश्चलनाद्धीनं वायोरुद्बोधकं हि तत् ॥३६॥ न चैतत्सलिलं साक्षात्सलिलद्रवकल्पकं ॥ भूतादि
हीनं भूतादि भूताधारं सनातनं ॥३७॥ अपाणिपाणिवदनं अचक्षुःश्रुतिवर्जितं ॥ सर्वेंद्रियगुणा
तीतं सर्वेंद्रियविवर्जितं ॥३८॥ सर्वस्य प्रभुमीशानं सर्वस्य शरणं सुहृत् ॥ सर्वेंद्रियगुणैः क्रांतं नित्यकांतं
सदोदितं ॥३९॥

शिवरह० १
१२६

माहेश्व० ग्र० ५२

नवद्वारगृहांतस्थे दिव्यपीठे प्रतिष्ठितं ।। यदप्रतिष्ठं विश्वाख्यं विश्वहस्तोरुपादकं ।।४०।। विश्वमौलिं
विश्वपीठं विश्वपीठतमः परं ।। नतत्र किंचित्प्रतिभाति रूपं यस्मात्परं (कारणं) नापरमस्ति (कार्यं) किंचित् ।।४१।। वेदांत
वेद्यं निर्गुणं यद्व चोगं यतो जातं भुवनं वैविचित्रं ।। यस्मिं लिंगे स्थितं चैतद्यस्मिं ल्लीनं जगच्छिवे ।।४२।।
यदाधारमिदं विश्वं त्रिगुणं परिवर्तते ।। तल्लिंग परिमाणं हि केन वक्तुं हि पार्यते ।।४३।। परिमाणादिर
हितं गुणखंडत्रयातिगं ।। अखंडमेकपिंडांडब्रह्मांडोपरितः स्थितं ।।४४।। न प्रतिष्ठा न यस्थानं त
ल्लिंगस्य महेश्वरि ।। नालयस्य महेशानि सर्वालयं महच्च तत् ।।४५।। सर्वभूतमहाकोशगर्भागार
स्थमंबिके ।। अणोरणीयोऽपि महन् महतोपि महत्तरं ।।४६।। सर्वाधारमनाधारं विश्वरूपप्रकाशकं ।।
तेजोमात्रं स्वप्रकाशं जीवेशाज्ञादिवर्जितं ।।४७।। प्रत्यक्षैतन्यमात्मानमानंदघनमद्वयं ।। ब्रह्मवि
ष्णुहराद्यो ऽथ पीठजालविवर्जितं ।।४८।। स्वात्मैकवेद्यं तल्लिंगं स्वस्मिन्नेव प्रतिष्ठितं ।। तद्भूमा परमा
नंदं तन्नानानास्ति किंचन ।।४९।। तस्मिंल्लिंगे दृष्टिगते दृग्गूपौलिंगता मियात् ।। त्लिंगोऽप्यलिंगो भव
तितल्लिंगस्यैव शीलनात् ।।५०।। नान्यं पश्यंति तल्लिंगं नान्यं जानंति केचन ।। तल्लिंगं परमानंदं सही

१२५

नंरसातिगं ॥५१॥ उपास्यं सर्वदा सर्वैः तदुनात्येति किंचन ॥ न तस्य मोहिमा कश्चित् स्वमहिम्निप्रीत
ष्ठितं ॥५२॥ सर्वहृत्संस्थितं लिंगं नित्यं सर्वप्रकाशकं ॥ अवस्था भेद रहितं माया गर्भ गृहांतरं ॥५३॥
सार्वकालिक पूज्यं तत् षट् त्रिकालादिवर्जितं ॥ प्रतिष्ठं स्वावृतत मोराशि स्वाभान भासकं ॥५४॥
न तत्र वाक् नमनो वा कदाचिन् न चेंद्रियप्राण भूतादि संघः ॥ स्वयं प्रभातं भासितुं नो समर्थो दृग्रूपं तत् के
वलं बोधहीनं ॥५५॥ जीवेश्वरौ ब्रह्म विष्णू कदाचित्तल्लिंग मेव स्व कु दृष्टि हीनौ ॥ किंचित्तत्र
सर्वज्ञ विमोहमानि नाहंकारमाया विवशांतरंगौ ॥५६॥ हंसो भवद्वाक्य जपाभिमां वदन् जीवो
विधिर्मोह जालेषु मग्नः ॥ अहं गृहोपासना शास्त्र जालैः सर्वज्ञ मेवाभिमुखे युयोधम् ॥५७॥ विष्णुंतद
चेश्वर प्राज्ञ मज्ञं सचाप्यहंकारवशांतरात्मा ॥ अहंच सर्वेश्वर इत्यथो व्यपदृष्ट लिंगोभ्युवाच
(छिन्नमं = विछितम्)
विधित्वं ॥५८॥ एवंच तौ युयुधाते ध शास्त्रैर्मिथ्याभूतैः पश्यमोहांधकौतौ ॥ कदाचिदैवंत
विहाय मोहं नरानरौ विधिविष्णू भवानि ॥५९॥ व्यपेत मोहौ भवतं तदंबिके दृष्ट्वा हतु लिंगमतद्वि
लोक्य ॥ पुनश्च माया प्रभवैश्च पाशैर्मौलिं मूलं चास्य पश्याव चेति ॥६०॥ नांतो न मूलं नच मौ

192

शिवरह० तिरस्य लिंगस्य दृष्ट्वो परतो परतो सदा शिवे ॥ भूदारहंसाकृतिदेह मा जौस्तु त्वा चलिंगे व्यरमंत तौतदा ॥६१॥ महेश्वरखण्ड

२२७ ॥जीवेश्वरौ ऊचतुः॥ ॥दारादरौ तौ हरि वेधसौ शिवोहं सारव्य मंत्रेण विभाव्य देवं ॥ ज्ञातावनी शौ यदृ दृष्टलिंगा वलिंगमाकाश मधर्म कौ तदा ॥६२॥ व्यपेत मोहा वभवंत तौ तदा उपाधिहीनोनहिकिंचिदत्र ॥ तदेवलिंगं न पूजनाया सपर्येर्नरैः शिवे ॥६३॥ कार्ये शिला धातुज बाणलिंगे चरेस्थिरे वाशिपिविष्टलिंगे ॥ संपूजयेद्भिल्वदलैर्भवानि भवां बुधेः संतरणा यत्नोकैः॥६४॥ तल्लिंग पूजान कदाचिदृशैः नरैः सुरैर्वा गण विप्र वर्यैः ॥ कर्तुं न शक्या शिवि भै रुपाये र्दानैस्तपो नाशनयादिभिः शिवे ॥६५॥ समर्चनं तत्कथये भवानि गूढं सदा प्राज्ञ तमैक गम्यं ॥ तदर्चनं पुण्य तरैश्चलभ्य मलभ्य मन्यै र्नृ पशुत्व धर्मैः ॥६६॥ भूताधिकारण धराधा दारणे न सर्वज्ञरूप हरिणा किटि रूपकेण ॥ किंचिज्ज्ञ जीव वरहंसक भूतपुण्य पाथो जजात वदनैः स्तुत मर्चितं च ॥६७॥ हृल्लिंगमात्मक मुमेमन साभि पश्य पश्यन् तदात्मक तयाभवती वचित्रं ॥ ॥ ६८॥ इति श्री शिवरहस्ये प्रथमे माहेश्वरांशे आत्मलिंग कथनं नाम अष्ट पंचाशोध्यायः॥५८॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ ॥ ॥ईश्वर उवाच॥ ॥ २२७

अहमीशश्च जीवोऽहमित्यहंकारमानिनौ ॥ तावेव हरिब्रह्माणौ तल्लिंगादर्शकौ शिवे ॥१॥ तन्मौलिमूलं
चमूरी सोऽहंकारः प्रकीर्तितः ॥ अहंमानाभिपन्नानां नाहि तत्पूजनं शिवे ॥२॥ वर्णाश्रममहाधर्मैश्च
मिमि स्तत्पूजनं ॥ तत्पूजारहितानां तु नास्ति मुक्तिः कदाचन ॥३॥ तत्पूजया विमुच्येत नान्यथा कर्मको
टिभिः ॥ सुराणां रूपपूजातो मम लिंगार्चनं वरं ॥४॥ मम भौतिकलिंगार्चा बिल्वपत्रैर्महेश्वरि ॥ तल्लिं
गपूजा लभेज्याहि पारंपर्यक्रमेण हि ॥५॥ सोऽपि पत्योपकारादौ प्रवर्तेत महेश्वरि ॥ विभूतिधारणं चा
पि ज्ञानांगत्वमुदाहृतं ॥ रुद्राक्षधारणं चापि ज्ञानांगत्वमुदाहृतं ॥ पंचाक्षरजपं चापि ज्ञानांगत्वमुदाहृतं ॥
॥६॥ रुद्राध्यायजपं चापि ज्ञानांगत्वमुदाहृतं ॥ त्रिनेत्रं मंबिकायुक्तं नीलकंठं महेश्वरि ॥८॥ मन्त्रैर्वेदस्य भु
क्तिचित्तशुध्यै श्रुतीरितं ॥ तद्दृश्यामेति मंत्रेण त्रिगुण्याते तिमंत्रतः ॥९॥ अंतरिक्षेति चक्र चामंप्राप्तोऽ
यं विधिक्रमः ॥ जाबालाथर्वणैर्मंत्रैः शिवाकैवल्यसंभवैः ॥१०॥ भस्मरुद्राक्षलिंगार्चा रुद्रपंचाक्षरेषु
मे ॥ ध्यायीतेशेति चीशवे शिवएक इतीरितं ॥११॥ उमासहायमित्यादिमंत्रे ध्यानांगकल्पनैः ॥ सौति
पत्योपकारिणि हृल्लिंगाराधनायहि ॥१२॥ इज्यादानव्रतैश्चापि वर्णाश्रमनिबंधनैः ॥ तदारादुप-

193

कारं हि न साद्या लिंगपूजने ॥१३॥ न चेयं प्राप्यते पूजा पूज्यपूजक वर्जिता ॥ धूप दीपादि रहिता गंध पुष्प
विवर्जिता ॥१४॥ पंचा मृतो दैसे कादि नैवेद्य परिवर्जिता ॥ भावना मात्र सुलभा दुर्लभा योगिनामपि ॥१५॥
प्रज्ञातीर्थ महागंगा निषण्णो मौनि ताखिलः ॥ नित्य शुद्धोऽहमस्मीति स्नात्वा स्वात्म जलाशये ॥१६॥
स्वात्म ज्ञान महाभस्मोद्धूलितो धवलाकृतिः ॥ ज्ञान वैराग्य बोधोद्यत् त्रिपुंड्रोज्ज्वल भासुरः ॥१७॥ शां
ति दांति यमाभ्यास योगरुद्राक्ष मालिकः ॥ पंचभूत महातत्व पंचीकरण निर्मलः ॥१८॥ पंच कोश विदूरो
द्यत् पंचाक्षर परायणः ॥ पंचप्राण मनो धर्म सर्वेंद्रिय विवर्जितः ॥१९॥ ईशोऽहं ब्रह्म परमं वाच्य वाचक वर्जितं
॥ ध्यायन् स्वात्मैक्य विज्ञान महानंदांबु मग्नधीः ॥२०॥ गत मोहो महामाया गर्भ धामैक संस्थितं ॥ स्वात्म
लिंग स्थितापार निर्मल ज्ञान वर्जितः ॥२१॥ पंचकर्मेंद्रिय रस पंचगव्य प्रसेचकः ॥ पंचज्ञानेंद्रियापार पंचामृत
निषेचकः ॥२२॥ अखंडैक्यानुसंधान रुद्र वृत्या निषेचकः ॥ मनो लय महागंध लेपनादि प्रकाशकं ॥२३॥
सर्वात्म्य भाव बिल्व सद्रुक्ष वेष्टन वेष्टितं ॥ सोऽहमस्मी त्यखंडताभिः स्वात्म लिंगं समर्चयेत् ॥२४॥ महावा
क्यानुसंधान बिल्वैः पुष्पैः समर्चयेत् ॥ चतुर्वेदांत सारोऽथ महावाक्यैश्च भूषणैः ॥ संभूष्य देह जालोऽथ मस्य

भोज्यनिवेदनैः॥ विनिवेद्याहमस्मीति तांबूलैरुपचारकैः॥२६॥ स्वात्मबिल्वादिकुसुमैः पंकजैश्चसमाधिजैः॥देहजालादिरहितप्रणामप्रक्रमादिभिः॥२७॥ महानंदमहाधारानगैश्च करतालकैः॥अहंविश्वमभवमिति गानैश्च नटनर्तनैः॥२८॥ सर्वसंगपरित्यागछत्रचामरदर्पणैः॥ संपूज्य पूजापूज्यादिपूजकादि लयक्रमात्॥ नैवाहमस्मि किंचिद्वै नेदं नानात्मकं जगत्॥संपूज्यात्मनमद्वंद्वतनयेत्तत्सपूजनं॥३०॥ नपूजांतो नास्य शिवेन वोत्थासनकल्पनं॥ नकालदेशनियमो नसाधनपरिग्रहः॥३१॥ सर्वदा सर्वभावेन आत्मलिंगं प्रपूजयेत्॥ब्रह्मद‍ृत्रमिदंदृश्यं नैवेद्यं तन्निवेदितं॥३२॥ भुक्त्वा सुखमवाप्नोति तन्निवेदनभोजनात्॥ गुणत्रयादिरहितं त्रिःशखांबु पिबेत्ततः॥३३॥ सदाशिवोहमस्मीति तन्निर्णोदकपानकृत्॥ एवमात्मा महालिंगपूजा ते कथिता शिवे॥३४॥ एवंपूजयतो नित्यं पूज्यपूजाविवर्जितं॥पूजकः पूज्यतामेति सदालिंगमयो भवेत्॥३५॥ नपूजा नलिंगं नचोपासनादि नवेदांतधारारसस्वादनं मुक्तयेहि॥ नवेदप्रचारोत्र धर्मैकजालैः शिवेमत्प्रसादैकलभ्यं किलेदं॥३६॥ नच प्राणकोशं नचानंदकोशं नविज्ञानकोशं न चान्नादिकोशं॥ नचाणुर्न दीर्घं न बंधं न मुक्तं नच द्वैतमेकं त्वनीशं परंच॥३७

/३९

नच व्यापकं देशकालादिहीनं अवस्थादिहीनं त्वलिंगं रसादिं (गुणादिं)॥ गुणातीतमेकं चिदानंदरूपं घनं चा
परवंडं सदारवंडितेषु ॥३८॥ मनोवागतीतं त्वनादिं च सूक्ष्मं सदा शुध्दं त्वसंगं महांगं ॥ सदालिंगसंगं
त्वलिंगं सतुंगं नभःस्वांतरं गंजनानामसंगं ॥३९॥ नपुण्यं नपापं नतज्जन्मनाशौ नचिंता नचार्तिर्न तल्लोभ
मोहौ ॥ नवा दीक्षको नैव शिष्यस्तदेवं नवेदांतवादैर्दुरापं सदापं ॥४०॥ सहस्रास्यहस्तं सहस्राक्षपादं तदे
वाधुनापाणिपादास्यहीनं ॥ तथागंधमेकं रसैश्चापिहीनं असंस्पर्शकं घ्राणजिव्हादिहीनं ॥४१॥ तु
रीयं त्वशीर्णं शरीरेषु नित्यं विभुं सर्वदेहादिधर्मैर्विहीनं ॥ तथात्मानमिष्टं कनिष्ठं च ज्येष्टं प्रियं वस्तुतः सर्व
भोगेषु युक्तं ॥४२॥ तदेवाखिलैर्भोगजालैर्विहीनं महानंदसंदोहधामैकसीमं ॥ तदेवास्मि लिंगं
तदेवास्मि भूतं तदेतद्धि विश्वं शिवेनांतमानं ॥४३॥ तदेवाखिलाधारपुच्छप्रतिष्ठं तदेवाद्य ब्रह्म तदेव
त्वमीश ॥ तदेवेशितत्वं सदा तत्वमस्मीत्यहं ब्रह्म चास्मीति वाक्यैर्दुरापं ॥४४॥ तदेवायमात्मेति ब्रह्मे
त्यहं वै सदा ब्रह्मभूतो भवेदेव ब्रह्म ॥ तदूर्ध्वं तदुस्तादधस्तात्तदेव तदेवेशि पश्चात्पुरस्तात्तदेव ॥४५॥
तदेवाद्यलोकास्तथालोकलोक्यादिशो भूतवर्गास्तथा वेदजालं ॥ सुराश्चासुरा भूसुरा भासुरं तत्प्रतिष्ठं समस्ते पुनिष्ठं

नैष्ठाहं त्वसत्ता सदेवास्ताक्षेत्रं

विशिष्टं॥ ४६॥ कनिष्टं विशिष्टैश्च शिष्टैर्दुरापं सदा लोकनेत्रे शिवो चापि विष्टं॥ तदीय प्रसादेन वायुर्धरित्री तथा सूर्य चंद्रादयो वन्हयश्च॥ ४७॥ विभात्य स्यभासैव लोकं त्वशेषं यद ज्ञानतो नित्यमेतज्जडं च॥ यदुद्बोधने नापि सर्वं विभाती यदा लोकने सर्वमेतत्स्थि पश्येत्॥ ४८॥ दृगेतद्दृशो नैवरूपं तदेतन्न दृश्यं तथा दर्शनं चापि गौरि॥ न तद् ज्ञानमेतद् विचित्रं न सूक्ष्मं न च स्थूलमण्वादिहीनं॥ ४९॥ न तत् श्रोत्रकं नापि पश्यं च जिघ्रं न च स्पर्श शब्दादि गंधादिहीनं॥ ॥ तदेतत्सुराणां हृदिस्थं गुहास्थं न हि प्राणवाचां न मस्तोपि दूरं॥ ५०॥ न च स्त्री न पुंस्त्वं नहि क्लीबमेतत् यदा केन कार्येण युक्तं हि तात्थि॥ न बालं युवा चैव न वृद्धं न दीर्घं न ह्रस्वं न दीर्घं न कृष्णं न पीतं॥ ५१॥ न वै वर्तुलं नैव तद्देच तुष्कं न चोर्ध्वं न चाधो न तद्विस्तरं हि॥ तदेवाप्यखंडं न खंडादिहीनं समस्तांडगं विसृतं चांडतोपि॥ ५२॥ न शुष्कं न चार्द्रं घनं वापि देवि न किंचित्तदेवेह पश्यामि लिंगं॥ यतो ब्रह्मविष्णुर्बीन्द्ररुद्राः प्रजाताय तो वा महाभूतसंघा नि देवि॥ ५३॥ अनेनैव जीवंति नित्यं सदा स्ते जगज्जालमेतन्महालोकवर्गाः॥ तथांते लयं यांति लिंगे त्व लिंगे तदेतद्धि जिज्ञास्य ब्रह्मेदमेतत्॥ ५४॥ येनैव सर्वेंद्रियकल्पना ततां रूपं च चक्षुः परिपश्य-

तेतत्॥ तदेव लिंगं विमलं प्रपश्य नानैव नास्ति परिदृश्यते तत्॥५५॥ यदेव वाक् सर्वरसाँश्च वेत्तिरसा-
ति गंगा तत्परि पश्य लिंगं॥ तदेव तच्छ्रोत्र वरं सर्वं श्राव्यं शृणोतीदमेवाद्य लिंगं॥५६॥ यदेव चाघ्राति
सुगंधमेतत्तदेव लिंगं परि पश्य देवि॥ यत्रैव त्वक् स्पर्शमथैव वेत्ति तदेव लिंगं मम देवि पश्य॥५७॥
यदेव च प्राणिति प्राणवर्गं बुध्यादि यद्बोधयते च लिंगं॥ पाण्यंघ्रिपायु प्रजनादिकेषु विसर्गजानंद
बलं च धर्मं॥५८॥ तल्लिंगमेतद्धि विजानते जना मनो मनो यच्च तदेव लिंगं॥ यथैव नद्यः समाप्ताः
समुद्रे वे लाति गा नाम रूपे विहाय॥५९॥ तल्लिंग संदर्शनतो नरो भवेन्नामाति गोरूप गुणातिगश्च॥
तदेव लिंगं ध्वनि बिंदु वर्णमात्रा कलातीत गुणातिगं च॥६०॥ ओमोमिति प्राणवर्गो च वेदे वेदांत संघे
च वदत्यभीक्ष्णं॥ ईशानवास्यं हित देवलिंगं पूर्णात्तथा पूर्णतरं सुपूर्णं॥६१॥ यदा तमस्तन्न दिवा न
रात्रिः न सन्न चासत् तदतीत लिंगं॥ तदक्षरं तत्स वितुर्वरेण्यं प्रज्ञा तस्मात् प्रसृता पुराणी॥६२॥
भाव ग्राह्य मनीडं ततू भावाभाव करं हितत्॥ कलासर्गकरं लिंगं ये विदुस्ते जहुस्तनुं॥६३॥
स्वभावमेके वदंतीश लिंगं कालं तथान्ये परिमुह्यमानाः॥ लिंगस्यैतन्महिमानमिति वीतशोको ज्ञात्वा

लिंगं शांति मत्यंतमेति ॥६४॥ यस्मिंल्लिंगे अधिविश्वे निषेदुः यस्मिन्निदं संच विचैति सर्वं ॥ यस्माद्भूव भुवनस्यास्य गोपाः प्रजापतिर्भूतवर्गैकर्ता ॥६५॥ यल्लिंगमेतद्भुवनं विचक्र मेतस्यांशतः पादमिदं हि विश्वं ॥ अणोरणीयान्महतो महीयांस्तदेव लिंगं निहितं गुहायां ॥६६॥ तदेव लिंगं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशं ॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः ॥६७॥ कर्माणि तस्य नश्यंति लिंगे दृष्टे परावरे ॥६८॥ तल्लिंगं ज्योतिषां ज्योतिः चेतनानां च चेतनं ॥६९॥ तत्र को मोहः कः शोकस्तल्लिंगमनुपश्यतः ॥ तद्दर्शनविहीनानां विपदः स्युर्भवे भवे ॥७०॥ जन्ममृत्युजरादुःखैरभिभूता हि नित्यशः ॥७१॥ आनंदं तस्य लिंगस्य ज्ञात्वा बिभ्येन्न जातुचित् ॥ तल्लिंगदर्शनानंदमात्रं जीवंति सर्वशः ॥ ७१॥ अपाणिपादं तल्लिंगं मनसोऽत्त ज्जवीयो हि ॥ स्थानकालातिगं तत् स एवासौ स ईश्वरः ॥७२॥ तल्लिंगवेत्ता तरति शोकमेतत्सनातनं ॥ तदेव ज्ञानं थैवं लिंगमेतन्मनः स्थितं ॥७३॥ ध्यातव्यं ध्यानहीनं च ध्येयध्यानादिवर्जितं ॥ ज्ञानज्ञेयादिरहितं नामरूपविवर्जितं ॥७४॥ अनंतमहिमाधाम प्रतीतोषं तवैभवं ॥ अजातमेतत्तल्लिंगं कश्चिद्धीरः प्रपश्यति ॥७५॥ तल्लिंगं सर्वतो वक्रं ज्वालाजटिलिताखिलं ॥

यदा चर्मवदाकाशं वेष्टयिष्यंति मानवाः ॥७६॥ तदा तल्लिंगमज्ञात्वा दुःखस्यांतो भविष्यति ॥ नांतःप्रज्ञं
हि तल्लिंगं नो भयप्रज्ञमेव च ॥७७॥ न प्रज्ञं चैव तल्लिंगं ना प्रज्ञं चेतदीश्वरि ॥ अदृश्यं चैव तल्लिंगं
अग्राह्यं तत्सदैव हि ॥७८॥ एकात्मप्रत्ययं लिंगं प्रपंचोपशमं हि तत् ॥ तल्लिंगजा इमे लोकास्तल्लिं-
गे लीयतेऽखिलं ॥७९॥ तल्लिंगे लयनाद्देवी तज्जलानिति ते जगुः ॥ तद्वेदादौ स्वरं लिंगं वेदांते च प्र
तिष्ठितं ॥८०॥ तल्लिंगप्रकृतौ लीना ब्रह्मविष्णुमहेश्वराः ॥ तद्ब्रह्म तच्छिवः साक्षात् तद्विष्णुस्तदीश्व
रस्वराट् ॥८१॥ संम्राट् विश्वेश्वितल्लिंगं तदृश्यं सूक्ष्मदर्शिभिः ॥ हृदा पश्यंति तल्लिंगं मनसैव मनी
षिणः ॥८२॥ श्रावणायापि तल्लिंगं न लभ्यं बहुभिः शिवे ॥ शृण्वंतोऽपि शिवे लिंगं न विदुर्बहवोऽपि यं
॥८३॥ आश्चर्यवत्पश्यति कश्चिदेतदाश्चर्यवच्छृणुते तच्च लिंगं ॥ आश्चर्यवद्बोधयते तथान्य आश्च
र्यवत्पश्यति तच्च लिंगं ॥८४॥ न प्राणेन नापानेन लिंगहीनो न जीवति ॥८५॥ अजामेकां लोहितशुक्लकृष्णां
बह्वीं प्रजां जनयंतीं सरूपां ॥८६॥ अजो लिंगी जुषमाणोऽनुशेते जहात्येनां लिंगसंस्थः स आत्मा ॥८७॥
तल्लिंगमेरे द्रष्टव्यं श्रोतव्यं वेदपर्वतैः ॥८८॥ पुरीशयं च तल्लिंगं सर्वभूतेषु संस्थितं ॥ कोऽहं वा त्या

माहेश्व० अ० ५९

॥ प्राणापानेन युक्तोऽपि ॥

४ पंक्ति २ यस्मान्नाणीयो न ज्यायोऽस्ति किंचित् ॥

च्चकः प्राप्यालिंग हीनो महेश्वरि ॥ ॥ एसो ह्येष महालिंगं रसरूपं विकेसदा ॥ एतत्धि परमानंदं लिंगमेतत्स्वयं प्रभुं ॥ ८९ ॥ यस्मात्परन्नापरमस्ति किंचित् ॥ वृक्ष इवस्तब्धो दिवि तिष्टति लिंगमेकं ॥ तेनेदं पूर्णलिंगभासैकसर्वं ॥ लिंगाद्वाचो निवर्त्तंते अप्राप्य मनसा सह ॥ तदत्यतिष्ठद्देवेशि ब्रह्मांडोर्ध्वां गुलं ततं ॥ ९१ ॥ तस्मिन्भाति स्वयं लिंगं चंद्रसूर्याग्नयो न हि ॥ भांति तत् तेजसा व्याप्तं जगदेतच्चराचरं ॥ ९२ ॥ यथा तत्रज्ञाविहितं हि भूमौ गुहाहितं तच्च लिंगं महातं ॥ हिरण्यं नविंदंति ऊर्ध्वे चरंतस्तथेदं प्रपश्यां विके लिंगमेतत् ॥ ९३ ॥ जाग्रत्स्वप्नसुषुप्त्य लिंगं मनसा ततं ॥ तदेतदहमीति ज्ञात्वा लिंगी लिंगाति गो भवेत् ॥ ९४ ॥ यथोर्णनाभिः सृजते तंतुजालं गृण्हातिव क्रमेण तथात्ति सर्वं ॥ तथा जगज्जालमिदं हि लिंगतो भवत्यथांते विलयं प्रयाति ॥ ९५ ॥ ब्रह्मैवेतल्लिंगमिदं सनातनं स्वविधयासंस्मरते च मुच्यते ॥ तदेतल्लिंगं तपसा वेदितव्यं नान्यैर्धर्मैस्तच्च लिंगं त्वलिंगं ॥ ९६ ॥ तदेव लिंगं त्वविमुक्ते निविष्टं भूतालिंगं विश्वनाथाभिधं च ॥ वाराणस्यां भूयुगे सन्निविष्टं योगैः पश्यंति तत्र ते चोत्क्रमंति ॥ ९७ ॥ तत्रैव तेषां तारकं चोपदेशं ओंकाराख्यं प्रणवं ब्रह्म मंत्रं ॥ नतस्य प्राणोनुक्रमतीव

 देवि तल्लिंगसंगं भवतीत्यलिंगं ॥९९॥ तत्राविमुक्ते चोपास्यं तल्लिंगं महिमालिंगं ॥ तत्राशक्तस्य माहेश्व-

 देवेशि मौक्तिकं भुवि मुक्तिदं ॥९९॥ संदृश्यं चक्षुषा मर्त्यैः क्रमात्तन्मुक्तिदायकं ॥ तस्मिन्नेकेतते

विरक्ति न भयं भवेत् / तत्परो वेद तत्

ल्लिंगे त्वंतरेण भवेद्भयं ॥१००॥ तत्परादादिदं लिंगं ओमित्येब्रह्मेति वाक्यतः ॥ तदेतत् ब्रह्म परमं

आत्मलिंगं सनातनं ॥१०१॥ वेदायत्रैव वेदांतैः निवृत्ताय त्रिलिंगके ॥ हृत्पुंडरीकं विरजं तल्लिंगं

भासेतेऽनिशं ॥१०२॥ कं च खं चैव तल्लिंगं सर्वव्यापि निरामयं ॥ आनंदघनमद्वैतं चतुर्थं तमसः (मनसः)

परं ॥१०३॥ दहराकाशस्तरं तच्च सूर्यमंडलमंडितं ॥ चंद्रकोटिसहस्त्राभं तद्दृश्यं सर्वथा शिवे ॥१०४॥

योगेनात्मानुसंधानैः वीतमोहभयैः सदा ॥ वेदांतविज्ञानसुनिश्चितार्थैः संन्यासयोगेयतिभिः

शुद्धबुद्धैः ॥१०५॥ तेषामेवैतद्विजरं लिंगधाम प्राप्य प्रापेश्चाविदूरं शिवेच्छ ॥ नैषा तर्केणमतिराप

नेयाद्दुरोपमं ल्लिंगमेतीत्य सत्यं ॥१०६॥ य चो अक्षरे परमे तत्प्रविष्टं सर्गादिहीनं महालिंगमेतत् ॥ सु

रार्ध्ये दुरापं तथा योगिभिः कर्मिभिश्चाप्यदृश्यं ॥ तल्लिंगत्यागेन सर्वथा वीतमोहो भवत्यवश्यं

.... श्रुतिगुह्यमेतत् ॥१०७॥ येनाविरतो दुश्चरिता न्नाशांतो नासमाहितः ॥ तस्यैतद्दुर्लभं लिंगमात्मस्थं

चसर्वगं ॥१०८

एषां न जिह्म मनृतं सदैव तेषां लिंगं हृदि मात्म्य वशां तं ॥ अतो लिंगं पूजये दाप्त कामो न काम कामी लिंग पूजाधिकारी ॥ एतदर्थं गूढतमं महेशि नान्ये विंदंति ज्ञाननिष्ठा हि भूयः ॥ न वादेशिको नैव शिष्यः कदाचिन्न पूज्ञान पूज्यो न वा पूजकत्वं ॥ स्वदोषात्स दोषोऽपि नास्त्ये वतिंगे जगन्नैव शेषं विशेषा द्भवानि ॥ महाशेष भूषा विशेषोऽपि नात्र सदोषाकरा पारमौ लिनेचैव ॥११२॥ ॥ इति श्री शिवरहस्ये प्रथमे माहेश्वरांशे शिवगौरि संवादे उपनिषल्लिंग कथनं नाम एकोन षष्टितमोऽध्यायः ॥५९॥ ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु वक्ष्यामि ते देवि हितमात्यंतिकं शिवे ॥ यत्प्रोक्तं पूजनं देवि सुराणां च नृणां सदा ॥१॥ सा पूजनं तत्फलदा जन्मकर्म प्रणाशनी ॥ संधि देव परा पूजा सा तु तस्यां मनो लयः ॥२॥ साधारणा नां सा पूजा अव्यक्ता तीव दुर्घटा ॥ मत्प्रसादेन देवेशि पचे लिमतपः फलैः ॥३॥ योगैर्योगेश्च तपसा महानंदकदंबकैः ॥ भस्म निष्ठस्य सततं रुद्राव र्तनशीलिनः ॥४॥ भस्मात्रिपुंड्र युक्तस्य सदा रुद्राक्ष धारिणः ॥ पंचाक्षर परस्यैव सदा लिंगार्चकस्य च ॥५॥ बिल्वपत्रैर्महादेवि प्रदोषे पूजकस्य मां ॥ नक्ताशनार्चन ध्यान चतुर्दश्यष्टमी षु च ॥६॥

199

सोमवारव्रताचारयुक्तस्य नियतस्य च ॥ मत्क्षेत्रवासिनो देवि अविमुक्तरतस्य च ॥७॥ विश्वेश्वरा-
वैकस्यास्य सुरस्य च नरस्य च ॥ तथा महालये पुण्ये रुद्रकोटौ महेश्वरि ॥८॥ कालंजले प्रभासेपि
पुष्करे मरकंटके ॥ पिंडारके कुरुक्षेत्रे महाकाले महेश्वरे ॥९॥ देवदारुवने पुण्ये नैमिषे चित्रकूट-
के ॥ केदारे कामदे पुण्ये वैद्यनाथे महेश्वरि ॥१०॥ श्रीशैले च तथोंकारे तथा वेणुवने शिवे ॥ आ-
वटके सोमनाथे गोकर्णे त्र्यंबके गिरौ ॥११॥ श्रीमद्दक्षिणकैलासे तथैकाम्रवने मम ॥ वृद्धाद्रौ व-
णाद्रौ च तथा गोपर्वते शिवे ॥१२॥ हृत्पुंडरीके गूढे च जप्येशे श्वेतकानने ॥ गजारण्ये रत्नगिरौ श्री-
कंठे मातृपर्वते ॥१३॥ कोटिकायां मंगले च पुण्ये द्रुतिवने पि च ॥ कुंभकोणे र्जुने चैव श्रीसुंदरगिरौ
तथा ॥१४॥ माधवी तेजनी देवी दीरणीकानने तथा ॥ शमीवने बिल्ववने घंटेशब्रह्मकानने ॥१५॥
छायावने च श्रीवांछे तथा वेदवने शिवे ॥ वल्मीके वातुतुपुर्यां च सेतौ वै गंधमादने ॥१६॥ हालास्येशा-
लिकवने गजशैले महेंद्रके ॥ वसतः पुण्यशीलस्य जक्ताशनरतश्य च ॥१७॥ संवत्सरं द्वादशाब्दं
तु भस्मनोद्धूलितस्य च ॥ कस्यचिद्भाग्यनिर्वहे ज्ञानं तल्लभते मम ॥१८॥ बहुभिर्जन्मभिर्देवि म

त्वप्रसादयुतस्य च ॥ वैराग्यभक्तियुक्तस्य आत्मलिंगार्चने मतिः ॥१९॥ जायते पुण्यपाकेन चित्तशु
द्ध्यनुसारतः ॥ जायते जन्मनाशाय नृणामत्यंतदुर्लभं ॥२०॥ नानाचारविहाराणां विषयासक्तचेतसां ॥
वांछा न जायते देवि कस्यचित्क्वचिदेव हि ॥२१॥ बहुजन्मसहस्रेषु तिर्यक्स्थावरजंगमैः ॥ जन्मभिः
पुण्यनिचयैः युक्तस्य पुरुषस्य च ॥२२॥ मत्प्रसादे न विज्ञानं जायते नान्यथा शिवे ॥ मद्ध्या न घौरैर्मोदा
दियुक्तस्य निरतस्य च ॥२३॥ अथर्वशिरसो ध्यायशिखाजपयुतस्य च ॥ जाबालश्रुतनिष्ठस्य

४००

शांभवस्य विशेषतः ॥२४॥ कैवल्यकालरुद्रादिजापिनो ब्राह्मणस्य च ॥ रुद्रावर्तनशीलस्य भस्म
निष्ठस्य मे सदा ॥२५॥ ज्ञानं विजायते देवि कस्यचिच्छिवयोगिनः ॥ यततामपि शैवानां कश्चिन्मां
वेत्ति तत्वतः ॥२६॥ मज्ज्ञानसाधनं देवि नृणामत्यंतदुर्लभं ॥ मां ध्यायेत्हृदयागारपद्मसंस्थं चतु
र्भुजं ॥२७॥ मृगटंकधरं सौम्यं सच्चिदानंदविग्रहं ॥ शुद्धकर्पूरसाराछकुंदेंदुधवलप्रभं ॥२८॥ मु
कुटोल्लासिचंद्रार्कगंगामलकपर्दकं ॥ भुजंगराजवलयं महार्हमणिभूषणं ॥२९॥ दिव्यानेकम
णिव्रातचितसिंहासनस्थितं ॥ त्रिनेत्रं नीलकंठं च इंदुधाम सनातनं ॥३०॥ उमया सहितं ध्याये

शिवरह०१ १६८

त्क्षणंवाथ तृणार्घकं ॥ सोहमीशः शिवः साक्षात् अहं रुद्रो हरिर्विधिः ॥३१॥ अहमिंद्रो नलो वायु
र्यमोहं वरुणोऽर्यमा ॥ चंद्रः कुबेरो मरुतो अश्विनौ व सवो र्ककाः ॥३२॥ स्कंदो विघ्नेश्वरश्चैव नंदि
केशादयोगणाः ॥ सर्वेषां जनिता चाहं मत्त एवाध निर्गताः ॥३३॥ मयैव विधये दत्ता वेदाः सर्वे सनातनाः
॥ मयैव विष्णवे दत्तं सहस्रारं सुदर्शनं ॥३४॥ अहमेवेति विज्ञाय ध्यायेन्मद्रूपमीश्वरं ॥ एवोहि ध्यायतां
देवि मज्ज्ञानं जायते नृणां ॥३५॥ अथवा देवमीशानं मां ध्यायेत्सूर्य मंडले ॥ हिरण्यबाहुमाशास्यं हि
रण्यश्मश्रुमीश्वरं ॥३६॥ हिरण्यवर्णं देवेशि अंबिकापतिमीश्वरं ॥ सर्वग्रंथि विमोक्षाय तज्ज्ञानं
जायते नृणां ॥३७॥ योगेन वापि नित्य मयमासन युतस्य च ॥ रेचके पूरये (रेचये) द्वायुं पूरकेणाथ पूरयेत् ॥३८॥
कुंभके कुंभवत्धीमान्धारयेत्पीठकात्रयं ॥ योगाग्निदग्ध कायोऽथ मलस्यामलचेतसा ॥३९॥ नी
हार धूमविद्युत्स्फटिको ज्वल दीपवत् ॥ ज्योतिर्विभासते देवि हृदि पूरितवायुभिः ॥४०॥ प्राणायामे
न सततं निर्वात शिखवीह ॥ सोहं ज्योतिर्महानात्मा असंगः पुरुषः शिवः ॥४१॥ आपाद मस्तकं देहं
व्याप्य सर्वेष्ववस्थितः ॥ योमां योगेन जानाति स्वात्मारामं महेश्वरं ॥४२॥ तस्य सिध्यंति नियतं सि-

माहेश्व० अ० ६०

१६८

द्वयोष्टौ महेश्वरि ॥ तस्य मूर्ध्नि महानात्मा सहस्रदलपंकजे ॥५३॥ गोस्तनाकारवत्स्वारा अ

मृतैकरसस्रवाः ॥ व्यपोह्यततत्कपालं तु इडायाः संततस्रवाः ॥५४॥ पिंगलाकुंडली मध्यात्पतं

ति शिखिमस्तके ॥ वैश्वानरोयं सर्वेषु मद्रूपो देहिषु स्थितः ॥५५॥ तत्र चंद्रामृतकरैः पिंगलायां म

हेश्वरि ॥ स आत्मज्योतिरानंदो नित्यमुक्तो महेश्वरः ॥५६॥ सदा क्रीडन्न्योममध्ये दहराकाशगः स

दा ॥ चेतयामींद्रियगणं वाचा च मनसा सह ॥५७॥ परापश्यावैखरीषु प्रणवादिरसस्त्वहं ॥ सोहमाव

सथातीतः पुरुषोहं पुरीशयः ॥५८॥ अलिंगोस्म्यहमात्मा च सुरतिर्यङ् नरेषु च ॥ नामरूपातिगः साक्षा

रस्यतः (=रम्यमाणः)

त् अहंकारविवर्जितः ॥५९॥ रस्यस्तत्कृतकर्माणि विषयाभ्येषि कं सुखं ॥ षोडशात्मेकला देवि एको

जानामि सर्वशः ॥६०॥ ताः सर्वा पिकला देवि मयि प्रोतं ति नित्यशः ॥ मंतावोद्धार स्थपिता ज्ञातावि

ज्ञान ईश्वरः ॥६१॥ श्रुतेः श्रोता, तथा घ्राता दृक् दृष्ट्या द्यहमेवाहि ॥ यथाकूर्मे महाग्रीवान्ह स्व दीर्घा

भवेच्छिवे ॥५२॥ यथा नद्यः स्पंदमाना नामरूप गुणातिगाः ॥ समुद्रे स्तं प्रयांतीशे यथास्ते भानुदी

तयः ॥५३॥ पुनर्यथोदये प्राप्ते सूर्यस्येव मरीचयः ॥ प्रसरंति महादेवि यथा मत्सं निधौ जगत् ॥५४॥

पद्मं मित्र कौबेरं द्वादिक मत्स्य द्विज नीकुलं ॥ यथामणि जसंनिध्या च्चेष्टंते लोह सूचयः ॥५५॥ कालक
र्मविपाकेन तथा मत्संनिध्यो जगत् ॥ चेष्टते नितरां देवि स्थिति संहार जन्मतः ॥५६॥ सोहं सृष्ट्वा प्रविश्यै
व तन्नाम गुण रूपतः ॥ ब्रह्म विष्णु हराख्याभिः यथा पूर्वं युगे युगे ॥५७॥ सृजाम्यात्मा नमेवाग्रे ततो नाना
विधं जगत् ॥ यथाग्नेर्विस्फुलिंगा वै क्षुद्रा संभवन्ति प्रिये ॥५८॥ इंद्रो मित्रोथ वरुणः पूषा सोमो हमेव हि ॥
मनवः पितरो वि प्रास्तारा जालं ग्रहास्तथा ॥५९॥ स्थावरं जंगमं चैतद हमेव सनातनः ॥ सर्वः सर्व शरीरे
षु सर्वेंद्रिय गुणातिगः ॥६०॥ सर्व भोक्ता हमेवास्मि सर्व कार्य कृतास्पदः ॥ नाहंत ज्जन्म मरणैः स्थित
संगेष्व सज्जकः ॥६१॥ असंगो नैव लिप्तोस्मि सर्व बाह्यांतरास्त्वहं ॥ एकस्तथांतरः सर्व दुःख हीनोस्मि
शंकरि ॥६२॥ एवं मां विप्रा सोहं सोमे हृदंतरा ॥ तस्याहं न प्रणश्यामि सचमेन प्रणश्यति ॥६३॥ योग सांख्यो
मयादेवि तथोक्तो मम हृत्तमो ॥ सर्व साधारणं देवि कथयिष्ये प्युपासनं ॥६४॥ अलिंगोस्म्य हमीशानः
लिंगे तिष्ठामि सर्वदा ॥ यथा गोव गतं क्षीरं विषाणादौ न दृश्यते ॥६५॥ ऊधस्येव प्रदृश्येत तथाहं सर्व
गास्यपि ॥ हृदि ध्यातु मशक्तानां ज्ञानयोगे न वै शिवे ॥६६॥ लिंगे कृतां परां पूजां शांभवैर्भस्म धारिभिः

॥ मत्सुंड्रु निरतैरेव रुद्राक्ष वरकंकणे ॥ रुद्राध्याय ध्यायनतो पंचाक्षर जपेन च ॥ एकं वा बिल्व पत्रं यैर्नि
क्षिप्तं मम मस्तके ॥ ६८॥ भक्ते गृह्णामित द्देवि तस्मै ज्ञानं ददामि च ॥ तं ज्ञान भाजनं कुर्यां मुक्तिं मम शंकरी ॥
॥६९॥ नान्य वर्णाश्रमे धर्मे विधिधे शेष मे शिवे ॥ नैव तुष्टि मेम परा जायते कर्म कोटिभिः ॥७०॥ नषोड
श महादानै रेकाहाहीन सत्रकैः ॥ प्रपा वापी प्रदानैर्वा कन्यां न्नादि प्रदानतः ॥७१॥ कथं चिज्जायते
देवि मद्भक्त्यां मतिर्भवेत् ॥ पुंड्रां तरेषु विप्रेषु मस्करीणां गणेषु च ॥७२॥ नैव प्रीति र्महादेवि यथा
मत्सुंड्रु धारीषु ॥ भस्म धार्यै व सततं मत् ज्ञान स्यैव भाजनं ॥७३॥ शिव लिंगार्चन ध्यान रुद्राध्याय जप
ेषु च ॥ पंचाक्षर जपेश्चैतत् मम क्षेत्र निवासकः ॥७४॥ भस्म त्रिपुंड्रु धार्येवाधिकारी नान्य उच्य
ते ॥ उर्ध्व पुंड्रं भ्रमेणापि न कुर्यान्मो हितो द्विजः ॥७५॥ प्रत्यु तो नरकायैव तस्य सर्व मनुष्ठितं ॥
यदि कुर्यात्प्रमोदेन पितृभिः सपतेदधः ॥ ७६॥ उर्ध्व पुंड्रां कितं दृष्ट्वा मीलया म्यहं लोचने ॥
मत्प्रसादा लोकने नत ज्ञानं जायते शिवे ॥७७॥ मन्नेत्रे मीलिते देवि कथं ज्ञानं भविष्यति ॥
लिंगं कैलास मौलौ मे कैलासेश्वर संज्ञितं ॥ ७८॥ देवि तिर्यङ् मनुष्या द्यैर दृश्य मपिकामदं ॥

स्मरणा देव सान्निध्यं यत्र कुत्रापि सिध्यदं ॥ ७९ ॥ एतल्लिंगस्य माहात्म्यं वेदैर्न ज्ञातमेव हि ॥ सुरासुरैश्च मुनिभिः गणैश्चैरपि शंकरि ॥ ८० ॥ कैलासेश्वर संज्ञं तु लिंगं मुक्ति प्रदायकं ॥ लिंगराजमिदं देवि त्वेवं वेदे सनातनं ॥ ८१ ॥ ममैव हृदयानंद दायकं स्वर्ग मोक्षदं ॥ संसार सागरा पार तारकं भवभेषजं ॥ ८२ ॥ वेदांत सारसर्वस्व मेतल्लिंगं वरं शिवे ॥ न तस्य चिन्मया ख्यातं नाख्येयं यस्य कस्यचित् ॥ ८३ ॥ एतल्लिंगप्रभावेन जगत्सृष्टिं वितन्वते ॥ विधातारः सर्व एव कल्पे कल्पे स्वसूनुभिः ॥ ८४ ॥ देवतिर्यङ्नराकार समुद्रं सनदीवनं ॥ लोकलोक्याश्च देवेशि विधाताध्यं तनोति च ॥ ८५ ॥ विष्णवः प्रतिकल्पं वै एतल्लिंगप्रभावतः ॥ दैत्येश्वरान्निहंतारो महतामल्लचक्रतः ॥ ८६ ॥ वैकुंठ वासिनः सर्वे ते लक्ष्म्याः पतयः शिवे ॥ प्रतिकल्पं तथा रुद्रास्ते गौर्याः पतयोंबिके ॥ ८७ ॥ एतल्लिंगप्रभावेन प्रलये संहरंत्यपि ॥ जगज्जालं तथा शूले कृत्स्नं सासुरमानुषं ॥ ८८ ॥ सेंद्राश्च मनवश्चैव ऋषिभिः पितृभिः शिवे ॥ एतल्लिंगे लयं यांति प्रतिकल्पं सुरासुराः ॥ ८९ ॥ जगद्ब्रह्मांड जालैश्च सर्वाधारमिदं शिवे ॥ रूपं संकोच्य मे दिव्यं महांते प्रलये शिवे ॥ ९० ॥ त्वया गणवरैर्देवि स्कंद हेरंब पूर्वकैः ॥ निवसामि सदा लिंगे कैलासेश्वरसंज्ञिते ॥ ॥ ९१ ॥

अलिंगो लिंग संस्थोहं सृजामि विसृजामि च ॥ जगज्जालमिदं देवि ब्रह्म विष्णीश पूर्वकं ॥९२॥ सं
हरामि तथैवांते लीलयं ममशंकरि ॥ आत्मक्रीड आत्मरतिः सृष्टि स्थित्यंतकारकः ॥९३॥ कारणं कार
णानांच पतीनांपतिरीश्वरः ॥ चेतनश्चेतनानांच नित्योहं परमेश्वरि ॥९४॥ अकारणोहं कारणाधि
पाधिपो ममैव कश्चिज्जनको नहीश्वरि ॥ कालात्मयुक्तान्यधितिष्ठतीशो गुणी सर्वज्ञः सर्वभूताधि
वासः ॥९५॥ ॥ईश्वर उवाच ॥ एतत्ते कथितं देवि रहस्यार्थ प्रकाशकं ॥ न देयं गुह्यमप्येतत् भक्तेषु
प्रतिपादय ॥९६॥ रहस्यांशमिदं शैव मादिमं परमेश्वरि ॥ गुह्य ज्ञानमिदं सुभ्रु रहस्य ज्ञानसंग्रहं ॥९७॥
नप्रकाश्यमिदं भद्रे कस्यचित्खेल यौविके ॥ इदं रहस्यं वेदानां अनंतानां सनातनं ॥९८॥ देवादीनां मु
नीनांच गणानांच प्रकाशितं ॥ तव हार्दं न देवेशि रहस्यं कथितं मया ॥९९॥ हृदि धार्यं सदा देवि गोप्या
द्गोप्यमनुत्तमं ॥ प्रथमः शिवरत्नाब्धि रहस्यस्यांशमुत्तमः ॥१००॥ कर्णभूषामणिस्त्वेष कथितस्तु
सुगोप्यतां ॥ सत्यं सत्यं पुनः सत्यं उधृत्य भुजमुच्यते ॥१०१॥ ॥स्कंद उवाच ॥ इत्युक्त्वा गिरिजां
देवः समालिंग्य महेश्वरः ॥ कैलासमौलौ शिवया विजहार यथासुखं ॥१०२॥ ॥ देव्युवाच ॥ ॥

वस्त्रा धौतविधौ सहस्रकरता पुष्पार्पणे विष्णुता गंधे गंधवता महान्नपचने बर्हिर्मुखाध्यक्षता॥ पात्रे कांचनगर्भतास्ति भगवन् कारुण्यवारांनिधे शुश्रुषां करवाणि ते पशुपते स्वामिन् त्रिलोकीगुरो॥३॥ गंडूषांबु निमज्जनाय यदभूत् गंगावतंसस्य ते चूडालंकृतिकल्पनाय विधिधृतं ज्योतिःसुधाधामते॥ तृप्त्यै सिद्धितशेषमोमभक्ष्य मपि त्रैलोक्यकुक्षिंभरे विद्याधीश मृते तव स्तुतिरियं वाणी लघिष्ठापि मे॥४॥ ॥सूत उवाच॥ श्रुत्वा चाथ महेश सुंदर महाकैलासलिंगालया त्वत्पारावार महाघ संसृति भरं वन्ह्याप्त तूलाद्रिवत्॥ पापाद्रिः प्रशमं प्रयाति सुकृतां राशिः परं वर्धते शैवं स्थैर्य तदपारवर्णन कथाः शंभोः मुदेशांकराः॥ अगणित गुणगर्भ पुण्यजालैः सुरजालैरमृतैः सुरद्रुसालैः कलहंसकुलैर्विलासशीलैर्न विशेषोस्ति त्रिविष्टपेपि पुंसां॥६॥ श्रोतॄणामिदमेव सुंदर महाशैवैकसारं मधुनाता संसृतिघर्मभारक थयासंप्राप्नुयाद्वाफलं॥ किंचित्त्रं क्षणमात्रमप्यग सुताकांताङ्घ्रिज पादादेरात् क्राकारमहाघसंसृतिभरं न प्राप्नुयाज्जातु चित्॥१०७॥ ॥स्कंद उवाच॥ ॥श्रीमत्कैलासमौलौ त्रिभुवनजनकाद्रिश्रुतापारधीरा संसारातारकारा गृहगतजनता कामपादाग्लाना॥ देव्या मुक्त्यै स्वयुक्ता

सततपरिचिता पादवद्ध्येन प्रेम्णा वेदानंदैक सीमा दुरित भवनदी तारयास्त्रात्रि नौका ॥ पुंसामार्यै कधुर्याः कथितशिवकथा पांथकाः सांपराये जैगीषव्य कृते महेश हृदयान्तिःसारितं यन्मधु ॥ दिव्या तत्करुणादरेण कथितं मह्यं तदुक्तं मयाशैवं दिव्य रहस्य मद्भुत तमं वेदांत सारस्थितं ॥ पीत्वा तुं दिल मानसाः शिवपदं ध्यायंतु मुक्त्यै सदा ॥ ११०॥ ॥ जैगीषव्य उवाच ॥ ॥ इष्टानिष्ट समस्त वस्तु विषयव्यावृत्त चेतोस्म्यहं ॥ निष्टोवोपम कष्ट तुष्ट जनकं मन्ये परं बिषुपं ॥ ११ ॥ किं त्विष्टं शिपिविष्ट कष्टहरणी चित्राष्ट मूर्तेः कथा ॥ श्रोतुर्मेदुर दुष्ट कोटि हरणं तुष्टं प्रसन्नं मनः ॥ मत्तानंग करींद्र दारण महासिंहोपमस्येश्वर स्यार्चा धूत समस्त पातक ततेः प्राप्तं न किं चिन्मम ॥ स्वेच्छ स्य निरंकुशस्य जगतां वर्णाश्रमोत्थ श्रमैः किंवामेतव वक्त्र पद्मज महाशंभोः कथाः सुंदराः ॥ १३ ॥ पायं पायमपायजन्म रहितो मोदामि नृत्यामि च पापोद्दाम क्रौंच भंगोत्व मेको जिह्वानघ प्रस्तुतं शंभुभक्ताः ॥ त्वद्दर्शनात्सुदिनं सुप्रभातं मे शीक्रयाः शक्ति हस्तो सिशुरः ॥ विषयाविष संक्लमा मम प्रति मांती श्वर पादसेवनात् ॥ भवता भव ताप संततेः परिहीनाम नयोप्यमी गृहस्थाः ॥ १५ ॥ शिवतत्व प्रभावोत्थ हर्षवर्षैः परिषिक्ता-

४ पंक्ति १० – "मुरवांबु रुहतः शैव रहस्य पर॥ संतृप्ताश्च ततोऽवदंश्च मधुना"

शिवरह० १ मुनयः सुरागणाश्च ॥ गुरुरस्माकं महोसिभाग्यवैभैः तवदेयं किमतः प्रणामतोन्यत्॥१६॥ ॥ महेश्वर० अं० ६०

२६८ मुनय ऊचुः॥ ॥ षड्वक्त्रामलपद्मसंघजनिता शंभोः कथा पावना नुस्माकं कुरुते दया रसभरैः संसार भारालसान्॥ तस्या स्यमुनेः समागमवशात्ता मा विमुक्तेः फलं ॥ किंचित्रं भगवन् त्रिनेत्रजकथा सौरैः पवित्रावयं॥१७॥ ॥गणा ऊचुः॥ ॥श्री भिः किलतेंदुमौलिचरणध्यानार्चनैस्त्वन्मुखादाश्राव्यो भक्तिभावसुरसाः शंभोः कथाः पावनीः॥नोकैलासनिवाससौख्यधुरिमागण्यानोकांच त्वभोत्वद्वक्त्रा मलदर्शनेन सुतरां तृप्या महे केवलं॥१८॥ स्कंदत्वद्वक्त्रपद्मामलमधुकरिभिः प्लाविता स्मो मुनींद्राः॥ शैवेंद्रावारणेंद्रो नमत्वीचिविहिता पारवृतैः कथाभिः॥१९॥ शंभोः पुंभावमुत्ये कलितकलिमलास्फा "दुरिता" रमाद्यज्ज्ञानोद्ध्वांतसंत्युत्प्रदावप्रशमनागाधदुःखापनुत्यै॥२०॥ ॥विष्णुब्रह्मेश्वरा ऊचुः॥ ॥सृष्टिस्थित्यंतकार्यैः सततपरिचिता पारदुःखेषु मग्नाः॥ लग्नाः कर्मजपापतापमनसो जन्मादिदुःखास्पदाः॥२१॥ शांताः प्राप्य भवत्पदांबुजोत्थसरणिं मुक्तेः किमन्यैर्धनैः॥ संतुष्टु बुः कुमारं २६९ गणाः सुरमुनीश्वराः॥ प्रणम्य मुदिताः सर्वे शृणुध्वं तत्स्तुतिं द्विजाः॥ ॥ मुनिदेवगणा ऊचुः॥ ॥

शरणागतलोकमातुल गाधिपते करुणाकर कामद कामहरं नश शरकानन संभव चारुरुचे परिपालय तारक

मारकनः ॥ हरसारसमुद्भव हैमवती करपल्लव लालितकम्रतनो पुरवैरि मुकुंद हृदंबुनिधे परिपाल

यतारकमा(रकनः) ॥२४॥ शरदिंदु समान षडाननया सरसीरुहलोचन पाविंलो(कनया) ॥ निरुपाधिक यानिज

बाल तया परिपालय तार· ॥२५॥ गिरिजासुत सायकभिन्नगिरे सुरसिंधुतनूज सुवर्णरुचे ॥ शिखिजात,

शिखावलवाहजते, परिपालय· ॥२६॥ जयविप्रजनप्रिय वीर नमो जयभक्त परायण भद्रनमो ॥ जयशा

खविशाख कुमारनमो परिपा· ॥२७॥ पुरतो भवमे परितो भवमे पथि मे भगवन्भर रक्षतातं ॥ वितरागि

षु मे विजयिन्भगवन् परि· ॥२८॥ इति कुक्कुटकेतुमनुस्मरतां पठतामपि षण्मुख षट्कमि(दं) ॥ नमतामभि

नंदनमिंदु भृतो नभयं क्वचिदस्ति शरीरिणां ॥१२९॥ ॥सूत उवाच॥ ॥ अणुस्थाणुवेणु प्रतिनिभ

सुमोघ ज्ज जदिदं ॥ महाभानुश्चायं तुहिनगिरि रास्तेघ्न हित कृत ॥ हिमांशुः स्वर्भानु भगवत ज

नानां चोहमुदे ॥ समीचीनेनेदं दिविविततचित्रैक वसतिं ॥१३१॥ जाते पादाभिघातचलित महि

तले सव्यथे भोगिनाथे ॥ साक्रंदे दंति वृंदे विलुठति कमठे चं[illegible]ले शैलजाले ॥१३२॥ नादोन्निद्रे समुद्रे

शिवरह १ न दरमण सुता नायके जागरूके साश्चर्यं त्रास धुर्यैस्त्रिभुवन मधुना पश्यते तांडवत्वं ॥ पायादायास माहेश्व॰ अ॰ ६०
ग्रं॰ १ खेदद्रुमितफणि फणा रत्न निर्यन्निर्यच्छायामाया पतंग द्युति मुदित वियद्गाहिनी चक्रवाकं ॥ १३३॥
२६९ अभ्रांत भ्रांत चूडा तुहिन करक रालीकनालीकनाद छेदा मोदानुधाव द्रुहिणरथखगं धूर्जटेस्तां
डवेनः ॥ १३४॥ इतिश्री स्कंद स्तुतिर्नाम षष्टितमोध्यायः ॥ ६०॥ ॥ प्रथम माहेश्वरांशः समाप्तः ॥
॥ श्री काशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्री काशीकालभैरवार्पणमस्तु ॥ ॥ श्री मदन्नपूर्णा
गंगाविश्वेश्वरार्पणमस्तु ॥ ॥ श्री गौरीशंकरार्पणमस्तु ॥ ढुंढिराजार्पणमस्तु ॥ ॥

श्रीगणेशायनमः॥ ॥श्रीसरस्वत्यैनमः॥ ॥श्रीगुरुभ्योनमः॥ ॥श्रीकाशीविश्वेश्वरायनमः॥ श्रीकालभैरवाय
नमः॥ अगजाननपाथोजविकासनदिवाकरं॥ विघ्नाद्रिकुलिशं श्रीमद्गणाधीशंनमाम्यहं॥१॥ ॥सूतउवाच॥ ॥पु-
नःप्रणम्यमुनयोजैगीषव्यंमहामुनिः॥ सभक्त्यातारकारातिपुरारातिकथाशुभाः॥२॥ पप्रच्छविनयोपेतःतुष्टीकृतजग
त्त्रयः॥ स्वच्छमानसोत्फुल्लप्रहृष्टवदनांबुजः॥३॥ धृतत्रिपुंड्रभूत्यैवबाह्यचलांतरः॥ रुद्राक्षमालकोटीरःशं-
भवाग्रेसरस्तदा॥४॥ गणेषु देवसंघेषु मुनिव्रातेषुसत्तमाः॥ पंचास्यहृदयानंदं षडास्यं प्रेक्ष्यभक्तितः॥५॥ प्राह
शूरारिमाशास्य ध्यानपूतहृदंतरः॥ जैगीषव्यउवाच॥ ॥सर्वज्ञहृदयानंदगौरीचुंबितमूर्धज॥ तारकारकां-
तकषड्वक्त्रतारिणे॥६॥ सर्वज्ञाननिधेतुभ्यंनमः सर्वज्ञसूनवे॥ सर्वधाजित्कुमारायकुमारायमहात्मने॥७॥
त्वत्षडाननपाथोजनिष्यंदामृतसप्रभाः॥ कथाःसुधामधुरिमाः शंभोःशांवएवताः॥८॥ शृण्वतोमेमनस्तृप्तिर्नो
मोषांशिवनंदन॥ गणेश्वराश्चदेवाश्चमुनयोपि विशेषतः॥९॥ त्रिनेत्रसुचरित्राणांपावनंयमतंद्रिताः॥
किंत्वयाश्रावि देव्याश्चवदनांबुजनिसृताः॥१०॥ अनर्गलामृतझरीभरसारोपमाःकथाः॥ देव्यै देवेनक
थितारहस्यारहसिप्रभो॥११॥ पुण्येशिवरहस्येद्य गोप्याद्गोप्यतराश्रयाः॥ तदेवाख्याहिषड्वक्त्र पंचव-

^भक्तकारिणे

शिवरह० क्रा यथा श्रुताः ॥१२॥ तामम प्रीतये शंभो राज्ञया वद षण्मुख ॥ त्वत्समो नरहस्यज्ञो गौरीहृदयनंदन ॥१३॥ हृ० भव-

धूर्जटिप्रेमसदनमयि मूर्तिकृपास्पद ॥ ॥सूत उवाच॥ ॥ तद्वागमृत्तधाराभिः संप्लावितहृदंतरः॥

गुहो हितं महाशैवरत्नसंपुटमुत्तमं ॥१४॥ उद्घाट्य दर्शयां चक्रे मुनये भावितात्मने ॥ ॥स्कंद उवाच॥ प्र० १

प्र० १ ॥ जानामि शश्वद्द्रुणनाथपादं प्रफुल्लरक्तांबुजपंकजोपमं ॥ विघ्नेभसंघोत्तममौलिभेदने मृगेंद्रहस्तोऽथ नख

प्रभुं मुने ॥१५॥ त्वादृक्षा मुनयो न संति भुवने त्र्यक्षांघ्रिपद्मार्चकाः पूताः पूततरा भगाक्षिहरणपारार्थ्य

सागराः ॥ धीरोदारकथारसेषु सरसाः मारस्य हंसा इवं श्रीविश्वेश्वरभक्तिपुण्यसुरसामोदैकभारां

तराः ॥१६॥ किं वक्तव्यमुमामनोरमणतो नान्यो हि विश्वेश्वरो विश्वस्तेषु च भावुकेषु भगवान्न्याधि-

व्यथां संहरेत् ॥ व्यर्थायासकरैरपारविविधैः किं धर्मजाले मुने श्रोतव्यो हि सदा शिवः शिवतरो भ-

क्तैकमोक्षप्रदः ॥१७॥ श्रीचंद्रचूडचरणार्चनजातपुण्यैः तुंगैरतुंगविभवा अपि ये मनुष्याः ॥ रुद्राक्षभ-

चाक्षि

स्मकलितां गललामशोभाः ते वै शिवाश्रयकथासु च दीक्षिता हि ॥ ~~(सभा श्रव चक्षु श्रवापारभूषावि-~~

विशेषेण गाधमतिदुष्टाविशेषाः॥ सु दृतेन चाक्षि

~~सो भ स दो षा कसा मार मौलि प्रभा शानंद भांग भा मांग भा भासनेन~~ ॥ यथा चक्षुश्रवापारभूषाविशेषेण १

कृगातितुष्टा विशिष्टा॥ सुरोषा करा सार मौलि प्रकंपेन कामांग वामांग शोभा शतेन॥ तदेवा द्य हृद्यं सुपद्यं सुगद्यं वराम्यद्य वेदांत वेद्यं महार्थं॥ समोहे हृ मोश्यानतोय प्रदे चारु दोषे प्रदोषे॥२१॥ सुदेशाकराकार मौलीश लिंगार्चके प्राप्त पुण्ये मुभक्ते विरक्ते मुमुक्षौ कथा रसा स्फार होराः कथाश्चा कथिष्ठाः शिवाये शिवेना द्य तुष्टेन पुष्टे प्रकृष्टो रुपुण्ये कल्म्याः पवित्राः॥ त्रिनेत्र प्रियाः प्राज्य राज्याभिरामाः प्रमोदे पिमान्यादरिद्रा त दरिद्राः॥२२॥ शिवे कष्ट पुष्टे भवे विप्रकृष्टाः तुराषाट् पदारण्यतो त्कृष्ट भागाः॥ विनष्टा घसंघा जनिष्टेक निष्ट प्रथिष्टे मदिष्टे वरिष्टे विशिष्टे शिवे तुष्टि दाव्यः॥२३॥ कथा मे शृणु त्वं वरं कोपि संकोपि संकोचितांतः न कोपीश्वरे भक्तिभावैर्युतस्यात्स एवाधुना स्वर्धुनी धन्य मौलेः पदांभोज रक्तो विरक्तो मुनिश्च॥२४॥ विनिर्जित्य कामादि षड्वर्गमुग्रं त्वनुग्राप्य थागे सरश्चोग भक्तः॥ लभेदेव भक्तिं विरक्तिं च मुक्तिं तथांते गणत्वं कथायां तरश्चेत्॥२५॥ शिवानुग्रहादेवते भक्तिभावो न कस्यापि लोके नुलोके कुतश्चित मुनींद्रे गणेंद्रे सुरेंद्रे भवान्वै लला भोसि भक्त्या ममैवाद्य तुल्यः॥२६॥ प्रशंस्य रहस्यं यतः शैव सार प्रदाने मनो मेद्य ईष्टे मुनींद्र॥ तवैवाद्य हृष्टं प्रकृष्टं प्रथिष्टं ममापीश भक्त्या कृपातो ष्ट मूर्तेः॥२७॥

शिवरह० श्रीशूलपाणि-चरणार्चनजातपुण्यैः यूयं सदा सुरगणा गणपुंगवाश्च ॥ एते द्विजाः परमकारुणिकस्य शं- द्वि० भवा

भोः पादप्रवीण मनसोप्यनसूयकाश्च ॥ २८ ॥ निपातितकृकाटिके भगवदास्य पंकेरुहे चपेटवर

घर्षणे विगतदंतमं घोर्यमा ॥ सुसप्तवरजिह्वको विगतजिह्व भागाग्रको विनासिकवरामरी

कवरवाणिकं जोद्भवा ॥ २९ ॥ क्षपद्वीर पादार्चनाद्वीरभद्रो महारौद्ररौद्रैः वृतो ध्युग्रवेगैः ॥ अनुग्रो धुना शं

भुवार्तारसज्ञः चकास्तीश पादांबुज ध्यानलग्नः ॥ ३० ॥ श्रीशैलादिरनुद्धतोयमधुनायश्चोद्धृतो वालकंली

लाकॢप्तसपर्यया पुरभिदो लिंगे च तुंगे पुरा ॥ उद्धाय प्रकटोरुघात चरण प्रांतेन शंभोस्तदायः कालं

विजिगाय हुंकृति परःसोयं कथांतरः ॥ ३१ ॥ विहंगमातंगकुरंगवाहाः तुरंगमोत्तुंगपतंगसोमाः ॥ धनांग

वाहस्य चरित्रसारकथारसे तर्पितरोरुहर्षैः ॥ ३२ ॥ ॥ इति श्री शिवरहस्य द्वितीये भवाख्यांशे स्कंदवा

क्यं नाम प्रथमो ध्यायः ॥ १ ॥ ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ ॥ स्कंद उवाच ॥ ॥ श्री कैलासे पुरा वि-

प्रजेगीषव्य महामुने ॥ तपश्चचार सादेवी नियतं नियताशना ॥ १ ॥ अकामापि शिवा तत्र किंचित्कामं हृ

दि स्मरन् ॥ कामांगनाशनपदं हृदि ध्यायत्तपर्यया ॥ २ ॥ वर्षायुतं तपश्चक्रे कैलासे परमेश्वरी ॥ तप-

अ० १

२

२

त्तताप परमं यद्साध्यंतपस्विभिः ॥ कृशामृणालतन्वंगी कुचोग्रं ताद्दशंतपः ॥३॥ कठोर वर्ष्मसंसाध्यं महोत्थं चेतसो धृतिः ॥४॥ धाराधार मुवर्षासु महावातवतीष्वलं ॥ शिलासु भावकाशासु सबव्हीरनयन्निशाः ॥५॥ निशापतिकरासारमानपीनहृदंतरा ॥ श्रुत्वा सिंहवरं घोरं दृष्ट्वा विद्युच्चतूर्णितीः ॥६॥ आसारसीकरैः क्लिन्ना नच कंपे मनाकुचसा ॥ तडित्स्फुरंतीत्व सन्त मिस्रासु तपोवने ॥७॥ याता यातं करोतीवद्दृष्टुं तत्तपसः स्थितिं ॥ तपतु रेव सा क्षात्साकेरो केतवालिले ॥८॥ पंचाग्नीन्परिध्याया त्र तपस्यति तपोवने ॥ नमनागपि हेमंते ज्वालामाला विवर्जिता ॥९॥ कुशाग्रतोयमपि सा स्वीचक्रे तापतापिता ॥ ग्रीष्मे प्रचंडकिरणैः चंडभानोः प्रचंडिता ॥ रोमांचकंचुवतीवेपमानतनुक्रुरा ॥ पर्यक्षिपत्क्षपाक्षामासरसोनलिवसा ॥११॥ निशीथिनीषु शिशिरसारस क्रौंचसद्रवैः ॥ पतंती स्मरसा पारमुद्यता धृतितर्पिता ॥१२॥ मनस्विनामपि मनोराज्यं संसृजती मधौ ॥ तदोष्टपल्लवाद्रागोजह्रे माकंदपल्लवैः ॥१३॥ वसंते संचरंतीसा वनेबाला चलं मनः ॥ चक्रे तपस्विभिः श्रुत्वा कोकिलाकाकलीरवं ॥ बंधुजीवेधररुचिं कलहंसे कलागतिः ॥ निक्षेपमिवसाक्षिप्राशरद्यासीत्तपोरता ॥१५॥ शाणेन मणिवल्लीढा कृशाप्याप्य

शिवरह० नर्थतां ॥ तथापि तपसा क्षामा दिदीपे ग्निशिखेवसा ॥१६॥ सदानंदघना शंभुपादाब्जानिदद्रमानसा ॥ द्वि०भ०

निद्रातंद्रादिरहितात्म्यार्द्रीकृतहृदंतरा ॥१७॥ शिवध्यानसुधाधारानिष्यंदामृतशीकरैः ॥ कुर्वन्त्तीं

स्वमात्मानं सुविस्मृतमथाकरोत् ॥१८॥ परिमुच्यांगरागादिभूषणविलसत्तनुः ॥ अपर्णापि सदा पर्णावास अ०२

२

सासंवृता शिवा ॥१९॥ वलक्षभूत्या विलसद्द्राक्षाकृच्छविसोमजित् ॥ प्रचंडसूर्याकिरणावृतात्यच्छशर

द्धना ॥२०॥ त्रिपुंड्रमंडितोत्स्फुल्लमुरक्तवनजानना ॥ तिलकोद्भासिवक्त्रश्रीविराजितजगत्त्रया ॥२१॥

महारत्नमणिव्रातलसत्तुरवलं विना ॥ कंठेन धृतरुद्राक्षमालालंकृतविग्रहा ॥२२॥ एणेयवत्र-

सिकोद्भासिभूतलाधारयत्प्रभा ॥ भास्मासनस्थाबरदा भर्त्सयत्येनसां गणं ॥२३॥ विद्युल्लतेव घनगा

कैलासनगमूर्धगा ॥ स्वर्धुनीं पुण्यसलिलां पावयंतीवगाहनैः ॥२४॥ स्वसंहननसौंदर्यरसपावितदिक्

ततिः ॥ मालूरवनमध्यस्था तन्मूलस्थंडिलेरता ॥२५॥ रुद्रवृत्तिरसापारातत्पदार्थविशोधिनी ॥ पंचा

स्यध्याननिर्धूतरमसामहसातता ॥२६॥ पंचाक्षराद्यातस्थैकपादेन सा शिवा ॥ [illegible]णुवन्निश्चल

तरास्थाणुन्यस्तहृदंतरा ॥२७॥ प्रपंचपंचीकरणस्थाणुवन्नगजा तदा ॥ पंनगाशनवाहाद्यैः [illegible] विस्मि

ते [illegible] ॥२८॥

तपोमूर्तिरियं देवोदेवोऽग्र मूर्तिरपि शंकरी ॥ अलक्ष लक्षीकरणे त्र्यक्षमक्ष विदूरगं ॥ २९ ॥ नासाकोटिंकटाक्षे-
ण लक्षयंती पराशिवा ॥ अपक्ष्मनेत्रावरणकृतांबुज बिलोचना ॥ ३० ॥ निद्रादरिद्र नयना द्रागपि ध्यानपराय-
णा ॥ तस्याकाश्यमहावर्षमाभिमंत्येव शैलराट् ॥ ३१ ॥ निनाय यामिनीनाथ ध्यानैः नैवाथ यामिनी
॥ तामेवं तपसांराशिमाशादरहृदंतरां ॥ ३२ ॥ चित्कलानंदकलिकां तपोरंजितवेषभूः ॥ तांमृगें द्राअपि
वनेसेवंति परमादरैः ॥ ३३ ॥ परितः परिसेवंति राजानंजनताइव ॥ स्वपिच्छैः छादयंत्येनां मयूराः सो-
मशेखरां ॥ ३४ ॥ वीजयंत्येव हंसास्तां स्वकपक्षोक्षवायुभिः ॥ चामराश्च मरीपुच्छैः दोधूयंतिसदा शिवां
॥ ३५ ॥ मृगाः पश्यंत्यनिमिषैर्लोचनैः हरिणेक्षणां ॥ वायुगाया सितांदेवीं मत्वाच परिसेवते ॥ ३६ ॥ कदंब
बंधुरसुमगंधबंधेकशीतलाः ॥ कैलासमौलिसंचारमेघवृंदाइवोत्तमाः ॥ ३७ ॥ वसंतसूर्यकिरणसं-
तप्तांजगदंबिकां ॥ सिंधुरास्सुंदरतराः स्वशुंडापुष्करोत्थितैः ॥ ३८ ॥ जलासारैः सेचयंति तप्तगात्रां महेश्व
रीं ॥ स्वच्छाकृधामसुभगस्ताराना थोपि स्वैः करैः ॥ पाययत्यनिशं देवीगात्रं धूयेतमामिति ॥ तिलकास्तिल-
कायंतेतदं वायास्तपोवनं ॥ ४० ॥ रक्ता शोकवरादेवी शोकवृंदं हरंतिते ॥ प्रफुल्ल शेखरा पारपुन्नागान-

शिवरह. गमूर्धनि ॥४१॥ पुंनागा इव शोभंते चंदनानंदितानना ॥ सर्जाज झंझर पत्रैश्च अर्जुनास्तर्जयंत्यपि ॥४२॥ भवांशाः
देव्यास्तपो विघ्नकरान्स्वकरैः वारिता तपाः ॥ तालास्वपत्रवायूत्थ चलनैर्घर्घरारवाः ॥ ४३॥ कुंदवल्यो
मुदं देव्यै दधुर्मंदार गंधिताः ॥ वात युक्ते मरंदैश्च पूजयंत्येव तां शिवां ॥४४॥ सालाः प्रालेय भूकन्या
मालोकंत इवास्थिताः ॥ तमालास्तबकैर कुपुष्प भार नताननैः ॥४५॥ नमंत इव तां देवीं परितस्तु मुदा
तदा ॥ कदंबा जगदंब्यां तां पुष्पल्लोलंब भासुराः ॥४६॥ लंबोदर प्रसूं देवीं आलिंगत इवास्थिताः ॥ दा-
डिमी कांति सर्वस्व मयि दत्वेति हर्षिता ॥४७॥ इदं पद्मपलासाक्षी इति तेन्यास तत्पराः ॥ लक्ककाः प्रपदे कां
तिः देव्यान्यस्ता हि नो इति ॥४८॥ धृत्वा तस्यै पुनर्दातुं प्रवृत्ता इव ते स्थिताः विंबवल्यस्तया देव्या दन्ता
धर सुरंगकाः ॥४९॥ सेवंति च महादेवीं परितः प्रसृता स्तदा ॥ पाटला स्वसमापार गंध मेदुर मूर्त
यः ॥५०॥ तन्नखोत्था मलार त्नकांति गर्भा इव स्थिताः ॥ मालूराः स्वसुमोद्भूत जितेण मद सौरभाः ॥५१॥
स्वकुंदैः छादयंत्येव पत्रैः स्वैः पूजयंत्तु मां ॥ नीपा भापति वद्देवीं सेवंति परितो वृताः ॥ ५२॥ लिकुचाः
कुच सौंदर्ये तस्यास्मो विजिता इति ॥ अनम्र फल शाखाभिः विनम्रा इव तो स्थिताः ॥५३॥ आम्राः स्वसौ

४

४

रभदलदिग्दंस्तोमैर्महेश्वरीं ॥ देवीपाणितलाकारपल्लवालंबिशेखराः ॥ ५४ ॥ देव्याः पिशंगितजटाभारशेख-
र(म)स्थिताः ॥ चंपकाश्चंपकोद्दामकलिका कारनाशिकां ॥ ५५ ॥ देवीं वृत्तविलूनैश्च पूजयंति सुमैः स्वकैः ॥
वकुला भूधरोत्तुंगकुलशेखरकन्यकां ॥ ५६ ॥ पवनैर्विगलत्पुष्पैः ग्रर्च्यामर्चंति शाखिनः ॥ शिरीषाः स्व
सुमाधिक्य दिव्यकोमलविग्रहां ॥ ५७ ॥ स्वपुष्पैश्छादयंत्येनां कर्णिकाराश्च केसरैः ॥ पूजयंति महादेवीं
तथा कुरबकाअपि ॥ ५८ ॥ तिमिशारक्तमालाश्च स्वपुष्पैः मालिकंदधुः ॥ जंबूनिंबाकेतकाश्च पुष्पगुच्छैः
शिवांगकं ॥ ५९ ॥ अफुल्लकुसुमासारपटवासप्रभांतदा ॥ मुक्ताफलसमाकारैः मधुकाविगलत्सुमैः ॥
६० ॥ विकिरंति महादेव्या मूर्ध्नि धन्याः स्वकैः करैः ॥ फलजालप्रपतनपूजामिषभैरस्तदा ॥ ६१ ॥ कुर्वंति
तद्वनोद्देशे तिर्यंचोपि सहायतां ॥ एवं परिचयात्तस्याः कैलासनगमूर्धगाः ॥ ६२ ॥ मृगांडजस्थावश्च
सेवंति परितः शिवां ॥ नगाग्रमौलिसंघेषु तेवनस्पतयोपि च ॥ ६३ ॥ स्वजनुर्धन्यता प्राप्त्यै देव्याः से-
वापरायणाः ॥ कोकिलाः काकलरवैः श्रवणोद्दामसुंदरैः ॥ ६४ ॥ कलहंसालयः केकारवै रुत्तमब-
र्हिणः ॥ सारसाः क्रौंचनिवहाः रुवंति मधुरध्वनिं ॥ ६५ ॥ भृंगाः तुंगरवाः पुष्पच्छद भ्रमणसुंदराः ॥

शिव र० देवींतोषयंति परितः स्ववाग्भिस्ते विनीतवत्॥ ६६॥ स्कंद उवाच॥ ॥इत्थं शैलवरे पुरा गिरिजया तप्तंतपः पावनं यक्षाक्षोभ्य पदांबुज प्रवणया ध्यानैक धारा रसैः॥ वर्षाणामयुतं शिरीष कुसुमाकारांगसौं दर्यमप्युज्झित्येव शिवैक निष्ठ हृदया किंचिद्धृ दासंदधत्॥ ६७॥ सर्वेषां तपसां फलोन्मुख महा साम्राज्य दान क्षमा दाक्षायण्यपि ध्यान धृत विषया देवं स्व चित्ते दधत्॥ लोकानां प्रदिशत्य पार तपसा प्राप्यं फलं चेति सासा सर्वोत्तम देवदेवजनिम प्राप्यार्चय त्केवलं॥ ६८॥ ॥इति श्री शिव रहस्य भवे द्वितीयांशे देवी तपो वर्णनं नाम द्वितीयो ध्यायः॥ २॥ ॥श्री काशी विश्वेश्वरा०॥ ॥

॥स्कंद उवाच॥ ॥तपस्यंत्यां तथां बायां सर्वेषां विस्मयावहं॥ आश्चर्य कारिभिः भूतैस्तथैव प्रम थेश्वरैः॥ १॥ मुनीश्वरै देव संघैः विष्णु ब्रह्मादिभिः सुरैः॥ गंधर्वोरु रगैः सिद्धैः चारणै र्यक्ष रक्षु षैः॥ २॥ काले बहुतिथे याते समभ्यागा द्धृहद्व्रया॥ शिवो हि विप्र रूपेण तत्तपः सिद्धि हेतवे॥ ३॥ वयसा शतकेना पि कृशो धमनि संभितः॥ पर्णकुटावृत तनुः धृत यष्टि कमंडलुः॥ ४॥ शिरा भिर्दृश्य मानाभिः स्नायु चर्मा स्थि संयुतः॥ सित श्मश्रु जटा कूर्चे ब्रह्म सूत्रो पवीभितः॥ ५॥ पर्वताग्रे चरन्मंदं स्व-

द्वि०अ० ग्र०३

५ ५

लत्पादः प(त)न्नपि ॥ मंदं मंदं समायाति मंद मारुतवद्द्विजः ॥ ६ ॥ कैलासो पवनेतत्र ददर्शायत लोचनां ॥ मालूरवृ-
क्ष संघोत्थ छायायां स्थंडिलोपरि ॥ ७ ॥ भस्म पर्यंक शयितां विद्युत्कोटि शतप्रभां ॥ सौंदर्य धारा सर्वस्व विग्र-
हामिव संस्थितां ॥ ८ ॥ उत्फुल्ल रक्त कमल दल प्रांतोरु लोचनां ॥ चांपेय कलिका प्रोद्यन्नासा शोभित मौ-
क्तिकां ॥ ९ ॥ सुवृत्त हल्लकल सच्छ्रवण द्वय शोभितां ॥ कंजदर्पतिरस्कारि कंठ मंडल शोभितां ॥ १०
घन मंडल संकाश कच भार विराजितां ॥ पिशंगित जटा लोक वेणी जाल सुमौलिकां ॥ ११ ॥ अष्टमी चं-
द्र संकाश भ्रूलता शोभिताननां ॥ पक्ष्मभि र्विजित मार निबिडावृत लोचनां ॥ १२ ॥ उद्यच्छशांक मध्य-
स्थ कलंक रहिताननां ॥ पीन वृत्त मणि प्रोद्यत्कलशाभ कुच द्वयं ॥ १३ ॥ त्रिपुंड्र रेखा भस्माक्त तिलक
द्योतिताननां ॥ त्रिवलीवल्लि गंभीर सुंदरोदर संवृतां ॥ १४ ॥ स्तन भारनत प्राय कटि मंडल शोभितां
॥ रंभास्तंभ सुवृत्तोरु द्वय कांड महापदां ॥ १५ ॥ कमठी पृष्ठ संकाश प्रपदालक्त सावदां ॥ जानु गुल्फ स्फि-
गाकार तत्तद्वृत्ताखिलाकृतिं ॥ १६ ॥ मणि स्तंभोपमाकार बाहु द्वय नखांगुलिं ॥ प्रवालालक्त कासल्कु-
रुविंदाभ सन्नखां ॥ १७ ॥ पद द्वया लक्तकर कैलासं रक्त वर्णकं ॥ नख दीधितिनारक्त प्रभायित-
दिगंतरां ॥ १८ ॥

शिवर० अपर्णा पर्णजालेन वाससा संवृतां तदा ॥ सुपांडुर महा भस्म परिशोभि कलेवरां ॥ १९ ॥ भूर्जवल्लिविहीना हि० भ०
पि शुशुभे याक्षमालया ॥ स्थिरां तपो मूर्ति मिव सदूरात्स मुदैक्षत ॥ २० ॥ देव्यापि दृष्टो विप्रेंद्रः शैवो
भस्म विभूषितः ॥ त्रिपुंड्रावृत्त मस्तकालो रुद्राक्षांगदकंकणः ॥ २१ ॥ वदन् हर हरे शेति धृतयष्टि-
स्खलन्पथि ॥ तादृशं ताप सं दृष्ट्वा तपो राशि मिव स्थितं ॥ २२ ॥ मूर्ति मंतं हव्यवाह मिवागत मुमा तदा ॥ एहे
हीत्य भ्यवाचंतं तापसं वीत कल्मषं ॥ २३ ॥ स गौरी सार वाक्येन जात हर्ष स्तदंतिकं ॥ मंदं मंदं य यौ विप्रः त-
द्देव्यास्तपसो वनं ॥ २४ ॥ देव्या दत्तवृसी मध्य मध्य तिष्ठत्कृतांजलिः ॥ उवाचांबाननं वीक्ष्य स गद्गद
मेहातदा ॥ २५ ॥ ॥ विप्र उवाच ॥ ॥ किंचिन्नु जानामि शिवे वक्तुं श्रोतुं किलामले ॥ जरया परिपूर्णांगः
शतवर्षायुरस्मि हि ॥ २६ ॥ अस्मिन्केलास भूभागे संचराम्यहमेककः ॥ तत्र श्रुतं शिव गणैः कुरुतेंबा तपो
दृढं ॥ २७ ॥ त्वद्दर्शनार्थं देवेशि मंदं मंदं समागतः ॥ विस्मयेनाह मत्रागां त्वत्पादांबुरुहेक्षणः ॥ २८ ॥ त-
वापि तपसा किं वा कार्यमंभोरुहानने ॥ सर्वेषां तपसां देवि त्वत्पादाब्जं तपः फलं ॥ २९ ॥ प्रसूते ब्रह्मविष्णू
नां मुनीनां भावितात्मना ॥ मुनिभिश्च गणैर्देवैस्तपस्तप्तं शिवपुरा ॥ ३० ॥ तत्पदांबुज सेवार्थं शिवज्ञानार्थमंबिके ॥

त्वत्प्रसादेन ते सर्वे जाता लोकेषु नायकाः ॥ ३१ ॥ ब्रह्मा स्रष्टा कृते विष्णुः संहर्ता रुद्र उत्तमः ॥ कल्पितास्त्वद्दयापात्राः
त्वद्रूपां गाव लोकनात् ॥ ३२ ॥ किं तवाप्राप्यमस्ति हस्तपासा केवले नहि ॥ क्व ते तनुः शिरीषो त्थकुसुमादपि मा-
र्दवी ॥ तपः क्व नु महादेवि साहसं प्रति भाति मे ॥ क्वत्त्वांगे कर्पूरं क्व वा भस्मविलेपनं ॥ ३४ ॥ पाटीररसक-
र्पूरकस्तूरीवरचंदनैः ॥ लिपितं कुसुमामोदि मणिमाणिक्यभूषितं ॥ ३५ ॥ भूषणानां त्वदीयांगं भूषणं किल शैल
जे ॥ शैलजातेति काठिण्यं हृदये त्वनुवर्त्तते ॥ ३६ ॥ हे य्यंगवीनसदृशं तव मानसमंबिके ॥ तदद्य कठिनं किंतु
तपस्येव प्रवर्तते ॥ ३७ ॥ तव भर्त्ता महादेवः साक्षाल्लोकैकनायकः ॥ तेनैवानुमता चासि नो चेत्तव तपःक्रिया ॥
३८ ॥ कारणं नैव जानामि त्वत्तपःकरणे शिवे ॥ फलप्रदानोन्मुखी त्वं सर्वेषां तपसामपि ॥ ३९ ॥ यदि श्रा-
व्यं वद पर्णे न गुह्यं ते यतोंबिके ॥ वद गुह्यं कृपासार यो क्षेणे न हृद्गतं ॥ ४० ॥ तस्य तद्वचनं श्रुत्वा गौरी गि-
रिवरात्मजा ॥ प्राह तं विनयानम्रा वृद्धं तापसमुत्तमं ॥ ४१ ॥ श्रीगौर्युवाच ॥ ॥ किं चित्कामं पुरस्कृत्य त-
पो निष्ठास्म्यहं द्विज ॥ न मेस्ति किंचित्क र्तव्यं कारणं नान्यतो मम ॥ ४२ ॥ अहमेवाखिलाराध्या सर्वेषां तप-
सां फलं ॥ प्रदातुं मोचितुं सर्वान् पशून् हमतं दृता ॥ ४३ ॥ विश्वाधिको महादेवः सर्वेषामधिनायकः ॥

212

शि०र० समे भर्त्ता सखा माता बंधुर्मम पिता शिवः ॥ ४५ ॥ तस्य शक्तिरहं रहं साक्षात् मया मायी महेश्वरः ॥ मया कृतमिदं भ०
दं विश्वं लोकलोक्यैः समावृतं ॥ मत्तेजसेव स सृजे यथा पूर्वं विधिर्जगत् ॥ मत्तेजसेव विष्णुश्च जगत्पात्यसु-
राईनः ॥ ४६ ॥ मत्तेजसेव रुद्रोपि संहरत्येव जगत् ॥ मत्तेजसेव देवेंद्रः त्रिविष्टपनिविष्ठितः ॥ ४७ ॥ मरु
तो मनवश्चैव सोम सूर्या ऋषीश्वराः ॥ तारा जाल मिदं सर्वं वायुरग्निर्यमो यमा ॥ ४८ ॥ निऋतिर्वरुणश्चैव
कुबेरो रुद्र एव च ॥ दिक्पालाः प्रमथाधीशाः स्कंद हेरंब पूर्वकाः ॥ ४९ ॥ सर्वे सुरासुरा दैत्या राजानः पृ
थिवी भुजः ॥ नदी नद समुद्राश्च गिरयोथ वनानि च ॥ ५० ॥ भूरादि सप्त लोकाश्च पाताला न्यथ सप्त वै ॥
सर्वमद्वशगं विप्र चराचरमिदं जगत् ॥ ५१ ॥ ~~किंचित्पृच्छामि विप्रेंद्र शांभवाग्रे सरो ह्यसि~~ ॥ तस्येश्वरस्य
चिच्छक्ति रहमेव सनातनी ॥ तथापि लोकगुप्त्यर्थं किंचित्कामं हृदि स्मरन् ॥ ५२ ॥ तस्येश्वर प्रसादार्थं च-
रामि परमं तपः ॥ किंचित्पृच्छामि विप्रेंद्र शांभवाग्रेसरो ह्यसि ॥ ५३ ॥ तद्वदस्वानुपूर्वेण मातस्त्वद्व्याते ऋ
मः ॥ तथ्यं प्रब्रूहि मातथ्यं तेन तुष्टास्मि शांभव ॥ ५४ ॥ सत्य प्रियाहं विप्रर्षे मम कैलास सद्मनि ॥ नैवाश्रमो मुनि
गणो नो चात्रैव नो पिहि ॥ ५५ ॥ चंद्र सूर्य कराश्चापि न प्रसर्पंति सुधरे ॥ विष्णुब्रह्मादयो देवाः कैलासस्या-

स्य दर्शने ॥ ५६ ॥ बहु कालं तपस्यंति प्रसादार्थं हि शूलिनः ॥ तव प्रवेशः कुत्रा भूत्तन्मे वद मनोगतं ॥ ५७ ॥ ॥
सूत उवाच ॥ ॥ तदा देव्या वचः श्रुत्वा विप्रवेष धरो हरः ॥ प्रोवाच प्रसभं देवीं परिवंचक ईश्वरः ॥ ५८ ॥
॥ विप्र उवाच ॥ विप्रोहं भार्गवो देवि हिमाचल कृताश्रमः ॥ तत्राहं मवसं विप्रः तपः रचा ध्यायशीलवान् ॥ ५९ ॥
~~अस्मिन् जन्म शतांते त्वं विप्रः कैलासमो स्मिमः~~ ॥ बहु जन्म शतावर्तैः सदा लिंगार्चकस्य मे ॥ नजहाति स्मृतिर्मातः
ततो हं प्रवदामि ते ॥ ६० ॥ प्रसाद सुमुखो देवो माम भावत वै कदा ॥ ईश्वर उवाच ॥ अस्मिन्जन्म शतांते
त्वं विप्रः कैलासमो लिगः ॥ ६१ ॥ तत्रैव भवतो जन्म तत्रैव त्वं जरां गतः ॥ स्थास्यसि चिरकालीनः को
तुकावह एव मे ॥ ६२ ॥ नित्यः सदैव जरया क्षुत्पिपासेन चान्यथा ॥ स्मृतिर्जहाति न त्वां हि जराजीर्णं पि च त्व
यि ॥ ६३ ॥ इत्थं प्रसाद सुमुखो मामाह परमेश्वरः ॥ तस्मा द्रूवस्येहं कैलासे प्रसादेनमहेशितुः ॥ ६४ ॥ तव
प्रभावं विज्ञातुं मामाह परमेश्वरः ॥ ॥ स्कंद उवाच ॥ इति विप्र वचः श्रुत्वा साश्चर्यं सम भाषत ॥ मौलिं मां दो
लयन्देवी नासाग्र न्यस्त तर्जनी ॥ ६५ ॥ गौरी उवाच ॥ ॥ कदा चिन्मा रहस्ये पि नो क्तवान्परमेश्वरः ॥ कस्मिं चि
मांस्ह ॥ विप्रोस्ति तापसो वृद्धो बहु वर्षायुरुत्तमः ॥ ६६ ॥ मम लिंगार्चकः साधुरस्मिन्कैलास पर्वते ॥

2/3

शि०र० इतिसा विस्मयेनाह ततो विप्रो भुवाचतां॥६७॥ ॥विप्र उवाच॥ ॥त्वंतः प्रियतरा भक्ता महादेवस्य शंक- टी० भ०
री॥ नैवाकथि शिवेनत्वं किंचिद्वक्ष्यामि ते हितं॥६८॥ भक्तिप्रियो महादेवो भाववश्यो महेश्वरः॥
सर्वज्ञासि विशेषेण त्वयि वाच्यं न विद्यते॥६९॥ तथापि किंचिद्वक्ष्यामि जरसा च परिप्लुतः॥ पृ० ३
८ कायक्लेशकरेणालं तपसा परमेश्वरि॥७०॥ किं कायक्लेशनिचयैः धर्माभासशतैः शिवे॥ अर्थ
व्ययाया सलभैः पतनांते दुरासदैः॥॥७१॥ योगैर्यागैस्तीर्थयात्राव्रतकृच्छ्रैश्च साधनैः॥इ-
ष्टापूर्तैः कष्टधर्मैः वर्णाश्रमनिबंधनैः॥७२॥ श्रमैकभारं नो सौख्यं चित्तशांतिर्न चैव हि॥ ८
अतिकल्मषचित्तानां संसारासारवर्त्तिनां॥७३॥ जडानामल्पसाराणां क्रमान्मुक्तिप्रदा हिते॥
तस्मात्क्वापि न संसेव्यो दारुणो यमवग्रहः॥७४॥ साक्षान्मुक्तिप्रदं धर्मं शिवलिंगार्चनं शिवे॥ तस्मिन्सं
पूजिते शंभुर्नितरां परितुष्यति॥७५॥ अधिकारिविभेदेन धर्माभासाः शिवे नहि॥ कल्पिताः श्रीमहेशेन
श्रौतस्मार्तपुराणकाः॥७६॥ विप्राणां श्रौतधर्मा हि कथिता स्तिस्मृतैरपि॥ क्षत्रियाणां विशां चापि
पौराणः शूद्र एव हि॥७७॥ तां स्त्रिके येदक श्चापि न नियोज्यो स्ति शंकरी॥ कर्मवादमिदं श्रौतं यज्ञा

ध्ययनसत्क्रियाः॥७९॥ यज्ञैरिष्ट्वा महादेवं स्मार्तैरपि सदा शिवं॥ शुद्धस्य कर्मभिर्देवि ततो भूयादुपासनं॥८०॥
उपासनायां ये धर्माः तान् शृणुत्व मिहांबिके॥ अग्निरित्यादिभिर्मंत्रैः विभूत्युद्धूलनं तथा॥८०॥ त्रियं-
बकेश्च गिरिजे भस्मनाप्यवगुंठनं॥ त्रियायुषैश्च त्र्यंबकैश्च त्रिपुंड्रपरिधारणं॥८१॥ ततो रुद्रजप-
श्चैव पंचाक्षरजपस्तथा॥ रुद्राक्षधारणं देवि शिरोबाहुगलादिषु॥८२॥ त्रिपुंड्रस्य च यन्मंत्रं तद्धि रु-
द्राक्षधारणे॥ महाभस्म महादेवः संसारभयमोचकः॥८३॥ ततो लिंगार्चनं श्रेष्ठं बिल्वपत्रैर्महेश्वरि॥ ए-
वं संतत्युक्तस्य शिवध्याने भवेन्मतिः॥८४॥ सूर्यात्मनो महेशस्य रूपमूर्तस्यापि शूलिनः॥ त्रिनेत्रं नीलकं-
ठं च सांबहृत्स्थं विचिंतयेत्॥८५॥ ततोपि ध्यानतः शंभोः नित्यानित्यविवेकतः॥ गुरुशुश्रूषया चैव
वेदांतार्थविचारतः॥८६॥ सर्वमात्ममयं भाति तस्यैवानुग्रहाच्छिवे॥ ब्रह्मैव ब्रह्म भवति नान्यदत्रास्ति किं-
चन॥८७॥ ज्ञानेन ज्ञेयमालोक्य ज्ञानं तत्र विवर्जयेत्॥ ज्ञानं ज्ञेयं तथा ध्याता ध्येयं ध्यानं तथैव हि॥८८॥
आत्मैवेदं किलेशानि ब्रह्मैवेदं हि नेतरत्॥ तदा विज्ञायते ज्ञानं शिवानुग्रहतः परं॥८९॥ किं वक्तव्य-
मुमासहाय चरणांभोजार्चनध्यानतो नान्यल्लिंगसमर्चना जि महापुण्यांबुराशेः परं॥ सर्वं लभ्यत एव शं-

मु भजना किं कार्य मधेतरैः॥ धर्मा भास परं पराभिरगजे भूया श्रमः केवलं॥ ८०॥ योदेवं सुचिरं शिरोव्रतपरो लिंगे स्थिरे वाचरे बिल्वैः पूज्य त्रिकाल मेव नियतं तेनैव तप्तं तपः॥ किं धर्मजाले निखिलेश्च यागैर्योगै स्तथाष्टांग यमाशजाद्यैः॥ व्रतैश्च कृच्छ्रैरमृते रुमापति प्रियं न किंचिन्नियते न गौरि॥ ८१॥ लिंगार्चनं बिल्वदलै रपारैः त्रिकाल मीशार्चनतो विमुक्तः॥ लभेत देतस्य कृपाकटाक्षतो नान्य त्प्रियं तस्य त्रिशूलिनो बिके॥ ८२॥ इत्युक्त्वा सजगाम विप्रतिलकश्चादर्शनं पश्यतो देव्यास्तत्र महेश्वरेण कथितं धर्मोत्तमं सा शिवा॥ ध्यानेनाधिजगीष्ट देव मिति सा तध्यान हृष्टांतरानंदांभोधि निमग्न मार हृदयांतं चाष्ट मूर्तिं शिवा॥ ८३॥ इति श्री शिवरहस्ये भवोद्धितीयांशो विप्रदेवि संवादे नाम तृतीयोध्यायः॥ ३॥ ॥ श्रीकाशी विश्वेश्वरार्पण मस्तु॥ ॥ मुनिरुवाच॥ ॥ सा विप्रवचनं श्रुत्वा स्कंद देवी गिरींद्रजा॥ किं चकार तदा शैले तत्समाचक्ष कौतुकं॥ १॥ स्कंद उवाच॥ तदा स्कंदो ह्यवक्तुं गौरीश्चरितमुत्तमं॥ प्रचक्रमे गणेंद्राणां मुनीनां नाकिनां तथा॥ २॥ ध्यात्वा पुरारि मथ सा स्वहृत्स्थं तथांबिका॥ तपो वनगता देवी तस्मिन्केलासपर्वते॥ ३॥ कोटिभिर्विहितानेक शिखरैरिंदु सम प्रभैः॥ प्रकाश धवल श्चापे राकाश मिव निर्मलैः॥

तत्रैकस्मिंश्च शिखरे रम्यतुंगघनावृते॥ राजतोत्तमसर्वस्वधारारसविजृंभिते॥ ५॥ स्वहृदये चिंतया मास क्षणमेकमतंद्रिता॥ महामाया महाशक्तिर्यया ततमिदं जगत्॥ ६॥ यया सृजति भूतानि स्वे देवो महेश्वरः॥ सैव सा स्वहृदा ध्यानैः चिंतयत्क्षणमात्रकं॥ ७॥ तस्मिन् गिरिवरोत्तुंगशिखरे समदृश्यत॥ रम्यं मणितटं दिव्यं योजनायतमुत्तमं॥ ८॥ मणिसोपानसंयुक्तैस्तीरबंधैर्विराजितं॥ स्फाटिकोज्वलदिव्यांबुपूरपूरितमुत्तमं॥ ९॥ रत्नमत्स्यैः कर्कटैश्च रत्नकूर्मैः समावृतं॥ कुरुविंदोत्तमलसत्सहस्रदलपंकजैः॥ १०॥ विकसद्भृंधुरामोदपर्यंतामलकेसरैः॥ मरुदुत्थैस्तत्परागरंजितैस्तीर्थवारिभिः॥ ११ मरालोदककुंचारिहारितयच्चाक्रकुकुटैः॥ सारसैः सारसारावैश्चक्रवाकयुगैर्वृतं॥ १२॥ तत्तीरपरितः स्वच्छछाया संनम्रमौलिभिः॥ वनस्पतिवनैर्देव्या तत्र सीमा कृता मुदा॥ १३॥ तत्प्रांतरत्नगर्भोरुमंडपावलिभासुरा॥ ज्वलत्कुंभोरुवल्लभीजालकच्छन्नतांबरं॥ १४॥ प्रफुल्लरत्नमंदारैः रत्नपंकजशोभितैः॥ तिलकैरत्नमालैश्च तमालोत्तमसालकैः॥ १५॥ धवैर्नीपैश्च पनसैः ~~लककर~~ च्छन्नतांबरं लिकुचैर्बकुलैरपि॥ अशोकैः कर्णिकारैश्च कुटजैश्च कुरंटकैः॥ १६॥ तगरैरगरैराजद्राजवृक्षैः सिरीषकैः॥ तक्कोलं-

शि० र० कोलपुन्नागनागार्जुनकर्णिशुभिः ॥१७॥ चंदनैर्नंदनाकारैः चकुटैश्च कुरंटकैः ॥ तगरैस्तगरैराजन्नय-भवोद्दि-
नानंदसुंदरैः ॥१८॥ श्रीकर श्रीपरिवृतैः श्रीवृक्षैः पाटलैर्धवैः ॥ संतानैः पारिजातैश्च जंबुजंबीर ग्र० ४
फलद्रुमैः ॥ कोविदारैर्देवदारैः बिभीतकहरीतकैः ॥ वटोरुपटलैश्चैव पूगनारेलसर्जकैः ॥२०॥
कदलीदललोलैश्च फलपुष्पावनामिभिः ॥ लवंगैः कुशिकैः फुल्लकृष्णागरुमधूककैः ॥
२१॥ कुंदवल्यो मल्लिवल्यो द्राक्षेलावल्लिगुच्छकैः ॥ शोभिताः शाखिशाखाग्रविस्तृतेषु वन
भूमिषु ॥२२॥ तत्फुल्लकुसुमामोदिशीतसुंदरवायुभिः ॥ कंकेलिकेलिपालीभिस्तथा गंध
फली द्रुमैः ॥२३॥ प्रत्यग्रकेतकभरैः राजराजाद्रनैरपि ॥ काकलीकोकिलालापैः कपोतरुत शु-
भासुरं ॥ भुजंग भोगाभरणं कंठे नील मणिप्रभं ॥३७॥ तत्फणावृत सन्मौलि दर्शना

शिवरह० सर्वकामदं ॥ तद्रत्न शिखरोद्भासि वृषभा वलि शोभितं ॥३८॥ विस्मयानां स्मयक-भवनोद्
रं सौंदर्या दपि सुंदरं ॥ रम्यं विहार सदनं त्वया मे कल्पितं शिव ॥३९॥ परमानंदद
मेघयथात्वद्दर्शने मम ॥ तथैवायं मणि द्वीपः इयं कल्पक वाटिका ॥४०॥ इतिदे-
व्या वचः श्रुत्वा ततोंतर्वर गर्भकं ॥ मणि जाल युतो तुंग प्राकारां तः प्रकल्पितं ॥४१॥
नीपानोकहकादंब वन राजि विराजितं ॥ चिंतामणि मणी कूप्त सौधा युत विराजितं ॥४२॥
सुरम्यतन्मणिस्तंभ उत्कीर्णो घ सुपीठकं ॥ शाणोल्लीढ मणि व्रात चारु चक्र्यैक भासु
र ॥४३॥ नीपोपवन सौंदर्य दर्शया मास विश्वपः ॥ रत्नद्वीप कुलं प्रफुल्ल सुमनापारा
द्गंधावृतं नेत्रानंद करं सदैव विततं चाम्लान वर्ज शिवे ॥ दिव्योत्तुंगतरंग जालक
सुधा सिंधोर्जले स्सिक्तमप्यक्तं मणि जाल कांति ततिभिः प्रोद्यच्छिखं सुंदरं ॥ रत्नो
द्यन्मणि वेदिका शाल युतं धारा गृहैः शोभितं बर्ही क्रीडन बर्हि कोकिल- ॥

महाहंसालिपालीततं ॥४५॥ कापोतावलिलीलया सुमधुरारावैरणत्तैरसं जिनो मंजीरध्वनि पादपंक
जमुमे तत्र लयान्यस्य तां ॥४६॥ इत्युक्त्वा जगदंबयात्रि जगतां नाथःशशीशेखरः ॥ दृष्ट्वाद्यनीपव
नं ससुंदर महापुष्पाढ्य गुच्छावृतं ॥४७॥ तद्वातैरति सुंदरोत्तम महाशीत र्थि सारा करैः ॥ गंधा
नंदित घ्राण तर्पित मरुज्जाले विशाले रपि ॥४८॥ देव्यानीपवनं विलोक्य सदयं चातिष्टदीशायुतो
रम्ये रत्नमणि वेदिका स्तृत मणीमंचे जगन्नायकः ॥ ॥ ईश्वर उवाच ॥ ॥ नीपानां कुलमेतदद्य
गिरिजे चात्यं तपापापहं गोपायंत मनेन नः प्रतिदिनं त्वद्भक्तियुक्ता उमे ॥ वेपंतः पवनालिसारचल
नैः पुष्पैरहीनं चयत्युपोघन्मधुगंध सार सुभगं पश्याद्य मोदास्पदं ॥५०॥ ॥ इति श्री शिवरहस्ये
भवोनाम द्वितीयांशे मणि द्वीपवर्णनं नाम त्रयोदशोध्यायः ॥ १३॥ ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥
॥ स्कंद उवाच ॥ मंचे षु देवौ हित दाचि क्रीडतुर हो द्विजाः ॥ शंभोः तत्रैव नवसीतः कृता नीपवनेत
दा ॥१॥ नीपशाखा लंबितोयधृखला मंचके शिवौ ॥ नगराजांग संभूता तत्र स्थाप्राह शंकरं ॥२॥
श्लथ धम्मिल्ल मल्लीनां सरालिकलिकाभरैः ॥ चंदनालेप सुभग गात्रेणा लिंग्य शंकरं ॥३॥ नयनां

२४१

जनचिन्हो घल्क पोल तट सुंदरं ॥ स्वकुचागाढमृदिक्कुंकुमांकितवक्षसं ॥४॥ विधूतनिंबसाम्राज्य मधुरं साम हे शितुः ॥ वारुणी दिक् समाक्रांत प्रांतः शशि सम त्विषं ॥५॥ चुंबनालिंगनप्रौढरसानंदोल्लसा शिवा ॥ प्राहतं देवदेवेशं प्रांजलिः गिरिजा तदा ॥६॥ ॥गिरिजा उवाच ॥ ॥देवदेव महादेव शरणागतवत्सल ॥ महेश्वर तपोराशि दयाराशीश शंकर ॥७॥ इंदुधाम समानास्य बालेंदुकृतशेखर ॥ पश्यामि द्वीपमध्यस्थं त्वया चिंतामणी चितं ॥८॥ महारत्नवरोत्तुंग सौधांत गृहमीश्वर ॥ ॥स्कंद उवाच॥ ॥ इत्युक्तं तद्वचो देव्या शिवः श्रुत्वा महेश्वरः ॥९॥ शिवः स्वहृदयाकार संधितोघ विचित्रितं ॥ उत्कीर्णरत्नजालेभ्यः प्रभाधिकविनिर्मितं ॥१०॥ देव्यै तद्दर्शयामास विश्वात्मा विश्वभावनः ॥ चेष्टितं तस्य को वेद वेदवेद्यस्य चेशितुः ॥११॥ मनागिति च जानेहं तच्चेष्टितमिदं जगत् ॥ अधिता स्त्वया स्यामः तदधिष्ठानचेष्टितं ॥१२॥ अपूर्वं यन्मया दृष्टं तदाख्यामि च शृणु ॥ तन्नो देव्या महादेव्या निरगान् दुरितं तकः ॥१३॥ तन्नो पवनमध्यस्थं सिंहासनवरं तदा ॥ तद्दर्शयामास देव्यै दिव्यचिंतामणी ततं ॥१४॥ सौधराजोत्तमं देवः श्रीचक्राकारसुंदरं ॥ चिंतामणिसमूहानां ज्योतिः प्रततरांबरं ॥ चक्रकोणविवृत्ताद्यन्मणितोरणपालिभिः ॥ वलभीसुंदर

कारा स्तंभ कुंभो ज्वलोछ्रयं ॥१६॥ सौधाग्र विविधोछ्राय मणी कलश दिङ्मुखं ॥ जयंतो वै जयंती नां नि
कारैः त्रिदिवस्थलो ॥१७॥ महा सिध्यष्टक स्यापि क्रीडाभुवन मुत्तमं ॥ वृत्त कल्प द्रुम वनं नीपैः फलकुला
वनैः ॥१८॥ पर्यंत कलिता पार आलवाल मणि द्युतिं ॥ प्रासादेषु प्रतोलीषु प्राकाराग्रे गृहांगणे ॥१९॥ गोपुरे
षु विचित्रेषु कपाटेषु तटेष्वपि ॥ मणिमाणिक्य रत्नानां उच्चलच्चारु रोचिषां ॥२०॥ ज्योति र्जाले र्जटिलितं
शिवे द्रमवलोक्यतां ॥ द्यावाभूम्योरंतराले लोक जाले तथा भुवि ॥२१॥ विष्णु ब्रह्मेश भवने दिक्पालानां
पुरे तथा ॥ नागानामपि लोकेषु दैत्येंद्राणां पुरीष्वपि ॥२२॥ कैलासेवा महादेवि चिंतामणि गृहाधिकं ॥ ईदृक्सं
पति संभारः न कुत्र भुवनेश्वरि ॥२३॥ उद्यत्कांति महा सौध मणि रंजित पीठभूः ॥ चारु चित्र विचित्राढ्य चिं
तामणि गणा द्युतिः ॥२४॥ भास्वरं सुमनो धाम कल्पकानां भरैरपि ॥ नीप व्रात महा गंध वात सुंदर दीर्पितं ॥२५॥
धूपधूमामृता सार मणि दीपायुतो ज्वलं ॥ सुरम्य हर्म्य पश्याद्य लोचनानां लिषामुषं ॥२६॥ मनः सर्व स्वरचि
तं मया तन्कृतं शिवे ॥ मणि जालक सच्छिद्र तरलो दार कांतिभिः ॥२७॥ दिङ्मोह जनकं चैतत् दर्पणोदर
सुंदरं ॥ हीरसार घनापार तलोल्लासित दिक्तटं ॥२८॥ विचित्र सूत्र वैडूर्य रंजि धारा कलाकुलं ॥ गोमेद गर्भ

शिखर२ मेदोघ्र च्चारु भित्ति विभूषितं ॥२९॥ पुष्यरागमणि ज्योति स्तंभ विद्रुम पुत्रिकं ॥ महेंद्रनीलसंक्लृप्त स्तंभपीठो
ज्ज्वलस्पदं ॥३०॥ प्रवाल तिलकालो लो ज्वल त्तलकलाकुलं ॥ मुक्ता गुच्छसरापारलंबितो त्तमपीठकं ॥३१॥ व
लभीकुल जालं विनाना रागसमावृतं ॥ महामणिक्य वलभी निर्य त्कांति वृता दिशः ॥३२॥ आताम्रा उवरा
जंते गतसाम्य सुधाशने ॥यत्राति मित्र तेजोभिः शलाका भिर्विचित्रितं ॥३३॥ गवा दितं पक्षि गणैः ^{पा} रालीपाली

मरालकैः ॥ सिंहाक्रांतम ^{गज} अप्रोघच्छं डादंडादि कोल्लितेः ॥३४॥ शार्दूल मुखवृत्तास्य घोणा चुंबितनासिकैः ॥
मरालराज मुखगमुक्ता सक्त लतावृतैः ॥३५॥ कपोतपालीमणिजा रक्तपादाक भासुरैः ॥मयूर पक्ष संदृश मयू

खपक्षतैः ॥३६॥ विस्तृ तालं विपिच्छाग्र भरसार ^{क} कल्पिकृतैः ॥ हंसालि स्कंध मध्यस्थ रत्न सौधालिकातते ॥३७॥
उद्वहंत श्रमोद्भ्रांत नयना सारसुंदरं ॥भुजाभ्यां पीन वृत्ताभ्यां कल्पिता मणि पुरुषाः ॥३८॥ सिंहास्य निर्यद्दंष्ट्रा
प्रजिव्हा निर्य त्सुतारके ॥ ^{मनसा हि महा} नंयनान्यमला पार मणीनां कल्पितां बिके ॥३९॥ पश्याद्युनामणिमयैः पुरुषैर्धृतचाम
रैः ॥ केलि लीला विचलनैः पुत्तल्यो व्यजनीकराः ॥४०॥ सेवंति त्वां महादेवि स्वजाड्य विनिवृत्तये ॥ यंत्रासारम
र्दकारर या कृति गृहं शिवे ॥४१॥ धूयमान पताकं च तुरंगावलि शोभितं ॥ वहंति श्री युतं यस्मिन् तुरंगाः कामवे
गिनः ॥४२॥

प्रोच्चलंत इवा भाति दिव्यं रथ गृहं शिवे ॥ सिंह प्रणादयुतमत्युदारं केसरीगणैः ॥४३॥ सहस्त्रं धवलापार सटाशोभितकंधरैः ॥ रहीति धूर्तं ग्रहणे मणिजालयुतस्य च ॥४४॥ गजसौधमिमं पश्यादिव्य सिंधुरमूर्धगं ॥ चलदस्नाग्रदंडोत्यमणी नुवरहर्षितं ॥४५॥ विधृतोत्तुंग कुंभस्थ दिव्य पीठमणिद्युति ॥ इंद्रनीलमयैः कूटैः गजैः पश्यांबिके तव ॥४६॥ इत्युक्ता गिरिराजजाततनया मानंदयन्धूर्करः ॥ दिव्यापारमणिद्युतिप्रविल सन्मौलिस्य कुंभो ज्वलान् ॥४७॥ प्रासादान्वि विधान् अक्क त्रिम महा चित्रस्य विश्वेशितुः ॥ चित्रैर्कल्पित सज्जकैरनुदिनं तुष्टा षृमूर्तिः शिवा ॥४८॥ स्वोत्फुल्ला मल पंक जोत्तमकरैरालिंग्य हृष्टांतरा धारा सारगृहे
ष्वकालमनयत्का लाति गस्येशितः ॥ पर्यंकांक गति प्रचार विहिता पारानुसारादरा देवी सा परमेश्वरस्य ललितं पादांबुजं सेवती ॥४९॥ इति श्री शिवरहस्ये भवे क्षितोयांशे श्री चक्र सौध वर्णनं नाम चतुर्दशोध्यायः॥
॥१४॥ ॥श्री काशी विश्वेश्वरार्पणमस्तु॥ ॥श्री ईश्वर उवाच॥ ॥पश्य देवि महामंचं पुष्प सारछदावृतं ॥ हिरण्यानर्घ्य वस्त्राढ्य महाकशिपु शोभितं ॥१॥ सौधाघ्रत पताकाभिः उद्यद्धरिशश तायुतं ॥ पुष्पछ द पटप्रांत लोला लंबित मौक्तिकं ॥२॥ रत्नजालिकया लोललल त्कांतितते गृहे ॥ सुगंध गंध बहुले घ्राण

शिवरहस्य तर्पण मुत्तमं ॥ चिंता मणि वरो तुंग सौधमध्या व लंबितं ॥ मणिशृंखलिका कीला जालिका ललितोत्त
मं ॥४॥ लंब मान मृणा राव विता न जनितांबरं ॥ विता नालं बि सहज गुच्छ मुक्ता सरावृतं ॥५॥ मणि जालव
रालंबि वात पोतच लद्युतिः ॥ अर्चोभिश्चर्चितं तत्र वितान स्वर लंबिभिः ॥६॥ उद्यदिंदु सुधा चुं बिधवलि
म्नायुता धिकं ॥ दिव्यं चिंता मणि गृहं सुबंधुर रसो त्कटं ॥७॥ मणिभृंगार जाल्यच्छ सुधा पूरैः प्रपूरितं ॥क
र्पूर सार तगर कस्तूरी वरचंदनं ॥८॥ मणिपात्र स्थितं पश्य प्रावृतं रत्न चे लकैः ॥ सुधारस भरा पार कल्प
वृक्ष फला कुलं ॥९॥ मणिपात्रो ल्लस त्कांति विदारित गृहांकुणं ॥ धूपोद्य न्मणिपात्रेश्च धूप धूमार्त दि
ङ्मुखं ॥१०॥ धूप जोत्तुंग धूमोत्थ गंध बंधुर मारुतं ॥ कल्प वृक्ष सुमोद्भूत सर शेखर केसरैः ॥११॥ प्रोद्यत्सिं
दूर शुंडा भसरागुच्छ सरै स्तथा ॥ मणि पात्रै र्वृतं पश्य पुष्प संगत वायुभिः ॥१२॥ बंध गंध वहा सार गृहे म
तत्सु मध्यमे ॥ उद्यच्छशिकला सार पुष्प शोभित कांतिभिः ॥ विनादित महा वीणा अनाहत सुतंद्रितः ॥ मृदं
गरं गित तल शब्द प्रोद्य त्ध्वनी भरैः ॥१४॥ पूरितांत गृह मुखं पश्यांबक मले क्षणे ॥ नेदृशं शयनीयं ते
कैलासे पि मनोहरं ॥१५॥ ब्रह्मा विष्णु महेशान ईश्वराम्‌ं च पादुकाः ॥ सदा शिवास्य फलकः सोपधाना

भवो शि
अ॰ १५

३८

३८

र्थे तत्वके ॥१६॥ निषण्णालंघनानंदरसामोदिवरादरा ॥ अधिशेष्व महादेवि दिव्यचिंतामणीगृहे ॥
॥१७॥ इत्युक्त्वा तां समालिंग्य देवः कामांगनाशनः ॥ कंदर्पदर्पनाशोघ्य कोटिकंदर्पसुंदरः ॥१८॥ का
मेश्वराकृतिरभूत्सिंदूरोत्तमविग्रहः ॥ चंचच्चंद्रकलामौलि लोचनत्रयदीप्तियुक् ॥१९॥ तमालनील
सुगलरक्तालक्तकसत्करः ॥ रक्तकंजोपमानास्य रक्तपंकजपाणिकः ॥२०॥ रक्तपंकजधामांघ्रिर्मणि
जालविभूषणः ॥ रत्नांबरधरासार प्रसारितदिशामुखः ॥२१॥ तमस्तोमतिरस्कारिरत्नाभरणभूषितः
॥ शुभगंधावृतोत्तुंगपीनवक्षोरुबाहुभिः ॥२२॥ एणंच परशुंचैव दधानंच वराभये ॥ तस्मिन्निषण्णः
पर्यंके पश्यन्देव्याः तदाननं ॥२३॥ मित्रसंदर्शनोत्फुल्ल रक्तपंकजसन्मुखं ॥ अंबामंबुरुहाभाक्षींत्रिने
त्रां चंद्रसेखरां ॥२४॥ मुकुटोघटितापाररत्नजालैकभासुरां ॥ बिंबकांतितिरस्कारिरदछद विराजितां ॥
॥२५॥ तिलकांकूसितमुखांताटंकद्युतिकर्णिकां ॥ कर्णालंबितरत्नाढ्य बालीवलि विराजितां ॥२६॥ दिव्य
चूडामणिस्फारचंचच्चंद्रकसूर्यकां ॥ सीमंतरेखायितसुप्रभोघ्यदलिकायुतां ॥२७॥ मणिमाणिक्यख
चितललन्मुक्ताफलावृतां ॥ उघ्यत्कविसमस्वछ्र नासाभरणभासुरां ॥२८॥ कंठेमंडलिकाक्लृप्तरत्नकंठसर

देशबाल-१ द्युतिं ॥ चिंताकलंबित स्वच्छ मुक्ता गुच्छविराजितां ॥२९॥ मणि मुक्तासरा पारलसत्पदकसंतति ॥ रत्नवैडूर्य
गोमेद पुष्पराग हरिन्मणिं ॥३०॥ कल्पिताच्छ महाराग पद्मरागोज्ज्वलप्रभां ॥ भासितापारसत्कांचीकटित
टमनोहरां ॥३१॥ रम्यं कंकणि काक्लृप्त मणि माणिक्य मौक्तिकैः ॥ खचिता पारसारोच्चक्षुर हस्त सुसंवृतां ॥३२॥
बाहुबंध महानाग फणाबंधोरु मौक्तिकैः ॥ जलप्रभैः रत्नगुच्छ प्रभाभास्वर शोभितां ॥३३॥ वंकिकामुखसं
फुल्ल रत्नसे मंतिकातितिं ॥ वेणीमंडलसंक्लृप्त रत्नसे मंतिदीधितिं ॥३४॥ पुराकेत शिरोत्तुंग मुक्ता रत्नैकशे
खरां ॥ कुमुदाकारमुक्ताच्छ मणि सुंदर संततिं ॥ मल्लिका मोदि धम्मिल्ल मल्लिका लिसरावृतां ॥ रक्षा
मणि मयाकार छत्राकबर शोभितां ॥३६॥ रत्नांगुलि प्रवित तत्प्रभा जाल लसत्करां ॥ निचोल कीलितपा
र नानारत्नतति द्युतिं ॥३७॥ रत्नाचल लसद्वस्त्रां कुंकुमारुणसुंदरां ॥ पाटीरसकस्तूरी सारले पितसकु
चां ॥३८॥ चंदनद्रव दिग्धांगीं मुग्धस्मितमनोहरां ॥ अंगुष्ठकाल सद्धीर कलिकोत्कांति तांबरां ॥३९॥
घुमंघुमित सद्वस्त्रां पटवासैकवासितां ॥ पदांबुजतलारक्त जाड्यवी ललितोज्ज्वलां ॥४०॥ मंजीररत्नजरण
सिंजन्मंजुलनिस्वनां ॥ चतुर्भुजेक्षु कोदंड पाशांकुशसरोज्ज्वलां ॥४१॥ सौंदर्यधारा सर्वस्वं तामालिंग्य

च सुंदरी ॥ महादेव्या निषण्णो भूत् तस्मिन्मंचे मनोहरे ॥४२॥ सुधापानेरसास्वादिदिव्यचंदनचर्चितः ॥
दिव्यपुष्पधरासारलसद्दलतरंगकः ॥४३॥ रत्नवृक्षोच्युतापारधूपवर्त्तिसुतर्पितः ॥ मणिद्वीपमहावृक्षमु
द्भासितदिगंतरं ॥४४॥ द्रवत्पुष्पोत्थसलिलासारशीकरसुंदरः ॥ विजहारमहादेवः कामेशः कामनाशनः ॥
॥४५॥ कामेश्वर्या महादेव्या चिरंकालं द्विजोत्तमाः ॥ चिंतामणिसारगृहांतरालविद्योतितापारमणींद्र
जालैः ॥४६॥ मंचेसुगंध्युत्तरसच्छदावृतं देव्याहरस्तत्रमुदा विजह्रे ॥ नानागंधसुमानुमोदितरसासारै
कशुद्धांतरः ॥४७॥ कामेशः कमनीयसौरभभरैरानंदितस्वांतरः ॥ कामेश्याशिवयाकृपारसरसैःसंक्लृ
प्तभोगोत्सवैः ॥ जातानंदभरैः सहैव करुणामूर्तिः कृपासागरः ॥ ईश्वरउवाच ॥ नित्यारक्षणदीक्षितेननगरंख्यातंवरं
श्रीपुरं द्वीपेऽस्मिन्मणिकल्पितेतदुपरीमध्यस्थितंतेगृहं ॥ यद्धा चिंतितकामदानमणिभिः क्लृप्तंतदर्थेम
यानित्याभिः पुरमेतदद्यकृपया भोमुज्यतां भूतिभिः ॥ स्कन्द उवाच ॥ ब्रह्माविष्णुसदाशिवेश्वरमहारुद्रोरुमंचेश्वरी
स्तीर्णेतल्पवरेशिवांकनिलया श्रीकामदानेश्वरी ॥ कामाख्येनमहेश्वरेणत्रिजगन्नाथेनहर्षोत्तरा नित्याभिः
परिसेविता भगवती पायात्सदा मांद्विजाः ॥५०॥ ॥इति श्रीशिवरहस्ये द्वितीयांशे चिंतामणिसौधवर्णनंनामपंच

शिवरहस्ये षोडशोध्यायः ॥१५॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ मुनय ऊचुः ॥ ॥ कथं देव्या तारकारेः पुरं श्रीपुर नामकं ॥ कल्पितं श्रीमहेशान श्रावयतस्तत् वद षण्मुख ॥१॥ ॥स्कंद उवाच ॥ ॥ यथा देव्या निर्मितं च श्रीपुरं शृणु तद्द्विजाः ॥ कामेशेन शिवेनैव संप्रोक्ता परमेश्वरि ॥२॥ ललिता श्रीमहादेवी सैव त्रिपुरसुंदरी ॥ मनसा चिंतयामास पुरं तत्र मनोरमं ॥३॥ मणिप्राकारशतकैः भूधराकार गोपुरैः ॥ मणिमाणिक्य खचितनवरत्नोरुकांतिभिः ॥४॥ प्रफुल्लसुमनामोदि रत्नवृक्षवनावृतं ॥ कल्पवाटी परिवृतं नीपोद्यानैर्विराजितं ॥५॥ सुधासिंधुतरंगोत्थ रम्य पर्यंतमारुतं ॥ नवरत्नागारसौध कुंभोद्यत्कांतिकांतितं ॥६॥ दिव्यमुक्तावलीक्लृप्तसारावलिविभूषितैः ॥ गोमेदपुष्परागोद्यत्प्रवालमणितोरणैः ॥७॥ हीरजालकसंछन्न कुंभमौलिविराजितैः ॥ सौधपंक्तिसमुल्लसद्दीवशालायुतशस्तदा ॥८॥ मणिमाणिक्यखचितनवरत्नविचित्रितैः ॥ धूपितैस्तगरामोदपाटीरोशीरचंदनैः ॥ सुवर्णोर्ध्वज्वलितगवाक्षवलभीयुतैः ॥ मंडपावलिसंछिन्नमौलिपालिततद्द्युतिः ॥१०॥ मणिरोचिश्चितादर्शकुट्टिमोद्यत्कवाटकैः ॥ प्राक्पश्चादुत्तरेचैव दक्षिणे पूर्वतः क्रमात् ॥११॥ मणिगोपुरमौलिस्थ हीरोद्यत्कलशप्रभैः ॥ तिरस्कारितचंद्रार्कैः प्राकारैर्मणि

कल्पिते ॥१२॥ नियुतायुतगोव्यूत्तासि समुच्छ्रायो रुमंडलैः ॥ गोमेदपुष्परागेंद्रनीलवैडूर्यहीरजैः ॥
मुक्ताविद्रुमरक्ताद्यैस्ततिकांतिविराजितैः ॥ गरुडोद्गाररत्नानां मंडपावलिशोभितैः ॥१४॥ हीर
सौधैः मणिप्रोच्चद्वातायनगवाक्षकैः ॥ देवी विहारसदने मदनांतकरस्यच ॥१५॥ पर्यंतरत्नमा
लादिच्छन्नमौलिविराजितैः ॥ चंद्रोपलमहासौधैः चंद्रासारैकनिर्झरैः ॥ रम्यादर्शमहासौधैः रत्नपु
ष्पविराजितैः ॥ पालीपालीचितानेकमयूरवरहंसकैः ॥१७॥ गजसौधैः हंससौधैः सिंहसौधैश्चभा
स्वरैः ॥ तुरंगरथसौधैश्च शार्दूलोत्तमसौधकैः ॥१८॥ तत्तत्प्राकारांतराले श्रीदेव्या मनसाततैः ॥ सु
रत्नतरवस्तत्रमणिपुष्पफलावृताः ॥१९॥ चंदनानांच विपिनैः नयनानंददायकैः ॥ कल्पवृक्षोरुविपि
नैः नीपोपवनसुंदरैः ॥२०॥ कदंबवनराजीभिः राजराजीववापिकाः ॥ तत्प्रांतमध्यसौधैश्चनव
रत्नविचित्रितैः ॥२१॥ धारासारगृहैश्चैव भ्रमद्भ्रमगृहैस्तथा ॥ मंदारपारिजातोत्थवनवायुसुगंधि
तैः ॥२२॥ प्रत्यग्रकेतकोव्यूत्तासि चंपकोद्दामसौरभैः ॥ कुरुवाशोकबकुलरसालमधुकैर्घवैः ॥२३॥
खर्जूरपूगनारेलनागपुन्नागलोध्रकैः ॥ तक्कोलांकोलहिंतालमणिरंभाकपित्थकैः ॥२४॥ तगरागरु

शिवरः केदार देवदारु मधूककैः ॥ चिरि बिल्वैश्च बिल्वैश्च मधू काम्रातकै र्ध्रुवैः ॥२५॥ वल्लयस्तत्ररा जंति द्राक्षेला पिप्प लीयुताः ॥ मरीचयः कुंदमल्यः जाजीका चंद्रिकायुताः ॥२६॥ तद्रम्य कुसुमामो दि सौम्य बंधुर मारुतः ॥ हंसा मयूरश्चीपवाः कोकसारस पंक्तयः ॥२७॥ कपोत शारिकाराव मृगाश्च चमरीगणाः ॥ कुरंगहस्तिनः कोलाः संचरंति वने मुदा ॥२८॥ नयनानंददं नित्यं श्री पुरे मणि द्वीपके ॥ पद्मिन्यो विविधा स्तत्र रत्न सोपान मंडिताः ॥२९॥ प्रांतरत्नो च्चत महामंड पावलि भासुराः ॥ तत्र देवद्रुमा पारवनराजि विराजितं ॥३०॥ तत्प्राच्यां मणिसंक्लृप्तं दंडिनी धाममुत्तमं ॥ नाना रत्नमणि भ्राजि सिंधुरै र्विराजितं ॥३१॥ भद्र मंद्र मंद्र मृगैः चतुर्दंताल्लि शोभितैः ॥ कटस्रा विमद भरैः कुंभोच्च सांद्रारुणैः ॥३२॥ मणिग्रैवेयघंटा दिकुथांकुश विभूषितैः ॥ पूर्वतो भाति शैलेंद्र निभै र्वारण सत्तमैः ॥३३॥ दक्षिणे तत्र प्राकारो नवरत्न विराजितः ॥ मंत्रिण्या रत्तत्र तद्धाम नवरत्न विचित्रितं ॥३४॥ उच्चैश्रवा ध्विकैरश्वैः नानावर्णै र्वलोत्कटैः ॥ कल्माषै स्तित्तिरि प्रख्यैः रक्त कर्बुरश्वेतकैः ॥३५॥ नील पीतक मांजिष्ठैः मयूरसदृशै हयैः ॥ तत्राश्वकोटि र्नियुक्ता मंत्रिणी सेविता तदा ॥३६॥ मुद्रिण्याः पश्चिमे धामनाना रत्न वि

ललितोपा॰ अ॰ १६

४१

४१

चित्रितं ॥ कुंभोध्वन्मणि कूप्माक्ष वक्र जाला पताककैः ॥ ३७ ॥ युगंधराक्षफल घोणाकबूरशोभितैः ॥
रथैश्चकोटिभिस्तत्र शोभिता मुद्रिणी तदा ॥ ३८ ॥ वाराह्याश्चोत्तरे धाम रत्नावलि विभूषितं ॥ सोपि
प्रमुदिता नित्यं पालितं योगिनीगणैः ॥ ३९ ॥ नवकोटिभिरत्युग्राः प्रासासिवरपाणिभिः ॥ नित्या नामंत
रासद्म पद्मरागमणीतलं ॥ ४० ॥ ततो हि परितस्तत्र ज्वालामालिनिकाततः ॥ प्राकारो वन्हिनावीतो
पर्यंत ज्वालशोभितः ॥ ४१ ॥ अनिंधनो दहत्येषः स्वशिखालेढितांबरः ॥ अहोरात्रमविश्रांतः ज्वाला
व्याप्तदिगंतरः ॥ ४२ ॥ मातरो बटुकाश्चैव डाकिन्यो योगिनीगणाः ॥ यांति तत्रांतरे देव्याः प्राकारा
णां शताष्टकं ॥ ४३ ॥ मार्तंडभैरवश्चैव तथैवानंदभैरवः ॥ प्रमोदभैरवश्चैव तथा वै मोदभैरवः ॥ ४४ ॥
प्राच्यां प्रतिच्यां तत्पाति दक्षिणे च तु तथोत्तरे ॥ सुधाकूपा सुधावाप्यो घृतक्षीरदधिस्त्रवा ॥ ४५ ॥ मधुश्रवा
तथा नद्यः पुटके पुटके मधु ॥ सुधा फलाः सदा वृक्षाः अम्लानानि सुमानि च ॥ ४६ ॥ योजनायत गंधीनि ने
त्रानंदकराणि च ॥ द्वीपो यं कुमुदाकारः सुधावार्धितरंगकैः ॥ ४७ ॥ रंजितः परितो भाति मणिसारैकसुंदरः
॥ लक्षद्वयं योजनानां मनसा शिवनिर्मितः ॥ ४८ ॥ तत्र चिंतामणितते सौधे परमभास्वरे ॥ कामेश्वर्या च

शिवर०२ कामेशः तत्रनित्य मुपासते ॥४९॥ नाना भोग विहारैश्चनित्याभिः परिसेवितः॥ ब्रह्मविष्ण्वीश्वर सदाशि भवीप्रि० अ० १६
वरुद्रारुमं चके ॥५०॥ निषण्णः परस्यां देव्या कामेशः कामदायकः॥ कामेश्वर्यासदे वास्तेकामदानेक
दीक्षितेः॥ कोटिकंदर्पदर्पघ्नः कर्पूदणांक शोभितः॥ सुरक्त पंकजा कार विग्रहस्सुंदराकृतिः॥५२॥ जपा
सुम निभा धिक्यकामेश्या कांतिवत्तया॥ सेवितो विविधै र्भोगैः नित्या भिः परि सेवितः॥५३॥ ॥स्कंद
उवाच॥ पार्श्वो जात भवीप्रया करमहा पंके रुहाभ्या सिता पाण्या लोल धृताक्ष चामर गणैः संवी जितासा
शिवा ॥ नित्याभिः परि सेविता प्रमथ पे नाध्यास्त मंचोत्तरं स्वस्यारक्त नखां शुनि गतहरिब्रह्मेशलीला
युता ॥५४॥ ॥इति श्री शिवरहस्ये द्वितीयांशे श्री चक्र वर्णनं नाम षोडशोध्यायः॥१६॥ ॥श्री काशीवि ४२
श्वेश्वरार्पणमस्तु॥ ॥जैगीषव्य उवाच॥ ॥श्रुतमेतन्महाख्यानं स्कंदत्वत्तोखिलार्थदं॥ मणि ४२
द्वीपामहादेव्या श्रीपुरस्य तु वर्णनं॥१॥ परा शक्ते र्महासौध शिंचता मणि गणां चितः॥ सुधासुधासिंधोर्म
ध्यगतकल्पवाटिवनावृते॥२॥ नीपोपवन पर्यंतं श्रुत्वाहंनितरां मुने॥ अत्यंतं विस्मया विष्टः परिपूर्णम
मनोरथः॥ सर्वज्ञ हृदयानंद गौरी हृदयनंदन ॥ तारकारित दा देवः किं चकार शिवायुतः॥४॥ तन्मेवद विशेषेण

महां शुश्रुषवेनघ ॥ ॥सूत उवाच॥ ॥ जैगीषव्यवचः श्रुत्वा मयूर वर वाहनः॥५॥ उवाच मनसो देवौ
नत्वा हृष्ट तनूरुहः॥ जैगीषव्याय मुनये विनयोदार संयुतं॥६॥ माधुर्य गुण गांभीर्य चाक्षू रस विजृंभितं॥
॥स्कंद उवाच॥ ॥ मणि द्वीपे सुधासिंधौ मध्येगत मणिप्रभे॥७॥ मणिप्राकार पर्यंत कल्पवृक्षौघशोभि
ते॥ नीपवटिस माक्रांत चिंतामणि विराजिते॥८॥ महासौध गुहा शृंग महाद्युति विराजिते॥ दिव्यैवं
ता मणिगृहे कल्पवाटी परिवृते॥९॥ चिंतामणि गण ज्योतिः [illegible]र स्कृत दिवाकरे॥ तस्मिन्ना लंबिरत्नौ
घशृंखला बद्धमंचके॥१०॥ हरि ब्रह्म महेशेश सदाशिव वरार्चिते॥ पादप्रपीठ भूतेषु सृष्टि स्थित्यंत कारिषु
॥११॥ तस्मिन्विहार शयने कामकामेश्वराकृतिः॥ चिक्रीडतुः चिरंकालं देवौ रस संदमुने॥१२॥ तदा संप्रा
र्थयामास देवी देवं महेश्वरं॥ प्रणय प्रांजली देवी भगवंतं महेश्वरं॥१३॥ ॥देव्युवाच॥ ॥ ममात्यंत तपो
भूत महानंद रसेनच॥ अनंत जगदुत्पत्ति संहार स्थिति तोषकृत॥१४॥ हृद्येण तवेशान निर्मितो द्वीपउत्त
मः॥ सुधासिंधु तरंगौघ मणि भौमिक सुंदरः॥१५॥ तत्रचिंता मणिकृत सौधमध्यस्थ मंचगः॥ वसमाग
ध्यकैलास मत्र मे रमते मनः॥१६॥ यादृश्यत्र मम प्रीतिः तादृशी चन कुत्र चित्क्वचित्॥ ममांतरात्मा भगवन्

५४

शिवस्य मम प्राणप्रिये मोणः ॥१७॥ विज्ञप्तं यन्मया शंभो तत्स्वी कुरु कृपानिधे ॥ तदुदारतरां वाणीं समाकर्ण्याह तां शिवां ॥१८॥ ॥ईश्वर उवाच॥ ॥ममेष्टवासः सुभगे कैलासो गीयते सुरः ॥ शंभोः कैलाससदनं इति रूढं महेश्वरि ॥१९॥ अत्र त्वं च मया सार्धं विहरस्व शिवे सदा ॥ सुधासागर मध्यस्थ मणिद्वीपे मनोहरे ॥२०॥ कल्पवृक्ष महावाटी नीपौघ विपिनाकुले ॥ यथा त्वयि मम प्रीतिस्तथा द्वीपे महेश्वरि ॥२१॥ अस्मिन्नेव वसामीति ममापि नियतं मनः ॥ एकोप्यहमनेकात्मा नानाकारो हमीश्वरि ॥२२॥ यथा सूर्यः पुरा ष्ट्द्वीपे लोकेष्वपीश्वरि ॥ एक एव हितत्रत्यै दृश्यते स्वगृहोदितः ॥२३॥ तथाहं सर्वभूतेषु सर्वांतर्वासरूपहि ॥ अत्राहं वैलया देवी कामेश्वर समाह्वयः ॥२४॥ त्वं च कामेश्वरी देवी नानारूपाणि कल्पय ॥ इत्युक्ता सा जगन्माता शिवस्यानुमतं शिवा ॥२५॥ चकार रूपं कामेश्याः त्रिपुराख्या महेश्वरी ॥ तथा तत्र मणिद्वीपे नित्याभिः परिसेविता ॥२६॥ कामेशा नस्थितां देवी कामेशा परमेश्वरे ॥ रमया मास विविधैः भोगजाल रसैः शिवा ॥२७॥ पुनः कतिपये काले शंकरो लोकसुंदरो ॥ वृषभं तं समारुह्य कैलासमभिजग्मतुः ॥२८॥ नंदिभृंगि गणौघैश्च देवैर्गणपेन च ॥ नानावाद्य महारावबाधिरीकृत दिङ्मुखः ॥२९॥ कैलासमौलि रत्नौघ सदने परमेश्वरः ॥ पर्वतं द्रागजा

भवो द्वि:

अ॰७

४३

४३

युक्तो गण युक्तः परं सुखं ॥ नाना हार विहारैश्च कोटि कंदर्प सुंदरः ॥ सुधासागरो द्वा चिंता मणि द्वीपमध्ये ॥
महाकल्पवाती घता पारवाटि मनोज्ञे ॥ महानीप जालांतमोघप्रभाभिः सुचिंता मणी कुंभ सौधांतरे
घन्महामंचके कामरूपो महेशः ॥ तयामे जनिर्यास देवास्त ईशो जग ज्जाल संहार संस्थास्थिति
ज्ञः ॥ नगाग्रे ध्व कैलास मौलौ महांते निषण्णः सदा विश्व लीलो महेशः ॥ ३ ॥ स देवोनया चित्र शक्ति
महेशो अनंतान्य पाराणि चित्राणि तस्य ॥ न जानंति वेदान जानंति देवात दाकार रूपं नकोपी शरूपं ॥
किमेतत्त दापार नो रूप मेहापरं निर्गुणं किंतु लभ्यं प्रसादात् ॥ ३ ॥ ॥ इति श्री शिवरहस्ये भवाख्ये द्वितीयां
शे सप्तदशो ध्यायः ॥ १७ ॥ ॥ श्री काशी विश्वेश्वरार्पण मस्तु ॥ ॥ स्कंद उवाच ॥ ॥ एकदाद्रीं द्रमालोक्य
मेना हृष्ट तनू रुहा ॥ उमां संस्मृत्य निश्वस्य प्रोवाचे त्थं पतिव्रता ॥ १ ॥ ॥ मेनोवाच ॥ ॥ आर्यपुत्र
न जानामि प्रवृत्ति मपि किंचन ॥ विवाह समया दूर्ध्वं तस्या गौर्यो गिरीश्वर ॥ २ ॥ प्रवृत्तिमपि नादे
व्या जानेहं तेन दुःखिता ॥ स वृषेंद्र गतिर्देवो भस्मोरग विभूषणः ॥ ३ ॥ महापितृ वनावासो दिग्वासाः
क्वास्ति संप्रति ॥ अष्टौया मातरो दृष्वा ब्राह्मी प्रभृतयो त्रयाः ॥ ४ ॥ दुःख स्वरूपा मन्येहं बालिका कष्ट

शिवस्य हेतवः ॥ तस्यैकस्य न कोप्यन्यो एको रुद्रः श्रुतीरितः ॥५॥ तदुक्तं प्रवृत्यैव क्रियतामुग्धमौलिभो ॥ भवोद्धि
तस्याः प्रियायावाक्ये न तदपत्यप्रियो गिरिः ॥६॥ उवाच वचनं सास्त्रमुमा वात्सल्य सन्निधौः ॥ ॥गिरि अ० १२
उवाच ॥ ॥मेवं वदाद्य मेने त्वं दुःखाधिक्यं महेश्वरे ॥७॥ मत्सुता सा शिवा देवी त्रैलोक्य जननीश
वा ॥ कन्याते कारणाज्जाता शिवस्यार्धांग भागिनी ॥८॥ यस्याः कटाक्षमात्रेण सर्वेषां सर्वसिद्धयः
॥ लभ्यंतेव महेशान्याः सा किंदुःखाधिका भवेत् ॥९॥ सुखैक वसतिः शंभुः शंकरः शाश्वतोऽव्ययः ॥ तत्स्व
रूपं परिज्ञानं वेदैर्गोपन शक्यते ॥१०॥ यस्य लिंगार्चने नैव मोक्षभाग्यमदूरगं ॥ यस्यार्चने नदेवानां देवत्वं
४४ किल भामिनि ॥११॥ यस्यैक वसतिर्मेने कैलासो रजताचलः ॥ धनुर्यस्य महामेरुः सर्वदेवालयो महान् ४४
॥१२॥ यस्य बाणो हरिः साक्षाद्यस्याश्वा श्रुतयोऽखिलाः ॥ रथो धरित्री देवस्य सर्पराजोऽथ सिंजिनी
॥१३॥ स्रष्टा यस्य किं नेदानीं सारथी रथवाहने ॥ चंद्रसूर्यौ तथा चक्रे तस्य देवस्य धूर्जटेः ॥१४॥ सख्या
तो देवेषु देवेशः सुधन्वा सखिवपुर्हरः ॥ हरिकेशश्च भगवान् रथाश्वपतिरीश्वरः ॥१५॥ विष्णुब्रह्म
महेशादि लोकोत्थायाः श्रियः प्रिये ॥ तस्य कैलासकोट्यंश कोट्यंशेनापि नो समाः ॥१६॥ तद्दर्शनार्थं

चममगंतुं वृत्तं मनः प्रिये ॥ अहमेव गमिष्यामि तस्या मेनेगवेषणे ॥१७॥ गवां पते महेशस्य कैलासनि
लयस्य च ॥ नितरां बाधते प्रेम तद्दृष्ट्वा स्निदूषितं ॥१८॥ यदाप्रभृति सा देवी निर्गता मम सद्मतः ॥ मन्ये
मेने तदारम्य पद्मसद्मापि निर्ययौ ॥१९॥ तदालापाधयो मेने श्रोत्रे शब्दग्रहौ प्रियो ॥ प्राणेश्वरि तदार
भ्य स्यातां शब्दगृहां तरौ ॥२०॥ जैवातृकीयतोन्ह स्यात् दूरी भूता दृशो मम ॥ प्रिये जैवातृकी जोत्स्ना
ततोन्हे गपिधुनोति मां ॥२१॥ यदपत्य प्रमोदेन देवदेव्याः पदांबुजं ॥ धन्याः पश्यामि नेत्राभ्यां चिराय चिर
पादहत् ॥२२॥ दृष्ट्वा शिवौ शिवं मस्या दिति मन्ये गिरीश्वरः ॥ मेने धन्येष्व त्वत्कन्यादर्शनेनाद्य
धन्यतां ॥२३॥ मान्योति नितरां शंभोः कैलासारोहणेन तु ॥ ॥ हिमवानुवाच ॥ ॥ मेनाकान
यरत्नानि वासांसि विविधानि च ॥२४॥ वृत्तमुक्ताफलानां तु कोटिद्वय परीमितं ॥ तथा हारित
रागाणां हीरकाणां तुलाशतं ॥२५॥ नवलक्षाधिकं विप्र षडस्त्राणां सुतेजसां ॥ लक्षद्वयं विद्रुमा
णां तुला विमल वर्चसां ॥२६॥ कोटिं च पद्मरागाणां पंचावेहि तुला मुने ॥ पुष्परागतुलापंचको
टिंच गुणितस्तदा ॥२७॥ तदा गोमेदरत्नानां तुला लक्षमितं मुने ॥ इंद्रनीलमणीनां तु कोटिद्वयमितं तदा ॥
॥२८॥

शिवर॰२ गरुडोद्गारिरत्नानां तुलाः प्रयुतसंमिताः ॥ शुद्धविद्रुमरत्नानां तुलाश्च नवकोटयः ॥२९॥ अष्टांगाभ- मबोधि- अ॰१८

रणानां च संख्या कर्तुं न शक्यते ॥ मुकुटांगदकेयूरचूडामणिशिखंडकाः ॥३०॥ कर्पूरोनागबंधाश्च वं-

किकांगुलिकादयः ॥ वेणीमंडलसंभ्राजिरत्नपुष्पगणास्तथा ॥३१॥ मणिहस्तसराश्चैव हीरांगुष्ठप्रवेष्ट-

नाः ॥ रत्नग्रैवेयचिंताकलोलमुक्ताफलीसरैः ॥३२॥ रत्नाढ्यपदकानां च सरावलिमणिप्रभैः ॥ रत्नताटंक-

८५ वलयैः नासावेढैश्च मौक्तिकैः ॥३३॥ रत्नकांचीड्य (च्योड) घंटाढ्यमुक्तागुच्छैः कलंबिताः ॥ रत्नमंजीरपादांघ्रि-

कटकारत्नशृंखलाः ॥३४॥ कुंडलीभोगवक्त्रा (का) भारणत्कंकंटकपाडगाः ॥ नखांगुलीवेष्टनकैर्मुक्ताजालैः

स्रवद्धरैः ॥३५॥ वाससां च विचित्राणां वरावृता (नानावर्णावृताम्बराम्) ॥ पद्मरागः सवर्णानां सोमधामैकवर्चसां ॥३६॥ बालात-

पप्रभाणां च नीलमांजिष्ठवर्चसां ॥ हंसपालीगजाकारसिंहप्रांतोरुशोभिनां ॥३७॥ सवर्णपद्मसंक्लृप्त-

वाससां राशयस्तदा ॥ कर्बुराणां च पीतानां हरिन्मणिनिभात्मनां ॥३८॥ क्रिमिसूत्रोत्थजात्युच्चकासा-

राशिभैरपि ॥ निचोलैर्विविधैस्तत्र मुक्ताप्रांतोरुशोभितैः ॥३९॥ दुकूलकूलविलसन्मणिमौक्तिक- ८५

जालकैः ॥ निचितस्वर्णवस्त्राणां भारकानां शतत्रयं ॥४०॥ गंधगंधायितानां च कंकतादर्शभारकैः ॥

अंजनारोचनानांच कर्पूरपटवाससां ॥४१॥ पाटीरचंद्रकस्तूरीगंधैर्मलयजैस्तथा ॥ नागनागरुतक्को लजातीपत्रफलैरपि ॥ लवंगैलामधुसृणसर्जनैश्च मनःशिला ॥ सिंदूरालक्तकनिशाकुंकुमैःकंक णैस्तथा ॥४२॥ क्रमुकाणां राशयश्च स्वच्छनागकपत्रकैः ॥ मुक्ताचूर्णाद्रिजात्युच्च चंदनैर्धूपवर्त्तिभिः ॥ ॥४४॥ स्वमौलिचंदनानां च पालिकालिभरैरपि ॥ रत्नकंदुकहल्लीसदंडैश्चैवाथ पालिकाः ॥४५॥ दिव्य दुकूलफलैश्चैव रत्नवीटीगणैरपि ॥ वर्त्तिकाकोटिकोटिभिश्च मुक्ताशुक्तिकरंडकैः ॥४६॥ छत्रव्यज नजापारचामरापारदर्पणैः ॥ फलमूलभराणांच तथा सुमनसांभरैः ॥४७॥ पार्वतीयैश्च पुरुषैरूह मानैश्च संघशः ॥ शकटीनां कुलभरैः पूरितैः रत्नवाससां ॥४८॥ ययौकैलासमीशस्य मध्येहृष्टोम होमहोमुनि ॥ सुवर्णकोट्यो हस्त्यश्वदास्योदासाश्च कोटिशः ॥ सर्वाण्यपि समादाय प्रतस्थे भूधरेश्वरः ॥४९॥ ययौकैलासमीशस्य मध्येहृष्टो महामहामुनिः ॥ दुर्वासा तपतां श्रेष्ठो तपोयुक्तो जटाधरः ॥५०॥ भस्मरुद्राक्षसंवीतो वृतो मुनिगणैरपि ॥ रुद्रावर्तनशीलैश्च शिवलिंगार्चकैस्तथा ॥ बिल्वपत्रैस्त्रि कालं च पंचाक्षरपरायणः ॥ तं दृष्ट्वा प्रणनामाथ मेनयाहिमभूधरः ॥५२॥ मैनाकेन नगश्रेष्ठो गंतुं

४२।

केख०२ तत्रोपचक्रमे ॥ तमाह विनयानम्रं हिमवंतं महागिरिं ॥५३॥ ॥दूर्वासा उवाच॥ ॥कुत्रवागम्यते शैलमे-मभोद्धिः नाकेन च मेनया ॥ तद्भुतं सम्यगाचक्ष्व यदि श्राव्यं नगोत्तम ॥५४॥ तद्दूर्वासवचः श्रुत्वा प्रांजलिर्विनयान्नगः ॥ प्रोवाच तं महात्मानं दूर्वाससमकल्मषं ॥५५॥ ॥हिमवानुवाच॥ ॥मेनया दर्शनेप्सानो बहुकालीनया मम ॥ देवी मुखांबुजं द्रष्टुं गच्छशमिस्ने हयंत्रितः ॥५६॥ ॥ हिमवान् उवाच॥ ॥अजापि सा महादेवी मत्तो जातेति मे स्पृहा ॥ कैलासे शंकरं द्रष्टुं उपबर्हेण सत्करः ॥५७॥ शिवपादांबुजद्वंद्वदर्शनार्थं महामुने ॥ हिमवद्वचनं श्रुत्वा मुनिः प्राह तदा मुदा ॥५८॥ ॥दूर्वासा उवाच॥ ॥गच्छ स्वारिष्ठ पंथानं मा ते कार्यस्य विघ्नता ॥ द्रष्टव्यं देवं महादेवं त्वन्मौलौ संस्थितं हि मां ॥५९॥ तपस्यंतं च केदारे मुनिभिः सोपयेश्वरं ॥ केदारेश्वरलिंगस्य पीठवस्या परं सदा ॥६०॥ शिवाज्ञया महादेवी त्वया प्यत्रागमिष्यति ॥ तां प्रसाद्य तपःपारं गंतुमिच्छामि भूधर ॥६१॥ इत्युक्तो मुनिना भूभृत् नत्वा गाच्छ्राकरं नगं ॥ मेनाकेन च संहृष्टो मेनयानुययौ द्रुतं ॥६२॥ ॥स्कंद उवाच॥ ॥श्वशुरं शाशिशेखरस्य देव्याः पितरं ज्येष्ठकुलाचलेषु धुर्यं ॥ वयसा शिरसा न नाम पादौ हिमभूमेः स तदा महेशशैलः ॥६३॥ मेनाकेन च मेनया हिमगिरिः

अ०१८

४६

४६

कैलासमौलिस्थितं तत्रागाद्गजापीतं सुमनसां भारैश्च यत्नार्हणैः ॥ स्वस्यापारीशिरो द्रुसंभवफलैः पुष्पार्हणै रद्रिराडायातो पचिति प्रथानपरमानंदेन दृष्टुं शिवौ ॥६४॥ कलधौतनगः कलासुदक्षः शशलक्ष्माक कलाधरास्य मौलेः ॥ कुलभूभृत्तिलकं प्रणम्य हर्षाच्छ्रयणे नीपशिवस्य वाचमूचे ॥६५॥

॥कैलास उवाच॥ ॥ भवतो भवदंगसंगतोप्य भवद्दर्शनमद्य शैलमौले ॥ भवराशौ हि भवप्रमाणतो भगिनी चास्य गिरेर्गुहा भवानी ॥६६॥ भवतो विपिनावनीतपोघ्नतपसो राशिमुनीषु देवसंघे ॥ वनजालेषु नगेश्वरोरु मौले कुशलं किमुत वांडजे मृगेषु ॥६७॥ अगमावयमेव लोकजाले सुगमा अप्यतिशंकरस्य भक्ताः ॥ निगमागमसंस्तुतस्य पादाश्रयणे नानुगता सदा नगेश ॥६८॥ ॥सूत उवाच॥

श्वेतनगतिलकस्य वाक्यजालं मधुरोदारतरं निशम्य हर्षात् ॥ कलधौतनगस्य धूततापैः वचनैर्नंदितहृद्गुहो भ्युवाच ॥ ॥हिमवानुवाच॥ ॥ तव मौलिकुलेषु तुंगलिंगप्रथिता पारशिवालयो ज्वलंतः ॥ भवतापशमाय केवलं भवपादांबुजसंश्रया द्विशिष्टः ॥७०॥ तव मौलिवनस्पति प्रभावे तव मौल्यंडजसन्मृगेन गाध्य ॥ कुशलं किमु चित्रमेतदेव शंभोः पदभक्तेषु नवा किमस्त्वलभ्यं ॥७१॥ ≡

९५२

 इत्यालिंग्य न गोत्तमो सरसया वाचा प्रसंन्नाननो जातानंद भरो महेश्वर पदांभोजानुरक्तांतरो ॥ यातो देव-

वरं मुमापति तया तो मेनया प्रश्नुता पारस्तन्यभरी भरो रसवरैः शैलेंद्र कन्येक्षणात् ॥ ७२॥ ॥ इति श्रीशिवरहस्ये भवाख्ये द्वितीयांशे कैलास हिमाचल समागमो नाम अष्टदशोध्यायः ॥ १८॥ ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ ॥ स्कंद उवाच ॥ ॥ आरा दृष्ट्वा तदा विप्रहिमवान्हेमभूषितं ॥ विमानतदनु प्राप्य समो लोसस्यातु मद्रिराट् ॥ १॥ मेनया रत्नभारैश्च दुकूल फलभारकैः ॥ मैनाकेनाथ सव्येतु दत्तहस्तो नगाधिपः ॥ २॥ दक्षेत्र्यक्षमहाशैल कैलासा चलपाणिना ॥ दत्तहस्तो नगाधीशः तच्छ्रादर्शिन गोत्तमं ॥ ३॥ विस्मयात्क्रांतहृदयो मेनांवीक्ष्य तदाब्रवीत् ॥ ॥ हिमवानुवाच ॥ ॥ धन्यमन्ये च नयने मेने यैव मनोरथं ॥ ४॥ चिराय दृष्टः कैलासो नानाशृंग विराजितः ॥ यत्र संत्युरुरत्ना (थगर्भधाम गतानि च ॥ ५॥ उत्कृष्ट शिवलिंगानि सोम धामो ज्वलानि च ॥ तल्लिंग गर्भधामाद्य पश्यकुं भावलीमपि ॥ ६॥ दूरादृष्टे पुण्यतमं यत्र कुत्रशिवालयं ॥ तत्सप्त जन्मपापानां विनाशकमपि प्रिये ॥ ७॥ कैलासमौलिजापार शिवागारो रुशेखरैः ॥ = जन्मनां पापगणानां प्रवेशः कुत्रवा प्रिये ॥ ८॥ पश्य गोपुरजालानि वृषकुंभो ज्वलानि च ॥ तत्रोपुरमहा—

कुंभ बिंबाउव नभों कोणे ॥९॥ चंद्रसूर्यौ तथा तारा बिंबिताउव संस्थिताः॥ ग्रहाः सप्तर्षयश्चैव ध्रुवोयंप
श्यमत्प्रिये ॥१०॥ सौध पंक्ति मिमां पश्य मणिजालैः प्रकल्पितां॥ सर्वांना सोपि भगवान् सौधेष्वत्यंत
हर्षितः॥११॥ मेने त्वत्कन्यया मेने विहरत्येवनिश्चितं॥ राजते राजते धन्यो मान्यो मन्यु समागताम्॥१२॥
बालोप्य बालचरितः कैलास्त्वेष भूधरः॥ पुत्रास्त्रिय तयोमध्ये मैनाकेनाद्य निश्चितं॥१३॥ यस्मिन्कैला
स भूभागे ब्रह्मविष्ण्वादि कांक्षिते॥ तपसा नैव संप्राप्यो दुर्दर्शो योगिनामपि॥१४॥ कैलासदर्शनार्थाय तपस्यं
तितपः प्रिये॥ अद्यापि ब्रह्मविष्ण्वाद्या मुनयो गणसत्तमाः॥१५॥ सोयं संबंध संबंध्यो गौर्या गुरुतया प्रि
४६३
ये॥ स्नेह धारानुवर्शातो अगम्यः सुगमो भवत्॥१६॥ नैवेद्यादि लोकेषु नास्त्यस्य तुलना क्वचित्॥१७॥
स्वयमीशेन मनसा कल्पितोयं महीधरः॥ विश्वेषिश्च सृजाक्लृप्त मेतन्न गनदीवनं॥१८॥ कालेनशी
र्णतां याति कारणात्कार्यमप्यनु॥ अनुमीयत हे बाले नश्वरे स्थिरता कथं॥१९॥ किंतु मूल्यं जयेनाद्य
विश्वाधिपेन संकल्पितः॥ गिरिशेन गिरिशोयं पश्यनेत्रेण भामिनि॥२०॥ कलधौत महाशैलो धूत
पापोयमादरात्॥ यतन्मौलि शिखला स्नाम वायु पातेक कांक्षिणः॥२१॥ विष्णु ब्रह्मादयो देवाः मुनयो—

मानवाः प्रिये ॥ यांतीप संहरत्येषः पाप तापं विशेषतः ॥ २२ ॥ किंतु दृष्टोयमधुना दुष्टोयं चाष्टदेहिनः ॥ व- ये विशिष्टाः सर्वेषु धन्यामान्याश्च भू भृतां ॥ २३ ॥ सुराणां च मुनीनां च गणानां किलसत्तमे ॥ हृत्तमो- नाशकः शैलः त्वन्ये दृक् तमनाशकाः ॥ २४ ॥ एतस्य दर्शनादेव प्राप्तकामोस्मि सांप्रतं ॥ इत्युक्त्वांतम- हाशैल मारुरोह महागिरिः ॥ २५ ॥ अपश्यच्चालयन्दृष्टिं सर्वतः शैलमूर्धसु ॥ नाना सौधैक वसतिगो- पुराली विराजितं ॥ २६ ॥ रत्नप्राकार वृषभैः शोभितं चाशिवालयैः ॥ रत्नकुंभोरुधाराभिः विचुंबितांम- बांबरं ॥ २७ ॥ गणसौध गणानां च स्कंद हेरंब सौधकैः ॥ तरुणानां प्रभाभिश्च ततमत्यंत सुंदरं ॥ २८ ॥ म- जानं पर्वतं द्राणां वनसानु विभूषितं ॥ कुलाचलैश्च परितो मूर्तिमद्भिरुपासितं ॥ २९ ॥ उत्फुल्लकम- लोदार सरसीभिर्मनोहरं ॥ नानावृक्ष सुमोत्धूत गंधबंध विराजितं ॥ ३० ॥ नाना मृग गणानां च को- टिभिः परितावृतं ॥ मंदमारुत संचार पुलिनायित दिक्तटं ॥ ३१ ॥ नानारत्न मणीकॢप्त मंडपावलिशो- भितं ॥ गंगाभिः पंचभिस्तत्र शोभितं लिंग संघकैः ॥ ३२ ॥ मंदमंदं ययौ पश्यन् गिरिराट्तं गिरीश्वरं ॥ स्नात्वा सदेव गंगायां कैलासामलपर्वते ॥ ३३ ॥ कृत्वा चावश्यकं कर्म मेनया सोप्यमन्यत ॥

४८

नि
धन्यतां सस्व जनुषः साफल्यमगजेश्वरः ॥३४॥ तमागतं तदा सात्वा विपुधाधा महीधराः ॥ समागताः
प्रणम्यैनं प्रालेया चलपर्वतं ॥३५॥ मेनां मैनाकमालिंग्य कुशलं तेप्यवोचिरे ॥ ॥गिरिय ऊचुः॥ ॥ध
न्यमान्या वयं सर्वे कैलासनिवसामहे ॥३६॥ शशिमौलेः प्रसादेन वयं त्व दर्शनेनच ॥ गिरिः कालेने
ह सांप्र जातमद्रीश्वराधुना ॥३७॥ गौरी गुरोर्दर्शनेन सफलो नोमनोरथः ॥ गुरुर्मेना जनित्रीनः
भवान् गुरुतरो हिनः ॥३८॥ एह्यस्माकं गृहान्द्रष्टुं लकदावातवर्दर्शनं ॥ इत्युक्तश्चाद्रिभिः शैलःता
नालिंग्यानुमन्यच ॥३९॥ तानाह गिरिराजो यं गिरीन्पुत्रानिवौरसान् ॥ ॥हिमवानुवाच ॥ ॥
भवतां स्वस्तिवैवत्साः भवपादैकवर्त्मनां ॥४०॥ त्रिनेत्रमान्याः यूयंहि किं चित्रं स्वस्त्ययंतुवः ॥
भवन्मौलिषु विश्वात्मा भवो भवरुजां हरः ॥४१॥ विहरत्येवनियतं भवन्मौलिस्थ सौधके ॥ उत्सु
क्तास गिरिर्गत्वा गिरिणामाश्रयेषुच ॥४२॥ प्रत्येकं गिरिभिस्तत्र पूजितो भोजनार्हणैः ॥ मेनया
गिरिराट् तत्र मैनाकेनच संयुतः ॥४३॥ उवास मुदितोत्यर्थं कैलासेन मुदायुतः ॥ कैलासोप्येनमा
मंत्र्य भोजनेनार्हणेनच ॥४४॥ स्वर्गोपसुमनोसोभिः मेनयातंनगेश्वरं ॥ हिमवंतं गणवरैः

शिवर०२ श्रुत्वा चागत मीश्वरः ॥ स्कंद हेरंबनंद्यादीनाहूय प्रेषयत्तदा ॥ तमानीयत्तु मीशानो मेनाकेन च मेनया- भवोद्धि

॥४६॥ शिवाज्ञां ते तदा श्रुत्वा नंदी स्कंद गणेश्वराः ॥ विमानेनार्कवर्णेन गणवृंदैः समागताः ॥४७॥ दृष्ट्वा अ०१९

नगेश्वरं तत्र कैलासस्य गृहोषितं ॥ मेनाकेन च पत्न्या च पार्वतीयैर्गणैर्वृतं ॥४८॥ विमानादवरुह्यैवनं

दि स्कंद गणेश्वराः ॥ गत्वा प्रणेमुस्तं शैलं गौरी गुरुमतंद्रिताः ॥ मेनां नत्वा च मेनाकं समालिंग्य मुदा

तदा ॥ सोपि प्रालेयशैलेंद्रो दृष्ट्वा पौत्रौ मुदायुतः ॥५०॥ नंदिनं तौ च शैलेंद्रो मूर्ध्न्याजिघ्रन्मुदा द्विजाः ॥

४२९ मेनापि पौत्रावालिंग्य पुत्री पुत्राननेक्षणा ॥५१॥ जातहर्षाश्च पुलकैश्चिरं बाष्पाण्यवर्तयन् ॥ स्वास

नेष्पुपविष्टास्ते कैलासेनानुमोदिताः ॥५२॥ गिरिप्राह तदा पुत्री पुत्रौ तन्नंदिनं मुदा ॥ ॥ हिमवानु ४२९

वाच ॥ ॥ वत्सौ भवंतौ बहुना कालेना लोकयाम्यहं ॥ स्वसायं नंदिनं पुत्रं द्रष्टुमागाच्च मातरं ॥ =

भवंतौ पुत्रकौ युक्तौ माता मह्यानु चोदितः ॥५४॥ चिरं संदर्शनानंद संजात पुलकोद्गमः ॥ पश्यामि

तं महादेवं गौरीं हृष्यन्नंदिनौ ॥५५॥ माता महेन शैलेन इत्युक्ता स्ते कुमारकाः ॥ सर्वे प्रांजलयः शैलमान्या

मनुभ्य वोचिरे ॥ ॥ स्कंदाद्या ऊचुः ॥ ॥ किंचिन्नं भवतः शैलगुरो गुरुतमो भवान् ॥ पश्यं देवं महादेवं-

गौरीं तव तनूभवां ॥५७॥ महेशेन महाशैल प्रेषितादर्शनायते ॥ मेनया सहितेनैर्या हि मैनाकेनामुनामु
दा ॥५८॥ अचिरेण दृशा पश्य देवीं तं चंद्रभूषणं ॥ इति सर्वे समालिंग्य गिरिं गणपुंगवाः ॥५९॥ स्कंद
हेरंबकाश्चैव मैनाकेन च मेनया ॥ विमानं तत्समारुह्य कैलासेन सहा द्रिमट ॥६०॥ ययौ कैलास
मौलिषु पश्यन् विश्वेशितुः श्रियं ॥ सौधमालां च तत्र त्यां मणि प्रवर कल्पितां ॥६१॥ मेनामुवा
च प्रसभं प्रालेयाचल मुत्तमः ॥ ॥गिरिरुवाच ॥ ॥जामातुस्ते श्रियं विष्णु ब्रह्मादि दुर्लभां ॥६२॥
पदवी मद्वी या यायः मनसा णीय सा किमु ॥ कल्पितं शक्यते देवि मादृशैरव विवशा भव ॥ तद्गिरेर्वच
नं श्रुत्वा दृष्ट्वा पौत्रांचि तां श्रियं ॥ उवाच गिरिराजानं मेना नम्रशिरोधरा ॥६४॥ ॥मेनाउवाच ॥
॥ स्त्रियामया कृता बुद्धिर्मन्यथैव महेश्वरे ॥ नो चेन्महेश्वरत्वं स्यात् कथं देवे त्रिलोचने ॥६५॥ सं
जात विस्मया मेना मन्ये सर्वं मनोरथं ॥ पूर्णं शिवप्रसादेन गौर्या संदर्शनेन च ॥६६॥ ॥स्कंद उवाच ॥
मैनाके न च मेनया शिवपदद्रुक्षा चेना याधिकं ॥ स्वोद्यन्मौलिगतैः फलैः सुमधुरैः मूलैश्च बिल्वो
भैः ॥ रत्नौघाह गणैः मुदा गिरिवरो वीक्षन् ययौ तां श्रियं उत्फुल्लामलवक्त्रपंकजलसद्दृष्टुं महेशं-

शिव॰र॰ शिवां ॥६७॥ प्रालेयधवलाचलो गिरिवरैर्युक्तो विमुक्तापदं प्राप्तुं शंकरदिव्यधामवरगा प्रासादमत्युज्वलं ॥ कैलासाचलदत्तहस्ततलको ज्येष्ठो गिरिर्विस्मयन् स्वेनानीतमपारमात्मभरकैः किं देयमित्याद्रतात् ॥६८॥ पयोदधिपयःकणैः कथमिहास्ति चार्घ्यं मुदे प्रचंडतररश्मिभिः किमुत दीपदानेन नमे ॥ इतीव मनसा स्मयन् गिरिवरस्ततोऽर्थ्यैर्जगाम भवनं विभोर्गुरुभरादि रत्नोद्वहैः ॥६९॥ सोऽप्यद्रीश्वरमागतं गिरिजया श्लेषं नंदीमुखात्तेनानीतविचित्ररत्ननिवहं दृष्ट्वा ददौ शंकरः ॥ तं चालिंग्य तदा मुदा त्रिजगतां नाथोऽपि गोत्रगुरुं प्रेम्णा हेमवितानचित्रितमहासिंहासने विश्रुतं ॥७०॥ मेनाकेन च मेनया गिरिवरं संपूज्य चालिंग्य तान् प्राह स्वस्ति वचोऽप्युदारमनसा तं चाद्रिपं चेश्वरः ॥ तत्पुष्पप्रकरं फलोच्चतकुलं प्रीत्यानुमान्याद्रात् भक्त्याभ्यर्च्य गिरिव्रजं सुमधुरैर्भक्ष्यैश्च भोज्यैरपि ॥७१॥ संभोज्य स्वसुतैर्मुदा गणवरैः प्रालेयशैलानुगैः मेनाकं गिरिश्वरं गिरिजया तांबूलपुष्पार्हणैः ॥ वासोरत्नविभूषणैर्मणिगणैर्धूपैश्च दीपोत्सवैः रुद्राणी गणनर्तनैश्च भगवान्नं बायतो मोदतः ॥७२॥ ॥ इति श्रीशिवरहस्ये भवाख्ये द्वितीयांशे हिमाचलेश्वरसमागमो एकोनविंशोऽध्यायः ॥१९॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥

भवो॰ द्वि॰ अ॰ १९

५०

५०

॥सूत उवाच॥ ॥ ततोंतःपुरमागत्य सा मेना सोद्रिराट् तदा॥ प्रणतां प्रांजलिं गौरीं मेना मिलि

~~ब्रवीदुमां ॥१॥ पश्यस्नेहेन देवेशि त्वदालोकन हर्षिता॥ इत्युक्ता सा च गिरिजा पितृवाक्यप्रहर्षिता~~

॥१॥ ॥हिमवानुवाच॥ ॥गौरि त्वां दृष्टुमोहातः समागच्छ मिहांबिके॥ मेनया त्वामथा त्रागामे

नाकरुणया गिरा॥२॥ पश्य स्नेहेन देवेशि त्वदालोकन हर्षिताः॥ इत्युक्ता सा च गिरिजा पितृवाक्यप्रह

र्षिता॥३॥ मातरं तां समालिंग्य मेना हर्षेण भाषितां॥ मेनां पितां समालिंग्य गौरी स्नेह विलोचनैः॥

॥४॥ अपश्यत्प्रस्नुतपयः पूर्णस्तां स्नापयत्तदा॥ सा स्त्रां विलामुखं वीक्ष्य प्रोवाचाबांम्ब गद्गदं॥५॥

॥मेना उवाच॥ ॥धन्यं पश्यामि नेत्रेण चिरमद्य तवाननं॥ पुत्रि स्नेहेन त्वां गौरि प्रसन्नेनांतरात्मना

॥६॥ आनंदांबुनिधौ मग्ना सर्वेंद्रिय गुणैः सह॥ इत्युक्त्वा तां समालिंग्य चानंदांबु परिस्रवैः॥७॥

स्विनानीतं क्रीडनकं तस्यै दात्री ति तस्तदा॥ रत्नाभरणजालानि गंधागरु निशादिकं॥८॥ कुंकु

मं रोचना पुष्पं वासोभार निचोलकं॥ पालिकाः बालिका देव्यै सर्वं यत्तदुपाहृतं॥९॥ सा दृष्ट्वा

मेनयादत्त मनुमान्य मुदांबिका॥ तयाहार विहारैश्च स्नान नीराजनोत्सवैः॥१०॥ क्रीडाभिःर्वि

विधाभिस्मा निन्ये वर्षं तदंबिका ॥ सोप्यद्रिराट् महेशेन सपुत्रोनुचरैस्सह ॥११॥ पूजितो गणवर्यै-
श्च उवास अचल सौधके ॥ एकदा मेनया देवी कैलासाचलदर्शने ॥१२॥ नियोजिता शिवा ज्ञातोदृष्टुं दे
वीसखीगणैः ॥ ततो विमानं तरसा मेनया वामनोहरं ॥१३॥ अष्टसिंहसमायुक्तं कामगं सुमनोहरं ॥
रत्नोघपुष्प मणिप्रख्यदीप्तिदीप्तदिगंतरं ॥१४॥ अत्यर्कवर्णं तरसा मनोवेगातिवेगितं ॥ मुक्तामणि
वयखचितं पताकाध्वजशोभितं ॥१५॥ सिंहासनयुतं दिव्यं मणिपुष्पसमावृतं ॥ मणिदीप महाकांति
कांतितं चोज्वलसभं ॥१६॥ रत्नकुंभशतोपेतमंतरिक्षरथोपमं ॥ धूपामोदैक बहुलं पुष्पदाम
सुवासितं ॥१७॥ मेनयांबा समारुह्य कैलासं द्रष्टुमभ्यगात् ॥ फलजालैश्च तांबूलैः गंधपुष्पभरै
रपि ॥१८॥ भूषिताभूषणैश्चित्रैः देव्याश्चापि सखीगणैः ॥ रक्तानुरक्तनार्यैश्च सेवावसरशिक्षितैः
॥१९॥ चामरैर्वीजसंलग्न्या काचिच्छत्रविधारणी ॥ काचित्तांबूलपात्रं च कल्का धारधरापि च ॥
॥२०॥ कंकतादर्शनिकराः फलपुष्पस्रजोत्कराः ॥ गंधपत्रकरा वासो रत्नभूषणसत्कराः ॥२१॥ भृंगा
रुपानपानीयैः शीतैर्धूपैश्च दीपकैः ॥ एवं सखीगणो देव्या देवीमेनां च सेवते ॥२२॥ वीणावेणुमृदंगा

५१

नारम्यध्वनिकरास्तथा ॥ उमा संदर्शयामास मेनायै तन्महोत्सवं ॥२३॥ प्रथमावरणं देवी कैलासस्य
महेशितुः ॥ नानाप्राकारमणिभिः जितं दिव्यमद्भुतं ॥२४॥ तत्प्रकारमणिज्योत्स्ना चंद्रार्कौ नैव
भासतः ॥ गोपुराणां लक्षकैश्च सहस्रमंडितैः ॥२५॥ रम्यम् प्रावलीक्लृप्तैः महावृषभसेवितैः ॥ पश्य
मेने परितः कल्पिता एव सागराः ॥२६॥ कैलासस्य महामेरुः वृषस्तंभ उवास्थितः ॥ सागराःप
रिघाकारा प्राकारस्यास्य शोभिताः ॥२७॥ लक्षस्तंभैर्मणीक्लृप्तैः मंडपोयं सुलोचने ॥ तन्मध्य
सरसी राजत्कलहंसैः सुपद्मकैः ॥२८॥ कुरविंदमणीजालसोपानप्रांतभासुरं ॥ गंधमोदि
तमंदारतरवः परितः स्थिताः ॥२९॥ परितावनमध्यस्थं मंडपं पश्य रत्नजं ॥ नियुतस्तंभसंक्लृ
प्तं पश्य बिल्ववनं महत् ॥३०॥ अरुणैः पल्लवैर्युक्तं मूललिंगोपशोभितं ॥ तन्मध्ये मंडपो भा
ति सहस्रस्तंभमंडितः ॥३१॥ महामरकतैः क्लृप्तस्तस्मिन्लिंगकुलं महत् ॥ सहस्रभिदमुत्कृ
ष्टं शिवप्रेमरसास्पदं ॥३२॥ पश्यैतद्बिल्वमंदारपंकजांकितमस्तकं ॥ उद्यत्त्रिपुंड्रविलस
त्फालभागमनोहरं ॥३३॥ भुजंगभोगकलितं कंठेमौलौ फणायुतं ॥ मणिद्वीपमहाकांतिरं–

शिवरुजितं धूपितं सदा ॥३५॥ रत्नपुष्करणी तोयैः अभिषिक्तं विलोकय ॥ दर्शनादेन सांनाशो भविष्य मवाद्धि: अ.२०
ति न संशयः ॥३५॥ सुरम्य केतकवनं पश्यो न्निद्रारु केतकं ॥ वायुरायासव हुला न्सुखयत्येव तद्
तः ॥३६॥ मंदार सुंदरवन फुल्ल पुष्पोत्थ धूलिभिः ॥ सुगंध मेदुरा त्यंतं मंद घ्राणे कतर्पकः ॥३७॥
नंदिकेशालयं पश्य गणलक्षैः परिवृतं ॥ नवरत्न चितानेक रत्न प्राकार गोपुरं ॥ नंदीश्वरं सदानं
दी पूजयत्यति भक्तितः ॥ तल्लिंगागारमेतद्धि मणीकलश सुंदरं ॥३९॥ प्राकारं दक्षिणं पश्य नीलक
५२ ल्पितमुन्नतं ॥ गोपुरार्बुद संयुक्तं मणिकुंभ विराजितं ॥४०॥ राजद्गोपुर गोष्ठासि रुद्रचारित्रस ५२
दृशं ॥ पश्य चंडीशनिलयं नाना रत्न विचित्रितं ॥४१॥ तत्र चंडीशनिलयं लिंगं चंडेन पूजितं ॥ प्रा-
कृ दक्षिणे च लिंगानां कोटि नामालयं शुभं ॥४२॥ रत्नगर्भ गृहोद्भासि मणिकुंभोज्वलत्प्रभं ॥ पश्चात्प्रा
कार निलयं गोपुरावलि शोभितं ॥४३॥ राजत्प्राकार वृषभैः मौलिमाणिक्य कुंभकैः ॥ पश्य मेने भृं
गिकस्य सदनं मणिकल्पितं ॥४४॥ भृंगीशस्यालयं पश्य वरिवस्या परो गणः ॥ भृंगीश्वरस्यानि
लय मत्र पश्य शिवालयं ॥४५॥ नियुतं मणिलिंगानां गर्भधाम्नो रुशेखरं ॥ रम्य प्रासाद मौलिस्थ—

क्रीडामणिसंघोज्ज्वलं ॥४६॥ गोपुराग्रमहाकुंभधामतातिविराजितैः ॥ रम्यं पुष्पवनं पश्य मेनेपादपमौलिगैः ॥४७॥ पुष्पगुच्छपरागोत्थधूलीगंधायितोद्दिशाद् ॥ पश्योत्तरं हि प्राकारं नवरत्नविराजितं ॥४८॥ गोपुरोच्चन्मौलिकुंभबृंदरूद्धचंद्रार्कैः ॥ शोभितैः परमोदारतलानां गणनापिन ॥४९॥ शिवालयानां गणनां गणितुं नेह जातुचित् ॥ रत्नकुंभोज्ज्वलकुलं लिंगधामौरुवृंदकं ॥५०॥ पश्यक्षणेन मेने त्वमुक्तपापा भविष्यसि ॥ सुरत्नपद्मिनी चेयं पश्य चंपकवाटिकां ॥५१॥ रत्नचंपकपुष्पौघैः रत्नफुल्लैश्च पंकजैः ॥ इत्युक्त्वा सा जगन्माता मेनया चावतीर्य च ॥५२॥ विमानशिखराद्देवी मेनया चावतीर्य च ॥ नानावृक्षशतोपेतां रत्नपुष्पविचित्रितां ॥५३॥ तन्मध्यमणिधामाढ्यमंडपे संस्थितांबिका ॥ मेनया च सखीभिश्च कृत्वा पुष्पावसेचनं ॥५४॥ राशीचक्रेपुष्पजालं मणिपुष्पैः सुगंधितैः ॥ ॥सूत उवाच॥ ॥सा रत्नमंडपगता शशिधाममौलिलिंगार्चनाय सखीनिचितैश्च पुष्पैः ॥ सा मेनयावतातार सुपद्मिनीं तां स्नातुं सखीगणवरैः सम्सानुलिपेः ॥५५॥ ॥इति श्रीशिवरहस्ये द्वितीयांशे देवीविहारो नाम विंशोध्यायः ॥२०॥ श्रीकाशी

शिवःशिवविश्वेश्वरार्पणमस्तु ॥ ॥ स्कंद उवाच ॥ ॥ रत्नपुष्करणी मध्ये सखीभिः सहिता शिवा ॥ मेनयाप-

जलक्रीडां कृत्वा चकार मे चनैः ॥१॥ अन्योन्य स्तन कुंभेषु कपोल जघने षु च ॥ धाराय्रैश्चोसिष

चुः स्तन पंकज कुड्मलान् ॥ उत्फुल्ल पुंडरीकांश्च समाजह्रे सखीगणैः ॥ नीलोत्पल कुलं चा

पि कुमुदं हल्लकं तथा ॥३॥ तत्तीरं ताः समारुह्य चिरं क्रीड्य सरोवरे ॥ दुकूलकूलता ः सर्वाःप

रिदध्युः सखीगणैः ॥४॥ मेनयानुगता देवी मेना मेनान भूषयत् ॥ धम्मिल्लमल्लीस्रग्भिः कंकतैः

स्वयमंबिका ॥५॥ अलकालं बितक चंसमीचक्रे स्वमातरि ॥ रोचनां जन सिंदूरैः नेत्र फालेच

नासा ॥६॥ तिलकं तन्मुखे देवि स्वयमानंद दर्शिनी ॥ तत्पादांबुजयोर्देवी नरसालक्त पंङ्क्तिः

॥७॥ स्वयं चक्रे महादेवी सख्यः चक्रुः शिवां प्रति ॥ अभूषयत्तदांगानि रत्न भूषादिभिः शिवा ॥८॥

अधूपयत्कच भारं मेनायाः स्वयमद्रिजा ॥ अंगरागं गंध यैः पट्वा सिक्तदांबिका ॥९॥ स्वांगमेनां

गनस्यापि शुभंदर्पक्षणि मंडलैः ॥ नानापुष्प सुवासैः धम्मिल्लैस्ते च भू[illegible]षुः ॥१०॥ ततो वन विहारा

र्थं समुत्तस्थौ सखीगणैः ॥ देवी सा मेनया सार्धं पादसंयोजि पादुका ॥११॥ ययौ वनस्थलीं तत्र पुष्प—

स्क. पृ. अ. २१

५३

वृक्षोपशोभितां ॥ चंपकाशोकपुंनागबकुलैश्चंपकाम्रकैः ॥१२॥ कुटजैश्च धवैः फुल्लकेतकीनां गणैस्तथा ॥ मंदारपारिजातैश्च कुरवैः पारिजातकैः ॥१३॥ शमीशिंशपबिल्वैश्च करंजाशोककैः मधूककैः ॥ मल्लीवल्लीकुंदवल्लीजाजीद्राक्षासुपिप्पली ॥१४॥ पूगीरंभावृतापार पर्यंतैः प्रसृतास्तदा ॥ नीपानोकहजंबीरजंबाम्रातकभल्लकैः ॥१५॥ लोध्रसल्लकवृक्षैश्च फुल्लहल्लकपंकजैः ॥ कासारसारमध्यस्थमणिमंडपमध्यगाः ॥१६॥ विजहार वनेदेवी मेनया स्वसखीगणैः ॥ उत्फुल्लारक्तकमलहल्लकान्पुंजहारसा ॥१७॥ उत्फुल्लचंपकानां च पुष्पाण्यपचिनोत्तदा ॥ मल्लीकुंदबकुलपारिजातसमुद्भवाः ॥१८॥ मालाश्चोद्ग्रथ्य पुष्पाणां देवी पक्वफलान्यपि ॥ समाजहारालिभिः सा वृक्षाधः स्थितमंचगा ॥१९॥ मेनया परया प्रीत्या सखीगणनिषेविता ॥ नारिकेलाम्रपनसमातुलिंगेंगुदीफलैः ॥२०॥ करंजैः कदलीजंबूदाडिमीलकुचैस्तथा ॥ पुंड्रेक्षुसारखंडैश्च नानाभक्ष्यान्नराशिभिः ॥२१॥ क्षीरोदनैर्घृतान्नैश्च दध्यन्नैः सोपदंशकैः ॥ शाकसूपापूपजालैः दधिक्षीरघृतादिभिः ॥२२॥

शिवश्शैलिंगपूजां समारंभे सा देवी मेनयासह ॥ सख्या नीतैः गंधपुष्पपंचामृतघटीशतैः ॥२३॥ फल-
जालैस्तथेक्षुणां सारैः क्षौद्रैः सशर्करैः ॥ वासोभूषणतांबूलैर्धूपदीपैर्मनोहरैः ॥२४॥ दृष्ट्वा दर्शम
होदेवी त्रिपुंड्ररचनादरा ॥ मुक्तां तरितरुद्राक्षमाला शोभितकंधरा ॥२५॥ मेनया सा ययौ तत्र रम्यं
देवी श्वरालयं ॥ तत्प्राकारमहामौलिगर्भागारैकसुंदरं ॥२६॥ गोपुरोद्भासिमाणिक्यकुंभैः सद्रत्नभि-
त्तिपे ॥ शोभितं मंडपगणे धूपदीपालिरंजितं ॥२७॥ तत्रांतर्गृहमासाद्य मेनये क्षिसखीगणैः ॥ शु
द्धकर्पूरधवलं मणिबिंबोत्तमांगकं ॥२८॥ हीरत्रिपुंड्रसंशोभितद्युमणि फणावृतं ॥ सोमार्धशे
खरं लसन्मणिहारविभूषितं ॥२९॥ तल्लिंगं वीक्ष्य सा देवी प्रणम्य मणिभूषितं ॥ देवीश्वराभिधं
तत्र देवी सा मेनयायुता ॥३०॥ पूजया मास विभवैः पंचामृतनिषेचनैः ॥ फलसारैश्च विविधैश्चं
दनांभोघटैरपि ॥३१॥ वस्त्रगंधाक्षतैर्बिल्वैः पुष्पमालाभिरीश्वरी ॥ धूपदीपैश्च विविधैः आ
नीतैर्भक्ष्यभोज्यकैः ॥३२॥ अंधसां राशिभिर्देवी निवेश्य परमेश्वरी ॥ तांबूलानां भरैर्देवी प्रदक्षि
णनतिक्रमैः ॥३३॥ स्वसखीगणसंक्लृप्तवाद्यनाद्यानिषेविते ॥ संपूज्य सा महादेवी देवीशं मेनया-

भवानीकृ
अ. २१

५४

५४

सह ॥३४॥ लिंगाग्रे संनिवेश्यांबा रुद्रवीणा करा तदा ॥ नरवोत्थभूष्ट महातंत्री गानरक्तानुगुंठतः

॥३५॥ तुष्टाव स्तोत्रवर्येण तदा देवीश्वरं शिवा ॥ देव्युवाच ॥ ॥ पुरहर भगवन् कुरु करुणां स्मरह-

र शंकर प्रभो ॥ गरधर गुरुभर जगदुद्धारक मुरहर पूजित पाद ॥ गजहरय महाहर भगम खहर

हरिशर हर पाहि ॥ अगपति विल सित लिंग कुलांतर भरितानंदक मोद ॥३७॥ परि फुल्लांबुज वि

ल्वालंकृत शशिधामोध्धृत मौले ॥ परिपाहीश्वर शंकर सुंदर भक्तजन प्रिय शंभो ॥३८॥ उध्धृतेध

मकर सम सुम जाधिक मारख रांगक भूष ॥ भसितालंकृत निटिलालंकृत पुंड्रोत्तम परिभूष ॥३९॥

चक्षुः श्रवणग मणिगण कंधर सोमार्य मान लाक्ष ॥ तुरगायित निगमाव्यय हर श्रुति मौलोध्धृत

कीर्ते ॥४०॥ परिपाहीश्वर देव दयाकर भगवन्नवमां दीनां ॥ पुरहर मुरहर पूजित पाद शंबर हर ह

र हर हर शंभो ॥४१॥ गंगाधर हर गरकंधर हरकाकोदर वरहार ॥ परिपाहध्वनिशाकर लोचन द

यया सततं गिरिवास ॥४२॥ ॥ सूत उवाच ॥ ॥ इत्थं सा गान वाराभिः तुष्टावाष्टाकृतिं हरं ॥

तद्गानधारां सा श्रुत्वा मेना विस्मायिता तदा ॥४३॥ चित्रार्पितेव सा तस्थौ तत्रतत्र सखीगणः ॥ तं त्वा

तिशयकौतथमूर्त्तिरागैकमेदुरं ॥४४॥ रागानुसारं शुश्राव मेना गांधर्वमुत्तमं ॥ संजातपुलका स्त्रीभि- न्येवं पंकजकुड्मलैः ॥४५॥ उन्मेषनिमिषैर्हीनास्ताः पश्यंत्यालयोंबिकां ॥ विसृष्टगाना सा देवी नृत्यं लिंगाय यतः कृतं ॥४६॥ सखीभिर्जातहर्षेण मेनया पश्यदीश्वरी ॥ तदालयात्तटं प्राप्य देवगंगा मणिद्युति ॥४७॥ तन्मध्यमंडपां लस्या नवरत्नविचित्रिते ॥ भोजयामास सा देवी निवेदितमुमाप तेः ॥४८॥ भक्ष्यान्नराशिदध्योदैः मेनां चस्वसखीगणं ॥ स्वयं चापि महादेवी बुभुजे षड्रसान्वितं ॥४९॥ रत्नपात्रपरिक्लृप्तैः नानाभक्ष्यान्नमुत्तमं ॥ स्वाद्यैः पेयैश्च मधुरैः पानीयैः शीतलैः शिवा ॥५०॥ स्वर्णभृंगारुकालितैः पाटलागरुगंधितैः ॥ ॥देव्युवाच॥ ॥ अहो धन्ये महामेने शिवनैवेद्यमीदृशं ॥५१॥ पापजालैकसंहारी आस्वादय सुधाधिकं ॥ भक्ष्यं भोज्यं तथा पेयं दध्यन्नमिदमुत्तमं ॥५२॥ गृहाण सोपदंशानि पानानि विविधानि च ॥ रसवंत्यश्च सुभोग शिवनैवेद्यमुत्तमं ॥५३॥ इति तां भोजयामास रत्नपात्रे स्वसखीगणं ॥ देवगंगासरित्तीरे सोपानतटमंडपे ॥५४॥ क्षीरप्रक्षाल्य हस्तौ च मंडपे सा वरासने ॥ मेनया संस्थिता देवी तांबूलैः सुमनोहरैः ॥५५॥ मुखवासैः सुधूपैश्च स्रग्गं-

भवा० अ० २१

५५

धाभरणार्पणैः॥ विश्राणयत्तदाभेनां स्वसखीगणमुत्तमं ॥५६॥ स्वयं चाभूषयद्गात्रं दिव्याकल्पैर्म-
हेश्वरी ॥ दिव्यांगरागभूषैश्च पुष्पैर्वस्त्रैश्च भूषिता ॥५७॥ स्वसखीकल्पितापारवेणुवीणामृदंग
कैः॥ दिव्यनाट्यसमारंभैः निनायदिवसं क्षणात् ॥ रत्नकंतुकलीलाभिरक्षक्रीडारसैः शिवा॥
कदाचिद्वनमध्यस्थवृक्षालंबनमंचकैः ॥५९॥ मेनया सा प्रमुदिता वनमंडपमध्यगा ॥धारागृ
यगृहे देवी चंडांशुकरतापिता ॥६०॥ मयूरशुकशारीककलहंसांश्च पश्यती ॥ रत्नदंडामले
देवी चक्रे हल्लीसलास्यकं ॥६१॥ मेनया स्वसखीभिश्च वृक्षांदोलैश्च शंकरी ॥ मणिदीपेक-
दाचित्सा मेनया विजहार सा ॥६२॥ सुधासागरमध्यस्थनौकाक्रीडादिभिः शिवा ॥ क्षेपिणीक्षे
पितजलैः सखीभिर्गानधारया ॥६३॥ स्वयं रुद्रमहावीणां गृहीत्वा गानधारया ॥ शिवनामा-
निगायंती तोषयामास मातरं ॥६४॥ उद्यच्छशांकधवलरत्नप्रासादमौलिगा ॥ रत्नमंचेषु
सा देवी पुष्पप्रस्तरकेषु च ॥६५॥ चंद्रचंदनलिप्तांगी मेनया वीजिता तदा ॥ सखीभिः सेवि
ता देवी नानासेवारसैस्तदा ॥६६॥ शयाना पुष्पपर्यंके देवी रात्रिमनीनयत् ॥ ॥ स्कंद उवाच॥

शिवर०२ एवंनानाविधाः क्रीडादेव्या हर्षोरुधारया ॥६७॥ कैलासे च मणिद्वीपे उवास चिरमंबिका ॥ भवा.द्वि

मेनया सा सखीभिश्च प्रमोदानंदनिर्भरा ॥६८॥ वर्षाणां शतकं सदा गिरिजाज्जाता सखीभिः अ०२१

सुखं सा मेनां नगराजमूर्धनि शिवा दिव्यां गागैः सुभैः ॥ भक्ष्यैर्भोज्यरसैः सदा रसभरैः क्रीडा

दिभिस्तोषयद्विश्वेशानुमतेन भाग्यनिवहैर्देवी सखीनां गणैः ॥६९॥ ॥इति श्रीशिवरहस्ये

भवाख्ये द्वितीयांशे देवीविहारो नाम एकविंशोध्यायः ॥२१॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥

॥ ॥स्कंद उवाच॥ ॥एवं देव्या पूजिता सा मेना धन्य मनोरथा ॥ देव्या क्रीडारसभरैर्विहारैश्च

५६ नासनैः ॥१॥ निनाय दिवसान् तत्र कैलासे नंदिता भृशं ॥ भूधरोपि समेनाकः पूजितः शंकरेणहि ॥

रत्नसौधे महामंचे भक्ष्यभोज्यैश्च पर्वतैः ॥स्रग्गंधवासस्तांबूलैर्गणानां पूजनैस्तथा ॥३॥ ५६

वाग्भिः संभावयामास नित्यं हर्षोरुधारया ॥ फलं मूलं तथैवान्नं वासोगंधसुमादिकं ॥४॥ यच्च

प्रियकरं शंभो प्रियं देवी च सा मुदे ॥ पर्वतेंद्राय सा देवी मेप[illegible] मासमादिता ॥५॥ शिवश्यानुमते

नैव नित्यं वृध्या सुखोदकैः ॥ एवं देवेन देव्या च हिमवान् भूधरोत्तमः ॥६॥ पूजितो मेनया सार्धं-

मैनाकेन तदा गिरिः ॥ नाना हारविहारैश्च प्रीत्या तत्रानुमोदितः ॥ ७ ॥ स्वकया संनिधिं प्राप्य शंभो स्तत्र गिरीश्वरः ॥ तुष्टाव देवं देवीं च कैलासे शंकरालये ॥ ८ ॥ ॥ हिमवानुवाच ॥ ॥ दिक्कूलफाल तिलकानलकालव्यालेंदुमाल गरनीलकराब्जशूल ॥ लीलाकृतांगनिखिलागम तत्वमूलबालार्धगा[illegible]त्र मुनिबालकृतालवाल ॥ ९ ॥ तिग्मांशुशीतांशुजहव्यवाहनेत्रोज्वलन्मदनकाय उमासहाय ॥ भूदारदारनरसिंहविदारणेश दैत्योरुसिंधुरकटीतटचर्मवस्त्र ॥ १० ॥ गंगातुंगजटोरुशेखरसुधाधामार्धखंडोज्वल ॥ स्थूलपारद्विजिव्हहारवलयो[illegible]मरूणनूपुर ॥ ११ ॥ उक्षेंद्रोत्तमवाहनाव्ययहराधामेरुसुस्पंदन ॥ सोमार्यमणकचक्रकर्षणमहावाहोर्थवेदोत्तम ॥ शंभो मेदिशभद्रमघ्नदयया मां पाहि सर्वेश्वर ॥ पाथोजातभवोत्तमांगहरणपारव्यथां संहर ॥ १२ ॥ पद्मोत्थापतिनेत्रपद्मनिवहापारार्चितांघ्रिक ॥ भूधुरधुर्यशरासनोरुविहितामोर्वी महीधारक ॥ १४ ॥ पाषद्रीश्वरमौलिलिंगवसते शंभो मृडानीपते ॥ कुलाचलशरासन कुलिशपाणिभोगप्रद ॥ १५ ॥ कुजापतिशरोत्तमं कुसुमबाणदग्धांगक ॥ कुलीर-

शिवाय२ चवर मदं कुटिल सौरिद पापहं ॥१६॥ कुशीद जन दुर्गं कुमति दुःख दं त्वां भजे ॥ ॥सूत उवाच॥ भवानीकृ

॥ तत्स्तुतिं स शिवः श्रुत्वा हर्ष निर्भर मानसः ॥ उवाच वचनं दीनं वीक्ष्य देवो देवो द्विजासरवः॥१७॥ अ०२

प्रणमंतं च शैलादिं स्वर्णनेत्र लसत्करं ॥ ॥ ईश्वर उवाच ॥ ॥ भूधरेंद्र गच्छ त्वं विमाने नार्ककरो

चिषा ॥१८॥ दर्शय स्वं मदीयं यः कैलासः स शिवालयः ॥ नग्लानिर्न श्रमो वास्यत्त तथा संविधी

यतां॥१९॥ गच्छ तो मेनया सार्धं मैनाकेन नगेशितः ॥ इति शंभो र्वचः श्रुत्वा नंदिकेशः कृतांजलिः

॥२०॥ हिमाचलं समैनाकं गृहीत्वा कर पल्लवैः ॥ अत्यर्क सु विचित्रं च पताकावलि भासुरं॥२१॥

पुष्पमाला परिक्षिप्तं मुक्तामाला परिष्कृतं ॥ फलपुष्पांबु संयुक्तं भक्ष्य भोज्य समन्वितं ॥२२॥

मृदंग मुरजोत्कृष्ट रुद्रकन्यावृतं तदा ॥ गणतौर्यत्रिका पाट विनोदित दिशामुखं ॥२३॥ शिवाज्ञ

या गिरिवरं रत्न सिंहासने वरे ॥ उपवेश्यासने नंदी समैनाकं स्वयं तदा ॥२४॥ रत्नसिंहासने वि-

प्र गणवृंदैः समन्वितः ॥ दर्शयामास शैलेंद्रं गणेंद्रो भूधरं तदा ॥२६॥ प्राह प्रालेय शैलेंद्रं नंदीनं

दित मानसः ॥ ॥नंदिकेश्वर उवाच॥ पश्य धन्य नने त्रेण कैलासं शंकरस्य हि ॥२७॥ यत्रैकं वा-

शिवागारं तत्क्षेत्रं योजनायुतं ॥ तत्रैव वसतां पुंसामपि कीटपिपीलिकं ॥२८॥ मुक्तिरीशप्रसा-
देन पश्यंतां पापनाशनं ॥ अत्रानंतशिवागारे मौलिकं भेकदर्शनात् ॥२९॥ न जाने महिमावत्तं शि-
वो जानाति नेतरः ॥ कैलासं शंकरावासं नानाद्रुमलतायुतं ॥३०॥ रत्नपुष्करिणी फुल्लपद्मराज-
कुलसंकुलं ॥ नानावल्लीवेष्टितोरुवनस्पतिशुभ्रतायुतं ॥३१॥ नानापक्षिरुतापारवननिर्झर-
कंदरं ॥ मृगेंद्र सिंधुरेंद्रादि चमरी महिषावृतं ॥३२॥ कोकिलाकाकलीगान शुक सारिक सारसैः ॥ कुर
रक्रौंचवहुलं हंसनादविनादितं ॥३३॥ नागमौलिगतोत्तुंग सालताल द्रुमाकुलं ॥ सुरम्यबंधुरामोदपुष्प
किंजल्कमारुतं ॥ पुष्पगुच्छ भरालोल मारुतामल भूतलं ॥ तलशोभित पुष्पौघ फल तामायितोत्तमं ॥३४॥
प्रभातवातपोतोच्छ्रीत लायितभूतलं ॥ द्रोणिजालं बिसच्छेदरसासक्त ससुधागुणं ॥३६॥ भ्रमद्भ्रमर झं-
कारमधुकोद्दामगंधिनं ॥ केतकी पुष्पसौरभ्यसुगंधायित दिक्तटं ॥ कुरुवोद्दाम गंधाढ्य चंदनानंद-
ताननं ॥ तिलकायितदेवद्रुमौलिस्य तिलकैर्युतं ॥३८॥ वातपोतमुखासारवल्मीकोत्थितपन्नगं ॥
करटीकटधामादीकृत गंधित भूतलं ॥३९॥ रोमंथफेनबिंदूच्चनमहिषीणां गवां तथा ॥ ऊधोनिर्गत्य

शिवरह० २

यः पूर्पंकिलायितभूतलं ॥५०॥ तत्पंकपंक्तिसंलग्नवैरेण खुरभूतलं ॥ मुस्तांम्रेडनको दृष्टकोलदंष्ट्रोत्थि तोपलं ॥५१॥ गैरिकापीतहरितरक्तमांजिष्टधातुभिः ॥स्रवंतं रीतिभिः शैलं गजेंद्रमिव यत्रिधा ॥५२॥ उत्तुंगशिखरापारशृंगैरुल्लिमिलितांबरं ॥ दर्शयामास नंदीशो नगराजायतन्नगं ॥५३॥ कैलासं कलधौतोपद्रव्यकांतिविराजितं ॥ प्राह तं नंदिकेशोपि भिखरींद्रं शिवाज्ञया ॥५४॥ ॥शैलादिरुवाच॥ ॥पश्य शैलं महाशैल महेशस्य दृशा तव ॥ पश्य पश्येदमतुलं प्राकारं वरगोपुरं ॥ नाना गोपुरसौधैश्च मदालयमिदं ततं ॥ विकेशस्येदमतुलं गृहं शंभोर्वरालयं ॥५६॥ एष रत्नगिरिर्भाति रत्नकांतशिलोच्चयः ॥ तत्र रत्नाग्र शिखरः प्रासादोयं महेशितुः ॥५७॥ उपक्लृप्ताकरुचिरो रत्नतोरणमंडितः ॥ हीरैर्न्निर्माणमयो भाति सहस्रस्तंभमंडपः ॥५८॥ मध्ये शैलं सदा भाति हरमानससोदभूः ॥ कोटिलिंगालयानां च शिखराण्यपि पश्य भो ॥ ॥५९॥ दर्शनेनापि पापानां प्रलयो यः भविष्यति ॥ एष दक्षिणतो मेरो प्राकारो मणिकल्पितः ॥६०॥ चंडीश्वरालयं पश्य रत्नसौधवरान्वितं ॥ चंडीश्वरेशशिखरं पश्य तच्च नमस्कुरु ॥६१॥ लिंगायुतमहासद्मप्रोच्चकुंभैकभासुरं ॥ पश्य शैलेश्वरापारगोपुराणां तलान्वीप ॥६२॥ सुरत्नपद्मिनी चेयं रत्नसोपानमंडपैः ॥ परितः

भवा० उ० अ० २२

५८

५८

परिवीतां चरत्नकुंड लहल्लके ॥५३॥ मणि जैरविंदोच्चपरागरसरंजिता ॥ कैलासशस्य शिखरं पश्य-
भूधरनायक ॥५४॥ उद्यत्पताकाकलशमूलगोपुरभासुरं ॥ अत्र स्वयं महादेवः संपूजयति सर्वदा ॥५५॥ तल्लिं-
गावाखिस्यातः हर्षतो देवनायकः ॥ प्रदोषेषु विशेषेण पश्य नृत्तारुमंडपं ॥५६॥ अभ्रंलिहे मस्तकुंभैः विशाले-
मणि भासुरैः ॥ सुरम्यरत्नवेदीभिः परितः परिवेष्टिते ॥५७॥ अत्र देवीं समावेश्य रत्नसिंहासने शिवः ॥ मणिरंगे
सदा सायं नृत्यत्यानंदनिर्भरैः ॥५८॥ मया च गणनाथेन स्कंदेन गणपैर्वृतः ॥ वेणुमर्द्दलमड्डुत्य तालकाहल-
निस्वनैः ॥५९॥ सभाः पश्यात्र वितता मणिमौलिपताकिकाः ॥ सहस्रस्तंभसंयुक्ताश्चतुर्दिक्षु मनोहराः ॥६०॥
सौवर्णो राजतो चापि चित्सभात्र महीशतुः ॥ अन्या रत्नसभा चेयं रत्नपर्य्यंक कांतियुक् ॥६१॥ सायं नृत्यति-
देवेशो देव्यग्रेत्र समासु च ॥ रम्यं सहस्रलिंगानां रुद्रमालयमुत्तमं ॥६२॥ उद्यद्दिवाकरप्रख्यं कुंभजाल
किर्तांबरं ॥ पश्यात्र देवदेवस्य कोटिस्तंभारुमंडपं ॥ धूपदीपमणिज्योतिरुद्रक्रीडनमुत्तमं ॥ मौलि
जालकमध्यस्य मणिकुंभोज्वलद्रूपं ॥६४॥ सुरम्यवापिका चेयं सुधाकल्लोलमालिनी
॥ देवगंगातटं पश्य लिंगा सौधोरुमंडपा ॥६५॥ सुधासागरगा चेषा गंगाकैलासमौलिगा ॥

शिवरत्नपंचवक्त्रेश्वरस्यापि सद्म पश्य मनोहरं ॥६६॥ रत्नकुंभ महाकांति तिरस्कृत दिवाकरं ॥ तल्लिंगपंचवक्त्रोत्थानघः पंचात्र मुमुक्षुः ॥६७॥ शिवगंगा देवगंगा रत्नगंगेति विश्रुताः ॥ कैलासगंगा शैलेंद्र मधुगंगेति चक्रमात् ॥६८॥ सर्वास्ता स्तीरवर्त्मा रुमणि सोपान मंडपाः ॥ परितः शोभिता पार शिवसौधविराजिताः ॥६९॥ लिंगसद्म महाकुंभ बिंबिता तुंगतोरणाः ॥ रत्नकर्कटमत्स्यैश्च पद्महंसैककोककाः ॥७०॥ नीलोत्पलामणि प्रासादो रत्नरंजितः ॥ उच्चकुंभः सदाभाति दिव्यसिंहासनांचितः ॥७१॥ रत्नेश्वरालयं पश्य नवरत्नविचित्रितं ॥ पश्य बिल्ववनं शंभोः नवारुणदलान्वितं ॥७२॥ तन्मूलमणि लिंगस्य स्थाणुरस बिजृंभितं ॥ कल्पवाटीमिमां पश्य रत्नवेदिका चित्रितं ॥७३॥ कंदलेशालयं पश्य शैलात्र सुमनोहरं ॥ कुल्या २ चात्र प्रपश्याच्च मधुक्षीर घृतस्रवाः ॥७४॥ देवीश्वरालयं पश्य सदा देव्याः प्रियंकरं ॥ तत्र सालवनं पश्य पारिपक्वदफलावृतं ॥७५॥ विलोकय दृशा शैल पश्चिमे गोपुरं स्थितं ॥ सहस्र तलसंयुक्तं गवाक्षवृक्षभैर्युतं ॥७६॥ रम्योत्तुंगमणिद्योति शिखराग्रपताकिकं ॥ उग्रेश्वरालयं पश्य उग्रपातकनाशनं ॥७७॥ भृंगिसौधोयमतुलो बाणस्यात्र-

भवानीदृ०
अ० २२

५२९

५२९

गृहं महत् ॥ हरिकेशालयं पश्य पश्य स्कंदालयं महत् ॥७८॥ अविमुक्तेशस्यापि शैलवं पश्य प्रणति-
गोनग ॥ नवरत्न महाशैलान् पश्य सौधोत्तमैर्वृतान् ॥७९॥ उमेश महाधाम पश्यात्र सुमनोहरं ॥
गर्भेशगर्भभवनं पश्य कुंभैर्विभासितं ॥ ८०॥ मंडपं दश सहस्र स्तंभ कुंभ विराजितं ॥ कैलासन लिनी चे-
यं रत्न फुल्लांबुजावृता ॥ ८१॥ तन्मध्य सौध गर्भस्य मणि मंचं प्रपश्य भो ॥ कैलेशेशालयं पश्य पापा-
दि कुलिशं हि तत् ॥ ८२॥ कुलशैलं प्रपश्याद्य चंद्र कांत शिला तलं ॥ सहस्र योजनायामं तत्र चंद्र-
श्वरालयं ॥ ८३॥ कुलाचल महासौधान् प्रपश्य नगसत्तम ॥ अयुतं लिंग सदनं मदनांतकरप्रियं ॥
॥ ८४॥ आलोकय महाशैल शैलेशस्य वरालयं ॥ क्षीरोदवापिका चेयं रत्न सोपान मंडपा ॥ ८५॥ क्षीरे-
श्वरालयं तीरे तस्याः पश्य मनोहरं ॥ मयूरेशस्य सद्मैतत् वन गर्भे विलोकय ॥ ८६॥ मिटिमस्तत्र-
सौधे तु आज्ञया शूलिनो नग ॥ पूर्वतो हं दक्षिणतः चंडी भृंगिरिटिस्तथा ॥ ८७॥ पश्चाद्थोत्त
रे शैल चंद्र चूडस्य शासनात् ॥ पालयामो गणा येश्च सदा शूल वरायुधैः ॥ ८८॥ ॥ नंदीश्वर उवा-
च ॥ स्तल्लिंग कुलं त्वपार मणि जैः सौधैश्च सद्रे पुरैः स्यैर्तुंगनि खात सागर महाप्राकार-

शिवस्य भूभृदृशौ ॥ फुल्लाब्जैः सरसीगणैः सुमवनैः क्लृप्तार्घ्यैर्भूधरः विश्वेशेन विचित्रचित्रमनसा
संपश्य शैलोत्तम ॥ ८९ ॥ नानाराजविराजितो हि शिवसौधोऽयं शैलराट् द्राजतकांतिसार-
निवहैः श्री विप्रराजाधिकः ॥ राजल्लिंगगणैर्मराज भुवने विश्वेश्वरस्याज्ञयाराज द्राजसम-
स्तराजति परं शैलाधिराजेक्षय ॥ ९० ॥ ॥ इति श्रीशिवरहस्ये भवाख्ये द्वितीयांशे हिमाचला
यकैलासदर्शनं नाम द्वाविंशोध्यायः ॥ २२ ॥ ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ ॥ नंदीश्वर उवा-
च ॥ गणेश्वरस्य सदनं पश्य कुंभविराजितं ॥ हीरसौधमिमं पश्य अत्यर्कं द्वि सुंदरं ॥ १ ॥
पाटलीनां वनं पश्य बहुधामोदगंधितं ॥ पाटलीशागारमेतत् पापपाटन चंचुरं ॥ २ ॥ स्वर्णताली
वनं पश्य यत्र घर्घरमारुतं ॥ तालेशशिखरं भाति दधिकल्लोलिनीत्विषं ॥ ३ ॥ मुंजिकेशद-
यं पश्य पश्य नागेश्वरालयं ॥ विघ्नेशस्य निवेशं च पश्य सोमेश्वरालयं ॥ ४ ॥ शरणं शरणं शंभो-
पुन्नागवनमध्यगं ॥ बिल्वेश्वरस्य शिखरं पश्य बिल्ववनान्तरे ॥ ५ ॥ गंधर्वेशशिखरं पश्य साल
वनं महत् ॥ दशसहस्र गंभीरं रत्नस्तंभो रुमंडपः ॥ सिंहेश्वरालयं पश्य पश्य रुद्राक्षकाननं ॥

रुद्ररूप महावृक्षैर्युतं पापभयापहं ॥ भस्मधारणश्चापि पश्यात्र कुमुदोज्वलं ॥ भस्मेश्वरालयं
पश्य दर्शनात्पाप भस्मकृत् ॥८॥ गंधशैलोहशिखरं पश्य गंधेश्वरालयं ॥ चंदनानां वनं पश्य नयना-
नंददायकं ॥९॥ घृतकुल्यामिमां पश्य तत्ताद्भ्र घृतगंधितां ॥ घृतेशधाम पश्यात्र नगेश्वर दृशा-
द्भुयं ॥१०॥ त्वं कृतार्थो कुरुक्षि प्रक्षिप्रेशालयलोकनात् ॥ उत्तरं गोपुरं पश्य महावृषभशेखरं ॥११॥
गरुडो क्रीडागिरिस्ताद्भ्र मंडपं पश्य भूधर ॥ पुष्परागोत्थशिखरं पश्यागरुवनं महत् ॥१२॥ देवदारुव
नं पश्य देवदारेश्वरालयं ॥ कालाग्निरुद्रसदनं पश्यात्र सुमनोहरं ॥१३॥ गंधर्वेशालयं पश्य वेद
शिशिखरं महत ॥ तरणीशालयं पश्य पद्मगर्भेश्वरालयं ॥१४॥ सुधाविपिनमप्यत्र पश्य खर्जू
रिकाननं ॥ पूगीवनमिदं पश्य पर्णादेशालयं नग ॥१५॥ भैरवेशालयं पश्य मणिखंडेश्वरालयं
॥ सुधावापीयमतुला सुधया पूरिता त्र नु ॥१६॥ श्रीमहेशेन करुणाकटाक्षरसवीक्षणात् ॥ त-
त्तीरे पश्य सुभगां सुधाधामेश्वरालयं ॥१७॥ अमृतेशालयं पश्य कूपः पापविनाशनः ॥ जटेश्वर-
स्य शिखरं पश्य नंदनकाननं ॥ पश्याम्रवनमेतद्धि तरुणारुणपल्लवं ॥ आम्रेश्वरालयं पश्य पश्य-

[illegible]

 लिंगशताष्टकं ॥१९॥ बिल्वमंदार सन्मौलि फणी फणविभाजितं ॥ मणिगर्भ गृहांतस्थं त्रिपुंड्रो-
ज्वल फालकं ॥२०॥ उध्यदर्क कर प्रख्यं शिव प्रासाद मीक्षय ॥ कुंदेंदु मणिस्तंभ मणिस्तंभ मणि
मंडप मीक्षय ॥२१॥ पिप्पलेशालयं पश्य पश्या शोक वनं महत् ॥ विशोकेशस्य सदनं पश्य मंदारका
ननं ॥२२॥ शुक्रेश्वरस्य सदनं पश्याध्वर भूधरं ॥ वृशेसस्य महा सद्म पश्य प्रासाद केश्वरं
॥२३॥ उग्रो शालयं पश्य ईशान सदनं महत् ॥ रुद्रेशस्यालयं पश्य पारिजातवनं महत् ॥ रत्न-
 प्रासाद शिखरं पश्यात्र सुमनोहरं ॥ गिरिकेशालयं पश्य हरिकेशवनं नग ॥ सरोवरं त्वं पश्या
घसागराख्यमिदं नग ॥२४॥ सागरेशस्य शिखरं पश्यात्र सुमनोहरं ॥ अमलेशालयं तत्र कुमुदे-
शालयं ततः ॥२५॥ हंसेश्वर महा धाम धाम भद्रेश्वरस्य च ॥ तत् प्राकारस्य सौधाग्रं पश्येतद्दृष-
लांछितं ॥२६॥ मणि ज्योतीश्वरं पश्य मौलिं कामेश्वरस्य च ॥ मधुक खंड मप्यत्र द्राक्षावल्ली
वनं ततः ॥२७॥ कैलास गंगा तत्रैव वीक्षयाध्य नगोत्तम ॥ कोट्यर्बुद लिंगानां सौधमालां विलो
कय ॥२८॥ कुंभावपली मिमां पश्य दर्शनात्पाप नाशिनी ॥ तमालवन मध्यस्थं मालीशशिखरं-

दृश्यता ॥२९॥ पश्य त्वं सुंदरेशस्य कपर्दीशालयं तथा ॥ यक्षेश्वरस्याभयदं पापभक्षेश्वरस्य च ॥३०॥
वने शोयं मतंगेशः प्लक्षेशोयं द्रुतीश्वरः ॥ शिखरं विनतेशस्य वसतीशस्य लोकय ॥३१॥ एला वनीमिदं
पश्य रत्नगुच्छैर्विराजितं ॥ कुलाचलानां सौधो हि लिंगकुंभान्विलोकय ॥३२॥ वन धाम महामौलि लिं-
गं च हिम भूधरः ॥ तत्परस्ताद्रत्नभूमिः सुधासिंधुर्विराजते ॥३३॥ तरंगमालाविततो सुधापिंडो रुफेन
वान् ॥ तन्मध्ये च मणिद्वीपः चारुचक्रे श्वचक्रास्ति वै ॥३४॥ मणिद्वीपोयमतुलः श्रीपुरं तत्र राजते ॥ म
णिद्वीपेश शिखरं मध्ये पश्यन गौतम ॥ मणिगंगातटं पश्य मणिगंगा सुधाब्धिगा ॥ करंजवनमध्यस्थं
करंजेशं शिवालयं ॥३६॥ एवं शताष्टौ प्राकाराः श्रीमहेशेन कल्पिताः ॥ कैलास मौलौ विततारत्नलिं-
गालये सह ॥३७॥ तत्रांतरे च भवनं स्कंदस्य गणपस्य च ॥ स्कंदेश्वरस्य शिखरं पश्य विघ्नेश्वरस्य
च ॥३८॥ देव्यांतःसदनं तत्र मणिसौधं विलोकय ॥ नाना स्कंदगणास्तत्र विघ्नेशस्य महागणाः ॥३९॥
शक्ति पाशांकुशकरास्तत्र प्राकाररक्षकाः ॥ नवलक्षं पंचलक्षं ताभ्यां तत्रैव रक्षितं ॥४०॥ सद्योजा
तो वामदेव तत्पुरुषो घोर एव च ॥ ईशानस्तत्र चांतर्हि प्राकार परिरक्षकाः ॥४१॥ स्वगणेस्ता दृशैरेव-

शिवरः प्रत्येकं लक्षसंख्यया ॥ स्वनाम्ना स्थाप्य लिंगानि दिव्यधाम गतानि ते ॥ ५२ ॥ सदा पीचीतिभिस्तत्र-
पूजयंति विलोक्य ॥ तन्मौलिकुंभजालानि वीक्ष्य तच्चेन मस्कुरु ॥ ५३ ॥ एवं तत्रांतरे पन्याः पंच
विंशतिमूर्तयः ॥ पंचपंचांतरास्तत्र प्राकारपरिरक्षकाः ॥ ५४ ॥ स्वनाम्ना स्थाप्य लिंगानि कैलासामल-
पर्वते ॥ तत्रांतरे महादेव्यावसतिः शिवकल्पिता ॥ ५५ ॥ नास्माकं प्रसरस्तत्र नानामणिमहांतरे ॥ स
त्यस्तत्र महादेव्याः संचरंत्यत्र पश्य तत् ॥ ५६ ॥ तत्र लिंगोरूपद्मानि मणिकुंभोज्वलानि च ॥ रुद्राण्यः

पूजयंत्येव तत्र लिंगायुतं नग ॥ तत्रांतरे महेशस्य मंडपानां चतुष्टयं ॥ ललामराजद्वृषभं मणिकुंभोज्वल
च्छ्रियं ॥ तत्र देव्या महादेवो विरहत्यवनिशिचतं ॥ ५७ ॥ ॥ स्कंद उवाच ॥ ॥ इत्थं नंदीशवाक्येन सं-
६२
तुष्टः प्राह भूधरः ॥ समुच्छ्रसत्पुलकः सास्रो धन्यंमन्ये दृशोर्द्वयं ॥ ५८ ॥ ॥ हिमवानुवाच ॥ ॥ कैला
समौलिवरलिंगसमुल्लधाम कांतोरुकुंभकलनेन नयामि जन्म ॥ अत्रैव वासमभिरोचयते मनो मे-
सत्यं ब्रवीमि गणपेंद्र नमो नमस्ते ॥ ५९ ॥ धन्ये मे नयने जनुश्च सफलं धन्यो गिरींद्रोप्ययं यस्यापारशि
खाश्रयो हि भगवान् लिंगाकृतिः शंकरः ॥ प्राकारेषु च गोपुरेषु विपिने रुद्रावतारः प्रभुश्चास्ते सोध-

वेरषु देवी तिलकः कस्तव्य वृंते गुणान् ॥५०॥ ॥इति श्री शिवरहस्ये भवाख्ये द्वितीयांशे त्रयोविंशोध्या-
यः॥२३॥ ॥श्री काशी विश्वेश्वरार्पणमस्तु॥ ॥नंदी उ०॥ ॥प्राच्यां पश्य नगश्रेष्ठ श्रेष्ठोयं धरणीधरः
॥निष्टप्त कनकाकारो मेनाना सुरवराश्रयः॥१॥ सहस्र शिखरापारः कांतिकांचितदिक्तटः॥ वृषस्तं-
भनिभो भाति कैलासाग्रेन गोत्तम॥२॥ पश्य तान्परितः धाकान्समुद्रान्सनदीनदान्॥ पश्य द्वीपान्म-
हाशैलान्समुद्रेषु विशेषतः॥ विपिनाय निजातानां प्रासादानां च मौलयः॥ प्रोच्छ्रपताका राजंति मणि
कुंभाग्र शोभिताः॥४॥ एष नीलस्तथा विंध्यो मंदरो दुर्दुरो नगः॥ सुमाली केतुमालश्च भद्राश्वो तत्र-
वार्षिको॥५॥ रैवतः शतशृंगश्च मणि बभ्रुश्च पिंगलः॥ उदयश्च कपालश्च मैनाकोय मधुर्गिरिः॥
॥६॥ अस्ताचलः पारियात्रः निषधो कंदलाचलः॥ तव मूर्ति रियं शैली मौलिके दारलिंगतः॥७॥
त्वमत्यंत महाशृंगैरुपेतोसि महानग॥ त्वत्तो मानुष गंगेयं निर्गता लिंग संगिता॥८॥ भगीरथस्य त
पसा पावयंती च भूतलं॥ अन्या विक्रमतो विष्णोः पादतो निर्गता नग॥९॥ गंगाद्वा मलती च्या-
ब्धिं संगता मालवा निभे॥ इयं गर्वभरा क्रांता ईशेन शशिमौलिना॥१०॥ जटाकोटी गनिलयां—

शि०पु० चक्रं सा च विनिःसर्जिता॥ देवैः संप्रार्थिता देवस्तां भूमौ परिमुक्तवान्॥११॥ आनंदकाननं प्राप्ता चक्रतीर्थं भवा सि० अ० २४

मरिंदम॥ ततोऽपश्य सुभगं विश्वेशशीर्ष खगं महत्॥१२॥ भास्ते भूमिसर्वस्वं खंडे वै जाह्नवीयतः॥अ-

विमुक्तं प्रपश्याथ मृता यत्र पुनर्भवाः॥१३॥ विमुक्तिं दास्यते देवः यत्र विश्वेश्वरः स्वयं॥ तत्पश्चात्साग-

रप्रान्ते कुरुक्षेत्रं प्रभासकं॥१४॥ रुद्रकोटिः पुष्करं च गंगाद्वारं पवित्रकं॥ पिंडारकं कालंजरं तापीतीरे

मनोहरं॥१५॥ यत्र पाशुपतो योगी मुनीनां चोपदेशतः॥ देवदेवेन तन्नैव पश्येत् क्षुणिकुंभकं॥१६॥ श्री-

शैलशिखरं पश्य पश्य त्र्यंबकभूधरं॥ क्षिप्रातीरे महाकालं कामदं वैद्यनाथकं॥१७॥ पश्चात्तथोत्त-

राश्चेमे कुरवः पश्य भूधरं॥ ताम्रस्वर्णमयी भूमिस्तत्र द्वीपवृतो दधौ॥१८॥ सौहि किंपुरुषास्तु स्वगा

ननाः॥ शिलानदीमिमां पश्य तत्प्रातेऽश्वकचक्रकाः॥१९॥ पुरुषाणां प्रवेशोऽत्र ताव देवनगोत्तम॥न-

रभूमिस्ततो द्वीपो शाकः क्रौंचेमनो रमौ॥२०॥ कुशश्वास्तौ ततः प्राच्यां क्षीरोदेनावृतो नग॥ देवभू

मिस्ततो रम्याद्ध्यो देपरिकल्पिता॥२१॥ चक्रवालोगिरिः प्राच्यां तत्प्राच्यामुदयाचलः॥प-

श्चादपि प्रपश्येमां भूमिं स्वादोदधौ वृतां॥२२॥ स्वर्णारं पश्य सुभगं वरुणावासमुत्तमं॥ शोणो नाम-

६३

६३

नदीवि प्रतीच्यां वहते नग ॥२३॥ रम्य सालवनं प्रांते गंधर्वाणां प्रमोदभः ॥ अस्ता चलावधिनगा तस्मा ते शाल्मलि द्विपः ॥२४॥ दक्षिणे भारतेवर्षे जंबुनाम नदी सदा ॥ प्रत्येव नियतं तस्या द्वीपं जांबून स्मृतं ॥२५॥ देवभोज्यं महच्छैल निष्ठ तं कनकं हि तत् ॥ प्रतिष्ठान पुरं पश्य करहट पुं तथा ॥२६॥ कावेरीपुरं चापि पश्य विंध्य निवासिनीं ॥ पश्य वेणुवनं पुण्यं नागनाथ शिवालयं ॥२७॥ ओंकारम नर्मदातीरे कुंडे चोंकारनामकं ॥ आवढक मिदं पश्य पश्येत द्धुस्रणेश्वरं ॥२८॥ नैमिषं पश्य विपुलं विशालां बदरीमत ॥ गोदां च नर्मदां चैव बाहुदां कृष्णवेणिकां ॥२९॥ नीरां पयोष्णीं पश्यांग नीरा आवलि भासुरां ॥ कालिंदी गंगया युक्ता यत्र वेदी प्रजापतेः ॥३०॥ प्रयागवन मेतद्धि चित्रकूट गिरिस्ततः ॥ शूलटंकालयं पश्य गयां च पितृ तृप्तिदां ॥३१॥ सोमेश्वरालयं शैल पश्यायोध्यं महापुरीं ॥ सुधेश्वरालयं पश्य सरयूतीर संगतं ॥३२॥ पश्चालोका मुखं पश्य गंगां पश्याब्धि संगतां ॥ कामोदकमिदं पश्य पश्य कोंकण भूतलं ॥३३॥ पश्चिमां भोधिकोणे च पश्य गोकर्णमुत्तमं ॥ रम्यं शेषाचलं पश्य स्कंदो यत्र प्रतिष्ठितः ॥३४॥ श्रीमद्दक्षिण कैलास शिखरं पश्य भूधरं ॥ पश्य कांचीं च विपुलां स्कान्न शिखरं नग ॥३५॥ पश्यारुण-

१७०

शिवरुद्रि शिखरं स्मरणात्पापनाशनं॥ वृत्धाचलाद्रि पश्याद्रे रम्यामभ्रसभांदृशा॥३६॥ पश्यनर्तनमीशस्य-
२ देवदेवस्य धूर्जटेः॥ गोपर्वतं तत्र पश्य पुण्यं मार्गसहायकं॥३७॥ सह्याद्रिं पश्य तुंगाद्रेयतो जाताकुवे-
रजा॥ पुण्यं श्रीकंठशिखरं ततो रत्नागिरीश्वरं॥३८॥ नृणज्योतीशशिखरं मातृभूताद्रिरषवै॥ तद्द-
क्षिणे द्वादशांतं ततो वेणुनगं नगा॥३९॥ महेंद्रशिखरं पश्य दक्षिणां भोनिधौ स्थितं॥ तांम्रपर्णी
तत्र नदी कृतमालाचवेगिनी॥ ४०॥ कन्यातीर्थं ततः प्राच्यां पश्य चाद्रे शुचीश्वरं॥ गंधमा-
दनशैलेश शिखरं पश्य भूधर॥४१॥ गजारण्यं ततो दीव्यां ततः पंचनदाह्वयं॥ कुंभेशशिखरं
६४ पश्य पश्य मध्यार्जुनाभिधं॥४२॥ त्रिकोटिमंगलं पश्य मायूरं श्वेतकाननं॥ संगतां सिंधुना- ६४
पश्य सह्यजां पुण्यनिम्नगां॥४३॥ वांछेश्वरं छायवनं पुण्यं तत्ते जिनीवनं॥ घटेश्वरं तत्र पश्य-
यत्र कालो हतः पुरा॥४४॥ श्रीमहेशानपुण्याद्रे मृकंडुतनयावने॥ ब्रह्मेशं चैव वैद्येशं तं जेशं
नम्रतीच्यके॥४५॥ कमलालयसंज्ञं च तथैवान्ये शिवालयाः॥ अतिकाननमीक्षस्व वेदतीर्थं तथा
ब्धिराट्॥४६॥ कावेरीतीरजोद्धासिलिंगधामानि लोकय॥ भारतं पश्य विपुलं खंडे तं लिंगमंडलं॥
॥४७॥

प्राक्पश्चाद्दक्षिणे चापि भूधरं द्वतयोत्तरे ॥ ब्रह्मांडभूमिस्तेषा त्रयखंडान्यपि विलोकय ॥ शिवान्नयामया शैलदर्शितोयं नगोत्तमः ॥ पुण्योयं रमणीयोयं कैलासः शंकरालयः ॥ ५० ॥ भद्राश्व केतुमालौ च प्राच्यामीक्ष्य मनसन्नग ॥ पश्चात्धरिश्च किं पूर्वः खंडे द्वे सागरावृतौ ॥ २० ॥ देवभूमिरियं पश्य सुरकिंनरहर्षदा ॥ तत्रोत्तरे मंदरोहि शंभोरानंदवासभूः ॥ ५१ ॥ ईलावर्तो मणीवर्षः भारतो दक्षिणे नग ॥ कल्पिता स्तेमहेशेन वर्षाश्च कुलपर्वताः ॥ ५२ ॥ ॥ नंदीश्वर उवाच ॥ ॥ इत्येषते समासेन कथितो विस्तरः क्रमात् ॥ श्रुत्वाध्यायमिमं पुण्यं कैलासे गणपो भवेत् ॥ ५३ ॥ तस्य तद्वचनं श्रुत्वा हृष्टरोमा महीधरः ॥ प्रोवाच नंदिनं वीक्ष्य जातहर्षो मुनीश्वराः ॥ ५४ ॥ ॥ नगेंद्र उवाच ॥ ॥ धन्यस्त्वं त्रिपुरारिपादकमलध्यानानुरागादरः ॥ किं तत्तुल्य गुणं वदामि वचसा को वेद शंभोर्गुणान् ॥ यास्त्रिं विविधांडकोटिघटने पांडित्यमप्पंततः वेदव्या विधयोपि वा हरिहरा जानंति नो वाप्यणु ॥ ५५ ॥ किं वक्तव्यममुमा सहाय चरणांभोज प्रभाभावतो-आनंदांबुधि मग्नसर्व हृदयो जानेन किंचित्प्रिय ॥ अत्र त्यामललिंग सौधकुलगं किं वा ममान्यत्प्रियं शंभोः पादपरागरंजितमनाः कालं नयामीक्षणात् ॥ ५६ ॥ त्वं नंदिगणपोत्तमोसि भगवन् क्षेमास्पदो

९७

शिवरूपमे सखा ॥ इत्युक्त्वा (कृत्वा) हिमवान् शिलादतनयं चानंदबाष्पाकुलो मेनाके न च मेनया शशिशिलागारस्थलिं- भवा०टी०
गोत्तमं कृत्वार्चादिभौर अपार विभवैस्तुष्टाव शंभुं तदा ॥५७॥ ॥स्कंद उवाच॥ ॥शंभौ निश्चलमा- अ०२४
नसोप्य घकुलश्रेष्ठो हिमाद्रीश्वरो भक्त्याराधितवान् सुबिल्वविपिनोद्भूतैः सुमस्तत्फलैः ॥ वर्षाणां दशकं
महेश्वरदयासारप्रभावादिकः ॥५८॥ ॥हिमवानुवाच॥ ॥शशिधरगंगाधर मावहराव्यय शंभो ग-
णनातीत गुणप्रकृष्टदेव ॥ तव लिंगसुपूजनान्मनो मे न कदान्यत्र गतीषु भावयामि ॥५९॥ ॥सूत उवाच॥
६५ तस्मै चापि वरं ददौ पशुपतिः भक्त्यैकनिष्ठायते कामान्पूरयितास्मि वैभव भवेत द्धाच्युतामत्सुरः ॥ इ- ६५
त्युक्तो गिरिराट् तदाह हर गिरं श्रुत्वाह भक्त्याभिवं देव्यास्ते भवने निवासमतुलं दूर्वा सवाक्यं शिवे ॥६०॥ ३
भक्तिं चापि शिवांघ्रिपंकजभवां संसारमुक्तिप्रदां ॥ ॥नंदिकेश उवाच॥ ॥धन्यः केदारलिंगोत्तमंमिलि-
तशिरामाश्रयस्त्वं मुनीनां त्वन्मो लोचमसतां तपः फलमहोदातुं प्रवृत्तो हरः ॥ किंचांबाजनको सुदारचरि-
तो वृद्धः कुलाद्रीश्वरः कस्तेतुल्यनगा यतो नागरो लिंगप्रतिष्ठाचैकः ॥६१॥ विमानवर्येण नगोद्भिष्टं तु
ष्टं प्रकृष्टशिवलिंगसमर्चनेन ॥ निनाय शंभोः सविधं गणेंद्रो हृष्टो गिरिस्त्विति उवाच प्रांजलिः ॥६२॥

इति श्रीशिवरहस्ये भवाख्ये द्वितीयांशे कैलासदर्शनं नाम चतुर्विंशोऽध्यायः ॥२४॥ श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥स्कंद उवाच॥ ॥ततो हिमाद्रिदेवेशं कैलासामलसौधगं॥ पार्वत्या सहितं शंभुं दिव्यसिंहासनस्थितं ॥१॥ चतुर्भुजमुदारांगं सर्वरत्नविभूषितं॥ किरीटकोटिगोद्भासि चंद्रार्धकृतशेखरं॥२॥ कुंडलाढ्यतकर्णाद्यत्कुंडलीफणिभूषितं॥ नवरत्नांगदलसत्कंकणांगदमुदितं॥३॥ सोमधामसमानास्यं तपनानललोचनं॥ धृतत्रिपुंड्ररचनातदधस्तिलकोज्वलं॥४॥ उत्फुल्लरक्तकमलरत्नमालाधरं विभुं॥ दिव्यचंदनलिप्तांगं दिव्यपुष्पार्चितांघ्रिकं॥५॥ धूपितं परितो धूपैः नागरागरुसंभवैः॥ शुद्धांबरधरं सौम्यं पर्यंतमनिशं शिवां॥६॥ मणिहर्म्याद्युविप्रोद्यद्दीप्तकैलासपर्वतं॥ वामांकसंनिविष्टां बावदनास्मितकांतिभिः॥७॥ धावल्यतरं निर्यद्धीदेवांगप्रभया ततं॥ नत्वाननां महादेवीं शिवांकस्थां महेश्वरीं॥८॥ भस्मत्रिपुंड्रनिटिलां कस्तूरीतिलकोज्वलां॥ बिंबाधरां प्रसन्नास्यां ललनां सागमौक्तिकां॥९॥ मुकुटोद्भासिचंद्रांकां कचबंधसुमल्लिकां॥ तपनोडुपबिंबाभभ्राजिताटंकयुगलश्रवां॥१०॥ मणिहीराद्युपदकलसद्ग्रीवामनोहरां॥ कनकांगदके-

शि०पा०२ पूरनागबंधविराजितां ॥११॥ कस्तूरीरसपाटीरचंद्रचंदनचर्चितां ॥ तांबूलपूरितमुखीं तिर्यङ्लोचन- भवानीदु
कोदितः ॥१२॥ पश्यंती वदनांभोजं शंभोः सुंदरमेदुरं ॥ सुरम्यपादकमलं मुक्तामंजीरशोभितं ॥१३॥ दे अ०५५
वीसखीभिश्च वृतं गणैश्च महेश्वरं ॥ मया च गणपेनापि धृतचामरवीजितं ॥१४॥ छत्रैः पताकाभिश्च
यथारिभिर्गणपुंगवैः ॥ जयंत्या विजया हस्तधृतचामरवीजिता ॥१५॥ मन्यछत्रावृतमुखी दंडिन्या
दर्शहस्तया ॥ बालया वीटिकामत्स्यपेटी विधृतया तदा ॥१६॥ भद्रिण्या खड्गकोशाय कर्या सेविता
शिवा ॥ तद्दहस्ते महाशूलं खड्गकोशं च दंडिना ॥१७॥ भैरवोद्भावितमहानिषंगवरकार्मुके ॥ काला-
ग्निरुद्रो मायूरव्यजनेनाप्यवीजयत ॥१८॥ एवं गणवृतं देवं देव्या सिंहासनस्थितं ॥ दृष्ट्वा प्रण
म्य नंदीशो गिरिं देवाय जिज्ञपत ॥१९॥ प्रवेश्य तामित्यवश्यं देवदेवो महेश्वरः ॥ प्रांजलिः स
त्वरं गत्वा ततो गिरिं हिमभूधरं ॥२०॥ दृष्ट्वा यांतं समेनाकं दत्तहस्तं च नंदिना ॥ गौरीगुरुं महाशैलं-
जातहर्षं तदानगं ॥२१॥ प्रवेशयच्च सविधं शंभोर्देव्याः गणाग्रणीः ॥ दृष्ट्वा देवं महादेवं सनगो
हर्षनिर्भरः ॥२२॥ प्रणम्य प्रांजलिर्विप्राः ममामातामहो द्रिराट् ॥ अगजापतिमाभास्यं तुष्टाव पुल-

६६ ६६

कांगक: ॥२३॥ ॥ हिमवानुवाच ॥ ॥ भवहर भगवन् पुरांतकारे प्रमथाधीश हरींद्र रुद्र पूज्य ॥ विबुधाधिप सर्वमंगलाधिनाथ हर गरकंधर सोमचंद्र चूड ॥२५॥ अहिवर वरहार शोभितांग अगपतिवासम होरु लिंगवास ॥ खगपतिवहनेत्र पूज्यपाद शंभो विधिमस्ताभरण प्रसीद देवदेव ॥२५॥ बलिबलमथन प्रमाथ शंभो गिरिजानाथ सनाथया शुभां ॥ मथनोद्भूत समुद्भूतोद्धत गरहारिन् प्रमथैकनाथ पाहि ॥२६॥ धृत गंगामलचंद्र सत्कपर्द निगमोत्तंस विशेष वाक्यतुष्ट ॥ भवभावहृदंतराय नाश गिरिकैलासनिवास पाहि शंभो ॥२७॥ गजमुख षण्मुख शंकरार्चित सुखकमल अमुख मौले ॥ शशिमुखिलोकन पंचमुखोद्धत लोचन लेखवरोत्तम पाहि ॥२८॥ अवशिव सदयं भवभवहृदयं कुरु कुरु करुणां शशिमौले ॥ वितर विमुक्तं परिहर बन्धं स्मरहर यमहर भगहर शंभो ॥२९॥ भवपदकमले विदिश सुभक्तिं तव लिंगार्चनतः प्रकृष्ट भावं ॥ तव पदकमलादरं च शंभो मम सन्मानसमेत दद्य चास्तु ॥३०॥ तव लिंगामललोचने स्तुनेत्रे तव पादप्रणतो शिरोपि मेच ॥ तव लिंगोत्तम पूजनाय हस्तौ तव लिंगालय प्रक्रमाय पादौ ॥३१॥ शशिधर

१५३

शिव र.२ धराहरस्य धराधरहर पुरहर शंकर गरधर शंभो ॥ जलधरवहन गधर शूलधराव्यय हरि भस्मारुण धरपाहि ॥३२॥ ॥ भवा.दि

॥सूत उवाच॥ ॥ ततस्तु त्या तोषितः शंभुः तमभ्यर्णे नगाधिपं ॥ स्तुहीत्यवोचत्कृपया स्वागते नाभ्यनंदयत् ॥३३॥ ॥ अ.२५

॥ईश्वर उवाच॥ ॥ दृष्टः कैलास शैलो मे त्वया नागवरोत्तम ॥ दृष्टानि शिवलिंगानि सर्व पापहराण्यपि ॥३४॥

कोट्यर्बुदानि लिंगानि गोपुराण्य नगोत्तम ॥ प्रासादवर सौधाश्च किं दृष्टा मंडपावलिः ॥३५॥

सरांसि रत्नकमल भ्राजिष्णूनि नगोत्तम ॥ रत्नानां गिरयोप्यद्द तन्मौलि मणि मंडपाः ॥३६॥ कै-

६७

लासेश्वरलिंगं मे दृष्टं मुक्तिप्रदायकं ॥ अंबिके शंसदं वायाः हृदयागारसंस्थितं ॥३७॥ गणानां

भवनान्यत्र किं दृष्टानि लयादिप ॥ महावनानि पुष्पोघसुरभीणि समंततः ॥३८॥ सहस्रलिंगधा

मोघत्कलशालीसपुण्यदा ॥ क्रीडारत्न महासौधपंक्ती दृष्टा त्वयानघ ॥३९॥ रम्यं बिल्ववनं दृष्ट-

६७

मोणलिंगोरुमूलकं ॥ पुण्याश्चात्र सभा दृष्टा सेयं मे नर्त्तनस्थली ॥ सहस्रायुतलक्षोघत्कोटिस्तंभो

रुमंडपाः ॥ त्वया दृष्टा नगश्रेष्ठ सागरा मेरुपर्वताः ॥४१॥ शैलप्राकार राजश्री गोपुरालि वृषावली ॥

दृष्टं भुवनगोलं ते शिवक्षेत्राण्यपि क्रमात् ॥४२॥ धन्यस्त्वं नगमूर्धन्य धन्यः कैलासदर्शकः ॥

कैलास दर्शने नाद्य सफला ते जनुर्नग ॥५३॥ विष्णुब्रह्मा दयो देवास्तथान्ये मुनयो गणाः॥ कैलास दर्श नार्थाय तप्स्यं त्यथापि ते तपः॥५४॥ किं मम वानुग्रहेणैव कैलासस्या स्व दर्शनं॥ महादानैश्च विविधैः षोडशैश्च नगोत्तम॥५५॥ मम कैलास भवन दर्शनं नैव जायते॥ अष्टांगयोगैर्विविधैः यमादिनियमासनैः॥ मम कै कैलासभवन॰॥५७॥ गवां कोटिप्रदानेन अश्वमातंगकोटिभिः॥ मम कैलासभ॰॥५८॥ धनधान्य मणीनां च वस्त्राभरण दानतः॥ मम कैलास भवन॰॥५९॥ तीर्थप्रक्रमकन्यान्नदानैश्च गृहदानतः॥ मम कैलासभ॰॥५९॥ तीर्थप्रक्रमकन्यान्न दानैश्च गृहदानतः॥ मम कैलास भवन दर्शनं ने॰॥६०॥ पानीय दीप धूपादि दाने नापि तपस्विषु॥ मम कैलास भवन दर्शनं नैव जायते॥६१॥ वेदवेदांतवादेश्च वर्णाश्रमरतात्मनां॥ मम कैलास भ॰॥६२॥ किंतु प्रसादेन मम भक्त्या चैवाप्यनन्यया॥ लभ्यते दर्शनं शैल मम कैलास मौलिगं॥६३॥ अनन्य भावः सततं भस्म पुंड्रोज्वलो निशं॥ रुद्राक्षहारवलयः पंचाक्षर परायणः॥६४॥ रुद्रलिंगार्चन परो रुद्राध्याय जपादरः॥ शिवक्षेत्रै—

कवृत्तिः तेन लभ्योयमद्रिराट् ॥५५॥ किमुक्ते नापि बहुना लभ्योयं मदनुग्रहात् ॥ नदेवा नैवगं-
धर्वा ब्रह्म विष्णु महेश्वराः ॥५६॥ मनसाते रचिंत्योयं कैलासो मम भूधरः ॥ ॥ईश्वर उवाच॥ ॥
मद्भक्तया जगति प्रचंड सुरताभ्याताडने पंडिताः शृंकताशनादितस्तया चंडांशु पुत्रार्पहाः ॥
॥५७॥ चंडीशः पितरं निनाय चयमं श्वेतो विजिग्येंतकं मार्कंडेयदधीचि गौतम मुखाः विष्णु-
यमं चेंद्रमप्पा जोते जयशालिनो मम महालिंगार्चनादेवते ॥५८॥ ॥इति श्री शिवरहस्ये भवा
ख्ये द्वितीयांशे शिवबाक्यं नाम पंचविंशोध्यायः ॥२५॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥
॥स्कंद उवाच॥ ॥नंदी विज्ञापयामास श्रुत्वा शंभोः वचस्तदा ॥ प्रणम्य विनयोपेतः प्रांजलिः
करुणानिधिं ॥१॥ ॥नंदी उवाच ॥ धन्यो मान्योयमचलः दयये शतदामलः ॥ ब्रह्म विष्ण्वा-
दिभिर्देवैः नैवतो गिरिरीक्षितः ॥२॥ नतपोभिरप्राप्य कैलासो नगसत्तमः ॥ त्वत्कृपा
सावलनैः नगो नेत्रातिथिकृतः ॥३॥ तवप्रमोदरस भूधरणो भूदयं शिव ॥ दर्शनेनाद्य
विवशः कैलास धरणीभृतः ॥४॥ तवापार महाधाम्नि कैलासवासमो तिके ॥ अनेन पर्वते—

द्रेणविहितोत्र शिवालयः ॥५॥ शशिधाम शिलाक्लृप्तः प्राकारवरगोपुरः ॥ हिमाचलेश्वरं नाम
लिंगं प्रातिष्ठि पन्नगः ॥६॥ पंचामृत निधीकैश्च चंदनै र्बिल्वपूजनैः ॥ धूपदीपैश्च नैवेद्यैः तांबू-
लध्वज चामरैः ॥७॥ वाद्य संघार वैश्चैव मेनया पूजयन्नगः ॥ मेनाकेन च लिंगं ते स्वमौलि
शशिधामजं ॥८॥ तेन स्तुतिं महादेव तत्स्तुतिं शृणु शंकर ॥ ॥नंदी उवाच॥ ॥उमासहा
य उरुगाय भवादि भावपापाद्रिहाय गुणरूपविहीनकाय ॥ दग्धांधक त्रिपुरमन्मथकाय
शंभो नमामि मन यादि जनता सुचमो चयाव ॥१०॥ नंदितत् स्तुतिं श्रुत्वा संतुष्टो नितरां हरः ॥
तमभ्युवाच हृष्टात्मा स्वालिंगार्चनतः शिवः ॥११॥ लिंगप्रतिष्ठया तुष्टो अष्टमूर्तिरुवाच तं ॥
॥ईश्वर उवाच॥ ॥धन्यस्त्वं मम कैलासे मल्लिंगालयकल्पकः ॥ प्रतिष्ठितं येन लिंगं-
तेन सर्वमनुष्ठितं ॥१२॥ तेन यागाः कृताः सम्यक् दक्षिणान्नादिभिस्सदा ॥ तपांसि तेन तप्ता-
नि कृच्छ्र चांद्रायणादिभिः ॥१३॥ त्रैलोक्यं तेन भूपृष्ठे भूधरेश प्रतिष्ठितं ॥ वने पुरे वा ग्रा-
मे वा पर्वते वा सरित्तटे ॥१४॥ गंगातीरे कोटिगुणं ततो कोटिगुणं नग ॥ किं पुनर्मम कैलासे—

विष्णुब्रह्मादि दुर्लभे ॥१५॥ धन्यस्त्वं मम हृत्पद्मसद्म गोस्मिन गोत्तम ॥ तवादेयं किमस्त्यत्र त्वमेवाहं न संशयः ॥१६॥
त्वमेवा चमूर्तिर्मे यतो लिंगवपुराश्रयः ॥ केदारेश्वरलिंगं ते यतस्त्वन्मौलिसंस्थितं ॥१७॥ तल्लिंगदर्शनादेव मुक्तिसाम्राज्य-
मस्तुते ॥ देवैश्च मुनिभिश्चैव गणेंद्रैरपि भूधर ॥१८॥ तव मौलौ तपस्तप्तं केदारेश्वरपूजकैः ॥ तपस्थानं महोत्कृष्टं तव मौ-
लिनगोत्तम ॥१९॥ धन्यस्त्वं सर्वमान्योसि त्वत्तो जातेयमंबिका ॥ ममैषा परमा मूर्तिरियं शक्तिः सदा मम ॥२०॥ यस्याः कटा-
क्षलेशेन जगदेतच्चराचरं ॥ यस्याः पदांबुजद्वंद्वदर्शनेन सुरासुराः ॥२१॥ निवृत्ताः परमां मुक्तिं लभंते मत्प्रसादतः ॥ मावि
चारय शैलेंद्र वरं मत्तोभिकांक्षय ॥२२॥ प्रसन्नोस्मि नगश्रेष्ठ मम लिंगप्रतिष्ठया ॥ कैलासमौलौ शैलेंद्र मुक्तोसि मम पूज-
या ॥२३॥ हिमवाच्छंकराच्छ्रुत्वा वचनं चातिहर्षितः ॥ मौलौ करांजलिं कृत्वा प्रणम्य परमेश्वरं ॥२४॥ प्राहानंदाश्रुधा
रोद्यत्पुलकांगो महीधरः ॥ ॥हिमवानुवाच॥ ॥किमन्यैर्नवरैर्णेश यतो दृष्टं पदांबुजं ॥२५॥ तवाद्य देवदेवस्य ध-
न्योस्मि नगसंचके ॥ तपसा मेन शक्यं ते कैलासस्यास्य दर्शनं ॥२६॥ लिंगसौधाश्च विविधाः मौलिकुंभपताककाः ॥ दृष्ट-
ह्यनेन सुदृशा कैलासेशोपि वीक्षितः ॥२७॥ अंबिकेशो मया दृष्टः देवीशोपि स्तुतो मया ॥ स्कंदेशश्च गणेशश्च मयैक्षि-
कुमुदेश्वरः ॥२८॥ सभाश्चापि मया दृष्टाः गोपुराण्यपि ते विभो ॥ प्राकाराः परिघाकाराः सागराश्च तथाद्भुताः ॥२९॥ ॥

मंडपावलिसंघैश्च मम नेत्री तिथिः कृता ॥ किंमुक्त्या मम देवेश देव्या दर्शनतो मम ॥३०॥ तव पादांबुज द्वंद्वभक्तिरस्तु ममाचला ॥ अचलस्यापि मेवैतत् अचलं मे मनस्त्वयि ॥३१॥ देव्याः प्रसादतो मेना पश्यंतीं तव हृन्नगं ॥ विस्मयानंद हृदया मेनाकोप्ययमीश्वर ॥३२॥ देव्याश्चिरं सहावासात्तव कैलास पर्वते ॥ देवीपदांबुज द्वंद्वं किंचित्कालं मयि प्रभो ॥३३॥ मौलौ मेदध तामद्य मम देवी प्रसादतः ॥ त्वत्प्रसादात्सनाथं मां कुर्वंती परमेश्वरी ॥३४॥ केदारेशं महालिंगं मम मौलिस्थितं शिव ॥ समर्चयतु देवी यं किंचित्कालं सदोषिता ॥३५॥ मेनयारमता मीशा लोकया त्रेय मोदृशी ॥ दूर्वासापि महायोगी तपस्तप्यति दारुणं ॥३६॥ मुनिभिः शैववर्यैश्च भस्मरुद्राक्ष भूषणः ॥ भस्मशायी रुद्रजापी केदारेशार्चनेरतः ॥३७॥ त्रिकालं बिल्वपत्रैश्च तव भक्त्या प्यनन्यधीः ॥ अनुगृण्हीष्वत मनु मम मौलिकृतास्पदं ॥३८॥ इत्युक्तो गिरिशेनेदं गिरिशो भक्तवत्सलः ॥ प्राह देवीं महादेवः वीक्ष्यतं हिमभूधरं ॥३९॥ ॥श्री शिव उवाच ॥ ॥एष प्रार्थयते शैलः तवागमनमुत्तमं ॥ स्वमौलि धाम लिंगं च केदारेशं च वीक्षितुं ॥४०॥ मदाज्ञयैव दूर्वासास्तपस्तप्यति तत्रहि ॥ धन्यं कुरु नगश्रेष्ठं मेनां कामीश्वरी ॥४१॥ मैनाकमीश्वरी ॥४२॥ गच्छ लग्ने शुभे देवि विमाने नार्करोचिषा ॥ गणेशैश्च नगेशैश्च सेवितानगसद्म तत् ॥४२॥ दूर्वासस-

९७८

मुनिवरं अनुगृह्यार्चयेश्वरं ॥ केदारेशं तथापि तु वरं मौलिसमाश्रयं ॥ ४३ ॥ विगाह्य तत्र गंगां च त्वत्पितुर्मौलिगां सुखं ॥
विरहं स्वाप्य देवेशि मेनया पूजिता शिवे ॥ ४४ ॥ एकांशेन वसात्रैव मम पार्श्वे सनातनि ॥ विचित्र शक्ते देवेशि त्वं पि-
तुर्हर्षदायिनि ॥ ४५ ॥ किंचित्कालं विहृत्येशि पुनरागच्छ सत्तमे ॥ इत्युक्ता श्रीमहेशेन प्राह भूधरकन्यका ॥ ४६ ॥
॥ देव्युवाच ॥ ॥ मनोरथो यमतुलो मम मेना सुहर्षदः ॥ पश्यामि शिखरं देव पितुर्मम सुरेश्वर ॥ ४७ ॥ केदारलिंगपू-
जां च कुर्वेहं भक्तिभाविता ॥ दूर्वासा तव भक्तोयं किमर्थं तप्तवान् तपः ॥ ४८ ॥ तदाचक्ष्व महादेव श्रवणे कौतुकं

मम ॥ दयया भगवन्ब्रूहि मम तत्तपसो विधिः ॥ ४९ ॥ ॥ स्कंद उवाच ॥ ॥ इत्यंबावचनेन सुंदरगिरा प्रोवाच वि-
श्वेश्वरः ॥ देवीं वीक्ष्य मुदा तदा गिरिवरं दृष्ट्वा गणेंद्रानपि ॥ ५० ॥ मां चैवाथ गजाननं प्रकटया दूर्वाससस्तत्तपः ॥ स्वस्या

शाकरणे निविश्य विनुतो देवीं बभाषे प्रभुः ॥ ५१ ॥ ॥ इति श्रीशिवरहस्ये भवाख्ये द्वितीयांशे षड्विंशोध्यायः ॥ २६ ॥
॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ ईश्वर उवाच ॥ ॥ कथमाकलय त्वं पर्णे दूर्वासात्र पुरा मुनिः ॥ तेन तप्तं तपो
घोरं वर्षाणामयुतं शिवे ॥ वर्षमेकं निराहारः वर्षमात्रावकाशकः ॥ वर्षं तु जलमध्यस्थो जपन् रुद्रमनन्यधीः ॥ १ ॥
पर्णाशी वर्षमेकं तु वर्षं गंधवहाशनः ॥ वर्षं धूमाशनो देवि पंचाग्निपरिमध्यगः ॥ सदा चानिमिषः सूर्यमंडलस्थ-

विलोकिमां ॥ एकहस्तेन गां बिभ्रन्नूर्ध्वपादस्थितो मुनिः ॥४॥ पंचाक्षरपरो देवि पंचास्यध्यानतत्परः ॥ जटालीबिशि-
रोऽस्थैर्न्यग्रोधइववर्षकं ॥५॥ पादावालंध्य वृक्षाग्रे मुनिर्लंबदधशिराः ॥ वर्षमेकं महादेवि भस्मच्छन्नस्त्रिपुं-
ड्रधृक् ॥६॥ सुरमित्रासनकरं विष्णुब्रह्मादिभिः सुरैः ॥ मुनिभिर्जैणपैश्चैव तदशक्यं तपो बिके ॥७॥ दूर्वाससा
यथा तप्तं तथा केनापि नो बिके ॥ एवं संतप्यमानोयं सदा मल्लिंगपूजकः ॥८॥ सर्वावस्थास्वपि मुनिः बिल्वपत्रै-
र्विराजितैः ॥ तस्यासन्बहवः शिष्याः मुनयो वीतरागिणः ॥९॥ भस्मत्रिपुंड्ररुद्राक्षधारिणश्चर्मवाससः ॥ सर्वे-
लिंगार्चनपराः गुरुशुश्रूषणेरताः ॥१०॥ तं शुश्रूषंति नियताः सदा दूर्वाससं मुनिं ॥ तत्कालोचितसेवाभिर्नि-
यमात्तोषयंति तं ॥११॥ एवं तपस्यतस्तस्य शतशृंगमहीधरे ॥ नानाद्रुमलताकीर्णे नानापक्षिमृगायुते ॥१२॥ तप
श्शिवशरणे तस्मिन् रम्यपार शिवालये ॥ तत्राहमगमं देवि त्वत्प्रसादाय केवलं ॥१३॥ आरुह्य चैकं वृषभं गणसंघनि
षेवितं ॥ तं दृष्ट्वा विस्मयोपेतः तत्र तं मुनिपुंगवं ॥१४॥ वृतं सहस्रशिष्यैश्च स्वसमानैर्महैरैः ॥ अवोचं परया प्री-
त्या तदा दूर्वाससं मुनिं ॥१५॥ ॥ ईश्वर उवाच ॥ ॥ दूर्वासास्त्वं तपोराशिर्वाराशिरिव धैर्यधृक् ॥ अर्कप्यो भू-
मिधृक् तुल्यः यशोधन तपोधनः ॥१६॥ सदावाताशिपर्णाशि सलिलाश्यनिलाशकः ॥ तव द्रष्टुं तपो घोरमागतो-

शिवरह॰२ सि वरं वृणु ॥१७॥ तावन्निमीलिताक्षस्सो विषमाक्षमवैक्षिच ॥ त्र्यक्ष संदर्शनानंद संजात पुलको मुनिः ॥१८॥ अ- भवानंदि
या लुलोके स्वदृशा सदृशं भास्कराधिकं ॥ वृषस्थं गणपैर्युक्तं मां तुष्ठावाष्ट पद्यकैः ॥१९॥ वेदांत सार सर्वस्वैः तत्स्तु अ॰२७
तिं श्रुणु शैलजे ॥ ॥ईश्वर उवाच ॥ ॥ इलामिलन्मौलिरथेंदुमौलिं माया निशा निद्रित जीवितेंद्रं ॥ विद्रावि-
चिन्मुद्रकराग्र मुद्रं व्यालेंद्रमालांगर नीलकंठ ॥ मा फालकालं मुनिरालुलोके ॥२०॥ ॥ दूर्वास उवाच ॥ ॥ स्वधामा-
क्षि प्रेषु भृंग इव सुभी मोद हरगं स्व धूमो ज्योति स्त्वं महिमगत अग्च श्च भगवन ॥ अथाहं त्वा मुग्र स्थिर करणका
येनवचसा नुमस्तु मो त्वमेस्त नुगत मथैनो निवपन ॥२१॥ मानो महांत मुत मानो अर्भकं मान उक्षंत मुत मान उक्षितं ॥
७१ मानोवधी स्तनयं तं सुतं मेगावश्चाश्वान्ह विषा त्वांय जामः ॥२२॥ शंभो स्मदीय विबुधे षु दुराचरेषु पापेषु निष्कृति- ७१
मतोप्य विनाशकेषु ॥ एकोहि धात्रि चतुरे ष्वपि पंचकेषु त्वं शूर भूरि षु वधीः करुणा र्द्र दृष्ट्या ॥२३॥ अंतर्येनम
जीत मूढ मतयो ध्यानं मनीषा ततं रुद्रं त्र्यंबकाखिल सितं श्रीकंठमीशं सदा ॥ लिंगे कोमल बिल्व पल्लव जलैः
नार्चंतिये जिव्हयाल दुक्ता मल शेष भुक्ति रहिताः गृण्हंति तेवै मलं ॥२४॥ देवं लिंगवरे सदा स्थित महो बिल्वै-
र्दलैः कोमलैः नीरैर्वापि मसु क्रिया सुभगवन सोमस्य वाग ल्हैया ॥ भूर्णित्वा सवने षु क्रोधि तवपुः भीमं मृगेंद्रो पमंया-

चेदेवसदाशिवमघुस्या माचुक्रुधः शंकर॥२५॥ कस्त्वां दैवतमार्व भौमरहितं या चेद्यईशानकं॥ आभिस्त्वां भगवन्सदैवचनमेभिर्गीर्भिश्चरुद्रोद्यतैः॥ नक्तं चापि दिवा महेश पितरं मंद्रं बृहंतं मृधं मृष्वत्वामजरं सुषुम्नामपि वैरुद्राण्यया संयुतं॥२६॥ राजच्चंद्रकलाधरं त्रिभुवनस्येशानमिंदुप्रभं त्वद्भक्ताः कवयो हवेम सततं त्वल्लिंगपूजादराः॥ त्वं शंभु प्रमतिः पिता मि हितकृत् बंधुस्त्वमेवासि मे त्वं माता परमोव्ययस्कृदपि मे त्वज्जामयो वावयं त्वां देवं च भजाम शंकर विभो त्वद्भक्तिरूधा मम स्मैः॥२७॥ दुर्वासा स्तवमेतदेवकलितं चित्ते कृतो दुर्वसः॥ क्रोधो नाम भविष्यति शम्भजनात्तवैश्रियो वांछिताः॥ उद्यच्चामरछत्रपंक्तिविलसन्मत्तेभकुंभस्थिताः राजद्वृंदिगणस्तुतो मधुरया वाचा सदास्ते सुखी॥ २८॥ ईश्वर उवाच॥ तुष्टस्तस्मया भस्त्या तं ब्रुवंतं मुनिं शिवे॥ कामान्वृणु तपोराशे सर्वांल्लभ्यान यथेप्सितः॥२९॥ इति तद्वचनं श्रुत्वा स दुर्वासा महातपाः॥ प्रोवाच नित्यतां तस्य मत्कैलासागमस्तथा॥३०॥ सर्वलोकेषु नियतं वासः सर्वत्र पूजने॥ अमोघत्वं क्रोधहर्षाभिः शापान्नैव तपः क्षयं॥३१॥ इत्थं यया चे स मुनिः तत्सर्वं दत्तवानहं॥ कृदत्वास्य वमन्कामान्तेन संपूजितस्तदा॥३२॥ तस्मादपक्रमे शैलात् शतशृंगात्तदा क्षणात्॥ कैलासमभ्यं प्राप्तः शंकरेणामुना शिवे॥३३॥ गायता शंकरं सामनंदिना विश्वनंदिना॥ गणेनैवं तेनाय सामोरेवतगायुना॥३४॥

४७८

शिव०र०२ मं तुष्टोसि प्रसन्नास्य कैलासेश्वर पूजकः॥ निशामुखे प्रदोषे मे प्रदोषे तत्र शंकरि॥३५॥ संपूज्य देव कैलासादीभिन्नं लिंगमेव वा॥ पूजांते स मुनि दृष्टः दुर्वासायं सशिष्यकः॥ कैलास लिंगं नत्वा मां प्रतिष्टाप्यात्र लिंगकं॥ स्वनाम्ना मम कैलासे दुर्वासेश्वरनामकं॥३७॥ लिंगं तद्धि कदेशानात् पश्चिमे दिव्यधामानं॥ नित्यं त्रिकालमभ्यर्च मां विध्यति गच्छति॥३८॥ तत्र तत्र सदा देवि तस्मिन्कैलासपर्वते॥ तस्मै प्रीत्या मया दत्त बिल्व पुस्कर संयुता॥३९॥ कैलास लिंगमौलीनः प्रीत्या तस्य मुनेः करे॥ तां गृह्यि त्वा मुनिर्माल्यं नेत्रे शिरसि चार्पयत्॥४०॥ प्रसादं च मया दत्तं निर्माल्यं निर्मलायिह॥ शांकमाय मया दत्तः त्वं न्ये पादे विदुर्लभः॥४१॥ मनः प्रसादं संप्राप्य निर्गतो मम भूधरात्॥ अदत्तातेन विप्रेण दृष्टो मार्गे सुरेश्वरः॥४२॥ देवैः परिवृतश्चेंद्रः कुलिशो घ्वलको युवा॥ शच्याप्यनुगतः शक्रः छत्र चामर शोभितः॥४३॥ नृत्यद्भिरप्सरः संघैः परीतो याति दैवतैः॥ शारदाभ्रघन प्रख्यं गजमभ्रमुवल्लभं॥ चतुर्दंतं महाकायं आरुह्य पुरतो मुने॥ ययौ देवेश्वरस्तत्र तस्मै मालां मुना तदा॥४५॥ सोप्यखर्व महा गर्वे दुर्वासं बुधिमध्यगः॥ अगणय्य मुनिं तां च मालां मेध्य प्रसादितां॥४६॥ अंकुशाग्रेण जग्राह मत्तवारणकुंभगः॥ दुर्वासदत्तां तां मालां पातयामास हेलया॥४७॥ कुंभे कुंभिपतेस्तस्य ययौ मंदं शतकृतुः॥ मदांधितः सकरटैः शुंडाग्रेणाग्र-

भवानीदु० अ०२७

७२

७२

ह्रीतदा ॥४८॥ स्वकट्टेताडयामास कुंभाग्रे कर्णयोस्तदा ॥ तं तादृशं सदृ ष्ट्वैव कांटंकिरिटिस्थितं ॥४९॥ चुक्रोधक्रो-
धभोगेण अशपत्तं मुनिस्तदा ॥ शतमन्युं मन्युनास महामन्युप्रसादभाक् ॥ ॥दूर्वासा उवाच ॥ ॥क्रोधिगर्वो ममा-
धीश देवीशंभुप्रसाधितां ॥ मालां मौलौ गजस्याध्य पातयस्य च दुर्मते ॥५१॥ विनष्टभ्रष्टराज्यांगः निश्रीकस्त्वं
भविष्यसि ॥ अयमैरावतः क्षिप्रं दानवैश्च प्रपीडितः ॥५२॥ त्वया दुःखं महत्तीव्रं प्राप्तव्यं सुरसत्तम ॥ तवानुया
यिनो देवाः गुरुस्त्वद्क्रोधदायकः ॥५३॥ मदोनुयातः सगणः दुःखं प्राप्नोतु शाश्वतं ॥ इत्युक्तं तद्वचः श्रुत्वा सगुरुः
सशतक्रतुः ॥५४॥ अवरुह्य गजात्क्षिप्रं नत्वा च मुनिपादयोः ॥ श्लाघ्या च गुरुणा देवैः सदूर्वासाः प्रसादितः ॥५५॥
॥इंद्र उवाच ॥ ॥ क्षमापराधं मे ध्याशु विमोक्षं वद सत्तम ॥ तवापराधं केनेत तद्ज्ञायते मुनिसत्तम ॥५६॥ शिवदत्त
महामाला लंघनेनाद्य दुर्मतिः ॥ मदांधेन मया क्रीर चेष्टितं तव कोपकृत् ॥५७॥ इत्युक्तो बहुदांतेन सदूर्वासा
महाप्रभः ॥ उवाच तं गुरुं चापि मातेबुद्धिस्तदा मः ॥५८॥ शिवमाया गृहीतस्य देवराज्येन दुर्मते ॥ मामप्रणम्य
चाग्राहीन्मम वाक्नानृता भवेत् ॥५९॥ वसत्व ममवैर्युक्तः तपसाभ्यर्चयन्हरं ॥ अदुःखं देवशरदां हि माद्रो देव
नायक ॥६०॥ ततः प्राप्स्यसि राज्यं ते असुरैर्हृतमोजसा ॥ इत्युक्त्वा निर्गतो देवि दूर्वासाः क्रोधमूर्छितः ॥६१॥

शिव र.२ इंद्रो हि मोद्रिं संप्राप्य हृतराज्ये सुदैत्यपैः ॥ बलिना पालितं देवि विष्टपं सुष्टु तत्ततः ॥६२॥ तता पदे वै गुरुणाश्र- भवा.द्वि.

च्यात्रिदशनायकः ॥ त्रपाकृष्ट भ्रमक्रांतकेदारे शं समर्चयन् ॥६३॥ केदारमस्तु वन्मत्तया पुनः प्रापामरावतीं ॥ दूर्वा अ.२७

सोपि महायोगी शांभवः कल्मषैर्युतः ॥६४॥ पुनस्तताप शरदांशतमानेन पार्वति ॥ अशैवायमया दत्तं निर्माल्यं शंकर

स्य हि ॥६५॥ इति तद्दोष शांत्यर्थं तप्यते परमं तपः ॥ हिमाद्रिमौलौ देवेशि स दूर्वासा महामुनिः ॥६६॥ स च मद्दर्शना

देव निर्मुक्ताः संभविष्यति ॥ यस्ते मदीयं कैलासं आगतास महामुनेः ॥६७॥ तस्मान्मदीय निर्माल्यं निर्मलेनैव

चेतसा ॥ निर्मलैः शांभवैरेव ग्राह्यमन्यैर्न चांबिके ॥६८॥ मद्भक्तं चंदनं पुष्पं अन्नं भक्ष्यं फलादिकं ॥ मद्भक्तैरेव

७३ तद्ग्राह्यं देयं तेषां न चान्यतः ॥६९॥ मर्यादा च कृता देवि मन्निर्माल्यस्य भक्षणे ॥ धारणे शांभवा एव पात्रं निर्माल्य ७३

दर्शने ॥७०॥ अशांभवे यथा दत्वा परितप्तो महामुनिः ॥ मम प्रियोपि दुर्वासाः तथान्यः सत्यमुच्यते ॥७१॥ तस्मान्नि

र्माल्य मीशानि शांभवायैव दापयेत् ॥ तमनुग्राह्य देवेशि त्वत्पितुः शिखरे स्थितं ॥७२॥ याहि तत्र विमानेन एकां

शेनात्र संशयः ॥ श्रुत्वाज्ञां विपुलां प्रगृह्य नगजा दुर्वाससस्तां कथां श्रुत्वा मोदितदंतुराश्रुपुलका पित्रा गणेंद्रैरपि ॥

स्कंदेनापि मया गजवक्त्रस्येनापि संतोषतः ॥ यानायाशु तदा गणवरैर्देवी सखीनां गणैः ॥ उक्त्वा भवदीश्वरेश्व-

रतादेवी मुदा स्वांशतो कृत्वा चान्यत्र पुस्त दानगवरेदेवांक संस्था शिवा ॥७४॥ ॥इति श्रीशिवरहस्ये भवाख्ये द्वितीयांशे दुर्वासस्तपश्चर्यावर्णनंनामसप्तविंशोध्यायः॥२७॥ श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥जैगीषव्य उवाच॥
कथं कैलासदनान्निर्गता जगदंबिका॥ दुर्वाससा स्तुता देवी कथं देवानुमोदिता॥१॥ कियंतं कालमवसत्कथं देवी परा शिवा॥ कथं सा पूजिता देवी हिमशैलेन मेनया॥२॥ केदारेश्वर पूजापि कथं देव्या सुरांगनाः॥ अशेषसंगताश्चैव तारकारेवदाध्व तत॥३॥ पुरारिप्रेमसदनं नगपौत्र नगात्मक॥ ॥सूत उवाच॥ ॥इत्थं पृष्टः स मुनिना स्कंदो वाच मुनीनाणान॥ देव्या हिमाद्रिगमनं शृणुष्वं तेन कीर्तितं॥४॥ ॥स्कंद उवाच॥ जैगीषव्य जितक्रोधकामारातिपदार्चक॥ अनाख्येयं त्वयि मुनौ नास्ति किंचिन्ममाधुना॥५॥ ततो बहुतिथे काले यातेस परमेश्वरः॥ देव्या विहारशयने भोगजालैरनेकशः॥६॥ देव्या संप्रार्थिता देवो हिमाद्रिगमनं प्रति॥ देवी उवाच॥ नगराजोयमधुना मेनया सह शंकर॥७॥ मां प्रार्थयति केदारं द्रष्टुं लिंगं तव प्रभो॥ दुर्वासापि महायोगी तव भक्तो जितेंद्रियः॥८॥ तपसा कर्षिततनुः तव पादाब्ज पूजकः॥ अनुगृह्य मुनिं लिंगं केदारं पूज्य भाविता॥९॥ मेनया भूधरेणाथ पूजिता तं नगोत्तमे॥ विपिनाव निमीशान गंगां तत्रा ब्जिनीमपि॥१०॥ विगाह्य सखिभिः स्वैरं दृष्ट्वा तन्मो-

१४०

तिभासुरं ॥ कैलासमागमिष्यामि यद्या ज्ञातवशंकर ॥११॥ ॥सूत उवाच॥ ॥ इत्यंबावचनं श्रुत्व प्राह देवो द्रि- भवानीं द्रु-
जासखः ॥ किं चिन्म्लानमुखां भोजो देवी माह महेश्वरः ॥१२॥ ॥श्रीईश्वर उवाच॥ ॥श्वः प्रभाते महादेवि गछ
त्वं नग मौलि ततः ॥ विहगाध्व मया सार्धं कैलास मणि सद्मनि ॥१३॥ सृजस्व शक्तिं देवेशि तव देहान्ममांकगां ॥
इत्युक्त्वा देव देवेन सा देवी गिरिजा तदा ॥१४॥ मनसोन्मन्यशक्तिं तां निर्माय परमेश्वरी ॥ राजत्कं मल्लपुष्पा-
ढ्यां उद्यदिंदु समाननां ॥१५॥ नीलोत्पलदल प्रख्य नयन द्वयशोभितां ॥ बिंबाधरां गंधफलीनासालंबितमौ-
क्तिकां ॥१६॥ रत्नग्रैवेयमालाढ्यां फुल्लहल्लक धारिणीं ॥ क्वनद्गुलाछ्रताटंकां चंद्रार्धमकुटोज्वलां ॥१७॥
तिलकांकित तत्फालां अलकाक्त पदद्वयां ॥ रत्नांगदभुजां देवीं रत्नकांचिलसत्कटिं ॥१८॥ रत्नांगुलीयविलस
त्करशाखाग्र पल्लवां ॥ पादांबुजरणद्रत्न शृंखलानूपरान्वितां ॥१९॥ ~~दिव्यांबरावृतां तत्र दिव्य चंदन चर्चितां ॥२०॥~~
दिव्यांबरावृतां तत्र दिव्य चंदन चर्चितां ॥ रक्तकुंकुमवर्णां तां तां बूलास्यां सुमध्यमां ॥२०॥ मनोन्मनी सा स
सृजे मनसा सा महेश्वरी ॥ मनोन्मन्या तया देवी तस्मिन्कैलास पर्वते ॥२१॥ मनोन्मनीश्वरं लिंगं दिव्य प्रासाद मध्य-
गं ॥ प्रतिष्ठाप्यार्चयामास पंचामृत निषेचनैः ॥२२॥ गंधैर्धूपैश्च वासोभिः दीपैर्बिल्वैश्च पंकजैः ॥ नैवेद्यैश्चैव-

१४/

तांबूलैः मणिनीराजनोत्सवैः ॥२३॥ सापि तुष्टाव तल्लिंगं देव्याश्चिच्छक्तिरीश्वरी ॥ ॥मनोन्मनी उवाच॥ ॥
वाचामगोचरमनसोपि मनोन्मनीश देवेश द्योतकमनोसुगणस्यकाश ॥ त्वं व्योमकेश दयया शशिधाममौले पाहि द्रि
यादिरहित प्रणव प्रकाश ॥ बालार्धगात्र रमणीय जटोरुगंगा तुंगोत्तमांग शशिधाम ललाम शंभो ॥२६॥ विश्वेश विश्व
मदनांतकर प्रसीद कैलासवासिन् निखिलागमतत्वसार ॥ एवं संस्तुत्य तल्लिंगं तया देव्या शिवा तदा ॥२७॥ पूजया
देवदेवस्य तां प्रीता मकरोच्छिवे ॥ तामानिनाय देवस्य संनिधिं परमेश्वरी ॥२८॥ प्रणामं शंभुपादाब्जे तया देव्या
तदाकरत् ॥ तद्दर्शने सुधासारस्मेरास्यं प्राह शंकरं ॥२९॥ ॥देव्युवाच ॥ ॥मयैवोत्पादिता शक्तिस्त
ववांक संस्थिता ॥ मनोन्मनीयमतुला अनया विरहेश्वर ॥३०॥ यत्र कुत्रापि त्वत्क्षेत्रे भूलोके वामरालये ॥ तव लिं
ग समीपस्था तत्प्रीत्यै भवतां भव ॥३१॥ अस्मिन्कैलाससदने अनया स्थापितं तव ॥ मनोन्मनीश्वरं लिंगं
तस्मिन्सन्निहितो भव ॥३२॥ यावदागमने मेध तव पादांबुजादरा ॥ विहाराहारशयने त्वयैषाद्यानुगृह्यतां ॥
॥३३॥ तव मोदाय देवेश मनसेयं विनिर्मिता ॥ इत्यं बाववचनानंदसंदोहपुलकांगकः ॥३४॥ दृष्ट्वा मनोन्म-
नीं शक्तिं तल्लिंगं स्थापितं तया ॥ प्रहर्षजातसौहार्दां तां गाढं परिषस्वजे ॥३५॥ देवीं स्वांके संनिवेश्य तयास—

बुभुजे श्वरः ॥ रत्नपात्रेषु संक्लृप्तं अन्नजातं चतुर्विधं ॥३६॥ दिव्याभरणवासोभिर्धूपैर्दीपैस्तथांबिकां ॥ सुस्नातां-
समलंकृत्य प्राहनंदिनमीश्वरः ॥३७॥ ॥श्रीईश्वर उवाच ॥ ॥देव्यानया गणेंद्रैश्च नगेंद्रेण महामुना ॥ मेनया
गणपेन त्वं स्कंदेन च सखो गणैः ॥३८॥ विमानेनार्कवर्णेन मणि सिंहासनशोभिना ॥ गच्छ त्वं द्रुत मवाप्य शिवयोर्हि
मभूधरं ॥३९॥ देव्यायथोदितां पूजां तत्र तत्र प्रकल्पय ॥ नग्नां निनंश्र मोवास्याः सूर्यचंद्रकरैः शिवां ॥४०॥ भक्ष्यैर्भो
ज्यैश्च विविधैः गंधपुष्पैर्मनोहरैः ॥ हिमाचलं समैनाकं मेनामेनां गणोत्तम ॥४१॥ गणेश्वरान्सखी जालं स्कंदविघ्ने
श्वरौ सुतौ ॥ संपूजय यथा जोषं पथि श्रांतिविवर्जितान् ॥४२॥ परिष्कृतं रत्नजालैः विमानं कल्पयाद्यरात् ॥ देव्याहि
मोद्र गमने शीघ्रं त्वं संविधीयतां ॥४३॥ इत्याज्ञां सिरसा शंभोः प्रगृह्य स शिलादजः ॥ नानाकक्षान्वितं रत्नपर्यं
तं वरदोहकं ॥४४॥ मुक्ता वितानवितंत रत्नद्वारशतावृतं ॥ मणिहंसमहासिंहपिक संघविनादितं ॥४५॥ क्रीडा
मयूररचितं पताकावृंदशोभितं ॥ मणिजालांकितं दिव्यं उध्यत्कलश भासुरं ॥४६॥ घंटानादितदिक्चक्रं पुष्पदा
मोपशोभितं ॥ मणन्वेणुमहावीणा शंखदुंदुभिघोषितं ॥४७॥ रुद्रावतारक्रीडादि रचितं चारुशिल्पकैः ॥ भक्ष्य
भोज्यान्नपात्रैश्च सुगंधामोद मोदितं ॥४८॥ धूपितं वरधूपैश्च नानामणिगणान्वितं ॥ दिव्यसिंहासनोपेतं पताका—

छत्रचामरैः ॥४९॥ शोभितं रत्नमंचैश्च शय्यागृहविभूषितं ॥ सुरम्यमुकुरोद्दामं तलपंक्तिविराजितं ॥५०॥ सोपधानकुथोपेतं कक्ष्याशतविचित्रितं ॥ कैलासशिखराकारं विमानं सार्वगामिकं ॥५१॥ रुद्राणी गीतया युक्तं वीणादिध्वनिशोभितं ॥ तद्देवायतदानंदो विमानं दर्शयत्क्षणात् ॥५२॥ देवो दृष्ट्वा गणे नाममद्रिजामाह शंकरः ॥

॥ श्रीईश्वर उवाच ॥

॥ सिद्धं विमानं देवेशि तव गंतुमुपस्थितं ॥५३॥ दिव्यो मुहूर्तसमयः समारोहद्रुतं शिवे ॥ मैनाके नगिरीशेन मेनया स्वसखीजनैः ॥५४॥ तवानुयात्राः सर्वेयस्कंदहेरंबकासुताः ॥ नंदीश्वरो वीरभद्रो तंडुभृंगीरिटिस्तव ॥५५॥ सेवां कुर्वंति देवेशि त्वदीया नावशाः सदा ॥ विश्रम्य पथि देवेशि गच्छ शनंदरसैर्युता ॥५६॥ इत्युक्ता सा शिवादेशं प्रहृष्टहृदया शिवा ॥ श्रुत्वा नत्वा महादेवं सा गाढं परिषस्वजे ॥५७॥ किंचिदानंदजाश्रूणि मुंचती सा शिवाननं ॥ वीक्ष्य त्रिलोचनानंदजाश्रुणि परिमार्जनी ॥५८॥ वासांचलेन तामाह संस्थितां च मनोन्मनीं ॥

॥ देव्युवाच ॥

॥ शिवाज्ञाकारिणी भद्रे शयनासनचेष्टितैः ॥५९॥ कामांगनाशनापारी च त्वमगानुवर्तिनी ॥ विहरस्व यथा जोषं यावदागमनं मम ॥६०॥ इत्याज्ञाप्य तदा देवी पुरः संस्थां मनोन्मनीं ॥ सा प्रमुण म्य शिवापादौ तया मूर्ध्न्युपाजिघ्रिता ॥६१॥ शिवेनानुगता देवी काश्चित्कक्ष्या-

४१२

शिवरूपविकायुता ॥ प्रतस्थेसा तदा देवी सखीगणनिषेविता ॥६२॥ छत्रैः पताकैर्व्यजनैः चामराणां च पंक्तिभिः ॥ भूषणैर्वरताम्बूलवासस्त्रग्गंधधारिणः ॥६३॥ तामन्वयुर्महादेवीं गणा नंदादयस्तदा ॥ प्रोत्सारितमहाकक्ष्यगणानां वेत्रधारिणां ॥६४॥ विकिरंति महादेव्याः पुष्पाणि पुरतो गणाः ॥ मृदंगमुरजापारशंखदुंदुभिनिस्वनैः ॥६५॥ नृत्यंति रुद्रकन्याश्च देव्यास्ताः संनिधौ मुदा ॥ कैलासशिखरे हाम प्रासादवरमौलिगाः ॥६६॥ विकिरंति महादेवीं लाजैः सुमनसां गणैः ॥ जयेति प्रसभं वाचो मुमुचुस्ते गणोत्तमाः ॥६७॥ तामालिंग्य महादेवी मनुया तां मनोन्मनीं ॥ देवपार्श्वे द्रुतं गच्छ त्यशात्तां मेनयानुगा ॥६८॥ विमानवरमारुह्य सिंहासनवराश्रिता ॥ मेनया भूधरेशेन मेनाकेन सखीगणैः ॥६९॥ स्कंदेनागणपेन शिनंद्यादिगणपैस्तदा ॥ जयेति पूजिता वाग्भिः संतोषाकुलमानसा ॥७०॥ रुद्राणी करजोदारवीणाक्वणनसुंदरैः ॥ शिवनामामृतरसं पिबंती श्रोत्रसंपदा ॥७१॥ नयनानंददं देवी पश्यंती स्वसखीजनैः ॥ वीजिता व्यजनैश्चित्रैः चामरैः सखिभिस्तदा ॥७२॥ पूजिता भक्ष्यभोज्यैश्च पेयैर्धूपैश्च धूपिता ॥ मेनया विहरंती सा ययौ मंदं हिमालयं ॥७३॥ पश्यंती दिव्यसौधानां मालाः प्रोच्चलताककाः ॥ कैलासलिंगधामानि प्राद्यलकुमानि सा शिवा ॥७४॥ ध्यायंती शिवपादाब्जविहारा हारचेष्टितं ॥ ६ ॥

भवा. द्वि. अ. २९

७६

स्मरंती स्वचरित्राणि शिवस्य परमात्मनः ॥७५॥ सर्वान्गणेंद्रानपितरं स्कंदं ह्रेरंबकावपि ॥ निवेश्य बाह्यकक्ष्यायां विमानस्यार्करोचिषः ॥७६॥ शिवनैवेद्य भक्ष्यान्नै स्तर्पयत शंकरी ॥ स्रग्गंधाभरणै रुच्चैः रुद्राणीवरनर्तनैः ॥७७॥ समाययौ सापितरं नगेंद्रं पार्वती तदा ॥ यावत्कैलासशिखरं दर्शितानंदितां तम ॥७८॥ अपक्ष्मपक्ष्मपातेन पश्यंती भर्तुरालयं ॥ प्रणम्य तद्विमानाग्रं देवदेवस्य शूलिनं ॥७९॥ तावद्ददर्शसादूरात् केदारेश शिवालयं ॥ ज्वलत्कुंभपताकाग्रवरगोपुरमुद्धरं ॥८०॥ तत्र प्रणम्य सा देवी दूराद्दे क्षत्हिमाचलं ॥ तद्योहिमाचलेंद्रेण पार्वतीया गणोत्तमाः ॥८१॥ प्रेषिताः श्रीमहेशान्या सद्यालंकर्तुमुद्यताः ॥ स्वमौलिमपि केदारं रम्यचारुशिवालयं ॥८२॥ शिक्ताः गंधांबुभिर्मार्गाः फलितास्तत्र तेनगाः ॥ नगोर्ध्वं शिखरोद्भासि फलपुष्पालिशोभिता ॥ दीपावली विरचितरत्नतोरणपंक्तयः ॥ प्रोद्यद्रंभाफलभरपुष्पैश्चैवावलीभिः ॥८४॥ द्वारेषु परिकृत्याश्च मणिकंभाः सुपल्लवाः ॥ रंगवल्ली विरचितास्वमौलिवरशृंगके ॥८५॥ केदारेशालयं तस्य दिव्य धूपाभिराजितं ॥ प्रोद्यत्पताकाबहुलं बिल्वमंदारपूजितं ॥८६॥ लिंगं तच्चंदनालिप्तं फणीफणविभूषितं ॥ देवांगनासमायाता विष्णुब्रह्मादयः सुराः ॥८७॥ गंधर्वा मुनयः सिद्धाश्चारणाश्चाप्सरोगणाः ॥ स्तुवंति च महादेवीं नृत्यंत्यप्सरसः पुरः ॥८८॥ गायंति गीतं गंधर्वा—

१८३

देवान् जेपु मुनीश्वराः ॥ एवं नानाविधैर्घोषैर्युक्ता सा परमेश्वरी ॥ ८९ ॥ स्वपितुश्चारुशिखरप्रासादवरमासदत् ॥ देवैस्तु ता-
गणेंद्रैश्च पित्रमात्रानुमोदिता ॥ ९० ॥ तत्राविशत्पितुर्वेश्म विमानादवरुह्य सा ॥ मात्रदत्तवरा देवी दिव्यसिंहासनाश्रिता ॥
॥ ९१ ॥ विहाय हारशय्याभिः पूजिता परमेश्वरी ॥ उवास हिमशैले सा स्वपितुर्भवने मुदा ॥ ९२ ॥ मणिदीपजपंक्तिभिः
तदानीराजितांबिका ॥ वासोभिरत्नपुष्पैश्च गिरींद्रेणार्चिता शिवा ॥ ९३ ॥ विसृज्य स्कंदहेरंबौ नंदिकेशादिकान्ग-
णान् ॥ यातेस्य शाङ्कणान्देवी कैलासं शंकरालयं ॥ ९४ ॥ प्रणम्य तं महादेवीं स्कंदनंद्यादयो गणाः ॥ ययुस्तदा से कै-
लासं विमानेनार्करोचिषा ॥ ९५ ॥ देवी सखीभिः सहिता विजहार पितुर्गृहे ॥ रम्यक्रीडाविनोदैश्च मात्रापित्रा च पू-
जिता ॥ ९६ ॥ गत्वा ते प्रमथाधीशा नत्वा देवं महेश्वरं ॥ व्यजिज्ञपुस्ते वृत्तांतं देव्यागमनसंभ्रमं ॥ ९७ ॥ हिमाचल-
निवेशं च देवानां दर्शनं गणाः ॥ शिवो वृत्तांतमखिलं श्रुत्वा देवः पिनाकधृक् ॥ ९८ ॥ विजहार स कैलासे चिंतयन्स्त्रीश-
वागमं ॥ मनोन्मन्या महादेवः कैलासवरसौधगः ॥ ९९ ॥ चिक्रीड सरसालापैर्विहारशयनासनैः ॥ यस्त्विमां हिमनगो-
त्तमकथां श्रुत्वा महेशाश्रयां ॥ देव्याश्चागमनं हिमाचलकुले कन्यापि विंदेत्पतिं ॥ सौभाग्यं धनमक्षयं क्षितितलेप्य-
क्षांघ्रिपद्मार्चकः कष्टेभ्योपि विमुक्त एव सततं तुष्टः सदा बंधुभिः मोदन्नेव सुपुत्रपौत्रविभवैरंते गणेंद्रो भवेत् ॥ १०२ ॥

॥इति श्रीशिवरहस्ये भवाख्ये द्वितीयांशे हिमाचलगमनंनाम अष्टाविंशोध्यायः॥२८॥ श्रीकाशीविश्वेश्वरार्पणमस्तु॥
॥गणा ऊचुः॥ ॥कथं देव्या महायोगी दूर्वासाः सप्रसादभाक्॥ कथं तेन स्तुता देवी तत्स्कंद वदनोधुना॥१॥ तत्स्तुति-
श्रवणादेव सर्वेषामघनाशनं॥ तामकारे भवत्येव सर्वेषां शृणु तांवद॥ ॥स्कंद उवाच॥ ॥कदाचित्सा महादेवी स्व
पितुर्मौलिमोक्षती॥ गिरिवृक्षे सुमवृते सरोवरमृगैर्युते॥ नानापक्षिरुतापारगायिगंधर्वकिंनरे॥ गिरिः शिखरधा
राभिः आपगाविनतास्तदा॥४॥ मेनया विहरंती सा तस्यापश्यत चाश्रमं॥ तपस्यद्भिर्मुनिवरैः भस्मोद्धूलितविग्रहैः
॥५॥ धृतत्रिपुंड्ररुद्राक्षरुद्राध्यायजपादरैः॥ पंचाक्षरजपासक्तैः पंचास्यध्यानतत्परैः॥६॥ रुद्रलिंगार्चकै
र्भक्त्या बिल्वैः पुष्पैस्सदैव हि॥ केदारन्यस्तमनसैः दामदाराविवर्जितैः॥७॥ कृसीकटनिविष्टैश्च तापसैरुपशोभितं॥
ध्यायद्भिर्मनसा सांबं केदारेशं तपस्विनः॥८॥ फलमूलांबुपर्णाशाः पवनाशास्तथापरे॥ कट धूमाशिनाः केचिन्न
ग्नाश्चर्मैकवाससः॥९॥ हृत्पुंडरीके ध्यात्वैवं पुंडरीकाजिनांबराः॥ तत्र तस्मिन्ध्रमे हीनाः आश्रमे विद्युदा
कृतिं॥१०॥ निरीक्ष्य देवीं दूर्वासाः स्वतपः फलमंबिकां॥ एहीति मातरिति तां प्रणनाम तदा मुनिः॥११॥ दिव्या
सनं दिशत्तस्यै समेनायै मुनीश्वरः॥ विस्मितैर्मुनिसंघैश्च मधुपर्कैरपूजयत्॥१२॥ पुष्पैर्गंधैस्तथा धूपैः फल-

शिव.र.२ मूलैर्महेश्वरीं ॥ प्रीतिदत्तं मुनिश्रेन देवी तच्छ्रा गृहीत्तदा ॥१३॥ तेन स्तुता महादेवी सिद्धासनवराश्रिता ॥ १४ ॥ ≡ भवा.द्वि. अ.२९

॥ मुनिरुवाच ॥ ॥ धन्योहं पावनो हं च त्वद्दर्शन मुमेमम ॥ तपः फलं च फलितं काले नाद्य ममांबिके ॥ त्वत्सादपंकजरजः प्राप्त येमत्तपः फलं ॥१५॥ किं मुक्त्या ममदेवेशि यत्वं भक्तेष्ट सिद्धिद ॥ पराशक्ति र्महामाया ब्रह्मादि जननी शिवा ॥१६॥ महादेव महादेह वरवामार्ध भागिनी ॥ तुष्टाव प्रवणो भूत्वा तां शिवां समुनि स्तदा ॥१७॥ ॥ दूर्वासा उवाच ॥

॥ श्री मातस्त्रिपुरे परात्परतरे देवि त्रिलोकी महासौंदर्यार्णव मंथनोद्भव सुधा प्राचुर्य वर्णोज्वलं ॥ उद्यद्भानुसहस्र नूतन जपा पुष्प प्रभं ते वपुः स्वांते मे स्फुरतु त्रिलोक निलयं ज्योतिर्मयं वाङ्मयं ॥१॥१८॥ आदिक्षांत समस्त वर्ण सुमणि प्रोते वितान प्रभे ब्रह्मादि प्रतिमाभिकीलित षडाधाराब्जक क्षोन्नते ॥ ब्रह्मांडाब्ज महासने जननि ते मूर्तिं भजे चिन्मयीं सौषुम्नायत पीत पंकज महामध्य त्रिकोण स्थितां ॥२॥ वंदे वाग्भवमैंद्व वात्म सदृशं वेदादि विद्यागिरो ॥ भाषादेश समुद्भवा पशुमता छंदांसि सत्वस्वयन ॥ तालान्यं च महाध्वनीन्प्रकटयत्यात्म प्रप्रसारेण यत्तद्बीजं पदवाक्य मान जनकं श्री मातृके ते परं ॥३॥ त्रैलोक्य स्फुट मंत्र तंत्र महिमां नाप्नोति शश्वत्तु बिना तद्बीजं व्यवहार जाल मखिलं नास्त्येव मातः स्तव ॥ तज्जाप स्मरण प्रसक्त सुमतिः सर्वज्ञतां प्राप्य कः शब्द ब्रह्मनिवासभूत—

वदनोनेंद्रादिभिः स्पर्धते ॥४॥ मात्रा यत्र वियाजितेति विशदा तामष्टधामातृकां शक्तिं कुंडलिनीं चतुर्विधतनुं यस्त्वविन्मन्वते ॥ सो विद्याखिलजन्मकर्मदुरितारण्यप्रबोधाग्निनां भस्मीकृत्य विकल्पजालमखिलं मातः पदं त्वद्व्रजेत् ॥५॥ यत्ते मध्यमबीजमंबकलया प्युदिव्यवर्णं क्रियाज्ञानेच्छादिमनंतशक्तिविभवव्यक्तिं व्यनक्ति स्फुटं ॥ उत्पत्तिस्थितिकल्पकल्पिततनुं स्वात्मप्रसारेण यत् ॥ काम्यं ब्रह्महरीश्वरादिविबुधैः कामक्रियायोजितैः ॥६॥ कामान्कारणतां गतानगणितान्कार्यैरनेकैर्महीमुख्यैः सर्वमनोगतानधिगतान्मानैरनेकैः स्फुटं ॥ कामक्रोधसुलोभमोहमदमात्सर्यादिषट्कं चयत् ॥ बीजं भ्राजयति प्रणौमि तदहं ते साध कामेश्वरि ॥७॥ यद्वत्त्याखिलकामपूरणचणं स्वालम्प्रभावं महाजाड्यध्वांतनिवारणैकतरणी ज्योतिर्विबोधप्रदं ॥ यद्वेदेषु च गीयते श्रुतिमुखं मात्रात्रयेणोमिति श्रीविद्ये तव सर्वराजवशकृत् तत्कामराजं भजे ॥८॥ यत्ते देवि तृतीयबीजमनलज्वालावलीसंनिभं सर्वाधारतुरीयबीजपरमं ब्रह्माभिधाशब्दितं ॥ मूर्धन्यांतविसर्गभूषितमहोंकारात्मकं तत्परं संविद्रूपमनन्यतुल्यमहिमं स्वांते मम द्योततां ॥९॥ अगुप्ता गुप्तायाः स्वयमपि महांतो पि लघवः सकोलानिः कौलागुरुभिरपि दिष्टा अपि तव ॥ प्रसन्ना यां देवि तव सकलमंत्रार्थफलदा तरोर्मूले शिक्ते फलति-

१५७

शिव स्त० खलु शाखाशततमी ॥१०॥ सर्वं सर्वत एव सर्वविषये कार्येन्द्रियाण्यन्तरां तत्तद्विव्यवहारैककर्मभिरिदं सर्व्यस्तनु-भवान्द्रि
नानापरा ॥ वागर्थव्यवहारकारणतनुः शक्तिर्जगद्व्यापिनी यद्बीजात्मकतां गता तव शिवे तं नौमि बीजं परं ॥११॥ अ० २९
अन्नोदुघुमोणप्रभंजनधरानोमंतरस्थायिनी शक्तिर्ब्रह्महरीशवासवमुखामर्त्यासुराल्मस्थिता ॥ सृष्टस्थावरजंग
मास्थितमहाचैतन्यरूपा च यात्ययद्बीजस्मरणेन सैव भवती प्रादुर्भवत्यंबिके ॥१२॥ स्वात्मश्रीविजिताजविष्णु
मघवन्ध्रीपूरुषैकव्रतं सोवृध्याकविताविताललहरीकल्लोलिनीदीपकं ॥ बीजं यत्रिगुणप्रवृत्तिजनकं ब्रह्मे
ति यद्योगिनः शांता नित्यमुपासते तदिह ते चित्ते दधे श्रीपरे ॥१३॥ एकैकं तवमातृके परतरं संयोगिवायोगिवा वि
द्यादिप्रकटप्रभावजनकं जाड्यांधकारापहं ॥ यन्निष्ठाश्च महोत्सलासनमहाविष्णुप्रहर्तादयो देवास्तेषु विधि
ष्वनन्यमोहमास्फूर्तिं दधे तेपि तत ॥ ब्रह्मायोनिरमासुरेश्वरसुहल्लेखामियुक्तैस्तथा मार्त्तेंदुमनोभवाभवसुधो
मायाभिरुद्राश्रितैः ॥ सामां बुक्षांति शक्तिभिः प्रकटितैर्बाणागवेद क्रमैर्वर्णैः श्रीशिवदेशिकेन विदितां विद्यां तवा
वाश्रये ॥१४॥ इत्थं त्रीण्यपि मूलवाग्भवमहाश्रीकामराजस्फुरच्छक्तयानि च तुःश्रुतिप्रकटितान्युक्तकूट-
नि ते ॥ भूतत्तुश्रुतिसंख्यवर्णविदितान्यारक्तकांते शिवे ॥ यो जानाति सर्वं जगतां सृष्टिस्थितिध्वंसकृत ॥१६॥

नित्यं यस्तव मातृकाक्षरसखीं सौभाग्यविद्यां जपेत् संपूज्याखिलचक्रराजनिलयां सायन्तनाग्निप्रभां ॥ कामा-
ख्यं शिवनामतत्वमुभयं व्याप्यात्मना सर्वतो दीव्यन्तीमिह तस्य सिद्धिरचिरात्स्यात्तत्स्वरूपैक्यता ॥ २६ ॥ काव्यैर्वा
पठितैः किमल्पविदुषैर्घोघुष्यमाणैः पुनः किं तैर्व्याकरणैः किंबोधिततया किं वाभिधानश्रिया ॥ एते स्वनबोभ
वीति सुकविस्तावत्तव श्रीमतोर्यावन्नानुसरेत्सरीति सरणिं पादाब्जयोः पावनीं ॥ २७ ॥ गेहं नाकति गर्वितः प्रणम
ति स्त्रीसंगमो मोक्षति द्वेषी मित्रति पातकं सुकृतति क्ष्मावल्लभो दासति ॥ मृत्युर्वैद्यति दूषणं सुगुणति त्वत्पा
दसंसेवनात् ॥ त्वां वंदे भवभीतिभंजनकरीं गौरीं गिरिशप्रियां ॥ २८ ॥ आद्येरग्निरवींदुबिंबनिलयैः अंबत्रि-
लिंगात्मभिः मिश्रारक्तसितप्रभैः रनुपमैः युष्मत्पदैस्तैस्त्रिभिः ॥ स्वात्मोत्पादितकाललोकनिगमावस्था
मरादित्रयैः रुद्भूतं त्रिपुरेति नाम कलयेद्यस्ते स धन्यो भवेत् ॥ २९ ॥ आद्यो जाप्यतमार्थवाचकतया रूढः
स्वरः पंचमः सर्वोत्कृष्टतमार्थवाचकतया वर्णः पवर्गात्मकः ॥ वक्त्रत्वेन महाविभूतिसरणिस्त्वाधारगोहृद्गतो ॥
भ्रूमध्ये स्थित इत्यतः प्रणवतां ते गीयते बागमैः ॥ ३० ॥ गायत्री सशिरा तुरीयसहिता संध्या त्रयी त्वागमैराख्याता
त्रिपुरे त्वमेव महतां शर्मप्रदा कर्मणां ॥ तत्तद्दर्शनमुख्यशक्तिरपि च त्वं कर्म ब्रह्मेश्वरी कर्त्ताहं पुरुषो हरिश्च सविता—

बुद्धेः शिवस्त्वं गुरुः ॥ अन्नप्राणमनःप्रबोधपरमानंदैः शिरःपक्षयुक्पुच्छात्मप्रकटैर्महोपनिषदां वाक्यैः प्रसिद्धीकृतैः ॥ कोशैः पंचभिरेभिरेव भवतो मे तत्प्रलीनामिति ज्योतिःप्रज्वलदुज्ज्वलात्मचपलां यो वेद सब्रह्मवित् ॥ २३ ॥ सच्चित्तत्वमसीतिवाक्यविदितेरध्यात्मविद्याशिवे ब्रह्मास्त्यैरतुलप्रभावजनकैस्तत्तैस्त्रिभिस्सत्कुरोः ॥ लब्ध्वा पुरस्य मुखारविंदकुहरात्संप्राप्य दीक्षामतो यस्त्वां विंदति तत्वतस्तद्दहमित्यार्यैः समुक्तो भवेत् ॥ २४ ॥ सिद्धान्तैर्बहुभिः प्रमाणगणितैः अन्यैरविद्यातमो नक्षत्रैरिव सर्वमंधतमसं तावन्न निर्भिद्यते ॥ यावन्नेसविनेव संततमिदं नोदेति विश्वांतरं जंतोर्जन्मनिवारणे कोभिदुरं श्रीशांभवि श्रीशिवे ॥ २५ ॥ आत्मासौ सकलेंद्रियाश्रयमतोबुध्यादिभिः शोचितः कर्माबद्धतनुर्जनिं-

वमरणं प्राप्नोति यत्कारणात् ॥ यत्ते देवि महाविलासलहरी विद्यायुधानां जयस्तस्मात्त्वां गुरुमभ्युपेत्य कलये त्वामेव चेन्मुच्यते ॥ २६ ॥ नानायोनिसहस्रसंभववशाज्जाता जनन्यः कति प्रख्याता जनकाः कियंत इति मे सेत्स्यंति चाग्रे कति ॥ एतेषां गणनैव नास्ति महतः संसारवारांनिधेः भीतं मां नितरामनन्यशरणं रक्षानुकंपानिधे ॥ २७ ॥ देहक्षोभकरैर्व्रतैर्बहुविधैर्ध्यानैश्च होमैर्जपैः संतानैर्हयमेधमुख्यसुमखैः नानाविधैः कर्मभिः ॥ यत्संकल्पविकल्पजालमलिनं प्राप्तं पदं तस्य ते दूरादेव निवर्त्तते परतरं मातः पदं निर्मलं ॥ २८ ॥ पंचाशन्निजदेहजाक्षरभवैर्नाना-

विधैर्धातुभिः बह्वर्थैः पदवाक्यमानजनकैः अर्थाविनाभावितैः ॥ सोमिप्रायवदर्थकर्मफलदैः ख्यातैरनंतैरिदं ॥
विश्वं व्याप्य चिदात्मना हमहमित्युज्जृंभसे मातृके ॥ २८ ॥ श्रीचक्रं श्रुतिमूलकोश इति ते संसारचक्रात्मकं विख्यातं
तदधिष्ठिताक्षरशिवज्योतिर्मयं सर्वतः ॥ एतन्मंत्रमयात्मिकाभिररुणं श्रीसुंदरीभिर्वृतं मध्ये बैंदवसिंहपीठ
ललिते त्वं ब्रह्मविद्ये शिवे ॥ २९ ॥ आताम्रार्कसहस्रदीप्ति सुषुमासौंदर्यसारैरलं लोकातीतमहोदयैरुपचितैः
सर्वोपमागोचरैः ॥ नानारत्नविभूषणैः रमणि ते जाज्वल्यमानाभितस्त्वन्मातस्त्रिपुरारिसुंदरि कुरु स्वांते निवासं
मम ॥ ३० ॥ बिंदुप्राणविसर्गजीवसहितं बिंदुत्रिजीवात्मकं षट्कूटं ह्रीं निपर्यया निगदिता तावत्त्रिबालाबला ॥
एभिः संपुटितं प्रजप्य विहरेत्प्रासादमंत्रं परं उद्ध्यात्तमं स्योगजनितं सद्भोगमोक्षप्रदं ॥ ३१ ॥ त्रिंजन्मपुष्पादकंकण
महामुद्रासुलाक्षारसालंकारां कितमंघ्रिपंकजयुगं श्रीपादुकालंकृतं ॥ उद्भास्वन्नखचंद्रखंडरुचिरं राजज्ज
पासंनिभं ब्रह्मादित्रिदृशासुरार्चितामदं मोर्ध्नि स्मरामंबिके ॥ ३२ ॥ आरक्तच्छविनातिमार्दवयुजा निश्वाससहा
र्येणयत्कौशेये नविचित्ररत्नघटितैर्मुक्ताफलैरुज्ज्वलैः ॥ कूजत्कांचनकिंकिणीभिरभितः सन्नद्धकांचीगुणैः ॥
अदीप्तं सुनितंबबिंबमरुणं ते भावयाम्यंबिके ॥ ३३ ॥ कस्तूरीघनसारकुंकुमरजोगंधोत्कटैश्चंदनै राद्वीतमणि—

मालया विरचितग्रैवेयहारादिभिः ॥३४॥ दोर्दंडद्व्यविभूषणे जननि ते ज्योतिर्विभास्वल्लुचव्याजस्वर्णघटद्वयं हरिहर-
ब्रह्मादिपीतं भजे ॥३५॥ मुक्तारत्नसुवर्णकांतिललितास्ते बाहुवल्लीरहं केयूरोत्तमबाहुदंडवलयैर्हस्तांगुलीभूषणैः ॥
संपृक्ताः कलयामि हारमणिमन्मुक्ताकलापीकृतं ग्रीवापीठविभूषणं नसुभगं कंठं च कंबुश्रियं ॥३६॥ उद्यत्पूर्णकलानि-
धीशवदनं भक्तप्रसन्नं सदा संफुल्लांबुजपत्रकांति सुमाधिकारदक्षेक्षणं ॥ सानंदं कृतमंदहासमसकृत्स्वादुर्भ-
वे कौतुकं कुंदाकारसुदंतपंक्तिरुचिरं पूर्णस्मरास्यं विके ॥३७॥ तप्तस्वर्णकृतोरुकुंडलयुगं माणिक्यमुक्तोल्लस-
द्धीरावद्धमनन्यतुल्यमपरं हेमंच चक्रद्वयं ॥ शुक्राकारनिकारदक्षममलं मुक्ताफलं सुंदरं बिभ्रत्कर्णयुगं भजा-
मि ललितं नासाग्रभागं शिवे ॥३८॥ जातीचंपककुंदकेसरमहागंधोद्धुरत्केतकीनीपाशोकशिरीषमुख्यकुसुमप्रोत्तं-
भिता धूपिता ॥ आनीलांजननीलमत्तमधुपश्रेणी च वेणी तव श्रीमातः श्रयतां मदीयहृदयांभोजे सरोजालये ॥३९॥
लेखालभ्यविचित्ररत्नघटितं हैमं किरीटोत्तमं मुक्ताकांचनकिंकिणीगणमहाहारप्रबंधोज्ज्वलं ॥ चंचच्चंद्रकला-
कलापललितं देवद्रुपुष्पार्चितं माल्यैर्[illegible]विलंबितं सुशिखरं बिभ्रच्छिरस्ते भजे ॥४०॥ प्रोक्षिप्तोच्चसुवर्णदंड-
ललितं पूर्णेंदुबिंबाकृतिं चक्रं मौक्तिकरत्नचक्रकलितं क्षौमांशुकोत्तंसितं ॥ मुक्ताजालविलंबितं सकलशं नाना-

भवा॰ द्वि॰ अ॰ २१

प्रसूनार्चितं चंद्रोड्डामरचामरालिदध तीं श्रीदेवि ते स्वस्त्रियः ॥४०॥ विद्यामंत्ररहस्यविन्मुनिगणैः कृतोपचारार्च-
नां देवादिस्तुतिगीयमानचरितां वेदांततत्त्वात्मिकां ॥ सर्वास्ताश्चतुरीयतामुपगतास्त्वद्रश्मिदेव्यः परास्तं नित्यं स
मुपासते स्वविभवैः श्रीचक्रनाथे शिवे ॥४१॥ शृंगारादिरसालयं त्रिभुवनी माल्यैरनेकैर्वृतं सर्वांगीण सदंगरागसुरभि
श्रीमद्वपुर्धूपितं ॥ तांबूलारुणपल्लवाधरयुतं रम्यं त्रिपुंड्रं वहत् फाले नंदनचंदनेन सुरभीं ध्यायामि ते मंगलं ॥४२॥ ६०॥
एवं यस्मरति प्रबुद्धसुमतिः श्रीमत्स्वरूपं परं वृद्धोप्याशु युवा भवत्यनुपमः स्त्रीणामनंगायते ॥ स्वाष्टैश्वर्यतिरस्कृ
ताखिलसुरश्रीजृंभितात्मालयः पृथ्वीपालकिरीटकोटिविलिभिः नीराजितांघ्रिर्भवेत् ॥४३॥ अयतव धनुःपुंड्रे
क्षुकृतसिद्धमणिद्युति त्रिभुवनवधूमोहज्योत्स्नाकलानिधिमंडलं ॥ अखिलजननि स्मारस्मारं गतस्मर
ताजनं त्रिभुवनवधूमोहांभोधेः प्रपूर्णविधुर्भवेत ॥४४॥ प्रसूनशरपंचकप्रकटगुंभनागुंफितं त्रिलोकमुवलोक
मवलोकयत्यमलचेतसां चंचलं ॥ अशेषरमणीजनस्मरविजृंभणं यस्सदा पदुर्भवति ते शिवे त्रिजगदंगनाक्षोभ
णे ॥४५॥ पाशं प्रपूरितमहासुमतिप्रकाशं यो वा तव त्रिपुरसुंदरि सुंदराणां ॥ आकर्षणेखिलवशीकर णे प्रवी
णः चिंतेवसन्स भुवनत्रयवश्यकृत्स्यात् ॥४६॥ यस्त्वां ते कलयति कोविद स्त्रिलोकीस्तंभारंभणवेक्षण कृत्युदाक्षीर्यं॥

शिव० २ मातस्ते विजयं तरां कुशं सयोषा॥ नु देवास्त्वं भयांति चमूमु जो त्र सैन्यं॥४७॥ पाश ध्यान वशाद्द्रवेद्द्रव महा मोहां भसोऽर्कं- भवा० द्वि
भणं॥ प्रख्यात भसंवेष चिंतनवशा न्नत्त छुरस्यं सुधीः॥ चाप ध्यान वशात् समस्त जगतां मृत्योर्वशत्वं महादुर्ग स्तंभ महां अ० २१
कुस्यमननां माया ममेयांतरेत्॥४८॥ न्यासं कृत्वा गणेशं ग्रह गण महा योगिनीराशिपीठैः॥ पंचाशन्मातृकार्णैः सहितबहु
कलैः अष्ट वाग्देवताभिः॥ सश्रीकंठादि युग्मैः निजविमल तनौ केशवाद्यैश्च तत्वैः॥ षट्त्रिंशद्भिस्तथाद्यैः भगवति
भवतीं यस्मरेत्सत्वमेव॥४९॥ भगवति तव पाद पद्मातिसद्मा विक श्री॥ स्त्रीं जाति परिहृत्य मद्राय निद्रा दिषु॥ अलि
इति कलनाद संगीत भंगी कृते॥ परिमलमिह किंतु वंदेति संदेहितः॥५०॥ सुरपति पुर लक्ष्मी जृंभणाती तलक्ष्मीः॥ प्रभव
ति निजगेहे यस्य देव त्वमार्ये॥ विधृत बहु कलानां पात्र भूतस्य तस्य॥ त्रिभुवन विदिता जृंभिता कीर्ति रच्छा॥५१॥

८२

मातस्त्वं भूर्भुवस्व र्महगणित तनुस्त्वं तरिक्षं नु सूर्यौ॥ राशी शुक्रं द्रवन्हीं दु भिरपि निगम ब्रह्मभिः प्रोत शक्तिः॥-
प्राणापानादि युक्तैः कलयति सकलं मानसंध्यान योगा दूषां तेषां सपर्या भवति सुखकृतब्रह्म वायोग्यता च॥५२॥
क्व मे बुद्धिर्वाचः परम विदुषो मंद सरणिः क्व ते मात ब्रह्म प्रमुख विबुध स्वांत वचसां॥ अमुं मे विस्फूर्तिः परतरम
हिम्न स्तवनुतिः॥ प्रसीद क्षंतव्यं बहुलतर चापल्य मपि मे॥५३॥ प्रसीद परदेव ते मम हृदि प्रभूतं भयं॥ निवारयदरिद्रतां—

दलयदेहि सर्वसतां ॥ विधेहि करुणानिधे शिरसि पादयुग्मं स्वकं विदारय जरामृतिं त्रिपुरसुंदरि श्रीशिवे ॥५५॥ ५५॥७२
इति त्रिपुरसुंदरी स्तुतिमिमां पठेद्यः सुधीः स सर्वदुरिताटवीपटलचंडदावानलः ॥ लभेन्मनसि वांछितं प्रचुरसिद्धिऋद्धिर्भवेदनेकविधसंपदां पदमनन्यतुल्यो भवेत् ॥५६॥ ५६॥७३॥ संगीतं सरसं कवित्वसरणिं मायवान्यस्मृतौ व्याख्यानं हृदि तावकीनचरणद्वंद्वं च सर्वसतां ॥ षट्कर्मणि कालिके तव बलं श्रीजृंभणं मंदिरे सौंदर्यं वपुषि प्रकाशमतुलमंबेश्वरी श्रीशिवे ॥५७॥ ५७॥७४ पृथ्वीपालप्रकटमकुटस्रगरजोरंजितांघ्रिः विद्वत्पूजा नीतिमतिसमाराधितो बाधितारिः ॥ विद्याः सर्वाः कलयति हृदा भासयंति प्रभाभिः लोकाः सर्वैः नवनवपदैरिंदुबिंबप्रकाशैः ॥५८॥ ५८॥७५ भूष्यं वैदुष्यमुच्चैर्दिनकरकिरणाकारमाकारतेजाः स ज्ञानं भूरिमानं दिनकरललितं दुर्गमं योगमार्गं ॥ आयुष्यं चाष्टसिद्धिं हरगिरिविशदां कीर्तिमभ्येत्य भूमौ देहांते ब्रह्मपारं परमशिवचिदाकारमभ्येति विद्वान् ॥५९॥ ७६॥ उच्चैर्मुनीचेष्वपि दर्शनेषु प्रकाशते देवि तव स्वरूपं ॥ समुज्वलत्येव हि यज्ञवाटे चंडालवेश्मन्यपि जातवेदाः ॥६०॥ ६०॥७७ ॥स्कंद उवाच ॥ दूर्वाससा महितदिव्यमुनीश्वरेण विद्याकलायुवतिमन्मथमूर्तिनैव ॥ स्तोत्रं व्यधायि रुचिरं त्रिपुरांबिकायाः वेदांगमौक्तिकपटलैर्विदितैकमूर्तेः ॥६१॥ ति: इमा सदसदनुग्रहनिग्रह-

१३९

शिव.र.२ स्फीतनिजविग्रहो भगवान् ॥ सर्वासामुपनिषदां दुर्वासा जयति देशिकः प्रथमः ॥ ६१ ॥ छत्रं चामरयोर्युगं व्यज- भवा.दि.
नमादर्शं तथा मर्द्दलैः ॥ भेरीशंखमृदंगकाहलकलं गीतं च नृत्यं तथा ॥ साष्टांगप्रणतिः स्तुतिर्बहुविधा चैतत्सम- अ.२९
स्तं मया संतुष्टेन समर्पितं तव शिवे संतुष्टये कल्प्यतां ॥ ६२ ॥ ॥ सूत उवाच ॥ ॥ इत्युक्त्वा स मुनिः गिरींद्रतनयापा-
दाब्जयोः प्रालमन्ते भ्राज्जोत्यसौ रिङ्गभरसभरैः आनंदितस्वांतरः ॥ देवीं वीक्ष्य मुदा तदाह सुगिरा देहि प्रसादे तितां
कैलासाचलमार्गपालिसरणिं शंभोः कृपां केवलं ॥ ६३ ॥ ॥ स्कंद उवाच ॥ ॥ तत्स्तुतिं सा शिवा श्रुत्वा संतुष्टा मेनया
सह ॥ तमाह विनयानम्रं दुर्वाससमकल्मषं ॥ ६४ ॥ ॥ देव्युवाच ॥ ॥ महिम्नानेन तथानेन तुष्टाहं त्वत्तपस्यया ॥ वृणु
८३ कामान्यथेष्टं ते यावदेत्य मुनेधुना ॥ ६५ ॥ इत्थं देव्या वचः श्रुत्वा स दुर्वासा महामुनिः ॥ प्रांजलिः प्रार्थयामास प्रणम्य प- ८३
रमेश्वरीं ॥ ६६ ॥ ॥ दुर्वासा उवाच ॥ ॥ भक्तिं त्वत्पादयोः पूजां कैलासे शिवदर्शनं ॥ कैलासगमनं देवि ममेवेष्टं स-
दांबिके ॥ ६७ ॥ नान्यच्च कामये हं वै कामारिपदपूजनात ॥ तेनैव सर्वकामानां प्राप्तिर्मेध्य महेश्वरि ॥ ६८ ॥ केदारेशं
महालिंगं त्वास्तितु मौलिसंस्थितं ॥ तत्संसेकाय देवेशि आनयाशुसरिद्वरां ॥ ६९ ॥ ॥ सूत उवाच ॥ ॥ इत्थं दुर्वा-
ससो वाक्यं श्रुत्वा सा जगदंबिका ॥ प्राह तं मुनिमीशानी यत्वयोक्तं तथा भवेत् ॥ ७० ॥ तत्रैव गंगा देव्या च स्मृगातान्

मौलितो नगात्॥७१॥ तस्यां सा मेनया सस्नौ दूर्वासा मुनिभिः सह॥ स्नात्वाभ्यर्च्य महालिंगं केदारे शंमहेश्वरी॥७२॥ स्वपितुर्भवनं चागात् अनुगृह्य च तं मुनिं॥७३॥ स्कंद उवाच॥ मुनिर्नत्वा देवीं पशुपतिमधीशं त्रिजगतां ययौ कैलासस्थं चिरतर दृशोर्दर्शनफलं॥ ससंप्राप्येशानं सम कथयदीशाय हितदा महादेव्या दत्तं वरमपि मुदा तत्र विनतः॥७४॥ संप्राप्य कैलासवरं मुनीं द्रो नत्वा महेशं विवशो ननर्त॥ महेश विश्वेश प्रसीद शंभो इतीरयन् तत्र मुनींद्रवर्यः॥७५॥ देव्या तदा तं मुनिमीशिता सो नुग्राहितं प्राह शिवः कटाक्षैः॥ धन्यास्त्वमित्याहशिवो पितं मुनिं कैलासमो लेनिवसेत्यशात्तदा॥७६॥ ॥इति श्री शिवरहस्ये भवाख्ये द्वितीयांशे देव्या महिम्नस्तवो नामैकोनत्रिंशोध्यायः॥२९॥ श्री काशीविश्वेश्वरार्पणमस्तु॥ ॥जैगीषव्य उवाच॥ ॥दूर्वाससः तारकारे श्रुतमाख्यानमुत्तमं॥ देवीप्रसादसंपत्तिः महिम्नस्तवकीर्तनं॥१॥ कैलासदर्शनं तस्य शिवदर्शनमेव च॥ श्रुत्वाहृष्यामि मुनिभिः सहैर्भिगणपुंगवैः॥२॥ किं चकार महादेवी हिमाद्रौ च पितुर्गृहे॥ कथं सा पूजिता तेन हिमशैलेन मेनया॥३॥ तदाचक्ष्व महाभाग श्रोतुं कौतूहलं हि मे॥ ॥सूत उवाच॥ ॥जैगीषव्येन कथितं श्रुत्वा वाक्यं हरांगजः॥४॥ साधु साध्विति तं चोक्त्वा कथयामास पूजनं॥ देव्या हिमाद्रिशैले च केदारे शार्चनं द्विजाः॥ मेनया भूधरेंद्रेण कृता चापचितिर्मुदा॥

देव्या तत्कथयामास जैगीषव्याय पृच्छते ॥६॥ ॥स्कंद उवाच॥ सा नित्या गिरिजा तत्र गिरिराजेन पूजिता ॥ उवास भवने तत्र पितुः परमहर्षिता ॥७॥ आलीगणैः परिवृता दिव्य सिंहासनस्थिता ॥ मेनया पूजिता नित्यं विहार शयनासनैः ॥८॥ दिव्य मंचे सुधा सौधे मणिपीठेधिशायिनी ॥ पुष्पैर्गंधैर्भक्ष्य भोज्यैः पेयवासो विभूषणैः ॥९॥ सखीभिस्सेविता देवी निनाय दिवसानृतून् ॥ वसंते समनुप्राप्ते स्मरंती शंकरं तदा ॥१०॥ हिमाद्रि विपिने देवी कुसुमापचया दरात् ॥ नानाद्रुम लताः फुल्लाः संपश्यंती तदाद्रिजा ॥११॥ स्वपितुर्मौलिकासारनलिनानि प्रपश्यती ॥ पुन्नागसरला न्दिव्यान्कोविदारान्मधूककान् ॥१२॥ प्रफुल्लान्सल्लकान्देवी पश्यंती नगमूर्धनि ॥ अशोक शाखामालंब्य स्वकराग्रेण सा शिवा ॥१३॥ एकांते चिंतयंती सा शिवपाद सरोरुहं ॥ कैलास मौलि सौधेषु शिवेन हि समागमं ॥१४॥ उत्फुल्ल नलिनीं दृष्ट्वा तत्तटस्था महेश्वरी ॥ हंसयुग्मं तदा देवी दृष्ट्वा निश्वसती तदा ॥१५॥ खिन्नाननांबुजा देवी हिमापायाब्ज संनिभं ॥ उत्फुल्लानोकहांस्तत्र तन्मूलमणिकल्पिते ॥१६॥ वेद्या मध्यासते देवी सखिभिर्मेनया तदा ॥ चंद्र चंदन लिप्तापि धारासार गृहेष्वपि ॥१७॥ फुल्ल पुष्पांबुसारो घश्रीकमसार तर्पिता ॥ वीजिताव्यजनैश्चित्रैः सा तापं न जहौ तदा ॥१८॥ दिव्य पुष्प फलं दृष्ट्वा शिवाय विनिवेद्यसा ॥ ६ ॥

सोपहारं प्रकुर्वंतीमेनामालिंग्य साशिवा ॥१९॥ विदूनमनसा देवी विरहात्परमेश्वरी ॥ चंद्रकस्तूरिकामोदं नांगी चक्रे थ चंदनं ॥२०॥ निशि चंद्रोदये देवी हिमवत्मौलिसौधगा ॥ सुधाधामकरासारैः संतप्तहृदया भवत् ॥२१॥ जाजीकुंदमहामल्लीकेतकोत्पलचंपकान् ॥ स्वपितु मौलिसंस्थान् सा पश्यंती शंकरं विना ॥२२॥ निःसारं मन्यते सर्वं पित्रा मात्रा प्रपूजिता ॥ मंदमंदारसुभगवायुभिः परिशीलिता ॥२३॥ खिन्नानना सा विरहे महेशस्य महेश्वरी ॥ न तापमजहात्क्वापि धारासार गृहेष्वपि ॥२४॥ व्यजनैर्वीजिता देवी सखीभिश्चामरैरपि ॥ पद्मान्यपि हिमासारं स्वपितुर्मौलिसंस्थिता ॥२५॥ मणिसौधेषु दुर्गेषु फलान्युपजिघ्रती ॥ मेनया सांत्विता देवी हृदयेन विदूयता ॥२६॥ अंजनं रोचना गंधं कस्तूरी कुंकुमं निशां ॥ निर्बंधेनु तदा मातुः भोज्यं पेयं च सा शिवा ॥२७॥ शय्या सुमैस्तदा क्लृप्तां दिव्यमंचेषु धूपितां ॥ मणिदीपैश्च विविधैः कुंभादर्श गृहे विकां ॥२८॥ सुप्तापि निद्रां सा देवी चिंतयित्वा महेश्वरं ॥ प्रबुध्यातिक्षणा देवी सखीभिः सेविता पि च ॥२९॥ तांबूलगंधपुष्पाद्यैः दिव्यभक्ष्यान्नराशिभिः ॥ क्व शंकर इति स्वप्ने पृच्छत्यभिनयेन सा ॥३०॥ कैलासमौलिसौधेषु विहारनिहतादरात् ॥ इत्यर्थोक्तिपरा देवी पश्यंती सा स्वमातरं ॥३१॥ हिमाद्रिं चिंतयंती सा निद्रांते द्रितलोचना ॥ दिवाहे-

मौद्रि विपिने केकिको किलकूजनैः ॥ ३२ ॥ परितप्यति सा बाला महेश विरहातुरा ॥ मेनया कंदुकक्रीडां कुर्वती भवाङ्क्षि-
क्षणमंबिका ॥ ३३ ॥ हिमाद्रि मौलि पालीषु फलान्यप्युपभुंजती ॥ तदीयवनवातोत्थैः पुष्पकेसररेणुभिः ॥ ३४ ॥ भ

ल्लैरिव स्वांगसूतैः इत्यमन्यत सा शिवा ॥ कदाचिन्मेनया देवी मैनाकेन सखी गणैः ॥ ३५ ॥ रत्नांदोल महाक्रीडां कु
र्वती वृक्षलंबितैः ॥ हिमाचलमहामौलौ वरप्रासाद भूमिषु ॥ ३६ ॥ हल्लीसलास्यमालीभिः कुर्वती सास्मरच्छिवं ॥
आदर्शमुखनिश्वासैर्मालिन्यमकरोच्छिवा ॥ ३७ ॥ हिमवानपितां दृष्ट्वा विमनः क्लांतमानसां ॥ पुनः पूजासमारंभैः पूज
यामास पार्वतीं ॥ ३८ ॥ मेनया ललिता देवी दिव्यासन विहारकैः ॥ जलक्रीडासमारंभैः धारासार गृहांतरैः ॥ ३९ ॥ स्व
मौलि विपिनोत्कूलशाखिदर्शनकौतुकैः ॥ मृगपक्षिगणानंदैः मयूरवरकेतनैः ॥ ४० ॥ सारंगवारणहरीन् हरिणांलो

२८५

कनैः शिवां ॥ तोषयामास शैलेंद्रः देवीं संवत्सराष्टकं ॥ ४१ ॥ सा निनाय समा देवी स्वपितुर्मौलिसंस्थिता ॥ तां दृष्टुमा
गताः सर्वाः तपस्विन्यः सुरांगनाः ॥ ४२ ॥ लक्ष्मीर्वाणी शची चैव स्वधा स्वाहा सुरांगनाः ॥ अरुंधत्यनसूया च गार्गी मै
त्रायणी तथा ॥ ४३ ॥ तारा च रोहिणी मुख्याः लोपामुद्रा मनोरमा ॥ गंधर्व्यो नागकन्याश्च यक्षविद्याधरांगनाः
॥ ४४ ॥ किंनर्यो यातुधान्यश्चरं भाद्याप्सरोवराः ॥ देवीपदांबुजद्वंद्वं वीक्षितुं ता हिमालयं ॥ ४५ ॥ समायाता विमान-

९२

स्यान द्योतीर्थमहेश्वरि॥ वस्त्राभरण पुष्पाणि कुंकुमं चंदनं निशां॥४६॥ फलमूलोपायनं च ताभिर्दत्तमरोचयत॥
मेना तत्रोपविविशुः समंतात्ताव रांगनाः॥४७॥ गायंति गानगंधर्वाः नृत्यंत्य प्सरसस्तदा॥ वीणातोद्यं वादयंति किं
नर्यः स्वरमूर्छनैः॥४८॥ फलमूलै र्निशा मिश्च कुंकुमैर्वर चंदनैः॥ पुष्पैस्सम र्चयामासुः धूपैर्दीपैः सुरांगनाः॥४९॥ मु
निपत्न्यास्तया देव्या मेनया च समन्विताः॥ लक्ष्मीं वाणीं शचीं चैव तथान्यास्सुरयोषितः॥५०॥ तापसी पुत पश्चोचे
कुशलं गिरिजा तदा॥ देवपत्नीषु देवानां कुशलं लोकवार्तया॥५१॥ सा देवी मधुरालापैः ताः संभाव्य यथा विधि॥
उवासनग हर्म्येषु तास्तदोचुस्सुरांगनाः॥५२॥ ॥सुरांगना ऊचुः॥ ॥दयारसघने शिवे विकचपंकजास्ये वि
केसुचंपकसरावली मधुरगंध जाजीसरैः॥ सुगुच्छवरमल्लिका विधृत पाटलोशीरकैः विराजितकपर्दके विलस
दिंदुकोटीरके नमत्सुर पदांबुजे भवहरे नमस्ते नमः॥५३॥ मंजीरसिंजित तरण न्मणिपादयुग्मकं जोपमानक
रणायितलत्कको द्युपादद्वयं सुरगणोत्तमम् मौलिकोटिघृष्टंसुसन्नखजितांबर कांतिकांतं॥ त्वामंबमंबुरुहगर्भ
रसास्य नेत्रै लग्ना विलग्न हृदयाः सुतरां नमस्ते॥५४॥ जयदेवि जगद्वंद्ये प्रपन्नार्तिहरे शिवे॥ तवपादांबुजद्वंद्वं दर्श
नं नः क्व वा भवेत्॥५५॥ तवपादांबुजार्चातः धन्यामान्याः सुरासुराः॥ शिववामांकभागस्या सदा कैलासवासिनी॥५६॥

तवपादप्रभाजालैर्धृता लोकत्रयावली॥ अद्य धन्यतरः कालः अद्य धन्ये विलोचने॥५८॥ मुनिदेवांगनाः सर्वा यत्ते दृष्टं पदद्वयं॥ वेदैरपि ह्यविज्ञातं वेदांतैरपि ते पदं॥ तवाद्य दर्शनं जातं सफला नो मनोरथाः॥ इति लक्ष्म्यादिकानां च वाचः श्रुत्वा महेश्वरी॥५९॥ समीक्ष्य देव्याः सर्वास्ता देवी प्राह तदा रमां॥ देव्युवाच॥ ॥ कच्चित्ते कुशलं पद्मे वाणींद्राणि स्वधे तव॥६०॥ अरुंधत्यनुसूया द्याः गार्गि मैत्राणि मुद्रिके॥ गंधर्वाश्चाद्य किं नर्यः युक्ता वा पतयो ह्यहि॥६१॥ इति देव्या वचः श्रुत्वा विस्मितास्ताः सुरांगनाः॥ प्रोचुरंजलिबंधेन देवीं भगवतीं शिवां॥६२॥ ॥ देव्य ऊचुः॥ ॥ त्वयेति भाविताना हि कुशलं सर्वदा शिवे॥ त्वद्दृष्टपदांभोजं मंगलानां च मंगले॥६३॥ वयं धन्यतमा जातास्त्वदालोकनमात्रतः॥ स्नानांगराग भक्ष्याद्यैर्वासस्त्र गंधकुंकुमैः॥ देव्या ताः पूजिता देव्यो नत्वा देवीं ययुर्गृहान्॥६४॥ देवी सा स्वपितुर्मौलौ केदारेशं समर्चयत्॥ पित्रा कल्पितसंभारैः प्रदोषेषु महेश्वरी॥६५॥ मेनया स्वसखीभिश्च विगाह्य सरितां वरां॥ गंगांबुनिर्मलघटैः पंचामृतघटैः शिवा॥६६॥ धृतत्रिपुंड्ररुद्राक्षविल्वपुष्पैश्च पंकजैः॥ चंदनालेपनैर्वस्त्रैः फणींद्रवरगोलकैः॥६७॥ दिव्यैराभरणैर्धूपैर्मणिदीपैश्च शंकरी॥ शंकरं पूजयामास केदारेशं महेश्वरं॥६८॥ दिव्यान्नराशिभिर्देवी भक्ष्यभोज्यफलैरपि॥ छत्रचामरपंक्तीभिः मृदंगवरकाहलैः॥६९॥ शंखदुंदुभिनिर्घोषैर्वेणुवीणारवैः शिवा॥६

८६

सखीभिः कल्पिताऽपारखरिवस्या दराच्छिवा ॥७०॥ प्रदोषेषु विशेषेण प्रणामप्रक्रमैस्तदा ॥ पूजांते गिरिशं स्तोत्रै-
स्तुष्टाबाष्टाकृतिं हरं ॥७१॥ केदारेशं महादेवी समाकर्णयतस्तुतिं ॥ इत्थं सा परमेश्वरी त्रिजगतां आधारभूतं हरं
केदारेशमुमासमर्चयदहो पुष्पैस्तु कालेद्विजा ॥ मोदापारमहोदधिप्रविलसन्नस्वांतरा येर्विना प्रालेयाचलमौलिशे
खरमहल्लिंगं च केदारकं ॥७२॥ ब्रह्माद्यैर्हरिरुद्रशक्रविनुतं यक्षैर्मुनींद्रैरपि वेदांतैरपि संघशः श्रुतिगणैः संसेवि
तं संस्तुतं ॥ एवं सा प्रणिनाय काल कलना छूरीकालकालाचनात ॥ देवी सा गिरिराजलोचन महानंदैकपारा रसा
मेनयाहृदय॰ जमध्यविलसत्पादांबुजा साशिवा ॥७५॥ देव्युवाच ॥ ॥ सद्योजातमहेशशंकर विभो खद्योतवत्व
त्पुरः स्यातुं न प्रभवो भवंति विबुधास्ते सोमसूर्यानलाः ॥ विद्योतंति कथं सुविद्युत इमा स्याद्दंतिनद्योपिते भीताः
सायरगायमानिलमरुन्मायानलाः पाहि मां ॥७६॥ वामदेव मुनिदेवगणेंद्रैर्वासुदेवनयनार्चितपाद ॥ भूमिदेवनि
करैरभिपूज्य देवदेव दयया परिपाहि ॥ अघोर घोर भवसागर कर्णधार लीलाकृतांग सुरहीर महेशधीर ॥ मार
मारकखीर सुमघस्त्रग्धराम खराधिपधीर ॥७७॥ ईसानसंहनन भोगितकामिनीन प्राघ्यदिवाकरहुताशन
शशीनयनांग विहीन ॥ नाना विधान जगदेक निधान शंभो मेनात्मजाविनुत वेदवाक्यततिभिः प्रथित प्रधान ॥७८॥

शिवर॰२ तत्पुरुषी पूर्ण जगता मुदिली तिशंभो, पारुष्यहीनवचसाप्यधिवल्कृताते॥ देवैश्चदेवविधिना, पुरुषोत्तमेन स्कंदेन गौरिगणपेन च पूज्यपाद॥७९॥ ॥स्कंद उवाच॥ ॥एतत्ते मिहितो मया द्विजवर श्रोत्रे कृतार्थे तव अंशोयदि भवःसुधारससमः किंवाचितत्ते मधु॥ श्रुत्वाप्येतदसारसंसृतिमरुत्यक्त्वा विमुक्तो भवेत् तस्मिन्प्रभु कृपा भवत्यनुदिनं प्राङ्गणे द्रोभवेत्॥८०॥ कैलासाचलमौलिपालिषु चिरं रुद्रो भवेत्सत्तमः॥ विष्णु ब्रह्म मरुद्गणेंद्र विदिशां नाथेषगंधर्वके॥ भूलोकेखिल भोगिनाथ निलये कोटी भयं संख्यया॥ देव्यै सारतरं शिवो वददि दंतल्लक्ष्मानंद्विजाः॥ मार्कंडेयदधीचिगौतममुखाः शृण्वंति देवाः सदा॥८१॥ अनंतमहिमास्पदं शिवरहस्यरत्नाकरं विहाय युवती जनोन्मथित चित्तवित्तार्थिनः॥ भ्रमंति धनिनां गृहे विकृतदंतकोशानना विनाशसमये प्यहो परिलुठंति कीनाशगाः॥८२॥ निद्रांतं द्राहतांगानि शिकुणपसमा प्रातरास्यका कान्तानो पायेन पिंडोर्नि जजठरदरी पूर्तये यांति मूढाः॥ नोकोपि क्षणमात्र चिंतितशिवो न श्रूयते शांभवा संसारार्णवतारिणी शिवकथा तेषां गतिः का भवेत्॥८३॥ प्रमथपतिपदाब्जध्यानहीना नमान्या सा मान्या शिवमन्यु दग्धवपुषस्या ज्यांतजात्याइति॥ यज्वापि क्षितिपालसूनुरपिवा आशाधिपोवा शुनःपुच्छो यल्लघुमान सोल्लेघुतरस्तुच्छः कथं गण्यते॥८४॥

भवाद्वि॰ अ॰ ३०

८७

८७

॥ इति द्वितीयांशे भवाख्ये अ० ३०॥ ॥पत्राणि॥

८८

५१.९

इति श्री शिवरहस्ये द्वितीये भवाख्येऽशे त्रिंशोऽध्यायः ॥३०॥ ॥ इति श्री शिवरहस्ये भवाख्ये द्वितीयांशे जैगीषव्यस्कन्दसंवादे शतसहस्रसंहितायां समाप्तः ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ कालभैरवाय नमः ॥



पु. १

॥ अथ शिवरहस्य तृतीयांश पूर्वार्धप्रारंभः ॥ हरा० अ०

॥श्री गणेशायनमः॥ शारदायैनमः॥ ओं शिवाय गुरुवेनमः॥ ॥शिवपादारविंदश्रीर्योश्रियंश्रीपतिंविधिं॥ इंद्रं चंद्रं सुरानन्यानुत्पादयति साशिवा ॥१॥ ॐ पुरा नैमिशमाश्रित्य मुनयः शौनकादयः॥ सूतं वेदार्थ तत्वज्ञं प्रणम्योचुः प्रयत्नतः॥२॥ ॥ऋषय ऊचुः ॥वेदवेदांत तत्वज्ञ शिवज्ञानैक जीवन॥ शिव तत्वं वदास्मभ्यं शिवस्थानं श्रुति श्रुतं॥३॥ यत्र सर्व सुखावाप्तिर्य आपत्संघवारणं॥ सान्निध्यानं महेशस्य भक्तानुग्रह साधनं॥४॥ शांभवानाम भीष्टार्थाः सर्वे सिध्यंतियत्रवै॥ अनायासेन सततं प्रसन्नः पार्वती पतिः॥५॥ यत्र तीर्थानि रम्याणि पापनाशकराणि च॥ धर्म प्रवृद्धिदं लिंगं शांतं मंगलदायकं॥६॥ एतादृशं स्थलं कुत्र त्रिनेत्रस्यापि संमतं॥ तद्विचार्यातियत्नेन वद प्रीति पुरःसरं॥७॥ त्वया क्षेत्राणि दृष्टानि विचित्राणि बहून्यपि॥ तेषु किं सिद्धिदं क्षिप्रं विरूपाक्षप्रियं चकिं॥८॥ इति तन्मुनिवाक्यानि श्रुत्वा रम्याणि सादरं॥ तानुवाच मुनिर्ध्यात्वा हर्ष निर्भर मानसः॥९॥ ॥सूत उवाच॥ ॥साधु साधु महा भागाः शुद्ध चित्तास्त पश्यया॥ भव दर्शन मात्रेण प्रसन्न मधुना मनः॥१०॥ भाग्यवंतो भवंतोपि भव लिंगार्चन प्रियाः॥ भवतां संनिधानेन भवे भक्तिः प्रजायते॥११॥ सत्संगो दुर्लभो लोके संतः शांभव पुंगवाः॥ शांभवानां महा भाग्यं लोकेनास्त्यत्र तत्वचलु॥ शांभ संगाभि वांछापि मम जातं पुरा शुभा॥

१

सातावदद्य फलिता भवदाग मनादिह ॥१३॥ शांभवागमनं भाग्यैर्जन्म जन्मांतरार्जितैः ॥ भवतीति श्रुतं पूर्वं वसिष्ठादिकवाक्यतः ॥१४॥ शांभवत्वं च विज्ञातं भवत्सु बहुसाधनैः ॥ तानि तावत्साधनानि पुण्यकोट्यार्जितानि हि ॥१५॥ उद्धूलनं त्रिपुंड्रं च रुद्राक्षाणां च धारणं ॥ शिवलिंगार्चनं चेति तपः फलमनुत्तमं ॥१६॥ यत्र शांभवपादाब्ज रजो लेशः पतिष्यति ॥ तत्तावदुत्तमं तीर्थं तत्र शंकर संनिधिः ॥ तत्रैव धर्माः सर्वेपि सर्वाभीष्टफलप्रदाः ॥ शांभवानां सन्निधाने कृतं पुण्यं तदक्षयं ॥१८॥ न यत्र पापसंबंधः सर्वसंपत्समागमः ॥ यत्र शांभवसंगश्चेत्किं मिष्टं न हि सिध्यति ॥१९॥ दूराद्दृष्ट्वा शांभवानां पादांबुजमजादयः ॥ प्रणमंति प्रस्तुवंति प्रार्थयंति तदागमं ॥२०॥ आगते शांभवे गेहं नृत्यंति पितरः सुराः ॥ तदासनप्रसादेन न स्वर्गलोकपतिर्भवेत् ॥२१॥ भक्त्या तच्चरणांभोजं प्रक्षाल्य विमलैर्जलैः ॥ पूतो भवति पुण्यात्मा निवृत्तः पापसंघतः ॥२२॥ यो भाव चरणांभोजं शिवस्य प्रणमेन्मुहुः ॥ तं नमंति सुराः सर्वे धन्योयमिति वादिनः ॥२३॥ त एव धन्याः पुण्याश्च ये शांभवपदार्चकाः ॥ तत्पादजलपानेन पीयूषं पीतमेव हि ॥२४॥ शिवलिंगांकितं दृष्ट्वा ननमेद्यः प्रमादतः ॥ स तावत्पातकी लोके वेदबाह्यः स एव हि ॥ ॥२५॥ शिवबुध्या प्रपश्यंति शैवं शिवपरायणाः ॥ शिवालयः शैव एव किं पुनः शिवस्वसः ॥ अनंतजन्मपुण्या-

९७८

नां फलं शैवत्वमीरितं ॥ शैवं विलोक्य पुण्येन कः सुखं नाप्नुयाद्भुवि ॥२७॥ ये पूजयंति मनुजाः शैवपूजकपूजका- हराः मृ

न् ॥ ते पूज्याः सर्वदेवानां मुनीनां च विशेषतः ॥२८॥ अर्घपाद्यादिकं यच्च संपादितमिहाधुना ॥ तत्स्वीकृत्य
कृतार्थं मां कुर्वंतु शिवतत्पराः ॥२९॥ अद्य धन्योस्मि धन्योस्मि कृतार्थोस्मि शिवार्चकाः ॥ शिवरूपाणि भवतां
शरीराणीति मन्महे ॥३०॥ एतानि शिवलिंगानि शरीराणि मुनीश्वराः ॥ उत्तमान्येव लिंगानि शिवो यत्राधिति
ष्ठति ॥३१॥ शिवाभिमानलिंगानि शैवगात्राणि तानि मे ॥ पूजनीयानि यत्नेन बिल्वपत्रादिभिर्मुदा ॥३२॥ इत्यु
क्त्वा तानि लिंगानि पूजयित्वा मुहुर्मुहुः ॥ प्रणतः प्रांजलिः सूतः प्रहृष्टः स्थिरमानसः ॥३३॥ तं तादृशं विलो
क्यैव सूतं शांभवपुंगवाः ॥ आनंदाश्रुसमाकीर्णाः कृतांजलिपुटा जगुः ॥३४॥ ॥ ऋषय ऊचुः ॥ ॥ सूत ध
न्योसि धन्योसि शिवभक्तिरियं त्वया ॥ कथं प्राप्ता पुरा चीर्णं किं किं पुण्यमनस्वरं ॥३५॥ केन पुण्यप्रभावेन भवता
मंगलावहं ॥ मंगलपतिपादाब्जस्मरणं क्रियते वद ॥३६॥ ॥ सूत उवाच ॥ ॥ पुरा व्यासः समागत्य केदारे
श्वरसंनिधौ ॥ केदारेश्वरमभ्यर्च्य स्थितः संतुष्टमानसः ॥३७॥ तदा शिवार्चनपरं व्यासं शिष्यगणावृतं ॥
मणम्योक्तं शिवज्ञानं कथं जातं तवेत्यपि ॥३८॥ स शिवाराधनासक्तः शिवपंचाक्षरं स्मरन् ॥ स्पृष्ट्वा विभूतिं लिंगं-

चकेदारेशमुवाचमां ॥ ॥व्यास उवाच ॥ ॥सूताधुना तत्वमेकं वक्ष्ये शैवं सनातनं ॥ रहस्यं परमं गुह्यमना-
ख्येयं विचक्षणैः ॥४०॥ पश्यत्सु शैववर्येषु सर्वेषु सर्वे ब्धेते पुसादरं ॥ रहस्यमुच्यते किं चित्वं भक्तोसि ममेत्यपि
॥४१॥ यद्रहस्यं मया नोक्तं तदिदानीं मयोच्यते ॥ गोपनीयं प्रयत्नेन शिवभक्ति पुरःसरं ॥४२॥ शिवभक्ताय वक्त
व्यमातुराय विशेषतः ॥ विलोक्य सर्वतो दिक्षु नयत्र स्वविरोधिनः ॥४३॥ अशांभवाय सहसा न वक्तव्य
मिदं त्वया ॥ अनाप्तायनवक्तव्यं रहस्यमिति निश्चयः ॥४४॥ शपथः क्रियतामत्र केदारेश्वर सन्निधौ ॥ अशांभवा
य सहसा न वदामी ति निश्चयात् ॥४५॥ निधान कुंभं चोराय दुष्टाय हित मानसः ॥ कः प्रयच्छति यत्नेन तं संपाद्य
५९७ प्रयत्नतः ॥४६॥ अन्ये निधान कलशा देयाः संतु कथंचन ॥ अयं निधान कलशः सर्वथा देय एव न ॥४७॥ शृण्वंत्व
थ भवंतोपि मुनयः शिवतत्पराः ॥ प्रसंगादधुना शैवं रहस्यं रम्यमुच्यते ॥४८॥ इदं भवद्भिर्यत्नेन गोपनीयं
समाहितैः ॥ रहस्यानामिदं तावद्रहस्यं शैवमुत्तमं ॥४९॥ यथा रत्नानि दिव्यानि गोपनीयानि यत्नतः ॥ तथा-
रहस्यमप्येतद्गोपनीयं विशेषतः ॥५०॥ रहस्यरत्नमित्येतत् प्रख्यातं वेद संश्रुतं ॥ ~~इदं रहस्य रत्नमित्येतत्-
प्रख्यातं वेदसंश्रुतं~~ ॥ इदं रहस्यं वेदांतं गोपनीयं महत्तरं ॥५१॥ मयापि श्रद्धया तावद्भवत्सुदययापरं ॥—

शिव र॰ ३ | रहस्यमुच्यते शैवमवक्तव्यमपि ध्रुवं ॥५२॥ रत्नान्यत्यंतदिव्यानि प्रदेयानि कदाचन ॥ इदं रहस्यं परमं न देयं शिव-
३ | तत्सरः ॥५३॥ प्राणरक्षामणित्वेन प्रसिद्धमिदमादरात् ॥ अतएव भवद्भिस्तु गोपनीयं विशेषतः ॥५५॥ इदं रहस्य-
मित्युक्तं शिवेन गिरिजां प्रति ॥ तया गुप्तमिदं पुण्यं भवान्या भक्तिपूर्वकं ॥५३॥ तया तावत्कुमाराय पृष्टया भक्ति-
पूर्वकं ॥ स्नेहेनोक्तं रहस्यं हि शैवं वेदांतसंभवं ॥५६॥ तदुक्तं नंदिकेशाय कुमारेण कदाचन ॥ प्रणताय विनीताय
कृतांजलिपुटाय च ॥५७॥ इदं नारायणायोक्तं नंदिकेशेन धीमता ॥ उत्पादपद्मरजसा संयुताय यतात्मने ॥५८॥
इदं नारायणेनोक्तं चतुर्वक्त्राय धीमते ॥ प्रणताय तिनम्राय सस्वत्या सहान्वहं ॥५९॥ ब्रह्मणा सनकादिभ्यः प्रोक्त-
मेतन्महत्तरं ॥ तैरुक्तं नारदायाद्य मह्यं तेनोक्तमादरात् ॥६०॥ अभ्यासार्थमिदं तावत्तद्विस्मरणशंकया ॥ मयाव-
क्तुं समारब्धं भवद्भ्यो मुनिपुंगवाः ॥६१॥ अतएव प्रयत्नेन विनीताय हिताय च ॥ भवद्भिरपि वक्तव्यं नान्यस्मै सर्वथा
द्विजाः ॥ इदं मत्सार्थितं तावत्कर्तव्यं नात्र संशयः ॥ इदमेव परं सत्यं ममेयं गुरुदक्षिणा ॥६३॥ ॥ ऋषय ऊचुः ॥
यदुक्तं श्रीमता भक्त्या तत्सर्वं श्रुतमेव हि ॥ हितायास्मभ्यमप्युक्तं त्वया तत्त्वविदांवर ॥६४॥ यद्गोपनीयं देवा-
नां रहस्यं शांभवं मुने ॥ तद्गोपनीयमस्माकं रत्नवत्तात्र संशयः ॥६५॥ इदं कंठमणित्वेन रक्षणीयं विशेषतः ॥

इ॰ तू॰ अ॰ १

अस्मिन्नर्थे संशयोपि श्रीमता कार्य एव न ॥६६॥ यद्रहस्यं पुरा नो नः श्रीमता पिलयामुहुः ॥ पृष्टेनापि प्रयत्ने
न रहस्यं तदिहोच्यते ॥६७॥ इति श्रुत्वा मुनिवचो व्यासः संतुष्टमानसः ॥ रहस्यं वक्तुमुद्योगं चकार चतुरस्त
तः ॥६८॥ प्रणम्य शिवमद्वैतं भस्मधारणपूर्वकं ॥ शिवलिंगमुपस्पृश्य पुनर्नत्वा महेश्वरं ॥६९॥ आनंदाश्रुसमा
कीर्णः तूर्णं गद्गदया गिरा ॥ हृदि सांबं स्मरन्नेव घोरसंसारशामकं ॥७०॥ ॥व्यास उवाच ॥ ॥धन्या यूयं न
संदेहो भस्मभूषितविग्रहाः ॥ शिवविद्यादानपात्रं त्रिनेत्रप्रियमीदृशं ॥७१॥ पात्रे दत्तानि रत्नानि धनानि वि
विधानि च ॥ सर्वसौख्यप्रदानीति श्रुतानि श्रुतिभिर्मुहुः ॥७२॥ शिवविद्यादानपात्रं दुर्लभं भुवनेष्वतः ॥ लब्धे
पात्रे परित्यागः कथं कार्यो मनीषिभिः ॥७३॥ शिवविद्याप्रदानेन दातुः पात्रस्य च द्वयोः ॥ तरणं तु भवत्येव घोर
संसारसागरात् ॥७४॥ यत्रापारहराजरामरकथासिंधुः समुज्जृंभते तत्रांबागणनाथषण्मुखयुतः शंभुः स्व
यं नृत्यति ॥ विष्णुर्वेत्रकरः चतुर्मुखमुखान् दूरीकरोत्यादरान्नंदीशोग्रकटाक्षवीक्षणभयग्रस्तः समस्तान् सु
रान् ॥७५॥ पदार्धमपि वा मुदा मदनमर्दनानंदद प्रसादनकथागतं कथमपि स्मृतं वा श्रुतं ॥ ददाति मुदमंत
कं प्रणतमाशु तावत्करोत्यपारसुकृतांबुधिप्रवरसद्धिवृद्धिं मुहुः ॥७६॥ पायात्सोयमलौकिकः शिवकथा–

 गंगातरंगानिलः॥ श्रोतृन्प्यावृतोतिनाद्भुतमिदं तत्संगतिं तत्कुलं॥ तत्पोष्यानपि पावयत्यनुदिनं नूनं सकृद्वास्मृतः॥
 किंवक्तव्यमनुक्षणं श्रुतिपथारूढो मृडानीपतिः॥७७॥ गात्रश्रोत्रविशालनेत्ररसनाचित्तायुषामक्षया॥ वृत्तिः पुण्य
वशेनतेन गणनाप्येषां परार्धाधिका॥ यद्यप्यस्तु तयापि शंकरकथापीयूषसिंधुस्फुरत्कोट्यंशांशविशेषतत्वक
थनं शक्यं न सर्वात्मना॥७८॥ द्राक्षेक्षुक्षीरसाराद्यतिरुचिररसास्वादनाख्यापनाद्यैरख्यालंकालकालश्रुतिकथि
तकथायूथपीयूषधारां॥ धीराकारप्रसारस्फुरदुरुसुरसासारधारानुरक्तांशक्ते विविक्ते पिबपिबरसने स्वादनामो
दमाना॥७९॥ वामे मेरुशरासनं हरिशरं सव्ये दधानं करे सं हर्तुं त्रिपुराणि भूरथवरन्यस्ताग्रपादांगुलिं॥ आपादप्रण
तामिता मरशिरःकोटीररत्नप्रभास्पर्धोवर्धकपादुकार्धचरणं कालेक्षणं भावयेत्॥८०॥ वंदे मेरुशरासनोरुशिखरज्या
कारकाकोदरं ग्रीवालंकृतवामपाणिचरणं नाराचनारायणं॥ सव्याकुंचितपाणिना सकरुणं संभ्रामयंतं पुरं यि(जि)त्वावी
क्ष्यशिवासहायममरस्त्रगृष्टितुष्टं मुहुः॥८१॥ प्रणामानम्रेंद्रप्रमुखवनितायल्लकमणिप्रभास्पर्धामर्दामृतकरशिरो
रत्नमहिला॥ मुहुर्दृष्ट्वा हृष्टा निजचरणजाग्रच्छविकृतास्मितव्यक्तानंदा दिशतु मम कल्याणसरणीं॥८२॥ जाताः शांकर
सुंदरोदरदरीद्वारोर्वरास्वंकुराः शिक्ताः शंकरनामधेयसुधया सद्यः प्रवृधाः फले॥ आनम्राः शिवनाम लक्षणसुधायं—

ऽभिलाषां मुहुः कुर्जंतीं स्तनां रसैरभिनवां कर्तुं किमद्योद्यता: ॥८॥ ॥ इति श्री शिवरहस्ये महेतिहासे व्याससुनिसंवादे हराख्ये तृतीयांशे प्रथमोध्यायः ॥१॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ ऋषय ऊचुः ॥ ॥ शिवविद्या महाविद्या विद्याया मुक्तिदायिनी ॥ तां विद्यां वेद वेदावा गौरी वा शंकरोथवा ॥१॥ कुमारो वा गणेशो वा नंदिकेशोपि वा स्वयं ॥ यदि स्याद्गिरिजाकांते भक्तिरव्यक्तिरव्यभिचारिणी ॥२॥ तदेव शिवविद्यायाः स्वरूप[illegible] भवेत् ॥ भक्तिरीशे तथा तावन्न तस्याप्यद्भुतं तपः ॥३॥ शिवविद्याप्रभावज्ञो दुर्लभो भूतले मुने ॥ यथा भक्तिर्महादेवे तव सात प्रसा खलु ॥ तथा क्कापि न दृष्टे न भक्तिरव्यभिचारिणी ॥ भक्ति[illegible]रत्नतया ख्याता सैव भक्तिर्महेश्वरे ॥५॥ सा भक्तिर्मुक्तिमुक्तिदा नृणां संसारभयमोचिनी ॥ महादेव शिवदाकारः परमानंदविग्रहः ॥६॥ निर्गुणोपीति निर्णीतः पार्वतीपतिरित्यपि ॥ चंद्रचूड इति ख्यातः कालकाल इति स्मृतः ॥ त्रिशूलपाणिः सर्वेशो जटामंडलमंडितः ॥८॥ उमार्धविग्रहत्वेन विख्यातः परमेश्वरः ॥ अंधकारिरिति ख्यातो वृषभध्वज इत्यपि ॥ लिंगाकार इति ख्यातो भस्मोद्धूलितविग्रहः ॥ रुद्राक्षभूषणः शांतो नीलकंठ इति स्मृतः ॥१०॥ विरूपाक्ष इति ख्यातः दक्षो दाक्षायणीप्रियः ॥ कुमारगुरुरव्यक्तो व्यक्तसुंदरविग्रहः ॥११॥ कामारिरिति विख्यातः कामदत्वेन कीर्तितः ॥ अक्षरत्वेन विज्ञातो—

प्रवणो

विज्ञानानंदसागरः ॥ १२ ॥ ईश्वरः परमात्मा च परं ब्रह्म परात्परः ॥ इत्यन्योन्यविरुद्धं हि नाम शर्वे चिदात्मके ॥ १३ ॥ चिद्विलास इति ख्यातः चिदित्यपि विशेषतः ॥ इदं सर्वं वदाम्यस्मै शिवधर्मान्विशेषतः ॥ १४ ॥ तद्धर्मश्रवणादेव तज्ज्ञानं च भविष्यति ॥ ॥ व्यास उवाच ॥ ॥ शृणुध्वं मुनयः सर्वे भूतिधारणपूर्वकं ॥ १५ ॥ हृदि ध्यात्वा महादेवं मंगलार्धांगमव्ययं ॥ शिवार्चनं परो धर्मः सर्वधर्मोत्तमोत्तमः ॥ १६ ॥ तद्भिन्ना धर्माः सर्वेऽपि तदर्था एव केवलं ॥ शिवः परं ब्रह्म सच्चिदानंदलक्षणं ॥ १७ ॥ विज्ञानघनमेवेदमानंदघनमित्यपि ॥ तन्निर्विकारं नित्यं तदाद्यंतविवर्जितं ॥ १८ ॥ ज्योतिःस्वरूपममलं नामरूपविवर्जितं ॥ अप्रमेयं निर्गुणं च निरंजनमनामयं ॥ १९ ॥ वाचामगोचरं मन्ये मनसामप्यगोचरं ॥ यतो वाचो निवर्तंते अप्राप्य मनसा सह ॥ २० ॥ वेदवेदांतवचनैरशक्यं तन्निरूपणं ॥ पुराणानां का कथा त्र्वा ङ्मार्गार्गलमेव तत् ॥ २१ ॥ अनर्गलप्रवाहाणां कथा नाम पिचा कथा ॥ वागगोचरमप्येतत्कथं चित्कृपया प्रभोः ॥ २२ ॥ शंभोर्विषयतामाप ततस्तद्वच सामपि ॥ इदमप्युच्यते तावत्प्रेरिते न कथंचन ॥ २३ ॥ शिवेनैव मया विप्राः स बुद्धिप्रेरकः शिवः ॥ देवस्य सवितुर्बुद्धिं प्रचोदयति शंकरः ॥ २४ ॥ स एव भगवान् भर्गो धियो यो नः प्रचोदयात् ॥ देवस्य दीप्यमानस्य सवितुर्ज्ञानमुत्तमं ॥ २५ ॥ प्रचोदयति विश्वात्मा वरेण्यं शिव एव सः ॥ अन्यः को वा तद्वरेण्यं सवितुर्वा प्रचोदयात् ॥ २६ ॥

अस्माकमितरेषांवा सभर्गः शंकरस्तुतः ॥ अस्य भर्ग पदस्यैव माहात्म्यं श्रुतिषुश्रुतं ॥२७॥ संसार भर्जनाद्भर्गःस्तो
यंस्वर्गापवर्गदः ॥पुरा चकार गायत्री तपो घोर तरं परं ॥२८॥ प्रीतस्तत्तपसा शंभुः तद्भक्त्या परयातदा ॥ ततःपरं
स भगवान्भर्गः सर्गादिकारणं ॥२९॥ तामुवाचाति चतुरो घन गंभीरयागिरा ॥ ॥सदाशिव उवाच ॥ ॥ त्वयात
प्तं तपो घोरं कल्पांतामयुतं ध्रुवं ॥३०॥ तेन प्रीतोस्म्यहं देवि वरं वृणु यथेच्छया ॥ वरदेषु वरेण्योहं त्वदीप्सितवर
प्रदः ॥३१॥ किमदेयमयाप्यत्र प्रीतोवैतपसाधुना ॥ इति तद्वचनं श्रुत्वा प्रणम्य भुविदंडवत ॥३२॥ गायत्रीमूर्ति
मासाद्यस्वानंदाश्रुपरिप्लुता ॥ ॥ गायत्र्युवाच ॥ ॥ भगवन्देवदेवेश गर्भ संसार भर्जक ॥३३॥ प्रसीद करुणासिंधो
वरं देहि मदीप्सितं ॥ मंत्रः शिव पदाभावे जपायोग्य इति श्रुतिः ॥३४॥ प्रसिद्धास्ता श्रुतिस्तावन्मान्या धन्यस्त्वके
वलं ॥ मंत्रे शिव पदंयत्र तेन सिद्धिः प्रजायते ॥३५॥ अतो मुनीश्वराः सर्वे शिव मंत्र जपोत्सुकाः ॥ शिव मंत्रे वि
द्यमाने सर्व विद्या प्रकाशके ॥३६॥ अविद्यानाशके तस्मिन्नन्यो मंत्रो न जप्यते ॥ व्यर्थायासप्रदा मंत्राः शिव
शब्दविवर्जिताः ॥३७॥ अतस्तैर्बहुधाजप्तैरल्पं वान फलं ध्रुवं ॥ नीरसैस्तरुभिः पुष्पं न फलं वा यथा तथा ॥३८॥
शिवमंत्रान्यमंत्रेण प्रजप्तेनापि किं फलं ॥ किंवंध्या जरठा पुत्रं सूते विद्या विशारदं ॥३९॥ तथा मंत्रास्तु ते–

३०

शिव र० ३
६

वंध्या शिवनामविवर्जिता॥ शिवनामस्वरूपेण दौहृदेन महेश्वर॥४०॥ फलं मंत्रतरुः सूते भक्तिसिक्तः पुनः पुनः॥
शिवनामप्रवेशेन मंत्रो भाति यथा रविः॥ उदयाचलमासाद्य सहस्रकिरणोपि सन्॥ महांधकारेण रविः यथा भाति
तथा मनुः॥४२॥ शिवमंत्राभावबंधो न फलायोपयुज्यते॥ मंत्राकारं दिनं भानुरूपेक्ष्यासाद्य भासते॥४३॥ मंत्ररूपोद
नस्यायं भर्गशब्दस्तु भास्करः॥ दिनं न भास्कराभावे दिनत्वमपि यास्यति॥४४॥ यथा तथा मंत्रतापि मंत्रे तेन वि
नातु न॥ स्वच्छं शिवपदं पूर्वं त्वयतावन्महात्मना॥४५॥ तद्यत्र मंत्रेन भवेत्स मंत्रो जप्य स्वत॥ कंठे मंगलसूत्रं चे
त्सा नारी मंगलावहा॥४६॥ तथैव मंत्रविद्यापि मंगला यतनं विना॥ शिवमंत्रस्तु मंत्राणां तावन्मंगलसूत्रवत्॥४७॥
जातो मंगलदानाय किं मन्यैः साधनैरपि॥ रत्नभूषणयुक्तापि नरंडा भाति सर्वथा॥४८॥ विना मंगलसूत्रेण तथा
मंत्रो न तं विना॥ किं तया क्रियते धेन्वा या न दोग्ध्री न गर्भिणी॥४९॥ शिवमंत्रविहीनेन जप्तेन मनुनापि किं
॥ यागोः सगर्भा सा पोष्या साधनैर्विविधैस्तथा॥५०॥ शिवमंत्रेण संयुक्तो मनुर्जप्यो मनीषिभिः॥ शिवमंत्रा-
त्मकं रत्नं मंत्र प्राप्य विराजते॥५१॥ यथा धरा रत्नगर्भा फलं सूते मनोहरं॥ पतिव्रता पिया नारी पुत्रहीना न रा
जते॥५२॥ तथा शिवपदाभावे मंत्रविद्या न राजते॥ मंत्रो मंत्रलमाप्नोति शिवमंत्रप्रवेशनात्॥५३॥ तदभावे स-

हर॰ तृ॰
अ॰ २

मंत्रस्याद्यमंत्रः केवलः शिवः ॥ महिमा शिव शब्दानां नन्त्रा तुं शक्यते मया ॥५४॥ वेदैरपि न विज्ञातो मुनिभिश्च सुरैरपि ॥ मन्मंत्रे जपयोग्यत्वं नास्तीति मुनिभिः प्रभो ॥५५॥ न जपाय प्रयुक्तोयमेतो दुःख मिदं मम ॥ एतद्दुःख विनाशस्तु त्वत्प्रसादं विना कथं ॥५६॥ त्वयि प्रसन्ने भगवान्न प्राप्य मपि किं प्रभो ॥ यन्न वेदैरपि ज्ञातं तवरूपं महेश्वर ॥५७॥ तदद्य दृष्टं भगवन् प्रसीद परमेश्वर ॥ नमोनमस्ते स्तु महेश तुभ्यं नमोनमस्ते वृषभध्वजाय ॥५८॥ नमोनमस्ते गिरिजाधवाय विद्यास्वरूपायनमो नमस्ते ॥ नमोनमस्ते परमात्मनेनमः स्वर्गापवर्ग प्रदभर्ग शंभो ॥५९॥ भवत्सदांभोज विलोकनेन सुखांबुधि मेय्यनुवृत्तिमाप ॥ आपत्कुलं नष्टमनंतमीश त्वत्पादप-द्मार्पित चित्तवृत्तेः ॥६०॥ शुभास्पदत्वं समवाप्य शंभो प्रसन्न चित्तोपि भवेन्नरोपि ॥ अणोरणीयान्महतो महीयान्नात्मा गुहायां निहितोस्य जंतोः ॥६१॥ तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशं ॥ उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकंठं प्रशांतं ॥६२॥ ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्त साक्षिं तमसः परस्तात् ॥ अव्यक्तरूपं परमात्मतत्वं न वेद वेदांत परिश्रमेपि ॥६३॥ ज्ञेयं परं त्वीश्वरपादपद्म प्रसाद विज्ञेय मितिप्रमामे ॥ नयस्त्वरूपं तववेद दृष्टं न दृष्टमीशान सुरैरपीदं ॥६४॥ मयापरं भाग्यवशेन दृष्टं भाग्यस्य—

शिवर० काचा भगवन्नियत्ता ॥ यत्पादपद्मस्मरण प्रवृत्ताकृतां तवार्ता मतिदुःखहांतां ॥६५॥ विहाय चानंदजलाब्धिमग्नाः हरः तृ

६ संसारतापैर्नचपीडिताःस्युः ॥ महेश्वरश्रीचरणारविंदं निधाय चित्तांबुजकर्णिकायां ॥६६॥ आनंदधारावृतसद्म अ०२

च्छरीराः सुराः प्रपश्यंति नरानुधीराः ॥ यदीक्षणं वाशिवपादपद्मं हृत्पद्मसंविष्टमतिप्रकृष्टं ॥६७॥ प्रकृष्ट एवातिनिकृष्टजन्मा

प्युत्कृष्टजन्मा सतु किंपुनःस्यात् ॥ स्वर्गापवर्गप्रदमीश्वरं त्वां भजंति धन्याः परमं तरायैः ॥६८॥ विना विमुक्ता चपरंपरा

स्ते समस्तलोकेषु किलास्ति कास्ते ॥ आनंदकल्याणपरंपरासु तिष्ठंति ते शंकरपूजकास्ते ॥६९॥ नापत्प्रपश्यंति कदा

धीरा पिधीरास्त एवेति विचारितार्थ्य ॥ मयि प्रसादोपि कृतस्त्वयायं त्वत्पादसंदर्शनदानरूपः ॥७०॥ आनंदकंदोयमनुक्षणं

मे सूते महानंदनिधानमीश ॥ कारुण्यपूर्णांबुधिमीश्वरं त्वां स्मृत्वापि संतोषमहाब्धिपूर्णः ॥७१॥ दृष्ट्वा भवंतं भगवंत-

मीश कोवा न तृप्तस्तरसा सुखेन ॥ अनुक्षणं तस्य सुखानि शंभो सुखानि संपज्जलराशयोपि ॥७२॥ यस्यानपायात्वयि

भक्तिरीश सातावदत्यंतसुदुर्लभा न ॥ येन प्रमादेन कृतोस्ति धर्मो महेशपादार्चनरूप एव ॥७३॥ तस्यैव तद्भक्तिशुभ

प्रवाहः सुदुर्लभः किंन समस्तामपीश ॥ शंभोर्यथा भर्गपदप्रवेशो मंत्रेमदीयेपि तथा प्रसादः ॥७४॥ भवत्वयं मे भगवन्वरो

स्यवरत्वमित्येवमतिर्ममास्तु ॥ ॥व्यास उवाच ॥ ॥ इत्युक्तं तद्वचः श्रुत्वा तथास्त्विति महेश्वरः ॥७५॥ गायत्रीपूजि-

ते लिंगे प्रविष्टो गणसंवृतः॥ गायत्र्या पूजितं लिंगं यः पूजयति सादरं॥७६॥ स सर्वसिद्धिसंपन्नः सिद्धेषु प्रथितो भवेत्॥ तदा प्रभृति गायत्री जपयोग्या मुनीश्वराः॥७७॥ स्वर्गापवर्गदा तृप्त्वा द्वर्गो भर्गत्वमागतः॥ यो गायत्रीस्तवं पुण्यं महेश ज्ञानपूर्वकं॥७८॥ पठेज्जपफलं प्राप्य सिद्धमंत्रो भविष्यति॥ एतादृशः शिवः केन नार्चितोनन तो मुहुः॥७९॥ न ध्यातो न स्मृतः पुण्यैरपारैर्विविधैरपि॥ शिवमंत्रजपं कृत्वा शिवध्यानपुरःसरं॥८०॥ शिवं यांति शिवाचाराः सदाचाररताः सदा॥ अतः शिवपदाभावे मंत्रो जप्यो न सर्वथा॥८१॥ शिवमंत्रान्वितो मंत्रो जपनीयः प्रयत्नतः॥ वेदोक्तत्वेन शब्दस्तु न जपायोपयुज्यते॥८२॥ नहि रासभशब्दस्य शुद्धस्य जपयोग्यता॥ तृणं प्रसूनसहितं यथा मौलिविभूषणं॥ मुक्तिकांताकराक्रांता शिवमंत्रजपैः परं॥८४॥ वेदांबुराशिः सर्वोपि नालं कामाय जायते॥ रत्नाकरत्वं जलधेः दिव्यरत्नान्वयासरं॥८५॥ किमिदं योग्यं तद्रत्नं तत्रत्यं न तृणं तथा समुद्रस्थत्वमात्रेण तत्रत्या सिकता अपि॥८६॥ केनवा शिरसा बाह्यास्तत्र त्या मणयो यथा॥ शिवमंत्रमणिस्तावद्वेदरत्नाकरे स्थितः॥ ग्राह्यो जपाय योग्यत्वात् तदन्यो ग्राह्य एव न॥ अलं किं बहुनोक्तेन शिवशब्दः परात्परः॥८८॥ शिव एवेति विज्ञेयः शिवलिंगं च तादृशं॥ शिवश्च शिवलिंगं च रुद्राक्षः सितभस्म च॥८९॥ शिवक्षेत्रं च भाग्येन लभ्यते मुनिपुंगवाः॥ शैवो भूत्वा शिवं—

५०॥

शिवर॰ ३ प्राप्य मुच्यते पापबंधनात् ॥ शैवास्त्ववश्यं विभूति विलसद्रुद्राक्ष भूषाश्रयाः ॥ पूज्यंनः शिव लिंगमेव सततं ध्येयः शिवः हरा॰ तृ॰
८ केवलं ॥ अस्मद्भाग्यवशेन भर्ग पदभाङ्मंत्रोपि पंचाक्षरो रुद्राध्याय गतो जपाय विविध क्लेश प्रभंगाय च ॥ ९१ ॥ अ॰ २
॥ इति श्री शिवरहस्ये व्यास मुनि संवादे हराख्ये तृतीयांशे गायत्र्युपासनो नाम द्वितीयो ध्यायः ॥ २ ॥ ॥ श्री काशी विश्वे-
श्वरार्पणमस्तु ॥ ॥ सूत उवाच ॥ ॥ इति तद्वचनं श्रुत्वा ते सर्वे मुनि पुंगवाः ॥ आनंदाश्रु प्रवाहाक्ताः संसक्ताः शिव
पूजने ॥ १ ॥ पुनः प्रणम्य तं व्यासं शिव तत्वोपदेशकं ॥ शिवतत्वोपदेशाय प्रेरयामासुरादरात् ॥ २ ॥ ॥ मुनय ऊचुः ॥ ॥
शिवः कथं पूजनीयः शिवधर्मोऽत्र के मुने ॥ शिवाचाररताः के वा शिवः केन प्रसीदति ॥ ३ ॥ शिवायै कुत्र वा प्रोक्तं रहस्यं
शैवमुत्तमं ॥ तदावासः स्वरूपं च कीदृशं मुनि पुंगव ॥ तदावासस्य किं मानं तत्र के वा मवस्थितिः ॥ इदं सर्वं विशेषेण
विचार्य वद सादरं ॥ ॥ व्यास उवाच ॥ ॥ साधु पृष्टं मुनिश्रेष्टाः श्रीकंठार्चन तत्पराः ॥ एतत्कथानुवादेन महानंदः
प्रवर्धते ॥ संपदं बुनिधिः प्राप्तो विनष्टाः पापपर्वताः ॥ एतदर्थं पुरा प्राह जैगीषव्याय पृच्छते ॥ ७ ॥ तारकारिरुवा
चेत्थं संतुष्टेनांतरात्मना ॥ ॥ जैगीषव्य उवाच ॥ ॥ जगतां जननी गौरी कैलासे शंकरांतिकं ॥ ८ ॥ कदागता
वदास्मभ्यं स्कंद शिक्षित तारक ॥ ॥ स्कंद उवाच ॥ श्रुणुष्व जैगीषव्या द्याह्यशेषै र्भूसुरैः सुरैः ॥ १ ॥ ६ ॥

गायत्र्याश्चतपः सिद्धिं देव्यायानं हिमाचलात् ॥ अणु कैलासगमनं गणानां प्रेषणं मुने ॥१०॥ तवाद्य कुशलप्रश्ने-
र्मेमानंदः प्रजायते ॥ महाशांभवसंगेन भवाब्धिरपि शुष्यति ॥११॥ शैवधर्मोपदेशाय योग्यो भाग्यवतां वरः ॥ अतः
शिवप्रभावोपि वर्णनीयो ममाधुना ॥१२॥ सुमेरुतुंगशृंगेषु शृंगमेकमनुत्तमं ॥ न तुंगशृंगमस्त्यन्यत्तच्छृंगापेक्षया
द्विजाः ॥ तच्छृंगोपरि रत्नानां प्रासादः कश्चिदुत्तमः ॥ तत्प्रासादप्रभावोपि वेदानामप्यगोचरः ॥१४॥ परार्ध्ययो
जनायामस्तावद्यो जनमुन्नतः ॥ दिगष्टकमपि व्याप्य दिगंतेष्वपि तिष्ठति ॥१५॥ न तत्प्रासादशृंगेषु सूर्यचं
द्रादिरश्मयः ॥ सूर्यस्य तत्र का वार्त्ता चंद्रस्य च मुनीश्वराः ॥१६॥ तत्प्रासादप्रांतदेशे नित्यपुष्पाः सुरद्रुमाः ॥ सुधा
प्रवाहकल्लोलमणिकांतिविराजिताः ॥१७॥ प्रासादः सोप्ययत्नेन नवरत्नविनिर्मितः ॥ तद्रत्नकांतिपूर्णानामंतर
वनसर्वथा ॥१८॥ तत्प्रासादस्य मध्येपि कोटिशो मणिमंडपाः ॥ विचित्ररचनाबद्धाः कोटिशो मणिवेदिकाः ॥१९॥
रत्नशृंगाणि तेष्वेव संख्याहीनामनोहराः ॥ रत्नद्वाराणि तस्यैव विपुलान्यपि कोटिशः ॥२०॥ न सूक्ष्मद्वारसंख्या
पि कदाचिदपि सर्वथा ॥ कर्त्तुं न शक्यते नूनं कल्पांतेपि सुरैरपि ॥२१॥ रम्ये सुरतरोर्मूले वेदिका च मनोरमा ॥ सा
तत्तरुप्रसूनानां समूहैः परिवारिता ॥२२॥ समरंदानि पुष्पाणि स्रवंत्येव पुनः पुनः ॥ तासु सर्वासु सर्वत्र शिवलिं-

303

गानि सर्वशः ॥२३॥ स्फुरत्स्फुलिंगरूपाणि तेजःपुंजमयान्यपि ॥ समंदाभिषिक्तानि तत्पुष्पैः पूजितान्यपि ॥२४॥
रत्नप्रासादकांतीनां प्रवाहाः प्रचलंति ये ॥ तैरावृतानि लिंगानि कोटिशः सर्वदा द्विजाः ॥२५॥ तत्पुष्पगंधवाहानां मं
दानामपि सुंदरः ॥ स्पर्शः सुधातरंगानां अन्वयेन सुखावहः ॥२६॥ तत्प्रासाद महाशृंग मणिमंडपशोभया ॥ भूषितानि भ
वंत्येव शिवलिंगानि शांभवाः ॥२७॥ एकैकस्मिन्द्वारदेशे गणाः संति सहस्रशः ॥ तेजोरूपाश्च ते तावत्प्रासादमणि
कांतिभिः ॥२८॥ तत्रांधकारवार्तापि न कदापि मुनीश्वराः ॥ तत्तेजःपुंजसंगेन दीपापेक्षा न जायते ॥२९॥ सूर्यचंद्रा
द्यपेक्षापि तत्रत्यानां न जायते ॥ सुरद्रुमैश्च तत्रत्यैः सुधाफलसमन्वितैः ॥३०॥ गणास्तृप्ता भवंत्येव सर्वदापि
प्रतिक्षणं ॥ न तेषामशनापेक्षा गणानामपि सर्वथा ॥३१॥ तत्प्रासादेवरोत्तुंग शृंगमंडपवेदिका ॥ या तत्र रत्नखचि
तं सिंहासनममापते ॥३२॥ कोटियोजनविस्तीर्णं कोटियोजनमुन्नतं ॥ तं मंदारतरुस्त्रस्त पुष्पमालाविराजितं ॥
३३॥ तदुपर्यंबिकाकांतः स्वतः कांतः परात्परः ॥ प्रविष्टस्तेजसां राशिर्मनोवाग्विषयोपि न ॥३४॥ क्षीरसाग
रसंकाशपट्टकूलपरिच्छदः ॥ नानापरिमलद्रव्यदिव्यचंदनचर्चितः ॥३५॥ त्रिपुंड्रविलसत्फालो रुद्राक्षमणि-
भूषणः ॥ अनंतरत्नसन्नद्धकंधराभरणान्वितः ॥३६॥ रत्नांगदैश्च केयूरैर्मणिमंडलमंडितैः ॥ मुक्ताहारैश्च-

x पंक्ति ५ ' सकम्पाश्च विनीताश्च हेमवेत्र कराः परम् ॥'

विविधैः भूषितो भूति भूषणः ॥३७॥ अमूल्यरत्न खचितै र्वि विधै रंगुलीयकैः ॥ सुरत्न कटिसूत्रेण विपुलेन विभूषितः ॥३८॥ अपार चित्ररत्नौघ किरीट प्रभया युतः ॥ नानामणि समाकीर्ण कर्ण भूषण भूषितः ॥३९॥ रत्नमाला समाक्रांत रत्नछत्रार्बुद श्रिया ॥ रत्नदंडाग्र विलस च्चामरा र्बुदवीजितः ॥४०॥ ध्वजैश्च पाणि संबद्धै र्विविधै र्वृष भांकितैः ॥ परितोव्यावृतः शंभुः स्थितः सुख निधिः प्रभुः ॥४१॥ महा प्रभुं तमीशानं दूराद्दृष्ट्वा गणा अपि ॥

x स[illegible]कं पाश्च विनीताश्च हेमवेत्र कराः परं ॥४२॥ तत्र तावन्न गंधर्वाः किनरा नरा अपि ॥ तावद्दूरं नगमनं तेषां संभावितं यतः ॥४३॥ सुमेरु मूले देवानां स्थलानि विविधानि च ॥ तेषां नारायणा दीनां ताव द्गमनमेव न ॥४४॥ सुमेरु मध्ये कैलासः कदाचित तत्र शंकरः ॥ विहारार्थं समायाति लीला विग्रह सुंदरः ॥४५॥ तत्र तावन्नं दिकेश प्रसादे न कदाचन ॥ नारायणादयः शंभुं प्रणमंत्यति दूरतः ॥४६॥ तत्रापि वेत्र संघात भीता नारायणादयः ॥ ततोपि दूरगाः श्वेतिसकंपाः प्रभुदर्शने ॥४७॥ तथास्ति सदुत्तुंग शृंगप्राकार दर्शनं ॥ तेषां नारायणादीना मति दुर्लभमेवहि ॥४८॥ तत्र तावत्कु मारस्य गणेशस्यापि दूरतः ॥ अवस्थानं ततस्तत्र नान्येषां गमनं मतं ॥४९॥ तत्र स्थितं महादेवं गिरिराजकुमारिका ॥ द्रष्टुमभ्युत्थिता शंभुं प्रपश्यामीति सादरं ॥५०॥ गिरिजापि–

सुखासीनं हिमवंतं नगेश्वरं ॥ पप्रच्छ मंदहासेन दिव्यवेषविराजिता ॥५१॥ अद्य पश्यामि शैलेंद्र शंकरं लोकशंकरं ॥ प्रासादशृंगप्रासाद रत्नसिंहासनस्थितं ॥५२॥ न तत्र सूर्यकिरणाः चंद्रस्यापि न रश्मयः ॥ विद्युतामपि ताराणां तत्र वार्ता न वै ध्रुवं ॥५३॥ तदेकांतस्थलं रम्यं सुंदराणां च सुंदरं ॥ कल्याणानां च कल्याणं पावनानां च पावनं ॥५४॥ पुण्यानां पुण्यमत्यंत ततो नास्त्यधिकं क्वचित् ॥ अद्य तद्दर्शनोत्कंठा पुनः पुनरुदेति मे ॥५५॥ इत्येतद्वचनं श्रुत्वा हर्षाश्रुपरिपूरितः ॥ अंबामाह स शैलेंद्रो बिनयानतकंधरः ॥५६॥ ॥ हिमवानुवाच ॥ शिवे तत्रागमने विलंबस्ते क्रियान्वद ॥ पुनरागमने देवि किमुत्कंठा प्रजायते ॥ त्वद्वियोगव्यथां सोढुं शक्त एव न सर्वथा ॥ अतिदूरेण गमनं मम तत्र गतिर्न हि ॥५८॥ न यत्र सूर्यकिरणाः प्रसरंत्यूर्ध्वमप्यतः ॥ कथं तत्रास्मदादीनां गमनं कमलानने ॥५९॥ इति तद्वचनं श्रुत्वा मेनया सह पार्वती ॥ आनंदाश्रुसमाक्रांता मंदमाह गिरीश्वरं ॥६०॥ ॥ श्रीपार्वत्युवाच ॥ ॥ सायं वा श्वः परश्वो वा पुनरागम्यते मया ॥ त्वया चिंता न कार्यात्र सत्यमेवोच्यते मया ॥६१॥ इत्युक्त्वा प्रार्थितां गौरीं स विलोक्य मुहुर्मुहुः ॥ आनंदाश्रुपरिक्लांतो न च वाच मुवाच च ॥६२॥ तं दुःखितं विलोक्याम्बा मेनकामपि दुःखितां ॥ विरता गमने तस्थौ शिवा शैलेंद्रसंनिधौ ॥६३॥ एवं स्थिता मास मात्रं नयंती दिव—

हरः तृ
अ० ३

सान्निध्या ॥ सल्लापैश्च विहारैश्च शैलेंद्रानंद साधनैः ॥६४॥ अतः परं कदाचिद्वा भवानी पति मंदिरं ॥ प्रयास्यतीति हिमवान् उपचारं दरोद्यतः ॥६५॥ विलक्षणोपचाराणां प्रचारैस्ता मनुक्षणं ॥ पूजयामास गिरिजां वात्सल्येन विशेषतः ॥६६॥ यस्मिन्दिने साधनानि तत्पूजार्हाणि तानिच ॥ दिनांतरे तदन्यानि तदन्यानि दिनांतरे ॥ एवं प्रतिक्षणं शैलः शिवामाराधयन्मुदा ॥ मासं क्षणमिवापश्यन्मेनया सह सादरं ॥६८॥ ततः परं नंदिकेशः शिवाज्ञाकारिणांवरः ॥ समागतो हिमगिरिं गणैर्दिव्यैः समन्वितः ॥६९॥ समालोक्य स शैलेंद्रो नंदिकेशं गणेश्वरं ॥ प्रहृष्टः स्वासनं तस्मै ददौ कंप समन्वितः ॥ ततः पूजां यथा योग्यां कृत्वा नंदीश्वराय सः ॥ कृतांजलिपुटो भूत्वा पप्रच्छ विनयान्वितः ॥७१॥ ॥ हिमवानुवाच ॥ ॥ कुतः समागतो नंदिन्कुशली खलु शंकरः ॥ किमस्ति कार्यमेताव द्भवदागमनेवद ॥७२॥ ॥ नंदिकेश्वर उवाच ॥ ॥ गिरे कुशलरूपस्य शंकरस्य महात्मनः ॥ सर्वदा कुशलं सत्यं कुशलं कुशलं खलु ॥७३॥ यत्पादपद्मस्मरणात्कुशलं सर्वदा गिरे ॥ तस्यनाकुशलं नूनं स एव कुशलप्रदः ॥७४॥ महामृत्युंजयस्तस्य मृत्युवार्तापि दूरतः ॥ नव्याधिवार्तापि गिरे स यतो व्याधिनाशकः ॥७५॥ यन्नाम स्मरणेनापि विनष्टो रोगसागरः ॥ तस्य रोगभयं कुत्र नित्यानंदस्य वस्तुतः ॥
॥७६॥

यदक्षि मीलने नैव ब्रह्मादि प्रलयो भवेत् ॥ तस्यास्त्यकुशलं किंनु साशंकापि न जायते ॥७७॥ नारायणाद्याः सर्वे पि-
ब्रह्मांताः प्रलयं गताः ॥ तान्पश्याहमप्यद्धा शिवपादप्रसादतः ॥७८॥ महामृत्युंजयत्वेन वेदवेदांतसंस्तुतः ॥ महादेव
स्ततस्तस्य कुशलं सर्वदा खलु ॥७९॥ यल्लिंगपूजको भक्त्या (कृत्या) नरो मृत्युं न पश्यति ॥ तस्य देवाधिदेवस्य कुशलं
सर्वथा खलु ॥८०॥ मदागमनवार्तेयं ज्ञापनीया त्वयाधुना ॥ अंबिकायै प्रणामाश्च वक्तव्याश्च मया कृताः ॥८१॥
अंगुलीयकमप्येतन्महादेवस्य भूषणं ॥ प्रदर्शनीयमंबायै येनानंदः प्रवर्धते ॥८२॥ इति तद्वचनं श्रुत्वा गृहीत्वा
प्यंगुलीयकं ॥ ददौ सत्वरमंबायै निवेद्यागमनं च तत् ॥८३॥ तदंगुलीयकं दृष्ट्वा हृष्टा सा भववल्लभा ॥ दधार
शिरसा भक्त्या नेत्रस्पर्शनपूर्वकं ॥८४॥ तदालोकनमात्रेणाप्यानंदाश्रुकणान्विता ॥ स्वात्मसंवेदनं कृत्वा शिव
ध्यानं चकार सा ॥ तेन ध्यानेन नीतोपि भूयान्कालस्तया ततः ॥ स्वात्मसंवेदनं प्राप्य जगाद वचनं शिवा ॥८६॥
कुशली खलु विश्वात्मा महामृत्युंजयस्य तत् ॥ कुशलं सर्वथा ज्ञातं तत्राकुशलधीः कुतः ॥८७॥ स महाकाल
कालोतः कालशंका न जायते ॥ कालाग्निरुद्रो भगवान् पतिर्मम महाप्रभुः ॥८८॥ अपमृत्युविनाशः स्यात् महा
मृत्युविनाशनं ॥ यस्य स्मरणमात्रेण स पतिर्मम शंकरः ॥८९॥ यत्पादपद्मस्मरणान्महाव्याधिर्विनश्यति ॥

स एव मम भाग्येन भर्त्ता सौभाग्य दायकः ॥९०॥ यः सर्व मंगला नाम्ना सा तावद् हमेवीह ॥ तन्नाम तावदेव स्यात्त-
त्पाणिग्रहणादभूत् ॥९१॥ पूजयंति महादेवं सुराः सौभाग्यदायकं ॥ स सौभाग्यप्रदो भर्त्ता मम मृत्यु विवर्जि
तः ॥९२॥ भक्त्या शंकरपूजनोद्यतमतिः भाग्योदया ज्जायते सौभाग्यं मम सर्वदापि न कुतः सौभाग्यतो नन्मु
खा ॥ सौभाग्यप्रदपादपद्मनियमध्यानेन मे सर्वदा सौभाग्यं कुशलं सुखान्यनुदिनं सौभाग्यवृद्धिश्च मे ॥
९३॥ ॥इति श्री शिवरहस्ये हराख्ये तृतीयांशे नंदिकेशागमनं नाम तृतीयोध्यायः ॥३॥ ॥श्री काशीवि
श्वेश्वरार्पणमस्तु ॥ ॥व्यास उवाच ॥ ॥इति तद्वचनं श्रुत्वा प्रहृष्टः शैलपुंगवः ॥ चकार भार्यया साकं विचा
रमति सादरं ॥१॥ नंदिकेशो गणाधीशः प्रमथेष्वधिकः परः ॥ तेन सत्वरमागम्य शिववार्त्ता कृता खलु ॥२॥
अतः परं सन स्यात् त्रिनेत्रप्रेषितोस्य यतः ॥ न तेन सह वक्तव्यं गमन प्रतिबंधकं ॥३॥ अंबिकायाः प्रेषणा
र्थं प्रयत्नः क्रियतां त्वया ॥ बहुकालं किमत्रांबा सती संस्थातुमिच्छति ॥४॥ पतिव्रता पतिं त्यक्त्वा नान्यत्र स्था
तुमिच्छति ॥ पतिसेवा परो धर्मः सर्व संपत्प्रवृद्धिदः ॥५॥ परिचर्यापरं भर्तुः तदनुग्रह कारणं ॥ तेनेष्टसिद्धि-
र्या सा तु न धर्मान्तरतः प्रिये ॥६॥ प्रीतिपूर्वकमद्यांबा प्रेषणीया किलान्यथा ॥ कोपोपि प्रमथेशस्य कथं—

शिवरह.२
१२

यान भविष्यति ॥७॥ हारास्तारतराश्चीराण्यपराभरणान्यपि ॥ रत्ननद्धानि देयानि केयूरादीनि को- हा०.तृ.
टिशः ॥८॥ यानि नूतनरत्नानि सागरेणाहृतान्यपि ॥ तानि सर्वाणि देयानि तदर्थान्येव तान्यपि ॥९॥ यद- अ.५
र्थानीति निश्चित्य तापुनंता नियत्नतः ॥ तानि तावत्तदर्थानि तेषां कृत्यं च किं मम ॥१०॥ अत्युत्तमादि मणयः
कंकणान्युत्तमान्यपि ॥ शिवायै तानि देयानि रम्याण्यन्यान्यपि प्रिये ॥११॥ प्रिये सत्वरमाहारो गौर्यै
रस विजृंभितः ॥ संपादनीयो यत्नेन भक्ष्याद्यैर्विविधैरपि ॥१२॥ स्वाद्यैर्लेह्यैश्च पेयैश्च मधुराम्लैर्मनोर-
मैः ॥ तत्र द्रुमसमुत्पन्नैः फलैरप्यमलैः प्रिये ॥१३॥ आच्छादयंति छायाभिः सुमेरुशिखराण्यपि ॥ नमेरुतरु-
वस्तेपि प्रेषणीयाः सहांबया ॥१४॥ प्रसूनमालाजालानि ते मेरुशिखरावधि ॥ कल्पनीयान्यपाराणि सांद्रा-
णि विपुलान्यपि ॥१५॥ तन्मरंदैः सनीहारैः पुष्पछायासमन्वितैः ॥ सांद्रैर्हिमकराकारैर्नसूरकरसंगमः ॥१६॥
तुषारकरसंकाशे राकाशशि विजृंभितैः ॥ अंबिकायानमार्गोपि प्रच्छन्नः पटमंडपैः ॥१७॥ विमानान्यपि दि-
व्यानि कामगानि मनोरमे ॥ संपादनीयान्यधुना वाहनान्यपि कोटिशः ॥१८॥ चंद्रमंडलसंकाश चंद्रमं-
डलमंडितः ॥ सिंहोपि वाहनं देव्याः गिरिस्पर्धी करोति सः ॥१९॥ औन्नत्यं वर्धते तस्य यस्य यावदपेक्षितं ॥

विलक्षणं तदौन्नत्यं सोपि रत्नपरिच्छदः ॥२०॥ अन्यान्यप्युपयुक्तानि भवानीगमनं प्रति ॥ तानि संपादनीया
नि प्रिये सत्वरमद्य मे ॥२१॥ इत्युक्त्वा गिरिजां दृष्ट्वा दूरादेव गिरीश्वरः ॥ आनंदबाष्पसंवीतः नंदिकेश
मुपागतः ॥२२॥ उपहारादिकं सर्वं भवान्या प्रेषितं मुदा ॥ गृहीत्वा नंदिकेशोपि भुक्त्वा सुखमवापसः ॥
२३॥ तत्प्रेषितं चंदनं च कस्तूरीकर्दमान्वितं ॥ स्वांगे विलेपयामास कृत्वा शर्वार्पणं मुदा ॥२४॥ वसनान्यपि
दिव्यानि दिव्यान्याभरणानि च ॥ गृहीत्वा नंदिकेशोऽथ दधार परया मुदा ॥२५॥ एतस्मिन्नंतरे केचिद्गणा
स्तस्मादुपागताः ॥ विलंबः किमभूदेवमिति सत्वरभाषणाः ॥२६॥ तानप्यभ्यागतान्दृष्ट्वा गणान्गिरि
रस्ततः ॥ तेषां च सांत्वनं तावच्चकार वचनैर्मुहुः ॥२७॥ तया पूजां चकारासौ भवानीसंनिधिं ययौ ॥ अंबां भो
जनसंतुष्टामुवाच वचनं मुदा ॥२८॥ ॥गिरिराज उवाच॥ ॥ अंबान्येपि गणास्तावदधुना समुपागताः ॥
विलंबः किमिति प्रीत्या शंकरप्रेषिताः शिवे ॥२९॥ इत्युदीर्य गिरींद्रोपि सर्वाभरणभूषितां ॥ गौरीं दृष्ट्वाम-
नकां च प्राह मंदं विचक्षणः ॥३०॥ अंबाद्य सुमुहूर्तोस्ति मध्यान्हे पुष्ययोगतः ॥ गुरुयोगाच्च गमने शु
भमेवानुवर्तते ॥३१॥ शंकरेच्छानुसारेण गंतव्यमिति मे मतिः ॥ विलंबश्चेत्पुनः शंभुर्न प्रेषयति सत्वरं ॥३२॥

शिवेच्छामनुसृत्यैवयस्तुकार्यंकरिष्यति ॥ तस्यप्रतिक्षणंसौख्यमन्यथातत्कथंभवेत् ॥३३॥ इत्युक्त्वासत्वरं शैलः नानावाद्यसमन्वितः ॥ मंदंमंदंगृहद्वारान्निर्ययावंबिकायुतः ॥३४॥ ततः पुरोवाचमेनामंबिकेवाहनान्यपि ॥ बहूनिसंतितेकुत्रप्रीतिर्यदविचक्षणे ॥३५॥ विमानानांकामगानामर्बुदंद्वारितिष्ठति ॥ कंठीरवोपिगिरिजेमोत्कंठस्तिष्ठतिप्रियः ॥३६॥ एतासांनिष्ककंठीनांदासीनामर्बुदानिते ॥ तिष्ठंतितानिनेयानित्वत्सेवार्थमनुक्षणं ॥३७॥ इतितद्वचनंश्रुत्वाविमानंवीक्ष्यसादरं ॥ मेनयासहसागौरीमंदवाचमुवाचच ॥३८॥ ॥ पार्वत्युवाच ॥ ॥ अंबत्वयामयासाकंमामेरुशिखरावधि ॥ आगंतव्यंगिरिशेनाप्ययोगः सह्यएवन ॥३९॥ इत्युक्त्वातांसमादायकरेणगिरिमादरात् ॥ आरुरोहवरारोहविमानंकामगंतदा ॥४०॥ देवदुंदुभयोनेदुर्जगुर्गंधर्वनायकाः ॥ ववुर्वाताः शीतलाश्चसुगंधपरिवेष्टिताः ॥४१॥ पुष्पवृष्टिरभूद्व्योममकरंदरसाकरा ॥ ननृतुश्चाप्सरगणाः चारुनाट्यविशारदाः ॥४२॥ रत्नछत्रार्बुदच्छायाचारुचामरकोटिभिः ॥ समाक्रांताबभौतावद्यावन्निर्यातिशांभवी ॥४३॥ तदानींपुरतस्तस्थौचंद्रमंडलमंडितः ॥ पंचाननोपिमामंब्यानसंभावयतीतिकिं ॥४४॥ सिद्धयोनिधिभिः साकंमंबिकायेमुदास्थिताः ॥ मंदारतरुभिः साकंपुष्पमालासमाकुले ॥४५॥

तदानीं मागतः प्रीत्या सत्वरं रत्नसागरः ॥ रत्नभारगणोपेतः तत्र भाव्यागमभूधरः ॥४६॥ उपेंद्राद्यमराः सर्वे दे वदुंदुभिध्वनिं ॥ श्रुत्वा संतुष्टहृदयाः किंमंगलमिदं त्विति ॥४७॥ अद्य प्रायो महादेवनिलयं प्रति पार्वती ॥ गंतुमेवाद्य तानूनं शुभचिन्हप्रभावतः ॥४८॥ स्वप्नेन शुभचिन्हानि कदापीत्यवधारितं ॥ गौरीविवाहसमयेपरं जातानि तानि तु ॥४९॥ इत्युक्त्वा ब्रह्मविष्ण्वाद्या देवाः सर्वे सुहृद्गणैः ॥ स्ववल्लभाभिः सहिताः तदा सत्वर मागताः ॥५०॥ तपोनिष्ठाश्च सिद्धाश्च सर्वे गिरिवराश्रयाः ॥ स्वस्वभार्यादिसंयुक्ताः शिवदर्शनकांक्षया ॥५१॥ तदा किलातिसंमर्दः समभूद्योनसर्वथा ॥ कदाचिज्ज्ञातानुभूतः कृतार्थोस्तेन सर्वथा ॥५२॥ दूराद्विमानशृंगाणि दृष्ट्वा नारायणो मुदा ॥ प्रणतः कमलायुक्तः समुहुस्तद्विलोकयन् ॥५३॥ ब्रह्मादयोपि प्रणताः प्रणताश्च पुनः पुनः ॥ दृष्ट्वा विमानशृंगाणि कृतार्था वयमित्यपि ॥५४॥ ततश्च नंदिकेशोपितत्संमर्दं विलोकनात् ॥ गणान पश्यद्विविधान् रत्नवेत्रैः समन्वितान् ॥५५॥ ततो वेत्राण्युन्नतानि दृष्ट्वा ब्रह्मादयः सुराः ॥ वेत्रमूलग तं भानु विस्मया विष्टमानसाः ॥५६॥ अत्युन्नतानि वेत्राणि वेगेन पतितानि चेत् ॥ तदाघात स्त्वसह्यस्या दिति चिंतासमाकुलाः ॥५७॥ वेत्राघातभयादद्य यद्दिया मो दिगंतरं ॥ तदा कथं वा द्रष्टव्यं भवानीचरणांबुजं ॥ ॥५८॥

९७०

अस्तु वेत्रवराघातस्तावतापि न नः क्षतिः॥ भवानीचरणांभोजदर्शनं दुर्लभं खलु॥५९॥ वेत्रघातेन मूर्छायामंततो मरणेपि वा॥ गौरीचरणवातेन किं न वृत्ते न जीवनं॥ यो गौरीचरणांभोजगंधवाहः स जीवनं॥ तेन संजीवनापेक्षा जीवनान्नोपजायते॥६१॥ गौरीपदाब्जगंधेन गंधवाहः समन्वितः॥ गंधवाहत्वमापन्नः स तावदति दुर्लभः॥६२॥ प्राप्तानि जन्मानि बहूनि पूर्वं नतानि धन्यानि कदाचिदेव॥ न जातमेवेति विचारयामो विमानशृंगं न कदापि दृष्टं॥६३॥ विमानरत्नाश्रितशैलकन्यापदाब्जगंधान्वितगंधवाहः॥ पुण्यैरनंतैरपि दुर्लभोयं प्राप्योधुना वेत्रवराभिघातैः॥६४॥ पश्यंति सर्वे ऋषयोपि सिद्धाः त्यक्त्वा समाधिं फलमेतदेव॥ अंबाविमानाग्रविलोकनेन किं नैव तत्तपसोधुनेति॥६५॥ फलं यदेवाग्रतपः प्रभावात्प्राप्तव्यमस्माभिरिहाधुना तु॥ विमानशृंगाग्रविलोकनेन जातप्रभावः श्रुतिषु श्रुतोपि॥६६॥ अस्माकमिष्टं फलमद्य जातं शिवः प्रसन्नोपि भविष्यतीति॥ चिन्हानि दृष्टानि बहूनि तेषां फलं विमानाग्रविलोकनं नः॥६७॥ यत्पादपद्मप्रभया विमानं तत्पद्मरागान्वितवद्विभाति॥ तद्दर्शनं नैव विलोकितं च शिवापदांभोजमिति स्मरामः॥६८॥ तत्पादपद्मप्रभया समेता वयं क्षणार्द्धेन मुदा भवामः॥ ततश्चलत्येव नतद्विमानं सर्वात्मना सर्वफलाश्रयं च॥६९॥

तदूर्ध्वदेशेषुयदिप्रयातितदा तत्तद्दर्शनमेवनात्र ॥ अयातिचेदत्रसुमेरुमूलं तदावयं धन्यतमाः सुरेषु ॥७०॥
यद्यस्माकमनं तजन्म तपसा प्रीतो भवानीपतिः ॥ भाग्यं चेदनुकूलमद्यबहुधागौरीपदांभोरुहं ॥७१॥ द्रक्ष्या
मः सकलेष्टदाननिपुणं पुण्याकरं पुण्यदं नो चेद्दुर्लभमेव जन्म सुकृतप्राप्यं जगन्मंडले ॥७२॥ ॥इतिश्री
शिवरहस्ये हराख्ये तृतीयांशे गौरीं भगवती प्रयाणन्नाम चतुर्थोध्यायः ॥४॥ ॥श्रीकाशीविश्वेश्वरार्पणम
स्तु॥ ॥व्यास उवाच ॥ ॥ ततः परं सुराः सर्वे तद्विमानावलोकनात् ॥ उत्पश्यंतोपि संत्रस्ता तदा घातभ
यादपि ॥१॥ तद्वत्र छायया त्रस्तो निर्गतोन्यत्र भानुमान् ॥ अदृश्य एवन संजातश्चंद्रवातो पितत्रन ॥२॥
ततः परं प्रचलितं घंटाघोषविजृंभितं ॥ पताकार्बुदसंवीत चामरार्बुदसंयुतं ॥३॥ चंद्रकोटिगणोपेतं ग्रह
मालाविराजितं ॥ प्रतिक्षणं नवमभुक्तद्विमानं मुनीश्वराः ॥४॥ शक्तं दिगंतं तद्गंतुं क्षणेनैव संशयः ॥ तथा
पि मंदमेवेदं चरति प्रीतिपूर्वकं ॥५॥ पुष्पवृष्टिरभून्मध्ये प्रतिक्षणमनुत्तमा ॥ मंदमंदारपवनैः परिवीता
प्रतिक्षणं ॥६॥ मंदारतरवोप्युच्चाः तेन प्रचलितास्तदा ॥ स्वच्छाय या समाक्रांतं कुर्वंतः सादरं मुहुः ॥७॥
तारहारगुणच्छन्न पुष्पगुच्छ समन्वितं ॥ विमानं दूरतो दृष्ट्वा ननृतुर्देवता गणाः ॥८॥ ततः परं मंदमेवमेत्य

नका प्राह तां शिवां ॥ तत्संतोष प्रवृध्यर्थं सुरानुग्रहकांक्षया ॥९॥ शिवे पश्य सुरान्दूरे प्रणतान्भक्तिपूर्व कं ॥ सुरनारीगणं पश्य पश्य सिद्धांगनाः शिवे ॥१०॥ पश्य किंनरनारीणां गणं गंधर्व योषितां ॥ त्वत्पाद दर्शनोद्योगात् अद्यताभिर्विनिर्गतं ॥११॥ मुनिपत्नी गणान्पश्य सिद्धपत्नी गणानपि ॥ नागनारी गणान्प श्य परितः प्रणतान् शिवे ॥१२॥ पश्य नारायणं गौरि प्रणमंतं मुहुर्मुहुः ॥ तस्यैव निकटे लक्ष्मीं प्रणतामति सादरं ॥१३॥ शूलपाणि प्रिये पश्य वाणीं तां प्रणतां मुहुः ॥ चतुर्वक्त्रं प्रपश्यांब शचीनाथं तयायुतं ॥१४॥ गण वेत्रगण त्रस्तान्पश्यान्यान मरानपि ॥ गौरि त्वच्चरणां भोज प्रभासं भावनादरात् ॥१५॥ नात्यं करोति कम लां पश्य तां कमलानने ॥ स्वाभीष्ट सिध्धिरधुना शिवा संप्रेक्षणादिभिः ॥१६॥ वाणी गुणगणान्बत वस्तौ ति पुनः पुनः ॥ स्ववाणी पुण्यतां यात् शिवासंकीर्तनादिति ॥ सुमेरु मूलगमने तदिष्टावाधि रित्यतः ॥ मेरु मार्गेण गंतव्यं अद्य शंकर मंदिरं ॥१८॥ कामगस्य विमानस्य विचित्रा गतिरित्यतः ॥ नान्यमा र्गेण गंतव्यं दयायदि सुरेष्वपि ॥१९॥ इत्युक्त्वा गिरिजां दृष्ट्वा क्षुतृष्णादिक शंकया ॥ विविधानुपहारां श्च कल्पयामास मेनका ॥२०॥ सुधां पीत्वा सुधा स्पर्दि कल्प फलान्यपि ॥ विविधानि समास्वाद्य संतुष्टा—

310

गिरिकन्यका ॥२१॥ दिव्योपहारसंतुष्टा तांबूलललितानना ॥ उत्फुल्लपद्मनयना सा गौरी रुरुचे द्विजाः
॥२२॥ ततः परं प्रचलितं विमानं रत्नराजितं ॥ मेरुमूलमुमादेवान्प्रीणयंत्विति सत्वरं ॥२३॥ ततः सुरगणाः
सर्वे संतुष्टाः प्रणताः शिवां ॥ तुष्टुवुर्विविधैः स्तोत्रैः कृतार्थाः स्म इति द्विजाः ॥२४॥ ॥देवा ऊचुः॥ ॥जय
गौरि जगद्वंद्ये जय शंकरि वल्लभे ॥ जय पद्मानने देवि जय श्री सर्वमंगले ॥२५॥ जय स्मरहरार्धांगगतुंग
सिंहासनाश्रये ॥ जय श्रीकंठ विविधशृंगाररससंश्रये ॥२६॥ जय कर्पूरकस्तूरिचंदनांगविलेपने ॥ जय मंदा
रविलसन्मालिका समलंकृते ॥२७॥ जय हारविहाराढ्य कुचकुंभांतरस्थले ॥ जय रत्नगणाकीर्णकोटीर
वरभासुरे ॥२८॥ जयानंतमणिछन्नसुवर्णाभरणान्विते ॥ जय पूर्णसुधारश्मिसमानवसनोज्वले ॥२९॥
तारहीरवराक्रांत ताटंकघटितालके ॥ मणिदर्पणसंकाशकपोलललिते शिवे ॥३०॥ जय नीलावलीका
खेणी मंडलमंडिते ॥ जय मत्तेभकुंभाभसुधापूर्णकुचाश्रये ॥ उन्मत्तमीनसंकाशनयनश्री समन्विते ॥ गंगा
वर्तातिगंभीरनाभीकांतिविराजिते ॥३२॥ जयाणुमध्ये ललिते रोमालिभ्रमरावृते ॥ उन्मत्तहंसगमने
जय चंद्रालके शिवे ॥३३॥ जय मौनिमनःपद्मसद्माश्रितपदांबुजे ॥ जय भक्तजनानंदप्रवृद्धिकरणोद्यते ॥

शिव०३ २६ — हय०नू अ०५

जयश्रीकंठकंठस्थबाहुवल्ली विराजिते ॥ जयस्व भक्तदुःखाब्धि विशोषण विचक्षणे ॥३५॥ जयानंदसुधा-
बोधिस्वरूपे जयशांभवि ॥ जयस्वर्गापवर्गादि फलदानोन्मुखे शिवे ॥३६॥ पाहि पाहि सुरानस्मानल्
सादंबुरुहार्चकान् ॥ अनन्यशरणानंब जगदालंबने जय ॥३७॥ भजामो भजामः स्मरारि प्रियां तांभजा
मो भजामो भजामो भवानीं ॥ भजामो भजामो भजामो भरण्यामः शरण्याग्रगण्यां भजामः ॥३८॥ भजामो भवत्पा
दपद्मप्रसाद प्रभावानुद्बुद्धाः प्रबुद्धाः सुखेन ॥ भजामश्चिरं गौरि संसारबंधं सनिर्बंधमाशु प्रलीनं कुरुष्व ॥३९॥
भवत्पाद सेवा समासक्तचित्ताः श्रिया सेविताः सर्वदा भाग्यवंतः ॥ भवत्पाद पद्मं विनान्यन विद्मः प्रसादानु
कूलं न विद्मो न विद्मः ॥४०॥ भवत्पादुकाराधका एव लोके नरास्सुर्धराधीश पूज्यातिपूज्याः ॥ भवद्दर्शनं जा
तमस्माकमंब प्रसन्नाः कृतार्थाः कृतार्थाः कृतार्थाः ॥४१॥ सकृद्वा भवत्पाद पद्मप्रभाभिः वयं भूषिताश्चेत्त बाह्यां
बकिंवा ॥ धनं याति दीनेषु दत्तं धनं चेद्धनं वृद्धिमेतीति धन्याव दंति ॥४२॥ प्रतीक्षाकृतातातवद्धांबशीघ्रं
त्वदंघ्र्यंबुजाराधने साधुनापि ॥ न जाता तथापि स्वचित्तेषु दुःखं न वृत्तं भवत्पादपद्मश्रियानः ॥४३॥ अ
नंतैस्तपोभिस्तुलाकोटिदानैस्तथा यागपूगैर्व्रतानां समूहैः भवत्पाद संदर्शनं धर्मबीजं परं तु प्रसादात्तवैवा-

द्रिकन्ये ॥५४॥ भवत्पादपद्मांबुजादेतुवातः करोतु श्रिया संयुता नेव लोकान् ॥ स लोकोपकाराय सृष्टः त्वयापि-
त्वमेवासि माता पिता सि त्वमेव ॥४५॥ भवत्पाद पद्म श्रिया संयुतानां पवित्राणि गात्राणि सर्वाणि गौरि ॥ गिरीं-
द्रोपि धन्यस्त्वदाराधनेन श्रियामेनका सापि धन्यापि धन्या ॥४६॥ तवानुग्रहः प्रार्थितोपि प्रयासैर्न लभ्यः
कृतोपि प्रयासं विनापि ॥ अकस्माद्यदि त्वत्पदांभोज भक्तिस्तदासोपि लभ्यो भवत्येव गौरि ॥४७॥ भवत्पाद
पद्म प्रसादस्य पात्रं वयं तावदंबाधुना धन्य धन्याः ॥ इतोप्यन्यदस्माकमाशास्यमस्ती त्युपेक्षा न कार्या-
त्वया दीन वर्गे ॥४८॥ शिवे किंचिदन्यं न नः प्रार्थनीयं भवत्पाद पद्मानुरागं विनापि ॥ स एवानुरागो महा
भोगहेतुः सुसेतुः सुराभीष्टरत्नांबुराशेः ॥४९॥ नमस्ते कल्याणि त्रिपुरहरवामांगसदने नमस्ते शर्वाणि स्म
रहरमनोहारिवदने ॥ नमस्ते रुद्राणि स्खलदमलनीलोत्पलदलछलच्छाया छन्नच्छदे मधुर गंभीर
नयने ॥५०॥ नमस्ते नीलाद्रिद्रव विपुल कल्लोल विविध प्रभाभावाभावद्वलल्लित नीलालककुले ॥ नम
स्ते भक्तेष्टप्रद चतुर पादांबुज युगे नमस्ते भूयस्ते पुनरपि नमस्ते पुनरपि ॥५१॥ प्रणामानम्रेंद्रप्रमुख वनिता
यल्लकमणि प्रभास्पर्धामर्धा मृतकर शिरोरत्न महिला ॥ मुहुर्दृष्ट्वा दृष्ट्वा निज चरण जाग्रच्छ्वि कृतां स्मित-

3 ॥

व्यक्ता नंदा दिशतु मम कल्याणसरणीं ॥५२॥ ॥इति श्री शिवरहस्ये हराख्ये तृतीयांशे देवी प्रार्थनं नाम पंचमोध्यायः॥५॥ ॥श्री काशी विश्वेश्वरार्पणमस्तु॥ ॥व्यास उवाच॥ ॥इति प्रसादिता देवैः मेरुमूल समाश्रितं॥ स्वर्गलोकमवापांबा दिव्य पुष्पक संश्रिता ॥१॥ पुष्पवृष्टिरभूतत्र सांद्रा सुंदर मंजरी॥ मंद मंदार पुष्पौघ गंधवाह समन्विता ॥२॥ ततः परं सुराः सर्वे विमानवरसंस्थिताः॥ तत्प्रभासंघ संक्रांतां दृष्टु मभ्युद्यतामुदा॥३॥ इत्युन्नत विमानस्थां नशेकुर्द्रष्टु मंबिकां॥ ततः परं गद्गदाभिर्वाग्भिस्तुष्टुवुरंबिकां॥४॥ ॥देवा ऊचुः॥ ॥गिरिराजकुमारिके शिवे चरणं ते कमलामलंकथं॥ न निरीक्षितमादरेण तन्नाग मेरप्यवधारितं नहि॥५॥ अधुना चरणांबुजं शिवे यदि ते दृष्टिपथं प्रयास्यति॥ कथमप्यघकोटिनाशकं सकलाभीष्टदमप्प संशयं॥६॥ नविमान मणि प्रभागणैः कथमप्यादरतोपि सर्वथा॥ नयनैर्न निरीक्षितं तदा कथमस्माकमुमे गतिर्भवेत्॥७॥ शफरीचर लोल दृष्टिभिः कथमप्यंब विलोकया शुनः॥ यदि ते करुणा रसालयः सुखवर्गोप्प पवर्गा भाजनं॥८॥ अति दीनदयालुता शिवे त्वयि वेदैरपि निश्चिता ततः॥ अतिदीनगणेषु वै सुरान् गणयित्वा जगदंब पाहि नः॥९॥ किमशक्यमिहांब ते शिवे नहि दीनो च्चवचः श्रुतं च किं॥ अतिदूर विलोकने पि ते श्रम एवेति विशेषते मितं॥१०॥

निकट स्थित भक्त पालनं करुणावीक्षण दृष्टिभिः शिवे ॥ कथमप्यनुवासमं विके न हिते को पितथा भवेद्भ्रमः ॥१३॥
अधुनाय दिगम्यते त्वया त्रिदशाधीश्वर शंकरालयं ॥ निलयं सुखसागरं स्थिते पुनरप्यागमनं कथं भवेत् ॥ नवयं
गिरिराजकन्यके करुणा पात्र मिति प्रमापिते ॥ पतितानपि पापवयस्युमे पतितेष्वेव सुरान् विलोकय ॥१३॥ तव
दृष्टिर दृष्टताभवेदिति निर्णीतमति प्रयत्नतः ॥ तपसापि न तस्य साधनं भवतीति प्रमितं प्रमातृभिः ॥१४॥ किम
होनदया गिरींद्रजे दयनीयाः कतिते जगत्त्रये ॥ न हितेषु सुराः पतंति वा दुरदृष्टं किमिहामरेष्वपि ॥१५॥ शिवपूज
न साधिता परासुरतासा न कथं मता तव ॥ शिवपूजनभक्तिरस्ति ते ननु मुमे शंकर तत्परा खलु ॥१६॥ तव यद्यपि शंकरे र
तिस्त्वरयागं तुमु मार्धविग्रहे ॥ कथमद्य भविष्यतीति सा गिरिजे नैव हि विघ्निता भवेत् ॥१७॥ अतिदीन सुरानुपाल
नेन च विघ्नो पि पथि प्रियादरे ॥ परमापदगाधसागरे पतितानुद्धर सादरं सुरान् ॥१८॥ यदि गौरि भवेदुपेक्षया गम
नं ते पतिमंदिरं प्रति ॥ स शिवो पि कथं न पृच्छति त्रिदशाः किं न विलोकिता इति ॥१९॥ गमनप्रतिबंधकं च किं क्ष
णमात्रादवलोकने पि ते ॥ अतिदुःखमहाब्धिमालया वलिता एव सुराः शिवे न किं ॥२०॥ किमसाधुजनत्वनिर्ण
यस्तव दे वि त्रिदशेष्व पीति ते ॥ क्षतिरस्ति किमत्र नः शिवे तदपाकर्तुमपि क्षमा न किं ॥२१॥ तव दर्शनमात्रतः शिवे दुरि-

स्य सु
तान्धिः प्रलयं प्रयास्यति ॥ सुखसागर पंक्ति मादमदनुयात्येव शिवार्चकालयं ॥२२॥ गिरिजे सुखदान्यतामगाच्च- हरा॰ नृं
रणस्तेन चतुर्विरीक्षणं ॥ अधुना सुखसाधनं शिवे नतवायास लवोपि सर्वथा ॥२३॥ तवकल्पतरुर्न चांबिके अ॰ ६
नचचिंतामणिरद्रिकन्यके ॥ सुरधेनुरयं परं त्वहो चरणः कोपि सुधाघनो घनः ॥२४॥ सुधाघन तामुपागतः
चरणस्ते सुररूप पादपान् ॥ अभिषिंचतु दुःख पावकं प्रति तत्पानधुना मुहुर्मुहुः ॥२५॥ क्व सुधा घनता क्व
धीरता सुरचित्तांबुजपूजनार्हता ॥ क्व सुरानव लोक नादरः चरणस्यास्य तवांब शांभवि ॥२६॥ करुणाब्धि
तरंगमालयाललितं ते नयनांबुजं शिवे ॥ तदिदं सुरवृंद मंदिरे प्रसरत्वाशु सुखांबुधिप्रदं ॥२७॥ गिरिजा नय
नावलोकनं सुरनारी समवेक्षितं क्षणं ॥ कमलाप्यनुवेलमंबिका चरणांभोजरजः प्रसादजा ॥२८॥ कमलाक
मलैरलं बलिं गिरिजा पादुक पूजन प्रिया ॥ पुरतः पुरतः प्रसर्पति प्रवहंती गिरिजे विलोकय ॥२९॥ किमतः
परमस्ति वांछितं गिरिजा पादुक दर्शनं विना ॥ तदनंत सुखप्रदं शिवे त्रिदशानामपि दुर्दृशा पदं ॥३०॥ क्व चतुर्दशलो
कनाथता क्व कृपा सागरता दयार्द्रता ॥ क्व निरंतर दीनबंधुता क्व तवाद्याप्य कृपा सुरेष्वपि ॥३१॥ क्व वदान्य वदा
न्यमान्यता क्व दयात्तुंगतरंगलोलता ॥ क्व शिवार्चकमातृता शिवे क्व तवाद्याप्य कृता सुरेष्वपि ॥३२॥ ॥६॥

मनुजेष्व पिते शिवे दया गुरुसंसाररतेष्वनुक्षणं ॥ नवयं तदपेक्षया क्षताः क्षणमप्यंब [illegible] विलोकया शुभा ॥३३॥
यदि ते चरणारविंदयोः प्रभयापि प्रभुभूतयानया ॥ नवयं परितो विभूषिता कथमस्माकमुमेपि जीवनं ॥३४॥ अ
मरानवशंकरप्रिये करुणापात्रमिति स्मरामरान् ॥ शरणं तव पादपंकजं न तदन्यच्छरणं सुरप्रियं ॥३५॥ वयमेवमु
मार्धविग्रहं गिरिजामप्यभयाय सर्वथा ॥ शरणं शरणाय कुर्महे शरणं नान्यदपेक्षितं खलु ॥३६॥ अनुवारमु
माहरौ परं प्रणतास्मः स्मरणैरनुक्षणं ॥ गतकल्मषराशयः पुनः प्रणतास्म प्रणताः पुनःपुनः ॥३७॥ यदि दैवतदैव
तं प्रभुं भवमंबां भवभारभीरवः ॥ नवयं प्रणताः पुनःपुनः न कृतांतोपि किमत्र नृत्यति ॥३८॥ अमिता प्रभुता तवांबि
के तवया सैव महेश्वरेपि सा ॥ न तदन्यगतागतः क्व वा शरणं नः शरणार्थिनामपि ॥३९॥ न महाप्रभुसेवकाः परं
भवदुःखं न भवं प्रवेदिरे ॥ न मृगेंद्रगृहेषु कोकसा करिमुक्ताफलकं धरेष्वपि ॥४०॥ यदि ते चरणारविंदयोः प्रसवः
कोपि समर्पितस्तदा ॥ अधमोपि नरो जगत्पतिर्भवतीत्येव वदंति साधवः ॥४१॥ अमरानतिदीनवत्सले क्षण
मप्यंब विलोकयादरात् ॥ करुणारससारधारया दरसंसारदवातुरामुमे ॥४२॥ यदि तेन विलोकनं तदा सुरता
यामपि नादरोस्ति नः ॥ नतया फलमस्ति किं त्वया गिरिजे कल्पतरुस्वरूपया ॥४३॥ तव वा किमुपेक्षया फलं–

8/3

प्रविलापोपिनन: श्रुतस्त्वया ॥ अयिमातरूमे किमस्ति केष्वदयाकारणमस्ति शांभवि ॥४४॥ शिव एव दयानि-
धिः शिवे तव तावत्कठिनं मनोयतः ॥ अधुनापिनदीनवीक्षणं क्रियते सादरमंबुजानने ॥४५॥ सुतमप्यपराध
संकुलं जननी पालयतीतिनः श्रुतं ॥ किमुमेवद पातकानिनः तवनामस्मरणेप्यनुक्षणं ॥४६॥ बहुतूलगिरिप्रदा
हकोदवलेशोन शिवे तथैनसां ॥ कुलमाशु विनाशमेत्यहो शिवनामस्मरणाग्निलेशतः ॥४७॥ यदिपापविनाश
साधनं शिवनामस्मरणं नशैलजे ॥ वदतर्हि किमस्ति साधनं वद सत्यं वदतद्धि मश्शेत: ॥४८॥ निगमेष्वघनाश
साधनं शिवनामस्मरणं परं श्रुतं ॥ तदिदं नकथं विनाशकं विविधाघौघकुलस्य शैलजे ॥४९॥ शितभूतिविभू
षणः शिवं यदितावत्प्रणतस्मरन्मुदा ॥ प्रपतंतिमहाघकोटयः पुनरुत्थानविवर्जिताः परं ॥५०॥ वयमीश्व
रलिंगपूजकाः क्वमहापातकभीतिरद्रिजे ॥ नमहानलसंन्निधिंगतो हिमभीतः पतितः प्रधावति ॥५१॥
क्षुधितोप्यमृताशनः पुमान तृषितोपीतियथातथा शिवे ॥ शिवलिंगसमर्चनप्रियो नचदुःखांबुनिधिंप्रया
स्यति ॥५२॥ नचशंकरपूजकार्चकोप्यघलेशाश्रयतामुपैत्यतः ॥ अघसंश्रयवार्तयापिनानवयं शैलसुते
समावृताः ॥५३॥ कृपया परया शिवप्रिये त्वरया पश्य दयासुधाकरान् ॥ कुरु कापिनतावता क्षतिः नसुधार-

हरः तृ
अ० ६

ष्टिमसमानता तव ॥५४॥ गिरिजे नचकोररक्षकः क्षणदानायक इत्यपि श्रुतः ॥ नहितेन ससेवितस्तथा कृपया
पश्य सुरान् शिवप्रिये ॥५५॥ किमनाथसनाथतां त्वया गिरिजे कर्त्तुमनुद्यमः कृतः ॥ किमनेन फलं फला
र्थिनां किमयं धर्म इति श्रुतस्त्वया ॥५६॥ नभवत्कृपया विना गतिः यदि गत्यंतरमस्ति नस्तदा ॥ तवमास्तु-
निरीक्षणं ततो गतिहीना नमरान वांबिके ॥५७॥ अस्माकं शरणागतामरशिरः कोटीरहीरप्रभापारावार
तरंगसंगत शिवाकांतांघ्रिपंकेरुहे ॥५८॥ पद्मायद्धक मल्लचं चलतले श्री चंदनापादुके दुष्टारिष्टनिवा
रके शरणमितित्यनन्यं न मन्यामहे ॥५९॥ ॥ इति श्री शिवरहस्ये देवताप्रार्थनं नाम हराख्ये तृतीयांशे षष्टो
314 ध्यायः ॥६॥ ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ ॥ व्यास उवाच ॥ ॥ इति वृंदारकास्तुत्वा कृतांजलि
पुटामुहुः ॥ उत्पश्यंतो विमानाग्रं ननृतुः स्वसुहृद्गणैः ॥१॥ ततः शिवापदांभोजप्रभाधामानुलोकनं ॥ कृत्वा
कृतार्थतां प्राप्य प्रणतास्ते मुहुस्ततः ॥२॥ ततः प्रचलितं तावत्स्वर्गलोकमतीत्य तत् ॥ ब्रह्मलोकं विष्णुलो
कं कैलासमगामत्ततः ॥३॥ तदानीममराः सर्वे परस्परविलोकनैः ॥ परिश्रांताश्च तुष्टास्ते वार्तां चक्रुर्य
थोचितां ॥४॥ पश्यंतु गतमेवेदं विमानमतिसत्वरं ॥ तन्नास्मद्दृष्टिविषयस्तत्कांतिर्दृश्यते सुराः ॥५॥ ॥

तपःफलितमस्माकं तद्धारावीक्षणादपि ॥ द्रष्टव्यं कथमस्माभिः शिवाचरणपंकजं ॥६॥ तद्धारादर्शनेनैव कृ- तार्थाः प्रमथा अपि ॥ अस्माकं तत्र का वार्ता तावतैव कृतार्थता ॥७॥ यत्पादपद्मरजसः प्रसादेन जगत्त्रयं ॥ समुत्पन्नमिदं देवाः समुत्पन्नास्तदद्भुतं ॥८॥ तद्धाराप्रभया धन्नं सुरलोको ऽति पावनः ॥ सत्यलोकोपि वैकुंठो प्यय मत्यंतपावनः ॥९॥ अतः परिमहास्माकमग्रेपि कुशलं खलु ॥ तत्पादप्रभया सर्वे प्यावृतास्मो वयं क्षणं ॥१०॥ किंकिं पुण्यं पुराचीर्णं नविघ्नस्तत्फलेन तत् ॥ अनेनानुमिदं देवाः तद्धारामंडलेन हि ॥११॥ अस्माकम- पिगात्राणि पवित्राण्यद्य धारया ॥ शिवचरणकांतीनां साधारा खलु दुर्लभा ॥१२॥ दुर्लभा दुर्लभा धारा- शिवाचरणकांतिजा ॥ सापावनं पावनानां शोभनानां च शोभनं ॥ अस्मन्मणि किरीटानां तद्धाराकांतिसंग मात् ॥ कांतिः प्रवृद्धा संगेन तेन किंचित्र मद्भुतं ॥१४॥ हेम्नः पावकयोगेन कांतिवृद्धिर्यथा तथा ॥ तद्धारा- संगमाद्वृद्धा किरीटमणिभूः प्रभा ॥१५॥ इत्यन्योन्यं वदंतस्ते तद्वार्तामेव ते पुनः ॥ कुर्वंतः सुखमापन्नास्ते हर्षाश्रुसमावृताः ॥१६॥ ततः परं तद्विमानं कैलासमगमद्विजाः ॥ अवतीर्य ततो गौरी मेनकामाह सादरं ॥ ॥१७॥ चित्राणि मंदिराण्यत्र सुंदरास्तरवः परं ॥ ये ते हाम विहारार्हाः प्रदेशाः सुरदुर्लभाः ॥१८॥ न दृष्टास्ते व-

या पूर्वं अधुनानात्रशंकम्॥ ततः प्रपश्यतच्चित्रं गिरिराजसमन्विता ॥१९॥ इत्युक्तं तद्वचः श्रुत्वा मेनया गि
रिणा सह॥ कैलासद्वारसंनद्धां वेदिकां कांतिसंवृतां ॥२०॥ विचित्ररत्नखचितां वेदिकां वीक्ष्य पर्वतः॥ अ
तिविस्मयमापन्नस्तद्रत्नप्रभया वृतः॥२१॥ किमाश्चर्यमिदं गौरि रत्नान्येतादृशानि न॥ रत्नाकरेपि रम्या
णि दृष्टपूर्वाणि न ध्रुवं ॥२२॥ कैलासनगरद्वारवेदिका रत्नकांतिभिः॥ कांतमेतच्छरीरं मे दृष्टपूर्वमिदं तु न
॥२३॥ कांतिः फणिफणारत्नकांति दूरीकरोत्यतः॥ वेदिका संगता सेयं विमानेनापि संगता॥२४॥ एतत्कांति
समाक्रांतं विमानमिह राजते॥ अत्याश्चर्यमिदं दृष्टमग्रे किं किं भविष्यति॥२५॥ ते धन्याः प्रमथाः सर्वे वे
दिजा कांतिसंवृताः॥ नियमत्र प्रभारूप ------ विवर्जिताः॥२६॥ अहो महदिदं भाग्यं दृष्टमेवमिदं स्थलं॥
अस्माभिरीदृशं स्थानं न श्रुतं च कदाचन॥२७॥ इत्युक्तं गिरिजा वाक्यं सा श्रुत्वा गौरी शिवप्रिया॥ तत्रो
पविष्टा तेनापि मेनयापि सहादरात् ॥२८॥ ततः परं मेनका सा सुंदरैः सुरभूरुहैः॥ फलान्यादाय रम्याणि
गौरी माह मनोहरं ॥२९॥ एतादृशानि दृष्टानि न फलानि पुरा मया॥ तरवोपि तथा दृष्टाः प्रकृष्टास्तुष्टि
हेतवः॥३०॥ एतद्दर्शनमात्रेण संपूर्णमुदरं शिवे॥ अतः परं भक्षणे [illegible] च्छा जातु गौरि न जायते॥३१॥

3/s

इत्युक्तं तद्वचः श्रुत्वा गौरी तामाह मेनकां ॥ अत्राप्यद्भुतवृद्धिस्ते तथा न मम जायते ॥ ३२ ॥ अंतःपुरप्रवेशे न सुखं यद्य द्भविष्यति ॥ तदपूर्वं भवत्येव प्रतिक्षण म संशयः ॥ ३३ ॥ इत्युक्त्वा परितो दृष्ट्वा तान्या स्वाद्य-फलानि च ॥ मंदं मंदं प्रविष्टा सा गिरिजा शिवमंदिरं ॥ ३४ ॥ तत्राद्भुतानि दृष्टानि मंदिराणि बहून्यपि ॥ रत्नै रेव विचित्रैस्तैः कृतानि सुमनोहरं ॥ ३५ ॥ सुधाप्रवाह संवीताः कुल्यास्तु त्यानकै रपि ॥ तत्तीर कल्पत रवोप्य पारफल संभृताः ॥ ३६ ॥ अंबागमनकालज्ञैः प्रहृष्टैस्तरुभिः सदा ॥ पुष्पवृष्टिः कृता कापि यान पूर्वम-भून्मुहुः ॥ ३७ ॥ तत्र तत्र तरुमूले षु रत्न लिंगानि कोटिशः ॥ दृष्ट्वा सा पूजयामास मरंदैः कुसुमैरपि ॥ ३८ ॥ तन्मध्ये मंडपस्तावदखंड मणि मंडितः ॥ योजनायुत विस्तीर्ण स्तावद्यो जन मुन्नतः ॥ ~~शतयोजन विस्तीर्णं प्रभाकूटविराजितं~~ ॥ तत्रैव प्रतिमाः काश्चिदपूर्वाश्चातिसुंदराः ॥ हृष्टाः सहासा श्चान्योन्यं गानतान विजृंभिताः ॥ ४० ॥ पर्यंक मेकं तत्रैव शतयोजन मुन्नतं ॥ शतयोजन विस्तीर्णं प्रभाकूट विराजितं ॥ ४१ ॥ मंदार पुष्प संवीतं शयनार्हं शिवस्य तत् ॥ शिवा विहार गंधेन तत्संवीत मनुत्तमं ॥ ४२ ॥ रत्नसोपान संबद्ध मष्टदिक्षु विशेषतः ॥ सोपानेष्वपि पुष्पाणि नूतनानि क्षणे क्षणे ॥ ४३ ॥ तादृशं मंच मालोक्य शैलेंद्रो मेनया सह ॥ उवाच वचनं चारु भवानीं च विलोक्य सः ॥ ॥ ४४ ॥

इदं प्रायो महेशस्य विलाससदनं प्रिये ॥ दृष्टमानंददं जातं स्पृष्टं चेत्किं प्रयच्छति ॥४५॥ गौरीमनोहरं रम्यं
शंकरस्य मनोहरं ॥ पर्यंकं दृष्टमेवेदं धन्योहं नात्र संशयः ॥४६॥ इदं न दृष्टममरैर्गंधर्वैरुरुगैरपि ॥ किन्न
रैरपि सिद्धैर्वा गणैरपि विशेषतः ॥४७॥ एतादृशे मणिमये पर्यंके शंकरालये ॥ गौरी तिष्ठति संतुष्टा शंकरानुग्र
हात्परं ॥ एतादृशं स्थलं तावद्दुर्ग्रयापि तपस्यया ॥ नलभ्यते सत्यमेव न क्वाप्येतादृशं स्थलं ॥ अस्मत्प्रीतिप्र
दानाय गौर्यातावत्प्रदर्शितं ॥ नाधुना शंकरोऽस्तीति तस्मिन्सत्यति दुर्लभं ॥५०॥ सभामंडपपर्यंतं संचरंति गणा अ
3/6 पि ॥ अमराणां न वार्तापि द्वारि तेषामेव स्थितिः ॥५१॥ सभामंडपमालोक्य कस्तृप्तिं न प्रयास्यति ॥ तन्मंडप
मणिस्तंभगांभीर्यं वर्ण्यते कथं ॥५२॥ तदर्बुदमणिस्तंभप्राकारपरिवेष्टितं ॥ अखंडास्ते मणिस्तंभाश्चित्र
रत्नविराजिताः ॥५३॥ घनीभूतारत्नकांतिस्तत्रास्तरणमव्ययं ॥ कोटिशः संति परितः रम्यास्ते रत्नमंडपाः
॥५४॥ तेषु सर्वेषु पुष्पाणि मंदारतरुनिःसृताः ॥ मरंदधारासंकीर्णास्तेषु लिंगानि कोटिशः ॥५५॥ तदेव रम
णीयानां रमणीयं मनोहरं ॥ रमणीयत्वमेतस्य किं वक्तव्यमतः परं ॥५६॥ एतादृशं विहायांबा स्थलंम
न्मंदिरे कथं ॥ स्थातुमिच्छति कल्याणि प्रेम्णापि सततं प्रिये ॥५७॥ यादृशानि फलान्यत्र तादृशानि फलानि न ॥

शिवर० २२

अस्मन्मंदारतरुषु तथा सुरतरुष्वपि ॥५८॥ तैरर्कतरुसंकाशैर्मंदारतरुभिश्च किं ॥ एते वि- इरा० तृ०
लक्षणा एव तरवः सफलाः सदा ॥५९॥ नाममात्रेण समता तरूणां नार्थतस्तथा ॥ अतस्ते तरवस्तावन्नैत अ०७
त्तरुसमाः प्रिये ॥ एतत्तरुफले दृष्टे ध्यानं दोपि प्रजायते ॥ नतत्तरुफलैरेवं भक्षणे नापि भूरिशः ॥६१॥ इत्यु
क्त्वा मणिपर्यंकं दूरान्नत्वा पुनः पुनः ॥ गिरिः प्रदक्षिणीकृत्य स्वंकृतार्थममन्यत ॥६२॥ ततः परं घनी
भूतविचित्रमणिकांतिषु ॥ मृदुलेषूपविश्यांबा गिरिमाह विचक्षणा ॥६३॥ तल्पैरनल्पैर्मृदुलैः सुख
स्पर्शैस्तु नेदृशाः ॥ स्वतः सुगंध एवायं रत्नकांतिसमुच्चयः ॥६४॥ इदमेतादृशं रम्यं स्थलमेतदपेक्षया ॥
अनंतगुणिते रम्ये स्थले तिष्ठति शंकरः ॥६५॥ तं मेरुशिखराग्रेषु रत्नैर्नैकेन निर्मितः ॥ प्रासादस्तस्य
शृंगेषु प्रासादः कश्चिदुत्तमः ॥६६॥ तत्रास्ति स महादेवः परमानंदविग्रहः ॥ अनंते दुरविप्रख्यः प्रख्या
तः श्रुतिषु स्मृतः ॥६७॥ तद्दर्शनार्थमधुना गंतव्यं त्वरया मया ॥ भवतां गमनं तत्र नैव संभावितं गिरे
॥ चंद्रमंडलमादातुं नरः किमभिवांछति ॥ कृतायामभिवांछायां कथं तत्तेन लभ्यते ॥ एवमेव गिरि
श्रेष्ठ तन्मंदिरविलोकनं ॥ दुर्लभं तत्र गमनं तत्र नैव संभावितं गंतव्यमित एव हि ॥ निधीन्यस्य गिरि-

श्रेष्ठ पश्याभरण मंडपान्॥ दुकूलमंडपान्पश्य विचित्र मणि मंडपान्॥७०॥ मंडपे मणयः संति ते सर्वेभीष्टदाः

सदा॥ अपेक्षितं प्रयच्छंति स्वेयमानीय सादरं॥७१॥ इत्युक्त्वा रत्नपात्रेषु विशालेषु तदा शिवा॥ मनोहरान्नपूर्णे

षु चक्रास्परिवेषणं॥७२॥ ततो भुक्तं तया साकं मेनया शिवया सह॥ सुधा फलानि मुक्तानि पक्वान्नान्यपि कोटिशः॥

७३॥ पश्चादाचम्य सुधया तांबूलमपि सादरं॥ गृहीत्वा विस्मयापन्नो गिरिरानंद संवृतः॥७४॥ ततः परं विचित्रा

णि वसनानि ददौ शिवा॥ कल्पांतेपि न नश्यंति मलिनान्यपि तानि न॥७५॥ तेषामुज्वलतां तावद्बुधिमे तिप्रतिक्ष

३/७ णं॥ परिधानेपि जीर्णत्वमसंभावितमेव हि॥७६॥ रत्नान्यपि ददौ तस्मै सा रत्नाभरणान्यपि॥ अपराणि विचि-

त्राणि मेनकायै ततः परं॥७७॥ ऐरावत मदस्तंभे हे तु भूतान्नगजानपि॥ तुरंगांश्च तथो तुंगान्देवाश्वमदनाशकान्

॥७८॥ ददौ गाश्च विचित्रास्ता सुरगोमदनाशनीः॥ प्रवृत्ताः सर्व फलदाः मंदारानपि कोटिशः॥७९॥ विमानान्य

पि दिव्यानि कामगान्यपि कोटिशः॥ अन्यान्यपि विचित्राणि फलानि प्रददौ शिवा॥८०॥ ददौ परिमलद्रव्याण्यपा

राणि शिवप्रिया॥ ददौ हारानुदारान्सा तारहारसमावृतान्॥८१॥ गृहीत्वा तावदेतावदंबादत्तमिदं गिरिः॥ वियो

गभीत्या संतुष्टोप्यसंतुष्ट इव स्थितः॥८२॥ एतस्मिन्नंतरे काले विमानवरसंयुताः॥ अन्ये गणाः शंकरेण प्रेषिताः सम-

 पागताः ॥८३॥ ते सर्वे नंदिकेशेन गणैरन्यैश्च संवृताः ॥ कैलासनगरद्वारवेदिकायां परं स्थिताः ॥८४॥ ॥ गणा ऊचुः ॥
विलंबः सम भून्नंदिन् किमेतदुचितं तव ॥ स्वामिकार्यार्थमुद्युक्तो न विलंबं करोति हि ॥८५॥ कदाचित्कुपितः स्वामी
यदि कार्यविरोधतः ॥ तदा कथं जीवनं स्यात्सेवकानां विशेषतः ॥८६॥ सेवकानां च यत्कृत्यं तत्कृत्यमतियत्नतः ॥ क-
र्तव्यं सत्वरं तेन तुष्टः स्वामी भविष्यति ॥८७॥ रुष्टश्चेत्कष्टमेवास्य फलं किं न भविष्यति ॥ तत्कष्टापेक्षया कष्टं स्वामि
कार्यविनाशने ॥ तदेव कार्यं कर्त्तव्यं भृत्यैर्येन स्वनायकः ॥ तुष्टो भवति तद्भिन्नं न कार्यं प्रलयेपि वा ॥८९॥ अन्यानुरो
धकृत्यैः किं स्वामिकार्यविरोधतः ॥ सर्वप्रयत्नैः कर्त्तव्यं सर्वथा स्वामितोषणं ॥९०॥ इत्युक्तं तद्वचः श्रुत्वा नंदिकेशो
विचक्षणः ॥ प्राह प्रसन्नवदनं विनयान्वयसंयुतं ॥९१॥ ॥ नंदिकेश्वर उवाच ॥ ॥ यूयमाप्ततमा एव शंकरस्य
न संशयः ॥ भवदुक्तं हि तत्सत्यं न तत्राप्यस्ति संशयः ॥९२॥ यदि कार्यांतरे स्वामी नियोजयति मां तदा ॥ तत्क्ष-
णेनैव कर्त्तव्यं असाध्यं न जगत्त्रये ॥९३॥ अंबा स्वतंत्रा तस्यास्तु दर्शनं मम दुर्लभं ॥ तस्यास्त्वरातु केनापि क
र्तुमेव न शक्यते ॥९४॥ सा स्वेच्छया विहारश्चेत्करिष्यति तदा कथं ॥ अस्माकं प्रतिबंधोपि कर्त्तव्यः सादरं सदा ॥९५॥
महाप्रभुत्वमंबायाः शंकरस्य यथा तथा ॥ तदग्रे वक्तुमिच्छापि कथं वा भवति स्फुटं ॥९६॥ कोटियोजनदूरस्थाः

सुराः सर्वेपि सादराः ॥ पूजार्थमागतास्तेषां दर्शनं जातमेवन ॥ प्रणामैस्ते परिश्रांताः स्वेदधारापरिप्लुताः ॥ नत्वार
भिः समुद्रेपि पूर्णे प्युद्वेलतां गनः ॥९८॥ देवांगनाश्च पद्माद्याः प्रणतास्ताः पुनःपुन ः ॥ श्रांताः केवलमंबायाः तासुदृष्टि
र्नसर्वथा ॥९९॥ विमानरत्नमारूढा मृडानी संस्थिताद्रदा ॥ उत्पश्यंति सुराः सर्वेस्वस्वदारसमावृताः ॥१००॥ अहोसंभ्र
मस्तावद्वाङ्मनसगोचरः ॥ तद्विहारप्रभावोपि वेदनामप्यगोचरः ॥१०१॥ अहो शिवाविलासोयं विलासः शैववर
वहि ॥ तद्दर्शनं नपुण्यानां राशिभिर्यो प्रजायते ॥१०२॥ तदागमनवेलायामुत्साहायादृशाः पुरा ॥ तादृशानकदाप्यग्रे
3/8 भविष्यंति विशेषतः ॥३॥ विलक्षणः ससमयः शिवागमनसंयुतः । तानितूर्याणि तेवाताः तादृशाः पुष्पवृष्टयः ॥४॥
तेजयध्वनयो देव्यास्तानिस्तोत्राणि येः सुरैः ॥ कृतानि श्रवणेनापि सिद्धिदानि पदेपदे ॥५॥ सिद्धानामपि संम
र्दो गंधर्वाणां चकोटिशः ॥ किन्नराणां नांमुनीनां च वक्तुमेवनशक्यते ॥६॥ वेत्रप्रहारसंत्रस्ताः सर्वेनारायणा
दयः ॥ अद्यापि कंपसंपन्नाः सुरनारीगणैः सह ॥७॥ संत्रस्ता अपि सानंदाः सर्वेनारायणादयः ॥ सवाग्विषयतां
नापमनोविषयतामपि ॥८॥ नवृत्तं भवतां भाग्यं तत्संमर्दावलोकने ॥ रत्ननीराजनानां च राजयस्तास्तथाविधाः
॥९॥ देवांगनाभिः सर्वाभिः तदागानपुरःसरं ॥ नीराजनानि दत्तानि तेषां संख्या न सर्वथा ॥११०॥ नीराजनप्रभा-

कूटो मेरुकूट प्रभाकरः ॥ स किन्न दृष्टः सहसा भवद्भिर्मेरुकूटगैः ॥ ११ ॥ मन्ये त्राणां फलं जातं तत्सं मर्दावलोकने ॥ शंकरस्यैव कृपया तत्फलं जातमद्य मे ॥ १२ ॥ तत्फलेन पवित्रस्य मम भीतिर्न सर्वथा ॥ शंकरेणापि तज्ज्ञातमतः केन भयं मम ॥ १३ ॥ स सर्वज्ञो महादेवः कुपितः किं मयि प्रभुः ॥ अस्वातंत्र्यमपि ज्ञातं तेनस्याऽगमनो त्सवे ॥ १४ ॥ इदानीं संप्रविष्टास्ति कैलास भवनांतरे ॥ तत्रास्माकं प्रवेशः किं येन स्याद्गमनत्वरा ॥ १५ ॥ अतः परं प्रयत्नोपि कर्त्तव्यो भवतां यदि ॥ साम र्थ्यं तत्र वार्तावाकः करिष्यति सत्वरं ॥ १६ ॥ स्वं वदत्सु सर्वेषु गणेष्वन्योन्यमादरात् ॥ वाणी कापि समुत्पन्ना तस्मिन्नेवाशरीरिणी ॥ १७ ॥ अंबा प्रयातु शैलेंद्रो मेनया सह मंदिरं ॥ स्वमंदिर परिष्कारः कर्त्तव्यस्तेन किं शिवे ॥ १८ ॥ विलंबोपि क्रियानैवं शिवदर्शनकालसे ॥ शिवानुग्रह वांछायां विलंबो युक्त एव न ॥ १९ ॥ इति तद्वचनं श्रुत्वा सिंहमारुह्य शैलजा ॥ प्रेषयामास शैलेंद्रं सर्वसंपत्समन्वितं ॥ २० ॥ सा दृष्टा गिरिणा पुनः पुनस्मादृष्ट्वाथ सा मातरं ॥ सा दृष्ट्वापि तया पुन पुनरपि प्रेम्णा पुनर्दर्शने ॥ इच्छां सापि चकार सोपि गिरिजा रानंदधारावृतां प्राहांबामनुवा रंवकृपया मां पश्य पश्ये त्वयि ॥ २१ ॥ ॥ इति श्री शिवरहस्ये हराख्ये तृतीयांशे मेरुपार्थनं नाम सप्तमोध्यायः ॥ ॥ ७ ॥ ॥ श्री काशीविश्वेश्वरार्पणमस्तु ॥ ॥ व्यास उवाच ॥ ॥ आरुह्य सिंहमंबा सा क्षणमात्रं ततः परं ॥ १ ॥

शंकरप्रेषितं दिव्यं विमानवरमाश्रिता ॥१॥ तस्मिन्विमाने संविष्टा यदा शंकरवल्लभा ॥ तदा दुंदुभयो नेदुः जय
शब्दपुरःसरं ॥२॥ ततस्ते प्रमथाः सर्वे शर्वाणीचरणांबुजं ॥ स्मृत्वा प्रहृष्टाः प्रणताः पुनः पुनरनातुरः ॥३॥ तूर्य
दुंदुभिघोषैस्ते जयध्वनिपुरःसरं ॥ वेत्रहस्ताः प्रचलिताः कंपयंतः सुराचलं ॥४॥ शिवनामानुवादेन शिवासंतो
षहेतुना ॥ सानंदा एव सर्वेपि धावंतः पुरतोभवुः ॥५॥ अतुलानामानितान्यंबा मनोज्ञानि शिवप्रिया ॥ आनंद
परिपूर्णा सा स्मरंती शंकरं मुदा ॥ शिवनामानि गायंती मधुरं मधुरस्वरा ॥ मधुराक्षरसंपन्नान्यनुवारं शिवाप्रि
या ॥७॥ शिवहर भव भर्ग भीम शंभो स्मरहर शंकर शर्व चंद्रमौले ॥ त्रिनयन वृषकेतनांतकारे गिरिश मृड शरुद्र पा
हि ॥८॥ शंभो भर्ग भवेंदुशेखर महादेव स्मरारे हर श्रीकंठेश महेश शंकर मृडत्र्यक्षाक्षरो मापते ॥ सर्वेश्वर रुद्र
भीम भगवन् शूलिन् कपर्दिन् शिव श्री मृत्युंजय विश्वनाथ गिरिश श्रीवामदेवावमां ॥ ९ ॥ शंभुं शंकरमिंदुशेख
रमुमाकांतं महेशं शिवं शर्वं रुद्रमनंगदक्षमथनं मृत्युंजयं शंकरं ॥ भर्गं भूतपतिं भवं पशुपतिं फालाक्षमु
क्षध्वजं भीमं दिग्वसनं मृडं हरमजं श्रीकंठमीशं भजे ॥१०॥ शंभो क्वापि न तारका अपि न वा चंद्रो न वा भानुमा
न्नान्यः कोपि सुरोत्र कुत्र वसति श्रीचंद्रमौले तव ॥ प्रासादद्युतिकोटिकोटिघटिता दृष्टिर्ममा द्याधुना वि–

गिरिश

विद्युत्संघसमावृते च भगवन् सर्वात्मना कुंठिता ॥ ११ ॥ एतन्निर्मितमत्र किं मणिमयस्थानं प्रभामंडलैः ॥ व्याप्तं मंडितमेव मंडलमिदं किं मंडनं वांछति ॥ स्थानं नैव विलोक्यते घनतरं गंभीरमेतादृशं तेजःपुंजघनं घनांतरमिदं नापेक्षते सर्वदा ॥ १२ ॥ यत्रानंतसुरादिसेवकगणाः स्वस्ताः स्वनारीगणैः साकं शोकविवर्जिताः प्रतिदिनं कंपायमाना अपि ॥ सेवंते तदनुत्तमं स्थलमुमाकांतो विहायात्र किं तिष्ठत्यत्र महाप्रभुमतं रम्यं स्थलं केवलं ॥ १३ ॥

॥ व्यास उवाच ॥ ॥ इत्युक्त्वा सा शिवा तस्मिन् विमाने विपुले स्थिता ॥ एकैवाहं वसामीति चिंताव्याकुलमानसा ॥ १४ ॥ महेश निकटे तावदेवं गंतुं न शक्यते ॥ परिचर्यार्थमत्रान्याः कल्पनीया मनोरमाः ॥ १५ ॥ ममैव यदि तत्राद्य गम्यते शंकरोपितां ॥ विलोक्य सादरं किं मां वदिष्यति विशेषतः ॥ १६ ॥ एकाकिनी कथं नारि विमाने विपुले स्थिता ॥ नारीपरिजनाक्रांता नारी तावद्धि राजते ॥ १७ ॥ अमरप्रवरार्धांगमहमेकाकिनी कथं ॥ गंतुमभ्युद्यता धीरा वीरशंकरमंदिरं ॥ १८ ॥ इत्यालोच्य तदा गौरी दिव्यसौंदर्यविग्रहान् ॥ ससर्ज क्षणमात्रेण कोटिशो मुनिपुंगव ॥ १९ ॥ रत्नाभरणसंपन्ना यौवनाक्रांतविग्रहाः ॥ रूपलावण्यसंपन्नाः नवा एव प्रतिक्षणं ॥ २० ॥ विचित्रमाल्यवसनाः सुरनारीविनिंदकाः ॥ रूपेणानन्यतुल्येन स्वयौवनमदेन च ॥ २१ ॥ रुद्रवीणाः

३२०

समादायता: सर्वाश्च पृथक् पृथक्॥ शिवनामानि दिव्यानि गायंति स्म मनोहरा:॥२२॥ तानि नामानि शृण्वंती
परमानंदरूपिणी॥ साकल्याणी मुदं प्राप्य सच्चिदानंदलक्षणा॥ २३॥ आदाय स्वयमप्येकां वीणां वाणीषु ल
क्षसा॥ वीणा प्रवीणा रुद्राणी गानतानरता बभौ॥२४॥ न तज्ज्ञानं विजानंति गंधर्वा अपि किंनरा:॥ अथान्येपि सुरा:
सर्वे सुरनारीगणा अपि॥२५॥ एवं गानविलोला सा वीता चामरकोटिभि:॥ छत्रार्बुदच्छायया पि संछन्ना
मायया शिवा॥२६॥ शंकरस्तत्समारंभं ज्ञात्वा तत्तोषकारणं॥ पुन: संप्रेषयामास गणानमितविग्रहान्॥२७॥
योषिद्गणांश्च विविधान् सर्वाभरणभूषितान्॥ सौंदर्यभेदसंपन्नाननागलोकान्मनोहरान्॥२८॥ गणतूर्य
ध्वनिं श्रुत्वा तज्ज्ञानमपि दूरत:॥ अद्भुतं गानमेतावत्कृत्स्नमित्याह शांभवी॥२९॥ प्रायः सोयं शिवेनैव तोषः सं
पादितो मम॥ अपूर्वनारीसृष्ट्यापि गानसृष्ट्यापि शंकर:॥३०॥ शंकरत्वान्महादेव: शंकरत्वं स्वकं पुन:॥
प्रवृत्तं कर्त्तुमेवेदं सृष्टं सर्वमिति स्मृतं॥३१॥ अशक्यं किं महेशस्य मदनुग्रहवांछया॥ सृष्टमेतावदधुना
विविधं चंद्रमौलिना॥३२॥ मयि तावत्कृपादृष्टिस्त्वयापि गिरिशस्य सा॥ सा तावद्रक्षणीया मे विरूपाक्षावलो
कनात्॥३३॥ मत्कृतोपि विलंबो च विस्मृतश्चंद्रमौलिना॥ कृपालुत्वं मयि स्वामी प्रकटं कर्त्तुमिच्छति॥३४॥

तस्यदेवाधिदेवस्य शंकरस्य महात्मनः ॥मदनुग्रहवांछ्रापितपसाभूयसापिसा॥३५॥ इत्यालोच्य पुनर्गौरी-
महेशप्रेषितं गणं ॥नारीणाममितं दृष्ट्वा प्रहृष्टा सापुनः पुनः ॥३६॥ततस्ताः सुरनारीणां पराभवविचक्षणाः॥
दंडवत्प्रणताः सर्वाः स्तुतिपूर्वकमादरात्॥३७॥नीराजनानि दत्तानि दिव्यरत्नगणश्रिया॥नानामणिगणाकी
र्णोः पात्राण्यादायकोटिशः॥३८॥उपहारानतौकांश्च तदानींतान्गिरींद्रजा॥ शिवनैवेद्य शेषत्वबुध्याजग्रा
हसादरं॥३९॥तान्यास्वाद्य विचित्राणि फलानिजगदंबिका॥कृतार्थत्वमतिंचक्रे शिवनैवेद्यसेवनात्॥४०॥
दुर्लभं शिवनैवेद्यमद्यप्राप्तं मयाधुना॥ पावनंचित्तमप्यद्य पावनानांचपावनं॥४१॥ शिवनैवेद्यकोटयंशको
ट्यंशोप्यतिदुर्लभः॥संपूर्णं शिवनैवेद्यंकस्यवासुलभं भवेत्॥४२॥ पुरोडाशं धिक्करोति शिवनैवेद्यमीदृशं॥
पुरोडाशेः किमेतावद्भक्षितेः फलमाप्यते॥४३॥ अलंयागसहस्रेणाप्यलं योगार्बुदैरपि॥ भक्षिते शिवनैवेद्ये
शिवसायुज्यमाप्नुयात्॥४४॥ अतः परं शंकरस्य सन्निधानम विस्मृतं॥ येनेदं शिवनैवेद्यमकस्मात्समु
पागतं॥४५॥नयद्यपि सुधातावदधुनामेतथापिकिं॥नोपेक्षणीयं सहसा शिवनैवेद्यमागतं॥४६॥दृष्टे
पि शिवनैवेद्येयांतिपापानि दूरतः॥ भुक्ते तु शिवनैवेद्ये पुण्यान्यायांतिकोटिशः॥४७॥ दूरतः शिवनैवेद्ये गंधे-

प्या याति चेन्नदा ॥ पापसंघास्तु सहसा प्रलयं यांति वस्तुतः ॥ यद्गृहे शिवनैवेद्य प्रचारोऽपि प्रजायते ॥ तद्गृहं पा
वनं सर्वमन्यपावनकारणं ॥४९॥ आगतं शिवनैवेद्यं गृहीत्वा शिरसा मुदा ॥ भक्षणीयं प्रयत्नेन शिवस्मरणपूर्व
कं ॥५०॥ क्षीरं वा फललेशं वा जलं वा शंकरार्पितं ॥ गृहीत्वा मुच्यते सद्यः पापकोटिगणादपि ॥५१॥ आगतं
शिवनैवेद्यं अन्यदग्राह्यमित्यपि ॥ विलंबे पापसंबद्धो भवत्येव हि मानवः ॥५२॥ नयस्य शिवनैवेद्यग्रह
णेच्छा प्रजायते ॥ सपापिष्ठगरिष्ठस्यान्नरकं यात्यपि ध्रुवं ॥५३॥ इत्युक्त्वा शिरसा गौरी तानि सर्वाणि सा
दरं ॥ आस्वाद्यास्वाद्य संतुष्टा शंकरस्मरणोत्सुका ॥५४॥ महेशपीतशेषां तां सुधामादाय शैलजा ॥ पुनः
पुनः पपौ भक्त्या धारामृतां धुनीमिव ॥५५॥ ततस्तांबूलमादाय शिवार्पितमुमा तदा ॥ तत्कृतं गानमाकर्ण्य
नाद्यां दृष्टुं समुद्यता ॥५६॥ ततस्तत्कृतनाद्यानि विचित्राणि विशेषतः ॥ दृष्ट्वा विस्मयमापन्ना गाना
कर्णनतत्परा ॥५७॥ न केनापि कृतं नाद्यं पूर्वं वै शंकरमंदिरे ॥ कैलासेऽपि विलासाढ्ये तादृशं तद्विलक्षणं
॥५८॥ मत्प्रीत्यर्थमिदं सृष्टं नान्यमीशेन वस्तुतः ॥ मयि तावत्कृपा शंभो रघुनाप्यनुवर्त्तते ॥५९॥ इदं नाद्यं
विहायाग्रे गंतुमेवन शक्यते ॥ प्रायः शिवापराधोऽपि गमने मे भविष्यति ॥६०॥ प्रेषितः शंकरेणैव नाद्यस्त्री—

णां गणोधुना ॥ एतद्विहाय गमने प्रत्यवायो भविष्यति ॥६१॥ अस्य नाट्यस्य समयः क्रियानारंभमात्रतः ॥ सं-हरा नृ
तोषाशयो वृद्धाः किमग्रेमे भविष्यति ॥६२॥ नेत्रत्रयेण तन्नाट्यं दृष्टुमेव न शक्यते ॥ सहस्रेणापि नेत्राणां लक्षेणा- अ.८
प्य र्बुदेन वा ॥६३॥ किल पाराणि नेत्राणि विशालान्यमलानि च ॥ तैर्नाट्यमीदृशं दृष्ट्वा संतुष्टा न भवामि किं ॥६४॥
इति गौरी विचार्यादौ ससर्ज नयनानि सा ॥ विपुलानि विचित्राणि रम्याण्यपि विनोदतः ॥६५॥ तैर्नेत्रैस्तदृशं ना
ट्यं विलोक्यांबा प्रतिक्षणं ॥ संतुष्टा स्वस्वरूपं च विस्मृत्य विवशा स्थिता ॥६६॥ तन्नाट्यालोकनेनैव नीतः कालः
कियानपि ॥ प्रतिक्षणं नवं नाट्यं के नवा तन्न दृश्यते ॥६७॥ तन्नाट्यवार्ताश्रवणं कृत्वा रंभादिका अपि ॥ वि
स्मयाविष्टहृदयाः पुरा देवेंद्रमंदिरे ॥६८॥ प्रतिक्षणं नवं नाट्यं कथं ताभिः कृतं तदा ॥ नाट्यविद्यापि सात्यल्पा
न तत्तद्विषयं खलु ॥६९॥ विचित्रं निर्मितं नाट्यं तद्विद्यायां नयन्मतं ॥ तादृशं नाट्यमीशेन सृष्टमत्राद्भुतं च
किं ॥७०॥ विचित्रसृष्टिकरणे समर्थः शंकरः खलु ॥ ततस्तत्रापि किं चित्रं तदस्माकं हि दुर्लभं ॥७१॥ प्रासादः
खलु सृष्टोस्ति शंकरेण सतादृशः ॥ स्वर्गलोके नागलोके सत्ये विष्णुपदे पि वा ॥७२॥ तथैव नाट्यसृष्टिस्या
त् सा विद्या तत्र सा न न ॥ तावतापि किमङ्गल मङ्गले पि न न क्षतिः ॥७३॥ या विद्या स्वर्गलोकेस्ति तदभ्यासो न चेत्तदा॥

अस्माकमज्ञतासेयं अभ्यस्ता सा विलक्षणा ॥७४॥ अस्माकं तादृशं भाग्यं तद्विद्याभ्यसने कुतः ॥ सा विद्या-
परमा विद्या शंकरेण विनिर्मिता ॥७५॥ देवादत्र समाया ता कृपया शंकरस्य सा ॥ अभ्यासस्तत्र कर्तव्यस्तदा
गमनमेव न ॥७६॥ गानवार्त्ता श्रुता पूर्वं तज्ज्ञानं नात्र सर्वथा ॥ नूतनागानविद्या चेदत्र सापि कथं भवेत् ॥७७॥ किं
च सौंदर्यधारापि दिव्यनाट्यांगनाश्रिता ॥ साधारा केन वा लभ्या सा किलात्यंतदुर्लभा ॥७८॥ प्रतिक्षणं नवं ता
सां सौंदर्यमतितोषदं ॥ तत्कथं प्राप्यते लोके दुर्लभं तदितः श्रुतं ॥७९॥ तद्वांछां कमला तावदधुनापि करोति सा ॥
वाणी शची च धाया चत्त दिहात्यं तदुर्लभं ॥८०॥ किं वांछया फलप्राप्ति विलक्षणफलोदयः ॥ भूरिपुण्य
तपोलभ्यस्तत्तपसा सुकुत्र वा ॥८१॥ कैलाससदनावासः शिवदासीगणस्य यत् ॥ तत्सौंदर्यं न लोके तु सु
नारीषु सर्वथा ॥८२॥ कैलासदासीवदनं दृष्ट्वा दृष्ट्वा पुनःपुनः ॥ कमला लज्जया तावद्दूरान्नम्रमुखी स्थिता
॥८३॥ कुरूपं सृष्टमीशेन किमेतन्मम दुर्भगं ॥ साहं तपस्यया शंभुः प्रीतो मत्कृतया खलु ॥८४॥ सौंदर्यमे
व नारीणां निधिस्तेन विना सुखं ॥ न प्राप्यते हि नारीभिः धनलाभेपि भूरिशः ॥ न चाभरणवांछापि सौं
दर्ये सति यौवने ॥ दुर्लभं तद्द्वयं प्राप्य नारी किंच मनोरमा ॥८६॥ नारीरत्नमिति प्रोक्तं रम्यसौंदर्ययौवनैः ॥

शिवरह०३
२८

तदभावे तृणप्राया पतितं तत्तृणं वरं ॥८७॥ पतिव्रत्यं यौवनं च सौंदर्यं च विशेषतः ॥ शंकरानुग्रहेणैव नारीभिः प्राप्यते परं ॥८८॥ शिवदासीमुखं दृष्ट्वा नमस्कार सुरांगना ॥ वैरूप्याश्रयतां ज्ञात्वा कारत्व निंदां चकार न ॥८९॥ तद्दासीयौवनस्यापि वैलक्षण्यं महत्तरं ॥ तन्नाम रंगना प्राप्यं तदन्यत्र कुतो भवेत् ॥९०॥ तादृशं भाग्य मन्याभिर्बहुजन्म तपस्यया ॥ कृपया पिन संप्राप्यं शंकरानुग्रहं विना ॥९१॥ अकस्माद्यदि संप्राप्यः शंकरानुग्रहस्तदा ॥ सर्वभाग्यसमाकीर्णा तूर्णमेव भवत्यपि ॥९२॥ कुर्वंति तपसा प्रीतं शंकरं लोकशंकरं ॥ संसारवार्त्तां त्यक्त्वापि तद्वार्त्तायाः फलं च न ॥९३॥ किं च यद्यत्फलं रम्यं विलक्षणमनुत्तमं ॥ तदनुग्रहमात्रेण शंकरस्य प्रजायते ॥९४॥ शंकरानुग्रहे बीजं शिवलिंगसमर्चनं ॥ तदर्चनेन यत्प्राप्यं तत्प्राप्यं नान्यधर्मतः ॥९५॥ धर्मः को वा भवेद्येन सुप्रीतः शंकरो भवेत् ॥ शिवलिंगार्चनं त्यक्त्वा तदर्चनमनुत्तमं ॥९६॥ किं च मुख्यः स्वर्गलोकाच्छिवलोक इति श्रुतः ॥ तस्मिंल्लोके पुण्यपुंजैः स्थीयते शांकरैः परं ॥९७॥ न स्वर्गनाममात्रेण स्वर्गलोको यमीदृशः ॥ शास्त्रेषु स्वर्गशब्दार्थः प्रसिद्धः स तु नात्र तु ॥९८॥ दुःखान्यत्र बहून्येव सुखवैरि कृतान्यपि ॥ दुःखाकृतिः स्वर्गलोकः कथं वा शास्त्रनिश्चितः ॥ ॥९९॥ मुख्यस्वर्गाख्यया ख्यातः कैलास इति विश्रुतः ॥ नायं स्वर्गः स्वर्गवार्त्ताभ्रांतानां मात्र केवलं ॥१००॥

ह्रा० तृ०
अ० ८

किंचयद्दुर्लभंलोके सर्वेषामपि तादृशं ॥ लिंगार्चनेन संप्राप्य मन्यत्प्राप्यंनसर्वथा ॥१०१॥ अधिकारोपिलोके
स्मिन्दुर्लभः शिवपूजने ॥ तस्मिं सति किम प्राप्यं फलं शंकर पूजने ॥१०२॥ तथापितादृशं नाट्यं दृष्ट्वा गौरीमनो
हरं ॥ तदानविरता जातातत्रनाट्यावलोकनात् ॥१०३॥ अभिनव शिवदासीनाट्य मानंद राशिः गिरिवरतनया
सासादरंवीक्ष्यतस्मात् ॥ अनुगतमनुवृत्तावर्त्त माना विमाने पुनरपि शिवदासीनाट्यलोला बभूव ॥१०४॥
॥इति श्री शिवरहस्ये हराख्ये तृतीयांशे व्यासमुनिसंवादे नामाष्टमोध्यायः ॥८॥ ॥व्यास उवाच॥ ॥ना
३२९ ट्यावलोकनानंदपारावारवैः परं ॥ गौरीसमावृता रेजे तन्नारीगानलालसा ॥१॥ विचित्राप्रतिमं नाट्यम
पूर्वं द्रष्टुमुद्यता ॥ अपूर्वगानलोलाच विवशा जगदंबिका ॥२॥ ततः परं महादेवस्तद्विलंबं विलोक्य सः ॥
पुनर्गणानपूर्वांश्च प्रेषयामास सत्वरं ॥३॥ तेपि सर्वे महोत्साहाः नंदीशप्रमुखैर्गणैः ॥ प्रमुखाः शंकराज्ञा
याः स्वरूपं प्राहुरादरात् ॥४॥ ॥शंकर उवाच ॥ किंकृत्यं नंदिकेशेन किंवाकृत्यं गणैरपि ॥ किमन्यैरपि
मेकृत्यं स्वकार्यकरणोद्यतैः ॥५॥ क्षणः कल्पायते सोयं गौरीदर्शनवर्जितः ॥ उत्साहवृद्धिहेतुश्च दृश्यतेन
तया विना ॥६॥ लोके संतिपदार्थाश्च बहवस्तोषहेतवः ॥ किंतैरनंतैरपि मेपदार्थै रपिसाधकैः ॥७॥ रमणी

शिवर०३ यत्तद्वस्तु गौरि रूपं मनोहरं ॥ तदन्यत्तादृशं लोके न जातं न भविष्यति ॥८॥ नारी सृष्टिरपूर्वापि विलासा- हरा०तृ
२९ य कदाचन ॥ क्रियते तादृशी सृष्टिः तत्कल्पापि न जायते ॥९॥ कस्मिन्मुहूर्ते सा सृष्टा समुहूर्तोपि दुर्लभः ॥ अ०९
मुहूर्ते महिमा को वा सा सृष्टिस्तावदद्भुता ॥१०॥ सृष्टौ मुहूर्तोपि मया सुमुहूर्तो विलक्षणः ॥ तन्मुहूर्त
समानस्तु मुहूर्तोपि न दृश्यते ॥११॥ न तत्कल्पेपि कल्पांते कल्पमध्येपि दुर्लभः ॥ कल्पादिरयमेतस्मिन्स
मये दृश्यते पि न ॥१२॥ इत्युक्ते तद्वचः श्रुत्वा नंदिकेशादयो गणाः ॥ परस्परं मुखं दृष्ट्वा विचारं चक्रुरादरात् ॥
१३॥ सत्यमुक्तं महेशेन तत्कार्यं तदपेक्षितं ॥ विलक्षणमिदं कार्यं कर्तुमेव न शक्यते ॥ पुरा देवगणाः सर्वे तृणे
नैकेन तंतुना ॥ बिसवल्ल्यां निबद्धाश्च साम र्थ्यं तादृशं मम ॥१५॥ चुलुकांतः स्थिताः सर्वे सागराः सरि
तस्तथा ॥ सरांसि च तथान्यच्च जलं मुक्ताफलाकृतिः ॥१६॥ मद्वेत्राग्रनिपातेन कंपायंते सुरा अपि ॥ ब्रह्मा
ण्डमंडलं सर्वमणुकल्पं कृतं मया ॥१७॥ मद्भृत्यभृत्यभृत्योपि ब्रह्मविष्ण्वादिपूजितः ॥ तं दृष्ट्वापि सकंपा
स्ते किमिहागत इत्यपि ॥१८॥ तदागमनवेलायां कृतांजलिपुटास्तदा ॥ दंडवत्प्रणतास्सर्व भवंति स न
राः सुराः ॥१९॥ सामर्थ्यमीदृशं सर्वं महेशस्यैव यद्यपि ॥ तथापि तत्कृपालेशादस्मिमानो ममेदृशः ॥२०॥ ॥

शिवकिंकरभावेन मम सामर्थ्यमीदृशं ॥ तथापि किंकरोम्यत्र सामर्थ्यं कुंठितं मम ॥२१॥ कुंठिते सति साम
र्थ्ये कार्यो त्वं कंठान जायते ॥ अतस्त्वत्कार्यकरणं दुर्लभं चाधुना मम ॥ क्वांवा प्रभुत्वं क्वास्माकं तत्कार्यक
रणोक्षमः ॥ महाप्रभुर्महादेवः किन्न जानाति तद्धृयं ॥२३॥ ज्ञात्वापि स महादेवः महाप्रभुरिति स्वयं ॥
अस्मानाज्ञापयत्येव महद्भाग्यमिदं खलु ॥२४॥ अहमादौ प्रेषितोस्मि ततः प्रचलिता शिवा ॥ सोत्कंठया परं
तत्र न कृत्यं मम सर्वदा ॥२५॥ अस्ति स्वातंत्र्यमीशेन गौर्यास्तावद्धि निश्चितं ॥ नान्याज्ञावशगा गौरी स्वशि
३२७
वानुग्रहस्तथा ॥२६॥ महेश्वरानुग्रहस्य किमशक्यं जगत्त्रये ॥ तदनुग्रहपात्रत्वं दुर्लभं जगतीतले ॥
२७॥ शिवानुग्रहमप्राप्य तावन्नारायणादयः ॥ तपस्याकरणोद्युक्ताः सर्वेपि गिरिकंदरे ॥२८॥ मध्येस
मागतैः केचिद्भवद्भिरधुना गणाः ॥ समागतं किमेतेन भवदागमनेन तु ॥२९॥ नाट्यावलोकनोद्युक्ता
गिरिराजकुमारिका ॥ भवदागमनं तावत्तया न ज्ञायते खलु ॥३०॥ क्व तन्नाट्यसमारंभः क्व गणागम
नादरः ॥ भवदागमनेनापि न कार्यं भावि दृश्यते ॥३१॥ भवतां गणना कुत्र मम चान्यस्य चाधुना ॥ कोटिशो
वा समायांतु गणाः किं तैः प्रयोजनं ॥३२॥ न गणानां प्रवेशोस्ति तन्नारीनाट्यमंडपे ॥ तद्द्वारदेशेपि गति–

शिवर०४ ३०

रस्माकं मतिर्दुर्लभा ॥३३॥ पुनः पुनः समायांति तत्र नाट्यांगनाः किल ॥ गीतिर्गानानुभावेन नूतनेनानुमीयते ॥३४॥ गणाः शृण्वंतु तद्गानं नानुभूतं पुरा मया ॥ नान्यैर्विघ्नेश्वराद्यैर्वा महेशेनापि वा ततः ॥३५॥ सृष्टास्ताः शंकरेणैव गाननाट्यविशारदाः ॥ तिरस्कारं शारदाया परं ताः कर्तुमुद्यताः ॥३६॥ क्व शारदा क्व कमला क्व तदन्या मरांगनाः ॥ तद्गंधगंधोपि किमत्र प्रसरिष्यति ॥३७॥ गाननाट्यविलोलायाः पार्वत्याश्चलने यदि ॥ विलंबस्तावता का वा स्याद्स्माकं विडंबना ॥३८॥ अयं विलंबो देवस्य महादेवस्य सर्वथा ॥ अपेक्षितो भवत्येवेत्यनुमीयत एव हि ॥३९॥ अन्यथा नाट्यनारीणां प्रेषणं नः पुनः पुनः ॥ पुनः पुनः फलान्नादिपदार्थप्रेषणं कथं ॥४०॥ गंधः समागतः कोपि गंधः पूर्वविलक्षणः ॥ पक्वान्नानां अनंतानाम पूर्वाणां विशेषतः ॥४१॥ पक्वान्नकरणायासो न शिवस्य कदापि च ॥ तदिच्छया परं सृष्टिस्तेषां तु स्यादनुक्षणं ॥४२॥ प्रसूनानि प्रेषितानि महादेवेन सादरं ॥ विलक्षणानि तद्गंधः कथमत्रानुभूयते ॥४३॥ ब्रह्मांडमंडलं व्याप्तो ह्ययं गंधो विलक्षणः ॥ पुष्पवृष्टिर्गंधवृष्टिः शंकरेण कृता खलु ॥४४॥ न कल्पतरुपुष्पेषु सुगंधोपीदृशः खलु ॥ अस्य गंधस्य महिमा शिवेन ज्ञायते परं ॥४५॥ महेशसृष्टि-

हरा०तृ० अ०९

चातुर्यमिदमत्रानुभूयते॥ अतस्तेन बिलंबायसृष्टिरेवंप्रकल्पिता ॥ ४६॥ सहस्रशः प्रयास्यंतिब्रह्मक
ल्पास्तथाप्ययं॥ नाट्योत्सवोनशांतः स्यादधुनाभिनवोयतः॥४७॥ नाट्येनाभिनवेनायंनूतनाभिनवोत्स
वः॥ पुनः पुनर्भवत्येवनवनाट्यविलोकनं॥४८॥ नारीणांनाट्यसामान्यविलोकनरतिर्नवा॥ किंपुनर्नाट्य
भेदानां अवलोकनसंभ्रमः॥४९॥ अतः परं महेशेन नाट्यनारीगणोयदि॥ नप्रेष्यतेतदातावन्निर्विघ्नगतिरंबिका
॥५०॥ वांत्येते पवनामंदाः प्रसूनासारसंवृताः॥ मरंदवृष्टिरधुना प्रकृष्टादृष्टिगोचरा॥ ॥५१॥ चिरंजीवतुवातोयं
३२५ आसारासारसंगमः॥ गंधोपिनाट्यंगानं च किमस्माकमितो भयं॥५२॥ स्वयं बिलंबं सोढ्वापि विलंबस्यास्यका
रणं॥ प्रेरयत्यंबिकानाथः किमंबापिकरिष्यति॥५३॥ अत्राभिनवनाट्यस्य प्रसंगोपिनचेद्यदि॥ तदाप्रविष्टेभे
वस्यादंबया शिवमंदिरं॥५४॥ किंचावगणनातावदंबयानकृताधुना॥ नाट्यस्यास्य महेशेन प्रेषितस्याद
रः कृतः॥५५॥ नाट्यानादरमात्रेण शंकरानादरोयदि॥ तदाकठिनमित्येवकृतंनाट्यावलोकनं॥५६॥ अना
दरस्य विषयोप्येतन्नाट्यंनसर्वथा॥ अपूर्वस्यास्यनाट्यस्यकथंवास्यादनादरः॥५७॥ नाट्यकोलाहलस्या
पिश्रवणंमंगलायते॥ नाट्यावलोकनरसोवर्णनाविषयोपिन॥५८॥ एतन्नाट्यविलोकनंश्रममहांभोधेर्महा–

वाडवोप्पानंदाब्धिसुधाकरः शिवगणाऽऽशास्यः शिवाशास्यतां ॥ प्रातः प्रापक एव दीर्घसुकृतां मोधेस्यं वर्णनामार्गा-तीतइतिश्रमोपिन तथा तद्गुणेनाभ्युद्यमे ॥५९॥ सामर्थ्यं गिरिशस्य किंमुनिगणावेद्यं प्रकृष्टं परं तन्नाट्येः प्रकटीकृतं पटुतरा सृष्टिः क्वचा तादृशी ॥ मायामात्रमिदं नयेन विपुला विप्वा विलासो भवेत्सोयं शर्वविलास एव-सकलः कोन्यो विलासो भवेत् ॥६०॥ भाग्यं तावदिहेदृशं सुरगणाऽऽशास्यं स्वतो दुर्लभं श्रुत्यं तैरपि सर्वथा नविदितं देवैर्मुनीन्द्रैरपि ॥ गंधर्वैरपि किन्नरैरपि तथा नागेश्वरैरप्ययं संतोषाननुभूत इत्यनुदिनं नाट्योत्सवो मृग्यते ॥६१॥ वार्त्तासेयमुमासहाय निकटे यास्यत्ययं सर्वथा नाट्यानंदसुधार्णवः प्रतिपदं वृद्धिं प्रयास्यत्ययं ॥ विघ्नायागमने गिरीन्द्रतनया संगोधुना दुर्लभो विघ्नध्वांतनिवारकोपि जगतीपृष्टे नदृष्टः पुनः ॥६२॥ विघ्नेशोपिन शक्त एव सहसा नाट्योत्सवो ध्वंसने तन्नाट्यस्य विनाशनाय सकथं यत्नं करिष्यत्यपि ॥ नाट्योत्साह विघातकस्त्वदितरः कोवा जगन्मंडले शुंडादंडविराजितः खलु महाढुंढिः सनाट्योद्यतः ॥६३॥ ॥ इतिश्री शिवरहस्ये हराख्ये तृतीयांशे व्यासमुनिसंवादोनाम नवमोध्यायः ॥९॥ ॥ श्रीव्यास उवाच ॥ ॥ शिवानागमनं दृष्ट्वा शंकरो लोकशंकरः ॥ ताडिलं बस्याके बीजं प्रायः श्रांतापथि प्रिया ॥१॥

प्राय:सुरकराघात: पथिवृत्तोन्यथाकथं॥ अनागमनमेतस्या:कोमलावयवा शिवा॥२॥ शिरीषप्रसव-
स्यापि मार्दवंता दृशंनहि॥ यादृशं गिरिजादेहे सुगंध परिवेष्टिते॥३॥ गिरिजादेहसंबधमार्दवश्रव
णेनकिं॥ शिरीषकुसुमंप्रापमहारण्यतरंपरं॥४॥ क्ववाशिरीषकुसुमंक्वशिवादेहमार्दवं॥ कियदं
तरमेतस्यातस्यापि मृदुलान्वये॥५॥ कैलासदुर्गमार्गस्य भास्करः स्वकरैःपरं॥ चकारखलुदुर्गत्वं
दुर्गत्वं च गिरेरपि॥६॥ तन्मार्गे रविजाकांति: प्रवृत्ता प्राय शस्तथा॥ श्रांता सा गिरिजा तांता नितांतत
नुकोमला॥७॥ सुधाकरकराणां चमृदलत्वं न तादृशं॥ तत:साश्रांतिमापन्ना मार्गोदूरतरोप्ययं॥८॥
अमंदवातसंगोवा तद्विमानेन भूरिशः॥ तदा घातेनवाश्रांता सापरं सर्वमंगला॥९॥ यद्वाचामरवा
तानाममंदानां प्रसारत:॥ श्रांतातावन्नविश्रांता किंतद्विश्रामसाधनं॥१०॥ नतदा सजनस्तत्र श्रमाप
हरणक्षम:॥ विनातेनकथंमार्गे समायास्यति शांभवी॥११॥ मेनका किं परित्यक्ता तयाकैलासमंदि
रात॥ साचेत्सहसमायाति तदा खलु न संभ्रम:॥१२॥ तया विमानोपहारं गौर्यैकोवा समर्पयेत॥-
उपहारादरागौरी सानुवारंमितिश्रुतं॥१३॥ सासुप्ता किं परिश्रांता स्वभावेनालसापरं॥ चिंतयावा-

 परिश्रांता कितया चिंतयाफलं ॥१४॥ श्रांतायाः पथि विश्रामो जननीजनकान्वये ॥ पतिसंगेनवानूनं-
 सनतेनविना भवेत् ॥१५॥ चिरं संभ्रमसंक्रांता मेनया सहसंगमे ॥ तद्वियोगेनसा श्रांता कोमलं तन्मनोपि
हि ॥१६॥ मयापि तावन्नगतं यत्रसा गिरिकन्यका ॥ तत्राभ्यासे सहायेन सुखागमनमिच्छति ॥१७॥ यद्यपे
षा गिरिसुता तथापि कठिनानसा ॥ दृष्टापि बहुधा काले गिरिजा कोमला लता ॥१८॥ तपस्यया तनुर्दूना
भवान्याः पूर्वमेवसा ॥ तां तां नितांतमधुना श्रांता पथि विशेषतः ॥१९॥ तपसा दूनदेहाया गौर्यास्तनुवि
जृंभणं ॥ अद्यापिन भवत्येष श्रांता पथि विशेषतः ॥२०॥ तयाप्युग्रतपः पूर्वं तेनतावत्कृतं खलु ॥ तस्यास्त-
नतनूस्तावत्तनुतामगमत्पुनः ॥२१॥ अतः परं मया तावत्तत्र गंतुं नशक्यते ॥ वक्तुमप्यधुना शक्तिः स्तदना
गमनेनमे ॥२२॥ नतदा तमुखाद्वार्ता क्वापिन श्रूयते मया ॥ कस्याप्यागमनं नात्र यतो दूरतरं स्थलं ॥२३॥
आवासोप्युचितो नात्र वार्त्ता नागमनादिह ॥ यत्र वार्त्ताप्रसारः स्यात्तत्रावस्थानमीप्सितं ॥२४॥ प्रति
क्षणं प्रियावार्त्ता प्रियेण श्रूयते यदि ॥ तदा प्रिया प्रीतचित्ता विश्रांतिमुपयास्यति ॥२५॥ अवैराग्यादयं
सर्वो विचारः क्रियतेधुना ॥ भार्याचर्या विचारोपि विरक्तस्य कथं भवेत् ॥२६॥ वैराग्यं परमं भाग्यं तद्भाग्य-

मतिदुर्लभं ॥ अत एव विचारोयं क्रियतेपि प्रतिक्षणं ॥ किंचा परिग्रहः पूर्वं नकृतं सकृतो यदि ॥२७॥
तत्पालन परित्यागे प्रत्यवायोपि जायते ॥ नसा स्त्री युवती त्याज्या तन्मनोरंक्षणं क्षणं ॥२८॥ क्षणार्धं
वायदि कृतं तेन नप्रत्यवैत्ययं ॥ ऋतु कालाभिगमनं ब्रह्मचर्यमिति श्रुतं ॥२९॥ तद भावे प्रत्यवैति तेन नैव-
तपः क्षयः ॥ प्रत्यक्षतः श्रूयमाणा प्रजातं तुमिति श्रुतिः ॥३०॥ भार्या संग परित्यागे दूना किन्न भविष्य
ति ॥ विशेषतः ततः प्राप्तं भर्तृत्वं तस्य पालनं ॥३१॥ भार्या पालन मात्रेण तन्न तेन विना भवेत ॥ गौरी
विशाल नयना भ्रमर भ्रमणोत्सवः ॥३२॥ तन्मुखांभोजमासाद्य सद्यः संप्रति वर्धतां ॥ मया पितावद
धुना तदा गमन हेतवः ॥३३॥ नदृश्यंते तद्विलंबे बीजं किमिति चिंत्यते ॥ इति संचित्य सस्मार कुमा
रं गणनायकं ॥३४॥ ततः परं स विघ्नेशः सत्वरं हृष्टमानसः ॥ संतोष कारणं किंवा विलक्षण
मिहाधुना ॥३५॥ आनंदो वर्धते सोयं सुधा निधि पराक्रमः ॥ प्रायः स्मरहरः किं मां सस्मार स्मेर
पूर्वकं ॥ अन्यथा कथमेतावानानंदाब्धिः प्रवर्त्तते ॥ चिन्हान्यपि मनोज्ञानि दृश्यंते शिव दर्शने ॥
॥३७॥ सांब दर्शन मात्रेण भविष्यति न संशयः ॥ पुण्यानां परिपाकोयमधुना समुपस्थितः ॥३८॥

शिवर०३ तत्पादपद्मं भक्त्या च दृष्ट्वा प्रीतो भवाम्यहं ॥ वेदांतैरपि तत्तावद दृष्टं कष्टनाशनं ॥३९॥ दृष्टव्यम- हा॰ तृ॰
३२ घुनारम्यं रमणीयमनुत्तमं ॥ रमणीयानि दृष्टानि वस्तूनि विविधान्यपि ॥४०॥ नतत्तुल्यं क्वापि दृष्टं अ॰१०
दुरदृष्टविनाशकं ॥ वांछंति यत्पदांभोजं द्रष्टुं नारायणादयः ॥४१॥ तैर्न दृष्टं न केनापि द्रष्टव्यमपि तत्प
दं ॥ तपसाना ति घोरेण धर्मैर्वा विविधैरपि ॥४२॥ परंतु तद्भवल्लब्ध शंकरानुग्रहान्मम ॥ इत्युक्त्वा स
त्वरं सांबं स्मृत्वा शंकरपादुके ॥४३॥ ध्यात्वा ययौ गणाधीशः शिवसंनिधिमादरात् ॥ ततः प्रणम्य ब
हुधा कृतांजलि पुटः प्रभुं ॥४४॥ शंभुं स्तोतुं मतिं चक्रे सर्वाभीष्टप्रदायकं ॥ [illegible] ॥ गणाधी-
श उवाच ॥ ॥ नमस्ते देवदेवाय नमस्ते रुद्र मन्यवे ॥ नमस्ते चंद्रचूडाया प्युतो तइषवे नमः ॥४५॥
नमस्ते पार्वतीकांत नमस्ते मेरुधन्वने ॥ नमस्ते भगवन् शंभो बाहुभ्यामुत ते नमः ॥४६॥ इषुः शिवत
मा या ते तया मृडय रुद्र मां ॥ शिवं धनुर्यद्बभूव ते नापि मृडयाधुना ॥४७॥ शरव्या या शिवतमा तया ति
मृडय प्रभो ॥ या ते रुद्र शिवा नित्यं सर्वमंगलसाधन ॥४८॥ तयाभिचाकशीहि त्वं तनुवा मामुमापते ॥
अघोरयापि तनुवा रुद्राद्या पापकाशिनी ॥४९॥ या तया मृडयः स्वामिन्सदा शंत मया प्रभो ॥ गिरिशं—

३२०

तमहारुद्र हस्ते यामिषुहस्तवे ॥५०॥ बिभर्षि तां गिरित्राद्य शिवां कुरु शिवापते ॥ शिवेनवचसा-
रुद्र नित्यं त्वाच्छावदामसि ॥५१॥ त्वद्भक्ति परिपूतांगं माहिंसीः पुरुषं जगत ॥ यन्नः शर्व जगत्सर्वं
मयक्ष्मसुमना असत ॥५२॥ यथा तथा वमां रुद्र तदन्यदपि मे प्रभो ॥ रुद्र त्वं प्रथमो देव्यो भिषक्पा
पविनाशकः ॥५३॥ अधिवक्ताध्यवोचन्म भवलिंगार्चकं मुदा ॥ अहींन्सर्वान्यातुधान्यः सर्वाअ
प्यद्य जंभयं ॥५४॥ असौ ताम्रो रुणो बभ्रुः नीलग्रीवः सुमंगलः ॥ विलोहितोस्त्ययं शंभो त्वद्धिष्ठा
नमेवहि ॥५५॥ नमो नमस्ते भगवन्नीलग्रीवाय मीढुषे ॥ सहस्राक्षाय शुद्धाय सच्चिदानंद मूर्तये ॥५६॥
उभयो रात्नियो ज्यीया धन्वनस्तां प्रमुंचतां ॥ संप्राप्य धनुरन्येषां भयाय प्रभविष्यति ॥५७॥ अस्म
द्भयविनाशार्थ मधुनां भयद प्रभो ॥ याश्चते हस्त इषवः परा ता भगवो वप ॥५८॥ अवतत्य धनुस्त्वं
सहस्राक्षशतेषुधे ॥ मुखानि शीर्य शल्यानां शिवो नः सुमना भव ॥५९॥ विज्यं धनुरिदं भूयाद्विशल्यो
बाणवानपि ॥ अशांषन्निषवो प्यस्य प्या भुरस्तु निषंगधिः ॥६०॥ कपर्दिनो महेशस्य यदि नाभूनि
षंगधीः ॥ इषमेवापि समर्थोश्चेतसा ग्रलेन भयं भवेत ॥६१॥ यातेहेति धनुर्हस्ते मीढुष्टम बभूवया ॥

शिवरह०३ तयास्मान्विश्वतस्त्वेन पालयत्नमय क्षमया॥६२॥ अनातत्तायायुधायनमस्तेधृष्णवेनमः॥ हरः-तृं
३४ बाहुभ्यांधन्वनेशंभोनमोभूयोनमोनमः॥६३॥ परितेधन्वनोहेति विश्वतोस्मान्वृण क्तुसः॥ अ०२०
इषुधिस्तवयस्तावदस्मदारे निधेहितं॥६४॥ हिरण्यबाहवे तुभ्यं सेनान्येतेनमोनमः॥ दिशां
चपतये तुभ्यं पशूनांपतयेनमः॥६५॥ त्विषीमतेनमस्तुभ्यंनमः सस्पिंजरायते॥ नमःपथीनांपत
येबभ्लुशायनमोनमः॥६६॥ नमो विव्याधिनेन्नानांपतयेप्रभवेनमः॥ नमस्ते हरिकेशायरुद्रायास्तू
पवीतिने॥६७॥ पुष्टानांपतये तुभ्यं जगतांपतयेनमः॥ संसारहेतिरूपायरुद्रायाप्याततायि
ने॥६८॥ क्षेत्राणांपतये तुभ्यं सूताय सुकृतात्मने॥ अहंत्याय नमस्तुभ्यंवनानां पतयेनमः॥६९॥ रोहि
तायस्थपतये मंत्रिणेवाणिजायच॥ कक्षाणांपतयेतुभ्यं नमस्तुभ्यंभुवंतये॥७०॥ तद्वारिवस्कृता
यास्तु महादेवायतेनमः॥ औषधीनांचपतयेनमस्तुभ्यं महात्मने॥७१॥ उच्चैर्घोषायधीराय
धीराकंदयतेनमः॥ पत्तीनांपतये तुभ्यं कृत्स्नवीतायतेनमः॥७२॥ धावते धवलायापि सत्वनां
पतयेनमः॥ नमस्ते सहमानाय तुभ्यं विव्याधिनेनमः॥७३॥ अव्याधिनीनांपतयेककुभाय निषंगिणे॥

स्तेनानां पतये तुभ्यं दिव्येषुधिमते नमः ॥७४॥ तस्कराणां च पतये वंचते परिवंचते ॥ स्तायूनां पतये तुभ्यं नमस्तेस्तु निचेरवे ॥७५॥ नमः परिचरायापि महारुद्राय ते नमः ॥ आरण्यानां च पतये मुष्णतां पतये नमः ॥७६॥ उष्णीषिणे नमस्तुभ्यं नमो गिरिचराय ते ॥ कुलुंचानां च पतये नमस्तेस्तु भवाय च ॥७७॥ नमो रुद्राय शर्वाय तुभ्यं पशुपते नमः ॥ नम उग्राय भीमाय नमो अग्रेवधाय च ॥७८॥ नमो दूरेवधायापि नमो हंत्रे नमो नमः ॥ हनीयसे नमस्तुभ्यं नीलग्रीवाय ते नमः ॥७९॥ नमस्ते शितिकंठाय नमस्ते स्तु कपर्दिने ॥ नमस्ते व्युप्तकेशाय सहस्राक्षाय मीढुषे ॥८०॥ गिरिशाय नमस्तेस्तु शिपिविष्टाय ते नमः ॥ नमस्ते शं भवे तुभ्यं मयो भव नमोस्तु ते ॥८१॥ मयस्कर नमस्तुभ्यं शंकराय नमो नमः ॥ नमः शिवाय शर्वाय नमः शिवतराय च ॥८२॥ नमस्तीर्थ्याय कूल्याय नमः पार्याय ते नमः ॥ अवार्याय नमस्तेस्तु नमः प्रतरणाय च ॥८३॥ नम उत्तरणायापि हरातार्याय ते नमः ॥ आलाद्याय नमस्तेस्तु भक्तानां वरदाय च ॥८४॥ नमः शष्प्याय फेन्याय सिकत्याय नमो नमः ॥ प्रवाह्याय नमस्तेस्तु ह्रस्वायास्तु नमो नमः ॥८५॥ वामनाय नमस्तेस्तु नमोस्तु बृहते नमः ॥ वर्षीयसे न-

329

नमस्तेस्तुनमोवृद्धायतेनमः ॥ ८६ ॥ संवृध्वनेनमस्तुभ्यं अग्नियायनमोनमः ॥ प्रथमायनमस्तुभ्यं- आशवेचाजिरायच ॥ ८७ ॥ शीघ्रियायनमस्तुभ्यं शीभ्यायचनमोनमः ॥ नम ऊर्म्याय शर्वोयाप्यव स्वन्यायतेनमः ॥ ८८ ॥ स्रोतस्यायनमस्तुभ्यं द्वीप्यायचनमोनमः ॥ ज्येष्ठायचनमस्तुभ्यं कनिष्ठायच तेनमः ॥ ८९ ॥ पूर्वजायनमस्तुभ्यं नमोस्त्वपरजायच ॥ मध्यमायनमस्तुभ्यं अपगल्भायतेनमः ॥ ९० ॥ जघन्यायनमस्तुभ्यं बुध्नियायनमोनमः ॥ सोभ्यायप्रतिसर्यायायाम्यायचनमोनमः ॥ ९१ ॥ क्षेम्याय चनमस्तुभ्यं याम्यायचनमोनमः ॥ उर्वर्यायनमस्तुभ्यं खल्याय चनमोनमः ॥ ९२ ॥ श्लोक्यायचाव सान्यायावस्वन्यायतेनमः ॥ नमोवन्यायकक्ष्याय मोज्यायचनमोनमः ॥ ९३ ॥ श्रवायचनमस्तुभ्यं प्रतिश्रवनमोनमः ॥ आशुषेणाय शूरायनमोस्त्वाशुरथायच ॥ ९४ ॥ वरूथिनेवर्मिणेच बिल्मिनेचनमो नमः ॥ श्रुताय श्रुतसेनायनमः कवचिनेनमः ॥ ९५ ॥ दुंदुभ्यायनमस्तुभ्य माहनन्याय तेनमः ॥ प्रहितायन मस्तुभ्यं धृष्णवे प्रहितायच ॥ ९६ ॥ पाराय पारविंदाय नमस्तीक्ष्णेषवेनमः ॥ सुधन्वनेनमस्तुभ्यं स्वायु धायनमोनमः ॥ ९७ ॥ नमः स्रुत्याय पथ्याय नमः काट्यायतेनमः ॥ नमोनीप्याय सूद्याय सरस्यायचतेनमः ॥ ९८ ॥

नमोनाद्यायभव्यायवैशंताय चतेनमः॥ अवद्यायनमस्तुभ्यंनमः कूप्यायतेनमः॥९९॥ अवर्ष्यायचवर्ष्याय-
मेघ्याय चनमोनमः॥ विद्युत्यायनमस्तुभ्यंईध्रियायनमोनमः॥१००॥ आतप्यायनमस्तुभ्यंवात्याय
चनमोनमः॥ रेष्याय चनमस्तुभ्यंवास्तव्यायच तेनमः॥१०१॥ वास्तुपायनमस्तेस्तुनमः सोमायतेनमः॥
नमोरुद्राय ताम्राया प्यरुणा यचतेनमः॥ नमउग्राय भीमायनमः शंगायतेनमः॥ नमस्तीर्थ्यायकूल्याय
सिकत्यायनमोनमः॥३॥ प्रवाह्यायनमस्तुभ्यंइरण्यायचतेनमः॥ नमस्तेचंद्रचूडाय प्रपथ्यायचतेनमः॥४॥
किंशिलायनमस्तेस्तुक्षयणायचतेनमः॥ कपर्दिनेनमस्तेस्तुनमस्तेस्तु पुलस्तये॥५॥ नमोगोष्ठ्या
यगृह्याय ग्रहाणांपतयेनमः॥ नमस्तल्प्याय गेह्याय गुहावासायतेनमः॥६॥ काट्यायगह्वरेष्ठायह्र
दय्यायचतेनमः॥ निवेष्प्यायनमस्तुभ्यंपांसव्यायचतेनमः॥७॥ रजस्यायनमस्तुभ्यंपरात्परतराय
च॥ नमस्तेहरिकेशायशुष्क्यायचनमोनमः॥८॥ हरित्यायनमस्तुभ्यंहरिद्वर्णायतेनमः॥ नम
उर्म्यायसूर्म्यायपर्ण्याय चनमोनमः॥९॥ नमोपगुरुमाणायपर्णशद्यायतेनमः॥ अभिघ्नतेचा
खिदतेनमः प्र खिदतेनमः॥२०॥ विश्वरूपाय विश्वाय विश्वधारायतेनमः॥ त्रियंबकायरुद्रायगिरि-

शिव.र.३
२६

आपतयेनमः॥११॥ मणिकोटिरकोटिस्थकांतिदीप्तायतेनमः॥ वेदवेदांतवेद्यायवृषारूढायतेनमः॥
॥१२॥ अविज्ञेयस्वरूपायसुंदरायनमोनमः॥ उमांकांतनमस्तेस्तुनमस्तेसर्वसाक्षिणे॥१३॥ हिरण्य- हिरण्य- हि.तृ.
बाहवेतुभ्यंहिरण्याभरणायच॥ नमोहिरण्यरूपायरूपातीतायतेनमः॥१४॥ हिरण्यपतयेतुभ्यंअं अ.१०
बिकापतयेनमः॥ तदुमापतयेतुभ्यंनमःपापप्रणाशक॥१५॥ मीढुष्टमायभर्गायकद्रुद्रायप्रचेतसे॥
तव्यसेबिल्वपूज्यायनमःकल्याणरूपिणे॥१६॥ अपारकल्याणगुणार्णवायश्रीनीलकंठायनिरं
जनाय॥ कालांतकायापिनमोनमस्तेदिक्कालरूपायनमोनमस्ते॥१७॥ वेदांतवृंदस्तुतसद्गुणा
यगुणप्रवीणायगुणाश्रयाय॥ श्रीविश्वनाथायनमोनमस्तेकाशीनिवासायनमोनमस्ते॥१८॥ अ
जातसौंदर्यसुधानिधानसमृद्धिरूपायशिवाधवाय॥ धाराधराकारनमोनमस्तेधारास्वरूपा
यनमोनमस्ते॥१९॥ नीहारताराकरकाकवाकप्रकारहाराप्रतिहारवीर॥ वीरेश्वरापारदया
निधानपाहिप्रभोपाहिनमोनमस्ते॥१२०॥ ॥व्यासउवाच॥ ॥एवंस्तुत्वामहादेवंप्र-
णिपत्यपुनःपुनः॥ कृतांजलिपुटस्तस्थौपार्श्वेढुंढिविनायकः॥१२१॥ तमालोक्यसुतंप्राप्त—

वेदवेदांतपारगं ॥ स्नेहाश्रुधारासंवीतं प्राहेद्भुरिदमादरात् ॥ १२२ ॥ ॥ इति श्रीशिवरहस्ये हराख्ये तृतीयांशे गणेशकृतरुद्रस्तुतिर्नाम दशमोध्यायः ॥ १० ॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥

॥ ॥ व्यास उवाच ॥ ॥ एवं स्तुत्वा महादेवं प्रणिपत्य पुनः पुनः ॥ कृतांजलिपुटस्तस्थौ पार्श्वे वंढुढिविनायकः ॥ १ ॥ तमालोक्य सुतं प्राज्ञं वेदवेदांतपारगं ॥ स्नेहाश्रुधारासंवीतः प्राह ढुंढिं सदाशिवः ॥ २ ॥ ॥ श्रीसदाशिव उवाच ॥ ॥ कुशलं खलु ते ढुंढे कुमारः कुत्र वर्तते ॥ दृष्टोसि बहुकाले न तस्यापि कुशलं खलु ॥ ३ ॥ त्वया सह कुमारेण मया गिरिजया सह ॥ एकत्रवासः सततं कर्त्तव्यः स्यात्ततः परं ॥ ४ ॥ न कुमारवियोगश्च वियोगस्तव वा मम ॥ तथा गौरीवियोगो वा सर्वथा नैव रोचते ॥ ५ ॥ गौरीं विहाय भवता भवता पापहारिणीं ॥ न स्थातव्यं कुमारेण मयापीति विचारय ॥ ६ ॥ अधुना निर्गता गौरी सुंदराद्गिरिमंदिरात् ॥ मंदं मंदं समायाति सा मंदगमना खलु ॥ ७ ॥ कैलासमंदिरं दूरं वरं सुंदरसुंदरं ॥ तत्र तिष्ठति यद्वा सा मध्ये तिष्ठति शांभवी ॥ ८ ॥ कस्तदागमने विघ्नः परिहार्योहं एव सः ॥ जननीदर्शने त्वं कंठा तव किं वा न जायते ॥ ९ ॥ इत्युक्तं तद्वचः श्रुत्वा प्रणिपत्य पुनः पुनः ॥ जगाद वचनं

चार्सदेवार्थ विजृंभितं ॥ ॥श्रीगणेश उवाच ॥ ॥स्वामिन्नायाति सा गौरी दूरमेतद्धि मंदिरं ॥ दूरागमनवेलायां किं विलंबो न जायते ॥११॥ किंच सा पथि विश्रम्य मंदमायाति शांभवी ॥ मंदं मंदं मंदवातो वाति वीतापि तेन सा ॥१२॥ न कदाप्यनुमुक्तोस्ति मार्गोयास्तया शिव ॥ गौरी शरीरं लोकेस्मिन्कोमलादतिकोमलं ॥१३॥ किंच नाट्यसमारंभसाधनानि त्वया खलु ॥ प्रेषितानि विचित्राणि प्रायस्तल्लास्य शिवा ॥१४॥ गाननाट्यसमारंभोप्यपूर्वः कल्पितस्त्वया ॥ तदालोकनसंतुष्टा कथमायाति सत्वरं ॥१५॥ तदालोकन विघ्नोपि मया कार्योऽधुना प्रभो ॥ स विघ्नस्तावदेतस्य भवत्येवापकारकः ॥१६॥ अंबा पश्यति नाट्यं चेत्तत्तन्नाट्यावलोकने ॥ मया व्याकुलाचरणं कर्तव्यमिति मन्महे ॥१७॥ अंबामहोत्सवे विघ्नं किं कर्तुं यतते मनः ॥ कृतेपि यत्ने तद्विघ्नयत्ने विघ्नो भविष्यति ॥१८॥ अन्येष्टविघ्नाचरणे सामर्थ्यं मम यद्यपि ॥ तं विघ्नाचरणे यत्नः कृतोपि विफलो भवेत् ॥१९॥ बलाबलविचारेण यत्कार्यं करणोद्यतः ॥ तेन कार्यं भवत्येव नान्येनैवावधारितं ॥२०॥ तत्रापि यदि संजाता तदभ्यागमनत्वरा ॥ तदा कथमितः सर्वं अपूर्वं प्रेषितं त्वया ॥२१॥ ब्रह्मांडमध्ये यत्तुल्यं वस्तु क्वापि न दृश्यते ॥ तादृशं सृष्टमद्येश त्वया विश्वात्मना खलु ॥२२॥

अदृष्टपूर्वं दृष्ट्वापि कस्य वा विरतं मनः ॥ दृष्टपूर्वाभिमर्षेपि नरम्ये विरतं मनः ॥ तद्विघ्ना चरणे गौरि
कुपिता यदि पश्यति ॥ न दा मम मात्रागमनं पुनः शंकितमेव न ॥ २४ ॥ ब्रह्मांडमंडले को वा तद्विघ्नाय प्र
वर्तते ॥ जीवनाशापरित्यागे कदाचिद्यतते तथा ॥ २५ ॥ भवत्पदांभोजविलोकनाय पुनः पुनश्चित्तमि
दं प्रवृत्तं ॥ नान्यत्र गंतुं यतते महेश त्वमेव माता च पिता त्वमेव ॥ २६ ॥ त्वत्पादपद्म भ्रमर त्वमेतन्मनो
भिवांछत्यतिलालसं च ॥ किमुत्तमं वस्तु विहाय याति पवित्रवृत्तिः सुखवृत्तिकामः ॥ २७ ॥ यन्न श्रुतं वेद
३३२ वचः प्रपंच विचार विस्तार परैरपारैः ॥ तदद्य दृष्ट्वापि विहाय याति चित्तं तपोलब्धमिदं कथं वा ॥ २८ ॥
अतः परं ते मयि सत्कृपा चेन्नत्वया मिकामं खलु कालकाल ॥ त्वत्पादुकाराधनसेवनाभ्यां अन्यत्र ता
वन्न रुचिर्ममाद्य ॥ २९ ॥ अंबा समायास्यति चेदिदानीं त्वत्पादपद्मार्चन विघ्नरव ॥ नूनं त्वदभ्यागमनं
तदानीं अविघ्नतस्त्वत्पदपूजनं न ॥ ३० ॥ योषा जारमिव प्रियं प्रियतमं त्वत्पादपद्मं मयाप्यालिंग्याद्य
मम प्रयाति न कथं स्वाभीष्टसिद्धिं विना ॥ ३१ ॥ त्यक्तं वांछति जारमप्यतिधनं तद्वन्मनो मे प्रभो मद्वि
तभ्रमरो जहाति न भवत्पादांबुजं शंकर ॥ अनंतजनिसंचितैः अमितपुण्यपूर्णार्णवैरिदं शिवपदांबुजं—

शिवरह० ३
३९

नयन गोचरं जायते ॥३२॥ जगज्जनक शंकर त्रिदशनायकाव प्रभो भवत्पद सरोरुह भ्रमरस्व चित्तं मम॥ हर० तृ०
भवंतु बहवः सुरास्त्रिपुरसूदनाराधकाः परंतु न सुरैर्दिं तव पदांबुजं दृश्यते ॥३३॥ अपार गुण सागर प्रम अ० ११
थधीर गौरीपते चिरं मम मनः पदे तव विहारमन्विच्छति॥ अलं विमलयोगि हृत्कमल मध्यवासेरलं शिवां
घ्रिकमलाधुना शरणदाग्रगण्यादरात्॥३४॥ वसस्व मम मानसे कुगति भूरि भारालये॥ विचारशिशिरव्ह
र प्रकर भूतभूसाध्वसे॥ अनाथशरणागतासुर सुरैकरक्षामणे त्रियंबक सदाशिव त्रिपुरमर्दनाशंहर॥
॥३५॥ कृपासुरससागर स्मरहरांधकारे हर प्रसीद भगवन्प्रभो भवभवाब्धिसंशोषक॥ यदि त्रिनयनाधु
ना तव पदांबुजं त्यज्यते मदीयमपि मानसभ्रमर मत्र संमूर्छितं ॥३६॥ क्षणेन हतमेववा विगतजीवनं म
न्महे न जीवन विवर्जितं क्वचन जीव जातं प्रभो॥ शिवैकशरणस्य मे शरणमन्यदस्तीति किं भ्रमोपि भव
ति प्रभो शिवपदांबुजाराधनं॥३७॥ निधानमिति मे मतिस्तदितरन्निधानं न मे तदेव निधनेपि मे धनमन
न्यलभ्यं धनं॥ महेश्वर कदापि वा न च जिह्वास्य मास्यांतरस्थितं नमति निर्मलं शिव निवेदितं सादरं॥३८॥
अमूल्य शितशर्करामधुरमेवमीशाधुना भवत्पद सरोरुहं न मम मानसं त्यक्ष्यति॥ क्षणार्धमपि वा मनः स्मरहरा—

घ्रिपंकेरुहप्रभूतमकरंदपः प्रमुद धारया धीरया ॥ सुधामपि विहायतां विहरसादरंक्वादरस्तवापिमम वामनः शरणमिंदुमौलिंव्रज ॥ व्रजव्रज निरंतरं व्रज महेश पादांबुजं ॥३९॥ भजाभयदमन्वहं भजभजा धुनावाभज ॥ कथंनभजनेरतिः शिवपदांबुजस्यान्यथा ज्वलज्वलनतेजसा ज्वलतुते स्वरूपं महर्निधा नमिदमेवमेसुकृतसिंधुसंघार्जितं ॥४०॥ ममाघनिधयो नवात्रिपुरवैरिपादांबुजं इदं खलु सुदुर्लभंननि धयस्तया दुर्लभाः ॥ किमन्यद पिवांछितं मम शिवांघ्रिपद्मं विना प्रयाति मरणे धनंननिधयः प्रयांत्येवकिं ॥४१॥ प्रयांतिपशवः प्रियाः प्रियतमाः प्रयांत्येवताः तदन्यदपियातितद्धितसुपुत्रमित्रादिकं ॥ नयातिसुकृ तंपरंपशुपतिप्रसादार्जितं ॥ नसातिशयमीदृशं पशुपतिप्रसादं विदुः ॥४२॥ स्मरारिचरणार्चनादधिक मस्ति किंवा फलं श्रुतिश्रुतमनेकधा शिवपदांबुजाराधनं ॥ प्रधानधनमित्यपि प्रथितमेववेदेष्वपि ॥४३॥ निरंतरमुमापतिस्मरणकारणं दुर्लभं तपः फलमिदंमतं शिवपदांबुजानुग्रहात ॥ किमन्यदधिकं फलं शिवशिवेतिवाचादरात ॥ किमस्ति भुवनत्रयेप्यधिकमेतदन्यत्तव ॥४४॥ यदंघ्रिकमलार्चनंजगतिदु र्लभंदेहिनां सुरासुरमुनीश्वरप्रवरवांछितं तत्परं ॥ तदेवपुनरीप्सितंममपुनस्तदेवेप्सितं ॥ तदेवपुनरी—

३३३

स्मितं मम पुनस्त्वदेवेस्मितं॥ तदेव पुनरिपिस्मितं मम पुनस्तेदेवे स्मितं॥४५॥ इदं शिव पदांबुजं यदि विहाय मोहा-न्मुहुः प्रयाति मदनांतकस्मरण हीन मेतन्मनः॥ प्रणश्यतु नतेन मे गिरिशकृत्य मस्ति प्रभो न चाहितम भीप्सितं भवति याति संग्राह्यतां॥४६॥ परात्परतरा मर प्रवर शंकरा धीश्वरो हरा दरवशान्ममत्वमसि मेगतिः सर्वथा॥ अनन्य शरणं कथंहर विहातुमिक्षा तव प्रचोदय धियः प्रियाः सदय गर्भ नस्ते पदे॥४७॥

॥इति श्री शिवरहस्ये हराख्ये तृतीयांशे एकादशोध्यायः॥११॥ ॥श्री काशी विश्वेश्वरार्पण मस्तु॥ ॥

व्यास उवाच॥ ॥इत्याकर्ण्य वचस्तस्य करुणा रस वारिधिः॥ आलिंग्य ढुंढि राजानं माह विघ्नहरं हरः॥१॥ स्तवेनानेन सुप्रीतस्तवा देयं किमस्ति मे॥ त्वं कुमारश्च गौरी च प्रियास्त्वन्यन्नमे प्रियं॥२॥ अयं तव श्रुति मतः श्रुत्यर्थः प्रकटीकृतः॥ स्तवेनानेन सुप्रीतो वत्स जीव चिरं चिरं॥३॥ स्तुत्वा स्तोत्रेणमानत्वा प्राप्नुयादी प्सितं फलं॥ स्तवराजत्वमापन्नः स्तवः सोयं मम प्रियः॥४॥ अतः परं त्वया तावत् गिरिजा संनिधिं प्रति॥ गंतव्यं त्वरया तत्र तदीयं पश्य संभ्रमं॥५॥ नाट्यांगनालोकनेन संतुष्टा गिरिकन्यका॥ यद्वा मार्ग परिश्रांता तद्विचारस्तवो चितः॥६॥ जननी जनकश्चेति पुत्र पोष्यं द्वयं परं॥ ७ ॥

तत्रापि जननी श्रेष्ठा गर्भे धारणपोषणैः ॥७॥ विरक्तेनापि जननी पोषणीया प्रयत्नतः ॥ असाध्वी वा

सुसाध्वीं

साध्वी तु सुतानामपि ॥८॥ असाध्वी यदि भर्तारं विहायान्यत्र तिष्ठति ॥ तदुपेक्षा न कर्त्तव्या पोष्या

सान्नादिदानतः ॥९॥ यदि साध्वी पितुर्गेहे बंधुगेहेपि वा ससेत् ॥ तामाहूय स्वसदनं पुत्राः संपोषयं-

ति च ॥१०॥ त्वयापि तत्र गत्वापि तदुद्वेगकरं परं ॥ कृत्यं न कार्यं सहसा कार्यं तदनुमोदनं ॥११॥ यदि भ्रा-

९३५

ता [illegible] गिरिसुता मार्गायासेन सा तदा ॥ सुधादानादिना सम्यक् सेवनीया त्वया शिवा ॥१२॥ इतो

नय सुधां दिव्यां निर्मिता मधुना मया ॥ पीतावशिष्टा सा पीता निर्मितापि सुधा मया ॥१३॥ सुधाविशे

षाः संत्येव बहवस्तेषु सादरा ॥ न भवानी भवत्यत्र सादरा सा भविष्यति ॥१४॥ मद्भुक्तशेषं दृष्ट्वापि प्रहृष्टा

गिरिकन्यका ॥ स्था पिता मह्यमीशेन शेषोयमिति सादरा ॥१५॥ पतिव्रता गिरिसुता सा ततः पतिदेवता ॥

तस्याः प्रीतिर्मयि प्रीतिः मम तस्यां विशेषतः ॥१६॥ साध्वी सुपुत्रा सुभगा लावण्यनिधिरंबिका ॥ ततस्त

स्यां मयि प्रीतिर्धारारूपेण वर्तते ॥ सा लावण्यसुधांभोधिः सौभाग्यांबुधिरेव सा ॥ सौभाग्यानां निधानं

सा सा गौरी सर्वमंगला ॥१८॥ न सर्वमंगलां त्यक्त्वा वसामि हृदयादिह ॥ हृदयान्निर्गता साचेन्मंगलं दुर्लभं खलु ॥

॥१९॥

शिवरह० ३
४०

सर्वमंगलदानार्थमुद्यता सर्वमंगला ॥ तद्वियोगे मंगलानि दुर्लभानि मनीषिणां ॥२०॥ तां सर्वमंगलां-हरा तू
स्मृत्वा दुष्कराण्यपि वस्तुतः ॥ कार्याणि कृत्वा क्षुद्रोपि तत्कार्यफलमश्नुते ॥२१॥ त्वयापि गमने गौरीच
रणां कुरु हमुहुः ॥ स्मर्तव्यमतियत्नेन सर्वसिद्धिकरं परं ॥२२॥ पुरा तारकसंहारं कुमारः कर्तुमुद्यतः ॥ तमेव
ध्येविदित्वाथ चिंतया मास चेतसा ॥२३॥ प्रेरितः शंकरेणाथ तारका सुरनाशने ॥ तन्नाशविघ्नसंघानां नाशः
केन भविष्यति ॥२४॥ वराश्च तुमे खास्त्रा ताक्कोटिशस्तेन तारकः ॥ ॥ अवध्यत्वेन निर्णीतो वधस्तस्य कथं
भवेत् ॥२५॥ उन्मत्तस्तैर्वरैः सोपि गणयत्येव ना मरान् ॥ तेनामराधिकाराश्च क्षणेनैव हृताः पुरा ॥२६॥
विचेरुस्ते धरापृष्ठे निष्ठुरे शर्कमावृते ॥ नारायणादयः सर्वे तदा निरवलंबनाः ॥२७॥ तिष्ठत्येवमतिक्रू
रस्तारको भुवनत्रयं ॥ करोति सव्यथं तस्य संहारः केन वा भवेत् ॥२८॥ इंद्रः शचीकुटीरेस्मिन् जयेते
नापि संवृतः ॥ स्वर्गलोकात्परिभ्रष्टः कष्टमाप्नोति नष्टधीः ॥२९॥ तृणकल्पमभूद्वज्रं वज्रं दंडायते ख
लु ॥ यावृत्रहरणे शक्तिस्तस्य या सापि निर्गता ॥३०॥ सोयं नाराय पूर्वं पद्मया सह सादरं ॥ वैकुंठे संस्थित
स्तस्य शक्तिरप्यतिकुंठिता ॥३१॥ आविले कमले सापि तया कमलया सह ॥ निलीनान्मीनसंघातनि—

अ० १२

हितो दुःखितोऽधुना ॥ ३२ ॥ यो वाणीरमणः सोऽपि ब्रह्मारण्यमुपाश्रितः ॥ जीर्णपर्णकुटीवासी निकटे रटीति
स्फुटं ॥ ३३ ॥ न सूर्यकरसंचारः स सो दूरास्तमाश्रितः ॥ न चंद्रवार्त्ता तारणां दूरे वार्ता विशेषतः ॥ ३४ ॥ वातो वा
ति शनैः खतारकासुरमंदिरे ॥ दूरीकुर्वन्रजःपुंजं शंकितोऽतीव दुःखितः ॥ ३५ ॥ पाककर्मरतो नित्यं पा
वकस्तन्महानसे ॥ अनपायेन दुःखेन कालं नयति दुष्करं ॥ ३६ ॥ धूमोऽपि धनयोगेन दुःस्थ हरश्चेन्म
हानसे ॥ तदा दुःखमिति ज्ञात्वा न चेंधनमपेक्षते ॥ ३७ ॥ वरुणस्तरुणीत्यक्त्वा कदा स्वरमणीं गृहे ॥
तस्यैव सेचनं कुर्वन्नधितिष्ठति दुःखितः ॥ सागरोऽपि स्वरत्नानि तस्मै दत्वा मुहुर्मुहुः ॥ रिक्त एवपु
नर्भीतो रत्नाभावविनिश्चयात् ॥ यद्यानेयानि रत्नानि बहूनीति स तारकः ॥ दूतान्प्रेरयति व्यग्रः तदा किं
कार्यमित्यपि ॥ ४० ॥ नीयंते प्रत्यहं रत्नान्यनंतानि पुनः पुनः ॥ किमुत्पन्नानि रत्नानि किं देयानीति दुःखितः ॥
तद्वदन्येऽपि सर्वेऽपि सुरास्तारकपीडिताः ॥ गिरिकंधरमाश्रित्य निलीनाः संति दुःखिताः ॥ ४२ ॥ मुनयोऽपि वनं
त्यक्त्वा फलमूलजलावृतं ॥ साग्निहोत्राश्चरंत्येव नीरसे गिरिकंधरे ॥ ४३ ॥ ऊषराऽपि धरा धीरा तारका
सुरविह्वला ॥ सदा सफलसस्याढ्या पीड्यमानाऽपि दानवैः ॥ ४४ ॥ तारकासुरगंभीरशरीरामिततेजसा ॥

शिवरह० ३ ४१

अहोरात्र विवेकोपि नांधकारो न सर्वथा ॥४५॥ न तत्प्रति भवेल्लोके लोका लोका चलावधि ॥ क्रीडां - हरः तृ अ० २२
कृत्वा सवैकुंठे स्व[illegible]दारैः सह तिष्ठति ॥ तदग्रे विरजा नाम नदीं दृष्ट्वा स तारकः ॥ भीतस्तदग्रे नायाति
शूल ज्वाला समावृतां ॥४७॥ अतो नायाति कैलासं काल काल भयादपि ॥ अन्यथा तस्य गमनं तत्रा
पि स्यादकुंठितं ॥४८॥ एवं संवसतस्तस्य तारकस्य दुरात्मना ॥ अशक्य एव संहारः सर्वथापीति
मन्महे ॥४९॥ दुःखितास्ते सुराः सर्वे विचार्यान्योन्य मेकदा ॥ नारायणस्य निलयं जग्मुस्ते कमलापतेः
॥५०॥ खद्योतव ल्लिलीनं तं कमला सहितं हरिं ॥ ऊचुर्विस्मयमापन्नाः शरणं किमिहेति नः ॥५१॥ ॥
देवा ऊचुः ॥ ॥ नारायणाधुना कं वा शरण्यं शरणार्थिनां ॥ प्रपन्नाः स्म प्रपन्नानां आपन्नार्ति विनाशकं ॥
५२॥ क्व ते धैर्यं क्व ते शौर्यं क्व ते बाहु पराक्रमः ॥ खद्योत रूपतामेत्य पद्मया सह तिष्ठसि ॥५३॥ मधुकैट
भ घैरिलं कुत्र वा गतमद्य ते ॥ लज्जावहं नतं नाम किमिदं मधुसूदन ॥५४॥ अतः परं कथं सोरव्यं ई
दृशी ते गतिर्यदि ॥ कमलापति तावाते कथं वा स्थिरता मिया[illegible] ॥५५॥ निलीनं त्वां न जानाति नूनं कम
लया सह ॥ विमला कमला तेन दृष्टा चेत्यज्यते कथं ॥५६॥ अल्पो बिले स्मिन्कमले लीने सति न दृश्यसे ॥

अन्यथा तेन नीतास्यात् बलिना कमला खलु ॥५७॥ तव चेत्कुंठिता शक्तिः अस्माकमपि कुंठिता ॥ श
क्तिरत्नलया तावत् अधैर्यं क्रियते कथं ॥५८॥ धैर्यमावह यत्नेन नारायण सुरैः सह ॥ युद्धे कृते तार
कोपि हंतव्य इति सत्वरं ॥५९॥ मरणादधिकं किन्नः कमले कमलान्वयः ॥ आविले विमले स्यापि ग
तिस्तव किमीदृशी ॥६०॥ इत्युक्तं तद्वचः श्रुत्वा मंदमाह हरिः सुरान् ॥ तारकः श्रोष्यतीत्येव भीतः स्व
वचनं मुहुः ॥६१॥ ॥नारायण उवाच॥ ॥ तारकासुरहंतृत्व शंकाप्यस्मासु नामराः ॥ बहुवारं
कथं तेन क्रूरेणैव निराकृताः ॥६२॥ तारकासुरहुंकारोप्यस्माकमशनिः खलु ॥ नकोप्यशनि
पातेन जीवनाशं करिष्यति ॥६३॥ तन्नेत्रतेजसा दग्धं अस्त्रमंडलमस्य मे ॥ नारायणास्त्र भस्मे
दं चक्रं भस्मावशेषितं ॥६४॥ इदमस्त्रद्वयं मुख्यं भस्मसादभवत्सुराः ॥ युद्धसाधनमस्माकम
न्यं नष्टमशेषयं ॥६५॥ शार्ङ्गं नष्टं गदा नष्टा शंखो नष्टस्तदीक्षणात् ॥ नष्टं बाहुबलं सर्वं शरीर
बलमतः ॥ तत्तेजसापि दूरेपि स्थातुमेव न शक्यते ॥६७॥ तन्नेत्रतेजःपातेन देहो मे चक्रसन्निभः ॥
तेन कृष्ण इति ख्यातिः लोके जाता ममाधुना ॥६८॥ युद्धप्रत्याशया यूयं अधुना समुपागताः ॥ सा तावद-

ति दूरेस्तु वासोपि कीन्नो त्रमे ॥ ६९ ॥ बहूनां वचनैस्त्रय दि कोला हलस्तदा ॥ स समागत्य सहसा- ह्रा: ह
हलायास्यति तारकः ॥ ७० ॥ यदुक्तं मधुवैरिखं मयि तन्न ममामराः ॥ स महामायया तावत्कैटभोपिह अ० १२
तः पुरा ॥ ७१ ॥ या गौरी लोकजननी महामायेति विश्रुता ॥ सा संहाररता सा का मोहयत्यखिलं जगत्
॥ ७२ ॥ महामाया मोहितोहं भवंतोप्यमरास्तथा ॥ मोहिता मुनयोप्यन्ये मोहमेष्यंति सर्वदा ॥ ७३ ॥
सा चेन्मोहप्रवृत्तास्याज्जगतो मोहितं जगत् ॥ विनाशाय प्रवृत्ता चेत्त्विनश्यति न संशयः ॥ ७४ ॥
मधुकैटभनाशाय विधिना संस्तुता शिवा ॥ तदा तयोर्विनाशोपि कृत एव तया खलु ॥ ७५ ॥ चिच्छक्तिः
परमा माया सर्जने पालनेपि सा ॥ संहारेपि समर्था सा महेशस्यापरा तनुः ॥ ७६ ॥ तया यस्य विनाशा
य कृतो यत्नः कियानपि ॥ तस्य नाशो भवत्येव तस्मिन्नेव क्षणे सुराः ॥ ७७ ॥ सुराणामसुराणां च सृष्टि
पालननाशनैः ॥ सा क्रीडति महागौरी भवानी सर्वमंगला ॥ ७८ ॥ शर्वाणी पार्वती दुर्गा मृडानी
विश्ववाहुका ॥ कामाक्षी सा विशालाक्षी शिवा त्रिपुरभैरवी ॥ ७९ ॥ सिद्धेश्वरी च विकटा सेवका
त्यायनी स्मृता ॥ वागीश्वरी महाकाली महिषासुरमर्दिनी ॥ ८० ॥ चंडमुंडप्रमाथिनी धूम्रलोचनमर्दिनी

निशुंभमर्दिनी देवी शुंभासुर विनाशनी ॥ ८१ ॥ सैव शाकंभरी लोके कौशिकीति च गीयते ॥ दुर्गासुरविनाशेन दुर्गा देवीति गीयते ॥ ८२ ॥ गौरी संहारकाले पि करुणारससागरा रिपून् अपि पुनात्येव शस्त्रप्रहरणादिभिः ॥ ८३ ॥ महामायासमुत्पन्ना माया कांचनशोभना ॥ संहारकारिणी सापि मायांतरविजृंभिता ॥ ८४ ॥ तत्तन्मायास्वरूपाणि निर्माय स्वयमेव सा ॥ उत्पत्तिस्थितिसंहारान् करोति भववल्लभा ॥ ८५ ॥ वृत्रासुरादयः सर्वे महामायाहताः सुराः ॥ कैलासनगरद्वारस्वर्गलोकमुपागताः ॥ ८६ ॥ तेपि धन्याः सुराः सर्वे यया ते चासुरा हताः ॥ नता दृशं वा भाग्यं नः पुण्यैरगणितैर्विना ॥ ८७ ॥ अस्माकमपि नष्टानि दुरदृष्टानि सा शिवा ॥ दुरदृष्टविनाशाय प्रसंगेनापि संस्मृता ॥ ८८ ॥ अतः परं तारकाद्या भीतिर्जाता दुरत्यया ॥ सा नाशं प्राप्नुयादेव गौरीस्मरणकारणात् ॥ ८९ ॥ या सर्वमंगला नाम्ना तन्नामस्मरणे सति ॥ शं भवानां निर्मलानां मंगलानि पदे पदे ॥ ९० ॥ नूनं जागरणे तेषां मंगलानि प्रयच्छति ॥ स्वप्ने पि सा मंगलानि मंगला सर्वमंगला ॥ ९१ ॥ यद्वा मांगमिति ख्याता वेदे सा सर्वमंगला ॥ मंगलानि तनोत्येव प्रतिक्षणमनाकुला ॥ ९२ ॥ कोवान मंगलं प्राप मंगलापतिपूजया ॥

स सर्व मंगला भर्ता मंगलानि प्रयच्छति ॥९३॥ सर्व मंगलया युक्तः तारकासुरनाशकं ॥ जनयामास- हरः तं
विश्वात्मा तारकं सह निष्यति ॥९४॥ अतः परं कियान्कालो नेयो स्माभिस्ततः परं ॥ तारकासुरसंहारं
स कुमारः करिष्यति ॥९५॥ समूहे श्वरवीर्येण कुमारः सम भूत्सुराः ॥ स वीराग्रे सरः क्रूरो महा गौरी कु
मारकः ॥९६॥ स शौर्य नवनीतेः पोषितः शौर्य सागरः ॥ तारकासुरसंहारं क्षणे नैव करिष्यति ॥९७॥
कुमार शर संधान दहन ज्वालया परं ॥ तारकासुर संहारो भविष्यति न संशयः ॥९८॥ इति तद्वचनं
श्रुत्वा नत्वा नारायणं सुराः ॥ प्रहर्षेण परं प्राहुः कृतार्थो सीति सादरं ॥९९॥ तारकासुर संत्रास दा
वानल समावृताः ॥ शिवनाम सुधा सारैः शीतला स्म किलाधुना ॥१००॥ कथं स्मृतो महादेवः संसारा
ग्नि विनाशकः ॥ अकस्माद धुना दीनानस्मान्पालयितुं परं ॥१०१॥ स कृपालुर्नीलकंठः सर्व कंटक
नाशकः ॥ करोति मंगलं नित्यं क्षणार्धे नापि वा स्मृतः ॥२॥ प्रतिक्षणं महादेव चरण स्मरणादराः ॥ हा
राः पर मुदा रास्ते न संसार भयातुराः ॥३॥ त एव धन्या मान्याश्च धरणी मंडले मुहुः ॥ ये स्मरंति महादे
वं उमालिंगित विग्रहं ॥४॥ अहो महदिदं भाग्यं सौभाग्य निधि रेवनः ॥ गौरी धवो धुना साधु धाम रूपेण-

संस्मृतः ॥८॥ महादेवपदांभोजभृंगमंगसमंगलं॥ तनूत्तमांगमुत्तुंगमुहुस्तत्प्रणतं मुदा॥९॥
हरं परात्परतरं तं महानंदसागरं॥ स्मृत्वानत्वापि दृष्ट्वापि परमानंदतां ययुः॥७॥ ये ये कृतार्था
स्ते सर्वे सर्वदा सर्वसिद्धिदं॥ शंकरं शरणं प्राप्ताः प्राप्तैश्वर्यमहोत्सवाः॥ यद्द्वारगास्तु गतसंगको
ट्यो यद्धाम्नि मत्तेभसमूहकोट्यः॥ तद्द्वारपालाय नमोनमः सदा सशंकरद्धाम विचारसागरः॥ न शंभवानाम
शुभं कदाचित्ते शोभनानां सदनः सुखानां॥ त एव धन्या पृथिवीतलेस्मिन्मान्याः सुराणां च नरेश्वराणां॥१०॥ अ
स्माकं कृतपुण्यसंघविभवैरद्याधुना शंकरे भक्तिः काचन सापि मेरुसदृशं सूते धनं निर्धना॥ स्मृत्वा तं सकृदप्यपार
धनभूसौभाव्यं तस्ततः संतः केपि किलांतकांतकलसत्पादांबुजाराधकाः॥११॥ संपूर्णकामं परमं प्रकामं निर्दग्धकामं गि
रिजार्धवामं॥ धृतार्धसोमं समवाम सोमं देवोत्तमं देवतसार्वभौमं॥१२॥ कृतं किमपि यत्पुरा शिवपदांबुजाराधनं तदेतदधु
नासुखं किमपि साधु सूते मुहुः॥ इदं न सुरधेनुभिर्न मणिनापि कल्पद्रुमैः सुधानिधिनिमज्जनैरपि तु केवलं तेन नः॥१३॥
॥इति श्री शिवरहस्ये हराख्ये तृतीयांशे व्यासमुनिसंवादो नाम द्वादशोध्यायः॥१२॥ ॥श्री काशी विश्वेश्वरार्पणमस्तु॥
॥श्री शिव उवाच॥ ॥ एवं ढुंढे कुमारोपि विज्ञार्यी दरपूर्वकं॥ नत्वा मामाह विनयात्कृतांजलिपुटः शनैः॥१॥ कुमार उवाच॥

शंकरापारकरुणासारसागर शंकुर ॥ मदन्योदयनीयस्ते ढुंढेर्वा नैव दृश्यते ॥ २ ॥ तारकासुरसंहार विहारचतुरो हरः ॥ स महावीर इत्यस्ति श्रुतिस्मृति शिरोमणिः ॥ ३ ॥ सृष्टिपालन संहारान्करोति श्री महेश्वरः ॥ न तदन्यः क्वचित्कोपीत्यपि श्रुतिरपि श्रुता ॥ ४ ॥ अतस्तारकसंहारः कथं कार्यो मया प्रभो ॥ तादृशं नास्य सामर्थ्यं अन्यस्यापि न सर्वथा ॥ ५ ॥ यत्कार्यकरणे शक्तो यस्तेनैव परं खलु ॥ तत्कार्यमिति नान्येन न तत्वं तादृशं खलु ॥ ६ ॥ यत्तेजसा सुराः सर्वे पराभूताः प्रतिक्षणं ॥ तद्वीर्यदावदहनं न सह्यमिति मेनिरे ॥ ७ ॥ शतभानिवतत्तेजः सुरसंहारमिच्छति ॥ समहाप्रलयाग्नीनां समूहमिव तिष्ठति ॥ ८ ॥ स दुर्धर्षः सुराणां चेत्सहायोपि सुरैर्मम ॥ कथं विधेयो विधिना स तु नारायणोगतः ॥ ९ ॥ अधुना तस्य वार्तापि न श्रुता तात का गतिः ॥ तस्य नारायणस्यापि विधेर्वा भक्तवत्सला ॥ १० ॥ किमेवमुत्कटा सृष्टिः तस्य संपादिता प्रभो ॥ तत्संहाराय यत्नोपि कथमेतादृशो धुना ॥ ११ ॥ स कालकूटकूटानां कूटवल्लिकलवर्धितः ॥ अतस्तस्य न संहारे प्रवृत्तिरपि जायते ॥ १२ ॥ नवटांकुरवत्तस्य संमतं परिपालनं ॥ स वृक्षैः किं न खल्वेधः शाखामंडलमंडितः ॥ ॥ १३ ॥ कथं विषतरुः सृष्टः सुराणामपि नाशकः ॥ कालकूटादपि भयं न सुराणामभूत्तदा ॥ १४ ॥ तन्नेत्रतेजसां लेशाः कालकूटवदन्वहं ॥ स्वर्गिवर्गविनाशाय चरंति सुरमंदिरे ॥ १५ ॥ तन्नेत्रतेजो वयवोप्यसंसह्यः कथं मम ॥ सह्यः स सा-

क्षादग्नीनां समूहः प्रलयोन्मुखः ॥१६॥ तत्संहार प्रयत्नो पि प्रायः स्याद्विफलो मम ॥१७॥ अतस्त [illegible]मधु
नायत्नोन क्रियते मया ॥ यत्ने कृते यदि फलं न भविष्यति सत्वरं ॥ तदा चेतसि वै [illegible]व्यं अकीर्तिरपि दुस्तरा ॥ त
स्मादगमनेनैव कालोनेयः कियानपि ॥१८॥ असह्य स्सर्वेषांसमसह्यः किमिमाधुना ॥ ततः पराजये लोके प्युप
हासोपि जायते ॥ किं तेनाप्युपहासेन शत्रूणामपि जीवनं ॥ यदि तस्मिन्महा युद्धे सन्नद्धे बुद्धिनाशके ॥२०॥
विपर्ययो भवे युद्धे यशोवृद्धिस्तदाकथं ॥ उत्पत्तिरेवयशसः प्रथमं दुर्लभा ततः ॥ कथं तद्युद्धवार्त्तापि कृतां तां
त्वकशंकर ॥ सर्वेषामंतकत्वेन कृतां ततः प्रथितः कथं ॥२२॥ न प्रेष्यते तद्वधाय तद्वधं न करोति किं ॥ कथमस्म
द्वध्यस्य तस्य [illegible]द्ध्यते ति चेत् ॥२३॥ तर्हि सह्यात वापीशि मम त्रिदशा दुर्दशा ॥ तदायुः परिमाणं च न कर्त्तुं
यतते मनः ॥२५॥ अतस्त द्युद्धवार्ताभिः कालाकाला लमित्यलं ॥ इत्युक्तं तद्वचः श्रुत्वा मयेवं समुदीरितं ॥२५॥
तदादरेण श्रुमे गणेश वचनं पुनः ॥ सत्यमुक्तं कुमाराद्य तारकासुरसंनिभः ॥२६॥ नाधुना वर्तते वीरो न भूतो न भविष्य
ति ॥ तथापि ते विचारः कः कालीं कात्यायनीं स्मर ॥२७॥ कालि कालीति काली ति स्मरन्युद्धे जयं लभेत् ॥ उमा गौरि
महागौरि महाकालि शिवासती ॥२८॥ शर्वाणी चंडिका दुर्गा रुद्राणी गिरिकन्यका ॥ मृडानी पार्वती माया महा माया महेश्वरी
॥२९॥

शि०म०३ ४८

अपर्णा शांभवी भद्रा शुभा त्रिपुरभैरवी ॥ श्रीः सर्वमंगला लक्ष्मी भवानी दक्षकन्यका ॥ ३० ॥ आर्या हैमवती चेति-हरा॰ तृ॰ श्रुत्वा जयमवाप्नुयात् ॥ एकैकमपि यन्नाम गौर्याः स्तद्दुःखनाशकं ॥ ३१ ॥ जयप्रदमिदं चैतदायुर्वृद्धिकरं परं ॥ ततः कुमारस्तां गौरीं स्मृत्वायुध्यायया हिते ॥ ३२ ॥ जयो भवत्यसंदिग्धं तन्नाम जयदं यतः ॥ स्मृत्वापि गौरीं गिरिराजकन्यां धन्यां च मान्यां च कलंकशून्यां ॥ ३३ ॥ दुर्गामनन्यामपि भावयंतः सद्यो भवंत्येव हि भाग्यवंतः ॥ स्मृत्वापि यां पातकसागरेभ्यो निर्गत्य संगत्य च सौख्यसंघे ॥ ३४ ॥ स्वर्गं समेत्याप्यपवर्गमेत्य तिष्ठंति भाग्येन नराः शिवाग्रे ॥ यद्दृष्टिपातेन जगत्समस्तं उत्पन्नमेतत्परिपालितं च ॥ ३५ ॥ कल्पावसाने प्रलयं प्रयाति सा देवता मंगलदेवताया ॥ तत्पादपद्मस्मरणं मुनीनां तपस्यया केवलमं बिकास्या ॥ ३६ ॥ स्मृत्वा सदा सर्वसुखप्रदात्री सैषा विधात्री सुखसागराणां ॥ यामन्नपूर्णां प्रणमंति देवाः स्तुवंति गंधर्वगणा मुनींद्राः ॥ ३७ ॥ मत्याश्च तत्पादरजःप्रसादाद्रमाद्यः सा खलु पूजनीया ॥ यस्याः कटाक्षप्रसरेण धन्यो दीनो दरिद्रः कृपणोपि धन्यः ॥ ३८ ॥ मान्यः सुराणां धनसागराणामधीश्वरः स्यादिति तां भजांबां ॥ [illegible] पद्मांबुजरेणुलेशं दधार शौरिः किल कूर्मरूपः ॥ ३९ ॥ शेषः सहस्रेण दधार मूर्ध्ना सैषा भवानी शुभराजधानी ॥ कुलाचले मेरुसमानधैर्यै रति प्रयत्नेन विमुक्तकार्यैः ॥ ४० ॥

३४०

यत्पादपद्मांबुजरेणुलेशो धृतो मुदा सा गिरिजा तवांबा ॥ ५०॥ दिग्दंतिभिर्यत्पदपद्मरेणुः धृतः स्वकुंभस्थलपंकिलेपि ॥ ५१॥ मदांबुधारापरिवीतगात्रैस्तद्धारणाया सगतैः स्वतंत्रैः ॥ ५२॥ यत्पादपद्मांबुरुहार्चनाय रत्नाकरो नूतनरत्नमालां ॥ ५३॥ संपादयत्यन्वहमादरेण सा किन्न गौरी तव पूजनीया ॥ ५४॥ इयं स्तुतिर्मन्मुखपंकजेभ्यो मरंदधारेव मुदं भवान्याः ॥ ५५॥ मुदे प्रवृत्ता तु शुभाय नित्यं जयाय सौभाग्यसमृद्धिहेतुः ॥ ५३॥ अतः परं सत्वरमेव ढुंढे गौरीपदांभोरुहवीक्षणाय ॥ ५४॥ कुरु प्रयत्नं कुरु मा विलंबं लंबोदरालंबनसंभ्रमाणां ॥ एका किनश्चेत्तव तत्र गंतुं मनःप्रवृत्तिर्न तदा तदापि ॥ कुमारमभ्येत्य सहायभूतं सतां वदंबानवलोकनार्तः ॥ तेनापि शीघ्रं तव कार्यमद्य कर्त्तव्यमेवेति विनिश्चयो मे ॥ ५६॥ तस्यास्त्यशक्यं न किमप्यतस्ते विचारणीयं गमने गणेश ॥ एकेन तेनैव मदिष्टकार्यं सिद्ध्यत्यवश्यं सतया विलंबं ॥ ५७॥ न कर्त्तुमिच्छत्यति सूक्ष्मबुद्धिः सुहृद्गदं तं वेदस किं न वेद ॥ समन्वियोगो घत चित्तवृत्ति निर्वृत्तिरप्यस्त्वपराधभीतेः ॥ ५८॥ तच्चित्तवृत्तेरनुवृत्तिरस्मिन्सशौर्यमूर्त्तिः श्रुतगीतकीर्त्तिः ॥ तस्याधुनैवागमने विलंबस्त्वयान कार्यः सहसा विलंबः ॥ ५९॥ न तस्य सह्यः स हि सिंहसिंहः सिंहासनाद्द्रष्टुमपि प्रवृत्तः ॥ यद्वीर्यवार्त्ता श्रवणे-

शिवरहः ३
४६

पितारः सतारकः सर्वसुरालकोपि ॥५०॥ त्रस्तः समस्तासुरभूनिरस्तः सवस्तुतः स्तावदति प्रशस्तः ॥ एकः कु- हरः ८३
मारो जगतीतले मे कुमारनाम्ना प्रथितः कुमारः ॥५१॥ कुमार एवेति कुमारबुद्धिः कुमारमात्रे मम डिंभके हे ॥ ते- अ० १३
नाकुमारं न कुमारतापि प्रदर्शिता कार्यविशेषसिध्या ॥५२॥ ससिद्धसाध्यार्थितसिद्धबुद्धिः न बुद्धिमानत्र तयाविध
धोन्यः ॥ गौरीकुमारेण कुमारसुः स्यात्सूते कुमारं न तयातदन्या ॥५३॥ न तादृशः कोपि कुमारवर्गे कुमारवृत्तिर्न
तथा कुमारः ॥ मदुक्तकार्येण विलंबशंकालंबोदरं वाचरणांबुजस्य ॥५४॥ आलोकनेतस्य खलु त्वरा स्यात्सा
तं विलोक्य प्रमुदा भवित्री ॥ दृष्टे कुमारे गिरिराजकन्या विन्यस्य कार्यांतरमाशु तेन ॥५५॥ आलिंगिताक्षी
रसहस्रधाराधाराधरात्युच्चकुचा भवित्री ॥ दृष्टे कुमारे गिरिराजकन्या स्नेहः परं क्षीररसत्वमेत्य ॥५६॥ गौ
रीकुचद्वारवरेण तावद्विनिर्गतः स्याद्बहिरद्य नूनं ॥ कुमारमार्गागमने प्रवृत्तिं श्रुत्वापि गौरी विगतान्यवार्ता ॥
॥५७॥ कुचौ पयःप्रस्रवणप्रवृत्तौ दृष्ट्वा मुहुः स्मेरमुखा भवित्री ॥ सुस्मेरद्विगुणीकृतानि रुचिरक्षीरप्रसारं मुहुः
पश्यंती कुचकांचनाचलशिरः संमाननाभ्यन्नता ॥ स्कंदालिंगनलालसा पिचपके क्षीरं गृहीत्वा
मुहुः किं नायास्यति सत्वरं सुत इति प्रेमांबुधारा शिवा ॥५८॥ सा गौरी सुखराशिरेव सुकृत-

श्रेणीसुधासागरः ॥ सौंदर्यद्रववाहिनी च सततं सावाहिनी संपदां ॥ आपद्राशिविनाशिनी खलु महापापाशनिः साशनैः ॥ एतन्मे शयनं समेत्य शमुमा मह्यं प्रदास्यत्यपि ॥५९॥ गौरी शारदपूर्णचंद्रवदना दृष्टाप्य दृष्टैर्मुहुः कष्टं दुःखमपाकरिष्यति मुहुः स्पृष्टा सुखांभोनिधिं ॥ सृष्ट्वा सृष्टिविचक्षणं खलु मुहुः दृष्टिप्रवृष्टिं परं स्रष्टुं दृष्टविशेषपोषिततनुं कुर्यादं दृष्टान्वितं ॥६०॥ भाग्यैर्भूरितपःप्रभावभवनैः संभावनीया मुहुः भक्ताभीष्टफलप्रदाननिपुणा साति प्रवीणा क्षणं ॥ ध्याता पीक्षणदा प्रतिक्षणमितिश्लक्ष्णे भवानी कदा ॥ द्रष्टव्या नयनाश्रमापहरणं कर्त्तव्यमत्यादरैः ॥६१॥ धन्यानां भवनेषु सा गिरिसुता विन्यस्य पादांबुजं स्थित्वा वा क्षणमात्रमादरयुता तद्द्वारपालां गणे ॥ इत्थं ती कमला विलासमसकृत्त द्वारपालां गणे प्यालस्येन विना रमा विहरणं साकं तृप्तविक्लृति ॥६२॥ देवानामपि वंद्य एव सततं यत्पादुकाराधकस्तत्पादांबुरुहं स्मरंति सुकृतैः कांते रनंतैरपि ॥ तन्मात्रस्मरणेन सुंदरतरे सा पीं दिरामंदिरे तत्सेना निरता कदापि विरता भ्रांता न संजायते ॥६३॥ जातश्चेज्जननीमनोज्ञजठरे गौरीपदांभोरुहं स्मृत्वा भूपतितामुपेत्य बहुधा भुक्त्वापि भोगान्बहून् ॥ कुर्वन्वा भवपालनं बहुधैः कुर्वन्वि वाराधनं काशीं प्राप्य विमुच्यते मुनिवराराध्यामसाध्यामपि ॥६५॥ दृष्टा चेद्गिरिराजराजतनया—

नेत्रोद्भवो जायते सर्वांगं पुलकांचितं चनमनः किंतत्प्रसन्नं मम ॥ नित्यानंद सुधा प्रसार लहरी कल्लोल माला-हरा:तूः कुलः कालं क्विं न नया मिकालकलना साकालकालस्यमे ॥६५॥ ॥ इति श्री शिवरहस्ये हराख्ये तृतीयांशे श्री
महेश गणेश संवादो नाम त्रयोदशोऽध्यायः ॥१३॥ ॥ श्रीकाशी विश्वेश्वरार्पणमस्तु ॥ ॥ व्यास उवाच ॥ ॥ पुनस्तं गंतुमुद्युक्तं कर्तुमेव महेश्वरः ॥ प्राह मंदं मधुरया गिरा गीर्वाण नायकः ॥१॥ कुमार गमने वृत्ते लंबोदर विलंबधीः ॥ निवृत्तो वास्तु सहसा सविलंबसहोपिन ॥२॥ तस्यदर्शनो त्कंठानी लकंठाधिरोहणे ॥ मुहुर्मुहुः प्रवृद्धा स्यात्तन्निरोधोतिदुःसहः ॥३॥ भवद्गमन मात्रेण त्वरया गिरिकन्यका ॥ समायास्यति मां द्रष्टुं प्रहृष्ट वदना सती ॥४॥ दृष्ट्वा गौरी शरद्राका सुधाकरकरां शुना ॥ मल्लोचन चकोरास्ते पुष्टा तुष्टा भवंत्यपि ॥५॥ एतस्मिन्नंतरे वीरः कुमारः समुपागतः ॥ प्रणतः प्रश्रुतानंद धारा सार समावृतः ॥६॥ ततः परं सतुष्टाव भगवंत मुमापतिं ॥ अनंतैरपि वेदांतैर्योन ज्ञातस्त मव्ययं ॥७॥ कुमार उवाच ॥ योयं देवः सच्चिदानंद रूपो रूपातीतो वेद वेदान्तवार्त्ताः ॥ यस्मादस्मान्निर्गतार वसत्यं तंत्वा देवं तत्वतः कोपिवेद ॥८॥ यस्मादेतज्जायते विश्वमादौ येनैवेदं रक्षितं रक्षणार्हं ॥ अंते तावन्नाशमेति प्रभुतं तं त्वां वंदे देवता सार्वभौमं ॥९॥ यत्पादाब्जं मृग्यमासीन्मुनीनां तत्व ज्ञाना पारसाराकराणां ॥६॥

तत्पादाब्जं दुर्लभं दुर्लभं मे देवा शास्यं सर्वदा दुर्लभं च ॥१०॥ यत्पादाब्जं कामकामाः सुराद्याः सर्वे ताव
द्दृष्टुमिच्छंति भक्त्या ॥ तत्पादाब्जं दुर्लभं देव गीतं तन्मे चित्तं सर्वदा सावधानं ॥११॥ यागैर्योगैः साधनैर्यन्न
दृष्टं पादांभोजं विश्वनाथस्य तन्मे ॥ नित्यं तावद्दुर्लभं दुर्लभानां मध्ये तावद्दुर्लभं त्वत्पदाब्जं ॥१२॥ त्वत्पादा
ब्जं द्रष्टुमद्यापि धन्याः योगाभ्यासं कर्तुमभ्युद्यतास्ते ॥ कृत्वाकृत्वा तं पुनः श्रांत चित्ताः त्वत्पादाब्जं द्रष्टुमर्धें
दुमौले ॥१३॥ घोराकारासार संसार सिंधुर्यत्पादाब्जालोकनेन प्रवृद्धः ॥ तं त्वां सोमं देवता सार्वभौमं वंदे वं
दे सुंदरानंदकंदं ॥१४॥ नित्यानंदानंदसंदोह बीजं यत्पादाब्जं सर्व विज्ञानबीजं ॥ पादांभोजं तन्नमामि
३१ २ प्रपन्नः त्वत्पादाब्जं सर्वदा दुर्लभं मे ॥१५॥ सुरापार कोटीर कोटि प्रभाभिः भवत्पादुकाकांतिकांताभिरीश ॥
प्रशांतो विधुर्भानुमानिंदुमौले कला षोडशी वान तस्यास्तु तासां ॥१६॥ भवत्पादपद्म प्रभा मंडलेन प्रवृ
त्तो पि मार्तंड इत्येवमन्ये ॥ जगन्मंडलं भासयत्यं बिके श प्रकाशस्तवायं प्रकाशायकस्य ॥१७॥ तवायं
प्रभावः प्रभूतः प्रभाति प्रभा मंडलस्यास्य कार्यं न विघ्नः ॥ स्फुलिंगेन नष्टेपि गाढांधकारे क्व सूर्या
द्यपेक्षा पि लोकेषु दृष्टा ॥१८॥ तडित्कोटि संघात जात प्रकाशं तिरस्कृत्य तेजस्तवेदं प्रवृत्तं ॥ ॥

शिवस्तु०२
४८

स्फुरत्पादपद्मस्य तस्य स्फुलिंगाद्विवर्वन्हिरिंदुग्रहास्तारकाश्च ॥१९॥ अचिंत्यप्रभावो मनोऽगोच- हरः ॥
रो वा न वेदांतवागोचरो वा निवृत्ताः ॥ स्वतो वाच स्वेति मन्ये सचित्ता प्रवृत्तिः कथं तत्र मानांतरस्य ॥२०॥ अ०१४
अनंतानि पापानि नाशं प्रयांति स्वत स्त्वत्पदांभोरुहानुग्रहेण ॥ किमुग्राह्यस्य शक्यं तवानुग्रहस्याप्य
यंते ममानुग्रहोयं महेश ॥२१॥ महेशा ययाचे भवत्पादपद्मे दृढां भक्तिमेकांतदन्यं नयाचे ॥ त्वमेवासि माता
पितासि त्वमेव त्वमेव प्रभुर्मेत्वमेवासि बंधुः ॥२२॥ अनाथैकनाथ प्रभो विश्वनाथ प्रभो मम नाथं सनाथं कु
रु त्वं ॥ अनन्यावनं तेकथं वानधर्मः त्वमेवासि धर्मस्वरूपः स्मरारे ॥२३॥ स्मरामि स्मरामि स्मरारे भवं
तं विपर्ध्वांतसंहारहेतुं प्रशांतं ॥ जगद्धेतुमेकं भवंतं स्मरामि स्मरारे शरण्यो नकोप्यस्ति लोके ॥२४॥
क्ववा ते पदाब्जं क्ववा वाम नो मे मनोवृत्तिरस्मिन्कथं त्वत्पदाब्जे ॥ स्थिरा जायतां मिंदुमौले दयालो
दयापात्र मस्मि त्रिनेत्राहमेकः ॥२५॥ अहं सर्वदा त्वत्पदांभोजभृंगो भवाम्येव शंभो भवत्पादपद्मं ॥
मनः सद्मनंन्मे मनः पद्मया पि प्रभो मोहकाले पि न क्रीडतीति ॥२६॥ भवत्पादपद्मश्रिया साकमेव मनः
क्रीडतीति प्रमोदो ममासो ॥ तत स्ताव ताहा निरीशानकाते तवाहं तवाहं तवाहं तवाहं ॥ ६ ॥२७॥

नलोके ममान्य त्किमाशास्य मस्तीत्यवश्यं त्वया शंक नीयं महेश ॥ २७ ॥ इतोनाधिकं क्वापि लोकेषु शंभोन-
चात्यत्स्म माशास्य मस्तीति विद्धः ॥ इतिस्तुत्वा महादेवं कुमारो नतकंधरः ॥ प्रणम्य शिवपादाब्जं तदालिंग्य
स्थितो मुदा ॥ २८ ॥ ततः परं तं कुमारं करुणा सागरो हरः ॥ आलिंग्य ढुंढि नासाकं उवाच वचनं मुदा ॥ २९ ॥ श्री सदाशि
व उवाच ॥ ॥ ढुंढे कुमारेण सहाधुनात्वं विमान मारुह्य मनोज्ञ मद्य ॥ प्रयाहि गौरी चरणार विंद मरंद धारादद
र्शनाय ॥ ३० ॥ इदं तु तावत्सु दिनं गणेश त्वया घनेत्र श्रमवारणाय ॥ आनंद धारा परि पालनाय गंतव्य मंबा पद
सन्निधानं ॥ ३१ ॥ त्वया जगन्मं गलमंमला याः किमंगलं मंगल देवता याः ॥ सेव्यं स्वरूपं नयनार विंद संदोहसे
व्यं खलु सेव्य मद्य ॥ धन्यं दिनं ताव दिदं गणेश गौरी पदांभो रुहदर्शनेन ॥ नूनं कुमारस्य तवापि भाग्यं सौभा
ग्य संपत्ति निदान भूतं ॥ ३३ ॥ अभूत पूर्वं खलु मंगलं ते भविष्यति प्रायश इत्यवैमि ॥ यतः कुमारोपि समागतो
यमंबापदांभोज विलोकनाय ॥ ३४ ॥ रमादिकापार सुरांगनानां तु गोत्तमां गानत पादुकायाः ॥ मम प्रियायाः
परमं बिकायाः पदार विंदं मुनिवृंदवंद्यं ॥ ३५ ॥ वंदारु वृंदार कवंदि तायाः शैलाधिराज प्रियकन्य कायाः ॥
पादार विंदं मुद मातनोतु श्रियं तनोतु स्वतएव दृष्टं ॥ ३६ ॥ इतीरि तं तद्वचनं कुमारः श्रुत्वा प्रहृष्ट स्तु गणेशयुक्तः ॥

शिवर० ३
४९

ययौ विमानोत्तमरत्नसिंहे सिंहासनाधिष्ठितस्वतुष्टः ॥३७॥ ततः परं दुंदुभयो विनेदुः ववुश्च वाताः सुखहराः तूः हेतवस्ते ॥ मंदारकुंदादिमरंदमंदाः सुपुष्पवृष्ट्याद्भुतपुष्टरूपाः ॥३८॥ ततो विमानाग्रपताकभागान्तन्मंदवातप्रसरात्प्रकंपान् ॥ ददर्श तत्राभयदा निवांबा नात्यां गना मंडलमंबरांते ॥३९॥ आचूलमूलामलरत्नराजिविराजिते यानवरे कुमारं ॥ गणेश्वरं चाचलराजकन्या मन्ये स्तुतं लोचनगोचरं तं ॥४०॥ अयं कुमारो मम षण्मुखो सौ गजाननोयं गणनायकोयं ॥ इति प्रहृष्टा गिरिराजकन्या वचो विंदं वाच मुदीरयंती ॥४१॥ ददर्श दूरेण गजाननो सौ कुमारमालोक्य मुहुः प्रहृष्टा ॥ इयं भवानीति वदन्कुमारं प्रियं सखायं परिषस्वजानं ॥४२॥ पश्याद्रेणाय कुमार गौरीं महेश्वरश्री चरणारविंदं ॥ द्रष्टुं प्रवृत्तापि न सा निवृत्ता विश्वानि देवी भुवनानि चष्टे ॥४३॥ सेयं गौरी नात्यनारी गणानां कृत्वावज्ञां संज्ञया सादरं मां ॥ दृष्ट्वा दृष्ट्वा त्वन्मुखांभोजमादौ देवं देवं राधसे चोदयंती ॥४४॥ सेयं माला सच्चिदानंदभूता गीता सेयं वेदवेदांतवृंदे ॥ मंदं मंदं स्वाचरंती चवाचमेषा नेत्री राधसः सूनृतानां ॥४५॥ इत्युक्ता तौ तदङ्घ्रिमा[illegible]मनोज्ञा दत्युत्तुंगादागतौ तां भवानीं ॥ नत्वा [illegible] दूरात्तत्पदांभोजयुग्मं भूयो नत्वाप्यं बिका लिंगितौ च ॥४६॥ ततः कुचप्रस्नुतलतं तयोभिः स्नेहस्वरूपै रभिषिंच्यमानौ ॥ मुदं परंप्रा

अ० २४

पतुरंबिकायाः तौ तत्पदांभोजविलोकनेन ॥४७॥ गणैश्च सर्वैर्न नृत्तु गणेशः समागतः षण्मुख संयुतोयं ॥ अतः परं शंकरदर्शनाय गौरी गमिष्यत्य बिलंबहेतोः ॥४८॥ अस्माकमप्यं शिवाधवस्य पदारविंदं सुखवृंद वंद्यं ॥ वंद्यं मुकुंदाक्षिसरोजपूज्यं भाग्यैरनंतैर्विविधैरपारैः ॥४९॥ जातास्ताव द्ब्रह्मकल्पाश्च शांताः तेषां मतस्तावदद्या प्यदृष्टः ॥ नाट्यानंदेनैव कालो भवान्या नीतस्ताव च्चित्रमत्रापि किंवा ॥५०॥ गौरीनेत्रोन्मीलनेमी लनेवाकल्पास्ताव त्कोटिशः संभवंति ॥ जातास्तावन्नाशमेते प्रयांति प्रायः सेयं शंकरस्यैव लीला ॥५१॥ अस्माकं वानापराधो भवानी लीला नाट्या लोकनाय प्रवृत्ता ॥ तस्या श्चित्तं किं पराधीनमंबा नित्यानंदा सर्वतंत्रस्वतंत्रा ॥५२॥ अत्रास्माकं विश्वनाथानुगानां वृत्त्या तावत्नापराधाभिमानः ॥ वृत्तिर्येयं शंकरस्यैव सेवा गौरी सेवाप्यत्र कुत्रापराधः ॥५३॥ अस्मद्भाग्यादागतोयं कुमारः तेनैवेयं नाट्यवार्तागतैव ॥ अंबातावत्तत्कुमारस्य वार्ता श्रुत्वा तावद्यास्यति श्रीमहेशं ॥५४॥ स्वंतेपि परस्परं शिवकथावार्त्तां वदंतः परं ॥ प्राप्यानंदमनंतमिंदुश कला लंकारवार्तारसैः ॥ स्कंदालोकनवंदनादि विविधाचारोन्मुखास्ते सुखं ॥ नंदीश प्रमुखाः परस्परं सुखाविर्भूतवागुन्मुखाः ॥५६॥ ॥ इति श्री शिवरहस्ये हराख्ये तृतीयांशे देव्या समुनि संवादो नाम चतुर्दशोध्यायः ॥

॥१४॥

 ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥व्यास उवाच ॥ ॥ततः परमुमाकांतं स्मृत्वा सा गिरिकन्यका॥आ-
 नंद जल धाराभिराक्रांता प्राह तं सुतं॥१॥कुमार शंकरः क्वास्ति शंकरः कुशली खलु॥ अद्य दृष्टः किमीशा
नः सर्वेशो लोक शंकरः॥२॥अद्यैव प्रेषितस्तेन महेशेन भवानपि॥यद्वा पूर्व दिने यद्वा प्रेषितोसि दिनांतरे॥३॥
शंकरायो पहारोपि केन वा परिकल्प्यते॥केनानुलेपनादीनि दीयंते मो[illegible] हेतवः॥४॥केन कालापनयनं काले
कालस्य तस्य वा॥ विलास निलयः केवा [illegible]वाल न्निलयालयाः॥५॥कृतः किं मद्विचारोपि क्वास्ति किंवा क
रोति सः॥इति मद्विषया चिंता किं महेशस्य वर्त्तते॥६॥ इति गौरी वचः श्रुत्वा कुमारश्चतुरः परं॥धीरो गंभीर
वचनं उवाच विनयान्वितः॥७॥ कुमार उवाच॥ चमत्कारकरं गौरि वचस्तव किमीदृशं॥वचनं वदनांभोजात् मरंद इव निः
सृतं॥८॥ ॥कुमार उवाच॥ ॥शंकरः शंकरो नित्यं परमानंद सागरः॥ महेशानंद लेशेन सानंदाः साम राय
यं॥९॥सच्चिदानंद रूपस्य माहादेवस्य शांभवि॥त्वया विज्ञाय ते रूपं ततः प्रश्नः कथं कृतः॥१०॥कल्पांते
सकलामर प्रमथनं कृत्वा पुनः सादरं॥ सृष्ट्वान्यान् मरान् अपार महिमा तान्पालयत्यंबिके॥११॥कालस्या
पि स कालरूवस खलु ब्रह्मादिकान् संहरन्॥अंते संततमंतरायरहितः शांतः कृतांतांतकः॥१२॥ तस्यैरूवयमनं-

तम प्रति मतं तस्यैव तद्भूतयः ॥ भूतानां निवहाः स मृत्युरहितो मृत्युंजयः संततं ॥११॥ अश्रांतश्रुतिगीत
कीर्त्तिरसकृत विज्ञान मूर्तिः स्वतः ॥ तद्दृष्टिः खलु शांभवोत्तम मनः फुल्लार विंदांतरे ॥१२॥ लोके पामरवृत्तयः
कति सुराः संहारकाला हताः ॥ तेनेशेन विहार एव सजगन्नाशो महेशस्य तु ॥१३॥ येनारायण पद्मज प्रभृत
यः पारे परार्धं मुहुः ॥ तस्याबाकुशलं कुतः कुशलिनां अग्रेसरः शंकरः ॥१४॥ यत्पादाब्जरजः प्रसाद विभवः
स्वर्गः सुराराधितो वैकुंठो पि तदन्य लोककलना भ्यासः प्रया सोपिनः ॥ तस्यापार गुणार्णवस्य करुणा सिंधोः
सुधाध्यर्पणं ॥१५॥ तत्तद्देवत वार्पणं कृत मिति ज्ञेयं भवा निलया ॥ [१४॥] अन्यस्यास्ति न कृत्य मत्र गिरिजे जातु प्रजानां
पतिः ॥ जातस्तत्पद पद्म रेणुभिरियं जातोपि नारायणः ॥ जाता सा कमला विधेश्चरमणी वाणी तयान्ये शिवे जाता
स्तस्य महेश्वरस्य महिमा वेदैश्च न ज्ञायते ॥ [१५॥] अज्ञानां परमिंदुशेखर कृपा शून्यात्मना जायते ॥ तत्रान्यामर तुल्य
तामतिरति भ्रांता तदंतायसा ॥१८॥ अंतेनापि विना कृतांत इव सा तावद्दुरंता सतां ॥ सातावन्न भवत्यनं
तमहिमा सोमावतंसः खलु ॥ [१६॥] यं देवोत्तम मामनंति बहुधा वेदाः परं यं परं ॥ मायातीतमुमापतिं पतिममुं
विश्वस्य विश्वस्य च ॥२०॥ विश्वस्य त्रिपुरांतकं त्रिनयनं वंदे मुनींद्रादयः गंधर्वा अपि किंनरा अपि समेता

शिवस्तु॰ ३
५१

ऽतोऽस्य मातः शिवे ॥ १७॥ यल्लिंगार्चन तत्पराः सकृदपि स्वाराज्य राज्येश्वरं धिक्कृत्यामर[illegible] नायक मपि श्रीकांतमप्यं-हरा तृ
तत्तः ॥ ॥ स्वांते संतत मर्चयंति सुकृतैः पूताः कृतांतांतकं तत्पाद स्मरणेन तावद धुना धन्यावयं शैलजे ॥ १८॥ जा
यंते बहवः सुरा अपि नरास्तेषां वरिष्टं परं मन्ये शांकर मेव शंकर पदन्य स्त प्रसूनं नरं ॥ ॥ तस्माद प्यधिकोनको
पि गिरिजे राजाधिराजार्चितः सोयं शंकर इत्यवैमि मनसा सत्यं त्रिसत्यं पुनः ॥ १९॥ उत्पत्ति स्थिति नाश साध
नतया ख्यातो महेशस्ततः तं त्यक्त्वा कमुपास्महे गिरिसुते दुग्धं सितासंयुतं ॥ ॥ प्राज्याज्येन समन्वितं मु
खगतं त्यक्त्वा पुरीषोदकंकः पातुं यतते सतां मतिरियं साक्षात् सतां जायते ॥ २०॥ मन्ये दैवत दैवतं पशुपतिं मन्ये कृ
तांतांतकं मन्ये देवशिखामणिं विधुलसत्खंडावतंसं शिवं ॥ ॥ मन्ये दैवत सार्वभौम मसकृन्मन्ये तदन्यं
शिवेकं मन्ये मनसाप्यनन्य मनसा मान्योपि मान्यो स्तिकः ॥ २१॥ जायंते च पुनः पुनः पुनरमी नारायणे द्वादयस्ते
तावद्गिरिशार्चनादर गृह द्वारो रुदंडाहतिं ॥ सोढ्वा मुंडित मुंडवज्जड धियो धिक् धिक् धिगित्यन्वहं जन्म
ति प्रलपंति वेत्रनिहता धावंति [illegible] धावंति च ॥ २२॥ ये निंदंति शिवं महेश ममलं देवैस्तु संसेवितं सर्वज्ञं करुणा
मयं पशुपतिं वाचामसेव्यं विभुं ॥ ॥ २३॥ तावन्नित्यं स[illegible]दंतो वदंति स्वांते शांते शंकरं पूजयामि ॥ २४॥ ब्रह्मांड मंडल-

अ॰ २७

विलोडनदंडघाताघाताश्चरंतिकतिते शिवचिंतकाः किं ॥२६॥ तच्चिंतने सति कृतांतकृता न भी

तिःश्रांतिः कुतः क्वज निर्दुर्दशयाति भीतिः ॥ २५॥ प्राप्यापि जन्म मनुजत्व मुपेत्य तत्र ब्राह्मण्यमेत्य

समधीत्य च वेदविद्यां ॥ २७॥ मीमांसया सह ततः परमिंदुमौलि ध्यानं विहाय वसतः कुगतिर्भवानि ॥ २८ / ७५

किं रासभो पि मणिभारपरीतदेहः तद्भूषितो भवति तद्दशां भवोपि ॥ २९॥ विद्यामधीत्य यदि शां

करं तां नयाति तज्जन्म रासभसमान मिति स्मरामि ॥ संसारे गिरिजामनोहर हर श्रीपादपद्मार्च

नं ॥ तल्लिंगार्चनमेववा स्मर हर ध्यानं क्षणं वा यदि ॥ दैवात्स्याद्गिरिजे तदैव सफलं जन्मेति मन्ये मुहुः ॥

नोचेत्पातकपातका कुल महाज्वाला कुलो जायते ॥ जायंते जननी पयोर सरताः किं तैरंतैः फलं ॥ यस्य

श्रांत उमासहायचरणांभोजार्चनानादरः ॥ ३१॥ तर्हि स्यात्खलु नारकी नर इति स्वर्गापवर्गप्रदं भर्गं को

पि भजत्यनन्यमनसा धन्यः स धन्याग्रणीः ॥ तत्पद्मांबुजवंदनेन सफलं जन्मेति मन्ये शिवे ॥ ३२॥ यच्चि

त्तं क्षणमेव वा शिवरतं तद्ध्यानधारा यदि ॥ चित्ते तत्पदरेणुभिर्जगदिदं पूतं परं पावनं ॥ सत्यं तस्य खलु

न्नतं कुलमलस्तत्सेवका नाधिकः ॥ लोके शांभव पुंगवाः खलु खल ध्वांतापहुताहस्कराः ॥ ३३॥ तत्पादांबु

जरेणुमात्रममराः सर्वेपि वांछंत्यहो ॥ तच्चेन्मूर्ध्नि तदा सदा शिवकृपा स्यादित्यवश्यं मुदा ॥ कीटत्वं समु- हरा: तः
पेत्य शंकरगृहद्वारे चरंत्यं बिके ॥ ३४ ॥ धन्या तज्जननी पितापि स महान्वंशोपि धन्यः परं तद्भृत्योपि अ॰ १५
तदाश्रितोपि स महान् तच्चेटिकाचेटिका ॥ यच्चित्तं क्षणमात्रमप्यघहरे लिंगे पिवेश्वेश्वरे ॥ संसारातुल
तूलशैलविलयं गारं सुहारो चिरं ॥ ३५ ॥ यो नित्यं शिव एव दैवतमिति ज्ञात्वा तदर्चारतः तं ध्यात्वापि विमुच्य
ते खलु जनिस्तद्धा सदा सान्वये ॥ दैवाज्जन्म भवत्यदुर्लभमिदं नैत्याहुरत्यास्तिकाः श्रुत्यर्थोपि तथा विधश्रु
तिरितिव्यर्थानलप्रार्थना ॥ ३६ ॥ मन्ये दैवतदैवतं शिवमुमे वेदांतवाक्यैरतः ॥ तत्पूजानिरतं नमामि मन
सा तद्दुर्लभं मे निरे ॥ गीर्वाणाः परमंबिकापति पदांभोजार्चनं दुर्लभं तल्लिंगार्चनमप्यनंतफलदं तद्दुर्लभं मे
निरे ॥ ३७ ॥ मानातीत इतिस्मृतोपि महिमा माहेश्वरस्तं कथं वेदो वेद न तेन यश्च विदितः तं शांभवो वेद
तं ॥ ते वेदाः प्रणमंति देवसहिता स्तत्पूजने सादराः ॥ साक्षात्सांब इति श्रुतिस्मृतिशिरोरत्नं श्रुतं तन्मया
॥ ३८ ॥ पुण्यं जन्मनि जन्मनि प्रतिदिनं कल्पावसानावधि प्राचीनामितया गदाननिचयाभ्यासानु
बंद्धं यदि ॥ तस्मिन्सत्यपि शांभवोत्तमपदांभोजाश्रये जायते भक्तिर्भर्गपदांबुजे गिरिसुते सा दुर्लभा सर्वथा ॥

एवं सार्थकमित्यवैमि गिरिजे लोकेषु वेदेष्वपि प्रख्यातं शिवलिंगपूजनमिदं सर्वा...मनादुर्लभं ॥ ज्ञात्वा दुर्लभमित्यपि प्रतिदिनं तत्पूजनायो धृतो धन्योतः शिवपूजकादपिपरो धन्यः क्वावै भूतले ॥५०॥ लीला मानुषविग्रहः शिवरतः शैवः शिवः केवलं तं मन्ये शिवमेव तत्पदरजो मान्यं सुराणामपि ॥ तद्देहः शिवमंदिरं शिवतरस्तस्मिन्सदा क्रीडति व्यापारांतरमंतरा गिरिसुते त्यक्त्वा पितन्मंदिरं ॥५१॥ ब्रह्मत्वादिकमानुषंगिकफलं मन्ये शिवाराधने मुख्यं तस्य फलं किमप्यनुमितं श्रुत्यापि तत्सर्वथा ॥ दुर्ज्ञेयं शिवरूपताफलमिति ज्ञेयं कथं वा मया तस्यानुस्मरणेन तद्यदितदा किं तत्फलं शैलजे ॥५२॥ एवं मेमतिरिंदुशेखरपदांभोजार्चनादध्वसा जातापि स्थिरतामुपेत्य पुनरप्यभ्यासमार्गं गता ॥ तत्पादाब्जविलोकनेन गिरिजेलं शंकरार्धांगमित्यं वाहं तनय स्तवेत्यपि वरो देयो कृतोप्यस्त्विति ॥५३॥ अंबाहं गणनायकोपि गिरिशे नाद्याधुना प्रेषितः संतुष्टस्त्वयि शंकरः शिवधनं त्वं तावदेवाधुना ॥ त्वय्येवास्तिमनः शिवस्य न शिवे चिंतांतरं जायते मूर्तिस्ते शिवचेतसि स्फुरति सादृष्टे यमत्युत्सवैः ॥५४॥ ध्यानारूढमहेशचेतसि शिवे त्वन्नृत्यसि लांपरं मन्ये दैवतदैवतं किमितरत्ध्येयं महेशस्य वा ॥ किं कृत्यांतरमीश्वरस्य जगतां जन्मस्थितिध्वंसनं—

तत्पादांगुलिचारणादिति शिवेकृत्यांतरं किं भवेत्॥४५॥ प्रीतिर्यात्वयि शंकरस्य गिरिजे सा तत्समाना-
पि वा नम्वापि तिमतिर्ममास्ति शिववाक्व्यापारसारैर्मिता॥ सा तावन्नगणेश्वरेपि न मयि स्वस्मिन्नपि
स्नेहभूः॥ त्वन्मूर्त्तिः परमित्यवैमि सकलानंदप्रदानान्मुखे॥४६॥ इत्युक्तं गिरिराजराजतनया तद्वाक्यमा
कर्ण्य सा पीयूषद्रवरूपमप्रतिममप्यास्वाद्य हृद्यं मुहुः॥ आलिंग्यात्मजमादरादतिदृढस्नेहांबुधारावृतं
चक्रे सा गणपं कुमारमसकृत्स्पृष्ट्वा कराभ्यां द्विजाः॥४७॥ ॥इति श्रीशिवरहस्ये हराख्ये तृतीयांशे कुमार
गौरी संवादोनाम पंचदशोध्यायः॥१५॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥व्यास उवाच॥ ॥ततःपरं
कुमारेण प्रणता गिरिकन्यका॥ गणेशेनापि विनुता प्राह मंदं विचक्षणा॥१॥ महेश्वरो दीरिता या वाणी मद्वि
षये सुत॥ कथं भूता तत्स्वरूपं स्मृत्वा स्मृत्वा पुनर्वद॥२॥ वंदे सुंदरमंदारसुरजःपुंजपिंजरं॥ सुरनारीशि
रश्चारी गौरीचरणजं रजः॥३॥ इत्युक्त्वा तत्पदांभोजं नत्वा मूर्ध्ना मुहुर्मुहुः॥ मधुराक्षरसंपूर्णां मधुरां
गिरमाह च॥४॥ ॥कुमार उवाच॥ ॥गिरिजे शंकरः प्रातः मातरहृदयानिधिः॥ गिरिजाचरणं द्रष्टु
प्रयाहीत्यब्रवीन्मुदा॥५॥ तच्चित्तवृत्तिर्गिरिजे शरीरे रुचिरे चिरं॥ अतिसुंदरमित्येव विलंबस हतेसकिं॥६॥

कुमार गिरिजापरं चिरमुदार हारादरा सहार हर हारयोः किमपि सांतरं पश्यति ॥ विहार विरहाद्यो
हर हरामराधीश्वर स्मर स्मर हरे ति मा मिति करो ति चिंतान किं ॥७॥ एतस्मिन्नंतरे काले जयां च विज
यामपि ॥ प्रेषया मास गिरिश स्ताम पूर्वां शिवां प्रति ॥८॥ ताभ्या मागत्य सहसान त्वा त च्चरणांबुजं ॥ कुमार
मपि न त्वा तं स्थितं पार्श्वे मनोहरे ॥९॥ तत स्ता भ्यां समानीतान्य पारा भरणा निस ॥ दुकू लानि विचित्रा
णि फलान्य पि ददर्श सः ॥१०॥ ततस्ता भरणा गौरी सेयं सत्वर × मर्हृष्ट मानसा × मस्वि ति ॥ निर्जगाम
बहिर्द्वारं कुमारो गणपा न्वितः ॥११॥ ततः परं नंदिकेश प्रमुखाः शिव किंकराः ॥ नत्वा कृतां जलि पुटाः
तुष्टवुर्हृष्ट मानसाः ॥१२॥ स्तुत्वा ततः परं भक्त्या प्रणता न्पुनरा दरात ॥ उवाच वचनं चारु कुमारः प्रीत
मानसः ॥१३॥ शंकरा लोक नो द्योगः कर्त्तव्य स्त्वरया त्वया ॥ अतः परं विलंबो पि न संभा वित स्व हि ॥१४॥
सज्जस्थानि विमाना नि भवं लब्धा मितान्यपि ॥ मुक्तामालादि संकीर्णा न्य पाराण्य पि सत्वरं ॥१५॥ अंबा वि
मान मानेयं परिष्कारः कृतो नवा ॥ कामगस्य विमानस्य तस्य मुक्ता फलै रलं ॥१६॥ सु दुकूल पताकाश्च
छत्राण्य घ सहस्रशः ॥ विमान शिखरे संतु संलग्ने ष्वपि कोटिशः ॥ सुमंदार मरंदानां धाराः संतु सहस्रशः ॥

मंदारमालानिकरैरामूलाग्रविजृंभितैः ॥१८॥ सुकल्पतरुगुच्छानां छायया छन्नमस्तु तत् ॥ तन्मीडितं भवला-

शुचंद्रमंडलमंडलैः ॥१९॥ तारतारामालिकाश्च सांद्राः संतु सहस्रशः ॥ विधुद्रुमार्बुदैरस्तु परिवीतं

तदुन्नतं ॥२०॥ इंद्रनीलमणिच्छायामध्ये मध्ये तु वर्ततां ॥ रत्नसिंहासनैर्दिव्यैरपरैर्वीतमस्तु तत् ॥२१॥

तन्मध्ये मणिशोभाभिर्वनीभूता भिरुन्नता ॥ वेदिका रचनीया सा परितस्तारकान्विता ॥२२॥ मध्ये

सुधाकरकरप्रकरक्षालिता पुनः ॥ वेदिकारत्नमालाभिः चित्रैरस्तावृता पुनः ॥२३॥ तत्र सिंहासनं दिव्यं

सुमेरुसदृशं श्रिया ॥ रचनीयं मृदुतरं रत्नच्छायाभिरादरात् ॥२४॥ धिराजितं भवत्वेतदपारैश्चामरैरपि ॥

रत्नसोपानमार्गाश्च तत्र संतु शुकोटिशः ॥२५॥ उत्फुल्लकुसुमच्छन्ना मार्गास्तैर्मरंदपाः ॥ भवंतु सत

रत्नत्रमंदेवालः प्रवर्ततां ॥२६॥ सुमेरुतुंगशिखरप्रभाकूटजयोद्यतैः ॥ तद्रत्नकलशैर्वीतमपारैरस्तु-

सत्वरं ॥२७॥ हरमंदिरमार्गोपि सदुर्गो मास्तु मर्गतः ॥ भीतिरस्तु समार्गोतः छादितोस्तु सुधाकरैः ॥२८॥

सुधाकरकरच्छायाऽछादिते पथि शंकरः ॥ तद्गनेन समायाति कदाचित्तन्न विग्रहे ॥२९॥ मृदुलो मार्ग

मार्गश्चेत्स्वर्गस्यापि तिरस्क्रिया ॥ भवत्यतः प्रवृत्तिश्च सुलभा सा सुखावहा ॥३०॥ प्रपाश्च कोटिशः

संतु सुधाधाराभिरध्वनि ॥ रत्नमालापरिक्रांतास्ते मार्गाः संतु कोटिशः ॥३१॥ मुक्ताजालपरिच्छिन्नाः
पुष्पासारसमावृताः ॥ फलैरप्यतुलैः पूर्णाः संतु मार्गाः सहस्रशः ॥३२॥ तरवो दूरतः संतु दिगंतेयां
तुते परं ॥ अत्युन्नताश्च कर्त्तव्याः कुसुमासारमंडपाः ॥३३॥ तत्र नाट्यांगनाः संतु कोटिशोपि पदे पदे
॥ सौंदर्यधारासंक्रांताः ताः सर्वा नवयौवनाः ॥३४॥ पुष्पप्रासादरचना विधेयाः सादरं पथि ॥ प्रासादाः
कोटिशः संतु सुपुष्पा मार्गपार्श्वयोः ॥३५॥ सुधाफलानि विमलान्यनंतान्यपि तेष्वपि ॥ संतु तेषु सु
३५१
धाधाराः तडिल्लुलसमाकुलाः ॥३६॥ रत्नमालाभूषिताश्च चंद्रचारुकरावृताः ॥ सर्वे नवत्वमापन्नाः
संतु तावत्प्रतिक्षणं ॥३७॥ तन्मार्गे रुद्रवीणानां रम्याणां संतु कोटयः ॥ नखाघातं विना सर्वे मधुर
ध्वनिसंवृताः ॥३८॥ शुकानां च पिकानां च कोटयः संतु सत्वरं ॥ मरालराजराजीनां राजीनामपि कोटयः
॥३९॥ सरांसि कोटिशः संतु फुल्लराजीवराजिभिः ॥ विराजिता निरजसा पिंजराण्यप्यनुक्षणं ॥४०॥
विद्रुमाणां लताः संतु कोमलाः कोटिशः पथि ॥ नाट्यांगनानुकरणं कृत्वा कृत्वा प्रतिक्षणं ॥४१॥ तन्मा
र्गे पुष्पवाटीनां कोटयः संतु कोटयः ॥ उत्फुल्लपुष्परूपाणां मंदिराणां समाकुलाः ॥ एवं नियोगमासाद्य—

शिवरह॰३
५५

सुवशापतिरादरात् ॥ प्रेषयामास सगणान्तत्कार्यक्षमान्बहून् ॥५३॥ एतस्मिन्नंतरे काले भृंगीशंकर- हरः तृ
मंदिरात् ॥ समागतो विमानेन कंपमानेन वायुना ॥५४॥ दूराद्दिमानमालोक्य कुमारः कंपमावहन् ॥ नंदि अ॰१६
केशमुवाचेदं वचनं तं विचक्षणं ॥५५॥ ॥कुमार उवाच ॥ ॥नंदिकेशेश मस्माकं शतांशेनापि दुर्लभं ॥
मयाप्यागमने कालो भूयाने वा भवः खलु ॥५६॥ तद्दिमानं समायाति त्वरया कस्य तद्भवेत् ॥ शंकरा ज्ञात्व
रां प्राप्य प्रायः कोपि समेतिमां ॥५७॥ इति स्त्वया विमानेन गंतव्य मति सत्वरं ॥ विचारोपि त्वया कार्यस्ते
नापि सह सादरं ॥५८॥ न तेन सह वक्तव्यं निष्ठुरं तु रवचः ॥ न कर्णारुं तु दयाहि मधुरं वद सादरं ॥५९॥ मधुरा
क्षरवाणीनां पात्रं शंकरकिंकराः ॥ तेषु निष्ठुर मुक्त्वा ते नरकं याति सत्वरं ॥ ६०॥ पुरा हिमगिरिप्रांते शंकराराः
धनोत्सुकः ॥ शुकनामा मुनिर्जातः जन्मकोटितपः फलैः ॥६१॥ तत्रतुंगानि लिंगानि कोटिशः संति
तान्ययं ॥ पूजयित्वा स्थितस्तत्र स्वकरार्जित साधनैः ॥६२॥ नीहारधारा लिंगेषु तेन तेषु प्रकल्पिता ॥
मंदारकुसुमासारैः पूजिता निप्रतिक्षणं ॥६३॥ अर्क संपर्क भीत्यापि सुपुष्प पट मंडपैः ॥ लिंगमंडलमा
क्रांतं चकार च मनोहरं ॥६४॥ शंकराचार निरतैः अपारैः शांकरैर्वृतः ॥ सं पूजयति लिंगानि यामेयामे वि-

शेषतः ॥५५॥ पूजयामास लिंगानि बिल्वकोमलपल्लवैः ॥ विमलै रत्नुलैः काले काले जललवाकुलैः ॥
॥५६॥ तारकाकर्षणं कृत्वा तारामालासमाकुलं ॥ शिवलिंगालयं चक्रे परितः परिशोधितं ॥५७॥ अ
मंदकुंदमंदाररजःपुंजैः समाकुलं ॥ लिंगमूलं च कारासौ अनुवेलं सलीलया ॥५८॥ दिव्यान्नपर्वतै
रेव नैवेद्यमतिसादरं ॥ संकल्पयति शुद्धात्मा तपसा परिकल्पितैः ॥५९॥ परमान्नप्रवाहाश्च शर्करा
गिरिसंयुताः ॥ आज्यप्रवाहसंबंधास्तेन शाय प्रकल्पिताः ॥६०॥ वटकोदुंबरादीनि पक्वान्नान्यपि
कोटिशः ॥ शर्कराज्यसमेताश्च कल्पितास्तेन कोटिशः ॥ सुधाप्रवाहास्तेनैव पानार्थमपि कल्पिताः ॥६२॥
एलालवंगकर्पूरखादिरादिसमन्वितान् ॥ तांबूलशैलान्विमलान्कल्पयामास कोटिशः ॥६३॥ चंद
नादिककर्पूरकस्तूरीसंयुतान्यपि ॥ कल्पयामास तपसा चंद्रकल्पानि शंभवे ॥६४॥ अपारपुष्पमा
लाभिरतुलाभिरनेकधा ॥ पूजयामास नियमात्तपसा प्रीणयन् शिवं ॥६५॥ रत्नछत्रैश्चामरैश्च
कोटिशः परिकल्पितैः ॥ रत्ननीराजनैर्दिव्यैश्चकार शिवपूजनं ॥ तस्य तावत्कलत्राणां अयुतं
यौवनान्वितं ॥ तेनैव कल्पयामास नाट्यं शंकरमंदिरे ॥६७॥ गानं च कारयामास रुद्रगीणभिरादरात् ॥

दुंदुभिध्वनयस्तेननिर्मितास्वतपोबलात् ॥६८॥ तथा शिवरतस्तत्र रुद्राध्ययनतत्परः ॥ हरशिष्यसमा- हरा०तृ०
क्रांतो हारान्संयोजयन्स्थितः ॥६९॥ हरिरनैवेद्यशेषेण हाराणामेव भोजनं ॥ कल्पयामास नियमात्स अ० २६
रसेनाविशेषतः ॥७०॥ विचित्राणि दुकूलानि शंकरायार्पितान्यपि ॥ तानि दत्वा शांभवेभ्योददावन्या
निशांभवे ॥ हरेभ्यः प्रददौ भक्त्या दिव्यान्याभरणानि च ॥७१॥ यदा यानि प्रदत्तानि दुकूलाभरणान्यपि ॥
तानि दत्वा शांभवेभ्योददावन्यानि शांभवे ॥७२॥ छत्राणि चामरादीनि नूतनानि दिने दिने ॥ कल्पयामास तपसा तत्फलं तदिहास्त्विति ॥७३॥ विना न तपसा तावत् सामग्री तावती कुतः ॥ तेनैव कल्पयामास शिवपूजनसाधनं ॥७४॥ बहुजन्मार्जितेनापि तपसा तेन किं फलं ॥ इति शंकरपूजायामुपयुक्तं न तत्तपः ॥७५॥ तपसापि समासाद्य शिवपूजनसाधनं ॥ तेनार्चयित्वा देवेशं कृतकृत्यो भवेन्नरः ॥७६॥ तत्तपः फलितं तेन येन साधनमुत्तमं ॥ संपादितं महादेवपूजनाय प्रतिक्षणं ॥७७॥ तपश्चेच्छिवपूजायामुपयुक्तं न तर्हि तत् ॥ तपः किंतु महारण्यं शिलावृक्षादिरोदनं ॥७८॥ तपसा प्राप्य भाग्यानि भाग्यवंतः परात्परं ॥ शंकरं पूजयंत्यन्ये दुर्भगाः स्वकेवलं ॥७९॥ तपस्तावद्विधेयं स्यात् यावच्छंकरपूजने ॥

साधनं प्राप्तमेतेन न तस्यात्तदनंतरं ॥८०॥ शंकरार्चनसामग्री प्राप्तिरस्तु तपःफलं ॥ फले
प्राप्ते पुनस्तेन साधनेनालमित्यलं ॥८१॥ न येन तपसा प्राप्तं शिवपूजनसाधनं ॥ न तत्तपः किंतु
तत्तु तंतुवायुवि चेष्टितं ॥८२॥ तपसा प्राप्य सामग्रीं शंकराराधनस्य यः ॥ स शंकराराधनेन मु
क्तो भवति नान्यथा ॥८३॥ तद्भाग्यमप्यभाग्यं स्याद्येन नाराधितः शिवः ॥ कृते शिवाराधने तु भा
ग्यं भाग्यत्वमाप्नुयात् ॥८४॥ भाग्यानामपि संवादः पुरा कोपि श्रुतो मया ॥ स संवादः श्रुतः सद्यः पर
[३८] मानंदसाधनं ॥८५॥ भाग्याधिदेवताः सर्वाः सर्वसौभाग्यसंयुताः ॥ रत्नमंडपमध्यस्थसिंहासन
समाश्रिताः ॥८६॥ तत्रैकदेवता प्राह सुंदरं वचनं तदा ॥ भवतामुपयोगोद्य कुत्र वा जायते फलं ॥
॥८७॥ किं ते महेशपूजायामुपयोगो धुना वद ॥ वदत्वं च वदत्वं च वदत्वं च वदाशु मे ॥८८॥ अनृ
तेनैव वक्तव्यं इदं शंकरमंदिरं ॥ अत्रानृतप्रवादेन विनाशो भवति ध्रुवं ॥८९॥ सत्यस्वरूपो
भगवान् उमाकांतस्तया सति ॥ तत्सन्निधाने न वक्तव्यं सत्यमेवाद्य सादरं ॥९०॥ अन्यत्र यत्र
कुत्रापि भवत्वनृतभाषणं ॥ फाललोचनदेवेषु सा वार्त्ता न हिता बहा ॥९१॥ असत्यरूपनिकेटभ—

शिवरहस्य
५७

वत्वनृत भाषणं ॥ सत्य मूल महा देव मंदिरे तत्कथं भवेत् ॥ ९२ ॥ शंकरे सत्य मूलत्वं त्वं सत्य- हर०लं० मिति श्रुतिः ॥ वदत्येवं न चान्यस्य सत्यत्वं श्रुति चोदितं ॥ ९३ ॥ सत्ये रमंते मुनयः सत्यं शंकर एव सः ॥ तत्सन्निधाने त्वनृतं महा पातक सन्निभं ॥ ९४ ॥ शिव सन्निधि माश्रित्य कृतं पुण्यं च पातकं ॥ अनंत मिति निर्णीतं अतः सत्यं वदा धुना ॥ ९५ ॥ इति तद्वचनं श्रुत्वा कापि भाग्या धिदेवता ॥ सत्यमेवाह हनि पुणा कृत्वा शप थमीश्वरे ॥ ९६ ॥ यन्मंदिरे निवासो मे सततं वदति शांभवः ॥ तद्द्वारि मत्त मातंगा कोटयः संति सर्वदा ॥ ९७ ॥ तत्र तुंग तुरंगाणां कोटयः संति सर्वदा ॥ गोयूथ कोटयः संति महिषीणां च कोटयः ॥ ९८ ॥ विचित्र रत्ना भरणाः कोटयस्तस्य मंदिरे ॥ सुमेरु तुल्यास्तद्गेहे तप्त कांचन पर्वताः ॥ ९९ ॥ दिव्यान्नराशयः संति कोटिशः कमलानना ॥ नाट्यां गनाः कोटिशस्ताः सर्वा भरण भूषिताः ॥ १०० ॥ सौंदर्य धारा धीरापि नारीणा मनुवर्तते ॥ तासां लक्षण मंतं वक्तुं मेव न शक्यते ॥ १०१ ॥ एताव द्भाग्यमेतस्य पुत्राः संति सहस्रशः ॥ प्रवीणाः शिव विद्यायां शांभवा एव केवलं ॥ भृत्याश्च कोटिशः संति ते तावदति शांभवाः ॥ दास्यश्च कोटिशः

संति ताः सर्वाः शिव तत्पराः ॥३॥ प्रायः सुरांगना एव दासी त्वं समुपागताः ॥ सदा कुर्वंति तत्सेवां शंकराग्रे सरस्यताः ॥४॥ भृत्यास्तेप्यमरा एव तद्भृत्यत्व मुपागताः ॥ तत्सेवतां महादेवः संतुष्टो भवतीत्यपि ॥५॥ ऐरावतो पि रूपाणि धृत्वा तावत्सकोटिशः ॥ तद्वारे गजरूपेण तिष्ठती त्येव गम्यते ॥६॥ सदेवा श्वोश्व रूपाणि धृत्वा त[illegible]रिकोटिशः ॥ तदुत्तुंगस्व रूपेण तिष्ठती त्येव गम्यते ॥७॥ तत्कलत्राणि रम्याणि तेनैव शिवमंदिरे ॥ नियोजितानि नाट्याय पूजांते प्रतिवासरे ॥८॥ नृत्यंति शिव लिंगाग्रे तानगान पुरःसरं ॥ तत्कलत्राणि शोसाहंनाट्य मभ्यस्य सत्वरं ॥९॥ पंचामृताभिषेकेण गव्यस्य वि नियोजनं ॥ तद्गेहे रत्नलिंगानि बहूनि विविधान्यपि ॥१०॥ तत्पूजार्थं कोटि मात्रं धनं शस्य व्ययस्तत्तः ॥ पूजांते तद्धनं तेन हारेभ्यो दीयते मुदा ॥११॥ पर्वताकार पक्वान्नैः नानारस विजृंभितैः ॥ परमान्नैश्च नैवेद्यं तेनेशाय प्रदीयते ॥१२॥ तत्सर्वं शिव भक्तेभ्यो दत्वा शिष्टं सुतैः सह ॥ भुक्त्वाव शिष्टं भार्याभ्यो दत्वा नृत्यति शांभवः ॥१३॥ रुद्राक्ष माला भरणो रुद्राक्षकवचान्वितः ॥

शिवरहस्ये
५८

रत्न लिंगार्चको नित्यं भूति भूषित विग्रहः॥१४॥ भूति रुद्राक्षर हितो नतस्य नगरे नमः॥ अंततः-हराः ८
पशवोप्यस्य भूतिरुद्राक्ष भूषणाः॥ एता दृग्भाग्य सदने सर्व दास्थीयते मया॥ नतद्गृहे परि- अ.२६
त्यागो रोचते सर्वथा मम॥१६॥ इति तद्वचनं श्रुत्वा तदन्या देवतास्ततः॥ लज्जा नतानना सर्वाः
चुक्रुशुस्ताः परस्परं॥१७॥ अहो न तादृशं भाग्यं अस्माक मिति चिंतया॥ अशैव भोगाय धनं
जायते सर्व मित्यपि॥१८॥ इयं भाग्यवती धन्या सभाग्या भाग्यदेवता॥ वसती शांभवागारे यस्माद
स्याः सुखावहा॥१९॥ अतः परं किलास्माभिः अशांभव गृहे स्थितिः॥ नकर्त्तव्या नकर्त्तव्या सर्वथा
पीति निश्चितं॥२०॥ ततः परं तद्गृहाणां वार्त्तां त्यक्त्वा विशेषतः॥ ताः सर्वाः शांभवागारे वसतिं
चक्रुरादरात्॥२१॥ तथापि सति भाग्यस्य भाग्यत्व मपि सर्वथा॥ शिवपूजानुकूलत्वं अन्यथा
तत्कथं भवेत्॥२२॥ अतस्तपः फलं भाग्यं तद्भाग्यस्यापि भाग्यता॥ शिवार्चनोपयुक्तत्वात्त
द्भाग्यस्यापि तत्फलं॥२३॥ शिवपूजोपयुक्तानां तरूणा मपि वस्तुतः॥ मुक्तिरन्यस्य का वार्त्ता
साक्षात्तदुपयोगिनां॥२४॥ तादृशस्य शुकस्यापि शांकरस्य कदाचन॥ उक्तं निष्ठुर मेकेन सता

वह्निरयं गतः ॥१२५॥ एवं शंकरपूजनस्य महिमा मानां तरागोचरः सोयं लोचनगोचरः कथ मतो वाग्गोचरो वा कथं ॥ तस्मान्निष्ठुरभाषणैरलमलं श्रीकालकाला र्चके ॥ सत्यं यन्मधुरा क्षरं तदधुना वक्तव्यमित्यादरात् ॥१२६॥ ॥ इति श्री शिवरहस्ये हराख्ये तृतीयांशे नंदिकेश्व रकुमारसंवादो नाम षोडशोध्यायः ॥१६॥ ॥ श्री काशीविश्वेश्वरार्पणमस्तु ॥ ॥ व्यास उवाच ॥ ॥ इति तद्वचनं श्रुत्वा कुमारं नंदिकेश्वरः ॥ कृतांजलिपुटः प्राह विनयानतकंधरः ॥१॥ ॥ नंदिकेश्वर उवाच ॥ ॥ कुमार भगवन्केन तस्मै निष्ठूरभाषणं ॥ कृतं तं निष्ठुर स्यापि स्वरूपं वद सादरं ॥२॥ तन्निष्ठुरोक्त्या तस्यापि जाता सायातना कथं ॥ तत्सर्वं मादरेणाद्य वक्तु मर्हसि षण्मुख ॥३॥ शिवतत्वज्ञनयोसि शिवानुग्रह भाजनं ॥ ततस्त्वमधुना तावत्तत्सर्वं वद सादरं ॥४॥ इति तद्वचनं श्रुत्वा प्रहृष्टः षण्मुखस्ततः ॥ प्रक्रांतं पूर्ववृत्तांतं वक्तुं सस्मार शंकरं ॥५॥ ॥ कुमार उवाच ॥ ॥ शिवार्चकं शुकं दृष्ट्वा मुनिः कश्चित्त पोनिधिः ॥ अंबरीषकुलोत्पन्नो निष्ठुरं प्राह सत्वरं ॥ भाग्यसंपादने नास्य व्ययः स्यात्तपसः

353

खलु ॥ शिवार्चने न किं कृत्यं तपश्चेन्नष्ट मङ्गुलं ॥७॥ इत्युक्तं तद्वचः श्रुत्वा तमसं भाष्य मित्यपि ॥ हरः तृ
मत्वा शिवार्चनो द्योगं चकार पुनरादरात् ॥८॥ ततः समुनिशार्दूलः फल मूल जलाशनः ॥ मृतः स
र्पेण संदष्टः कष्टेन व्याकुलो प्य भूत् ॥९॥ ततः परं कालदूताः कालेन समुपागताः ॥ कुंभीपाके पातनीयस्त्व
स्येति विचक्षणाः ॥१०॥ तदायमश्चित्र गुप्तं धर्माधर्म विवेचकं ॥ प्राहानेन कृतं पापं किं किमित्या दरेण सः
॥११॥ इति तद्वचनं श्रुत्वा चित्रगुप्तो विचक्षणः ॥ यमं प्राह विनीतः सन्कृतांजलिपुटो मुहुः ॥१२॥ ॥ चित्रगु
प्त उवाच ॥ ॥ यमानेन कृतं पापं कल्पांते पिन नश्यति ॥ महापातककोटीनां जनकं तत्पुनः पुनः ॥ कया
यातनया तस्य पापस्य स्याद्विनाशनं ॥ पुनः पुनर्वृद्धिमेव तत्प्रयाति प्रतिक्षणं ॥१४॥ ईदृशं पातकं लो
के न भूतं न भविष्यति ॥ नवर्त्तते पि कुत्रापि नूनं ब्रह्मांडमंडले ॥१५॥ तत्पाप स्यानुवादो पि कर्त्तु मेव न शक्यते
॥ यतस्तदनुवादेन प्रत्यवायः प्रजायते ॥१६॥ विना [illegible] नुवादेन प्याकल्पांत मयं यम ॥ अस्मिन्घोरनरका
वासं करोतु त्वया धुना ॥१७॥ स्वल्प दर्शन मात्रेण यत्पापं समुपार्जितं ॥ तन्नाशाय प्रयत्नो पि कर्त्तव्यः खलु
सत्वरं ॥१८॥ नयं तु दूताः सहसा शूलघात पुरः सरं ॥ तं पापिष्ठवरश्रेष्ठं मास्तु तस्य विलोकनं ॥१९॥

एनं ज्ञात्वा प्रति दिनं कृताः पातक कोटयः ।। कल्पावसान पर्यंतं सो विमुक्तो भविष्यति ।। २० ।। महापातकरा
शीनां कल्पांते विलयो भवेत् ।। एतद्दर्शन जं पापं नल यंया स्याति ध्रुवं ।। २१ ।। एतद्विलयनोपायः चिंतनी
यस्त्वयायम् [मया] ।। श्रुतितत्वं विचार्यादौ मर्यादां सुकृ[त]स्य च ।। २२ ।। इत्युक्तं तद्वचः श्रुत्वा कालो व्याकुलमान
सः ।। चिंतयामास बहुधा खिन्न खिन्न खिन्नः प्रतिक्षणं ।। २३ ।। अतः परं कि मस्माकं साधनं पापनाशने
।। किमर्थमागतं मोहाद्दूर दृष्टस्य किं फलं ।। २४ ।। प्रातःकाले मुखं दृष्टं कस्य दुष्टस्य दुष्कृतं ।। किमुपस्थि
तमस्माकं दुःख रूप फलोन्मुखं ।। २५ ।। दूर दृष्टस्य महिमा दुर्जयः खलु वस्तुतः ।। अतः परं किम
स्माभिः कर्त्तव्य मधुना पिवा ।। २६ ।। विचार्य नागतं तस्माद्दृत्तोन शकुनो पिनः ।। अस्मदागमने प्रायो
नास्माभिः शंकरः स्मृतः ।। २७ ।। स्मृत्वा शंकर माराध्य ममर प्रवरं फलं ।। योयाति तस्य विजयः सुखा
न्यपि पदे पदे ।। २८ ।। शंकराराधनं कार्यं गमने समुपस्थिते ।। तद्दूरगमने तावत् अदूरगमने पिवा ।। २९ ।।
नाना साधनयुक्तोपि शंकराराधनं विना ।। तैः साधनैः फलं तावत् न प्राप्नोत्येव सर्वथा ।। ३० ।। अलं बहु वि
धैरन्नै रलमाया सकोटिभिः ।। अलमन्यै रुपायैर्वा कालकालार्चनं विना ।। ३१ ।। साधनानां साधनं त्वं संपाद—

यति सत्वरं ॥ महेशाराधनं तेन विना तस्या दसाधनं ॥ ३२ ॥ शंकराराधनं मुख्यं सर्वसाधन साधनं ॥ तदेवस-हरा: तृ
फलं मन्ये तदन्यद्धि फलं खलु ॥ ३३ ॥ न जानंते ते मूढास्ते मुख्यं तु फल साधनं ॥ शंकरार्चन मेवेति वेदबाह्या: अ०९७
स्वभावतः ॥ ३४ ॥ कस्य चिह्नरि पुण्यस्य शिवाराधन मेवमे ॥ फल साधन मित्येषा प्रमा भवति भाग्यतः ॥ ३५ ॥
शंकरा स्वलत्वज्ञाः तेषामभ्युदयः सदा ॥ शिवाराधन मात्रेण नान्यापेक्षा प्रजायते ॥ ३६ ॥ शक्तिः कल्प
तरूणां या शक्तिः सुरगवामपि ॥ ततो प्यनंतगुणिता सा शिवाराधनस्य हि ॥ ३७ ॥ शंकरार्चन सामर्थ्यं न कस्यापि
जगत्त्रये ॥ येन ब्रह्मत्वमाप्नोति विष्णुत्वं मुक्तिमंततः ॥ ३८ ॥ शिवार्चन समः रसः कोपि भूरि पुण्यस्य जायते ॥ स
रसो दुर्लभो लोके सुधारससस्य तु ॥ ३९ ॥ शंकरानुग्रहादेव शिवाराधन धीर्भवेत ॥ सैव सूले फलं ताव द्धि
मलं तदपेक्षितं ॥ ४० ॥ शिवाराधन मेवैकं अभीष्ट फल साधनं ॥ तदन्यः साधनाभास स्तेन किं जायते
फलं ॥ ४१ ॥ पिपासा पग मो लोके कथं वा मृगतृष्णया ॥ सा चेत्तदा तदार्तस्य जल पानादिक क्रिया ॥ ४२ ॥
शुक्तिकारजतत्वेन ज्ञाता किं केन चित्क चित ॥ साधयत्य तियत्नेन कामिनी करकंकणं ॥ ४३ ॥ तस्माद्दु
मास्पदं यावत्तावन्न फल साधनं ॥ साधनत्वेन विज्ञातं फलं साधयति ध्रुवं ॥ ४४ ॥ प्रमितं साधनत्वेन केवलं –

शिवपूजनं॥ तेनैव सि द्धिरन्येन नासिद्धि रूप जायते ॥४५॥ तथा सति प्रसंगेनाप्यनायासेन साधितं॥
शिवार्च्चनं फलं नित्यं यद्यद्यद्यदपेक्षितं ॥४६॥ अतः परं प्रयत्नोपि कर्त्तव्यः शिव पूजने॥ तेन तद्दर्शि
नोत्पन्न पापनाशो भविष्यति॥४७॥ महाघ गिरि संघात वज्रमीशान पूजनं॥ तेन तत्पाप विलये भयशं
का न जायते ॥४८॥ तावत्पाप भयं भक्त्या यावन्नाराध्यते शिवः॥ तदाराधन मात्रेण दग्धाः पातक कोट
यः॥४९॥ महा पाप शरीरस्य विप्र शंकर पूजनं॥ तेन तावत्तस्य नाशः सत्वरं खलु जायते॥५०॥ एतस्मि
न्नंतरे तत्र कश्चिदार्त्तस्वरः श्रुतः॥ ततः परं म्लान चित्तत्वरयासयदयोयमः ॥५१॥ ततः परं तं विलोक्य
भस्मोद्धूलित विग्रहं॥ शिव लिंगार्चकं शुद्धं ददर्श मुनि पुंगवं ॥५२॥ ततः प्रणम्य तं भक्त्या सका
लोपि कृतांजलिः ॥ तमुवाचाति विनयाच्चित्र गुप्तेन संयुतः॥५३॥ वनवास्यसि सवने सवने सवनेवने॥
वनेनापि महेशानं पूजयंत्यत्र साधवः॥५४॥ शिव लिंगं प्रयत्नेन वनेन वनजैरपि॥ वने संपूजयन्मर्त्यः
सवने सुखमाप्नुयात्॥५५॥ एवं चार्त्तः स्वरः कोयं तव किं तत्र कारणं॥ इदं वद विशेषेण मह्यमित्याह
तं यमः॥५६॥ ततः परमुवाचेदं वचनं तं यमं प्रति॥ मया पापरतो दृष्टः तेनार्त्तिर भवन्मम॥५७॥ शिवनिंदा

शिवर० ३
६१

कृतातेन दुर्मुखं तन्मुखं खलु ॥ तद्दर्शनेन पापानि मयि जातानि कोटिशः ॥५८॥ तदा लोकन पापानि वृ-हरा(ल्) धियां तिक्ष्णेक्षणे ॥ अतः कथं विना शस्यात् तेषा मिति विचिंत्य ते ॥५९॥ देवास्त्वयाप्य यत्नेन सदृष्टः पापकृत्तमः ॥ मया स एव दृष्टोतः तेन दुःखं प्रवर्धते ॥६०॥ एतद्धि नाश को धर्मो धर्म रूपेण किं त्वया ॥ नज्ञातस्त्वं वद प्रीत्या विचार्या दर पूर्वकं ॥६१॥ इति तद्वचनं श्रुत्वा यमो पि नियमान्वितः ॥ शुकाश्रु मंययोतेन मुनिना सहसत्वरा ॥६२॥ तं शुकं मुनि शार्दूलं कालकालार्चने रतं ॥ प्रणम्य दंडवद्भूमावुवाच वचनं यमः ॥६३॥ ॥यम उवाच॥ ॥ दृष्टः कश्चिन्मया दुष्टो दुरदृष्टेन दूरतः ॥ स शैव निंदकस्तेन पातकं तावद र्जितं ॥६४॥ तद्दृष्ट्वा लोकनादेव मयाप्यद्य मुपार्जितं ॥ को वा तन्नाशकोपायः तं मे वद शिवार्चक ॥६५॥ ततः सोपि शुकः प्राह दृष्टो यस्तु मया यम ॥ त्वयादृष्टः स दुष्टोपि यतः स शिव निंदकः ॥६६॥ कृतं यद्यपि तेनात्र तपो घोर तरं परं ॥ तथाप्य शंकरो जातः तद दृष्टं तथाविधं ॥६७॥ किं घोर तपसा कृत्यं किमन्यै धर्म संचयैः ॥ शिवलिंगार्चने नित्यं विश्वासो यदि नाद्भुतः ॥६८॥ अपार पुण्य निधयो येन पुण्यैः समर्जिताः ॥ तस्यैव तावद्धि श्वासः शिवलिंगार्चनेयन ॥६९॥

अ० १७

कल्पावसान पर्यंतं धर्मैश्चेच्छिनयापनं ॥ तदा कथं चिद्धि श्वासो जायते शंकरार्चने ॥७०॥ सुलभं पुण्य पुंजानां श्री मृत्युंजय पूजनं ॥ अन्येषां दुर्लभं तावत्त देव शिव पूजनं ॥७१॥ सुमेरु शिखर स्थानं चंद्रेण सहस्रं स्थितिः ॥ पाताल वासिनां सा तु दुर्लभा तत्तया खलु ॥७२॥ अतः शिवाराधने पि विघ्नाः संभाविता स्ततः ॥ तत्कार्यम प्रमादेन प्रमादे कुगति र्भवेत् ॥७३॥ अशांकारागार नारीन ग्नीरव लोकने ॥ निमील्य लोचने पश्चात्कुर्यात्सूर्यावलोकनं ॥७४॥ अशांकर शरीराणि दृष्ट्वा नार किणामपि ॥ दृष्ट्वा भानुं विशिष्टश्चेद्दूरं यात्यपि धावति ॥७५॥ शिवनेत्र त्वबुध्यैव कर्त्तव्यं भानुदर्शनं ॥ अन्यथा धीर्यदि युक्ते तदा नरक मश्नुते ॥७६॥ ततः परं भस्मनांगं सम्य गुद्धूल्य सादरं ॥ हरलिंगार्चनं कार्यं कृत्वा मुक्तो भवेद्ध्रुवः ॥७७॥ उद्धूलितं भस्मनांगं नव मेवोप जायते ॥ भस्म पाप शरीराणां भस्मीभूत्रीकरण साधनं ॥७८॥ तत्पुण्य परिपाकेन भस्मांगमुपयात्यपि ॥ तस्मादुद्धूलनेनान्यन्नवांगमुपजायते ॥७९॥ प्रविष्टा रोम कूपेषु शरीरस्थेषु कोटिशः ॥ लिंगानि जनयत्येव तदंगे भूतिरुत्तमः ॥८०॥ मन्ये लिंग मयं कायं विभूत्युद्धूलनाद्यम ॥ तदंगं चर लिंगं स्याद्दुत्तुंगं चेतना श्रयं ॥

अर्चेतनानि क्र लिंगानि काश्मीरादीनि कोटिशः॥ संति तत्पूजनेनावन्न तावत्फलमश्नुते॥८२॥ प्रत्यक्षेण विरूपाक्षः शांभवाकारमाश्रितः। गृह्णाति फलमन्नं वा नीरं वा पुष्पमेव वा॥८३॥ लिंगार्चकस्य महिमा तस्य लिंगार्चनस्य वा॥८४॥ वेदः कथंचिज्ज्ञानाति न विजानाति वायम॥८५॥ शांकराग्रे सुरस्यांगं विभूतिपरिवेष्टितं॥ दृष्ट्वा भूतपतिस्तावन्नृत्यत्यंबिकया सह॥८५॥ अभूतपूर्वमेवेदं चरलिंगमिति श्रुतं॥ शैवांगमुत्तमांगं तु तस्य तल्लिंगमुत्तमं॥८६॥ बाहुद्वय प्रसारेण लिंगाकारतया परं॥ उत्तमांगं दृश्यमानं तस्य लिंगमिति स्मृतं॥८७॥ अर्पितं चरलिंगेषु साक्षाद्भुंक्ते महेश्वरः॥ तत्स्थावरलिंगेषु न तथा शिवसन्निधिः॥ रत्नलिंगं श्रुतिप्रोक्तं रत्ने शांभवपुंगवः॥ अतस्तदात्मकं लिंगं लिंगोत्तममिति श्रुतं॥८९॥ यस्य शांभवलिंगेषु न भक्तिरुपजायते॥ तेन स्थावरलिंगस्य पूजाकार्या प्रयत्नतः॥९०॥ स्थावरस्यापि लिंगस्य पूजां कृत्वा ततः परं॥ तदर्पितोपहारेण कर्त्तव्यं हारतोषणं॥९१॥ भुंक्ते हारमुखं प्राप्य सादरो हर इत्यपि॥ श्रुतिः श्रुता ततो हारं हाराहारोदरं विदुः॥९२॥ हारमाहारमासाद्य हारोपि हरतामियात॥ ततो हारो हरः साक्षात्तदाहारोदरं च सः॥९३॥ एषां न हा

रस्रूपेषु लिंगेषु दृढामतिः॥ तैरर्चनीयं तल्लिंगं स्थावरं गिरिगव्हरे॥९४॥ हारांतः करुणाकारगुहा माश्रित्य शंकरः॥ तिष्ठतीत्यव गंतव्यं सा गुहा वेदबोधिता॥९५॥ तस्यां गुहायां संविष्टमंबिकारमणं प्रभुं॥ स्मृत्वा हर्षाश्रुधाराभिर्घोरो हारो मृतो भवेत्॥९६॥ यथाधिकारं लिंगार्चां कृत्वा पापैर्विमुच्यते॥ यथाविभवमेतस्य पूजा कार्या विशेषतः॥९७॥ शिवः स्वयं दा दृष्टश्चिदानंदघनस्तदा॥ तस्यार्चनपरो भूयान्नालिंगार्चनतत्परः॥९८॥ शिवसंनिधिरित्येव लिंगे पूजा विधीयते॥ सचेत्संन्निहितः साक्षात्कार्यं तस्यैव पूजनं॥९९॥ अतः प्रकृतपापस्य नाशायापि प्रयत्नतः॥ शिवलिंगार्चनं कार्यं तन्नाशस्तेन जायते॥१००॥ पापदावानलस्यायं शिवलिंगार्चनांबुदः॥ विनाशको भवत्येव सभाग्यानां भवेत्तु॥१०१॥ अतः परं कालकालपूजया कालयापनं॥ कर्त्तव्यं कालनिलयं कालकालं स्मरन्व्रज॥२॥ इत्युक्तं तद्वचः श्रुत्वा तत्कृतं लिंगपूजनं॥ तत्साधनानि दृष्ट्वापि यमः प्राह शुकं प्रति॥ धन्योसि भाग्यवान् लोके भवानेकः शुका धुना॥ सर्वलोकोपकाराय शिवपूजा तवे दृशी॥४॥ शिवपूजा साधनानां साधनं तपसां फलं॥ एतावतैव तपसा सर्वेषां कृतकृत्यता॥१०५॥ त्वया जन्मार्जितानंततपोरूपेण केवलं॥

लिंगार्चनं फलमिदं सर्वसाधनसिद्धिदं ॥६॥ लोचनानां फलमिदं शिवलिंगविलोकनं ॥ अर्चितस्यास्य-हरात् लिंगस्य दर्शनं तु विशेषतः ॥७॥ शिवाराधनसामग्रीं दृष्ट्वा स्वयं मुहुर्मुहुः ॥ नतोऽसि परमानंदं सेयमत्यद्भुता खलु ॥१०॥ न शिवार्चनसामग्रीप्रभावस्यापि वर्णनं ॥ अपाररसना भिर्वा शक्यते कर्तुमेकदा ॥९॥ कल्पिता रचना सेयं त्वया शंकरमंदिरे ॥ अपारतपसामेषा रचना फलमुच्यते ॥११०॥ जन्मेते सफलं माता धन्या धन्य पिता तव ॥ शांभवस्य त्वया संगात् धन्यं मामपि मन्महे ॥११॥ भुवने पुनः कुत्रापि दृष्टः शांभवपुंगवः ॥ एतादृशः शिवरतो दुर्लभः खलु सर्वदा ॥१२॥ धन्यं नेत्रयुगं धन्यं धन्यं धन्यं करद्वयं ॥ शिवपूजनसामग्रीकरणालोकनादरात् ॥१३॥ एतादृशं [illegible] जया परया नया ॥ फलं शांकरपादाब्जमकरंदयुतामतां ॥१४॥ इत्युक्त्वा शंकरं नत्वा स पुनः पुनरादरात् ॥ शुकं नत्वा ययौ कालः चित्रगुप्तसमन्वितः ॥१५॥ यमः स्वनिलयं गत्वा दूतानाहूय तांस्ततः ॥ शैवनिष्ठुरवक्तारं ताडयंस्त्विति चाब्रवीत् ॥१६॥ तस्य तु क्षणमात्रं वा नरकान्मास्तु निर्गमः ॥ घोरेषु नरकेष्वेव स नित्यमधितिष्ठतु ॥१७॥ सपापिष्ठः पाचनीयो भाजनीयो निरंतरं ॥ ताडनीयः कशाघातैः अग्निकल्पैर्मुहुर्मुहुः ॥१८॥

अ० २७

इत्याज्ञाप्य यमस्त्वस्थः चित्रगुप्तेन संयुतः ॥ लिंगार्चनोत्सवं स्मृत्वा शुकस्यातीव विस्मितः ॥ ११ ॥ भुवि खलु शिवलिंगाराधका एव धन्या निजहितधनधान्यैः शंकरं पूजयंतः ॥ शिवजनपरिवीताः शैववार्ताप्रवृत्तिप्रकटित निजपुण्याः पुण्यपूर्णार्णवास्ते ॥ १२० ॥ ॥ इति श्री शिवरहस्ये हराख्ये तृतीयांशे कुमारनंदिकेश्वरसंवादो नाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ ॥

व्यास उवाच ॥ ॥ अतः शंकरभक्तेषु नयुक्तं निष्ठुरं वचः ॥ सदा स्नेहेन वक्तव्यं विनीतेन शनैः शनैः ॥ १ ॥ अतस्त्वयापि गत्वाग्रे नंदिकेश्वर सादरं ॥ वक्तव्यं तेन सहसा मधुरावागनुत्तमा ॥ २ ॥ इत्युक्तः प्रेषितस्तेन ययौ सत्वरमादरात् ॥ रत्नपुष्पकमारुह्य गणकोटिसमावृतः ॥ ततो दूरं नंदिकेशं भृंगी दृष्ट्वा प्रहृष्टधीः ॥ प्रणम्य शिरसा भक्त्या पप्रच्छ कुशलं ततः ॥ ४ ॥ ॥ भृंगिरुवाच ॥ ॥ अनंतब्रह्मकल्पांताः प्रवृत्ताः सुयशापते ॥ तथापि त्वया तावन्ना भूऌमनमाद राल् ॥ ५ ॥ शंकराज्ञानुसारेण वर्तनं खलु दुर्लभं ॥ न शंकराज्ञां भूतां विलंबकरणायसा ॥ ६ ॥ नारायणाद्यमुसंख्याः कोटिशः पद्मजादयः ॥ तथापि भवतां तावत्त्कालकलनापिन ॥ ७ ॥ कालकालकृपा

शिवरहस्य
६४

तावद्रघुनाप्यनुवर्त्तते ॥ भवत्स्वेवंकृता पूजा भवद्भिः शंकरस्य तु ॥ ८ ॥ आराधितः सावधानं गिरिराजसु-हरः तु-
ताधवः ॥ अतो न कालकालस्य कोपलेशो भवत्स्वपि ॥ ९ ॥ प्रभुः कार्यार्थमुद्युक्तो विलंबे किं करिष्यति ॥ उ अ. १८
ग्रोप्यनुग्रो भगवान् भक्तेष्वेवमनुग्रहात् ॥ १० ॥ अनुग्रहेपि विज्ञाते प्येवं कार्यविलंबनं ॥ नो चित्तं भृत्यकृत्या
निन विलंबसहान्यपि ॥ ११ ॥ मृत्युंजयत्वात्तत्कार्यविलंबोपि न नः क्षतिः ॥ मृत्युंजयस्य कृत्यं च न मृत्युमु
पयास्यति ॥ १२ ॥ इति तद्वचनं श्रुत्वा नंदिकेशः प्रहृष्टधीः ॥ त्वया साधूक्तमित्युक्त्वा ददावालिंगनं पुनः
॥ १३ ॥ ततः परं स तरसा कुमारनिकटं ययौ ॥ कुमारेण प्रेषितोहमित्युदीर्य शिवं स्मरन् ॥ १४ ॥ विमानादव
तीर्याथ नंदी भृंगिसमन्वितः ॥ ननाम दंडवद्भक्त्याथालमुवाच च षण्मुखः ॥ १५ ॥ ॥ षण्मुख उवाच ॥ ॥
देवता सार्वभौमस्य महादेवस्य सेवकाः ॥ यूयं कृतार्थाः पुण्यानां सागरा एव केवलं ॥ १६ ॥ किं करोति महा
देवः तस्मिन् सिंहासने नवे ॥ प्रवृद्धमानेवसति किं वा रत्नप्रभालये ॥ १७ ॥ किमेक रत्नभवने योजना
र्बुदमुन्नते ॥ किन्नीलरत्नसदने योजनायुतमुन्नते ॥ १८ ॥ हीरागारेति रुचिरे लक्षयोजनमुन्नते ॥ स
मुक्ताफलसौधे वा गिरिराजसुताधवः ॥ १९ ॥ किं पद्मरागभवने नानारत्नविचित्रिते ॥ यद्वागोमे—

धूकागारे शंखयोजनमुन्नते ॥२०॥ पुष्परागस्य सदने यद्वा मारकतें गृहे ॥ शंखलक्षोन्नते यद्वा शिवो
न्यत्राधितिष्ठति ॥२१॥ मरंदकुल्यानिकटे यानि लिंगानि कोटिशः ॥ पूजितानि विचित्राणि तेषु क्रीड
ति किं मृडः ॥२२॥ यद्वा क्रीडति विश्वात्मा चंद्रमंडलमंडपे ॥ विद्युद्दामसमाकीर्णे ताराराजिविराजि
ते ॥२३॥ मंदारकुसुमासारमंडपेषु चरत्युत ॥ तुंगभृंगांगनानाट्यं पश्यन् गौरीमनुस्मरन् ॥२४॥ यद्वा
कुसुमसौधेषु तल्पप्रासादेषु वा शिवः ॥ यद्वा साधु सुधाकुल्यातीरे चरति शंकरः ॥२५॥ इति लक्षवचनं
श्रुत्वा भृंगी विनयसंयुतः ॥ उवाच मधुरां वाणीं वाणीवाणीशदुर्लभां ॥२६॥ मंदारपुष्पशयनै रत्नैरपि
संवृते ॥ अत्युच्चकुसुमासारप्रासादेषु हरः स्थितः ॥२७॥ तत्र स्थित्वा समाहूय मामादरपुरःसरं ॥
प्रेषयामास भगवान्कुमार तव संनिधिं ॥२८॥ धन्योस्मि त्वत्पदांभोजं दृष्टमद्य यतोधुना ॥ अतःप
रं प्रयाणाय कुरु यत्नं विशेषतः ॥२९॥ महादेवपदांभोजविलोकनमहोत्सवः ॥ सत्वरं भवतु स्वामि
न् तद्विलंबे शुभं कथं ॥३०॥ इति संभाषणे भृंगी कुमारमभिनंदयन् ॥ कुमारोक्तां शिवकथां शृण्व
न्नादरतः स्थितः ॥३१॥ अंबा विजयया साकं जयया सेविता मुदा ॥ प्राह स्मेरमुखांभोजरुचिराचि—

शिवरहस्य
६५

रमादरात् ॥३२॥ ॥गौरी उवाच ॥ ॥ हरः स्मरारिः स्मरतीति चित्रं खलः सुखासार समावृतोपि॥ हरः तू अपारमानंदमपि प्रयच्छन्नां दोलयन् मंदमिदं मनो मे ॥३३॥ गौरीहार विहारोरु विलासालसलांकदा॥ अ.१८

प्रयास्यतीति विजया हाराकारं जगौ मुहुः ॥३४॥ अंब त्वामेव सततं चिंतयित्वा पुनः पुनः ॥ त्वन्मूर्तिमात्र ध्यानेन कालं नयति शंकरः॥ ३५॥ सुंदराण्यरविंदानि सौवर्णानि विलोकयन् ॥ करोति निंदा मे तेषां सौं दर्याधिक् धिगित्यपि ॥ ३६॥ दृष्टं गौरी मुखांभोजे सौंदर्यमतिशोभनं॥ तत्कोट्यंशोपि नात्रेति सृष्टि र्व्यर्थेति मन्यते ॥३७॥ ससंपूर्ण शरद्राका सुधाकर विलोकनं ॥ नचकार कलंकीति मत्वा स्मृत्वा त्वदान नं ॥३८॥ नददर्श महादेवः शफरी परिवर्तनं ॥ त्वन्नेत्र संभवं स्मृत्वा नीलमानं विचिंतयन् ॥३९॥ कोम ला विद्रुमलता पद्मराग प्रभान्विता ॥ निंदिता तेन ते गौरि सुंदराधर चिंतनात् ॥४०॥ फुल्लं तिलप्र सूनं वातेन नालोकितं शिवे ॥ नासापुट तटं स्मृत्वा शिवेनादर पूर्वकं॥ ४१॥ खंडनीलालिमाला पिते ननालोकिता शिवे॥ रुचिरान् चिकुरान् स्मृत्वा धंमिल्लमपि शोभनं ॥४२॥ सुमेरु गिरि कल्पाश्च गिरयस्तेन नेक्षिताः ॥ त्वत्कुच स्मरणे नैव तत्सौंदर्य विनिंदया ॥४३॥ मरंदा वल्लवार्त्तापि नकृता तेन—

शैलजे ॥ गंभीरनाभिस्मरणात्कदापि गिरिकन्यके ॥४५॥ नहेमरंभास्तंभानां सौंदर्यमपिवीक्षितं ॥ त्वदूरुभागसौंदर्यस्मरणेन प्रतिक्षणं ॥४५॥ नकोकनदसौंदर्यं दृष्टंतेन शिवप्रिये ॥ पादारविंदस्मरणे महादेवेनते मुहुः ॥४६॥ नकृतंतेन गिरिजे ताराहारावलोकनं ॥ त्वदुरोजातिरुचिरहारानुस्मरणेसति ॥४७॥ मरंदपानां दूरेण स्थितिमिच्छतिशंकरः ॥ पिकालापांश्चहुंकारन्ननशृणोति विनिंदति ॥४८॥ अम्लानपुष्पशय्यानां नकरोति विलोकनं ॥ नास्वादितोरसस्तेन सुधायाः सर्वथांबिके ॥४९॥ उन्मत्तगजहंसानां गमनं सविनिंदति ॥ वरटानां सभर्गाणां स्मृत्वा त्वत्पदचालनं ॥५०॥ मध्यंस्मृत्वा तवांबाघसिंहमध्यविनिंदनं ॥ अणूनां परिमाणस्य निंदामपि चकारसः ॥५१॥ सुमेरुसानुसौंदर्यनिंदकोपि सधूर्जटिः ॥ स्मृत्वाकटितटं तिष्ठत्यंबतेन विडंबना ॥५२॥ नीहारतल्पमधितिष्ठति चंद्रमौलिः ॥ मारज्वरानलविदाहविनाशनाय ॥५३॥ तत्संगमेन गिरिजे तदभूदसह्यदावानलप्रतिमम प्रतिमंभवानि ॥५४॥ कुंदोच्चयेषुशयनं नचकार गौरि मंदारपुष्पनिवहेष्वपिकालकालः ॥५५॥ दूरीकरोति विधुमंडलचारुशय्यां चंडांशुमंडलधिया गिरिजे धवस्ते ॥ उत्कंठया

९६०

पियदकुंठितनीलकंठनाट्यावलोकनमशेषविशेषचिंतां ॥ कुर्वन् गिरींद्रतनयेन च कारधीरो मा रारिरस्खलु वि-हरः लू शेषतस्त्वनूनं ॥ कर्पूरगौरसम भवद्गिरिजे शरीरं किं शंकरस्य रुचिरं न सुमेरु चारु ॥ ५७ ॥ कार्श्यं च तावदधुना तनुरेति शंभोः सा किं तनुर्न भवती ति नमावदाद्य ॥ ये कल्पिताः परिमिता अपि लीलया च लीला विहार निलयाः कमलालयास्ते ॥ ५८ ॥ दूरीकृताश्च तरसा विनयं प्रपन्नाः किं शैलराजतन येव दलति त्रिनेत्रः ॥ मंदार सुंदर मरंद विनोद सौध भृंगांगनां गमपि शंग विलोकनार्हं ॥ ५९ ॥ अंगा रकल्पमभवत् गिरिराजकन्ये धन्येत वैव विरहेण महेश्वरस्य ॥ नारी विशेषरचना चतुरश्चिरं ते स्मृत्वा शरीरमगराजसुते महेशः ॥ ६० ॥ दूरीकरोति तरसा रचनां चकोरः कां जोमिव प्रतिदिनं स्मृत चारुचंद्रः ॥ पूर्वं विधाय विधुमंडल मंडपानि गौरी विनोद मदवर्धन साधनानि ॥ ६१ ॥ नानी लिलेन गिरिजा विरहे वृथेति दूरीकृतानि गिरिशेन गिरीशकन्ये ॥ यद्यन्मनोहरतरं गिरि सेन सृष्टं तत्सर्वमद्य गिरिजागमनं विनामे ॥ ६२ ॥ कृत्यं न दृष्टमिति दुष्टतमत्वशंका कृत्वाधिति ष्ठति स निष्ठुर सृष्टि बुध्या ॥ अद्यापि तु शंकर विहार विचारलेशः किं ते गिरिशतनये कमनी य मूर्तिः ॥ ६३ ॥

किंनः स्मृतः श्रवण मंगल पुण्यकीर्ति भोग्यप्रदान विनिवारित पातकार्तिः॥ यत्पादुकास्मरण
म मात्रममंगलानि दूरीकरोति शतधापि सहस्रधापि ॥६४॥ पश्चात्तनोति विविधान्यपि मंगलानि
तत्पादुकास्मरण माशु शुभावहं ते ॥ धन्यासि देवि गिरिजे गिरिश प्रसाद संदेह पात्रमपि चित्र
मिदं तवेदं ॥६५॥ गात्रं पवित्र मिद मत्र कथं त्रिनेत्र सेवाख्य सत्रवर दीक्षित मस्तु शस्तं ॥कल्याण
रूपसुगुणार्णव मिंदुमौलिं तूर्णं विलोकय परात्परमन्नपूर्णे ॥६६॥ अभ्यर्णमेत्यवर वर्णि निवर्णनीयं सं
पूर्णकाममपराजितमेहि भद्रे॥ अंग श्रियाकनक चंपक कांति धारा दूरीकृतातव तयाफलमस्ति किंवै॥
॥६७॥ यद्यद्य शंकर विहार वरानुकूलानस्यात्तदा गिरिसुते विफलान किं सा॥ राका सुधाकरमनो
हर बिंबमंब तन्निंदनं वदनमद्य करोति तेवै॥६८॥ किं तेनवा फलमनुक्षण मिंदुमौलि लीला विनोदमधु
रस्मितवर्जितं चेत्॥ नीलोत्पलामल विशाल दल श्रियापि दूरे गतं तव विलोचन धामधारां॥ दृष्टे
त्यदृष्टपरिपाक विचिंतनेन तन्नौरि शंकर विनोद मुदे कदा स्यात्॥ नीलाचलालिकुलकां
ति विशेषपूरं दूरीकरोति चिकुर प्रचुर प्रभा ते॥७०॥ एषा त्रिलोचन विलोचनगोचरा चेन्नौरि प्रमोद —

जननी जननि स्खलःस्यात्॥ धीरे सुमेरु शिखरातिमनोहर श्रीर्दूरं प्रयाति विपुलं कुचमंडलं ते॥७१॥ हराः द्दृ
दृष्ट्वा तदेतदधुना गिरिजे गिरिशे दृष्टं प्रकृष्टमति पुष्टिमुपेत्य हृष्टं॥ रोमावलि त्रिवलि संवलिताल ऽ॥१८
नोति कामध्वजश्रियमियं गिरिजेपि धेहि॥७२॥ एषा स्मृतापि मदन ज्वर भूरि धारां संपादयि
ष्यति हराय चिराय धारां॥ त्वत्पादपद्ममति सुंदर विद्रुमादि मुद्राद्रव श्रियमिदं नतिरस्करोति
॥७३॥ तुच्छस्य तस्य न तिरस्क्रियया फलं स्यात् इत्येव शंकर हरारि मनोहरं ते॥ संपूर्णदोहदमदां
धमरालकांतामत्तेभदारगमनानितिरस्करोति॥७४॥ त्वत्पादपद्मचलनं नवचंद्रमौलिलीला
रसास्पदमिदं नमुदं तनोति॥ अंबाधुना घनमिदं जघनं तवेदं नूनं नदीषु पुलिनं प्रकटीकरोति॥७५॥
उत्तप्तकांचनविशेषितकांचिकाकं किंजालमस्य किमियं नतु रक्षणाय॥ आवर्तवृत्तिरपि यासरितां स
दासा त्वन्नाभिदेश सुषुमा श्रवणेन लज्जा॥ किंनांबुमज्ज्यन विलीनकुलाकुलानां हानिं प्रवृद्धसकला
नवलोकनेन॥ किं गौरी विषमे क्षणं क्षणमपि त्वा लैवनायाति मां यद्वासाति विशाल फाल विप
लज्वालानलव्याकुलं यद्वा सन्निहित त्रिशूलमथवामां कालकूटाशनं गौरं मामुरुदर्प सर्पवलयं-

पंचास्त्रसंहारकं ॥७७॥ समा दृष्टिस्तस्याः कुटिलचटुला लोलनलिनी भवित्री फालाग्निं विषमपि सशूलं हरति किं ॥ न संव्यालं बाला मदनशरमालाति विमलां विशालां लीलां वा किमिति न मुदा पश्यति मुहुः ॥७८॥ अंबा शंबरवैरि वैरि रुचिर व्याहार सारा दरां धीराप्यस्त्र विकार सार सरसा सारा महारे रलं ॥ सारे जे विकलंक सुंदर शर द्राका निशानायका लोका लोकन शोकनाशनकरे सस्मारहारं चिरं ॥७९॥ लीलाकल्पितकल्प भूरुहवरा पारां तरालस्फुरद्रत्नाकार सुमेरु धीर रुचिराकार प्रकाराकरे ॥ धीरे मारशराति सुंदर सरस्तीरे विहारे चिरं वारंवारमलं विहार मकरंगौरि स्मरारेः परं ॥८०॥ सौंदर्या मरवाहिनी लरकिमा भूमा भवानी तियां प्रेमा सोमकलावतंसमहिमास्थेमासु संवर्धतां ॥ तस्यैव प्रथिमा तथैव लघिमा तस्याः स्वयं द्राघिमा तस्यायं महिमा तथा मधुरिमा सीन्वितं तेजसः ॥८१॥ ॥इति श्रीशिवरहस्ये हराख्ये तृतीयांशे विजयगौरीसंवादो नामाष्टादशोध्यायः ॥१८॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥वेदव्यास उवाच ॥ ॥ इतिनां विजयावाणीं साक्षाद्वाणीमिवस्मितां ॥ शुश्राव श्रवणानंदधारामिव मनोहरां ॥१॥

तत: परं दुकूलानि सूक्ष्माणि गिरिशेनसा ॥ प्रकृष्टानि विलोक्यांबा चंद्रबिंबाननावभौ ॥२॥ परि- हरा.दं धायततो धीरा वसनानि सवासनं ॥ शैले विलोक्य वसनं कमनीयतरं शिवा ॥३॥ धंमिल्लस्य प रिष्कारं सीमंतस्यापि मानखे: ॥ चकार गौरी त्वरया रत्नाभरण भूषिता ॥ तत: परं विचित्रेषु रत्न पात्रेषु कोटिश: ॥ पक्वान्नानि निधायांबा बुभुजे ससुतासती ॥५॥ ततस्तांबूल मादाय जयया विजयायच ॥ दत्तं भवानी रुरुचे चिरमानंदवाहिनी ॥ हरो पहार शेषान्नं प्रेषयामास शैलजा ॥ गणेभ्यस्ते गणाधीशा: तुष्टा: पुष्टा: परस्परं ॥७॥ देवदुंदुभयोनेदु: तूर्यध्वनि विजृंभिता: ॥ शं खदुंदुभि निर्घोषै: व्याप्तं शंकरमंदिरं ॥८॥ अपूर्व दुंदुभिध्वानं ध्याना रूढोपि शंकर: ॥ दिव्याभ रणसंकीर्ण स्फुट कर्णपटै: पपौ ॥९॥ तत: कोयमपूर्वोत्र दुंदुभिध्वनि रित्यपि ॥ मृडस्तं डिं समाहूय बाढमूचे वचस्तदा ॥१०॥ कोयं डिंडीरवस्तंडे मंडनं कर्णमंडले ॥ गौरी प्राय: समायाति नवा तत्त्वं विचारय ॥११॥ इत्युक्तो दंडवद्भूमौ तंडीनत्वा मृडं तत: ॥ विमानरत्नमारुह्य सययौ त्वरयाद्विजा: ॥१२॥ तद्विमानं तदा गौरी दूरात् लोचनगोचरं ॥ चकार तरसा धीरा किंमितं दितिवि स्मिता ॥१३॥

अत्यद्भुतं विलोक्यांबा तद्विमानं मनोहरं ॥ सादरं हारमित्येवहृष्टा पुष्टा प्रकृष्टधीः ॥२४॥ ततः कु
मारमाहूय कस्येदं पुष्पकं शिशो ॥ इदं हारमुदारं किंतरसात द्विचारय ॥२५॥ ततः कुमारस्तं दृ
ष्ट्वा हारं ध्वज विवर्जितं ॥ नहारं हर संबंधीत्युवाच वचनं चसः ॥२६॥ ततो वहिर्गतः स्कंदः तद्वि
चारायसादरं ॥ ततः सत्वरमेवात्र सतंडिः समुपागतः ॥२७॥ सनत्वा दंडवद्भूम्या कुमारं नतकंधरः ॥
विलंबानां बिकाकांत हितायेत्यब्रवीन्मुहुः ॥२८॥ ततः कुमारस्त्वरया गौरी चरण पंकजं ॥ नत्वा
चलाचल सुते त्वरयेत्यब्रवीन्मुदा ॥२९॥ अयं तंडी प्रचंडोसावुद्दंड गणपाश्रयः ॥ तद्दोर्दंड बलेनै
वभ्रांतं भूमंडलं पुरा ॥२०॥ त्वरया प्रेषितः सोपि शंकरेण समागतः ॥ अतः परमवस्थान मत्राप्य
नुचितं शिवे ॥२१॥ विमानं रत्नसन्नद्धं तवतद्धि मनोहरं ॥ तवारोहण मात्रेण प्यानंदो वृद्धिमेष्यति
॥२२॥ इतितद्वचनं श्रुत्वा विमानरचनां शिवा ॥ दृष्ट्वा प्रहृष्टा सजयातया विजयया सह ॥२३॥ तदारु
ह्य ततो गौरी विमानमति शोभनं ॥ नाट्यांगनार्बुदयुता गानं श्रु आवलंकृतं ॥२४॥ ततः कुमारे
चलति ते वनेन गणैः सह ॥ दुंदुभिध्वनिसंपूर्णं पुनः शंकर मंदिरं ॥२५॥ परार्धयोजनायामेयाने —

स्थिता गिरींद्रजा ॥ पुनर्विस्मयमापन्ना व्यापन्नार्तिविनाशिनी ॥ २६ ॥ विद्युल्लतासमानानि नेत्रा-हराणि(?)

ण्यत्युत्तमान्यपि ॥ अपाराणि ददर्शाग्रे गणहस्तस्थिता निसा ॥ २७ ॥ बभूवकुसुमासारो मंदमारु-

तसंयुतः ॥ सुगंधपुष्परजसा मासारोपि ततः परं ॥ २८ ॥ सा पुष्पमंडपच्छाया प्रच्छन्ने पुष्पके स्थिता ॥

रराज गौरी राजीवराजिराजिविराजिते ॥ २९ ॥ पुष्पप्रासादशृंगाणि पश्यंती सा पुनः पुनः ॥ नात्यं-

गनानतपदा मंदं मंदययो शिवा ॥ ३० ॥ मंदमारुतपोतेन केतकीसंयुतेन सा ॥ सेविता सा सुतोदृ-

ष्ट्वा सस्मेरापि पुनः पुनः ॥ ३१ ॥ उत्फुल्लकमलाक्रांतसारांसि विपुला निसा ॥ रत्नसोपानकल्लोलसं-

कुलानि ददर्श सा ॥ ३२ ॥ तत्रापूर्वमरालानां वरटानां च कोटयः ॥ दृष्ट्वा प्रहृष्टाः पुष्पांगाः शिपि विष्ट-

प्रियापरं ॥ ३३ ॥ शुकान् पिकान् चकोरांश्च भ्रमरानपि कोटिशः ॥ सुस्वरान्पुष्पमालासु निबिडासु

मनोहरान् ॥ ३४ ॥ रुद्रवीणासहस्राणि दृष्ट्वा सा प्रतिमंडपे ॥ स्वतःस्वनयुतान्यंबा विस्मयं परमं य-

यौ ॥ ३५ ॥ सुधाप्रपासु विश्रांता पश्यंती पुष्पमंदिरं ॥ पदे पदे प्रकृष्टानि फलान्यास्वाद्य सा ययौ

॥ ३६ ॥ तडित्कोटिकुटीराणि ददर्श गिरिजा ततः ॥ प्रतिक्षणं पुष्पवृष्टिं दृष्ट्वा हृष्टा च नूतनां ॥ ३७ ॥

तां तद्धि लोकनानंदधारां मंदगतिं शिवां ॥ दृष्ट्वा तुष्टाव तुष्टात्मा तदा गणगणो मुदा ॥ ३८॥ जयांब
जय सर्वाणि जय गौरि शिवप्रिये ॥ जयान्नपूर्णे विमले कालकालप्रिये नघे ॥ ३९॥ जय शैलसुते दे
विकमलामललोचने ॥ जयामारांगनाराध्ये जयकल्याणि शांभवि ॥ ४०॥ जय मंगल सर्वांगे मंगले स
र्वमंगले ॥ जयमृत्युंजयार्धांगतुंगसिंहासनाश्रये ॥ ४१॥ जय भक्तजनानंदप्रदाननियतव्रते ॥ ज
य दुर्गे विशालाक्षि जय त्रिपुरभैरवि ॥ ४२॥ जयवागीश्वरि प्रज्ञे मंगला गौरि चंडिके ॥ चित्रघं
टे जयानंगविजयध्वजमालिके ॥ ४३॥ जय श्रीविलसद्गौरि सिद्धेश्वरि नमो नमः ॥ नमस्ते संकष्ट
गौरीशीतला गौरि ते नमः ॥ ४४॥ वंदे देवि नमस्तुभ्यं ललिते विश्वबाहुके ॥ कंदलांब नमस्तुभ्यं न
मस्ते भ्रमरांबिके ॥ ४५॥ ज्ञानप्रसूनांब नमो नमस्ते नमो नमस्ते शिवकामसुंदरी ॥ नमो नमस्ते स्व
रूणाचलेश्वरी नमो महागौरि नमो नमस्ते ॥ ४६॥ नमो नमः कल्पलताप्रसूनमालासमाक्रांतपदारविंदे
॥ वंदे स्वभक्तेप्सितदानलोले विलासशीले गिरिजे नमस्ते ॥ ४७॥ नमो नमस्त्वच्चरणारविंदमरं
दधाराप्रसरोस्तु मूर्ध्नि ॥ अस्माकमीशानदया यथा स्यात्तथा विधेयं गमनोत्तरं वा ॥ ४८॥ नमस्त्वा

राधेनकृतो विलंबस्तमेव संवेदय शंकराय ॥ कृतापराधानपिबाल पुत्रान्नंबानसाकुप्यतिसर्व आपि-हरा० तृ
॥४९॥ अस्माकमन्यच्छरणं किमस्ति विहाय तावच्चरणं तवांब ॥ शिवस्यवातावदुमेत तोस्मा अ० १९
नवानवं भक्तजनस्यकार्ये ॥५०॥ अस्माकमप्यंतकवैरिधीरद्वारा श्रयाणां न भयं कुतोपि ॥ दयावि
धेयाखलुतावदंबालपाद पद्मार्चकतत्परणां ॥५१॥ विहारकालेषुकदाचिदंब सांबायतावद्विनिवे
दनीया ॥ वयं यथासाधुसुखं प्रपन्नाः शिवप्रसादेन भवत्प्रसादात ॥५२॥ सा त्वं शिवार्धांगमुमे
दयाचेदस्मासु तावत्तव तावतापि ॥ नदुःखलेशोपि ततः प्रसन्ने प्रसन्नचित्ता न्कुरु सर्वदानः ॥
॥५३॥ विज्ञापनेयं हृदि सावधानमानंद दान प्रवणे तवास्तु ॥ एतावदस्माकमुमासहाय सहा
यतामेतिन संशयोत्र ॥५४॥ एवं सागणनायकोक्तवचनान्युच्चैः समाकर्ण्य सा भूयस्तद्वचना निशं
करपदोपेतान्यनंतान्यपि ॥ श्रुत्वा हृष्टमति प्रकृष्टहृदया मत्वा पुनः शंकरं ध्यानानंदरसप्रभूतवि
लसद्रोमांचकांता शिवा ॥५५॥ तत्रादूरमहेश्वरालिरुचिरागारारुसिंहासनानंता श्रांतसुकांतिसं
तातिसमाक्रांतानि तांतं शिवा ॥ रेजे राजतशैलतुंगशिखराकारोरुरत्नासने प्वासीनाप्यनुवेल-

मिंदुशकलालंकारकांताबभो ॥५६॥ दूरादंबरशेखरां तर विमानारूढगौरी स्फुरत्वेरापारलडिल्लुतालिसुषुमापूरं विलोक्यादरात् ॥ सा गौरी सहतुपा गते तिस्म मुहुः पश्यन पुनः शंकरः शंकाशूकविवर्जितः स्मरहरः संस्मार पूर्वां दशां ॥५७॥ अच्छाया स्याति शैलजे क्षण रुचिव्रातः प्रतापं मुहु दूरीकृत्य शनैरतः परमियं प्रेम्णा समा लिंग्यमां ॥ आर्तिं सा परिहृत्य कृत्य शल मप्या शास्य मा शास्यतां प्राप्ता पूरयितुं समर्थ हृदयायासादयासागरा ॥५८॥ गौरी चारु विहारसागर लसत्कल्लोलमालाकुलोल्लीलाकाल्पित दिव्य विग्रहयुतः पुष्पोच्चये प्यप्यहं ॥ प्रासादेष्वपि पुष्प पुंजर चिताकारे षु पुष्पोल्लस च्छायाकोटि समावृते षु सुदृशांक्रां तेषु नेयं दिनं ॥५९॥ वातोवातु मनोहर प्रसवजो मंदं सुधा शीकर व्यापार प्रचुर श्चिरेण रुचिर स्वैरं विहाराकरः ॥ उत्फुल्लानि सरांसि सार सकुलोल्लीलांबुवीची प्रभासंबद्धानि शनैः शनैः सुकुमा शय्या स्पृशन्संततं ॥६०॥ गौरी चारु शरीरतः किमितिवाना याति वातोधुना कस्तूरीघनसारगंधरुचिर व्यापार भारानपि ॥ दूरीकृत्य निरंतर श्रमकृतः स्वेदांबुधारामपि प्रासार प्रसव प्रसाद विभवं संपादयन्सर्वतः ॥६१॥ तत्र स्मिल्ल विलोक

९५

शिवरह०३
७२

नेन विलयः स्यादप्यलीनाम होलन्नीलाचलकांतिसारमसकृद्दूरीकरोतीत्यपि ॥ चंद्रस्तावदितः-हर॰ तृ॰
प्रयास्यति शिवावक्त्रेंदुसंदर्शनाद्धास्यंतेव विलोलसुंदरदलाः कोतार विंदान्यपि ॥ ६२ ॥ अत्युन्मत्त अ॰ २९
चकोरराजिरधुना दूरं प्रयास्यत्ययं क्रीडारत्नगिरिः प्रयास्यति शिवावक्षोजसंवीक्षणात् ॥ मीनाः सं
तु जलेषु संततमुमीलन्नेत्रमीनप्रभाप्रादुर्भावविलोकनेन सकृदप्यत्यद्भुता सा शिवा ॥ ६३ ॥ यद्यद्या
स्यति तत्प्रयातु नमे तेरस्ति कार्यं यदा गौरीलोचनगोचरा मम तदा सा कं तया क्रीडनेन ॥ ब्रह्मांड
प्रलया भवंतु बहवः कल्पोपि तत्संगमे स्यादेव क्षणकल्प इत्यनुदिनं तत्सं निधानं धनं ॥ ६४ ॥ सृष्टिः
केयमभूदपूर्वविभवा गौरीस्वरूपा पुरा तु ल्यं नैव मयामि तं वसुमणिश्रेष्ठं भवानीपरं ॥ नारीरत्नमिति श्रु
तं नयनयोरानंददानाय सा ज्ञानानंदघनासुधाघनघना ज्ञाता भवानी मया ॥ ६५ ॥ ॥ इति श्री शिव
रहस्ये तृतीयांशे हराख्ये अंशे गौरी आगमनं नाम एकोनविंशोध्यायः ॥ १९ ॥ ॥ श्री काशी विश्वेश्वरार्प
णमस्तु ॥ ॥ व्यास उवाच ॥ ॥ इत्युदीर्य महादेवः सानंदे साति सत्वरं ॥ विमानरत्नच्छायाभिः
समाक्रांतो महेश्वरः ॥ जयध्वनिश्रुतस्तेन तूर्यध्वनिनिरंतरं ॥ दुंदुभिध्वनयः पश्चाच्छुश्रुलास्तेन मनोहराः ॥ २ ॥

गौरीशरीरकांतिश्च तड़िल्कूदनि भातदा॥ दृष्टा तेन महेशेन पुष्टस्तेनाभवद्द्विजाः॥ जयध्वनीनाम भवत् यस्तु कोलाहलस्तदा॥ससुधासन्निभो जातः तदा श्रवण मंगलं॥५॥ ततः परं नमे किंचिदुर्लभं शिवा दृष्टा सौंदर्य निधिरादरात्॥ महादेवेन तेनायं परमानंद मासवान्॥ यच्चिंतितं फलं पूर्वं तत्प्राप्त मधुना मया॥अतः परं नमे किंचिदुर्लभं वस्तु दृश्यते॥६॥नवनीत मिव प्राप्य बालकः सततदाहरः॥तुष्टः पुष्टः प्रहृष्टश्च दृष्ट्वा तां गिरिकन्यकां॥७॥ अनन्तः परमान्नानि यथास्यं प्राप्य तुष्यति॥तथा तुष्टो महादेवो दृष्ट्वा गौरीं मनोहरां॥८॥ अपुत्रः पुत्रमासाद्य यथा तुष्टो भवेत्तथा॥तुष्टो गौरीं विलोक्या शुकृशः पूर्वं सतां विना॥९॥ माकंदकंदं संप्राप्य पिकः पुष्टो यथा तथा॥गौरीं दृष्ट्वा महादेवः तुष्ट एव प्रतिक्षणं॥१०॥ प्राज्यं राज्यं समासाद्य धनहीनो यथा नरः॥तुष्टस्त [illegible] गिरींद्रजां॥११॥ ततः परं प्राप गिरींद्रकन्या धन्या पुरारातिपुरः प्रकारं॥ ततः परं हर्षमनोज्ञ वृष्टिः सुपुष्पवृष्ट्या सहसं बभूव॥१२॥ अपारतूर्य ध्वनयः प्रवृत्ताः सुदुंदुभिध्वान विधानयुक्ताः॥स शंखनादाश्च सगाननादाः जयध्वनीनाम पिवृष्टिरासीत्॥१३॥ तदानवं सृष्टमभूत पूर्वं समंदिरं

३६८

वृ

त्तन्नगारं शिवेन ॥ जय प्रदेशो भनदं मनोज्ञं सर्वत्र सर्वोत्सवसागराढ्यं ॥१४॥ अनंतनानाविधरत्न-
मालासुतोरणागारवरावृतानि ॥ स्थलानि सर्वाणि चकार शंभुर्लीलाविनोदेन दयानिधानः ॥१५॥
रत्नद्वारविशेषकोटिशिखरद्वाराणि ता त्वीशाने गौरी रत्नविमानरत्नविलयासंतोषवर्षायुता ॥
सानीराजनकोटिकूटघटिता नाट्यानि दृष्ट्वा मुहुस्तस्मादप्यवतीर्य शंकरगृहद्वारे स्थिता सा
क्षणं ॥१६॥ सा तस्मिन्समये शिवं हृदि मुहुः स्मृत्वा पुनः सस्मिता धृत्वा सा विजयाकरं सुरुचि
रा गौरी शिवालोकने ॥ लज्जानम्रमुखी विहारसदनं मंदं मुदा प्राप सा सानंदा शिववीक्षिता मु
हुरुमा धन्येति मन्ये ति च ॥१७॥ सानंदं मुहुरिंदुमौलिवदनं स्मेरांकितं सस्मिता दृष्ट्वा संनिधि
मेत्य शैलतनया तृतान सा सर्वथा ॥ तां दृष्ट्वा विजया ययौ च सजया गेहांतरं सा तता गौरी शं
करसुंदरांकमगमद्विद्युल्लतेवांबुदं ॥१८॥ गाढालिंगनचुंबनाधररसास्वादानुमोदाद्भुतानं
दांभोधितरंगसंगललितस्वस्वांगरागस्थले ॥ लीलाकाप्यभवद्ययानपुनरप्यगे भवेदूनता
तत्धारासुधया प्रतिक्षणमभूदानंदवृद्धिस्तयोः ॥१९॥ कंदामंदमरंदमंदिररसालिंदालिमाला

कुलाशय्या शंकर चित्तवृत्तिरचिता ताराकुलव्याकुला ॥ शुद्धा शुद्ध सुधांशु मंडलकुलाव्याप्ता शिवा संगमे शंगायातिमुदंत तान परमानंदाय सालीलया ॥२०॥ कार्याकार्य विचार दूरहृदया मत्युं जयस्य प्रियासंगा लिंगनतत्परा मुहुरि हानंगव्यथा मास्थिति ॥ ग्रीष्मार्त्त स्मृषितो जहाति सलिलंप्राप्यामलंकोमलं कस्तक्षन्न जहाति सापि गिरिजा शंगांग संगं पुनः ॥२१॥ लोके यन्मधुरं ततोपिमधुरं हारं विहारं परं मेने सा गिरिराजराज तनया सौभाग्य संघालया ॥ दुःखानि प्रलयं प्रयांतु विलयं काशीं प्रयात प्रियं दूरं यांतु विपत्कुलान्यपि मुहुः शंगांग संगादिति ॥२२॥ शंगालिंगनतत्परा गिरिसुता जातायदासातदाहारास्तुत्रुटितास्तथांगद युगं भग्नं चकांची तथा ॥ भग्नाकंकण मंडलं च कणशो भग्नं तदालिंगनात्पुष्टा तत्तनुरुष्ट मूर्त्ति महिमा लीला विलासैरलं ॥२३॥ क्रीडा मंडित गंडमंडललसत्कस्तूरिकामंडनं कर्पूरागरुकेसरादि रुचिरश्रीखंड खंड द्रवैः ॥ साकं निर्गलमेव सलस ... स्वेदांबुधारान्वितैः ॥ ... भीसरसि प्रविश्य रुचिरं तज्जंघबंधान्वितैः ॥२४॥ चिरहार विहारसारभारप्रचुरानंग विलास लालसायाः ॥ विधिकल्प सहस्र मप्यनल्पं क्षणकल्पं समभूद्गिरींद्र जायाः ॥२५॥

अमृता मृत मिंदु मौलि लीला निलयं कायमनामयं ममेदं ॥ अनुमेय महोदयं स्वमाया विलयोपायत -हरा॰ल्ट॰
या शिवापि मेने ॥२६॥ बहुकल्प वियोग जाततनोः तनुता सा तनुता मवा परूपं ॥ अनुरूप मवापते अ॰२०
नरेजे गिरिजा श्री गिरिनाथ कांक शय्यां ॥ २७॥ अमंद परमानंद कल्लोल कलितो शिवो ॥ स्वशिवा
कारमालोक्य तुष्टौ पुष्टौ पुनः पुनः ॥२८॥ मंदस्मेरानुसंधान निधान मधुना परं ॥ प्रलब्ध मिलितौ तौ
वदन्योन्यानंद संवृतो ॥२९॥ ततः परं परतरे विहार रस सागरे ॥ गौरीहरौ परां क्रीडां सव्रीडौ चक्रतुर्मु
शं ॥३०॥ एवं क्रीडा विनोदेन नीताः कल्पाः सहस्रशः ॥ ततः परं शंकरो पि सस्मारा नंद मंडपं ॥३१॥
रत्नैनेकैनर चितं शंख योजन मुन्नतं ॥ तदनंत महा भोगं ताव द्योजन मायतं ॥ ३२॥ तदनंतु सुधार
श्मि मंडलैः परिवेष्टितं ॥ विद्युत्कूट गणा क्रांतं तारा मंडल मंडितं ॥ ३३॥ कुंद मंदार राजीव राजीसो
पानरंजितं ॥ तत्सुधा कुल्य कल्लोल मालिकाल लितकूलं ॥ ३४ ॥ चंद्र मंडल पर्यंत शिरः पल्यं
कसंवृतं ॥ मंदार कुसुमा सार मरंद रजसावृतं ॥ ३५॥ केतकी वात पोतेन वीतं पूतं विभूतिभिः ॥ अ
नुभूत महानंद संदोह समलंकृतं ॥ ३६ ॥ तत्काल काल सल्लाप लीला लोल सुधा मयं ॥ अनामय विहा

राणां आलयत्वेन संश्रुतं ॥३७॥ तस्मिन्नु मासहायत्व मुमयामय्य नामये ॥ संपादनीय मित्येव ययौ मृत्युंजयः स्वयं ॥३८॥ तत्र सिंहासनं दृष्टुं कोटियो जन मुन्नतं ॥ तावदायत मुत्तुंग रत्न भृंगवि राजितं ॥३९॥ तद्वनीभूत मंदार मकरंद विराजितं ॥ तदनंत मणिछाया छाया छादित मुत्तमं ॥४०॥ रुद्र वीणाकोटिगानध्वनि शोभन साधनं ॥ तत्फुल्लकुंद मंदार शिरीषकुसुमछदेः ॥४१॥ आछादितं विनोदानां आस्पदं सदनं प्रभोः ॥ शंभो र्मनोहरं दष्ट्वा हृष्टा प्राह शिवा शिवं ॥४२॥ केयं सृष्टि र्महादेव नदृष्टा नापि संश्रुता ॥ केन तुल्य मिदं लोके किमितोप्यधिकं भवेत् ॥४३॥ ईदृशी रचना शंभो न केना प्यभूत्प्रभो ॥ अचिंतनीयो महिमा तवायम मरप्रभो ॥४४॥ नरवर प्रसरा भावे शिवनामानुगा यन ॥ अनंत रुद्रवीणासु श्रूयते तानरं जितं ॥४५॥ मनोहर घनी भूत रत्नछाया विराजितः ॥ प्रासादः कोयमेतस्मिन्मनो वैभव भावितः ॥४६॥ इंदु मंडल मंचस्य निर्माणं अतिशोभनं ॥ तदिदं कमनीयेन शयनीयेन रंजितं ॥४७॥ नेत्रपात्र मिदं चित्रं त्रिनेत्रा त्रास्तु मे स्थितिः ॥ कल्पमात्र मितस्तावदितो गमन मेवन ॥४८॥ इत्युक्तात्त त्तदानंद संदोहानंद मंदया ॥ मकरंद श्रिया युक्तं

 प्रापांबासशिवा शिवं ॥४९॥ तदृष्ट्वातत्रा विश्रांता भ्रांतिं विस्मृत्य शैलजा ॥ आनंदरसधाराभिर -हरा:॥
 पाराभिर्बभौ द्विजाः॥५०॥ आनंदरस मग्नासा विज्ञान घनसाम्यं ॥ गौरी शंकरमालिंग्य नसस्मा
रस्ववर्त्तनं ॥५१॥ क्वचिच्चैलंक्वचिच्चोलीर्धम्मिल्लं च क्वचित्क्वचित् ॥ रस सागर मग्नायाः
क्वचिद्बाहुलता दिकं ॥५२॥ एवं क्रीडारसेनैव शिवाभ्यां कल्पकोट्यः ॥ नीताःक्षणार्धकल्पास्ते
सर्वे पि शिवयोःपरं ॥५३॥ ततःपरंततो प्युच्चैः तुल्येकल्पित मंडने ॥ विहार निरता गौरी शंकरेण सहा
दरात् ॥५४॥ एवंकल्पेष्वनंतेषु दिव्य मंडल मंडिता ॥ विहार निरता गौरी विरतानकदापिच ॥
५५॥ प्रतिक्षणं विचित्राणि सारत्ना भरणान्यपि ॥ स्वतः समागतान्यंबा साजहौ शिवलीलया
५६॥ तुंगशृंगाग संगेन मदं गमपि मंगलं ॥ तनोती तिनहारेषु चकार रतिमंबिका ॥५७॥ शर्व
सर्वांग संगस्याप्यंतरा यो भवेद्यं ॥ हारोमनोहरो पीतिहारं दूरी चकारसा ॥५८॥ सागौरी कुच
मंडलाय शिखरोत्तुंगाय हारां ददौ शृंगार द्रवपूरिताय रुचिराकाराय धीरायच ॥ हारापार
जयाय चूचुकलिसन्मुद्राय रुद्रप्रिया हार द्रावण धारणा यव लिकां निश्रेणिकाया दरात् ॥५९॥

सापश्चाद्दृढगंडमंडलतलेकस्तूरिकामंडनं नासायां नवमौक्तिकं तदधरे तांबूलरागं मुहुः ॥ ता
टंकं श्रावणाय फालफलके मुक्तामयं मंडनं सीमंतेपि नखप्रचाररुचिरे सारत्नमालां ददौ ॥ ६० ॥
ताराकारस्थूलमुक्ताफलश्रीर्गौरीनासावासमासाद्य सद्यः ॥ अद्य प्राप्तं पद्मरागप्रभावं केनेत्येवं
त्यादरेणाधरेण ॥ सारत्नांगमदंगदोचितमुमा दृष्ट्वा ददौ कंकणे नानारत्नविराजिते करमुखे रत्नां
गुलीयान्यपि ॥ ६१ ॥ सादातुं विरलाननखप्रातिमया छन्नासुतास्वंगुलीष्वानीलाभरणानि कान्यपित
३६७ थायोम्या निरत्नान्यपि ॥ साकांचीमतिसूक्ष्ममध्यविलसद्रोम्णो र्चिताकुंचितां कांचीनेत्यपतिभार
भीरुहृदया सातद्द्वयां कुर्वती ॥ ६२ ॥ मध्ये रत्नमणिप्रभाभिरभितो बद्धं चकारांबिकातङ्कं कापनया
यसापि जघने तावद्दुकूलं दधौ ॥ यादेविद्रुमपद्मरागरुचिरे लाक्षारसासेचनं सागौरीनचकारसारु
णकरव्यापारभंगोद्यते ॥ ६३ ॥ धंम्मिल्ले कृतमेव बंधनमिदं किं विश्लथं निर्गतं मन्येनंगमदापहा
रनिरते युक्तं किमस्येत्विवा ॥ पश्चाच्चंदनकर्दमेन सहितं कस्तूरिकाकर्दमं दलांगेषु विलेपनौ
षधधियाजन्यक्षताक्षेपकं ॥ ६४ ॥ चोलीं साकुचयोः सुमेरुविजयप्रारब्धयोस्तज्जयः प्रारंभेपिजयः

पुनः पुनरिदं भूयादितीयं शिवा ॥ गौरीशंकर चारु धीरकरजव्यापार चिंन्हां कितां शृंगालिंगनमं-
गलै रभिनवैः संपूर्णकामोदया ॥६५॥ सा सर्वा भरणान्विता विरुरुचे दिव्यांगरागां कितं शृंगां गं समु
पेत्य मंगलतमं शृंगारधाराकरं ॥ ॥ इति श्री शिवरहस्ये हराख्ये तृतीयांशे गौरी शिवमेलनं
नाम विंशोध्यायः ॥२०॥ ॥ श्रीकाशी विश्वेश्वरार्पणमस्तु ॥ ॥व्यास उवाच ॥ ॥ ततः स्मर
हरापार शृंगाररस संयुता ॥ गौरी कुमारं सस्मार शंकरो लोकशंकरः ॥१॥ ततः समागतः स्कंदः सा
नंदं सुंदराननं ॥ त्रिलोचनं च संवीक्ष्य प्रणतो दंडवद्भुवि ॥ ततः कृतांजलिर्भूत्वा शिवौ तुष्टाव षण्मुखः
॥ गणेशेन सहानंद सागरावति सादरं ॥ ३॥ नमो नमस्ते गिरिशाय तुभ्यं नमो नमस्ते गिरिकन्यकायै ॥
नमो नमस्ते वृषभध्वजाय सिंहध्वजायै च नमो नमस्ते ॥४॥ नमो नमो भूतिविभूषणाय नमो नम
श्चंदन भूषितायै ॥ नमो नमः फालविलोचनाय नमो नमः पद्मविलोचनायै ॥५॥ त्रिशूलहस्ताय
नमो नमस्ते नमो नमः पद्मलसत्करायै ॥ नमो नमो दिग्वसनाय तुभ्यं चित्रांबरायै च नमो नमस्ते ॥६॥
चंद्रावतंसाय नमो नमस्ते नमोस्तु चंद्राभरणान्वितायै ॥ नमः सुवर्णांकितकुंडलाय नमोस्तु रत्नो

ज्वलकुंडलायै ॥७॥ नमोस्तु ताराग्रहमालिकाय नमोस्तु हारान्वितकंधरायै ॥ सुवर्णवर्णाय नमो न नमस्ते नमः सुवर्णाधिकसुंदरायै ॥८॥ नमो नमस्ते त्रिपुरांतकाय नमो नमस्ते मधुनाशकायै ॥ नमो नमस्त्वंधकसूदनाय नमो नमः कैटभसूदनायै ॥९॥ नमो नमो ज्ञानमयाय नित्यं नमश्चिदानंदघनप्रदायै ॥ नमो जटाजूटविराजिताय नमोस्तु वेणीफणिमंडितायै ॥१०॥ नमोस्तु कर्पूररसाकराय नमो लसत्कुंकुममंडितायै ॥ नमोस्तु बिल्वाम्रदलार्चिताय नमोस्तु कुंदप्रसवार्चितायै ॥११॥ नमो जगन्मंडलाय नमो मणिभ्राजितमंडनायै ॥ नमोस्तु वेदांतगणस्तुताय नमोस्तु विश्वेश्वरसंस्तुतायै ॥१२॥ नमोस्तु सर्वामरपूजिताय नमोस्तु पद्मार्चितपादुकायै ॥ नमः शिवालिंगितविग्रहाय नमः शिवालिंगितविग्रहायै ॥१३॥ नमो नमस्ते जनकाय नित्यं नमो नमस्ते गिरिजे जनन्यै ॥ नमो नमो नंगहराय नित्यं नमो नमो नंगविवर्धकायै ॥१४॥ नमो नमस्तेस्तु विषाशनाय नमो नमस्तेस्तु सुधाशनायै ॥ नमो नमस्तेस्तु महेश्वराय श्रीकुंदले देवि नमो नमस्ते ॥१५॥ इति स्तुत्वा महादेवं अंबामानंदकंदलां ॥ लंबोदरः कुमारो पिताभ्यामालिंगितो मुहुः ॥१६॥ वरं वृणु कुमाराद्य लंबोदर त्वमेप्सितं ॥ इत्युक्ते तद्वचः

श्रुत्वा ययाचे सवरं परं ॥१७॥ त्वत्पादांबुरुहार्चने मतिरुमाकांतास्तु मे सर्वथा त्वंनामस्मरणेपि मे शि-हरा-स्तु
व शिवे पंचाक्षरावर्त्तने ॥ लिंगे मंगलदायके पि भसिते रुद्राक्षमालास्वपि स्वामिन्धांकर सेवने पि स
ततंहारो पहारेष्वपि ॥१८॥ सांगैरध्ययनादिभिर्हर तपः संचैर्हियागैस्तथा योगैर्वमुलतुलादिदान
निकरैर्भूमंडलावर्तनैः ॥ अन्यैरप्यलमेव धर्मनिचयै रायास संपादकैर्भोमालानलकाल कालकलये त्वां
तेनुवेलं पदं ॥१९॥ मोगांगानि विनश्वराणि भगवन्प्राज्यानि राज्यान्यपि श्री मृत्युंजय सर्वथापि नि
धयः सापाय शंकाश्रयाः ॥ शंकातंक निवारकं निरधिकं कालांतकं केवलं त्वामन्येत तएव सात्वयि स
दा भक्तिर्ममास्तु स्थिरा ॥२०॥ गो क्षीरे घृत शर्करादि मधुर द्रव्ये तु जिह्वा यथा लोला तद्वदुमापते
शिव महादेवेति नाम स्मृते ॥ लोला संततमस्तु चित्तमपि मे त्वत्पाद पद्मे मुदा ॥ मंगलं समुपैत्यतिष्ठ
तुवरः सोयं वराणां वरः ॥२१॥ प्राप्य प्रोषित भर्तृके वरमणं भानुं यथा पद्मिनी शीतांशुं कुमुदं सुधामिव नरो
राज्यानि राजाधमः ॥ सुश्रोत्रं बधिरोंधकः सुनयनं पंगुः पदक्षेपणं वाणीं मूक इवांतकांतकपदं पुष्टं
प्रहृष्टमनः ॥२२॥ प्राप्येवोपर भूतले जडमतिः श्रांतो वसंतं पिको वनसंलालसं ॥२३॥ मच्चित्तमकरंद

पानानिरतो भृंगो मरंदं यथा कामी सुंदरकामिनी मिव धनं निःस्वो यथा बालकः ॥ स्तन्यं मेघमिवां कुरं शिव तथा त्वन्नाम संकीर्तनं लब्ध्वा तुष्यतु पुष्टमस्तु सततं याचेन चान्यान्वरान् ॥ २४ ॥ शंभो त्व च्चरणारविंदमधुना दृष्टं पुनर्मेकदा देयं दर्शनमिंदुशेखरदयासिंधो यदाने क्षितं ॥ त्वत्पादांबुजमादरे णनतदा ग्राह्यं जलं वाकथं मामाज्ञापय दर्शनाय भगवन् सायं प्रगेवा प्रभो ॥ २५ ॥ त्वत्तस्मादधिको वरो वरदमे नापेक्षितः सर्वथा शर्वायं शपथः शिवा चरणयोः त्वत्पादपद्मे पिमे ॥ अन्यत्किं मदपेक्षि तं शिवपदांभोजे भजे संततं तन्मात्रं मदपेक्षितं हृदयमप्यत्रान्वहं सादरं ॥ २६ ॥ इत्याकर्ण्य वचस्तस्य तमालिंग्य मुहुर्मुहुः ॥ प्रीतिर्यथा तथैवास्तु त्वदन्यः कः प्रियो मम ॥ २७ ॥ गणेश्वरकुमाराभ्यां शिव यापि सहान्वहं ॥ योगो स्त्वि ति रुचिस्तावदन्यत्र प्रीति रेवना ॥ २८ ॥ इत्युक्त्वा पुनरालिंग्य कु मारगणपौ शिवः ॥ वसनानि विचित्राणि ददावाभरणान्यपि ॥ २९ ॥ ततः परमुवाचेदं वचनं गिरि जापतिः ॥ वस्त्राद्यैर्नंदिकेशादीन्तोषयस्वेति सादरं ॥ ३० ॥ ततः प्रणम्य तं सांबं निर्गतो गणपान्वि तः ॥ रत्नक्षाराण्य पारा णि तौ त्वा विस्मय संयुतः ॥ ३१ ॥ ततः परं मणिश्रेष्ठरंजिते सिंजिताश्रिये ॥

शिवरहस्य
७७

मंदिरे सुंदरे धीरः कुमारः सुकरः स्थिरः ॥ ३२ ॥ ततः समागताः सर्वे नंदिकेश मुखा गणाः ॥ प्रणताः - हरा . लृ.
प्रस्तुवं - नस्तं स्तुतितत्परमादरात् ॥ ३३ ॥ ततः सस्मार तरसा दिव्याभरण पर्वतान् ॥ दुकूल पर्वतान अ. २२
न्यान् तदा दिव्यान्नपर्वतान् ॥ ३४ ॥ तदपेक्षानुसारेण ददौ तेभ्यो यथा क्रमं ॥ तान् कोटिशः प्रहृष्टास्ते
तुष्टुवुर्गणनायकाः ॥ ३५ ॥ ततः परं मंदिराणि ददौ तेभ्यः तदिच्छया ॥ चित्रनिर्माणरम्याणि हर्म्या
ण्यपि स कोटिशः ॥ ततः परं गणाः सर्वे शर्वध्यानपरायणाः ॥ स्वस्व मंदिरमासाद्य सद्यः संतुष्ट
मानसाः ॥ ३७ ॥ ततः परं कुमारोपि संयुतो देवसेनया ॥ विचार चतुरो धीरो रम्यं हर्म्यमुपाश्रितः ॥ ३८ ॥
गणेश्वरोपि स्वरया तयासरसया सह ॥ दिव्यं प्रासादमासाद्य हृद्याचाररतो मुदा ॥ ३९ ॥ ततः परं ज
यामंबा विजयामपि सादरं ॥ आहूयाभरणादीनि ददौ ताभ्यां तु कोटिशः ॥ ४० ॥ पश्चान्नाव्यांगनाः
सर्वाः समाहूय शिवा तदा ॥ ताभ्योप्याभरणादीनि ददौ दिव्यानि सादरं ॥ ४१ ॥ ततः परं महादेवः
पुष्पप्रासादमुन्नतं ॥ सहासमाद शिवया परया हृद्यमुत्तमं ॥ ४२ ॥ तत्र लीलाकल्पितानि दिव्या
न्नानि सहांबया ॥ भुक्त्वा यथेष्टमास्वाद्य फलानि मुदितः शिवः ॥ ४३ ॥ ततः परं केतकीनां गंध

माघ्रा य शंकरः॥वालानीतं शिवा माह ग्राह्यो गंधस्त्वयेत्ययं॥४४॥ततः परं मुदा चांबा गंधान्ना
नाविधानपि॥त्वदुपाघ्रातशेषान्मे प्रयच्छे ति मुहुर्मुहुः॥४५॥ततः परं रुद्रवीणां आदाय भववल्लभा॥
गानविद्यास्वरूपा सा जाता गानरता शिवा॥४६॥ शिव शिव हर शंभो भर्ग भी मस्म रारे त्रिपुरहर
यमारे कालकूटांधकारे॥परशिव परमात्मन् रुद्रवीणा प्रवीणा वदति नख मुखा ग्राघात भीतिं हरे
ति॥४७॥सृष्टि रेषा महादेव भूलपूर्वा न सर्वथा॥बीज मस्ति किमत्रेति बभाषे वचनं शिवा॥४८॥
॥शिव उवाच॥ ॥पुरा गंधर्वनगरे शिवलिंग मनोहरे॥गंधर्वराजनारीणां विहार निकराकरे
॥४९॥हूहूनाम्ना प्रसिद्धो भूद्गंधर्वगणनायकः॥स सर्वभाग्य संपन्नो वदान्यश्च विशेषतः॥५०॥
स पुष्पकं समारुह्य चचार भुवनत्रये॥कुत्र कोवा विशेषोस्ति किं प्रियं कस्य वा भुवि॥५१॥ किंवाम
नोहरं लोके हराराधन साधनं॥एवं विचार्य तरसा जगाम गिरिकंधरं॥५२॥ तत्र कोपि महावीरः शं
करः करुणाकरः॥शंकराराधनोद्युक्तस्तं दृष्ट्वा प्रणतो पि सः॥५३॥ततस्तं विनयेनैव हूहू गंधर्वस
त्तमः॥किमत्र शंभव श्रेष्ठ स्थीयते गिरिगव्हरे॥५४॥ सौंदर्यवीर्य संपन्नः सौभाग्यानिलयोधुना॥

किंकर्त्तुमुद्यतः किंते दुर्लभं भुवनत्रये ॥५४॥ इतितद्वचनं श्रुत्वा सोपितं प्राह सस्मितः ॥ अत्याश्चर्यकरां वाणीं शृणु कर्ण विभूषणं ॥५५॥ अत्रास्ति लिंगमुत्कृष्टं इदं सर्वेष्टदायकं ॥ एतदाराधनेनैव सिद्धाः सिद्धिंगताःपुरा ॥५७॥ सिद्धलिंगमितिख्यातं सिद्धिसत्वेन निश्चितं ॥ अत्रपूर्वमभूद्विप्रो दरिद्रोव्याधिपीडितः ॥५८॥ कुष्टीव्रणपरिक्रांतः कुनखीशावदंतकः ॥ कुब्जोविकर्णः काणश्चस च्छिद्रमलिनांबरः ॥५९॥ तेन काणेनभुक्तानि दुःखानि विविधान्यपि ॥ सदैव योगादेतस्य लिंगस्य निकटे स्थितः ॥६०॥ एतल्लिंगार्चनं कृत्वा कोपि किंनरपुंगवः ॥ ददौ नैवेद्यमुत्कृष्टं परमान्नंमनोहरं ॥६१॥ विशाले कदलीपर्णे शिवनैवेद्यमादरात् ॥ निधाय शर्करा युक्तं घृतधारासमन्वितं ॥६२॥ दत्वा शिवाय नैवेद्यं पूजांते शंकरं स्मरन् ॥ विशेषं नु भुजेतेन पात्रं त्यक्तं तदंतिके ॥६३॥ ततस्तेन तदाघ्राय सुगंधसहितं मृदु ॥ भक्षितं पर्णमेवैतत्तूर्णं तु क्षुधया तदा ॥६४॥ तदातद्द्क्षणादेव प्राप रूपमनुत्तमं ॥ वृद्धोपि स युवा जातः तदानीमति सुंदरः ॥६५॥ ततः स विस्मयाविष्टो हृष्टः पुष्टो मुहुर्मुहुः ॥ कस्यायं महिमा किंवा मम पुण्यं पुरातनं ॥६६॥ एवमुक्त्वा स्थिते तस्मिन्पुनर्नैवेद्यमादरात् ॥

ओ

तेनानीतं महेशाय येनानीतं पुरा मुदा ॥६७॥ ततो निवेद्य नैवेद्यं सिद्धेशाय विशेषतः ॥ भुक्त्वा तथैव तत्सर्वं तत्र तेन निपातितं ॥६८॥ ततः परं गते तस्मिन् तत्पर्णं तूर्णमेव सः ॥ आदाय परमानंदमवाप धनिको यथा ॥६९॥ ततः परं तदा घ्राय वारंवारं स सादरं ॥ महिमा को यमस्येति विचारनिरतस्तदा ॥७०॥ तदानीमागतः शैवः कश्चिन्नामानि संवदन् ॥ शिव शंकर शर्वेति मुहुर्मुहुरुदारधीः ॥७१॥ आगत्य बिल्वपत्राद्यैः शिवलिंगसमर्चनं ॥ कृत्वा फलेन दिव्येन पूजयामास शंकरं ॥७२॥ ततस्तत्फलमादाय स नैवेद्यधिया मुदा ॥ भक्षयित्वा परं रेजे जितसर्वमनोरथः ॥७३॥ तं प्रणम्य ततो विप्रः सादरं भक्तिपूर्वकं ॥ अतिविस्मयमापन्नः प्राह शैवं कृतांजलिः ॥७४॥ ॥विप्र उवाच॥ ॥शैवेंद्र रूपं पूर्वं ते यदभूत्तन्मनोहरं ॥ ततः सहस्रगुणितं रूपमासीदिहाधुना ॥७५॥ किमस्य कारणं विद्वन् तत्त्वज्ञ वद सादरं ॥ कस्यायं महिमा किंवा सामर्थ्यं कस्य किं वद ॥७६॥ इति तद्वचनं श्रुत्वा शंकरस्तमुवाच सः ॥ साधु पृष्टं त्वया विप्र शृणु तत्तावदुच्यते ॥७७॥ शिवनैवेद्यशेषस्य भुक्तस्य परया मुदा ॥ सामर्थ्यमेतदन्यच्च सामर्थ्यं श्रुतिषु श्रुतं ॥७८॥

यो भुंक्ते शिवनैवेद्यं सत्यं वदति भाग्यवान् ॥ सुंदरोपि भवत्येव सर्वलक्षणसंयुतः ॥७९॥ शिवनैवेद्यकोट्यंशमपि भाग्यवान् ॥ प्राप्नोत्यन्यस्यकस्यापि सत्यं वदति दुर्लभः ॥८०॥ इंदिरा प्रापसौंदर्यं भाग्यमप्यतुलं द्विजाः ॥ शिवनैवेद्यपात्रस्य संगमेनापि केवलं ॥८१॥ पद्मा भिल्लसती पूर्वमरण्यनिलया सदा ॥ सा भर्त्रा सह काष्ठानि क्रययानयति स्वयं ॥८२॥ तदेव जीवनं तस्याः तद्भर्तुरपि सर्वदा ॥ सा कृशा जरया नित्यं पलितापि प्रतिक्षणं ॥८३॥ सा कदाचिद्वने स्थित्वा काष्ठान्यपि तृणान्यपि ॥ बध्वा वोढुमशक्तापि मूर्ध्नाधाययये तदा ॥८४॥ तत्र कश्चिन्महाशैवो बिल्वपत्रादिभिः शिवं ॥ संपूज्य पांथः कृत्वान्नं ददौ शर्वाय सादरं ॥८५॥ तन्नैवेद्यं स्वयं भुक्त्वा निःशेषमपि सादरं ॥ उच्छिष्टपात्रमन्यत्र त्यक्तं तेन महात्मना ॥८६॥ तदेव पात्रं वातेन नीतं भिल्लांगनाकरे ॥ पपात सा ततः पश्चाच्चक्रे देहविसर्जनं ॥८७॥ ततः परं भटैर्नीता दुर्घटैश्च यमस्य सा ॥ पालिता कालनिकटे तैर्दूतैरति निष्ठुरैः ॥८८॥ ततः परं यमः प्राह चित्रगुप्त मियं क्व वा ॥ स्थित्वा किं वा कृतं पापं अनया पुण्यमुत्तमं ॥८९॥ इत्युक्तस्त मुवाचेयं भिल्लनारीयमाधुना ॥ वने मृता कृशा दीना तृषार्त्ता क्षुधिता भृशं ॥९०॥

हरा० ल० अ० २१

अनयानकृतंपुण्यंमरणात्पूर्वमादरात्॥ हिंसापराप्रयत्नेनपरपीडनतत्परा॥९१॥ जालेनपक्षिजा
लानिसमादाययथेच्छया॥ छित्वाशस्त्रेणबहुधातत्पाकंचकरोतिसा॥९२॥ तन्मांसमश्नंतस्याऽसुरा
पानरतापिसा॥ सेयंपुण्यविहीनैवंवनेचरतिसर्वदा॥९३॥ नदृष्टमनयाक्वापिशिवलिंगमनुत्तमं॥
दीपमालापिविमलानदृष्टाशिवमंदिरे॥९४॥ नानयाशंभवोदृष्टःलीलामानुषविग्रहः॥संमार्जनं
चनकृतंतयाशंकरमंदिरे॥९५॥ शिवांगणरजःपुंजोनापिदूरीकृतस्तया॥नदृष्टाशिवपूजापि
३२५ सर्वमस्याःकदापिच॥९६॥ नज्ञातःशिवमार्गोपिभोगस्वर्गापवर्गदः॥नबिल्वतरुसेवापिकृता
भक्तिपुरःसरं॥९७॥ कैंष्टविनाशिनी ॥नभस्मनाललाटंवापूतमस्याःकदापिच॥रुद्राक्षवा
तोपितयानज्ञातासर्वथायम॥९८॥ शिवाभिषेकपानीयंनपीतंचतयायम॥ शिवनैवेद्यगंधोपि
नाघ्रातोदुष्टयानया॥९९॥ नमहादेवनामापिश्रुतंसर्वाघनाशकं॥ शिवतीर्थाटनोद्योगस्तयान
कृतस्वहि॥१००॥ शिवार्चनंनजानातिनश्रुतंचशिवार्चनं॥ शिवोत्सवोनदृष्टोपिनश्रुतोपि
कदाचन॥१०१॥ तयाशिवपुरावासोनकृतोपिकदाचन॥ शिवकुंडानिदृष्टानिनानयाप्रीतिपूर्वकं॥२॥

शरीरत्यागसमये शैवो क्लिष्टकृदान्वितः॥ जातं तत्पुण्यमेतस्याः सर्वाभीष्टप्रदायकं॥३॥ इत्युक्तं तद्धरस्य

वचः श्रुत्वा प्रहृष्टः स्वरयायमः॥ स्पृष्ट्वा तदंगं प्रणतः कृत्वा तस्याः प्रदक्षिणं॥ ततः परं परं रूपं प्राप

सा तत्करान्वयात्॥ दिव्यमाल्यांबरधरां दिव्याभरणभूषितां॥५॥ ततस्तां स्थापयामास रत्नसिंहास

नेयमः॥ पूजयामास पुष्पाद्यैस्ततः स्वर्गं जगाम सा॥६॥ किं वर्णनीयमधुना शिवपूजकानां सामर्थ्य

मर्थिजनदुःखविनाशकानां॥ यद्भुक्तपात्रमपि गात्रविशेषयोगैः स्वर्गं तनोति सुखसंततिमातनो

ति॥१०७॥ ॥इति श्रीशिवरहस्ये हराख्ये तृतीयांशे शिवगौरीसंवादो नाम एकविंशोध्यायः॥

॥२१॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीशिव उवाच॥ ॥ इति शैववचः श्रुत्वा स वि

प्रो हृष्टमानसः॥ पुनर्भिल्लांगनावार्तां पप्रच्छ किमभूदिति॥१॥ ॥श्रीशैव उवाच॥ ॥

स्वर्गलोकमनुप्राप्य भुक्त्वा भोगाननेकधा॥ ब्रह्मलोकमवाप्याथ ब्रह्मणा सापि पूजिता॥२॥

ततः परं ब्रह्मलोके सा सिंहासनसंस्थिता॥ ब्रह्मणा पूजिता नित्यं सनकाद्यैश्च सादरं॥३॥ ततः

कदाचिद्यत्नेन ब्रह्मलोकनिवासिभिः॥ पृष्टः केयमिति प्रीत्या सादरं स चतुर्मुखः॥ ॥ब्रह्मोवाच॥

किंवक्तव्य महो धन्यं शंभवानां महात्मनां ॥ स्वरूपं वेद संवेद्यं कथं चिदिति मन्महे ॥ ५ ॥ वेदैरपि
न विज्ञातं यद्रूपं तत्कथं मया ॥ वक्तव्यं तत्र मे बुद्धिः सर्वथाप्यतिकुंठिता ॥ ६ ॥ वैकुंठेनापि न ज्ञातं
शंभवानां स्वभागतः ॥ स्वरूपममलं तत्तु जानाति स महेश्वरः ॥ ७ ॥ यद्गात्र मात्र संगेन पवित्रं गात्र
मुच्यते ॥ तेषां स्वरूपं शैवानां न ज्ञातु मपि शक्यते ॥ शैवाश्चरंति भूलोके ते सर्वे शिव विग्रहाः ॥
शिव प्रभावः केनापि ज्ञायते किं जगत्त्रये ॥ ९ ॥ यदंग संगः संसार सागरस्यापि शोषकः ॥ स मोचकोपि
पिपापेभ्यो वर्णनीयः कथं मया ॥ १० ॥ अलौकिक मिदं चित्रं चरित्रं शंकरस्य तु ॥ तत्त्रिनेत्र परि
त्वाद्वेदांत विषयोपि न ॥ ११ ॥ शैवस्य रूपकोट्यंश कोट्यंशं शोपि केवलं ॥ न वेदैरपि वेदांतैः
सर्वैरपि न निश्चितं ॥ १२ ॥ धन्याः कृतार्थाः सर्वज्ञाः शंकरास्त्व केवलं ॥ तत्पाद रजसो लेशः पुना
ति भुवन त्रयं ॥ १३ ॥ सहस्त्र जिव्हः शेषोपि शैव माहात्म्य वैभवं ॥ नैव वर्णयितुं शक्तः तथैवाहं हरि
स्तथा ॥ १४ ॥ शंभवांगानुषंगेण महापाप विहंगमाः ॥ प्रयांति नलिकाघात घोषादिव विशेषतः
॥ १५ ॥ पुरा कश्चिद भूद्राजा प्रजापीडन तत्परः ॥ पापा नामा श्रय स्तस्य पापानां गणना पि न ॥ १६ ॥

परद्रव्यरतो नित्यं परद्रोहरतस्तथा ॥ परनिंदा परो नित्यं परदाररतः सदा ॥१७॥ गोहिंसा निरतो नित्यं अश्व हिंसारतस्तथा ॥ द्विज हिंसा परो नित्यं तन्नारि दुःखदायकः ॥१८॥ तद्राज्ये जलपानार्थं मृगा अपि चरंति न ॥ अन्येषां तत्र का वार्ता पापिष्ठ जनमंडने ॥१९॥ तद्देशे विपिने कोपि पांथः शैवोत्तमो गतः ॥ तत्र बिल्वतरुस्तेन दृष्टो दोषनिवारकः ॥२०॥ नवबिल्वदलाक्रांतमालवालजलाकुलं ॥ वेष्टितं परितः सम्यगुशीरैरतिशीतलैः ॥२१॥ तत्रास्ति कुंडममलं जलकल्लोलमंडितं ॥ परितः प्रोक्षितं शुद्धं छायाछन्नमनुत्तमं ॥२२॥ तद्देशराजा विपिने संचरन् मृगघातुकः ॥ तद्बिल्वमूले छायार्थमधितिष्ठति शीतले ॥२३॥ ग्रीष्मकाले रविकरैः प्रतप्तः पर्यटन्वने ॥ तद्बिल्वमूलमाश्रित्य ततो याति पुरं प्रति ॥२४॥ तं बिल्वतरुमालोक्य तुष्टो भवति भूपतिः ॥ तद्रक्षणार्थं बहवः स्थापिताश्च वने चराः ॥२५॥ वातेनापि न लूनैव शाखा बिल्वतरोस्तः ॥ अन्येन केन वा तस्य शाखा लूना भविष्यति ॥२६॥ बिल्वशाखाप्रवृध्यर्थं जलं चातीव निर्मलं ॥ सदापयति भूपालः तन्मूलं पूर्णमंबुना ॥२७॥ तादृशं बिल्वमूलं तु समाश्रित्य क्षणं स्थितः ॥ सशो

भवस्तदा राजा सोपि तत्र समागतः ॥२८॥ ततः श्रांतं शैववर्यं बिल्वमूलस्थितं नृपः ॥ दृष्ट्वा शांतिर
सा श्रांतः तुरगादवतीर्य सः ॥२९॥ एकाकी स ययौ मंदं बिल्वमूलं क्षुधातुरः ॥ श्रांतो भानुकरैस्तप्तः को
यमित्याह तं शनैः ॥३०॥ ततो वातः प्रचलितः शैवांगाद्भूतिसंयुतात् ॥ तेन वातेन संवीतो भूपतिः सात्वि
कान्वितः ॥३१॥ तमाह शैवं श्रांतोपि कुतो वा समुपागतः ॥ विपिने तव संचारः कथं शार्दूलसंयुते ॥३२॥
निष्ठुरं हि मनः पूर्वं ममेदानीं तु तद्(नत ता) दृशं ॥ त्वद्दर्शनादेव मेद्य सामर्थ्यं किं तवेदृशं ॥३३॥ मया तु निहताः
पूर्वं ब्राह्मणाः एव केवलं ॥ तेषां न गण(ना) नूनं अद्य साधीर्न जायते ॥३४॥ अहो ममापि विपिने कोयं काल
विपर्यय(म)ः ॥ प्रायो वश्यकरो मंत्रः तव तिष्ठति कश्चन ॥३५॥ शार्दूलैरपि न स्पृष्टः भवानत्र वने घने ॥ अत
स्त्वं वद मंत्रं(त) त्वं भृत्यत्वमागतः ॥३६॥ मया यद्यत्कृतं पापं तत्संख्यापि न दृश्यते ॥ तन्निष्कृतिः कथं
वा स्यात् तत्सर्वं वद सादरं ॥३७॥ अद्यप्रभृति भृत्योहं तव नास्त्यत्र संशयः ॥ कृपां कुरु विधेयोस्मि
सर्वथा तव शां भव ॥३८॥ त्वदंगसंगवातेन पूतः सात्विकतां गतः ॥ भूतिं प्रयच्छ मे शैवीं मंत्रपूतामनुत्तमां
॥३९॥ पापिष्ठेष्वपि कुर्वंति करुणामति साधवः ॥ किंचित्त्वत्सन्निधाने न ~~मत्कं नपुण्यं मयि दृश्यते ॥ स्त~~
पापेभ्योपि न मे भयं ॥४०॥

त्वं तावत्पापशार्दूलपंचाननइतिस्मृतः॥ अतःपरंक्व पापेभ्यो भयमद्य भविष्यति॥५१॥ त्वत्संनिधा-
नजनकं नपुण्यमयिदृश्यते॥ एतज्जन्मकृतं पुण्यं पूर्वजन्मकृतं चन॥५२॥ अकालवृष्टिस्त्विमेदृष्टि

स्तावविशेषतः॥तानिलानि विनष्टानिदुर्दृष्टानिकोटिशः॥५३॥ त्वद्दर्शनं पापराशेः अशनिस्पर्शनंतव॥
सर्वपुण्यनिधानानां मूलमित्यवधार्यते॥५४॥ इत्युक्त्वा प्रणतो राजा शैवपुंगवमादरात्॥ततस्तत्कालभू
त्यैशैः संयुतो भूपतिस्तदा॥५५॥ तद्देहान्निर्गतं पापं गजरूपमुपाश्रितं॥दग्धपुच्छं दग्धतुंडं ददर्श
सगजंनृपः॥५६॥ ततःपरं प्रणम्याशु स राजा शैवपुंगवं॥ किमयं भगवन्ब्रूहि धूमाकारोगजोधुना॥
॥५७॥ निर्गच्छति किलांगारस्तत्तुंगांगादनंतथा॥ ज्वलत्ययं सधूमोपि महापर्वतसंनिभः॥५८॥तस्मा
दपि प्रजायंतेदग्धाः पातकपर्वताः॥इदमत्यद्भुतं दृष्टं सर्वकष्टनिवारकं॥५९॥ संनिधानं शांभवस्य
भाग्यंवा किमितोधिकं॥ सर्वसौभाग्यमूर्तिस्त्वं जातंत्वत्सन्निधेर्मया॥६०॥ अहो महदिदं भाग्यंभो
ग स्वर्गापवर्गदं॥इतितद्वचनं श्रुत्वा प्राह शांभवपुंगवः॥६१॥ राजन्नाश्चर्यमेतेतन्ममाप्यत्रनसंशयः॥
त्वत्तःकोप्यधिको लोके पुण्यवान्नेतिमन्महे॥६२॥कृतं बिल्वतरोरस्य पालनं जलदानतः॥तदेबुत्व—

मानेन पापनाशस्तवाधुना ॥५३॥ बिल्वमूले त्वया दत्ता शीतला जलबिंदवः ॥ तत्संख्यया प्रनष्टानि पातकानि बहूनि ते ॥५४॥ एकस्मिन् दिवसे सिक्तो बिल्वः सलिलबिंदुभिः ॥ तेरनंतानि पापानि नष्टानि नसंशयः ॥५५॥ प्रत्यहं दीयते मूले बिल्वस्यास्य नृपोत्तम ॥ जलं तेन महद्भाग्यं मुक्तिश्चाग्रे भविष्यति ॥ एतानि बिल्वपत्राणि पवित्राणि नृपोत्तम ॥ नूनं त्रिनेत्ररूपाणि पोषितानि जलार्पणैः ॥५७॥ त्वं तावदधुना वंद्यो वृंदारकगणैरपि ॥ तव भाग्यस्य नोयत्तो मम मान्योसि सर्वथा ॥५८॥ महादेवस्वरूपोयं बिल्वो वेदैरपि स्तुतः ॥ यथाकथंचिदेतस्य महिमा ज्ञायते कथं ॥५९॥ वनमेतत्पावनं च बिल्वेनानेन केवलं ॥ एतज्ञ्ज्ञानानुषंगेण लिंगमंगं प्रजायते ॥६०॥ पुण्यतीर्थानि यावंति लोकेषु प्रथितान्यपि ॥ तानि सर्वाणि तीर्थाणि बिल्वमूले वसंति हि ॥६१॥ बिल्वमूलजलैर्यस्तु मूर्धानमभिषिंचति ॥ स सर्वतीर्थस्नातः स्यात्स एव भुवि पावनः ॥६२॥ बिल्वमूले महादेवं लिंगरूपिणमव्ययं ॥ यः पूजयति पुण्यात्मा स शिवं प्राप्नुयाद्ध्रुवं ॥६३॥ बिल्वमूले प्रजप्तास्तु मंत्राः सिद्धिमुपागताः ॥ तन्मंत्रमहिमा तावच्छज्ञायते शंकरेण हि ॥६४॥ शक्तिहीनोपि मंत्रो बिल्वमूलेषु जप्यते ॥ स सिद्धः स्वफलं दद्याद्यदि माहेश्वरप्रियः ॥ ॥६५॥

८३ शिवरहस्य

बिल्वरूपं समासाद्य शिव एव स्वयं प्रभुः ॥ लोकानामुपकाराय वनेस्मिन्नधितिष्ठति ॥६६॥ एतस्य बि- हरान्तः
ल्वमूलस्याप्यालवालमनुत्तमं ॥ जलाकुलं महादेवो दृष्ट्वा तुष्टो भविष्यति ॥६७॥ गंधपुष्पादिभिः अ०२२
सर्वैः उपचारैः प्रयत्नतः ॥ यो बिल्वं पूजयेन्नित्यं सन्ततिस्तस्य वर्धते ॥६८॥ दीपमालां बिल्वमूले यः
कल्पयति सादरं ॥ स तत्त्वज्ञानसंपन्नो महेशांतर्गतो भवेत् ॥६९॥ प्रदक्षिणनमस्कारान् बिल्वमूले
प्रयत्नतः ॥ ते पापपर्वतानां च नाशकास्युर्न संशयः ॥७०॥ नमस्कार्ये त्वबुध्याय प्रणतो दंडवद्भुवि ॥ त
स्मात्पतंति पापानि नोत्तिष्ठंति कदाचन ॥७१॥ बिल्वशाखां समादाय हस्तेन नवपल्लवं ॥ गृहीत्वा
पूजयेद्बिल्वं तेन पापैः प्रमुच्यते ॥७२॥ बिल्वमूले शिवरतं भोजयेद्यस्तु भक्तितः ॥ एकं वा कोटि
गुणितं तस्य पुण्यं प्रजायते ॥७३॥ बिल्वमूले क्षीरयुक्तमन्नमाज्येन संयुतं ॥ यो दद्याच्छिवभक्ताय
स दरिद्रो न जायते ॥७४॥ पुरा कश्चिद्भूद्विप्रो विंध्यमूलमुपाश्रितः ॥ स दरिद्रः कुटुंबी च पुत्रपौत्रादि
संयुतः ॥७५॥ प्रतिद्वारमटत्येव कणार्थं पुत्रसंयुतः ॥ कणान्कियच्चित्संप्राप्य तैः स जीवति भूपते ॥७६॥
ततः परं मुनिवरं मार्कंडेयं ददर्श सः ॥ कणार्थं सगृहद्वाराण्यटन्नेव सपुत्रकः ॥७७॥ ततस्तं मुनिशा-

द्भूलं प्रणतो दंडवद्भुवि ॥ प्राह दुःख समाक्रांतः पाहि पाहीति संवदन् ॥७८॥ ॥विप्र उवाच॥ ॥
वृद्धोहं पुत्र पौत्राद्यैर्वृतः पत्न्यापि वृद्धया ॥ न भक्ष्यं प्राप्यते विद्वन् शरीराणि कृशान्यपि ॥७९॥ धनपूर्णेषु देशेषु धा
न्यपूर्णेषु सर्वदा ॥ स्थीयते तैर्न दीयंते द्विजा अपि कणाः परं ॥८०॥ दातुमभ्युद्यताः पूर्वं विरलास्ते भवंत्यपि ॥
अन्येभ्यो दीयते धान्यं मह्यमेतैर्न दीयते ॥८१॥ कदाचित्प्राप्तमप्यन्नं कर्दमेषु पतत्यधः ॥ कदाचिन्नीयते चोरैः
पश्यत्येव मयि स्फुटं ॥ आहारेण विना सर्वे क्रंदंत्येते तिबालकाः ॥ अतः परं मया विद्वन् किं कर्तव्यमथाधुना ॥८३॥
युगपद्यदि सर्वेषां स्तेषां मरणं यदि ॥ तथापि सुखमेवेति मन्ये मुनिगणोत्तम ॥८४॥ इति तद्वचनं श्रुत्वा मुनि
र्विस्मय मानसः ॥ विचिंत्य हृदि तद्बीजं ततः परमुवाच तं ॥ ॥मार्कंडेय उवाच॥ ॥ जन्मांतरे त्वया
विप्र शैवाय प्रीति पूर्वकं ॥ न दत्तमन्नं बिल्वस्य मूले दारिद्र्यनाशके ॥ ८६॥ शांभवं रूपमासाद्य साक्षाद्दन्न
पतिः स्वयं ॥ बिल्वमूलेषु भुक्त्वान्नं करोत्यन्नपतिं नरं ॥८७॥ न दत्तं बिल्वमूलेषु शांभवायान्नमादरात् ॥ अ
तस्त्वेवं दृशं दुःखं अन्नाभावेन जायते ॥८८॥ अधुना वा बिल्वमूले शांभवाय प्रयत्नतः ॥ प्रयच्छान्नमिदं भक्त्या
ते नान्नं लभ्यते त्वया ॥८९॥ तदन्नस्य प्रदानेन सर्वदा प्यन्नराशिभिः ॥ तूर्णं पूर्णं भवत्येव मंदिरं तव सर्वदा ॥९०॥

विश्वस्य वचनं विप्र त्वरया बिल्वमुत्तमं ॥ पश्य प्रयाहि तन्मूले पूजयस्व सदा शिवं ॥ ९१ ॥ तत्रैव शांभवायान्नं हरालः

देहि भक्तिपुरःसरं ॥ अतः परं न दारिद्र्यं न दुःखमपि जायते ॥ ९२ ॥ इति तद्वचनं श्रुत्वा नत्वा तं मुनिपुंगवं ॥ त
देवधान्यमादाय ययौ बिल्ववनं प्रति ॥ ९३ ॥ तत्र बिल्वतरोर्मूले दृष्टः शांभवपुंगवः ॥ शिवलिंगार्चनरतो भ
स्मोद्धूलितविग्रहः ॥ ९४ ॥ उपवासैः कृशतनुः वायुमात्राशनः सदा ॥ तं दृष्ट्वा प्रणतो विप्रः कृतार्थोहमितिस्म
रन् ॥ ९५ ॥ ततः सोपार्जितं धान्यं तुषनिर्मुक्तमादरात् ॥ कृत्वा पाकोद्यतो जातः स्नात्वा कुंडे हरांतिके ॥ बिल्व
च्छायासमाक्रांते बिल्वपत्रसमावृते ॥ ततः सिद्धं चकारान्नं मृदुलं नवमुत्तमं ॥ तदन्नं समुपादाय बिल्वमूले
शिवांतिकं ॥ नीत्वा शिवाय नैवेद्यं ददौ भक्तिपुरःसरं ॥ ९८ ॥ तदन्नं समभूद्वृद्धं दृष्ट्वा तद्गिरिसंनिभं ॥ दृष्ट्वा
संतोषमापन्नः पुत्रपौत्रसमन्वितः ॥ ९९ ॥ ततः परं स शैवो पि तदन्नं गिरिसन्निभं ॥ विलोक्य हर्षसम्पू
र्णः क्षुधितस्तमुवाच च ॥ १०० ॥ ॥ शैव उवाच ॥ ॥ अहो ब्राह्मण धन्योसि शिवायान्नमिदं शुभं ॥
दत्तमल्पं प्रवृद्धं हि भुक्तशेषं त्रिवेन तु ॥ १०१ ॥ तव भाग्यस्य नो तोस्ति दारिद्र्यं नष्टमेव ते ॥ अतः परं शां
भवेभ्यो देयमन्नमिदं शुभं ॥ २ ॥ अस्मिन्वने बिल्ववृक्षाः कोटिशः संति शांभवाः ॥ तन्मूलेषु शिवासक्ताः शिव—

लिंगार्चन प्रियाः ॥ ३॥ तन्प्रणम्य मुहुर्भक्त्या तेभ्योन्नमिदमुत्तमं ॥ प्रयच्छ तेन संतुष्टो भवेदन्नपतिः स्वयं ॥४॥
येनान्नपति भक्ताय दत्तमन्नं प्रयत्नतः ॥ तेनान्नं प्राप्यते दिव्यं नानाविधमनुक्षणं ॥५॥ इत्येतद्वचनं श्रुत्वा
नत्वा शांभवपुंगवान् ॥ चकार प्रार्थनं भक्त्या तदन्नग्रहणाय सः ॥६॥ ततस्ते शिवनैवेद्यं इदमत्युत्तमं नवं ॥ इति
भुक्त्वा प्रहृष्टास्ते तेन तुष्टः सदाशिवः ॥७॥ ततः सभुक्त्वा विप्रोपि सपुत्रो भार्यया सह ॥ पौत्रैश्च परमानंदं प्रा
पाकंठान्नसंगमात् ॥८॥ ततोययौ गृहं सोपि स्वकीयं धान्यसंयुतं ॥ दृष्ट्वा प्रहृष्टो महिमा कोयमद्भुत इत्यपि ॥९॥
ततः परं विशालानि चकार सदनानि सः ॥ अन्नराशिः समाक्रांतान्युत्तमानि प्रतिक्षणं ॥१०॥ तेन तद्बि
ल्वमूलेषु भोजनायामास शांभवान् ॥ दिव्येनान्नेन विप्रोसौ कोटिशो नृपसत्तम ॥११॥ अतः पूजय भूपाल
बिल्वमूले महेश्वरं ॥ प्रयच्छान्नं शांभवेभ्यः प्रत्यहं प्रीतिपूर्वकं ॥१२॥ अतः परं न हिंसापि विधेया पक्षिणामपि ॥ कारय स्वप्रयत्नेन सुंदरं शिवमंदिरं ॥१३॥ एतस्मिन्नंतरे [illegible] बाणलिंगमनुत्तमं ॥ सोमेश्वरस्समानी
यस्थापनीयं प्रयत्नतः ॥ बिल्वमूले बाणलिंगं स्थापयित्वा समर्चय ॥ विभूतिधारणं कृत्वा कृत्वा रुद्राक्ष
धारणं ॥१५॥ अतः परं तु विरतः संसारादघसागरात् ॥ महेश्वररतो भूत्वा लिंगपूजारतो भव ॥१६॥ ॥

सदोषाः सर्वेषां विष विषम पाका विषयिणां विष प्रायः प्रायः प्रियतममहिष्यादि विषयाः ॥ अतो हित्वा मोहं भ- जभज महादेव मघहं महा देवं हित्वा नहि नहि महोत्साहद महो ॥ ११७ ॥ ॥ इति श्री शिवरहस्ये हराख्ये तृतीयांशे शिव गौरी संवादे नाम द्वाविंशोध्यायः ॥ २२ ॥ ॥ श्री काशी विश्वेश्वरार्पण मस्तु ॥ ॥ ब्रह्मोवाच ॥ ॥

इति तद्वचनं श्रुत्वा राजा संतुष्ट मानसः ॥ प्रणम्य दंडवद्भूमौ तमुवाच शिवार्चकं ॥ १ ॥ शिवदीक्षां प्रयच्छाद्य त्वया त्वया पूतो भवाम्यहं ॥ अनन्य शरणं विद्धि मां पाप विरतं नृपं ॥ २ ॥ शिवदीक्षा प्रभावो वा महिमा शंकरस्य वा ॥ कीदृशस्तं वदाद्या शु येन पापं विनश्यति ॥ इत्याकर्ण्य वचस्तस्य शांभवः प्राह तं नृपं ॥ विभूति धारणं कृत्वा शपथं च महेश्वरे ॥ ४ ॥ ॥ शांभव उवाच ॥ ॥ शिवदीक्षा प्रभावस्तु शिवेन ज्ञायते परः ॥ यद्यप्यथापि तद्रूपं शृणु सादरमास्तिक ॥ ५ ॥ शिवमंत्रे दीक्षितस्य तनु दृष्ट्वा पि दूरतः ॥ प्रयांति यम दूतास्तु तथा पातक पर्वताः ॥ ६ ॥ अधुनैव त्वया दृष्टः पापाकारो गजो महान् ॥ महापर्वत संकाशो ज्वलत्यद्यापि पश्यतं ॥ ७ ॥ पापानि गजरूपेण निर्गता नि तवाधुना ॥ मत्फाल भूति संगेन मदंगालोकनादपि ॥ ८ ॥ दीक्षितः शैव विद्यायां बाल्ये भाग्य वशादहं ॥ श्रीका[illegible] काल करुणा संपूर्णा मयि तिष्ठति ॥ ९ ॥ येये शांभव विद्यायां दीक्षिता-

स्तेतपोधनाः॥ तत्पादरजसा तावत्पावनं भुवनत्रयं ॥२०॥ यस्य शांभव विद्यायां भक्तिर्भवति भाग्यतः॥ तं नमंति सुराः सर्वे शार्वानुग्रहकांक्षया ॥२१॥ अक्षयं धनमस्माकं सा विद्या शांभवी खलु॥ अन्यद्धनं क्षयं याति न तद्यातिक्षयं नृप ॥२२॥ बहुपुण्याब्धयः शैवास्तां दीक्षां प्राप्य सादरं॥ हृष्टा भवंति तेऽलं द्विजास्ते कलौ खलु ॥२३॥ न यस्य पालको द्वीतिर्नियमादपि जायते॥ तस्य पुण्यस्वरूपस्य विद्या भवति शांभवी॥ कैलासमपि संप्राप्ताः शैवाः शांभवविद्यया॥ सोपानरूपा विद्येयं कैलासारोहणोद्यमे ॥२५॥ नान्यैरुपायैस्तल्लाभः कैलासो दुर्लभोप्ययं॥ सुलभत्वेन विज्ञेयस्तया शांभवविद्यया ॥२६॥ न यस्य शांभवी विद्या तस्य जन्म निरर्थकं॥ वंध्यात्तज्जननी राजन् तेन पुत्रेण किं फलं ॥२७॥ मानुषं जन्म संप्राप्य द्विजत्वं च विशेषतः॥ संप्राप्य शांभवीं विद्यां राजते द्विजराजवत् ॥२८॥ तृप्ता भवंति पितरः तया शांभवविद्यया॥ तद्विद्यासहितं विप्रं प्रणमंति मुनीश्वराः॥२९॥ ब्राह्मणः शांभवीं विद्यां यावन्नाप्नोति पुण्यदां॥ तावत्स न प्रणामार्हो न दानार्होपि भूपते॥२०॥ अभ्यस्य शांभवीं विद्यां शिवार्चनरतो यदि॥ तदैव स्यात्प्रणामार्हो दानार्होपीति मन्महे॥२१॥ परमा शांभवी विद्या दुर्लभा परमार्थतः॥ अतस्तत्राधिकारोपि दुर्लभत्वेन निश्चितः॥२२॥ संप्राप्य-

३८०

शांभवीं विद्यां शंभु पूजां करोति चेत् ॥ तदा शिवेन सा पूजा गृह्यते प्रीति पूर्वकं ॥२३॥ तयैव विद्यया दत्तं शिव-
लिंगे जलादिकं ॥ सुधात्वं याति तेनैव मुक्तास्तत्पितरोपि हि ॥२४॥ स्वपुत्रं पितरो दृष्ट्वा तया शंकर पूजकं ॥
पीत्वा तज्जलमानंदं प्राप्ता नेच्छंति च स्वधां ॥२५॥ इत्याकर्ण्य वचस्तस्य भूपतिः प्रणतः पुनः ॥ अधुना शांभवीं
विद्यां देहि देहीति सादरं ॥२६॥ ततस्तद्विनयं दृष्ट्वा वीरः शंकर पुंगवः ॥ तथास्त्विति समप्याह सोपि तुष्टस्त
तो नृप ॥२७॥ ततः समागतास्तस्य सेना सा वाहिनी विभोः ॥ संख्या मार्ग मतिक्रांता गज वाजि विराजिता ॥
२८॥ तस्य प्रधान पुरुषाः क्व राजा गत इत्यपि ॥ विचार व्याकुलाः सर्वे बिल्व मूल मुपागताः ॥२९॥ तत्र राजा
नमासीनं विनयानत कंधरं ॥ विलोक्य विस्मयापन्नाः किमभूदिति भो बुधाः ॥३०॥ क्रूरोयं पाप निरतः
पुरा च प्रातरं ततः ॥ अधुना सत्व मापन्नः किमित्याश्चर्य संयुताः ॥३१॥ ततस्ते सत्व संपन्नाः सन्निधाने
न भूपतेः ॥ नतास्ते भूपतिं प्राहुर्गंतव्य मिति सत्वरं ॥३२॥ ततस्तानाह भूपालो विस्मयं जनयन्मुदा ॥
शृण्वंतु सावधानेन कर्त्तव्य मधुनोच्यते ॥३३॥ शांभवाग्रेसरस्यास्य सन्निधाने सदा मया ॥ स्थातव्य
मत्र नगरं रचनीयं विशेषतः ॥३४॥ रत्न मंदिर मत्रैकं कर्त्तव्य मति सुंदरं ॥ अत्रैव बाण लिंगानि स्थापनीया

३८/

न्यनंतथा ॥ ३५ ॥ एतस्य बिल्ववृक्षस्य छायामध्यं दिने रवौ ॥ यावत्तावन्नर्मदानि संतु लिंगानि कोटिशः ॥
॥ ३६ ॥ यावती रचना तत्र ततः शतगुणा यदि ॥ अत्र स्यात्तर्हि संतोषस्तत्र तावन्न गम्यते ॥ ३७ ॥ विश्वकर्मा समा
यातु रचनां नगरस्य सः ॥ करोतु सत्वरं रत्नैर्नानामंडपमंडितं ॥ ३८ ॥ अधुना शिवदीक्षार्थं यद्यद्द्रव्यमपेक्षितं ॥
तदानयध्वं यत्नेन त्वरये त्याह तान्नृपः ॥ ३९ ॥ ततस्तद्वचनं श्रुत्वा राज्ञः क्रूरस्य मंत्रिणः ॥ तदुक्तं सर्वमप्याशु
कर्त्तव्यमिति चोचिरे ॥ ४० ॥ ततो निर्मितमेवाशु नगरं स्वर्गसन्निभं ॥ मंदिरं च महेशस्य नानारत्नविराजितं ॥
॥ ४१ ॥ ततस्तात्वा प्रयत्नेन भस्मनोद्धूल्य तां तनुं ॥ रुद्राक्षमालाभरणस्तमुवाच मुनीश्वरं ॥ ४२ ॥ स्वामिन्म
ध्यान्हगो भानुः पुण्यकालोयमुत्तमः ॥ दीक्षा साधन संपत्तिः जाते त्याह नृपोत्तमः ॥ ४३ ॥ स्थापयित्वा त
तो भक्त्या मूले बिल्वतरोः शुभे ॥ लिंगानि तानि संपूज्य बिल्वपत्रादि साधनैः ॥ ४४ ॥ होमं कृत्वा प्रय
त्नेन तया शांभवविद्यया ॥ राज्ञे स शांभवीं विद्यां ददौ प्रीतिपुरःसरं ॥ ४५ ॥ रराज राजा सं प्राप्य तां विद्यां शां
भवीं तदा ॥ नीरं ध्रमेघनिर्मुक्त भानुमंडलवद्बुधाः ॥ ४६ ॥ राहुग्रस्तार्कवद्राजा सपूर्वं विद्यया विना ॥ तां प्रा
प्य राहुनिर्मुक्तः भानुवद्नृपतिर्बभौ ॥ ४७ ॥ मंत्रिणस्तं नृपं दृष्ट्वा तेपि शांभवविद्यया ॥ संपन्नास्तस्य भार्या-

काशीरहस्य
८७

श्चतद्भृत्या अपिकोटिशः ॥४८॥ ततस्तंनगरं सर्वं शांकरैः परिवारितं ॥ तत्राशांकरवार्त्तापि श्रूयते पिनकैर - हर०लु०
पि ॥४९॥ शिवमंदिर संक्रांतनगरं सर्वतः सदा ॥ मंदिरं तादृशंतत्रनयत्र शिवमंदिरं ॥५०॥ दृष्टेपिनगरेतस्मि अ०२२
न्नति क्रूरोपि शांकरः ॥ शिवलिंगार्चनपरो भवत्येवनसंशयः ॥५१॥ दृष्ट्वातंनगरंदूराद्भूपालस्यप्रयांत्यपि ॥भ
यग्रस्ताः कृतांतस्य दूताः सर्वे महोद्धताः ॥५२॥ एतादृशोयं महिमा शांभवानामनामयः ॥ अतस्तद्वर्ण
नंकर्त्तुंकःसमर्थो भवेद्भुवि ॥५३॥ तेनराज्ञाधनंयावद र्जितं पूर्वमादरात् ॥ तत्सर्वं प्रदेयं भक्त्याशांभवे
भ्यस्तदाज्ञया ॥५४॥ शांभवाः प्रत्यहं तेन बिल्वमूलेषुकोटिशः ॥ भोजनाद्यैस्तोषिताश्च प्रत्यहं प्रीति
पूर्वकं ॥५५॥ तस्य बिल्वतरोरेकः प्राकारस्तेनकारितः ॥परितो योजनायामो मणि मंडलमंडितः ॥५६॥
तन्मध्येरत्न भवनंयोजनार्धायतंकृतं ॥ तत्र लिंगानिरम्याणि स्थापितानिबहून्यपि ॥५७॥
॥रत्नदीपपरिक्रांतंरत्न भूषण भूषितं ॥५८॥ उदारास्तस्ययेदाराः कोटिशस्तामनोहराः ॥
रत्नमालापरिक्रांतंतदेव शिवमंदिरं ॥५८॥ सायंप्रगे पिनाट्यानिचक्रुस्ते गिरिशालये ॥५९॥ तद्दर्शना
र्थमस्माभिः गम्यते भक्तिपूर्वकं ॥ तेनादरकृतोस्माकं एतेशैवाइतिश्रिया ॥६०॥ ॥ ६ ॥

एतादृशेन तेनैव राज्ञा भूमंडले जनाः ॥ शैवाः कृतास्तदा कोपि नाशैवो भुवि दृश्यते ॥ ६१ ॥ तदाय मालये कोपि नास्ति न श्रूयते पि च ॥ कीटाश्च स्वर्गमायांति सर्वे तद्देशवासिनः ॥ ६२ ॥ मृगादीनां च का वार्त्ता तस्मिन्देवे सति श्रिया ॥ एराज भूतलं सर्वं शैवमंडल मंडितं ॥ ६३ ॥ तेनोषित मिहाकल्पं सशरीरः समागतः ॥ स राजा दार सहितो मंत्रिभिः सह सादरं ॥ ६४ ॥ स तेनैव शरीरेण वैकुंठे पि स्थितो मुदा ॥ कल्पमात्रं ततो राजा स्वराज्य मगमन्मुदा ॥ ६५ ॥ एतादृशाः सुबहवः स्थिताः सर्वे नृपोत्तमाः ॥ शांकरानुग्रहा देव सर्व भाग्य समन्विताः ॥ ६६ ॥ इयं भिल्लसती देवा दुर्भगा व्याधि पीडिता ॥ जीवनं ताव देतस्याः काष्ट विक्रयणादिना ॥ ६७ ॥ [illegible]न्मरण काले तु शैवो द्विष्टप लाश भाक् ॥ करोस्यास्तेन पुण्येन यमेनाभ्यर्चिता मुदा ॥ ६८ ॥ इन्द्रेणाभ्यर्चिता भक्त्या स्वर्गलोक मुपागता ॥ अत्रेय मागता धन्या पूजितापि मया मुहुः ॥ ६९ ॥ अतः परं विष्णु लोकं प्रयास्यति विमानतः ॥ बहुकाल मुषित्वा सा तत्र तुष्टा भविष्यति ॥ ७० ॥ ततः परमियं नारी क्षीर सागर कन्यका ॥ भवित्री रूपलावण्य संयुता भाग्य संयुता ॥ ॥ ७१ ॥ स सागरः सुतां दृष्ट्वा संतुष्टोपि भविष्यति ॥ लक्ष्मी नाम्ना नामकर्म स करिष्यति सागरः ॥ ७२ ॥ उमाप्रसादे लब्धेयं कन्यकेयं मयेति सः ॥ लक्ष्मीनामांकिता चक्रे तेन साति तरां बभौ ॥ ततस्तु कस्मै देयेयं कन्यका –

कमलानना ॥७३॥ इयमाजानदेवानां गणानामपियाखलु ॥ अतःपरं कर्मदेवाः तिष्ठंतिबहवः खलु ॥७४॥ हरः लः

ते[illegible]लव्या कोवाप्रीतो भविष्यति ॥ श्रेष्ठो नारायणस्तेषु कर्मदेवेष्वतो मया ॥ तस्मै देयेयमित्येव अ.२३

तस्मैदास्यत्यसंशयः ॥ सातेन परिणीतापि कियत्कालं यथेच्छया ॥७६॥ उषिता तातसदने पुनर्विष्णुसमन्विता ॥

नारायणस्य रमणी सा लक्ष्मीर्लक्षणान्विता ॥७७॥ तन्नामानि भविष्यंति बहूनि विविधान्यपि ॥ इंदिरा कमला

पद्मा श्रीरित्यादीनि भोबुधाः ॥७८॥ ईदृशं भाग्यमनया प्राप्तं तत्तात्र संगमात् ॥ शिवनैवेद्यफलभुग्भ

वेज्जनमनोहरः ॥७९॥ ॥श्रीशंकर उवाच ॥ ॥ इति ब्रह्मवचः श्रुत्वा तत्स भानि[illegible]

ति विस्मयमापन्नाः शिवध्यानरताः सदा ॥८०॥ तथा च शिवनैवेद्यफलभोजनपुण्यतः ॥ रूपं प्रवर्धते भाग्यं

तत्प्रसादस्तु तादृशः ॥ अतः परं किमेतस्य वर्णनीयं फलं मया ॥ शिवार्पितस्य नीरस्य फलस्यापि विशेषतः ॥८२॥

भोजनेन विनष्टानि नैवेद्यस्य महेश्वरे ॥ अर्पितस्याशुपापानि धर्माश्च समुपागताः ॥८३॥ अनेकजन्मतपसा

शिवनैवेद्यभोजनं ॥ प्राप्यते दुर्लभं पुंसां देवानां च विशेषतः ॥८४॥ शिवनैवेद्यपात्रस्य महिमा वर्णितो मया ॥

आपातोतोन संपूर्णः पूर्णो वाग्विषयोपि न ॥८५॥ इति तद्वचनं श्रुत्वा स विप्रोपि प्रणम्य तः ॥ सिद्धलिंगार्चनं कर्तुं

चकारमतिमादरात्॥८६॥ इदमेतादृशं लिंगं सर्वमंगलदायकं॥ पूजनीयं प्रयत्नेन देवानामपि दुर्लभं॥८७॥ अस्मिंल्लिंगे फलं नीरमन्नं वाय समर्पितं॥ तद्भोजनेन भाग्यानि भविष्यंत्येव कोटिशः॥८८॥ ॥श्री शिव उवाच॥ इति तद्वचनं श्रुत्वा गंधर्वनगराधिपः॥ तल्लिंगपूजनोद्युक्तः सर्वसाधनसंयुतः॥८९॥ रत्नादिभिः समभ्यर्च्य सायंकाले मुहुर्मुहुः॥ रत्नदीपप्रभाकूटैः पूजयामास सादरं॥९०॥ ततः स्वदारानाहूय नाट्यार्थं लिंगमंदिरे॥ योजयामास ते सर्वे नाट्यविद्याविशारदाः॥९१॥ तै रेवगान मारब्धं नाट्यं कृत्वा पुनः पुनः॥ रुद्रवीणां समादाय प्रत्येकं लिंगमंदिरे॥९२॥ रुद्रवीणाध्वनिं श्रुत्वा पवनाघातजं बहु॥ संतुष्टास्ते दुर्लभोयं ध्वनिरित्याहुरादरात्॥९३॥ प्रार्थना तैः कृतास्तत्र नाट्यांते मुहुरादरात्॥ अस्मासु रुद्रवीणात्वं भवित्वित्यति भक्तितः॥९४॥ ततः परं स सिद्धेशस्वरूपेण मया शिवे॥ तथास्त्विति वरो दत्तस्तेन जातास्तथैव ते॥ ते सर्वे रुद्रवीणात्वं प्राप्यात्र मम मंदिरे॥ तिष्ठंति गिरिजे पश्य शृणु तद्ध्वनिमादरात्॥९६॥ इति तद्वचनं श्रुत्वा गौरी संतुष्टमानसा॥ विहारे निरताजाता तद्ध्वनिश्रवणोत्सवैः॥९७॥ वसंतोत्सवसंपन्ना कस्तूरीकर्दमादिभिः॥ समाक्रांता महेशोपि तैराक्रांतो मुहुर्मुहुः॥९८॥ सरः परं समासाद्य फुल्लराजीवराजितं॥ मणिसोपानसंबद्धं जलक्रीडां चकारसः॥९९॥

श्रो ३

स जल क्रीडया श्रांतस्तत्रैव मणिमंडपे ॥ रत्नसिंहासनाक्रांते स्थितो गिरिजया सह ॥१०० ॥ ततो दिव्यदुकूला-इया त्
नि परिधाय महेश्वरः ॥ अंबया सह दिव्यैश्च भूषणैर्भूषितः शिवः ॥१०१॥ अंगरागं चकारा शुभ्र घन सार द्रवादिभिः ॥
रराज गौरी तैरेव मंगला पति संयुता ॥१०२॥ ततः प्रासादमत्युच्चं कुंद मंदार रंजितं ॥ तैरेव रचितं प्राप यो जना
र्बुदमुन्नतं ॥३॥ तत्र स्थित्वा महादेवः तया गिरिजया सह ॥ रेमे स परमानंद विग्रहो मुहुरादरात् ॥४॥ पापारण्य
दवानलो जनिजरा संसार हाला हलो रोगोद्वेग पतंग भंगनलिका संचाल कोलाहलैः ॥ दुष्टारिष्ट सदर्प सर्प
कुहरा पारा चलानंदतः । कालः कोपि किलापदानपि कथाया काल कालस्य सा ॥१०५॥ ॥इति श्री शिवर
हस्ये हराख्ये तृतीयांशे शिव गौरी संवादो नाम त्रयो विंशोध्यायः ॥२३॥ ॥श्री काशी विश्वेश्वरार्पणमस्तु॥
॥व्यास उवाच॥ ॥तत्र सिंहासनासीनं महेशानमुमा मुहुः॥ आलिंग्या लिंगनैस्तुष्टमष्टमूर्त्तिमुवाच सा
॥१॥ ॥पार्वत्युवाच ॥ ॥भगवन् सत्यलोकोपि त्वया सृष्टो महा प्रभो ॥ तस्य लोकस्य महिमा महा
नेवानुवर्त्तते ॥२॥ सन्निवासस्य हे लुकस्तस्य कस्त्वया ॥ पालनाय नियुक्तो स्ति तेन पुण्यं च किं कृतं ॥ इदं स
र्वं विशेषेण श्रोतव्यं फाललोचन ॥ कियत्कालमवस्थानं तत्र तस्य भविष्यति ॥४॥ इति तद्वचनं श्रुत्वा मधुरं

चमनोहरं॥ शंकरोपि सुधारूपां गिरमाह शिवां प्रति॥५॥ ॥श्रीशिव उवाच॥ ॥सत्यलोकोपि निष्प्रा
पः सर्वेषामपि सर्वथा॥ सुमेरुमध्यभागस्थः मद्धि लासा श्रयः पुरा॥६॥ तस्मिन्लोके मनोज्ञानि वनानि वसनान्य
पि॥ जलकल्लोललोलानि विमलानि सरांस्यपि॥७॥ उत्फुल्लानि सरोजानि सर्वदा तेषु संत्युमे॥ मंदारतर
वस्तत्र कोटिशः कमलानने॥८॥ तत्रापि संति गिरिजे रत्नमंदिरकोटयः॥ तेषु तिष्टंति लिंगानि मनोज्ञानि मनो
रमे॥९॥ तदा लोकनमात्रेण शुभवृद्धिः प्रजायते॥ तत्पूजया मंगलानि भवंत्येव प्रतिक्षणं॥१०॥ तत्र न क्षुधया पीडा
तृषया वा वरानने॥ तत्र स्थितं पुरा गौरी विहाराय मया तदा॥११॥ आगतं नंदिकेशेन कैलासात्वरया शिवे॥ कु
त्र क्रीडति देवेशः शिव इत्याकुलस्तदा॥१२॥ तत्र सिंहासनारूढं देवं बंदिगणस्तुतं॥ मनोज्ञवेषं गीर्वाणवाणी
संस्तुतमादरात्॥ आगत्य दंडवन्नंदी प्रणतो भक्तिपूर्वकं॥ विनयावनतः प्राह कृतांजलिपुटः शिवे॥१४॥ ॥
नंदीश्वर उवाच॥ ॥भगवन्देवदेवेश सर्वलोकमहेश्वर॥ कोयं विलासो भगवन् अवस्थानमिदं कथं॥
१५॥ यादृशी रचना शंभो कैलासद्वारमंदिरे॥ न तत्कोट्यंशकोट्यंशकोट्यंशोप्यत्र शंकर॥१६॥ कैलासो
पवने शोभा सा शोभा भुवनेषु न॥ तत्र मंदारतरवो जायमानाः फलान्विताः॥१७॥ मंदारांकुरसंजातफला

३१५

नांगणनापिन॥ प्रसूनैः सहजायंते मंदारांकुरकोटयः॥१८॥ तदंकुर फलस्यापि योरसः ससुधारसं॥ तिरस्कुरो-हरा' तृ-
तिसहस्रा तन्माधुर्यं क्व वर्त्तते॥१९॥ तदंकुर प्रसूनानां गंधलेशोपि वस्तुतः॥ कस्तूरी गंध संदोह तिरस्कारक अ.२४
रः खलु॥२०॥ कुंदादीनि प्रसूनानि भवंत्येव प्रतिक्षणं॥ तदुत्पत्तिः कदापीश प्रतिबद्धा न सर्वथा॥२१॥ अन्येषामपि
पुष्पाणां धारारूपा जनिः खलु॥ अखंड बिल्व पत्राणि जायंते पि तदंकुरैः॥२२॥ बिल्वांकुरैः समागत्य शिव लिंग
स्य पूजनं॥ क्रियते बिल्व पत्राद्यैः तदातव मनोहरं॥२३॥ मरंद धारा सिक्तानि शिव लिंगानि कोटिशः॥ बिल्वा
दिभिः पूजितानि प्रसन्नानि महेश्वर॥२४॥ तल्लिंग दर्शनं त्यक्त्वा मनोन्यत्र न याति हि॥ तदा लोकन नेयानि
दिनानीति मतिर्मम॥२५॥ तस्मिन्ननुपवने शोभा या सा वाग्विषया कथं॥ वन शोभा महादेव श्रुता हि शुभदायि
नी॥२६॥ भृंगैः पिकैः शुकैर्हंसैः चकोरैरपि सारसैः॥ रत्नाकारैरपारैस्तैर्व्याप्तं तं वनमीश्वर॥ सुवर्ण वर्णवर्णा
नां कदलीनां फलैरपि॥ अपारैर्व्याप्तं शंभो तद्दूं धैर्व्याप्तं वनं॥२८॥ तत्रेक्षु दंडा जायंते सुधा फल समन्वि
ताः॥ तद्रसादधिकः कोपि रसस्तु मधुरोपि न॥२९॥ सहकारांकुरैरेव सहकार फलान्यपि॥ परिपक्वानि
जायंते प्रसूनं न च दृश्यते॥३०॥ मुक्ता विद्रुम वल्लीनां मतस्तत्र न सर्वथा॥ पुष्पा स्वारः सर्वदापि सदा पुष्पोच्च-

याः शिव ॥३१॥ नीलाचलानां धिक्कारः कृतं स्यादलिमंडलैः ॥ तेपि गायंति नामानि मधुराणि तव प्रभो ॥३२॥ इद
मेतावदीशान कैलास नगराद्बहिः ॥ नगरांतर शोभा तु मनसो गोचरा प्रभो ॥३३॥ तत्तादृशं स्थलं त्यक्तं किमत्र
स्थीयते प्रभो ॥ इदं हार विहारार्थं कथं वा स्थल मीश्वर ॥ ममाप्यत्र रुचिर्नेश तव किं वा रुचिः शिव ॥३५॥ लोके
रुचिकरं वस्तु तादृशं नैव दृश्यते ॥ तादृशं शंकरावासे कैलासे सुख मीश्वर ॥३६॥ तज्जातीय सुखस्यापि ना
स्ति संभावना खलु ॥ यदसंभावितं लोके तत्सर्वं तत्र शंकर ॥३७॥ अतः कथं वा तत्यागे मतिः परम सुंदरे ॥
तव यद्रत्नसदनं कैलास द्वारि दृश्यते ॥ ३८॥ तद्ब्रह्मांडे न कुत्रापि तत्कोट्यंशोपि कुत्र वा ॥ तत्र स्थितिर्महा
देव त्वयोग्येति मे मतिः ॥३९॥ अयोग्या स्थितिरत्रेति त्वयापि ज्ञायते प्रभो ॥ नाहं विज्ञापनां कर्तुं अधिकारि त
थापि किं ॥४०॥ विज्ञापनेयं हृदये ज्ञापनायाधितिष्ठतु ॥ किं चानुग्रह पात्राणि भुवनानि चतुर्दश ॥४१॥ ताव
तानि विचित्राणि रम्याणीत्यपि मन्महे ॥ तेषु सर्वेषु भव्येषु भुवनेषु शुभावहं ॥४२॥ कैलास भुवनं मन्ये भवा
नीरमण प्रभो ॥ ॥व्यास उवाच ॥ ॥ इत्याकर्ण्य वचस्तस्य प्राह गौरीमनोहरः ॥ संतोषं जनयन्नेव
घनगंभीरया गिरा ॥४३॥ ॥सदाशिव उवाच ॥ ॥ सत्यमुक्तं त्वयानंदिन् तत्रार्थे विस्मयोपि न ॥

कैलासादधिकः कोवा देशोदेशेषु विश्रुतः॥ सनैवतपसा प्राप्यो घोरेणाप्यमितेनवा॥ नान्यैरपि त्रिलोके-हराल
षु कैलाशः परमोत्तमः॥४५॥ नदेवेषु यथादेवो मदन्योप्यधिकस्तथा॥ तथा सर्वेषु देशेषु कैलासस्त्वधिका
धिकः॥४६॥ यथा गोक्षीरमधिकं क्षीरेषु विविधेष्वपि॥ मधुरेषु यथा श्रेष्ठा मधुरा सितशर्करा॥४७॥
यथा घृतेषु सर्वेषु गोघृतं सुमनोहरं॥ परमान्नं यथान्नेषु सर्वेष्वप्यधिकं श्रुतं॥४८॥ यथा तरुषु सर्वेषु
श्रेष्ठो बिल्वतरुः श्रुतः॥ यथा फलेषु सर्वेषु श्रीफलस्य फलं वरं॥४९॥ यथा सर्वेषु वस्त्रेषु दुकूलं चित्रितं वरं॥
भूषणेषु यथा श्रेष्ठं भव्यं रुद्राक्ष भूषणं॥५०॥ अंगरागेषु सर्वेषु श्रेष्ठा भूतिः श्रुतिश्रुता॥ यथा नरेषु
सर्वेषु शंकरः पुरुषोत्तमः॥५१॥ यथा नारीषु सर्वासु नारीरत्नं गिरींद्रजा॥ यथा तीर्थेषु सर्वेषु शिवगंगा
परं यथा॥५२॥ सरोवरेषु सर्वेषु यथा रुद्रसरोवरं॥ यथा पुरेषु सर्वेषु पुरं काशीपुरं वरं॥५३॥ यथा वापीषु
सर्वासु ज्ञानवापी मनोहरा॥ मुक्तिमंडपमुत्कृष्टं मंडपेषु यथा मतं॥५४॥ यथा विश्वेश्वरं लिंगं लिंगेषु
श्रेष्ठमुच्यते॥ यथा मूर्तिषु सर्वासु दक्षिणा मूर्तिरुत्तमा॥५५॥ तथा सर्वेषु देशेषु कैलासोप्यधिका
धिकः॥ यथा गिरिषु सर्वेषु श्रेष्ठो हिमगिरिः स्मृतः॥ तथा सर्वेषु देशेषु कैलासोप्यधिकाधिकः॥५६॥

३९८

यथानदीषु सर्वासु नर्मदा शर्मदा सदा ॥ तथा सर्वेषु दे० ॥५७॥ यथा मुनिषु सर्वेषु श्रेष्ठः कलशसंभवः ॥
तथा सर्वेषु० ॥५८॥ यथा मंत्रेषु सर्वेषु शिवपंचाक्षरः परः ॥ तथा सर्वेषु० ॥५९॥ शिवपूजासाधनेषु बिल्व
पत्रं यथा वरं ॥ तथा० ॥६०॥ यथा वेदेषु सर्वेषु रुद्राध्यायः परः स्मृतः ॥ तथा० ॥६१॥ यथा सर्वेषु सर्पे
षु सहस्रफणिरुत्तमः ॥ तथा० ॥६२॥ यथा चतुष्पदां मध्ये प्रसिद्धो वृषभेश्वरः ॥ तथा० ॥६३॥ यथा वि
द्यासु सर्वासु शिवविद्या परा स्मृता ॥ तथा० ॥६४॥ यथा भोज्येषु सर्वेषु शिवनैवेद्यमुत्तमं ॥ तथा० ॥६५॥ यथा
गृहेषु सर्वेषु श्रेष्ठं मतं गृहं मतं ॥ तथा० ॥६६॥ मंदिरेषु यथा श्रेष्ठं रम्यं शांकरमंदिरं ॥ तथा० ॥६७॥ उत्तमांगं यथां
गेषु शिवानतिकिणां किल ॥ तथा० ॥६८॥ कुमारेषु यथा श्रेष्ठः षण्मुखः श्रुतिषु श्रुतः ॥ तथा० ॥६९॥ लोहम
ध्ये यथा श्रेष्ठं कांचनं शैलजे प्रियं ॥ तथा० ॥७०॥ ब्राह्मणेषु यथा श्रेष्ठः शांभवो ब्राह्मणोत्तमः ॥ तथा० ॥७१॥
यथा रत्नेषु सर्वेषु श्रेष्ठश्चिंतामणिः स्मृतः ॥ तथा० ॥७२॥ यथा ग्रहेषु सर्वेषु श्रेष्ठः सोयं सुधाकरः ॥ तथा० ॥
७३॥ पावनेषु यथा भस्म श्रुत्युक्तं पावनोत्तमं ॥ तथा० ॥७४॥ कैलासतुल्यः कुत्रापि वेदेष्वपि न दृश्यते ॥
तथाप्यधिकमस्तीति वक्ता पापकुलाकुलः ॥७५॥ सन्निधिः सर्वदा यत्र मम तस्मात्किमुत्तमः ॥ कैलासे म

१२

संनिधिर्नित्यं तेनासावधिकस्स्मृतः ॥७६॥ विचित्रारचनास्तत्र वेदांतागोचरा अपि ॥ ततस्तत्र सुखं यावत्ताव-हराः ल्(?)
दन्यत्र कुत्रवा ॥७७॥ सर्वोत्तमः सकैलासः तत्र मे रमते मनः ॥ तत्रानंतानि रम्याणि वस्तूनि विविधान्यपि ॥७८॥ अ२५(?)
रहस्यमन्यद्वक्ष्यामि यत्र मे रमते मनः ॥ तदेव विधिनंदीश कैलास इति सादरं ॥७९॥ गौरी शरीरे रमते मम चि
त्तमनुत्तमं ॥ काश्यां शांभवचित्तेपि तदन्यत्र न सर्वथा ॥८०॥ त्रिष्वप्युत्तमं मन्ये केवलं शांभवं मनः ॥
तत्रानंदो यथा तद्वदानंदो यत्र कुत्रवा ॥८१॥ कल्प्यते बहुधा पूजा शांभवेन प्रतिक्षणं ॥ प्रतिक्षणं विशि
ष्टेष्टे क्षणदासा मनोरमा ॥८२॥ सतन्मनो विभूतया जातस्तत्र शिवालयः ॥ परार्धयोजनायामः कल्पि
तोरत्नमंडपः ॥८३॥ रत्नप्राकार संवीतः रत्नमंदिरमंडितः ॥ रत्नद्वारार्बुदाकीर्ण मेकैकं तत्र मंदिरं ॥८४॥
तत्रापि कल्पतरवः प्रसून समलंकृताः ॥ अर्पिताः कोटिशस्तेन कल्पिताः शिवमंदिरे ॥८५॥ तत्कल्पतरु
मध्यस्थं रत्नसिंहासनं वरं ॥ कोटियोजन विस्तीर्णं कल्पितं तावदायतं ॥८६॥ तदग्रे कल्पिता तेन पुष्पशय्या
मनोहरा ॥ तत्र स्थितमुमाकांतं मांचिंतयाति सादरं ॥८७॥ नव्यचित्रदुकूलानां पुंजैरावेष्टितं मुहुः ॥
नानापरिमलद्रव्य रसरागानुरंजितं ॥८८॥ दिव्याभरण संकीर्णं मिनिकांचि विराजितं ॥ ॥

३८८

रत्नकेयूरनिकराकांतिराजिविराजितं ॥८९॥ रत्नांगदार्बुदाकीर्णतत्कांतिनिकराश्रितं ॥ रत्नोत्तमपरिक्रांतक
टिसूत्रविराजितं ॥९०॥ दिव्यारत्नांगुलीयानां सहस्रेण समन्वितं ॥ अपारतारहाराणां विहारैश्च विराजितं ॥९१॥
मणिश्रेष्टसमाकीर्णकर्णाभरणभूषितं ॥ रत्नरत्नसमाकीर्णकोटीरगणराजितं ॥९२॥ नूपुरैरप्यपारैर्मां सदाप
रिवेष्टितं ॥ धूपैर्विचित्रैरगुरुप्रभवैरपि धूपितं ॥९३॥ रत्ननीराजनव्रातविराजितमुमापतिं ॥ दिव्यपक्वा
न्नगिरिभिः शर्करापर्वतान्वितैः ॥९४॥ दिव्याज्यवाहिनीयुक्तैः संतोषयति मां मुहुः ॥ सूपशाकगिरिव्रातसं
वेतोदनपर्वतैः ॥९५॥ मध्वाज्यवाहिनीयुक्तैः तोषयत्यनुवासरं ॥ सुधाफलैरपारैर्मां विविधैर्मधुरोत्तमैः ॥९६॥
संतोषं जनयत्येव सुधाधाराभिरादरात् ॥ तांबूलपर्वतानेवपूगपर्वतसंकुलान् ॥९७॥ मुक्ताचूर्णान्वितान्दि
व्यान्प्रयच्छतियथेच्छया ॥ एलालवंगगिरयः खादिरागिरयोपि मे ॥९८॥ एवंप्रतिक्षणं तेन मानसं मम पूजनं ॥
करोति प्रत्यहं भक्त्या नृत्यत्यग्रेयथेच्छया ॥९९॥ पंचामृतप्रवाहैर्मां अभिषिच्य मनोहरैः ॥ एवं पूजाविधानेन
कल्पितेशां भवेनमे ॥२००॥ तच्चित्ते यादृशं सौख्यं तन्नक्वापि मनोहरं ॥ मंदिरं शांकराकारं दृश्यते नंदिके
श्वर ॥२०१॥ सम्मृज्ज्य सदनं त्यक्त्वा धनधान्यादिभिर्नरः ॥ अन्यत्र याति किं लोके तथात्र पूज्यते कथं ॥२॥

गौर्यासह विहारार्थं पुष्पप्रासादकल्पना ॥ क्रियते तेन सततं तत्यागे मत्तिरेव न ॥३॥ शरीरेया दृशी प्रीतिः मदी- ह.ए.नृ.
येमम सर्वथा ॥ ततोप्यत्राधिका प्रीतिः शांभवे विग्रहे सदा ॥४॥ तेन छत्राण्यपाराणि मंडितानि मनोहरैः ॥ अ.२४
कल्पितैर्मणिभिर्दिव्यैः मुक्ताजालान्वितान्यपि ॥५॥ सुधाकरकराकारैरपारैरपि चामरैः ॥ चारुचामीकरा
कारदंड मंडलमंडितैः ॥६॥ नियतं शांकरो नित्यं मम सेवां करोत्यतः ॥ रम्यं शांकर मेवात्र शरीरं मम मंदिरं ॥७॥ किं
कैलासेन काश्या वा किं गौर्या मंदिरेण वा ॥ शरीरं शांकरं मन्ये रत्नमंदिर मंदिरं ॥८॥ प्रतिक्षणं तेन पूजा तथा वि
विधसाधनैः ॥ क्रियते तादृशी कुत्र पूजोपकरणानि ते ॥१०॥ मरंदरस संकीर्णकुसुमासारकल्पना ॥ क्रियते
तेन सान्येन कल्पनीया कथं मम ॥१०॥ तादृशः शांकरो वीरः कलौ कश्चिन्न विष्यति ॥ क्षिप्रः संप्रत्यधुना नंदि
न्नेते पूज्या न संशयः ॥११॥ एतावत्काल पर्यंतं त्वया पूजा कृता मम ॥ परंतु न तथा पूजा कृता, ज्ञाता पि न ध्रुवं ॥
१२॥ अधुना गम्यते नंदिन् रेवातीरं मनोहरं ॥ तत्रास्ति शांकरः कश्चित्तेन ध्यानं कृतं मम ॥१३॥ परंतु न तथा पूजा
कृता ज्ञाता पि न ध्रुवं ॥ आसायं तत्र विश्राम्य गौर्या सह विशेषतः ॥१४॥ प्रतिक्षणमपाराभिः पूजाभिः परि
वेष्टितः ॥ वसामि परमानंद सागरः करुणाकरः ॥१५॥ सायंकालेपि पूजां मे स करिष्यति सादरं ॥ महानिरि-

महापूजां सकरिष्यति सादरं ॥२६॥ ततः परं पुष्पशय्यां कल्पयिष्यति मे परं ॥ रत्नप्रासादमध्यस्थां मंदिरे रत्न
सुंदरे ॥२७॥ विहारसाधनं सर्वं कल्पयिष्यति भक्तितः ॥ रत्नदीपाः सुधाकाराः फलसारा मनोहराः ॥२८॥ पुष्प
साराः कल्पनीयाः मंद्वा ता मनोहराः ॥ ततः परं सवितरः विहार निरतेमयि ॥२९॥ निद्रा मुद्रान्वितः सोपि भवि
ष्यति कथं चन ॥ इदानीं तु त्वया नंदिन् कैलासं प्रति सत्वरं ॥३०॥ गंतव्यं रक्षणं कार्यं कैलासद्वार मंदिरे ॥ पुनर
प्यमृतामृता मृता ममनामामृतपानलोलुपा ॥३१॥ रसना शिवकीर्तनोत्सुका शिवगांगेवपुनाति मानसं ॥
शिवसज्जनसाधुवादगोष्ठी भुवनान्यपि तारयंति सत्यं ॥३२॥ इति श्री शिवरहस्ये हराख्ये तृतीयांशे शि
वगौरीसंवादो नाम चतुर्विंशोध्यायः ॥२४॥ ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ ॥ व्यास उवाच ॥ ॥
इत्युक्त्वा श्री महादेवो देवदेवः शिवायुतः ॥ प्राप शैव मनोरूपं मंदिरं सर्वसुंदरं ॥ तेन ध्यातो महादेवः स
र्वदेव शिरोमणिः ॥ अनंत वेद वेदांत वंदि वृंद निषेवितः ॥२॥ सेवितः परया भक्त्या गणैरगणितैरपि ॥ वृं
दारवृंदसंदोहै मंदुरै रभिवंदितः ॥३॥ तुषार गिरि संकाश वृषभारूढ विग्रहः ॥ रत्नछत्रार्बुदच्छायासमा
च्छादितवाहनः ॥४॥ अपारचामरोद्धूतवातपोत निषेवितः ॥ गौरी रम्यांग संगेन सर्व मंगल संयुतः ॥५॥

स्वमनो मंदिरापार प्राकार मणि मंडपे ॥ पुष्पोच्चय समाकीर्णे स्थित मीशमचिंतयत् ॥६॥ तत्रोपहारैः कृत्-
षैः संतुष्टे पुष्प पूजया ॥ दिव्यनार्यंगनानाट्य विलोकन रतं मुहुः ॥७॥ अपार रत्नद्वारा णिलीलवीतीर्वितन्त्र
तान्यपि ॥ आयांतं वृषभारूढं चिंतयामास शंकरं ॥८॥ प्रतिद्वारि महेशाय कल्पितं तेन सादरं ॥ पूजोपक
रणं तावत् यावता तुष्टधीर्भवः ॥९॥ अवतीर्य वृषाधीशाद्रत्न सोपान मार्गतः ॥ रत्न सिंहासनासीनं चकारम
णिमंदिरे ॥१०॥ मधुपर्कादिकं सर्वं तेनाशु परिकल्पितं ॥ गोक्षीरवाहिनी तेन स्नानार्थमपि कल्पिता ॥११॥
घृतांभोधिः कल्पितोपि दधिसारांबुधिस्तथा ॥ शर्करागिरयस्तेन स्नानायपरिकल्पिताः ॥१२॥ तद्वत्फ
लरसांभोधिः तदर्थं कल्पितस्तदा ॥ गंगाप्रवाहः शतधा कल्पितस्तेन मूर्धनि ॥१३॥ अपार रत्नकल
शैः कवोष्णा जल संयुतैः ॥ स्नानं प्रकल्पयामास स तु सांबाय शंभवः ॥१४॥ ततः परं दुकूलानि कल्पिता
न्यमितान्यपि ॥ ततो नंत मणिश्रेष्ठ महासिंहासनं वरं ॥१५॥ कुंदादि पुष्प संकीर्णं कल्पयामास सादरं ॥
त्रिपुंड्रं कल्पयामास चंदनैरनुलेपनं ॥१६॥ अपार रत्नाभरणैः भूषयामास शंकरं ॥ धूपयामास धूपै
श्च दीपयामास दीपकैः ॥१७॥ दीपमालाः कल्पिताश्च परितः शतयोजनं ॥ सूपोदनाद्विराज्यस्य

हर-तृ अ-२५

वाहिन्यः परिवेष्टिताः ॥१८॥ शाकपर्वतसंकीर्णाः कल्पितस्तेन सादरं ॥ ततः पक्वान्नगिरयः कल्पितास्तेन कोटिशः ॥१९॥ शर्करागिरिसंयुक्ता परमान्नस्य वाहिनी ॥ कल्पिता तेन महती मधुराघृतवाहिनी ॥२०॥ सुधामधुप्रवाहाश्च कल्पितास्तेन कोटिशः ॥ नारिकेरांबुवाहिन्यः तेन संकल्पितास्तदा ॥२१॥ ततश्च सिततांबूलदलपर्वतपंक्तयः ॥ क्रमुकाद्रिसमाकीर्णा चूर्णपर्वतसंयुताः ॥२२॥ एलालवंगकर्पूरकस्तूरीखदिराचलाः ॥ कल्पितास्तेन छत्रादि विचित्राण्यमितान्यपि ॥२३॥ कल्पितानि प्रयत्नेन ~~चाके~~ चारु चामरकोटयः ॥ सुगंधवालास्तेनांशुकोटयः परिकल्पिताः ॥२४॥ दर्पणान्यपि तेनैव रम्याणि विविधान्यपि ॥ चंद्रमंडलतुल्यानि शंकरायार्पितान्यपि ॥२५॥ शंकरार्थे सनाट्यार्थं तूर्णमप्सरसां गणान् ॥ कल्पयामास निपुणः कोटिशोपि मनोहरान् ॥२६॥ रत्नदंडांकितानंतरत्नछत्राणि शांभवः ॥ अपारचामरोपेतान् उपकल्प्य स हृष्टधीः ॥२७॥ प्रतिक्षणं पुष्पवृष्टिं मंदारकुसुमोद्भवां ॥ कल्पयामास सांबाय शंकरः सादरं द्विजः ॥२८॥ एवं तत्कृतया सांबः पूजया परया तया ॥ संतुष्टः प्राह तं सायं वचनैर्मधुरैर्हरः ॥२९॥ ॥श्रीशिव उवाच ॥ ॥

कृतं यत्पूजन मिदं मह्यं शंभव पुंगव ॥ तेन तुष्टोस्मि सहसा वरं वृणु यथेच्छया ॥३०॥ इत्युक्तस्तद्वचोवी - ह्‌ - चीसुधासारापरिप्लुतः ॥ समुद्यतस्तु किं कर्तुं प्रहृष्टः शंकरो द्विजः ॥३१॥ ॥शंकर उवाच॥ ॥ अ.२५

नमो नमस्तेस्तु नमो नमस्ते नमो नमस्ते गिरिजासहाय ॥३२॥ मृत्युंजयानामयमाम्नवाव गतिस्त्वमेवा सिममेंदुमौले ॥ ३२॥ त्वं कालकूटादि विषोद्भवानि दुःखानि सर्वाणि सुरासुराणां ॥ दूरीकरोषि त्रिज गज्जनित्री गौरीतवार्धांगमनंगशत्रो ॥३३॥ यो मंगलामंगलसूत्रसंगः स सांगभंगाय कदापि नासीत् ॥ सतावदाशुस्मृतएव शंभो शुभानि सूते सुतरां ततानि ॥३४॥ संतानसंघातसमूहवृद्धिः समृद्धिरीशानपदे स्मृते मे ॥ संभाविताताल विमुक्तिरत्ने निरंतरायासुरवृंदवंद्य ॥३५॥ यत्ते महादेव पदारविंदमानंदधारांबुदसुंदरं मे ॥ आनंदमत्यद्भुतमाततोति संदर्शनादेव पिनाकपाणे ॥३६॥ कल्याणराशिः समुदेतिवृद्धिं नष्टो महापातक पर्वतोपि ॥ आनंदगंगाविततरंगभंगे संगेन सिक्तं कुरु ते मनो मे ॥३७॥ अपारपुण्यानि फलोन्मुखानि तपांसि दानान्यमितानि तानि ॥ आनंदगंगा बवृधे समृद्धा मतिः प्रवृद्धा मम चन्द्रमौले ॥३८॥ त्वत्पादपद्मस्मरणे -

न्दुधाराप्यानंदधारांतनुते विचित्रां॥ त्रिनेत्र तत्पात्र महं पवित्रं त्वं नेत्र संसर्ग विधूतत्तंत्रं॥ ३९॥ यत्पा
दसेवा निरताः कृतार्थाः सुरेंद्रलोकादि पदार्थ मात्रे॥ वांछां न कुर्वंति सुमेरुहस्तो हस्तेन किं वा यव
सं विधत्ते॥ ४०॥ त्वत्सेवया केवलइंदुमौले लक्ष्मीः पुरोधावति बंदिरूपा॥ वाणी च वाणी रमणं विहाय
प्युमा सहाय स्मरणानुरागे॥ ४१॥ यागैर्नयोगैरपि सागरांत मही प्रदानैरपि गोप्रदानैः॥ सुखान्य पार
णिन चंद्रमौले त्वत्पादुकाराधन हेतुकानि॥ ४२॥ अपार संसार महांबुराशि विशोषणाय स्मरणं त
वैव॥ महाग्निकल्पान्यति पातकानि धाराधरत्येतदुमासहाय॥ ४३॥ ममत्वदीयश्चरणः प्रभूतमै
श्वर्यमाकल्पमनन्यलभ्यं॥ संपादयत्येव विमुक्तिमंते किमन्यदत्रापि वरायोग्यं॥ ४४॥ यस्मादि
हामुत्र सुखप्रवाहः त्वत्पादपद्मानु विलोकनेन॥ अतः किमन्यद्वरणीयमद्य यद्यस्ति तन्मेव
दसावधानं॥ ४५॥ स्वर्गापवर्गप्रद मित्यवैमि निधानदान क्षम मित्यवैमि॥ त्वत्पादुका ध्यान
मतो महेश किं देयमप्यस्ति जगत्त्रयेपि॥ ४६॥ अतः परं केवलमिंदुमौले त्वत्पादपद्मस्मरणा
नुरक्तिः॥ विरक्तिरप्यब्जजलोकवासेप्यस्तु स्मरारे स्मरमामनाथं॥ ४७॥ अनाथनाथस्त्व

मुमासहायमामप्यनाथं शरणागतं त्वां॥ प्रपन्नमंदारहरा मरेशलयासनाथं कुरुमामनाथं॥४८॥ हरः॥ त्वं ॥
यत्ते पदांभोरुहमब्जजादिमनः सरोजासनसंनिविष्टं॥ तत्कष्टनाशाय समर्थमेव स्मृतं कदा ॥ अ॰२५॥
चिन्मरणे क्षणेवा॥४९॥ अर्धेंदुमौले मरणक्षणे मे विभूतिरुद्राक्ष विभूषणस्य॥ त्वत्पादपद्मस्मर
णानुरागो भवत्वयं तावलव प्रसादः॥५०॥ तातस्त्वमेवासि ममेंदुमौले माता भवानी युवयोः प्रसादा
त्॥ महेश्वराराधक संततिर्मे सदा प्रवृद्धास्तु वरोय मेकः॥ ५१॥ मत्संततिः शंकरपूजनेन दिने दिने वृद्धि
मुपेत्य नित्यं॥ करोतु गौरीरमणांघ्रिपूजां प्रजाधनप्रापणहेतुभूतां॥५२॥ लोके महेशार्चकपादु
कार्चाधनार्जना सक्त धियो महांतः॥ सुखानि भुक्त्वा सुकृतै रुदारैर्दारैः कुमारैरपि भाग्य
वंतः॥५३॥ अनंतकल्याणपरंपराणां निदानमीशस्मरणं वरेण्यं॥ तदेवतावन्मम सर्वदास्तु म
त्प्रार्थनीयं च तदेव शंभो॥५४॥ शंभो भवानीरमण प्रभो मां त्वद्दासदासादि परंपरायं॥ विलो
क्य वा पाहि कृपानिधान गतिस्त्वमेवासि ममेंदुमौले॥५५॥ त्वमेव मातासि जगज्जनि
त्रिप्रिये महेशस्य पिता त्वमेव॥ महेश तस्मादेवदीनबंधो दयोरसार्द्रीक्षितटाप्रसारैः॥५६॥

अपार पाप प्रलयानल स्त्वं त्वत्पाद पद्म स्मरणं क्षणं वा ॥ अक्षीण पुण्या भरणे न लभ्यं त्वमीशते पा
द मनुस्मरामि ॥५७॥ श्री काल काल हृदये कलया मि नित्यं त्वां काल काल महिले कलयेऽनुवेलं ॥
मच्चित्त मस्तु युवयोश्चरणारविंदे वंदे मुहुर्मुहुरहं विजहा मि मोहं ॥५८॥ हे भूतनाथ भगवन्
गिरिजासहाय हे गौरि देवि गिरिजे शिववल्लभे मां ॥ पाहि स्मरांतक यमांतक चंद्रमौ ले पा
हि स्मृता पि मधुकैटभ हंत्रि धात्रि ॥५९॥ पाहि प्रभो भव भयापह मोह शत्रो पाहि त्रिलोचनस
दा सुर सार्व भौम ॥ पाहि प्रबोध जननि प्रलयावसान श्री फाल लोचन विहार विनोद लीले ॥६०॥ पा
हि प्रपन्न सुर लोक विलोक नेन कृत्वा सुरारि विलयं करुणा विधाने ॥ पाहि स्मरारि करचारु विचा
रितांगि श्री मंगले सकल मंगल दान लोले ॥६१॥ पाहि प्रसाद शिव भक्ति मनन्य धन्य मान्यं मद
न्य मपि धन्य मनन्य चित्तं ॥ पाहि प्रसाद सुमुखैः करुणा कटाक्षैः दाक्षायणि प्रणत पाप विना
शदक्षे ॥६२॥ पाहि त्वमेव गति रित्य नुवार मीशत्वत्पादपद्म भजनं करवाणि वाणी ॥ सैषा मम
स्फुरतु पाहि शिवे भवानि त्वत्पाद पद्म भजने मतिरस्तु नित्यं ॥६३॥ पाहि स्मरामि हरत्वे चर

णारविंदं मंदारकुंदनवबिल्वदलादि पूज्यं ॥ पाहि स्मरामि गिरिराजसुते त्वदीयपादांबुजं त्रिदशा[illegible]त्

चित्तकलत्रपात्रं ॥ ६५ ॥ वंदे सर्वसुरासुरप्रभुमुमाकांतं प्रशांतं मुहुः ॥ संतानद्रुमपुष्पमंडपमहा- अ.२५

सिंहासनाधिष्ठितं ॥ ६६ ॥ आनम्रामरविंदमौलिविलसत्कोटीरदिव्यप्रभापुंजव्यंजितपादुके तव

भजे मृत्युंजयाववमां ॥ त्वामाराध्यतमं वदंति मुनयः स्तोमा वतंसं प्रभुं वेदांत। अपि संस्तुवंति भगव

न्त्वत्पादपद्मं मुहुः ॥ ६६ ॥ त्वद्रूपं विदितं नयोगनिकरैर्योगैः इच निश्चितमिदं सर्वा त्मनाशंकर ॥ ६६॥

शर्वाणीकुचहेमकुंभविलसत्कोश्मीररेणुप्रभापूरापूरितदिव्यकांतिरुचिरं त्वत्पादपद्मं मुदा ॥ ६७ ॥

वंदे सुंदरमद्रिजाकरतलालंकारसारा करं वारंवारमनुस्मरामि सकलाभीष्टप्रदानाकरं ॥ ६७ ॥ कारुण्या

मृतसागरामरवरापारानतिव्यत्ययव्यत्यस्तोन्नतपादुकामितमणिश्रीरंजितं मां कुरु ॥ ६८ ॥ त्वामेवाह

मुपागतः शरणमित्यर्घेंदुमौले स्मर[illegible]प्यहमेक एव भगवन् किन्नाव सिष्ट प्रभो ॥ ६८ ॥ कल्याणानि

तनोतु मे तव पदांभोजं विपत्संततिं दूरीकृत्य महाघसागरमहाकल्लोलमालामपि ॥ ६९ ॥ लीला

ले खलु कालकालजगतां सृष्टिस्थितिध्वंसनान्यायासोपि न तत्र ते सततमप्येतत्तव क्रीडनं ॥ ६९ ॥

मामामुंच महेश मामकधिया मद्भागधेयं प्रियं शंभो त्वच्चरणारविंद भजनं तन्मे निधिस्तद्धनं ॥७०॥ तन्मे सौख्य
महांबुधिश्चतरणोपायोप्यपायांबुधेः ॥ आनंदांबुधिवीचिकादिरचना चातुर्यमर्यादभूः ॥७१॥ ॥इति श्री शिव
रहस्ये हराख्ये तृतीयांशे व्यासजैमिनिसंवादो नाम शैवप्रार्थनं पंचविंशोध्यायः ॥२५॥ ॥श्री काशीविश्वेश्वरा
र्पणमस्तु ॥ ॥व्यास उवाच ॥ ॥ इति तद्गिरमाकर्ण्य स कारुण्यार्णवः क्षणं ॥ सापर्णस्तं विलोक्याह वचनं च
सुधामयं ॥१॥ येयं भवत्कृता पूजा तया तुष्टोस्म्यसंशयः ॥ स्तोत्रेणानेन सुतरां तुष्टः पुष्टोस्मि शंभव ॥२॥ वरोयः
प्रार्थितो भक्त्या सोपि दत्तः किलादरात् ॥ किमदेयं ममाप्यस्ति मद्भक्तेभ्यो विशेषतः ॥३॥ भवद्भिर्यत्कृतं स्तोत्रं त
3/2
त्पठेद्यः सुबुद्धिमान् ॥ तत्संतति प्रवृद्धिः स्यात्तदैश्वर्यं च वर्धतां ॥४॥ इत्युक्त्वा तत्कृतां पूजां गृहीत्वा सादरं हरः ॥
तत्रैवांतर्दधौ विप्राः कोटिशो गणसेवितः ॥५॥ ॥ऋषय उचुः ॥ ॥कथा पापहरा सेयं सुधारूपा श्रुताधुना ॥
पुनः कुत्र स्थितं देव्या सहदेवेन शंभुना ॥६॥ ॥व्यास उवाच ॥ ॥ ततः कैलासमगमद्गिरिजावल्लभः
प्रभुः ॥ तत्रोपवनमासाद्य विहारनिरतो भवत् ॥७॥ रम्योपवनमध्यस्थरत्नमंडपमध्यगे ॥ रत्नसिंहासने स्थि
त्वा गौरीमाह हरो गिरं ॥८॥ पश्य बिल्वतरून्गौरि बिल्वांकुरसमावृतान् ॥ शिवलिंगार्चनस्थानं गत्वा गत्वा पुनः
पुनः ॥९॥

पश्य प्रसूनवल्लीनां कुलं याति प्रतिक्षणं ॥ शिवलिंगार्चनायाशु प्रसूनफलसंकुलं ॥२०॥ पश्य पश्याहर विंदानि सुंदराण्यति सुंदरि ॥ मंदमारुतसंवीत मंदारकुसुमान्यपि ॥२१॥ पश्यांकुरेषु पक्वानि फलानि विमलान्यपि ॥ विपुलानि विचित्राणि रसधारान्विलान्यपि ॥२२॥ पश्य पश्येक्षुदंडाग्र फलमंडलमंबिके ॥ तद्रसं च सुधाधारारस धिक्करण क्षमं ॥२३॥ अभूतपूर्वमेवास्मिन्वने सर्वमिहांबिके ॥ पश्य पश्य विनोदेन परमानंद साधनं ॥२४॥ शोभामभिनवामेनां पुनः पुनरनुक्षणं ॥ दृष्ट्वा गौरी महादेवं प्राह विस्मयसंयुता ॥२५॥ शंकरापार करुणा रस सागर सागर ॥ सादरं वद वृत्तांतं वनस्यास्य विशेषतः ॥२६॥ अमी किंतरवो लोके सांकुराः किंचरंत्यमी ॥ शिवार्चनाय पुष्पाद्यैः स्वतस्वालियत्नतः ॥२७॥ ॥ सदाशिव उवाच ॥ ॥ पुराहिमगिरेरेवकंदरेषु मुनीश्वराः ॥ तप्त्वा घोरेण तपसा श्रांताः शांता निरंतरं ॥२८॥ कल्पावसानपर्यंतं स्थितास्ते स्वतपोबलात् ॥ ततः परं प्रसन्नोस्मि तेभ्य स्व शुभानने ॥२९॥ ततस्तु त्वा प्रार्थितोपि वरस्तैरेव शैलजे ॥ अन्यैरप्रार्थितः पूर्वमपूर्वः स्वरः शिवे ॥३०॥ यस्तु वरस्तैः कृतो गौरि तं त्वं पापहरं शृणु ॥ वरस्वरूपं वक्ष्यामि तत्प्रार्थितमनाकुलं ॥३१॥ ॥ ऋषय ऊचुः ॥ ॥

वंदे सुराराधित मिंदुमौलिं वंदे भवानीरमणं महेशं ॥ वंदे महामेरुशरासनोरुकोटिप्रभाकूटविघट्टितांगं ॥२२॥ वंदे महानंदपदप्रदानं विहारलोलं खलु कालकालं ॥ वंदे पुरश्रीपरिहारहेतुं वंदे स्मराराति मुमासहायं ॥२३॥ वंदे तमर्धेंदुकलावतंसं तारा विहाराकर संवृतांसं ॥ वंदे मनोमानसराजहंसं वंदे भवानीस्मितमंदहासं ॥२४॥ वंदे मुकुंदाद्यमरासुराणां वंद्यं च वेदांतगणस्तुतं च ॥ वंदे प्रपन्नार्तिहरं परं तं वंदे मुहुः शंकरमेव वंदे ॥२५॥ वंदे जगत्सर्गविधानहेतुं वंदे जगत्पालनहेतुमीड्यं ॥ वंदे जगत्संहरणक्षमं त्वां वंदे भवानीमुखपद्मभानुं ॥२६॥ वंदे मुहुः संहृतकालकूटं वंदे स्मरारिं मदनांतकं तं ॥ वंदे तमेवांधकदुर्मदांधमहांधकारप्रलयानलं तं ॥२७॥ वंदे मुदा तं गिरिराजकन्याकुचांककास्मीरजांकितांगं ॥ वंदे मुहुः फालविलोचनं तं वंदे त्रिशूलस्फुरदग्रहस्तं ॥२८॥ वंदे पुनस्त्वां मृगशावहस्तं वंदे शिवालंकृतवामभागं ॥ वंदे विभूतिस्फुरदुन्नतांगं रुद्राक्षमालाकुलभूषणं तं ॥२९॥ वंदे चतुर्वर्गफलप्रदं तं वंदे वृषाधीश्वरकेतनं तं ॥ वंदे जटाजूटतटाभिघातविस्रस्तनक्षत्रगणावृतं तं ॥३०॥ ॥व्यास उवाच॥ ॥ इति स्तुत्वा महादेवं ते सर्वे मुनयस्तदा ॥ वरं देहि महादेव वरदोत्तम

३९३

शंकर ॥ ३१ ॥ प्रसीद नः प्रभो शंभो प्रपन्नार्तिहराधुना ॥ देहि नस्तरुरूपेभ्यः कैलासं गिरिजापते ॥ ३२ ॥ कैला
से खलु लिंगानि सन्ति दिव्यानि कोटिशः ॥ तत्पूजनोपयुक्तास्मस्व तस्व प्रसवैः सदा ॥ ३३ ॥ नाराधितानि
लिंगानि प्रसवैरनुवासरं ॥ अतो गतं वृथा जन्म तपसा केवलेन नः ॥ ३४ ॥ किं केवलेन तपसा देहशोषकरे
णवा ॥ व्यर्थं गतमिदं जन्म न कृतं लिंगपूजनं ॥ ३५ ॥ सञ्जीवन् मृत एवेति निश्चितो निगमैरपि ॥ येन नाराधि
तं लिंगं सांगं मंगलसाधनं ॥ ३६ ॥ बिल्वपत्रैः प्रसूनैर्वा फलैर्वा विमलैर्जलैः ॥ शिवार्चनं चेन्न कृतं तज्ज
न्म विफलं खलु ॥ ३७ ॥ लिंगे प्रसूनमेकं वा नवं बिल्वदलं मुदा ॥ येन दत्तं स भाग्यानां निलयं स्यादसंशयं ॥
अनुग्रहः परं शंभो कृतोस्मासु त्वयाधुना ॥ अनेनानुग्रहेणापि तन्नास्तु तरुरूपता ॥ ३९ ॥ शिवपूजोप
युक्तानां तरूणां मरणे सति ॥ अपर्णारमणावाप्तिर्भवतीति श्रुतिः श्रुता ॥ ४० ॥ अतोस्माकं वरानेतानी
प्सितान् देहि शंकर ॥ तदा तरुत्वमस्मभ्यं अपूर्वं तत्र दीयतां ॥ ४१ ॥ विलक्षणतरुत्वेन स्थितिरस्माक
मीप्सिता ॥ कृपानिधे यायदि ते दीनेषु करुणानिधे ॥ ४२ ॥ इति तद्वचनं श्रुत्वा तथास्त्विति महेश्वरः ॥
तत्रैवांतर्दधे विप्राः तत्प्रीतिमभिवर्धयन् ॥ ४३ ॥ ॥ ऋषय ऊचुः ॥ ॥ तपोदानं च पूजा च यागाश्च नियमा-
अपि ॥

शिवप्रसादपर्यंतं तत्प्रसादः फलं यतः ॥ ५४ ॥ प्रसन्ने सति गौरीशे पुनरन्यत्फलं तु न ॥ फलानां फलमुत्कृ
ष्टं प्रसादः शांकरो यतः ॥ ५५ ॥ ॥ व्यास उवाच ॥ ॥ न ज्ञायते प्रभावोयं महादेवस्य शूलिनः ॥ वेदां
तैरप्यतस्तस्य महिमा केन वर्ण्यते ॥ ५६ ॥ नीतं जन्म मुदा येन महेशपरिचर्यया ॥ स एव धन्यः पुण्या
त्मा स देवैरपि पूज्यते ॥ ५७ ॥ येनार्चनं महेशस्य शिवलिंगे प्रयत्नतः ॥ न कृतं तादृशं जन्म नव्यं सत्य
मुच्यते ॥ ५८ ॥ पत्रैः फलैः प्रसूनैर्वा नीरैर्दूर्वांकुरैरपि ॥ संपूज्य श्रीमहादेवं देवपूज्यः प्रजायते ॥ ५९ ॥
अत्रैवोदाहरंतीमं इतिहासं पुरातनं ॥ श्रवणेनापि भक्तिः स्यादितिहासस्य केवलं ॥ ६० ॥ पुरा श्री
गिरिदेशेषु कश्चिदासीन्नराधमः ॥ स दरिद्रोतिकृपणो कुष्टव्रणसमाश्रयः ॥ स्थित्वा ब्राह्मणवेषेण
परहिंसापरः सदा ॥ ततः स भिल्लवेषेण मृगया निरतः सदा ॥ ६२ ॥ अरण्यपक्षिजातानां मृगाणां
च विशेषतः ॥ मारणाय प्रवृत्तोपि न तद्धिंसां करोति सः ॥ अशक्तस्य कथं तेषां हिंसा नेनेन भवि
ष्यति ॥ तस्मादासाय मासीनो विपिने दुर्दशाश्रयः ॥ ६४ ॥ स्वतो मृतो भवेत्पक्षी यदि कश्चित्तथा स
तं ॥ आदाय याति सदनं तेन तस्यापि जीवनं ॥ ६५ ॥ कलत्रस्य सुतानां च कल्पितं तेन जीवनं ॥

शिवर० ३
१००

क्षुधातुराः सदा सर्वे तत्पोष्यास्ते क्षुधातुराः ॥ बृहतीफलजालानि समादाय कदाचन ॥ स भक्षणा-
र्थं मुमुक्षुः पाकं कृत्वा क्षुधातुरः ॥ ५७ ॥ तदानीं बृहतीपुष्पमेकमादाय तत्सुतः ॥ बालकः प्रक्षि
पद्भूमौ तल्लिंगे पतितं ततः ॥ ५८ ॥ ततः स दैवात् क्षुधया तत्र पंचत्वमागतः ॥ तदानीमागताः क्रूराः
कोटिशो यमकिंकराः ॥ ५९ ॥ ततो नीतो यमभटैः पालितो पियमालिके ॥ ततो दूराद्विलोक्यापि तं
कालः कंपमागतः ॥ ६० ॥ तदा कालश्चित्रगुप्तं प्राह कंपसमन्वितः ॥ अहो किमिदमाश्चर्यं पश्य
पश्येति सत्वरं ॥ ६१ ॥ अद्याद्भुतमिदं दृष्टं दुश्चिन्त्यमपि जायते ॥ भयं च हृदयारूढं किं कर्त्तव्य
मतः परं ॥ ६२ ॥ त्रिशूलपाणेरेतस्य दर्शनेन भयं भवेत् ॥ कंपोपि भवति स्पष्टं तथा शिवगणा
दपि ॥ अधुना तादृशं किंचिद दृष्टमिह सर्वथा ॥ भये सत्यपि कंपोयं कुतो वा मे प्रजायते ॥ अ
धैर्यं च समुत्पन्नं कोयमानीय पालितः ॥ दूतै रज्ञैर्मदीयैस्तैरधुना तद्विचार्यतां ॥ ६५ ॥ प्राय
शः सोयमुत्कृष्टोप्यानीतस्तैर्दुरात्मभिः ॥ अतः परं मया तेषां शिक्षा कार्या प्रयत्नतः ॥ ६६ ॥
इति तद्वचनं श्रुत्वा चित्रगुप्तोपि विस्मितः ॥ यममाहातिधीरं तं दूतान्वीक्ष्यापितं ततः ॥ ६७ ॥

॥ चित्रगुप्त उवाच ॥ ॥ अहो किमिद मारब्धं महादेवेन तन्मनः ॥ कथं भावि कदा किंवा करोतीति न विद्महे ॥ ६८ ॥ महेश्वरः स्वतंत्रो सौ करुणा रससागरः ॥ विभवास्तस्य बहव स्तेषां संख्या न विद्यते ॥ तस्याधमाधमे प्यस्ति कृपा यदि तदा परं ॥ स सर्व भाग्य संपन्नः कैलास मपि यास्यति ॥ ७० ॥ अनेन यत्कृतं पुण्यं मत्तस्त च्छृणु सादरं ॥ श्रुत्वापि यस्य माहात्म्यं मुक्तो भवति मानवः ॥ ७१ ॥ एतस्य तु पिता दुष्टो नष्टो धर्म विवर्जितः ॥ नाना पातक संक्रांतो दरिद्रो व्याधि पीड़ितः ॥ ७२ ॥ भ्रातरो प्यस्य दुष्टास्ते माता दुष्टा स्वभावतः ॥ कुलं च दुष्ट मेतस्य दरिद्र जन संकुलं ॥ ७३ ॥ एतत्कुल समुत्पन्ने रन्नमन्न मितिव्यथां ॥ कृत्वैव स्थीयते नान्नं लभ्यते केन केरपि ॥ ७४ ॥ मरणावसरे प्राप्ते बृहती कुसुमं परं ॥ विछिन्नं मलिनं क्षिप्तं तल्लिंगे पतितं यम ॥ ७५ ॥ तावता गिरिजाकांतः संतुष्टः कष्टनाशकः ॥ स्वदूतानाहतं शीघ्रं आनयं त्विति पुष्पके ॥ ७६ ॥ अतः परं समागत्य किंकरिष्यंतिते गणाः ॥ तन्न जाने यमातो यमकांड प्रलयः खलु ॥ ७७ ॥ अतः परं त्वमागत्य पाशैर्बध्वा दृढं यम ॥ भवंत मपि नेष्यंति मामप्यत्र न संशयः ॥ ७८ ॥ दूतानामत्र का वार्त्ता कृतांत मृत्यो तव ॥ अतः परं क्व गंतव्यं अस्माभिस्य तमे वचन ॥ ७९ ॥

३९५

यत्रापि गम्यते तत्र समागत्य गणास्ततः ॥ कुपितास्तेन यिष्यंति बध्वा पाशैर्दृढैर्यम ॥ ८० ॥ दूतानां चलया-हरा । तू
शिक्षा न कृता पूर्व मादरात् ॥ अतएवापदोयांतिकेनस्यात्तन्निवारणं ॥ ८१ ॥ अविचार्यकृतंकर्मदूतैरेतै अ० २६
र्दुरात्मभिः ॥ अतो दुःखसहस्राणि तव संभावितान्यपि ॥ प्रमादो दुःख हेतुर्हि तेन दुःखमवाप्यते ॥ किंच
न ज्ञातमस्माभिः शिव तत्वं तथा सति ॥ ८३ ॥ अशिक्षिताश्च दूतास्ते ततस्तैस्तैरनुक्षणं ॥ संभाविता
नि दुःखानि महा पापकृतान्यपि ॥ ८४ ॥ अतः परं वा यत्नेन तमानय विशेषतः ॥ पूजयस्वयथाकामंप्र
मादो मास्तु सर्वथा ॥ ८५ ॥ ॥ व्यास उवाच ॥ ॥ एतस्मिन्नंतरे काले शिवदूताः समागताः ॥ महे
श प्रेषिताः सर्वे विमानवरमाश्रिताः ॥ ८६ ॥ ते समागत्य तरसा पाशैर्बध्वा यमं मुहुः ॥ संताड्यनेतुमु
द्युक्तास्तदा ब्रह्मा समागतः ॥ ८७ ॥ विष्णुः समागतः पश्चादिंद्रेण सहसत्वरं ॥ ततस्ते प्रणताः सर्वे गण
पादांबुजे पृथक् ॥ ततः पूजां च कृत्वा ते गणेभ्यो भक्तिपूर्वकं ॥ तानूचुर्विस्मयाविष्टाः कृतांजलिपुटाः सुराः
॥ ८९ ॥ ॥ देवा ऊचुः ॥ ॥ नमोनमः शांभवेभ्यो गणेभ्यो वो नमोनमः ॥ नमो गणपतिभ्योपि गृत्सेभ्यो वो
नमोनमः ॥ ९० ॥ नमो गृत्सपतिभ्यश्च व्रातेभ्यो वो नमोनमः ॥ नमो व्रातपतिभ्यश्च विरूपेभ्यो नमोनमः ॥ ९१ ॥

नमोस्तु विश्व रूपेभ्यो महद्भ्यो वो नमो नमः ।। रथिभ्यो वो नमस्तुभ्यं रथेभ्यश्च नमो नमः ।।९२।। सेनाभ्य
श्च नमो नित्यं सेनानिभ्यश्च वो नमः ।। दातृभ्यो वो नमस्तुभ्यं संगृहीतृभ्य एव च ।।९३।। इति स्तुत्वा
पुनर्नत्वा गणान्पुष्पकसंश्रितान् ।। कृतांजलिपुटाः सर्वे मूर्ध्निकं प मुपागताः ।।९४।। क्षमध्वमपराधान्नः
सर्वथा प्रणतान्सुरान् ।। पश्यध्वं करुणादृष्ट्या पालनीया यतो वयं ।।९५।। अयमज्ञोय मोनास्यत्वपराधस्तथा
सति ।। क्षमा विधेया यूयं हि दयांबुनिधयः सदा ।।९६।। दूतास्तावदसंख्याता स्तेषां शिक्षापि दुर्लभा ।। मिताना मेव
शिक्षा स्यादमितानां तु सा कथं ।।९७।। यमस्यैकस्य गमनं कथं प्रतिगृहं गणाः ।। अपारगृहसंकीर्णमिदं
भूमंडलं खलु ।।९८।। यदि जानात्ययं तत्त्वं तदापायो घतः कथं ।। अधुना तस्य शिक्षापि नानीतस्य कृता खलु ।।
।।९९।। यमोपि चित्रगुप्तेन सह सर्वं विचार्य तत् ।। करोति शिक्षां तद्योग्यां सा पूज्यस्य न सर्वथा ।।१००।। पूज्यापूज्य
विचारोपि कृतस्तेन भविष्यति ।। इदानीं तु भवद्भिश्च त्वरया समुपागतं ।।१०१।। यमस्य बध्वानयनं यद्धाघात
पुरःसरं ।। यदाक्ववादया स्मासु दुःखितेषु गणेषु गणेश्वराः ।।२।। शिवाज्ञाकारिणामत्र न यद्यप्यस्ति दुर्ल
भं ।। तथाप्यस्तु विचारोत्र किंकरोतीत्ययं यमः ।। ३।। भवदाज्ञां समुल्लंघ्य कोवा जीवितुमिच्छति ।।

स्वर्गेपि सत्यलोकेपि वैकुंठेपि विशेषतः ॥४॥ अस्माकमपराधास्तु भविष्यंति क्षणे क्षणे ॥ क्षंतव्यास्ते विशेषेण नमो-
वो गणनायकाः ॥५॥ कालकालाज्ञया सर्वं भवद्भिः [क्रि]यते यदि ॥ तस्य निवारकः को वा सत्यं ब्रह्माण्डमंडले ॥६॥ किं
च भृत्यान्विनीतान्नः सापराधान्विशेषतः ॥ पालयध्वं प्रयत्नेन भवत्प्रतिभटाश्च के ॥७॥ अद्भुतं महदैश्वर्यं महा
देवस्य तस्य तु ॥ कृता यूयं माननीयाः पूज्याश्चाप्यसुरासुरैः ॥८॥ एकेनापि क्षणेनैव शंकरेण जगल्लयः ॥ क्षणेन
क्रियते तत्र बहूनां कृत्यमस्ति किं ॥९॥ शिवाज्ञया तु परया भवद्भिः समुपागतं ॥ अमोवृतो हि भवतां लक्ष्यः को
पस्य किं यमः ॥१०॥ कैलासभुवनद्वारि स्थित्वापि स्मरणं यदि ॥ शिक्षार्थं क्रियते तर्हि शिक्षितः किं न वै यमः ॥११॥
यमस्य तस्य का वार्ता वयं सर्वे गणाः सुराः ॥ भवदाज्ञापाशबद्धास्तत्र कः संशयो भवेत् ॥१२॥ किं चाद्य भाग्यमस्मा
कं यूयं शंकरकिंकराः ॥ नेत्रप्रसादपात्रत्वं प्राप्तं तद्भाग्यमेव नः ॥१३॥ अद्य श्रीमद्गिरीशा[न] पादुकादर्शनं कृतं ॥
भवद्दर्शनमात्रेण कृतार्थाश्च वयं गणाः ॥१४॥ अस्माकमपि यद्भाग्यं तदद्यैव फलोन्मुखं ॥ यतोद्य भवतां दृ
ष्टाः पुण्याश्चरणरेणवः ॥१५॥ ब्रह्माण्डमंडलस्यास्य पावनत्वं प्रकल्पितं ॥ अधुना पावनानां नो दुःखवार्ता
पि दूरतः ॥१६॥ आशास्यमिदमस्माकं भवत्पादावलोकनं ॥ तज्जातमधुना तावत्सुखं संभावितं खलु ॥१७॥

हराः तृः
अ॰२६

स्वंतेषुवदत्सु शंकरगणाः सर्वेषु बध्वायमं ॥ देवानप्यनुकूलतामुपगतान्कालस्य सर्वानपि ॥ २८ ॥ बध्वाता नपराधलेशरहितान्नेतुं तदैवोद्यताः श्रीमृत्युंजयशासनेन शमनं संताडयंतो मुहुः ॥ २९ ॥ इति श्रीशिवरहस्ये हराख्ये तृतीयांशे यमबंधननाम षड्विंशोध्यायः ॥ २६ ॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ व्यास उवाच ॥ ॥ यमादिबंधनोद्योगकोलाहलमुमापतिः ॥ श्रुत्वा नंदिनमाहूय प्राह युक्तं वचस्तदा ॥ ॥ श्रीसदाशिव उवाच ॥ ॥ त्वया गंतव्यमधुना सत्वरं नंदिकेश्वर ॥ रत्नपुष्पकमारुह्य विलंबस्तत्र नोचितः ॥ २ ॥ यमानुकूलतां प्राप्ताः सेंद्रोपेंद्रमरुद्गणाः ॥ तानानीय प्रयत्नेन शूलज्वालासु पातय ॥ ३ ॥ यावंतः प्रतिकूलास्ते ते सर्वे शूलघातनैः ॥ तत्तच्छृंखलबंधैश्च पीडनीयाः प्रयत्नतः ॥ ४ ॥ मदाज्ञोल्लंघनं कृत्वा प्रवृत्ता ये दुरासदाः ॥ ते पश्चाद्बहुबंधेन पीडनीया विशेषतः ॥ ५ ॥ किंच तस्य यमस्यापि तत्र क्रूरघातनैः ॥ यथा पीडा तथा कार्यं तत्र गत्वा प्रयत्नतः ॥ ६ ॥ तेषामानयनेनात्र न कृत्यमपि दृश्यते ॥ शिक्षा तत्रैव कर्तव्या तप्तमुद्गलघातनैः ॥ ७ ॥ कुंभीपाके पातनीयाः प्रयत्नेन सुरा अपि ॥ यमानुकूलतां प्राप्ता ते सर्वे नष्टबुद्धयः ॥ ८ ॥ किंच तेषां यातनायां तेषां चेन्मरणं तदा ॥ सृष्टिरन्यैव कर्तव्या सर्वथापि मदाज्ञया ॥ ९ ॥ तव प्रतिभटो लोके न कोपीत्यवधारितं ॥

अतस्तत्र यथाकामं सत्वरं याहि साकं ॥२०॥ तत्र तावद्विचारोपि न कार्यस्तैः सहाधुना ॥ प्रतिकूलत्वमापन्ना -हरा- तू हंतव्या एव सर्वथा ॥२१॥ यदि ते सामवाक्यार्थमाया स्यंति सुरास्तदा ॥ तीक्ष्णतलकशाघातैः अविचार्यैव तान्ह न ॥२२॥ इति तद्गिरमाकर्ण्य प्रणम्यापि महेश्वरं ॥ कृतांजलिपुटो नंदी प्राह वाक्यविचक्षणः ॥ ॥ नंदिकेश्वर उवाच ॥ ॥ महेश्वराज्ञा शिरसा धृता नात्रास्ति संशयः ॥ त्वदाज्ञाभंजको यस्यास्स हंतव्यो न संशयः ॥२४॥ ब्रह्मांडमंडले कोवा त्वदाज्ञाप्रतिकूलभाक् ॥ सकंपा एव तिष्ठंति सदा सर्वे सुरासुराः ॥ अपराधः कदा कोवा भविष्यति न विद्महे ॥ इति तिष्ठंति सर्वेपि सुराः शासनभीरवः ॥२६॥ किं चाधुना सुराः सर्वे संहर्तव्यास्त्वदाज्ञया ॥ तावता न भवस्तेषां न हानिरपि सर्वथा ॥२७॥ अन्यामरणां स्वर्गे तु भीतिस्तेषां कथं भवेत् ॥ नूतनापेक्षया जीर्णाः स्वतः शंकाकुलं किल ॥२८॥ एतेषामेव कर्तव्या शिक्षा तावद्यथोचितं ॥ अनुतप्तास्तत स्तेपि स्यास्यंत्याज्ञावशाः सदा ॥२९॥ शिक्षायां क्रियमाणायामपराधं पुनर्यदि ॥ करिष्यंति तदा सर्वे हंतव्या एव ते सुराः ॥३०॥ इति मे भाति भगवन् त्वयि विज्ञापना मया ॥ अशक्या कर्तुमेवेति निश्चितं च मुहुर्मुहुः ॥३१॥ ॥ व्यास उवाच ॥ ॥ इति तद्वचनं श्रुत्वा विचार्य हृदि शंकरः ॥ सम्यगुक्तं त्वया नंदिन उचितं कुरु सत्वरं ॥३२॥

इत्याज्ञप्तः प्रहृष्टोपि त्वरया नंदिकेश्वरः॥ जगाम पुष्पकारूढो यत्र देवाय मादय॥२३॥ नंदिकेशं समालोक्य दूरात्ते शिवकिंकराः॥ सकं पास्ताडयामासुः कशाभिरमरान्मुहुः॥२४॥ केचित्तत्कशाघातैर्मूर्छिता स्वतेसुराः॥ मुद्गरैर्भिंडिपालैश्च ताडिताः श्वासवर्जिताः॥२५॥ तप्तक्रकचसंघातनिहिताः पतिताः सुराः॥ चुक्रुशुश्च तदा सर्वाः सकं पाश्चामरांगनाः॥२६॥ तत्कोलाहलमाकर्ण्य गंधर्वा अपि चुक्रुशुः॥ तथैव मुनयः सिद्धाः गंधर्वा अपि पन्नगाः॥२७॥ ततः परस्परं प्रोचुस्ते सर्वे भयविह्वलाः॥ दुरात्मनायमेनेदमविचार्यकृतं खलु॥२८॥ शिवाज्ञा विस्मृता तेन प्रमत्तेन दुरात्मना॥ तत्कृते नापराधेन सुराः सर्वेपि दुःखिताः॥२९॥ अकांड प्रलयो लंभः कोयमत्य द्भुतोधुना॥ पाशैर्बध्वा सुराः सर्वे पतिताः शस्त्रमंडले॥३०॥ महाग्निज्वालया दंडैः कशाघातैश्च पीडिताः॥ अयं निरंतरा क्रोशः कदा शांतो भविष्यति॥३१॥ कदावानाशम ~~भस्मक्वंसशौर्य~~ भ्येति सेयं त्रिदशदुर्दशा॥ एतावत्कृतमेतैस्तु गणैर्नंदी समेष्यति॥३२॥ स किंवा कर्तु मुद्युक्तः तत्तावत् ज्ञायतेपिन॥ गणश्रेष्ठस्य तस्यात्र किमशक्यं सशौर्यवान्॥३३॥ किंच संपत्स मायातु महापद्मा विशेषतः॥ भोक्तव्य मागतं सर्वैः स्वतंत्रैः सुरैरपि॥३४॥ एवं वदत्सु सर्वेषु तत्र लोकनिवासिषु॥ तत्र नंदिनमालोक्य प्रणताः शिवकिंकराः॥ प्रणम्य नंदिकेशं तं गणाः

प्रोचुर्नताननाः॥ अस्माभिः कृत्यमेतावत्कृतं पश्य विशेषतः॥३६॥ यमानुकूलवचनैरेतैर्बद्धाः सुराः परं॥ ततश्शृंखल-हराः तू
लया खंडे निहताश्चाग्निसंकुलैः॥३७॥ यमस्तु पूर्वमेवात्र प्रबद्धः प्रहृतोपि च॥ एतेतु मूर्छिताः सर्वे कशाघातप्र
पीडिताः॥३८॥ अतः परं किमस्माभिः कर्त्तव्यं तद्वदाधुना॥ त्वदाज्ञाकारिणः सर्वे वयं तावदसंशयं॥३९॥ ततः सुरा
स्तुतं दृष्ट्वा नंदिकेशं गणोत्तमं॥ ततः समुदिताः सर्वे नंदिकेशावलोकनात्॥४०॥ तत्कटाक्षामृतासिक्तास्ते सर्वे विग
तज्वराः॥ विच्छिन्नबंधाः सर्वेपि प्रणतास्तत्पदांबुजे॥४१॥ पाहि पाहि कृपासिंधो सापराधानपि क्षणं॥ कटाक्षकरु
णासारैरभिषिंच मुहुर्मुहुः॥४२॥ शिवाज्ञोल्लंघनं तावदस्माभिर्नकृतं प्रभो॥ तथापि दुरवस्थेयं त्रिदशानामपी
दृशी॥४३॥ शिवपूजापरित्यागो न कृतः सर्वथा सुरैः॥ तथापि दुरवस्थेयं त्रिदशानामपीदृशी॥४४॥ शिवध्यानपरि
त्यागः न कृतः सर्वथा सुरैः॥ तथापि॰॥४५॥ शिवार्चकाराधनं च न त्यक्तं सर्वथा सुरैः॥ तथापि॰॥४६॥ उद्धूलन
परित्यागो न कृतः सर्वथा सुरैः॥ तथापि॰॥४७॥ रुद्राक्षधारणत्यागो न कृतः सर्वथा सुरैः॥ तथापि दुरवस्थेयं त्रि
दशानामपीदृशी॥४८॥ शिवपूजाद्रव्यनाशो न कृतो बुद्धिपूर्वकं॥ तथापि॰॥४९॥ उपेक्षितं च नास्माभिः अधु
नाशिवमंदिरं॥ तथापि॰॥५०॥ शिवदूषणवार्त्तापि न श्रुता क्वापि सर्वथा॥ तथापि॰॥५१॥ शिवावज्ञा

कृताक्वापि सर्वथाना सुरैरिह ॥ तथापि० ॥ ५२ ॥ न शांकर गणा वन्द्याः सर्वथापि कृता सुरैः ॥ तथापि० ॥ ५३ ॥ नत्य
क्तं मधुना देवैः शिव निर्माल्य धारणं ॥ तथापि० ॥ ५४ ॥ शिव तीर्थादन त्यागो न कृतः सर्वथा सुरैः ॥ तथापि० ॥ ५५ ॥
शिव निंदक पापिष्ठ पोषणं न कृतं सुरैः ॥ तथापि० ॥ ५६ ॥ शिवाभिषेक पानीयमपी त्वान स्थितं सुरैः ॥ तथापि० ॥ ५७ ॥
नत्यक्तं शिवनैवेद्यं भोजनं च सुरैरिहः ॥ तथापि० ॥ ५८ ॥ शिव मार्गा मार्जनं च न कृतं सर्वथा सुरैः ॥ तथापि० ॥ ५९ ॥
शिव मार्गे कंटकानां न कृतं चा निवारणं ॥ तथापि० ॥ ६० ॥ शिवालया मार्जनं च न कृतं सर्वथा सुरैः ॥ तथा० ॥ ६१ ॥ शिवा
लया परिष्कारो न कृतः सर्वथा सुरैः ॥ ६२ ॥ शिव दीपापरिष्कारो न कृतः सर्वथा सुरैः ॥ तथा० ॥ ६३ ॥ शिव नीराज
नादानं न कृतं सर्वथा सुरैः ॥ तथा० ॥ ६४ ॥ शिव धूपान र्पणं च न कृतं सर्वथा सुरैः ॥ तथापि० ॥ ६५ ॥ शिवा निवेदिता
न्नानि न भुक्तानि सुरैः सदा ॥ तथा० ॥ ६६ ॥ शिवा निवेदितं नीरं न पीतं सर्वथा सुरैः ॥ तथा० ॥ ६७ ॥ शिवा निवे
दितं वस्त्रं नोप भोगाय कल्पितं ॥ तथापि० ॥ ६८ ॥ शिवा निवेदितं सौख्यं नोप भोगाय कल्पितं ॥ तथापि० ॥ ६९ ॥
रंभासं भोगकाले पि शिव विस्मरणं न नः ॥ तथापि दुःखस्येयं त्रिदशानामपी दृशी ॥ ७० ॥ यद्यपराध मस्माकं वि
धेय मपि शासनं ॥ महेशानं न जानीमो महेशानस्त्व मेव नः ॥ ७१ ॥ आर्तार्त्तिध्वांत हरणे करुणा तरणिः क्षणं ॥ —

तरणोवास्त्व तरणो दत्तो दत्त हरप्रियः ॥७२॥ इतिदेववचश्रुत्वा नंदिकेशः कृपानिधिः ॥ तद्दुर्दशापहरणं चकार-हरःतुः
तदनंतरं ॥७३॥ ततः सिंहासनारूढो विमानादवतीर्यसः ॥ सुरैरा[illegible]धितो नंदी तानुवाचयथो चितं ॥७४॥ ॥ अ०२७
नंदिकेश्वर उवाच ॥ ॥ अपराधोयमेनाद्य यः कृतस्तेन जीवनं ॥ असंभावितमेवेति विज्ञेयमधुना सुराः ॥७५॥ न
कालमात्रप्रलयो भवतामपितद्दशात् ॥ संभावितोत्र प्रलयः सदेवा देशतो भवेत् ॥७६॥ उग्रोप्यनुग्रहश्चासीत्
प्रार्थनावचनैर्मम ॥ अन्यथा सुरवर्गस्य जातस्याद्विलयः खलु ॥७७॥ भवद्भिः सहयामे श्रीममयासापरं सुराः ॥ भव
तांरक्षणायासीत् अन्यथा तत्कथं भवेत् ॥७८॥ यमस्याप्य पराधोत्र वस्तुतो नास्तियद्यपि ॥ तथापिदूतदोरा
त्म्यं यमनाशाय कल्प्यते ॥७९॥ नशिक्षयति कालोयं कालेकाले स्वकान्मुहुः ॥ दूतानतः शिक्षयेति सवक्तुमिवशि
क्षितः ॥८०॥ इत्युक्तवंतंतंदेवाः कालेनापि समन्विताः ॥ प्रणताः पुनरूचुस्ते विनया नतकंधराः ॥८१॥ ॥ देवाऊचुः ॥
॥ आनीतस्तावदधुना सतावन्नैव शिक्षितः ॥ नहुतः पीडितोवापि विचारः क्रियतेधुना ॥८२॥ अविचार्यकर्म
कर्मकर्त्रा[illegible]य मधुना सुरैः ॥ असर्वज्ञास्वभावेन सर्वज्ञः केवलं शिवः ॥८३॥ विना विचारंयद्यस्य पूजनं क्रियते
तदा ॥ जातस्यतदपराधोपिनस्याद्दालन्तविद्महे ॥८४॥ किमस्य पुण्यं पापंवा प्रवृद्धंतद्विचार्य तत् ॥ —

पश्चात्कार्यं यथा योग्यं कर्त्तव्य मिति निश्चयः ॥८५॥ गणाभ्यागमनेनायं ज्ञायते पुण्यवानिति ॥ तत्पूर्वं तत्कथं ज्ञेयं ज्ञायतेऽधुनापि तत् ॥८६॥ किमनेन कृतं पुण्यं भवदागमनक्षमं ॥ नदानैरपि यागैर्वा भवदागमनं भवेत् ॥८७॥ तुलादानादिदानानि कृतानि बहुभिर्मुहुः ॥ त्वय्यागम्यात्र तिष्ठंति विचारः क्रियते ततः ॥८८॥ यागा अप्यश्वमेधांताः कृता येस्ते पि संततं ॥ आगत्यात्रतु तिष्ठंति पश्चात्स्यात्तद्विचारणा ॥ ८९॥ अनेक युग पर्यंतं यैः कृतं तपसा कृशं ॥ शरीरं ते समागत्य तिष्ठंत्येतान्विलोकय ॥९०॥ एतैर्गो कोटिदानानि कृतानि बहुधा पुरा ॥ तिष्ठंत्यत्रैव ते सर्वे तानेतान्पश्य सत्वरं ॥९१॥ यैर्भूप्रदक्षिणं पूर्वं कृतं तै रप्यनाकुलैः ॥ स्थीयते पश्य पश्यैतान्कोटिशो नंदिकेश्वर ॥९२॥ आयास्यंत्यधुना धन्या धनवृष्टि परायणाः ॥ दृष्टव्यास्ते त्वया स्वामिन्येतानप्यवलोकय ॥९३॥ अनेन प्रत्यहं लक्षं रत्नानामेव दीयते ॥ ब्राह्मणेभ्यः प्रयत्नेन तिष्ठत्यत्रावलोकय ॥९४॥ अनेन प्रत्यहं लक्षं गवां दत्तं महात्मना ॥ अयं च स्थापितो स्त्यत्र तद्विचारो भविष्यति ॥९५॥ अनेन सस्यसंपूर्णां महीं दत्वा मुहुर्मुहुः ॥ एतस्यागमने कालो भूयानेव गतः खलु ॥९६॥ नवान्यनेन बहुधा सवनानि कृतान्यपि ॥ एतादृशाः कोटिशो पि तिष्ठंत्यत्रय मालये ॥९७॥ तटाकाः कारितास्तेन कोटिशः सागरोपमाः ॥ एतादृशाः कोटिशो पि तिष्ठंत्यत्रयमालये ॥९८॥ अत्युग्रेमहा-

१०८

रण्ये प्रपास्तैः कारिता मुहुः॥ महा ग्रीष्मे पि तिष्ठंति पश्यैतान्यम मंदिरे॥९९॥ अनेन मेरु तुल्यानि दत्तानि व- हरा॰ तृ॰
सनान्यपि॥ दरिद्रे भ्यो विशेषेण पश्यतं यम मंदिरे॥१००॥ गोक्षीर कुंभाः शत शो दत्तास्तेन प्रयत्नतः॥ प्रत्यहं अ॰ २७
विप्रवर्गेभ्यः पश्य पश्य यमालये॥१॥ अन्न प्रदानै रेतेन कोटिशस्तोषिता द्विजाः॥ एता दृशा मुहुः पश्य को
टिशो यम मंदिरे॥१०२॥ कन्यादानैर्विधीलस्तैः कालः कनक संयुतैः॥ एता दृशाः कोटिशोपि संतिपश्य यमा
लये॥३॥ आवृत्तानि मुहुस्तैस्तु महा दानानि कोटिशः॥ न तेषां गणना प्यस्ति सर्वथा यम मंदिरे॥४॥
गो कोटि पान योग्यानि कुल्यान्यपि कृतानि तैः॥ पश्यतान्नंदिकेशाद्य यम मंदिर संस्थितान्॥५॥ रत्न
प्रासाद दानानि तैः कृतान्येव कोटिशः॥ तेषां न गणनाद्यापि पश्य पश्य यमालये॥६॥ कृतानि तैः को
टिशो पि सरांसि विपुलान्यपि॥ वाप्यः कृताश्च संपूर्णाः जलैः पश्य यमांतिके॥७॥ पर्यंक शय्यादाना
नि कोटिशस्तैः कृतान्यपि॥ पश्यतान्प्रलिलान्दूरे छत्र दान परानपि॥ धनैर्धान्यैश्च गोवृंदैः गृहोपकर
णैः सह॥ गृहास्तु कोटिशो दत्तास्तैस्तानात्र विलोकय॥९॥ पांथ छायानुकूलाश्च वृक्षास्तै कोटिशः कृ
ताः॥ पांथेभ्यो जल मन्नं च दत्तं तैस्तान्विलोकय॥१०॥ सुगंध पुष्प मालापि दिव्य चंदन कर्दमैः॥ —

कोटिशस्तोषिता विप्रास्तैस्तानत्र विलोकय ॥११॥ अतः परं कदा तेषां विचारोपि भविष्यति ॥ तेषां विनिर्गमो
वास्यात्तेषां तु गणनापि न ॥१२॥ परार्धादपि तिष्ठंति तेषां किं गणनाधुना ॥ तावतां गणना तावत्कल्पांते
भाविवानवा ॥१३॥ एकैकस्य विचारेण पुण्यपापानुयोगतः ॥ कालापनयनं तावत्कालस्यास्य प्रजायते ॥१४॥
जलपानार्थमप्यस्य नावकाशः प्रजायते ॥ कालं नयति कालोयं धर्माधर्मविचारणे ॥१५॥ एतादृशस्य कालस्य
शासनार्थं किमुद्यमः ॥ युक्तो भवति येनास्य ताडनं कृतमीदृशं ॥१६॥ शिवलिंगार्चनं त्यक्त्वा किमनेनाधुनाप्य
यं ॥ शासनार्हाः कथं यूयं शूराग्रेसराः खलु ॥१७॥ पश्य त्रिपुंड्रं तत्फाले कंठे रुद्राक्षमालिकां ॥ एतस्य ताडने
भीतिः शांकरा भवतां न किं ॥१८॥ शिवलिंगार्चकान्स्मान्भूतिरुद्राक्षभूषणान् ॥ पश्य व्रणानि चा
स्माकं अंगेषु घातजान्यपि ॥१९॥ अस्मासु दुर दृष्टानि किमद्यापि गणेश्वर ॥ भूतिरुद्राक्षदेहानां
दुःखमेतत्कथं मतं ॥२०॥ इत्युक्त्वा विरतादेवाः प्रणिपत्य पुनः पुनः ॥ व्रणापीडितसर्वांगास्तदा घात
भयासुराः ॥२१॥ यस्यैश्वर्यमपारमद्भुतमघानाक्रांतमंतं विना तिष्ठत्य प्रतिमंतमेव शरणं मन्ये कृपा
सागरं ॥ गौरीचारुपयोधराधरवलीहारावलीके[illegible] लिका लीलालोलमिहानुवेलमकलं श्रीकाल—

कालंभजे ॥२२॥ ॥ इति श्री शिवरहस्ये हराख्ये तृतीयांशे व्यास मुनि संवादे नाम सप्त विंशोध्यायः ॥२७॥
॥ श्री काशी विश्वेश्वरार्पण मस्तु ॥ ॥ व्यास उवाच ॥ ॥ इति देव वचः श्रुत्वा नंदिकेशः शिवं स्मरन् ॥
शिव प्रभावं सस्मार विलक्षण मनामयं ॥१॥ ॥ नंदिकेश्वर उवाच ॥ ॥ श्रुणु विष्णो श्रुणु ब्रह्मन् श्रुणु काल शचीपते ॥ श्रृण्वंतु अन्ये सुरगणाः प्रभावं शांभवं मुहुः ॥२॥ महेश्वरः सर्व सुरोत्तमोयं अनामयोयं जगदीश्वरोयः ॥ मृत्युंजयोयं मदनांतकोयं कालांतकोयं मम भागधेयं ॥३॥ अस्माक माराध्य तमं प्रकृष्टं विश्वेश्वर श्री चरणारविंदं ॥ आनंदकंदं तदिदं प्रमोदं ददातु मंदं स्मृत मप्य मंदं ॥४॥ वंदे मुहुर्दैवतसार्व भौमं सोमावतं संगरलावतंसं ॥ तमेव वेदांतगणास्तुवंति तं देव देवं शरणं प्रपद्ये ॥५॥ यदा कदाचित्धृदयारविंदे महेश्वर श्री चरणारविंदं ॥ क्षणं चरं तो यदि चिंतयंति तदा कृतांतस्य पदं न यांति ॥६॥ यः काल कालः श्रुतिषु प्रसिद्धः तं काल कालं प्रणमंति संतः ॥ ते तावदंते न कृतांत भीतिं प्रयांति यांत्येव शिवं प्रसन्नं ॥७॥ न चायमन्यामर तुल्य रूपोयतो विरूपाक्ष इति प्रसिद्धः ॥ को वा विरूपाक्ष समक्षमेति विना विरूपाक्ष कटाक्ष लेशं ॥८॥ धर्मैरपारैरलमेव यागैः दानैरपारैरलमेव योगैः ॥ ९ ॥

तपोभिरुग्रै रलमेव किं तैः तं काल कालं कलये नु वेलं ॥९॥ धर्मोपि कोबालदुमासहाय स्वरूप दानेपि समर्थमेव ॥ एकं नवं बिल्व दलं शिवाय समर्पितं तत्तुलनां प्रयाति ॥१०॥ खंडानि पत्राण्यपि चंद्रमौलिः छिन्नानि पुण्यान्यपि लीलया वा ॥ क्षिप्तानि गृण्हाति शुभं ददाति मुक्तिं ददाति प्रतिभः सधर्मे ॥११॥ किमश्वमेधादिक याग वृंदैः नतैः शिवाराधन पुण्यराशेः ॥ लेशोस्तियः सूक्ष्मतरो मितांतं तेनापि तुल्या न भवंति ते तु ॥१२॥ गोकोटि दानैरपि किं फलं स्यान्नते शिवाराधन पुण्यराशेः ॥ लेशोस्ति० ॥१३॥ किमुत्तमाश्वार्बुददान संघैः नतैः शिवाराधन पुण्य राशेः ॥ लेशोस्तिः ॥१४॥ किं कांचनाभ्यर्चितकन्यकानां दानैरपारैरनुवासरं वा ॥ ते लिंग पूजा फल लेश लेश लेशेन किं तत्तुलनां प्रयांति ॥१५॥ सस्यादि संपूर्ण महिप्रदानैः किं तैरनंतैरपि तानि तानि ॥ ते लिंग पूजा फल लेश लेशेन किं तत्तुलनां प्रयांति ॥१६॥ ~~पूर्ण महि प्रदानैः किं तैरनंतैरपि तानितानि ॥ ते लिंग पूजा फल० ॥१६॥~~ नवानि सांद्राणि विनिर्मितानि किं तान्यनंतान्यपि संततानि ॥ ते लिंग पू० ॥१७॥ किमन्न दानैरमितैर्विचित्रैर्घृतादिकैर्द्रव्य समन्वितैर्वा ॥ ते लिंग पूजा० ॥१८॥ गोक्षीरपूर्णामृत कुंभदानैः धन प्रदानैश्च फल प्रदानैः ॥ ते लिंग पूजा० ॥१९॥ विचित्रवस्त्राभरणार्बुदानां दानैरपारै

802

शिवरहस्य
१०८

दक कुंभ दानैः॥ तेलिंगपूजा०॥ २०॥ सुगंध पुष्पा फलमालिकानां दानेरपारैरपि किं फलंस्यात्॥ तेलिंगपूजा०॥ हरा०लु

॥२१॥ लिंगे प्रदत्तं कुसुमंदलंवा फलं जलं वातदुमा सहायः॥ गृण्हाति तेनैव ददाति भाग्यं अनंतमंतेसद

अ०२२

दाति मुक्तिं ॥२२॥ दूर्वांकुरैर्वा शिवलिंगरूपं संपूज्य भक्त्या प्रणमंतियेते॥ तीर्त्वैव संसार महांबुधिं ते

प्रयांति संतः खलु काल कालं॥ २३॥ लिंगेयदल्पंफल मंबुवान्य द्दत्तं तदेवा मितपुण्य हेतुः॥ नतेनतुल्यं

जगतीतले स्मिन् शुभावहं पाप विनाश हेतुः॥२४॥ शिवाययः प्रत्यह मादरेण दत्वा जलं बिल्वदलानिद

द्यात्॥ तत्पुण्यतुल्यंतु नपुण्य मस्तिदृष्टं श्रुतंवाश्रुति षु प्रसिद्धं ॥२५॥ शिवाय दद्याद्यदि मुष्टिमात्रं

भक्त्यायदन्नं घृततले श युक्तं॥ तत्पुण्य०॥२६॥ दीपं महेशायघृताभिषिक्तं सद्व र्त्तिकायुक्त मपिप्रद

द्यात्॥ तत्पुण्य०॥२७॥ धूपं महेशायघृतेनयुक्तं ददातियः प्रत्यह मादरेण ॥ तत्पुण्य०॥ २८॥ दधिप्र

दानं गिरिशाय भक्त्याकरोतियः प्रत्यहमादरेण ॥ तत्पुण्य०॥२९॥ क्षीर प्रदानं गिरिशाय भक्त्याकरो

तियः प्रत्यहमादरेण ॥ तत्पुण्य०॥ ३०॥ घृत प्रदानं गिरिशाय भक्त्याकरोतियः प्रत्यह मादरेण॥ तत्पु

ण्य०॥३१॥ त्रिला प्रदानं गिरिशाय भक्त्याकरोतियः प्रत्यह मादरेण ॥ तत्पुण्य०॥ ३२॥ फलप्रदानानि-

मृडाय भक्त्या करोति यः प्रत्यहमादरेण ॥ तत्पुण्य० ॥ ३३ ॥ मधुप्रदानानि भवाय भक्त्या क्रोति करोति यः प्रत्यहमा
दरेण ॥ तत्पुण्य० ॥ ३४ ॥ तांबूलदानं गिरिशाय भक्त्या क० ॥ तत्पुण्य० ॥ ३५ ॥ एलालवंगादिकमादरेण ददाति यः
प्रत्यहमीश्वराय ॥ तत्पुण्य० ॥ ३६ ॥ ददाति यो दर्पणमीश्वराय मनोहरं प्रत्यह ॥ तत्पुण्य० ॥ ३७ ॥ करोति यश्चा
मरवीजनेन बाल प्रसारं गिरिशाय नित्यं ॥ तत्पुण्य० ॥ ३८ ॥ छत्रप्रदानं नियमेन नित्यं करोति
यः सर्वसुरोत्तमाय ॥ तत्पुण्य० ॥ ३९ ॥ ध्वजाप्रदानं गिरिशाय नित्यं करोति यः प्र० ॥ तत्पुण्य० ॥ ४० ॥ नाट्यप्रदानं
गिरिशाय नित्यं करोति यः प्र० ॥ तत्पुण्य० ॥ ४१ ॥ तूर्यप्रदानं गिरिशाय नित्यं करोति यः प्र० ॥ तत्पुण्य० ॥ ४२ ॥
संमार्जनं शंकरमंदिरस्य करोति यः प्र० ॥ तत्पुण्य० ॥ ४३ ॥ दीपावलिं शंकरमंदिरेषु करोति यः प्र० ॥ तत्पु० ॥
४४ ॥ दुकूलदानं गिरिशाय भक्त्या करोति यः प्र० ॥ तत्पु० ॥ ४५ ॥ करोति यः पुष्पवितानदानं भक्त्या महेशाय
विशेषकाले ॥ तत्पुण्य० ॥ ४६ ॥ वसंतकाले नवचंदनेन करोति लिंगेष्वनुलेपनानि ॥ तत्पुण्य० ॥ ४७ ॥ दध्यन्न
दानेन करोति पूजां नित्यं महेशाय तु सोपदंशं ॥ तत्पुण्य० ॥ ४८ ॥ क्षीरान्नदानेन करोति पूजां नित्यं म० ॥
तत्पुण्य० ॥ ४९ ॥ घृतान्नदानेन करोति पूजां नित्यं महे० ॥ तत्पुण्यतुल्यं तु न पुण्यमस्ति दृष्टं श्रुतं वा श्रुति

शिवरह० ३
३०९

षुप्रसिद्धं॥५०॥ मध्वान्नदानेन करोति पूजां नित्यं महेशाय तु सोपदंशं॥ तत्पुण्य०॥५१॥ महेशनैवेद्य -हस्य०लु विशेषदानैः यः शंकरं तोषयति प्रयत्नात्॥ तत्पुण्य०॥५२॥ महेशदत्तैर्व सनैर्धनैर्वा यः शंकरं तोषयति अ०२५ प्रयत्नात्॥ तत्पुण्य०॥५३॥ किं लिंगार्चन पुण्य तुल्य मनघं पुण्यं श्रुतं त्वद्धतः॥ पुण्यानामपि पुण्य मुत्तम तमं तत्सर्व पुण्यालयं॥५४॥ तन्मूल्यं जयतोषकारण मिति ज्ञातं तदेवोत्तमं॥ तद्वेदांत शिरोमणि श्रुति मतं किं तेन तुल्यं सुराः॥५५॥ रे रे सुराः शिवपदांबुज पूजनेन तुल्यं न पुण्य मतुलं तदपार पुण्यैः॥ साध्यं त देव सुकरं करवीर पुष्पै दूर्वांकुरै रपि कृतं वितनोति मुक्तिं॥५६॥ विश्वासः शिवपूजनेप्यगणितैः पुण्यैः परं जायते॥ जातस्याप्यनुवर्त्तनं बहुतरैः पुण्याब्धि भिर्जायते॥ तत्पूजाकरणेन पुण्य निधयः प्राप्ताः समस्तास्तदा कल्याणं बुधयोप्यपार विभवाः प्राप्ताः परार्धाधिकाः॥५८॥ कामं काय विशेषणाय मुनिभिस्त्यक्तं ततः किं तु तो लिंगाराधन मंतरेण मरणे भोगस्य मुक्तेरपि॥ वार्त्तानेत्यवधारितं श्रुतिगणैः लिंगार्चनं कामदं सर्वेषामिति निश्चितं तदितरत्सर्वं तुषान्वेषणं॥५९॥ एकं बिल्वदलं नवं शुचि शोभित मप्य... म्लान मप्यल्प मत्यल्पं यत् शिवलिंग भागनिहितं हत्यापदांभोनिधीन्॥

कल्याणांबुधिपंक्तिमप्यनुदिनं तावत्करोत्यन्वहं मोदांभोधिविवर्धनं च बहुधा मुक्तिं तनोत्यंततः॥६०॥ सत्यं सत्यमिहोच्यते सुरगणाः सत्यं पुनः सर्वथाप्युधृत्याशु भुजद्वयं शपथमप्यंबापदांभोरुहं॥ कृत्वा शंकरचारुचारुचरणांभोजे पि लिंगार्चनं सर्वाभीष्टदमेव तेन सदृशं पुण्यं न लोकत्रये॥६१॥ यत्तल्लिंगसमर्चनं मुनिजनाः शास्त्रं रहस्यं परं वक्तव्यं शिवपूजनोत्सवरसाविर्भावतुष्टायतु॥ इष्टायामितपुण्यकीर्तिविभवाकाराय हारायतन्नास्यस्मै शिवनिंदकाय शपथः शंभोः प्रभोः पादयोः॥६२॥

॥व्यास उवाच॥

॥नंदीश्वरवचोवीचीपानपीनात्मविग्रहाः॥ शिवानुग्रहमासाद्य प्रापुरानंदमद्भुतं॥६३॥ ततः परमनेनापि दूतानीतेन किं पुरा॥ पुण्यं कृतं वदास्माभिर्न ज्ञातमिति चोचिरे॥६४॥

॥नंदिकेश्वर उवाच॥

॥ किं वक्तव्यं मया देवाः त्रिनेत्रस्याद्भुतं खलु॥ चरित्रं तत्पवित्रं हि पवित्राणां विशेषतः॥६५॥ हरस्यामखवीरस्य रंकेष्वप्यविशंकया॥ अनुग्रहस्तदुग्राणां परमानंदसाधनं॥६६॥ स्वतंत्रः स महादेवो यं पश्यति दयार्णवः॥ तेन तीर्णः स संसारपापनक्राकरः खलु॥६७॥ प्रभुचित्तानुसारेण किंकराणां तु वर्त्तनं॥ अन्यथा विपरीतं स्यात् इति निश्चितमेव हि॥६८॥ तदुक्तिरेव वेदार्थो वेदवक्ता स एव हि॥ प्रामाण्य-

मपिवेदानांनस्वतः परमार्थतः॥६९॥ परंतु शिववाक्यत्वस्वरूपेणेति निश्चितं॥ वेदास्तु शिववाक्यानि-हराः तु
प्रामाण्यं तेषुसर्वथा॥७०॥ धर्मतत्वं महेशेन ज्ञायतेनामरैरपि॥ किंनरैर्वानगंधर्वैर्नराणां तत्रकाकथा॥
७१॥ नित्यंसर्वज्ञमूर्त्तित्वादृष्टमूर्तिः परंस्वतः॥ जानातितत्वंधर्माणां सर्वेषामपिवस्तुतः॥७२॥ अयमेता
दृशोधर्मः फलमस्येदमित्यपि॥ जानातिभगवान्शंभुः सांबः संसारमोचकः॥७३॥ तन्मायया परं विश्वं
मोहितंतच्चराचरं॥ संसारे पातयत्येव पुनःपुनरनेकधा॥७४॥ अहो महेश्वरैश्वर्यं अपारमतुलं खलु॥
तत्केन ज्ञायते लोके वेदैर्न ज्ञायते यतः॥७५॥ तदुक्तवचनैर्वेदैस्तद्रूपावगमः कथं॥ अस्मदुक्तेनवा
क्येननास्मज्ज्ञानं यथा तथा॥७६॥ वेदांतगोचरं रूपं सच्चिदानंदलक्षणं॥ तदस्माभिः कथं ज्ञेयं दुर्ज्ञे
यत्वावधारणात्॥७७॥ येलीलाविग्रहाः शंभोस्तेप्यनंतास्तथाविधाः॥ तत्ज्ञानमप्यशक्यं हि सर्वथै
वस्वभावतः॥७८॥ एकैको विग्रहस्तस्य नास्मन्नयनगोचरः॥ तेजःपुंजसमाक्रांतास्तेजःपुंजाः
स्वभावतः॥७९॥ द्विबाहवो विग्रहास्तु कोटिशः परमात्मनः॥ तस्यैवकोटिशस्तावत्तेचतुर्बाहवःप
राः॥८०॥ केचिदष्टभुजास्तस्य केचिच्चदशबाहवः॥ सहस्रबाहवः केचित्केचित्ते लक्षबाहवः॥

तेकोटिबाहवः केचित्केचिदर्बुदबाहवः॥परार्धबाहवः केचिन्महादेवस्यविग्रहाः॥८३॥ दिव्याभरणसंपन्नाः
तेसर्वेमेरुसंनिभाः॥दुकूलसंवृताः सर्वेदिव्यचंदनचर्चिताः॥ उमार्धविग्रहाःसर्वेत्रिशूलवरबाहवः॥तेसर्वे
चन्द्ररेखांकाः नीलकंठाः कपर्दिनः॥कैलासभुवनागारंव्याप्यसर्वं व्यवस्थिताः॥परमानंदसंपूर्णास्ते
सर्वेपिकृपार्णवाः॥८५॥ तत्प्रभावार्णवात्तस्तुनवेदैरपिदृश्यते॥तत्ज्ञानमस्मदादीनांसुतरामपिदु
र्लभं॥८६॥ एतेषांविग्रहणांतुसर्वेषांमूलविग्रहः॥ चिद्घनः शिवस्वेतितत्ज्ञानमपिदुर्लभं॥८७॥
तत्ज्ञानमस्मदादीनांसुतरामपिदुर्लभं॥तत्राष्टिबाहुरीशानविग्रहोदृश्यतेमया॥८८॥कथंचिद्घोरतपसाकृपया
पिशिवस्यमे॥शिवयासदयायुक्तःतदातद्दर्शनंपरं॥८९॥कुमारस्यगणेशस्यतदन्येषांतुदुर्लभं॥सवि
हारार्थमायातियदाबहिरुमां विना॥९०॥तदासकरुणापूरोहरोलोचनगोचरः॥तस्यैवलीलयासृष्टिःस्थि
तिःसंहारइत्यपि॥९१॥सकथंचिद्धृदवाक्यैर्विरूपाक्षोनिरूपितः॥तदाज्ञावशगंसर्वंइदंब्रह्माडमंडलं॥
९२॥वातिवातस्तोभीतःशंकरानुग्रहशासनात्॥उग्रोग्रशासनादेवभीतःसूर्योप्युदेत्ययं॥९३॥भीषा
स्मादग्निरिंद्रश्चमृत्युर्धावतिपंचमः॥ एतादृशंमहादेवंसर्वश्रुत्यंतसंस्तुतं॥९४॥स्मृत्वापिमुच्यते

शिवरहस्य
१९१

घोरैरपारैरघसागरैः॥ अर्चनं स्मरणं ध्यानं वंदनं कीर्तनं तथा ॥९५॥ जपोपि शिवलिंगाग्रे शिवस्यानंतमुच्य- ह॰ तृ॰
ते ॥ शिवचरणसरोजाभ्यर्चनाध्यानदानस्मरणभजनगानाराधनालापनाद्यैः॥ अनुपदमनुधावंत्याहरादिं अ॰२४
दिशाद्याः कनकरुचिरदंडाखंडचंडातपत्रैः॥९६॥ ॥श्री[illegible] रहस्ये हराख्ये तृतीयांशे व्यासमुनिसंवा
दे नामाष्टविंशोऽध्यायः॥२८॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥व्यास उवाच॥ ॥ततः परं सुराः
सर्वे प्रणताः प्रीतिपूर्वकं॥ शिवधर्मकर्णनार्थमुपयुक्ताः प्रीतिपूर्वकं॥१॥ ततः कृतांजलिपुटाः सुरास्ते नतकं सु
धराः॥ शिवधर्मान्वदस्वेति तं मुहुर्मुहुरानताः॥ सुराणां शिरसा कण्ठ्यं सधीरो नंदिकेश्वरः॥ शिवधर्मम
णिश्रेणीभूषणः प्राह तान्सुरान्॥३॥ नंदिकेश्वर उवाच॥ नानाधर्मफलापाररसः शंकरपूजनं॥ न तस्मा
दधिकं पुण्यं श्रुतं स्वर्गापवर्गदं॥४॥ शिवपूजनमेवैतद्बहुधा श्रुतिकीर्तितं॥ तत्कीर्तनेन वेदाश्च पा
वना इति कीर्तिताः॥५॥ शिवध्यानपरा पूजा शंकरस्य महात्मनः॥ तेन ध्यानेन मुच्यंते संसारदवसागरा
त्॥६॥ हिरण्यबाहुरित्यादि श्रुतिकोटिप्रतिश्रुतं॥ स्वरूपं शंकरस्येदं ध्येयं मोहं विना मुहुः॥७॥ मुहुर्मु
हुः [illegible] कांतं नितांतं शांतविग्रहं॥ ध्यात्वा ध्यानप्रभावेन मुच्यते भवबंधनात्॥८॥ बहुजन्मार्जितैः

पंक्ति ८ - "च नैवेद्यंच मनोहरं॥ पानीयं चाथ ताम्बूलमेला कर्पूर संयुतम्॥ लवंगादि युतं दद्यात् दीपं"

पुण्यैः भवेभक्तिः प्रजायते॥ तया भक्त्या महादेवं ध्यात्वा मुक्तो भवेन्नरः॥ ९॥ सा भक्तिः दुर्लभा लोके त
पसा प्यमरा स्ततः॥ शंकरानुग्रहा देव सा भक्ति र्भवति ध्रुवं॥ १०॥ अत्युक्तेन प्रकारेण ध्यात्वा लिंगे सदा
शिवं॥ पूजा कार्या प्रयत्नेन प्रत्यहं प्रीतिपूर्वकं॥ ११॥ बिल्वैः प्रसूनैर्दर्भैर्वा नवदूर्वांकुरै रपि॥ नीरैर्वा
पूजयेल्लिंगं सर्व मंगल दायकं॥ १२॥ भस्मनो द्धूल्य सर्वांगं कृत्वा रुद्राक्ष धारणं॥ शिवलिंग मुपस्पृश्य
चरं वाचर मेव वा॥ १३॥ सद्यो जातादि भिर्मंत्रैः आवाह्य गिरिजापतिं॥ रुद्राध्यायेन सूक्तैश्च रौद्रैरभिषे
भिषेचनं॥ गो क्षीर दधि मध्वाज्यैः शर्करा फल संयुतैः॥ जलैश्च शीतलैर्धारा मविच्छिन्नां प्रकल्प
येत्॥ १५॥ ततो विभूतिं दत्वा तु दद्याच्चंदन मादरात्॥ ततो बिल्वदलं दद्याद्दत्वा नपि सादरं॥ १६॥ त
तो धूपं च दीपं नीराजनं ततः॥ १८॥ दर्पणं चामरं छत्रं व्यजनं च ततः परं॥ दत्वा प्रणम्य ~~शिरसा~~ बहुधा
नात्म मीशाय कल्पयेत्॥ १९॥ पुनर्जलं गंधयुक्तं शीतलं च मनोहरं॥ दत्वा धूपं च दीपं च कर्पूरेण मनो
हरं॥ २०॥ पश्चाद्गुरूपदिष्टेन मार्गेण स्थिरासनः॥ पंचाक्षर जपं कृत्वा शंकरान्भोजये त्ततः॥ २१॥
स्वयं च शिवनैवेद्यं भुक्त्वा मौन पुरः सरं॥ ततः शिव कथां पुण्यां वाच यित्वा पुनः शिवां॥ २२॥

शिवर०३
११२

पुनराराधनं कुर्यादुक्तमार्गेण सादरं ॥ एवं कृत्वा पुनः पूजां मध्यरात्रे पुनः पुनः ॥२३॥ ततः शयनसामग्रीं-हरा-त
संकल्प्य शिवयोः स्वयं ॥ कृत्वा शयनमीशानं स्मृत्वोत्थायार्चयेत्पुनः ॥२४॥ एवमामरणं कुर्यात्सदोपन
यनोत्तरं ॥ इदं नित्यं ब्राह्मणानां राज्ञां वैश्यस्य चामराः ॥२५॥ सुराणां च विशेषेण मुनीनामप्यनुत्तमं ॥ शि
वार्चनं परो धर्मः किन्नराणां विशेषतः ॥ गंधर्वाणां च सर्पाणां सिद्धानां च विशेषतः ॥ नारीणां च परो धर्मः शि
वपूजनमास्तिकाः ॥२७॥ शूद्राणामितरेषां च लौकिकं शिवपूजनं ॥ शिवार्चनं विना भुक्त्वा दरिद्रो भवति
ध्रुवं ॥२८॥ अंते नरकमाप्नोति शिवार्चनविवर्जितः ॥ संसारबंधनान्मुक्तो न भवत्येव सर्वथा ॥२९॥ संसा
रसागरे मग्नः शिवपूजनलक्षणं ॥ आधारं दुर्लभं प्राप्य समुत्तिष्ठति मानवः ॥३०॥ संसारबंधविच्छे
दाः शिवार्चनमहासिभिः ॥ तद्विच्छेदकमन्यत्तु दृश्यते न जगत्त्रये ॥३१॥ जायंते बहवस्तावन्म्रियंते च पुनः
पुनः ॥ शिवार्चनविहीनास्ते जन्मकोटिषु दुःखिताः ॥३२॥ ते गर्भनरकावासाः ये शर्वानर्चका नराः ॥
सूकराणां च तेषां च विशेषस्तु न सर्वथा ॥३३॥ मलाशनं यतस्तेषां तेषामप्यविशेषतः ॥ तेपि सूकर
गर्भेषु जायंते च पुनः पुनः ॥३४॥ अत्रैवोदाहरंतीममितिहासं पुरातनं ॥ अपारवेदराशिस्थं वेदांतपारगं
॥३५॥

पुराकश्चिद भूद्विप्रो धनधान्यसमन्वितः॥ पूर्वार्जितेन पुण्येन पुत्रपौत्रादिसंयुतः॥३६॥ संभुंक्ते विपुला न्भोगान्द्विवानर्चन तत्परैः॥ असंख्यातैः सहात्यंतं नाट्यगानादरः सदा॥३७॥ ददाति तेभ्यो वित्तानि बहूनि विविधान्यपि॥ रत्नानि तेन दत्तानि दुकूलान्यपि कोटिशः॥३८॥ अशांकरैः सह प्रीतिः तेभ्यो दत्तं धनं बहु॥ गावः सहस्रशो दत्तास्तेभ्यस्त्वदुरात्मना॥३९॥ महिषीणां सहस्राणि तेभ्यो दत्तानि कोटिशः॥ अश्वाश्च दत्तास्तेनैव बलीवर्दाश्च कोटिशः॥४०॥ अन्नानां राशयो दत्तास्तेभ्यस्त्व प्रयत्नतः॥ अशांभवैः सहावासः संल्लापो भोजनं शयः॥४१॥ अशांभवं मंदिरं च तस्य भाति स्मशानवत्॥ न तस्य मंदिरे चैव शिवलिंगं मनोहरं॥४२॥ तच्चांडालश्मशानेन तुल्यमित्येव गम्यतां॥ यन्न शांकरसंकीर्णं यल्लिंगेन विवर्जितं॥४३॥ शिवलिंगविहीनस्य मंदिरे यदि मोहतः॥ निवसेत्सोपि चंडालः प्रतिजन्मनि जायते॥४४॥ अशांभवोदकं पीत्वा मूत्रप्रायं प्रयत्नतः॥ मूत्रकुंडे पतत्येव जन्मकोटिषु मानवः॥४५॥ अशांभवान्नं मोहेन यो भुंक्ते मोहतोपि वा॥ स तप्तमलकुंडेषु पतत्येव न संशयः॥४६॥ अशांभवैः सह प्रीतिं भोजनाद्यैः करोति यः॥ स चंडालत्वमासाद्य विष्टायां जायते कृमिः॥४७॥ महापातकसंसर्गो वरं [illegible] विनाशकः॥ अशांकरैः

शिवरहस्ये
११२

सहावासो न वरं दुःखसाधनं॥४८॥ चंडालैरपि संवासोयद्यापदितदावरं॥ सतावत्सर्गमार्गस्य सर्वथान निवा- रकः॥४९॥ भोगः स्वर्गापवर्गाणां अंशाभवकुलान्वये॥ दूरेकथा प्रत्युतात्र परत्रापि महद्भयं॥५०॥ तादृ शोपि मृतो दैवात्सकल त्रोग्नि मापसः॥ तेन भुक्तानि घोराणि नरकानि पुनः पुनः॥५१॥ येयैस्तस्य धनं प्राप्तं तस्य मित्राणि यानि च॥ तैः सहात्यंत घोरेषु नरकेषु स्थितः सतु॥५२॥ संसारमेय जन्मानि भुक्त्वा भुक्त्वा सहस्रशः॥ पिशाचरूपतां प्राप्तो वने जलविवर्जिते॥५३॥ तत्रार्तः क्षुधया सोपि तृषार्तोप्यनुवास रं॥ दुःखेन कालनयनं कृतं तेन दुरात्मना॥५४॥ एतादृशाः कोटिशस्तु विपिनं समुपाश्रिताः॥ तृषार्ता श्च क्षुधार्ताश्च क्षुधाग्न्य जठराग्निना॥५५॥ तदाक्रोशैर्वनं व्याप्तं मृगैर्भीतैः सहस्रधा॥ तैः शब्दैः कर्णशस्त्रा भैः वनं त्यक्तमनंतधा॥५६॥ तस्मिन्वने मनोज्ञानि फलानि विपुलान्यपि॥ तैर्न दृष्टानि रम्याणि जला न्यपि विशेषतः॥५७॥ तैर्न दीपः शंकराय दत्तः शंकरमंदिरे॥ तेन पापेन ते सर्वे प्यंधाः सर्वात्मना सुराः॥५८॥ यैश्च दीपो महेशाय न दत्तो भक्तिपूर्वकं॥ तेतु सर्वेपि जात्यंधाः भवंत्येव न संशयः॥५९॥ यैर्न दत्तं महेशा य शीतलं जलमुत्तमं॥ ते तृषार्ता न पश्यंति जलं च निकटे स्थितं॥६०॥ यैर्न दत्तं महेशाय चंदनं च मनोहरं॥

हरः लु
अ०२९

तेदुर्गंधसमाक्रांतलनवोपिभवंतिहि॥६१॥ यैर्न दत्तं महेशाय वसनं प्रीतिपूर्वकं॥तेतुन प्राप्नुवंत्येवव सनानि विशेषतः॥६२॥ यैर्न दत्तं महेशाय नैवेद्यं रससंयुतं॥ तेतुन प्राप्नुवंत्यन्नं नपश्यंत्यपि दूरतः॥ ये मंदिरं महेशाय नकृतं भक्तिपूर्वकं॥ तेतुन प्राप्नुवंत्येव सदनं सर्वथा सुराः॥६४॥ रुचिराणि मनोज्ञानि पवित्राणि फलानिवा॥ जलानिवा महेशाय दत्वा कामानवाप्नुयात्॥६५॥ जलं चुलकमात्रं वायो दद्याद्गिरिशायसः॥ ऊषरेपि जलं प्राप्नोत्यतिग्रीष्मेप्यसंशयं॥६६॥ जलं दत्वा महेशाय तद्दत्वा शंभवाय च॥ सुधासागरमासाद्य मोदंते मनुजाः सुराः॥६७॥ अन्नं दत्वा महेशाय तद्दत्वा०॥ अन्नपर्वतमासाद्य मोदंते मनुजाः सुराः॥६८॥ दुग्धं दत्वा महेशाय तद्दत्वा शंभवाय च॥ क्षीरसागरमासाद्य मोदंते मनुजाः सुराः॥६९॥ दधि दत्वा महेशाय तद्दत्वा०॥ दधिसागरमासाद्य मोदंते मनुजाः सुराः॥७०॥ घृतं दत्वा महेशाय तद्दत्वा०॥ घृतसागरमासाद्य मोदंते मनुजाः सुराः॥७१॥ शिवाय शर्करां दत्वा तद्दत्वा०॥ शर्करागिरिमासाद्य मोदंते मनुजाः सुराः॥७२॥ फलं दत्वा महेशाय तद्दत्वा०॥ फलपर्वतमासाद्य मोदंते मनुजाः सुराः॥ ७३॥ शिवाय चंदनं दत्वा तद्दत्वा शंभवाय च॥ चांदनं ह्रदमासाद्य मोदंते मनुजाः सुराः॥ ७४॥

शिवरह० ३
११५

शिवाय कुसुमं दत्वा तद्दत्वा शांभवायच ॥ कुसुमाचलमासाद्य मोदंते ॥७५॥ शिवाय वसनं दत्वा तद्दत्वा ॥ हरा० त
वसनाचलमासाद्य मोदंते ॥७६॥ शिवायाभरणं दत्वा तद्दत्वा ॥ भूषणाचलमासाद्य मोदंते ॥७७॥ दत्वा
सुवर्णमीशाय तद्दत्वा ॥ सुवर्णाचलमासाद्य मोदंते ॥७८॥ दत्वा छत्रं महेशाय तद्दत्वा ॥ रत्नछत्रसमा
कीर्णः प्रयाति शिवमंदिरं ॥७९॥ शिवाय चामरं (दत्वा तद्दत्वा शांभवायच ॥ रत्नचामर) संकीर्णः प्रयाति शिवमंदिरं ॥८०॥ ~~शिवाय चामरं दत्वा~~
~~तद्दत्वा~~ ॥ शिवाय वाहनं दत्वा तद्दत्वा ॥ रत्नपुष्पकमासाद्य प्र० ॥८१॥ यद्यद्द्रव्यं महेशाय तद्दत्वा ॥ सर्व
सौभाग्य संपन्नः शिवलोकमवाप्नुयात् ॥८२॥ अशांभवाय दत्तानि मेरुतुल्य धनान्यपि ॥ व्यर्थानि तानि
सर्वाणि चोरनीतसमानि हि ॥८३॥ अशांभवाश्च चोराश्च पुल्कसाश्च समाः सुराः ॥ ततोन ते
दानपात्रं अपात्रत्वमलोकिताः ॥८४॥ अतस्तेन धनं प्राप्याप्य भाग्येन दुरात्मना ॥ अशांभवेभ्य
स्तद्दत्तं तेन दुःखमवापसः ॥८५॥ तत्तुल्यास्तेवने तस्मिन्मिलिताश्च परस्परं ॥ मुहुराक्रोशनं
कृत्वा सनिं दावचने स्थिताः ॥८६॥ आक्रोशात्सुवने तेषु साबभूवा शरीरवाक् ॥ अशैवानां गतिरि
यं किमत्राक्रोशनैः फलं ॥८७॥ अहो गतं धनं व्यर्थं अशैवेभ्यो ति मोहतः ॥ दत्तं पात्रत्व बुध्यापि नापा—

अ० २६

त्वं विनिश्चितं ॥८८॥ ऊषरे प्रदेशे गर्त्ते पुरीषे विपातितं ॥ यथा वृथा तथा जातं अशैवेष्वर्पितं धनं ॥८९॥
आक्रोशमपि कुर्वंति सर्वास्ता धनदेवताः ॥ अशैवाधीनतां प्राप्ताः तेन कष्टं गता इति ॥९०॥ अधर्मप्रवणं
जातं अशैवजनसंगमात् ॥ धनं सर्वं गतं व्यर्थं तेभ्यो दत्तमसंशयं ॥९१॥ जन्ममध्ये कदाचिद्वा जलं वा शं
भवाय किं ॥ न दत्तं तेन पापेन पिशाचत्व मुपागताः ॥९२॥ न दत्तं शंभवायान्नं शुष्कं वा मोह
तोपि वा ॥ अतो वने पिशाचत्वं भवद्भिः प्राप्तमीदृशं ॥९३॥ न दत्तं वसनं वापि शंभवाय महात्मने ॥ तेन पा
पेन संप्राप्तं पिशाचत्वं भवादृशैः ॥९४॥ अशांभवकथासक्तैः न श्रुता शांभवी कथा ॥ तेन पापेन संप्राप्तं
पिशाचत्वं महावने ॥९५॥ न च दीपमालापि महादेवस्य मंदिरे ॥ तेन पापेन ॥९६॥ अन्यदत्तापि दीपानां
माला नैवावलोकिता ॥ तेन पापेन संप्राप्तं ॥९७॥ पूजनं न कृतं भक्त्या शंभोः शैवस्य वा मुदा ॥ तेन पापेन०
॥९८॥ न कृतं मंदिरं शंभोः धने सत्यपि मोहतः ॥ तेन पापेन ॥९९॥ शिवक्षेत्राटनोद्योगे न कृतः पापयोगतः
॥ तेन पापेन ॥१००॥ न दत्तं शिवलिंगेषु पत्रं वा पुष्पमेव वा ॥ तेन पापेन ॥१०१॥ ग्रीष्मकाले नीरधारा लिंगे
षु न कृता मुदा ॥ तेन पापेन ॥२॥ लिंगोपरि मलद्रव्यं चंदनं चार्पितं न हि ॥ तेन पापेन ॥३॥ वाणीन –

१०९

शिवपुराणम्
११६

मधुराप्युक्ता शंभवायमनोहरा ॥ तेनपापेन ॥४॥ इतिवाणीं मुहुः श्रुत्वा शिरस्ताडनपूर्वकं ॥ परस्परं महीपृष्ठे-हरा-
पतिताश्चुक्रुशुर्भृशं ॥५॥ तदानीमागतः कोपि शांकरस्तद्वनं प्रति ॥ बिल्वपत्रार्थमुद्युक्तः तांशुश्राव गि-
रंतदा ॥६॥ ततो बिल्वान्युपादाय सत्वरं मंदिरंययौ ॥ तामुवाच गिरं तेभ्यः स्वकीयेभ्यो तिविस्मितः ॥७॥ तद्ग्रा-
मवासिनः सर्वे श्रुत्वा विस्मयमागताः ॥ तदा प्रभृति सर्वेपि शांकरत्वमुपागताः ॥८॥ ततः कश्चिन्मृतस्तत्रग्रा-
मे भस्मविभूषणः ॥ तदानीमागताः शंभोर्दूतास्तं नेतुमादरात् ॥ सतस्मिन्नेव दिवसे भक्त्या भस्मविभूषणः ॥
श्रुत्वा वार्त्तां तदुक्तां तां अशैवत्वं जहौ तदा ॥१०॥ तदुक्तवार्त्ता श्रवणादनु तप्तः प्रतिक्षणं ॥ वृद्धेनातः परं का-
र्यं किमित्यत्यंतदुःखितः ॥११॥ मरणावसरे सेयं श्रुत्वा वार्त्ता शुभावहा ॥ अतः परं पूजने च लिंगे शक्तिः
कथं भवेत् ॥१२॥ श्रुता शिवकथा क्वापि न पुरा पापनाशिनी ॥ अतः परं तु वृद्धेन किं कर्तव्यं शिवार्चनं ॥१३॥
शैवेन क्वाप्यागतो पि भोजितो पि न भक्तितः ॥ पापग्राम निवासेन पापमेवार्जितं मया ॥१४॥ धिक् धिक् धि-
धिक् धिगयं ग्रामः शिवलिंगविवर्जितः ॥ अशांभवजनाक्रांतः शिवभस्मविवर्जितः ॥१५॥ धिक्
धिक् धिगिदं वेश्म शिवभक्तिविवर्जितं ॥ धन्यं धान्यं गवां वृंदं दुष्कुलानां कुलं तथा ॥१६॥ अशैवमुक्त-

मेतावदशैवपरिवेष्टितं॥ इदानीमपि दानार्थं शंभवो नात्र सर्वथा॥१७॥ परमान्नेन साज्येन पक्वान्नैर्वि
विधैरपि॥ शांकरो भोजितो नात्र गृहे धिक् धिक् गृहं गृहं॥१८॥ इति प्रलप्य बहुधा भो शंभो पाहिमा
मिति॥ उद्धूल्य भस्मनांगानि लौकिकेन मृतस्ततः॥१९॥ नीत्वा दग्धो मृतस्तावत्तत्पुत्रैरपि तादृशैः॥
ततः समागताः सर्वे स्वं गृहं प्रति विस्मिताः॥२०॥ ततस्तद्दहनोद्भूतो धूमस्तद्वनसंगतः॥ आक्रांतास्तेन
धूमेन पिशाचास्तद्वनाश्रिताः॥२१॥ ततस्तद्धूमसंगेन ते सर्वे गतकल्मषाः॥ शिवलोकमनुप्राप्ताः पुष्पकेषु
स्थिताः सुराः॥२२॥ सहतेनापि वृद्धेन शिववार्त्तां समुत्सुकाः॥ प्रशंसां शांकरस्यैव शृण्वतः पुनरादरात्॥
॥२३॥ अतो महेश महिमा महानेव महात्मनां॥ महानंदकरो नित्यं महापातकनाशकः॥२४॥ यस्यानु
तापमात्रेण मुक्तिरासीन्मरुद्गणाः॥ तद्धूमसंगान्मुक्तास्ते पिशाचास्तेपि पापिनः॥२५॥ एतावता
पि भगवन्महादेवः कृपानिधिः॥ ददाति स्थानमुत्कृष्टं योगिनामपि दुर्लभं॥२६॥ अघोरनरकावासं
कृत्वा कल्पशतेष्वपि॥ पिशाचत्वमनुप्राप्य मुक्तास्तद्धूमसंगमात्॥२७॥ सोपि किं शांभवः किं तुप
तिताग्रेसरोयतः॥ कदापि न कृतं तेन महादेवस्य पूजनं॥२८॥ पूजितं शिवलिंगं च न दृष्टं तेन सर्वथा॥

शि.र.ह.३
१२६

नदृष्टः शांभवस्तेन तत्संगस्त्वदूरतः ॥२९॥ मरणाभिमुखो वृद्धः सोनुतापेन केवलं ॥ मृतो भस्मकणाक्रां-हरः तु
तः तस्य सा गतिरुत्तमा ॥३०॥ यं ध्यात्वा मुनयः कदाप्यविरता स्तुत्वा च वेदाः परं न त्वा देवगणाः कलत्रसहि अ.२९
ताः पुत्रैस्स्वमित्रैर्युताः ॥ तं देवोत्तममाकलय्य मनसा स्मृत्वा क्षणं वा क्षणैः संपूर्णा क्षणदाधियार्धकलया कामं
मुदं प्राप्नुयुः ॥१३१॥ इति श्रीशिवरहस्ये हराख्ये तृतीयांशे सुरनंदीश्वरसंवादे नाम एकोनत्रिंशोध्यायः
॥ ॥श्री काशीविश्वेश्वरार्पणमस्तु ॥ ॥ देवा ऊचुः ॥ ॥ आज्ञापयास्मान् भगवन् अस्माकमपि शंक
रः ॥ आराध्यस्तत्पदांभोजस्मरणं क्रियते सदा ॥१॥ तस्यैवानुचराः सर्वे तदाज्ञाकारिणः सदा ॥ तं विना गति
रस्माकं अन्यो नास्तीति निश्चितं ॥२॥ तत्पादस्मरणेनैव नीयंते दिवसाः खलु ॥ जीवनं तावदस्माकं स्मृ
तं तच्चरणांबुजं ॥३॥ भवदुक्तकथाधारसुधापानेन तन्मनः ॥ पीनं दिने दिने वृद्धिं प्रयात्यत्र न संशयः ॥४॥
स्वामिन्नगणितं द्रव्यं एतैर्दत्तं दुरात्मभिः ॥ अशांभवेभ्यः का तेषां भवित्री कुगतिर्वद ॥ ५॥ किं च तद्दा
नपात्रत्वं ये गतास्तेप्यशांभवाः ॥ तेषां का वा गतिस्स्यात्तु दुर्ज्ञेया खलु मादृशैः ॥६॥ सहस्रयोजना
यामं संकीर्णं समं मंदिरं ॥ अशैवैरेव तैस्तावद्दाराधनदानतः ॥७॥ धनवृष्टिः कृता तैस्तु ब्राह्मणेभ्यः

४ पं.१- अशांभवास्तावता पि न दत्तं तद् वृथा गतं ॥ ८ ॥ यागादिकानां तद्धर्मनिरतास्ते तथापि तु ॥

परं तु तैः ॥ अशांभवास्त तस्तेषां गतिः का वा भवेद्वद ॥ शिवालय विहीनेषु देशेषु स्थित मादरात् ॥ अशैव धर्ममाश्रित्य धर्मांतर परायणाः ॥ १० ॥ एता दृशानां सर्वेषां विचारार्थं मयं यमः ॥ प्रवृत्तस्तेन कालो स्य भूयानेव गमिष्यति ॥ ११ ॥ एतादृश विचारेण क्षीणमायुर्दिने दिने ॥ एतस्य शिव पूजापि त्वरया संप्रजायते ॥ १२ ॥ तेन तेन विचारेण दुःखितः सर्वदायमः ॥ तद्दुःखशमनोपायं नंदिकेश वदाधुना ॥ ॥ नंदिकेश्वर उवाच ॥ ॥ तुष खंडनकल्पस्य विचारस्यास्ति किं फलं ॥ अशांभवाः पातनीयाः कुंभीपाकेषु प्रयत्नतः ॥ १४ ॥ अशांभवकृतान्धर्मान धर्मानिति संस्मर ॥ चंडालैः किं कृतो यागः स्वर्गाय स्वर्गसाधनं ॥ १५ ॥ यदि पुल्कसनारीभिः वेदस्याध्ययनं कृतं ॥ तेनाध्ययनजं पुण्यं तासु संभावितं च न ॥ १६ ॥ अतः सर्वे पातनीयाः कुंभीपाकेषु ते यम ॥ आकल्पं तेषु ते स्थित्वा प्रयास्यंति पिशाचतां ॥ १७ ॥ अतः परं पूजनीया वदा मि बहुधापरं ॥ शृणुध्वं सावधानेन शिव भक्तान् विशेषतः ॥ १८ ॥ हे विश्वनाथ मदनांतक काल गौरीपते गिरिश चंद्रकलावतंस ॥ शैलेंद्र जा हृदय पंकज राजहंस पाहीति यो वदति तं शिवभक्त माहुः ॥ १९ ॥ काशीपते हर भवामर सार्वभौम भीम स्मरांधक रिपो गिरिश त्रिनेत्र ॥ भो भूति

गात्रवृषभाधिपपत्रगात्र पाहीति यो वदति तं शिव भक्त माहुः ॥२०॥ विश्वेश्वरत्रिदशनायक भक्तमौले लीला-हृतात्त कृति लोल विकटार्घटितार्थ देह ॥ शिद्धेश्वरी रमण चंद्र पते मुहुर्मां पाहीति यो वदति तं शिव भक्त माहुः॥२१॥ भोसंकट रमणाशूलकर स्मरारे श्री शीतला रमण भो कल शेश शंभो ॥ ज्योतिः स्वरूप भगवन् मणिकर्णिकेश पाहीति यो वदति तं शिव भक्त माहुः॥२२॥ पुण्याभियुक्त परमेश्वर नंदिकेश श्री मन्महेश्वर सुवर्ण पिनाकपाणे ॥ श्री कालकूट विषनीलल राधकंठ पाहीति यो वदति तं शिव भक्त माहुः॥२३॥ उद्धूलनातिरुचिरांगल सत्रिपुंड्र रेखाललाट फलकांधक मर्दकेश ॥ आमर्दकेश्वर महाघ विनाशकेश पाहीति यो वदति तं शिव भक्त माहुः॥२४॥ श्री वृद्धकाल वृषभध्वज कृत्तिवास श्री लिंग लिंग निलयाव्यय मृत्यु मृत्यो ॥ श्री वक्रतुंड गणनायक ढुंढिराज पाहीति यो वदति तं शिव भक्त माहुः॥२५॥ केदारनायक सदा शिव सोमनाथ ज्ञानेश दक्षहर नायक दक्षनाथ ॥ सिद्धेश धर्म गणनायक चंडिकेश पाहीति यो वदति तं शिव भक्त माहुः॥२६॥ एतादृशाः संततमर्चनीयाः सुरैस्पारै रपि किं नराद्यैः ॥ तत्पूजया पूजित एव नूनं गौरीसहायः समयो ममायं ॥ लिंगं विलोक्य सहसा प्रणतः फलं वा पर्णं च नीरमसकृत्प्रयतः प्रदद्यात् ॥ ॥

रुद्राक्ष भस्मकण भूषित पुण्य देहो देहावसानमधिगम्य शिवं प्रयाति ॥२८॥ एतादृशानतिनिगूढ शिवा-
र्चनादि द्रव्यानपार गुण सागर सागरांस्तु ॥ दृशाद्विलोक्य मुहुरादरतोपि नत्वा तुष्टा भवंति मुनयोऽपि गणा-
श्च सिद्धाः ॥२९॥ येनार्चितं सकृदुमापति लिंगमेकं तेनाशु शोक जलधिः खलु तीर्ण एव ॥ तूर्णं प्रयाति
गिरिजारमणं सतावत्त्वं वंद्यः सतामनुदिनं सुकृतार्णवत्वात् ॥३०॥ आकर्णिता शिवकथा क्षणदा क्षणं वा
प्रक्षीण पातक महांबुधिरेव सोपि ॥ तत्पूजनेन गिरिजारमणो [illegible] हृष्टः कष्टानि नाशयति सत्यमिदं
मयोक्तं ॥३१॥ यः पश्यति स्मरहर प्रियलिंग पूजां भक्त्या प्रमोदममुपयाति विलोकनेन ॥ रोमांच चिन्हि-
तवपुस्स्मृत चंद्रमौलिस्तं शांभवं विदुरघांबुधिनाशहेतुं ॥३२॥ तं पुण्यकृत्तमवरेण्यमितिस्मरामियःका-
लकालचरणांबुज भक्तियुक्तः ॥ युक्तः सयोग नियमादिभिरित्यवैमि तस्मान्न कोपि भुवनेष्वधिको
नरेषु ॥३३॥ यः प्रातरिंदुशकला भरणार्चनेन प्रीतः स्मरन् स्मरहरं फलपुष्प दानैः ॥ तं पूजयंतिमु-
नयो पि मुहुः सधन्यो मान्योस्मदादिभिरिति प्रणमंति धीराः ॥[illegible]॥ ये शंकरार्चनपराः शिवकालकाल
मन्नाथ मज्जनकमेपरमाप्तबंधो ॥ मत्प्राणरक्षक महेश्वर मामवावंतं त्वां विना गतिरिति प्रवदंति

शिवरहस्य
११८

शैवाः॥३५॥ दारास्तवैव तनयास्तव चंद्रमौले धान्यं तवैव धनमश्वगवादयोपि॥ सर्वं त्वमेव तव सर्वमिति स्मरंतः संसारभीतिमपहाय शिवं प्रयांति॥३६॥ धन्यं मनः शिवपदस्मरणानुरक्तं धन्यं विशालनयनांबुजजीवनं च॥ तल्लिंगपूजनविलोकनलोलमेव तस्मात्किमन्यदधिकं भुवि धन्यमन्यमस्ति॥३८॥ धन्यौ तदीयचरणौ शिवतीर्थयात्रापूतौ करौ च शिवपूजनसाधनत्वात्॥ धन्यं शिरः शिवनतिप्रवणं तथा तस्मात्किमन्यदधिकं भुवि धन्यमस्ति॥३९॥ धन्या हि तस्य जननी जनकोपि धन्यो धन्यं कुलं च रमणी तनयाश्च भृत्याः॥ दास्यश्च यस्य शिवलिंगसमर्चनेन सद्यः प्रसन्नमपि मानसमित्यवैमि॥४०॥ उन्मत्तवद्वदति शंकर नाम दृष्ट्वा लिंगार्चनं कुसुमचंदनधूपदीपैः॥ पक्वान्नराशिभिरमंदमुदाय स्व[तृप्ता]दुका स्मरणमप्यघनाशकं हि॥ ॥४१॥ यः कश्चिदेवभुवनेष्वमितप्रभावो भावेन भावसदृशो भुवनत्रयेपि॥ भावस्य भावभयलेशविहीनवृत्तेः भूयो भवो न भवतीति भवोपि मेने॥४२॥ संसारभारपरिहारविहारहाराहारोपहारपरमादरमादरेण॥ दूरादनादरमपास्य नमंति शौरेः धीराश्च किन्नरवरास्सह तैः कुमारैः॥४३॥ किं वर्णयामि शिवभक्तजनप्रभावं गौरीपतिप्रियतमः शिवभक्त एव॥ तं पुण्यपुंजमजपूज्यतमं विदित्वा तत्पूजनाय नियतो भव

नित्यमेव ॥५४॥ येशंकर स्मरण मात्र पवित्र गात्रास्तान् त्वं त्रिनेत्र निलयान्यम पश्य पश्य ॥ तन्मंदिरे षु गमनं नत
वापियुक्तं तत्पूजनार्थमपि तत्व मिदं वदामि ॥४५॥ श्रुत्युक्त सिद्ध सित भस्म पवित्र गात्रान् तांस्त्वं त्रिनेत्र निल
यान् यम पश्य पश्य ॥४६॥ रुद्राक्ष भूषण विभूषित पुण्य देहान् तान् त्वं त्रिनेत्र निलयान् यम पश्य पश्य ॥ तन्मंदि
रेषु गमनं नत वा पियुक्तं तत्पूजनार्थमपि तत्व मिदं वदामि ॥४७॥ श्री बिल्वपत्र शिव लिंग समर्चनार्थान् तां
स्त्वं त्रिनेत्र निलयान् यम पश्य पश्य ॥ तन्मंदिरेषु० ॥४८॥ श्री शैल नायक समर्चन पूत चित्तांस्तां स्त्वं त्रिनेत्र
निलयान् यम पश्य पश्य ॥ तन्मंदिरे० ॥४९॥ श्री कालहस्ति परिपूजन सक्त चित्तान्तांस्त्वं त्रिनेत्र निलयान्यम
पश्य पश्य ॥ तन्मंदिरे० ॥५०॥ एकाम्रनायक विलोकन पूत चित्तान्तांस्त्वं त्रिनेत्र नि० ॥ तन्मंदिरे ॥५१॥ ईड्या
रुणाचल विलोकन लोल चित्तान्तांस्त्वं त्रिनेत्र निलयान्यम पश्य पश्य ॥ तन्मंदिरेषु ॥५२॥ श्री मच्चिदंबर विलो
कन सक्त चित्तान्तांस्त्वं त्रिनेत्रः ॥ तन्मंदिरे० ॥५३॥ मध्यार्जुनेश्वर विलोकन सक्त चित्तान्तांस्त्वं त्रिनेत्र० ॥
तन्मंदिरे ॥५४॥ श्री कुंभकोण पति पूजन सक्त चित्ता ॥ तन्मंदिरेषु० ॥५५॥ श्री नंदि मंडल विलोकन
सक्त चित्ता० ॥ तन्मंदिरेषु० ॥५६॥ भूतिं विचिंत्य सततं भ्रमरां बिकायाः तुष्टा भवंति सुकृतै रमितैर्यमातः ॥

शिव०र०२ ३२९

तन्मंदिरेषु०॥८७॥ श्रीकंदला चरणपूजनसक्त चित्तान्नॄन्त्वं त्रिनेत्र॥ तन्मंदिरे०॥८८॥ तीर्थेश लिंगनि- लयार्चनसक्त चित्तान्नॄन्॥ तन्मंदिरे०॥८९॥ काशीप्रदेशवसमानसपुण्य देहान्नॄन्त्वं त्रिनेत्र॥ तन्मंदि रेषु॥९०॥ विश्वेश्वरार्चन विलोकनसक्त चित्तान्नॄन्॥ तन्मंदिरेषु॥९१॥ शुद्धा विमुक्त पलि पूजनसक्त चित्तान्नॄन्त्वं॥ तन्मंदिरेषु॥९२॥ आनंदभैरव विलोकन पूत चित्तान्नॄन्त्वं॥ तन्मंदिरेषु॥९३॥ श्रीमुक्तिमंड प विलोकनसक्त चित्तान्०॥ तन्मंदिरेषु०॥९४॥ भक्त्याकयं चिदनुवासरमन्नपूर्णापादार विंद भजने प्रवणाः शिवास्ते॥ तन्मंदिरे०॥९५॥ श्रीधुंढिराज चरणार्चनसक्त चित्तान्नॄन्॥ तन्मंदिरे०॥९६॥ वीरेश्वरार्चनविलो कनपूत चित्तान्॥ तन्मंदिरे०॥९७॥ श्रीकालभैरव विलोकन पूत चित्तान्॥ तन्मंदिरेषु०॥९८॥ ओंकारनायक विलोकनसक्त चित्तान्॥ तन्मंदिरेषु॥९९॥ दूतास्त्वालिकठिनाः खलु शिक्षणीयाः तेधर्मबुद्धिरहिता दुरि तप्रवृत्ताः॥ तद्योगतस्तव विशेषत स्वधर्मोनाशं प्रयास्यति सतेन शिवापराधः॥७०॥ दूताश्चरंतियदितेशिवमंदिरेषु शैवेषु तत्सदनमार्ग महार्ह देशे॥ तर्हि प्रकुप्यति शिवो पियमातस्त्वं तेतावदादरत स्वनि वारणीयाः॥७१॥ येशंकरस्मरण पात्र विधूत पापास्ते शंभवास्तवयमान्वह मर्चनीयाः॥ तेषां गृहेषुन

कदापि भटाः प्रयांतु ल्लेह मार्ग मपि तेन विशंतु मोहात्॥७२॥ ये लिंग पूजनरताः सततं प्रहृष्टास्ते शंभवा
स्तवयमान्वह मर्च नीयाः॥ तेषां गृहे०॥७३॥ उद्धूलन प्रभव पुण्य समृद्ध चितास्ते शंभवा०॥ तेषां गृहेषु०॥
७४॥ ये बिल्वमूल शिव लिंगकृत प्रणामास्ते शंभवा०॥ तेषां गृहे०॥७५॥ ये बिल्वपत्र लवनाहलकंटकाग्रास्ते
शंभवा०॥ तेषां गृहे०॥७६॥ ये बिल्वपल्लव कृतोन्नत लिंग पूजास्ते शंभवा०॥ तेषां गृहे०॥७७॥ ये वै त्रिपुंड्र
रुचिरामल भाल भागास्ते शंभवा स्तवयमान्वह मर्च नीयाः॥ तेषां गृहे षु न कदापि भटाः प्रयांतु ल्लेहमार्ग
मपि तेन विशंतु मोहात्॥७८॥ रुद्राक्ष भूषण विराजित कंठ देशास्ते शंभवा०॥ तेषां गृहेषु०॥७९॥ ये लिंग

९/१

पूजन महोत्सव लोल चित्तास्ते शंभवा०॥ तेषां गृहेषु०॥८०॥ ये शंभवार्चन समर्जित वित्त भारास्ते शंभ
वा०॥ तेषां गृहेषु०॥८१॥ ये शंकर स्मरण विस्मृत कार्य चेष्टास्ते शंभवा०॥ तेषां गृहेषु०॥८२॥ ये शंग लिंग
निहितेक्षण रश्मि जालास्ते शंभवा०॥ तेषां गृहेषु०॥८३॥ ये चंद्र चूड कलना मृतपान लोलास्ते शंभवा०
॥ तेषां गृहेषु०॥८४॥ धन्याः शंकर नाम[illegible]मु सुधा धारा धरा सारभूः [illegible] जिव्हा राजराज विनुता
धन्येति मान्येति च॥ सा जिव्हा बहु जन्म संचित चिराभ्यस्तातिपुण्यार्जिता सेयं पुण्यसुधा निधिः खलु सुसं

लभ्या शिवानुग्रहात्॥८५॥ ॥इति श्री शिवरहस्ये हराख्ये तृतीयांशे यमनंदिकेश्वरसंवादो नाम त्रिंशो हरा॰ तृ॰ ध्यायः॥ ॥श्री काशी विश्वेश्वरार्पणमस्तु॥ ॥व्यास उवाच॥ ॥इत्युक्तं तद्वचः श्रुत्वा प्रहृष्टास्ते सुरा अ॰ ३१ स्तदा॥ विश्वस्य तत्त्वं पुनर्नत्वा कृतांजलिपुटा जगुः॥१॥ ॥देवा ऊचुः॥ ॥श्रीनंदिकेश्वर स्वामिन् शिव विज्ञानसागर॥ अनेन किं कृतं पुण्यं तद्वोप्यमपि संवद॥२॥ ॥नंदिकेश्वर उवाच॥ ॥तत्पुण्यश्रवणा देव भवतां विस्मयो भवेत्॥ तत्त्वज्ञानविहीनानां सर्वमाश्चर्यसाधनं॥३॥ शिवपूजाप्रभावाब्धि बिंदुज्ञानविवर्जिताः॥ भवंतस्तापसाः सिद्धा गंधर्वाः किंनरा अपि॥४॥ शिवप्रभावरूपाणां रत्नानां सागरः शिवः॥ अतः शिवो विजानाति स्वतत्त्वं नेतरो जनः॥५॥ अस्माभिरपि तत्तत्त्वं लेश तस्तत्प्रसादतः॥ ज्ञातं कथंचिदन्येन कथं ज्ञेयं सुरादिभिः॥६॥ अपूर्वमणयो येन संचिताः स्वगृहे स्वतः॥ स तत्त्वविदन्यस्तु तत्तत्त्वं वेद किं सुराः॥७॥ यस्य रत्नस्य यन्मौल्यं तत्तेन ज्ञायते परं॥ रत्नतत्त्वं विजानाति स तु रत्नपरीक्षकः॥८॥ न च रत्नपरीक्षायां सर्वे दक्षाः स्वभावतः॥ दाक्षायणीवल्लभस्तु नित्यः सर्वज्ञ एव हि॥९॥ स तावन्नित्यसर्वज्ञ शिरोमणिरिति श्रुतः॥ शूलपाणिः ततः सोयं तत्तत्त्वं वेद वस्तुतः॥१०॥ रत्नेषु च विचित्रेषु तेषु द्वित्राणि कानि चित्॥

रत्नानि तान्यमोल्यानि तानि देयानि नामरा ॥११॥ शिवधर्मात्मकं रत्नं गोपनीयं विशेषतः ॥ अतिभक्ता
यदातव्यं ना भक्ताय कदाचन ॥१२॥ अल्पाल्पस्य रसस्यापि स्पर्शो देव कथंचन ॥ लोहाचलः सुवर्णत्वं
प्राप्नोती त्वेवं धारितं ॥१३॥ अग्निलेशेन तूलादि भस्मसाज्जायते क्षणात् ॥ अल्पाल्पे नौषधेनापि महाव्या
धिर्लयो भवेत् ॥१४॥ सूक्ष्मासिरप्यंगमध्ये प्रविष्टोंग विनाशकः ॥ विषमप्यल्पमेवांगे युक्तं देह विनाशकं ॥
१५॥ तथैव शिवधर्मोपि सूक्ष्मः पापादि नाशकः ॥ पुण्यं संपत्समृद्धिं च करोति न संशयः ॥१६॥ धर्माणामुत्त
मोधर्मः शिवधर्मः सनातनः ॥ सर्वोत्तमोत्तमत्वेन यथा गीतः सदाशिवः ॥१७॥ यथा सांबो महादेवः सर्व
देवशिखामणिः ॥ तथायं शिवधर्मोपि सर्वधर्मशिरोमणिः ॥१८॥ शिवधर्मात्परो धर्मो नास्ति न श्रूयते पिच
॥ सत्यमेतत्पुनः सत्यं उद्धृत्य भुजमुच्यते ॥१९॥ शिवधर्मान्यधर्मेषु धर्माभासत्व निश्चयात् ॥ तद्धर्मा
चरणात्किं वा फलं संभावितं सुराः ॥२०॥ शिवधर्मान विज्ञाय धर्माभासरता नराः ॥ कुर्वंतु तान्विमोहेन न
तेभ्यः फलमश्नुते ॥२१॥ रत्नभ्रमेण स्फुटितं कांचं गृण्हाति यो नरः ॥ स तेन रत्नाभरण धारणा त्पन्न धर्मवान् ॥२२
॥ अति स्वच्छस्य रत्नस्य क्रयः स्याद्धनकोटिभिः ॥ ततस्तद्रत्नमुत्कृष्टं लभ्यनापेक्षया खलु ॥२३॥ किंच

शिवर० ४
१२१

देवाधिदेवस्य यत्प्रियं तद्धरं स्मृतं॥ तदन्यत्सर्वमपरमसदाचारदूषितं॥२४॥ अयं तु भिल्लतनयः तत्पितापा-हरा।तू-
पभाजनं॥ तन्माता भ्रातरस्तस्य तत्कुलं च न संशयः॥२५॥ अयं छिन्नं कंटकारि प्रसूनं लिंगमस्तके॥ मरणा
वसरे प्राप्ते पातयित्वा मृतः सुराः॥२६॥ लिंगपूजनमेतेन कुसुमेन कृतं यम॥ अपवर्गदमित्येवं ज्ञात्वा तेन
न पालितं॥२७॥ ज्ञात्वा धर्मस्य करणे शिवपूजात्मकस्य तु॥ फलं यद्भाविलं तावद्वेदैरपि न निश्चितं॥२८॥
अज्ञात्वापि कृतो धर्मः शिवपूजात्मकः खलु॥ सर्वाभीष्टप्रदो नूनं इति वेदे विनिश्चितं॥२९॥ अनेनैव
हि धर्मेण गणत्वं प्राप्य बालकः॥ शिवप्रियतमो भूत्वा स्थास्यत्येव न संशयः॥३०॥ पुरा पापरतः कश्चिद्विं-
ध्यदेशेषु संस्थितः॥ तेन पापेन नीतानि दिनानि प्रतिवत्सरं॥३१॥ तेन यावत्कृतं पापं तत्पापगणनापि
न॥ पुनः पुनः स पापेषु निरतो विरतोपि न॥३२॥ स जारजस्वभावेन जारिणीनिरतोपि सः॥ तद्दुष्टाश
नो नित्यं कर्मांतरविवर्जितः॥३३॥ तेनैवोत्पादिता कापि जारिण्यां कन्यका तया॥ रेमे स पापनिरतो यौव
नाक्रांतया मुहुः॥३४॥ तस्या मुत्पादया मास कन्यकां सापि सुंदरी॥ यौवनेन समाक्रांता तया रेमे स पा
पधीः॥३५॥ तस्यां च जनया मास कन्यकां सोपि पापधीः॥ तया पि रेमे सा प्राह तं कदाचिन्मनोहरा॥३६॥
अ०३१

॥कन्यका उवाच ॥ ॥शयने कुसुमापेक्षा जायते मम तानि मे॥ आनयाद्यान्यथा क्रीडा तव नाद्य भविष्यति॥३७॥ इत्युक्तं तद्वचः श्रुत्वा शिवारामं ययौ निशि॥ स शिवार्चनयोग्यानि दृष्ट्वा पुष्पाणि विस्मितः॥३८॥ अतः परं प्रयत्नेन सर्वं पुष्पवनं मया॥ समूलं भवनं नेयं वनं स्यान्मम मंदिरे॥३९॥ एतादृशानि पुष्पाणि नान्यत्र भुवनत्रये॥ अतः सर्वाणि नेयानि मूलैः पुष्पवनानि तु॥४०॥ तत्रैकं पुष्पमादाय सुगंधमति सुंदरं॥ वनाद्विनिर्गतः पापी धावन्नेनयद्यो गृहं॥४१॥ तत्पुष्पगंधसंबंधवालपोत जिघृक्षया॥ दंदशूको महाकायो स्वबिलान्निर्गतः सुराः॥४२॥ आघ्रायाघ्राय तं गंधं सर्पस्तन्मंदिरं गतः॥ तं पुष्पकरमालोक्य तत्कायेसमुपाविशत्॥४३॥ ततः सर्पसमाक्रांतः सभीतो बहिरागतः॥ सर्पेण दष्टस्तत्पुष्पं पातितं लिंगमस्तके॥४४॥ तत्रैवास्समानीतं नार्मदं लिंगमुत्तमं॥ केनचित्पूजनं कर्तुं तत्रैव स्थापितं स्थितं॥४५॥ स सर्पो लिंगमावेष्ट्यात्तत्पुष्पाघ्राणनप्रियः॥ लिंगे संपादयामास शीतलत्वं सुवेष्टनैः॥ ततः ससर्पसंदष्टो मृतस्तद्विषसंश्रयः॥ तदा महेशस्तं दृष्ट्वा बभाषे गिरिजां प्रति॥४६॥ ॥सदाशिव उवाच॥ ॥गौरि कौतुकमस्त्येकं तद्वृत्ते शृणु सादरं॥ यत्कथाश्रवणात्सद्यो भक्तिर्मत्पूजने भवेत्॥४८॥ अस्ति पुष्पवनं रम्यं विंध्यदेशे मनोहरं॥ तत्र पुष्पाण्य-

नंतानि तद्गंधो प्यति सुंदरः॥४९॥ तत्रवात प्रसारोपि न भविष्यति सर्वथा॥ मद्भक्तेनकृतं रम्यं तद्वनं गौरि-
सुंदरं॥५०॥ भूमंडले न कुत्रापि तादृशं वनमंबिके॥ समंधा स्वतद्गंधैः वृत्तिकंटक भूरुहाः॥५१॥ ते चंदनत
रुस्पर्धां कुर्वंति प्रत्यहं शिवे॥ स्वगंध सदृशो गंधो न भवत्विति शैलजे॥५२॥ सुचंदन तरुत्वेन तरवस्तेम
ताजनैः॥ तत्पुष्पेषु प्रियो गंधः सोपि तावन्मनोहरः॥५३॥ मंदार प्रसवो त्पन्न गंधस्पर्धां करोति सः॥
गंधोपि कंटकतरुः प्रसवाधिष्ठितस्सदा॥५४॥ तत्र न भ्रमराणां वा प्रवेशः शैलकन्यके॥ तत्पुष्पद्रुममूले
षु कुल्याः संति मनोहराः॥५५॥ सुगंधजलकल्लोलमालाकुल समाकुला॥ प्रत्येक मालवालं च द्रुमा
णां विस्मयावहं॥५६॥ इत्युक्तं तद्वचः श्रुत्वा गौरी संतुष्टमानसा॥ शिवेन सह संप्राप तद्वनं पुष्पका
श्रिता॥५७॥ तस्मिन्वने दीर्घिकापि रत्नसोपानसंकुला॥ तत्तीरे रत्नसंबद्धं शिवमंदिरमुत्तमं॥५८॥ रत्नप्र
साद शोभाभिरलंकृतमिवादरात्॥ तन्मंदिरे बभौ देवः सांब स्तत्र समागतः॥५९॥ तत स्तं लिंगमालोक्य
शंकरो गिरिजान्वितः॥ आलिंग्य भक्त्या तल्लिंगं स्थिरं तत्र क्षणं स्थितः॥ तानि पुष्पाणि संवीक्ष्य शंकरो
लिंग मस्तके॥ रत्नोच्चयेन तुल्यानि संतुष्टः शिवया सह॥६१॥ अपार दीपमालाश्च दृष्टास्तत्र शिवालये॥

रत्नस्तंभेषु विचित्राणि ददर्श गिरिजापतिः॥६२॥ ततो बहिर्विनिष्क्रम्य तरुमूलेषु संस्थितः॥ तदा तत्तरुजा

पारकुसुमासार संवृतः॥६३॥ तत्कुल्या जलमास्वाद्य फलानि विमलान्यपि॥ तत्र गंधफली गंधं समाघ्राय पुनः

पुनः॥६४॥ स्वर्णगंधफली पुष्पं संकुलं तद्वनं सुराः॥ रेजे मनोहरं व्याप्तं स्थूलैर्गंधफली फलैः॥६५॥ तान्या

घ्राय महादेवः पीत्वा तद्रसमादरात्॥ सुधावधारणं चक्रे धिक् धिक् रससुधेति च॥६६॥ ततः सुदूरे प्यत्रापि

नार्मदं लिंगमुत्तमं॥ सर्पवेष्टितमालोक्य तत्र गंतुं मनो दधे॥६७॥ बाणलिंगमिदं रम्यं लक्षतो नीलमातृ

रात्॥ तत्र क्षणं वसाम्यद्य ततो मम मंदिरं॥६८॥ न रत्नमंदिरे प्रीतिः मणिलिंगेषु वा मम॥ रेवालिंगे परा प्रीतिः

तल्लिंगं मंगलावहं॥६९॥ तल्लिंगालोकनादेव ममानंदः प्रवर्धते॥ तल्लिंगसदृशं लिंगं नास्ति ब्रह्मांडगोलके॥

॥७०॥ इति कृत्वा मतिं देवः शिवया संयुतः शिवः॥ ययौ तन्नार्मदं लिंगं तत्रापि क्षणमास्थितः॥ तत्पुष्पं तु समा

घ्राय नित्यं गंधमनोहरं॥ येन पुण्यवता दत्तं पुष्पमेतन्मनोहरं॥७२॥ रेवालिंगे स्वयंभूते तस्य मुक्तिर्भविष्य

ति॥ संतोषं परमं प्राप तया गिरिजया सह॥७३॥ पुनः पुनः परं गंधं समाघ्राय महेश्वरः॥ सर्पसंवेष्टिते लिंगे

निवासं च चकार सः॥७४॥ एतद्गंधं समाघ्राय कोपि काकोदरो महान्॥ चकार शीतलं लिंगं स्वकायपरिवेष्टनैः॥

॥७५॥

एतद्दृष्टं न हेतुत्वमपरं मुक्तिसाधनं ॥ भोगिभूषण तातेन सिद्धा किल समाधुना ॥ ७६ ॥ इत्युक्त्वा कुणपं दूतास्त्रि-
वकिंकरवेष्टितं ॥ ददर्शतं विमानस्थं भूतं च स्तु गणेश्वराः ॥ ७७ ॥ ततः परं ययौ सांबः तमुत्सवमनेकधा ॥ दृष्ट्वा प्रहृ
ष्टस्त द्राग्यमारामं प्रति सत्वरं ॥ ७८ ॥ तस्मा ल्लिंगार्चनं श्रेष्ठं यस्य कस्यापि मुक्तिदं ॥ लिंगार्चनसमं पुण्यं न भूतं न
भविष्यति ॥ ७९ ॥ शिवार्चनजपुण्येन पुण्यवान यमित्यतः ॥ एतस्यागमनं तावद्युक्तं यममंदिरे ॥ ८० ॥ अत्रेतिहा
संवक्ष्यंतिये पुराणविदो जनाः ॥ पुरा कश्चिद्दरिद्रो भूत् तत्र श्रीशैलमंडले ॥ ८१ ॥ तेन पापाण्यपाराणि द्विजेनापि
कृतानि हि ॥ भिल्लागारेषु विचर [illegible] करोति कणयाचनं ॥ ८२ ॥ तैः कणै र्जीवनं तस्य कंटकारिफलैरपि ॥
फलानि तानि यत्नेन समानीय दिने दिने ॥ ८३ ॥ राशिं करोति भाग्येन नर्मदा लिंग मस्तके ॥ तान्यानीय सपक्वा
नि क्षित्वा पक्वा प्रयत्नतः ॥ ८४ ॥ नर्मदा लिंग निकटे संभक्तयति सादरं ॥ एवं संवसतस्तस्य प्रदोषे समुपस्थिते
॥ ८५ ॥ तत्र स्नात्वा नदीतीरे स्वेदापनयनाय सः ॥ ततः परं यया पूर्वं कंटकारिफलैर्जलैः ॥ ८६ ॥ प्रोक्षितैः पूर्व
वत्तत्र राशिं तावच्चकार सः ॥ पश्चाद्दूर्वांकुरैस्तानि छादया मास सत्वरं ॥ ८७ ॥ विलंबे नाघतत्पाको मास्त्वि
त्येव विनिश्चयात् ॥ ततः कृत्वा कणैरन्नं नार्मदा लिंग सन्निधौ ॥ ८८ ॥ श्रांतश्चकार शयनं काष्ठैः प्रज्वाल्य पावकं ॥

सोमप्रयोदशी दैवाद्दार्द्रेण तत्र संयुता ॥८९॥ तस्याः प्रदोष समये तदा सीच्छिवपूजनं ॥ आम्लानानि भवंत
च फलानीति जलान्वयः ॥९०॥ कृतो दूर्वान्वयोपीति नास्था तस्य शिवार्चने ॥ परं तु नार्मदे लिंगे तत्सर्वं तेन कल्पि
तं ॥९१॥ पूजात्वेनैव निष्पन्नमन्नं नैवेद्यतां गतं ॥ दीपत्वेनैव निष्पन्ना काष्ठज्वाला मनोहरा ॥९२॥ प्रणामत्वेन निष्प
न्नं शयनं तस्य तत्तदा ॥ तस्य भाग्यवशादेवं संपन्नं शिव पूजनं ॥९३॥ तेन तुष्टो महादेवः करुणा सागरः प्रभुः ॥ ततः
परं ददर्शायं स्वप्नं सर्वार्थकामदं ॥९४॥ स्वप्ने दूर्वार्चितं लिंगं नार्मदं तद्ददर्श सः ॥ फलैरप्यर्चितं लिंगं नैवेद्येन सम
न्वितं ॥९५॥ दीपज्वालादीपितं च सपश्चाद्दुत्थितः सुराः ॥ परितो रत्न सदनं रत्नप्राकार संवृतं ॥९६॥ दिव्य
भोगसमाकीर्णं भृत्यकोटिसमन्वितं रत्न जाला विराजितं ॥ दिव्य नारी समाकीर्णं [illegible] जितं
॥९७॥ गोकोटिवृंद संयुक्तमश्वकोटि समन्वितं ॥ गजकोटि समाकीर्णं भृत्यकोटि समन्वितं ॥९८॥ दासी
कोटि समाकीर्णं रत्नाभरण मंडितं ॥ इदमत्यद्भुतं दृष्ट्वा प्रहृष्टो विस्मयं गतः ॥९९॥ दिव्यनारी मुखं दृष्ट्वाब
भाषे वचनं मुदा ॥ कासि त्वं चंचलापांगि कमलालय लोचने ॥१००॥ कस्यांगनासि सदनं कस्येदं मणि
मंडितं ॥ अश्वाः कस्य गजाः कस्य दासाः कस्य वरानने ॥ एतादृशं महद्भाग्यं कस्य पुण्याश्रयस्य वा ॥१०१॥

 त्वया किमागतं भव्येमस्यार्द्दवमति सुंदरि ॥ दिव्यचामरवातेन मां तोषयसि सादरं ॥२॥ प्रतिक्षणं शरीरं मे नवमेव प्रजा-

 यते ॥ सौंदर्यवृद्धिरप्यस्य नवमेव प्रतिक्षणं ॥३॥ इतितद्वचनं श्रुत्वा सा तमाह मनोहरा ॥ संपादयंती तच्चित्ते परमा

नंदसागरं ॥४॥ भाग्याधिदेवता साहं प्रेषिता शंकरेण हि ॥ त्वत्सेवार्थं नियुक्ता स्मि मत्तुल्याः संति कोटिशः ॥

॥५॥ त्वयाद्य नार्मदे लिंगे प्रदोषसमये शिवः ॥ जलैः समर्चितः शुद्धैः कंटकारिफलैरपि ॥६॥ दूर्वांकुरैश्च दीपै

श्च नैवेद्येनापि पूजितः ॥ प्रणामेनापि समयः सोयं पुण्यतमः स्मृतः ॥७॥ एतादृशो महायोगो दुर्लभो देहिना

मतः ॥ एतस्मिन्योगे पूजितो त्र तुष्टो भवति शंकरः ॥८॥ शिवदेयेषु भाग्येषु भाग्यमल्पमिदं त्वया ॥ प्राप्तं प्राप्त

व्यमग्रे तु भाग्यं संख्याविवर्जितं ॥९॥ एवं गणितमहिमायं देवदेवो महेशः गिरिवरतनयांगालिंगितो मंगला

नि ॥ वितरति बहुकालं नंदयोग्यानि नित्यं शिवविभवमहाब्धिव्रातसंख्यान नूनं ॥१०॥ ॥इति श्रीशिवरह

स्ये तृतीयांशे सुरनंदिसंवादो नाम एकत्रिंशोध्यायः ॥३१॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥नंदि

केश्वर उवाच ॥ ॥इत्याकर्ण्य वचस्तस्याः तां प्रणम्यातिभक्तितः ॥ आनंदधारासंक्रांतो बभाषे वचनं मुदा ॥

कियत्कालमिदं भाग्यं देवि मद्दशमेष्यति ॥ शंकरस्य प्रसादोयं मयि जातः कथं वद ॥२॥ इत्युक्ते तद्वचः श्रुत्वा-

बभाषे सा मनोरमा ॥ रमारमणनेत्राब्जपूज्यांघ्रिस्मरणोत्सुका ॥ ३ ॥ संपादयंती बहुधा विस्मयं सुस्मितानना ॥
शिवलिंगार्चनध्यानस्पर्शनस्मरणोत्सुका ॥ ४ ॥ त्वयायदपि पूजायाः स्वरूपं विदितं ननु ॥ तथापि कृपयाशं
भो कृतार्थोस्मिन संशयः ॥ ५ ॥ कंटकारिफलानां तु रक्षणाय फलं तृणैः ॥ आच्छादनं कृतं सायं तज्जातं शिवपू
जनं ॥ ६ ॥ तदिदं लिंगमुत्कृष्टं क्षेत्रमप्युत्तमोत्तमं ॥ कालोपि सोयमुत्कृष्टः शिवपूजनसाधनं ॥ ७ ॥ महादेवः
स भगवान्दीनवत्सल इत्यतः ॥ निमित्तं किंचिदालोक्य ददौ भाग्यमनुत्तमं ॥ ८ ॥ एतस्मिन्समये भक्त्या ज्ञा
त्वा लिंगानि चव्रतं ॥ करोति पूजां यो मर्त्यः स साक्षादीश्वरो भवेत् ॥ ९ ॥ एतादृशः पुण्यकालोत्र दुर्लभः खलु
देहिनां ॥ दुर्लभं च भवे देव महादेवार्चनं परं ॥ १० ॥ अज्ञात्वा विविधं यस्तु करोति शिवपूजनं ॥ तत्कामदं
भवत्येव ज्ञातं चेत्किं वदाधुना ॥ ११ ॥ अतः परं प्रमादेन विनाशं कर पूजनं ॥ कुरु भाग्यमिदं तेन स्थिरं तव भवि
ष्यति ॥ १२ ॥ यस्मिन्दिने प्रमादस्ते भविष्यति शिवार्चने ॥ तस्मिन्नेव दिने भाग्यमेतदन्यत्त्वया स्यति ॥ १३ ॥
भाग्यं गतास्तु सततं शिवपूजनतत्परान् ॥ विचार्य संचरंतीति प्रमादो मास्तु सर्वथा ॥ १४ ॥ यादृशस्तादृशो वा
स्तु शिवाराधनतत्परः ॥ तं तावदनुसृत्यैव भाग्यं तिष्ठति केवलं ॥ १५ ॥ भाग्यांगना विहारस्य स्थलं शंकरमं
दिरं ॥

तद्विहाय न कुत्रापि यांति भाग्याधिदेवता ॥ २६ ॥ यथा धनिकमालोक्य याति वारांगना तथा ॥ हारं विलोक्य भाग्या- हरा- लु
निस विहाराणि यांति तं ॥ २७ ॥ भाग्यं नाना मंदिरं तु मन्ये शांकर मंदिरं ॥ अतः शांकर तां प्राप्य कुरु शं कर पूजनं ॥ अत्र- ३
॥ २८ ॥ अकुलीनः कुलीनो वा ज्ञानी वा ज्ञानवर्जितः ॥ शिवाराधन मात्रेण भवेद्भाग्यांगनापतिः ॥ २९ ॥ अत्राप्यु
दाहरंतीममितिहासं पुरातनं ॥ शिवपूजारत्नतत्व ज्ञानराशि विजृंभितं ॥ ३० ॥ पुरा कश्चिद भूद्राजा सर्व भाग्यस
मन्वितः ॥ धनधान्यादि संपूर्णं मंदिरं तस्य सर्वदा ॥ ३१ ॥ गजाश्वकुल संपूर्णं संकीर्णं महिषीगणैः ॥ दासीनां च
मनोज्ञानां समूहेन समावृतं ॥ ३२ ॥ एवं सौभाग्य संपन्नो विस्मृत्य शिवपूजनं ॥ निद्रा क्रीडादि निरतो युवतीजन
संवृतः ॥ ३३ ॥ तादृशस्य महद्भाग्यं क्षणेन विलयं ययौ ॥ शिवपूजापरित्यागस्तन्महाभाग्यनाशकः ॥ ३४ ॥ तद्र
त्ननिर्मितागाराः सप्राकारा लयं गताः ॥ गजानां च कुलं नष्टमश्वानामपि सत्वरं ॥ ३५ ॥ दासीनां च कुलं नष्टं
भृत्यानामपि सत्वरं ॥ दारास्तस्य महोदारा हारास्तस्य लयं गताः ॥ ३६ ॥ तदन्नराशयो नष्टास्तथैव धनरा
शयः ॥ विनष्टं गोकुलं तस्य महिषीकुलसंकुलं ॥ ३७ ॥ अकस्माज्जातमेवं किं सर्वं नष्टमिदं कथं ॥ अनर्थ
हेतुरत्रास्ति को वा सोपि न दृश्यते ॥ ३८ ॥ इन्द्रेणापि खलु स्पर्धा कृता पूर्वं मया धनैः ॥ धनस्य तस्य नाशो

मूलकथमघवनांतरे ॥२९॥ इति दुःखेन संविष्टो वनमाप दुरासदं ॥ क्षुधार्त्तस्तृषितः श्रांतश्चिंताशोकसमाकुलः ॥
॥३०॥ ददर्श शांभवं तत्र बिल्वमूले महावने ॥ शिवलिंगार्चनरतं भस्मोद्धूलितविग्रहं ॥३१॥ भस्मत्रिपुंड्ररेखांकं रुद्राक्षाभरणाश्रयं ॥ निमीलिताक्षं ध्यायंतं महादेवमनामयं ॥३२॥ तं दृष्ट्वा स तु भूपालः शांभवोत्तममादरात् ॥
प्रणम्य दंडवद्भूमौ उवाच स कृतांजलिः ॥३३॥ ॥राजोवाच ॥ ॥भगवन्शांभवश्रेष्ठ नीलकंठः सनिष्ठुरः ॥
तेनाद्य संहृतं भाग्यं ममाभाग्यस्य दुरात्मनः ॥३४॥ यदस्ति सहमानत्वं महादेवे श्रुतिश्रुतं ॥ तस्मिन्तिष्ठति नित्ये तु स कथं मयि निष्ठुरः ॥३५॥ अन्यस्य सहमानत्वं न श्रुतं नापि वस्तुतः ॥ किं चान्यस्तादृशः को वा यन्नैष्ठुर्येण दुर्भगः ॥३६॥ इति तद्वचनं श्रुत्वा हृष्टो रुष्टोपि शांकरः ॥ तमुवाच महाधीरो राजानं दीनवत्सलः ॥३७॥ ॥शांभव उवाच ॥ ॥यदुक्तं सहमानत्वं महादेवे सनातने ॥ तद्वेदोक्तमतस्तस्य निष्ठुरत्वमसंगतं ॥३८॥ कृता शिक्षा महेशेन दुर्वृत्तस्य तवाधुना ॥ शंकरस्मरणं त्यक्तं तथा शंकरपूजनं ॥३९॥ उदारदारसंभोगे भोगवानविचक्षणः ॥ विरूपाक्षो न स्मृतो हि त्वया भोगाकुलेन तु ॥४०॥ यत्तत्परिमलद्रव्यं कस्तूरीरसभूषितं ॥ तदनर्पितमीशाय स्वोपभोगाय कल्पितं ॥४१॥ दुकूलान्यपि रम्याणि शंकरानार्पितान्यपि ॥ कल्पितानि प्रमत्तेन स्वो

420

पभोगाय केवलं ॥४२॥ सहस्रा स्वोपभोगाय कल्पितानि वनान्यपि॥ भूषणानि विचित्राणि शंकरनर्पितान्यपि॥
॥४३॥ यदन्नं क्षीरसंयुक्तं शंकराया निवेदितं॥ तद्भुक्तं मया दुष्टेन तेन जातोसि दुर्भगः॥४४॥ यदन्नपतये दत्तं
तदन्नममृतं खलु॥ तद्भिन्नं विषमेवेति विषभोगे कुतः सुखं॥४५॥ भाग्यनाशेन नष्टाश्च प्राणाः सर्वेप्यसंशयं॥
अतः प्राणविहीनस्तु मृत इत्यवधारितः॥४६॥ दरिद्रस्य मृतस्यापि नांतरं खलु दृश्यते॥ दरिद्रो मृत एवेति
तस्य सौख्यं कुतो भवेत्॥४७॥ अप्रसौख्यनिधिरेवायं अप्रशां भवइति स्मृतः॥ अतस्त्वपजाधुना तावदाशांसौ
ख्यावगाहिनी॥४८॥ येनदत्तं महाभाग्यं तद्धि स्मरणमेवते॥ अप्रशनित्वेन निष्पन्नं अतस्तत्केन नश्यति॥
॥४९॥ भाग्यं प्राप्य खलून्मत्ताः भाग्यदं विस्मरंत्यतः॥ अभाग्या एव ते तावद्भविष्यंति न संशयः॥५०॥ क्वते दारा
महोदाराः सहाराः हारतालये॥ हारत्वे सति तत्सर्वं भविष्यति न संशयः॥५१॥ आयुष्मंतो भाग्यवंतः रूपवंतो
विशेषतः॥ शांभवा एव तत्सर्वं शांभवाननुधावति॥५२॥ एतावद्भाग्य समये कथं नाराधितः शिवः॥ कदापि
नकृतं राजन् तदा शंकरपूजनं॥ नाकारितं मंदिरं वा रत्नमंडलमंडितं॥ महेश्वरविहाराय रत्नाभरणभू
षितं॥५४॥ दीपमालाश्च न कृताः कोटिशः शिवमंदिरे॥ नवान्नराशि निर्दत्तं नैवेद्यं शंकराय तु॥५५॥

नकृता घृतकुल्यापि शिवनैवेद्यकल्पने ॥ मधुकुल्यापि नकृता क्षीरकुल्या विशेषतः ॥ ५६ ॥ श्रीमहादेवनैवेद्यं नभुक्तं भक्तिपूर्वकं ॥ नशांभवसमूहेभ्यो दत्तमन्नं विशेषतः ॥ ५७ ॥ नचरत्नानि दत्तानि दिव्यान्याभरणान्यपि ॥ दुकूलानि न दत्तानि शिवप्रीत्यर्थमादरात् ॥ ५८ ॥ योमहद्भाग्यसमये नाराधयति शंकरं ॥ सदुर्भगो भवत्येवशीघ्रं भाग्यविवर्जितः ॥ ५९ ॥ अभाग्यबुद्धिमग्नानां भक्तिः शंभौ नजायते ॥ केवलं भाग्यसंपन्नाः तेकुर्वंति शिवार्चनं ॥ ६० ॥ शिवनामोच्चारणेन नयंति समयं मुहुः ॥ तेतावदति धन्यास्ते पूजनीयाः प्रयत्नतः ॥ ६१ ॥ अतः परं गते भाग्ये शिवपूजार्चने मतिः ॥ नभविष्यति दुःखेन दुःखांबुनिधिमज्जने ॥ ६२ ॥ यदि दुःखेपि संप्राप्ते करोति शिवपूजनं ॥ तदापि दुःखहानिस्याद्भक्तिश्चेद्गिरिशे तदा ॥ ६३ ॥ अधुनावा महादेवं स्मरापस्मारनाशकं ॥ ६ ॥ स्मर स्मरा विलंबेन सांबं संसारमोचकं ॥ ६४ ॥ संसारदृढमूलानां विदः शंकरार्चनात् ॥ महापरशुरूपस्यादन्यथा सकथं भवेत् ॥ ६५ ॥ शिवनामाग्निसंदग्धाः संसारतरवः पुनः ॥ नप्ररोहंति सहसा निर्मूलास्तेयतस्ततः ॥ ६६ ॥ विषमप्यमृतं नाम शंकरं कार्यभेदतः ॥ पापमूर्तेर्विषं मन्ये पुण्यमूर्तेः सुधापरं ॥ ६७ ॥ दृढसंसारपाशानां छेदनाय शिवार्चनं ॥ दृढं संपन्निधानानां संबधायच जायते ॥ ६८ ॥ तथाच पापनाशार्थं तत्संप

शिव र०
२२७

त्संगमायच॥ कर्त्तव्यमतियत्नेन लिंगेशंकरपूजनं॥६९॥ लिंगानिबहुधा संति भुक्ति मुक्ति प्रदान्यपि॥तेषुलिं- हरा०नृ०
गेषु सर्वेषु नार्मदं लिंगमुत्तमं॥७०॥ यद्दत्तंनार्मदे लिंगे जलंकुसुममेववा॥ फलंबिल्व दलं वापितदानंदं बुधिप्रदं॥७१॥ अ०३२
दुर्लभंनार्मदंलिंगं दुर्लभा बिल्वमंजरी॥ दुर्लभा शांभवी विद्या दुर्लभः शंकरः कलौ॥७२॥ शंकरत्वं समासाद्यरेवा
लिंगेमनोहरे॥ बिल्वाद्यै रर्चनंकृत्वामुक्तो भवतिमानवः॥७३॥ अत्रापि संति लिंगानि श्रीशैले शंकरालये॥ पर्व
ताराधितं लिंगं त्रिपुरांतकसंज्ञितं॥७४॥ तल्लिंगपूजनादेव मुक्तः स्यादघ सागरात्॥ तस्य दर्शनमात्रेण मुक्तः स्या
दघ सागरात्॥७५॥ त्रिपुरासुर संहारं कृत्वा फाल विलोचनः॥ लिंगाकारं समासाद्य स्थितः श्री पर्वते खलु॥७६॥
भूमंडले षुतीर्थानि यानि तानि विशेषतः॥ श्रीशैल मूर्ति मासाद्य तिष्ठंत्येव न संशयः॥७७॥ तल्लिंगार्चनजंपुण्यं
संपन्मुक्तिकरंपरं॥ ~~तंत्रेन सामग्रीन्वोश्रीचंद्रलोदिके~~॥ तत्रयेनार्पितं द्रव्यं तदनंतफलं मतं॥७८॥ दूर्वांकुरै र्बि
ल्वपत्रैर्नीरैर्वात्रिपुरांतकं॥ यः पूजयति पुण्येण स मुक्तो भवति ध्रुवं॥७९॥ तत्र गोदोरकलशं भोग्यमाद्भक्ति
पूर्वकं॥ शांभवाय स पुण्यात्मा सुधासागर राट् भवेत्॥८०॥ श्रीपर्वते शांभ बयोद द्यादन्न मादरात्॥
स तावदन्न राशीनां अधिपो भवति ध्रुवं॥८१॥ तत्र रत्नानि यो दद्याद्भक्त्या शिव परायणः॥ स रत्नकोशाधि

पतिः भवत्येव न संशयः ॥ त्रिपुरान्तक मुद्दिश्य सुवर्णं यः प्रयच्छति ॥ स सुवर्ण पतिर्भूत्वा मुक्तो भवति मानवः ॥८३॥
शिव चिंतन शीलानां यो दद्या द्द्विजमंततः ॥ सोपि वित्ते शतां याति ऋषिवर्यै रपि स्तुतः ॥८४॥ घंटाकर्णेश्वरं नाम
लिंग मस्त्येक मुत्तमं ॥ तत्पूजनेन पापानि विनश्यंति न संशयः ॥ ८५॥ तत्रापि कुंड मस्त्येकं सुधाकुंड मिति श्रुतं ॥ त
त्र स्नात्वा नरः सद्यः शुद्धो भवति सर्वथा ॥ ८६॥ तत्कुंड जल मध्यस्थो घंटा कर्णेश्वरं स्मरन् ॥ सर्व पाप विनाशा
नां हेतु रेव प्रजायते ॥८७॥ घंटाकर्णेश्वरं नत्वा संपूज्य कुसुमादिभिः ॥ तत्पुष्प संख्यया तत्र संपत्प्राप्नोति मानवः ॥
८८॥ सारंगेश्वर मालोक्य तत्र स्नात्वा तिपावने ॥ तत्सरो जल पानेन मुक्तो भवति मानवः ॥८९॥ पुण्यकोटि समा
क्रांतं शिखरेश्वर पूजनम् ॥ करोति पुण्यकालेषु बिल्वदूर्वादि भिर्मुदा ॥९०॥ विभूतिकुंड मस्त्येकं तत्तु पावनपाव
नं ॥ तस्मिन्कुंडे प्रविष्टानि तीर्थानि विमलान्यपि ॥९१॥ तत्कुंड जल योगेन तीर्थानां तीर्थतामता ॥ ततः सर्वाणि ती
र्थानि तत्र यांति दिने दिने ॥९२॥ श्रीशैलो दुर्लभो लोके भस्मकुंडं च दुर्लभं ॥ त्रिपुरांतक लिंगं च दुर्लभं जगतीतले
॥९३॥ शिखरेश्वर मालोक्य विमुक्तः पापपंजरात् ॥ पश्चान्मुक्तो भवत्येव यत्र कुत्रापि वा मृतः ॥९४॥ तत्रास्ति हाट
केशाख्यं लिंगं हाटक निर्मितं ॥ तत्रास्ति हाटकं कुंडं तज्जलं पापनाशनं ॥९५॥ तत्र स्नात्वा प्रयत्नेन तल्लिंगं भक्ति-

422

शिवरहस्य.
१२९

पूर्वकं ॥ बिल्वपत्रैः समभ्यर्च मुक्तो भवति मानवः ॥ ९६ ॥ श्रीशैले भ्रमरांबायाः कृत्वा दर्शनमादरात् ॥ सर्वपापविनि- हरा० तृ०
मुक्तः संपन्नो भविष्यति ॥ ९७ ॥ भ्रमरांबापदांभोजं कोमलैर्बिल्वपल्लवैः ॥ समभ्यर्च प्रयत्नेन सर्वराष्ट्राधि अ० ३२
पो भवेत् ॥ ९८ ॥ भ्रमरांबां समभ्यर्च यस्तु राश्रौ प्रदक्षिणं ॥ करोति तत्करस्थास्यात्सर्वसंपद्वरांगना ॥ ९९ ॥ तस्यस्था
न्महदैश्वर्यं संततिस्तस्य वर्धते ॥ यश्चित्तं भ्रमरांबायाश्चरणांबुरुहार्चने ॥ १०० ॥ तस्य तावद्विपत्तिस्याद्यावन्नाराधि
ताशिवा ॥ आराधितायां तस्यां तु संपद्वृद्धिर्दिने दिने ॥ १ ॥ तत्र संपत्प्रदानाय दीक्षिता भ्रमरांबिका ॥ तत्पादांबुरु
होत्पन्नाः सर्वदा सर्वसंपदः ॥ २ ॥ संपत्खनिरिति ख्याता श्रीशैले भ्रमरांबिका ॥ तस्याः प्रभावो वेदैर्वा न ज्ञातः
सर्वथा खलु ॥ ३ ॥ अलमलमभिलापैरिंदुमौलिप्रसादात्सकलभुवननाथो जायते मानवोपि ॥ इति मनसि विवि
चिंत्यानुग्रमुग्रं विदित्वा भजभज भगवंतं पार्वतीकांतमेकं ॥ १०४ ॥ ॥ इति श्रीशिवरहस्ये हराख्ये तृतीयांशे
सुरनंदीश्वरसंवादे नाम द्वात्रिंशोध्यायः ॥ ३२ ॥ ॥ श्रीकाशीविश्वेश्वरर्पणमस्तु ॥ ॥ राजोवाच ॥
॥ प्रमत्तेन मया पूर्वं त्यक्तं शंकरपूजनं ॥ तत्त्यागेन गतं भाग्यं न पूजासाधनान्यपि ॥ १ ॥ न पंचामृतसामग्री नवा नै
वेद्यसाधनं ॥ न दीपदानसामग्री नवा श्रीचंदनादिकं ॥ २ ॥ एवं सति कथं पूजा कर्त्तव्या प्रीतिपूर्वकं ॥ भावना-

कथमंशानामपेक्षां न करोति किं ॥ स्मरणं कथमंशेन विना किं करणं भवेत् ॥ कथमंशविमुक्तेन करणेन कुतः फलं ॥४॥ फलं संभावितं किंवा शुद्धगोदोहनादिना ॥ किं प्रयोगाप्रविष्टेन तेन गोदोहनेन वा ॥५॥ किं सान्नाय्येन वा दध्ना केवलाज्ज्येनवा फलं ॥ पत्न्यावेक्षितमेवाज्यं प्रयोगांगं न केवलं ॥ जपमेव किमेतस्याप्यनस्यांगत्वमीप्सितं ॥ तत्तावत्कथमंशोपिकरणापेक्षितः खलु ॥७॥ एवं च करणे नापि श्रीमहादेवपूजया ॥ निष्पत्तिः फलजातस्य कथमंशैर्विना तु न ॥८॥ इति तद्वचनं श्रुत्वा तमाह प्रीतिपूर्वकं ॥ ॥शंकर उवाच ॥ ॥ संपत्काले कथं त्यक्तं त्वया शंकरपूजनं ॥९॥ संपाद्य लयकालीनोप्यनुतापस्त्वयाधुना ॥ कथं चित्पुण्यसामग्रीं संपादयितुमर्हसि ॥१०॥ कथमन्नानि दिव्यानि कथं वा रत्नपर्वताः ॥ स्थिता सौ शेशपूजायामू न जाता भक्तिरुज्ज्वला ॥११॥ पुनर्भाग्येपि संप्राप्ते सोन्मादेन त्वया कथं ॥ महादेवार्चनं कार्यं विपत्कुलविनाशकं ॥१२॥ आपत्काले यथा भक्तिः संपत्काले भवेत्तथा ॥ सततं त्वेव संसारं दिव्यसाधनपूजया ॥१३॥ ते रत्नपर्वता नष्टाः त्वया ये समुपार्जिताः ॥ ततः कथं त्वया कार्यं रत्नैर्लिंगस्य पूजनं ॥१४॥ रत्नैर्नैकेनयः कुर्यात् श्रीमहादेवपूजनं ॥ स संपद्राशिसंपन्नः कल्पांतेपि भविष्यति ॥१५॥ तानि रत्नानि दग्धानि शंकरानार्पितान्यतः ॥ ते प्यन्नराशयो दग्धाः शंकरायानिवेदिताः ॥१६॥ गोक्षीरघृतकुल्याश्च शंकरानार्पितास्ततः ॥ शुष्का एव जलानां च कुल्या [illegible] त्याकुलाइव ॥ ॥१७॥

दग्धं पुष्पवनं सर्वं यैः पुष्पै रीशपूजनं ॥ भक्त्या न कृतमेवेति दग्धाश्च फल संचयाः ॥ १८ ॥ स भाग्य विभवो दग्धो भवान- हरा- र्चनतस्त्वत्र ॥ अतः किमनुलापेन फलमद्य भविष्यति ॥ १९ ॥ महाविभव संपत्त्या श्री महादेव पूजनं ॥ कर्तुं कथं महोत्साहो न कृतो दुर्भगाधम ॥ २० ॥ धिक् धिक् जन्म तवेदं ते जीवनं धिक् धिगेव तत् ॥ शिवार्नचक जन्मानि निरयाय हि केवलं ॥ २१ ॥ अतः परं वा यत्नेन नवदूर्वांकुरादिभिः ॥ त्रिपुरांतक पूजायां निरतो भव सत्वरं ॥ २२ ॥ इत्युक्तस्तं मुनिं नत्वा स्नात्वा सरसि पावने ॥ दूर्वांकुरैः सरसिजैः पूजया मास शंकरं ॥ २३ ॥ एवं संवसतस्तस्य श्री महादेव पूजया ॥ भूयानेव गतः कालो कालकाल कृपां विना ॥ २४ ॥ उन्मत्ताय महद्भाग्यं न दातव्यमितीच्छया ॥ न दत्तं भाग्य मीशेन कृतेपि शिवपूजने ॥ २५ ॥ अति प्रमत्त भाग्यानि हृतान्येव हि लीलया ॥ स्वतंत्रेण महेशेन प्रभुत्वं प्रकटीकृतं ॥ २६ ॥ अन्ना भावान्नि राहारः स चिरं शिव पूजया ॥ कालं नीत्वा स्थितस्तत्र त्रिपुरांतक मंदिरे ॥ २७ ॥ ततः परं स राजा तु प्रदोषे सोमवासरे ॥ आर्द्रा नक्षत्र संयुक्ते पूजया मास शंकरं ॥ २८ ॥ दूर्वांकुरै रपारैश्च कमलै रमलै र्जलैः ॥ प्रणामै रपि नृत्यैश्च तोषया मास शंकरं ॥ २९ ॥ ततः परं महादेवः प्रसन्नः करुणा निधिः ॥ ददौ भाग्यान्यनंतानि तस्मै राज्ञे विशेषतः ॥ ३० ॥ ततः स राजा संप्राप्य भाग्यानि विविधान्यपि ॥ प्रहृष्टः शंकरं स्तुत्वा-

चकार शिवमंदिरं ॥ ३१॥ रत्नप्राकार संयुक्तं अनंत विभवं मुदा ॥ स भक्त्या कारयामास दिव्य पुष्पवनान्यपि ॥ ३२॥
कोटिशो दीप मालाश्च रत्नपात्रेषु भक्तितः ॥ चकार धूप गिरयः कल्पिता स्तेन वह्निषु ॥ ३३॥ अपार रत्न गिरयः
शंकराय समर्पिताः ॥ पंचामृत प्रवाहैश्च तोषितः परमेश्वरः ॥ ३४॥ दिव्यैः परिमल द्रव्यैः चारु चंदन कर्दमैः ॥
सुगंध कुसुमासारैः पूजयामास शंकरं ॥ ३५॥ नैवेद्य पर्वतैरीशं तोषयामास भूपतिः ॥ नाट्यैर्गानैश्च विविधैः
दुकूला भरणादिभिः ॥ ३६॥ प्रदक्षिण नमस्कारैः ललाट किणकारणैः ॥ स्वेद धारा परिक्रांतश्चकार शिव
तोषणं ॥ ३७॥ भोजिताः प्रत्यहं तेन कोटिशः शैव पुंगवाः ॥ दुकूल गिरयो दत्ताः तेभ्य एव प्रयत्नतः ॥ ३८॥ सुवर्ण
रत्न गिरयः तेभ्यो दत्ताश्च भक्तितः ॥ तद्देशवासिनः सर्वे कृतास्तेनैव शंकराः ॥ ३९॥ शिवार्चनानुरागेण तेनाऽऽ
हारोपि विस्मृतः ॥ न दारो दार हाराणां क्षणं वा तस्य संगमः ॥ ४०॥ विनश्वरमिदं भाग्यं अनेनयदि शंकरः ॥ पूजि
तस्या तदा भाग्यं प्रवृद्धं च भविष्यति ॥ ४१॥ शिवपूजा परित्यागाद्दुःखं भुक्त मनेकधा ॥ अतः परं वा यत्नेन
कर्तव्यं शिवपूजनं ॥ ४२॥ येनान्नमपि न प्राप्तं मया तेनाधुना महत् ॥ भाग्यं प्राप्तमिदं भाग्याच्छंकराय स
मर्पितं ॥ ४३॥ शिवनैवेद्य मात्रेण कमं चि ज्जीवने सति ॥ अन्य द्भाग्यं महेशाय देयं दत्तं च तेन मे ॥

१२५

अतः परं कृपासिंधुः कुपितोनयथातथा॥ कर्त्तव्यमन्यथा दुःखं भविष्यत्येव पूर्ववत्॥४५॥ यावज्जीवमयं धर्मो ममशंकरपूजनं॥ अनेनकालनयने कालादपिनमे भयं॥४६॥ अस्यादुन्मादकालोयं शिवानुग्रहसाधनः॥ भार्गवंचा प्रतिमंतेनकर्त्तव्यं शिवपूजनं॥४७॥ इतिनिश्चित्यवहुधा सचकार शिवार्चनं॥ तेनपुण्यप्रभावेन संपद्वृध्यप्यभूत्सदा॥४८॥ तस्यपुत्राः शतंतेपि वीराः शांकरपुंगवाः॥ तैश्चपूजाकृतानित्यं रत्नादिभिरुमापतेः॥४९॥ रत्नैरपि महेशाय मंदिराणि कृतान्यपि॥ शिवपूजाप्रसूनार्थं नवान्यपि कृतानि तैः॥५०॥ विरता स्वसहसा संसारे दुरिताकरे॥ पुष्पाणि सायमानीय बिल्वपत्राणि कोटिशः॥ अर्पितानि महादेवे नीतः कालश्चतैस्तया॥ भार्ये पि विरताः सर्वे शंकराराधनोत्सुकाः॥ शांभवास्वते सर्वे शिवपूजापरायणाः॥ नारायणादिवृंदारवृंदवंदितपादुकाः॥५३॥ कृत्वा शिवार्चनं नित्यं विहारार्थं चरंतिते॥ स्वर्गलोके ब्रह्मलोके विष्णुलोके निजेच्छया॥५४॥ उत्तमाश्वं समारुह्य तेयांति स्वर्गमंदिरं॥ गजानपि समारुह्य कदाचिदपि शांभवाः॥५५॥ शिवपूजाप्रभावेन तेपि सर्वेऽपि शांभवाः॥ अविघ्नगमना एव ब्रह्मलोके पि संततं॥५६॥ कदाचिदागतान्दृष्ट्वा शांभवांस्तांश्चतुर्मुखः॥ अभ्युत्थानादिभिः सम्यक्पूजयामास सादरं॥५७॥ ततः सपृष्टस्तत्रत्यैः तत्स्वरूपं किमित्यपि॥

ततस्तान्विस्मयेनाह तत्पितामह वर्त्तनं ॥५८॥ एतत्पितामहः पूर्वं कीकटेषु स्थितः पुरा ॥ स भिल्लस्तेन तद्देशे शि
वमंदिरपालकः ॥५९॥ तद्द्वारेश्च तदा हारो नीयते तत्र नित्यशः ॥ स तत्र क्षुद्रजंतूनां करोत्येव निवारणं ॥६०॥ यथा
न क्षुद्रजंतूनां प्रवेशः शिवमंदिरे ॥ तथा करोति यत्नेन नियुक्तः केन चिन्मुहुः ॥६१॥ तदा तन्मंदिरद्वारि बलिदा
नान्नमादरात् ॥ गृहीत्वानुभुजे भिल्लः स्वदारैः सह भक्तितः ॥ तदन्नपरिपाकेन सपुष्टो रतितत्परः ॥ ततो
दधार तत्पत्नी गर्भं सौभाग्यसंयुतं ॥६३॥ ततस्तस्या भवत्पुत्रः रूपलावण्यसंयुतः ॥ ततस्तद्देशराजापि तं द
दर्श कदाचन ॥६४॥ ततः परं विचार्यायं राजा पुत्रविवर्जितः ॥ तस्मै राज्यं ददौ पश्चात्स मृतो भूपतिर्बुधाः ॥६५॥
तेन शिवनैवेद्यबलिभोजनपुण्यतः ॥ तदन्नपरिपाकेन तद्गर्भे ज्ञानसंयुतः ॥६६॥ भुक्तं महेशनैवेद्यं जनकाभ्यां
ममादरात् ॥ तदन्नरसपुष्टाच गर्भे तनुरियं मम ॥६७॥ तदन्नरसपुष्टाभ्यां गर्भः संपादितो ह्ययं ॥ मम भाग्य
स्यनांतोस्ति शिवनैवेद्यभोजनात् ॥६८॥ पित्रोस्तद्रसपुष्टाभ्यां गर्भः संपादनं कृतं ॥ तदन्नरसधारायाः संबंधे
न मयाधुना ॥६९॥ शरीरं पावनं धन्यं जीवनं च ममाधुना ॥ राज्याधिपत्यं संप्राप्य कर्तव्यं शिवपूजनं ॥७०॥ शिव
नैवेद्यसंबंधात् भूपतिर्जायते पुमान् ॥ दुर्लभं शिवनैवेद्यं सुराणामपि तद्यतः ॥७१॥ दुर्लभं प्राप्यते तावदीशानुग्रह-

शिव०२ णात्परं ॥ इति संचिन्त्य संचिन्त्य सोपि गर्भाद्विनिर्गतः ॥७२॥ ततः सुराज्यं संप्राप्य यौवनं प्राप्य दुर्मदः ॥ नशिवाराधनं द्योगं चकार कुमतिर्बुधाः ॥७३॥ उदारदारधीरांगसंगात्सोपि विस्मृतः ॥ रत्नप्रासादमारुह्य क्रीडायां निरतो मुहुः ॥७४॥ तादृशोन्मादसमये विस्मृते शिवपूजने ॥ तस्य राज्यं गतं सर्वं सौभाग्यं च गलं तथा ॥ ततः श्रीशैलनाथस्य सेवया राज्यमापसः ॥ ततः परं महादेवं पूजयामास सादरं ॥७६॥ तत्पूजनेन संप्राप्तं भाग्यं पूर्वाधिकं बुधाः ॥ तस्य भाग्यस्य नांतो भूत्तेन भाग्येन शंकरं ॥७७॥ पूजयामास विविधैः उपचारैरनेकधा ॥ तस्य पुत्राः किलायाताः सर्वदा शंकरार्चकाः ॥७८॥ एतैश्च रत्ननिलयाः शंकरायकृतास्तथा ॥ यथा तुष्टो महादेवो रत्नसुंदरमंदिरैः ॥७९॥ वनानि कारितान्येतैः तेषु पुष्पाणि संततं ॥ तैः पुष्पैः पूजयंत्येव महादेवं प्रयत्नतः ॥८०॥ महादेवप्रसादेन राज्यवृद्धिः प्रजायते ॥ तद्राज्यधनमादाय शिवपूजां करोति सः ॥८१॥ शिवपूजनसामर्थ्यं अनंतैश्वर्यदं बुधाः ॥ तदैश्वर्यस्य नांतोस्ति तद्भक्तानां च वस्तुतः ॥८२॥ शिवचिंतनशीलं चेदमृतं चित्तमन्ततः ॥ वनेशायाति पतितं पतिपत्तेरपि स्तुतं ॥८३॥ निवासो मत्तमातंगकोटीनां शांभवालये ॥ उच्चैःश्रवणभाग्येन शिवनाम्नः फलं हि तत् ॥८४॥ तुरंगाणां च तुंगानां कोटिशः शांभवालये ॥ तदुच्चैः शिव-

अ० २३

१३१

पूजायाः फलमित्यवधारितं ॥८५॥ गोवृषाणां च नित्यः शां भवस्यालयः खलु ॥ गिरिशाराधनस्यैव फलं तदिति निश्चितं ॥८६॥ यद्यद्भाग्यं स भाग्यानां तत्सर्वं शिवपूजया ॥ सभाग्य त्वं च निर्णीतं केवलं शिवपूजया ॥८७॥ किं चानुषंगिकमिदं फलमित्यवैमि भाग्यं समृद्ध धनधान्य समृद्धि रूपं ॥ सत्यादिलोकवसतिश्च शिवार्चनस्य मन्ये फलं किमपि तच्छिव एव वेद ॥८८॥ मुख्ये सत्यपि किं फले तदित रत्किं चित्फलं जायते यानारोहण लक्षणं च न फलं ग्रामांग संगात्मके ॥ मुख्ये सत्यपि तत्फले खलु तया मल्लोकवासः फलं कैलासान्वयमि कृतामपि तया तत्फलं कल्प्यते ॥८९॥ ॥इति श्री शिवरहस्ये हराख्ये तृतीयांशे सुरनंदीश्वरसंवादो नाम त्रयस्त्रिंशोध्यायः ॥३३॥ ॥श्री काशी विश्वेश्वरार्पणमस्तु ॥ ॥ई॥ ॥ ॥नंदिकेश्वर उवाच ॥ ॥इति भाग्य वचः श्रुत्वा नत्वा भाग्याधिदेवतां ॥ सन्निधानं तवा त्रास्तु सेव यावत्त एव मे ॥१॥ महेश्वराज्ञया प्राप्तः त्वया मत्सन्निधिः खलु ॥ एतावता सभाग्योहं इतः किमधिकं फलं ॥२॥ आराधनं च भवति करोमि भगवानपि ॥ संतुष्टो येन भगवान् सो भाग्यं स्थिरता मियात् ॥३॥ इत्युक्त्वा सोपि संतुष्टो भोगारंभ समावृतः ॥ शिवार्चनपरो नित्यं शिवनाम रतो भवत् ॥४॥ तेनाप्युक्तमुत्कृष्ट

426

कारितं रत्नमंदिरं ॥ तस्य नार्मद लिंगस्य सर्वाभरण भूषितं ॥ ५ ॥ मणिमाला समाक्रांतं रत्नप्राकार संयुतं ॥ - हश॰तृ॰
सपंचामृत कुल्याभिश्च क्रे लिंगाभिषेचनं ॥ ६ ॥ दिव्यनीर प्रवाहैश्च शीतलैर्गंध संयुतैः ॥ कस्तूरीघनसा अ॰ ३५
रादिनाना द्रव्य समन्वितैः ॥ ७ ॥ चंदनं च घनी भूतं दिव्यगंध समन्वितं ॥ दत्तमीशायतेनैव रत्नै रभ्यर्चितः
शिवः ॥ ८ ॥ गोघृतेनैव दिव्येन दीपमालाः कृताः खलु ॥ ताभिः प्रभान्वितं जातं सर्वं ब्रह्मांड मंडलं ॥ ९ ॥ बिल्व
मंदारकुसुमैः कमलै रमलै रपि ॥ अन्यैश्च विविधैः पुष्पैः गंध सार समन्वितैः ॥ १० ॥ सुवर्णपुष्प मालाभिः ना
नारत्न समन्वितैः ॥ मुक्ताहारैरविरलैः नीलमालाभिरादरात् ॥ ११ ॥ बिल्वपल्लव मालाभिरमलाभिर्विशेषतः ॥
अतुल्याभिरमूल्याभिः पूजयामास शंकरं ॥ १२ ॥ नानाविधैर्धूपधूमैः धूपयित्वा सदाशिवं ॥ नैवेद्यं कल्पया
मास स चान्नैर्विविधैरपि ॥ १३ ॥ परमान्न प्रभावैश्च शर्कराज्य समन्वितैः ॥ वटकाद्यैर्भक्ष्यसंघैरपारैर्मधु
रैरपि ॥ १४ ॥ नारिकेलजलानां च प्रवाहैः शीतलैर्जलैः ॥ एलालवंग संयुक्तैः तांबूलैरमलैरपि ॥ १५ ॥ रत्नछत्रैश्चा
मरैश्च दुकूलैर्दर्पणैरपि ॥ प्रणामैरपि नाट्यैश्च तोषयामास शंकरं ॥ १६ ॥ दिव्यान्नैः शिवनैवेद्यैः तोषया
मास कोटिशः ॥ शांभवाग्रसरानेवद दौतेभ्यो धनान्यपि ॥ १७ ॥ गो सहस्राणि दत्तानि शैवेभ्यस्तेन सादरं ॥

विविधान्यपि धान्यानि तेभ्यो दत्तानि तेन तु॥ प्रत्यहं दृढया भक्त्वा पूजामेवं विधाय सः॥ आसाय मुपवासेन निशि भुंक्ते शिवार्चकः॥१९॥ एवं संवसतस्तस्य दृष्टुं सर्वं शिवोत्सवं॥ सनकाद्यैः सहानंतैः मुनिभिर्नारदोययौ॥२०॥ सदूरे णैवतान् दृष्ट्वा भस्मनोद्धूलितविग्रहान्॥ रुद्राक्षमालाभरणान् हृष्टः सादरमास्तिकः॥ तानागतान्प्रयत्नेन नत्वा भक्तिपुरःसरं॥ पूजां विधाय विहितां रत्नसिंहासने स्थितान्॥२२॥ स्वयं च भस्मनोद्धूल्य सर्वांगान्यपि भक्तितः॥ रुद्राक्षमालाभरणः प्रपच्छ शिववैभवं॥२३॥ महेश्वराराधनस्य प्रकारः कः परः श्रुतः॥ किं तत्फलं चाधिकारी कोवात न्मेवदं तुवः॥२४॥ इति तद्वचनं श्रुत्वा नारदो भक्तिपूर्वकं॥ नत्वा महेश्वरं प्राह शिवधर्मान्विशेषतः॥२५॥ ॥ नारद उवाच॥ ॥ संति धर्माः श्रुतिप्रोक्ताः कोटिशस्तौरलं खलु॥ आयासमात्रफलकैरल्पाल्पफलकैरपि॥ ॥२६॥ धर्मैरपारैर्विविधैः यत्फलं लभ्यते जनैः॥ तदीशार्चनसंप्राप्यं लीलयैव न संशयः॥२७॥ न बहुद्रव्यं वि लयो नाल्पायासः शिवार्चने॥ प्राप्यंते विप्र लान्येव विपुलानि फलान्यपि॥२८॥ बिल्वपत्रस्य मात्रस्य प्रदाने लिंगमस्तके॥ यत्प्राप्यते तत्तु फलं न धर्मांतरकोटिभिः॥२९॥ लिंगसृष्टिः कृता पूर्वं करुणासागरेण हि॥ त्रिशूलपाणिना सेयमुत्कृष्टा सृष्टिरद्भुता॥३०॥ पुरा कैलासभुवने सुखासीनं महेश्वरं॥ हिरण्यबाहुमीशानं स्वर्ण–

शिवर॰२ सुंदर विग्रहम् ॥३१॥ शरद्राकेश्वराकारं दुकूलपरिवेष्टितं ॥ उदारतारहाराणां विहारनिकरं परं ॥ जटाजूटतडि-हरा॰ टी॰
१३२ कोटि निकटेंदुकलाधरं ॥ रत्नाभरणशोभाभिः अभितः परिवेष्टितं ॥३३॥ त्रिलोचनं नीलकंठं सोत्कंठं गिरिजा अ॰३४
१३३ नने ॥ अप्रमेयमनाद्यंतं सच्चिदानंदलक्षणं ॥३४॥ परमानंदं शांतं मंगलानां च मंगलं ॥ पवित्राणां पवित्रं च देव
तानां च दैवतं ॥३५॥ अप्रधृष्यं भवं भीमं जरामरणवर्जितं ॥ महामृत्युंजयं शर्वं महारुद्रं पिनाकिनं ॥३६॥ भक्तानंद
प्रदं भव्यं दिव्यवेषविभूषितं ॥ स्मरणेनापि भक्तानां सर्वाभीष्टप्रदायकं ॥३७॥ गौरीविहारनिरतं प्रसन्नवदनं
प्रभुं ॥ शंभुं विलोक्य गिरिजा प्राह तद्भाममागगा ॥३८॥ ॥श्रीगौर्युवाच ॥ ॥ भगवन्भवदेवेश त्वं
सर्वज्ञशिरोमणिः ॥ प्रष्टव्यमेव मधुना दयया तद्वदाधुना ॥३९॥ केन सिद्धिर्भवेन्नृणां मुक्तिश्च परमेश्वर ॥
इष्टलाभोपि सततं तद्वदादरपूर्वकं ॥४०॥ न चावगणना कार्या नावहेलन स्खलना ॥ नान्यत्र चित्तविश्रामः कर्त्त
व्यः श्रमवर्जितः ॥४१॥ इति तद्वचनं श्रुत्वा प्राह गौरीं मनोहरं ॥ वचनं श्रुतितत्त्वज्ञः तदादरपुरःसरं ॥४२॥
॥श्रीसदाशिव उवाच ॥ ॥ इष्टसाधनमस्त्येकं गोपनीयं प्रयत्नतः ॥ तदेव तावदधुना वक्तव्यं श्रुतिचोदितं ॥
॥४३॥ निधनेत्यादिभिर्मंत्रैः लिंगमुक्तं ममांबिके ॥ नमः पदांतैर्मंत्रैः स्तैः पूजा प्रयुक्ता विशेषतः ॥४४॥ ॥

ममैवपूजाविहितातैरादौतदनंतरं॥ लिंगपूजापिविहितासापूजासुलभायतः॥४५॥ मत्स्वरूपपरिज्ञानमशक्य
मितिनिश्चयात्॥ मल्लिंगपूजनंतावदुक्तंलोकोपकारकं॥४६॥ मल्लिंगपूजनंतावद्यावज्जीवंविशेषतः॥
कर्त्तव्यमितियत्नेनश्रुतिभूतेनवर्त्मना॥४७॥ यावज्जीवंश्रुतिःसेयमग्निहोत्रादिकर्मणां॥ शिवलिंगार्चनस्यापि
नसमानाविशेषतः॥४८॥ सायंप्रातःश्रुतिस्तत्रमिन्नकालनियामिका॥ अनुपादेयमत्रांगंकालोपीत्यवधारितः॥४९॥
तथापिविधिशक्तिश्चकालमादायकेवलं॥ तत्रपर्यवसन्नेवसायंप्रातरितिश्रुतिः॥५०॥ प्रकृतेलिंगपूजायांश्रुतिःका
लनियामिका॥ नास्तीतिसर्वदाकार्या,साणमुल्प्रत्ययोन्मिता॥५१॥ णमुल्प्रत्ययस्यास्यसंकोचायश्रुतिस्तथा॥
असंकुचितएवायंप्रत्ययःस्वार्थबोधकः॥५२॥ विहितप्रत्ययेनैवशिवपूजनभावना॥ तयाभावनयातावत्करणं
पूजनंमितं॥५३॥ तत्राधिकरणंकिंवाकालद्बोधकसप्तमी॥ अधिकारोचकस्तस्मिन्कथमंशोपिचिंतितः॥५४॥
शिवलिंगेबिल्वपत्रैःपवित्रैःस्वार्जितैरपि॥ श्रुतिप्राप्ताभावनापिपूर्णाशासमभूच्छिवे॥५५॥ श्रुतिर्यथास्तिस
र्वेभ्यःकामेभ्यइतितत्रसा॥ दर्शादौतद्वदत्रापिकामःश्रुतिरविच्युता॥५६॥ फलसाधनभूतत्वात्करणंशिवपू
जनं॥ शिवार्चनेनलभ्यंतेसर्वेकामाइतिश्रुतेः॥५७॥ इयंशिवार्चनेनेतितृतीयाकरणंपरं॥ शिवपूजनमेवेतिशक्त्या—

बोधयतिस्वयं॥५८॥तस्याःशक्तिस्तुनान्यत्र ओमित्यंशेव निश्चिता॥करणेशक्तिरेवं चतदेवकरणं स्मृतं॥५९॥
यजुस्तु होतितादित्यादि श्रुतिरायतनेयथा॥शक्तालयेवप्रकृते लिंगे कुर्यादितिश्रुतिः॥६०॥तयाचसप्तमीसे
यंलिंगमायतनं परं॥ज्ञेयं शिवार्चनस्येति तत्रशक्तावदत्यपि॥६१॥फलकामोधिकारीति ज्योतिष्टोमेवि
निश्चयात्॥प्रकृतेप्यधिकारीतु फलकाम इतिश्रुतः॥६२॥गुणांतरान्वेषणाय प्रवृत्तासापि भावना॥बिल्व
पत्रै रितिश्रुत्वातानिजग्राह सादरं॥६३॥ स्वानीतान्येवतानीति संस्कारापेक्षयापिसा॥स्वानीतत्वा
ख्यसंस्कारं सागृण्हात्येव सादरं॥६४॥पत्न्यावेक्षितमित्यत्र संस्कारः पत्न्यवेक्षणं॥स्वानीतत्वं चसंस्कारो
बिल्वपत्रेषु निश्चितः॥ ६५॥ प्रयोगे प्रथमेतावत्संस्कारोयमितिश्रुतः॥आज्यमन्नं द्वितीयादि प्रयोगे नियमस्तुन
॥६६॥आधान भावनानांधकर्तृरूपावगाहिनी॥अनंधकर्तृसापेक्षा प्रयोगेप्रथमामिता॥६७॥द्वितीयादि
प्रयोगेषु देवादंधत्वसंभवे॥आज्यावेक्षण संस्कारलोपं गृण्हाति भावना॥६८॥एवं शिवार्चने प्याद्येस्वानीत
त्वावगाहिनी॥प्रयोगे भावनातत्वं द्वितीयेनावगाहते॥६९॥यदिकर्त्ता स्वयं दक्षः तत्पत्रानयने सदा॥तद्गृ
ण्हातीतिनियमोनद्वितीयादिषु ध्रुवं॥७०॥नपंगुरप्यधिकृतः प्रयोगे प्रथमेयतः॥प्रदक्षिण क्रमणवद्गृण्हात्येव
भावना॥७१॥

एवं चाद्यप्रयोगेपि विशेषवचनैः परं ॥ पंस्वादीनपि गृण्हाति शिवपूजन भावना ॥७२॥ सोमभावे तु पूतीकाविशे षवचनेन सा ॥ गृण्हाति भावना तद्वदन्यद्गृण्हाति भावना ॥७३॥ आद्यप्रयोगे गृण्हाति बिल्वपत्रादि भावना ॥ तदभावे तु तत्तुल्यं पत्रं गृण्हाति भावना ॥७४॥ अत्रांगानि बहून्येव श्रुतानि विविधान्यपि ॥ नित्यं चमसवत्किं चिदंगमस्ति शिवार्चने ॥७५॥ गोदोहनादितुल्यानि काम्यांगान्यपि कानि चित् ॥ तानि नित्यांगलोपाय प्रवृ त्तानि कथंचन ॥७६॥ गोदोहनप्रयोगे किं चमसस्यांगतामता ॥ एवं नित्यांगलोपे पि प्रयोगस्याविशेषतः ॥७७॥ भस्मत्रिपुंड्रकरणं सन्निपत्योपकारकं ॥ शिवलिंगं च रुद्राक्षधारणं च श्रुतिश्रुतं ॥७८॥ नवनीताभ्यंजनादि तुल्यं भस्मादि धारणं ॥ तस्य प्रतिनिधिर्नेति तत्प्रयोगेप्यपेक्षते ॥७९॥ कर्मांगत्वेन विज्ञातं भस्मधारण मित्यतः ॥ तत्त्यागेनाधिकारी स्यात्स्मार्त्तेवा वैदिके पिवा ॥८०॥ शिवमंत्रजपे योग्यो भस्मधारी न चेतरः ॥ धृते भस्मनि गायत्री गुरुणाभ्युपदिश्यते ॥८१॥ अग्निकार्येण संपन्ने पूर्वं भस्मन्यतः परं ॥ धृते भस्म नि गायत्री जपयोग्यो पजायते ॥८२॥ गायत्री शिवमंत्रत्वात् भस्मधारण भावनां ॥ सा गृण्हाति विप श्यंतिं तद्गृहीताधितिष्ठति ॥८३॥ रुद्राक्षधारणं तद्वत्तां शिवार्चनभावनां ॥ स्वानुग्रहार्थं पश्यंती भावना-

प्रचरिष्यति॥८४॥पूर्वांगाप्युत्तरांगानि तानि तावत्परस्परं॥महापूर्वोपयुक्तानि सापूर्वद्वार संभवात्॥८५॥
तदपूर्वं फलं यावत्ताव देवाधितिष्ठति॥फले जाते न तस्यापि कृत्यमित्यवधारितं॥८६॥सर्वेभ्य एव कामे
भ्यः शिवपूजनमित्यपि॥प्रयोगभेदमाश्रित्य तद्भावेन तन्मतं॥८७॥नह्येकेन प्रयोगेन फलानि विविधा
न्यपि॥अतोर्थवाद एवायं नानाविधफलश्रुतिः॥८८॥आवृत्तिश्चेत् प्रयोगाणां बहूनि विविधान्यपि॥फला
नि विविधान्येव भविष्यंतीति निश्चयः॥८९॥ जाबली व बिल्वपत्रं अन्यत्र चार्चन साधनं॥भवत्यतो लो
किकं च तदंगमिति निश्चितं॥९०॥तत्सर्वांगोपसंहारं सर्वथा फलभावना॥सापेक्षितं गृहीत्वैव संपूर्ण फल
मिच्छति॥९१॥श्रुचितकालजीविल्वनिद्राल स्यादिवर्जनं॥गृण्हाति भावना तावत्तदंगमिति निश्चयात्॥९२॥
विश्वासोप्यंगमेवात्र शिवपूजनबोधके॥वाक्यं तदर्थवादेपि प्ररोचकमिति श्रुतेः॥९३॥शिवार्चनेपि वेदस्या
वेदस्य नियमात्तयोः॥तदंगत्वमिति ज्ञातं भावनानुगृहीतयोः॥९४॥शिवपूजोपकरणं भस्मसंस्कृतमेव तत्॥
गृहीतः सोपि संस्कारः तया भावनया हितत्॥९५॥अखंडा भावना सोयं प्रयोगस्य विशेषतः॥भावनांतरसंप
न्ना तत्तदंगावगाहनात्॥९६॥तत्प्रयोगबहिर्भूतान्यंगानि विविधान्यपि॥गृण्हाति भावना सैव बृहस्पतिसवं यथा
॥९७॥

तथापि शिवपूजायां लिंगमाहवनीयवत्॥ जलादि वह्न्यां भवोपि पूजाधिकरणं क्वचित्॥ ९८॥ लिंगान्यपि

विचित्राणि नर्मदादीनि कानिचित्॥ तेषु पूजा विशेषेण तत्फलायोपकल्पते॥ ९९॥ रेवाजले न रेवायां रेवा

तीरसमुद्भवैः॥ दूर्वांकुरैर्वासंपूज्य मुक्तो भवति मानवः॥ १००॥ रेवातीरसमुत्पन्नाः तरवोपि वरानने॥ लिंग

रूपास्ततस्तेषु पूजनं मुक्तिभुक्तिदं॥ १॥ लिंगानि सं तियावंति त्रैलोक्ये वरवर्णिनि॥ तानि सर्वाणि लिंगानि

मम प्रियकराणि हि॥ २॥ मद्भक्तो यत्र सद्भक्त्या मम ध्यानं करिष्यति॥ तदेव लिंगं मद्रूपमन्यल्लिंगं न सर्वथा॥

३॥ मंत्रैरधिष्ठिते द्रव्यैः पूजा तावद्विधीयते॥ अधिष्ठानं देवतायाः पवित्रं मंत्रसाधितं॥ ४॥ तथा च सिद्ध

लिंगानि नार्मदादीनि केवलं॥ तत्र प्रतिष्ठाविधयः प्रसरंति न सर्वथा॥ ५॥ सिद्धक्षेत्राणि यावंति तत्र लिं

गानि यानि च॥ तेषु प्रतिष्ठाविधयः प्रसरंति न सर्वथा॥ ६॥ सिद्धक्षेत्रोत्तमा काशी तत्र लिंगानि यानि तु॥ ता

नि लिंगानि सर्वाणि सिद्धानि त्यवगम्यतां॥ रेवायां यानि लिंगानि तानि लिंगानि शैलजे॥ सिद्धलिंगानि

सर्वाणि तानि पूज्यानि सर्वदा॥ ८॥ त्रियंबकाख्यं यल्लिंगं गंगोद्दामूले मनोहरं॥ तत्सिद्धलिंगं तत्पूजा भुक्ति

मुक्तिप्रदायिनी॥ अहोबलाभिधं लिंगं सिद्धलिंगमिति श्रुतं॥ कोटिशंकरसंज्ञं च सिद्धलिंगमिति श्रुतं॥ ९॥

तीर्थेश लिंगमप्येव सिद्धलिंगमिति श्रुतं॥ संगमेश्वरलिंगंच सिद्धं०॥१०॥ श्री शैलेया निलिंगानि तानिलिंगा-
निशैलजे॥ सिद्धलिंगानि सर्वाणि तत्पूजा सर्वसिद्धिदा॥११॥ अशीतियोजनायामः श्रीशैलः कमलानने॥स
तु लिंगमयः सर्वं सर्वतीर्थमयोपिसः॥१२॥ शिलादेनतपस्तप्तं शिवगंगातटे शिवे॥तदुग्रतपसा सर्वं सकंप
मवनीतलं॥१३॥ देवाः सर्वे सकंपाश्च मुनयश्चारणा अपि॥ तादृशे नोग्रतपसा हृष्टोस्मि कमलानने॥१४॥
ततः प्रत्यक्षतां प्राप्तः प्रीतस्तत्तपसा शिवे॥ मयिप्रसन्ने देवेशे ययाचे सवरं वरं॥१५॥ ॥शिलाद उवाच॥ ॥
नमोनमस्ते गिरिजासहाय नमोनमस्ते सुकृतस्वरूप॥ नमोनमस्तेन्नपते महेश नमोनमस्तेस्तु नमो
नमस्ते॥१६॥ त्वत्पादांबुजभक्तिर्मे निश्चला भवतु प्रभो॥ त्वमेव शरणं शंभो गतिस्त्वं जगतां प्रभो॥१७॥
कर्माण्यत्यफलोन्मुखानि भगवन् त्वत्पादपद्मंयतो दृष्टं दोषविवर्जितं सुखयुतं तावत्करोति स्वतः॥
तत्तावन्मुनिवृंदमानसमनः पद्मप्रविष्टं प्रभो तन्मे मानसपंकजे क्षणमपि स्वामिन्मुदे जायतां॥१८॥
वाजश्चमेस्तु त्वत्पूजया साप्रयतिश्चमेस्तु॥ महेश्वराशुप्रतिसिश्चमेस्तु धीतिश्चमेस्तु क्रतुरस्तु शंभो॥
॥१९॥ स्वरश्चमेस्तु वरदेश शंभो श्लोकश्चमेस्तु श्रुतिगीतकीर्त्ते॥ श्रावश्चमेस्तु श्रुतिरस्तु शंभो शिवाभि-

धान श्रवणाय नित्यं ॥२०॥ ज्योतिश्च मे स्तु ज्वलन स्वरूप सुवश्च मे स्तु त्रिपुरा सुरारे॥ प्राणश्च मे तावद
पानयुक्तो व्यानश्च मे सुश्च तथैव चित्तं ॥२१॥ अधीतं च तथा वाक् च मनश्चक्षुश्च मे प्रभो ॥ श्रोत्रं दक्षो बलं
चोजः सहश्चायुश्च मे प्रभो ॥२२॥ जरा वात्मा च मे शंभो तनूः शर्म च वर्म च॥ अंगान्यस्थीनि भगवन् परू
षि च भवं तु मे ॥२३॥ शरीराणि भवं त्वीश तानि रम्याणि मे प्रभो ॥ ज्यैष्ठ्यं च मे धिपत्यं च मन्यु र्भामश्च मे प्रभो॥
॥२४॥ आमश्चांमश्च जेमा च महिमा वरिमा च मे॥ प्रथिमा चास्तु गौरीश वर्ष्मा च द्राघिमा च मे ॥२५॥ वृद्धं वृद्धिश्च
सत्यं च श्रद्धा चास्तु जगच्च मे॥ धनं वशस्त्वि षिश्चास्तु क्रीडा मोदश्च मे प्रभो ॥२६॥ जातं जनिष्यमाणं च
सूक्तं मे सुकृतं मे ॥ वित्तं वेद्यं च भूतं च भविष्यं च सुगं च मे ॥२७॥ सुपथं ऋद्धमृद्धिश्च क्लृप्तं क्लृप्तिश्च मे मतिः॥
सुमतिः शं मयश्चास्तु प्रियं चास्तु शिवा शुभे॥२८॥ अनुकामश्च कामश्च शंभो सौमनसं च मे॥ भद्रं श्रेयश्च वस्यश्च यशो
मे स्तु भगश्च मे ॥२९॥ द्रविणं चास्तु यंता च धर्त्ता क्षेमश्च मे धृतिः॥ विश्वं महश्च संविच्च ज्ञात्रं सूश्च प्रसूश्च
मे ॥३०॥ सीरं लयो ऋतं चास्तु भगवन्नमृतं च मे॥ अयक्ष्मं चानामयच्च जीवातुश्चास्तु मे सदा ॥३१॥ दीर्घायु
त्वानमित्रे च सर्वदाप्यभयं च मे॥ सुगं च शयनं सूषा सुदिनं चास्तु मे सदा ॥३२॥ उर्क् च मे सूनृता चास्तु पयश्चा

स्तुरसश्चमे॥ घृतंमधु चसग्धिश्च सपीतिश्चकृषिश्चमे॥३३॥ वृष्टिश्च जैत्रमोद्भिद्यं रयिचास्तु सदा पिते॥ रायः
पुष्टंच पुष्टिश्च विभुच प्रभुच प्रभो॥३४॥ बहुभूयश्च पूर्णं चतथा पूर्णतरंचमे॥ अक्षितिश्चास्तु भगवन्कूय
वाश्च भवंतुमे॥३५॥ अन्नमन्नपते मेस्तु लेनास्तु क्षुच्च मे प्रभो॥ व्रीहयश्च यवा माषा तिला मुद्गाश्चमे शिव॥
३६॥ खल्वाश्च संतु गोधूमाः मसूराश्च प्रियंगवः॥ अणवः संतु मे नित्यं शामाकाः संतु मे प्रभो॥३७॥ नीवाराख्या
श्चमे संतु गृहे सर्वान्ननायक॥ अश्माच मृत्तिका चास्तु गिरयः पर्वताश्चमे॥३८॥ शिकताः संतु भगवन्मेव
नस्पतयश्चमे॥ हिरण्यमस्त्वयश्चास्तु तथा सीसं त्रपुश्चमे॥३९॥ श्यामं लोहं च मेग्निश्च गृहे तिष्ठंतु स
र्वदा॥ आपश्च वीरुधः संतु तथैवौषधयोपि मे॥४०॥ कृष्टपच्यं च बहुधा मम तिष्ठतु वेश्मनि॥ तथैवाकृष्टपच्यं
चवन संभवमस्तु मे॥४१॥ गोमहिष्याद्यो ग्राम्याः पशवः संतु मे गृहे॥ सदा यज्ञेन कल्पंता मारण्याः पशवश्चमे॥
॥४२॥ वित्तं वित्तिश्च भूतंच भूतिश्च वसतिर्वसु॥ शिवपूजादिकं कर्मशक्तिश्च शिवपूजने॥४३॥ एमश्चास्तु
ममेतिश्च गतिश्चास्तु शिवार्चने॥ अग्निरिंद्रश्च मे सोमः सविताच सरस्वती॥४४॥ पूषा बृहस्पतिर्मित्रः
त्वष्टाच वरुणश्चमे॥ धाताच विष्णुरप्यस्तु गृहकर्मकरस्तु मे॥४५॥ अश्विनौ च ममेशान तिष्ठेतां सर्वदा गृहे॥

मरुतश्च प्रसर्पंतु विश्वेदेवाश्चमे गृहे ॥ ४६ ॥ त्वदाज्ञावशगानेतानस्तौं द्रादि सुरान् शिव ॥ मद्वशान्कुरु विश्वे
शदक्षान्मद्गृहकर्मणि ॥ ४७ ॥ अन्तरिक्षं चपृथिवी, द्यौरप्यस्तु दिशश्चमे ॥ मूर्धा प्रजापतिश्चास्तु मेभवत्कृ
पया भव ॥ ४८ ॥ अंशुश्चरश्मिरप्यस्तु मेदाभ्योधिपतिश्चमे ॥ उपांशुरंतर्यामश्चेममस्त्वाद्रें द्रवायवः ॥ ४९ ॥
मेमैत्रावरुणश्चास्तु तथैवास्तु ममाश्विनः ॥ प्रतिप्रस्थानशुक्रौ च मंथी चाग्रयणश्चमे ॥ ५० ॥ वैश्वदेवो ध्रुव
श्चापितथावैश्वानरश्चमे ॥ ऋतुग्रहाश्चमे संतु सातिग्राह्याश्चशंकर ॥ ५१ ॥ ऐंद्राग्नौ वैश्वदेवश्चग्रहाः
४३२ सोमोपयोगिनः ॥ तथा मरुत्वतीयाश्च गृहाः संतु सदापिमे ॥ ५२ ॥ माहेंद्रश्च तथादित्यः सावित्रश्चास्तु मे
ग्रहः ॥ सारस्वतश्च पौष्णश्च तथा पात्नीवतश्चमे ॥ ५३ ॥ सहारियोजनाश्चास्तु मेमेध्यश्चास्तु सर्वथा ॥
बर्हिर्वेदिधिष्णियाश्च स्रुचश्चचमसाश्चमे ॥ ५४ ॥ ग्रावाणः स्वरवः संतु तथैवोपरवाश्चमे ॥ तेमेधि
षवणे संतु ते द्रोणकलशश्चमे ॥ ५५ ॥ वायव्यानि च मे संतु पूतभृच्चास्तु मे प्रभो ॥ तथैवाधवनीयश्च
तदाग्नीध्रंचमे प्रभो ॥ ५६ ॥ हविर्धानंचमेस्वामिन् गृहाश्चैव सदश्चमे ॥ पुरोडाशाश्चमे स्वामिन्पच
ताश्च भवंतुमे ॥ ५७ ॥ तथैवावभृथः संतु स्वगाकारश्चमे प्रभो ॥ अग्निर्घर्मश्चमेर्कश्च सूर्यः प्राणश्चमे प्रभो ॥
॥ ५८ ॥

अश्वमेधश्च पृथिवी द्यौरप्यदितिरस्तु मे ॥ मे शङ्करीरंगुलयो दिशश्च विदिशश्च मे ॥५९॥ त्वया यज्ञेन कल्प्यं तां

ऋक्‌ सामच मे तथा ॥ स्तोमो यजुश्च दीक्षा च तपश्चास्तु ऋतुश्च मे ॥६०॥ व्रतं चाहोरात्रयोर्यद्वृष्ट्यालुनियमात्मकं ॥ वृहद्रथं तरेयज्ञे कल्प्येतां फाललोचन ॥६१॥ गर्भा वत्साश्च भगवन् त्र्यविश्वास्तु महेश्वर ॥ त्र्यवी च मे दित्यवाड्‌ दित्योही च सदा शिव ॥६२॥ पंचाविश्च महादेव पंचावी च त्रिलोचन ॥ त्रिवत्सश्च त्रिवत्सा च तुर्यवाडेव मे प्रभो ॥६३॥ तुर्योही पष्ठवाच्चास्तु पष्ठौही च महेश्वर ॥ उक्षा वशा च ऋषभो वेहत्तङ्वान् त्वयास्तु मे ॥६४॥ धेनुरप्यस्तु भगवन् क्षीरवाति मनोहरा ॥ यज्ञेन कल्पतामायुः प्राणो यज्ञेन कल्पतां ॥६५॥ अपानो पि सयज्ञेन व्यानेन सह कल्पतां ॥ चक्षुः श्रोत्रं च यज्ञेन मनसा सह कल्पतां ॥६६॥ वागात्मापि तथा यज्ञो प्येवं यज्ञेन कल्पतां ॥ त्वदधीनमिदं सर्वं तवेति प्रार्थितं मया ॥६७॥ सर्वस्वतंत्रोसि महेशयस्मात्त्वमेव दातासि तवापि देयाः ॥ उक्ताश्च तावच्च मकेन देहीत्तान स्वतंत्रान्‌ द्विव पूजकाय ॥६८॥ तेषां प्रदेयत्व विनिश्चयेन तान्देहि मह्यं शिवपूजकाय ॥ तेतावदस्मद्गृहकर्मयोग्याः योग्येन योग्यस्य किलान्वयो पि ॥२६९॥ एते पदार्थाः प्रथिता स्त्वदीयास्ते शर्व देयास्त्वदनयो न्याः ॥ अहं शिवारा-

धनसक्तचित्तः कोवा मदन्योस्ति सदानयोग्यः ॥७०॥ दातापि देये सति दानयोग्यं विहाय कस्मै प्रददाति भक्त्या ॥ विद्वानतो देहि महेश तान्मे लोके मदन्यस्तु नकोपि पात्रं ॥७१॥ त्वद्दत्तमेतादृशभाग्यमेत्य बलाद पूजानिरतो भवामि ॥ प्रमादलेशोपितदानभावि भवे भवे त्वत्पदपूजकस्य ॥७२॥ महाप्रभुः शंभुरुमासहायो ॥ दयामयो भूतिमयोपिदाता ॥ मातापितामे सहितप्रदाता धाता विधाता परमोतसंदृक् ॥७३॥ मन्ये शंकर देवदेवतवतद्दातृत्वमव्याहतं तेनाग्निप्रमुखान्सुरानपि सदातांत्र स्वतंत्रान्स्वतः ॥ मत्यं देहि मदिच्छया परमसौ कुर्वं तु कृत्यानि मे शक्तिर्यस्य यथा यथास्ति भगवन् सर्व स्वतंत्रप्रभो ॥७४॥ देयत्वेन विनिश्चितास्त्ववसुराः सर्वे पिवेदे रपि दाता त्वं तव भाग्यमप्यविलयं भूयः समुज्जृंभते ॥ अस्माकं तु महाप्रभुः भवभवांनैवेति चित्तं मुहुः स्वानंदांबुधिवीचिकातिचपलालीलाविलासास्पदं ॥७५॥ २७५॥ ॥

॥इति श्रीशिवरहस्ये हराख्ये तृतीयांशे शिलादप्रार्थना नाम चतुस्त्रिंशोध्यायः ॥३४॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥नंदिकेश्वर उवाच ॥ ॥ इति तत्प्रार्थितान्सर्वान् चमकप्रतिपादितान् ॥ वरान्ददौ महादाता सर्वदान्यशिरोमणिः ॥१॥ ततः परं तु तत्रैव कुंभयोनिं तपोनिधिं ॥

शिवध्यानसुधाधारापरिवीतंददर्श सः ॥२॥ सोपि दृष्ट्वा महादेवं सांबं सर्वसुरोत्तमं ॥ अतिसंतुष्टहृदयस्तु-
ष्टाव परमेश्वरं ॥३॥ ॥अगस्त्य उवाच॥ ॥भर्गो देवस्य सवितुर्वरेण्यमिह धीमहि ॥ स भर्गो भगवा-
न्दद्यान्मुः धियो यो नः प्रचोदयात् ॥४॥ गणगणपतये नमो नमः सुरगणपतये नमो नमः ॥ अगपतिपतये नमो नमः ॥
पशुपतिपतये नमो नमः ॥५॥ नमामि दुंढिं मदसिक्तगंडं हताघषंडं विधृतोर्ध्वशुंडं ॥ स्वभक्तविघ्नार्त्तिहरं
प्रचंडं परात्परं यन्महतो महांतं ॥६॥ गणाधिपं गंडतलालिकोटिं किरीटकोटिध्वजनिर्जितांबुदैः ॥ संसे-
वितांघ्रिं प्रणमामि सर्वदा कविं कवीनामुपमश्रवस्तमं ॥७॥ नमस्ते स्तु गणेशाय महादेवसुताय ते ॥ विघ्नांध-
कारसूर्याय ब्रह्मणां ब्रह्मणस्पते ॥८॥ सिद्धिं दातुं बुद्धिमृद्धिं शक्तं नित्यं गौरीपुत्रं ॥ स्कंदं वंद्यं वंदे वंदैः सुब्र-
ह्मण्यो सुब्रह्मण्यो ॥९॥ तारकासुरसंहारविहारचतुरं परं ॥ वंदे वंदारुमंदारं कुमारं पुष्करस्रजं ॥१०॥ ये वैदि-
कस्मार्त्तविधिप्रयुक्तक्रियाजलक्षालनपूतचित्ताः ॥ विभूतिरुद्राक्षविभूषणास्ते शमेन शांताः शिवमा-
चरंति ॥११॥ अकस्मादस्मदीयेन भाग्येन सुखदे नमे ॥ स्मरारातिस्मृतिस्ताव दम्त्रा दृष्टिरिवाजनि ॥
॥१२॥ सुरापारशिरोरत्नप्रभानीराजितायते ॥ महादेवाय शर्वाय सदसस्पतये नमः ॥१३॥ भूतजातसमु-

हरा०तृ०
अ०३५

सद्युत्पत्ति हेतु भूताय सर्वदा ॥ सर्व देवाभिवंद्याय भूतानां पतये नमः ॥ १४ ॥ सर्वामराधि देवाय देवाराध्यपरा
यते ॥ देवोत्तमोत्तमायाशु पशूनां पतये नमः ॥ १५ ॥ कालांतकाय शर्वाय महा मृत्युंजयाय च ॥ भूत स्वर्गापवर्गा
य जगतां पतये नमः ॥ १६ ॥ मुनींद्र सुंदरापारमनः पद्माश्रयाय च ॥ त्रिनेत्राय नमस्तुभ्यं क्षेत्राणां पतये
नमः ॥ १७ ॥ नमस्त्रिलोकनाथाय नमः परतराय ते ॥ १८ ॥ नमः शांताय भगवन् अन्नानां पतये नमः ॥ १८ ॥
आर्याचित्तप्रविष्टाय प्रहृष्टाय सुरेष्वपि ॥ प्रकृष्टायातिपुष्टाय पुष्टानां पतये नमः ॥ १९ ॥ महाभूताधि
१३१ पतये भूतिभीतिप्रदाय च ॥ भूतिप्रद प्रभूताय दिशां च पतये नमः ॥ २० ॥ विश्वमायाविदूराय वि
श्वविश्वप्रियाय च ॥ विश्वेश्वराय सोमाय विश्वरूपाय वै नमः ॥ २१ ॥ घोरतत्पुरुषेशानवामदेव सदा
शिव ॥ अविद्याध्वांत सूर्याय सद्योजाताय वै नमः ॥ २२ ॥ नमो भर्गाय भीमाय भगनेत्रहराय ते ॥ देवतासा
र्वभौमाय नमो रुद्राय मीढुषे ॥ २३ ॥ सहस्र शिरसे तुभ्यं सहस्रचरणाय च ॥ नमः सहस्र हस्ताय
सहस्राक्षाय मीढुषे ॥ २४ ॥ फाल भासुर नेत्राग्नि संदग्ध त्रिपुराय ते ॥ नमः सुंदर रूपाय सुमूलीकाय
मीढुषे ॥ २५ ॥ संसारघोर रोगार्त्ति निवारणकराय ते ॥ नमस्तुभ्यमषाढाय सहमानाय मीढुषे ॥ २६ ॥

नमस्तेवेदवेदांतवंदि वंदितमव्ययं ॥ भव्यस्वरूपंतंवंदे सदसस्पति मद्भुतं ॥२७॥ सुरासुरगणाराध्यंदुराराध्यंदुरात्मनां ॥ परमानंददंवंदे सुगंधिं पुष्टिवर्धनं ॥२८॥ तमेव भक्त्या हृदि भावयामो भवं भवानीरमणं भजामः ॥ भवादि नामानिमुदावदामोयतः प्रसूता जगतः प्रसूतिः ॥२९॥ गौरीविहार प्रवरप्रजातस्वेदोदकामोद विजृंभितेन ॥ उमासहायः समयः स भूयः तोयेन जीवान्व्यचसर्ज भूम्यां ॥३०॥ यएव तावद्गिरिराजकन्याविन्यस्तहस्तस्तानमस्तहस्तः ॥ सएवतावद्व्यचसर्जतस्यांयदोषधीभिः पुरुषान्पशूंश्च ॥३१॥ प्रदोषकालीन शिवार्चनेनयः सर्वदोषापहरोहरोमे ॥ गौरीविहारादरतः ससर्जयंदेष भूतानि चराचराणि ॥ ३२॥ फालादंदक्षयज्ञादि शिक्षादक्षाक्षिलक्षितं ॥ वंदे वंदे विरूपाक्षं अक्षरं परमंपदं ॥३३॥ शिवप्रभावश्रवणोत्सुकायशिवार्चनानंद विजृंभिताय ॥ शिवस्तवाख्यान विवर्धनाय शिवप्रजायै शिव मस्तु मह्यं ॥३४॥ महाप्रभुः शंभुरुमासहायोदयामयो भूतिमयोमयोपि ॥ माता पितामे सहितप्रदाता धाता विधाता परमोत संदृक् ॥ ३५॥ मंगलालंकृतार्धांगं अर्धेंदुललितालकं ॥ अर्धनारीश्वरंवंदे पुरुषं कृष्णपिंगलं ॥ ३६॥ जगन्निर्माणचातुर्यमर्यादासेतुसेवितं ॥ वंदे शांतमुमाकांतं जगतस्तस्थुषस्पतिं ॥ ३७॥ पुरादिकामरारातिसंहारचतुरं परं ॥ परात्परतरं

वंदे जेतारमपराजितं ॥३८॥ तंवंदे सच्चिदानंदं अद्वैतममतिसुंदरं ॥ लीलया विदधेयोयं इमानित्रीणि विष्ट
पाः ॥३९॥ तंवंदे नित्य सर्वज्ञ नित्य विज्ञान सागरं ॥ यतो यजूंषिजातानि ऋचः सामानिजज्ञिरे ॥४०॥ भवंत
मेवसततं भगवंतमुमापतिं ॥ स्मृत्वातरति संसारं योविश्वेभिर्विपश्यति ॥४१॥ सर्वामरनियंतारं शंकरंलोक
शंकरं ॥ भजस्वयत्प्रसादेनव्याप्य नारायण स्थितः ॥४२॥ तमेववंदे देवेशं महेशं शरणंगतः ॥ यदाज्ञया जगत्धाता
यथापूर्वमकल्पयत् ॥४३॥ स्मरारितमहंवंदेयल्लिंगं मंगलप्रदं ॥ पूजयंति प्रसूनाद्यैः इंद्रजेष्ठामरुद्गणाः ॥
१३५
नमामितमुमार्धांगं शंगंमंगलदायकं ॥ यमाराध्य सुखं प्रापुः देवासः पूषरातयः ॥४५॥ नमामितं महारुद्रं
शांभवांश्चिद्घनं परं ॥ सततं वेदवेदांतैः संजानाना उपासते ॥४६॥ नमामितां परां गौरीं कुचकुंकुमरू
षितां ॥ स्मृत्वाप्यानंददामाशुयाले रुद्रशिवातनूः ॥४७॥ नमस्तेकरुणापारसागरायस्मरायच ॥ नमः
शांतिरसायापिनमस्तेरुद्रमन्यवे ॥४८॥ महाप्रलयकालाग्निनिभशूलायतेनमः ॥ नमः परशवेतावदुतो
तइषवेनमः ॥४९॥ फणिराजमहाकाय ज्याज्योत्स्नामंडितायच ॥ महामेरुस्वरूपाय नमस्ते अस्तुधन्व
ने ॥५०॥ रत्नकंकणझांकार भासुराभ्यां भवप्रभो ॥ भक्ताभीष्टप्रदाभ्यांच बाहुभ्यामुत तेनमः ॥५१॥ सुरा-

सुरादिकापार संहार करणान्यपि॥ घोराण्यपार रूपाणि तस्मात्तेभ्योकरंनमः॥ ५२॥ मांमामक धियादीनं तावकंक रुणाकर॥ कुरु शंकर संपन्नं दरिद्रं नीललोहित॥ ५३॥ शांकराग्रे सराराध्यं शिवाराधन साधनं॥ रक्ष रक्ष विरूपा क्षनान्यं विंदामिराधसे॥ ५४॥ दाराणां मम पुत्राणां पौत्रादीनां विशेषतः॥ त्वत्पादुकाराधकानामस्माकम विता भव॥ ५५॥ अतः परमुमाकांतदुर्दशांन सहामहे॥ तांदुर्दशांहरास्माकं भूरिदा भूरि देहिनः॥ ५६॥ शिवपूजनश क्तेभ्यः शांभवेभ्यः प्रतिक्षणं॥ पवित्रंगोत्रमस्मभ्यंव सुस्याहंत दाभर॥ ५७॥ भावेभ्यो भवभीरुभ्यो भस्मांगेभ्यः प्रय त्नतः॥ भवानीरमण स्वामिन्निमांस्तोलृभ्य आभर॥ ५८॥ सर्व मोह विनाशाय सर्वाभीष्टद शंकर॥ प्रयच्छ शांकरीं विद्यां राया विश्वपुषा सह॥ ५९॥ शिव पूजा साधनानां बिल्वानामार्चनायच॥ तथा शिव प्रणामार्थं बलंधेहि तनूषु नः॥ ६०॥ शिवपूजन सामग्री विरहादेव दुःखिनः॥ हृद्रोगं मम सूर्ये शहरिमाणं चनाशय॥ ६१॥ शिवद्रोहरतायेच शिव भक्तपरा ङ्मुखाः॥ तान् शिवाचार रहितान् निबाधस्व महांभसि॥ ६२॥ अनन्य शरणानस्मान् त्र्यक्ष दाक्षायणी प्रिय॥ कटाक्षेण विरूपाक्ष रक्षाणो ब्रह्मणस्पते॥ ६३॥ गौरीपते पिता माता दाता भ्राता विशेषतः॥ त्वमस्माकं धनं भा ग्यं उत भ्रातो तनः सखा॥ ६४॥ सान्यपानादि समयेन कृतं शिवपूजनं॥ अन्यच्चत तूक्षमस्वेशयन्मयादुष्कृतं कृतं॥ ६५॥

कर्पूरपूरनीहार गिरासुंदर विग्रह ॥ गिरिजानुग्रहानुग्रं गाये त्वामनसागिरा ॥ ६६ ॥ सोयंदेयोवरोस्म भ्यंवयंलिंगं समर्चितं ॥ बिल्वादि साधनै र्दिव्यैः पश्येम शरदः शतं ॥ ६७ ॥ शिवलिंगार्चनोद्योग महोत्सव समन्विता ॥ सर्वसौ भाग्य संपन्नाः जीवेम शरदः शतं ॥ ६८ ॥ गौरी विहार श्री पुंज मंजु शिंजित मंजुलं ॥ श्रीकाल काल मालोक्यनं दाम शरदः शतं ॥ ६९ ॥ उमा सहायं सदयं प्रसन्न हृदयं हृदि ॥ सानंदं मुहुरालोक्य मोदाम शरदः शतं ॥ ७० ॥ प्रसी द भगवञ्छंभो भवत्करुणयावयं ॥ निर्मायाः शांभवा एव भवाम शरदः शतं ॥ ७१ ॥ हारापार कथा भव संसारा ति भय क्षयं ॥ कर्तुमत्यु घतं नित्यं शृणवाम शरदः शतं ॥ ७२ ॥ शिव शंकर गौरीश महादेवांत कांतक ॥ शूलिन्नि त्यादि नामानि प्रब्रवाम शरदः शतं ॥ ७३ ॥ अपमृत्यु महा मृत्यु महारोग कुलै रपि ॥ आधिभिर्व्याधिभि र्नित्यं अ- (मुक्तजीवा) जीता स्याम शरदः शतं ॥ ७४ ॥ गौरी कुच गिरि सारकाश्मीर रसरूषितं ॥ सदा प्रगेषु पश्यामि युवानं विश्वं ति कविं ॥ ७५ ॥ गौरी मनोहर स्मेर विलोकन विशारदं ॥ दृष्ट्वा हृष्टो स्मितं सांबं सुभासं शुक्र शोचिषं ॥ ७६ ॥ अपा रासार संसार रोग भोग विनाशकः ॥ स्मृतः स्मरहरः शूरः नीलग्रीवो विलोहितः ॥ ७७ ॥ स्मृतः स्तुतः श्रुतो ध्या- तः पूजितो वासकृन्मुदा ॥ मुक्तिप्रदो महादेवः (कं) तुग्रीवो अनामयः ॥ ७८ ॥ रुद्र वीणागान लोललीलया सामकल्पकः ॥

B6

सामगानप्रियः सोयं उपास्यै गायतानरः॥७९॥ रुद्रसूक्तप्रियोदेवोरुद्राध्याय प्रियः शिवः॥ अतस्तैरखिलैर्नूनं एष - हरा० लू० विप्रैरभिष्टुतः॥८०॥ शिवार्चनाद्योधर्माः चित्तशंकरकल्पिताः॥ अतो भज विरूपाक्षं अध्यक्षं धर्मिणामिमं॥८१॥
प्रणमंति सुराः सर्वे प्रणतं शिवसन्निधौ॥ अतः कुर्मो नमस्कारान्रुद्राय स्थिरधन्विने॥८२॥ रुद्राध्यायादिभि यीयानमस्या प्रतिपादिता॥ सापि नाकिनमायात्तु नमस्याकल्मलीकिनं॥८३॥ नेत्रां भोरुहतेकृत्यं हितमद्यावधु नोच्यते॥ पश्यमामकपश्येशं भ्राजमानं हिरण्मयं॥ शिवनामसुधाधारां घोरसंहारहारिणीं॥ अतः करणपात्रेण पातुंगौराविवेरिणि॥८५॥ शिवनिर्माल्यमाल्यानि सम्यगाघ्राय नासिके॥ शांभवेभ्योऽधुनानित्यं अस्मभ्यं शर्मयच्छता॥८६॥ रसनेमधुरापाररसास्वादनतत्परे॥ शिवनामरसंब्रूहि जयतामिवदुंदुभिः॥८७॥ रेरेचित्तचकोरत्वं जहिदुःखमतःपरं॥ शिवनामसुधाधारां भोरे वतृषितः पिब॥८८॥ रेरे मनश्चंचरीक शिवपदांबुजंमुहुः॥ गाढमालिंग्य निःसंगोयोषाजार मिवप्रियं॥८९॥ महार्हरत्नाकरचारु मेरुभूरीप्रभाभासुरभूषणाय॥ महेश्वरायातिमनोहराय महामहीं सुष्टुतिमीरयामि॥९०॥ महेश्वरातिदुःसहामितातिगर्भवेदनासमाकुलानपारपापसंघसंकुलानिमानू॥ अवाक्नामनाकमां उमासहायकालहन्नुदूपुणावसोमहेमृशस्वशूरराघसे॥

॥९१॥

भजे मकामदं मुदा हृदि प्रविष्टधा निरंतराय मंत राय नाशहेतु साधकं ॥ अनर्गल प्रवाह सृष्टि कारणं स भापाति
सनो ददातु तं रयिं पि शंग संदृशं ॥ ९३॥ नमोंधकासुरादि सर्व शत्रु नाश हेतवे सुराधिकाय चित्तमेत दिंदु खंड
खंड मौलये भयापहाय दैयमेव बिल्व पल्लवामलं ॥९४॥ न यस्य हन्यते सखा नन्हीयते कदाचन ॥ अहो महा
देव महानु भाव शुद्ध स्वभावानुपम प्रभाव ॥ ९५॥ भवोद्भवानुद्भव भव्य भाव भवे भवे नाति भवे भव स्वमां ॥ ९५
महाघकोटि कोटि कूटदाव पावकाकुलानंपार कामवं चितानुदार दार लोलुपान् ॥ ९५॥ अनाथनाथ वि
श्वनाथ तानवाव कालहंनं दूषणो वसो महेमृश स्वशूर राधसे ॥ ९६॥ मंदार कुंदादि मरंद धारा सक्ता लिमा
लाकुल मालिका भिः ॥ समर्चया मिस्तुति भिर्गिरिशं मषाढ मुग्र सहमान मामिः ॥ ९७॥ नमो नमस्ते गिरिराज
राजकुमारिका सुंदर कामुकाय ॥ नमो नमस्ते स्तु पुनर्नमस्ते नमो जघन्याय च बुध्नियाय च ॥ ९८॥ तस्मै नमः
सर्वगुणार्णवाय सर्वामराराधित पादुकाय ॥ गौरी समेताय बहु प्रतेयं यतः प्रसूता जगतः प्रसूतिः ॥ ९९॥ तस्मै
नमो मंगल मंगलाय श्री मंगला लंकृत विघ्न हाय ॥ वेदांत संघात समाश्रयाय यस्मात्परं नापरमस्ति किंचित्
॥ २००॥ सुधाकरापारकर प्रसार विहारताराकर हार भार ॥ नमो नमस्ते स्तु नमो नमस्ते यस्मिन्निदं संच विचैति सर्वं ॥ १॥

हिरण्यरूपंच हिरण्यबाहुं हिरण्यनाथंच हिरण्यवर्णं ॥ नमामि फाल स्फुर दग्नि जालं हिरण्य देतं शुचिवर्ण मारात् ॥ २ ॥ सूक्ष्माति सूक्ष्मा कुल विग्रहाय महोन्न ताल्फेन्नत सन्तुलाय ॥ नमो नमस्ते श्रुति संस्तुताय अणो रणीयान्महतो महीयान् ॥ ३ ॥ नकेवलं पर्वत मस्तके षुनकेवलं पर्वत मध्य भागे ॥ नकेवलं तद्गिरि मूल भागे अधस्विदासी दुपरिस्विदासीत् ॥ ४ ॥ नकेवलं पूर्व दिगाश्रितोयं नकेवलं तिष्टति दक्षिणायां ॥ नपश्चिमायामय मुत्तरस्यां व्याप्त स्सर्वा प्रदिशो दिशश्च ॥ ५ ॥ संसार रोगादिक रोग जालं श्रीकालकाला खिल लोकपाल ॥ दूरीकुरु त्वंत्वरया दयाब्धे भिषक्तमत्वा भिषजां शृणोमि ॥ ६ ॥ पश्याधुना पश्य भवत्पदाब्ज पूजारतं भस्म विभूषितांगं ॥ रुद्राक्षमाला भरणं महेश पश्चात्पुरस्तादधरादुरस्तात् ॥ ७ ॥ दया सुधा सागर धीर धारा तरंग संगत्व दपांग संगात् ॥ वयं महापापकुल स्वरूपा स्वल्पेन नावा दुरितान्तरेम ॥ ८ ॥ देव्यां बुधाराधर धीरधारा पूरापकाराकरमादरेण ॥ मां पालया भीष्ट विशिष्ट मिष्टमो जिष्टया दक्षिण रुबराति ॥ ९ ॥ महेश्वराराधन साधनानां आसादने नैवनयामि कालं ॥ नकाल भीर्दे हि ममानि तायुर्यो दक्षताय्युर्य दिवापरेतः ॥ १० ॥ ~~कदामि मुद्रां कित पाल भागं~~ कदामुदा सुंदर मंदहास पुरः सरं मांस्मरवैरिराराल् ॥ भस्मांग मालिंगासि सोत्त मांगैः स्थिरैर्भिरंगैः पुरु रूप उग्रः ॥ ११ ॥

कदा त्रिपुंड्रां कितफाल भागं रुद्राक्षमाला भरणं प्रियंच ॥ लिंगार्चकं दृक्ष सिरक्षणाय हिरण्यरूपः सो हिरण्यसं दृक् ॥१२॥ बिल्वादि संपूजित लिंग मध्यात् विनिर्गतं बिल्वदलांकितांगं ॥ शंगं प्रपश्यामि मुहुर्मुदाहं आदित्यवर्णं तमसः परस्तात् ॥१३॥ तमेव देवो त्तम मिंदुमौलिं भजामि भक्त्या भगवंतमेकं ॥ भवं भवानी पतिमामनंति वेदांत विज्ञान सुनिश्चितार्थाः ॥१४॥ त्वामेव सांबं सततं भजामि यल्लिंग पूजा समवाप्त भाग्यः ॥ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् ॥१५॥ तमेव विश्वेश्वर माश्रयामो योदेव देवो जगदेकनाथः ॥ यद्दृष्टिमात्रं श्रियमातनोति श्रीणामुदारो धरुणो रयीणां ॥१६॥ सुपुत्रपौत्रादि समृद्धि कामाः कामारिमेकं शरणं प्रपन्नाः ॥ यतः समस्ते प्सितदान लोलाद्धिरण्यगर्भः समवर्त ताग्रे ॥१७॥ महेश्वराद्देव समस्त मेतत्कल्पावसाने पुनरेव जातं ॥ आद्यां उमालिंगित सुंदरांगां दिवानक्तं पलितो युवाजनि ॥१८॥ भो लोचनो रुभ्रमरप्रकृष्टमंदारकुंदादि मरंदधारं ॥ विधाय गौरीपति माश्रितो यस्त्वा दुः किलायं मधुमानुतायं ॥१९॥ क्षीरं घृतं शर्करया समेतं गृहाण जिव्हे मधुरप्रियत्वं ॥ फलानि रम्याणि पुन गृहाण स्तुहि श्रुतं गर्तसदं युवानं ॥२०॥ अतः परं काल भयं नमे स्यान्न गर्भवासादि भयादिनूनं ॥ यतो जलै बिल्वदलैः प्रगे षु यजामहे सौमन

सायरूद्रं ॥२१॥ श्रीमन् महादेवदयासमुद्र श्रीमन्महारुद्र ममापराधान् ॥ दूरीकुरुत्वं कृपयात्वमीश पितेव पुत्रान्प्रति नो जुषस्व ॥२२॥ मामव्यकाव्यक्त सर्वापराधांगाधां भीधि क्रूरनक्रादि दष्टं ॥ दृष्ट्वारिष्टानि ष्टनाशाय भूयो देव स्नाता त्रायतामपूयुक्ष्न ॥२३॥ यत्पादाब्जं योगिभिर्नैव दृष्टं ब्रह्माद्यैर्वा सिद्ध संघैः रनेकैः ॥ यस्य ध्यानात्सर्वदा सर्वसिद्धिः तत्वायामि ब्रह्मणा वंदमानः ॥२४॥ नमामि तुंडिं मद सिक्त गंड हतावषंडं विधृतोर्ध्वषंडं ॥ स्वभक्त विघ्नार्तिहरं प्रचंडं परात्परं यन्महतो महांतं ॥२५॥ गणाधिपं गंडलल्लालि कोटिभिः किरीटकोटिध्वजनिर्जितांबुदैः ॥ संसेवितांघ्रिं प्रणमामि सर्वदाकविंकवीनामुपमश्रवस्तमं ॥२६॥ नमो भवान्यै भवतापभीरु स्वभक्त संरक्षण सत्वरायै ॥ आनंद दाहार विहार दावा चतुष्क पर्दा युवतिः सुपेशा ॥२७॥ ताराभिताराम रडारहारप्रसारधारा निकरोपकारां ॥ चिराय धीरां भज चित्त गौरीं शंबो विदं वाचमुदीरयंती ॥२८॥ नमामि तामेव जगज्जनित्रीं करोति काश्मीर रस प्रसारैः ॥ आरक्तवर्णे गिरिजा कुचैर्वा प्रियं सखायं परिषस्वजाना ॥२९॥ तामेव वंदे गिरिराजकन्यां यत्पादुका राधनतः सुखानि ॥ महेश्वरांकस्थल सन्निविष्टा विश्वानि देवी भुवना निचक्ष्या ॥३०॥ मंदारादि स्त्रग्वि शेषा लिवृंदामंद ध्वाना कर्णना सक्त चित्तां ॥ वंदे मंदं भक्त संरक्षणार्थं वंदे देवं राधसे—

हरा० टी०
अ० ३५

चोदयंती ॥ ३१ ॥ वंदे भूयो मंदहासोपहासव्यासक्तं शर्वं अमरं महेशं ॥ क्रीडालोलं कर्तुमभ्युद्यतां तां एषा नेत्री राधसः सूनृतानां ॥ ३२ ॥ भवानि मातस्त्रिजगज्जनित्री त्वमंबमंबाधर रागभोगैः ॥ श्रियं प्रदेहि त्वयाप्रियान्नोययाति विश्वाद्दुरितात्तरेम ॥ ३३ ॥ कस्ते स्तुतिं कर्तुमिहास्ति शक्तः यामिंदिरा सुंदर चंदनाद्यैः ॥ समर्चयामास सरस्वतीवासु भगादिदिर्वसु ॥ ३४ ॥ इति स्तुतो महादेवो वरान् दत्वा नदीप्सितान् ॥ पुनर्वरांतरं दातुं उवाचवचनं मुदा ॥ ३५ ॥ त्वयाकृतस्तोत्र शिखामणिं यः कंठे लुठंतं कुरुते ति भक्त्या ॥ तमाशु संपज्जलराशयस्ताः परिष्वजंते जनयोययापतिं ॥ ३६ ॥ इमं स्तवं यः पठति प्रभाते मध्यान्हकाले पि महाप्रदोषे ॥ तस्य प्रयांति प्रहताइवाशु भियं दधानाहृदये षु शत्रवः ॥ ३७ ॥ लभंते जपंतः श्रियं कीर्तिकामाः लभंते धनं धान्यमश्वादिकं च ॥ लभंते तथायुः प्रवृद्धं प्रवृद्धान् लभंते ह पुत्रान् लभंते ह पौत्रान् ॥ ३८ ॥ इति दत्वा वरांस्तस्मै तत्रैव गिरिजापतिः ॥ अंतर्दधे गणे शाद्यैः सह लिंगे शिवात्मके ॥ ३९ ॥ श्रीशैलेश्वरलिंगतुल्यममलं लिंगं न भूमंडले ॥ ब्रह्मांड प्रलयेपि तस्य विलयो नास्तीति वेदोक्तयः ॥ तस्मात्तत्कृजनेन मुक्तिरखिलैः प्राप्या न सा दुर्लभा तत् पूजानिरतस्य दुर्लभतमं किं वा जगन्मंडले ॥ ४० ॥ ॥ इति श्री शिवरहस्ये हराख्ये तृतीयांशे शिव गौरि संवादे-

शिवरह० ३ १६८२

नामपंचत्रिंशोध्यायः॥३५॥ ॥इति श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीसदाशिव उवाच॥ ॥तीर्थेश्वराभि-हरा० ल०

धं लिंगं मंगलाकरमव्ययं॥तत्सर्वमंगलं दिव्यं सर्वमंगलदायकं॥१॥तस्य लिंगस्य महिमा मया विज्ञायते शिवे॥ अ० ३६

॥२॥तस्य स्मरणमात्रेण संपदोयांति सादरं॥२॥स्मरणं तस्य लिंगस्य कोटिजन्मार्जितैः परं॥पुण्यैः प्रजायते

गौरी तल्लिंगं गौरवप्रदं॥तल्लिंगस्मरणादेव मुक्तिकांताकराश्रिता॥संपद्भिः सह संपन्नाः विपन्नैवोपजायते॥

॥४॥न तस्य विपदार्तिःस्याद्दैर्मनस्यंभयानिवा॥यस्य तीर्थेशलिंगस्य स्मरणं हृदिवर्तते॥५॥ एतदाराधनं

पूर्वं कृत्वा बिल्वदलादिभिः॥प्राप्तमैश्वर्यमतुलं स्वर्गप्राप्तिः ततः परं॥६॥ पुरा मुनीश्वराः सर्वे कोटिशंकर

पूजकाः॥भस्मोद्धूलितसर्वांगाःत्रिपुंड्रांकितमस्तकाः॥७॥ रुद्राक्षमालाभरणाः शिवध्यानपरायणाः॥

जटामंडलवीतांगाः सर्वे लिंगार्चनप्रियाः॥८॥ते सर्वे गौतमं दृष्ट्वा शिवयात्रापरायणं॥शिष्यकोटिसमा

कीर्णं शिवभक्तवरंपरं॥९॥दृष्ट्वा भक्त्यानताः सर्वे कृतांजलिपुटाः शिवे॥मोक्षधर्मांश्चपप्रच्छुः विनयान

तकंधराः॥१०॥ ॥ऋषय ऊचुः॥ ॥भगवन्धर्मतत्वज्ञ शिवपूजैकजीवन॥मोक्षोपायः कस्त्वया

घस वक्तव्यः समाधिना॥११॥ संसारसागरे मग्नाः कोटिशो ग्रहमेधिनः॥कोटिशंकर सेवायां निरताः

सर्वदा मुने ॥१२॥ तत्सेवयापि सहसा पाशः संसारलक्षणः ॥ नविच्छिन्नः कथं तस्य विच्छेदोपि भविष्यति ॥१३॥
नकोपि शिवतत्वज्ञो यथा मूर्तिस्वभावतः ॥ भवतुल्यो न दृष्टो भूदस्माभिर्भवभीरुभिः ॥१४॥ इदं त्वच्चरणां
भोजं दृष्टं हं त्वघ संचयं ॥ अद्य पुण्यैरिदं दृष्टं संपत्संप्रापकं चनः ॥१५॥ इति तद्वाक्यमाकर्ण्य विलोक्य समु
नीनपि ॥ पूजयित्वा महादेवं प्राह भक्तिपुरःसरं ॥१६॥ शिवलिंगार्चनध्यानशस्त्रेणातिशयेन तु ॥ संसारपाश
विच्छेदो भवतीत्यवगम्यतां ॥१७॥ संसारसागरे तावद्भयं भवति सर्वथा ॥ यावन्नाराधितो देवो महादेवो भवः
प्रभुः ॥१८॥ यस्तु देवो महादेवः सर्वदेवशिखामणिः ॥ तन्नामस्मरणाद्योगे प्यघराशिलयो भवेत् ॥१९॥ श्री
महादेवनामानि स्मर्त्तव्यानीति यस्य धीः ॥ तस्य पापाचलाद्भीतिः कदापि न भविष्यति ॥२०॥ महादेवा
र्चने बुद्धिस्तावन्नैवोपजायते ॥ यावन्नाघकुलध्वांतविलवः शंकरस्मृतेः ॥२१॥ शंकरस्मरणाकारप्रभा
करकरावृते ॥ चित्ते पापांधकारस्य विलयो भवति ध्रुवं ॥२२॥ श्रीमहादेवभक्तानां भवबंधभयं कुतः ॥
भवस्मरणमात्रेण भवराशिर्विनश्यति ॥२३॥ भवगाढांधकारोपि महामोहप्रदः सदा ॥ तद्भक्तिभानु
मालोक्य स्वतस्व विनश्यति ॥२४॥ दिवाभीतनिभं यत्तु भयं संसारलक्षणं ॥ तन्महेशार्चनाकारसूरे दृष्टे-

प्रयास्यति ॥२५॥ महादेवप्रभावस्तु सहसा ज्ञायतेऽपिन ॥ तज्ज्ञाने सति संसार भयमेवन जायते ॥२६॥ महादेवं सकृद्वापियः स्मरेद्भस्म भूषणः ॥ तत्पाद दर्शने नापि नसंसार महा भयं ॥२७॥ महादेवार्चने भक्तिः सहसानोपजायते ॥ साचेज्जाता ततो दुःखं नकाल ।दपि जायते ॥२८॥ महादेवाभिधानानि सुधाधारानिभानियः ॥ शृणोति तत्कुल स्यापिन संसार भयं भवेत् ॥२९॥ महादेवाभिधानेनश्रुते नापि स्मृतेनवा ॥ संसार सागरापार तारिणो पितरं तिते ॥३०॥ महादेवं सकृध्यात्वा स्मृत्वा तन्नाम सादरं ॥ संसार सागरं तीर्त्वा प्रयांति शिवमंदिरं ॥३१॥ भाग्यवंतो महादेव नामरूपां सुधां मुहुः ॥ स्मृत्वा कर्ण पुटैः पीत्वा स्तन्यानि न पिबंति हि ॥३२॥ भत्त्याकर्ण सुवर्णपात्रग महादेवाभिधानामृतं पीत्वा तिष्ठगरिष्ठ निष्ठुर वचोवीचीप्रपंचै रलं ॥ तेनैवाशुवरिष्ठतां व्रज पुनः संसारघोरार्णवव्याकीर्णामितकर्णधारवरतां प्राप्यया सत्वरं ॥३३॥ महादेवाभिधानेननिधानेनपरंधनी ॥ तद्धनं सावधानेन साधुभिर्ध्यायते हृदि ॥३४॥ महादेवाभिधान्यस्यध्वनि मध्वनि साधवः ॥ सुधाधुनीमिव प्राप्य सानंदं प्राप्नुवंति हि ॥३५॥ महादेवाभिधानेन महानंद समृद्धयः ॥ वृद्धिं प्रयांति तास्तावत्परमानंद संनिभाः ॥३६॥ महादेवं मुहुर्ध्यात्वा सकृद्वा पुण्यकोटिभिः ॥ पुण्य राशिमनुप्राप्य पुण्यवानेव जायते ॥३७॥

हर० तृ० अ० ३६

पापघोराब्धिमग्नानां क्षणात्तरणकारणं ॥ महादेवाभिधानं हि महापातकतारकं परं ॥ ३८ ॥ महादेवाभिधारूपं अमृतं शिवनिर्मितं ॥ संसारोरः सघापारविषराशिविनाशकं ॥ ३९ ॥ संसारसागरे घोरे मग्नो भग्नमनोरथः ॥ अनाथनाथं नकथं विश्वनाथं महं भजे ॥ ४० ॥ पापघोराब्धिमग्नानां क्षणात्तरणकारणं ॥ इदं दृष्टं शिवस्थानं पापनाशाय जायते ॥ ४१ ॥ इतोप्यत्युत्तमं लिंगं लिंगं तीर्थेश्वराभिधं ॥ इतोप्युत्तमं लिंगं मंडलेस्मिन्न दृश्यते ॥ ४२ ॥ तत्रागत्वा तीर्थेशः पूजनीयः प्रयत्नतः ॥ सोमत्रयोदशी सेयं पातालद्रा संयुता तथा ॥ ४३ ॥ भूतया संयुत्ता श्रेष्ठं शिवपूजनसाधनं ॥ इत्युक्तं तद्वचः श्रुत्वा गौतमेन सहादरात् ॥ ४४ ॥ ततः तीर्थेश्वरं प्रापुर्मुनयो गौतमान्विताः ॥ ततस्ते मुनयः स्नात्वा पापनाशनवारिभिः ॥ ४५ ॥ उद्धूल्य भस्मनां गानि रुद्राक्षालंकृताश्चते ॥ ततःपरं बिल्वपत्राण्यमलानिजलान्यपि ॥ ४६ ॥ गृहीत्वा तीर्थनाथस्य पूजां चक्रुर्मुनीश्वराः ॥ ततः प्रदक्षिणीकृत्य दंडवत्प्रणिपत्यते ॥ ४७ ॥ शिवध्यानरताः सर्वे स्थिताः सन्मुक्तिमंडपे ॥ ततःपरं मुनिवरास्तीर्थेशनिकटे स्थिताः ॥ ४८ ॥ बिल्वपत्रकराः सर्वे गौतमं द्रष्टुमागताः ॥ ततःपरं बिल्वपत्रैः तीर्थनाथार्चनं मुदा ॥ ४९ ॥ कृत्वा नत्वा नत्वा गौतमं च प्रणताः प्रीतिपूर्वकं ॥ तानागतान्समालोक्य गौ—

नमः शांभवोत्तमान्॥ ५०॥ तदुक्तं वचनं रम्यं शुश्राव प्रीतिपूर्वकं॥ ॥मुनय ऊचुः॥ ॥ तीर्थेशक्षेत्रमहिमा मह-
ता ज्ञायते त्वया॥ सर्वं कथ्यौधुनायेन निष्पापास्स्मो वयं मुने॥ ५१॥ इति तद्वचनं श्रुत्वा गौतमः प्रीतिमानसः॥ नत्वा
तीर्थेश्वरं भक्त्या तानाह प्रीतिपूर्वकं॥ ५२॥ ॥गौतम उवाच॥ ॥ साधु पृष्टमिदं क्षेत्रं तीर्थोत्तममिति स्मृतं॥
अयं तीर्थेश्वरो देवो लिंगं तीर्थेश्वराभिधं॥ ५३॥ अस्य तीर्थस्य महिमा वेदैर्विज्ञायते परं॥ मयापि तत्प्रसादेन
कथंचित्तज्ञायते खलु॥ ५४॥ अत्र पूर्वं मुनिवराः शंकराराधनोत्सुकाः॥ बहवस्तीर्थनाथस्य पूजाध्यानरताः
सदा॥ ५५॥ ते लब्ध्वा कामनिचयं भुक्त्वा भोगान्यथेच्छया॥ अंतर्हिताः प्रयत्नेन लिंगे तीर्थेश्वराभिधे॥ ५६॥
इदं तु कामदं लिंगं मुक्तिदं च मुनीश्वराः॥ एतन्निर्माल्यपूजापि मुक्तिसाधनमुच्यते॥ ५७॥ पुरा विजयया-
सृष्टं जययाऽपि पुरं परं॥ क्षीरे क्षीरनदीतीरे गौरी तीर्थेश्वराज्ञया॥ ५८॥ रत्नप्राकारसंकीर्णं रत्नगोपुरसंकुलं॥
ततस्ताभ्यां महादेवः तीर्थेशः प्रार्थितः स्तवैः॥ ५९॥ त्वया त्वदाज्ञया सृष्टे नगरे रत्नसुंदरे॥ वसतिः सततं कार्या
द्वयपारयेत्यपि॥ तयोस्तद्वचनं श्रुत्वा तथाऽस्त्वित्याह शंकरः॥ ततः परं गतं ताभ्यां संतोषेण शिवाज्ञया॥ ६१॥
स्वभक्तानुग्रहं कर्तुं स्वनिर्माल्येऽपि शंकरः॥ स्थितः समर्चितो भक्त्या सर्वाभीष्टप्रदो भवत्॥ ६२॥ ततः स्वभक्त—

नीतेपि स्थितो निर्माल्यचंदनैः॥ शिवस्तां नगरं प्राप तदभीष्टप्रदो बुधाः॥६३॥ तत्राभीष्टप्रदो जातः स्वभक्तेभ्यः
सदा शिवः॥ करिष्यंति बहवः तत्पूजां भाग्यलिप्सवः॥६४॥ ये नित्यं तीर्थनाथस्य निर्माल्यस्यापि पूजनं॥
करिष्यंति प्रयत्नेन ते पूज्याः स्युः सुरैरपि॥६५॥ यदा यदा यत्र स तीर्थनाथो जातः स्वभक्तै रपि पूजितः स्यात्॥
तत्र स्थितस्तत्कृतपूजयैव दास्यत्यवश्यं तदभीप्सितानि॥ एतन्निर्माल्यमादाय दिव्यचंदनलक्षणं॥ विज
यापहृणं प्राप्य कश्चिल्लिंगं करिष्यति॥६७॥ तल्लिंगपूजया तावत् ज्ञानं भाग्यं च भासुरं॥ प्राप्तव्यमप्य
यत्नेन शिवभक्तेन तेनेह॥६८॥ तत्संततिप्रवृद्धिश्च भविष्यति दिने दिने॥ तल्लिंगं चंदने नैव प्रवृत्तिं स करिष्यति॥ ~~दर्शनं कर्तुं शांकरः~~
~~कश्चिदुत्तमः~~॥६९॥ तस्य पुत्राश्च पौत्राश्च तल्लिंगार्चनतत्पराः॥ सर्वसौभाग्यसंपन्ना वृद्धिं यास्यंति
सर्वथा॥ ~~तल्लिंगं चंदनेनैव प्रवृत्तं स करिष्यति~~॥७०॥ तल्लिंगदर्शनं कर्तुं शांकरः कश्चिदुत्तमः॥ आ
गत्य तस्य लिंगस्य पूजनं च करिष्यति॥७१॥ तद्भावलिंगमालोक्य प्रत्यहं तस्य पूजनं॥ कृत्वा स्यास्य
तितद्गेहे तदन्नैरेव पोषितः॥७२॥ सोपि शांभवमालोक्य तेन स्नेहं करिष्यति॥ शृण्वन् शिवकथां तस्मा
त् तुष्टः स्थास्यति सर्वदा॥७३॥ काले काले प्रयत्नेन तस्य लिंगस्य सेवया॥ तच्चित्तं निर्मलं तेन सतत्सेवां-

११२

करिष्यति॥७४॥ सन्निधानं महेशस्य तीर्थेशस्यास्य सर्वदा॥ सिद्धिप्रदायकस्यास्य भावलिंगे भविष्यति॥७५॥
भावलिंगालयस्यास्य बहुभाग्यप्रदस्य च॥ स्मरणादेव सिध्यंति फलानि विविधान्यपि॥७६॥ सिद्धलिंगं स्वि
दं लिंगं प्रसिद्धं सर्वकामदं॥ एतदभ्यर्चनेनैव मुक्तिः करतलाश्रया॥ तस्यैव भावलिंगस्य स्तुतिं स तु करिष्य
ति॥ तां भाविनीं स्तुतिं वक्ष्ये शृण्वंतु मुनयो मुहुः॥७८॥ तेन संपूजितो भक्त्या प्रसन्नस्तीर्थनायकः॥ भावलिंगे
मुदा स्तोत्रमेतदेव करिष्यति॥७९॥ ॥शंकर उवाच॥ ॥ शिवं देहि मे भावलिंगालयाशु प्रसीद प्रसीदा
दरेण॥ त्वदाराधनूनायत्तचित्ताय नित्यं विकारांतरायापकारान भूयः॥ नमो भावलिंगाय भावालयायस्मरापा
रगर्वापहारोद्यताय॥ नमः पुण्यकल्याणपूर्णार्णवाय प्रमाणाग्रगण्याग्रगण्याय तुभ्यं॥८१॥ इदं भावलिंगं गता
नं गसंगं यदंगोपसंगं प्रसंगेन शंगं॥ विलीनाभिषंगं महारोगभंगं करोतीति मन्ये ततस्ते नमोस्तु॥८२॥ यदर्धा
गमर्धेंदुखंडप्रचंडप्रभामंडलाखंडलाराध्यमीड्यं॥ तदाराध्यमाराध्य ब्रह्मकाब्जकाद्यं मुहुर्भावलिंगं
विपद्भावभंगं॥८३॥ यदाराधनेनामराराध्यतास्यान्नरस्याधमस्यापि सिद्धिप्रसिद्धिः॥ तदाराध्यमस्माक
मस्मत्कुलस्याप्युपास्यान्यदेवं सदा भावलिंगं॥८४॥ प्रभूतेषु पुण्येष्वगण्येषु भक्तिः भवे भावलिंगे भवेद्भावना
पि॥

१५३

शिवे भाव लिंग प्रभाव प्रबोधे" प्रमोदेन मोदाय संपादनीयः॥८५॥ सरत्याशु संसार घोरांधकारः" स्फुरद्भाव लिंगां

ग सूर्य प्रकाशे॥ विशिष्टा विशिष्टाद्य खद्योत वार्ता" कृतां तांत वार्त्तापि तस्मिन्कुतः स्यात्॥८६॥ अविद्या महावर्त

गर्त्तानुवृत्तिः" कुतो भाव लिंगार्क कोटि प्रकाशे॥ तदा राधना मोद मानंद सिंधोः शिव ज्ञान चंद्रोपि कोऽपि प्रजातः॥

॥८७॥ अहो भाग्य मस्माक मस्मत्कुल स्याप्य" भूद्भाव लिंगं परं दैवतं नः॥ वयं धन्य धन्या ग्रगण्या ग्रगण्याः" स

दा भाव लिंगार्चना सक्त चित्ताः॥८८॥ यदा भाव लिंगार्चना भक्ति लेश" स्तदा तावदापत्समूह प्रणाशः॥ तदा रा

धना सक्त लेश प्रकाशो" महानंद राशि प्रवेशो नुवेलं॥८९॥ मनोंतः स्मरंतः सकृत्पूजयंतो" भवं भाव लिंगे मुदा

भावयंतः॥ लभंते गणेशत्व मप्राप्य मन्ये" रिह प्राप्य दुष्प्राप मोदांबुराशिं॥९०॥ नचान्नाभिलाषास्पदालो

भ शंका" नचान्यत्रवा भाव लिंगार्चकानां॥ इहामुत्र सौख्याभिवृद्धिर्भवित्री" भुजं सम्यगुद्धृत्य सत्यं मयोक्तं॥

॥९१॥ नचंद्रत्ववांछा नचेंद्रत्ववांछा" नचोपेंद्रताब्जासनत्वादि वांछा॥ यतस्तान्यपायान्वितानीति मन्ये" परं त्वी

प्सितं भाव लिंगार्चनं मे॥९२॥ इदं भाव लिंगार्चनं कामधेनुः" समस्ता मराशास्य कल्पद्रुमो वा॥ इदं मर्त्य दुष्प्राप

चिंतामणिर्वा" फलानि प्रसूते विचित्राणि नित्यं॥९३॥ यतोनन्य लभ्यानि सूक्ष्माणि फलानि" प्रकृष्टानि वांछास्पदान्या

नितानि॥

अतः कामधेनुर्न कल्पो मणिर्वा परं त्वन्यदेवाद्भुतं भावलिंगं ॥ ९४ ॥ क्षणार्धार्धकोऽस्यैकदेशांशमात्रं वयं भावलिंगे. हरा. लू.

स्मरामो यतोऽतः ॥ प्रकृष्ट प्रकृष्ट प्रकृष्ट प्रकृष्ट प्रकृष्ट प्रकृष्ट प्रकृष्ट प्रकृष्टः ॥ ९५ ॥ महाभूतजातप्रजाताति भीतिः ॥ महामृत्युदूतात्प्रभूताति भीतिः ॥ महारोगसंघातजाताति भीतिः कुतो भावलिंगस्य संगेग्रभागे ॥ ९६ ॥ सकृज्जन्ममध्ये मुदा भावलिंगं स्मरंतं स्मरंतं कृतांतस्य दूतः ॥ प्रमत्तोपि तन्मार्ग संसर्गभीतः प्रभूतप्रतापो पि दूरं प्रयाति ॥ ९७ ॥ नमो भावलिंगार्चकाराधकेभ्यः तदाराधकेभ्यस्तदाराधकेभ्यः ॥ तदाराधकेभ्यस्तदाराधकेभ्यस्तदाराधकेभ्यस्तदाराधकेभ्यः ॥ ९८ ॥ ~~कृते भावलिंगार्चनोद्योगमात्रे त्रिनेत्रोपि किं देयमस्मै मयेति ॥ विचारैः~~ ~~स्मारै~~ यमः कंपयन्पापतापोपभीतः स्वदूतान्समाहूय तत्कर्णदेशे ॥ मुहुर्भावलिंगार्चकागारमार्गे न गंतव्यमित्येव जल्पत्यनुच्चैः ॥ ९९ ॥ कृते भावलिंगार्चनोद्योगमात्रे त्रिनेत्रोपि किं देयमस्मै मयेति ॥ विचारैरपारैर्नयत्येवकालं ततः कालवार्ता प्रवृत्तिः कुतोऽत्र ॥ १०० ॥ प्रभावं भवो भावलिंगार्चकानां परं वेद वेदोपि तन्नैव वेद ॥ अतस्तद्विचारे विरंचिः कुलं च कथं चंचुरास्तद्विचारे तदन्ये ॥ १ ॥ वरं भावलिंगांगदौवारिको रुस्फुरद्वेत्रपात्रत्वमित्यादरेण ॥ तदिच्छामुपेंद्रेंद्रचंद्रादिदेवाः प्रकुर्वंति धर्मं विहाय स्वकीयं ॥ २ ॥ रमा भावलिंगार्चकार्चापरा सानुवृत्ति-

तुंस्य कर्तुं प्रवृत्तेववाणी॥ तदाघ्यर्हणा रोहिणी सांजनसाचेत्" अवश्यं सुराशास्य माशास्यमस्य॥३॥ उमाभा
व लिंगांगतुंगोत्तमांगे विचित्रातपत्रा मितछायया सा॥ अविछिन्नमेवापरिछिन्नयाचं" परिछिन्नमेव प्रकामं
करोति॥४॥ न संसार पंकांकितो निष्कलंको" निरातंक एवाति रंकोप्यशंकः॥ शशांकांकितं भावलिंगाधिवा
सं" स्मरन्वासवत्वादिवांछांजहाति॥५॥ अहं भावलिंगेशपादारविंदे" स्वचित्तेन मूर्ध्ना प्रबद्धं करोमि॥ मदीयं
हृतं मानसं किं त्वयेति" त्रिलोक्यां न कोप्यस्ति ते मोचकोपि॥६॥ चिरं भावलिंगेशपादारविंदे" मनश्चंचरीकश्च
कारस्थितिं मे॥ सधर्मार्थकामापवर्गस्वरूपै" र्मरंदै रमंदैर्विनोदं करोति॥७॥ नमः सुंदरामंद मंदारकुंद"
स्फुरन्नीरनीहारहाराकराय॥ निराकारतारा चिरापारहीर" स्वरस्वागराकारते शंकराय॥८॥ जलव्याल
वालामलव्यालमाला" कुलानील लोलालसत्कुंतलाय॥ स नीलाचलानील नीलोत्पलश्री" विलासायते
कालकाल प्रणामः॥९॥ नमस्कारकर्पूरपूराभ्रगौर" ज्वरापार संसार भारापकार॥ पुरा खर्व गर्व प्रसाराप
हार" स्मरांधांधकारे स्मरारे हराय॥१०॥ नमश्चारुकाकोदरानद्धदेह रूपबद्धा प्रबुद्धेंदुखंडार्धमौले॥ महा
कालकालानलानीलफाल" प्रबाल प्रबालाधराधीर लोल॥११॥ नमश्चारुचामीकराकारवीर" प्रभापूर संपू-

र्णसंपूर्णकाम॥ नकिंकामकामायकामंप्रकामं॥ करोषिप्रदोषेनरोषंकुरुष्व॥१२॥ प्रदोषेषुतोषेणनाल्पंकरोषिप्र
दोषेषुरोषोनतेतः प्रदोषे॥ प्रदोषेपिरोषोनमय्यप्यतोमां॥ प्रदोषेषुवाभावयस्वास्तदोषं॥१३॥ नरंसर्वदोषाकरं
राजसंमं॥ सदातामसंघोरसंसारलीनं॥ हराराधनानंदसंदोहहीनं॥ सहीनंहराहीनहीनंप्रपश्य॥१४॥ नसा
ध्यस्वसंस्कारपारंगतोहं॥ नसारस्वतेष्टिप्रचारादरोहं॥ नचात्रातिरात्राद्यपूर्वाश्रयोहं॥ दयापात्रमात्रंत्रिनेत्रा
वमात्वं॥१५॥ मदीयापराधानगाधानबाधान्॥ विधिव्याधसंबंधबोधप्रबुद्धान्॥ अधीतानधीतप्रबुद्धाप्र
बुद्ध॥ श्रियाभ्रांतमभ्रांतमीशाशुपाहि॥१६॥ मदीयानिपापान्यपारांबुराशिं॥ प्रपूरापकाराणिनाशंप्रयांति॥
तवानुग्रहादुग्रदुष्टग्रहाणां॥ क्ववार्तापिसास्या॰कुलीवग्रहाणां॥१७॥ मदीयंमनःपादपद्मेतवाद्य॥ प्रविष्टंप्र
कृष्टंन्निकृष्टंनजातं॥ अतस्तन्नमायालुमायालुमाया प्रयालुप्रयालुप्रयालुप्रयालु॥१८॥ भवत्पादपद्मा
श्रितंजन्मनोमे॥ मदीयापराधान्क्षमस्वेतिमंदं॥ कदाचिन्निवेद्यानिवेद्यानपीश॥ प्रसादायसिद्धंकरो
तुप्रसन्नं॥१९॥ मनोजन्मजन्मांतरानंतपुण्यैः॥ त्वदंघ्र्यंबुजाराधनायप्रवृत्तं॥ निवृत्तन्नतन्मास्तुतंत्रान्
स्वतोतः॥ प्रवृत्तंनिवृत्तंकथंवामहेश॥२०॥ शरण्यःशरण्येषुकोवात्वदन्यो॥ मदन्योपिदीनःक्ववाभूतलेस्मिन्॥

अतस्त्वद्द्वयं वीक्ष्य कालात्क्षलक्षं क्षणं वा क्षणार्धं प्रविश्यादरेण ॥२१॥ न मे शारदादिप्रसादाद्यपेक्षा न वेदादिबोधप्रसादाद्यपेक्षा ॥ क्षणार्धं त्वदं घ्र्यंबुजाराधने मे सदैवास्तु वांछा न चान्यत्र वांछा ॥२२॥ यदि त्वं मदीयं मनोबुद्धिगम्यं प्रसादं प्रदातुं प्रवृत्तस्तदा मे ॥ भवन्नाममात्रानुरक्तं मदीयं मनः सर्वदाप्यस्तु शंभो प्रसीद ॥२३॥ वदान्या ग्रगण्या ग्रगण्यो ग्रगण्यो वदान्यातिमान्यस्त्वमीश ॥ अनन्या ग्रगण्या ग्रगण्या ग्रगण्यः कलौ कालकालाहमेवेति मन्ये ॥१२४॥ न तेदेयमप्यस्ति भक्त्या विनान्यत्तदन्यं तु मे प्रार्थनीयं च लोके ॥ न सांच चलाति स्थिरा त्वत्पदाब्जे महाकल्पकोटिष्वनंतेष्वपीश ॥२५॥ दृढा सैव जन्यात्प्यनंता प्ररूढा पुनर्वर्धमाना नवैवानुवेलं ॥ न जन्यत्वभावत्वशंकास्तु तस्याः प्रसादस्य ते दुर्लभं भावि किंवा ॥२६॥ न जन्यस्वभावस्य नित्यत्वमस्ती त्यवश्यं त्वया नैव वक्तव्यमीश ॥ किमप्यत्वशक्यं तवापि त्रिलोक्यां शिवन्यायवार्त्ता न मे रोचतेपि ॥२७॥ न ते गौतमाकाशनित्यत्ववादो मतो वेदवेदांततत्वज्ञमूर्ते ॥ न ते जैमिनेः शब्दनित्यत्ववादो न मिथ्यात्ववादोपि वेदांतिनां ते ॥२८॥ न बंधोपि मोक्षो वेदांतशास्त्रे तथा दृष्टसृष्टिप्रवादोपि दृष्टं ॥ अविद्याविलासो न कोपीह कल्यो विलासैर्यतस्ते जगज्जालमासीत् ॥२९॥ न चानंतवेदांतवार्त्ता विचारे हरारा-

११९

धकाराध्य भावाभिमान:॥ सचेन्नाधुना कर्म मार्गो विनष्ट:" शिवाराधना मार्गवार्ता कुल:स्यात्॥३०॥ शिवाराधनं. हरा. तु.
चे त्कदाचित्प्रमादाद्विहाये कदापि स्थिते यातना स्यात्॥ महापातकानां विनाश:कदाचित्" शिवाराधनेनेहसं
भावितोपि॥३१॥ वरं मद्यपाचार मार्गाभिमानो" वरं चंडचंडाल मार्गप्रवेश:॥ वरं नेश्वराराधन त्याग मार्गो" स
मार्गो महायातना मार्ग एव॥१३२" ननीरं हरानर्पितं पानयोग्यं" सुराकल्पमल्पं हि तन्मूत्रकल्पं॥ प्रमादेन पीत्वा
पितत्वावदंते" सदा यातनां प्राप्नुवंत्येव विप्रा:॥३३॥ शिवाराधने नास्ति यस्याभिमान:" स चंडाल चंडाल एवे
ति मन्ये॥ शिवाराधने यस्य भक्ति: प्रवृद्धा" स बुद्ध: सुराणामपीति प्रसिद्ध:॥३४॥ शिवानर्पितान्नानि भु
क्त्वापि मोहात्" मलाशी भवत्येव राशिस्त्वघानां॥ सपापस्वरूप: सदा यातनायां" निमग्नोति दु:खानि भुं
क्ते सुरोपि॥३५॥ कृतानंत पापो विहायेश्वरार्चा" शिवान्यार्चनासक्तचित्तोपि मत्त:॥ मृतेयातनां तेशुनो
गर्भवासं" समासाद्य तस्मान्निवृत्तो न नूनं॥३६॥ वधू भोगकाले पिय: कालकाल" स्वरूपानुसंधान हीन:
सहीन:॥ पलत्ताय साकार नारी शरीरं" समालिंग्य दु:खानि भुंक्ते सदापि॥३७॥ यदेवातिरम्यं स्वभोगो
पयुक्तं" तदीशाय सर्वं निवेद्येशशेष:॥ अयं मत्त्वमित्यादरेणोपभुंक्ते" महापुण्यराशि: स भुंक्ते सुखानि॥
॥३८॥

११८

सुतंवा समालिंग्य तज्जन्य सौख्यं निवेद्यां बिकावल्लभावादरेण ॥ अनंतं सुखांभोधिमाप्नोति सत्यं प्रवृ
द्धापि तत् संतप्तिः सर्वदा स्यात् ॥ ३९ ॥ शिवाराधनायां प्रवृत्तस्य वंशो न नश्यत्यवश्यं प्रसिद्धिं प्रयाति ॥
महानंदकंदत्वमाप्नोति सत्यं मुकुंदादिवृंदारवृंदाभिवंद्यः ॥ ४० ॥ वरं वंध्यभावो वरं गर्भनाशो वरं जन्म
कालप्रणाशो पि सत्यं ॥ वरं नैवकस्याप्यशैवत्वमेतत् फलं पापराशेरभाग्यांबुराशेः ॥ ४१ ॥ अशैवत्वमाप्नोत्य
भाग्यै रभं गैर्वरं जारजत्वं वरं मद्यपत्वं ॥ वरं सर्वपापौघसंजातमूर्तिस्वरूपत्वमित्येव मन्ये महेश ॥ ४२ ॥
वरं पुल्कसस्यापि संप्राप्य जन्म स्थितस्यापि गोमांसमात्राशनस्य ॥ वरं ब्रह्महत्यासहस्रादरस्या
प्यशैवत्वमत्यंतमेवाप्रकृष्टं ॥ १४३ ॥ अशैवत्वमासाद्य कृत्वास्य निंदां ज्वलद्वह्निमध्ये प्रविष्टो नु तप्तः ॥ मृतः सज्ज
तिं प्राप्य शैवत्वमेत्य प्रसादेन शंभोः स मुक्तिं प्रयाति ॥ ४४ ॥ वरं शैवदासानुदासानुदासी सुतत्वं यतस्तस्य
शैवानुबंधः ॥ सशैवानुबंधेन संसारबंधाद्विमुक्तो पि मुक्तो भवेत्पापसंघात् ॥ ४५ ॥ वरं शैवगेहांकणे कीट
भावः कदाचिद्यतो भूतिलेशानुयोगः ॥ तदुच्छिष्टपत्राभिघातोप्यघार्तिर्यतस्तस्य भाग्येन संभावितस्या
त् ॥ ४६ ॥ महादेवनैवेद्यशेषाशनानां पवित्राणि गात्राणि तद्गंधवाहात् ॥ सुरास्तावदिच्छंति पापापनुत्यै सदागंध-

वाहप्रवेशप्रवृद्धान् ॥४७॥ सदाय त्वशैवः प्रचारं करोति प्रभूतैरगण्यैः स्वपुण्याब्धिसंघैः ॥ तदा लत्र नूत्यं तियत्तल्वि-हरा.तृ.
तृणां समूहः स्वतः स्वर्गभोगं विहाय ॥४८॥ नच स्वर्गमात्रे तदानंदयोग स्ततस्तद्धि हायामरैः साकमेते ॥ प्रनृ
त्यंति शैवं चरंतं वसंतं हसंतो नमंतो मुदा पूजयंतः ॥४९॥ शिवः शैवमालोक्य तत्राति हृष्टो निवासं करोत्यं विकालो
ल्लदृष्टिः ॥ इतः किंमनापि प्रकृष्टप्रकृष्टं निवासस्थलं मद्विला सानुकूलं ॥१५०॥ सशैवप्रभावं प्रभुः शंभुरेकः
प्रजानाति जानाति गौरी गणेशः ॥ कुमारोपि जानाति वेदो न जानात्यतस्तं विधिर्वा हरिर्वा तदन्यः ॥५१॥ सती
शैवमाता त्वशैवस्य माता परं जारिणी गार्दभीवा शुनीवा ॥ वरं सूकरीवा वरं कर्कटीवा वरं कर्कशावा परं राक्ष
सीवा ॥१५२॥ पितुः शैवपुत्रस्य तस्यैव भाग्यं स भाग्यस्तदन्यो नलोकेषु दृष्टः ॥ अशैवस्य लोके पिता दुर्भगाणां
वरिष्ठः स विष्ठा सुजातः कृमिः स्यात् ॥५३॥ शुभः शांभवानां प्रभावः स्वभावः कथं मादृशैर्वर्णनीयोपि मूढैः ॥
कथं भाव भाव प्रभाव प्रभावः श्रुतीनाम गम्यो मया वर्णनीयः ॥५४॥ यया जिह्वया शांभवानां प्रभाव प्रभूतो महापु
ण्य संयुक्त चायं ॥ मया वर्णनीयोऽपि वाणी विचित्रा पवित्रा भवत्वित्यवश्यं न चित्रं ॥५५॥ कृपाशंकरस्यापि म
य्यप्यपारा यतो हारचर्या विचारः प्रवृत्तः ॥ अहं तावदप्यस्मि धन्यो मदन्यो न भावप्रभावस्तवेषु प्रवृत्तः ॥१५६॥

अहं धन्य एवास्मि मातापि धन्या पिता मे सखा बंधुवर्गोपि धन्यः॥ यतो भावमार्गप्रभावानुरक्तो विरक्तोपि संसार वार्तासु शंभो॥५७॥ अशैवानुकूलं मनो मास्तु मास्तु प्रमादेन वा स्वप्नकालेपि मास्तु॥ अयं तावदेको वरः प्रार्थनीयो ममेशान सर्वात्मना मुप्रयत्नः॥५८॥ इयं तावदिच्छा कथं चित्प्रजाता शिवानुग्रहेणैव मे पालनीया॥ यथा प्रवृद्धा प्रजाता तथा मे प्रसीद प्रसीद प्रभो चंद्रमौले॥५९॥ अशैवैः सहैतस्य वासः कदाचिद्यदि स्यात्तदा तस्य विघ्नोस्तु शीघ्रं॥ न तन्मित्र मित्रैर्न तन्मित्र मित्रैर्मेशान सल्लापवार्तापि मास्तु॥६०॥ यथा चंद्रचंडाल गेहाधिवासस्तथा स्यात् अशैवैः सदैकत्र वासः॥ अतस्तत्सहावास विघ्नोदयः स्याद्दयाचेदुमाकांत ते मय्यवश्यं॥६१॥ यदि स्यादशैवानुरक्तं मनो मे तदा स्युः कृतांतस्य दूताः प्रमत्ताः॥ प्रवृत्ताः प्रनृत्तं प्रकुर्वंत एव प्रबध्वा प्रणेयो मयायं मयेति॥६२॥ अशैवैः सहैतस्य शैवस्य वासो महापत्सु मोहप्रवेशोपि मास्तु॥ स यस्मादगाधव्यथाहेतुभूतो न चापत्समूहस्तथा दुःखहेतुः॥६३॥ अहं चेदपात्रं शिवानुग्रहस्य त्रिनेत्राशु मृत्युं परं प्रेरयस्व॥ न चाशैव संगाय मां प्रेरयस्व प्रसादोयमेवेश ते मह्य मद्य॥६४॥ न संध्यादिकर्मानुरागानुरागो यथा शंकराराधने साधने मे॥ असंख्ये शिवानुग्रहे संग्रहे वा समग्रस्य पुण्यांबुराशेर्महेश॥६५॥ न नित्येन नैमित्तिकेनापि केनाप्यपूर्वा क्रिया हेतुभूतेन मुक्तेः॥

शिवरह॰३
१५३

यतः शंकरानुग्रहेणैव मुक्तिः सत्ताव च्छिवाराधनेनैव लभ्यः ॥ जडाः केवलं कर्मणा मुक्तिमेके वदंतः श्रुतापारवेदांतमार्गाः
॥ नतैरस्मदीयानि शास्त्राणि तावद्भुतानीति मन्ये बहूनि प्रमत्तैः ॥६७॥ किमेतादृशं कर्म मोक्षोपयुक्तं न मीमांस - हरा.तृ.
याता वदेतद्विवेकः ॥ विधिः कुत्र वा द्वादशाध्याय मध्ये न कुत्रापि दृष्टो न वा वार्तिकेपि ॥६८॥ न च ब्रह्ममीमांसया अ.३६
तद्विवेको न चोपासना मार्गभिन्नोपि मार्गः ॥ न तस्याः फलं मोक्षरूपं प्रकृष्टं प्रकृष्टं फलं तत्वविज्ञान साध्यं ॥६९॥
न चोपासना चित्तशुद्धिं विनान्यत् फलं कर्तुमेकं समर्था समर्थाः ॥ कथं वा स साध्योपि मोक्षः स नित्यः वदा घाशु
वेदांतमार्गप्रविष्टः ॥१७०॥ मितं भावनायाः स्वरूपं न केनाप्यतस्तत्परिज्ञानशून्येन केन ॥ कथं तस्य मो
क्षस्य साध्यत्ववादः स निर्वाह्यमध्ये बलात्पातनीयः ॥७१॥ य एवाक्षपादस्य मोक्षः स साध्यः स तावत्परि
ध्वंस एवाविनाशि ॥ स तत्वावबोधस्य साध्यस्तु तावन्न वेदांतशास्त्राविरुद्धो विरुद्धः ॥७२॥ उपलेशा
स्त्रवार्ताभिरस्माकमेकः शिवानुग्रहो मोक्षहेतुः स तावत् ॥ शिवाराधनेनैव तत्राधिकारी परं शांभवः को
पि धन्योऽतिधन्यः ॥७३॥ शिवाद्वैतवार्ता परं रोचते मे शिवाराधकाग्रे सरोगे सरस्य ॥ शिवाराधकं बोध
कं शास्त्रमेकं प्रमाणं प्रमाणेषु विश्वासबीजं ॥७४॥ परं जन्मजन्मांतराभ्यस्तमेकं शिवाराधनाबोधकं शास्त्रमेव ॥

११०

यतस्त्वद्धिरूढे नमानाभिमानो ममेशानपादारविंदे शयामि ॥७५॥ महापत्तरंगानुषंगोपि शंग त्वदन्यं नपश्यामि नाराध
यामि ॥ नगृण्हामि नामापि सामि प्रकामं त्वदन्यस्य वार्ताश्च गर्ते पतंति ॥७६॥ महामृत्युरायातु मायातु किं मे न
तेनापि भीतिर्महामृत्युमृत्यु ॥ यतो मन्मनःपद्मसद्मप्रविष्टः खदुष्टानि कष्टानि हर्तुं समर्थः ॥७७॥ स्वकालो
पि कालो नयात्वं तिकं मे सको वा वराकः सकिन्नाति रंकः ॥ सचेटी चपेटी लटाघातभीतः कृतांतांतकाराध
काग्रे सरस्य ॥७८॥ इयं मे महाशैवसंगान्न जाता मतिः शंकराराधना साधनेषु ॥ परं त्वीशपादारविंदप्र
सादान्महाशैववार्तापितावत्कलौन ॥७९॥ कलिर्धर्मदावानलस्तत्रवार्ता महाशैवदेवद्रुमस्येति शंभो ॥
अहंतावदेको भवत्पादपद्मप्रसादामृतेनैव जीवामि लोके ॥८०॥ श्रीमन्निर्मल भाव लिं गममराराध्यं
प्रसन्नं सदा ॥ पूज्यं मत्कुलसंभवैरनुदिनं त्यक्त्वान्यदेवार्चनं ॥८१॥ एवं शंकरशासनं च न समुल्लंघ्यं
शिवा संयुतः ॥ शंभुर्नृत्यति लिंगमेतममलं दृष्ट्वा सुराभीष्टदः ॥८२॥ एतद्दर्शनमात्रतोपि सकलाभी
ष्टांबुराशिः स्वयं ॥ नित्यं स्वांगणमेत्य भावललितं लिंगं प्रपश्यत्ययं ॥८३॥ स्वामिन्नस्य वशैवसामिलव
चेदाज्ञात्वदारार्यकं ॥ त्यक्त्वान्यत्र न संवसामि शपथः शंभो त्वदंघ्र्यंबुजे ॥८४॥ त्वत्पादांबुरुहं विहाय -

नकदाप्यन्यत्र गंतुंमतिः॥ शंभोर्निर्मल भावलिंग सदृशं लिंगंक्ववा भूतले॥ पाताले पिन मंदरे पि सुतरां मेरौ महे
शालये॥ सत्यंसत्य मिदं पुनः पुनरिदंसंदेहवार्ता पिन॥ ८६॥ कल्याणानि पदे पदे सुखमपि स्वामिन्ल दारा
घने॥ सिद्धानामपि सिद्धिदं बहु विधाभीष्ट प्रदानोन्मुखं॥ नित्यंशंकर भावलिंग मधुना सिद्धि प्रदं जात
मप्यग्रे सिद्धिकरं करोति सततं सिद्धिं प्रसिद्धिं प्रभो॥ ८८॥ शेषाशेष फणामणि स्फुरदुरु श्रीकंठकंठ प्रगंगा
तुंगतरंग तिः क्वचिदियं लिंगैकदेशे पुनः॥ आनीलाय मुनातरंग तिपुनः सावाकुतरंगत्यहो सावाचां विषया
भवत्यपि कथं श्रीनीलकंठ प्रभो॥ ८९॥ लिंगंमंगलदं मनोरथ ततिंतावत्तनोत्यादरादादौ दृष्टमदृष्टभेद
जनकं स्रष्टुं विशिष्टं फलं॥ तद्भक्तं प्रणतं प्रपश्यति मुहुः चिंता समा लिंगितं॥ ९०॥ ध्यातं पूजित मप्यनन्य
सदृशं देयं किमस्तीयपि॥ अन्यालोकन दूनमस्य नयनांभोजं मदालोकन प्रेमाविष्करण प्रभाकर सम
फुल्लं किमस्मै मया॥ ९१॥ दातव्यं भुवनत्रये पि न तथा भूतं फलं दृश्यते॥ धर्माद्यर्थ चतुष्टयान्यदधिकं देयं
नदृष्टं फलं॥ शाघे नाप्यथ मायया पि सकृदप्यालोकितं दैवतैः सर्वाभीष्टफलप्रदत्वमभवन्यत् भावलिंग
स्यमे॥ ९२॥ तस्यैतस्य किमस्ति देयमसकृत्सानंदमालोकनेशैवायेत्यतिचिंतयापरमिदं कालेन यत्नन्वहं॥

यःपश्यत्यसकृन्मुदापरमिदं मे भावलिंगंप्रभो ॥ भक्त्यातद्दृशतामुपेत्य निवसा मान्यंनकृत्यंचमे ॥९३॥ त
स्यास्मिन्नधमर्णतामुपगते मय्यप्यदेयेसकिं कर्तुंपारयतीतिपापविमुखः चिंताब्धिमध्यंगतः ॥ धर्मार्थ
चतुष्टयादिकफलापेक्षान भक्तस्यमे ॥ यद्यप्यस्ति तथाप्यनन्यसदृशं किंनप्रदेयंफलं ॥९४॥ मत्पूजानिरता
यतन्ममनचेत्किंदेयमित्यन्वहं ॥ चिंतासिद्धिसमृद्धिरेवबहुधामत्पूजनाभ्युच्चये ॥९५॥ यत्किंचिज्जलमल्प
मप्युपहृतंभक्त्याविनाप्यर्पितं ॥ दास्यत्येवफलानि निर्मलजलैर्गासेचने किंफलं ॥९६॥ देयंकोमलबिल्व
पल्लवनवांभोजादिभिः पूजनैः किंवादेयमितिप्रशांतिरहिता चिंतानजानाविकिं ॥ किंचिच्चेदपरिष्कृता
न्नमपि मेदद्यात्तदा तत्फलं स्याद स्यान्नपलित्व मुत्तममधुक्षीराज्यदध्योन्नदः ॥ मह्यं किंफलमाप्नुयादिति
नकिं चिंतापिमेजायते ॥ जातावृद्धिपरंपरामुगता सद्भावलिंगस्यमे ॥ दिव्यैःकुंकुमकेसरैर्मृगमदैःकर्पूरखंडै
र्नवैः ॥९७॥ अन्यैरप्यतिगंधसुंदरसद्द्रव्यैर्युतंचंदनं दत्तंचेत्तुहिनान्वितंमयितदादेयंमयाकिंफलंशैवायेति
विचारसागरमहाकल्लोलमालाकुलः ॥ यो नित्यंनवपट्टकूलवसनैर्धूपैःप्रदीपैर्मुहुः ॥९८॥ माणिक्याभरणा
र्पणेनविमलच्छत्रैस्तथाचामरैः ॥ आदर्शैर्ध्वजसंयुतैरपि महापूजांकरोत्यादरात् ॥ तस्मै किंममदेयमित्यनु–

दिनं चिंता निरंता न किं॥ ॥१९८॥ यो भक्त्या प्रणतो निधाय धरणीपृष्ठे शिरः सादरं॥ तं देवाः प्रणमंति तावदसकृद्दंडप्रणा- मोद्यताः॥१९९॥ किंवा तत्फलमाप्नुयादिति न किं चिंतातु मे जायते॥ गंधाधिष्ठितभावलिंगनिलये वेदप्रमेयो मयि॥ ॥१९९॥ यो भक्त्या नियतः प्रदोषसमये पंचामृतैर्निर्मलैः॥ नीरैरुष्मिषिच्य वस्त्रविमलैः श्रीचंदनालेपनैः॥२००॥ पुष्पैः पंचकमालिकाभिरमितः श्रीभावलिंगार्चनं कृत्वा नृत्यति मन्मनस्यनुदिनं वृत्तिर्हि मे चिंतया॥ रुद्राध्याय सहस्र नामपठनैः मत्संनिधाने नयेद्वः कालं स विभूतिपूतहृदयो मुक्तो महापातकैः॥२०१॥ स्यादित्यत्र किमद्भुतं शिवमनुस्मृत्वा पितत्संनिधिं यास्यत्याप्तलमत्वमेष्यति न संदेहोऽत्र चित्रं च किं॥ मां द्रष्टुं यदि जायते मतिरपि प्रातः प्रमोदान्वितो मुक्तः पापगणैरपार सुकृतैः युक्तः समां पश्यति॥२॥ आधारः सुखसंपदामपि भवत्यायुः परं प्राप्नुयादारोग्यं निगमागमादिविहितं श्रीभावलिंगार्चने॥ यो मद्भक्तपदार्चकः सकृदपि प्राप्नोति शैवं पदं मत्पूजानिरतो भवेद्यदि तदा वक्तव्यमत्रास्ति किं॥ ॥२०३॥ तस्मादन्वहमर्चनीयममलं श्रीभावलिंगं गणैराराध्यं तदनन्यसक्तमनसा संत्यज्य धर्मांतरं॥ किं तैरध्वरकोटिभिः बहुविधद्रव्योपहारोद्यतैः॥ दानैः सांगपदक्रमादिसहितैः किं वेदपारायणैः॥४॥ किं योगैस्तपसापि किं

150

तु सकृदप्य श्रद्धयाप्यर्चितं॥ दास्यत्येवहि भावलिंग ममरा प्राप्याणि भाग्यान्यपि ॥ २०४॥ श्री मृत्युंजय भावलिंग निलया

पापामयानां लयः॥ त्वन्नाम स्मरणोद्यमे सति परं मुक्तः कुतस्त्वद्भयं ॥ ५॥ न स्वप्ने प्रलयेपि नापि मरणेप्य स्यांतका

द्भाभयं॥ तेनेत्थं दृढनिश्चये सति फलं किं नाम संकीर्तने ॥ २०५॥ भो शंभो भव भावलिंग निलय त्वत्पूजने योगिनं ल

क्ष्मीः तावदुपेत्य किं तव मतं वांछास्ति ते कुत्र वा ॥६॥ अक्लेशांगण रिंखण प्रणतिभिः स्थेयं मयाल द्गृहे॥ स्वामि

न्नित्यवधावतीति भगवन् किं किं फलं पूजने ॥ २०६॥ तत्पूजा निरतानिति शांकर पुर द्वारेषु तावत्सुराः सानंदांजलि

मस्तकाः प्रति दिनं तद्दर्शनाकांक्षया ॥७॥ तिष्ठंत्यत्र किमद्भुतं त्वयि महादेवे प्रसन्ने फलं॥ किं किं न्नास्य भ

विष्यति प्रति दिनं श्री भावलिंगालये ॥ २०७॥ आशास्यं मम भाव लिंग सकलं सिद्धं त्वदन्याश्रयं॥ व्यावृत्तं यदि

मानसं तदिति ते ध्यानेन किं पूजया ॥ ८॥ किं वा त्वत्परिचर्ययापि फलमित्यस्मिन्विचारे कृते॥ तावद्धा कुल

तानते भवतु सात्याज्येति संप्रार्थ्यते ॥ २०८ एताव द्वद भावलिंग निलय स्वामिन् ममाद्यावधि॥ त्वत्पादांबुरुहा

न्यचिंतनपरा वृत्तं विकारै र्विना ॥ ९॥ २०९॥ चेत स्तत्पुरुषार्थ भिन्नमपि ते देयं ममास्ति त्यपि॥ प्रत्याशा शिवपूजन

स्य फलमस्त्यन्यन्ममस्यादिति ॥ किन्नत्रामर भूरुहे निर्जगृह द्वाराश्रिते राश्रितेः॥ किं चिंतामणि कामधेनु

निवहैः किंवा निधीनां गणैः॥२९०॥ आकल्पं कमलापतिप्रभृतिभिः वृंदारकैराश्रितैः॥ रानम्रां जलिमस्तकैरनुदिनश्री भावलिंगार्चने॥ इति स्तुत्वा मुहु र्भक्त्या भावलिंगालयं प्रभुं॥ कृतांजलिपुटो नित्यं तत्पूजा निरतो भवेत्॥२९१॥ पुनः पुनस्तद्गुण वर्णनेन कालं नयेत्कालभयं विहाय॥ तं कालकालं विमलं सलीलं पश्यन् मुहुः स्थास्यति तत्समीपे॥२९२॥ त्यजत्य जतडिल्लटी विटवधूटिका चेटिका॥ विकारकरमिंदिरा रुचिरभूविहारं परं॥ भजाशु भज धूर्जटिं स्फुटकृपीट योनि स्फुरल्ल॥ ललाटपटलप्रभासमभिभूत भानुप्रभं॥२९३॥ ॥३६॥

॥इति श्री शिवरहस्ये हराख्ये तृतीयांशे गौतममुनीश्वर संवादो नाम षट्त्रिंशोध्याये तीर्थेश्वर महात्म्यं॥ ॥

॥श्रीकाशी विश्वेश्वरार्पणमस्तु॥ ॥नारद उवाच॥ ॥इति तद्वचनं श्रुत्वा गौतमं मुनिपुंगवं॥ पुनरूचुः प्रहृष्टास्ते भावलिंग महोत्सवं॥१॥ ॥ऋषय ऊचुः॥ ॥स्वामिंस्तीर्थेश निर्माल्य चंदनाराधने मतिः॥ कथं तस्याभवत्तत्र लिंगबुद्धिर भून्मुने॥२॥ ॥गौतम उवाच॥ ॥विश्वासो यत्र भक्तस्य यत्र पूजत्वधीरपि॥ तदेव लिंगं तत्पूजा सर्वसिद्धिप्रदा भवेत्॥३॥ यदेव लिंग संबंध घनचंदन गोलकैः॥ तत्रार्पितं बिल्वपत्रं भुक्ति मुक्ति प्रदं न किं॥४॥ अनुलिप्तं चंदनाद्यै लिंगमभ्यर्चयेदिति॥ श्रुतिः चंदन संबद्धान्न दूरीकर्तुमिच्छति॥५॥

समर्पितेषु पुष्पेषु पुनः पुष्पसमर्पणं ॥ पुष्पेषु क्रियतेतेषु पुनः पुष्पसमर्पणं ॥ भावलिंगं तु भावेन शुद्धभावे
न निर्मितं ॥ तत्रार्चनं कृतं तेन स्वसिध्यै तद्भविष्यति ॥ ७ ॥ ततस्तद्भावलिंगस्य भावपूतार्चने ननु ॥ भवत्येव
महद्भाग्यं स्वस्वभावानुरोधतः ॥ ८ ॥ तद्भावलिंगे दृष्टे पितुष्टिवृष्टिर्भविष्यति ॥ १० ॥ तीर्थेशलिंगनिर्मा
ल्यं चंदनं च समर्पितं ॥ ददाति सिद्धिं तल्लिंगं तीर्थेशस्याधिष्ठितं यतः ॥ ११ ॥ तीर्थेश्वराभिमानस्तु स्वनिर्मा
ल्येप्यविच्युतः ॥ ततस्तदभिमानस्य निलयं लिंगमुत्तमं ॥ १२ ॥ अस्य देवाधिदेवस्य तीर्थेशस्यावलोकनात् ॥
स्मरणादपि सिध्यंति फलानि विविधान्यपि ॥ १३ ॥ तीर्थेशनिकटे यत्तु तीर्थं पापविनाशनं ॥ तद्वीक्षणात्पाप
नाशो नानासिद्धिमवाप्नुयात् ॥ १४ ॥ तत्तीरे यस्तनुत्यागं तीर्थेशस्मरणोत्सुकः ॥ करिष्यति स पुण्यात्माया
ति तीर्थेशरूपतां ॥ १५ ॥ इदं पाशुपतं स्थानं महापाशुपताश्रितं ॥ तत्राधिकारः शैवानां वासो नान्यस्य सर्वथा ॥
॥ १६ ॥ अत्र पाशुपतैर्मुक्तिः प्राप्ता पूर्वमहात्मभिः ॥ अग्रेपि मुक्तिः प्राप्तव्या महापाशुपतैरिह ॥ १७ ॥ इति तद्व
चनं श्रुत्वा मुनयो हृष्टमानसाः ॥ किं वा प्रत्याह्निकं कर्म द्विजाना मिति चोचिरे ॥ १८ ॥ ॥ गौतम उवाच ॥
॥ अरुणोदयवेलायां उत्थाय शिवचिंतकैः ॥ दूरे शौचादिकं कृत्वा स्नात्वा पापविनाशने ॥ १९ ॥ उद्धूल्य भस्म

नांगानिमंत्रपूतेन भस्मना ॥ त्रिपुंड्रधारणं कार्यं तथा रुद्राक्षधारणं ॥२०॥ पश्चादाचमनं कुर्याच्छ्रुतिमार्गेण सादरं ॥
श्रौतमार्गरतानां तु श्रौतमाचमनं स्मृतं ॥२१॥ भवादिभिस्त्रिराचामेत्परिमृज्य त्रिरंबुना ॥ उपस्पृश्य सकृ
न्नीरं शिरः सम्यक् स्वचक्षुषी ॥ नासिके च तथा श्रोत्रे प्यालभ्य हृदयं ततः ॥ सव्यपाणिप्रोक्षणं च प्रोक्षणं पा
दयोरपि ॥२३॥ पंचाक्षरेण वा कुर्यात्तत्तदंगाभिमर्शनं ॥ आपो हिष्ठादिभिः कुर्यात् छिवमंत्रैस्तु मार्जनं ॥२४॥ स्वा
हांतेनपि वेदं बुतत्प्रधानमिति श्रुतं ॥ अर्घ्यप्रदानं कृत्वांते गायत्रीजपमाचरेत् ॥२५॥ ततः परं बिल्वपत्रैः दिव्य
तीर्थोदकै रपि ॥ गंधपुष्पादिभिर्दिव्यैः कुर्यात्तीर्थेश्वरार्चनं ॥२६॥ प्रदक्षिणनमस्कारान्कृत्वा भक्त्या पुनः पुनः ॥
पंचाक्षरजपं कुर्यात् ध्यात्वा शंकरमादरात् ॥२७॥ होमस्ततः परं कार्यो वैश्वदेवश्च सादरं ॥ वैश्वदेवेपि ये मंत्राः
स्वाहांतास्ते भवादयः ॥ भवाद्यास्युश्च देवांता सौत्वष्टौ मनवः स्मृताः ॥ तथा भवस्य द्रवस्य देवस्येत्याद्या
त्वष्टौ श्रुति स्मृताः ॥२९॥ तैःकृत्वा बलिदानं च तदग्नावेवतै रपि ॥ आवहंती ति मंत्रेण होमं कुर्यात्प्रयत्नतः ॥३०॥
पश्चात्तत्राहुतिर्देया पितृभ्योपि स्वधास्त्विति ॥ एवं प्रत्याह्निकं कर्म प्रातःकालीनमास्तिकैः ॥३१॥ मध्यान्हेपि
पुनः स्नात्वा कर्त्तव्यं शिवपूजनं ॥ उक्तेनैव प्रकारेण सायं च शिवपूजनं ॥३२॥ आसायमप्रमादेन प्रातरारभ्य सादरं ॥

नित्यं शिवार्चनं कार्यं बिल्वपत्रादिसाधनैः ॥ ३३ ॥ जलैः पत्रैः फलै रत्नैः पुष्पैर्दूर्वांकुरैरपि ॥ पूजयेद्गिरिजाकांतम-
प्रमादेन नित्यशः ॥ ३४ ॥ एवं संपूज्य यत्नेन बिल्वपत्रादिभिः शिवं ॥ नयंति कालं विमलाः शिवपूजनतत्पराः ॥
॥ ३५ ॥ यो नित्यसूतकी तेन शिवो नाभ्यर्चितः परः ॥ तदन्यै रर्चितो नित्यं ते सर्वेप्यधिकारिणः ॥ ३६ ॥ इति तद्वचनं
श्रुत्वा तमूचुर्मुनयस्तदा ॥ नित्यसूतकिनः केवा वदत्वं मुनिपुंगव ॥ ३७ ॥ ॥ गौतम उवाच ॥ ॥ त्रिपुंड्रधा-
रणं त्यक्त्वं श्रौतं सर्वार्थसाधनं ॥ ये स्त एव दुराचारा नित्यसूतकिनः स्मृताः ॥ ३८ ॥ नित्यसूतकिनां गेहे जलं यः पा-
तुमिच्छति ॥ सोपि तत्समतां याति निंद्य एव तथैव सः ॥ ३९ ॥ श्रौतकर्मणि नाशौचमश्रौते च क्वचिद्भवेत् ॥ श्रौ-
तकर्मपरित्यागः सूतकेपि न सर्वथा ॥ ४० ॥ श्रौतेकर्मणि तत्काले स्नातः शुद्धिमवाप्नुयात् ॥ कदापि न परित्या-
ज्यं श्रौतं कर्म शिवार्चनं ॥ ४१ ॥ यावज्जीवं श्रुतिस्तत्र प्रवला तन्न सूतकं ॥ तिरस्कृतं भावनापि तन्न गृण्हाति सू-
तकं ॥ ४२ ॥ श्रौतहोमेषु सर्वेषु शिवार्चनसमो विधिः ॥ न चाग्निहोत्रमस्य परित्यागोपि सूतके ॥ ४३ ॥ दर्शस्य
पूर्णमासस्य शिवलिंगार्चनस्य च ॥ प्रमादात्सूतके त्यागं कुर्वन्नरकमश्नुते ॥ ४४ ॥ प्राणप्रयाणकालेतु स्वस्य
शक्तिर्न चेत्तदा ॥ करणीयं प्रयत्नेन पुत्राद्यैः शिवपूजनं ॥ ४५ ॥ एतस्मिन्श्रौतधर्मेपि शिवलिंगार्चने श्रुते ॥ कलौ-

पापात्मनां बुद्धिः न भविष्यति सर्वदा ॥४६॥ पुराशप्ताः शिवाचारनिरतैः शांभवैर्द्विजाः ॥ तेन शापेन भक्तिस्तु न कलौ शंकरार्चने ॥४७॥ ॥ऋषय ऊचुः॥ ॥ द्विजाः कथं वा तैः शप्ताः शांभवाग्र्यैः सुरे मुने ॥ अथ श्रद्धा कथं मे तेषां जाता शंकरपूजने ॥४८॥ ॥गौतम उवाच ॥ ॥ दक्षः प्रजापतिः पूर्वं यागारंभं चकार सः ॥ तदानीमागताः सर्वे मुनयः शौनकादयः ॥४९॥ देवाः समागतास्तत्र गंधर्वाश्चारणा अपि ॥ सिद्धाः समागतास्तत्र तदन्ये कपिलादयः ॥५०॥ दीक्षां गृहीत्वा दक्षोपि सर्वसौभाग्यसंयुतः ॥ सुरैः सदस्यैरिंद्राद्यैः सह संतोषमाप सः ॥५१॥ तदानीं पार्वती प्राह कैलासनिलयं शिवं ॥ अतिप्रसन्नवदनं देवानामपि शासकं ॥५२॥ ॥पार्वत्युवाच ॥ ॥भगवन् दीक्षितो यागे दक्षोयं यक्षादिभिः सह ॥ तद्यागदर्शनापेक्षा ममाभूदधुना प्रभो ॥५३॥ इति तद्वचनं श्रुत्वा कालकालो महेश्वरः ॥ प्राह गंभीरया वाचा कल्पांतघनसन्निभः ॥५४॥ यागस्तेन समारब्धः स्वनाशाय दुरात्मना ॥ कातदा लोकने प्रीतिः तां प्रीतिमुपसंहर ॥५५॥ अद्यप्रभृति याजकाः सर्वनाशमेष्यंतिते शिवे ॥ तत्सदस्येपि संहारो भविष्यत्यद्य सर्वथा ॥ कल्पावसानकालोयं यस्मिन्काले दुरात्मना ॥ मयि द्वेषः समुत्पन्नो दक्षस्यापि दुरात्मनः ॥५७॥ नारायणादिदेवानां नाशः संभावितः शिवे ॥ किं चान्यदपि तन्नाशे कारणं किंचिदुच्यते ॥५८॥

तन्नाशालोकनायाद्यगंतव्य मितिधीरपि ॥ नकर्त्तव्या त्वया गौरि गणनीयः सकिं शिवे ॥ ५९ ॥ एतादृशाः कति
शिवेन संति भुवि दीक्षिताः ॥ किंते तत्प्रेक्षणायापिगमनायोद्यमो भवेत् ॥ ६० ॥ तन्नाशकौतुकं द्रष्टुं यद्यपेक्षा
तवांबिके ॥ तर्हि सृष्टिं कुरुष्वाद्यकामिन्याः काममादरात् ॥ ६१ ॥ इत्युक्ता सा महेशेन ससर्ज रमणीं तदा ॥
रमणीयां स्वानुरूपां स्वचिन्हपरिवेष्टितां ॥ ६२ ॥ नानालक्षणसंपन्नानानाभरणभूषितां ॥ तामुवाच तदा गौ
रीदक्षयागं प्रति त्वया ॥ ६३ ॥ गंतव्यं तत्र गत्वा तु कौतुकं पश्य सादरं ॥ इत्युक्ता सा तदा गौर्या ययौ कामस्व
१६३ रूपिणी ॥ ६४ ॥ विमानवरमारुह्य दासीकोटिनिषेविता ॥ गणकोटिसमाकीर्णा छत्रकोटिसमाश्रिता ॥
॥ ६५ ॥ सा यदा चलिता तत्र महोत्पाता निकोदिशः ॥ जातानि तानि दृष्ट्वा ते सुरसर्वेपि भयसंवृताः ॥ ६६ ॥ अ
ग्निवृष्टिरभूत्तत्रपरितो यागमंडपे ॥ सर्पवृष्टिरभूद्भूयः क्रोष्टारश्च ववाशिरे ॥ ६७ ॥ गृध्रछाया समाक्रांता
यागभूपरितो द्विजाः ॥ तदा लोहितवृष्टिश्च मांसोत्रादि समन्विता ॥ ६८ ॥ कंटकानाम भूद्वृष्टिः पुरीष
क्रिमि संयुता ॥ रेतः समन्विता साभून्मूत्रेणापि समन्विता ॥ ६९ ॥ एतादृशमहोत्पात सहस्त्राणि विलो
क्यते ॥ अभूतपूर्वैरुत्पातैः भयमाजग्मुरास्तिकाः ॥ ७० ॥ सकंपा स्वेदधाराभिरावृताः शुष्कतालुकाः ॥

अतः परं किमस्माभिः कर्त्तव्यमितिविव्हलाः॥७१॥ तदानीमागता सापि नाशी गौरी विनिर्मिता॥ तामालोक्य-
मुदं प्रापुः भवानी सेति विश्वमातृ॥७२॥ तां दृष्ट्वा ते सुराः सर्वे प्रणम्य च मुहुर्मुहुः॥ दक्षमाहुः प्रयत्नेन पूजनीयेति
सत्वरं॥७३॥ ततः सनम्रवदनो लज्जया परया युतः॥ अभ्युत्थानादिकं कर्म न चकार विशेषतः॥७४॥ तदानीं मुन
यः सर्वे तां प्रणम्य मुहुर्मुहुः॥ स्तुत्वा कृतांजलि पुटाः विनयेन नताननाः॥७५॥ इयमेव हि कल्याणी भवानी
भक्तवत्सला॥ इयमेव परा विद्या परमानंद दायिनी॥७६॥ सौभाग्यजननी सेयं सर्व सौभाग्यदायिनी॥
यत्प्रसादेन जीवामनंदा मशरदः शतं॥७७॥ सेयं भाग्यवशा दृष्टा दुरदृष्ट विनाशनी॥ कष्टापहरणोद्युक्ता
संतुष्टा वीक्षणादिभिः॥७८॥ नारायणाद्याः सर्वेपि यत्पादांबुज रेणुभिः॥ सृष्टाः सेयं महा गौरी शरणागत
वत्सला॥७९॥ नमो गौर्यै महा गौर्यै भवान्यै प्रणतां वयं॥ प्रणतान्पाहि गिरिजे विज्वरान् कुरु सादरं॥८०॥
यत्कोपांबुधि लेशोपि ज्वरः सर्वापकारकः॥ तां नतास्म वयं दुर्गे दुर्गार्त्ति भय हारिणीं॥८१॥ अरुण प्राण
संहार कारणे कमलानने॥ भीमे देवि नमस्तुभ्यं भयानि हर सर्वथा॥८२॥ वैप्रचित्त महाघोर हरि रोघनि
बर्हिणी॥ श्री रक्तदंतिके गौरी नमस्तुभ्यं नमो नमः॥ महामाये महादुर्गे मधुनाशन कारणे॥ नमस्तुभ्यं नमस्तुभ्यं-

भयं संहर संहर ॥८४॥ कैटभ प्राणहरण प्रवीणे शिववल्लभे ॥ नमस्तुभ्यं नमस्तुभ्यं पीडां संहर संहर ॥८५॥ शाकं
भरि जगद्वंद्ये शशांककलितालके ॥ नमस्तुभ्यं नमस्तुभ्यं शंकातंकानि संहर ॥८६॥ उन्मत्तमहिषारातिगर्व
संहारकारणे ॥ नमस्तुभ्यमवापन्नदारिद्र्यार्त्तिहरोद्यमे ॥ हेतु भूपाल संहार प्रवीणे छंदलांबिके ॥ नमस्तुभ्यंम
हादेवि सर्व रोग विनाशिनि ॥८८॥ भ्रमरांबे नमस्तुभ्यं शंबरारि विनाशिनि ॥ नमस्तुभ्यं शिवे शांते त्वयि भक्तिं
प्रयच्छनः ॥८९॥ नमस्ते जगदाधारे भव भार विनाशिनि ॥ नमस्तुभ्यं नमस्तुभ्यं परमानंदरूपिणि ॥९०॥ इति स्तु
तिपरान्दृष्ट्वा मुनीन्दक्षो विचक्षणः ॥ दुरदृष्टकृतामर्षादुवाचवचनं द्विजाः ॥९१॥ ॥दक्ष उवाच ॥ ॥अलं
स्तुतिभिरेताभि(दु)त्पातनाशकं ॥ चिंतनीयं किमेतस्यकारणंवाव दंतुवः ॥९२॥ ॥ऋषय ऊचुः ॥ ॥शृणुदक्ष वि
रूपाक्ष दीक्षितानां परां गतिं ॥ विरूपाक्षमनभ्यर्च्य धर्मं कुर्वंति येनराः ॥९३॥ नाराधितो महादेवः त्वया भक्तेष्टदाय
कः ॥ अत एव समुत्पन्नाः महोत्पातपरंपराः ॥९४॥ महादेवमनभ्यर्च्य यः कर्मांतरतत्परः ॥ तस्य नाशो भवत्येव
तत्कुलस्यापि सर्वथा ॥९५॥ दानायागफलं स्यापि शिव एवतया सति ॥ तमनभ्यर्च्य संप्राप्तं फलं के न महीतले ॥
॥९६॥ दुर्भगाणां महादेवपूजायां नमतिर्भवेत् ॥ अत एव वृथा कर्म न फलाय प्रजायते ॥९७॥ स्मृत्वा वा सकृदाराध्य

गौरीरमणमव्ययं ॥ दुर्लभ्यान्यपि सर्वाणि फलानि प्राप्नुवंतिते ॥९८॥ फलानियानियैर्धर्मैः प्राप्यंते स्वगुणैः सदा ॥ ता-
नि सर्वाणि लभ्यंते केवलं शंकरार्चनात् ॥९९॥ शंकरार्चनेनापि फलं यः प्राप्तुमिच्छति ॥ सवृष्ट्यापि विना धान्य मुत्साद-
यितु मिच्छति ॥१००॥ कोवा शिवमनाराध्य शिवं संप्राप्तुमिच्छति ॥ अविवेकि नमेकं त्वा मृते मृति भयातुरं ॥१॥ कः सर्वमं-
गलाकांतं कृतांतांतकमादरात् ॥ अनभ्यर्च्य शिवं प्राप्य मोदते दक्षतद्वद ॥२॥ कः सर्वमंगलाकांतं नितांतं शांत-
मादरात् ॥ सदा रंधीरमाराध्य माराध्यं शिवं व्रजेत् ॥३॥ पुण्यानां परिपाकेन बहूनामेव केवलं ॥ भक्तिर्भवे भवत्ये-
व बहुभाग्यवतां नृणां ॥४॥ दुर्लभा भक्तिरीशाने सौभाग्य परिपाकजा ॥ सातु भाग्यवतामेव केषांचित्खलु जा-
यते ॥५॥ अनंत जन्मभिर्येन पुण्यराशिः समार्जितः ॥ तस्यैव तावद्भक्तिः स्यात् भवे भव विमोचके ॥६॥ देवांतरा-
राधनेन त्यक्त्वा शंकरपूजनैः ॥ न लभ्यते फलं नूनं महद्वा स्वल्पमेव वा ॥७॥ शक्तिरीश प्रसादेन सत्कर्मकरण-
क्षमा ॥ शिवप्रसाद विरहे साशक्ति रति दुर्लभा ॥८॥ तवापि कुंठिता शक्तिः शिवानभ्यर्चनादिह ॥ कोवा समर्थो
देवेषु पापौघ कुलवारणे ॥९॥ आपत्परं परासेयं हरार्चनतो धुना ॥ न दृष्टा सेय मुन्मादादहंकारेण च त्वया ॥१०॥
दृष्टे र्दुरभिमानेन शिवानाराधनेफलं ॥ कथं प्राप्या तृषा शांतिः लोके किं मृगतृष्णया ॥११॥ महादेवेप्यहंकारं-

अ० ३७

कृत्वा जीवितुमिच्छति॥ यस्तं ज्वलनसंदग्धं मृतमेवेति मन्महे॥१२॥ अहंकारः कृतः पूर्वं महारुद्रे दुरात्मभिः॥
ते सर्वे निरयं प्राप्ताः कुंभीपाकेव संति हि॥१३॥ यस्माद्भीतोपि भीतः सन्वाति सूर्योपि चंद्रमाः॥ उदेति तं महा
देवं भजंति भवभीरवः॥१४॥ शरीरं तस्य भाराय केवलं परिकल्पितं॥ न यस्य शंकरे भक्तिः क्षणार्धक्षणमेव वा॥
॥१५॥ तस्यैव जीवनं धन्यं जन्म संप्राप्य येन वा॥ पूजितो गिरिजाकांतः कृतांतांतकरस्त्वसः॥१६॥ अधुनापि
महेशाने तव भक्तिर्न जायते॥ अत एव हि दौर्भाग्यं त्वाद्यप्यनुवर्तते॥१७॥ भक्तिर्न सहसा तावदुमाकांते प्रजा
यते॥ दुरदृष्टविनष्टानां नराणां दुष्टकर्मणां॥१८॥ बहवोपि भविष्यंति मृतकल्पाः कलावपि॥ किं तैर्गर्भसं
काशे रधर्मनिलयै रपि॥१९॥ तस्यैवामितपुण्यकोटिघटितं जन्मेति मन्यामहे यस्यांतःकरणं क्षणार्धमपि
वा विश्वेश्वराराधने॥ व्यासक्तं विगतस्पृहं तदितरा सामर्थ्याय जन्मापि वा व्यर्थं व्यर्थमिति श्रुतं श्रुतिशतैरश्रां
तमेव ध्रुवं॥२०॥ ॥इति श्री शिवरहस्ये हराख्ये तृतीयांशे गौतममुनिसंवादे दक्षाध्वरे सप्तत्रिंशो
ध्यायः॥३७॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥नारद उवाच॥ ॥इत्युक्तमुनिवाक्यानि श्रु
त्वा दक्षः पुनः पुनः॥ विनाशकरयोग्यानि वचनान्याह सत्वरं॥१॥ ॥दक्ष उवाच॥ ॥दक्षः प्रजापतिः सोहं-

मत्तः सर्वं प्रवर्तते ॥ ममापि रुद्रः किं पूज्यः त्रिशूली सर्पभूषणः ॥ २ ॥ इत्युक्तं तद्वचः श्रुत्वा मुनयः क्रोधसंकुलाः ॥ धिग्धिग्धि - हरा ग्र्गलव जन्मेति तमूचुर्दक्षमुद्धतं ॥ ३ ॥ अपूज्यत्वमतिर्यस्य शंकरे लोकशंकरे ॥ सममघपजचंडालरेतःपातसमुद्भवः ॥

॥ ४ ॥ यस्य भक्तिर्महादेवेन क्षणं वा प्रजायते ॥ तन्माता जारिणी ज्ञेया सामघपकुलोद्भवा ॥ ५ ॥ यस्या भक्तिर्महादेवे सपुल्कसकुलोद्भवः ॥ मतावच्चंड चंडालकुले नित्यं प्रजायते ॥ ६ ॥ अपूज्यत्वं महादेवे यो मोहादपि संवदेत् ॥ छित्वा तद्रसनामाशु विष्टया पूरयेन्मुखं ॥ ७ ॥ यया रसनया निंदा कृता देवस्य शूलिनः ॥ तज्जिह्वा मूत्रधाराभिः अनुलिप्तान लालया ॥ ८ ॥ ज्ञाते पूज्यतमत्वेन सोमे सोमार्धशेखरे ॥ तस्मिन्न पूज्यताधीः स्यात् चंड चंडालजस्य तु ॥ ९ ॥ धिग्धिग्भवतत्कुलं धिग्धिग्धिग्धितज्जननी मुखं ॥ यस्यापूज्यत्वधीर्देवाज्जाता पूज्यतमे शिवे ॥

॥ १० ॥ एतावत्कालपर्यंतं न दृष्टः शिवनिंदकः ॥ दृष्टस्त्वमेको दुष्टात्मा धिग्धिक्त्व मुखं क्षणात् ॥ ११ ॥ प्रातरद्य मुखं दृष्टं कस्य दुष्टस्य येन ते ॥ मुखं दृष्टं पापबुद्धेः शिवनिंदाकरस्य ते ॥ १२ ॥ शिवनिंदाविषज्वालाप्र्ग्लयवन्हिभिः ॥ शिवनिंदकवंशानां विनाशोऽपि भविष्यति ॥ १३ ॥ अद्य त्वय्यनुरक्ता ये शिवनिंदाकरे सुराः ॥ तद्विनाशो ध्रुवं बहुधा भविष्यति न संशयः ॥ १४ ॥ अद्य तावद्भाग्यंते दुर्भगस्य दुरात्मनः ॥ मनः शंकरनिंदायां प्रवृ-

त्तंपापकर्मणः॥१५॥ किंते कुले नशी ल्लेन शिव निंदा करस्यते॥ जन्मना पितवैतेन धिग्धिक्ते जन्मपापजं॥१६॥शुनांवा
रासभानांच रेत साज निरस्तिहि॥ यस्यतस्येश निंदायांमतिर्भवति दुर्भगा॥१७॥ प्रायस्त्वज्जननीयोनिः सिक्ता
रासभरेतसा॥ तेन जातस्त्वमीशान निंदांकर्तुं समुद्यतः॥१८॥ यद्वा मद्यप चंडालै रेतसा जन्मते[य]तः॥ अपूज्यत्व
मतिर्जाता शिवे पूज्यतमोत्तमे॥१९॥ अन्योपि पूज्यः किंलोके यतः पूज्यतमः शिवः॥ तस्मिन्नपूज्यता बुद्धिः महा
पापफलं खलु॥२०॥ ~~कोवातवाप्यस्ति सुखस्य हेतुः संरक्षकः कस्तवनाशकाले॥ नूनंविरूपाक्षललाटवह्नि
ज्वाला कुले तेपतनंच भावि॥२१॥~~ विनाशकाले विपरीत बुद्धिः भवत्यवश्यं विपरीतकालः॥ समागतः सोयमसं
शयोत्र दुश्चिन्ह संदर्शनमत्र हेतुः॥२१॥ कोवातवाप्यस्ति सुखस्य हेतुः संरक्षकः कस्तवनाशकाले॥ नूनं विरूपा
क्षललाटवह्नि ज्वालाकुलेते पतनंच भावि॥२२॥ यैर्यैः श्रुता सापि महेश निंदा दावानला भासुरादरेण॥ तेषां विना
शोद्य भविष्यतीति भविष्यदर्थोप्यवधारितोत्र॥२३॥ नारायणे नापितवास्ति सौख्यं चतुर्मुखे नापितयोस्तवापि॥
नाशो भविष्यत्यधुना सनाशो नूनं भवेल्लोचन गोचरोपि॥२४॥ वेदाः प्रमाणं यदितर्हि सद्यः संभावितस्ते शिवनिंदक
स्य॥ नाशोप्यघोरा मितयातनासु पातोपितावत्सहतैः सुहृद्भिः॥२५॥ एको विषाशी मरणं प्रयाति तस्माद्विषान्नास्ति भयं-

456

शिवरह०३
२६२

परंतु॥ महेशनिंदाविषतो भयं स्यात्तत्कुलस्यापि विनाशकत्वात्॥२६॥ महेशनिंदामितकालकूटकटाहकूटप्रकटीकरात्तृ-
ष्टेनेन॥ न जीवनं वांछति कोपि लोके तत्र प्रविष्टः खलु नाशमेति॥२७॥ अखर्वगर्वस्तव शर्वनिंदामहानलेनाशु वि- अ० ३७
नाशमेतु॥ अतः परं किं तव जीवनाशो महेशनिंदाविषपानपीते॥२८॥ महेशनिंदाविषदोषलेशः स्मशानवासायन नरं
सुरं वा॥ तं किं नरं वानरकालयंतं चिराय तावत्प्रकरोति किं न॥२९॥ दुष्टः शठो निष्ठुरभाषणश्च श्रीनीलकंठे भसिता-
वकुंठे॥ न जीवितं वांछति तुच्छवृत्तिः तस्य प्रवृत्तिर्मरणाय नूनं॥३०॥ यं सर्वदेवोत्तममामनंति सर्वामराराधितपाद-
पद्मं॥ तन्निंदया दुःखमहांबुराशितरंगमालाकुलिता भवंति॥३१॥ त्वया दुराचाररतेन निंदा कृता महेशस्य तथा-
तवाद्य॥ सद्यः सवंशस्य निरन्वयस्य नाशः स नाशो निरवावसानः॥३२॥ एतेषु कुक्षिस्थितिरक्षकस्ते सुरेषु तेषामपि वा-
श एव॥ त्वत्संगमादद्य भविष्यतीति प्राणप्रयाणावसरो हि तेषां॥३३॥ ये ये महादेवविनिंदकास्ते कल्पावसाने पिय-
मालयेषु॥ स्थित्वा स्वकीयैः सह सर्वदापि हा क्रोशनेनैव नयंति कालं॥३४॥ एषां मुनीनां शिवनिंदके न संगो भवे-
त्कुलजास्तदीयाः॥ अशांभवत्वं समुपेत्य नाशं यास्यंति सर्वे पियमालयेषु॥३५॥ यतो पियत्नेन महाग्निमालां
अत्रैव नाशाय परं चकार॥ तस्यां शिवाचारविनिंदकानां वासो भविष्यत्यनुवेलमेव॥३६॥ अघप्रभूत्या शुमहेशनिंदा-

महानलाघातविनष्टभावाः॥ भवेभवेशंकरनिंदयैवयमांतिकंयांतुनयंतिदूताः॥३७॥ इमान्यवाक्यान्यपिकुंभजादि
मुनीश्वरोक्तानि सुराश्च सर्वे॥ श्रुत्वा सकंपाः किमिहाद्य जातंइति प्रलापापहृतांतरंगाः॥३८॥ इतितद्वचनं श्रुत्वा
गिरिजा प्रेषितापि सा॥ शिवनिंदावचः श्रुत्वा चिंतयाव्याकुला द्विजाः॥३९॥ शिवनिंदावचः श्रुत्वायस्तुनव्या
कुलो भवेत्॥ सचंडालत्वमासाद्यनरकेषुपतिष्यति॥४०॥ शिवनिंदकसंगेन क्षणंवायोधितिष्ठति॥ सजारज
इतिज्ञेयोनरकाय सकल्पितः॥४१॥ पुरानरकलोकेषु शून्येषुयमकिंकराः॥ समागत्ययमंप्राहुरधिकारविवर्जि
ताः॥४२॥ ॥यमदूता ऊचुः॥ ॥श्रीकालकालध्यानेन नयंति दिव सान्नराः॥ तेषांनपापसंबंधो भूतले
दृश्यतेयम॥४३॥ शिवलिंगार्चनपराः शिवनामजपोत्सुकाः॥ शिवाचाररता एवसर्वे भूमंडलेयम॥४४॥ भस्मो
द्धूलनपूतांगाः त्रिपुंड्रांकितमस्तकाः॥ रुद्राक्षमालाभरणाः सर्वेपियमभूतले॥४५॥ शंभुलिंगार्चनंत्य
क्त्वानकोपि भुवितिष्ठति॥ शांभवसंगतिंत्यक्त्वानकोपियमभूतले॥४६॥ बिल्वमूलेषुलिंगानिस्थापयित्वा
मुहुर्मुहुः॥ पूजयंतिप्रस्तुवंतिप्रणमंतिप्रयत्नतः॥४७॥ बालकैरपिलिंगानिपार्थिवानिप्रयत्नतः॥ पूज्यंते जलदू
र्वाद्यैः पुष्पैर्नानाविधैरपि॥४८॥ नपीतंचजलंबालैः शिवलिंगार्चनंविना॥ अन्नवार्ता कुतस्तेषां निद्रावार्तापिदूरतः॥

158

शिवर०३ शिवलिंगार्चनं तेषां बालानां खेलनं खलु ॥ तत्क्रीडयापरं कालं नयंति खलु बालकाः ॥ ५० ॥ ते बिल्व तरु मूलेषु स्वांगः-हृ०रा०तृ०अ०३८
१६३ ण स्थेषु सर्वदा ॥ लिंगार्चनानि कुर्वंति कोमलैर्बिल्वपल्लवैः ॥ ५१ ॥ सोष्णमन्नं सोपदंशं निवेद्यात्यंत भक्तितः ॥ शि
वनैवेद्य माघ्राय भुक्त्वा तिष्ठंति बालकाः ॥ ५२ ॥ तद्दृ बिल्व तरु मूलानि दीप माला प्रभागणैः ॥ समन्वितानि सततं धू
पधूमाकुलान्यपि ॥ ५३ ॥ भस्माव गुंठनोत्साहाः सोत्साहाः शिव पूजने ॥ शिवनामानु संधान निर्धूता खिलकल्मषाः ॥
५४ ॥ तादृशान्बालकान्दृष्ट्वा तेषां ताताश्च शांकराः ॥ शिवविद्याभ्यासमेव कारयंति मुहुर्मुहुः ॥ तेषां कन्याश्च दाराश्च
शिवपूजनतत्पराः ॥ कुर्वंति सततं भक्त्या भस्मनैवानुलेपनं ॥ ५६ ॥ भस्मानुलेपनं त्यक्त्वा न तिष्ठंत्येव ते सदा ॥ रुद्राक्ष
माला भरणाः दारा बालाश्च बालिकाः ॥ ५७ ॥ पाककाले स्वेदनीत त्रिपुंड्रं पुनरादरात् ॥ त्रिपुंड्र धारणं कृत्वा पा
कयत्नाः पुनः पुनः ॥ ५८ ॥ पाककाले पि नामानि स्मृत्वा शैवानि सादरं ॥ गायंति तान गानेन प्रीणयंति सदा शिवं ॥
पक्वान्न गंध संबंधो न घ्राणेष्व स्वि तिक्ष्णं ॥ निवेद्य गंध मीशाय पाकागारे वसंति च ॥ ६० ॥ यावदन्नं कृतं गेहे फ
ल शाक समन्वितं ॥ ताव न्निवेद्य शर्वाय भुक्त्वा कालं नयंति ते ॥ ६१ ॥ प्रतिग्रासे महेशान महादेवेति वादिनः ॥ महा
देवध्वनि धुनी ध्वनयः प्रति मंदिरे ॥ ६२ ॥ चंदनं कुसुमं वासः शिवाय विनिवेदितं ॥ भक्त्या गृण्हंति शिरसा प्रण-

मंतिस्तुवंतिच ॥ ६३ ॥ राज्ञ्योदारविहारेपि हरनामानुकीर्तनं ॥ कुर्वंति हारास्ते दाराः परं हारास्वभावतः ॥ ६४ ॥ हारां गनालिंगनेपि शिवलिंगं न विस्मृतं ॥ तदालिंगनजं सौख्यं शंकराय निवेद्यते ॥ ६५ ॥ हरस्मरहरापारगुणसागर शंकर ॥ पाहि पाहीति ते दाराः स्मरंति सुरते हरं ॥ ६६ ॥ तेधीरहारदारांगं भूतिभासुरमादरात् ॥ दूकूलांकमिवालोक्य शिवं स्मृत्वा हसंतिते ॥ ६७ ॥ विहारयोग्यंयद्द्रव्यं तन्निवेद्य महेश्वरे ॥ प्रसादबुध्यातेसर्वे तत्स्वीकुर्वंति यत्नतः ॥ ६८ ॥ हरनामानुसंधाना त्तद्दार प्रसवेष्वपि ॥ वेदना नैव संप्राप्ता सातेषामन्यथाकुतः ॥ ६९ ॥ जातेकुमारे तन्नाम शिवशंकरइत्यपि ॥ कृत्वा भस्मानुलिप्तं तं कुर्वंत्येव कुलांगनाः ॥ ७० ॥ जातस्यापि शिशोस्तस्य विग्रहं भस्मभूषितं ॥ रूद्राक्ष भूषितं कृत्वा कारयंति शिवार्चनं ॥ ७१ ॥ शिशुहस्ते बिल्वपत्रं दत्वा लिंगस्य मस्तके ॥ प्रच्यावयंति यत्नेन धृत्वांगुलिकुलं बलात् ॥ ७२ ॥ पश्चाज्जाताय बालाय स्तान्यमीश निवेदितं ॥ प्रयच्छंति प्रयत्नेन शिवगानपुरःसरं ॥ ७३ ॥ औषधं च न गृण्हंति तद्दाराः प्रसवेष्वपि ॥ कृत्वा शिवार्चनं भक्त्या शिवतीर्थं पिबंति ते ॥ ७४ ॥ शिवतीर्थामृते पीते स्वसा प्रसववेदना ॥ शिवभस्मांगसंगेन तन्नैवेद्याशनेन च ॥ ७५ ॥ तेजलं कालकालाय निवेद्य प्रसवक्षणे ॥ पिबंति तेन प्रसवः सुखेनैव प्रजायते ॥ ७६ ॥ बिल्वछायासमाक्रांतसादने ष्वेव सर्वदा ॥ तिष्टंति तेषां-

गमनं शिवयात्रार्थमेव हि ॥७७॥ श्रीशैलादि शिवस्थाना लोकनप्रीतमानसाः ॥ पुनंति भुवनान्याशु स्वालोकनरतान- हरा.लू. अ.३८
पि ॥७८॥ चंद्रमौलि स्वरूपेण दृश्यंते ते महोन्नताः ॥ अशक्या खलु शेषस्याप्यहो तद्गुणवर्णना ॥७९॥ संचार एव भू
लोके त्यक्तो स्माभिरतः परं ॥ तत्रास्म त्कृत्यवार्त्तापि यम सर्वात्मना पिन ॥८०॥ महेशाराधनं त्यक्त्वा क्षणं वा निवसं
तिये ॥ ते ते षां शत्रवः काल निर्मलानां महात्मनां ॥८१॥ इति तद्वचनं श्रुत्वा यमः संतुष्टमानसः ॥ दूतानाहाविलंबेन
भाविकार्यमिति द्विजाः ॥८२॥ ॥यम उवाच ॥ ॥दक्षप्रजापतिर्नाम प्रजापतिरतः परं ॥ अशेषसुरसं
कीर्णो यागदीक्षां करिष्यति ॥८३॥ स दक्षः स्वविनाशाय शिवनिंदां करिष्यति ॥ तत्सहायाः सुराः सर्वे करि
ष्यंत्यनुमोदनं ॥८४॥ मुनयोपि करिष्यंति तथा तदनुमोदनं ॥ ततस्तेषां विनाशोपि भविष्यति न संशयः ॥८५॥
ते सर्वे नरके ष्वेव पतिष्यंति न संशयः ॥ तैः पूरितमिदं भावि सर्वं नरकमंदिरं ॥८६॥ स्वल्पैर्दिनैश्च तद्भाविते ना
विच्छिन्नयातना ॥ तैः प्राप्य निर्गमस्तेषां नरकान्न भविष्यति ॥८७॥ ततो नरकवासेन दुःखिता स्थ ते सदा ॥ भवि
ष्यंति ततस्तेषां न कोप्यत्रास्ति मोचकः ॥८८॥ हा महेश्वरनिंदायाः फलमेवमभूदिति ॥ आक्रोशनानि कुर्वे
वस्यास्यंति नरकालये ॥८९॥ शिवनिंदां भ्रमेणापि यः करिष्यति तं नरं ॥ पातयध्वं प्रयत्नेन कुंभीपाके विशेषतः ॥९०॥

इंद्रो वास्तु महेंद्रो वा विष्णुरस्तु प्रजापतिः ॥ शिवनिंदानुरक्तश्चेत्पातयध्वं सुरौरवे ॥ ११ ॥ रौरवान्निर्गमस्तेषां कदा पि न भविष्यति ॥ शिवनिंदापरं तेषां रौरवावास साधनं ॥ १२ ॥ रौरवान्निर्गमस्तेषां कल्पांतेपि न सर्वथा ॥ महारौरव सृष्टिश्च कृता पातयितुं सदा ॥ १३ ॥ शिवनिंदाविषज्वाला समाकीर्णाः सुरा अपि ॥ पतिष्यं त्वत्रैव सहसा महारौरव मंडले ॥ १४ ॥ तदानृत्यं प्रकुर्वंतो भवं तस्मान्सुरानपि ॥ पातयध्वं प्रयत्नेन कुंभीपाके विशेषतः ॥ १५ ॥ कुंभीपाको विना दूरे तन्निंदा तन्मूर्तिस्तथा ॥ तेषामागमनं चात्र सर्वथा न विलंबितं ॥ १६ ॥ लोके तदनुरक्तानां अन्येषां मपि सर्वथा ॥ भवि ष्यत्येव नरके यातना दुःसहा परं ॥ १७ ॥ एतानि तावद सकृच्छिव निंदकानां वासाय दुःख निलयानि विनिर्मितानि ॥ स्थानानि नूतन मिति निश्चितमेव दूताः तावत्कथं चिदमयः समयोपि नेयः ॥ १८ ॥ अस्माकं गिरिराजराजतनया- कांताघ्रिपंकेरूह ध्यानानंद समुद्र मुद्रित मनोव्यापार सारात्मना ॥ कल्पांतेपि न दुःखमित्यनुदिनं तेषां बुधि र्वर्धते तस्मात्कोपि सुधाकरः शिवकथानंदात्मको जायतां ॥ १९ ॥ ॥ इति श्री शिवरहस्ये हराख्ये तृतीयांशे गौतममुनि संवादे नाम अष्टत्रिंशोध्यायः ॥ ३८ ॥ ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ ॥ गौतम उवाच ॥ ॥ एवमुक्तं मुनिवचः श्रुत्वा गौरी विनिर्मिता ॥ नारी कलशयोनिं तं प्राह धर्मार्थकोविदं ॥ १ ॥ शिवनिंदाकृतायेन तस्यो-

क्तायातनात्वया ॥ तथा तदनुरक्तानां मुक्ता सा मुक्तिवर्जिता ॥ २ ॥ दैवादपि श्रुता येन सा निंदा पुण्यनाशिनी ॥ सा दुःखहेतुर्भूलेति प्रतीकारोत्र कः श्रुतः ॥ ३ ॥ अश्रुतेपि प्रतीकारे कल्पनीयः कथंचन ॥ तत्पातकानुरोधेन न युक्ता तदकल्पना ॥ ४ ॥ तद्वान्त्रिसत्रन्यायेन फलं कल्प्यमसंशयं ॥ अन्यथा तत्र तस्यापि न स्यादेव हि कल्पना ॥ ५ ॥ श्रुता सा शिवनिंदा मे लग्नाशरवदात्मनि ॥ अतो गात्रपरित्यागः कल्पनीयः प्रयत्नतः ॥ ६ ॥ वरमेव सुरापानं वरं गोमांसभक्षणं ॥ न वरं शिवनिंदायाः श्रवणं पापकारणं ॥ ७ ॥ वरं मद्यपसंसर्गो स्वर्णस्तेयः परं वरं ॥ न वरं शिवनिंदायाः श्रवणं पापकारणं ॥ गुरुदारामिगमनं केवलं वरमुच्यते ॥ न वरं शिव० ॥ ९ ॥ वरं ब्राह्मणसंघातशिरश्छेदः कुलक्षयः ॥ न वरं शिव० ॥ १० ॥ वरं राजकुलच्छेदो राजस्त्रीसेवनं वरं ॥ न वरं शिव० ॥ ११ ॥ वरं यवनसंसर्गो यवनस्त्रीनिषेवणं ॥ न वरं शिव० ॥ १२ ॥ वरं मस्वकुलच्छेदो वरं गोकुलनाशनं ॥ न वरं शिव० ॥ १३ ॥ वरं ब्राह्मणवित्तानां हरणं मरणं वरं ॥ न वरं शिव० ॥ १४ ॥ वरं पुल्कसजन्मापि पुल्कसस्त्रीनिषेवणं ॥ न वरं शिव० ॥ १५ ॥ वरं चंडालजन्मापि चंडालस्त्रीनिषेवणं ॥ न वरं शिव० ॥ १६ ॥ वरं रासभजन्मापि रासभस्त्रीनिषेवणं ॥ न वरं शिव० ॥ १७ ॥ वरं सूकरजन्मापि सुकरीसंगमोपि वा ॥ न वरं शिवनिं० ॥ १८ ॥ वरं शुनकजन्मापि शुनीयोनिनिषेवणं ॥ न वरं शिवनिंदा० ॥ १९ ॥ वरं मलजलावासे रेतःपानं वरं परं ॥ न वरं शिवनिं० ॥ २० ॥

हरा० तृ० अ० ३९

वरमाले शिरश्छेदो प्यंततो दुःख साधनं ॥ नवरं शिव निंदायाः श्रु० ॥२१॥ इत्युक्त्वा सा जहौ देहं महादेवं मुहुर्मुहुः ॥ स्मृत्वा नत्वा योगमाया महामाया विनिर्मिता ॥२२॥ ततस्तान्तारामालोक्य महारुद्रो विमन्युना ॥ ससर्ज वीरभद्राख्यं महा बलसमन्वितं ॥२३॥ वीरभद्रः समुत्पन्नः कोटि सूर्य समप्रभः ॥ अनंत बाहुचरणग्रीवानेत्र विराजितः ॥२४॥ अनंत क्रूरशस्त्राग्निकरमंडलमंडितः ॥ अनंत योजनायामतनुकांति विराजितः ॥२५॥ तंतादृशं विलोक्याशु घनगंभीरया गिरा ॥ क्रोधेनाह महारुद्रो वीरभद्रं विचक्षणः ॥ गच्छ गच्छ प्रयत्नेन दक्षं संहर संहर ॥ नारायणादिकान्हत्वा पुनरायाहि सत्वरं ॥२७॥ इत्याकर्ण्य वचः शंभोः प्रणिपत्य पुनः पुनः ॥ तदाज्ञां शिरसा धृत्वा ययौ नत्वा शिवामपि ॥ ॥२८॥ तमायांतं समालोक्य दूराद्दक्षादयः सुराः ॥ सकंपाः शुष्ककंठाश्च भयाशनि समाहताः ॥२९॥ किमद्भुतमिदं जातं प्रलयानलमंडले ॥ अनेन जगतां नाशो भविष्यत्यद्य सर्वथा ॥३०॥ एतादृशं पुरा क्वापि न दृष्टं न भविष्यति ॥ तद्देहतेजसायांतं तेजोमंडलमद्भुतं ॥३१॥ अनेककालकूटाग्निकूटमंडल सन्निभं ॥ तज्जटाघात मात्रेण नक्षत्राणि पतंत्यपि ॥३२॥ सूर्यचंद्रप्रभालीना खद्योत तनु संनिभा ॥ तत्पादघात धरणी विदीर्णा सागरा प्लुता ॥३३॥ महाप्रलयकालोयं अधुना समुपागतः ॥ अतः परं जीविताशा विनाशमभियास्यति ॥३४॥ ऋषीणामपि-

शिवमह॰३
९६६

यः शापो वृत्तः शंकरनिंदया॥ स एवायं किमायाति वन्हिरूपेण सत्वरं॥३५॥ रेरे दक्ष दुराचार किमिदं पातकं कृतं॥ श्रीमहा- देवनिंदाया सा विनाशाय जायते॥३६॥ श्रीमहादेवनिंदाया: प्रयत्नः कुलनाशकः॥ आहत्य निंदा सा तावन्महाशनि कुलं परं॥३७॥ न महाशनिपीडापि प्रवेशो गिरिगव्हरे॥ शिवनिंदाशनिः क्वापि नाशे वान्यरिमुंचति॥३८॥ यदि पा-ताललोकेपि प्रयाति शिवनिंदकः॥ तत्रापि तस्य नाशः स्यात्तन्निंदा विषमंडलैः॥३९॥ एवं तेष्वनुतापेन पीडितेषु सुरेष्व- पि॥ पुनरुत्पातसंघातः सम भूद्भय सूचकः॥४०॥ तत्र समागतः क्रूरः वीरभद्रो त्रिलोचनः॥ तन्नेत्र ज्वालया द- ग्धा यागशाला मनोहरा॥४१॥ तन्निश्वासैः समुद्भूता गणाः संख्या विवर्जिताः॥ गणैः सह महाभवद्युद्धं सुराणामपि दारुणं॥४२॥ ब्रह्मास्त्र मंडलो पन्नो ज्वालाराशिस्ततः परं॥ गणशस्त्रानले नैव शांतः खद्योत संनिभः॥४३॥ नारा- यणास्त्र ज्वाला मंडले नापि केनचित्॥ ज्वालामाला समुत्पन्ना सा गणास्त्रे निर्वारिता॥४४॥ ततो विष्णुः समा- दाय गदां कौमोदकीमपि॥ युद्धाया म्यागतः सोपि गणशस्त्रै निर्वारितः॥४५॥ पश्चाद्गरुडमारुह्य शार्ङ्गमादाय सत्वरं॥ युद्धाया भ्यागतश्चक्री तं दृष्ट्वा विस्मयं गतः॥४६॥ गरुडस्यः सवेगेन तत्पक्षोत्थानिलेचन॥ चकंपे धरणी सर्वा किमेतदिति विव्हला॥४७॥ तं दृष्ट्वा वीरभद्रोपि क्रुद्धः प्राहातिभीषणः॥ दुरात्मन्ने हि दुःशील विनाशस्ते समागतः॥

अ॰३९

मय्यप्यत्रागते शौर्यं त्वया किंवा प्रदर्शितं ॥ कालकूटस्य निकटे वृश्चिकः किं करिष्यति ॥ ४९ ॥ कोटिशो निहताः पूर्वं मया
नारायणादयः ॥ निरयं ते गताः सर्वे श्रीमहादेवनिंदया ॥ ५० ॥ धिगयं शलभाकारो गरुडो पतिवाधुना ॥ शार्ङ्गं ज्वलतु ते
शीघ्रं त्रिणकल्पेन तेन किं ॥ ५१ ॥ इत्युक्तं तद्वचः श्रुत्वा सोपि नारायणस्ततः ॥ गरुडेन सहागत्य युद्धं कर्तुं समारभे ॥ ५२ ॥
ततः पाशेन तं बध्वा पातवामास भूतले ॥ छित्वा पाशं ततो विष्णुर्नभोमंडलमाश्रितः ॥ तत्र गत्वा शंखनादैः पूरयामास दिक्
कुलं ॥ शार्ङ्गध्वनिसमाक्रांतैः भीषयामास भूतलं ॥ ५४ ॥ ततः क्रूरनखाग्रेण छित्वा गरुडवाहनं ॥ पातयामास भूपृ
ष्ठे गरुडेन सह क्षणात् ॥ ५५ ॥ ततः परं तु तद्रूपं परित्यज्याति भीषणं ॥ वाराहं रूपमासाद्य क्षोभयामास तान् गणान् ॥
॥ ५६ ॥ महापर्वतसंकाशो वाराहवपुषा हरिः ॥ निश्वासान्मुमुचे तेपि प्रलयानलसंनिभान् ॥ तैः सकंपाः समभवन्
गणाः संख्याविवर्जिताः ॥ तुंडेन पातयामास पर्वताग्राणि मूर्धनि ॥ ५८ ॥ पुच्छाग्रेणातिदीर्घेण समुद्रान्स सलील
या ॥ शोषयामास तन्नीरैः पावयामास भूतलं ॥ ५९ ॥ पुनस्व संनिभानेव वराहानेव कोटिशः ॥ लोकालोकाचल
निभान् ससर्ज सतमोगुणः ॥ ६० ॥ नभोमंडलमावृत्य स्थितं तैर्मुनिपुंगवाः ॥ तैर्वराहैर्जगद्व्याप्तं तुंडमंडलमंडितैः ॥ ६१ ॥
ततो दृष्ट्वा गणाः सर्वे तान्वराहान्दुरासदान् ॥ सर्वे भूरिभयग्रस्ताः व्याकुलाश्चिंतयातदा ॥ ६२ ॥ हा किमेवमभूदेतत्वरा-

ह व्याकुला मही॥ नीरंध्रासालुतैरेव शराणां प्रसरोपि न॥६३॥ अशक्यं गमनं चासीत् गगनेपि न भूतले॥ अवकाशक्षणं -हश॰ल॰
वात्र पादप्रक्षेपणाय वा॥६४॥ वाराह रोम शस्त्राणि भित्वापि घनमंडलं॥ प्रयांति कुत्र गंतव्य मिति चिंता समाकुलाः॥ ततो
वराहरूपेण भीषणे नातिदारुणं॥ वचो नारायणः प्राह रणकंडूपरायणः॥६६॥ आगतोस्मि महावीरो रावणो निहतो म
या॥ युद्धे भूमंडले को वा मम प्रतिभटो भवेत्॥६७॥ गणानामवकाशोत्र न युद्धे स्यात् मप्यतः॥ गणनीयाश्च ते तावन्म
म नारायणस्य न॥६८॥ चक्रेणानेन घोरेण क्षणेन रणमंडलं॥ मंडितं गणसंघेन पतितेन भविष्यति॥६९॥ यज्ञशाला
प्रदाहेन गर्वः किम भवत्तव॥ यज्ञशाला सहस्राणि कर्त्तव्यानि पुनर्मया॥७०॥ मयायस्य सहायार्थं उद्यतं तस्य केन वा॥
भयं भावि गणैरेतैः किं वा कार्यं भविष्यति॥७१॥ किमेतैरपि मे युद्धं युक्तमुक्तिसहं च न॥ अविद्धाः क्षणार्धेन शक्ता
स्ते गमनेपि न॥७२॥ इति प्रलप्य बहुधा दूरीकृत्य गणानपि॥ स वीरभद्राभिमुखो ययौ नारायणः स्वयं॥७३॥ स गत्वा
तत्र तं दृष्ट्वा वीरभद्रं भयानकं॥ तत्रापि स्वबलं प्राह महामोहसमन्वितः॥७४॥ तमह वीरभद्रोपि दृष्ट्वा क्रूरं भया
नकं॥ वराहरूपं तं रोषान्नारायणमनामयः॥७५॥ रेरे दुष्ट दुराचार किमुन्मत्तोसि दुर्भग॥ प्रलयानलकूटेन किं
कीटः समतामियात्॥७६॥ मया सह न युद्धार्हो गर्हितो गर्वमुत्सृज॥ तव गर्वः किमेतस्मिन्वीरभद्रे नुवर्त्तते॥७७॥

इत्युक्तं वीरभद्रं तं दृष्ट्वा क्रोधसमन्वितः॥ तत्क्रोधानलसंदग्धतुंडः प्राह पुनर्हरिः॥७८॥ मम रूपाण्यपाराणि तत्संहा
रे बलं क्व ते॥ तैरेवाच्छादितं रूपं तव तावद्भविष्यति॥ इति स्वविग्रहैः सर्वैः शवृत्तः सत्वरं हरिः॥ युद्धायाभिमुखो जा
तो दग्धतुंडोपि मोहतः॥८०॥ ततः स वीरभद्रस्य कोपलेशेन केवलं॥ मूर्छितः स बलैः साकमनेकैस्तैर्भयानकैः॥
॥८१॥ ततस्त्यक्त्वासतद्रूपं नृसिंहवपुषा हरिः॥ जगर्ज भूतलं सर्वं आक्रम्य स्वस्वविग्रहैः॥८२॥ तैर्विग्रहैर्जग
द्व्याप्तं महद्धासैश्च दुःसहैः॥ तैस्त्रस्तास्ते गणाः सर्वे तान्दृष्ट्वा भयविह्वलाः॥८३॥ ततस्तान्पर्वताकारान्नृसिं
१६२ हान्नतिभीषणान्॥ विलोक्य शरणं प्रापुः वीरभद्रं कृपानिधिं॥८४॥ ॥गणा ऊचुः॥ ॥स्वामिन् श्रीवी
रभद्राद्य दृष्टमत्यद्भुतं पुनः॥ वाराहकूटनाशेपि न स्वस्य मभवन्मनः॥८५॥ नृसिंहनेत्रज्वालाभिर्जगद्व्याप्तं
दवानलैः॥ यथा व्याप्तो गिरिस्तस्य नाधुनास्ति निवारकं॥८६॥ अतः परं तु ते नैव नृसिंहेन दुरात्मना॥ अस्मा
कमपि सर्वेषां भयं तु समभूत्खलु॥८७॥ एकैककस्य नृसिंहस्य नखवज्रायुधोपमाः॥ तैस्तावदधुना भीतिः
महती समुपस्थिता॥८८॥ एवं तेषु स्थितेष्वेवं वदत्स्वपि गणेष्वपि॥ आजगाम नृसिंहोपि नृसिंहगणसंयुतः॥८९॥
आगत्यैं याहि युद्धाय मया सह महोन्नत॥ किं विलंबेन ते कृत्यं वीरकृत्यमिदं तु न॥९०॥ ममापि शक्तिं द्रष्टव्या युद्धाया-

४ पृ.९ कृते त्रिपुण्ड्र रुद्राक्षाः कृते शंकर पूजनं॥

भिमुखोस्म्यहं॥ममप्रतिभटोलोके कोपिकोपाश्रयो विना॥९१॥ अनारायणमस्त्वद्य सनारायणमेववा॥ भूमंडल-हरा०तु
मितिप्राह नृसिंहो भीमविक्रमः॥९२॥ ततः सवीर भद्रोपि नृसिंहं प्राह भीषणं॥ अघोक्ति रध सत्यास्तु सत्यत्या
गोनमे मतः॥९३॥ इति श्रीवीर भद्रोत्क्या हतो नारायणस्तदा॥ नृसिंह विग्रहास्तस्य सर्वे तत्र लयं गताः॥९४॥
जामदग्निस्वरूपेण पुनरप्यागतो हरिः॥ अत्युग्र पर्वताकार शरीरै रमितैर्युतः॥९५॥ तैः शरीरै र्जगव्द्याप्तं तानिष्टा
गणास्तदा॥ भीताः कंपमनुप्राप्य समुद्युक्ताः पलायने॥९६॥ अपारतत्कुठारोरुधारा ज्वालासमाकुलाः॥ इलास
मभवत्सापि विदीर्णा पादघाततः॥९७॥ ततः समभवद्युद्धं गणानां रोमहर्षणं॥ रणेन तेन महसा व्याकुला एवते ग
णाः॥९८॥ कुठारधाराज्वाला भिर्व्याप्तं नक्षत्रमंडलं॥ तेन तावद भूक्षोलिः महती सादुरासदा॥९९॥ ततस्तान्क्षुभि
तान्दृष्ट्वा गणानाणपतिः स्वयं॥ विरभद्रो पितं दृष्ट्वा प्राह गंभीरया गिरा॥२००॥ ताव द्बलं तव भवेत् यावद्भक्ति स्त्रि
यंबके॥ तस्यां गतायां ते शक्तिः क्षणेनैव विनश्यति॥१॥ क्व ते रुद्र गणैः सांकरणमप्यति दारुणं॥२॥ त्यज त्रिपुंड्रं
यदिते युद्ध कांक्षा मया सह॥ त्यज लिंगार्चनं शीघ्रं त्यज रुद्राक्ष मालिकां॥३॥ लिंगार्चन बलेनैव जातं युद्ध बलं तव॥
अन्यथातव शक्तिः युद्धायान्यत्र वाहरे॥४॥ शिव चिन्ह मिदं नोचे त्तव नाशः क्षणेन किं॥ तस्मात्त लिंग मालोक्य सा—

मर्थ्यं मम कुण्ठितं ॥५॥ ब्रह्मांडमंडले कोवा रणे मां जेतुमिच्छति ॥ कति वा न हता: पूर्वं मया नारायणादय: ॥६॥ शिवपू
जाबलं त्यक्त्वा बलमन्यत्प्रदर्शय ॥ यदि ते रणकंडूतिर्न स्वभावबलं च ते ॥७॥ प्रबलं श्रीमहारुद्रशिवलिंगार्चनंब
लं ॥ तद्विहीनेन बलं लोके दृष्टं वा श्रुतमेव वा ॥८॥ लिंगार्चको दुर्लभोपि प्रबल: प्रबलस्तत: ॥ तेन युद्धेन बुद्धिर्मे
यत: सिद्धिर्न ते न मे ॥९॥ यदि गर्वस्तव भवेत्कंडूतिरपि ते रणे ॥ तदा लिंगं विहायात्र युद्धायायाहि सत्वरं ॥१०॥
इति तद्वच: श्रुत्वा गर्वपर्वतसंश्रय: ॥ स्वाभाविकं मम बलं न मे लिंगेन तद्बलं ॥११॥ इत्युक्त्वा लिंगमुत्सृज्य
त्यक्त्वा रुद्राक्षमालिकां ॥ त्रिपुंड्रधारणं त्यक्त्वा युद्धाय समुपस्थित: ॥१२॥ तत: श्रीवीरभद्र
स्तं शिवलिंगविवर्जितं ॥ चकार भस्मसादाशु जामदग्निं क्षणेन तु ॥१३॥ तत: समागतस्तत्र जमदग्निर्महामुनि: ॥
आगत्य प्रणिपत्याह वीरभद्रं महागणं ॥१४॥ यस्याभिमानो निर्माणो गणै: संहरणाय स: ॥ नाशमेष्यति तस्यापि
बलं संभावितं कथं ॥१५॥ शिवलिंगं परित्यक्तं तेन तावद्दुरात्मना ॥ तत्परित्यागतस्तस्य बलहानिरभूत्खलु ॥१६॥
रूपं बलं च भाग्यं च लभ्यते शिवपूजया ॥ तत्त्यागे दुर्बल: सद्यो दुर्भाग्योपि भविष्यति ॥१७॥ लिंगार्चनबलेनैव
सर्वां सिद्धिमवाप्नुयात् ॥ तदभावे बलं कस्य लोके संभावितं भवेत् ॥१८॥ ये ये लिंगार्चनं त्यक्त्वा व्यर्थं गर्वसमा—

श्रिताः ॥ ते सर्वे विलयं यांतु वीर भद्रास्त्र धारया ॥ १९ ॥ श्रीवीर भद्र प्रतिमः कोवा लोके भविष्यति ॥ कस्तेन सहयुद्धं-वा कर्तुमप्युधतो भवेत् ॥ २० ॥ अशांभवाः सुराः सर्वे हंतव्याः प्रीति पूर्वकं ॥ तेषां संहरणे तावत्प्रयत्नोप्यनपेक्षितः ॥ ॥ २१ ॥ शिव निंदाग्निना दग्धाः पूर्व मेव सुरास्ततः ॥ निमित्तमात्रं एवात्र वीर भद्र भवान्परं ॥ २२ ॥ ततो वामन रूपेण सविष्णुः समुपागतः ॥ ययाचे वीर भद्रं तं युद्ध मेव प्रयत्नतः ॥ २३ ॥ ततः सव वृधे विष्णुः व्याप्य नक्षत्र मंडलं ॥ ततस्तस्य शिरश्छिन्नं वीर भद्रेण लीलया ॥ २४ ॥ ततो राम स्वरूपेण नारायण मुपागतं ॥ दृष्ट्वा प्राह वीरो वीर भद्र भवान्परं ॥ २५ ॥ शूलं तृषा समाक्रांतं तवरके नकेवलं ॥ तूर्यं भविष्यति प्रायः तस्यैतदेव हि ॥ २६ ॥ इत्युक्तं तद्वचः श्रुत्वा सवालि शवदाहतं ॥ अज्ञात्वा वीर भद्र स्य बलं प्रबल मुज्वलं ॥ २७ ॥ खरक्षणेन निहितो दूषणो प्यति भीषणः ॥ ताटका निहता पूर्वं कूट कोटि निभा क्षणात् ॥ २८ ॥ हता शूर्पणखा दुष्टा मारीचो निहितो मया ॥ सप्तता लवनं छिन्न मक्षेधं वक्र मुन्नतं ॥ २९ ॥ अंगुष्ठेन पुरा क्षिप्तो दुंदुभिः पर्वताकृतिः ॥ बाली विनिहतः पूर्वं सेतु बद्धो महांबुधौ ॥ ३० ॥ मदीयेनैव कोनापि लंका दग्धा दुरासदा ॥ अक्षोपि निहतस्तेन कुमारो रावणस्य सः ॥ ३१ ॥ इंद्रजिन्निर्जितस्तेन लंकायां तोरणं महत् ॥ छिन्नं तेनैव वीरेण तत्तुल्याः कोटि शोभन ॥ रावणो निहतः पूर्वं सर्वलोके-
-क रावण ॥

कुंभकर्णादयः सर्वे निहता एव राक्षसाः ॥३३॥ रणकालेपि संप्राप्ते कालाग्निः सोहमेव हि ॥ मद्बाहुबलमालोक्य प्रयांति रिपवः परं ॥३४॥ मया सह न ते युद्धे जयवार्त्तापि दूरतः ॥ धिग्धिङ्नारायणं त्वं मां वीरभद्र यथार्थतः ॥३५॥ युद्धकालेपि संप्राप्ते यमोपि स्यात्सविह्वलः ॥ शक्तिश्चेत्तव युद्धार्थं आयाहि त्वरयाधुना ॥३६॥ इति प्रलपमानं तं वीरभद्रोपि सस्मितः ॥ ललाटवीतिहोत्राय कामं रामं ददौ द्विजाः ॥३७॥ ततो नेत्राग्निना रामो दग्धबाहुरिलातले ॥ पपात दग्धमूर्धापि दग्धवक्षःस्थलः क्षणात् ॥३८॥ ततश्च दुर्मुखो दृष्ट्वा पतितं भूतले मृतं ॥३९॥ प्राह अश्रुधारया क्रांतो रामं दृष्ट्वा मृतं पुनः ॥ नारायणस्वरूपस्त्वं भयव्याकुलितो मुहुः ॥४०॥ हा मृतोसि क्षणार्धेन शौर्यं शौर्यं क्व ते गतं ॥

१६८ श्रुतायाः शिवनिंदायाः फलमेव म भूत्खलु ॥४१॥ किंच गर्वो कृयो यास्ते वीरभद्रेश सन्निधौ ॥ तास्तदग्निस्वरूपेण दहाय समुपस्थिताः ॥४२॥ वीरभद्रेश्वरः सोयं महारुद्रगणप्रियः ॥ तेन साकं गर्ववार्त्ता कृता तत्फलमीदृशं ॥४३॥ रेरे दक्ष दुराचार किमित्यध्वरदीक्षितः ॥ भवत्सहायकरणात् मृतो नारायणोप्ययं ॥४४॥ गर्वस्य परिपाकोपि नाशाय मम भूत्तव ॥ अयं क्षणेन निहितः त्वदध्वरसमागमात् ॥४५॥ दुराचारेण तरसा शिवनिंदा कृता त्वया ॥ तया यागो विनष्टोयं तव नाशो भविष्यति ॥४६॥ गणनाथ कुत्रास्ति मृतेनारायणोधुना ॥ सर्वेषामपि संप्राप्तं मरणं—

नात्र संशयः॥४७॥ अतो दुर्जन संसर्गः परित्याज्यो मनीषिभिः॥ यस्मादनिष्टमेतावत् अधुना समुपस्थितं॥४८॥ अनिष्टं बुद्धिपाताय जातो दुर्जन संगमः॥ अहो मह दिदं कष्टं अशांकर समागमः॥४९॥ अनिष्टदौर्भाग्य परंपराणां अभाग्य दुःखाब्धि परंपराणां॥ तत्कारणं स्याद्यदशांकरेण सहाभिलापासन भोजनादि॥५०॥ अशांकरेण प्रणप्रणयादिस्यात्तदापरं दुःखपरंपरा स्यात्॥ साकेनवाना शमुपेतिभस्याः प्रवृद्धिरेवेति वदंति वृद्धाः॥५१॥ अशांभव समागमे यदि सुखं क्षणं बालदा विषे पिगिलिते सुखं किमिति जीवनाशो पिन॥ अशांकर पुरः सरादपि वदंति नीचं जनाः॥ सवृश्चिककरतो द्भवः शुनकरा सभो त्पादितः॥५२॥ अशांकर मुखं ज्वलत्वनलराशि मध्ये पतत्व मेध्य कुहरे पततु नुदिनं नादृीक्षणं॥ कदापि मम जायतामिति वदंति धन्याः परंत एव सुख राशयो प्यमित पुण्य पूर्णार्णवाः॥५३॥ एतादृशापत्कालोयं अशांकर समागमात्॥ मेरुवत्पतितः सोयं मृतो नारायणोधुना॥५४॥ नरकं सादयोदैत्याः यस्यौर्यश्रवणादपि॥ पलाय्य यांति तरसा सोयं नारायणो मृतः॥५५॥ यस्य शंखध्वनिश्रुत्वा यांति दैत्यादिगंतरं॥ सोयं नारायणस्तेन वीरभद्रेण संहतः॥५६॥ गोवर्धनाचलो येन कराग्रेण धृतः पुरा॥ सोयं नारा०॥५७॥ रावणस्ताडितो येन सर्व लोकैक रावणः॥ सोयं नारा०॥५८॥ हिरण्याक्षो हतो येन हिरण्यकशिपुस्तथा॥ सोयं नारा०॥५९॥

हरा०तृ०
अ०३९

एवं दुःखेन बहुधा प्रलपंतं चतुर्मुखं ॥ बध्वा पाशेन सहसा वीरेशः प्राह सस्मितः ॥६०॥ दुष्टस्त्वष्टातिनष्टोपि भ्रष्टोपि सं
यतः परा ॥ शिवनिंदा विषं पीत्वा दक्षेण सह संयुतः ॥६१॥ रेरे दुर्भग दुष्टात्मन् शिपिविष्टोपि विस्मृतः ॥ अष्टमूर्तिः स्व
कष्टानां सर्वथा विदारकः ॥६२॥ तव शिक्षा तथा कार्या दक्षः किं तव मोचकः ॥ सोपि को वा वराकस्ते मोचकत्वेन निश्चि
तः ॥६३॥ तवापि किं भ्रमो वृत्तः दक्षः शंकरनिंदकः ॥ येन मित्रं मम भूच्छत्रुः मित्रकार्यकरः कथं ॥६४॥ इत्युक्त्वा तच्छिरश्छे
दं चकार क्षणमात्रतः ॥ ततो हाहाकृतं सर्वं सुरसैन्यं पराहतं ॥६५॥ ततो दक्षो विहतः तदन्ये निहतास्तथा ॥ अशोक

165

ाश्च मुनयः शिवनिंदाग्निसंहताः ॥६६॥ उत्पाताश्च ततः शांताः शांता द्विजनितस्वनाः ॥ प्रसन्नाश्च दिशः सर्वाः
गंधर्वा ललितं जगुः ॥६७॥ देवदुंदुभयो नेदुः पुष्पवृष्टिरभूत्तदा ॥ ततो ययौ महादेवं वीरभद्रो महाबलः ॥ ततः प्र
णम्य शिरसा वृत्तांतं च निवेदयत् ॥ कृतांजलिपुटो भूत्वा कृतकार्यः स्थितः पुरः ॥ ततः शिवाय तत्सर्वं विनिवेद्य स
दाशिवः ॥ तमालिंग्य मुदं प्राप परमानंदसागरः ॥७०॥ लोके शंकरनिंदकस्य कुजनिः सा दारुणा यातना दौर्भा
ग्यं सकलार्त्तिरोगनिवहः क्लेशापकीर्त्यादयः ॥ आपत्पापपरंपराप्यनुदिनं संभाविता सा ततः संतः संति शि
वार्चनैकनिरतास्ते दुर्लभाः शांभवाः ॥७१॥ रेरे शशिरहर सादर निर्विकारहारोपचारकरण प्रवण प्रणामाः ॥

शिवरह० ३ तुभ्यं न लभ्यमुभयोरपि सन्निधानं यन्मन्मनः स्मरहर स्मरण प्रवीणं ॥८७२॥ ॥इति श्री शिवरहस्ये हराख्ये तृ- हरा० तृ०
९७१ तीयांशे गौतममुनि संवादो नाम एकोनचत्वारिंशोध्यायः ॥३९॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥नारद- अ० ३९
उवाच॥ ॥इति नारायणादीनां लयं दक्षाध्वरस्य च ॥ श्रुत्वा विस्मयमापन्नाः प्राहुर्गौतममास्तिकाः ॥१॥ सनत्कु-
मारः सनको वसिष्ठश्च सनंदनः ॥ बालखिल्यादिभिः साकं प्राहुः गौतममास्तिकं ॥२॥ नारायणाद्यः सर्वे ह्यधिकार-
परायणाः ॥ तेषां न रक्षणं वृत्तं मरणावसरे सति ॥३॥ वृत्तमेव मरणं च सुराणां शूलपाणिकरुणा हविरेण [विरहेण] ॥ रक्षणं च तदधी-
नमतस्याज्जन्मतानि सकलानि यतस्स्युः ॥४॥ शिवनिंदानले नैव तेषां नाशे पुनः कुतः ॥ वीरभद्रः समुत्पन्नः तस्य
कृत्यं च किं वद ॥५॥ किं चाधिकारे पूर्वस्मिन् नियुक्तः कः पुनस्ततः ॥ तत्सर्वं वद यत्नेन विचार्यैव पुनः पुनः ॥६॥
॥गौतम उवाच॥ ॥ शिवनिंदानलज्वालाकुलसंकुलिताः सुराः ॥ ततः परं वीरभद्रो निमित्तमपि तल्लये ॥७॥
उत्पत्तिस्थितिसंहारान्करोति च महेश्वरः ॥ निमित्तमात्रं संपाद्य किंचित्किंचित्क्वचित्क्वचित् ॥८॥ ब्रह्मांडमं-
डलाकांडप्रलये समुपस्थिते ॥ शिवनिंदादिकं किंचिन्निमित्तमपि मन्महे ॥९॥ उदुंबरफलांतरस्य गतजंतुसंता-
नवत् ॥ प्रयाति लयमिंदिरासहित एव नारायणः ॥१०॥ जरामरणजन्मनामनुदिनं प्रसंगो भवेत् ॥ अनंगहरिनिंद-

यापरमिति प्रमामेङ्गिजाः॥ उदुंबरतरूर्यदा स्वकुलेर मूलव्याकुलो॥ फलेऽपि सदा सकृत्फल कुल क्षये तद्गता:॥११॥ प्रयां तिमशकाः परं मरणमेव तद्वत्सुराः॥ शिवापति विनिंदया खलु लयं प्रयांत्यन्वहं॥ कः शांकर द्वेष विषाणि पीत्वा पुनः पुनः मृत्युवशं नयाति॥ नजातु जानाति विवेकहीनो दीनो महादेव महाप्रभावं॥१२॥ मत्वा किलान्यामरतुल्यमेव मारो महादेव महो प्रमोहैः॥ पतंगवत्प्राप स चित्रभानुज्वालाकुलो व्याकुल स्वनाशं॥१३॥ तस्मान्महेश निंदाग्नौ सर्वे नारायणादयः॥ पतितास्ते मृता स्तेषां शिवनिंदापरं विषं॥१४॥ ततः परं सत्यलोके वैकुंठे स्वर्गमंडले॥ स्वनिर्मितेरक्षणायस्या पयामासतान्गणान्॥१५॥ चिरकालं गणास्थित्वा तत्र तत्र यथाक्रमं॥ विषादेनैकदा सर्वे मिलिताः शिवमंदिरे॥१६॥ तदा स्वस्व विषादानां कृतान्योन्यं प्रकाशनं॥ जग्मुः कैलासनिलयं शिवध्यानपुरःसरं॥१७॥ ददृशुर्नंदिकेशं ते कैलासद्वारमंडपे॥ दृष्ट्वा ते विनयान्नत्वा कृतांजलि पुटा स्थिताः॥१८॥ तानुवाच स नंदीशः किमागतमिहेत्यपि॥ यत्र यत्र स्थितं पूर्वं तत्त्यागो नुचितः खलु॥१९॥ महेश्वरा ज्ञयायत्र स्थिति स्तत्रैव सादरं॥ उचितातत्परित्यागः सर्वथानुचितः खलु॥२०॥ ॥गणा ऊचुः॥ ॥ तप्तं तपः पुराघोरं तेन प्रीतः सदाशिवः॥ गणपत्यं ददौ तस्य फलं शंकरपूजनं॥२१॥ त्यक्त्वा शिवार्चनं पुण्यं स्थितिः कैलासमंदिरे॥ कस्स्यात्तु मिच्छति प्राज्ञो वैकुंठादिषु नूतनं॥

नतपस्तप्तमस्माभिः कर्त्तुं वैकुंठरक्षणं ॥ कोवा क्षीरं परित्यज्य कांजिकामभिवांछति ॥२३॥ वैकुंठाधिपतित्वमेत्य बहुधा पूर्वं स्थितं सादरं ॥ तत्यक्तं तदनंतरं शिवपदं प्राप्तं तपस्तत्कृतं ॥२४॥ तत्यक्त्वा पुनरेव तत्र न तथा वांछापि तुच्छे कथं ॥ प्रीतः स्वच्छमतुच्छमेत्य कुरुते वांछां स्वतुच्छे सुधीः ॥२५॥ वैकुंठमार्गोपि संकुचितोस्ति स स्वर्गमार्गोपि स सत्यलोकः ॥ नचास्मदिच्छाविषयः परंतु कैलासवासस्तपसा सलब्धः ॥२६॥ सुवर्णचीर्णोन्नतरत्नपीठे स्थित्वापि वांछां कुरुते विवेकी ॥ सगोक्षुरेप्यूषरनिष्ठुरेपि देशेपि देशे निजदेशवासी ॥२७॥ अलं किलालं खलु सत्यलोकोविलोकनेनापि शशांकमौलिः ॥ आराधितः किंतपसा तदर्थं व्यर्थं तदा जीवनमेव किं न ॥२८॥ दुग्धान्नाशनमेव यस्य सुखदं प्राप्तं च तत्किं सुधीः ॥ त्यक्त्वा गोक्षुरभक्षणाय यतते तद्वत्किलास्मत्प्रियः ॥२९॥ कैलासाचलवास एव सततं सर्वात्मना वांछितः ॥ तद्विघ्नः किमुपागतोयमधुना वैकुंठवासात्मकः ॥३०॥ अतिघोरतरं तपः कृतं खलु कैलासनिवाससाधनं ॥ तदिदं कथमंतरायतो विपरीताय फलाय केवलं ॥३१॥ वैकुंठाधिपतित्वमात्रमधुना किं वांछितं तत्फलं तद्यस्मात्प्रलये विनश्यति परं मध्येपि दोषान्वये ॥ तस्मात्तत्खलु तुच्छमित्यवधृतं वांतान्नवत्केवलं ॥ त्याज्यं त्याज्यमतः परं पुनरपि त्याज्यं ततोस्माद्दृशैः ॥३२॥ इति तद्गिरमाकर्ण्य नंदिकेशः प्रहृष्टधीः ॥ तानुवाच मुदायुक्तानकुर्वन्नेव मुहुर्मुहुः ॥
॥३३॥

॥नंदिकेश्वर उवाच॥ ॥भविष्यत्यल्पकालेन भवता मपि वांछितं॥ अधुना तु यथा स्थाने स्थातव्यं भक्तिपूर्वकं॥ ३४॥ उमाशिवाराधनसक्तचित्तो शिवो पितृपूजनमादरेण॥ गृण्हाति मध्यान्हगते सुसूर्ये निवेदनस्याव सरो पि नायं॥ ॥३५॥ ममापि कर्त्तव्यमुमासहायपादारविंदस्मरणं प्रसूनैः॥ लिंगं समभ्यर्च्य विशेषकालो मध्यान्हगे तिग्मक रेत्वयं हि॥३६॥ भवद्भिरधुना कथं गिरिशपूजनं त्यज्यते शिवार्चनपरायणाः खलु शिवं प्रयांत्यन्वहं॥ कृतं सद नुवेलमप्यमलकालकालार्चनं करोति सुखसंपदां पदमनल्पकालात्परं॥३७॥ अहो चिरंजीव तु चंद्रमौलि पादांबुजाराधनसक्तचित्तः॥ उपात्तवित्तः शिवपूजनार्थं शांतः सयोगी स किलाप्रमत्तः॥३८॥ विलंबेन सां बापराधोपि भावी सहेरंबतातो बिलंबासहिष्णुः॥ नचांबापि लंबोदरो लंबनेनाप्यपाकर्तुमिष्टं करोत्येव किंतु॥३९॥ यथेष्टो विहारो न कार्ये न कार्यः स्वकार्यातुरैः कार्य एवाबिलंबः॥ प्रभुप्रीतिरेव प्रभूतिं करोति प्रभू तिः प्रभोरेव भूता प्रभूता॥४०॥ इति तद्वचनं श्रुत्वा प्रणम्य च पुनः पुनः॥ स्वस्वस्थाने यथापूर्वं स्थिताः सर्वे पितृ गणाः॥४१॥ ततः परं महादेवः तीर्थे शाकारमास्थितः॥ तपसा पूतहृदयान् ददर्श मुनिपुंगवान्॥४२॥ ततो महेशो भव नाशनीं तां श्रुतिप्रसिद्धामितभूतिकोटिं॥ आश्रित्य धीरांतपसापि धीरान्ददर्श विप्रान्कलशः सकामान्॥४३॥

धर्ममूर्त्तिरिति ख्यातः तत्र कश्चिद् द्विजोत्तमः ॥ शिवाचाररतः शांतो जटिलो भूतिभूषितः ॥ ५५ ॥ तेन तत्र स्तपस्तप्तं क- हराःतृ

ल्पानामयुतं द्विजाः ॥ तथैव केचित्तत्तीरे शिवपूजापरायणाः ॥ ५५ ॥ भस्मोद्धूलितसर्वांगास्त्रिपुंड्रांकितमस्तकाः ॥

रुद्राक्षमालाबीतांगाः शिवलिंगार्चनप्रियाः ॥ ५६ ॥ निराहारा जलाहारा वाताहाराश्च केचन ॥ पर्णाहारास्तृणाहाराः

कणाहाराश्च केचन ॥ ५७ ॥ केचिद्ध्यात्वा महादेवं आनंदाश्रुसमाप्लुताः ॥ केचिन्नृत्यंति नंदंति प्रवदंति हसंति च ॥

॥ ५८ ॥ वल्कलान्येव वासांसि वासः वासः पर्णानि कस्यचित् ॥ केचिद्दिगंबरास्तत्र केचित्तत्र कगंबराः ॥ ५९ ॥ उरु

मात्रांबराः केचित्केचित्त रूवरांबराः ॥ अतिमात्रांबराः केचिद्रुद्राक्षाभरणांबराः ॥ ६० ॥ ते सर्वे लिंगपूजायां निरताः

शिवतत्पराः ॥ शिवनामजपोद्युक्ताः सदा शिवकथोत्सुकाः ॥ सांबं हृत्कमले ध्यात्वा कृत्वा मानसपूजनं ॥ प्रनृत्यं

तोपि गायंति शिवनामानि सादरं ॥ तान्दृष्ट्वा स महादेवो दूरादेव वृषध्वजः ॥ नंदिकेशमुवाचेदं वचनं प्रीतिपूर्वकं

॥ ६३ ॥ ॥ श्री सदाशिव उवाच ॥ ॥ नंदिकेश महाशैल पश्य पश्य शिवार्चकान् ॥ शिवलिंगार्चने तेषां विश्वा

सः खलु वर्धते ॥ ६४ ॥ लिंगपूजनमेतेषां सर्वेषां वृत्तमित्यतः ॥ तपसा सफलानूनं लिंगार्चनसमन्वयात् ॥ ६५ ॥ न

केवलेन तपसा केवलै रध्वरै रपि ॥ दानैर्वा केवलैः प्रीतिर्मम लिंगार्चनं विना ॥ ६६ ॥ तुंगालिंगार्चने प्रीतिर्यथा मम-

सदा तथा ॥

प्रीतिस्तु न भवत्येव वेदपारायणेऽपि ॥५७॥ तुलाकोटिप्रदानैर्वा प्रीतिर्मम न सर्वथा ॥ लिंगार्चनाद्यथा प्रीतिस्तथा प्रीतिर्न
केनचित् ॥५८॥ भोगकामोऽपि यः पूजां शिवलिंगे करिष्यति ॥ तस्मिन्नपि मम स्नेहः स्नेहपात्रं यतः स मे ॥५९॥ भोग
स्तावदभूतपूर्वविभवः संभावितः सर्वदा" लिंगाराधनतः स लिंगमहिमा ज्ञातो न केनाप्यतः ॥ लिंगाराधनतत्पराः सु
रपदं संप्राप्य तिष्ठंत्वमी ॥ कश्चिद्विष्णुरिहास्तु कश्चन विधिः कश्चिन्महेन्द्रोऽधुना ॥६०॥ केचिद्दिक्पतयो भवंतु ब
हवो देवा भवंत्वाश्वमी" तद्दाराः कमलादयोऽपि बहवस्ताव द्भवंतु प्रियाः ॥ नक्षत्राणि भवंतु केचन तथा केचित् ग्रहाः सवते
तत्रत्याः सुरसंसदि प्रियतमाः तिष्ठंतु केचित्तथा ॥६१॥ इत्युक्तः स महेशेन नंदिकेशस्तथा स्त्विति ॥ प्रेषितः स महेशे
न मुनिमंडलमागतः ॥ विलोक्य नंदिकेशं तं धर्मरूपं प्रणम्यते ॥ तुष्टुवुः पूजयित्वा तं सर्वेऽपि मुनिपुंगवाः ॥६२॥ तत्र धर्म
रतो नाम कश्चिदासीद्द्विजोत्तमः । तमाह तुभ्यं विष्णुत्वं दत्तमित्यभिनंदयन् ॥६४॥ एवं विधित्वमिंद्रत्वं चंद्रत्वादीन्य
पि स्वतः ॥ दत्वा तान्प्रेषयामास तं तं लोकं मनोहरं ॥६५॥ वैकुंठादिषु लोकेषु नंदिकेशप्रसादतः ॥ अधिकारं समा
साद्य स्थितास्ते मुनिपुंगवाः ॥६६॥ शिवलिंगार्चनफलं तया तेषाम भूद्द्विजाः ॥ ईप्सितार्थान्ददात्येव महेशो लिंग
पूजया ॥६७॥ ॥नारद उवाच ॥ ॥ इति पुण्यकथां श्रुत्वा सर्वपापप्रणाशिनीं ॥ हृष्टांतःकरणाः सर्वे प्राहुर्गौत-

१६८

ममादरात् ॥६८॥ अग्निवेशादयः सर्वे मुनयः शांभवोत्तमाः ॥ ब्राह्मणानां विशेषेण मुक्तिस्यात्कथमित्यपि ॥६९॥
॥ गौतम उवाच ॥ ॥ शांकराणां करतले मुक्तिरामलकोपमा ॥ वेदांते ष्वेव निर्णीता सा मुक्तिः सुलभा खलु ॥७०॥
यदि देवान्महादेवे भक्तिर्व्यभिचारिणी ॥ तदा तया मुक्ति कांता सह तिष्ठति सर्वदा ॥७१॥ साचेन्नूनातदा मुक्तिः तया
सह न तिष्ठति ॥ नीचेन सह संवासो महतां नोचितो यतः ॥७२॥ सापि भक्तिर्महादेवे बहु जन्मार्जितैः परं ॥ पुण्यैर्भवति
सा तावत् वस्तुतस्त्वति दुर्लभा ॥७३॥ घोरेण तपसा दानैरभ्यस्तैर्विविधैरपि ॥ भविष्यति महादेवे भक्तिरव्यभिचा
रिणी ॥७४॥ अभ्यस्तोत्खूलनेनापि यावज्जीवं प्रयत्नतः ॥ भविष्यति महादेवे भ० ॥७५॥ रूद्राक्षधारणाभ्यासाद्या
वज्जीवं प्रयत्नतः ॥ भविष्य० ॥७६॥ अन्नराशिप्रदानेन शांभवेभ्यः प्रयत्नतः ॥ भविष्यति० ॥७७॥ गोकोटीनां प्रदाने
न शांभवेभ्यः प्रयत्नतः ॥ भविष्य० ॥७८॥ नानारत्नप्रदानेन शांभवेभ्यः प्रयत्नतः ॥ भविष्यति० ॥७९॥ दिव्यप्रसादद
नेन शांभवेभ्यः प्रयत्नतः ॥ भविष्यति० ॥८०॥ सस्यपूर्णमहीदानैः शांभवेभ्यः प्र० ॥ भविष्यति० ॥८१॥ कन्याकोटिप्रदा
नेन शांभवेभ्यः प्र० ॥ भविष्यति० ॥ सर्वेष्वपि च कालेषु महाशांभवसेवया ॥ भविष्यति० ॥८३॥ बिल्ववृक्षवनानां च क
रणे शिवमंदिरे ॥ भविष्यति० ॥८४॥ प्रसूनराशिदानेन शिवलिंगे शिवात्मके ॥ भविष्यति० ॥८५॥ सरोवराणां करणैः

श्रीमहादेवमंदिरे ॥ भविष्यति ॥८६॥ सर्वभूषणदानेन शंभवेभ्यः प्रयत्नतः ॥ भविष्यति ॥८७॥ तटाकवापीनिर्माणैः श्री
महादेवमंदिरे ॥ भविष्यति ॥८८॥ दीपमालाप्रदानैश्च श्रीमहादेवमंदिरे ॥ भविष्यति ॥८९॥ रम्यहर्म्यविनिर्माणैः
श्रीमहादेवमंदिरे ॥ भविष्यति महादेवे भक्तिरव्यभिचारिणी ॥९०॥ पुरा कुरूणामधिपो वसिष्ठं मुनिपुंगवं ॥ ददर्श विपि
नश्रेष्ठ बिल्वमूलसमाश्रितं ॥९१॥ प्रणम्य दंडवद्भूमौ कृत्वा भक्त्या प्रदक्षिणं ॥ पूजयामास बिल्वाद्यैः शिवभक्तवरं
गुरुं ॥९२॥ ततो बभाषे विनयात्कृतांजलिपुटो नृपः ॥ मृगयार्थे महारण्ये प्रविष्टोस्म्यधुना गुरो ॥ भवद्दर्शनमात्रेण सापि बु
द्धिर्लयं गता ॥ इदं बिल्वतरुव्याप्तं वनं मुनिजनाश्रितं ॥९४॥ विभूतिराशयो दृष्टा गोलानलसमुद्भवाः ॥ रुद्राक्षतर
वो दृष्टाः सर्वकष्टनिवारकाः ॥९५॥ तत्तन्मूलेषु लिंगानि नार्मदान्येवकोटिशः ॥ दृष्टानि बिल्वपत्राद्यैः पूजितानि वि
शेषतः ॥९६॥ तानि लिंगानि तद्बिल्वच्छायासंछादितान्यपि ॥ एते पितवो धन्याः शिवपूजोपयोगिनः ॥९७॥ मुनयो वीतरा
गाश्च भस्मोद्धूलितविग्रहाः ॥ त्रिपुंड्रभालाः सर्वेपि सर्वे रुद्राक्षभूषणाः ॥९८॥ वाताशना जलाहारा नीराहाराश्च कोटि
शः ॥ पूजयंति महादेवं शिवलिंगस्वरूपिणं ॥९९॥ ध्यात्वा सांबं महादेवं आनंदाश्रुपरिप्लुताः ॥ प्रणमंति प्रस्तुवंति
नृत्यंति च हसंति च ॥२००॥ आस्फोटनानि कुर्वंति मदोन्मादाश्रया इव ॥ उच्चैः पठंति श्रीरुद्रं तत्तदर्थावबोधनात् ॥

विल्वपत्राणि रम्याणि क्षालितानि पुनः पुनः॥ प्रक्षिपंति प्रयत्नेन शिवलिंगेषु भूरिशः॥२॥ शिवलिंगेषु या दृष्टिस्तेषां सुकृ-
तकर्मणां॥ सनान्यत्र प्रयात्येव धर्मधारानुवर्तिनी॥३॥ तेषां दृष्टिर्महालिंगे कामिनां कामिनीष्विव॥ दृष्टिर्नान्यत्र संया
ति धारारूपा प्रवर्धते॥४॥ इदं भाग्यं मया दृष्टं दुरदृष्टविनाशकं॥ ममाप्यागमने कालो भूमानेवाभवन्मुने॥५॥ ते दृश्यंते
मया तैस्तु न दृष्टोहं महामुने॥ अतः परं तु विरतिः संसारादभवन्मम॥६॥ संसारपाशबद्धानां लोकानां मोक्षसाधनं॥
किमसाधारणं दृष्टं तन्मह्यं विनिवेदय॥७॥ ॥वसिष्ठ उवाच॥ ॥संसारपाशनाशाय पशुपाशविमोचकं॥
कालकालं महारुद्रं नित्यं पशुपतिं भज॥८॥ संसारपाशनिर्मूलकरणं लिंगपूजनं॥ तेन तत्पाशशांतिःस्या
त् तदन्येन न सर्वथा॥९॥ राज्यं भोगं विहायात्र शिवलिंगार्चनं कुरु॥ अनित्यराज्यभोगेषु विरतो भव सर्व
था॥१०॥ यदस्ति भाग्यमधुना ते न शंकरमर्चय॥ शिवसात्कृतभाग्यानां भाग्यं मुक्तिश्च जायते॥११॥ इदमेव
हि भाग्यानां आर्जितानां फलं नृप॥ यत्संततमुमाकांतलिंगाभ्यर्चनमादरात्॥१२॥ शिवलिंगार्चनेनैव सर्वथा
कालयापनं॥ न कालादपि भीतिःस्यादन्यथा सा बलीयसी॥१३॥ अद्यप्रभृति वित्तानां आर्जितानां शिवार्चने॥
उपयोगो यदि तदा सफलं स्यात्तदार्जनं॥१४॥ अन्यथा तत्धनं सर्वं प्रयासेन समर्जितं॥ दुःखेन लयमासाद्य न सुखा-

यभविष्यति॥१५॥ शंकराय महार्हाणि हर्म्याणि मणिकोटिभिः॥ कार यस्वालियत्नेन तत्तेषां फलमक्षतं॥१६॥ दिव्यर
त्नरथै र्नित्यं महादेवोत्सवान्वयः॥ अन्वयेतव भाग्येन यदि स्यादन्वयो महान्॥१७॥ अन्नराशिप्रदानेन शिवने
वेद्यकल्पनं॥ कुरुयत्नेन सततं तेन तुष्टः शिवो भवेत्॥ ११८॥ किमन्य दत्रवक्तव्यं यावदस्ति धनंतव॥ तावन्निवेदयेशाय
तेनधन्यं च जीवनं॥१९॥ तस्यैव जन्म सफलं यदार्जितधनैः सदा॥ दिव्योपचार संपन्नं यदि स्याद्गिरिशार्चनं॥
॥१२०॥ गिरिशार्चन सामर्थ्यात् संसार भयनाशनं॥ नकाले भीतिवार्तापि नृप संसारिणामपि॥२१॥ सर्वैः प्रयत्नैः कर्त
व्यं जीवता शिवपूजनं॥ शिवार्चने कृते सर्वधर्मजालं कृतं भवेत्॥२२॥ शिवपूजा परोधर्मः सर्वधर्मोत्तमोत्तमः॥ धर्म
470 भासतया ज्ञेयं तदन्य दिति मन्यतां॥२३॥ अयमेवोपदेशस्ते संसाराद्विरतो भव॥ संसारे न विषाकारे लेशतोपि
सुखं नृप॥२४॥ गात्रे क लत्रे पुत्रे वा मित्रे वा चित्रकर्मणि॥ अतिरात्रादि सत्रे वा विरतः सुखमश्नुते॥२५॥ कदा
चिदपि गम्येन शिवार्चनरतो यदि॥ तदास्या ज्जीवनं धन्यं अन्यथा व्यर्थमेव तत्॥२६॥ कलत्रवक्त्रे तांबूलरसनि
ष्ठीवनालये॥ वि विरतो भव वृद्धोसि तत्रास्थां त्यज संत्यज॥२७॥ मांसग्रंथि स्वरूपेषु वक्षोजेषु विशेषतः॥ विरतो
भव तज्ज्ञात्रे मूत्रपात्रे त्रपां भज॥२८॥ यौवनोन्माद कालेषु मदनज्वर पीडया॥ यद्यत्कृत्यसहस्राणि नाधुनाधुनात-

शिवरह·३
२७६

१२९॥

प्रयोजनं ॥ कलत्रापात्रगात्रेषु मूत्रपात्रेषु सर्वथा ॥ स्वनेत्रप्रसरो मास्तु वृद्धस्य तरुणी विषं ॥ ३० ॥ विषयेषु प्रवृत्ति-हरा-तृ
स्तेसंमतानाधुना नृप ॥ अतः परं परित्याज्यः ~~सर्वकाल अस्मिन्~~ क्षणं ॥ ३१ ॥ अंगनालिंगनापेक्षां क्षीणां कुरु विलक्ष
अंगनाधरबी
णां ॥ प्रतिक्षणं क्षणार्धं वा विरूपाक्षं भजादरात् ॥ ३२ ॥ दारादरः परित्याज्यः सर्वदा दारुणामपि ॥ यातनां कारयत्ये
१३३॥
व सततावदधुना त्यज ॥ यज मृत्युंजयं नित्यं त्यज मृत्युभयं त्यज ॥ अधुना तत्परित्यागे मृत्युभीतिः कुतोपि न ॥
दा
॥ ३४ ॥ कदाचिद्यौवने पीडा निबिडा दूर संगृहे ॥ अतः सर्वात्मनात्याज्यः संग्रहः सतु दासह ॥ ३५ ॥ असह्यया
तनां कोवा सोढुमिच्छति दुर्भगः ॥ अद्यापि विषयापेक्षा वृद्धस्यानुचिता मुहुः ॥ ३६ ॥ तावत्तद्विषयापेक्षया वैधो
वतपीडया ॥ दुःखितस्यान्तरस्तस्यां शांतायां तद्विमोचनं ॥ ३७ ॥ ज्ञानस्य परिपाकोयं यदि मृत्युंजयार्चने ॥ प्री
तरुणमत्येन १३८ त्ति
तिःस्यात्तरुणीष्वपि भाग्यतः ॥ ३८ ॥ अतः संसारवार्ताया परित्यागं कुरु स्वतः ॥ कुत्सितत्व मतिं तत्र कुरु संवी
१०६॥
क्ष्यतत्वतः ॥ अनायासेन संसार शोक सागर नाशकं ॥ शंकरं भज विश्वासं कुरु मद्वाचि सर्वदा ॥ ४० ॥ एते तु त
रुणा एव मुनयो यौवनक्षयं ॥ कृत्यैव श्री विरूपाक्षं वृक्ष मूले भजंति ते ॥ ४१ ॥ अविशिष्टमिदं तावत्पुरुषत्वं नरे
ष्वतः ॥ वैराग्य भाग्य संपन्नाः तिष्ठंति मुनयो वने ॥ ४२ ॥ एतेषामपि सौंदर्यं यौवनं च मनोहरं ॥ पश्य पश्य तथाप्येते-

अ·४०

संसाराद्विरतः परं ॥४३॥ मूर्खाणां तु परद्वारेष्वनुरागोऽपि रोगभूः ॥ अनेनैवानुरागेण रोगोऽपि प्रबलो भवेत् ॥४४॥ कि-
मंगनानुरागेण रोगकारणकारणं ॥ अंगनाममिति ख्यातं अनंगसदनं तथा ॥४५॥ अंगनापांगसंगेनाप्यनंगो-
गतरंगिणी ॥ तुंगागारतरंगाणां विहाराय प्रजायते ॥४६॥ अतः सर्वात्मनासंगोऽप्यंगनांगेन सादरं ॥ नकर्त्तव्यः
कदाचिच्चेदृतुकाले स[पुत्र]ज्जयतां ॥ प्रजासंपत्तिरेवैका फलं भार्यांगसंगमे ॥ ततः परं न तस्यापि फलमित्यवधार
य ॥४८॥ गृहाण शांभवीं दीक्षां विरूपाक्षं समर्चय ॥ मोक्षकांताविहारेण हरसंभावनां कुरु ॥४९॥ महादेवो महादा
ता महानंदप्रदो मुदा ॥ परमानंदरूपोऽयं स्वार्चनाद्भुक्तिमुक्तिदः ॥५०॥ मुक्तिरप्यविरक्तानां दुर्लभा खलु देहि
नां ॥ विरक्तिरपि संसारे हरान्याराधने तु न ॥५१॥ हरान्याराधनत्यागो वैराग्यमिति निश्चयः ॥ शिवलिंगार्चना
भ्यासस्त्वनुराग इति स्मृतः ॥५२॥ अनुरागः शंभलिंगे मंगलाय प्रजायते ॥ स सर्वमंगलाकांतः तस्मिन्गृण्हा
ति पूजनं ॥५३॥ शिवलिंगार्चनरतोऽप्यंगनापांगसंगतः ॥ यदि दैवात्तदा तस्य नानुरागः प्रवर्धते ॥ ५४॥ शिवार्चनरसापारसु
धासागरसंगतः ॥ तत्सुधाधारया तृप्तः क्षारनीरानपेक्षया ॥५५॥ यथा क्षीरेण संतृप्तः क्षारनीरं परित्यजेत् ॥
तथा लिंगार्चनरतः तद्विरुद्धं परित्यजेत् ॥ ५६॥ यथा तृषार्तो ग्रीष्मेण विमलं शीतलं जलं ॥ गृण्हाति तद्व द्गृण्हाति-

शिवपूजामृतं सुधीः ॥५७॥ शिवपूजामृतं त्यक्त्वा यस्तिष्ठति विमूढधीः ॥ स संसार महापाश बद्धो मुक्तिः कथं भवे- त् ॥५८॥ शिवपूजार्चनरतः कार्यांतर विवर्जितः ॥ मृत्युकालेपि संप्राप्ते नविभेति यमादपि ॥५९॥ पुरा कीटकदेशेषु विचित्ररथनामकः ॥ भूपति भाग्य संपन्नः पुत्रपौत्रादि संयुतः ॥६०॥ तस्य राज्यं महत्तस्य तस्मिन् राज्ये शिवाल याः ॥ कोटिशः संस्थितास्तेषु शिवलिंगानि कोटिशः ॥६१॥ तेषु सर्वेषु रत्नानां प्रकाराः कोटिशः स्थिताः ॥ दीपस्तं भाश्च तेष्वेव कोटिशो रत्न निर्मिताः ॥ रत्नानामेव रम्याणि हर्म्याणि विविधान्यपि ॥ तेषु रत्नमया एव नंदिकेशा श्च कोटिशः ॥६३॥ रम्ये शिवालये प्रांते बिल्ववृक्षाश्च कोटिशः ॥ तत्रैव नित्य पुष्पाणि दिव्य पुष्पवनान्यपि ॥ दीप माला सहस्राणि तत्तदीश्वरमंदिरे ॥ नाट्यांगना सहस्राणि सुतूर्यध्वनिकोटयः ॥ तेषु सर्वेषु रम्येषु महादेवाल येषु सः ॥ भूपालः पूजनं कृत्वा तुष्टो भवति सर्वदा ॥६६॥ पंचामृताभिषेकाद्यैः दिव्य चंदनकर्दमैः ॥ पुष्पैरपारै र्विविधैः दिव्याभरणकोटिभिः ॥६७॥ धूपराशिः समुत्पन्नः धूमराजिभिरादरात् ॥ दिव्यान्नपर्वतै र्दिव्यैः अ पूपादि समुच्चयैः ॥६८॥ कदलीसहकारादि फलराशिभिरुन्नतैः ॥ नारिकेलांबुकुल्याभिः क्षीरकुल्यासहस्र कैः ॥६९॥ तांबूल गिरिभि र्दिव्यै रेलकादि समुच्चयैः ॥ नीराजनैर्दर्पणैश्च रत्नछत्रैश्च चामरैः ॥७०॥

विविधैरुपचारैश्च पूजयित्वा महेश्वरं ॥७०॥
कृत्वा शिवार्चनं भुंक्ते निशि प्रत्यहमादरात् ॥ तस्य पुत्रा महावीराः शंकरस्य विशेषतः ॥७१॥ तेपि सर्वे महादेवमहापूजापरायणाः ॥ तस्य कन्याभवत्कापि नाम्ना कमललोचना ॥७२॥ तस्याः सौंदर्यमुत्कृष्टं नास्ति नारीषु तत्समं ॥ गर्भे स्थित्वापि सा नारी शिवपूजनतत्परा ॥७३॥ तत्र ध्यात्वा महादेवं नित्यं मानसपूजया ॥ शिवनामानि गायंती तोषयामास शंकरं ॥७४॥ ततः पूर्णेषु मासेषु योनिमार्गाद्विनिर्गता ॥ ततो निमील्य नयने ध्यायंती सांबमव्ययं ॥७५॥ स्तन्यपानं न सा चक्रे नयनोन्मीलनं च सा ॥ ततोंतः पुरवासिन्यः त्वरया बहिरागताः ॥७६॥ सर्वे निवेदयामासुर्वृत्तांतं भूपसंनिधौ ॥ भूपः श्रुत्वाथ वृत्तान्तमतिव्याकुलमानसः ॥७७॥ सस्मारे सुरलोकस्थौ वैद्यावत्युत्तमौ तदा ॥ तदा निवेद्य वृत्तांतं शचीनाथाय सादरं ॥७८॥ धन्वंतरिश्चामृतश्च विचारव्याकुलौ तदा ॥ शचीनाथो पितौ दृष्ट्वा प्राह किंवा विचार्यते ॥७९॥ अधुना किमशक्यं ते तद्वदेति विशेषतः ॥ ॥धन्वंतरिरुवाच ॥ ॥राजा चित्ररथो नाम भूतले मगधाधिपः ॥ स महाभाग्यसंपन्नः शिवपूजापरायणः ॥ तस्याशक्यं न लोकेषु नास्ति सर्वात्मना खलु ॥८१॥ तस्यैव भूपतेरासीत् अद्य कन्या मनोरमा ॥ सा गर्भेपि महादेवध्यानपूजनतत्परा ॥८२॥ अधुना प्रसवस्तस्याः स्तन्यपानोत्सवा न सा ॥ तेनाहं संस्मृतस्त-

अगंतव्यमिति रोचते ॥ ८३ ॥ तत्र कृत्यं न मे नूनं औषधैर्न फलं यतः ॥ शिवाचाररता सा तु न गृण्हात्यौषधं खलु ॥ ८४ ॥ हरा०

अतः परं मया तत्र गंतव्यं नेति चिंत्यते ॥ इति तद्वचनं श्रुत्वा विस्मितः पाकशासनः ॥ ८५ ॥ मया प्यागम्यते तत्र द्रष्टुं तामेव कन्यकां ॥ इत्युक्त्वा तेन संयुक्तो ययौ चित्ररथालयं ॥ ततस्तेनार्चितो भक्त्या शचीपतिरुवाच तं ॥ ॥ इंद्र उवाच ॥ ॥ भाग्यवानसि भूपाल पूज्यः सुरगणेष्वपि ॥ भूतिरुद्राक्षपूतांगः शंभुलिंगार्चनप्रियः ॥ महदैश्वर्यमासाद्य शिवपूजापरायणः ॥ ८८ ॥ विहाय भोगसामग्रीं कस्याद्दुग्रपरायणः ॥ त्वदीयालोकनेनापि शिवे भक्तिः प्रजायते ॥ ८९ ॥ सभायां पुण्यरूपायां शांभवा एव ते मताः ॥ भूतिरुद्राक्षमालांकाः चंद्ररेखांकिता इव ॥ १९० ॥ दृश्यंते शांकराः सर्वे सभायां तव भूपते ॥ रम्यशांकररूपाणां प्रतिबिंबानि भित्तिषु ॥ ९१ ॥ विचित्रलिखितानीव दृश्यंते शांभवानि हि ॥ अद्य भाग्यवशेनेदं जातं लोचनगोचरं ॥ ९२ ॥ हारं विहारसदनमिदमेव मनोहरं ॥ भूमंडलमिदं सर्वपावनं खलु शांभवं ॥ ९३ ॥ बहुपुण्यप्रभावानां भावानां संगमात्सुखं ॥ मंदिरे बिल्वतरवः परितो लिंगकोटयः ॥ ९४ ॥ तन्मूलेषु विचित्रेषु रत्नवल्येषु भूरिशः ॥ आनम्रबिल्वशाखाभिः लिंगान्यालिंगितान्यपि ॥ ९५ ॥ कामिनीभिरिवापूर्व कामुकांगानि लीलया ॥ अलमेतावता जन्म शिवलिंगावलोकनैः ॥ ९६ ॥ सफलं सकलं

लोके दुर्लभं लिंगदर्शनं॥ रत्नभूमिषु रम्याणि रत्नलिंगानि भूपते॥९७॥ बिल्वमूलेषु पुण्येनकेनवारं चितान्यपि॥
दूरादप्यद्य दृष्टानि शिवलिंगानि भूरिशः॥९८॥ स्वयत्यविलंबेन मंगलानां परंपरां॥ तवैतद्भूपते भाग्यं दुर्लभं
भुवनत्रये॥९९॥ यदिदं शंभुपूजायाः केवलं फलमुत्तमं॥ कल्पकोटिसहस्रेषु यत्पुण्यं समुपार्जितं॥२००॥ तत्पु
ण्यमेतदमलं लिंगं प्रत्यक्षलक्षणं॥ अमंगलानां संहारो जात एवाद्य सत्वरं॥१॥ यतो विलोकितं लिंगं शांभं
मंगलदायकं॥ एवं वदति भूपालं वासवे वासुकिः स्वयं॥२॥ वृद्धरूपं समासाद्य भूपालं द्रष्टुमादरात्॥ सस
मागत्य तं भूपं विलोक्य मुदितस्तदा॥३॥ धन्यधन्य नृपाधीश धन्योसि शिवपूजक॥ शिवपूजाप्रभावस्ते
सर्वेषां शुभदायकः॥४॥ शिवपूजाप्रभावोयं सूते शुभपरंपरां॥ संभावितानि सर्वाणि मंगलानि महीपते॥
॥५॥ लिंगार्चनेन लोकानां दुर्लभानि स्वभावतः॥ दुर्लभं मानुषं जन्म संप्राप्य शिवतत्परः॥६॥ शिवपूजां करो
तीति शांभवो भुवि दुर्लभः॥ शांभवः शोभनाकारो विकाररहितः परं॥७॥ शुभदानोद्यतो नित्यं स्वावलोकन
संगमैः॥ इदं धन्यं दिनं राजन् जीवनं धन्यमेव मे॥८॥ शरीरमपि मे धन्यं शांभवस्यावलोकनात्॥ दृष्टः शांभ
वरूपेण शंभुरेवाधुना मया॥९॥ धर्माणां परिपाकोयं शांभवांघ्रिविलोकनं॥ शांभवाग्रे सरगणाय च्चरणांबुज-

वीक्षणं ॥२०॥ तदेवाक्षयपुण्यानां कारणं मलस्यच ॥ भवदंघ्री चरणांभोजरेणवो भुवनत्रयं ॥२१॥ कुर्वंति पावनं नूनं य- हरा०तृ
तः पावन पावनाः ॥ पावनानि बहून्येव संति किं तै रनुत्तमैः ॥२२॥ यतः शांभव पादाब्जरेणु तुल्या निलानिन ॥ लोकेते
पशवो भवंति बहवः किं तैर्वृथा जीवनं तेषां केवल मेव शांभव पदां भोजादरामावतः ॥ भक्तिः शांभव पादपंकजरजः पुंजे
तदा संजने जाता जन्म सहस्रपातक महो त्पाताप हारायसा ॥२३॥ धन्यं शांकर पादपद्म भजनं संजीवनं मेनिरेहा
रः कोपि नरो हरत्यघकुलं लीला मला लोकनैः ॥ अकल्पं यदुपार्जितं च सुकृतं तेनैव तद्दर्शनं तत्कालस्यचतर्ज
नाय नितरां तद्धूजनायाप्यलं ॥२२४॥ ॥ इतिश्री शिवरहस्येहास्ये तृतीयांशे गौतम मुनि संवादो नाम चत्वा
रिंशोध्यायः ॥४०॥ ॥श्री काशी विश्वेश्वरार्पणमस्तु ॥ ॥गौतम उवाच ॥ ॥ ततः परं स भूपालो देव वैद्यादि
भिः सह ॥ विवेशांतः पुरं रम्यं कुमारी यत्र तिष्ठति ॥१॥ रत्न मंदिर संकीर्णं रत्न लिंग विराजितं ॥ रत्न तोरण संकी
र्णं दुंदुभिध्वनि संयुतं ॥२॥ फल पुष्प समाकीर्णं पानीयकलशावृतं ॥ पक्वान्न गंध संवीतं गंधवातनिषेवि
तं ॥३॥ रुद्रवीणाध्वनीनां च प्रतिध्वनि विराजितं ॥ शिव शंकर रुद्रेति नामध्वनि समावृतं ॥४॥ क्वचिन्ना
ट्यांगनावीतं क्वचि लिंगार्चकावृतं ॥ क्वचिन्महेश्वरकथा सुधा धारा समन्वितं ॥५॥ ईदृशं मंदिरं दृष्ट्वा सर्व—

सौभाग्यसंयुतं॥ संतोषवृष्टिसहिताः तुष्टुवुस्तेनृपं सुराः॥६॥ ततः परं मंदसंज्ञां विनिमीलितलोचनां॥ तांकुमारींवि
स्मयेनददर्शमुनिपुंगवाः॥७॥ ततः सराजाधैर्येण गृहीत्वातांकुमारिकां॥ शिवाभिषेकपानीये राप्लुतांचचकार
सः॥ ततो भस्मसमादायतत्तदंगानुलेपनं॥ कृत्वारुद्राक्षमालाश्च कंठदेसददौनृपः॥९॥ ततः परं बिल्वपत्रैः
शंकराय समर्पितैः॥ आघ्रायकन्यकांराजाप्यश्रुधाराप्लुतोभवत्॥१०॥ ततः परंकुमारी साप्युन्मील्यनयने
शनैः॥ शिवलिंगंविलोक्यैवप्रणता भक्तिपूर्वकं॥११॥ ततो लिंगमुपस्पृश्य बिल्वपत्रैर्मनोहरैः॥ संपूज्यालिं
गयत्तल्लिंगं प्रहृष्टा द्विजपुंगवाः॥१२॥ तां विलोक्य सुराः सोपिनृपोपिनृपकन्यकां॥ संतोषपरमंजग्मुः पुष्प
वृष्टिरभूत्तदा॥१३॥ देवदुंदुभयोनेदुरंतःपुरनिवासिनां॥ हर्षः समभवत्तस्याः श्रुत्वावार्त्तांमनोहरां॥१४॥ ततः
परं ~~महादेवमहादेवेतिसादरं~~॥ सराजातांकन्यकांकमलाननां॥ आलिंग्यपरमानंदमवाप्यत्यंतविस्मितः॥१५॥
ततोजगादसाकन्या शिवइत्यक्षरद्वयं॥ ततः परं महादेव महादेवेतिसादरं॥१६॥ श्रुत्वातदुक्तांतांवाणींनिर्वा
णपददायिनीं॥ प्रहर्षमतुलंप्रापुः विस्मयाविष्टमानसाः॥१७॥ एतस्मिन्नंतरे तत्रचतुर्मुखमुखाः सुराः॥
सनकाद्याश्चमुनयस्तां द्रष्टुं समुपागताः॥१८॥ तान्विलोक्य सुरान्राजा शिवनामरतान्मुहुः॥ भस्मत्रिपुंड्र

शिवरह०३
१८०

रुद्राक्षैः भूषितान्प्रणतो मुदा ॥१९॥ ततस्ते मंदिरं दृष्ट्वा तस्य भूपस्य शोभितं ॥ शिवलिंग समाक्रांतं रत्नदीपसमाकु-
लं ॥२०॥ शिवनिर्माल्य माल्यानां समूहै रंकितं नवैः ॥ बिल्वपत्रैश्च संकीर्णं संकीर्णं शांभवै रपि ॥२१॥ शिवध्यानस
मासक्त नाट्य स्त्री परिवेष्टितं ॥ रुद्रवीणा गानलोल शैवकन्या समाश्रितं ॥२२॥ प्रणमंति महादेवं लिंगरूपिण
मव्ययं ॥ केचित् बिल्वादिभिः द्रव्यैः पूजयंति सदाशिवं ॥२३॥ केचिन्नृत्यंति सोत्साहाः केचिद्ध्यानरता अपि ॥ शिवनै
वेद्यपक्वान्नराशि गंध समावृतं ॥२४॥ धूप गंध समाक्रांतं दीपमाला विराजितं ॥ तादृशं मंदिरं दृष्ट्वा सुराः कैलास
सन्निभं ॥२५॥ शिव लिंगानि दृष्ट्वा ते प्रणताः प्रीतिपूर्वकं ॥ लिंगार्चनानि ते चक्रु र्बिल्वपत्रादि साधनैः ॥२६॥ ततः परं
स राजा परिरत्न सिंहासनेषु तान् ॥ उपवेश्यार्चयामास बिल्वपत्रादि साधनैः ॥२७॥ ॥राजोवाच॥ ॥नाराय
णादयो देवाः शिवार्चनपरायणाः ॥ क्व गम्यते क्व वा वासः कुतो लिंगार्चना यवा ॥२८॥ शिवार्चनरताः शिष्टाः ताव
द्यूयमतो मया ॥ दृष्टाः पुण्या जनायाद्य श्रीमहादेव किंकराः ॥२९॥ इति तद्वचनं श्रुत्वा सुराः शिवपरायणाः ॥ संतो
षं परमं प्रापुः शिव लिंगार्चन प्रियाः ॥ ३०॥ ततस्ते ते सुराः प्राहुः विनयान तकंधरं ॥ राजानं कृतकृत्योसि धन्योसीति
मुहुर्मुहुः ॥३१॥ ततस्तां कन्यकां दृष्ट्वा भूति भूषित विग्रहां ॥ रुद्राक्षमालाभरणां शिवध्यान रतां परां ॥ शिवध्यान-

हरा०नृ
अ०४१

सुधापानपीनशोभनलोचनां॥ मृदुशिवकथागानलोलकर्णां विचक्षणां॥३३॥ सौंदर्यनिधिरूपां तां सर्वानंदप्र
दायिनीं॥ स्मेरदृशीं तांशु संवीतां दृष्ट्वां ता प्रणताः सुराः॥३४॥ विलोक्य प्रणतान्देवान्विस्मितः प्राह भूपतिः॥ केयं
भाग्यवती कन्या वक्तव्यमितिसादरं॥३५॥ ॥देवा ऊचुः॥ ॥इयंश्रीशैलनाथस्य मंदिरेप्रणि सुंदरे॥ स्थि
ताब्राह्मणकन्येयं अस्यास्तातः शिवार्चकः॥ विप्रःश्रीशैलनाथस्य प्रातः सायंच पूजनं॥ चकार विविधैः दिव्यैःम
ध्यान्हेपि विशेषतः॥३७॥ तत्पूजासमयेसेयं भक्त्या सन्निहितासती॥ चकार दीपांमालानां परिष्कारं पुनःपुनः॥
॥३८॥ कपिलागोघृतं दत्वा शुद्धं शोधितमादरात्॥ धूपदीपैश्च विविधैर्धूपयामासमंदिरं॥३९॥ नैवेद्यान्नप
रिष्कारं चकारातिमनोहरं॥ नाल्पंचकारबालेयं श्रीशैलेश्वरसंन्निधौ॥४०॥ ततः परं दैवयोगान्नदीतीरेम
नोहरे॥ प्राणान्मुमोचकन्यासा भूतिभूषितविग्रहा॥ तेन पुण्यप्रभावेन जातातव कुमारिका॥ गर्भेपिसंस्थि
तासेयं शिवध्यानरतानृप॥४२॥ अस्याः पुण्यस्यनांतोस्ति मान्यासुरगणैरपि॥ अतः परमियं नित्यं शिवपूजा
परानृप॥४३॥ आहारेप्यरुचिस्तावदस्याः सर्वात्मना नृप॥ नरत्नाभरणे प्रीतिः नवाबालाभिलापने॥४४॥
हारोपहारपुष्टांगाशांग लिंगार्चनप्रिया॥ शिवनामजपेनैवसंतुष्टानृपकन्यका॥४५॥ सेयं यौवनसंपन्ना सर्वदा–

नवयौवना ॥ न जरा नापि मरणं रोगोप्यस्यास्तु न ध्रुवं ॥४६॥ शिवगानरता नित्यं शिवमंत्रजपोत्सुका ॥ शिवालय-
निवासेन संतुष्टहृदया सदा ॥४७॥ एतस्यास्तु विवाहेपि न प्रीतिः पुरुषेपि वा ॥ ब्रह्मचर्येण गौरीशपूजनासक्तमा
नसा ॥४८॥ एतत्सौंदर्यवृद्धिश्च भविष्यति दिने दिने ॥ अंगपुष्टिस्तथाप्येषा विकारविरता भवेत् ॥४९॥ यस्य लि
लाभिलषितं तत्तत्सिद्धं भविष्यति ॥ तैः साधनैर्महादेवं पूजयिष्यति सादरं ॥५०॥ नात्यंकरिष्यति प्रीत्या प्रातःसायं
विशेषतः ॥ मध्याह्नेपि प्रयत्नेन शिवपूजनतत्परा ॥५१॥ शिवपूजनमेतस्याः केवलं जीवनं नृप ॥ तदंतरायः सहसा
नास्याः सह्यः कदाचन ॥५२॥ रात्र्यामपि प्रयत्नेन निद्रां तु न करिष्यति ॥ नित्यं जागरणेनैव कालयापनतत्परा ॥५३॥
शिवलिंगालये ह्येषा संमार्जनरता सदा ॥ व्यर्थालापान्परित्यज्य शिवकर्मरता सदा ॥५४॥ अनेनैव शरीरेण कैला
सं प्रतियास्यति ॥ रुद्रकन्यासमाक्रांता पार्वतीसेवनोत्सुका ॥५५॥ अस्याः कैलासयात्रायां देवदुंदुभिनिस्व
नाः ॥ भविष्यंति गणाः सर्वे समायास्यंति कोटिशः ॥५६॥ विमानरत्नमारुह्य कैलासं प्रतियास्यति ॥ अस्यां प्री
तिर्महेशस्य सर्वदा शिवपूजया ॥५७॥ शिवलिंगार्चने प्रीतिः यस्य तस्य च सर्वदा ॥ तस्मिन्नेव हि विश्वेशः स्नेहं ताव
त्करिष्यति ॥५८॥ शिवार्चनरताः केचित् विरलास्ते कलावपि ॥ दुर्लभा एव भूपाल लीलाकल्पितविग्रहाः ॥५९॥

तवभाग्येनतपसा महत्याशिवपूजया॥इयमभ्यागतासेयंतवापिनृप मंदिरे॥६०॥ एतस्याः पुण्यपुंजायाःसेवया
चविलोकनैः॥कालोनेयइतिप्रीतिरस्माकमपिजायते॥६१॥ अद्यैववयोवना क्रांता भविष्यतिनृपोत्तम॥सायं
कालेशिवार्चांतेनाट्यमेषाकरिष्यति॥६२॥नाट्यावलोकनंकर्तुंएतस्मिन्नृत्यमंडपे॥गणैः सह महादेवःस्था
स्यत्यंबासमन्वितः॥ अद्योत्सवो महान्कार्यः शिवागमनसंभवे॥ भाग्योत्सवस्यसमयः सोयमन्योनदृश्यते॥६४॥
पश्यपश्यतदंगानिवर्धमानानिभूपते॥ आश्चर्यकरमेतावत् भूतपूर्वनसर्वथा॥६५॥अभूतपूर्वतदृष्ट्वातेसर्वेवि
स्मयंगताः॥ततःपरं सराजापिदृष्ट्वाकन्यांप्रहर्षभूः॥६६॥स्वभाग्यविभवंदृष्ट्वा प्रहृष्टः शिवतत्परः॥भृत्याना
ज्ञापयामास शिवमंदिरमंडने॥६७॥वरुणः स्वयमागत्यक्षालयामासमंडपं॥रंगवल्यादिरचनांचकारसघ
नाधिपः॥६८॥रत्नतोरणसंवीतंचकारशिवमंदिरं॥पुष्पमालासमाक्रांतंपुष्पोच्चयसमाकुलं॥६९॥ मरंदधारा
संकीर्णं भ्रमरालि विराजितं॥ रत्नछत्रसमाकीर्णरत्नध्वज विराजितं॥७०॥ततःप्रदोषसमयेसंप्राप्तेमुनयः
सुराः॥उद्धूल्यभस्मनांगानिरुद्राक्षाभरणान्विताः॥७१॥ शिवपूजापराः सर्वे शिवध्यानपरायणाः॥पंचा
मृताभिषेकाद्यैरभिपूज्यसदाशिवं॥७२॥प्रदक्षिणनमस्कारान्कृत्वाध्यानपरायणाः॥कृतांजलिपुटाःसर्वे

47

स्तोत्रं चक्रुः शिवार्चकाः ॥७३॥ ततः साकन्यका सायं नवयौवनविग्रहा ॥ शिवतीर्थोदकैः स्नात्वा दुकूलं परिधायसा ॥७४॥ कृत्वा च कचसंस्कारं वेणीबंधनपूर्वकं ॥ उद्धूल्य भस्मनांगानि रुद्राक्षाभरणप्रिया ॥७५॥ त्रिपुंड्रधारणं कृत्वा ललाटादिषु सादरं ॥ शिवार्चनरता जाता सायं बिल्वादि साधनैः ॥७६॥ पंचामृतप्रवाहैः सातोषयामासशंकरं ॥ फलोदकप्रवाहैश्च तथा गंधोदकैरपि ॥७७॥ नीहारनीरपूरैश्च सुगंधैरभिषिच्य सा ॥ दिव्यवस्त्रैरलंकृत्य चंदनं च ददौ ततः ॥७८॥ बिल्वप्रसूनैर्विविधैः सा चैत्ररथसंभवैः ॥ पूजयामास गौरीशं धूपदीपैर्मनोहरैः ॥७९॥ दिव्योदनैश्च पक्वान्नैः परमान्नैः फलैरपि ॥ क्षीरसारादिभिर्दिव्यैः पूजयामास शंकरं ॥८०॥ कर्पूरराशिदीपैश्च मणिनीराजनैरपि ॥ रत्नछत्रैर्ध्वजैरुच्चैर्दर्पणैश्च मनोहरैः ॥ प्रदक्षिणनमस्कारान्कृत्वा नाट्यं चकारसा ॥ तन्नाट्यकरणे देवैः कृतं नेत्रनिमीलनं ॥८२॥ तदंगलाघवं दृष्ट्वा तन्नाट्यं शंकरार्पणं ॥ कृत्वा ध्यानरताः सर्वे विस्मयाविष्टमानसाः ॥८३॥ ततः परं निशामध्ये कृत्वा सा शिवपूजनं ॥ हारोपहारं देवेभ्यो ददौ साप्रीतमानसा ॥८४॥ राजा विलोक्य तं नाट्यं स्वदारैः सह विस्मितः ॥ संतोषं परमं प्राप देवैः सह विशेषतः ॥८५॥ ततः सुरेभ्यः सर्वेभ्यो यथाक्रममुपायनं ॥ ददौ प्रीताः सुरास्ते पि तमूचुर्नृपसत्तमं ॥८६॥

॥देवा ऊचुः॥

धन्योसिकृतकृत्योसि शिवार्चनपरायण॥ अनया भूषितंनूनंकुलंतवनृपोत्तम॥८७॥ इयंकुमारिकाबुध्याप्याद
रेणनिषेविता॥ शिवानुचरतामेत्य सुखंप्राप्स्यस्यसंशयं॥८८॥ यस्यकस्यापिहारस्य सानुमोदावलोकनैः॥
प्रीतोददातिसौभाग्यंसौभाग्यनिधिरीश्वरः॥८९॥ हाराःकुमारादाराश्चयस्यतावन्मनोहराः॥ कुमारिकाहर
रतातस्य भाग्यंमहत्खलु॥९०॥ कुटुंबपोषणेप्राप्ते नित्यत्वेनविशेषतः॥ अनंतगुणितंपुण्यंहारदारादितोष
णे॥९१॥ पुण्येनहारदाराणांपोषणप्रणयादिभिः॥ सुप्रीतोभगवान्शंभुर्भवत्येवनसंशयः॥९२॥ दाराश्च
हाराःसुकृतैःकुमाराःहाराःपरंपुण्यपरंपराणां॥ फलंहिकल्याणपरंपराणांहाराःस्वयंचेतितपःफलंहि॥
॥९३॥ उदारहारदाराणांकृत्वादारुणभाषणं॥ मोहेननरकंयातितत्स्तत्तत्रसंत्यजेत्॥९४॥ एतस्याःक
न्यकायास्तु शिवाराधनसाधनं॥ संपाद्यदेयंयत्नेनयदायावदपेक्षितं॥९५॥ यस्यकस्यापिहारस्य हरपूजनसा
धनं॥ दत्वासुखमवाप्नोति स्वकीयस्य विशेषतः॥९६॥ हारानुगुण्यकरणे भाग्यंयस्यप्रवर्धते॥ ततोपिभाग्य
वान्लोकेनलोकेक्षितिमन्यतां॥९७॥ हारायहररूपायदत्तंगृण्हातिशंकरः॥ तांकन्यकांप्रणम्यापितदनु
ज्ञामवाप्यच॥९८॥ इत्युक्त्वाप्रस्थिताःसर्वेसुराभूपालपूजिताः॥ अतःपूजयभूपालशिवलिंगानिभूरिशः॥
॥९९॥

नित्यंहारोपचारेणकुरुष्वदिनयापनं॥ विलंबः शिवपूजायांनोचितस्तववार्धके॥२००॥ आयुः प्रतिक्षणंक्षीणमा-
युर्वृद्धिः कदापिन॥ तद्वृध्यर्थमुपायोपि श्रीमहादेवपूजनं॥१॥ दिनांतेस्मयाकार्यं शिवपूजनमित्यपि॥ नकर्त्तव्योवि
लंबोपिप्रत्याशातत्रकातव॥२०२ शरीरं श्वः परश्वोवास्यास्यतीतिननिश्चयः॥ अतः शिवार्चनंकार्यंत्वरयासादरं
मुहुः॥३॥ यद्दिनेयन्मुहूर्तेवा जीवनंयस्यनिश्चितं॥ तदायत्नेनकर्त्तव्यं शिवलिंगार्चनंनृप॥४॥ यदिप्रमादः पूजायां
तदाव्यर्थंतुजीवनं॥ अवैयर्थ्यंजीवनस्यकेवलं शिवपूजया॥५॥ तदेवजीवनंधन्यंयेनशंकरपूजनं॥ क्षणमात्रंक्ष
णार्धंवा किमन्यदधिकंवद॥६॥ धन्यानामनुवासरं खलु मुहुः स्वस्वायुषः संक्षयो लिंगाराधनसाधनार्जनमहा
देवार्चनेनक्षणं॥ यस्यानुक्षणमीशपूजनरतिः धन्येषुधन्योत्तमोधन्यंदुर्लभमेतदीशभजनंसर्वात्मनादुर्लभं॥
॥७॥ भाग्येनैवमुहुर्मुहुः शिवपदांभोजार्चनेजायते बुद्धिस्तत्तपसः फलंक्षणमपिप्रीत्यास्मृतेशंकरे॥ संसारान्न
भयंयमादपिभयंनास्तीतिवेदेमतं सौभाग्यप्रदमीशपूजनमिदंलोकत्रयेदुर्लभं॥८॥ आयुः क्षीणमनुक्षणंम
रणमप्यभ्यर्णमित्यन्वहं भीतः कालभयेन भर्गभजनासक्तं मनोयस्यवा॥ तंतावत्प्रणमंतितेसुरगणाः श्रीका
लकालार्चको लोकेदुर्लभइत्यवेक्ष्यमुहुरप्यानंदधारावृताः॥९॥ ऐश्वर्याणिविनश्वराणिनितरांजीर्णंशरीरं-

धनं धान्यं वा निधनाय साधनमिदं सर्वात्मना नश्वरं ॥ तस्मात्पूजय शंकरं त्यज रतिं संसारवार्तास्वपि स्वापेक्षाय दिमोक्षलक्षणधने तन्नश्वरं नैव हि ॥ १०॥ किं दारै रतिसादरैः सुरतधीसंवर्धनात्यादरैः किं वा ते स्तनयैर्धनापहरणोद्युक्तैः प्रमादोद्यतैः ॥ उन्मादेन च यौवनेन च फलं तं कालकालं परं ॥ ध्यात्वा तच्चरणांबुजार्चनरतो भूत्वा नयायुर्मुहुः ॥ ११॥ एतावत्फलमायुषोपि विदितं विश्वेश्वराराधनं ध्यानैः कालविपर्ययेपि मनसः दोमेपि दोषेपि वा ॥ १२॥ रोषे वा कलुषात्मनामपि मुहुः संगे कुरंगेक्षणाव्यासंगं परिहाय कालनयनं श्रीकालकालप्रियं ॥ १३॥ भस्मोद्धूलितविग्रहो भव भवांभोधे भयं संत्यज ॥ प्राणपायधनप्रियादिविषयप्रीतिं पुनः संत्यज ॥ १४॥ मृत्युं सन्निहितं विलोकय मुहुः नास्था शरीरे प्रिया ॥ कालः कोपि खलः खलेष्वपि दयालेशोपि तन्नाश्रितः ॥ १५॥ लोकः कालवशं प्रयाति सकलं कालेन नीतो मुहुः ॥ पश्यन्नेव मुहुर्मुहुर्धनमिदं धान्यं ममेत्यादरात् ॥ १६॥ संप्राप्ते मरणक्षणेपि न जहात्यायुष्यवांछां खलु ॥ कालं पश्यति कालकालभजनं त्यक्त्वापि मूढः परं ॥ श्वासस्यापि विकुंठने सति शठस्तन्नीलकंठार्चनव्यासक्तो न भवत्यघौघविलयोपायः स मृत्युं जयः ॥ १७॥ आरूढं हृदये शिवापरिदृढं कर्तुं न यत्नं करोत्युन्मादं न जहाति मृत्युवशगः शंभोगानुषंगं विना ॥ भंगस्तस्य पदे पदे ज-

निजरारोगानुषंगो मुहुः॥ मृत्युस्तस्य शिरस्यपाव दुरितव्यापार दुरितव्यापार निर्धारकः यस्यांनंग मतंग भंगच- हरा।तृ-
रणां भोजार्चनानादरो हारापारकथा सुधा मधुरिमा रंभोपि संभावितः॥११८॥ ॥इति श्री शिवरहस्ये हराख्ये

तृतीयांशे शिवपूजोपकथने स्कंदमुनि संवादे वशिष्ठ राजप्रश्नो नाम एकचत्वारिंशोध्यायः॥५१॥ ॥श्रीका
शीविश्वेश्वरार्पणमस्तु॥ ॥नारद उवाच॥ ॥इति तद्वचनं श्रुत्वा स राजा वीतमत्सरः॥ संसारे विरतिं त्यक्त्वा
शिवपूजारतस्ततः॥१॥ राज्याभिषेकं कृत्वैव ज्येष्ठ पुत्रं शिवार्चकं॥ धनं च शिवसात्कृत्वा शांभवैः सहसादरं॥२॥
शंकरार्चापरो भूत्वा राज्यभारपराङ्मुखः॥ उद्धूलनत्रिपुंड्राभ्यां रुद्राक्षैश्च समावृतः॥३॥ गृहीत्वा शांभवीं
दीक्षां वशिष्ठाश्रममाययौ॥ ततः पुत्रैरनुगतो दारैरपि मुहुर्मुहुः॥४॥ निवार्य संगतिं तेषां स चक्रे हारसंगतिं॥
नकोपि महदैश्वर्यं प्राप्य बुद्धिमतां वरः॥५॥ हरपूजा विरहितो दृष्टः पूर्वः श्रुतोपि वा॥ शंकरानुग्रहेणैव भा
ग्यं प्राप्य मुहुर्मुहुः॥६॥ तत्पूजन परित्यागं कः कर्तुमभिवांछति॥ स्वस्वरूपं मुहुः स्मृत्वा भाग्यं स्मृत्वा मुहु
र्मुहुः॥७॥ फालाक्षपूजनासक्तो भवभावसमन्वितः॥ भावसंगेन भाग्यानि प्राप्नुवंति भवे भवे॥८॥ पुनर्भावा
र्चनं कृत्वा भाग्यवानेव जायते॥ भावसंग परित्यागे भाग्यमप्यति दुर्लभं॥९॥ दुर्लभे सति भाग्ये तु शिवपूजा-
कुतो भवेत्॥

भवपूजायामुपयुक्तं न सर्वथा ॥ तद्धि भाग्य

भवपूजनसामग्री भाग्यमित्यवधारय॥२०॥ तदभावे कथं वा स्यात् पूजनं भाग्यसाधनं॥ भक्तिश्चेद्भवपूजायां भाग्येनैव शिवार्चनं॥२१॥ तत्साधनं मुख्यमेव भाग्यमित्यवधारितं॥ सौभाग्यसाधनं भाग्यं यद्भवार्चनसाधनं॥२२॥ यद्भूयो भाग्यहेतुत्वात् भाग्यं भाग्यमिति स्मृतं॥ यद्भाग्यंमिति ज्ञेयं भाग्यवानपि दुर्भगः॥ यावदायुस्तावदेव भाग्ये सति शिवार्चनं॥२४॥ यदायुः सफलं नोचेदायुरेव न तत्खलु॥ अस्मिन्काले शंभवानां कुरु संभावनां मुहुः॥२५॥ तत्संभावनया शंभुः प्रसन्नः स्यादसंशयं॥ इत्युक्ते नारदवचः श्रुत्वा संतुष्टमानसः॥२६॥ संपूज्य तान्मुनिवरान् (तुम्बवीरज) शिवार्चनरतो भवत्॥ इति नंदिकेश्वरेणोक्तां कथां पापप्रणाशिनीं॥२७॥ श्रुत्वा ब्रह्मादयो देवा पुलकांचितविग्रहाः॥ तं प्रणम्य पुनः प्राहुः विनयानतकंधराः॥ कर्त्तव्यं किमिहास्माकं रहस्यमिति ते पुनः॥२८॥ ॥नंदिकेश उवाच॥ ॥ये येन राः परमशंभुपादपद्मसेवारताः कलियुगेपि विशुद्धचित्ताः॥ ते तावदादरवशादिभिरन्वहं वः पूज्या भवंति तदिदं परमं रहस्यं॥२९॥ श्रीनीलकंठ मदनांतक चंद्रमौले श्रीफाललोचन यमांतक विश्वमूर्ते॥ पाहीति ये सकृदपि प्रवदंति ते वः पूज्या भवंति तदिदं परमं रहस्यं॥३०॥ उत्पत्तिपालनविनाशनहेतुभूत भूतेश भूतनिवहार्चितपादपद्म॥ पाहीति ये सकृदपि प्र०॥३१॥ कल्याणपुण्यगुणसागर मेरुधीर रत्न-

१७९

शिवर०३ स्फुरद्धरशरासनकोटिहस्त ॥ पाहीतिये० ॥२२॥ गौरीकुचोरु गिरिशेखरचारु भारकाश्मीरसाररसरंजितपा- हरा-लृ
१०५ दपद्म ॥ पाहीतियेसकृद० ॥२३॥ आपादुकप्रणतदेवकिरीटकोटि रत्नप्रभापरिवृतांघ्रिसरोजराज ॥ पाहीति अ०५२
॥२४॥ संसार सागर निवारक कालकाल लीला विशेषपरिकल्पितकल्पजाल ॥ पाहीतिये० ॥२५॥ मन्नाथसुंदर
तरातिमनोहराद्रि कन्यासनाथ विधृतोडुगणाधिनाथ ॥ पाहीतिये० ॥२६॥ रत्नांगदांगमणिकंकणकिंकिणी
क गौरीमनोहरसनूपुर भासुरांघ्रे ॥ पाहीतिये० ॥२७॥ मंदारकुंद मकरंद रसाभिषिक्त पादारविंद परमाहर
हारवीर ॥ पहितिये० ॥२८॥ कर्पूरगौरहर सुंदरतारतारतारामनोहर विहार विहारहार ॥ पाहीतिये० ॥२९॥ मा
मीश मामकधियापरिपालयाशु क्लेशापहार चतुर प्रवर प्रवीर ॥ पाहीतिये० ॥३०॥ सर्वामरेश्वर हा खर्वसु
रारिगर्वनिर्वाण प्रक्ष कारुणिक प्रवीण ॥ पाहीतिये० ॥३१॥ श्रीमन्महेशकरुणातरुणांबुराशे गौरीमुखांबुजसह
स्रकरादरेण ॥ पाहीति० ॥३२॥ मृत्युंजयाव्ययपिनाककरामरारिवीरांधकासुर निवारणकारणाद्य ॥ पाही
तिये० ॥३३॥ श्रीकालकूट विषदोष विभूषकाशापाशप्रणाशन विधान विनोद मोद ॥ पाहीतिये० ॥३४॥ सौवर्ण
वर्णसहिरण्य हिरण्य बाहो शंभो हिरण्यद हिरण्यपते स्मरारे ॥ पाहीतिये० ॥३५॥ अन्यस्तवास्ति शिव शंकर पालनीया-

४९०

मत्तोपिकः कलुषनाशकरातिधीर ॥ पाहीतिये ॥ ३६ ॥ घोरापराधनिधिशोषककामशत्रो चित्रत्रिनेत्रक
रुणारसपात्रमात्रं ॥ पाहितिये० ॥ ३७ ॥ भस्मावकुंठ(न)ण विनष्टमहाघकोटि रुद्राक्षकर्णपरवर्णमवर्णवर्ण ॥ पा
हीतिये० ॥ ३८ ॥ श्रीबिल्वमूलशिवलिंगसमर्चनेन निर्धूतपातककुलाचलमीशशीलं ॥ पाहीतिये० ॥ ३९ ॥ दारा
विहारपरिहाररमादरंमांधीरं दुरोदरविचारविवर्जितंच ॥ पाहीतिये० ॥ ४० ॥ नित्यंमहेशचरणस्मरणप्रवीणंप्र
क्षीणपापकरणंकरुणार्णवेश ॥ शंभोत्वदंघ्रिकमलंकलयामिकालेकालेनुवेलमतिवेलमतोनुवेलं ॥ पाही
तिये० ॥ ४१ ॥ नित्यंमहेशचरणस्मरणप्रवीणं प्रक्षीणपापकरणंकरुणार्णवेश ॥ पाहीतिये० ॥ ४२ ॥ यःकश्चिव
दंतकरिपुस्मरणप्रवीणः प्राणप्रयाणसमयेपिस एववंद्यः ॥ पूज्यः स एव सकलाघविनाशहेतुस्तत्पादपद्म
भजनंनिधिरेवकोपि ॥ ४३ ॥ श्रीकालकालकरुणाकरदीनबंधो भक्तप्रभूतकरुणारससारसिंधो ॥ मांदीन
मप्यनुदिनंपरिपालयेतियसंवदंतिसकृदेवहितेनमस्याः ॥ ४४ ॥ प्रक्षीणपातककुलंभसितत्रिपुंड्ररु
द्राक्षभूषणमभूषणमंधकारे ॥ पाहीतियः प्रतिदिनंप्रवदत्यमंदंतंवंदनीयमसकृत्प्रवदामिदेवाः ॥ ४५ ॥
स्वामिन्नशंकरकथार्णववाडवंमांशैवापकारतरुसारकुठारभूतं ॥ लिंगार्चनव्रतविदूषकशैलवज्रंपाही-

शिवर.हे.३ तियोवदलितिप्रणमंतिदेवाः॥४६॥ पापांबुराशिपरिहारकरप्रवीरं हारंहरार्चनपरंगलदुर्विकारं॥ धीराःपरंसलल- हृश.तृ.
१२६ मादरतोनमंतिसंतःकृतांतपरितापनिवारणाय॥४७॥ येशूलपाणिचरणस्मरणप्रवीणास्तेतावदंलकभय अ.४२
प्रलयप्रवृत्ताः॥ पुण्यार्णवाःपरमकारुणिकोत्तमाश्चतत्पादपद्मभजनेस्वभयंभवाब्धेः॥४८॥ हेकाशिका
पुरपतेत्रिपुरांतकारेविश्वेश्वरत्रिदशवंद्यपदारविंद॥ मांरक्षरक्षविषमेक्षणवीक्षणेनप्रक्षीणपापमितिवे
दविदोवदंति॥४९॥ सानंदमिंदुशकलाभरणप्रणामश्रेणींगृहाणकरुणोरुतरंगिणीते॥ मय्यन्वहंप्रसरतु,
प्रणतार्त्तिनाशंसंपादयत्विति वदंतितरांवमान्याः॥५०॥ आनंदकंदमदनद्रुमवीतिहोत्रपाहित्रिनेत्र
सुचरित्रपवित्रगात्र॥ श्रीविश्वनाथकरुणारसपात्रमात्रमित्युत्तमोत्तमतमाःप्रवदंतिशैवाः॥५१॥
दुष्टाघकोटिघटितानपिकालकूटकूटोपमानपिमहेश्वरपाहिदीनान्॥ दीनार्तिभंजनमहाव्रतदीक्षि
तास्मान्पाहीतिवेदवचनानिवदंतिमान्याः॥५२॥ लिंगार्चनव्रतपरान्नपरोस्तिलोके,कोपिप्रभूतपरमा
द्भुतपुण्यराशिः॥ लिंगार्चनव्रतपरोभवतीतिवेदास्तावद्वदंतिबहवोबहुधाबुधानां॥५३॥ मान्योमान्योन
शिवार्चकादितिमतिर्धन्यस्यसंजायते पुण्यस्तोमपरिपाकतःकथमपिप्रायःसधन्योसमः॥ लोके-

दुर्लभ एव शांभव इति प्रामाणिकानां वचोवीची संचरति प्रभाकरएकराकारा तमोनाशिका ॥५४॥ कोपि प्राणिषु कालकाल भजनं कर्तुं प्रवृत्तो भवेत्तं वंदे पुनरेव तत्पदरजः पुंजैर्मनोरंजनं ॥ कर्तुं यो यतते कृतार्तिसुकृते स्वस्वादुके मस्तके कृत्वा नृत्यति कोपि पुण्य विभवो भाव स्वभावप्रियः ॥५५॥ लोके दुर्लभ एव शांभव इति ज्ञात्वाति पुण्यार्जितैः ॥ लब्धश्चेद्दु विशांभवः स्वविभवैरभ्यर्चनीयो मुहुः ॥ मोहात्तद्दूजनं त्यजेद्यदि नदा स्याद्दुर्भगो दुर्भगा तन्माता जनकोपि दुर्भग इति ज्ञेयो पितस्सध्रुवं ॥५६॥ शंभुः शांभव जिह्वया रसमयं गृह्णाति नैवेद्य मित्यन्नं शांभव पुंगवाय विविधं देयं तदाराधनात् ॥ स्यादाराधित एव तेन समहादेवोपि तुष्टः सदा तं पुष्णाति धनादिभिर्वितनुते तां मुक्तिकांतामपि ॥५७॥ किं तद्दूदशि रोविचारनिरतः स्यात्तेन तीर्थोदक स्नानेनापि तपस्यया शिवपुरीवासेन यागैरपि ॥ यागैर्वा नियमेन शांभव पदांभोजार्चनं चेन्न तैशावृत्तैरपि कोटिशोपि न फलं स्वर्गापवर्गप्रदं ॥५८॥ शंभुर्मे प्रभुरित्यवैति बहुभिः पुण्याब्धिभिर्भूतले कालोन्मूलक काल कलना व्यासक्त शीलः खलु ॥ तं काल प्रलयेपि पूजय महामृत्युजय स्तं प्रिये ब्रह्मानंदमयं विधाय विविधोपाये र्मुदा वर्धते ॥५९॥ भाग्यं तस्य तदित्यवैमि बहुधा येना–

र्चितः शांभवः संतुष्टो निलयः शिवस्य नितरामंबासमेतस्यसः ॥ तस्माहप्यधिकोनकोपि भुवने ष्विल्यादरा-

दन्वहंतं दृष्ट्वाप्रणमंतिपुण्यनिवहैः सिद्धामुनींद्रा अपि ॥६०॥ योयंशांभवपुंगवः समनुजः सिद्धोमुनिः

किंन्नरो गंधर्वोन सुरोपिकल्पतरुरप्याढ्योन चिंतामणिः ॥ पीयूषं सुरधेनुरंबुनिधिरप्यद्रीश्वरोवाप

रंत्वन्यः कोपि महानुभावइतिमे भावोपि भावो भव ॥६१॥ किंचान्यद्यम भावलिंगनिलयंमृत्युंजयं

योर्चयेत्प्रस्तौतिप्रणमत्यपारविभवं दृष्ट्वाप्रदोषेप्रगे ॥ हृष्टस्तन्निलयंनयाहिनभटाः संप्रेक्षणीया

स्त्वयातन्मार्गेपिनयाहितत्कुलगृहत्यागंकुरुष्वादरात् ॥६२॥ मोहाद्वातवभावलिंगभजनासक्ता

लयाध्वन्यपिव्यासंगादपिवागमिर्यदितदा श्रीकालकालः स्वयं ॥ संहारंतवकर्तुमिछतिततः तन्निं

दिराध्वध्वनांसंगोमास्तुयमायमस्तुनियमस्तेजीवनेछायदि ॥६३॥ श्रीशैलात्समुपेत्यशांभववर

स्तद्भावलिंगार्चनंकृत्वातस्यस्तुतिंकरिष्यतिनुतिःसातावदभ्यस्यतां ॥ तेतावन्मुहुरादरेणविनया

न्नत्वाकृतार्थोभवत्वामापन्नसमेतितेननभयंतेकालकालादपि ॥६४॥ कालाद्यानधिकालकाल

कलनासक्तान्विभूतिप्रभारुद्राक्षाभरणान्छिवार्चनरतान्शैवोत्तमानादरात् ॥ दृष्ट्वाहृष्टमनाः प्रणम्य-

बहुधादूरादरादादरात् तेषांसुंदरमंदिराण्यपिमुहुः नलायथेच्छंवस ॥६५॥ हेविश्वेश्वरहेमहेश्वरमहादेवेति नामामृतंपीत्वापीनतनु स्तनोतिमुहुरप्यावर्त्तनंतस्ययः ॥ कर्त्तुंवांछतितत्पदांबुजरजःपुंजेनसंजीवनीकल्पेना स्तुशिरोविभूषितमितोभीतिर्नमृत्योरपि ॥६६॥ हेकैलासनिवासहेपशुपतेपाहीतिनामामृतंपीत्वापीनतनुस्त नोतिमुहुरप्यावर्त्तनंतस्ययः ॥ कर्त्तुंवांछति० ॥६७॥ हेगौरीकुचकुंभिकुंभविलसत्काश्मीरधाररसश्रीपुंजार्चि तपादपद्मभगवन्पाहीतियोनर्त्तनं ॥ कर्त्तुंवांछति० ॥६८॥ हेगौरीरमणारुणाचलपतेहेशंकराराधनव्यास क्तामरभूरहोत्तमतमस्वामिन्निनीशार्चनं ॥ कर्त्तुंवांछति० ॥६९॥ श्रीशैलपतेमुहुः पशुपतेहेशैलकन्यापते हेकामांतकहेपुरांतकइतिस्मृत्वेवयोनर्त्तनं ॥ कर्त्तुंवांछति० ॥७०॥ हेकाशीपुरनायकाश्रितशिवाचारक्त प्रापकव्यापारप्रियपालकाव भगवंनित्योवयोनर्त्तनं ॥ कर्त्तुंवांछति० ॥७१॥ श्रीमन्मेरुशरासनोरुशिखर स्फारप्रभामंडलव्यासक्तामगंडमंडलतलत्राहीतियोनर्त्तनं ॥ कर्त्तुंवांछति० ॥७२॥ हेमृत्युंजयहेसदाशि वशिवावामांगसंगप्रभोहेशंभोवृषभध्वजातिदययापाहीतियोनर्त्तनं ॥ कर्त्तुंवांछति० ॥७३॥ हेविश्वाधिक फालोलोचनचिरासारोरुसंसारजांपारक्लेशनिशाविनाशदययापाहीतियोनर्त्तनं ॥ कर्त्तुंवांछति० ॥७४॥

शिव०२
१०८

शंभो मे जननी त्वमेव जनको भ्राता सखा मित्रमित्यालस्येन विनाव दत्यनुदिनं भक्त्या पियो नर्त्तनं ॥ कर्तुं वांछति० ॥७५॥ शंभो भर्ग त्रिपुरांतक त्रिनयन श्रीनीलकंठ प्रभो शंभो मारहरामरप्रवर मां पाहीति यो नर्तनं ॥ कर्तुं वां० ॥७६॥ त्वत्पादांबुरुहार्चनेन विजयो भाग्यानि मे जीवनं जीवातुश्चलदेव मे शिव शिव त्राहीति यो नर्तनं ॥ कर्तुं वां० ॥७७॥ प्राणिप्राणनकारणप्रवण मां प्राणप्रयाणक्षणे प्रक्षीणं शिवनामधेयसुधया पाहीति यो नर्तनं ॥ कर्तुं वां० ॥७८॥ स्वामिन्नन्नपते धनाधिपपते दुःखाब्धिमग्नं मुहुर्लग्नं पापगणेन भग्नमनसं पाहीति यो नर्तनं ॥ कर्तुं वांछति० ॥७९॥ मामेकं शरणागतं शरणदानंदप्रदानोद्यत स्वाधीनं कुरु लिंगपूजनरतं पाहीति यो नर्तनं ॥ कर्तुं वांछति तत्पदांबुजरजःपुंजेन संजीवनी कल्पनास्तु शिरो विभूषितमितो भीतिर्न मृत्योरपि ॥८०॥ काश्यामेव सतिलं त्रिपुंड्रनिटिलो रुद्राक्षकंठो मुहुः श्रीवीरेश्वरलिंगपूजनरतं पाहीति यो नर्तनं ॥ कर्तुं वां० ॥८१॥ रुद्राक्षामलभस्मभूषिततनुः विश्वेश्वराराधनं कृत्वा शंकरचंद्रशेखर महादेवेति यो नर्तनं ॥ कर्तुं वां० ॥८२॥ कृत्वा मोदकबिल्वकोमलदलैः वीरेश्वराराधनं जप्त्वा शंकरनाम जीवनपरित्यागाय यो नृत्यति नर्तनं ॥ कर्तुं वां० ॥८३॥ शंभोर्लिंगसमर्चनोत्तरमयं घोरां तरायै र्विना देहो यातु लयं ममेति मनसा निश्चित्य यो नर्तनं० ॥ कर्तुं वांछति० ॥८४॥ भो वृंदारकवृंदवंदित ——

हरा० टी०
अ० ५२

लसत्पादारविंदार्चकं दीनंमामवशंकरस्मरहरव्याहारकृन्नर्तनं ॥ कर्तुंवां० ॥ ८५ ॥ अलमलमनुवेलंकाल कालं सलीलं कलयकलयकालेव्याल मालं सशूलं ॥ परिहरगुरुभारं क्रूरसंसारसारादनुसरगिरिकन्यास्मेरधारानुरागं ॥ ८६ ॥ त्रिपुरहरपदाब्जामंदमंदारमाला ललितपरिमलश्रीसंश्रयाणांप्रभावः ॥ कथमपि ममशक्योवक्तुमित्येव मन्ये गिरिशचरणसेवा पुण्यपूर्णार्णवानां ॥ ८७ ॥ अनुदिनमनुमोदैरिंदुखंडावतंसं सकृदपिसकलाशापाशनाशावकाशं ॥ निटिलतटतटिद्भूतभूतानुबंधं गिरिशमनिशमीशं संस्मरामः स्मरारिं ॥ ८८ ॥ शिवहरभवशंभोभर्गभीमस्मरारे त्रिपुरहरयमारेघोररूपांधकारे ॥ परिहरदुरितंमेपाहिपाहीतिधन्योजपतिमुहरपारानंदसंदोहकंदे ॥ ८९ ॥ कमलविमलबिल्वाराधितंशंगसंगंकरतलकमलश्रीसंश्रितंभावलिंगं ॥ कलयकलयचेतः चारुचामीकरांगंसकलभयविभंगं मंगलांगानुषंगं ॥ ९० ॥ हितलरमिदमेकं चिंतनीयं मनस्ते किमपि किलतवार्तावर्तनंतोद्विहाय ॥ प्रतिपदमभिलाषादोषवेगापहारं कुरुकुरुनिगमांगं भावलिंगं शुभांगं ॥ ९१ ॥ इदमिहहितवांछातीतमक्षंफलं ते वितरतिवनबिल्वाराधितं भावलिंगं ॥ विमलकमललेशाराधितंवाप्रदोषे किमपि किमिहकार्यंचिंत-

शिवरहस्यनीयं मनो मे ॥९२॥ ममहितमिदमेकं वांछितार्थप्रदानप्रवणकरणमेतत् भावलिंगं सशांगं ॥ सकलहितकरांगंपा-हरा०लू०
१८९ पसंगात्तभंगां करकलितकुरंगासंगतुंगं सुखांगं ॥९३॥ इदमिह कमलानां मालया पूजितं चेत्कलयति कमलानां वास- अ०५२
संवादमोदं ॥ इदमिह वसति मे तत्तवेदं तवतवतीदद श्रीसंश्रितं भावलिंगं ॥९४॥ ममहितमिदमेतत् प्रायशः पूरयि-
ष्यत्यहितममितदैन्यं वारयिष्यत्यमोघं ॥ सकृदपि हृदयाब्जारूढमेवास्ति गूढं दृढमिति दृढभक्तिः भावलिंगे
शुभांगे ॥९५॥ संसाराब्धिविशोषणाय विविधाघौघांधकाराचलप्रध्वंसाय विपत्कुलानलकुलापायांबुरूपा-
यते ॥ भोशांगामल भावलिंगनिलयामेयप्रभावप्रभो शंभो भर्गभवाभिभावककृतः कोपि प्रभावोधुना ॥९६॥
आशापाशविनाशनाय विविधापारापदातिव्यथाधाराध्वांतनिवारणाय निगमः श्रेणीप्रमोदादृतं ॥ वंदे सुंदर
भावलिंगनिलयं मृत्युंजयं चाव्ययं नित्यानंदमयं निरामयमहं मोहं विहायाधुना ॥९७॥ आश्रांतश्रुतिकोटिकू-
टविदितश्रीभावलिंगार्चनव्यापारप्रभवं प्रभुत्वमभयं चादृष्टमव्याकुलं ॥ तद्विन्नं सकलं भयाकुलमिति
ज्ञेयं ततः सर्वथा कर्त्तव्यं खलु भावलिंगभजनं सौभाग्यसंवर्धनं ॥९८॥ अन्यत्किंचिदिहोच्यते मुहुरिदं
संगोपनीयं सुरैः सर्वैरप्यनिशं शिवार्चनशिवध्याननिधानेपरे ॥ तेनैवाखिलसिद्धयः प्रतिदिनं संवादमोदे-

श्विरंहारं सुंदर मंदिरं हर पदाधारं श्रिताः सादरं ॥९९॥ ॥इति श्रीशिवरहस्ये हराख्ये तृतीयांशे व्यासमुनि संवादे नंदिकेश्वर सुर संवादो नाम द्विचत्वारिंशोध्यायः॥४२॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥स्कंद उवाच॥ ॥श्रीनंदिकेश्वर मनोहरवाग्विलासंहार प्रभाव समलंकृत इष्ट हेतुं॥ श्रुत्वा प्रहृष्टहृदयाः पुनरष्टमूर्त्तिपूजा प्रभावविभव श्रवणोत्सुकास्ते॥१॥ श्रीनंदिकेश शिवपूजन पुष्पपूर्ण कर्णामृतं शिवकथाकथनं त्वया द्य॥ संवादितं नंदिदमस्मदपार दुःख संसार रूप तरुमूल कुठाररूपं॥२॥ अस्माभिरद्य शिवपूजनवर्णनेन चित्तं प्रमत्तमपि शांततरं कृतं हि॥ एतस्य तावदधुना पुनरिंदुमौलि भूरि प्रभाव सुधया परया न्वयस्यात्॥३॥ त्वत्पादपद्म रजसा शिरसोन्वयस्यादस्माकमक्षयदयासुखवाहिनीभिः॥ क्लेशाः हवीद हन्नाशिरपि प्रशांतः श्रीविश्वनाथकथयाकथयासु शिक्षां॥४॥ ॥व्यास उवाच॥ ॥इत्युदीरितमाकर्ण्य नंदिकेशः प्रहृष्टधीः॥ पुनः शिवकथामेव वक्तुं समुपचक्रमे॥५॥ नंदिकेश्वर उवाच॥ ॥प्रभूत पुण्य पुरुषः कोपि लोके शिवार्चकः॥ ततस्तच्चरणांभोज स्मरणेनापि मंगलं॥६॥ शिवपूजन पुण्येन यत्फलं समवाप्यते॥ तत्फलं नान्य धर्माणां राशिभिर्वा समाप्यते॥७॥ जनको नाम यः कश्चिद्राजा धर्म परायणः॥ स सर्व भाग्य संपन्नः शौर्य मर्यादयाश्रितः॥८॥

तस्मिन्क्षा सति भूलोके रिपवो पिलयं गताः॥ सर्वे धर्मपरा एव शिवपूजा परायणाः॥९॥ मंदिराणां च निर्माणं लिंगानां स्थापनायते॥ कुर्वंत्यति प्रयत्नेन रत्नै रेव मनोहरैः॥१०॥ इदं तु श्रीमहेशस्य स्थानं लिंगमनुत्तमं॥ स्थापनीयमिदं लिंगं एतस्मिन्नृत्यमंडपे॥११॥ इदं बिल्ववनस्यैव स्थलं पल्वलमुत्तमं॥ अत्र कुल्याश्च कर्त्तव्याः पयः पूरसमन्विताः॥१२॥ तटाकाश्चात्र कर्त्तव्याः पारावारमनोहराः॥ स्नानपानादियोग्यास्ते हाराणामेव सर्वदा॥१३॥ तटाके षपि लिंगानि स्थापनीयानि कोटिशः॥ आरामाश्चात्र कर्त्तव्याः पुष्पराशि विजृंभिताः॥१४॥ शिवमंदिर निर्माणं वनमध्येपि सुंदरे॥ कर्त्तव्यं मंत्र पुष्पाणां आसारैः पूजनं भवेत्॥१५॥ वसंत पूजया शंभुर्वनमध्ये विशेषतः॥ प्रीतः सौभाग्यसंपन्नं करिष्यति न संशयः॥१६॥ सरसामत्र रम्याणां निर्माणात्करुणार्णवः॥ अपर्णा रमण स्तूर्णं निर्वाणमपि दास्यति॥१७॥ काले नयौवने रम्ये हर्म्यच्छाया समाश्रिते॥ शंकराराधने नैव कृत्ये रन्यैर्जनैः फलं॥१८॥ शिवभक्त्या शिवार्चायां कृतायां गिरिजापतिः॥ अदेयमपि यद्वस्तु तद्दास्यति न संशयः॥१९॥ गृहकृत्यैर्जनैः कृत्यं अत्रैव गिरिशालये॥ उषित्वा शिवपूजायां यत्नः कार्यः प्रतिक्षणं॥२०॥ लक्षशो बिल्वपत्राणां पूजया गिरिजापतिः॥ संतुष्टो मोदलक्ष्मीं च दास्यत्येव न संशयः॥२१॥ यद्यदिष्टं भवेन्नित्यं तत्तद्दास्यति शंकरः॥

रंकेभ्यो यत्र बिल्वेन जलेनापि समर्चितः ॥ न पश्यति महादेवः साधनानि विशेषतः ॥ भक्तिमात्रं स्वभक्तस्य स्वा
र्चनाय प्रपश्यति ॥२३॥ दृढभक्तिः सुधाधारा शिवलिंगे शिवात्मके ॥ यदि तोर्हे जितं तेन सकलं खलु भूतलं ॥
॥२४॥ शिवभक्तिर्दृढा यस्य तद्दृष्ट्वा दूरतः सुराः ॥ नमंति मुनयः सिद्धाः शुद्धांतःकरणाः सदा ॥२५॥ दृढा भक्ति
र्महादेवे यदि देवात्प्रजायते ॥ तदा नारी न संयाति तद्दृष्टि निलयालये ॥२६॥ भूतिभूषितसर्वांगं दृष्ट्वैव य
मकिंकराः ॥ प्रयांत्याशु ग्रहाश्चान्ये ग्रहपीडाश्च दारुणाः ॥२७॥ यस्य फाले विभूतिः स्यात् अल्पाल्पापि श्रु
तिश्रुता ॥ तं न स्पृशंति वेतालाः काले न प्रेषिता अपि ॥२८॥ यस्यांगे पतितं शुद्धं शिवमंत्राभिमंत्रितं ॥ तं दृष्ट्वैव
विनश्यंति पिशाचा अपि दारुणाः ॥२९॥ यदा पिशाचसंचारो यस्य वेश्मनि दैवतः ॥ तदा तन्नाशकं भस्म शिव
मंत्राभिमंत्रितं ॥३०॥ विभूतिकणरूपाणां कुठाराणां विलोकनात् ॥ पिशाचतरवः सर्वे सकंपाः प्रपतंति च ॥३१॥
महारोगाभिभूतानां भस्मोद्धूलनमौषधं ॥ कुष्ठाद्योपि नश्यंति भस्मधारणमात्रतः ॥३२॥ शिवमंत्रजपो
यत्र तत्र नायांति ते ग्रहाः ॥ ब्रह्मराक्षसवेतालाः पिशाचाश्च विशेषतः ॥ ३३॥ उद्धूल्य भस्मनांगानि रुद्राध्यायं
पठंति ये ॥ तद्देशं प्रति नायांति शाकिनी डाकिनी बलाः ॥३४॥ मृडस्मरणमात्रेण डाकिनी तु विनश्यति ॥ शाकि-

485

नीनाश मायाति नाशं यास्यति मातृका ॥३५॥ गृहीत्वा भस्मयो मंत्रं शैवं जपति सादरं ॥ तस्य स्मरण ग्रह पीडा विन-हरा.तुः
श्यति ॥ अस्मिन्वने पिशाचानां संचारो न भविष्यति ॥ बिभूतिपूत देहानां अस्माकं वसतिर्यदि ॥३७॥ यत्र लिंगा
निरम्याणि नार्मदानि विशेषतः ॥ तत्र तावत्पिशाचानां वार्त्तापि न भविष्यति ॥३८॥ वयं धन्यतमा एव शिवलिं
गार्चनप्रियाः ॥ प्रीतिः शिवार्चने लोके दुर्लभा खलु वस्तुतः ॥३९॥ न दारेषु कुमारेषु न धनेषु निधिष्वपि ॥ अस्मा
कं प्रीतिरधुना किंतु सा शिवपूजने ॥४०॥ अयं पुण्यतमः कालो धन्यधन्या वयं परं ॥ यतः प्रीतिरभूदस्य महादेव
समर्चने ॥४१॥ ईदृशी बुद्धिरस्माकं न पूर्वमभवत्खलु ॥ अधुना तावदुत्पन्ना सा नः सर्वार्थसाधनं ॥४२॥ ये
न केनाप्युपायेन महामृत्युंजयार्चने ॥ कृते तावदिहेदानीं मृत्यो रपि न नो भयं ॥ जलानि विमलान्यत्र नवबिल्व
दलान्यपि ॥ तैरर्चितो महादेवः संतुष्टोद्य भविष्यति ॥४४॥ भक्ति सृष्टिः कृता तेन महाकारुणिकेनहि ॥ शंक
रेण तया स्माकं सिद्धिरेव पदे पदे ॥४५॥ सर्वाराध्यतमः शर्वः सर्वदेति प्रमा परं ॥ भक्तिरेषा प्रवृद्धास्ति शंक
रानुग्रहात्खलु ॥४६॥ शंकरानुग्रहस्यास्मिँल्लोके किमपि दुर्लभं ॥ अतः सा दुर्लभा भक्तिः अस्माकमभिव
र्धते ॥४७॥ शिवभक्तिसुधाधारा मुक्तिधारा परंपरा ॥ सा तावद्दूरि पुण्यानां हाराणामेव जायते ॥४८॥ हारोप-

हारपुष्टांगाः शांगाः शांगानुषंगिणः॥ शंगलिंगार्चनरताः शंगभक्तिपरायणाः ॥४९॥ शिवभक्तिसुधापान
पीनानां चरणांबुजं॥ स्मृत्वापि मुक्तः पापेभ्यो भविष्यत्येव मानवः॥५०॥ सहसा न भवत्येव शिवभक्तिः सु
धामयी॥ सुधा मर्त्यैः कथं प्राप्या विना यत्नेन केनसा॥५१॥ न यत्नैर्नापि तपसा शिवभक्तिः परं तु सा॥ शिवा
नुग्रहमात्रेण भविष्यति न संशयः॥५२॥ रचिता शंकरेणैव शिवभक्तिसुधाप्रपा॥ सा महादेवभक्तानां
सुलभा खलु केवलं॥५३॥ शिवभक्तिसुधापानं न कृतं येन तज्जनिः॥ व्यर्था तज्जननी तावदास्तिबंध्येति
धीमम ॥५४॥ किं तेन जातमात्रेण पत्रेणापि फलं परं॥ असंप्राप्त महादेवभक्तिभारेण केवलं ॥५५॥ यस्य
भक्तिर्महादेवे न भविष्यति सर्वथा॥ धराभारकराकारं तं धरा सहते कथं॥ गिरयोपि न भाराय धरायाः किंतु
यस्य सा॥ न भक्तिः स तु भाराय सा तन्मरणमिच्छति॥५६॥ शिवभक्तिविहीनानां धराभाराय जीवनं॥ ततः
सा न कथं तेषां धारा मरणमिच्छति॥५७॥ धरणी मरणं तस्य त्वरया याचते मुहुः॥ न यस्य शंकरे भक्तिर्दृढमू
ला प्रजायते॥५८॥ रे रे शंकरभक्तिभारसुधया किं नाभिषिक्तोधुनाधिग्धिक् तव जीवनं मरणमप्यद्यास्तु
ते सत्वरं॥ भारो मे गिरिभिर्न किंतु भवता तद्भक्तिहीनेन मे भारो भूरितरो भवत्यनुदिनं हा रे तरे दुर्धरः॥
॥५९॥

शिवशंभक्तिर्भाग्यवतो भवे भवति सा भावे भवे दुर्लभा भावस्यामितपुण्यपूर्णकरुणापूर्णार्णवस्यान्वयात्॥ कल्या-
णान्यपिहार भक्तिसुसुधासिक्तेन मे जीवनं भूभारायपरं भवेत बहवो हारे तराः पामराः॥६०॥ रे हारे तरे
कुशीलकुमते रे शंकराराधनध्यानाधानविरुद्ध दुर्धन दुराचार प्रवीराधुना॥ मूर्धा ते भिदुरे रघः पततु मे
भारायते जीवनं धिग्धिग्धिक् तव जीवनं चिरमिदं भूयेपि भारायमे॥६१॥ हा रे रेव ममापि जीवनमिदं तत्सा
दरेणु प्रभातावद्भाति विभूषणाय भसितं तत्पादुका संगतं॥ तद्देह प्रभव प्रभंजन महासंजीवनी संगमात्ता
वज्जीवनमित्यवेमि मुकुरायत्यत्फुलतः शंकरः॥६२॥ को वा शंकर पुंगवेन सदृशो भूमंडले दृश्यते तत्तुल्यो
न सुरो न वा मुनिवरो गंधर्वनर्यो पि वा॥ शेषो वा गुरुरेव वा विधिरयं नारायणो वायतो नित्यं शंकरपादुका
र्चनरतं वेदांतगीतं विदुः॥६३॥ योनापारजनिप्रपारविभवे भावानुरागादरान्नोरेरप्यमलैः प्रफुल्लकमलै
र्बिल्वी दलैः कोमलैः॥ मूलैर्बिल्वफलैः फलैश्च विविधैः लिंगं समभ्यर्चितं शांगं मंगलदं स एव हि ह
र प्रेमास्पदं शंकरः॥६४॥ स शिवं हृदि साधुशीलयंतः शिवपंचाक्षरमक्षरं जपंतः॥ गिरिशाय हितार्थमर्प
यंतः शिवमेव प्रयताः प्रयांति संतः॥६५॥ गिरिशाहितमर्थमर्दयंतः शिवपूजार्थमिहार्थमर्पयंतः॥ शिव-

मार्गरतान् प्रचारयंतः शिवमेव प्रयताः प्रयांति संतः॥६६॥ शिव पूजनपुण्यमाचरंतः शिवपूजानियमान्प्रतीक्षयंतः॥ शिवभक्तिविरोधमाक्षिपंतः शिवमेव०॥६७॥ शिवशास्त्ररतान् परीक्षयंतः शिवपूजानिरतान्प्रमोदयंतः॥ शिवमेव सुरोत्तमं वदंतः शिवमेव०॥६८॥ शिव भक्तिनिधानमार्जयंतः शिवभक्त्यंबुनिधीन्प्रवर्धयंतः॥ शिवभक्तिरसं प्रबोधयंतः शिवमेव०॥६९॥ श्रुतिबोधितभूतिमुद्वहंतः श्रुतरुद्राक्षविभूषणं वहंतः॥ शिवलिंगमसंगमसंगमर्चयंतः शिवमेव०॥ स्मरशासकमेव संस्मरंतो भगवंतं भवमेव भावयंतः॥ भवभूतभयानिसंहरंतः ~~त्रिपुरारतिकथा विचारयंतः॥ त्रिदशेशविधेयमाचरंतः शिवमेव०॥७०॥ नवरत्ननुतिं पठंतो~~ शिवमेव०

॥ शिवमेव प्रयताः प्रयांति संतः॥

407

॥७१॥ शिवनाम सुधानिधिं पिबंतः शिवमूर्त्तिं हृदि संततं भजंतः॥ शिवसुंदरमंदिरे वसंतः शिवमेव०॥७२॥ त्रिपुरारिपुरेषु संचरंतस्त्रिपुरारातिकथां विचारयंतः॥ त्रिदशेशविधेयमाचरंतः शिवमेव०॥७३॥ नवरत्ननुतिं पठंतो नवचंद्राभरणं विलोकयंतः॥ नवखंडमहीं प्रशासयंतः शिवमेव०॥७४॥ इथंवंदंतस्तेसर्वे मिथिलादेशसंश्रयाः॥ शिवार्चनपरा एव रुद्राध्यायजपादराः॥७५॥ याज्ञवल्क्यः कुलगुरुस्तेषां शांभवसत्तमः॥ स कदाचिदनाहूतो प्यागतो जनकालयं॥७६॥ तं मुनिं जनको दृष्ट्वा भस्मोद्धूलितविग्रहं॥

त्रिपुंड्ररेखाविलसत्फाल भागं तु लोषसः ॥ रुद्राक्षमाला भरणं शिवमंत्र जपोत्सुकं ॥ शिवध्यान सुधापानपीन-
लोलुप मानसं ॥७८॥ शिवध्यानपरानंद संदोह हृदयांबुजं ॥ आनंदाश्रु सुधाधाराधाराधरवरं परं ॥७९॥ रुद्राध्या
यार्थकथन प्रवीणं प्रवणेक्षणं ॥ विलोक्य मुदितो नत्वा बभाषे विनयान्वितः ॥८०॥ ॥जनक उवाच॥ ॥कृतकृ
त्योस्मि धन्योस्मि भवदागमनादिह ॥ कुतः समागतः स्वामिन् शांतं वर्ष्मानघं खलु ॥८१॥ महाभ्युदयका
लोयं पापानां प्रलयोप्यभूत् ॥ शांभवागमनं भाग्यैः भवत्येव भवे भवे ॥८२॥ किमसंभावितं पुंसां शांभवागम
ने सति ॥ शांभवैः सह संभाग्यं समायातीति निश्चितं ॥८३॥ अतः परं मंगलानां निलयोप्यालयो मम ॥
मंगलापति भक्तस्य यस्मादागमनं गृहे ॥८४॥ धाराधरेणापि विना ति वृष्टिर्वृष्ट्या विना सस्य समूहवृ
द्धिः ॥ यथा तथा शांभव पादपद्म रजःप्रसारोपि मुदे गृहेमे ॥८५॥ सस्यैर्विना धान्यविशेषराशिर्गर्भै
र्विना पुत्रसमूहजन्म ॥ यथा तथा० ॥ गुरूपसत्त्यापि विना समस्तविद्याविलासोप्यनुवेलमेव ॥८६॥
यथा तथा शांभव पादपद्म रजःप्रसारोपि मुदे गृहेमे ॥ यमादियोगव्यसनैर्विनापि सद्योमहासिद्धि
समृद्धयो वा ॥८७॥ यथा तथा० ॥ मार्गश्रमैरप्यमितैर्विनापि विश्वेशलिंगाग विलोकनं च ॥८८॥ ॥

यथातथा०॥ धर्मैरपारैर्विविधैर्विनापि मोदांगनापांगविलोकनंच॥८९॥ यथातथा०॥ पाकादिकानेकम
हाप्रयत्नैर्विनान्नपानादिविशेषसिद्धिः॥९०॥ यथातथा०॥ महांधकारप्रलयोनुभान्नुःभान्वग्निचन्द्रप्रभया
विनापि॥९१॥ यथातथा०॥ प्रदोहनादिव्यसनैर्विनापि गोदीरवृष्टिः मणिकादिकेषु॥९२॥ यथातथा०॥ पु
ष्टिः प्रकृष्टा दधिदुग्धसारघृतान्नपक्वान्नगणैर्विनापि॥९३॥ यथातथा०॥ दलैरबालैः नवकुड्मलैर्वापु
ष्पैर्विनानन्यफलप्रसूतिः॥९४॥ यथातथा०॥ विनांजनेनापि विशेषमूलैरसूलैर्यनिधिकोटिलाभः॥ यथातथा०
॥९५॥ अमंदानंदकंदानांहारपादारविंदयोः॥ अन्वयोयोग्यएवेतितेनानंदःप्रजायते॥९६॥ अतःपरंसु
दत्तापियुक्तामन्मंदिरस्यास्यविशेषताद्य॥ यतोमहादेवपदारविंदध्यानप्रवीणामृतवीक्षणंमे॥९७॥ इ
दंपरंपावनमेवजन्मसुजीवितंजीवितमस्यजातं॥ यतोमहादेव०॥९८॥ अपारकल्याणपरंपराणांमन्मंदि
रेषुप्रसरोपिभावि॥ यतोमहादेव०॥९९॥ निर्मलःकुलंमत्कुलमेवजातंत्वत्पादपद्मप्रसरेणगेहे॥ यतोम
हादेव०॥१००॥ उरहंसुराणामपिपूज्यएवसुरस्तुतीनामपि भाजनंहि॥ यतोमहादेव०॥१०१॥ दूरंगतापात
ककोटिवार्तांकृतांतवार्तापिविशेषतोपि॥१०२॥ भाग्योदयःकोयमभूतपूर्वःशिवप्रसादोयमनामयोहि॥

यतो महादेव०॥३॥ तृप्तास्तेपितरस्तदा गमनतत्वपादसंक्षालनात् पीतंतैरमृतं त्वदंघ्रिकमलप्रक्षालनाभ्यर्च- हरा०नू० नैः॥ जन्मेदं ममपावनंपशुपतिप्रेमास्पदं सं पदां सर्वा संपदमस्मिविस्मितमिदं किं चित्रमात्रापिकिं॥४॥ अ स्माकं गुरुरुत्तमोत्तममहादेवांघ्रिपंकेरुहध्यानाभ्यर्चनपूतमानस इति स्वा खर्वगर्वा श्रयः॥ सोयंपुण्यत मोग्रगण्य इतिमे बुद्धिः प्रवृद्धाधुना साध्वीदेवधुनीववृद्धिमगमत् वृद्धिं गमिष्यत्यपि॥५॥ अस्माकंशिव लिंगपूजकपदांभोजार्चनेन श्रियोतिः श्रेयोपिपदेपदेप्रतिभवे भावानुरागोदयः॥ उत्कृष्टाभ्युदयः कुला चलनिभापायव्ययानामयः शांगांगान्वयसंभ्रमोपि बहुधा संभावितः श्रेयसे॥१०६॥ ॥६॥ इतिश्रीकासीवि स्थले श्रीविश्वेश्वरार्पणमस्तु॥ ॥ इतिश्रीशिवरहस्ये हराख्ये तृतीयांशे स्कंदमुनिसंवादे जनकपश्नो नाम त्रिचत्वारिं शोध्यायः॥४३॥ ॥४॥ ॥नंदिकेश्वर उवाच॥ ॥व्याघ्राजिनोपविष्टाय याज्ञवल्क्याय धीमते॥ शां भवाय प्रसन्नाय जनकः प्रणतो मुहुः॥१॥ ततः प्राह मुनिश्रेष्ठं जनको विनयानतः॥ मुक्त्युपाय विशेषं मे वद शांभवसत्तम॥२॥ तीर्थाटनेन कालोपि नीतः सज्जनसेवया॥ गोदानैरपि भूदानैस्तुलादानैःसहस्रधा॥३॥ कन्याप्रदानैर्विविधैरन्नदानव्रतैरपि॥४॥ विचित्रगृहदानैश्च- फलपुष्पकुलाकीर्णवनदानैश्च कोटिशः॥

गजदानादिभिस्तथा॥ नीतः कालस्तथाप्यस्य संसाराद्विरतिर्न मे॥५॥ किमस्तिमूलमेतस्य शरीरममवल्क
यं॥ अहमित्यभिमानोपि कथमस्य प्रजायते॥६॥ गौरोहमिति बुद्धिश्च सुंदरोहमिति स्वतः॥ धनं ममेदं भार्या
पि कुमारोपि ममेत्यपि॥७॥ अंतस्तत्कुमारोहं इति धीरपि जायते॥ इदं सर्वं विशिष्याद्यावदतत्वविदुत्तम॥८॥
॥याज्ञवल्क्य उवाच॥ ॥संसारमूलभूतानि पापानि विविधान्यपि॥ तानि सर्वाणि पापानि संसारं जनयंत्यहो॥
॥९॥ पापसागर एवायं संसारश्च पुनः पुनः॥ पापैः प्रवर्धते नीरैरंबुराशिरिवान्वहं॥१०॥ पदे पदे पि पापानि सुगमा
नि कृतान्यपि॥ कर्त्तव्यानि क्रियंते च न पापविरतं मनः॥११॥ अनायासेन पापानि बहूनि विविधान्यपि॥ आयां
ति तानि पापानि वारितानि न केनचित्॥१२॥ तत्पापनाशनोपाय चिंतने यत्न एव न॥ पापानुसरणोपायय
त्नैर्नीतं वयो यतः॥१३॥ यथा पापमतिः पुंसामनायासेन लभ्यते॥ तथा पुण्यानुकर्णे मतिर्नैव प्रजायते॥१४॥
परद्रव्ये परद्रोहे परदारेषु सर्वदा॥ यया मतिस्तथा धर्मे न भवत्येव सर्वथा॥१५॥ सा पितावन्मतिः पापैः पुनः
पापानुवर्तिनी॥ सा मतिः पापमूलत्वात्पापमेवानुधावति॥ यथा यथा पातकानि प्रवर्धंते तया तथा॥ संसार
वृद्धिरित्यस्य नाशोपायो न दृश्यते॥१७॥ किंच चित्रमिदं नैव पापे संसारिणां मतिः॥ विषबीजेन नाम्रस्य वृद्धिश्च

जन्मांकुरस्यवा ॥१८॥ बीजानुरूप एवस्यादंकुरोपि तथासति ॥ संसारः पाप रूपः स्यात् पापे रेवप्रवर्धते ॥१९॥ संसार पापगिरयः प्रण श्यंति कदापिन ॥ तदुपायानुसारेण सोप्युपायोमयोच्यते ॥२०॥ अनायासे नसंसारः प्रवृद्धोपिविन श्यति ॥ शिवार्चनेन तूलादि र्यथावन्हि कणान्वयात् ॥२१॥ शिवार्चनं चसुलभं तत्रबुद्धिश्च दुर्लभा ॥ पुण्यकोटिभिरे वस्यात् बुद्धिः शंकरपूजने ॥२२॥ विहितानंत पुण्यानां करणे प्रति जन्मनि ॥ शिवार्पिता निलान्येव जनयंति तमाप्र तिं ॥२३॥ लोके शिवार्पणं कर्तुं पुण्यं पुण्यां बुधिः परं ॥ प्रवर्ततेतदन्यस्तु तत्कर्तुंनप्रवर्तते ॥२४॥ कोपिलोके महापु ण्यैः शिवानुग्रह भाजनं ॥ तदनुग्रह मात्रेण बुद्धिः शंकर पूजने ॥२५॥ उग्र लिंगार्चने भक्ति रुग्रैः पुण्यैः प्र जायते ॥ उग्रस्यापि न चोग्रत्वं सर्वेष्वपि विशेषतः ॥२६॥ येनेवा विहितं कर्मकृतंघोर तरं महत् ॥ तं प्रत्युग्रो प्यनुग्रोपि स्वभावादेवशंकरः ॥ तंप्रत्युग्रोमहारुद्रस्तं पातयति सर्वथा ॥ यः शंकरार्चनं त्यक्त्वा शिवान्या र्चनतत्परः ॥२८॥ संसार नरके घोरे गर्भवासे विशेषतः ॥ पातयत्येव तं मर्त्य ममृत्युं जन पूजकं ॥२९॥ गर्भव रूपकथने लज्जा तावत्प्रजायते ॥ तथापि मोहनाशाय तत्ताव त्प्रतिपद्यते ॥३०॥ कामांधकार ग्रस्तस्यविवे करहितस्य तत् ॥ यौवनोन्मादमत्तस्य तरुणी पुरतिर्भवत् ॥३१॥ तरुणी गारुणी तुल्या सेविता भ्रांतिमेवसा ॥

जनयत्यनपायासाकष्टरूपाविशेषतः॥ ३२॥ वारुणीपानमत्तस्य विवेकोनयथातथा॥ तरुणीसंगतस्यापिवि
वेकस्त्वतिदुर्लभः॥ ३३॥ वारुणीपानमत्तस्य किंचिदौषधमस्तितत्॥ सेवितंवारुणीदोषं निवारयति तत्क्षणे॥
॥ ३४॥ पापसाधनमेवेदं तरुणीमरणावधि॥ मरणेपि स्मृता सापि मरणाय प्रकल्पते॥ ३५॥ मृतापितरुणी ता
वत्तरुणेन स्मृता सति॥ तरुणज्वररूपेण मरणायोद्यता भवेत्॥ ३६॥ वारुणी चेत्परित्यक्ता स्मृतानोन्मादसा
धनं॥ त्यक्तापितरुणीतावदुन्मादाय प्रवर्त्तते॥ मरणं साधयत्येव दूरेपि तरुणी स्थिता॥ अतस्तत्संगयत्नोपि
परित्याज्यो मनीषिभिः॥ ३८॥ स एव बुद्धिमाँल्लोके स एवातिविचक्षणः॥ नयस्य तरुणीसंगे रतिःसर्वात्मना
भवेत्॥ ३९॥ तरुणीमुखरूपेण विषेण मरणं क्षणात्॥ अदृष्टेनापि दृष्टेन नूनं विषविलक्षणं॥ ४०॥ पीतेनैव
विषेण स्यान्मरणं दूरतस्तु नः॥ दूरेपि तरुणी सद्यो मरणस्यैव साधनं॥ ४१॥ तारुण्यवारुणीपानात्तरु
णीतनुसंगमात्॥ उन्मादे नास्ति किंचित्रं तदुद्यतस्तस्य कारणं॥ ४२॥ कारणानि बहून्येव मरणे संतितानि
तु॥ तरुणस्य विशेषेण तरुणी परमाणवः॥ ४३॥ तरुणी विरहे प्राणेवं तरुणी मरणक्षणे॥ क्षीणाधरिण्यां
जीवंति तरुणी परमाणुभिः॥ ४४॥ अवस्था भेदमासाद्य युवतीसंगमे सति॥ कामो द्वेकाःकाममेवकाम-

११०

कार्यकरोनरः॥४५॥तदा पुण्य प्रभावेन शंकरस्मरणेसति॥ तद्योग जनितं सौख्यं शंकराय निवेदयेत्॥४६॥तन्हरा.नृ
न्निवेदनपुण्येनतत्रयो जायतेनरः॥ सशंकरो भवत्येव तत्तत्पुण्यानुबंधतः॥४७॥तदा यदि सु दुर्मतः चिंतां अ.५५
तररतो यदि॥अशंकरो भवत्येव जायमानो नरस्तदा॥४८॥ जीवस्तु नित्य एवाय माकाश सदृशस्ततः॥ त
स्योत्पत्तिर्न चित्तस्य जन्मदेहस्य केवलं॥४९॥ननाशो नापि जन्मास्य जीवस्य जनिधीरपि॥ देहमादायनि
ष्पन्ना तद्भेदोप्युच्यते शृणु॥५०॥लिंगदेहो स्यकोप्यस्ति स्थूल देहस्य कश्चन॥देहान्वयः सर्वकापि मुक्तिः
सतु विनश्यति॥५१॥लिंग देहान्वय स्तस्य स्थूल देह दये सति॥ द्विविध स्थूल देहो पि पार्थिवापार्थिवा
त्मकः॥५२॥पांच भूतात्मकं देहं केचिदाहुर्वयंतुन॥पार्थिवानि शरीराणि नरादीनां विशेषतः॥५३॥भूतां
तराणां संयोगः पार्थिवे जायते ततः॥ तत्संयोगेन तद्देहे पांच भौतिकता भ्रमः॥ भूतांतर गुणध्वंसेगुणि
भूतलयेसति॥गंधानुवृत्यातद्गंधगुणकं पार्थिवं मितं॥गंधेन पार्थिवत्वस्याप्यनुमानंतनुष्वतः॥अस्म
दादि शरीराणि पार्थिवानीति मन्यतां॥५६॥अस्य देहस्य जनने रेतः प्रथम साधनं॥ लोहितं चतयोर्योगो
गर्भ भोगे प्रजायते॥५७॥रेतसो लोहिता धिक्यं नारी रूपं प्रजायते॥नारीयोनि प्रदेशस्थं लोहितं तस्य साधनं॥
॥५८॥

तदन्योन्यान्वयेनैव कललं जायते ततः ॥ तस्यापि कललावस्था पक्षमात्रा प्रजायते ॥ ५९ ॥ ततः परं बुद्बुदत्वं मासमात्रेण जायते ॥ प्रसरत्वं द्वितीये तु मासि तस्य प्रजायते ॥ ६० ॥ तृतीये रसपुष्ट्यातु मांसगोलः प्रजायते ॥ तत्रैव शाकेरुच्छाया मंगाभिव्यक्ति रित्यपि ॥ चतुर्थे त्वांत्र संबंधः पंचमे पित्त संगमः ॥ षष्ठेमज्जास्थि संबंधः तदा प्राण समन्वयः ॥ ६२ ॥ स्वस्वादृष्ट विशेषेण जीवस्तत्रान्वितो भवेत् ॥ लिंगदेहेन तेनैव तद्विनाशो न जायते ॥ ६३ ॥ प्रभूत पुण्यपूरस्य कस्यचित्त्वां भवस्यतु ॥ भोगेच्छायां गर्भ भागे प्रवेशः स्यात्सुखवहः ॥ ६४ ॥ पापपुंजस्वरूपस्य शिवभक्ति वियोगतः ॥ पाप भोगाय गर्भेषु वासो भवति सर्वथा ॥ ६५ ॥ पुण्यावरणयोगेन दुःखं धानुभवोपि न ॥ दारुपुत्तलिकामध्य प्रविष्टस्येव वस्तुतः ॥ पापात्मनां तु गर्भेपि घोरनरकयातना ॥ तया यातनया तस्य जीवनं मरणोपमं ॥ ६७ ॥ यावद्गर्भे निवासस्यात्तावत्कर्मानुचिंतनं ॥ ६८ ॥ पुण्यवासनया तत्र पुण्यं कर्तव्य मित्यपि ॥ [illegible] ॥ बुद्धिर्भवति पुण्यानां तस्यापुण्य मतिस्तु न ॥ ६९ ॥ पापात्मनां पापमेव कर्त्तव्य मिति धीः परं ॥ जायते तेन पापेन रतिः स्यात्पापकर्मणि ॥ ७० ॥ सप्तमे पुष्टिरंगानां अष्टमे पि प्रजायते ॥ नवमे त्वंगभागानां सुखवेदनयोर्मतिः ॥ ७१ ॥ दशमे गर्भचालन प्रभूतेन समन्वये ॥

शिवरह॰ ३
१९७

हरा॰ रु॰
अ॰ ४४

भवत्येवाविलंबेन योनिमार्गाद्विनिर्गमः ॥७२॥ बाल्यबालान्वयात्पश्चात्मंदबुद्धिः प्रजायते ॥ कश्चिदक-
श्च न पुण्यात्मा प्रबुद्धज्ञानवानपि ॥७३॥ ईदृशानि शरीराणि पापानिष्ठानां पुनः पुनः ॥ दुष्टान्यपि शरीराणि
कष्टभोगाय केवलं ॥७४॥ शांभवानां शरीराणि पुण्यरूपाणि केवलं ॥ ततस्तानि शरीराणि पुण्यानीत्यवधारय
॥७५॥ पुण्यकारणभूतानां शरीराणां विशेषतः ॥ पुण्यपूरान्वयस्तेन पुनः पुण्यं प्रजायते ॥७६॥ पुण्यं कर्तुं प्रवृ-
त्तस्य स्वेच्छयादेहसंगमः ॥ नेदेहेन विना पुण्यं देहं पुण्यस्य साधनं ॥७७॥ लिंगार्चनं शरीरेण विना नैव प्रजायते
॥ अतः शरीरमप्येकं शिवपूजनसाधनं ॥७८॥ भूरिपुण्यप्रभावेन शांभवो भुवि जायते ॥ तं दृष्ट्वा भूरियं तुष्टा
भवत्येव न संशयः ॥७९॥ अनेन देहयोगेन शांभवो मयि संगतः ॥ धन्यास्मि मम पुण्यस्यनांतोस्तीति मही वदः
॥८०॥ शरीरं शांभवं धन्यं शरीरस्यास्य रक्षणं ॥ कर्तव्यमिति भूर्नित्यं करोत्येवानुभाषणं ॥८१॥ एवं प्रजातदे-
हस्य शांभवस्य महात्मनः ॥ जन्मप्रभृति बुद्धिस्यात् श्रीमहादेवपूजने ॥८२॥ महादेवार्चने तस्य जाता बुद्धिः
प्रवर्धते ॥ बाल्येपि ज्ञानसंपन्नो मानसपूजने रतः ॥८३॥ तत्वज्ञानं समासाद्य शिवरूपं विचिंत्य च ॥ गर्भप्रवे-
शमारभ्य शिवपूजारतो भवेत् ॥८४॥ विषयेष्वनुरागोपि तस्य तावन्न जायते ॥ शिवार्चने परं बुद्धिः धन्योहमि-

तिजायते ॥८७॥ कस्यचिद्दूरिपुण्यस्य वाग्व्यापारानुवर्तनं ॥ उच्चैर्महेशनामानि बाल्ये पिवदति ध्रुवं ॥८८॥ शिवपूजनसामग्रीं संपाद्य विविधां मुहुः ॥ करोति पूजनं शंभो लिंगे मंगलदायके ॥ जन्मप्रभृतिमस्यस्या त्महादेवार्चने मतिः ॥ तस्य पुण्यस्य नान्तोऽस्ति सगणः केवलं नृप ॥८८॥ गणा अप्यभिवांछंति मानुषं देहमाश्रिताः ॥ यतो मानुषदेहेन पुण्यवृद्धिः प्रजायते ॥८९॥ यस्तु मानुषदेहेन दुर्लभेन विशेषतः ॥ शिवार्चनपरः पुण्यैः तत्पुण्यममितं भवेत् ॥९०॥ पुण्यानि संत्यनेकानि तानि पुण्यानि केवलं ॥ शिवपूजनपुण्योपकरणानि विशेषतः ॥ ९१॥ यानि पुण्यान्यनंतानि तानि सर्वाणि वस्तुतः ॥ शिवपूजोपयुक्तानि पुण्यत्वं प्राप्नुवंति हि ॥९२॥ पुण्यानामपि पुण्यत्वं केवलं शिवपूजया ॥ अतः शिवार्चनस्यास्य महिमापि महान्खलु ॥९३॥ शिवार्चनमहिम्नोपि महिम्नः कीर्तनं परं ॥ मुक्तिसाधनमित्याहुः ततस्तत्केन वर्ण्यते ॥९४॥ फलं शिवार्चनस्येदृग्यदेवेतियोवदेत् ॥ सस्ववेदबाह्येषु गणनीयो विशेषतः ॥९५॥ शिवपूजाफले यत्तु वेदांतेष्वपि नश्रुता ॥ अमितं तत्फलं यस्मात्तस्मिन्नमितधीर्मता ॥९६॥ शंकरेणापि महसा शिवार्चनफलं परं ॥ इयदेवेति निर्णेतुं न शक्यमिति मे मतिः ॥९७॥ शूलपाणिः स्वभावेन सर्वज्ञशिरोमणिः ॥ तदर्चनफले यत्तानास्तीतिम-

992

नृतनृप॥ ९८॥ कृते शिवार्चनाभ्यासे बहुकल्पेषु सादरं॥ तदा शिवार्चनफले परमे रमते मनः॥ ९९॥ मनोहराणां च-

मनोहरं हि मन्ये महादेव समर्चनं स्यात्॥ ल देवतावन्मधुरेषु सर्वेष्वतीव तावन्मधुरं मनोज्ञं॥ २००॥ वंदे पुण्यस्व रूपं भव भजन पराभूत संतापपापं प्रध्वस्तानंतकोपं प्रतिहतविविध ध्वांत संकाश चापं॥ रत्नाधारातिधीरं स्फुरदुरु शिखराकार चामीकराख्यां पारापार प्रूरव्यातिकर रुचिराचारमेरुत्व चापं॥ २०१॥ ॥ इति श्री शिवरहस्ये हराख्ये तृतीयांशे जनकयाज्ञवल्क्य संवादो नाम चतुश्चत्वारिंशोध्यायः॥ ५४॥ ॥ श्रीकाशी विश्वेश्वरार्पणमस्तु॥ ॥ जनक उवाच॥ ॥ याज्ञवल्क्य मुनिवाक्सुधानिधे राधिशाति रधुना विधूदयः॥ स्वर्धुनी विविधवीचिकोच्चयः सोयमभ्युदय एव कोपि मे॥ १॥ आपदामपि निवारणाय सा याज्ञवल्क्य मुनिवाग भूदिह॥ सा महेश्वरकथानुवादिनी घोरपापपरिहारकारिणी॥ २॥ अस्मदर्जित महाघ संक्षयो प्यद्य जात इति मे मनागपि॥ पापभीतिरपि नोपजायते जन्मकोटि घटने पि सर्वथा॥ ३॥ अद्य धन्यतममेव जन्म मे शांभवेन महसा षणं यतः॥ जातमाशु कुकृतां कुराशयो वृद्धिमेव मुपयांति को दिशः॥ ४॥ कोयमभ्युदयकाल संगमः शंगलिंगविविधार्चनोद्यमः॥ जात एव मम तत्समागमाद्धन्य धन्यमिदमस्य जीवनं॥ अद्य मन्त मिति जीवनं परं नीय-

१९३

तेनशिवपूजनेऽद्यमेः॥अद्यतावदधुनातदघमोजातएवशपथोपिशंकरे॥६॥शंकरानुसरणेनकेवलंशंग
लिंगविभवार्चनोमतिः॥ तेन तच्चरण सेवयापरं नेयुर्वदिवसोविवेकिना॥७॥ शंकरार्चन फलं मुहुश्रुलंशां
करामितकथासुधानिधेः॥संनिधानमपिमेनिधानतांप्राप्यतावदभयायजायते॥८॥ अद्भुतं किमिदमे
तदीदृशंपापराशिविनिवारिकाशनिः॥आगतः कथमभूदघक्षयादक्षयामृतनिधानसंगमः॥९॥शंक
रस्मरहरांतकांतकत्राहिमामवपरंमहेश्वर॥तावकंकथममुंविहायतेमंदाराचलनिवासनेमतिः॥१०॥
चित्तमस्यपरिशोधयाधुनालिंगपूजनरतिप्रदानतः॥ अन्यदद्यनचवांछितंचमेतावदेवममभुक्तिसाध
नं॥११॥ लिंगपूजनमनुक्षणंमयाकार्यमित्यपिमतिर्भवेद्यदि॥सामतिः सकल दुःखनाशनंकर्तुमेव
निर्गुणानसंशयः॥१२॥यावदस्तिधनमद्यसंचितंतावदीशपदपूजनोत्सवे॥देयमेतदुपयुक्तमत्रचेद
र्जनंचसफलंधनस्यमे॥१३॥कर्मणापिमनसापिसर्वथावाग्भिरप्यनुदिनंमहेश्वरः॥पूजितोयदितदा
घसंक्षयोजातएवविषयोपिनात्रमे॥१४॥किंकलत्रचिरगात्रसंगमैःकिंकुमाररुचिरानुभाषणैः॥किं
गजादिपशुपोषणोत्सवैः शंकरार्चनपरोभवाम्यहं॥किंगृहस्यपरिरक्षणेनवाप्राज्यराज्यपरिपालनेनवा॥

शिवर०३ शौर्यकर्मकरणे नवा मुहुः शंकरार्चनपरो भवाम्यहं ॥१६॥ दारुणापियमयातनाश्रुतासापि दुःखभयदायिनी खलु॥ मानशाम्यति शिवार्चनं विनातेन शंकरपरो भवाम्यहं॥१७॥ शंकरो मम गतिः सशंकरः शंकरीरष्यतिमम चिंतो मुहुः॥ शंकरे सति किमस्त्यपेक्षितं मोक्षदोपि सशिवः स्मृतोपि मे॥१८॥ मंगलापतिपदांबुजार्चनं सर्वमंगलविशेषसाधनं॥ सिद्धिसाधनमिदं विहाय मे कृत्यमन्यदिह रोचते पिन॥१९॥ चंद्रमौलिचरणांबुजार्चने ध्यानसाधनमिदं मनोपि मे॥ अन्यकार्यविमुखं विशेषतो जायतामिति मतिः प्रजायते॥२०॥ जीर्णमंगमधुनाविशेषतः शंकरार्चनमतिः नमेयदि॥ तोर्हि जीवनमिदं वृथा भवेदित्यवेमि मुनिवाक्यकोटिभिः॥२१॥ आर्जितं न सुकृतं मया पुरा न स्मृतोपि गिरिजामनोहरः॥ सेवितोपि नच शंभवो मुहुर्व्यर्थमेवगतमस्य जीवनं ॥२२॥ शांभवैः सह कदापि संगमो नाभवद्गिरिशलिंगपूजनं॥ जन्मतावदिह हा वृथा गतं हा किमस्य दुरदृष्टमद्भुतं॥२३॥ वार्धके कथमुमापतिप्रियैः शांभवैः सह विशेषतोधुना॥ संगमेपि गिरिशार्चनादरः शीर्णदेहपरिपाकदुःखतः॥२४॥ नश्रुतापि मुहुरादरात्परा साकथा गिरिशपूजकोदिता॥ जीर्णकर्णकरणेन तत्कथावर्णमात्रमपि गृह्यते कथं॥२५॥ गर्भवासजनितातिदुःखतः शंकरस्तु न समर्चितस्तदा॥

-हरा०तृ० अ०४५

१९९

तत्पुरीष विष कीट कोटिभिः दंशने सति शिव स्मृतिः कुतः ॥ २६ ॥ रेतसा खलु शरीर मद्भुतं लोहितेन जनितं कु
योनिषु ॥ सुकरालिषु बहुष्वनेकधा तेन भुक्तमपि दुःखमन्वहं ॥ २७ ॥ गर्भवास परिपीडितस्य मे तत्पुरीष ज
ल संयुतस्य च ॥ दुःखमेव समभून्मुहुर्मुहुः दारुणं विषमिवेह भक्षितं ॥ २८ ॥ दुष्ट कष्ट विनिवारकं च किं ग-
र्भवास निरतस्य दृश्यते ॥ अज्ञता खलु तदाति गर्हिता सा मुहुर्मुहुरपार दुःखदा ॥ २९ ॥ कीटयोनिषु यदाज
निस्तदा बंभरादिषु पुनर्भ्रमोदयः ॥ तत्भ्रमापसरणादि कारणं तत्र किंचिदपि दृश्यते कथं ॥ ३० ॥ सूकरादि जठ

११९

रेयदैकदानेक जंतु तनु संगमस्तदा ॥ कष्टमेव तनु संनिकर्षणाद्भुक्तमेव बहुधा मुहुर्मुहुः ॥ ३१ ॥ सूकरीज
ठरपावकाहता विष्टया जठर पूरणोद्यता ॥ तन्मला विलतनुः यदा तदा तेन दुःखमनुभुक्तमेव हि ॥ ३२ ॥ सूक
रस्य खलु रेतसा तनुः कापि पाप परिपाक योगजा ॥ जातु नैव हि परं तु सा मुहुः जन्म कोटिषु शिवार्चनं विना ॥
३३ ॥ येन केन चिदपि स्मृतः शिवः पूजितोऽपि सकृदादरात्कृतः ॥ जन्म संग परिहारको भवेत् इत्यपि श्रुतिशिरः
स्मृतं मया ॥ ३४ ॥ मोहजाल परिवेष्टितस्य मे शंकरार्चन रतांग संगमः ॥ नाभवत्परम शोक नाशकः पापक
र्मपरिपाकतो मम ॥ ३५ ॥ शांकरेण सह भाषणं मुहुः पातकानि विलयं प्रयांत्यपि ॥ याति याति यमयातनाभयं-

तन्न जातमतिदुष्कृतात्मनः ॥ ३६ ॥ शंकरायनवरत्नमंदिरं दत्तमेवनपुरामयामुदा ॥ रत्नकोशपरिरक्षणंवृथा-
जातमेवबहुदुःखसाधनं ॥ ३७ ॥ आर्जितंचगणनाविवर्जितं हेमतेननशिवार्चनंकृतं ॥ पद्दकूलगिरयःसमा
र्जिताःशंकरेषुनसमर्पिताःखलु ॥ ३८ ॥ गोकुलान्यपिबहूनियानिमेतानिशंकरवशानिभक्तितः ॥ नार्पितानिन
शिवोपिगोरसापारपूरपरिवेष्टितःकृतः ॥ ३९ ॥ कोटिशोनघृतकंबलेर्मुहुः शंगलिंगमभिवेष्ठितंकृतं ॥ पूजितं
चमधुपूरराशिभिः नाद्रेरणदधिपूरराशिभिः ॥ ४० ॥ शर्करागिरिभिरर्चितःशिवोगंधनीरनिकैरहर्निशं ॥ पुष्प
कुंकुमफलांबुराशिभिः नार्चितंगिरिशलिंगमुत्तमं ॥ ४१ ॥ चंद्रभागगिरिदीपमालिकाकोटिभिश्चनशि
वार्चनंकृतं ॥ धूपपर्वतसमूहधूपितोधूपितोपिनमुहुःमहेश्वरः ॥ ४२ ॥ शंकरोनगुरुरतोऽर्चितोमयाशंकरार्च
नविधानबोधकः ॥ नापिरुद्रजपसाकृतोस्म्यहं भूतिपुंड्रममलंकृतोपिवा ॥ ४३ ॥ फालमंडलमिदंनभ
स्मनाभूषितंकरगलादिकंचमे ॥ किंचपंचमकलेनवंचितःचंचरीककुलवंचितोप्यहं ॥ ४४ ॥ किंचपंचश
रचेष्टयामुहुःकष्टमेवबहुधानुभूयते ॥ कामिनीकनककंकणध्वनिःकर्णभूषणतयानिषेवितः ॥ ४५ ॥ यो
वनेनपरिवेष्टितस्यमेकामिनीकमललोचनादरः ॥ नादरःशिवपदांबुजार्चनेतेनतावदफलाजनिर्मम ॥
॥ ४६ ॥

पुंडरीकसदृशेननेक्षितं वीक्षणेन शिवलिंगमर्चितं ॥ मारमंदिरविलोकनादरादर्जितं बहुविधं च पातकं ॥
४७ ॥ अंगनांगकरसंकरादरे शंगलिंगकरसंगमादरः ॥ नाभयुज्जनिरियं लयं गता खिन्नखिन्नहृदयस्य सत्वरं
॥४८॥ श्रौतभस्मकणपुंजमंजुला कोमलातिविमलानमेत्तनुः ॥ तेन सूकरकुयोनिसेवनं जातमेव बहुकल्प
कोटिषु ॥४९॥ लिंगपूजनविशेषसाधनं विल्वपत्रमपि नार्जितं मया ॥ तेन० ॥५०॥ शंगलिंगममलैर्जलैरलं
नाभिषिक्तमपि भक्तिपूर्वकं ॥ तेन० ॥५१॥ शंकरायन दुकूलमर्पितं चंदनं च न समर्पितं मया ॥ तेन० ॥५२॥ नार्वि
495 तं मुहुरखंडतंडुलैः शंगलिंगमतितुंगमंगदैः ॥ तेन० ॥५३॥ बिल्वकोमलदलैर्महेश्वरो नार्चितः कमलपु
ष्पमालया ॥ तेन० ॥५४॥ धूपधूमपरिवेषवेष्ठितं मंदिरं न कृतमेव शांकरं ॥ तेन० ॥५५॥ मंदिरं च नवरत्नरंजि
तं शंकरायन निवेदितं मया ॥ तेन० ॥५६॥ गोघृतेन च न दीपमालिका क्वापि कापि चरिता शिवालये ॥ ते
न० ॥५७॥ ओदनोपि न निवेदितो मया शंकराय घृतशर्करान्वितः ॥ तेन० ॥ न प्रदक्षिणपुरःसरं नमः शंक
रस्य मुहुरादरान्मया ॥ तेन० ॥५९॥ निर्मलामितजलैः सुशीतलैः क्षालितोपि न मया शिवालयः ॥ तेन० ॥६०॥
दर्पणं च विनिवेदितं मया शंकरायन सुवर्णभूषणं ॥ तेन० ॥६१॥ नार्पितं कनककांचिरंजितं छत्रमेकमपि—

शर्वमस्तके॥तेन०॥६३॥चारुचामरसमीरणार्पितोः सेवितोपि नमयामहेश्वरः॥तेन०॥६३॥नर्त्तनंचनकृतंशिवांगणेशंकरा०॥ (शं-)कर स्मरण पूर्वकं मया॥तेन०॥६४॥शंगलिंगमभिषिच्य सादरं तज्जलं शिरसिनार्पितंमया॥तेन०॥६५॥शंकरार्पितजलं मुहुर्मयापीतमेवन महाघनाशकं॥तेन०॥६६॥शंकराय विनिवेदितं फलंनीरमन्नमपि भुक्तमेवन॥तेन सूकर कुयोनि सेवनं जातमेव बहुकल्पकोटिषु॥६७॥कष्टकाल विगमोप्यभूदहो शंकरागमनतो गृहांगणे॥ इष्टसिद्धिरधुना भविष्यतीत्यष्टमूर्त्तिकृपया परंमम॥६८॥शंकरातिरुचिरोरुमंदिरं शंकरांगमितितेन संगमे॥ दुर्लभं न किमपीतिमे मतिः संततं भवतु शंकरार्चने॥६९॥शंकरामितकथासुधारसैः पूर्णमेव मम कर्णपूरणे॥ चीर्णमेव मम पुण्यवर्णनं चारणे स्मरकोटिभिःमह॥शंकरोपि करुणारसार्णवो मद्गुणानपि सवर्णयिष्यति॥मामकोयमितिमामकार्चनात् सोपिशंकर समर्चनोत्सुकः॥७१॥यद्यपि प्रबल पाप राशिभिः व्यावृतोस्मि सततंतथा- प्यहं॥शंकरांघ्रिकमलावलोकनान्नष्टपातककुलो न संशयः॥७२॥कालतोपिन भयं ममाधुना कालकाल भजनप्रियान्वयात्॥कालकालकलनोरसोपिमेवर्धते मुहुरनुक्षणं मुहुः॥सोयमभ्युदय काल एवमे काल काल चरणांबुजार्चकः॥महदहं प्रतिसमागतोधुनाशंकरः स शिव शंकरालयः॥७४॥शंकरः सखलु दीनवत्सलः

शंकराकृतिमुपेत्य मद्गृहं ॥ प्रापपापविनिवृत्तिमादरात्कर्तुमेव करुणारसार्णवः ॥७५॥ एतदेव सुदिनं यतो
धुनाशंकरस्मरणसंगतं मनः ॥ अद्य तावदशुभग्रहान्वयो नष्ट एव हि शुभग्रहान्वये ॥७६॥ यद्यदुत्तममिहास्ति
मंदिरे तत्तदद्य कनकादिकं धनं ॥ शंकराय विनिवेदितं मया स्वत्वमस्य निवृत्तमेव मे ॥७७॥ शंकराय विनि
वेदितं शंकराय विनिवेद्यते मया ॥ तत्तु दत्तमिह वित्तमद्य मे कोटिकोटिगुणितं भविष्यति ॥७८॥ वित्तपात्र
मिति निश्चितं मया शंकरस्य करएव नापरः ॥ सादरं यदि तदर्पितं मया तत्र तेन सुखमक्षयं भवेत् ॥७९॥ का
मधेनुरिव शंकरो धनं हर्षवर्षममलं कृतो मुहुः ॥ दातुमेव यवसं समाप्नुयाद्दुग्धमेव मुहुरादराद्दहु ॥८०॥
नीरसेपि यवसेपि भक्षिते दुग्धमत्र बहु दीयते गवा ॥ तद्वदेव सददाति शंभवः सिद्धिमल्पधनपूजितोपि
सन् ॥८१॥ शंकरे सति न देव धेनुभिः कृत्यमस्ति सुरपादपैरपि ॥ तत्पदांबुजविलोकनाद्यतः सिद्धिरेवम
नुधावति स्वतः ॥८२॥ भस्मभूषणपरिग्रहेण मे सर्वसिद्धिगणसंश्रयोपि हि ॥ किं किमद्य न करिष्यति प्रियं
कामधेनुरिव कामसाधनं ॥८३॥ यः प्रमादमपहाय मायया त्यक्त एव शिवपूजकार्चनं ॥ कर्तुमिच्छति स ए
व सर्वथा पुण्यवानिति गुणे न गीयते ॥८४॥ भर्ग भीम भव शंकरेति वा नीलकंठ शिव शर्व सर्वग ॥ कालकाल-

गिरिशेति वा मुहुश्चित्तपोत स शिवं स्मर स्मर॥८५॥ अंधकासुर हरामरेश्वरापार धीरकरुणा रसाकर॥ मारसं- हर महेश्वरेति वाचित्त पोत सशिवं स्मर स्मर॥८६॥ चंद्रशेखर सुरासुरार्चितानंग भंगकर लुंग विग्रह॥ शंगलिं गनिलयाव्यये(घ्या)लि वाचित्त पोत स शिवं स्मर स्मर॥८७॥ सृष्टिपालन विनाशकारणानंत सुंदर विहार विग्रह॥ भूति भूषण विशोभिते तिवा चित्तपोत स०॥८८॥ शैल राजतनया कुचोल्लसत्कुकुमांचित पदांबुजाचल॥ अंबिका रमण मामवेत्यति चित्तपोत स०॥८९॥ तारकारुचिर हारकंधरव्यापृतादि तनयाकरांचल॥ चंचलाचल समान मानसा मीनमामवहरे तिवा स्मर॥९०॥ कल्पकोटि कृतपालकानिमे संहर स्मर स्मृतोपिमां॥ मामक प्रमिति गोचरं कुरु आहि मामिति मनः स्मर स्मर॥९१॥ भूति भूषितनुर्भवे भवे भाग्य भारपरिपाकतः शिवं॥ पूजयामि बहुधा धनेनाहं पाहि मामिति मनः स्मर स्मर॥९२॥ आनमामि भगवंत मंततः संततं चन भवं तमवकिं॥ शैल राजतनया पते मुहुः पाहि मामिति मनः स्मर स्मर॥९३॥ मत्कृतामित महापराधभी भूतनाथ चरणांबुज स्मृतेः॥ यातु नाशमिति मादरं हरं नानुवारमपि किं मनः स्मर॥९४॥ भावलिंगनिलयाप्रमेयमे मंगला रमण मंगलं कुरु॥ तावकं कुरु कुरु क्रमेण वदीनमित्यपि मनः स्मर स्मर॥९५॥

हरा० लू० उ० ५०७

लीलयालमनुवेलमव्ययापायकाय विषयैरलं बलैः॥ कालकालकलनेन कालभीः नेतिकालहरमेव संस्मर ॥९६॥ मन्मनः सरसिजासनाश्रयः किं क्षणार्धमपिवामदाशिव॥ इत्यनुक्षणमुमापतिं भजभाजमानमलिशं मनः स्मर॥९७॥ मंदिराणितव सुंदराणि चेन्मंदरेपि वसतिः कथं तव॥ तद्दीशममसानसासनेसंवसेति सततं मनः स्मर॥९८॥ शंकरातिरुचिरं न सुंदरं चित्तमंदिरतयापि सुंदरं॥ त्वत्कथामृतसुधानुलेपनादित्यपि स्मरहरं स्मरस्मर॥९९॥ नर्मदाकठिनलिंगसंगमे मंगले मतिरभूद्यथा तथा॥ मानसेपि ममसंवसादरादित्यनुक्षणमुतक्षणं स्मर॥१००॥ दीनबंधुरितिया प्रथास्तिते सा यथा न वितथा तथा कुरु॥ मामवामलनयाम नोहरत्राहि मामिति मनः स्मर स्मर॥१॥ नानुवारमगराजकन्यका सानुरागचरणांबुजादरं॥ किं मुहुर्मुहुरपर्णनायके त्युच्चरन्नुरुतरं मनः स्मर॥२॥ मत्वरं किमितिनप्रसन्नता मा[मा]प शंकर इति त्वरात्वया॥ किंकृतानुचितकारिता कथं मय्यपीति मनसा स्मर स्मर॥३॥ कः कल्याणपरं परार्णवपरं तं शंकरं नस्मरेद्गौरीचारुकुचोरुकुंकुमरसासाराऽरुणांघ्रिपरं॥ सोऽहं भावजयापि संस्मर महादेवं मुहुः मोहभीः त्याज्या पूज्यतमोत्तमोत्तमतमं [ताम] मनः संस्मर॥४॥ आकल्पं मम जीवनं भवतु मे भक्तिर्भवे भस्मनि श्रीरुद्राक्षवि-

भूषणे शिवपुरीवासे शिवाराधके ॥ नित्यं शंकर शंग लिंग भजने तत्पूजने तज्जपे तद्ध्याने तदवेक्षणेपि सुतरां मत्सं-
ततेरन्वहं ॥२०५॥ ॥इति श्री शिवरहस्ये तृतीयांशे हराख्ये जनकयाज्ञवल्क्यसंवादो नाम पंचचत्वारिंशो
ध्यायः॥४५॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीस्कंद उवाच॥ ॥सयाज्ञवल्क्यो जनकोक्तिरूपांसु
धां मुहुः कर्णपुटे रमंदं ॥ पीत्वा महानंदमवाप भक्त्या स्मृत्वा महादेवपदांबुजं च ॥१॥ श्रीमन्महादेवकथासु
धाब्धितरंगमाला विमलानुवेलं ॥ श्रीकालकालार्चनसाधनानां संपादनाय प्रभवत्यवश्यं ॥२॥ अनुग्रहः
शंकरपादपद्मस्मृतेरयं भक्तिरसोदयोपि ॥ श्रीमन्महादेवकृपांबुराशिकल्लोलमालाप्रसरप्रसादः ॥३॥
अस्माकमेतत्खलु भाग्यमद्य विद्याविलासैः खलु चंद्रमौलिः ॥ स्मृतो महानंदपदप्रदाता स्वानंदरूपो
पि सचिद्घनोपि ॥४॥ अनाद्यविद्याविलोपिजातः तवाप्य विद्यावरणे विनष्टे ॥ तत्राव शिष्टं शिवरूपमेक
मनेकधा भाति च भानमेव ॥५॥ न तत्र सूर्योपि विभाति चंद्रो नाग्निर्न तारापि न चापि विद्युत् ॥ स्वयंप्रका
शः खलु वृत्तिरूपो विद्यान तत्र प्रसरत्यवश्यं ॥ ओंकाररूपं प्रवदंति केचित्त निर्विकारं शिवरूपमेकं ॥ स
एवतावत् स्फुरति स्वभावान्न तस्य तु स्फोरकमस्ति लोके ॥७॥ इति तद्वचनं श्रुत्वा जनको विनयान्वितः ॥

शिवज्ञानोदयः केन तद्वदश्रुतिशेखरैः ॥ ८ ॥ ॥ याज्ञवल्क्य उवाच ॥ ॥ शिव एव परंब्रह्म शिव एव शिवात्मकः ॥ इति बुद्धिर्महादेव लिंगाराधनतो नृप ॥ ९ ॥ महादेवे महानंदे परब्रह्मणि शंकरे ॥ भक्त्या शिवार्चनेनस्याद्भक्तिरव्यभिचारिणी ॥ १० ॥ शिवपूजा श्रुतिप्रोक्ता शिवलिंगे शिवात्मके ॥ तयैव जायते शंभो भक्तिरव्यभिचारिणी ॥ ११ ॥ शिवमुद्दिश्य सुकृतं यद्यत्कृतमनेकधा ॥ तेनैव जायते शंभो भक्तिरव्यभिचारिणी ॥ कृतानि येन दानानि शिवप्रीत्यर्थमादरात् ॥ तेनैव० ॥ १३ ॥ येन कन्याप्रदानेन शिवः संतोषितो मुहुः ॥ तेनैव० ॥ १४ ॥ येन रत्नप्रदानेन शंभवास्तोषितो मुहुः ॥ तेनैव० ॥ १५ ॥ येनाश्वगजदानाद्यैः शंभवास्तोषितामुहुः ॥ तेनैव० ॥ १६ ॥ येन गोकोटिदानेन शंभवास्तोषितामुहुः ॥ तेनैव० ॥ १७ ॥ सुशीललांबुसेकेन येनैवाराधितः शिवः ॥ तेनैव जायते-शंभो० ॥ १८ ॥ पट्टकूलप्रदानेन येनैवाराधितः शिवः ॥ तेनैव जायते शंभो० ॥ १९ ॥ येन दिव्यान्नदानेन तोषितः पार्वतीपतिः ॥ तेनैव० ॥ २० ॥ रत्नाभरणदानेन येनैवाराधितः शिवः ॥ तेनैव० ॥ २१ ॥ रथोत्सवादिना नित्यं तोषितो येन शंकरः ॥ तेनैव० ॥ २२ ॥ अविरक्तो विरक्तो वा भक्तिमव्यभिचारिणीं ॥ प्राप्य यः पार्वतीकांतं अर्चयेत्स तु भाग्यवान् ॥ २३ ॥ वैराग्यमपि भोगेच्छा विरहः केवलं मतः ॥ न तु भाग्यपरित्यागो वैराग्यमिति मे मतिः ॥ २४ ॥ भाग्यवैल-

क्ते लिंगपूजा सांगं तु न भविष्यति॥ निरंगं वैदिकं कर्म न फलायेति मे मतिः॥२५॥ लिंगार्चनेन कर्त्तव्यं फलं विवि-
घमित्यतः॥ तदर्चनं च केनेति साधनं समुपेक्षितं॥२६॥ भावना प्रत्ययप्राप्ता कुर्यादिति ततः परं॥ किमित्ये
व तदाकांक्षा वस्तुतः फलगोचरा॥ कमनीयफलाकांक्षा तावदादौ प्रजायते॥ सर्वेषामविशेषेण तदेव समपे
क्षितं॥२८॥ ततः परं तत्फलं च स्वाराज्यं प्राज्यमित्यपि॥ तेनैव साफलाकांक्षा शांता भवति वस्तुतः॥ तत्फले निश्चि
ते पश्चात्केनेति करणे परं॥ आकांक्षा जायते सापि शांतास्यात्करणार्पणे॥३०॥ फलस्य तस्य करणं शिवाराधन
मित्यपि॥ शंकराराधनेनेति ज्ञातमेव तृतीयया॥३१॥ तृतीया करणं वक्तुं समर्था तत्तया विना॥ ज्ञातुं न शक्य
ते तस्य बोधकं चान्यदत्र न॥३२॥ तद्बोधनार्थं निर्माणं तस्याः केनद्वोस्थितं॥ करणं प्राप्तमेवेति तदाकांक्षा
क्षयं गता॥३३॥ करणेवगते पश्चात्कथमित्यपि जायते॥ आकांक्षा सा नु सर्वेषामंगानामेकदक्षमिता॥३४॥
दृष्ट्या कोटन नांगानां उपादानं यतस्तदा॥ सकृदेव तदाकांक्षा कथमित्येव जायते॥३५॥ ततः परं विशीर्णा
स्ते तदंगविधयः परं॥ प्रधानभावनामेव प्रविशंति तदिच्छया॥३६॥ उपशयंत्यंगविधयः स्वासमग्राह
कइत्यपि॥ एवमंगानि विधयः तदंगा विधयोपि हि॥३७॥ अंगान्यथांतरापूर्वं द्वारमासाद्य केवलं॥ -

परमापूर्वसंपत्तिहेतुभूतानि वस्तुतः॥ ३८॥ तत्राद्यं साधनं तावत्फलेच्छा कर्त्तुरन्यथा॥ तस्य कर्तृत्वनिष्पत्ति
र्विना तु न फलेच्छया॥ ३९॥ फलेच्छया विरक्तस्य कर्मण्युद्यम एव न॥ ततः कर्मपरित्यागे विधिः कुंठित एव
हि॥ ४०॥ किंच यद्विहितं कर्म शक्यं चेत्त्यज्यते तदा॥ तत्त्यागे नैव नरको भविष्यति न संशयः॥ ४१॥ देहात्मवा
दिनः केचिद्विहिताकरणात्परं॥ नरकावासममासाद्य तिष्ठंति क्लेशपूर्वकं॥ ४२॥ महाक्लेशानुबंधाय विहि
तं त्यज्यते जनैः॥ अश्रद्धया ततस्तेषां नरकेषु सदा स्थितिः॥ ४३॥ कृते त्ववश्यं विहिते कर्मणि प्रियमात्मनः॥
भविष्यतीति यत्ज्ञानं तीदृश्यामइति श्रुतः॥ ४४॥ तादृशज्ञानसंपन्नः कर्मण्यधिकृतस्ततः॥ तस्मिन्नन्यस्या
स्तिवैराग्यं स नि भोग्यो विशेषतः॥ ४५॥ शिवार्चने ममैतावद्वांछितं सर्वथा फलं॥ भविष्यतीति विश्वस्य भा
ग्यवानधितिष्ठति॥ ४६॥ नैमित्तिकं च नित्यं च काम्यं चेति त्रिधा मतं॥ कर्म तत्र फलं काम्ये नान्यत्रेति
वदंत्यपि॥ ४७॥ तेस्तावद्भावनागंधगंधोप्याघ्रात एव न॥ विधिश्रु(स्व)रूपज्ञानेन विना ते प्र(प)लयं त्यपि॥ ४८॥
अंध एव विधिः किंच फलभावे प्रवर्त्तना॥ कथमभ्युत्थिता तेन सा लंशात्रयवेष्टिता॥ आद्यांशः फलमेवे
ति तदाहत्य श्रुतं क्वचित्॥ क्वचित्कल्प्यं कल्पनापि विध्युत्था नार्थमेव हि॥ ४९॥ विधिस्तु फलमादाय प्रव-

मंसंप्रवर्त्तते॥ तत्कर्ममात्रसापेक्षंकर्मतेनविनाकथं॥५०॥ विभृत्युध्रूलनादीनां नित्यानामपिकर्मणां॥ फलमुक्तं
पृथक्तेषां नित्यत्वोक्ति पुरःसरं॥५१॥ फलानिमंत्रलिंगेनाप्युक्तान्येवहि कानिचित्॥ प्रधानबोधकेर्वाक्यैः
फलंयदिनबोधितं॥५२॥ अंगवाक्योक्तमप्येकं फलंयोग्यं प्रगृह्यते॥ यदितत्रापिनफलं तदातत्कल्प्यमेव
हि॥५३॥ रात्रिसत्रेफलं तावदाहत्यश्रुतमेवन॥ प्रधानबोधकेवाक्ये नवाक्येप्यंगबोधके॥५४॥ नैमित्यके
पियोग्यंतुकल्पनीयंफलंखलु॥ तस्मान्नकर्मकुत्रापि फलहीनंश्रुतंचन॥५५॥ एवंचपरिभाषापि नित्यत्वा
घवगाहिनी॥ प्रधानबोधकेर्वाक्यैः फलस्याश्रवणादिति॥५६॥ आर्द्रादियोगरूपस्य निमित्तस्यप्रसंजेन॥
नैमित्तिकंपूजनंतु विहितं फलसाधनं॥५७॥ इष्टसाधनताज्ञानं प्रवर्त्तकमितिश्रुतं॥ सर्वत्राप्यविशेषेण
केनवातन्निवार्यते॥५८॥ नियोगः फलमित्याहुः केचितेपितत्फलं॥ स्वीकृतंतदसद्वातुद्दपिचिंत्य
ते॥५९॥ नियोगः फलमित्युक्तेयेनतं प्रतिसंप्रति॥ वक्तव्यमस्तितेनापिदेयमुत्तरमेवहि॥६०॥ मौनंचेदु
त्तरंतत्र सफलेनबहिष्कृतः॥ नियोगः सफलंकर्म नकुत्रापिश्रुतंखलु॥६१॥ तस्मात्कर्माणि सर्वाणिस
फलानिश्रुतान्यपि॥ विशेष्यवैदिकंकर्म सफलं शिवपूजनं॥६२॥ तत्रांगानिबहून्येवतेरंगैरखिलैरपि॥

निष्पन्नं करणं तेन फलं भवति सर्वथा ॥६३॥ प्रधाने तु फलापेक्षा मुख्यमंगं तया विना ॥ प्रवृत्तिरेव नास्तीति
फलं तावदपेक्षितं ॥६४॥ सांगेन कर्मणा तावत्फलं भवति तस्य तु ॥ उत्पत्तिरंगाविरहे सर्वथा नेति निश्चितं ॥
६५॥ अंगानि तावदुच्यंते लदंगांगान्यतिक्रमात् ॥ लिंगार्चनेन कर्त्तव्यमायुरित्यादिवाक्यतः ॥६६॥ लिंगार्च
नं च करणं आयुः फलमिति स्मृतं ॥ तत्र लिंगार्चनं केनेत्याकांक्षापि प्रजायते ॥६७॥ तदाकांक्षानिवृत्ति
स्तु बिल्वपत्रादिसाधनैः ॥ वैराग्यं यदि कर्त्तुं स्याद्बिल्वपत्रादिसाधनैः ॥६८॥ तदा तत्करणस्यैव निष्पत्ति
र्नोपजायते ॥ धूपदीपादिदानं च धनसापेक्षमित्यतः ॥६९॥ ततो धने नवैराग्यं किं चार्जितधनैः परं ॥ शंकरा
राधनं कुर्यात्तेन तस्य फलं धनं ॥७०॥ पंचामृताभिषेकाद्याः सर्वेपि धनमूलकाः ॥ धनाभावे कथं क्षीरं दधि
मध्वाज्यमेव वा ॥७१॥ स्नानं च विहितं लिंगे शुद्धपक्वफलोदकैः ॥ तत्र तावत्फलप्राप्तिः न धनेन विना
खलु ॥७२॥ परमान्नादिकान्नानि नैवेद्याय श्रुतान्यपि ॥ तानि तावद्धनाभावेन भवंत्येव सर्वथा ॥७३॥
श्रुतमाहात्म्यदेवेषु सौवर्णाभरणार्पणं ॥ तदाभरणनिष्पत्तिर्धनाभावे कथं भवेत् ॥ भार्यायामपि वैराग्यम
युक्तमिति निश्चितं ॥ शिवनैवेद्यपाकाय विनियुक्ता यतः स्वतः ॥७५॥ विना योगानुसारेण सापि तावद-

शिवर० ३ पेक्षिता ॥ शिवार्चनोपियुक्तानां त्यागे पापं महत्खलु ॥७६॥ अतस्तत्त्यागमात्रं तु नवैराग्यं तथा सति ॥ वैरा-ह्रा०नृ०
२०६ ग्यवार्त्ता सर्वत्र वस्तुतः पारिभाषिकी ॥७७॥ परिभाषापि निष्पन्ना पदार्थस्य विशेषतः ॥ शिवार्चनोप अ० ४६
युक्तत्वकरणत्वानुरोधतः ॥७८॥ तस्माद्यदार्जितं वित्तं तन्निवेदनमीश्वरे ॥ तद्वैराग्यमिति प्रोक्तं तेन न
प्रत्यवैति च ॥७९॥ शतानंद इति ख्यातो राजा परमधार्मिकः ॥ गुणवान्वीर्यवान्नित्यं शिवपूजापरा
यणः ॥८०॥ शिवपूजादिधर्माणां विशेषेण विचारकः ॥ महादेवः पूजनीयः कथं कुत्रेति चिंतनात् ॥ कृ
तज्ञेषु वरिष्ठोपि सत्यव्रतपरायणः ॥ शांभवेषु दयालुश्च तत्तोषणरतः सदा ॥८२॥ सत्यप्रतिज्ञः सर्व
ज्ञो नीतिशास्त्रविशारदः ॥ प्रजानां पालने दक्षो दक्षः परनिबर्हणे ॥८३॥ कीर्तिमान्निपुणो धन्यः शु
चिश्च विगतस्पृहः ॥ असूयावर्जितो नित्यं प्रभामंडलमंडितः ॥८४॥ युद्धकाले सुराणां च सर्वथा
पि भयप्रदः ॥ सर्वलक्षणसंपन्नः सर्वाशापरिपूरकः ॥८५॥ तमेकदा गुरुः प्राप शेषेणापि समन्वितः
॥ समागतं समालोक्य पूजयामास शांभवं ॥८६॥ ततस्तेन महालापाः कृताश्च शिवपूजने ॥ नृपयुक्ताः
प्रयत्नेन तमुवाच गुरुं नृपः ॥८७॥ ॥शतानंद उवाच ॥ ॥धर्माणां परमो धर्मः को वा धर्मस्त्वया मितः ॥

धर्मोत्तमोत्तमत्वेन ज्ञानं धर्मं वदाधुना ॥ ८८ ॥ देवोत्तमोत्तमत्वेन को वा देवस्त्वया मतः ॥ श्रुतिभिः कस्य वा धर्मः
कीर्तितः कः परः प्रभुः ॥ ८९ ॥ ॥ गुरुरुवाच ॥ ॥ धर्मोत्तमोत्तमत्वेन शिवधर्मः प्रकीर्तितः ॥ शिवधर्मात्परो धर्मो
नास्ति न श्रूयते ध्रुवं ॥ ९० ॥ तेनैव शिवधर्मेण सर्वान् कामानवाप्नुयात् ॥ यं यं कामयते कामं तं तं कामारिधर्मतः ॥ ९१
शिवपूजापरो धर्मः तथैव शिवपूजया ॥ शिवपादाब्जभृंगत्वं प्राप्नोत्येव न संशयः ॥ ९२ ॥ तत्फलं नो भवेत्तपसा
न यागार्बुदकोटिभिः ॥ परं तु श्री महादेवकृपया परया खलु ॥ ९३ ॥ संप्राप्य भूरि पुण्येन भक्तिमव्यभिचारि
णीं ॥ क्षणं वा शंकरं स्मृत्वा मुक्तो भवति पातकैः ॥ परं तु श्री महादेवपादांबुजरतो भवेत् ॥ सा पूजा लिंगपूजे
ति विज्ञेया श्रुतिशेखरैः ॥ ९५ ॥ महापातकतूलाद्रिः शिवनामाग्निलेशतः ॥ दग्धः क्षणेन भवतीत्यवधा
रयसादरं ॥ ९६ ॥ यस्य शंकरपूजायां विश्वासोऽतिदृढः सदा ॥ तेन तीर्णः स संसारो नानापातकसागरः ॥ ९७ ॥
शिवार्चनप्रभावस्तु श्रुतिषु प्रथितः सतु ॥ एकया जिह्वया वक्तुं शक्य एव न वस्तुतः ॥ ९८ ॥ सहस्रजिह्व
शेषोयं अनेनापि न सर्वथा ॥ शिवधर्मप्रभावोयः स तु वक्तुं न शक्यते ॥ ९९ ॥ कृतं पूर्वमनेनापि तपो घोरतरं
पुरा ॥ शिवधर्मावबोधाय युगानामयुतं नृप ॥ १०० ॥ अनेन तपसा तावत्स धर्मो ज्ञात एव न ॥ तत्प्रभावो न स-

शिव-र-३
२०७

हेमा शिवान्ये ज्ञांत एवन ॥१॥ शिवः परम धर्मज्ञ शिरो मणिरिति स्मृतः॥ तथा च शिवधर्माणां तत्त्ववेदक सदाशि-
वः॥२॥ शिवधर्म परिज्ञानं शिवया शिव संनिधौ ॥ कथं चित्त परिज्ञातं कुमारस्यापिवस्तुतः॥३॥ नंदिके शा
दिभिर्धर्मः शैवः कश्चित्कथंचन॥ ज्ञायते मादृशै नापि कथंवा सविशेषतः॥४॥ जानाति शांभवंधर्मं लोके
परम शांभवः ॥ सतावद स्मदादीनां दुर्ज्ञेय इति निश्चयः॥५॥ विनिधयो विविधाः संति शिव पूजन बोधकाः॥त
त्परिज्ञान मस्माक मति दुर्लभ मेवहि ॥६॥ गोपनं शिवधर्माणां शंकरेण कृतंतुः॥ तत्ज्ञानं दुर्लभं तेषां अ-
स्माकं नृप सत्तम ॥७॥ लोके कोपि महेशोधर्म निरतो पूलो विनीतः श्रुतो॥ वेदांते रमितैः अनंत विभवैः भाव
प्रभावादरैः॥८॥ मन्ये दुर्लभ मेव शांभव महं धर्मोत्तमं तंमुहुः॥ वंदे भावम भाव संग रहितं भाव प्रभावोत्सुकं॥
॥१०९॥ वेदांतप्रणुतं शिवार्चक पदं वंदे मुकुंदार्चितं तद्वृंदारक वृंद वंदितमुमाकांतार्चकाराधितं॥ तत्सेवा
जनिरोग नाशकतया ज्ञाता तदाराधनान्मुक्तिः शंकर पूजकस्य महिमा केनापि न ज्ञायते॥११०॥ धन्याः
शांभव धर्म बोध[illegible] निधयः शैवोत्तमाः सर्वथा तत्पादांबुरुहार्चकोपि मुनां धन्यः स धन्यो त्तमः॥ तत्पा
दांबुजरेणुभिर्यदि शिरः पूतंन भीति स्तदा कालादप्यत एव संसृति भयं नेति स्मरामो वयं॥१११॥ अस्मा-

हरा-तृ
अ-५६

502

कें शिवपूजनोत्सुक शिवाचारव्रताराधकध्याने नापि पदे पदे पि निधय: संसारवार्तापिन ॥ निर्धूताखिलकल्मषा: शि
वपदंयासोनयामं भयं पश्यामोनियमादिकाम्यसनजंक्लेशं न मृश्यामहे ॥११२॥ ॥इति श्री शिवरहस्येहराव्ये
तृतीयांशे नृप गुरु संवादे नाम षट्चत्वारिंशोध्याय: ॥४६॥ ॥श्री काशी विश्वेश्वरार्पण मस्तु॥ ॥स्कंद उवा
च॥ ॥गुरु गौरव वाक्यानि शता नंद: पुन:पुन: ॥ श्रुत्वा प्रहृष्टस्तं प्राह शिवपूजा क्रमं नृप: ॥१॥ शिवार्चनव्रतपरै: किं
कार्यं प्रत्यहं गुरो ॥ तत्तावदधुना सर्वं निवेदय यथा क्रमं ॥२॥ ॥गुरुरुवाच॥ ॥अरुणोदयवेलायां समुत्थाय वहि:
परं ॥ शौचादिकं निवृत्यादौ स्नात्वा तीर्थोदके शुभे ॥३॥ उद्धूल्य भस्म नांगानि त्रिपुंड्रं च प्रयत्नत: ॥ रुद्राक्षधारणं कृ
त्वा पश्चात्संध्यां समाप्य च ॥४॥ शिवाराधनसामग्र्या लिंगेशं कारमर्चयेत् ॥ रुद्राध्यायं स्मरन्नेव तन्मंत्रार्थमनुस्मर
न् ॥५॥ शिवस्मरणचित्त: सन्नासीनोपि कुशासने ॥ व्याघ्राजिनेवापूतात्मा विभूत्युद्धूलनादिना ॥ चित्रासनेवा
मांजिष्ठे श्वेत्वेतवा कंबलेके शुभे ॥ नीले पीते सिहारिद्रे कर्बुरे वा विशेषत: ॥७॥ स्वांत: सिंहासनासीन मुमालिंगि
तविग्रहं ॥ कर्पूर गिरि संकाश दुकूल परिवेष्टितं ॥८॥ रत्नाभरण संयुक्तं अनंत विभवं प्रभुं ॥ हरं सर्वा मराराध्यं आनंद
घनमव्ययं ॥९॥ त्रिलोचनं नीलकंठं त्रिशूलकरमक्षरं ॥ दधानं वामहस्ताब्जे मेरु चापं शरासनं ॥१०॥ जटाजूट तटाब

द्ध चंद्ररेखा विराजितं ॥ त्रिपुंड्र विल सत्फालं भक्त संरक्षणेक्षणं ॥ ११ ॥ अष्टापद तडित्कूट सन्निभं सुंदराननं ॥ उत्फुल्ल-
मंद मंदार मल्लिका समलंकृतं ॥ १२ ॥ बिल्वपल्लववीतांग मनंगहरमव्ययं ॥ चारुचामीकराकारकरकंकणमंडितं ॥ १३
॥ प्रस्फुरन्नूपुरापार सिंजिता ललितसविते ॥ मुनि मानस भृंगांग संघातांघ्रि सरोरुहं ॥ १४ ॥ मृगांकितकरं देवं वरदाभय
पाणिनं ॥ करुणारस संपूर्ण विरूपाक्षं विचिंतयेत् ॥ १५ ॥ ततः परं महादेवं लिंगे तुंगे मनोहरे ॥ पूजयेदर्जितैर्द्रव्यैर
मलैः कमलादिभिः ॥ १६ ॥ लिंगार्चनं बिल्वपत्रैः छिद्रैर्वा विमलैः कृतं ॥ सर्वकामप्रदं पुण्यं तद्देदांतेषु विश्रुतं ॥ १७ ॥
एवं संपूज्य पूजांते कुर्यादात्मनिवेदनं ॥ पूजा निवेदनं कृत्वा प्रणम्य च मुहुर्मुहुः ॥ १८ ॥ मन्मानसंभव भवच्चरणार्च
नायतावत्प्रसून मिद मस्तु शरीर मस्य ॥ धूपाय नित्य मसवो पि उपहार योग्याः चक्षूंषि दीपकलिका फलतांप्र
यांतु ॥ १९ ॥ यद्यन्मदीय मनघं वसुचंद्रमौले तत्तत्तवैव पदपूजन योग्य मस्तु ॥ स्वामिन्त्रिलोचन ममेह पवित्रगात्रं
लिंगार्चनाय भगवन् अनुकूल मस्तु ॥ २० ॥ धीरैः सहार सुकुमार कुमारदारैः साकं निराकुल मुमारमणार्च
नेन ॥ कालेन याति विमलैः कमलाविलासैः श्रीकालकाल सकलैः सकलेरलं मे ॥ २१ ॥ जन्मानि संतु शतशोथ
सहस्रशो वा किं तावतापि यदि भक्तिरुमासहाये ॥ धन्यानि तानि सकलानि वदंति मन्ये धन्यं त्रिलोचन कृपैकनि-

धानभूतं ॥२२॥ मत्प्रार्थनीयमिदमेव भवत्पदाब्जभक्तिर्भवत्पदसरोरुहपूजनाय ॥ तेनैव मे सकलसिद्धिपरंपरा स्या
दे तावदेव मम देयमतिस्त्वयापि ॥२३॥ भक्तिर्भवे प्रतिभवेपि विरक्तिरर्थे शक्तिर्गिरीशनगरीगमनेनुरक्तिः ॥ लिंगा
र्चने रतिरलं गहरे प्रवृत्तिः बिल्वार्चने मतिरुमेशकथासु मे स्यात् ॥२४॥ अद्यावधि प्रलयकालमहावसानपर्यं
तमंतकरिपुस्त्रिपुरांतकाख्या ॥ नृत्यं करोतु रसना रुचिरां गणे मे श्रीशूलपाणिचरणे करवाणि ~~वाणि~~ वाणिं ॥२५॥
योगैरलं सकलयागकुलैरलं मे दानैरलं परिमलैः कमलाविलासैः ॥ अन्यैश्च धर्मनिकरैः सुकरैरपारैः गौरीमनो
रमणते चरणं भजामि ॥२६॥ भाग्यैरलं बहुविधैः निधिकोटिभिर्वा मातंगकोटिभिरलं तुरगार्बुदैर्वा ॥ गोकोटि
कोटिभिरलं महिषीकुलैर्वा गौरीमनोरमणते चरणं भजामि ॥२७॥ गर्भेर्भकत्वसमयेपि विवेकशून्यस्त्व
त्पादपद्मविमुखः कुमुखः कठोरः ॥ तत्तावदीश कृपया न पुनर्ममास्तु गौरीमनोर० ॥२८॥ पौगंडमंडिततनु
र्व्यसनप्रहर्षवर्षाभियोगमपि भोगमपि प्रपद्य ॥ भक्त्या स्मृतोसि भगवन्न मया जडेन गौरी० ॥२९॥ सोन्माद
यौवनवनोपहतेन तेन लेन नाराधितोसि न मनाग् विकीर्त्तितोसि ॥ तत्तावदीश्वर पुनः न ममास्तु मास्तु गौरी०
॥३०॥ नारीमनोहरविहारपराभिभूतचित्तेन तावदसकृन्न नमस्कृतोसि ॥ तन्मास्तु मास्तु हर मास्तु कदापि-

मास्तु गौरि०॥३१॥ वित्तार्जनाय बहुदेश निवासदोष व्यापार पूरित तनुः न तदा कदापि॥ अभ्यर्चितो पि हिमयातद्

पास्यमेव गौरि०॥३२॥ दारा सुहार परिहार विहार कारा कारानुकार करणे न वयो पि नीतं॥ तेनाल मेव हर हार भया पहारं गौरि०॥३३॥ हार प्रवीरवर मादरतो हरारं हारं सहार मनुवार मपि स्मरामि॥ नाद्यापि हार चिर संगलिता विरासित् गौरि०॥३४॥ मारो पकार कशर प्रवर प्रहार संहार भीरु तरुणी चरणो पघातैः॥ नीतं दिनं प्रति दिनं शमनं नमे न गौरि०॥३५॥ संसार सागर विचार विदूर गर्त्त वृत्ति निवृत्ति रपि हार मनो हरेषु॥ हारो पकार करणे पि न मे प्रवृत्तिः गौरि०॥ ॥३६॥ मंदार कुंद नव बिल्व दल प्रबाल वल्ली दलै रपि न लिंग समर्चनाय॥ यत्नः कृतः ऋतु शतादिक धर्म जालैः गौरि०॥३७॥ अंगार सागर विकार शरीर भार संहार मारहरहार विचार हीनः॥ दैनं दिन प्रलय संहरण प्रवीण गौरि०॥३८॥ मामेव मामक धिया परि पश्य पश्य कातावतापि तव तात बता लि हानिः॥ त्वं दीन बंधु रिति किं श्रुतिषु श्रुतापि गौरि म०॥३९॥ इति स्तुत्वा महादेवं प्रणिपत्य पुनः पुनः॥ बिल्वाद्यै रर्चनं कृत्वा कुर्यान्नैवेद्य भोजनं॥४०॥ शिव नैवेद्य शेषस्य भोजने नापि शंकरः॥ हारं पदं ददात्येव हरो हाराय सादरं॥४१॥ प्रति ग्रासे पि यत्नेन महादेव मनु स्मरेत्॥ यस्तस्य पातकं तावत् क्षणे न लय मेष्यति॥४२॥ सिक्थानां संख्यया हारः ~~सदा हारः~~ सदा हारानु मोदने॥ ६ ॥

अदत्तेनापि वा नित्यं तस्यानशनजं फलं ॥५३॥ हारोपहारकवलं स्पृष्ट्वा स्मरहं स्मरन् ॥ भुक्त्वा मुक्तो भवत्येव पापभो
गैः सभाग्यवान् ॥५४॥ हारोपहारं दृष्ट्वापि मुक्तो दुरितराशिभिः ॥ तद्भोजनान्महानंदकंदकंदः प्रजायते ॥५५॥ हा
रो हरं सोपहारं दृष्ट्वा हरहरेति यः ॥ वदत्युच्चैः स एवोच्चस्ततो प्युच्चो न कोपि हि ॥५६॥ हारोपहारसमयं यः प्रतीक्ष्याप्य
नुक्षणं ॥ तुष्टः सोपि विरिष्टः स्याद्वसिष्ठादि मुनिष्वपि ॥५७॥ भक्तिर्भवति पुण्येन शिवनैवेद्य भोजने ॥ सा भक्तिरचला
यस्य स मुक्तो नात्र संशयः ॥५८॥ हारोपहारपुष्टांगं हारं दृष्ट्वापि दूरतः ॥ प्रीत्या प्रहृष्टहृदयो स मुक्तो भवति ध्रुवं ॥
॥५९॥ हारोपहारपरिपाकविशोकमेकं लोकैकमप्यति निरंकुशमाश्रयंति ॥ धन्यास्तदंघ्रिकमलं कमलालयः
५०
स्यात्तं नित्यमेव कमलापरिपूजितं च ॥६०॥ तं तावत्परमेव वदंति मुनयो यो हारमेवादरादाहारं परिकल्प्य जीवति
हरं हारैः सहात्यादरात् ॥ स्मृत्वा नृत्यति हारनामपुनरप्युन्मत्तवत्कीर्त्तयन्छांगं लिंगमवेक्ष्य मोक्षसुखदं भूयः प्रण
म्यान्वहं ॥६१॥ हारोदारगुणानुवर्णनपरा जिह्वापि येनार्जिता तत्पादांबुजरेणुतामुपगतो भीतिं जहात्यंतका
त्भूतेभ्यः किमु तेति संततमतिश्रांतोपि कांतादरव्यापारप्रचुरानुबंधरहितो जीवत्यहो केवलं ॥६२॥ कर्ण स्वयं
न शृणु नैव वदस्व जिह्वे नार्चस्व हस्त न विलोकय नेत्रयुग्म ॥ चेतो न चिंतय न चाश्रय चान्यदेवं त्यक्त्वा महेश्वर-

पदांबुज मादरेण ॥५३॥ चेतः शंकर माश्रयेतर सुरान्स्त द्वार दौवारिकान्हा रक्षार विचार कातर नरान् सेंद्रानुपेंद्रा-हरा॰तू

दिकान् ॥ दूरे संत्यज संत्यजात्य जमिवस्वप्नेति मा संश्रय श्रेय श्चेत्तवबांछितं शिवतरं सांबं समालंबय ॥५४॥ चे
तश्चिंतय शंकरं जप शिवं जिह्वेन मेशं शिरो नेत्रां भोरुह शांग लिंग ममलं पश्यादरैः पूजितं ॥ रेरे कर्ण पुटाशृणु शंकर
कथापीयूष धाराः पिब घ्राणाघ्राय लसद्भस्वशं शिव पदांभोज च्युतं केसरं ॥५५॥ रेरे चारु करातिकोमल लसत् बि
ल्वीदलैः शंकरं ॥ लिंगान्पूजय लिंग मस्तक मुपस्पृश्यादरेणा न्वहं ॥ कृत्वा हस्तपुटं शिरस्यपि मुहुर्नाद्यो स्तवैः
शंकरं नत्वा स्वामिनये र्विनोदय महामृत्युंजयं चाव्ययं ॥५६॥ रे मानसा जहंस तरसा सांबांघ्रि पंके रुहं सेंद्रोपें
द्रविरंचि मान समहा हंस प्रशंसावहे ॥ तत्वं संभज संभजातक महाव्याधान्नतेतत्र भीर्भव्यं भावि भवो भवोद्भवा
दभयदात्सं भावितं शोभनं ॥५७॥ रेरे चित्तभ्रम प्रधाव सिवृथा संसार घोरोषरा पातं भोरुह गंध लोलुपततेगंधो-
नचांभोरुहं ॥ संसारोषर मंडलेषु बहुधा श्रांतोधुना वाभज ब्रह्मानंद मरंद कंद ममकृद्गौरीश पादांबुजं ॥५८॥
रेरे चारु शिरः पुनः पुनरुमाकांतां गणे लुंठनैः आस्वेदानति भिश्च जन्म तव तत्सार्थं कुरुष्वादरात् ॥ भूयस्त
स्मणति प्रभूत किणाजापार व्यथा नाशकं तत्पादांबुज माल्य बंधन मिति ज्ञातं मया तत्कुरु ॥५९॥ संसारो रुत रोः कठो-

रपिठरो घोरः कुठारः परोहाराराधनमित्येवेमितदिदं संसारिणां दुर्लभं॥ येनेदं सकृदप्यनंत मुकुले त्यादरा च्चेत्कृतं
नीरेर्वासतरत्यपार विविधव्याधिप्रपूर्णार्णवान्॥६०॥ एवं स्तुत्वा महादेवं प्रणम्य च पुनः पुनः॥ भुक्त्वा शंकरनैवेद्यं शांभ
वैः सह संवस॥६१॥ शांभवैः सह संवासो नत्याज्यः सर्वथा त्वया॥ शांभवान्क्षिवनैवेद्यैः परिपालय सादरं॥६२॥ शांभवा
एव ते राजन्सहायाः संतु सर्वथा॥ लिंगार्चनादि समये तदन्यान्मावलोकय॥६३॥ शिवार्चनादि समये शांभवैः
सहसंगमे॥ शिवार्चनं सांगमेव संगात्तस्मात्फलं भवेत्॥६४॥ शिवमंत्राधिकारोपि शांभवानां तथा सति॥ शिव
मंत्रोच्चारणं च शिव स्वांगमिति श्रुतं॥६५॥ शिवमंत्रार्थबोधेन प्रहृष्टाः शांभवाः पुनः॥ उच्चैः पठंति तान्मंत्रान्ते
५०५
नार्थस्मरणं भवेत्॥६६॥ तदर्थस्मरणं चांगं सोप्यर्थः संस्मृतस्त्वया॥ यथा स्वाध्याय संप्राप्तो मंत्रोपीत्यवधारय॥
कृत्वा,
॥६७॥ भुक्त्वा शिवकथामेवं शांभवेभ्यस्त्वमबोधितां॥ श्रुत्वा, सायमुमाकांतं पूजयित्वा यथोचितं॥ प्रहरानंतरं
शय्यां शंकराय निवेदय॥ शयनेप्युपचारास्तु कल्पनीयाः प्रयत्नतः॥६९॥ सुगंधकुसुमादीनि द्रव्याणि शिव
मंदिरे॥ स्थापनीया नियत्नेन शिवार्थमिति केवलं॥७०॥ यस्तु रात्रौ महेशाय पूजांते शयनादिकं॥ कल्पयेत्ते
न पुण्येन भवेद्भूमंडलाधिपः॥७१॥ शिवार्चनसमं पुण्यं न श्रुतं, तेन सिद्धयः॥ करस्था एव तास्सिद्धिः विश्वासेन-

परं भवेत्॥७२॥ मनुष्याणां तु सर्वेषां सर्वदा कलुषात्मनां॥ महादेवार्चने प्रीतिः न भविष्यति सर्वदा॥७३॥ मनुष्यदेहमासाद्य विश्वस्यापि सदा शिवं॥ यः पूजयति सर्वेशं स मुक्तो भवति ध्रुवं॥७४॥ विश्वेशपूजनं कृत्वा कृत्वा वीरेश्वरार्चनं॥ काशीवासरतो जातो ब्राह्मणः शास्त्रपारगः॥७५॥ सतावन्नित्य मभ्यर्च्य शंकरं लोकशंकरं॥ वीरेश्वरालयस्यापि करोति परिमार्जनं॥७६॥ स कदाचिन्महादेवं निशि संपूज्य सादरं॥ कृत्वा निद्रां महादेवं ददर्श गिरिजान्वितं॥७७॥ स पृष्टः शंकरेणैव किं करोमीति सादरं॥ आचारः कस्तवात्रेति प्राह स्नेहपुरःसरं॥७८॥ तदा प्राह स विप्रोपि भस्मोद्धूलितविग्रहः॥ रुद्राध्यायेन च स्तुत्वा प्रणम्य च मुहुर्मुहुः॥७९॥ तदङ्गस्मनांगानि विलेपयामो रुद्राक्षरत्नैश्च विभूषयामः॥ पंचाक्षरं पापहरं जपामो वाराणसीनाथ किमाचरामः॥८०॥ धर्माणि सर्वाणि विचारयामः कर्माणि सर्वाणि निवारयामः॥ श्रीभावलिंगं हृदि भावयामो वाराण०॥८१॥ कुंदेरमंदैः शिवमर्चयामो वृंदारवृंदाश्रयमाश्रयामः॥ गौरीसमेतं सततं भजामो वाराण०॥८२॥ अहर्निशं सादरमिंदिरादिवृंदारनारीकबरीनिरुद्धं॥ गौरीपदांभोजयुगं स्मरामो वाराणसी०॥८३॥ काशीपुरीवीथिषु संचरामः शैवानि नामानि सदा वदामः॥ श्रीभावमूर्तिं बहुधा नमामो वाराणसी०॥८४॥ परात्परं यन्महतो महा-

तं यदेकमव्यक्तमनंतरूपं॥ तद्रूपमेव हृदि चिंतयामो वाराणसी०॥८५॥ आराध्यमेकं शिवरूपमेव विश्वं पुराणं तम
सः परस्तात्॥ अनंतकोट्यर्कसमं भजामो वाराण०॥८६॥ आनंदकल्लोलकुलातिलोललीलाविलासालय
शैलबालां॥ त्वां कालकालं च विलोकयामो वारा०॥८७॥ गंगांभसा कुंभसमर्पितेन सुशीतलेन॥ वीरेश्वरं ला
मभिषिंचयामो वाराणसी०॥८८॥ जलामलैः कोमलबिल्वपल्लवैः श्रौतेन शुद्धोज्वलभस्मना च॥ वीरेश लिंगं
च समर्चयामो वाराणसी०॥८९॥ इत्युक्त्वा गिरिजाकांतं प्रणम्य च पुनः पुनः॥ भक्त्या स्तोतुं समारेभे पुनः पुनर
नन्यधीः॥९०॥ श्रीकाशीनाथ काशीपुरुचिरकथाकर्णनेन प्रवृत्तं चित्तं मत्तं कथं वा कथमपि नतयोर्वर्णने वा प्र
वीणं॥ कर्णं शीर्णं न पुण्यं क्षणमपि निपुणं प्राणिनां वा त्र्यक्षाक्षो भ्यापराधान्हर हर करुणासारपूरैकसिंधो॥
॥९१॥ पुण्यारण्यप्रकीर्णप्रणतसुरतरुश्रीयुतानंदसंगव्यासंगा भंगगंगाजलमिलिततलश्रीफलश्रील
मूले॥ तुंगं लिंगं निरंगं निगममनुगतं प्रोक्षितं नेक्षितं वा त्र्यक्षाक्षोभ्या०॥९२॥ स्नात्वा न ब्रह्मनालेसि
तभसितकृतोद्धूलनश्रीत्रिपुंड्रश्रीरुद्राक्षावृतांगः कृतनियमविधिः स्वर्धुनीपूरितीरे॥ श्रीरुद्राध्यायव
र्णप्रवणनिपुणधीः जस्मरामि स्मरारिं त्र्यक्षाक्षो०॥९३॥ संसारापारघोरज्वरखदिरांगारपूरप्रसारव्या–

व्यापारानेकशोकव्यतिकरनिकरव्याकुलो बाललीलः॥ काले काले नु वेलं प्रलयभयलयं नाश्रयामो महेशं त्र्य-
क्षाक्षोभ्य०॥९५॥ आश्रांतानंतचिंताहतविततमतिः स्वांतपद्मासनस्थं स्वस्थं शांतं नितांतं नतममरगणैः सं-
स्तुतं वेदसंघैः॥ अस्ताविद्याविलासव्यसनमतिमतं साधुनाराधयामः त्र्यक्षाक्षो०॥९५॥ भस्माभ्यंगं क्षणार्धं
प्रतिहतविमुखानंगमंगीकृतांगं शांगं गंगातरंगप्रतिभटविलसत् भोगिभोगोत्तमांगं॥ तुंगोत्संगांग संग
प्रमुदितगिरिजालिंगितांगं वनेडे त्र्यक्षाक्षोभ्य०॥९६॥ मत्वा पापानुतापं पुनरपि जननक्लेशकेशावकाशं
श्रुत्वा काशीमशेषश्रुतिशिखरमतानंदपीयूषराशिं॥ श्रुत्वा प्याशातिपाशप्रशमनशमनं नाश्रया मो नि-
शांतां त्र्यक्षाक्षो०॥९७॥ वारंवारं स्मरामि स्मरहरचरणौ नादरेण क्षणेन क्षीणप्राणप्रमाण क्षणचरणरणप्रेक्षणा-
दक्षिणोपि॥ प्राणप्राणाग्निहोत्रव्रतहितनियमः कामकामः प्रकामं त्र्यक्षाक्षोभ्य०॥९८॥ स्मृत्वा स्मृत्वापि का-
लज्वलदनलकुलस्तंभसंभारभारव्यापारारंभभीतिं यमभटघटना हा हहा सोपहासान्॥ भीतो भीतोपि भू-
तप्रतिभटविषयैः नार्चया मो यमारिं त्र्यक्षाक्षोभ्य०॥९९॥ सानंदं वेदवंद्यं स्मरहरचरणाराधनध्यानदानव्यक्ता-
सक्त स्वकर्मप्रति भुवमभवं मोक्षदाने भवत्वां॥ न त्र्यक्षेलक्षशोपि क्षणमपि मरणेप्यंघ्रिपद्मं तवेश त्र्यक्षाक्षो०॥१००॥

नग्नो गौरी सहाय स्मृति जनित निजानंद संदोह मग्नो लग्नं स्वर्गापवर्ग प्रदमघ हरापार लिंगार्चनेपि॥ नोद्दिग्नः पापकोपप्रचुर विषय जापारदुःखांबुराशेः त्र्यक्षाक्षोभ्या॥ २०२॥ गर्भा विर्भाव भोगव्य पगम सुगमोपाय शीलां शुकाय श्रीपादांभोजपूजाजित निजजन नव्याजजात द्विजश्रीः॥ विज्ञामिशोन भिन्नच्युतवितत मतिर्नमूतं त्वां भजामि त्र्यक्षाक्षोभ्या॥ २॥ त्र्यक्षस्त्वा श्रित रक्षकादि भवनाध्यक्षाधुना रक्ष मां रक्ष्यं, रक्ष्य मुपेक्ष्य सेत्किमिति मादक्षेपि मद्रक्षणे॥ फालाक्षा क्षर वीक्षणा क्षय महा निक्षेपदाक्षायणी वक्षोज स्फुरदक्षयकृपालक्षं परीक्ष्य क्षणं॥ ३॥ इति वीरेश्वरं स्तुत्वा तदाज्ञां प्राप्य सादरं॥ स्थित्वा काश्यां तदर्चायां निरतः सम भूत्सदा॥ इदं सर्वं महद्भाग्यं शिवाराधनजं फलं॥ २०४॥ ततस्त्व मपि यत्नेन शिव माराधयादरात्॥ हाराहारे विचारे तरसरपरो नोदार दारादर व्याहार व्यवहार सादर वरव्यापार भीरुः परं॥ वारं वार मनुस्मर स्मरहरं हारोपहारादरो हाराचार विचार मेव कुरुते संसार भारं हरन्॥ २०५॥ ॥ इति श्री शिव रहस्ये हराख्य तृतीयांशे वीरेश्वर स्तुतौ बृहस्पति शतानंद संवादो नाम सप्तचत्वारिंशोध्यायः॥ ४७॥ ॥ श्री काशी विश्वेश्वरार्पणमस्तु॥ ॥ याज्ञवल्क्य उवाच॥ ॥ इति तद्गुरु वाक्यानि गुरुर्वेधानि विशेषतः॥ शुल्लाशंकर पूजायां-

शिवरह.३
२१३

सादरः सतदा भवत्॥१॥ येशंकरध्यान विशारदाः सदा तेधीरदारादर सादरा किं॥ परं तुनी हारकरार्ध मोलिमनो-हरा-लू
हरा हार विचारधीराः॥२॥ नजातु जानंति जनिं जनन्याः परंवा यौवन कारणंवा॥ जीर्णं नपश्यंति परंतुते तु हरं
प्रपश्यंति चिरेण हाराः॥३॥ हारा नुदारा नुमहा रलिंग समर्चनध्यान निधान लाभान्॥ वंदे मुकुंदादि कदेववृंद वंद्य
हमंदार तरु प्रकाशान्॥४॥ संसार रूपामित दर्प सर्प प्रसर्पण प्राण समर्पणानां॥ कालेक्षणा क्षीण कथा सुधासु॥
क्षणेप्यपर्णा रमणं प्रयांति॥५॥ क्वशंकरापार कथा सुधार्णवः क्वपातकार शरीर योगः॥ क्वदुष्ट संसार विहार
वांछा दारादरापार रसाभिवांछा॥६॥ एकेनतेनैवदुरात्मना वा संसार सर्पार्पित चेतनापि॥ महेश्वरापारकथासु
धालवोदेवादवाप्तो यदि सोपि मुक्तः॥७॥ वक्तुं न शक्यते राजन्शिवार्चनकथार्णवः॥ तत्र रत्नान्यपाराणि हाररू
पाणि संत्यपि॥८॥ हारा एव महोदारा महेश्वर मनोहराः॥ तेषां प्रभावः केनापि न ज्ञातो लेशतोपिवा॥९॥ हाररू
पाणि रत्नानि दुर्लभानि जगत्त्रये॥ तत्कांतिप्रसरेणैव तमोनाशः प्रजायते॥१०॥ अज्ञान रूपतमसः प्रणा
शाय महेश्वरः॥ ससर्ज हार रत्नानि तद्विना शस्तुलेः परं॥११॥ एकदापार सूराणां मुदयेपिन सर्वथा॥ नाज्ञान
तमसो नाशो हारहार प्रभां विना॥१२॥ कृतालोकोपकाराय हार सृष्टिर्हरेण तु॥ सहारः केन चित्पुण्यैः अ-

अ.४८

पौरैरेव लभ्यते ॥१३॥ सर्वोपकारको हारो महेश्वरमनोहरः॥ यतस्तच्चरणांभोजरजः परमजीवनं ॥१४॥ संभाषण
प्रेक्षणाद्यैः पुनाति भुवनत्रयं॥ शांभवः केवलं तस्य दर्शनं पापनाशनं॥१५॥ यान्यार्जितानि पापानि तान्यनंता-
न्यपि क्षणात्॥ शांगांगाशृंगवातेन प्रणश्यंति न संशयः॥१६॥ शांगलिंगार्चनरतो मनोवाक्कायकर्मभिः॥
स शांग इति विज्ञेयस्तत्संगादेव मुच्यते॥१७॥ शांगाः स्पृष्टाश्च दृष्टाश्च पृष्टा अपि विशेषतः॥ अपारपातकाका
रपारावारापकारकाः॥१८॥ नयंत्यपि वदिष्यंति शांकराः सहसा पुनः॥ तथापि तेषां व्याहाराः श्रुताः पापपहारकाः
॥१९॥ हारोपचारव्याहारव्यवहारादरात्परं॥ हारास्तदादरेणैव संसारान्मुच्यते जनः॥२०॥ हारव्याहारमा
त्रेण मादरेण ततः परं॥ संसारसागराद्घोरान्नरान्संतारयेत् हरः॥२१॥ पुरा द्राविडदेशेषु मणिमुक्तानदी
तटे॥ वृद्धाचलेश्वरक्षेत्रे राजा परमधार्मिकः॥२२॥ शिवालयानां निर्माणं रत्नैरेव मनोहरैः॥ कारयामास
तत्तीरे शांकराति मनोहरे॥२३॥ स तेषु रत्नलिंगानि स्थापयामास कोटिशः॥ तस्य वृद्धाचलेशस्य मनोज्ञे
मणिमंडपे॥२४॥ मणिदीपावलिं कृत्वा पूजयामास शंकरं॥ अरुणोदयमारभ्य कृत्यं तस्य शिवार्चनं॥२५॥
न राज्यपालने त्वापि नेच्छा स्वात्मानुपालने॥ दारादिविषये त्वासु तस्य दूरतरा नृप॥२६॥ प्रतिप्रहरपूजाभि-

तोषयामास शंकरं॥ तत्पूजा साधनद्रव्य ममितं प्रत्यहं नृप॥ २७॥ पुजां पुनः पुनर्दृष्ट्वा प्रहृष्टः कष्टवर्जितः॥ अ-
निष्टं नाशयत्येव लोकानां स्वाव लोकनैः॥ २८॥ शिवनाम सुधाधारा धरो धीरः परं नृपः॥ महैश्वर्य संपन्नो
प्यपार गुण सागरः॥ शिवनाम सुधा धार रसेस्तु दृसनाचिरं॥ पुष्टः रमांन गयेक्षां नकोत्येव सर्वथा॥ ३०॥ क
दापि लौकिकं नाम तेन नोक्तं भ्रमादपि॥ शिवनाम्ना संज्ञयैव चरंत्यनुचरा अपि॥ ३१॥ मध्या ख्याग्रहणे व ज
लपात्रस्य केवलं॥ कुर्वंत्यानयनं तस्य सेवका अपि शंकराः॥ ३२॥ विधुत्या ख्यानसंधानं दीपानयन साधनं
॥ आतप नामग्रहणा दातपत्राहृतिः परं॥ ३३॥ वायग्रहण मात्रेण प्युशी रव्यजनादिना॥ वायु प्रसारं कुर्वंति
सेवकास्तस्य शांभवाः॥ ३४॥ तस्यान्नपति शब्दा नाम मिधानेन केवलं॥ प्रयच्छंत्यन्नमनघं महेश्वर निवेदि
तं॥ ३५॥ यद्यद्वस्तु महादेव संज्ञया संज्ञितं नृप॥ तत्तत्प्राप्य स राजा तु लौकिकं तं वदत्यपि॥ ३६॥ यदा वनप-
तित्वेन स्मृतो वनपतिस्तदा॥ तस्य पुष्पवनो भोगो जात इत्य विनिश्चितं॥ ३७॥ यदा वृक्षपतित्वेन स्मृतो वृक्ष
पतिस्तदा॥ बिल्वादि पोषणायुक्तास्तदीयाः सेवकास्तदा॥ ३८॥ यदा कक्षपतित्वेन स्मृतः कक्षपतिस्तदा॥ प
वृत्ता स्वतकृत्याः पुष्पकक्षा परिक्षणे॥ ३९॥ यदा पत्ति पतित्वेन स्मृतः पत्तिपतिस्तदा॥ पत्तिकोटि सहस्राणि-

समायांत्यपि दूरतः ॥४०॥ निषंगित्वेन गौरीशं यदा स्मरति पार्थिवः ॥ तदा निषंगमादाय प्रयच्छंति मनोहरं ॥४१॥
यदेवेषुधिमानीशः स्मृतस्तेन महात्मना ॥ तदेषुधिसहस्राणि नीयंते तस्य सन्निधिं ॥४२॥ तेनारण्यपति
त्वेन स्मृतो यदि महेश्वरः ॥ अरण्यपालनोद्योगस्तद्भृत्यानां प्रजायते ॥४३॥ स हिरण्यपतित्वेन स्मृतस्तेन शि
वो यदा ॥ तदा हिरण्यगिरयोप्यानीयंतेपि सेवकैः ॥४४॥ सरस्यत्वेन गौरीशं यदा स्मरति पार्थिवः ॥ तदा तद्भृत्यव
र्गस्य तत्सरः पोषणोद्यमः ॥४५॥ कूप्यत्वेन यदा राजा स्मरत्येव सदाशिवं ॥ तदा कूपोपचारेषु प्रमत्तास्तस्य सेवकाः
॥४६॥ वर्ष्यत्वेन यदा राजा स्मरत्येव महेश्वरं ॥ तदा वृष्ट्यर्थमुद्योगस्तद्भृत्यानां प्रजायते ॥४७॥ नाद्यत्वेन यदा शं
509
भुः स्मृतस्तेन महात्मना ॥ तदा नदीविचारेषु प्रयतास्तस्य सेवकाः ॥४८॥ एवं संवसतस्तस्य भूपालस्य महा
त्मनः ॥ आसायं भोजनापेक्षा न भवत्येव सर्वथा ॥४९॥ सायंकाले विशेषेण समाहा देवपूजने ॥ उद्युक्तः शांभ
वैर्युक्तो विमुक्तः पापपर्वतैः ॥५०॥ आपादमस्तकं सम्यक् उद्धूल्य सितभस्मना ॥ त्रिपुंड्रधारणं कृत्वा रुद्रा
क्षाणां च धारणं ॥५१॥ रुद्राक्षरत्नकोटीरं धृत्वा शिरसि सादरं ॥ रुद्राक्षमालालक्षाणां शोभया समलंकृतः ॥
॥५२॥ भस्मरुद्राक्षमालाढ्यैः शांकरैः सह सादरं ॥ गोक्षीरादिप्रवाहैश्च पूजयामास शंकरं ॥५३॥ चंदनैः कुसु-

मैर्बिल्वैः धूपदीपैश्च सादरं ॥ दिव्यान्नराशिभिः शंभुं पूजयामास सादरं ॥ ५४ ॥ पूजांते नृत्यतूर्याद्यैः स्तोषयित्वा महेश्वरं ॥ शांभवैः सहसल्लापं कृत्वा स्तोत्रं मुहुर्मुहुः ॥ ५५ ॥ समो भाग्यं महेशाय निवेद्य नियमान्नृपः ॥ हारोपहारशेषान्नैः स्तोषयामास शांकरान् ॥ ५६ ॥ सिद्धाः प्रदोषसमयेषु महेशपूजां लिंगेषु रत्नरचितेषु मनोहरेषु ॥ कृत्वा मृडा परिवृढं दृढभक्तिभावैः नृत्यंति नाट्यनिपुणाः सुरकन्यकाश्च ॥ ५७ ॥ गंधर्वराजनगरे पि शिवार्चनेन नीतः प्रदोषसमयः स सुधामयो पि ॥ तेषां न कृत्यमितरद्धि रिराजकन्यानाथांघ्रि पूजन महाव्रतदीक्षितानां ॥ ५८ ॥ सोमसायं चतुर्मुखाः त्रिदृशाः त्रिनेत्रं लिंगस्वरूपममलं सुधयाभिषिच्य ॥ मंदारकुंदकुसुमादिभिरर्चयंति ते देवदुंदुभिनिनादपुरः सरं हि ॥ ५९ ॥ रंभादिदेवगणिकाः शिवपूजनांते नृत्यं महेशनिकटे रजनीमुखेषु ॥ कुर्वंति सादरममंदमुदाप्रयत्नैः स्वेदप्रपूरपरिपूरितदिव्यगात्राः ॥ ६० ॥ स्वेक्षपनीतकृतभस्मसितत्रिपुंड्राः ताः स्वर्धुनीजलनिवेशनपूतगात्राः ॥ धृत्वा त्रिपुंड्रममलं सितभस्मनेव रुद्राक्षधारणपराः प्रभवंति भावाः पुनरेव नृत्यं कुर्वंति शंकरमनोहरमंदिरेषु ॥ ६१ ॥ लोकेन के पि रजनीमुखमेत्य भक्त्या कार्यांतरेषु निरताः प्रमदाः क्षमायां ॥

धृत्वा त्रिपुंड्रममलं सितभस्मनेव रुद्राक्ष धारण पराः प्रभवंति भावाः ॥६२॥ संपाद्य बिल्वकुसुमादि
कमादरेण संपूजयंति गिरिशं शिवलिंगरूपं ॥ कर्पूरदीपरुचिरप्रभया प्रदीप्तं व्याप्तं च धूपवरधूम
गणैरपारैः ॥६३॥ नारायणो मृदुमृदंगतलाभिघातनम्राननश्वसण घातविधूततद्दोषः ॥ स्वेदांबुपूर
परिपूरितएवनित्यं नृत्यं करोति नियमाद्रजनीमुखेषु ॥६४॥ सायं रमापि शिवलिंगमनंगभंग
क्रीडास्पदं सुरसरिद्वरनीरपूरैः ॥ कस्तूरिकारुचिरचंदनपुष्पमाल्य बिल्वादिभिः शुभदमर्च-
यति प्रयत्नैः ॥६५॥ पूजां समाप्य परिगृह्य च रुद्रवीणां गानैः समाप्य शिवनाम विशेषगानैः ॥ नृत्यं करोत्य
भिनयेषु विचक्षणा सा नारायणस्य रमणी तरुणी समेता ॥६६॥ नाद्यनसेयमनिशंच निशावसानं कृत्वा
प्रनृत्यति पुनः पुनरिंद्रमौलिं ॥ स्मृत्वा मनोहरशिवाचरणांबुजं च भूयः प्रनृत्यति हसत्यतिगानलोला ॥६७॥
गंगापि तुंगसुतरंगजलप्रवाहैर्लिंगाभिषेचनविधिं नियमैः समाप्य ॥ श्रीचंदनादिभिरलंकृतमीशमाशु
नत्वा प्रनृत्यति शिवोत्सवदर्शनेन ॥६८॥ ब्रह्मा शिवार्चनविधिं विधिभिर्विदित्वा भक्त्या प्रदोषसम
ये शिवपूजनेन ॥ पूतो जपत्यनुदिनं प्रणवान्वितानि पंचाक्षराणि शिवनाममनोहराणि ॥६९॥ वाणीत्ववा-

गिभरमिताभिरनंतकार्यैः प्रस्तौति शंकरपदांबुजपूजनंच ॥ कृत्वाप्रदोषसमयेस्वमरांगनाभिः साकंप्रनृत्यति विभूतिपवित्रगात्रा ॥ ७० ॥ देवास्तावदुमासहायचरणांभोजं प्रदोषेमुहुर्बिल्वाद्यैः कुसुमैश्च चंदनवरैः सं- अ० ४८

पूज्यजातोत्सवाः ॥ तत्पूजानिरताः कदापिनभवं त्येवामृतास्वादने कोवास्याद्विरतः प्रमोदविरतः को-

ज वाग्गमंडले ॥ ७१ ॥ कः पाणोगणनाथनाथचरणांभोजार्चनानादरः सायंकालमवाप्यदुर्लभतरंब्रा-

ह्मण्यमासाद्यच ॥ त्यक्त्वा(कृत्वा) केवलमंत्यजानपिमहापापाश्रयान्दूरवान् (मु) दुर्वीर्यान्दुरदृष्टकोटिघटिता

न्जारोपजारोद्भवान् ॥ ७२ ॥ मन्येतं पुरुषाधमंनरखरं दुर्वीर्यपातोद्भवं पापिष्ठातिवरिष्ठुमद्यपकु-

लेस्त्रीयोनिगंधोन्मुखं ॥ यः सायंशिवलिंगसंगरहितः कार्यांतरव्यापृतः शंगाराधनसाधनं(नां) दिविमु ना

खोभूभाररूपः परं ॥ ७३ ॥ तद्देशः प्रलयंप्रयातिसहसातन्नाशकेस्तेर्विनाब्रह्मांडप्रलयैः प्रदोष

समयेयः शंकरानर्चकः ॥ तच्चित्तंखलुपित्तवीतमनिशंतातोपितस्याधमः तन्मातव्यभिचारिणी-

शुनकजाजातापिमारासभेः ॥ ७४ ॥ ब्रह्मांडानिपुनातिशंकरपरः सायंशिवाराधकस्तत्तातः सुकृती

सतीचजननीतत्सोदरोब्राह्मणः ॥ तत्संतानसमृद्धिरप्यनुदिनंतस्याभिवृद्धिः सदासंतोषैर्धनधान्यसार

विभवाद्यभ्युच्चयः संततं ॥ ७४ ॥ तत्पादाब्जरजः शिरसि मे तस्मै नमः सर्वदा यः सायं शिवलिंगपूजनरतः श्रांतः प्रणामैर्मुहुः ॥ नृत्योत्साहकरः करादिविनयैरत्यादरात्सादरं व्याहारैर्हर शंकर स्मरहरेत्यासीत्यमंदोत्सवः ॥ ७६ ॥ संगस्तेन ममास्तु संततमुमाकांतं प्रदोषे बुधः क्षीराद्यैरभिषिच्य लिंगनिलयं श्रीचंदनालेपनैः ॥ बिल्वैरप्यमलैरमंदविलसद्गंधैर्मरंदान्वितैः कुंदैरर्चयति प्रकृष्टविभवैः कर्पूरदीपादिभिः ॥ ७७ ॥ तत्संगे दिनयापनं भवतु मे यः सायमीशार्चनध्यानानंदघनो विभूतिकवचो रुद्राक्षभूषोत्सवः ॥ जिह्वाग्रं करनामरूपसमुधापानादरास्वादनव्यासक्ता शिवलिंगपूजनमहोत्साहस्य सायं मुहुः ॥ ७८ ॥ वासः स्यान्मम तस्य मंदिरवरे यः सायमीशार्चनानंदापारतरंग संगीत तनुः भूतिप्रभाभूषितः ॥ रुद्राक्षाभरणः प्रतिक्षणमपि श्रीमन्विरूपाक्ष मां रक्षस्वेत्यक्षपरीक्ष्य मामकधिया रक्षेति यः संवदेत् ॥ ७९ ॥ पातालेषु रगेश्वरप्रभृतयः श्रीहाटकेशार्चनं सायं संततमेव शांतहृदयाः सायं बधूसंयुताः ॥ धूपैर्दीपगणैश्च चंदनवरैः पुष्पैरमंदैरपि प्राज्याज्यान्नवरैरपारमधुरैर्नाट्यादिभिश्चान्वहं ॥ ८० ॥ सायंकालशिवार्चनस्य महिमा केनापि न ज्ञायते तस्मादेव विमोहमेत्य बहवस्त्यक्त्वा कृता शिवाराधनं ॥ कुंभीपा-

कमुपेत्य गर्भजनितं क्लेशं च संप्राप्यते संसारार्णवमज्जनैरनुदिनं त्तिष्ठन्तिबंभारवैः ॥८१॥ लोके शांकरसंगतिः
खलु सदा सायं शिवाराधनध्यानाय प्रभवत्यवश्यमसकृत्तत्संगतस्तत्फलं ॥ सायस्यास्ति सदैव भाग्य

निवहा धारासुराराधितः यत्पादांबुजपूजनेन भगवान् फालेक्षणस्तुष्यति ॥८२॥ आकल्पं यदि धर्म
कोटिभिरहो रात्रिंच येनीयतां किंतैः सायमुमासहायचरणांभोजार्चने चेद्भवेत् ॥ पातिव्रत्यसमं खलु
व्रतमिदं त्यागेस्य किंदुर्भगो नस्यादेवततः कदापिन परित्याज्यं शिवाराधनं ॥८३॥ सायंकालशिवार्च
नेन भगवान् तुष्टो यथा शंकरस्तद्वन्नान्यविशेषकारजियमा चोरैः सतुष्यत्यपि ॥ तस्मात्सायमु
मासहायभजनं कृत्वा विमुक्तो भवेत् पापापारमहांबुराशिभिरपि प्राप्नोति भाग्यान्यपि ॥८४॥
॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ इति श्रीशिवरहस्ये हराख्ये तृतीयांशे याज्ञवल्क्यजनकसंवा
दोनामाष्टचत्वारिंशोध्यायः ॥४८॥ ॥ याज्ञवल्क्य उवाच ॥ ॥ राजा द्रविडदेशानां शूरसेनाधि-
पो नृपः ॥ चकार बहुधा धर्मान् शिवपूजनलक्षणान् ॥१॥ वयोनीतं च तेनैव सादरं शंकरार्चने ॥
सायं शिवार्चनं तस्य व्रतं भूपाल सत्तम ॥२॥ तस्मिन्व्रते यथा तस्य विश्वासो मुक्तिदायकः ॥ तथा-

तथा नान्यव्रते राजन् तत्तुल्य व्रतमेव न ॥३॥ तस्य व्रतस्य महिमा वेदेष्वपि निरूपितः ॥ विधिरप्य विशेषेण वेदेष्वेव प्रकीर्तितः ॥४॥ विधानमपि वक्ष्यामि सायंकाल शिवार्चने ॥ तत्फलान्यपि वक्ष्यामि विशेषेण नृपोत्तम ॥५॥ प्रातर्मध्यान्ह कालेपि मध्येपि शिव पूजकः ॥ सायं शिवार्चनं कृत्वा भुंक्ते मध्ये न सर्वथा ॥६॥ अस्त पूर्वमुर्व मुहूर्ते तु कृत्वा शौचादिकं परं ॥ स्नात्वा शिवोदकेनैव कुर्याद्‌चमनं क्रमात् ॥७॥ तत्पूर्वं भस्म धृत्वैव न-
भस्म विना धारणं ॥ कुर्यादाचमनं विप्रो जल पानं तु तद्यतः ॥८॥ जल पानाधिकारोपि धृते भस्मनि जायते ॥ विना तेन जलं पित्वा रेतः पानाद्यवान्भवेत् ॥९॥ अभस्मना तु न स्थेय मिति या श्रुतिराधृता ॥ तया श्रुत्या यतो नित्यं विहितं भस्म धारणं ॥१०॥ मुख प्रक्षालनं कृत्वा स्नानात्पूर्वमपि द्विजः ॥ भस्मनाघर्षयेत्कालं तद्यथा न प्लुतं जलैः ॥११॥
S/2
स्नान काले भाव पूतो निवेद्य जल मीश्वरे ॥ तेनैवाचमनं कृत्वा निवेदित जले नहि ॥१२॥ स्नानं च प्रत्यहं कुर्याज्जलैः शिव निवेदितैः ॥ कोष्णेन तेन कर्तव्यं अभिषेकोदके न वा ॥१३॥ ततः स्नात्वा प्रयत्नेन धृत्वा भस्माभिमंत्रितं ॥ पश्चादाचमनं कुर्यात्पश्चाद्रुद्रस्य धारणं ॥१४॥ पुनराचम्य सर्वांगमुद्धूल्य सित भस्मना ॥ त्रिपुंड्र धारणं कुर्यात्पश्चाद्रुद्राक्ष धारणं ॥१५॥ ततः संध्यां समाप्याशु शिव मंदिर माविशेत् ॥ प्रक्षालिते पवित्रे च श्रीमहादेव-

मंदिरे ॥१६॥ उदङ्मुखः प्राङ्मुखोवा यद्वा पश्चान्मुखो द्विजः॥ उपविश्य शिवं ध्यायेत् लिंगंसोमार्धशेखरं ॥१७॥ जटाजूटतटाघातोद्यतचंद्रकलाधरं॥ त्रिनेत्रं नीलकंठंच वरदाभयपाणिनं॥१८॥ सर्वाभरणसंयुक्तं दुकूलपरिवेष्टितं॥ हिरण्यबाहवे तुभ्यंनमःइत्यनुवंगतः॥१९॥ ध्यात्वा भक्त्या प्रयत्नेन दद्यादाचमनीयकं॥ ततः पंचामृतैः कुर्यादभिषेकं पृथक् पृथक्॥२०॥ ततः परं रुद्रसूक्तैः श्रीरुद्रध्यायपूर्वकैः॥ अभिषेकश्च कर्तव्योजलाविच्छिन्नधारया॥२१॥ पश्चादाचमनं दद्यात् वस्त्रं दद्यात्ततः परं॥ पश्चाद्विभूतिर्दातव्या शिवमंत्राभिमंत्रिता॥२२॥ ततः परं चंदनं च देयं कुंकुमकेसरैः॥ कस्तूरिकादिभिर्द्रव्यैः सुगंधैरपि संयुतं॥२३॥ ततः परं बिल्वपत्रैः क्षालितैश्च तिलाक्षतैः॥ पुष्पैरपारैर्मंदारप्रमुखैश्च समर्चयेत्॥२४॥ ततः परं धूपदीपैः कृत्वा नैवेद्यमुत्तमं॥ मधुरद्रव्यसंकीर्णं दद्यादाज्यसमन्वितं॥२५॥ परमान्नादिदमानि फलानि विविधान्यपि॥ यद्यद्रुचिकरं वस्तु तत्सर्वं विनिवेदयेत्॥२६॥ ततः कर्पूरदीपानां नीराजनसमर्पणं॥ दीपावलिप्रदानंच सर्वतः शिवमंदिरे॥२७॥ ततः स्तुत्वा महादेवं प्रणम्य च पुनः पुनः॥ लौकिकैर्वैदिकैर्मंत्रैः शिवध्यानपुरःसरं॥२८॥ नमोनमस्तेऽस्त्वीशाधिनाथ नमोनमस्ते प्रमथाधिनाथ॥ नमोनमो

मामव मामवाव स्फुरज्जटाजूट तटेंदुनाथ ॥ २९ ॥ संसाररूप विविधामितदंदशूकदंष्ट्राभिघात परिपीडित मिंदुमौले ॥ पाहि त्वदीय मतिदीन ममंद दुःखं आधिव्यथा विष विनाशक दीनबंधो ॥ ३० ॥ श्रीविश्वनाथ शरणागत वत्सलेश । त्वत्पाद पद्म भजनाय मनः प्रवृत्तं ॥ पुण्यैरगण्य विभवैस्तदपार पुण्य निक्षेपलाभ मनु वांछति तत्प्रयच्छ ॥ ३१ ॥ दुर्वार दुःख परिहार करं भवंतं फाल क्षणं भव भवाब्धि विशोषकं च ॥ जानाति चित्त मिति मे तदपार पुण्य निक्षेपलाभ मनु वांछति तत्प्रयच्छ ॥ ३२ ॥ येतावदीश चरणं शरणं प्रपन्नाः तेताव तैव सुखिनो दयया तवाते ॥ तत्तावदीश मम चित्त मिदं विचार्य चिर त्वत्पाद पद्म भजनाय पुनः प्रवृत्तं ॥ ३३ ॥ अन्यानि यानि कमलानि सरोवरेषु तैव प्रनाश मुपयांति सुगंध लेशः ॥ इत्यादरेण बहुधैव विचार्य चित्तं त्वत्पाद पद्म भजनाय मम प्रवृत्तं ॥ ३४ ॥ नान्यन्ममास्ति शरणं तरुणेंदु खंड दंडायमान कर मंडित मंडलांसं त्वत्पादुके शरण मित्यनुवारमेव ज्ञात्वा भजामि भगवंतमुमासहायं ॥ ३५ ॥ चित्तं ममेश चरणस्मरणे प्रवृत्तं जिह्वा महेश्वरकथा समुदीरणाय ॥ कर्णौ सदा शिवकथा श्रवण प्रवृत्तौ हस्तौ शिवार्चन विधौ मम तौ प्रवृत्तौ ॥ ३६ ॥ धन्यं मनो मम शिव स्मरण प्रवृत्तं पुण्यैरपार विभवैस्तदुपार्जितं मे ॥ पुण्यानि

तेन पुनरप्यमितानि तानि" सं भावितान्यपि शुभान्यपि भावुकानि॥३७॥ यत्कल्पकोटिसमुपार्जितपुण्यजातं तत्तावदीश चरणांबुजसेवनाय॥ जातं तदेवमम भाग्यमिति स्मरामि" भूयः स्मरामि चिरमाशु हरस्मरारे॥३८॥ भो शंकर स्मरहरामरवीर धीर॥ गौरीमनो रमण पापहर प्रवीण॥ मामुद्धरोद्धर महाघसमुद्रमग्नं संसार घोर विषसर्पमुखाभिलग्नं॥३९॥ कारुण्यसागर विशेष गुणांबुराशे" काशीपते कुशलमेव मम प्रयच्छ॥ मामुद्धरोद्धर०॥४०॥ त्वं दीनवत्सल इति श्रुतिषु प्रसिद्धः सिद्धादिसेवित महेश्वर शूलपाणे॥ मामुद्धरोद्धर०॥४१॥ श्रीनीलकंठ गिरिराजसुतोपकंठ सोत्कंठ मिंदुकलिकाभरणा चेनाद्यो॥ मामुद्धरो[illegible]धर०॥४२॥ कावागति मम महेश्वर चिंतितास्ति श्रीकालकाल शिवपूजकपूजकस्य॥ मामुद्धरोद्धर०॥४३॥ पापप्रवृत्ति रपि रुप्रि मास्तु भवत्पदाब्ज" पूजा विधान निरतस्य शिवासहाय॥ मामुद्धरोद्धर०॥४४॥ यत्संचितं विविध पाप कुलं तदाशु नाशं प्रयातु शशिखंड विमंडितांग॥ मामुद्धरोद्धर०॥४५॥ गर्भादिवासजनकं दुरदृष्टमस्य" यत्तावदाशु मम तद्विलयं प्रयातु॥ मामुद्धरोद्धर०॥४६॥ यो योनिमार्गविषदुर्गविनिर्गमादि" हेतुः स तावदधुना विलयं प्रयातु॥ मामु०॥४७॥

दुर्गंध पूर परि पूरित योनि भाग संभोग बुद्धिर धुना विलयं प्रयातु ॥ मामु० ॥ ४८ ॥ येये पुरीषजल संकुल
गर्भवासे दुर्वासना परिवृताः प्रलयो स्तु तेषां ॥ मामु० ॥ ४९ ॥ विश्वेशनाम सुसुधा रसपान पीना नित्यं
समास्तु रसना गिरिजा सहाय ॥ मामु० ॥ ५० ॥ श्री बिल्व पल्लव वरै रपि पूजित स्त्वं मुक्तिं प्रयच्छ
मपि शंकर किं प्रवृत्तः ॥ मामु० ॥ ५१ ॥ मत्प्रार्थनीय मिद मेत दनंत जन्म संकीर्ण पुण्य फल भूत मभूत
पूर्वं ॥ सानंद मिंदु शकला कलितावतंस पादार विंद मकरंद मधुव्रतत्वं ॥ पापाय मन्मदिति मेभ-
तिराविरासीत्तेन त्वदीय चरणांबुज भक्तिरेका ॥ कामांतका स्तु मम कामद कामये हं कामारिचा-
रु चरणार्चन साधनानि ॥ ५३ ॥ न ब्रह्म लोक मपि वांछति मानसं मे वाणी मनो रमणता मपि
किं च शंभो ॥ लिंगार्चने शिव निवेदित भोजने पि वांछां करोति तदिमं वर मद्य देहि ॥ ५४ ॥
वैकुंठवास मपि नेच्छति मानसं मे शंभो रमा रमणता मपि, किंतु भक्तिं ॥ वांछत्य पार विभवैः शिव
लिंग पूजां कर्तुं प्रदोष समयेषु विशेषतस्तु ॥ ५५ ॥ न स्वर्ग लोक मभिवांछति मानसं मे स्वर्गाधि
पत्य मपि चारु शशांक मौले ॥ प्राण प्रयाण समये पि शिवार्चने क्षां रूपं बलं स्व मभि वांछति पुण्य
पुंजैः ॥ ५६ ॥

२२०

ज्ञातं च चित्त मसकृद्गिरिश त्वया मे वीरेश लिंग विकटा निकटानेन ॥ नीतं वयः शिव दिने प्यशनं विहाय त्वल्लिंग पूजन रतेन न विस्मृतिस्ते ॥ ५७ ॥ देशांतर स्थित गृहोत्तं विलासिनो यांत त्संगमे पि न रतिर्मम योवनेपि ॥ तत्किं त्वया न विदितं गिरिजा र्धजाने जाने शिवान्य मशिवं शिव पूजनेन ॥ ५८ ॥ वाक् पुष्पजाल मसकृद्दु चिरं चिरेण कालेन दत्त मपि तुभ्य मपि त्वयापि ॥ तत्त द्गृही तमसकृत्त वि स्मृतिः कांका कोदरा भरण मां स्मर मां स्मराशु ॥ ५९ ॥ धत्तूर पुष्प नव बिल्व दलार्क पुष्पं गंगाजलादि सित भूति कणादि भिस्त्वं ॥ नाराधितोऽसि किमु मार रमणा तिभक्त्या तद्विस्मृतं कथ मपि स्मर विश्वनाथ ॥ ६० ॥ एकैक बिल्व नव पल्लव कोमलेन लिंगे प्रदोष समये तव घोर नाथ ॥ दत्तेन तेन च चतुर्दश लोक लोके वंध्यत्व मप्य फल मल्प फलं तदीश ॥ ६१ ॥ गंगा तरंग विमलानिल शीतलेन तोयेन या शिर सि ते रचिता सुधारा ॥ सा विस्मृता कथ मुमा रमणाद्य तस्याः किं वा फलं न च सुर गौरि वमा प्रवृत्ता ॥ ६२ ॥ विश्वास बीज विलयात्कथं प्रवृत्तिः तत्तत्फलार्पण समर्थ कदर्थ नेयं ॥ सह्या कथं मम तवापि न माम कत्व मद्यार्पिते मयि किमत्र वदामि शंभो ॥ ६३ ॥ यद्यक्ति तानि परलोक फलानि तेषां नाद्याधुना फल मिति श्रम एव सोयं ॥

अ० ४९

सर्वेस्मितार्थफलदानि शिवार्चनानि श्रौतानि तानि सफलानि सदापि शंभो॥ ६४॥ कृत्यं किमस्ति मरणोत्तर मोषधानां संजीवनी फलमपि श्रुतमेव किंन॥ साजीवनं जनयतीति निकृष्टवस्तु वस्तु प्रकृष्टमिदमीश शिवार्चनंहि॥ ६५॥ आमुष्मिकान्यपि फलान्यमितानि शंभो तावद्भवंतु भगवन्नधुनापि तानि॥ संभावितानि न फलानि कथं बहूनि येः कीर्तिरत्र बहुधा गिरिश प्रसादात्॥ ६६॥ एतावदीश सहमान मयायदुक्तं तन्नापराध इति मानय दीनबंधो॥ यो निष्ठुरं वदतिकोपि शिशुः कुमारः तद्रक्षणाय जनकः खलु संप्रवृत्तः॥ स्नेहस्त्ववास्ति मयि संततमित्यवैमि तेनैव जीवनमपीश ससंततेर्मे॥ दूरीकुरु प्रतिभवेपि भयानि शंभो त्वय्यस्तु भक्तिरनिशं मुहुरिंदुमौले॥ ६८॥ अद्य प्रभृत्यमितपातकराशिभीतिर्नास्तीति मे हर विभात्यनुवारमस्य॥ कल्याणराशिरुपपन्न इति स्मरामि संपत्समूहसहितोपि पदे पदे मे॥ ६९॥ इति प्रसाद्य गौरीशं प्रणम्य च पुनः पुनः॥ नृत्यं कार्यं महेशाग्रे शिवनाम पुरःसरं॥ ७०॥ पुनः प्रणम्य गौरीशं प्रक्षाल्य शिवमंदिरं॥ कृत्वा पूजां यथाशक्ति पूजनं विनिवेदयेत॥ ७१॥ होमश्च वैश्वदेवश्च शिवनैवेद्यशेषतः॥ कर्तव्यः पावके शैवैः सघृतेन वा॥ ७२॥ भवाद्यैर्देवशब्दाद्यैः स्वाहांतैर्जुहुयात्ततः॥

पत्नी शब्दे ततो रेव स्वाहां तेर्जुहयात्पुनः ॥७३॥ पश्चादाहुतिदानं स्यात् पितृभ्यो पि स्वधास्त्विति ॥ ततेरेवत-
र्पणं कार्यं होमात्पूर्वं विशेषतः ॥७४॥ होमोत्तरं वा कर्त्तव्यं सस्यात्कालद्वयेततः ॥ ततः शंकरनैवेद्यं भुजनंशां अ० ४५
भवेः सह ॥७५॥ ततः शिवकथालापैः निशानेयापि काचन ॥ एवं नित्यमिदं कार्यं सायंकाले शिवार्चनं ॥७६॥
यो नित्यं प्रयतः कुर्यात् सायंकाले शिवार्चनं ॥ तस्य पुण्यफलं वक्तुं ब्रह्मणापि न शक्यते ॥७७॥ इदं व्रतं ब्राह्मणानां
शांभवानां विशेषतः ॥ एतद्व्रतसमं पुण्यं नास्ति न श्रूयतेपि च ॥७८॥ ब्रह्मावर्त्ते पुरा कश्चिद्राजा भूच्चक्र
पालकः ॥ तस्यैश्वर्यस्य नांतो स्ति तेन पुण्यं कृतं पुरा ॥७९॥ तं दृष्टुमागतो व्यासस्तमाह नृपसत्तमः ॥ संपूज्य
सादरं भक्त्या शिवभक्तिपरायणं ॥८०॥ ॥ राजोवाच ॥ ॥ तत्त्वज्ञ तत्त्व विक्रोष्ट संसारक्लेशनाशकं ॥ उपा-
यं वद मे येन न संसारभयं मुने ॥८१॥ ॥ व्यास उवाच ॥ ॥ साधु पृष्टं त्वया राजन्धर्मे भ्वास्था नृणामिह ॥
दुर्लभा साय तो लोके प्रायः संसारिणो जनाः ॥८२॥ संसार रत चित्तानां कुतः स्याद्धर्मवासना ॥ धर्मवासनया
लोके विरक्तो जायते नरः ॥८३॥ अविरक्तस्य धर्मेषु वासना यदि जायते क्षणार्धेन विनिष्टासा न पुनर्जा
यते खलु ॥८४॥ संतता धर्मबुद्धिश्चेन्मनुष्याणां विशेषतः ॥ त एव मुक्ताः संसाराद्दुस्तराद्दुःखसागरात् ॥
८५॥

धर्मोश्च विविधाः संति संतुतेस्मिंतेष्वपि॥ न फलं धर्म धर्मेण विना धर्मेण केवलं॥ ८६॥ ॥ राजोवाच॥ ॥
श्रुतमद्य महैश्वर्यं त्वन्मुखादेव केवलं॥ धर्मो धर्मश्च वा शास्त्रे सा वार्ता न श्रुता खलु॥ ८७॥ ॥ व्यास उवाच॥ ॥ धर्मे
धर्मपरिज्ञानं लोके खल्वति दुर्लभं॥ धर्मे धर्मे प्रवृत्तिश्च लोके नैवोपजायते॥ ८८॥ धर्मोत्तमो धर्मधर्म
स्तत्धर्मावगमो भुवि॥ शांकरस्यास्ति तज्ज्ञानमन्येषां तु न सर्वथा॥ ८९॥ धर्मे धर्म इति ज्ञातो धर्मेषु शि-
वपूजनं॥ देवदेवो महादेवो यथा सर्वामरेष्वपि॥ ९०॥ देवत्वेन महादेवो नो च्यते तुल्यता यतः॥ परंतु
देवदेवत्वव्यवहारो महेश्वरे॥ ९१॥ तस्मात्धर्मोत्तमत्वेन शिव धर्मः शिवार्चनं॥ धर्मे धर्म इति ज्ञानं त-
स्मिन्नतिदुर्लभं॥ ९२॥ अधुनापि श्रुतो धर्मो धर्मे धर्म इति त्वया॥ शिवार्चनात्परो धर्मो धर्मे धर्मो
न सर्वथा॥ ९३॥ धर्मे धर्मत्वमेतस्य शिवलिंगार्चनस्य तु॥ धर्मांतरापेक्षया स्यात्तदपेक्षा तु त-
स्य न॥ यागदानादयो धर्माः शिवलिंगार्चनात्मकं॥ ९४॥ धर्ममाश्रित्य धर्मत्वं प्राप्नुवंति हि सर्वथा॥
तथा च धर्मे धर्मोयं धर्मसंम्राडिति श्रुतं॥ ९५॥ अतः शिवार्चनं श्रेष्ठं धर्माणामिति गीयते॥ अनंत
जन्मसंचीर्णैर्यागाद्यैः पूतमानसाः॥ ९६॥ शिवार्चने प्रवर्तंते तेन मुक्तिरवाप्यते॥ प्राप्याति दुर्लभां लोके भ-

क्तिमव्यभिचारिणीं ॥९७॥ कृत्वा शिवार्चनं मुक्तो भवत्येव हि सर्वथा ॥ प्रातर्मध्याह्न समये विशेषाच्छिरिशा-
र्चनं ॥९८॥ कर्त्तव्यं मध्य कालेपि संततं च शिवार्चनं ॥ ॥ राजोवाच ॥ ॥ मुने संतत पूजायाः कः प्रकारः अ०४५
कथं सदा ॥ सा पूजा काल साध्या हि कथं कार्या वदाधुना ॥१००॥ ॥ व्यास उवाच ॥ ॥ अविछिन्ना नीर धारा
शिव लिंगे मनोहरा ॥ कल्पनीया सैव धारा शिव संतत पूजनं ॥१॥ शिव संतत पूजायाः फलमप्युच्यते शृणु ॥
यस्य श्रवण मात्रेण तस्य भक्तिः प्रजायते ॥२॥ जलधारा मुक्ति धारा, पाप धारा पहारिणी ॥ धारा रूपाणि
पापानि नश्यंति जल धारया ॥३॥ अविछिन्नानि पापानि जलाविछिन्न धारया ॥ विनश्यंतीति सा लिंगे
कल्पनीया सदा द्विजैः ॥४॥ घर्म काले विशेषेण जल धारा प्रकल्पनं ॥ शिव लिंगेषु कर्त्तव्यं तेन पाप ल-
यो भवेत ॥५॥ अतः पाप लयो द्योगः कर्त्तव्यो नीर धारया ॥ शोधितं नीर मादाय सुगंध द्रव्य संयुतं ॥६॥
पत्रैः फलैर्वा पुष्पैर्वा नव दूर्वांकुरैरपि ॥ जलैरपि प्रकुर्वंति मुनयः शिवपूजनं ॥७॥ जलं दत्वा महेशाय
यत्फलं समवाप्यते ॥ तत्फलं केन वा सम्यक वर्णनीयं नृपोत्तम ॥८॥ शिवार्चनेन सिध्यंति सर्वे कामाः श्रु-
ति श्रुताः ॥ अनायासेन मर्त्यानां शुभदं शिव पूजनं ॥९॥ अपार करुणा सार सागरः शंकरः परः ॥ भक्त्या (कत्या) दत्तं

फलं पत्रं गृण्हाति शुभदायकः॥ १०॥ तस्य संपूर्णकामस्य नित्यानंदस्य वस्तुतः॥ तोषो जलार्पणे नापि जायते तत्कि लाद्भुतं॥ ११॥ प्रच्छिन्नान्यपि शुष्काणि बिल्वपत्राणि शंकरः॥ गृण्हाति, विपुलं भाग्यं दातुं भक्ताय सत्वरं॥ १२॥ शिवस्य करुणासिंधोर्महिमाऽपि महान्खलु॥ स्वभक्तदयया गृण्हात्यंबु पत्रं च किंचन॥ १३॥ नाराधयंति सहसा करुणासागरं हरं॥ नतरंत्यपि संसारसागरं पातकाकरं॥ १४॥ भक्त्यादेवशिरोमणेः सुरमणिर्दूर्वाणि पत्राणि वा नीरं वा कुसुमं फलं मणिमये लिंगेऽन्यलिंगेपि वा॥ दत्तं भस्मविभूषितेन कृपया गृण्हात्यनुग्राहको दातृत्वव्यसनी प्रयच्छति महद्भाग्यं भवानीपतिः॥ १५॥ ॥ इतिश्री शिवरहस्ये हरारव्ये तृतीयांशे याज्ञवल्क्यजनकसंवादो नामएकोनपंचाशोऽध्यायः॥ ४९॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु॥

॥ याज्ञवल्क्यउवाच॥ ॥ इति तद्वचनं श्रुत्वा प्रहृष्टः स नृपोत्तमः॥ वाग्भिरभ्यर्च्य तं व्यासं पुनराह विचक्षणः॥ भगवन्ब्रूहि तत्वज्ञ धर्मे धर्माधिकारिणं॥ तत्फलं च विशेषेण तदंगान्यपि सादरं॥ २॥ ॥ व्यासउवाच॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्येपि संकराः॥ तत्तदंगप्रभेदेन सर्वे तत्राधिकारिणः॥ ३॥ द्विजानां वैदिकैर्मंत्रैः शिवलिंगसमर्चनं॥ अन्येषां लौकिकैर्मंत्रैस्तत्कार्यं सर्वथा नृप॥ ४॥ स्त्रीणां च पुरुषाणां च

5/2

शिवलिंगसमर्चनं ॥ अवश्यमेव कर्तव्यं तत्त्याज्यं नैव सर्वथा ॥ ५ ॥ शिवलिंगार्चनं त्यक्त्वा यः पिबेन्नीरमेव वा ॥ सुरेतः पानजं पापं प्राप्नोत्येव न संशयः ॥ ६ ॥ यस्तु लिंगार्चनं त्यक्त्वा भोक्तुमिच्छति मानवः ॥ स मलाशनजं पापं प्राप्नोत्येव न संशयः ॥ ७ ॥ सात्यकिर्नाम राजा भूत्समस्ते क्षितिमंडले ॥ स राज्यपालनोद्युक्तो न भवत्येव सर्वथा ॥ तस्य दाराश्च बहवो रूपलावण्यसंयुताः ॥ सैतैः सहानिशं भोगान् भुंक्ते दुर्मंत्रिसंयुतः ॥ ९ ॥ तरुणीतनुसंगेन भोजनेन च नीयते ॥ अहोरात्रं न तस्यास्ति कृत्यमन्यत्स्वभावतः ॥ १० ॥ नारीषु तरुणीष्वेव रतिस्तस्य निरंतरं ॥ निद्राकालेपि तरुणीं त्यक्त्वा नैव दुरात्मना ॥ ११ ॥ एवं संवसतस्तस्य नारी तस्यैव कांचन ॥ उद्यानवनमासाद्य तत्र लिंगं ददर्श सा ॥ १२ ॥ तत्रैकः शांभवो दृष्टः शिवपूजनतत्परः ॥ भस्मोद्धूलितसर्वांगः त्रिपुंड्रांकितमस्तकः ॥ रुद्राक्षमालाभरणो युवा सुंदरविग्रहः ॥ तं दृष्ट्वा प्राह सा नारी कोसि कस्मादुपागतः ॥ किं कुलं कः पिता का वा माता नरोत्तम ॥ परिग्रहोस्ति ते किं वा नारी कुत्र तवाधुना ॥ इति तद्वचनं श्रुत्वा दृष्ट्वा तामति सुंदरीं ॥ ईषन्नम्राननः प्राह विनयेनाति विस्मितः ॥ १६ ॥ अहं राजकुलोत्पन्नो माता मे वीरसूः पिता ॥ भूरसेन इति ख्यातो भार्या कमललोचना ॥ १७ ॥ मात्यं च महदेवास्ति गजाश्वरथसंकुलं ॥

गवां च कोटयः संति रत्नागाराश्च कोटिशः ॥१८॥ सुवर्णस्य च नांतोस्ति मंदिरेषु तदेश्वमे ॥ मंदिराणि सुवर्णानां
रत्नानामपि कानि चित् ॥१९॥ इति तद्वचनं श्रुत्वा तमुवाच नृपांगना ॥ किमेवमागतोत्रापि किमेकाकी भ-
वानिह ॥२०॥ पर राष्ट्रे किमागत्य स्वबंधुजनवर्जितः ॥ भृत्यवर्गैश्च रहितः तपस्वीवाधितिष्ठसि ॥२१॥ वैराग्ये
तव किं बीजं महदैश्वर्य संयुतः ॥ भुंक्ष्व भोगान्यथाकामं तरुणीं रमणीं व्रज ॥ अनित्यं यौवनं नूनं वार्धके स
मुपागते ॥ कथं ते तरुणीयोगस्तारुण्य धन संक्षये ॥२३॥ किंच सौंदर्य मेतावत् यौवनं चातिशोभनं ॥ दुर्लभं मदनस्ये-
दं अपरं रूपमुत्तमं ॥२४॥ यद्वा मदन एवासि सौंदर्य मिदमीदृशं ॥ दुर्लभं भूतले मन्ये कांतिश्चात्यंतमुत्तमा ॥२५॥
सौंदर्यं यौवनं कांति रुन्मादनिधिरेव हि ॥ प्रत्येकमेव मिलिता स्त्रयो लोको नराः खलु ॥२६॥ केन वा संगमो
जातः तव राजकुलोद्भव ॥ वंचितोसि संदेहः शिक्षकस्तेन ते खलु ॥ पित्रा विरोधः किं जातः तव मात्राथवाधुना ॥
यद्वाकलत्रकलहः प्रवृत्तस्तव वेश्मनि ॥२८॥ तत्र चेत् कलहो वृत्तस्त त्यागं कुरु किं ततः ॥ मया सहात्र व-
सतः सौभाग्यं च भविष्यति ॥ भद्रं त्वं सह संगोपि मयाक्तो नृपोत्तम ॥ नारी रत्नमिति ख्यातं मम नाम नृपोत्तम ॥
मया सहात्र संगेन दिनानि नय सादरं ॥३०॥ त्वदधीनमिदं राज्यं प्राज्यमद्य भविष्यति ॥ भद्रं त्वं सह संगे-

पि मयात्यक्तो नृपोत्तम ॥३१॥ मत्परिग्रहमात्रेण तव सौख्यं भविष्यति ॥ विषदानेन भर्त्तापि हंतव्यो निशि सत्वरं ॥
॥३२॥ एतद्राष्ट्राधिपत्यं च देयं तुभ्यमसंशयं ॥ चंद्रमंडलसंकाशाः शय्याः संति मनोहराः ॥३३॥ औषधं च गृ-
हे सिद्धं मदनोन्मादसाधकं ॥ भक्ष्यभोज्यादयः सर्वे पदार्थाः संति कोटिशः ॥ रत्नमंदिरमेवास्ति शयनार्थमनु-
त्तमं ॥ रत्नजालसमाकीर्णं कस्तूरीगंधवेष्टितं ॥३५॥ दिव्यैः परिमलद्रव्यैरपारैः परिवेष्टितं ॥ दासीज-
नश्च बहवो दासाः संत्येव कोटिशः ॥३६॥ अपेक्षितं यद्यदेव तत्सर्वमपि दीयते ॥ अहमेव त्वदीयास्मि
तव किं दुर्लभं नृप ॥३७॥ व्याघ्रीदुग्धं गृहे सिद्धमपारं तस्य सेवनात् ॥ सर्वदा रमणीभोगे श्रमस्ते [illegible] न
भविष्यति ॥३८॥ कुसुमानि विचित्राणि कोटिशः संति मे वने ॥ इदं वनं ममैवात्र पटमंडपमंडितं ॥३९॥
दुकूलशय्या रचिता पुष्पशय्या समन्विता ॥ रसद्रव्याणि दिव्यानि संत्यत्र पटमंडपे ॥४०॥ अतः परं
विलंबस्य न कार्यमपि दृश्यते ॥ न चात्र भयलेशोपि मया सह समागमे ॥ पुरुषाणां प्रवेशोऽत्र नास्ति
सर्वात्मना नृप ॥ नारीवरगणै रेतदुद्यानं परिरक्षितं ॥४२॥ दास्योरंभानिभाः संति कोटिशो मम भू-
पते ॥ दास्यंतास्ते करिष्यंति काले काले यथोचितं ॥४३॥ मां पश्य सादरं राजन्नु[illegible]न्न मय्यनुरक्तं नृप ॥

अवाङ्मुखत्वं संत्यज्य रसिकत्वं भजाधुना ॥ ४४ ॥ अति सौंदर्य संपन्नामिंद्रिरापादरेणमां ॥ रंभादिभिः समागत्य पश्यत्वेव मुहुर्मुहुः ॥ ४५ ॥ देवानामपि मय्येव मनः प्रायो नृपोत्तम ॥ दृष्ट्वा मां पुरुषः को वा मदधीनो न जायते ॥ ४६ ॥ स्त्रीमात्रे पुरुषाणां तु प्रीतिरस्ति श्रुति सर्वदा ॥ नारीरत्ने मयि प्रीतिः कथं वा न भविष्यति ॥ ४७ ॥ यौवने नांग पुष्टिर्या मयि सा नृप सत्तम ॥ सौंदर्य संयुता पुंसां विनोदाय भविष्यति ॥ ४८ ॥ दृष्ट्वाहं सदृद्दृष्टेन त्वयापि नृपनंदन ॥ नित्यं मद्दर्शनाकांक्षां कुर्वंत्येवामरा अपि ॥ ४९ ॥ नूनं नपुंसकस्यापि पुंस्त्वं मद्दर्शनाद्भवेत् ॥ पश्य पश्य मदंगानि सुंदराण्यति सुंदर ॥ ५० ॥ सौंदर्य धन संपन्नस्त्वमहं तद्गुणं परं ॥ दृष्ट्वा त्वदीयतां प्राप्ता तत्स्थनं दुर्लभं यतः ॥ ५१ ॥ नारीणां धन लोभेन प्रवृत्तिः पुरुषेष्वतः ॥ इदं धनं परित्याज्यं न भवत्येव मे नृप ॥ ५२ ॥ कुरूपेष्वपि नारीणां हिरण्याय प्रवर्त्तनं ॥ रूपवंतं परित्यज्य कुत्सितानां स्वभावतः ॥ ५३ ॥ परमैश्वर्य संपन्नाः स्वर्णागाराश्च कोटिशः ॥ मम स्वर्णे सुरत्ने सुनाकांक्षा सर्वथा नृप ॥ ५४ ॥ त्वदीय मति सौंदर्य धनानां च धनं नृप ॥ इदमाकांक्षितं नित्यं त्यक्तु मेव न शक्यते ॥ ५५ ॥ त्वन्मुखालोकनेनैव दूरान्मदन मोहिता ॥ अतः परं संनिधाने कथं त्याज्यो भवान्मया ॥ ॥ ५६ ॥ यत्र यत्रैव गंतव्यं त्वया तत्र नृपोत्तम ॥ आगंतव्यं न संदेहः

किं त्याज्योऽसि भवान्मया॥ ५७॥ इति तद्वचनं श्रुत्वा भयेनानतकंधरः॥ तामाह नृपतिर्मंदं स्मरन्नेव महेश्वरं॥
॥ ५८॥ किमंब मय्यपि प्रीतिरति कुत्सितविग्रहे॥ संसारतापसंतप्ते दुःखिते तेन संततं॥ ५९॥ तिष्ठंति सदने
नार्यो यौवनोन्मादपीडिताः॥ सौंदर्यधारारूपास्ताः परित्यक्ताः सहस्रशः॥ ६०॥ ऐश्वर्यं च परित्यक्तं सर्वथा-
पि विनश्वरं॥ विनश्वरशरीरस्य नापेक्षा क्रियते मया॥ ६१॥ किमेतेन शरीरेण यौवनेनापि किं मम॥ अवि-
लंबेन देहस्य पतनं च भविष्यति॥ ६२॥ सौंदर्यं च किमेतस्य शरीरस्य विशेषतः॥ मांसास्थिमज्जारूपस्य
सौंदर्यं कुत्र दृश्यते॥ ६३॥ विनश्वरे शरीरेऽस्मिन्प्रीतिः कार्या न सर्वथा॥ तन्नाशे खलु दुःखानि भवि-
ष्यंति न संशयः॥ ६४॥ अभाग्यानां शरीरेषु भवत्या स्थाक दाचन॥ तयाद्दुःखं बहु प्राप्यं मरणोत्तरम-
क्षतं॥ ६५॥ मूत्रेण विष्ठया पूर्णं उदरं रेतसा खलु॥ कृमिभिश्च समाकीर्णं दुर्गंधेन समावृतं॥ ६६॥ मु-
खं तु श्लेष्मनिलयं लालाजलसमाकुलं॥ नासिकाकर्णनयनैः कुत्सितं निःसरत्यपि॥ ६७॥ पिहितं च-
र्मणा सर्वं मलादिकमतः कथं॥ शुद्धिर्मलपुटे देहे सुंदरत्वं न कुत्सिते॥ ६८॥ अमेध्यमध्यसं-
जातः कृमिः किमिति सुंदरः॥ अमेध्येन सहैतस्य शरीरस्य स्थितिः खलु॥ ६९॥ गर्भदुःखानि भुक्तानि-

बहूनि विविधान्यपि ॥ गर्भे कृमिसमाकीर्णं शरीरम भवत्खलु ॥ ७० ॥ शरीरं रेतसा जातं योनिमध्ये गतेन हि ॥ मू-
त्रगंधसमाकीर्णो योनिदेशोपि वस्तुतः ॥ ७१ ॥ अंकुरो रेतसा सिक्तो मूत्रेण परिवेष्टितः ॥ मलेश्च मेपिनश्चापि
स किं भवति सुंदरः ॥ ७२ ॥ पिचुमंदांकुराज्जातः पारिजातांकुरः कथं ॥ अतः शरीरे सौंदर्यं न केनाप्युपधारि-
तं ॥ ७३ ॥ दृश्यंते बहवो लोके तरुणा मरणोन्मुखाः ॥ मरणे सति सौंदर्यं तारुण्यं च क्व नु गतं ॥ ७४ ॥ अहो मह
दिदं कष्टं शिष्टानामपि जायते ॥ बुद्धिर्मांसविकारेषु शरीरेषु विशेषतः ॥ ७५ ॥ अभाग्यस्य परं तान्नारीसंग वृ
रति र्भवेत् ॥ कुत्सितत्वं न जानंति शरीरस्यापि मोहतः ॥ ७६ ॥ मलमांसास्थिमज्जानां ग्रंथिषु प्रीतिरस्ति चेत् ॥
तद्रूपेषु शरीरेषु प्रीतिर्भवतु कस्यचित् ॥ ७७ ॥ इतस्त्वया तु गंतव्यं त्यज पापमतिं तया ॥ यमलोके भयं
प्राप्यं त्वया पद्यापिनः श्रुतं ॥ ७८ ॥ यद्यद्य मेदनो द्रेकात्परदारांग संगमः ॥ तदा पातो भवत्येव कुंभीपा-
केन संशयः ॥ ७९ ॥ परदारान्न नंदृष्ट्वा मोहात्पापरतः क्वचित् ॥ आघोरयातनां प्राप्य कल्पांते मुच्यते न वा ॥ ८० ॥
दुराचाराः परां नारीं परस्य परितः परं ॥ पश्यंति ते प्रपश्यंति यातनां प्रविशंति च ॥ ८१ ॥ मलमूत्रादिदुर्गंधस-
मूह परिवेष्टिते ॥ योनिदेशे दुराचारा रमंते पामराः परं ॥ ८२ ॥ अंगानि यानि तेतु गान्यनंग परि पीडिते ॥

तानि मांसपुटान्येव तेषु का प्रीतिरधमे ॥ ८३ ॥ योनिः सूकरनारीणां यथा भवति कुत्सिता ॥ तथैव नरनारीणां
योनिरप्यतिकुत्सिता ॥ ८४ ॥ एवं सत्यपि देहेषु विशेषः कश्चिदस्ति हि ॥ तेन तावद्विशेषेण ग्राह्याग्राह्य-
त्वधीरपि ॥ ८५ ॥ अंतर्बहिश्च दुष्टास्ते सूकरादिकविग्रहाः ॥ अस्पृश्या एव ते तस्मात्ते तावदतिकुत्सिताः ॥
८६ ॥ मनुष्याणां शरीराणि कुत्सितान्यंतरित्यतः ॥ बहिस्त्वकुत्सितान्येव विशेषस्तावता खलु ॥ ८७ ॥ मानु
षेष्वपि देहेषु द्विजदेहः परं शुचिः ॥ तेषु ब्राह्मणदेहस्तु शुचिरित्यवगम्यतां ॥ ८८ ॥ तेषु ब्राह्मणदेहे-
षु पवित्रतममेव तत् ॥ शरीरं शांभवस्येति शांभवः खलु दुर्लभः ॥ ८९ ॥ शांभवस्य ब्राह्मणस्य शरीरम-
पि भस्मना ॥ त्रिपुंड्रेण च रुद्राक्षैः पवित्रमिति कीर्तितं ॥ ९० ॥ भूरिपुण्यप्रभावेन ब्राह्मणो जायते नरः ॥ शांभ
वो जायते तत्रापि पारैः पुण्यसागरैः ॥ ९१ ॥ शांभवब्राह्मणांगेन संगो मंगलदायकः ॥ ममाभवत्येन बुद्धिः
संसारेन प्रजायते ॥ ९२ ॥ राज्यं प्राज्यमपि त्यक्तं हारा दाराश्च कोटिशः ॥ न तत्संगसुखं तेन तत्याज्यमि-
ति मे मतिः ॥ ९३ ॥ मरणे सति राज्यानि कलत्राणि धनानि च ॥ नायांति शिवधर्मस्तु महात्मा स्यातिम-
त्वरं ॥ पश्चादग्रेऽपि मध्येऽपि शिवधर्मः परं स्वयं ॥ आवृत्यायाति सहसा न जहाति स शांभवं ॥ ९५ ॥

संपत्काले यथा पुत्र पौत्र मित्रादयः सदा ॥ तिष्ठंत्यावृत्यतं तद्वत्स्थैर्मोऽप्यावृत्य तिष्ठति ॥ ९६ ॥ न कलत्रं समायाति मरणे समुपस्थिते ॥ नपुत्रा नापि पौत्राश्च न मित्राणि च बांधवाः ॥ ९७ ॥ नचैश्वर्यं समायाति मरणे समुपस्थिते ॥ रथाश्च गजदासाद्याः समायांतिन सर्वथा ॥ ९८ ॥ यावज्जीवार्जितं वित्तं क्वास्तीति परिपृच्छति ॥ पत्नी पुत्रोपि बहुधा मरणे समुपस्थिते ॥ ९९ ॥ अनेन यौवनं नीतं भुक्ता भोगाश्च कोटिशः ॥ अनेन सहमंतव्य मिति धीः स्त्रीषु न ध्रुवा ॥ १०० ॥ प्रौढः पुत्रोयदि तदा म्रियता मय मद्यमे ॥ धन धान्येषु स्वामित्वं स्मादिसे वाव धारयेत ॥ १ ॥ नारीतु मरणे पुंसः क्व मे सुरत मित्यपि ॥ रुदत्ययं कां गतिंवा यास्यती ति न सर्वथा ॥ २ ॥ रक्षणं कृतमेतेन जीवता, मरणोत्तरं ॥ रक्षकोपि न चास्तीति रुदंति शिशवः परं ॥ ३ ॥ भृत्याश्च रक्षका भावाद्रुदंति सहसा गृहे ॥ दास्योऽपि बंधुवर्गाश्च तथैव प्रतिवेशिनः ॥ ४ ॥ राष्ट्रनिर्वाहका भावात्राजापि रुदति स्वयं ॥ प्रजाश्च पालका भावाद्रुदंति मरणोत्तरं ॥ ५ ॥ परंतु तेषु कस्यापि मरणोत्तर मस्य का ॥ गतिरित्यपि धीर्नैति ते ष्वास्था न प्रजायेत ॥ ६ ॥ धनार्जनं च पापेन कृतं गृण्हति ते सुताः ॥ न तस्य परलोकार्थं यत्नं कुर्वंति सर्वथा ॥ ७ ॥ न यमाद्रक्षकः कोपि लोके यमरिपुं विना ॥ अतो यमांतको नित्यं पूजनीयः प्रयत्नतः ॥ ८ ॥

५७ /

शिवमहि० ३ हरारवे दूं०

२२८ अ० ५०

कालांतकः परो बंधुः दयासिंधुश्च केवलं ॥ स्मृतोपि यातनाभीतिं हरत्येव न संशयः ॥ ९ ॥ भ्रमंति यौवनोन्मादान्न जानंति महेश्वरं ॥ नार्चयंति न पश्यंति न स्मरंति पुनः पुनः ॥ ११० ॥ नृणां मरणकालेपि स्मरणं शूलपाणिनः ॥ किं न निर्वाण दं तद्धि परमानंद एव हि ॥ नरस्तु मरणे प्राप्ते तरुणीमप्यनुक्षणं ॥ पश्यत्यतीव पापिष्ठो न पश्यति महेश्वरं ॥ ११२ ॥ बिल्वपत्रार्चितं लिंगं दृष्ट्वापि मरणक्षणे ॥ मोक्षांगनांगसंगेन परमानंदमाप्नुयात् ॥ १३ प्राणोत्क्रमणवेलापि याति कोलाहलैः परं ॥ शिवनामध्वनिस्तत्र न श्रुतो न कृतोपि सः ॥ ११४ ॥ व्यर्थक्लेशकरैः कालो नीयते परपीडनैः ॥ मुखे शस्ताडनैस्तेस्तु परलोके न तस्य तु ॥ ११५ ॥ न श्राव्यते शिवकथा श्रावितं शिवनाम वा ॥ तनुर्न भस्मना लिप्ता नापि बिल्वान्विता कृता ॥ ११६ ॥ शिवाभिषेकपानीयं न मुखे दीयते तदा ॥ न मध्येपि तनुर्दत्ता हरस्य वृषभस्य वा ॥ १७ ॥ विभूत्या रुद्राक्षैरपि मरणकाले परिवृता तनुस्त्यक्ता पुण्यैर्हरवृषभमध्ये यदि तदा ॥ शिवः स्वांकारूढं तदनुकुरुतेतं दृढतरं समालिंग्यायं मे तनुरिति मुहुस्तौति शिवया ॥ १८ प्राज्ये राज्येप्यपेक्षा न च नवतरुणीसंगमे चंद्रनांद्रे रत्नाढ्ये किं त्वपेक्षा मम भवति महादेवलिंगार्चनेषु ॥ प्राणस्याशु प्रयाणे शिवशिवहर

भो श्री महादेव शंभो पाहीति स्यादवश्यं मुहुरपि शिव हा नाम पीयूषवल्ली ॥११९॥ विश्वेश श्रीमहेश त्रिदश
वर महादेव शंभो त्रिनेत्र श्रीकंठांबासहाय त्रिपुरहर महारुद्र कालांतकेति ॥ नामान्येतानि शंभो मम
तव कृपया प्राण निर्याण काले प्राप्ते जिह्वां कुर्णाग्रे शिव शिव शिव इत्येव नृत्यंतु भूयः ॥१२०॥ बिल्वाद्यै
र्लिंग पूजा विरचन चतुरोप्यस्तु हस्तो, नमस्ते मूर्धा तावत्करोतु, त्रिनयन नयने प्रेक्षणाय प्रवृत्ते ॥ लिंग
स्याभ्यर्चितस्य स्मरहर चरणाराधनं मानसं मे। श्रोत्रे स्यातां महेश श्रवण सुखकरे प्राण निर्याणकाले ॥
१२१॥ प्रायश्चित्तानि शंभो शिव पदकमल ध्यानमेवेति मन्ये प्राप्ते प्राण प्रयाणे भसित शित तनु र्व्या-
घ्र रुद्राक्ष कांतः ॥ लिंगे बिल्वार्चनं च स्मरहर शिव इत्यक्षरोच्चारणं च प्रत्येकं वापि मुक्त्यै सकृद
पि शिवयोः पादपद्मे शयामि ॥१२२॥ कल्याणं शापकानां परममिदमिति ज्ञातमर्धेंदुमौले त्वत्पा
दांभोज मात्र स्मरणमिदमहो जीवनं रक्षकं मे मन्ये धन्योस्मि तेन त्रिपुरहर भवत्पारपद्माव
लंबं मत्वा लंबोदरान्यं शिव शिव शिव न स्कंद भिन्नं च मान ॥१२३॥ ॥इति श्री शिवरहस्ये
हराख्ये तृतीयांशे महेसेतिहासे याज्ञवल्क्य जनक संवादो नाम पंचाशत् अध्यायः ॥ ५० ॥ इति
तृतीयांश पूर्वार्धः ॥श्री॥

522

॥ अथ श्री शिवरहस्य तृतीयांश उत्तरार्धः ॥

॥ अध्याय ॥ ५० ॥ श्रीः ॥

यं वयो प्यायुस्तथा सति । उपयुक्तमिदं सर्वं स्याद चाशु शिवार्चने ॥ १५॥ धिक् धिक् धिक् तदैश्वर्यं येन नाराधितः शिवः । सकलं तज्जदे पूर्वस्यं येनैवाराधितः शिवः ॥ १६॥ शिव पूजनमुत्कृष्टं सर्व सिद्धि प्रदायकम् । तद्येन न कृतं तस्य जन्म नाम निरर्थकम् ॥ १७॥ शिव प्रसाद लब्धा ति धनधान्यादिकान्यतः ॥ तैरर्चनं महेशस्य कृत्वा मुक्तिमवाप्नुयात् ॥ १८॥ तदीयमेव दत्त्वापि तस्मै सौभाग्यमुत्तमम् । प्राप्तव्यमिति यत्नेन कर्तव्यम् शिवपूजनम् ॥ १९॥ शिवार्चनेन विज्ञेयः पुण्यवानिति मानवः । तदभावे न विज्ञेयो महापातकवानिति ॥ २१॥ + विना न पुण्यपु ञ्जेन भक्तिर्मृत्युञ्जयार्चने । अतः पुण्यात्मना नित्यङ्क्रियते शिव पूजनम् ॥ २०॥ शिवार्चनेन विज्ञेयः पुण्यवानिति मानवः । तदभावेन विज्ञेयो महापातकवानिति ॥ २१॥ अतः स दूरतस्त्याज्यो यो नार्चयति शङ्करम् ॥ तत्संयोगाभिलाषाद्यैः मानवः पापवान् भवेत् ॥ २२॥ येन केनापि रूपेण शरीरं प्राप्य मानवः । शिवार्चनपरो भूयात् सभूयः पुण्यवान् भवेत् ॥ २३॥ शिवार्चनपरो मर्त्यः संस्मृतः प्रण तः स्तुतः ॥ हरत्यघान्यनंतानि घोराणि विविधान्यपि ॥ २४॥ घोरपापवनस्यायं कुठारः शङ्करार्चकः ॥ अतः सर्वैः प्रयत्नैश्च कर्तव्यं शिव पूजनम् ॥ २५॥ अतः परन्त्वयोन्मादः परित्याज्यः प्रयत्नतः ॥ शिव पूजां कुरु प्रीत्या तव मुक्तिर्भविष्यति ॥ २६॥ शरीरं शिवपूजाया म् यौवने दक्षमित्यतः । प्रयत्नेन महादेवम् पूजयस्व यथोचितम् ॥ २७॥ स्नानं कुरु प्रयत्नेन शिवकुण्डे शिवोदके । उद्धूल्य भस्मनाङ्गानि निपुणन्त्वं प्रयत्नतः ॥ २८ ॥ शिरो ललाट वक्षस्सु स्कन्धे च मणिबन्धके । कूर्परे नाभिदेशे च पार्श्वयोर्गण्डमण्डले ॥ २९॥

श्रीगणेशायनमः॥ शारदायै नमः॥ श्री शिवाय गुरवे नमः॥ याज्ञवल्क्य उवाच॥ इति तद्वचनं श्रुत्वा सा राज्ञी भय विह्वला। वैराग्यं परमं प्राप्य तमुवाच नृपोत्त

मम्॥१॥ नशान्तिमेति सहसा घोरसंसार बासना॥ कथं वा तस्य शान्तिः स्यादुपायः कस्त्वया मितः॥२॥ अपार घोर संसार वासना च्युति साधनम्।

शिवार्चनमिति ज्ञानं तत्कर्तव्यम् कथं वद॥३॥ त्वया तनोः कुत्सितत्वं वस्तस्तु निरूपितम्। तत्कुत्सितं न सन्देहो दृश्यते च तथा खलु॥४॥ अस्य देह

स्य सौभाग्यमिदमेतावदेव हि। शिवार्चनोपयुक्तत्वं शरीरस्यावधारितम्॥५॥ अतः परम् प्रयत्नेन शिव लिङ्गार्चने यथा देहस्यास्योपयो

गः स्यात्तथा कार्य्यं मया नृप॥६॥ शिवार्चनेन सकलं जीवितं च यथा मम। तथैव यत्नः कर्तव्यः सर्वथापि मया नृप॥७॥ आहारञ्च

परित्यज्य वयो नेयं शिवार्चनैः। श्रुत्वा ध्वंतक भीतिः सा सद्यो हृद्दीनो॥८॥ यथा न गर्भवासः स्याद्गर्भे क्लेशोऽपि सर्वथा। तथा-

प्रयत्नः कर्तव्यः शिवलिङ्गार्चने मया॥९॥ शिवार्चन प्रकारं मे साधनान्यपि सत्वरं। वद तावद्यथा शास्त्रं यत्फलं लिङ्गपूजनात्॥१०

गुरुस्त्वमेव मे भूयः संसार भयमोचकः। अन्यो गुरुर्भवेत्को वा शिवाचार प्रवर्तकात्॥११॥ नृप उवाच॥ कालान्तकार्चनेनैव कालाद्भी

तिर्विनश्यति॥१२॥ नान्यस्तन्नाशकोपायो दृश्यते क्वापि सर्वथा॥१२॥ तवास्ति महदैश्वर्यं अनेन कुरु पूजनम्। ऐश्वर्यमेव सामग्री शङ्क-

राराधनस्य तु॥१३॥ यद्यपि श्रीमहादेवो जलेनाल्पेन वा सकृत्। मुक्तिदः स्यात्तथाप्येतदैश्वर्यं सकलं कार्यम्॥१४॥ इदम स्थिरमैश्व-

ऊरुप्रदेशे गुल्फे च त्रिपुंड्रं धारयेन्मुहुः ॥ रुद्राक्षधारणं कार्यं द्वात्रिंशत्कण्ठमालया ॥३०॥ शिखायामेक एव स्यात् द्विचत्वारिंशदुत्तमाः ॥ रुद्राक्षाः शिरसि
धार्याः कर्णयोर्द्वादश द्वयोः ॥३१॥ शतत्रयन्तूपवीते बाह्वोः षोडश षोडश ॥ चतुर्विंशति रुद्राक्षा द्वयोस्तु मणिबन्धयोः ॥३२॥ अष्टोत्तरशतैरेव रुद्राक्षैर्जपमालि-
का ॥ तया पञ्चाक्षरं जप्त्वा शैवः शिवमवाप्नुयात् ॥३३॥ त्रिस्त्रिराचमनं स्त्रीणां पुंसामिव यथाविधि ॥ भवाद्यैर्नामभिर्यद्वा शिवपञ्चाक्षरेण वा ॥३४॥ पश्चात्
कुशासने स्थित्वा यद्वा व्याघ्राजिनादिषु ॥ उदङ्मुखः प्राङ्मुखो वा पूजयेद्गिरिजापतिम् ॥३५॥ पञ्चामृताभिषेकाद्यैः कर्पूरादिसमन्वितैः ॥ जलैः फलोद
केरीशमाम्रादिकरसैरपि ॥३६॥ शुद्धोदकैः कवोष्णैर्वा शीतलैर्वा मनोहरैः ॥ पश्चाद्दुकूलवसनैः पूजयित्वा सदाशिवम् ॥३७॥ सुगन्धचन्दनेनापि
पूजयेद्गिरिजापतिम् ॥ विल्वपत्रैरक्षतैश्च प्रफुल्लकुसुमैरपि ॥३८॥ मन्दारादिप्रसूनानां मालिकाभिस्समर्चयेत् ॥ पश्चाद्धूपाय धूमैश्च दीपैः कर्पूरसम्भवैः ॥३९॥
ओदनै राज्यसंयुक्तैः शाकसूपसमन्वितैः ॥ परमान्नैर्घृतयुतैः शर्कराराशिसंयुतैः ॥४०॥ लड्डुकैर्वटकैस्स्वाज्यैरपूपैर्मण्डकादिभिः ॥ भक्ष्यैर्लेह्यैश्च चोष्यैश्च
पेयैश्च विविधैरपि ॥४१॥ कदलीनारिकेलाद्यैरपोरःफलमण्डलैः ॥ इक्षुदण्डैश्च मण्डैश्च दधिक्षीररसोद्भवैः ॥४२॥ दध्योदनैश्च क्षीरैश्च दधिपूरैर्मनोहरैः ॥
सुगन्धजलपूरैश्च नवेक्षुरसपूरकैः ॥४३॥ द्राक्षाराशिरसैरेलालवङ्गपरिवेष्टितैः ॥ अन्यैरपि रसद्रव्यैः पूजयित्वा महेश्वरम् ॥४४॥
पश्चादाभरणं दद्यात् रत्नराजिविराजितम् ॥ पुनर्वस्त्राणि रम्याणि रत्नछत्रादिकन्तथा ॥४५॥ दर्पणं व्यजनं चारु चामीकरविरा
जितम् ॥ चामरं पुष्पमालाश्च पताकाश्च मनोहराः ॥४६॥ देयङ्कर्पूरदीपानां नीराजनमनुत्तमम् ॥ पश्चादस्वेदमीशायप्रण

ते नर्तिनो त्सवैः ॥ ४७ ॥ रुद्राध्यायादिमन्त्राणां स्तोत्रैः शांभव भोजनैः ॥ पुण्यैश्शिवकथालापैः कालो नेयः प्रयत्नतः ॥ ४८ ॥ एव

मासायमीशार्ची कर्तव्या मुक्तिकाङ्क्षिभिः ॥ सायङ्काले विशेषेण पुनः पूजां समारभेत् ॥ ४९ ॥ उक्तेनैव प्रकारेण मोक्षदं निशिपूजनम् ॥ लिङ्गरूपिणमीशानं प्रदोषे यस्तु पश्यति ॥ ५० ॥ स वंशकोटिसंयुक्तः शिवलोकं प्रयास्यति ॥ ब्रह्महत्यादि पापानां प्रलयाय प्रजायते ॥ ५१ ॥ शिवार्चनं परमिदं वेदवेद्यमिति श्रुतम् ॥ प्रदोषकाले सम्प्राप्ते यः शिवं नार्चयिष्यति ॥ ५२ ॥ स दुर्भगो भवत्येव नरकं च गमिष्यति ॥ अयमर्थस्तु विज्ञातः कुम्भयोनिमुखान्मया ॥ ५३ ॥ तेन वेदैः परिज्ञातः शिवार्चन महोत्सवः ॥ याज्ञवल्क्य उवाच ॥ इति तद्वचनं श्रुत्वा सा राजमहिषी तदा ॥ ५४ ॥ तम्प्रणम्य गुरुम्मत्वा क्षमस्वेत्यब्रवीन्मुहुः ॥ त्वं गुरुर्मम भाग्येन संसारागार सागरात् ॥ ५५ ॥ संसारात्तारयापेक्षा कटाक्षैः पुण्यपूरितैः ॥ इत्युक्तं तद्वचः श्रुत्वा तां ददर्श स भूपतिः ॥ ५६ ॥ स्वसारमिव संसाराद्विरतः शङ्करः परः ॥ तामुवाच ततो राजा स्वतन्त्रा नासि भामिनि ॥ ५७ ॥ इतो याहि गृहं सर्वं समभ्यर्च्य सत्वरम् ॥ स्त्रीणां पतिव्रतानां तु सर्वथा भर्त्रनुज्ञया ॥ ५८ ॥ विना न धर्माचरणं तत्रापि शिवपूजनम् ॥ एकाकिना मया साकं मन्त्रसम्भाषणे सति ॥ ५९ ॥ विपरीतमतिर्लोके लोकानां तु भविष्यति ॥ न चात्र पुरुषाः सन्ति नाङ्गना अपि केवलम् ॥ ६० ॥ आवयोरिह संस्थानमयोग्यमिति मे मतिः ॥ यद्यप्येतासु नारीषु तरुणीष्वपि मे मनः ॥ ६१ ॥ संतप्तलोहखण्डत्वबुद्ध्या नैव

प्रवर्तते॥ अंगारसागरेऽजो वा प्रचरिष्यति सादरम्॥६२॥ किञ्चिदत्र तथा दुःखं प्रयासेन भविष्यति॥ यदा च्छरीरमंगार सागरागारसंयुतम्॥६३॥ तदा मद्विलये दैवान्नास्य यामीय यातना॥ परदारशरीरेषु यदि याति मनः क्षणम्॥६४॥ तदा तु घोरे नरके यातना तु भविष्यति॥ वरमेव सुराहारो गोमांसाहारसंयुतः॥६५॥ परदाराभिगमनं वरन्न वरम् खलु॥ परदाराभिगमने यस्येच्छा जायते यदा॥६६॥ तदैव नरकावासो जातस्तत्र न संशयः॥ भ्रान्तानां परदारेषु रतिर्भवति यद्यपि॥६७॥ तथापि सा रतिस्तस्य नरकाय प्रजायते॥ अघोरनरकद्वारम्परदाराङ्गसङ्गमः॥६८॥ तत्र यस्यास्ति विरतिः स एव पुरुषोत्तमः॥ अविवेकेन दुष्टानां परदाररतिर्भवेत्॥६९॥ तेन जानन्ति तां दोषां घोरां नरकयातनाम्॥ परकल्पेषु दाराङ्गसङ्गेन महापातककोटयः॥७०॥ तुला न याति सहसा यस्माद्वारतरस्तु सः॥ परदाराङ्गसङ्गेन यावन्तो वा क्षणा गताः॥७१॥ दुःखं तावत्सु कल्पेषु कुम्भीपाकादिपातने॥ परदाराभिगमने न यस्य विरतिर्भवेत्॥७२॥ स तावज्जारजो ज्ञेयो नरकाय प्रकल्पितः॥ एवञ्च न मम प्रीतिः परदारेषु सर्वथा॥७३॥ तथापि संगस्संत्याज्यः तैरे कान्ते विशेषतः॥ गुरुत्वबुद्धिर्मयि चेन्नास्ति तदा वरं मुञ्च याहि गृहं स्वकं शुभे॥७४॥ अतः परन्नात्र तवो चितास्ति भर्त्रा सहस्थ्ये यमिति प्रयाहि॥७४॥ कालोऽपि भूयान गमद्दुरेष्ये सम्भाषणेनैव न ते क्षुधा किम्॥ ममापि कार्यं शिवपूजनं हि व्यर्थं प्रलापैरलमित्नित्यत्कम्मे॥७५॥ प्रतिक्षणं क्षीणमिदं किलायुर्यद्यद्गतं तद्गतमेवतीर्न्न॥ न तत्समायास्यति रोदनेऽपि दुर्वार्तया किं फलमेति मातः॥७६॥ निरीक्षणञ्चापि न रोचते मे मातः शरीरस्य च सुन्दरस्य॥ तथापि दूरे वसतिर्वरं मे मारः

परंक्रूरतरः किशोरः ॥७७॥ वनानि नानाविधमारसेनाव्याप्तानि सर्वाणानि मनोहराणि ॥ पिकास्त्वया पञ्चमचञ्चुरास्ते दृष्टाः किमनादरेण ॥७८॥ केकैकेनेकैर्मद

नानुकूलैः गन्धानिलैश्च चम्पकसङ्कुलैस्तैः ॥ किं किं न कार्यं मदनस्य कार्यमिदं वनं नो पवनं विषस्य ॥७९॥ वृन्दं प्रपश्येद्भ्रमरीकुलं भृङ्गवृन्दैः मरन्दलोलैः समलंकृतं हि ॥ वृन्दं तु र

नं मदनोत्सवाय मुहुर्मुहुः प्रेरयति प्रियाङ्गे ॥८०॥ माकन्दवृन्दानि विलोकयाशु तान्येव तावत्पिकसुन्दरीणाम् ॥ विलासयोग्यानि विलोकयन्ति पिकाश्च येषा

रसभीतिचित्ताः ॥८१॥ अन्यानि पुष्पाणि मनोहराणि तान्येव तावन्मदनायुधानि ॥ अतः सुते सत्वरमेव याहि इतो यदि स्याद्गमनं तवाद्य तदेव ताव

द्गमनमित्यवैमि ॥ महेशपूजाप्रतिबन्धकस्य निवर्तिरस्माकमपेक्षिता हि ॥८२॥ महेशपूजाप्रतिबन्धकत्वम् महाघकूटस्य फलं तदेव ॥

हेतुर्यमावासजदुःखभोगसंमोहमानस्य न संशयोऽत्र ॥८४॥ महेश्वराराधनसाधनानां संपादने यः प्रतिबन्धमात्रम् ॥ करोति तद्वंशहुताशनः स

स्यात् स एव यत्नः प्रतिबन्धरूपः ॥८५॥ शिवार्चने कः प्रतिबन्धमत्र करोति पापिष्ठवरं विना तु ॥ स काकयोनिं शुनकस्य योनिं प्रयाति य-

स्तत्प्रतिबन्धकः स्यात् ॥८६॥ इदं शिवस्थानमतिप्रशस्तं लिङ्गं चतुर्थं शिवलोलयापि ॥ संकीर्णमेतस्य तु पूजनेन मुक्तिः करस्था भवतीति मन्ये ॥८७॥

अहो कथं लिङ्गमिदं मनोज्ञं मुनिप्रधारूपमितिस्मरन्ति ॥ तावन्महादेवपदार्चनानि बुद्ध्या तदा शङ्करमाविशन्ति ॥८८॥ यत्त्वं फलं वा जलमन्न

दत्तं अनन्तपापौघविनाशकं हि ॥ अतः परं मातरयं विलम्बः सोढुं न शक्यः शिवपूजनाय ॥८९॥ वनानि तावद्बहुनाञ्चितानि वनानि सन्त्यत्र मनो

हराणि॥ तैरस्यलिंगानि विशेषतोऽद्य कार्य्यं मया पूजनमंबयाहि॥ १०॥ आयुःक्षीणमिदं प्रतिक्षणमहो मृत्युः शिरस्त्यस्त्ययम्॥ कुर्वन्नेव कृतान्द्य संघ
गणनां नायाति चायुर्गतम्॥ ११॥ शम्भुर्नार्चित एव नापि समना नाराधिता शैलजा वक्षोजांचित कुंकुमांकितपदांभोजं क्षणं वामया॥ आयुः शंकरपू
जया यदि भवेत् क्षीणं तदा तत्परं धन्यं धन्यतमं च यद्यपि भवेद्व्यर्थं तदा कुत्सितम्॥ १२॥ तस्मादाशु महेशपूजनमनेनैवायुषा सर्वदा कर्त्तव्यं तदुमास
हायचरणाम्भोजप्रसूनाय मे॥ १३॥ इति श्रीशिवरहस्ये हराख्ये तृतीयांशे उत्तरार्धे याज्ञवल्क्यजनकसंवादो नाम प्रथमोऽध्यायः॥ १॥ श्रीकाशीविश्वेश्वरार्प
णमस्तु॥ याज्ञवल्क्य उवाच॥ इति तस्मिन्वदन्त्येव नारीरत्नं सरवो जनः॥ सा पञ्चीकृगते त्याशु शिवालयमुपागतः॥ १॥ तं दृष्ट्वा दूरतो भूपं मदनापरविग्रहम्॥ मद
नोन्मादसंवीतः स तु रन्तुं मनो दधे॥ २॥ ततः काचित्कराग्रेण तमाकृष्य मदावृता॥ अयं ममेति मनुते ममेत्यन्या ममेति च॥ ३॥ एवं सरवो जनः सर्वस्तमावृत्य
स्थितस्तदा॥ तदा राजापि निर्विण्णस्तरुणीकरसम्वृतः॥ ४॥ कदाचिदालिंग्य पन्तं भूपं तुष्टा भवति काचन॥ तां दूरीकृत्य काप्यन्या तमालिंग्याधितिष्ठति॥
॥ ५॥ निराकृता सा कयापि सा कयापि निराकृता॥ एवं तदङ्गसंगेन ताः सर्वा मदविह्वलाः॥ ६॥ मदनोऽयं समागत्य वने क्रीडति सादरम्॥ नायन्त्याज्यइति
माहुः तरुण्यस्ताः सहस्रशः॥ ७॥ स राजा कष्टमेतावत्कथमागतमित्यपि॥ चिन्तया व्याकुलस्तत्र चिंतया किं तया तया॥ ८॥ अपराधः कृतः को वा मदनोऽरपुरा मया॥ नारी
शरीररूपोऽयमामात्यङ्गारसागरः॥ ९॥ मया कस्य मुखं दृष्टं मशैवस्यास्य सत्वरम्॥ नारीशरीररूपोऽयमायात्यङ्गारसागरः॥ १०॥ भस्मोधूलनं प्रायः प्रातर्न कृतमि
त्यतः॥ नारीशरीररूपो०॥ ११॥ त्रिपुण्ड्रधारणं प्रायः प्रातर्न कृतमित्यतः॥ नारीशरीर०॥ १२॥ बिल्वपत्रैर्महादेवः प्रातर्नाभ्यर्चितस्ततः॥ नारीशरीर०॥ १३॥

शिवलिंगेनीरधारा नमया कल्पिता ततः ॥ नारीशरीर० ॥१४॥ न धूपदीपौ दत्तौ च लिङ्गरूपाय शम्भवे ॥ नारी शरीर रूपो० ॥१५॥ नैवेद्यन्न मया दत्तं प्रातः

शर्वाय सादरम् ॥ नारी शरीररूपोयं० ॥१६॥ प्रातर्न प्रणतः शम्भुः प्रदक्षिणपुरःसरम् ॥ नारी शरीररूपो० ॥१७॥ न ध्यातः प्रायशः शम्भुः गणनायकवन्दितः ॥ ना

री शरीर ॥१८॥ प्रायः शाम्भव पूजाद्य न कृतानेन सत्वरम् ॥ नारीशरीर० ॥१९॥ महेशार्चनविघ्नोऽयं कथमद्य समागतः ॥ नारी शरीर० ॥२०॥ प्रायः शि

वकथाप्यद्य न श्रुता भक्तिपूर्वकम् ॥ नारी शरीर० ॥२१॥ नारीशरीररूपेण किं विधेयमतः परम् ॥ कौरा कर्षयन्त्येताः सर्वास्तावन्ममेत्ययम् ॥२२॥ पतसेङ्गमेमोत्सेङ्ग

तुङ्गाङ्गारनिभप्रभाः ॥ अहो किमिदमाश्चर्यं स्त्रष्टमीश त्वयाधुना ॥२३॥ कोपस्त्रष्टिरियं प्रायो नाङ्गनास्त्रष्टिरीदृशा ॥ एतासां मारधीजाता मयि सुन्दरविग्रहे ॥२४॥

नेममारदशामेवं प्रापयामेयशङ्कर ॥ निवारय महत्कष्टमिदं मे तादृशं प्रभो ॥२५॥ विघ्नः कोऽयं समुत्पन्नो नारीरूपेण शंकर ॥ नारीगणश्चैत्येतस्य न लज्जा जलमज्जन

म् ॥२६॥ किमतो विघ्न एवायं नारीरूपमुपागतः ॥ शिवार्चने न विज्ञातमीमितं फलमित्यतः ॥२७॥ अस्य विघ्नः समुत्पन्नः स विघ्नो हि महत्फलम् ॥ अविघ्नानि

भवन्त्येव बहून्यल्पफलानि तु ॥२८॥ महाफलानि धर्माणि सविघ्नानीति निश्चयः ॥ अतः परं क्व गन्तव्यं किं कर्त्तव्यमतः परम् ॥२९॥ एतद्विघ्नापहरण

कर्त्तुं शक्तिश्च कस्य वा ॥ शङ्करेणैव स्त्रष्टा चेदियं विघ्नपरम्परा ॥ तदा निवारकः कः स्यात्तत्स्त्रष्टिमबला खलु ॥ आपत्कालइ णाभाति सोयमुद्वेगसाधनम् ॥३१॥

कदाप्येतादृशो विघ्नो न जातः सर्वथा खलु ॥ त्यक्तमद्यैवाङ्गनाङ्गसङ्गभीत्या गृहादिकम् ॥३२॥ पुनरप्यागतः सोऽयमन्तरायस्तदात्मकः ॥ एवं व्याकुलचित्त

स्य तस्य धीरस्य सर्वथा ॥३३॥ विकारो नाभवद्देहे काष्ठस्येव महात्मनः ॥ ततः परं विवसनं कृत्वा रूपं कुचेष्टया ॥ नग्नाश्चतास्तमारुह्य स्कन्धाधो ननृतुर्नृप ॥ तथापि निर्वि-

कारस्य तस्य भूपस्य तास्वपि ॥३८॥ पतङ्गधीसमुत्पन्ना हृद् वैराग्यभाग्यतः ॥ ततः परन्तु नास्त्येव स नपुंसक इत्यपि ॥३९॥ निश्चित्य निर्ययुस्तस्मात् श्रीमहादेवमन्दिरात् ॥ ततः परं राजपत्नी सा विलोक्य तदद्भुतम् ॥४०॥ विस्मयाविष्टहृदया चिन्तयामास चेतसि ॥ अयं नपुंसकः प्रायो न नस्त्रीदर्शनादपि ॥४१॥ न च चालनचेष्टा च चचाराङ्गविशेषकः ॥ यद्वा विरक्त एवायम् कुत्सितत्वावबोधनात् ॥४२॥ को वानुरागसहितः शुनीयो निविलोकनात् ॥ अङ्गप्रत्यङ्गसौंदर्यमपारमिदमस्य तु ॥४३॥ अस्य पुंस्त्वे न संदेहो विरक्तः केवलं नृपः ॥ एतादृशस्तु पुरुषो न दृष्टो न श्रुतोऽपि हि ॥४४॥ भाग्यवानयमेवैको लोकोत्तरगुणाश्रयः एतस्य दर्शनाद्यस्मात् मम (दमा) पि मदनज्वरः ॥४५॥ समुत्पन्नः प्रशान्तोऽपि तत्कथाश्रवणादिह ॥ एतस्मिन्नन्तरे काले तत्कल्याणिकोटिशः ॥४६॥ समागतानि तत्रास्ती त्याकर्ण्य सनृपोत्तमः ॥ समागताश्च तत्रैव गजाश्वरथकोटिशः ॥४७॥ मंचकोटिसमाकीर्णा प्रतिकोटिसमाश्रिताः ॥ ततः कोलाहलो जातः सम्पूर्णे पृथ्वीतले ॥४८॥ नगरं त[illegible]समा[illegible] वेष्ट्य ते सर्वे मन्त्रिसत्तमाः ॥ शिवालयस्य प्रासादं ददृशुस्तुङ्गमुत्तमम् ॥४९॥ सौंदर्यनिधिरत्रैव स्थास्यतीत्येव मेनिरे ॥ ततः परमयं राजा सौंदर्यनिधिनामकः ॥५०॥ तत्रास्तीति विनिश्चित्य ययुस्स्थानमनुत्तमम् ॥ तत्रापि चिन्तयामासुरुद्यानमिदमुत्तमम् ॥५१॥ कथं स्थास्यति राजायमत्र पुष्पफलाकुले ॥[illegible] अयं विरक्तो न स्थास्यत्यन्यत्र (तावद्) वने शुभे ॥ किं चावस्थानबीजं च शिवस्थानमिदं खलु ॥५२॥ तस्य राज्ञः शिवस्थाने केवलं स्थितिरित्यतः । अन्यत्र गमनं तस्य नैव सम्भावितं खलु ॥५४॥ अस्माकं यदि भाग्यं स्यादत्र स्थास्यत्ययं नृपः ॥ शिवस्थानं विहायायमीदृशं नैव यास्यति ॥५५॥ पूर्वेद्युर्निर्गतो गेहाद् दूरदेशं न यास्यति ॥ अदूरे न शिवस्थानमीदृशं दृश्यतेऽपि च ॥५६॥ एतादृशं शिवस्थानं प्रासादमवलोकयन् ॥ स्वहर्म्यस्य शिखरे नृपः खलु पुरा स्थितः ॥

५७॥ एवन्निश्चित्य ते सर्वे तदुद्यानावलोकनम्॥ कर्तुं समुद्यतास्तत्र स्त्रीगणं ददृशुर्नृप ॥५८॥ ततः परन्तु ते सर्वे संशयाविष्टमानसाः॥ स्त्रीसङ्कुले वने नूनं न
स्थास्यति नृपोत्तमः॥५९॥ पराङ्गनामयं दृष्ट्वा नृपस्तावदवाङ्मुखः॥ स कथं [illegible] वा वने स्थास्यत्यनन्तवनिताकृते॥६०॥ ऋतुकालेऽपि राजोऽयं स्वनारीसङ्गमेवहि
धेः॥ प्रवृत्तस्तेन सञ्जाताः कुमाराः पुण्ययोगतः॥६१॥ तस्य नारीषु न स्नेहो न भोगेषु तरामपि॥ राज्येऽपि तस्य न प्रीतिः यथा शङ्करपूजने॥६२॥ शिवध्यानरतो
नित्यन्न नारीमभिपश्यति॥ शिवलिङ्गावलोकने क्लृप्तस्य सर्वात्मना खलु॥६३॥ इदन्तु तदवस्थानस्थलमेव न सर्वथा॥ वृद्धापि नारी सहसा न दृष्टा तेन सत्व
रम्॥६४॥ तरुणीमसृणारण्यमिदमुद्यानमेव च॥ वनिता वनमेवेदमत्र तस्य स्थितिः कथम्॥६५॥ एकैकतरुमारुह्य नृत्यन्ति तरुणीगणाः॥ अत्र तस्यापि
भूपस्य शङ्किता किमवस्थितिः॥६६॥ यद्वा प्रातः समागत्य प्रविष्टः शिवमन्दिरम्॥ शिवध्यानसमाक्रान्तः प्रायः स्थास्यति भूपतिः॥६७॥ सूर्योदयोत्त
रं तावद्वनितास्ताः समागताः॥ तदुद्यानवनक्रीडां कुर्वन्त्यत्र तु कोटिशः॥६८॥ अविवेकस्वभावास्तास्तरुण्यः शिवदर्शने॥ अनुत्सुकास्तरुष्वेव क्री
डन्ति फलितेष्विह॥६९॥ एवं सति शिवागारे स्थातुमर्हति भूपतिः॥ एतादृशं शिवस्थानं न त्यक्ष्यति महीपतिः॥७०॥ अस्माकमत्र सहसा तरुणीगण
सङ्कुले॥ वने प्रवेशो ह्युचितो न भवत्येव सर्वथा॥७१॥ वनितासङ्कुले देशे वनितानां गतिर्मता॥ अतः प्रयान्तु वनिताः प्रविशन्तु शिवालयम्॥७२॥ तत्र
चेन्न भवेद्रा[illegible]जा सुन्दरे शिवमन्दिरे॥ बिल्वमूलादि पश्यन्तु शिवलिङ्गावृतान्यपि॥७३॥ प्रविशन्त्वति लोभेण तत्पत्न्यो वालकैर्युताः॥ अन्या
सान्तत्र गमनन्नारीणान्नात्र संशयः॥७४॥ इत्यालोच्य प्रधानास्ते तत्कलत्रानुमोदकाः॥ तासान्तत्र प्रवेशार्थमुद्योगञ्चक्रुरादरात्॥७५॥

प्रविष्टास्तन्मताः सर्वाः गृहीत्वा बालकानपि ॥ शिवमन्दिरमाविश्य प्रणतास्ताः सदाशिवम् ॥ ७६ ॥ रत्नैर्मनोहरैस्तास्तु भस्मोद्धूलितविग्रहाः ॥ त्रिपुण्ड्ररुद्राक्षयुताः
पूजयामासुरीश्वरम् ॥ ७७ ॥ स्तनन्धयान्बाहुमध्ये गृहीत्वा वक्षसायुतान् ॥ स्तनञ्च पाययन्त्यस्तान् प्रविष्टाः काश्चिदादरात् ॥ सगर्भाः काश्चिदुत्कृष्टाः पूर्णगर्भा
पृथकाश्चन ॥ अजातयौवनाः काश्चित् सम्पूर्णयौवनाः ॥ सौंदर्य्यधारारूपास्ताः सर्वाश्चातिसुन्दराः ॥ रमा मनोहराः सर्वा रूपराशिविराजिताः ॥ ८० ॥ ताः
सर्वा अपि तं दृष्ट्वा सोऽयम्भर्ता ममेत्यपि ॥ प्रहृष्टवदनाम्भोजस्मेराञ्चितमुखाम्बुजाः ॥ ८१ ॥ शिवध्यानरतं धीरं विनिमीलितलोचनम् ॥ दृष्ट्वा विनिर्गतास्सर्वाः
मन्दभाषणवर्जिताः ॥ ८२ ॥ त्वया दृष्टस्त्वया दृष्टस्त्वयेत्यन्योन्यमादरात् ॥ मन्दमाभाषणं कृत्वा सोत्साहास्तरुणीजनाः ॥ ८३ ॥ अपारमारसेनेव तन्नारीमालिका
मुदा ॥ दृष्टा तद्राजपत्न्या सा सर्वाभरणभूषिता ॥ ८४ ॥ सापि तत्तरुणीसङ्गं विस्मयेन समाकुला ॥ कुतस्समागतं कस्य कलत्रं णीति सादरम् ॥ ८५ ॥ पप्रच्छ विनया
नम्रा तत्सौंदर्य्यपराजिता ॥ तास्तं ध्यानसमाविष्टं राजानं वीक्ष्य लज्जया ॥ ८६ ॥ मन्दमाहुः प्रयत्नेन संज्ञयान्यत्र तां तदा ॥ नीलास्मेरसमायुक्तां प्रफुल्लवदनाम्बुजा
८७ ॥ कल्याणि वयं राज्ञः शांभवस्यापि शोभने ॥ वैराग्येण गृहं त्यक्तमनेनैव महात्मना ॥ ८८ ॥ सर्वदा शिवपूजायां निरतः सोऽयमास्तिकः ॥ अनेन नारीवदनं सोत्सा
हं नैव दृश्यते ॥ ८९ ॥ ऋतुकालेऽप्ययं नारीं प्रत्यवायभियापरम् ॥ भुंक्ते तद्भोगकालेऽपि शिवध्यानपरायणः ॥ ९० ॥ नित्यनक्तव्रती सोऽयं सायङ्काले शिवा
र्चनम् ॥ कृत्वा भुंक्ते निशि सदा शाम्भवैः सह सादरम् ॥ ९१ ॥ अरुणोदयमारभ्य मध्यरात्र्यावधि स्वयम् ॥ कालं शिवार्चनेनैव नय-
ति प्रतिवासरम् ॥ ९२ ॥ एतेषु बालकेष्वस्य बालकत्वेन सर्वथा ॥ न प्रीतिः किन्तु शैवत्वयुक्त्या प्रीतिः कदाचन ॥ ९३ ॥ भस्मोद्धूलितसर्वाङ्गः त्रिपुण्ड्राङ्कितमस्तके ॥

शि॰र॰रह॰३ ६

रुद्राक्षमालाभरणः सर्वदाप्ययमास्तिकः ॥ ९४ ॥ न चन्दनानुलिप्ताङ्गो न वा रत्नविभूषणः । न वाङ्गनाङ्गसंतुष्टो न वान्यरतः सदा ॥ ९५ ॥ अल्पवयस्ककाले वालानामङ्गपोषणार्थमादरात् । उद्धूलनं त्रिपुण्ड्रस्याप्यभूषितं न करोत्यपि ॥ ९७ ॥ कदाचिदस्य वालस्य रत्नकञ्चुकवेष्टिताम् ॥ रत्नाभरणसंयुक्तां सदृशीं तनुं नृपः ॥ ९८ ॥ ततः परं कञ्चुकञ्च सरत्नाभरणान्यपि । दूरीचकार यत्नेन मुकुटञ्चापि सम्भूपतिः ॥ ९९ ॥ भसितालङ्कृतङ्कृत्वा ददौ रुद्राक्षकंचुके ॥ रुद्राक्षमुकुटञ्चैव ददौ रुद्राक्षमालिकाम् ॥ १०० ॥ एवं विधं तं सर्वेषामकन्यकानाञ्च भूपतिः ॥ प्रयच्छति प्रयत्नेन रुद्राक्षाभरणान्यपि ॥ १ ॥ शिवार्चनेन कालोऽयं नीयतेऽनेन सादरम् । पूर्वेद्युर्निर्गतो गेहाद्राजा तीर्थाटनोद्यतः ॥ २ ॥ देवाद्यागतो राज्ञि राजवेषं विहाय तु ॥ रत्नमन्दिरमेतेन कारितं शङ्कराय च ॥ ३ ॥ अम्बिकायै गणेशाय कुमाराय च सादरम् । रत्नप्राकारसंयुक्तं रत्नप्रासाद[illegible]वेष्टितम् ॥ ४ ॥ रत्न पूर्ति[illegible] सङ्काशाः प्रासादाः कोटिशो नवाः ॥ सुधाकरकरकारतारहार विराजिताः ॥ ५ ॥ कारिताते पुरद्वाकानायक प्रतिमाः प्रियाः ॥ कारिता निमनोज्ञानि राज्ञा पुष्पवनान्यपि ॥ ६ ॥ अयं भोजनकालेऽपि नान्यवार्तां वदत्यपि ॥ व्यवहारेऽपि सर्वोऽपि शिवनाम्ना परम्प्रभोः ॥ ७ ॥ दुकूलशय्या संत्यक्ता तेन राज्ञा महात्मना ॥ निद्रा विभस्मशय्यायामुक्षणमात्रं महं निशि ॥ ८ ॥ शिवार्चनेन सर्वोऽपि नीयते समयः खलु ॥ भस्मरुद्राक्षपूताङ्गं न राजा पश्यति सादरम् ॥ ९ ॥ अस्माकं रत्नरम्याणां भूषणानान्तु कोटयः ॥ सन्त्यधापि न वै नित्यं क्रियते [illegible] तनुभूषणम् ॥ १० ॥ सूक्ष्मरुद्राक्षयुक्तानि सुवर्णाभरयान्यपि ॥ कोटिशः सन्ति तैरङ्गं नास्माभिर्भूषितं मुहुः ॥ ११ ॥ भस्मनोद्धूलनङ्कृत्वा त्रिपुण्ड्रं निटिलादिषु ॥ शुद्धरुद्राक्षमालानां भूषणैरङ्गमञ्चितम् ॥ १२ ॥ एतास्त्याः पत्न्यः सर्वाश्च रुद्राक्षाभरणाङ्किताः ॥ उद्धूलनत्रिपुण्ड्राभ्यां सर्वदा समलंकृताः ॥ १३ ॥ विभूत्यपरनामेस्वेदैः भस्मनालङ्कृता तनुः ॥ = ॥

ह॰न॰उ॰ अ॰२

क्रियते घर्मकाले तु पुनः पुनरनुक्षणम् ॥१४॥ भस्मत्रिपुण्ड्ररुद्राक्षमालिकासमलंकृताः ॥ नाट्यं कुर्म्मो महेशस्य पुरतो रत्नमण्डपे ॥१५॥ शिवगायनमभ्यस्तमस्माभिस्तदनुज्ञया ॥ क्रियते गानमस्माभिः सर्वदा शिवमन्दिरे ॥१६॥ बालकैरपि गौरीशपूजनं क्रियते गृहे ॥ स्तनन्धयोऽपि कुरुते शिवपूजनम् ॥१७॥ कोटिशः ग्रामभवाः सन्ति पञ्चाक्षरपरायणाः हारोपहारैस्तैः सर्वैः जीवन्ति शिवमन्दिरे ॥१८॥ गन्धर्वराजतनयाः सर्वाः स्ववयं प्रियाः ॥ अस्य राज्ञोऽतिशूरस्य स्वयं वरसमावृताः ॥१९॥ राजा शांभवपुंगवोऽयममराराध्यं महेशं सदा लिङ्गाकारमपारसाधनवरैरभ्यर्चयत्यादरात् ॥ एतद्दर्शनवाञ्छया सुरगणैः सर्वैः समागम्यते गन्धर्वैरपि किन्नरैरपि मुहुर्भूचक्रवर्ती नृपः ॥२०॥ इति श्रीशिवरहस्ये हराख्ये तृतीयांशे उत्तरार्धे याज्ञवल्क्यजनकसंवादो नाम द्वितीयोऽध्यायः ॥२॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥

याज्ञवल्क्य उवाच ॥ इति तद्वचनं श्रुत्वा राज्ञी विस्मितमानसा स्वयम्वरस्य वृत्तांतं श्रोतुमाह विचक्षणा ॥१॥ गन्धर्वराजनगरं नीहारगिरिकंधरे ॥ स्वयम्वरं कथय त्वं भूपतेरद्भुतम् ॥२॥ केन पुण्यप्रभावेण भूपालस्य स्वयम्वरम् ॥ इदं सर्वं विशेषेण ज्ञेयमित्याह ताः प्रति ॥३॥ तासु पद्मावती नाम प्रौढा गन्धर्वकन्यका ॥ तामुवाच प्रयत्नेन स्वयम्वरमहोत्सवम् ॥४॥ अयं पूर्वभवे विप्रो भिक्षुकोऽप्यतियाचकः ॥ प्रतिग्रहेण कालोऽपि नीतस्तेन तदा मुहुः ॥ दुरन्नभक्षणोद्युक्तो दुष्प्रतिग्रहलोलुपः ॥ आसायं याञ्चया कालं नयति प्रतिवासरम् ॥६॥ याञ्चया जीवनं कृत्वा सायंकाले प्रयत्नतः ॥ चिदम्बरेश्वरं ध्यात्वा नत्वा याति प्रयत्नतः ॥७॥ दीपमालां महापूजां दृष्ट्वा नत्वा मुहुर्मुहुः ॥ सम्यक् सम्यगिदं सम्यग् इत्युदीर्याति विस्मितः ॥८॥ धूपभस्म समादाय स्वाङ्गानि परिमृज्य च ॥ प्रयाति भवनं पश्चात् भुङ्क्ते पूजामनुस्मरन् ॥ एवं स्थितौ दैवयोगाज्जहौ प्राणाननातुरः ॥ ततो नीतो यमभटैर्यमेनापि सवीक्षितः ॥१०॥ चित्रगुप्तमुवाचायं कः पुण्यं किं कृतं पुरा ॥ अनेनेत्याह तम्प्राह चित्रगुप्तोऽपि विस्मितः ॥११॥ चित्रगुप्त उवाच ॥ दुरान्नभक्षणैर्नीतिः

कालोनेनदुरात्मना॥ नसंध्यावन्दितानेन होमवार्तापि दूरतः॥१२॥ स्नानङ्कर्तुन्नजानातिन कृतंभस्मधारणम्॥ रुद्राक्षधारणन्तेननकृतं दुष्टचेतसा॥१३॥ लिङ्गार्चन-
न्चनगृहे शिवनामापिन श्रुतम्॥ अयं शिवकथालापमून जानात्येव सर्वथा॥१४॥ नानाजातिगृहङ्गत्वा आन्ध्याकृत्वा प्रयत्नतः॥ आसापन्दुष्टवार्ताभिः कालन्न-
यति सर्वशः॥१५॥ पराङ्गनापि सङ्गेऽपि निरतः पापकृत्तमः॥ नस्मार्तकर्मनिरतः श्रौतकर्मपराङ्मुखः॥१६॥ अयन्तुमरणात्पूर्वम्मासमात्रं निशामुखे॥ शिवपूजां विलो-
क्यैव चकार निशिभोजनम्॥१७॥ पूजां दृष्ट्वा प्रमोदोऽपि कृतोऽनेन मुहुर्मुहुः॥ धूपभस्मसमादाय स्वगात्रञ्च पवित्रितम्॥१८॥ ततः परम्मृतः सोऽयमिति श्रुत्वा
नचोयमः॥ त्वरया प्रणतस्तस्मै रत्नसिंहासनन्ददौ॥१९॥ पूजयामास तं विप्रं ततः प्राहातिविस्मितः॥ भाग्यवानसि धन्योऽसि मान्योऽसीति मुहुर्मुहुः॥२०॥ धन्यन्ध-
न्यं मनुष्याणां जीवनं रजनीमुखे॥ दृष्ट्वापि पूजितं लिङ्गं भवन्ति सुरवन्दिताः॥२१॥ अनायासेन भाग्यानि प्राप्नुवन्ति मुहुर्नराः॥ दृष्ट्वापि पूजितं लिङ्गं सायङ्काले प्रयत्नतः विशेषतः॥२२॥
अर्चितं लिंगं मालोक्य मुच्यते पापकोटिभिः॥ शिवार्चनोपकरणं सायंकाले विशेषतः॥२३॥
वृषस्याण्डमुपस्पृश्य वृषभङ्गान्तरान्नरः॥ घ्राङ्गलिङ्गं समालोक्य मुच्यते पापकोटिभिः॥२४॥ धृत्वा भस्म प्रयत्नेन सायम्पश्यति यः शिवम्॥ तस्य पुण्यफलं वक्तुं
शेषेणापि न शक्यते॥२५॥ मया कथं नातत्पुण्यं वक्तव्यमियदीत्यपि॥ दैवैरपि न तच्छक्यम् वक्तुमित्येव मन्महे॥२६॥ प्रदोषकाले शिवपूजां (लिंग) दृष्ट्वा सकृद्वा शिवमे-
वयाति॥ भुक्त्वापि भोगान्विपुला (नपार) [illegible] नित्यापि मे मतिर्हि॥२७॥ अहो न जानन्ति शिवप्रभावं प्रदोषकालीन शिवार्चनस्य॥
फलन्न जानन्ति विमूढचेत्ताः संसारपाशाति निबद्धगात्राः॥२८॥ कृत्वा महीमण्डलमर्त्य देह संरक्षणं पुल्य निशामुखेषु॥ लिङ्गार्चनार्थं कृतकृत्य [illegible] एव
तेनैव तावन्मनुजो महान्हि॥२९॥ मर्त्यत्वं खलु दुर्लभं द्विजजनिस्तत्रातिसा दुर्लभा तत्रापयंखलु तच्च दुर्लभमभिज्ञत्वञ्च भक्तिः शिवे॥ सा येद [illegible]

व्य
दृष्यभिचारिणो यदि तथा लिङ्गार्चनात्यादरस्तर्हि प्राप्तमुमासहायचरणांभोजप्रभामण्डलम् ॥ ३० ॥ धन्यः कोऽपि शिवार्चकः कलियुगे भस्मत्रिपुण्ड्रादरो रुद्राक्षाभर
णप्रियः शिवमनुव्याहारमात्रादरः ॥ लिङ्गाराधनपुण्यपूर्वविभवो भावो भवानीपति, ध्यानानन्दसमुद्रमग्नहृदयः तस्मै नमः कोटिशः ॥ [31] ॥ धन्यः शाम्भवपुंगवः
कलियुगे कश्चिद्भविष्यत्यहो। काशीवासविनीतयौवनमदो वीरेश्वराराधकः ॥ ॥ तेनापारमहेश्वरामृतकथासिन्धुः प्रवृद्धो भवेत्तत्कीर्तिः श्रवणेन यास्यति
शिवं यः कोऽपि रङ्कोऽपि वा ॥ [32] ॥ धन्या तज्जननी पिता च सुतरां धन्योऽस्य धन्यं कुलम् ॥ तद्भृत्योऽपि स धन्य एव हि मुहुः श्रीकालकालार्चकः ॥ ३२ ॥ सर्वानप्य
मरानपास्य विधिवद्भस्मत्रिपुण्ड्रांकितो। रुद्राक्षाभरणः शिवैकशरणः श्रेष्ठोऽतिमान्यः सदा [॥ 33 ॥] भूपालोऽपि भविष्यति प्रभुरयं दाता शिवाराधने रम्भापारकुमार
वर्गसहितो गन्धर्वनारीपतिः। वैराग्यैकनिधिः शिवार्चकनिधिः नूनं प्रदोषार्चितं लिङ्गं दृष्टमिति प्रसूननिकरव्यासं मुहुः सादरम् ॥ ३४ ॥ इत्युक्तं तद्वचः
श्रुत्वा सर्वे यमसभासदः। तमूचुर्विस्मितास्सन्तो विनयानतकन्धराः ॥ ३५ ॥ सभ्ये सदा ऊचुः ॥ यम नामतवानर्थं धर्मराज इति प्रथा ॥ तवया स्वर्गलोकादौ
स्वर्भुवि च प्रवर्तते ॥ ३६ ॥ शौचस्नानादिकर्माणि स्मार्तानि विविधान्यपि ॥ तेषु कोऽपि कृतो धर्मो नानेनेति श्रुतं मुहुः ॥ ३७ ॥ ज्योतिष्टोमादयो यागाः तावद्दूरतरा
हि ॥ अस्याद्यदानवार्तापि यस्मादत्यन्तदूरतः ॥ ३८ ॥ अतिकुत्सितवृत्तिश्च श्रुतो तावदयं खलु ॥ नीचसेवारतो ह्यस्य पुण्यधीरपि न ध्रुवम् ॥ ३९ ॥ प्रदोषपूजितं लिङ्गम्
दृष्टव्यं पापनाशकम् ॥ इति नायं प्रजानाति विवेकरहितो यतः ॥ ४० ॥ एवं सति त्वया पूजा कथमस्य विशेषतः ॥ स्वसिंहासनमारूढः कथं तिष्ठति शैववत् ॥ ४१ ॥
शिवार्चकाः समायान्ति मार्गेणानेन शांभव ॥ लोकं गन्तु तदा तावत्तिष्ठंत्यत्रासनेक्षणम् ॥ ४२ ॥ अन्येषामवकाशोऽत्र दुर्लभः खलु वस्तुतः ॥ क्व सिंहासनमुत्कृ

33/

एवं क्वायं धर्मविवर्जितः ॥४३॥ एतावत्कालपर्यन्तं न दृष्टमिदमीदृशम् ॥ अद्भुतं दृष्टमधुना यमसिंहासनाधिप ॥४४॥ यम उवाच ॥ धर्मं सूक्ष्मं न जानन्ति बाल

राइव पामराः ॥ अशाङ्कराः परं क्रूराः तावद्धनरवत्नयः ॥४५॥ किमेतद्विषये जाता कठोरोक्तिः कुठारवत् ॥ पूज्येषु न कुठारोक्तिः सत्येष्वपि चितायतः ॥४६॥

किं धर्मैरितरैः स्मार्तैर्वैदिकैर्वा विशेषतः ॥ लौकिकैर्वा धर्मवार्ता भवद्भिर्न श्रुता यतः ॥४७॥ प्रदोषपूजितं लिङ्गं यः क्षणार्धार्धमेव वा ॥ विलोकयति तत्पुण्य

मनन्तं विभवं खलु ॥४८॥ प्रदोषकालीनमहेशपूजा विलोकनासक्तमतिर्न यः स्यात् ॥ स पातकाकार इति प्रसिद्धः स्वबोध एवेति मयापि बुद्धः ॥४९॥

प्रदोषलिङ्गपूजायां दृष्टायां पापसंक्षयः ॥ अक्षय्यामोक्षलक्ष्मीश्च भविष्यत्यधमस्य च ॥५०॥ जन्म तस्यैव सफलं येन लिङ्गं समर्चितम् ॥ सायं सकृद्वा

यत्नेनाप्यालस्याद्वा प्रसङ्गतः ॥५१॥ आसाद्य (यास) मात्रफलकैर्धर्माभासैः कुतः फलम् ॥ स्मार्तैर्वा वैदिकैर्वापि शिवलिङ्गार्चनं विना ॥५२॥ स्मार्तवैदिकधर्मा

णामनुष्ठानेऽपि कोटिशः ॥ लिङ्गार्चनेन यत्प्राप्यं तत्प्राप्यन्ते न सर्वथा ॥५३॥ धर्मा नराणां करणं धननाशाय केवलम् ॥ शिवार्चनं परो धर्मः परमानन्दसाधनम्

॥५४॥ पापराशिविनाशाय शिवलिङ्गावलोकनम् ॥ कल्पितं गिरिशेनैव नैव ज्ञानात्यवनारकाः ॥५५॥ लोकोपकारकं सृष्टं शिवलिङ्गावलोकनम् ॥ कल्पितं गिरि

शेनैव तन्न कुर्वन्ति पापिष्ठाः पतन्ति नरके ह्यहो ॥५६॥ अनाथनाथं श्रीनाथं नयनार्चितपादुकम् ॥ न जानन्ति महादेवं नरकेषु पतन्त्यहो ॥५७॥ श्रीमह

देवमहिमा दुर्ज्ञेयो दुर्जनैरतः ॥ पतन्ति नरके घोरे पितृभिः सह सर्वथा ॥५८॥ पिता पिता महादीनाम् यः शम्भुर्यो भवः प्रभुः ॥ तं न जानन्ति दुर्वृत्ताः प-

तन्ति नरके ह्यहो ॥५९॥ शिवधर्मेषु विस्तारादन्यधर्मरता नराः ॥ पतन्ति नरके घोरे क्रूराः शङ्करनिन्दकाः ॥६०॥ तदर्थं नरकाः सृष्टाः सर्वदा दुरव

हेतवः ॥ यैर्महादेव लिङ्गार्चा फलमज्ञातमादरात् ॥ ६१ ॥ न जानाति महादेव लिङ्ग पूजा फलानि यः । स सूकरः खरो यद्वा शुनकः काक एव वा ॥ ६२ ॥ दुर्भगास्त एव ते सर्वे
भर्गार्चन पराङ्मुखाः ॥ तन्मुखानि प्रदग्धानि शिवद्वेषाग्नि कोटिभिः ॥ ६३ ॥ सुलभं न विजानन्ति महादेवार्चनं जनाः ॥ शुद्ध दूर्वाङ्कुरेणापि लिङ्ग पूजा विमुक्तिदा ॥ ६४ ॥ क्षीरं वा-
नीरमुत्सृज्य भक्त्या लिङ्गे शिवात्मके विधूत पातकाश्चैव प्रयान्ति शिवमव्ययम् ॥ ६५ ॥ शुष्केण बिल्व पर्णेन तच्चूर्णेनापि यः शिवम् ॥ पूजयिष्यति तस्यापि मुक्तिकान्तानदु-
र्लभा ॥ ६६ ॥ व्यासङ्गेनापि यः शार्ङ्गं लिङ्गं मङ्गल दायकम् ॥ सायम्पश्यति पुण्यात्मा नमस्तस्मै नमो नमः ॥ ६७ ॥ अनाराध्य महादेवम् अनायासे[illegible]पि पापिनः ॥ प्रयान्ति
दुर्गमं घोरं नरकालयमन्वहम् ॥ ६८ ॥ वने वनानि रम्याणि वनजान्यपि तैः शिवः ॥ नाराध्यते दुर्भगेण नरकावासमिच्छता ॥ ६९ ॥ अनिच्छयाप्युमाकान्त लिङ्गं पश्य
तियो नरः ॥ सायं स दोष निर्मुक्तो मुक्तो भवति सर्वथा ॥ ७० ॥ तृणैरपि सुवर्णं मूर्खाः कथन्नाराधयन्त्यहो ॥ महादेवं महा[illegible] मोहो महानरक साधनम् ॥ ७१ ॥ शिव
लिङ्गार्चकांगानि दृष्ट्वापि स्वजनो मुखे ॥ प्रयान्ति ब्रह्मसदनं यत्किलात्यन्त मद्भुतम् ॥ ७२ ॥ सुलभत्वेन विज्ञातं शार्ङ्गांगस्य विलोकनम् ॥ तदभाग्यानिदग्धानामति दुर्लभ
मेव हि ॥ ७३ ॥ लिङ्गार्चनेन किं पुण्यमित्युपेक्षापि चेत्क्षणम् ॥ तद्वंशक्षय एव स्यात् पक्षपातेन नोच्यते ॥ ७४ ॥ अहो [illegible] महदिदं भाग्यं शिवलिङ्गार्चने मतिः ॥ तदेवाहि
महद्भाग्यं महद्भाग्यमिति स्मृतम् ॥ ७५ ॥ लोके दुराचार रताः शिवार्चां विहाय तिष्ठन्त्यति निष्ठयाते ॥ लिप्सा भविष्यति न संशयोऽत्र शिवापदाम्भोजयुगे शपामि ॥
७६ ॥ यः कर्मणा वा मनसापि वाग्भिर्नित्यं त्रिभिर्वा त्रिपुरान्तकार्चाम् ॥ करोति तत्पादरजः प्रसादं वाञ्छन्त्युपेन्द्रोऽपि चतुर्मुखोऽपि ॥ ७७ ॥ किमु वक्तव्यमुमासहा
यचरणांभोजार्चकाराधका पारैश्वर्यपरं हरिः प्रति दिनं तत्सेवकाराधकः ॥ श्रीवाणीरमणादयोऽपि मुनयः सिद्धाः समुग्रास्तथा गन्धर्वा अपि किन्नरा अपि

शेषादयः सेवकाः ॥७८॥ शम्भुः सर्वजगत्प्रभुर्विभुरिति ज्ञात्वा परं शाम्भवास्तत्पूजानिरताः परात्परतरं तेजः परं शाम्भवम् ॥ प्राप्यन्ते परमोत्सवाहृतनिजव्यापारपार
ङ्गताः [illegible] पारावार विहार पूजित पदाम्भोजाः प्रसन्नाः सदा ॥७९॥ कस्तूरीरसराजराजसहितः कर्पूरगन्धो यथा न ज्ञातः शुनकैस्तथा शिवशिवाचार
व्रतानादरैः ॥ न ज्ञातं शिवलिङ्गपूजनफलन्तत्कालकालार्चकैः ॥ ज्ञातङ्केवलमित्यलौकिकमिदन्ज्ञेयङ्कथम्पामरैः ॥८०॥ किमन्यद्वक्तव्यं स्मरहरकथासागर
रसो न विज्ञातो लोके रमित [illegible] महिमा तेन सहसा ॥ न बुद्धिर्मन्दानाम् शिवचरणसेवानुकरणे क्षणं वा न क्षीणम् यदि मरणकाले प्यघकुलम् ॥८१॥ वलाद्दे ते लो-
काः खलजनरता एव नितरां न जानन्त्येवा लम्बवत्(वत) न कालान्तकमतम् ॥ अतो ते सन्तप्ताः प्रतिपदम घोरेषु नरके वसन्तो वैर्दोषैः प्रलपन विषादातिसविषाः ॥
८२॥ अहो मोहः को वा जगति न महादेवभजने मतिर्भक्तिः श्रद्धा कथमपि न तत्पूजनरतिः ॥ न तद्धर्म्मालापेष्वभिरुचिरतो याति नरके ष्वघोरेषु भ्रष्टाः
शिवरुचिरमार्गादतिशठाः ॥८३॥ ललाटे किञ्चिद्वासितभसितमालिप्य शिरसा मुहुर्नत्वा यद्वा सकृदपि सरुद्राक्षवपुषा ॥ शिवन्दृष्ट्वा सायम् जल
मपि विनिक्षिप्य विमलं करौ लिङ्गे प्राङ्गे शिवपदसरोजे प्रविशति ॥८४॥ इति श्रीहरारव्ये शिवरहस्ये तृतीयांशे उत्तरार्धे याज्ञवल्क्यजनकस-
म्वादे नाम तृतीयोऽध्यायः ॥३॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ याज्ञवल्क्य उवाच ॥ इतितद्वचनं श्रुत्वा कम्पमा
नाः सभासदाः ॥ प्रणतास्तं यमं विप्रं शिवध्यानपुरःसरम् ॥१॥ ततः परं स्वर्गलोकं यमेनाभ्यर्चितो यदि यौ ॥ स विप्रः स्वर्गलोकेऽपि शचीनाथेन पूजितः ॥२॥ विमानवरमा
रुह्य ब्रह्मलोकं ययौ ततः ॥ ब्रह्मलोके यथाकाममुवासाभ्यर्चितः सुरैः ॥३॥ ततः परम् सत्यवाम् ब्रह्मभूपसुतः स्वयम् ॥ योगमार्गसमासाद्य वासुदेव इवापरः ॥४॥ गर्भेवू

चित्वा बहुधा स्तुत्वा शङ्करमव्ययम्। योनिमार्गेण गमनमास्त्वित्युक्त्वा स्थितः पुरा॥ ततः परं सुराः सर्वे तं द्विजं गर्भसंस्थितम्॥ तुष्टुवुर्विनयानम्राः कृताञ्जलिपुटा अपि॥६॥
अनुचितः पुराणोऽयम् पन्थास्तेनैव भूसुर॥ प्रपन्नाः ऋषयः साध्याः सिद्धाः सर्वे सुरा वयम्॥७॥ मार्गान्तरेण गमनं गर्भस्थस्योचितन्न न॥ तत्वज्ञस्य तवा त्वापि गर्भेवासो न रोच
ते॥८॥ तथापि गर्भवासार्थं त्वमिहाप्यागतोऽसि हे॥ मार्गान्तरेण गमने सद्गुरो जननी भवेत्॥९॥ यत्र कुत्राप्यवस्थानं येन केन पथा गतिः॥ योगिना अपि युक्तेति कुत्सिततत्वमतिं
त्यज॥१०॥ मनुष्यरूपमासाद्य योनिमार्गेण निर्गमे॥ नदूषणञ्च लोकानां सर्वेषां समभूत्यतः॥११॥ सोऽहमप्यन्यथा कर्तुं शक्तिरस्त्येव यद्यपि॥ तथापि न तथा कर्तुं युक्तमेवेति
मन्यताम्॥१२॥ अतः परं योनिमार्गाद्योनेः सरणं न ते॥ शरीरं त्वरमं यस्मान्न ब्राह्मणसत्तम॥१३॥ सायङ्काले त्वया दृष्टं शिवलिङ्गं समर्चितम्॥ तेन पुण्यप्रभावेन नज्ञान
मेवमभूत्तव॥१४॥ तदिदं पुण्यमुत्कृष्टं तत्प्रभावात्तवेदृशी॥ मतिर्युक्ता न सन्देहस्तत्पुण्यं तादृशं यतः॥१५॥ शङ्करानुग्रहेणैव तत्पुण्यमभवत्तव॥ अन्यथा तादृशं पुण्यन्दे
वानामपि दुर्लभम्॥१६॥ शिवलिङ्गार्चनेदृष्टं सायंकाले विशेषतः॥ स्वयं नृत्यति [illegible] सन्तुष्टो दिव्यदेवगणैः सह॥१७॥ प्रदोषसमये दृष्टं शिवलिङ्गं समर्चितम्॥ सर्व
कामदमित्याहुः तत्सत्यमभवत्खलु॥१८॥ संदिहानः शिवाचारे पापिष्ठो न प्रवर्तते॥ एतादृशं महद्भाग्यमधुनाद्दृष्टमद्भुतम्॥१९॥ तव स्वरूपं विज्ञातन्त्वयापि
नाशिवार्चनम्॥ कृतं पापेन नीतानि दिनानि खलु सर्वदा॥२०॥ दुष्प्रतिग्रहलोलस्त्वं दुराचाररतः सदा॥ न स्मार्तकर्मनिरतो वैदिकं क्वापि यतेऽपि न॥२१॥ नीचान्नभक्षणे
नैव वयो नीतं त्वया खलु॥ मद्यपाङ्गनया साकं बहुकालं स्थितन्त्वया॥२२॥ तस्यामुत्पादिताः पुत्राः कन्यकाश्च दुरात्मना॥ त्रिपुण्ड्रधारणन्नाजन्म कृतं श्रुति
चोदितम्॥२३॥ रुद्राक्षाणां धारणञ्च कदापि न कृतन्त्वया॥ बिल्वपत्रं विनिक्षिप्तं (न) जलं वा शिव(लिंग)मस्तके॥२४॥ नदीपवर्तिका दत्ता त्वया शङ्कर[illegible]

533

मन्दिरे ॥ दीपप्रदानवार्तापि दूरतस्तव सर्वथा ॥२५॥ न सोमवासरे भुक्तं नियमान्निशि सादरम् ॥ ग्राम्यैः सह संलापो न त्वया कृत एव हि ॥२६॥ पुण्याः शिवकथा
लापाः सर्वथा न श्रुतास्त्वया ॥ रुद्राध्यायो न जप्तो हि मन्त्ररत्नं समाश्रयः ॥२७॥ एतादृशेन दुष्टेन प्रदोषे दैवयोगतः ॥ शिवलिङ्गं त्वया दृष्टं कृतकृत्योसि ताव
ता ॥२८॥ शिवलिङ्गं न दृष्टं चेत् सायङ्काले त्वया तदा ॥ आकल्पं घोरनरकात्प्रच्यवस्ते कथम्भवेत् ॥२९॥ शिवाचारविहीनानां नरकान्निर्गमः कथम् ॥ पित्रा
दिभिः सहवासो नरकेष्वेव कोटिशः ॥३०॥ जन्मान्तरं वा सततं शिवमर्चय सादरम् ॥ जातिस्मरत्वं सम्प्राप्य तेन पुण्येन सत्वरम् ॥३१॥ तत्वज्ञानस्य धर्माणाम्
यागानामपि यत्फलम् ॥ तत्फलं केवलं मन्ये श्रीमहादेवपूजनम् ॥३२॥ शिवार्चनेन सर्वेषां कामानां सिद्धिरित्यतः ॥ प्रयत्नैर्बहुभिर्नित्यं कुरु शङ्करपूजनम् ॥३३॥
भूपाल त्वं समासाद्य नोन्मत्तो भव सर्वथा ॥ विभवैर्बहुभिर्नित्यं [illegible] भवलिङ्गं समर्चय ॥३४॥ यदि त्वन्न तवोन्मादस्तदा कुत्सितयोनिषु ॥ तव जन्मान्यनन्तानि
भविष्यन्ति न संशयः ॥३५॥ पापिष्ठानां शिवाचारे न बुद्धिर्जायते ततः ॥ प्रयान्ति नरकं घोरं यावदाचन्द्रतारकम् ॥३६॥ अतो गर्वं विहायाद्य योनिमार्गेण केवल-
म् ॥ भुवं व्रज यथाकामं यज मृत्युञ्जयं मुहुः ॥३७॥ इति तद्वचनं श्रुत्वा तथास्त्विति पुनः पुनः ॥ नत्वा तान्प्रेषयामास स्वकृतं सुकृतं स्मरन् ॥३८॥ समासन
वकं स्थित्वा गर्भे गिरिशमर्चयन् ॥ मनसा केवलं पश्चात् योनिमार्गाद्विनिर्गतः ॥३९॥ सुमुहूर्ते समुत्पन्नः पित्रोरानन्दवर्धकः ॥ नभाषे शिव इत्यादौ श्रीमहा
देव इत्यपि ॥४०॥ तदा तद्वचनं श्रुत्वा तन्माता कंपसंयुता ॥ तदानु निकटे सर्वाः कम्पमापुः स्त्रियो मुहुः ॥४१॥ किमद्भुतमिदं जातं बालचेष्टा तु नेदृशी ॥ इदं
खलु महोद्भूतमुत्पन्नं भयसाधनम् ॥४२॥ राज्ञे निवेदयामासुर्महद्भुतविचेष्टितम् ॥ इति विस्मयमापन्नास्तद्दास्यो नृपसन्निधिम् ॥४३॥

गत्वा पुत्रवृत्तान्तं कीर्तयामासुरादरात् ॥ राजन्कुमारस्सम्भूतो मदनापरविग्रहः तद्देहतेजसाध्वान्तम् सूतिकामन्दिरन्नृप ॥४४॥ तद्देहप्रभया प्रभया दीपाः सर्वे शान्ता इव स्थिताः ॥ अन्यदत्यद्भुतङ्किञ्चिदुत्पन्नेनसुतेनते ॥ उच्चैः शिव महादेव महेशेत्युक्तमादरात् ॥४५॥ इदमद्भुतमाकर्ण्य बालकोनाथमित्यपि ॥ तन्मातुरभवद्बुद्धिरस्माकमपि सामतिः ॥४६॥ इत्युदीरितमाकर्ण्य सराजा विस्मयङ्गतः ॥ उत्साहोपि प्रवृद्धोभूद्भूपालस्य तदा महान् ॥४७॥ तदानीमागतस्तत्र नारदो मुनिपुङ्गवः ॥ तमागतं पूजयामास भूपतिः ॥४८॥ निवेद्य पुत्रवृत्तान्तम् नारदाय स भूपतिः ॥ संस्तुतो नारदेनासौ मुहुः प्रीतिपुरस्सरम् ॥ ५०॥ राजंस्तव पुत्रस्य योगाज्जाता जनिर्मम ॥ पूर्वजन्मार्जितम्पुण्यं तस्य तद्धि फलं खलु ॥५१॥ सायङ्काले तेन दृष्टं मनोज्ञं बिल्वैः पुष्पैः पूजितं शाङ्करं लिङ्गम् ॥ धूपैरन्नैर्दीपदानै रम्यैस्तत्वज्ञोऽयम् तेन पुण्येन भूप ॥५२॥ पुण्यान्यनन्तानि न्यपि सन्ति किन्त्वैः प्रदोषकाले शिवदर्शनेन भवत्यवश्यं नृपतत्वज्ञो ना सौभाग्यसौंदर्य्यनिधिश्च मर्त्यः ॥५३॥ किं कौतुकं सृष्टमिदं शिवेन दृष्टं प्रदोषे शिवलिङ्गमात्रम् ॥ सुखेते सुखानि स्वयमेकमेव नान्यत्परङ्किञ्चिदपेक्षितं च ॥५४॥ प्रदोषकालः शिवसंमतोतः प्रदोषकालीनशिवार्चनेन ॥ प्रयान्ति शैवं पदमद्भुतं तन्न ज्ञायते भूप सुरादिभिश्च ॥ यः कोपि सायं शिवदर्शनेन भुक्त्वापि भोगान् विपुलानपारान् ॥ शिवम्प्रयात्येव विनाप्रयत्नैः स योगिनामप्यतिदुर्लभो हि ॥५६॥ संयोगवार्तान्न करोति शम्भुर्नयागवार्तामपि दानवार्ताम् ॥ परन्तु सायं शिवपूजकानाम् करोति वार्तां गिरिजासमेतः ॥५७॥ प्रदोषकाले समुपागतोऽद्य पुष्पं गृहीत्वा कमलं गृहीत्वा ॥ सबिल्वमादाय जलं गृहीत्वा सभूतिमादाय तिलाक्षतादीन् ॥५८॥ सधूपमादाय समागतो द्य दीपं समादाय फलं गृहीत्वा ॥ ताम्बूलमादाय स सायमादौ

४७ अनेन रत्नाभरणानि दत्तान्यनेन दत्ता खलु बिल्वमाला ॥ प्रदोषकाले मुहुरादरेण स्पृष्टं च लिंगं मम शांभवेन ॥ ६७ ॥

लिङ्गार्चनासक्तमतिर्भवानि ॥ ५९ ॥ निरीक्षितन्तेन महाप्रदोषे बिल्वार्चितं लिङ्गमनुत्तमं मे ॥ प्रदक्षिणेन प्रणतश्च तेन ध्यातञ्च तेन क्षणमास्तिकेन ॥ ६० ॥ विभू-
तिपूतेन विलोकितञ्च पुनः पुनर्लिङ्गमनुस्मृतञ्च ॥ रुद्राक्षमालाछविभूषणेन पुनर्पुनर्लिङ्गमनुस्मृतञ्च ॥ ६१ ॥ ताम्बूलमादाय ~~समा~~ ~~प्रस्मा~~ ~~ये~~ निवेदितञ्च द्रा
क्षाफलन्तेन म निवेदितञ्च तेनार्पितानि सत्कदलीफलानि प्रदोषकाले शिवलिङ्गमूर्ध्नि ॥ ६२ ॥ क्षीरप्रवाहैरभिषिक्तमद्य प्रदोषकाले सुदधिप्रवाहैः
घृतप्रवाहैश्च मधुप्रवाहैः सुसर्करारािशिभिरर्चितञ्च ॥ ६४ ॥ तेनाम्रपक्वोरुफलानि तानि दत्तानि लिङ्गोपरि तेन शुभ्रम् ॥ दुकूलमत्युज्ज्वलमायतञ्च
तदेव तावद्विपुलं मनोज्ञम् ॥ ६५ ॥ मन्दारमालासमलङ्कृतञ्च लिङ्गं मदीयं घनचन्दनेन ॥ कस्तूरिकाकर्दमसंयुतेन प्रदोषकाले खलु शा
म्भवेन ॥ ६६ ॥ सुशर्करासद्घृतकुम्भयुक्तं क्षीरान्नमेतेन निवेदितम्मे ॥ अपूपराशिश्च समर्पितो मे महाप्रदोषे खलु शाम्भवेन ॥ ६७ ॥
अयं हि हस्तो भगवानयं मे पुण्यस्वभावे भगवत्तरो मे ॥ अयं हि हस्तः खलु विश्वभेषजो यस्मादयं मेऽद्य शिवाभिमर्शनम् ॥ ६८ ॥ अनेन भुक्तं न दिवा भवानि जलन्न पीतम्
फलभक्षणञ्च ॥ कृतन्न ताम्बूलमपि प्रदोषेत्यक्ता शिवाराधनमादरेण ॥ ६९ ॥ ये ते मदीयाः सितिभस्मधूलाः प्रदोषकाले शिवपूजनाय ॥ कृतप्रयत्नाः शिवनामपू
ताः प्रकृष्टरुद्राक्षविभूषिताङ्गाः ॥ ७० ॥ प्रदोषकालीनशिवार्चनेन भुक्त्वैव भोग्यान् विपुलानपारान् ॥ स्थास्यन्ति सर्वेऽपि ममैव पार्श्वे मत्पूजनप्राप्तमहोत्सवास्ते ॥
॥ ७१ ॥ एते विमानानि मनोहराणि प्राप्यन्तकाराधिपपादपद्माः ॥ विरोन्द्रनारायणपूजिताश्च स्थास्यन्ति मत्पादनरवप्रभाभिः ॥ ७२ ॥ धन्याः प्रदोषेषु शिवार्च
काले सर्वे ममैवापरविग्रहास्ते ॥ तेषां परस्माद्रजो [illegible] यमोऽपि धत्ते शिरस्येव तथैव विप्राः ॥ ७३ ॥ प्रदोषकालीनशिवार्चनाय मतिः शिवे स्यान्मद

नुग्रहेण॥ अघोर संसार विकार सागरः पुनर्न दुःखानितया भवन्ति ॥७४॥ तावन्महापापभयं भवानि यावन्न पूजां रजनीमुखेषु ॥ करोति लिङ्गे सितभस्मवीत
स्त्रिपुण्ड्ररुद्राक्ष विभूषणः सन् ॥७५॥ पूजां कोऽपि महाप्रदोषसमये कृत्वा विभूति प्रभा रुद्राक्षाभरण प्रभा परिवृतो लिङ्गे जलैर्वा फलैः ॥ विल्वैर्वा नवकन्द
कारि कुसुमैर्दूर्वाङ्कुरैर्वा शिवे भूपालत्वमवाप्य मत्पदरजः पुञ्जेन संक्रीडति ॥७६॥ कोवा तेन समः प्रदोष समये येनाहमभ्यर्चितो विल्वी पल्लव मालया जल
लवैर्मौ तेन वा भस्मना॥ उत्फुल्लैः करवीर चम्पक महामल्ली प्रसूनैः शिवे। तत्पादाम्बुजरेणुभिर्मुहुरहो नारायणः पूजितः॥७७॥ आजन्माखिलकष्टशोषणकरैः किंवे
द पारायणैः॥ किं दाने र्धन धान्य नाशन करैः कन्या प्रदानैरपि॥ किं गोत्तुङ्ग तुरङ्ग दन्ति निकरारब्ध प्रदानैः शिवे॥ सायङ्कालशिवार्चनार्जित फलाभावेन मुक्ति
र्यतः॥७८॥ क्षीणा स्यात्तनुरेव घोर तपसा दाने धनं नश्यति। व्यर्थन्त्वायुरपि प्रयाति गिरिजे लिङ्गार्चनन्तन्न चेत्॥ तेनैवाखिल भाग्य भोग विभवे भूमण्ड
ले जायते॥ पश्चान्मुक्तिरुपैति तेन सदृशो धर्मो न जाने ध्रुवम्॥७९॥ स्वर्गः केवल मङ्ग जाति सहितात्यागात्स नव्यं गतो व्यङ्गं लिङ्ग समर्चनं जललवै र्विल्वी
दलैर्वा कृतम्॥ तेनापार सुरानतोऽपि विभवः स्वर्गापवर्ग प्रदम् लिङ्गाराधनमेव तेन सदृशो धर्मो न लोकत्रये॥८०॥ चित्तं यस्य न लिङ्ग पूजनरतम् तज्जन्मताव
द्गतम्॥ व्यर्थन्तज्जननी वयस्तरुवरच्छेदे कुठारः सतु॥ तद्वार्ताप्यघ साधनाय गिरिजे लिङ्गार्चकोराधको यस्तस्यानुचरोऽपि सोऽपि हि महान्कालाद्भु
यन्तस्य न॥८१॥ तज्जन्मातिमनोहरं सुखकरं मन्येऽतिमान्ये शिवे। यः सायं शिवपूजनोद्यतमतिर्मध्याह्नकाले प्रगे। तन्दृष्ट्वापि यमादयोऽपि वहुधा
कम्पायमानाः सदा। धन्या तज्जननी पितापि सुतरां धन्यः समान्यः सुरैः ॥८२॥ इति श्री शिवरहस्ये तृतीयांशे हराख्ये उत्तरार्धे याज्ञवल्क्यजनक

सम्वादो नाम चतुर्थोऽध्यायः ॥४॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ याज्ञवल्क्य उवाच ॥ इत्युक्तन्तद्वचः श्रुत्वा नारदेन सहाविशत् । मन्दिरं लिङ्गसंवी
तं रत्नमण्डलमण्डितम् ॥१॥ तत्रानीतः स बालोऽपि ब्रह्मभूपाज्ञया तदा । स बालकोऽपि तन्दृष्ट्वा सन्तुष्टो लिङ्गमन्दिरम् ॥२॥ रत्ननन्दीशसंकीर्णं रत्न
भृङ्गिविराजितम् ॥ रत्नमन्दिरध्वजाकीर्णं मणितोरणसंयुतम् ॥३॥ ततः प्रफुल्लनयनन्दृष्ट्वा राजानमास्तिकम् ॥ नारदञ्च प्रविष्टोऽसौ गर्भागारं शिवस्य
सः ॥४॥ ततः प्रणम्य तल्लिङ्गमालिङ्ग्य सम भून्मुहुः ॥ भूतिरुद्राक्षपूताङ्गः पूजयामास शङ्करम् ॥५॥ पञ्चामृतप्रवाहाद्यैश्चन्दनाद्यैर्मनोहरैः ॥ पूजया
मास गिरिशम् बिल्वपुष्पादिराशिभिः ॥ नैवेद्यराशिभिर्दिव्यैर्धूपदीपादिभिर्मुदा ॥ ततो नाट्यञ्चकारायं बालको नाट्यमण्डपे ॥७॥ प्रणम्य बहुधा प्र
भुं शिवध्यानपुरःसरम् ॥ ततः प्रणम्य तल्लिङ्गं स नारदन्दृष्ट्वा राजानञ्च शिवार्चकः ॥ भूतिरुद्राक्षपूताङ्गम् भूतिरुद्राक्षभूषणः ॥ प्रणम्य नारद
स्त्वाह धर्मं धर्मं वदेति सः ॥८॥ नारद उवाच ॥ साधु साधु महाप्राज्ञ चिरञ्जीवि शिवं व्रज ॥ अज मृत्युञ्जयम्भक्त्या जय मृत्युं शिवार्चनैः ॥१०॥ धन्यो
ऽसि कृतकृत्योऽसि कृतकृत्यतमः प्रिया ॥ आदृतोऽसि महाशैव भूतिरुद्राक्षजातया ॥ जातमात्रस्य तव बुद्धिर्महादेवार्चने तव ॥ सतावल्लादुतासाय
न्दृष्टं लिङ्गन्त्वया यतः ॥१२॥ तल्लिङ्गदर्शनोत्पन्नपुण्येनैव शिवार्चने ॥ अधुना भक्तिरुत्पन्ना सद्यः स्वर्गापवर्गदा ॥१३॥ अद्य प्रभृति न त्याज्यम्
शिवलिङ्गार्चनन्त्वया । न त्याज्यं साहसाद्बाल भस्मरुद्राक्षभूषणम् ॥१४॥ शिवार्चनेन कालोऽयं नेयः कल्याणदायकः ॥ व्यर्थकालापनयनम्
न कार्य्यम् ज्ञानिना त्वया ॥१५॥ आयुः शिवार्चनेनैव यदि क्षीणम्भविष्यति ॥ तदा ज्ञानञ्च सफलम् तदायुरपि सार्थकम् ॥१६॥ ज्ञानिनात्वा

नमान्नस्य विनाशे सति सर्वथा ॥ शिवार्चनार्थं यत्नस्तु कर्तव्यस्तेन मुच्यते ॥१७॥ यावद्भूमौ भवेज्जीवो तावद्भ्रमति सर्वथा ॥ संसार घोर नरके पापनक्र गृहाकुले ॥१८॥
ज्ञानमानन्द्य यत्तुल्यं तुच्छ जन्तु समाकुलम् ॥ तादृशं ज्ञानमन्येषां न मुक्त्यर्थं प्रजायते ॥१९॥ यत्ज्ञानां न किं ज्ञानं तत्किं मोक्षस्य साधनम् ॥ मोक्ष साधन भूतन्तु ज्ञानम-
न्यद्विलक्षणम् ॥२०॥ येन ज्ञानेन मुक्तिः स्यात् तज्ज्ञानाभ्यसनात्परम् ॥ मुक्तो भवति तज्ज्ञानं केवलं शिवपूजया ॥२१॥ देवोत्तमत्वेन ज्ञाते सति महेश्वरे ॥ तज्ज्ञानादेव मुक्तिः
स्यात् तज्ज्ञानं च शिवार्चनात् ॥२२॥ धर्मं धर्मतया ज्ञातं श्रीमहादेव पूजनम् ॥ तेन मुक्तिर्भवत्येव स्वर्गा भोगाश्च सर्वदा ॥२३॥ भक्त्या शङ्करमभ्यर्च्य यः स्वर्गन्नाभि
वाञ्छति ॥ तस्यापि भवति स्वर्गोप्यपवर्गोप्यसंशयम् ॥२४॥ स्वर्गार्थमपि चेद्भक्त्या शङ्करा राधकस्तदा ॥ अपवर्गो भवत्येव स्वर्गोप्यत्र न संशयः ॥२५॥ स्वर्गापवर्ग
दं यस्माल्लिङ्गे शङ्कर पूजनम् ॥ तत्फलमदत्वा तु न तिष्ठत्येव सर्वथा ॥२६॥ शिवलिङ्गार्चनाकारी यः कल्पतरुरुत्तमः ॥ स सर्व फलदो नित्यम् भवत्येव न संश-
यः ॥२७॥ रूपलावण्य सम्पन्नाः तरुणीगण कोटयः ॥ आसन्नास्त्वेव तस्य स्युः यः शिवाराधन प्रियः ॥२८॥ दिव्य तुङ्ग तुरङ्गाणां कोटयः समुपस्थिताः ॥ भव-
त्येव न सन्देहः शिवलिङ्गार्चकाङ्गणे ॥२९॥ उपस्थिताः सर्वदापि मत्तमातङ्ग कोटयः ॥ यः शिवाराधनोद्युक्तः तद्गृहद्वारमण्डपे ॥ सुरास्तद्गृहमायान्ति यः शिवाराधनो
त्सुकः ॥ तिष्ठन्ति देवाः सततं शिवाराधक मन्दिरे ॥३१॥ शिवज्ञानं समासाद्य यः शिवार्चन तत्परः ॥ तद्दर्शनेन मुक्तिः स्यात्स यस्मात् शङ्कर प्रियः ॥३२॥ शाम्भवैः सह
संल्लापेप्यघ कोटि विनाशकः ॥ शाम्भवानाम् दर्शनञ्च शङ्करस्यैव दर्शनम् ॥३३॥ शङ्करो दुर्लभो लोके शिवपूजाति दुर्लभा ॥ दुरात्मनां तथा बुद्धिः कुतः
स्याच्छिव पूजने ॥३४॥ किञ्चान्यदुच्यते बाल शङ्करेणापि गोपनम् ॥ कृतं हि शिव विद्यायास्ततः सा चापि दुर्लभा ॥३५॥ शिव विद्या महाविद्या विद्यान

म्परवमंमता॥ तस्याः संगोपनं तेन कृतमित्यन्यनोदितम् ॥३६॥ सा तु विद्या प्रयत्नेन पार्वत्या स्कंधसन्निधौ ॥ प्राप्ता शिवप्रसादेन स्कन्देनापि महेश्वरात्॥
३७॥ आराधितः शङ्करोऽपि स्कन्देन शिवयापि च ॥ ताभ्यामुक्ता महाविद्या भुक्ति मुक्ति प्रदायिनी ॥३८॥ अनन्तयत्नाल्लब्धा सा महाविद्या महात्मना ॥ म-
हादेवेन दत्तेति महागौर्य्यै मुहुर्मुहुः ॥३९॥ सा यातु मूलविद्यास्ति शिवविद्या शिवात्मिका॥ सा दुर्लभा न कस्यापि सा स्फुरत्यपि सर्वदा ॥४०॥ तद्विद्यासाधनी
भूतं शङ्कराराधनं परम्॥ अशङ्कराराधकस्य दुर्लभं खलु दृश्यते ॥४१॥ यद्दुर्लभमिति ज्ञातं तदेव सुलभं भवेत् ॥ शिवार्चनेन तत्तस्मात्सर्वसिद्धिप्रदायक-
कम्॥४२॥ शिवार्चनेन लोकेषु को वा मुक्तो न जायते ॥ तत्र तावन्न विश्वासो भविष्यति दुरात्मनाम् ॥४३॥ महेशार्चनमाहात्म्यम् न विजानन्ति मानवाः॥
अत एव पतन्त्येते नरके नु न संशयः ॥४४॥ शिवार्चनपरित्यागः सर्वथा पापसाधनम् ॥ तेन पापेन यान्त्येव नरकं दुष्करम्परम् ॥४५॥ अयत्नेन प्रयान्त्ये
ते नरकं प्रति मानवाः॥ अहो न नीरमप्यल्पं न च यच्छन्ति पल्लवम् ॥४६॥ पुष्पं वा देवदेवाय लिङ्गरूपाय सर्वदा॥ सुलभान्येव पत्राणि जलानि विमला
न्यपि ॥४७॥ सर्वभावेन यो भावो भवपूजनतत्परः ॥ भवे भवेऽपि स भवेत्स भूयो न भविष्यति ॥४८॥ कः शङ्करस्नानरसं विहाय परसान्तरम्॥ स तावद्ज्ञो
विज्ञेयः संतयावज्ञयापि च ॥४९॥ अवज्ञायाः परं स्थानं शङ्करार्चनको जनः ॥ तुष्यत्येव महादेवः केवलन्तद्वन्नया ॥५०॥ अवज्ञापात्रभूतस्याप्यवज्ञां यस्तु
मोहतः ॥ न करिष्यति तन्तावत्पातयत्येव पातके ॥५१॥ कृत्वा पापान्यनन्तानि सकृद्वा यः शिवं स्मरेत् ॥ स धूतपाप इत्येव विज्ञेयो मुनिसत्तमैः ॥५२॥
मुनीनामपि वंद्यः स्यान्महादेवपरायणः ॥ वंद्यो नारायणादीनां सुराणामपि सर्वथा ॥५३॥ शिवार्चनपरो लोके विद्यः पूज्यश्च सर्वथा॥

भक्त्या लिंग

तत्पूजया परं सर्वे मुक्ता इत्यवधारणात् ॥५४॥ महादेवोपि तं दृष्ट्वा तुष्टो भवति मानवम् ॥ यो निरतः शिवपूजायाम् निरतः सर्वसाधनैः ॥५५॥ सकृद्वा प्रथमे यस्तु शङ्करस्य भक्ति पूर्वकम् ॥ तस्य पापानि नश्यन्ति सत्यं पुरुषर्षभः ॥५६॥ धन्यं कृतार्थं तं मन्ये कृतकृत्यं नरोत्तमम् ॥ यः क्षणं वा महादेवं लिङ्गे पूजयति प्रभुम् ॥५७॥ भस्मोद्धूलितसर्वाङ्गः रुद्राक्षाभरणोचितः ॥ योऽर्चयति गौरीशं स घातकगणाश्रयः ॥५८॥ शिवार्चनाग्निसंदग्धाः पापपर्वतकोटयः ॥ तस्मात् शङ्कं यत्न लोकेऽस्मिन् सर्वथा नृपबालक ॥५९॥ भाग्याद् बुद्धिः प्रवृद्धिः स्याच्छ्रीमहादेवपूजने ॥ दुर्लभं दुर्लभं यस्माच्छ्रीमहादेवपूजनम् ॥६०॥ प्रातःकाले महादेवम् भस्मरुद्राक्षभूषणः ॥ अभ्यर्च्य लिङ्गरूपं मुच्यते नात्र संशयः ॥६१॥ कालत्रयेपि कर्तव्यम् शिवलिङ्गार्चनं बुधैः ॥ मध्ये मध्येऽपि कर्तव्यम् विरतिस्तस्य नोचिता ॥६२॥ यस्य स्याद्विरतिर्दैवात् श्रीमहादेवपूजने ॥ स न संसारपापेभ्यो मुच्यते नात्र संशयः ॥६३॥ पापार्णवसमाकीर्णो न लिङ्गार्चनतत्परः ॥ लिङ्गार्चनपरित्यागात्पुनः पापी भविष्यति ॥६४॥ शिवलिङ्गार्चकं मन्ये महापातकनाशकम् ॥ तन्न जानन्ति सहसा मूर्खमानवृत्तयः ॥६५॥ स्यान्नराणां पुण्यानि बहूनि विविधान्यपि ॥ तेषामेव भवेच्छ्रद्धा शिवलिङ्गसमर्चने ॥६६॥ शिवार्चनेन यस्यास्ति विश्वासो मुक्तिदायकः स वेदबाह्य इत्येव ज्ञातव्यो मुनिभिः सदा ॥६७॥ शिवार्चनं विना भूप न पेयं जलमादरात् ॥ न भोक्तव्यं सहसा न ताम्बूलस्य चर्वणम् ॥६८॥ यद्देवसोपभोगार्थं पवित्रं वस्तु तन्मुदा ॥ निवेद्य शम्भवे पश्चात् स्वभोगाय प्रकल्पयेत् ॥६९॥ येन भोग्योपकरणम् न शिवाय समर्पितम् ॥ स नारकीति विज्ञेयः स पामरनरो यतः ॥७०॥ शिवविज्ञानहीना ये ते सर्वे पामरा नराः ॥ वानरा एव ते तावत् सर्वेऽपि नरकाकराः ॥७१॥ अशैवस्पृष्टिः कथयते वा नरकपातनम् ॥ करोत्येव सदा कालः कालभेदेन केवलम् ॥७२॥ कालकालार्चनं त्यक्त्वा यः संचरति केवलम् ॥ तं कालदूताः पश्यन्ति मुहुरेव महोद्धताः ॥७३॥ पातनीयो मया यत्नादयं नरकसागरे ॥ सर्वथेति वदन्त-

नृप च स्यो

५३

स्ते प्रधावन्ति मुहुर्मुहुः ॥ ७४ ॥ शङ्करानर्चकस्यास्य कदा वा मरणं भवेत् ॥ कदा नेष्यन्ति प्रायः प्रचरन्ति प्रतिक्षणम् ॥ ७५ ॥ आयुरस्याखिलं क्षीणम् शिवानर्चनतस्त
ततः अयं नेयो महाघोरे कुम्भीपाके निपात्यते ॥ ७६ ॥ अयं दुरात्मा दुर्वृत्तः शिवानर्चनतत्परः ॥ एतदर्थं मया सृष्टा तप्तायसमयं खलाः ॥ ७७ ॥ संतप्तैश्चायसस्तम्भै
रशैवांस्तस्तु मुद्गरैः ॥ वयं संताडयिष्यामो मुहुरस्य न संशयः ॥ ७८ ॥ पूर्वं यमपुरी सर्वा शून्या जाता ततः परम् ॥ अशैवैरेव सम्पूर्णा सा तद्वासाय कल्पिता ॥ ७९ ॥ अशै
व सस्नत्वेन कुंभीपाकं नहन्त्यतः ॥ तत्राशैवाः प्रयत्नेन नेयास्त्वेव न संशयः ॥ ८० ॥ अशाम्भवास्तु पापिष्ठाः सर्वे विष्ठालयेष्वपि ॥ तैलेषु पातनीयास्ते न त्याज्याः सर्वथा मया
८१ ॥ सन्तप्तमूत्रकुण्डेषु शिवार्चनविवर्जिताः ॥ पातिष्यन्ति न सन्देहस्तेषां स्थानानि तान्यपि ॥ ८२ ॥ यानि यान्यतिदुष्टानि स्थानानि यममन्दिरे ॥ तानि स्थानानि सृष्टानि शै-
वान्यस्य दुरात्मनः ॥ ८३ ॥ पूयकुण्डानि तप्तानि रेतसा संयुतान्यपि ॥ अशैवार्थं निर्मितानि यमेनैव महात्मना ॥ ८४ ॥ सर्वथा पापनुत्त्वेन रक्षणीयाः प्रयत्नतः ॥ अशैवानान्तु नत-
थाते घोरनरकाश्रयाः ॥ ८५ ॥ किन्त्वावासस्तु यो येषां तेषां मिते निश्चयात् ॥ अशैवानां निवासाय कृतं नरकमन्दिरम् ॥ ८६ ॥ संतप्तभिण्डिपालानाम् कुण्डेषु विनिपा
तिताः ॥ अशैवास्तु मया पूर्वं ते तिष्ठन्त्यधुनापि हि ॥ ८७ ॥ ते तावन्न मया त्याज्याः कल्पान्तेऽपि न संशयः ॥ अहन्तद्दुःखदानाय विधिना सृष्ट इत्यतः ॥ ८८ ॥ इत्थम्
यमभटाः सर्वे प्रवदन्ति हसन्ति च ॥ अशैवा लोकनेनैव वंवारव पुरःसरम् ॥ ८९ ॥ अतः कुरु प्रयत्नेन लिङ्गे शङ्करपूजनम् ॥ लिङ्गार्चने कृते भीतिर्न मृत्योरपि जायते ॥
९० ॥ मृत्युर्बिभ्यति भीतास्ते कालस्यापि भटाः सदा मृत्युञ्जयार्चकं दृष्ट्वा जलैरपि फलैरपि ॥ ९१ ॥ कल्याणान्यनुधावन्ति कल्याणपतिपूजया ॥ सर्वकल्याणना
थोऽयम् मंगलापतिरीश्वरः ॥ ९२ ॥ स सर्वमंगलाकान्तः सर्वमङ्गलसंश्रयः ॥ सर्वमङ्गलदाता च शिवभक्ताय केवलम् ॥ ९३ ॥ आलस्येनापि यः कुर्यान्मह

देवस्य पूजनम् ॥ स तरत्येव संसारान्महापङ्कोरसागरात् ॥ ९४ ॥ मूलमन्त्रमहेशस्य पूजनं शांभवस्य तु ॥ अर्घांभवानां कठिनन्तज्ञानधिकृतोऽपि सः ॥ ९५ ॥ शैवत्व
मङ्गं शिवपूजनेषु मुख्यं न तेनापि विना शिवार्चा ॥ अन्यच्च तत्साधनमस्तु तत्तु मुख्यं तदेवेत्यवधारितं हि ॥ ९६ ॥ तेनाधिकारे सति सर्वदापि शिवार्चनं तेन कृत
म्प्रयत्नात् ॥ सर्वार्थसिद्धै भवतीति मन्ये स एव धन्यो भुवनत्रयेऽपि ॥ ९७ ॥ शैवेन दत्तं फलमंबु पत्रं शुष्कं नवं वाप्यदितं क्षतं वा ॥ गृह्णाति शम्भुः शिरसा ददा
ति तस्मै फलान्यमि यामितानि नित्यम् ॥ ९८ ॥ यो विश्वस्य महेश्वरं त्रिनयनम् लिङ्गे समभ्यर्चयेद्भक्त्या भूति विभूषितोऽतिमुदितो रुद्राक्षभूषान्वयः ॥ तत्पादा
म्बुजरेणुभिर्जगदिदं पूतं सुराः पावनाः ॥ सर्वे विष्णुचतुर्मुखप्रभृतयः तस्मात्स धन्यः सदा ॥ ९९ ॥ इति श्री शिवरहस्ये तृतीयांशे हराख्ये उत्तरार्धे पञ्चमोऽध्यायः
॥ ५ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीकाशीविश्वेश्वरसमर्पणमस्तु ॥ श्री याज्ञवल्क्य उवाच ॥ इति तद्वचनं श्रुत्वा प्रहृष्टः सोऽपि बालकः ॥ महाविद्यां प्रपद्ये
ति प्रयतो नृपनन्दनः ॥ २ ॥ महाविद्याप्रदानेन कृतार्थं कुरु मां गुरो ॥ शिवविज्ञानसम्पन्नो गुरुर्दुर्लभ एव हि ॥ २ ॥ सर्ववेदान्ततत्त्वज्ञः त्वं मह्यं मुनिसत्तम ॥ शिव
530

विद्यां प्रदायैव कृतार्थं कुरु मां गुरो ॥ ३ ॥ उपदिष्टा महाविद्या यदि सत्गुरुणा तदा ॥ मोक्षोपयुक्ता सा तावद्भवतीत्येव मे मतिः ॥ ४ ॥ मद्दृष्टवशेनैव तवात्राद्य समागमः
मय्यस्त्वनुग्रहः शंभोरित्यनेन मितं खलु ॥ ५ ॥ यद्यद्य शाम्भवीं विद्यां मह्यं दास्यति सादरम् ॥ तदा स्याज्जलपानं मे दूरे भोजनमस्य तु ॥ ६ ॥ यमसिंहासने वार्ता संस्थि
तेन मया श्रुता ॥ तां वार्तामधुना वक्ष्ये शृणु नारद सादरम् ॥ ७ ॥ मयि तत्रास्थिते कोऽपि समानीतो भटैस्तदा ॥ तं दृष्ट्वा प्राह कालोऽपि चित्रगुप्तं महामतिम् ॥ ८ ॥
किमनेन महाविद्या प्राप्ता नेत्याति सत्वरम् ॥ ततस्तेनापि न प्राप्ता सा विद्येत्युक्तमादरात् ॥ ९ ॥ ततः परं यमः क्रूरः तं दृष्ट्वा भीमशासनः ॥ कोपाग्निना परं दग्ध्वा नश्य

शिवरह०३
१५

न्तः कोपसंकुलः ॥१०॥ ततस्तं प्रेषयामास कुम्भीपाकाय सादरम् ॥ पच्यतां ताड्यतां तीव्रैरग्निशस्त्रैर्मुहुर्मुहुः ॥११॥ न प्राप्ता शाम्भवी विद्या तेन तावद्दुरात्मना ॥ अतस्ते
नैव तद्दुःखमशेवः प्रापदुर्मतिः ॥१२॥ शिवविद्याविनिर्मुक्तो न मुक्तो भवति ध्रुवम् ॥ तयैव विद्यया [illegible] पूर्वं गणत्वं प्राप्त मास्तिकैः ॥१३॥ शिवविद्यामनुप्राप्य शिवार्च
नपरो यदि ॥ तदा संसारमोक्षः स्यादिति श्रुतमनेकधा ॥१४॥ शैवविद्यासमाना तु न विद्या सर्वथेत्यपि ॥ वदन्ति वेदवेदान्तपारगाः शिवपूजकाः ॥१५॥ मदीयेनैव भा
ग्येन त्वया तावदिहागतम् ॥ अतः परं शैवविद्याप्रदानं कुरु सादरम् ॥१६॥ इति तद्वचनं श्रुत्वा राजा सन्तुष्टमानसः ॥ कोऽयं नारद तत्वज्ञ किञ्च किं नास्य सूतकम् ॥१७॥
नारद उवाच ॥ शिवार्चनप्रभावेन तत्वज्ञोऽयं नृपोत्तम ॥ न चास्य सूतकं नापि शोकमागन्तुकं नृप ॥१८॥ स्वत एव विशुद्धात्मा शिवपूजापरायणः ॥ अतोऽस्य शो
ककर्माणि शंकितान्यपि न ध्रुवम् ॥१९॥ यस्य देहाभिमानोऽस्ति गौरहम् इति धीरपि ॥ तस्य शौचं न तत्वज्ञः सूतकीत्यवधारय ॥२०॥ एतस्य पुण्यपुञ्जस्य दर्शनादपि
सर्वथा ॥ अशुचिश्च शुचिर्नूनं मस्याशौचं न सर्वथा ॥२१॥ शिवभक्तिविहीनास्युरशौचा एव सर्वदा ॥ मरणान्तं तदाशौचं मरणानन्तरं च तत् ॥२२॥ अशु
चिर्वा शुचिर्वापि यः स्मरेद्गिरिजापतिम् ॥ स शुचिस्तेन युक्तोऽपि शुचिर्भवति सर्वथा ॥२३॥ अशुचित्वं तावदेव यावन्नैव स्मृतः शिवः ॥ स्मृते शिवे शुचिः
सद्यो ह्यन्यापेक्षा ततस्तु न ॥२४॥ यः शैवस्मरणोद्युक्तः सोऽपि यावन पावनः ॥ शुचिः स्मृतः शिवो मर्त्यः तत्राप्यस्ति किमद्भुतम् ॥२५॥ शैवप्रभाव
मज्ञाता नित्यसूतकि[illegible]ताङ्गताः ॥ सर्वकर्मपरिभ्रष्टाः ते यान्ति नरकं ध्रुवम् ॥२६॥ इति तद्वचनं श्रुत्वा राजा सन्तुष्टमानसः ॥ शिवदीक्षासमार
म्भमहोत्साहसमन्वितः ॥२७॥ अलङ्कृत्य महेशस्य मण्डपं रत्नमण्डितम् ॥ पुष्पमाल्यादिभिर्वस्त्रैः विविधैस्तोरणैरपि ॥२८॥ महादेव

ह०उत०उ०
अ०६

सद्य एव महापूजां कृत्वा स्नानादि पूर्वकम्॥ जातकर्मादिकं सर्वं समाप्य स तु भूपतिः॥२९॥ नाभिनालस्य विच्छेदं कृत्वा बालस्य भूपतिः॥ स्नापयामास तं बालं शिवतीर्थै-
र्मनोहरैः॥३०॥ भूत्या रुद्राक्षमालाभिरलङ्कृत्य प्रयत्नतः॥ कलशस्थापनं कृत्वा हुत्वा वह्नौ घृतादिभिः॥३१॥ शिवमन्त्रैर्धर्मरूपैः पञ्चाक्षरपुरःसरैः॥ गृहीत्वा
बालकं राजा गत्वा शङ्करमन्दिरम्॥३२॥ स्वयं सम्पूज्य विधिवन्महादेवं स्वसाधनैः॥ पूजयित्वा सुनैवेद्यैः भक्ष्यैरपि फलादिभिः॥३३॥ कारयित्वा बालकेन पूजाद्र-
व्यैर्मनोहरैः॥ लिङ्गमूर्तिं महेशस्य नृपः सन्तोषमाप सः॥३४॥ ततः परं नारदो ऽपि भस्मस्नानादिना शुचिः॥ ददौ दीक्षां बालकाय नवनीतादिभिर्मुदा॥३५॥ ततः परां महाविद्यां
शैवीं पञ्चाक्षरात्मिकाम्॥ ददौ स्मृत्वा महादेवं पार्वतीं गणनायकम्॥३६॥ स्कन्दञ्च वीरभद्रञ्च स्मृत्वा श्रीकालभैरवम्॥ नन्दिकेशादिकैः सर्वान् महाशिवगणा-
नपि॥३७॥ शैवीं विद्यां स सम्प्राप्य रराज स तु बालकः॥ ततस्तद्देहतः कापि पापमूर्तिर्विनिर्गता॥३८॥ मषीवर्णा वक्रदन्ता वक्रपृष्ठभुजान्तरा वक्रकर्णा काकनेत्रा
दीर्घोदग्धशिरोरुहा॥३९॥ तं दृष्ट्वा स तु भूपालो भीतो नारदमाह तु॥ केयमित्यति भीत्यैव मन्दं गद्गदवाक्तदा॥४०॥ नारद उवाच॥ पापमूर्तिरियं भूप बाल-
देहाद्विनिर्गता॥ शिवविद्याग्निसंदग्धा नारकं देहमाश्रिता॥४१॥ ततः परं पापमूर्तिस्तमुवाच महामुनिम्॥ क्व गन्तव्यं मया स्वामिन् स्थिता तद्देहमाश्रिता
४२॥ शिवविद्याप्रदीप्तासिर्या तया तत्तनुरवृता। अतः परमवस्थानमत्र मे दुर्लभं खलु॥४३॥ इति तद्वचनं श्रुत्वा राजा विस्मयमागतः॥ बालो ऽपि राजकीयाश्च
मन्त्रिणो ऽपि द्विजा अपि॥४४॥ तामाह नारदो धीरः प्रवृद्धाञ्च प्रतिक्षणम्॥ यमालयमितो याहि याहि सत्वरमित्यपि॥४५॥ एतद्देशे त्वया तावन्न स्थेयं दुर्मु-
खे व्रज॥ इति तद्वचनं श्रुत्वा [illegible] पापमूर्तिरुवाच तम्॥४६॥ पापमूर्तिरुवाच॥ त्वत्तो ऽपि मुनिश्रेष्ठ शरणागतवत्सल

539

शि०रह०३
१६

ह०त०उ०
अ०६

अपावनानामनिशं पावनत्वं त्वदीक्षयात् ॥४७॥ दृष्टेऽपि शाम्भवे दैवात्पापशङ्का कथं भवेत् ॥ पवित्राणां पवित्रत्वं [illegible] ॥ मनयेक्षितमेवहि ॥४८॥
हर मुने मुदा
अपवित्रे पवित्रत्वं कर्तुं शक्तिस्तवाधुना ॥ अतः पावय मां दीनां सद्यः मुनिसत्तम ॥४९॥ स्थितमेनं समाश्रित्य बहुकालं मया मुने ॥ अपारकल्पगणना कर्तुमेव न श-
ए
क्यते ॥५०॥ अनेन सहवासोऽपि नरके सुकृतो मया ॥ अनन्तब्रह्मकल्पेषु तेषां तु गणनापि न ॥५१॥ प्रतिजन्मानि पापानि कृत्वायं मुहुर्मुहुः ॥ नरकेषु पतत्येव लज्जाना-
स्याभवन्मुने ॥५२॥ न शिवार्चनवार्तापि श्रुतानेन प्रयत्नतः ॥ शिवार्चकैर्न सङ्गोऽपि कृतो मङ्गलदायकः ॥५३॥ दूरतोऽपि न दृष्टास्तेषां भयाग्रेसराः परम् ॥ अनेन
मन्दिरं न दृष्टं न कदापि शिवस्य तु ॥५४॥ न प्रासाद प्रकारो वा प्राकारो वा शिवस्य तु ॥ रथोत्सवोऽपि न रथो दृष्टोऽनेन दुरात्मना ॥५५॥ अटनं दुष्टगेहेषु कृतमेते-
न सर्वदा ॥ नीचसम्भावयेनैव कालो नीतो दुरात्मना ॥५६॥ शिवनाम न जानाति सोऽयं शुनकसन्निभः ॥ श्वानि[illegible] योनिषु सङ्गोऽपि कृतोऽनेन दुरात्मना ॥५७॥ नरो
विसूकरीं योनिम् गार्दभीं योनिमन्वहम् ॥ आश्रित्यैव स्थितः सोऽयमति कामातुरो मुने ॥५८॥ नाना व्रणो व्याधिभिश्च पीडितः क्षुधितोऽप्ययम् ॥ शुनीं रेमे सूकरीञ्च गार्द-
भीमपि कोटिशः ॥५९॥ ब्राह्मण्यमपि सम्प्राप्य महापातककोटिभिः ॥ समाक्रान्तो यातनाश्च भुक्त्वायं स्थित एव हि ॥६०॥ स्मार्तं वा वैदिकं कर्म नानेन ज्ञातमेव हि ॥ नास्य
पुण्ये रतिर्जाता कदापि मुनिसत्तम ॥६१॥ यद्यत्कृतं पुरा पापम् तेन पापम्पुनः पुनः ॥ पुनः पापे पुनः पापमर्जितं गणनाप्यन ॥६२॥ भूपांसुगणनापि स्यात् कदापि
न्मुनिसत्तम ॥ न चैतत्पापगणनां कर्तुं शक्तो यमोऽपि सः ॥६३॥ चित्रगुप्तादयः शान्तास्तत्पापामितशङ्कया ॥ यमदूताः परिश्रान्ताः स्ताडनेनास्य कोटिशः ॥६४
भिण्डि
छिन्नानिभूपालानि शस्त्राणि त्रुटितान्यपि ॥ एतद्देहाभिघातेन सर्वदा यममन्दिरे ॥६५॥ पुनर्जनिः पुनर्मृत्युः पुनश्च यमयातना ॥ एवञ्जन्मानि नीतानि कष्ट

दान्येवकोटिशः॥६६॥ पापनाशाकरंकर्मनज्ञातंनकृतंमुने॥ पातकंतुपरंज्ञातंकृतंचमुहुरादरात्॥६७॥ भूभारभूतएवायंपापराशिसमाश्रयः॥ नपापरा
शिगणनापापानांगणनाकुतः॥ तानिसर्वाणिपापानिसायंशंकरदर्शनात्॥ नष्टानिनार्जितंपुण्यंतद्भिन्नंमुनिसत्तम॥६९॥ देहारंभकपापानांमूर्ति
रेषाक्षयास्यति॥ एतस्यनाशःकेनस्यात्कदावातद्वदाधुना॥७०॥ इदंचरममेतस्यशरीरमितिनिश्चितं॥ अतःपरमनेनस्यात्संगोप्यत्यंतदुर्लभः
॥७१॥ दुष्टेविषतरोर्मध्येयथाकीटःस्थितःसदा॥ तथास्थितंमयादेहेबालस्यास्यमुनीश्वर॥७२॥ यानिकीटशरीराणिकीटकेष्वस्यतेष्वपि॥
मयास्थितंपापभोगैःकेवलंनीयतेदिनं॥७३॥ किंचैतज्जननादत्रशांभवन्याप्नुतामहो॥ भविष्यतिमयाकुत्रस्थानव्यंतद्वदाधुना॥ नपापिष्टशरी
राणिराष्ट्रेस्मिन्मुनिपुंगव॥ इतोबहिर्विगमनंममशक्यंनसर्वथा॥७५॥ शांभवाग्रेसरेदृष्टेभीतिरस्याःप्रजायते॥ पलायनंचसहसानभविष्यति
सर्वथा॥७६॥ मुक्तिःसंपादनीयामेभूतिदानेनकेवलं॥ विभूतिःपापमूर्तीनांनाशायाशुप्रजायते॥७७॥ विभूतिधारणादेवमुक्ताःपूर्वमुनीश्वराः
॥प्राप्तंमुनिश्वरत्वंचकेवलंभूतिधारणात्॥७८॥ नभूतिसदृशंवस्तुभूतिर्दत्वेनकीर्तितं॥७९॥ भूतिर्विभूषणंयेषांतेभूतपतिसेवनं॥ कृत्वामुक्तिप
तिंयांतिमहादेवंकृपानिधिं॥८०॥ भूतिप्रभावोनज्ञातःकेनापिभुविसर्वथा॥ अतःसंसारभारेणभवंत्येवातिपिडिताः॥८१॥ अलौकिकंलौकि
कंवास्वतोभस्मातिपावनं॥ तत्पावयतिपापिष्ठवरिष्ठान्दुष्टचेतनान्॥८२॥ भस्मस्मृत्वापिमुच्यंतेभक्त्यापरमपावनं॥ महाभस्मप्रियंभस्मत
द्भस्मातीवदुर्लभं॥८३॥ पापानांभर्त्सनाद्भस्मभासनादीश्वरस्यच॥ तद्भस्मदेयंतेनैवममुक्तिर्भविष्यति॥८४॥ भवंतंगुरुमासाद्यभवत्करतला

न्वितं॥ भस्मादाय गृहीत्वाद्यमुक्तैवाहं भवाम्यहो॥८५॥ महानुभावो यो भाक्तस्वभावेन स्वभावतां॥ संपादस्य भावस्याप्येतचित्रं न वस्तुतः॥ ॥८६॥ इति तद्वचनं श्रुत्वा कृपालुरपि नारदः॥ कृते भूतिः कृते मुक्तिः भुक्तिर्वार्त्तापि दूरतः॥८७॥ त्वया निष्ठुर मत्रोक्तं बालकस्य महात्मनः॥ शिवविद्यादीक्षितोयं अत्र त्वपापसाधनं॥८८॥ यस्यास्ति शैव विद्यायां बुद्धिः सोपि महान्खलु॥ तत्र निष्ठुर मुक्त्वां तेन नरकं याति सर्वथा॥८९॥ अज्ञानेन प्रमादाद्वा प्रसंगाद्वा कदाचन॥ शिवज्ञानान्वितं दृष्ट्वा न नमेद्यः स पापधीः॥९०॥ शैव विद्यादूषकानां नरके वसतिः खलु॥ अतः परं त्वयाप्याशु गंतव्यं नरके ध्रुवं॥९१॥ शैव दीक्षापूतदेहः पुण्यपुंज इति स्मृतः॥ तत्र निष्ठुर मुक्त्वा ते यांते च नरकं ध्रुवं॥९२॥ विभुतिधारणे भक्तिः शांकरे शंकरे पिवा॥ यस्य स्यात्स तु मुक्तः स्यादन्यस्य तु न सा खलु॥९३॥ भस्मधारणपूतात्माथः पूतः शिवविद्यया॥ स एव तावद्दुष्कृष्टं तत्रेष्टं चेष्टभाषणं॥९४॥ शिवविद्यादीक्षितेषु विनयेनानुवर्त्तनं॥ सर्वपापविनाशाय स ह्य एव प्रजायते॥९५॥ शिवविद्यामणिः कंठे यदा यस्याधितिष्ठति॥ तदा तद्वशमायांति सर्वे ब्रम्हादयः सुराः॥९६॥ कल्पांतवन्हिरूपस्य बालस्यास्याधुना मया॥ तेजो न शक्यते सोढुं निष्ठुरोक्तिस्तु दूरतः॥ यस्तु स्वापेक्षया नीचः तत्र निष्ठुर भाषणं॥ कदाचिदुचितं तत्राप्युचितं तत्कथं सदा॥९८॥ स्वादिष्ठानां रसनां प्राप्य निष्ठुरं यो वदिष्यति॥ स नारकी ति विज्ञेयः तद्यतः पापसाधनं॥ ॥९९॥ शिवनामोच्चारणाय सृष्टा जिव्हा विशेषतः॥ ततस्तया निष्ठुरोक्तिरयुक्ता देहिनां खलु॥१००॥ मधुरान्मधुरं मनोहरं सुकरं शंकरनामकेवलं॥ वदति श्रुतभूतिपावनो मधुरास्वादनलोलजिव्हया॥१॥ मधुरोक्तिभिरेव तोषणं मधुरालापसुधारसज्ञया॥ अनया खलु जिव्हया मुहुः शिव

नामामृतपावनमीप्सितं ॥२॥ आरोग्यं परमायुरुन्नमम तिः सौभाग्यवृद्धिर्यशः श्रेयोरूपमुदारतारतिसुखं संतानवृद्धिर्मुहुः ॥ कांतिः शौर्यमपारशत्रुवि
जयेविद्यापिसंप्राप्यते ॥ नित्यं शंकरपूजया शिवमहाविद्यावता सर्वथा ॥१०३॥ इति श्रीशिवरहस्ये हराख्ये तृतीयांशे उत्तरखंडे याज्ञवल्क्य
जनकसंवादो नाम षष्ठोऽध्यायः ॥६॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ याज्ञवल्क्य उवाच ॥ इत्युदिरितमाकर्ण्य पापमूर्त्तिरुवा
चतं ॥ कृतार्थं कुरु मां दीनां दीनबंधो महामुने ॥१॥ अज्ञानेनापराधेन करणेपि मुहुर्मुहुः ॥ क्षंतव्यास्ते महाभाग क्षमायुक्ता महामनाः ॥२॥
कृपापराधे कुर्वंति करुणां दीनवत्सलाः ॥ तदभावे तयोः किं वा मुने करुणया वद ॥३॥ यमोपि करुणाहीनः करोति करुणां खलु ॥ कदाचिदिति मे ता
वतु अपराधं प्रणश्यतु ॥४॥ अपारपापनाशे चेत्सामर्थ्ये तर्हि किं मम ॥ अपराधापसरणे न शक्तिः शांभवोस्य ते ॥५॥ क्षणं वायेन सल्लापः शांभवे
न सहादरात् ॥ कृतस्तस्याघविलयो भवंतीत्यपि निश्चितं ॥६॥ पापराशिविनाशाय शांभवांगानिलोप्यलं ॥ गंगातरंगानिलवद्विशेषोन तयोर्मतः ॥
॥७॥ शैवांगालोकनं भक्त्या सकृद्वा यः करिष्यति ॥ सपूतः कृतकृत्यश्च तत्पुण्यममितं खलु ॥८॥ शांगांगसंगः खलु दुर्लभोत्र लोकोत्तरः पावनपा
वनोयं ॥ त्वं शैवविद्यानिधिरेव साक्षान्निधानलाभे सुखमेव नूनं ॥९॥ लब्ध्वा निधानानि भवंति लोके बहूनि तावत्सु सुविनस्तथा च ॥ अनेक
शांगांगसमागमेन लभ्या सुखानां न परंपरा किं ॥१०॥ किं चाधुनासं निहितः शिवोत्र लिंगेषु तुंगेषु मनोहरेषु ॥ तद्दर्शनादेव विमुक्तिरद्यजा
ता ममेति प्रमितिः प्रवृत्ता ॥११॥ अतः परं देहविसर्जनाय तावद्विलंबोस्तु ततस्तु किं मे ॥ किं चाधुना लिंगशरीरनाशो लिंगेषु दृष्टेष्वधुनैव वृत्तः ॥१२॥

लिंगानि दृष्टानि यदैव येन तदैव पापानि लयं गतानि ॥ गतेषु पापेषु न लिंगदेहः पापानुबंधः खलु लिंगदेहः ॥१३॥ यदिंदुमौलिस्थलमात्रमेव दृष्टं महाघप्रलयाय शक्तं ॥ अतः परं लिंग विलोकनेन पापस्वरूपात्म भयं भवाब्धौ ॥१४॥ भाग्यानि लिंगानि विलोकनेन नश्यंति तावद्विलयस्य वीजं ॥ तदेव यस्मादिति निश्चयं हि लिंगेषु दृष्टेषु सुखानि नूनं ॥१५॥ सुखानि लिंगप्रभवानि तानि लिंगाद्भवं स्येयविलोकनेन ॥ अतः परं मे सुखसंततिः स्यादत्रांतरायस्तु न सर्वथापि ॥१६॥ शांगांगसंगस्त्वतिदुर्लभो हि लिंगानुषंगे तदपेक्षयाहि ॥ दैवाद्द्वयोरत्र समागमेन पुनः पुनस्यात्सुखकल्पवल्ली ॥१७॥ शांगानि लिंगानि चराणि यानि स्थिराणि तेषामवलोकनेन ॥ आनंदराशिः समुदेति नूनमतः कुतस्याद्भयराशिभीतिः ॥१८॥ इति तद्वचनं श्रुत्वा नारदो लष्टमानसः ददौ भूतिकणांस्तस्यै तदा तल्लिंगमंडपे ॥१९॥ द्वित्रैरपि पवित्रैस्तैर्युता भस्मकणैः क्षणात् ॥ तत्याज तां तनुं घोरां कुरूपां कुत्सितामपि ॥२०॥ ततः पापशरीरस्य नाशे तद्देहदेवता ॥ तद्भूतिकणयोगेन दिव्यं रूपमवाप च ॥२१॥ सूर्यमंडलसंकाशां तनुं प्राप्य मनोहरां ॥ पौरुषं रूपमासाद्य बभौ विस्मापयन्नृजनं ॥२२॥ ततो विभूतिपूतांगो रुद्राक्षाभरणान्वितः ॥ प्रणम्य दंडवद्भूमौ पूजयामास शंकरं ॥२३॥ ततस्तं पुरुषं दृष्ट्वा भूपालः प्रीतमानसः ॥ पूर्वं पूर्वभये कोयं तद्वदेत्याह नारदं ॥२४॥ नारद उवाच ॥ दृष्टता त्वया राजन्नतिविस्मय साधनी ॥ शिवविद्याप्रभावोपि ज्ञातः खलु विशेषतः ॥२५॥ राजन्ना दयः सर्वे जीवास्तावद्विशेषतः ॥ जीवानां देहभेदोपि नटस्येवानुवर्तते ॥२६॥ नटो बहूनि रूपाणि गृण्हात्त्येकस्तथा खलु ॥ देहद्वयं समासाद्य सर्वदाप्यधितिष्ठति ॥२७॥ भिन्ना लिंगशरीरस्यैव

ताकाचिदेवसा॥ देवता स्थूलदेहस्य सापिभिन्नैव तिष्ठति॥२८॥ स्थूलदेहस्य विलये लिंगदेहोनुवर्त्तते॥ लिंगदेहलयस्तावन्मुक्तिकाले प्रजायते॥२९॥ द्विविधो मुक्तिकालेपि जीवन्मुक्तिरिहापरा॥ ज्ञेया परममुक्तिस्मा सर्वथा सा विलक्षणा॥३०॥ जीवन्मुक्तिदशायां च शिवयिद्याप्रभावतः॥ लिंगदेहविनाशोपि कस्यचिज्जायते नृप॥३१॥ लिंगदेहाभिमानोपि भूतिसंगाद्विनश्यति॥ तद्देहदेवतायाश्च तद्विनाशेन केवलं॥३२॥ तपसा देवतारम्यं धृत्वा देहं विशेषतः॥ स्वेच्छया चरति प्रीत्या सत्यलोकादिषु ध्रुवं॥३३॥ अतः परमयं तावत्पुरुषो भूतिपावनः॥ शिवनामानुसंधानसुधायां निरतो भवेत्॥३४॥ अतः परं न देहेषु स्पृहाप्यस्य भविष्यति॥ अयं देहः पुण्यरूपो यत्रकुत्रापि संचरेत्॥३५॥ संचरेच्छिवनामानि गायन्नेवमुहुर्मुहुः॥ पापदेहस्य विलयेन पुनः पापसंगमः॥३६॥ पुरुष उवाच॥ दैवान्मया पापदेहः परित्यक्तः शिवाज्ञया॥ अतः परं न तस्यास्तु संगः सर्वात्मना मम॥ मुक्तोहं कृतकृत्योहं द्विजैर्भूतिकणैरपि॥ कृपादृष्टिर्महेशस्य देवदेवस्य शूलिनः॥३८॥ अतः परं न कालाद्या मम भीतिरतः परं॥ यत्रकुत्रापि संचारो लोकेषु विगतस्पृहः॥३९॥ अतः परं न चादानं न विसर्गोपि कुत्सिते॥ न प्रवृत्तिर्निवृत्तिश्च निर्गमास्थितिरेव वा॥४०॥ न कार्यं कारणं वास्य तदाकांक्षापि न ध्रुवं॥ न संगतिरसंगो वा स्वानंदानुभवे सति॥४१॥ महासांभवदत्तेन भस्मना लिंगदर्शनैः॥ प्राप्तमेतन्महद्भाग्यं दुर्लभं खलु सर्वथा॥४२॥ अनेककल्पपर्यंतं देहबंधः स्थितो मम॥ अतः परं जितं नूनं नष्टा संसारशृंखला॥ चिरं कुत्सितगर्भेषु स्थितं दुःखेन सर्वदा॥ निर्गतं कुत्सितेनैव योनिमार्गेण कोटिशः॥४४॥ सहस्रकोटिसंख्या

59/2

कयोनिमार्गविनिर्गमात्॥ भुक्तान्यपारदुःखानि तानिनातःपरंखलु॥४५॥ संगःसमभवद्योयं शांभवैःसहतेमने॥ संसारबंधमोक्षोभू
त्कृतकृत्यास्मिसर्वथा॥४६॥ नचब्रम्हत्व वांछामे विष्णुत्वंनाभिवांछितं॥ कालोनेयःप्रयत्नेन शिवनामानुगायनैः॥४७॥ सितभस्मस्व
रूपेणसुधानिधिरुपागतः॥ तेननृप्तोस्मिसततं निवृत्ता तृषाममम॥४८॥ क्षुधयादग्धमुदरंतृषयापिपुनःपुनः॥ यांचादैन्यान्नभूत्यादिद
ग्धोदेहःपुराखलु॥४९॥ अकस्माद्देहसंबंधविश्लेषःकिमभून्मम॥ अहोकल्याणकालोयं कल्याणपतिदर्शनात्॥५०॥ ससर्वमंगला
क्रांतलिंगरूपेणभाग्यतः॥ दृष्टःकष्टविनाशायकोयमद्यमहोदयः॥५१॥ लिंगदर्शनकालोयंसमहाभ्युदयप्रदः॥ दुर्लभःसर्वकालेषुमह
तामपिदुर्लभः॥५२॥ अतःपरंयत्रयत्रशिवलिंगानितत्रमे॥ संचारःसुखदस्तत्रनिवासोपिकदाचन॥५३॥ शिवलिंगानिदृष्ट्वैवकालो
नेयोमयामुहुः॥ शिवार्चनंचकर्तव्यंप्रमादेनविनामया॥५४॥ शांभवैरेवसंगोपिकर्तव्यश्चपुनःपुनः॥ महादेवध्यानमेवैकर्तव्यंसत
तंमया॥५५॥ महादेवकथासिंधुर्यत्रयत्रप्रवर्धते॥ तत्रतत्रमयास्थेयंप्रमादेनविनाखलु॥५६॥ शिवस्थानपरित्यागोनकर्तव्योविशे
षतः॥ शिवतीर्थेषुसततंकर्तव्यमवगाहनं॥ शिवलिंगार्चनेनैवकालोनेयोमयामुहुः॥ शैवसंगपरित्यागेबुद्धिर्मास्तुममाधुना॥५८॥ अ
मृतत्वप्रापकानि शिवनामानिसंततं॥ जपनीयानियत्नेनतेनकालभयंकुतः॥५९॥ सौभाग्यभोगकालोयंसंप्रत्यस्यानुवर्तते॥ शिवप्र
सादादेतस्यवृद्धिरस्तुसदामम॥६०॥ देवोत्तमेमहादेवेभक्तिरव्यभिचारिणी॥ ममास्तुतावतानित्यंआनंदोपिप्रवर्धतां॥६१॥ अशैवमा

गेप्यप्रवृत्तिरतः परं तावदुमासहाय॥ भविष्यति प्रायश एव यस्मान्मयाप्ययं लिंगशरीरनाशः॥ कल्पावसाने खलु मुक्तिकाले भवेदयं लिंगशरीरना
शः॥ ममाधुना शांभव दत्तभूत्याद्तः परं लिंगशरीरनाशः॥६३॥ कष्टानि मे लिंगशरीरयोगाद्बहूनि दुःखान्यपि योनियोगे॥ तस्य प्रणाशे न तु योनि
योगो न यातना नापि शरीरबंधः॥ न शांभवानामपि संगमो मे कदापि पापक्षयहेतुभूतः॥ अद्याधुना दैववशात्सखे तः ते नास्मि तावत्कृतकृत्य एव॥
॥६४॥ कल्याणकालेयमुमासहायो दृष्टा यतः शांभवपुंगवाश्च॥ दृष्टाः समस्ते(ष्ट)निधानभूताः श्रीमन्महादेवकृपाकटाक्षैः॥६५॥ आनंदयात्पि दे
तुः शिवभजनरतामंदपादारविंदु॥ श्रीगंधं गंधवाहः स्पृशति जनिजरामृत्युदुःखापनुत्त्यै॥६६॥ आयात्याग त्यदेहं स्पृशति पुनरयं देवतानां च दे
हान्॥ मुक्तिं संपादयिष्यत्यपि सितभसितैः पूत एवानुवारं॥६७॥ इत्युदीरितमाकर्ण्य स राजा विस्मयं गतः॥ बालोपि विस्मयः पश्चात्तमेवाह सनार
दः॥६८॥ अद्यप्रभृति यत्नेन संवसात्रैव सर्वदा॥ कृत्वात्यंतप्रयत्नेन पिशाचानां निवारणं॥ बालग्रहादयः सर्वे वारणीयाः प्रयत्नतः॥ शाकिनी
डाकिनीमुख्यदुष्टग्रहसमन्विताः॥७०॥ सर्वदा कुरु यत्नेन महोत्पातनिवारणं॥ आधिव्याधिभयं चात्र निवारय विशेषतः॥७१॥ अत्युच्चैः कुरु य
त्नेन शिवनामानुगायनं॥ तावता न पिशाचानां प्रवेशोत्र भविष्यति॥७२॥ भस्मनां राशयः संति स्पृशतामनुवासरं॥ निर्माल्यं बिल्वपत्राणां
आघ्रायाघ्राय सादरं॥७३॥ दत्वा नैवेद्यमीशाय बलिदाने कृते सति॥ बलिनैवेद्यमासाद्य ~~क्रा~~ भुक्त्वा तुष्टो भवान्वहं॥७४॥ संसारबंधनाशाय शिवनैवेद्य
भोजनं॥ कल्पितं गिरिशेनेदं मंततो मुक्तिसाधनं॥७५॥ मुक्तिसाधनभूतेषु श्रेष्ठानि दश तानि तु॥ सेवनीयानि यत्नेन मुमुक्षुभिरहर्निशं॥७६॥

शिवतीर्थं विभूतिश्च रुद्राक्षाश्च शिवार्चकः॥ शिवलिंगं बिल्वपत्रं शिवनैवेद्यभोजनं॥७७॥ जपः पंचाक्षरस्यापि शैवस्यापि शिवार्चनं॥ सदा शि
वकथालापोप्येते दश विमुक्तिदाः॥७८॥ मुक्तिदं दशकं सेव्यं अप्रमादेन सादरं॥ एतस्मादधिकं नास्ति मुक्तिदत्वेन कीर्तितं॥७९॥ मुक्तिदेषु प्र
मादं यः करिष्यति विमोहतः॥ नरो न मुच्यते नूनं घोरसंसारसागरैः॥८०॥ भाग्याद्दन्यानुबंधाद्वा मुक्तिदं दशकं यदि॥ प्राप्तं तदा प्राप्तमेव शि
वं शिवपदं परं॥८१॥ न जानंति विमूढास्ते दशकं पापनाशकं॥ मुक्तिदं च ततो जन्म प्राप्नुवंति नराधमाः॥८२॥ मुक्तिदत्वेन विज्ञातं दशकं यो नु
कीर्तयेत्॥ सोपि मुक्तिमवाप्नोति तस्मात्तत्सेवनं परं॥८३॥ तत्सेवनं नित्यमेव तत्रैकमपि यस्त्यजेत्॥ स संसारी भवत्येव तस्मान्मुक्तिर्न सर्वथा॥
॥८४॥ मुक्तिकामैर्मुनिवरैः मुक्तिदं दशकं मुहुः॥ सेव्यते सेवया तस्य मुक्तिरेव भविष्यति॥८५॥ वेदेष्वप्ययमेवार्थो निश्चितो दशकात्मकः॥ सेव
नीया इति ज्ञात्वा तत्सेवानिरतो भव॥८६॥ यो न तद्दशकाभ्यासं करिष्यति पुनः पुनः॥ स वारणी यो नगराद्देशादपि विशेषतः॥८७॥ दशकाभ्या
सनिरताः सेवनीयाः प्रयत्नतः॥ तेषां यो दुःखदो मर्त्यः स याति नरकं ध्रुवं॥८८॥ दशकाभ्यासहीनानां नारकेष्वनिशं स्थितिः॥ तदर्थान्येव न
रकाण्यपाराणीति निश्चयः॥८९॥ दशकाभ्यासनिरताः सभाग्याः केवलं भुवि॥ तैरेवालंकृता भूमिः तदपेक्षां करोति सा॥९०॥ सर्वपापविनाशा
य दशकाभ्यासकार्चनं॥ कर्तव्यमतियत्नेन तेन मुक्तिश्च जायते॥९१॥ यो वा को वाति यत्नेन दशकाभ्यासनप्रियः॥ न तस्य गर्भवासः स्यान्न
रकोपि न सर्वथा॥९२॥ तदभ्यासे रतिस्तावद् शैवानां न जायते॥ अतस्ते दुःखसंवीताः सर्वेपि प्रतिजन्मनि॥९३॥ एतावदेव वक्तव्यं हिताय हि

तमादरात्॥ दशकाभ्यसनादन्यत्केवलं श्रमसाधनं॥१४॥ अनायासेन नाशः स्यात् पापानां दशकान्वयात्॥ अतः प्रयत्नतः सेव्यं दशकं मुक्तिकांक्षी

भिः॥१५॥ यन्मुक्तिदं दशकमस्ति तदेव तावत्संसारदुःखविनिवारकमित्यवैमि॥ तस्मात्तदन्वहमुपास्य मुमासहायस्तेनैव तावदघपंजरनाशकः

स्यात्॥१६॥ ॥इति श्री शिवरहस्ये हराख्ये तृतीयांशे उत्तरार्धे याज्ञवल्क्यजनकसंवादो नाम सप्तमोऽध्यायः॥७॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥

॥याज्ञवल्क्य उवाच॥ इति तद्वचनं श्रुत्वा प्रणतः सोपि नारदं॥ ओमित्युक्त्वा स्थितस्तत्र दिव्यवेषधरो नृप॥१॥ ततः परं बालकं च निरीक्ष्य नृपसत्तमः॥ नार

दं प्राह तत्त्वज्ञं शिवभक्तिरतं ततः॥२॥ ॥नृप उवाच॥ ॥अस्य भावी किमग्रेपि भाव्युक्तं मुनिसत्तम॥ किं यदायुः प्रमाणं च तत्सर्वमेव वदाधुना॥

॥३॥ नारद उवाच ॥अस्य कामानुसारेण जीवनं नृपसत्तम॥ इयत्तारहितं भाग्यमेतस्याग्रे भविष्यति॥४॥ स्थास्यंत्यस्य गृहद्वारि मत्तमातंग

कोटयः॥ मातंगमदधाराणां पूरैर्व्याप्ता धरा भवेत्॥५॥ सदा तुंगतुरंगाणां कोटयोपि गृहांगणे॥ स्थास्यंत्यस्य महीपालभूपालोयं भविष्यति॥

॥६॥ सौंदर्यनिधिरित्यस्य नाम नाम्नोर्थतोप्ययं॥ सौंदर्यनिधिरेवायं मन्मथापरविग्रहः॥७॥ अस्मिन्भूपालनोद्युक्ते शत्रुवार्तापि दूरतः॥ सु

वर्णरत्नकोशानां वृद्धिरस्य भविष्यति॥८॥ रत्नागारप्रभापूरैः इदं मंदिरमंडलं॥ मंडितं रमणीयं च भविष्यति नृपोत्तम॥९॥ गंधर्वरा

जनगरे विहाराय प्रयास्यति॥ तत्र भावि विवाहोस्य संभ्रमेण स्वयंवरे॥१०॥ गंधर्वकन्यकाः संति सह स्त्रं रतिविग्रहाः॥ अपूर्वकन्यका सृष्टि

रष्टमूर्तिकृता पुरा॥११॥ शांभवाग्रे सरः सोयं सर्वदा शिवपूजकः॥ शंकरार्चनधाराभिः अयं पूतो भविष्यति॥१२॥ यावज्जीवं श्रुतिस्तावद

नेनैवमहात्मना॥ सार्थंभविष्यतिप्रायस्तथानुष्ठानसंभवात्॥१३॥ अप्रामाण्यंचनास्यस्यादननुष्ठानलक्षणं॥ येनकेनाप्यनुष्ठानेनतस्य प्रामाण्यसंभवात्॥१४॥ पश्यपश्याधुनाभाग्यंएतस्यनृपसत्तम॥ शिवविद्यापिसंप्राप्ता ह्यनेनजन्मदिनेमुदा॥१५॥ केनजन्मदिनेप्राप्ता शिवविद्यापिमोक्षदा॥ अस्यपुण्यस्यनांतोऽस्तिभाग्यवानयमेवहि॥१६॥ अस्यपुत्राश्च बहवः शूराःपरमसुंदराः॥ भविष्यंतिशिवाचार निरताःशतमास्तिकाः॥१७॥ नचास्यरोगपिडास्यात्कदापिनृपसत्तम॥ अव्याहतगतिर्लोके लोकानामुपकारकः॥१८॥ एतद्दर्शनमात्रेण धन्याःकेचिन्महीपते॥ अनेनसहसंल्लापैःगमनागमनैरपि॥ एतादृशःशांभवस्तु नजातोनभविष्यति॥ अयंप्रतिदिनेवृद्धिं प्रयास्यति शिवार्चनात्॥२०॥ शिवार्चनजपुण्येनभाग्यमस्यभ्रमस्यभविष्यति॥ तस्यभाग्यस्यविलयोनभविष्यतिसर्वथा॥२१॥ किंचायंशिवसात्सर्वंकरिष्यतिधनंनृप॥ तेनपुण्येनकोशानांवृद्धिरेवक्षणेक्षणे॥२२॥ आयुषोवृद्धिरस्यस्यान्निरंतरशिवार्चनात्॥ धनधान्याभिवृद्धिश्चवृद्धिःस्यात्संततेरपि॥२३॥ राजोवाच॥ मुनिश्रेष्ठमहाभागनिरंतरशिवार्चनं॥ कथंभवतिमर्त्यानांनिद्रालस्यादिसंभवात्॥ ॥२४॥ नारदउवाच॥ जलधाराकल्पनीया शिवलिंगेशिवात्मके॥ मणीकःपुरणीयाश्च सुगंधैःशीतलैर्जलैः॥२५॥ शिवार्चकाःकल्पनीयाः शतशःशिवमंदिरे॥ कारणीयंयतैरेव शिवलिंगसमर्चनं॥२६॥ कस्यचित्स्यात्तदालस्यनिद्रापिस्यात्कदाचन॥ अनालस्यैःकारणीयं अन्यैरेवशिवार्चनं॥२७॥ तोषणीयाश्चतैरेतैःधनैर्गोभिर्गृहैरपि॥ शिवनैवेद्यदानैश्चदुकूलैर्भूषणैरपि॥२८॥ शिवनामानुसंधानकथाश्रवण

पूर्वकं॥कालो विनेयः सर्वोपि निद्रापि स्यात्कदाचन॥३०॥किं च मृत्युं सदा पश्यन् को वा निद्रां करिष्यति॥मृत्युभिया न निद्रापि भोजनेपि रतिः कुतः॥कदा
मरणमस्य स्यात्कदा वा यमयातना॥इत्येवं चिंतया किंच नियते दिनमासिकैः॥३१॥नास्तिकानां तथा जन्म तेषां न शिवपूजनं॥अतो मृत्युभयं तेषां
यातनाभयमन्वहं॥३२॥मृत्युं तरति मर्त्योपि महामृत्युंजयार्चनात्॥अतो मृत्युंजयो नित्यं पूज नीयः प्रयत्नतः॥३३॥मृत्युंजयार्चनेनैव यस्य
दायुषः क्षयः॥तदा तदायुः सफलं तदन्यं निष्फलं खलु॥३४॥पुरा किलायुर्मूर्तीनां समूहो युगपत्क्वचित्॥उपस्थितस्तदा तत्र यमोपि समुपागतः
॥३५॥अरन्लोकान्भटैः साकं रत्नामं च शोभयं॥मध्ये मध्ये नटन्नेव स्मरन्निटिललोचनं॥३६॥तदा तमागतं दृष्ट्वा यमं कंपमुपागताः
॥यमो दृष्ट्वैव ताः प्राह चित्रगुप्तं विचक्षणं॥३७॥ ॥यम उवाच॥आयुर्मूर्तिरियं भाति चंद्रवद्वानुवल्लभा॥इयं पावकवद्भाति सा विभाति
तथैव सा॥३८॥तारावद्भाति सा कापि भाति विद्युल्लतेव सा॥गाढांधकारवद्भाति सापि सा सापि सापि सा॥३९॥उल्कावद्भाति सा कापि का
पि सा कापि सापि सा॥सापि सा सापि सा सापि सापि सा सापि सापि सा॥४०॥परमानंदपूर्णा सा सापि सा सापि सापि सा॥४१॥सुस्मेरवद
ना कापि सापि सा०॥शिवगानरता कापि सापि सा०॥सापि सा सा॥४३॥आनंदाश्रुसमाकीर्णा कापि सा सापि सापि सा॥सापि सा सा०॥
॥४४॥रुद्रवीणां गृहीत्वा सा कापि गानं करोति सा॥सापि सा सा०॥४५॥सा नृत्यति विलासेन सापि सा सापि सा पि सा॥सापि सा सा०
॥४६॥ध्यानं करोति सा कापि मंदस्मेरा मनोहरा॥सापि०॥शिवनामा निजपति कापि सा सापि कापि सा॥सापि सा०॥४८॥विलोक्य द

र्पणंफालेत्रिपुंड्ररचनादरा॥ सापिसा०॥४९॥ रुद्राक्षमालिकाकायाकापिसासापिसापिसा०॥ सापि०॥५०॥ शिवलिंगार्चनरताबिल्व पल्लवकोटिभिः॥ सापिसा०॥५१॥ कापिसापिबतिप्रीत्यामहेश्वरकथासुधां॥५२॥ शिववार्तारसरसांदृष्ट्वादृष्टापिकापिसा॥ सापिसा० ॥५३॥ दृष्ट्वापूजितलिंगानिस्पृष्ट्वादृष्ट्वामुहुर्मुहुः॥ सापिसासापि०॥५४॥ साहर्षवर्षधाराभिराप्लुताशंकरस्मृतेः॥ कापिसासा०॥५५॥ अयंसमूहोह्यमनोहरोमेमहेश्वराराधनतत्परत्वात्॥ एतत्समूहानुविलोकनेनदिनानिनेयानिमयासदात्र॥५७॥ अद्याधुनाधन्यम भूद्दिनंमेशिवार्चकालोचनलोचनस्य॥ इदंचधन्यंममलोचनंचधन्यंपरंजीवनमस्यभाग्यं॥५८॥ अयंकथंमेचकराशितुल्यःसं घोरुदत्यश्रुजलाकुलोसौ॥ धिग्धिग्धिगापद्गुरायातिपीडाजातानिजातानिनजातुजाने॥५९॥ इतितद्वचनंश्रुत्वाचित्रगुप्तोपिवि स्मितः॥ विस्मापयन्यमंप्राहशृणुकौतुकमित्यपि॥६०॥ ॥चित्रगुप्तउवाच॥ शृणुशांभवसंघानांवार्ताश्रोत्रमनोहरां॥ यद्वार्ताश्रवणेनापिशिव भक्तिर्दृढाभवेत्॥६१॥ शांभवानामयंसंघःसुधाराशिरिवाधुना॥ दृष्टोप्यानंदपीयूषमयुरवान्जनयत्यहो॥६२॥ क्षणमप्यायुषोनास्यवैयर्थ्यं शिवपूजया॥ आयुःक्षीणमभूदस्यप्रतिक्षणशिवार्चनात्॥६३॥ सुधाधाराभिषेकेणशिवपूजाप्रतिक्षणं॥ तयाक्षणसहस्त्रांशोप्यस्यनाभूद्वृथा यम॥६४॥ तेनपुण्येनमहतानृत्यंतिप्रहसंतिच॥ लिंगपूजांचकुर्वंतिपुनःपुनरिहांतक॥६५॥ एतत्संघाश्रयाणांतुधनानिविविधान्यपि॥ जातानिशिवपूजार्थंतेनगायंतिकोटिशः॥६६॥ एतत्संघसमाश्रयामितधनैरभ्यर्चितःशंकरोनित्यंचंदनबिल्वपल्लवलसन्मंदारकुंदादिभिः॥

नैवेद्यैरमितैरनुक्षणमतो नृत्यंति गायंति च तेषामेव धनैः शिवार्चनमभूत्पंचामृतैः शोधितैः॥६७॥ शुद्धैस्तैः कपिलाघृतैरपि सदा धारापि लिंगे मु

दा॥ विच्छिन्ना न भवत्यनंतविभवा सामुक्ति धारापरा॥ गोक्षीरादिकधारयापि गिरिशः संतुष्ट एवान्वहं॥ रत्नागारविशेषनिर्मितमहालिंगप्रभापूर

गैः॥ तद्द्रव्यैरमितैः शिवार्चनफलैः सांद्रैरमोघैरपि॥६८॥ तेनैते शिवपूजनोत्सवरसास्वानंदधारावृताः॥ कल्याणाश्रयपूजनाय सततं नृत्यं

ति गायंति च॥ तत्संघाश्रितवित्तपूजनफलैस्तावत्स नृत्यंत हो गायंते यह संति संततममी मीरुद्र चिणादराः॥ शंभो शंकर चंद्रशेखर महादेवेति स

त्स्वरव्यापारप्रकरप्रचारनखरव्यापारसारादरैः॥ स्वप्नेप्यंबुजबिल्वपल्लवजलैरभ्यर्चयंति शिवं निद्रायामपि चित्रमेतदपरं निद्रापि तेषां

क्षणं॥७०॥ आयुर्वृद्धिमुपैति शंकरपदांभोजार्चनादन्वहं तस्य क्षीणदशा कदापि न भवत्यर्धेंदुमौलिस्मृतेः॥ तेषां तावदपारशंकरकथा

पीयूषपानात्तनुः पीनापीनतरापि ते मुहुरुमाकांतां बिकानायकं॥७१॥ स्मृत्वा चेतसि संततं कथमपि त्वामेव देवोत्तमं मत्वा शंकरनामधेयसु

सुधापानैर्नयामो दिनं॥ तेषामायुरनुक्षणं गणगणैः वेश्यामुखालोकनैः मद्यस्त्रीपरिसेवनेन च गतं पण्यांगनालापनैः॥७२॥ तेनाश्रुव्यथ

यानयंति दिवसांस्ते मे चकाकारतां संप्राप्यापि मुहुर्मुहुः शिवकथालापोपि तैर्नश्रुतः॥ हा हंतामितवित्तनाशनकरव्यापारभारादरैः नीतं तदि

नमंधकारि विमुखैर्दुःखोपकारादरैः॥७३॥ आराध्यः शिवइत्यपारविभवो नैवानुभूतो भवो भावैः साकमभाषणं च कृतमित्यज्ञः परं क्लिश्य

ति॥ अज्ञानाद्गिरिशार्चनं च न कृतं लिंगं च नालोकितं लिंगागारमहोत्सवोपि न कृतो दृष्टा न दीपावलिः॥७४॥ लिंगागारविनिर्मिता विधि

वशात्धूपप्रधूमावली दृष्टा नेत्यति चिंतयापरमयं सद्यः स्वयं क्लिश्यति॥ नानापापविनाशिनी शिवकथा नाकर्णिता नश्रुतं नामापिस्मरवैरिणः
सकरुणः श्रीशूलपाणिः क्षणं॥७५॥ नैवीतः करणांबुजैः स्मृत इति व्यर्थं वयो निर्गतं हाहा हंत वृथा वयोगतमिति व्यर्थं स रुदंत्य द्यते॥ आयुर्व्यर्थ
मिदं गतं शिवपदं न ध्यातमेवादरा ल्लिंगे बिल्वदलं प्रसूनममलं गंगाजलं वा मुदा॥७६॥ नक्षिप्तं न च वीक्षितं च नगरं विश्वेश्वरस्यादरा दित्थं
ते प्रलपंति हंत यततेतेतेतेपितेतेपिते॥ श्रीविश्वेश्वरलिंगमुत्तमतमं श्रीचंदनेनानघैः पुष्पैर्बिल्वदलैश्च नार्चितमहो क्षीणं वयः सर्वथा॥७७॥ हाहं
तामितपातकार्जनरतं चित्तं वयो निर्गतं॥ किं कर्तव्यमिति प्रतिक्षणममी दुःखातुराकातुराः॥ श्रीविश्वेश्वरपूजनं च न कृतं छिद्रैः पवित्रैर्नवैः बिल्वी
कोमलपल्लवैरभिनवैः दूर्वांकुरैर्भस्मना॥७८॥ नो दृष्टं विकटापदांबुजयुगं नाराधितं चंदनैः॥ मल्लीमालिकया दुकूलकलितैः इत्येवं हं दुःखिताः॥
न स्नातं मणिकर्णिकांभसि न चैवोद्धूलितेयं तनुः॥ भूत्या कालमपि त्रिपुंड्ररचनैः नालंकृतं भस्मना॥७९॥ रुद्राक्षैश्च न भूषिता तनुरहो व्यर्थं
गतं जीवनं हाहं तेतिबतेतिदैवहतमित्येते रुदंतिस्वतः॥ वीरेशायनकल्पिता तिरुचिरा सानीरधारा मुहुः॥ श्रीवीरेश्वरतुंगलिंगमसकृन्ना
भ्यर्चितं चंदनैः॥८०॥ सायं न प्रणतं च नेक्षितमहो भूतोपवासैर्निशा नीता नेति रुदंति हंत सततं ते कालभीत्यातव॥ काश्यामेव न कालभैरव
दिने कालाष्टमीनामके॥ कृत्वा जागरणं मुहुर्मुहुरयं दृष्टो मया भैरवः॥८१॥ कालेशोपि न वीक्षितो मुहुरहो हा हंत हं ते त्वमिदुःखे नैव नमृ
त्युनुक्षणमहो ते कालभीत्यायुतय॥ इति तद्वचनं श्रुत्वा यमो विस्मितमानसः॥ शिवभक्तगणं दृष्ट्वा पूजयामास संस्तुवन्॥८३॥ धन्यं

कुलमिदं दृष्टं शिवभक्ता युतंमया॥धन्यंधन्य मिदंतावज्जीवनंनयनांबुजं॥८४॥ एतदालोकनेनैव विनेयः समयोमया॥अपूर्वोयं शिवगणः

शिवनाम महोत्सवः॥८५॥ कथंगायंति दिव्यानि शिवनामानिकोटिशः॥आनंदोद्बोधकान्येव मुहुर्मुहुरतंद्रिताः॥८६॥ एतेधन्याः परंधन्याः

सर्वेतद्वीक्षणादराः॥धन्यस्तदंगवातोपिमुक्ति कांतानुकर्षकः॥८७॥ संगोपितावत्कर्त्तव्यः तावदेतैः सहान्वहं॥एतत्संगानुषंगोपिभुक्ति

मुक्ति प्रदोभवेत्॥८८॥ धन्यंधन्य मिदं शरीर मधुना धन्यांगसंगादयंधन्यः शांकरसंगइत्यवगतो ब्रह्मादि देवस्तुतः॥अस्माकं गिरिजाम

नोहरपदांभोजार्चनेजायते बुद्धिसिद्धिकरोत्तमोत्तमतमा मुक्ति प्रदानोद्यता॥(८९) इति श्री शिवरहस्ये हराख्ये तृतीयांशे उत्तरार्धे याज्ञवल्क्य

जनक संवादो नामाष्टमोध्यायः॥८॥ श्रीकाशी विश्वेश्वरार्पणमस्तु॥ याज्ञवल्क्य उवाच॥ एतस्मिन्नंतरे काले विमानवरसंश्रिताः॥देवाः स

मागतास्तत्र कौतुकं द्रष्टुमुद्यताः॥ तेतत्र शिवभक्तानां आयुर्मूर्त्ति विलोकनैः॥ प्रहृष्टाः प्रस्थितास्तेपि कृतांजलिपुटाः सुराः॥२॥ ततः प्रहर्ष

मतुलं प्राप्तास्तत्र त्रिलोकनात्॥धन्यमायुरिदंतेषांक्षीणं शंकर पूजया॥३॥ एतद्भाग्यस्य नांतोस्ति कृतकृत्यमिदं खलु॥सुमेरुस्वर्णदाने

पिक्षणार्धार्धायुरप्यहो॥४॥ दुर्लभंतद्गतंभूयो नायात्येवगतंगतं॥ शिवार्चनेनविलयेतत्तावत्सफलं खलु॥५॥ आयुः संपादितं पूर्वं शिवपू

जनसाधनं॥ शिवार्चनोपयुक्तं च सफलं नात्र संशयः॥६॥ तदेवायुस्तावत्सफलममलं पुण्यनिलयं तदेवायुर्वंद्यं क्षणमपि यदेवादरदरैः॥मु

हुर्लिंगंतुंगं प्रणमति पुनः पश्यति पुनः स्पृशत्या लिंग्यांगैः अभिनवजलैः सिंचति मुदा॥७॥ यदेवायुः पुण्यैरमितविभवैरर्जितमभूत्तदायुः क्षीणा

शिवरह०२ २४

चेद्गिरिशभजनेनक्षणमपि॥तदाधन्यंमन्येतदितिनततोप्यन्यदधिकं यतोवंद्यंवेदैरपिसुरगणैर्वामुनिगणैः॥८॥अपारायुःप्राप्यप्रमथपतिलिंगा चैनरतंमनःकृत्वाकृत्वाशिवभजनमेवप्रतिलयं॥मुहुर्बिल्वैर्नीरैःरतिरुचिरकर्पूररचितैर्वियोनेयंलिंगस्नपनविधिनाकेवलमिदं॥९॥ल सद्बिल्वीमल्लीकमलकनकार्कादिकुसुमैःमुहुस्तुंगंलिंगंविमलकमलाभ्युक्षितमहं॥प्रपश्यंस्तत्पूजारचनचतुरंशंकरपदंमुदामंदंमंदंम धुरनिनदैरेवकलये॥१०॥महद्भाग्यंयोग्यंयदिगिरिशपूजोपकरणंतदेवायुस्तावद्यदिगिरिशसेवोपकरणं॥तदन्यत्तव्यर्थंव्यथयतिकथंवा नवितथंमनस्तस्मात्कस्मात्स्मरहरपदंनस्मरतिमे॥११॥स्मरारेपापारेहरहरयमारेकरुणयामहासंसारारेस्मरहरमनोमेनिजपदं॥यथा नेदंव्यर्थंकथमपिकथंवाकथमयेतथागौरीनाथप्रमथगणनाथातिशपथैः॥१२॥त्वदीयंमत्वामामयमतिशिशुःशोककलितःशनैःशांतिंयातुभ्र मजनकसंसारविरतः॥भवल्लिप्सुस्साहाद्गुपदिशमहेशात्रिदशतांप्यपास्याकस्यास्यांरतिरपिशिवेतिप्रलपतः॥१३॥कदस्तुंगंलिंगंकनककु सुमाभ्यर्चितमिदंमुहुर्दृष्ट्वानत्वाशिवशिवमहेशामरपते॥महेशावस्वामिन्निति सततमेवानुवदतोभवत्वायुःक्षीणंशिवशिवशिवावल्लभवि भो॥१४॥महासंसारारेकिमपिनतवाशक्यमितिमेमनोनूनंनुन्नंत्रिनयनभवत्पादभजने॥प्रवृत्तंसंसारव्यसनभयभंगायभगवन्नयंनेयःकालः कथमपिशिवाराधनधनैः॥१५॥महद्भाग्यंरत्नान्यमितधनधान्यादिकमपिप्रभावोप्येतन्मेशिवशिवशिवाराधनमिति॥प्रबोधोवृत्तोयंप्रव लमहिमायंभवतुमेवनेबिल्वव्यापेशिवशिवशिवेतिप्रजपतः॥१६॥इत्युक्त्वातेसुराःसर्वैस्तैःसर्वैःसहसत्वरं॥विमानानिसमारुह्यस्वर्गमार्गं

ह०नृ०उ० ६ अ०९

ययुर्मुदा॥१७॥पश्चात्पापप्रयस्पाणामप्यायुर्मुर्तयः शनैः मर्त्तैर्यमभटैर्नीताः कुंभीपाकालयंप्रति॥१८॥ तस्मात्प्रतिक्षणंपूजा शंकरस्ययथातथा॥यत्नः
कार्योधीमतानुबंधस्यादन्यथाखलु॥१९॥ वरमेवात्महननंसुरापानंवरंपरं॥नवरंश्रीमहादेवध्यानहीनंवयःप्रियं॥२०॥ गोमांसभक्षणंवापिवर
मेवदुरात्मनां॥नवरंश्रीमहादेव०॥२१॥स्वर्णस्तेयंवरं मन्येवरंब्रह्मवधंतथा॥नवरं॥२२॥ गुरुदाराभिगमनंवरंमद्यपसेवनं॥नवरंश्रीमहादेव०॥
॥२३॥नानाविधानांपापानांकरणंवावरंपरं॥नवरंश्री०॥२४॥अहोपातकिनःसर्वेभविष्यंतिकलौयुगे॥नवरंश्रीम०॥२५॥ सर्वार्थदायकंदेवं
नजानंतिविशेषतः॥अतःप्रयांतिसर्वेपिनरकंनात्रसंशयः॥२६॥उमासहायपूजायांआलस्यंयः करिष्यति॥सयातिनरकेघोरेपुनरा
वृत्तिदुर्लभं॥२७॥उमासहायभजनंयेकुर्वंतिप्रयत्नतः॥तेयांतिपरमंस्थानंकैलासंशंकरालयं॥२८॥अनायासेनयश्चैतेशिवमंदिरमास्तिकाः
॥शिवाचाररताःसत्यंसत्यंसत्यंनसंशयः॥२९॥यःशिवाचारनिरतःसधन्योधन्यकृत्तमः॥तद्दर्शनेननश्यंतिपातकानिबहून्यपि॥३०॥पुरामगध..
देशेषुकश्चिद्राजातिधार्मिकः॥सर्वसौभाग्यसंपन्नःशिवपूजारतःसदा॥३१॥शिवनैवेद्यशेषेणकुर्वन्जीवनरक्षणं॥अन्यद्भाग्यंमहेशायस्तमित्यवग
म्यते॥३२॥तेनयत्पूजनंपूर्वंकृतमासीन्महात्मना॥तेनपुण्यप्रभावेनभवेत्प्रमथमध्यगः॥३३॥तस्यभूपस्यनिलयेशिवलिंगानिकोटिशः॥रत्नमंदि
रनिर्माणंशंकरार्थंचकारसः॥३४॥यावत्तेनार्जितंद्रव्यंतत्सर्वंशार्वमित्यपि॥सशर्वाराधनेनैवसर्वायुःकलनोद्यतः॥३५॥क्षणमात्रंचतस्यायुःनशि
वाराधनंविना॥शिवाराधनमात्रंतुतस्यव्रतमनुत्तमं॥३६॥शिवाराधनरूपेणव्रतेनैवमुहुर्मुहुः॥नयत्यायुर्वयस्तस्यशिवपूजनसाधनं॥३७॥तस्यतावत्कृ

तार्थस्यशिवपूजारुचिर्यथा॥ तथारुचिर्नदारेषुकुमारेषुधनेष्वपि॥३८॥ तस्यार्जुनेनतुल्यानिधनानिविविधान्यपि॥ सपात्रेषुधनत्यागेयवसंमनुते धनं॥३९॥ तस्यपुण्यप्रभावस्यशांकरस्यगृहंपरं॥ दृष्टुमभ्यागतोदैवात्कश्यपोमुनिसत्तमः॥४०॥ तंदृष्ट्वाकश्यपंहारंहारकोटिसमावृतं॥ संतुष्टः प्रणतोभूत्वाकृतार्थोस्मीतिभूपते॥४१॥ ततःपरंसराजातुसर्वान्हारानुदारधीः॥ हारोपचारैःसंतुष्टान्चकारनृपसत्तम॥४२॥ हारोपहाराद रहारसंघंविलोक्यराजाविनयानतःसन्॥ पप्रच्छभक्त्यापरमंसहारंधर्मविशेषेणसहारवीरः॥४३॥ ॥कश्यपउवाच॥ धर्मेषुसर्वेष्वपि हाररूपोधर्मःपरत्वेनविनिश्चितोतः॥ तंधर्ममाश्रित्यपरंप्रयांतिहारंपदंहारविशेषसेव्यं॥४४॥ हाराएवभवंतिहारचरणांभोजार्चना राधनध्यानात्करणाःक्षणंयदिवयःक्षीणंशिवाराधनैः॥ संसारस्यचदुःखनाशकरणंश्रेष्ठंतदेवादरात्पुण्येराजितिमित्यवैमिपुनरप्यायु स्तदेवेप्सितं॥४५॥ आयुस्तावदशेषदोषकरणोपायोहिदुष्टात्मनां प्रायःपुण्यवतांविलक्षणमभूदायुःशिवाराधनैः क्षीणंयस्यभविष्यति प्रतिदिनंतस्मैनमोस्त्वायुषे तत्तावत्खलुदुर्लभंभुविनृणांतद्वंद्वमेवान्वहं॥४६॥ अस्माकंगिरिशार्चनंवृतमतस्तेनैवनेयंवयस्तस्मादप्यधिकं नमेव्रतमितिज्ञातंमुहुर्वैदिकं॥ तत्तावदव्रतमित्यवैमिबहुधातत्तुल्यमन्यद्व्रतं॥ नास्तीत्येवमतिर्ममापिविधिनोजातामतिस्तादृशी॥४७॥ संसार व्रणनाशनार्थमसकृद्दृष्टंमयाप्यौषधं॥ वेदांतेषुभिषक्तमार्चनमितिब्रह्मादिकानामपि॥ अस्माकंसुतरामतःपरमुमाकांतार्चनंकेवलं संसा रोरुतरुप्रमूलहुतभुग्विश्वेश्वराराधनं॥४८॥ काशीवासरतंमनोस्तुसततंविश्वेश्वराराधनेढुंढीशार्चनपूर्वकंयदिमनःस्यादन्नपूर्णालये॥

दृष्वातांगिरिराजराजतनयांविश्वेश्वरालोकनेनैयंस्यादिदमायुरित्यनुदिनंचिंतापरंवर्धते॥४९॥अस्मा(द्)भाग्यवशेनशंकरपुरीजाताशिवाराधनं॥
तस्यांचेदघकोटिकोटिविलयेदेहव्यपायेसति॥तस्यांमुक्तिरुमासहायचरणेदृष्टेभविष्यत्यपिप्राणस्योत्क्रमणोत्तरंसगिरिशःपंचाक्षरंदास्य
ति॥५०॥मंत्राणांसशिरोमणिःशिवमनुस्तत्रापिपंचाक्षरस्तत्राप्यक्षरयुग्मरूपममृतंतद्दुर्लभंकेवलं॥यच्छुद्धिंशिवनामकंशिवकरंतन्मोक्षदानोद्यतं
तत्सामर्थ्यममेयमेवनमयाज्ञातंपरंतत्वतः॥५१॥वेदैःकिंशिवनामतुल्यममतंकिंचामृतंतत्परंसंसारौषधमित्यवैमितदिदंब्रह्मादिभिश्चिंतितं॥तत्ता
वत्सुलभेनमोक्षजननोपायःप्रियःसर्वथाश्रीमृत्युंजयपूजकस्यसुतरांमृत्युंजयायापितत्॥५२॥हेमृत्युंजयहेमहेश्वरमहादेवेतिनामादरादारा
देवकुमारदारधरणीधान्यादिवांछापिन॥संसारःसुतरांनवांछितइतिप्रायःशिवाराधनेवांछाकल्पतरुःसएवसकलाभीष्टप्रदानोद्यतः॥५३॥
या(व)त्पुष्टिरदृष्टकोटिघटितादेहेभवेद्दक्षदा(ता) तावत्तद्गिरिशार्चनार्थमसकृद्यत्नोपिकार्योनरैः॥आलस्यंपरिहायतद्यदिभवेत्तत्तद्विषंजायते॥तत्तावद्विषमित्य
वैमिबहुधातत्याज्यमेवान्वहं॥५४॥भस्मो(द्)धूलनपूर्वकंप्रतिदिनंरुद्राक्षपूतोमुदाश्रीमृत्युंजयपूजनाययततेबिल्वादिभिःसाधनैः॥तद्यत्नैःखलुपा
पसंघविलयस्तस्मिन्धृतेतत्क्षणाज्जीवन्मुक्तिरतःपरंप्रतिदिनंतत्संततंवैदिकं॥५५॥यावज्जीवमुमास(हा)यभजनेनेयंवयस्तत्सदाकर्तव्यंद्विजपुंगवैरिति
मुहुस्तत्रापियेब्राह्मणाः॥तैस्तत्संततमेवकार्यमितिमेबुद्धिस्ततस्तद्यदित्यक्तंस्यात्पतितोभवत्यपिभवेत्तस्यैवसायातना॥५६॥नानायोनिषुजन्मताव
दसकृद्भुक्तंचदुःखंमुहुर्घोरासायमयातनापिबहुधालब्धातथाप्यस्यन॥जीवस्यास्तुशिवार्चनेजनिजरारोगाग्निरूपेमुहुःकिंवक्तव्यमतःपरंशि

549

वरतोधन्योस्तियःकोपिसः॥५७॥गर्भावासमतीवदुःखमहमितिज्ञात्वापिमूढोदरां शैलाधीश्वरकन्यकापरिवृढंनाराधयत्यादरात्॥गौरीकांतपदारविंदभजनान्मुक्तिःपरंजायतेसाकस्याप्यनपेक्षितास्वलुमहासंसारमग्नात्मनां॥५८॥संसारविषपानाययततेमनुजःसदा॥शिवनामामृतंपातुंनयत्नंकुरुतेजनः॥५९॥मलाशनाययततेसूकरोवाखरोपिवा॥तथानरोपियततेसंसारायपरंखरः॥६०॥क्रूरोनरःखरोलोकेसंसारमलमिच्छति॥शिवार्चनसुधापानेतस्येच्छाजायतेकथं॥६१॥शिवार्चनसुधासाचेपीतामुहुरहर्निशं॥तृप्तोनक्षुधितोनापितृषितोपितिक्षणं॥६२॥संसारविषसर्पेणदष्टःकष्टमवाप्नुयात्॥पुनःपुनःससंसारीमृत्युमाप्नोतिदुःखितः॥६३॥अंतकालःकथंभाविमरणोत्तरमस्यकिं॥भविष्यतीतिसहसानविचारंकरोतिच॥६४॥चातुर्यमस्यसंसारविचारेष्वेवजायते॥नशंकराराधनेषुनरस्यापिदुरात्मनः॥६५॥दुर्बुद्धिरेवसंसारसर्पमेवानुसर्पति॥तद्वशाविष्टदेहोपिनतस्माद्विमुखोभवेत्॥६६॥इदमेवकिलाश्चर्यंदंदशूकाभिदंशने॥मृतःपुनःपुनर्दोषैस्तद्दर्शनमपेक्षते॥६७॥येनमार्गेणमरणंभवतीतिविनिश्चितं॥मृगैरपिसमार्गस्तुत्यज्यतेननरैःपरं॥६८॥जन्ममृत्युजरारोगदंदशूकाभिवेष्टिताः॥नकुर्वंतिदुराचाराःशंकराराधनंपरं॥६९॥अनाराध्यमहादेवंकोवामुक्तोभवेद्भुवि॥मुक्तिमिच्छतियस्तावत्सकरोतिशिवार्चनं॥७०॥मुक्त्यपेक्षापिबहुधानराणांनप्रजायते॥परंतुदारहारादाविच्छासंजायतेपुनः॥७१॥सिद्धेधनेपिबहुधाधनेच्छापिप्रवर्धते॥तथाशिवाराधनेषुनेच्छाकस्यापिजायते॥७२॥तुंगांगनांगसंगेषुयथेच्छाजायतेनृणां॥तथानशांगलिंगेच्छाकदापिदुरदृष्टतः॥७३॥तुंगलिंगांगमालोक्यक्षणंवायोभिनंदति॥तस्यानंदप्रवृद्धःस्यात्आनंदघनसेवया॥७४॥आनंद

घनमद्वैतंचिंतयंतिमहेश्वरं॥केचिद्धन्याःशिवरतास्तेभ्यो नित्यंनमोनमः॥७५॥शंकराराधनोद्युक्तो यस्तत्पदरजःपरं॥पुनातिशिरसालग्नमलग्नंपापको
टिभिः॥७६॥क्षणेनपापकोटीनांभवेद्विध्वंसनंमुहुः॥ निटिलाक्षार्चनादेवतत्तावदमृतंखलु॥७७॥अहो नामृतपानार्थंयतंतेदुर्बलाःकलौ॥मलि
नानांकुतस्तेषांमतिःशंकरपूजने॥७८॥अतिस्सुधाशनामेवकदाचिद्गिरिशार्चने॥ मतिःस्यात्सायतःसाक्षादमृतत्वंप्रयच्छति॥७९॥अमृतत्वमना
यासाद्गिरिशाराधनात्परं॥भवतीत्यवगंतव्यमन्यथातद्धिदुर्लभं॥८०॥दुर्लभंमानुषंजन्मप्राप्यापिनरसूकरः॥नकरोतिप्रयत्नंवाशंकराराधनेध
ने॥८१॥ शिवाराधनमस्माकंधनंनिधिरपिस्वतः॥ सूतेपुनर्निधिंसूतेनवमेवनिधिंपुनः॥८२॥निक्षेपास्तेक्षयंप्राप्ताःकेवलंधनसंचिताः॥अक्षयोनि
धिरस्माकंशंकराराधनंपरं॥निधीनांनिधिरस्माकंशिवाराधनलक्षणः॥अयंनिधिर्दुर्लभोहिब्रम्हादीनामपिध्रुवं॥८४॥ निधिलाभायकुर्वं
तियत्नंब्रम्हादयोपिते॥अक्षयोनिधिरप्राप्यःसर्वथेतिचिरंतिते॥८५॥ क्षयास्तुनिधयोलभ्याःसर्वैरप्यक्षयास्तुन॥निधिर्ब्रम्हांडमध्येस्मिञ्छिवारा
धनलक्षणः॥८६॥मन्येविरूपाक्षपदार्चनंपरंमोक्षप्रदानक्षममीक्षणेपि॥निक्षेपएवेदमिदंविलक्षणंमोक्षस्वरूपोनिधिरक्षयोयं॥८७॥अने
नमोक्षोभवतीतिबुधैःश्रीदक्षिणामूर्तिकृपाकटाक्षैः॥अस्माकमाजन्मखलुप्रवृद्धावृथाभविष्यत्यपिसाप्रवृद्धा॥८८॥धन्याःपरंशंकरलिंगपूजाप्रवि
ष्टचित्ताःपरमप्रवृत्ताः॥अतःपरंकिंबहुभाषणैर्वावामार्धजानिंभजचंद्रमौलिं॥८९॥ इतिश्रीशिवरहस्येहराख्येतृतीयांशेउत्तरार्धेयाज्ञवल्क्यजनकसं
वादेनामनवमोध्यायः॥९॥ श्रीकाशीविश्वेश्वरार्पणमस्तु॥ याज्ञवल्क्यउवाच ॥इतितद्वचनंश्रुत्वाराजासंतुष्टमानसः॥कीर्तिकेतुरुवाचेदंवच

नंधर्मसाधनं॥१॥ प्रभावंशिवलिंगानांशिवलिंगार्चनस्यच॥ विभूतिधारण स्यापिरुद्राक्षाणांचमेवद॥२॥ कश्यपउवाच॥ साधुसाधुशिवाचार
निरतोत्तमभूपते॥ प्रश्नोयंपुण्यरूपस्ते महापुण्यप्रबोधकः॥३॥ प्रश्नाःसंत्येव बहवः केचित्तत्रोत्तमोत्तमाः॥ उत्तमाः केचिदत्रापिमध्यमाश्च तथाधमाः॥
प्रश्नस्तवायं सर्वेषुभवत्येवोत्तमोत्तमः॥ एतत्प्रश्न समः प्रश्नो नजातो नभविष्यति॥ यत्प्रश्नश्रवणेनापिपूतमेवमनःपुनः॥ नपावनांतरापेक्षापावन
त्वायकेवलं॥६॥ तृप्तमेवमनोनूनंआनंदोपिप्रवर्धते॥ एतत्प्रश्नसुधाधारामुक्तिधारेवभातिमे॥७॥ तत्संगतिःकल्पलतेवपुंसांसर्वार्थसिध्यैभ
वतीतिमन्ये॥ धन्योसिमान्योसिनसंशयोत्र प्रश्नःकृतोमुक्तिदएवनूनं॥८॥ अतःपरंमेविषयेषुबुद्धिर्विनिर्गतासापिनवासनामे॥ पापोपकारोपिनि
वृत्तएवप्रवृत्तिरेवाद्यशिवप्रसंगे॥ शिवप्रसंगःशिवदायकोमे यतःशिवावल्लभसंनिधानं॥ तस्मिन्प्रसंगेसतिसर्वथापिनान्यत्रतिष्ठत्यगजापतिस्तु॥
॥१०॥ शिवप्रसंगःक्कभविष्यतीति विचार्यतिष्ठत्यपिचंद्रमौलिः॥ अतःपरं मंगलहेतुरीशो महेश्वरःसंनिहितःस्वभावात्॥ महेश्वराभ्यागमनेभवा
नीकुमारमादायगणेशमादौ॥ आयास्यतीतिद्रुतमेवनंदीभृंगीचसर्वैःस्वगणैःसमेतः॥१२॥ अयंप्रसंगःश्रुतएवनूनंकैलाससिंहासनसंस्थितेन॥
शिवेनगौर्यापिगणेश्वरेणस्कंदेननंदीशमुखैःसुरैश्च॥१३॥ तीर्थानिसर्वाण्यपिमूर्तिमेत्य शिवेनसाकंगिरिशप्रसंगे॥ अगस्त्यधन्यत्वमुपेत्यतावै
द्यास्यंतिनूनंनृपसत्तमाद्य॥१४॥ शिवप्रसंगःस्वयमेवपूजा महेश्वरस्येतिमतिर्ममापि॥ शिवप्रसंगेनसमानपूजायतःशिवाकर्षकएवसोयं॥१५॥
यतःशिवोत्कर्षविशेषवार्ता शिवस्यपूजापरमुक्तिहेतुः॥ तद्वार्तयासानसुधासमानासामुक्तिदानेतिविनिश्चयेन॥ शिवप्रसंगःस्वयमेवमुक्तिंकरोति

सद्यःश्रुतएवसाक्षात्॥यतोविरूपाक्षहितःप्रसंगःसंसारसंगांकुरपावकोयं॥१७॥शिवप्रसंगोधनमस्मदीयंनचोरहार्यंनतदन्यहार्यं।श्रुतोपिभूयोभवतिप्र
वृद्धोधृतोपिसंसारहरःस्वभावात्॥१८॥शिवप्रसंगेनविमुक्तिलाभेकथासुधाराशिकृतोपकारः॥नकोपितावत्सपरंमहेशगौरीसमाकर्णयहेतुभूतः॥
॥१९॥शिवप्रसंगमुक्तानांअस्माकंगिरिजापतिः॥प्रसन्नोपिविशेषेणकिमस्मभ्यंप्रदास्यति॥२०॥महामुक्तिर्महादेवचरणांबुजरेणुभिः॥सहावासःसनावस्या
त्कथाश्रवणान्नृप॥२१॥महेश्वरकथासुधांसुधांपिबतिशंकरः॥शांकरीकुमारगणनायकप्रमथदेववृंदैःसह॥इयंखलुसुधापरापरमुक्तिदानोत्स
वार्तयापिनसमानमित्यपिमतिःप्रवृत्धाभुवि॥२३॥आनंदेननिपीयतेनियमतःसादुर्ल्लभादुर्लभंतद्भिन्नंननुसर्वथापिनकृतिःतस्यांसुधायांनृप॥सा
तावत्स्वयमेवशंकरकृपारूपापिनित्यापिसातद्दानेनसमासमानमितरज्जन्यंनतेनास्त्यपि॥२४॥सातावद्गिरिशप्रसादजनिताजन्मादिदुःखाटवी॥
कल्पांतानलएवसानसुलभाविश्वेश्वरानुग्रहे॥सातावत्सुलभाभवत्यपिसुधातद्गोपनंसर्वथाकर्तव्यंशिवयोगिनेपरमियंदेयासुधामुक्तये॥२५॥शि
वकथामृतपानधनःसदाधनपतेर्धनमिच्छतिकःपुमान्॥तदिदमस्यधनंधैनेरापतेधनदकोशगृहेपिनतद्धनं॥२६॥धनानितावद्विविधानिलोकेव्य
थाकराण्येवतदर्जनेपि॥व्ययेपिविश्वेशकथानिधानंनदुर्ल्लभंशांभवपुंगवानां॥२७॥अपारपुण्ययोगेनश्रुताशिवकथासुधा॥पापानितत्पजिह्वाग्र
तृषामपहरिष्यति॥संसारानलसागरानिलमहाज्वालाकुलव्याकुलोनिर्दग्धस्तृषितःक्षुधानलकुलव्याप्तोदरःसादरं॥योभक्त्यासकृदेवचा
शिवकथापीयूषराशिंमुदाश्रुत्वातृप्तिमुपैतितस्यनतृषाक्षुद्वानतद्वेदना॥२८॥आनंदामृतसिंधुरेवगिरिजाकांतप्रभावप्रथापीयूषार्णववर्णनं

शिवकथासारस्त्वसारः परं॥ संसारार्णवमोचकोत्तमइतिज्ञातस्ततस्तत्परं किंवास्यादितिचिंतनेपिनसमस्तेनास्तिलोकत्रये॥२९॥ अतः शिवक
थालापैरपलापोपिसंसृतेः॥ अतः सत्संगतेरेवतत्कथास्वर्धुनींहृदि॥३०॥ प्रभावः शिवलिंगानांअपारस्तस्यवर्णनं॥ नमयानामरैर्नापिवेदैरपिनश
क्यते॥३१॥ शिवलिंगप्रभावज्ञः कोपिलोकत्रयेमहान्॥ भविष्यतिनयानास्मन्मनस्तद्गुणनक्षमं॥३२॥ नयान्यांविषयस्तावल्लिंगवर्णनमित्यतः॥
वेदांतास्तत्रविश्रांताः कृतांतांतककीर्तनात्॥३३॥ यस्मिन्कालेमतिर्यस्यशिवलिंगावलोकनात्॥ सतावत्सन्यधेवेतिकालेयंसुतरामपि॥३४॥
लिंगरूपंसमासाद्यरमतेगिरिजापतिः॥ लिंगरूपंप्रियंतस्यलिंगेगृण्हातिपूजनं॥३५॥ लिंगंमंगलदत्वेनयेनज्ञातंमहात्मना॥ समंगलापतिंयातितज्ज्ञा
नमतिदुर्लभं॥३६॥ लिंगंमंगलदंविदुर्मुनिवराः सर्वेसुराः किंनराः सिद्धाः किंपुरुषाः गणाश्चविविधाः शेषादयोप्यन्वहं॥ तल्लिंगार्चनतत्पराः परमिदं
लिंगंयतः सर्वदा॥ सर्वार्थप्रदमित्यवैम्यहमपिप्राग्जन्मपुण्यैर्नृप॥३७॥ लिंगंनार्मदमुत्तमोत्तमतमंलिंगेषुतत्पूजयासाक्षात्पूजितएवतेनसदृशं
लिंगंनभूमंडले॥ तद्बिल्वीनवपल्लवैरनुदिनंयेनार्चितंसादरं भक्त्यातत्सकृदेववासहिमहान्मान्योमहेशप्रियः॥३८॥ यः प्रातः प्रयतः प्रपश्यतिमु
हुः लिंगंविभूत्यापरं पूतः सन्प्रणतस्त्वनोपिपरतोमुक्तोभवेत्पातकैः॥ तल्लिंगंविमलैर्जलैरभिनवैर्बिल्वीदलैरर्चयन् चर्यामेवनसंसृतेः खलुक
रोत्याकल्पमंतेपिवा॥३९॥ लिंगाराधनपुण्यराशिमसकृद्बुधः प्रगृध्यः पुनः संसारार्णवशोषकः खलुमहापापौघविध्वंसकः॥ तेनैवामृततामुपैति
सपुनः संसारवार्तारसंनस्वप्नेपिसपश्यतीतिसमहान्लिंगार्चकोभूपते॥४०॥ लिंगार्चकेनसदृशोनमहाध्वराणां कर्तापितस्यतुफलंखलुतुच्छमेव॥

स्वर्गात्मकं शिवपदांबुजपूजकस्य तत्तावदिष्टमपि नेति वदंति सिद्धाः ॥४१॥ यो रंभापरिरंभणे पिशुनकौ तुंगांगसंगे पि वा तुल्यत्वं मनुते शिवार्चनपरः सस्वर्गवांछां कथं ॥ कर्तुं वा यतते विरक्तमनसां तत्राप्यपेक्षा कथं मोक्षेच्छापरमस्ति तस्य सततं लिंगार्चकस्य ध्रुवं ॥४२॥ लिंगाराधनसाधुमेवमनसां तावद्धनं तद्धनं सर्वेषां समपेक्षितं यदि भवेन्मुक्तोपि सर्वस्ततः ॥ तस्मात्कस्यचिदेव भूरितपसां पुंजस्य तस्याधनं तत्तावद्धनमक्षयं निधिमपेक्ष्यैवार्जितं सज्जनैः ॥४३॥ लिंगार्चनव्रतमिति प्रवदंति धन्यास्ते नैव मुक्तिरिति निश्चयएव तेन ॥ सर्वार्थसिद्धिरतएव हि तद्विहीनान्हीनान्वदंति मनुजान ति दुर्जनास्तान् ॥४४॥ पुरा विंध्यप्रदेशेषु कश्चिद्राजातिसुंदरः ॥ युवा परमपापिष्ठः सर्वदा युवतीवृतः ॥४५॥ कामोद्रेकः सदा तस्य तादृशाद्द्रव्यसेवनात् ॥ तेनोन्मादेन नीतानि दिनानि सुबहून्यपि ॥ ततः परं जरायां च न जहाति परांगनां ॥ परांगनांगसंगेन व्याधिवृद्धिरभूत्खलु ॥४७॥ तथापि न परित्यक्ता परदाररतिस्ततः ॥ जारणीचोरमार्गेण याति याति कुलांगनाः ॥४८॥ नानाविधांगनासंगाद्विरतिः तस्य नाभवत् ॥ तेनैव रोगः संजातः पापिष्ठस्य दुरात्मनः ॥४९॥ ततस्तेनैव रोगेण जातान्येव व्रणान्यपि ॥ तथापि न परित्यक्ता परनारी विशेषतः ॥५०॥ ततः परमभूत्तस्य मरणावसरस्ततः ॥ तद्राष्ट्रे पप्लवो जातः सर्वलोकभयंकरः ॥५१॥ प्रबलाश्च गताः सर्वेप्यटवीमटने नते ॥ पूर्णां चक्रुः स राजापि नीत एवाटवीं प्रति ॥ तृषार्त्तः क्षुधितो राजा स्वकर्मानुक्षणं स्मरन् ॥ स्वदारालोकनेनैव चकार दिनयापनं ॥ ॥५३॥ राज्यभ्रंशेन यद्दुःखं व्रणैश्च तरुणारुणैः ॥ व्रणशोणितधाराभिः अश्रुपूर्णोप्ययं भूभृत्ग॥५४॥ हाहा राज्यं कथमिदं धनं बहुविधं गतं ॥ तुंगास्तुरंगास्तुंगाश्च मातंगाश्चोष्ट्रगोगणाः ॥५५॥ क्व गताः क्व च मित्राणि क्व कलत्राणि तानि मे ॥ क्वामात्याः क्व गृहास्तेपि क्व शय्याश्च मनोहराः ॥५६॥ क्व तानि रत्न

पात्राणिस्वर्णपात्राणिकोटिशः॥कृवातानिदुकूलानिविपुलान्यमलान्यपि॥५७॥कृतेभृत्याःकृशास्यस्थकृतान्याभरणान्यपि॥मरणावसरेप्राप्तेगतंतत्स र्वमर्जितं॥५८॥अधुनातृषितृषितस्यापिक्षुधितस्यापिसेवकः॥नान्नदोजलदोवापियस्त्रदोवानदृश्यते॥५९॥धृतंवस्त्रंगतेदूरेनास्त्येववसनांतरं॥शांता सुरततृष्णापिनाद्यापिममदुर्मतेः॥अतःपरंगतिःकास्यान्मरणानंतरंचमे॥यममार्गस्यवार्त्तापिश्रुताप्राङ्मयाखलु॥६१॥गोक्षुरांगारसंकीर्णोयममा र्गइतिश्रुतः॥विश्रुतास्यामहासर्पाःसंतिसन्मार्गइत्यपि॥६२॥लोहशंकुसहस्राणिसंतितप्तानितान्यपि॥प्रतप्ताभिंडीपालाश्चसंतिमार्गेषुकोटि शः॥६३॥भर्जितासिकतातत्रमार्गेष्वाच्छादिताकिल॥अंगारवाहिनीतत्रज्वालामालाकुलाकिल॥६४॥कथंवातत्रगमनंअतिकष्टमुपागतं॥ गाढांधकारस्तत्रापिमित्रवार्तापिदूरतः६५॥हृष्टदेवभटास्तावत्ताडयंत्यतिदारुणं॥तत्ताडनमतिक्रोधान्मरणोपममेवहि॥६६॥हाहाकथंदुर्दशेय मस्येतिप्रलपन्नहो॥प्राणान्सभूपतिस्तत्रविपिनेकंटकावृते॥६७॥समृतोयत्रतत्रैवनिकटेलिंगमुत्तमं॥ततःसमागतोयातःसमुपस्पृश्यनिर्ग तः॥६८॥ततःपरंतुनारीणांरोदनेनकियान्गतः॥कालस्ततोगताःसर्वेपलाय्यारिभटाकुलाः॥६९॥व्रणदुर्गंधसंवीतस्त्यक्तस्तावसदूरतः॥ततो नीतोयमभटैरग्निमार्गेणदुर्मदैः॥७०॥दयालेशविहीनैस्तैःकशाघातनपूर्वकं॥अग्नितप्तकशाघातैःअतितीव्रतरैर्मुहुः॥तप्तलोहक्षुरप्राणां कोटिभिर्निहतोमुहुः॥एवंप्रलपमानोयंसंतप्ताग्निशिलातले॥७२॥पातितःपश्यतियमंदयालेशविवर्जितं॥ततोयमोपितंदृष्ट्वाचित्रगुप्तमुवा चसः॥७३॥किमस्यपुण्यंपापंवावदेतिमुहुरादरात्॥चित्रगुप्तउवाच॥यमधर्मार्थनिपुणपापानिशृणुसत्वरं॥७४॥तत्कृतानिदुरंतानिसंख्या

हीनानिसत्वरं॥यमतत्कृतपापानांसंख्ययापरमायुषः॥७५॥क्षयःस्यादेवकल्पांतेप्यस्यमुक्तिर्नसर्वथा॥तत्पापसंख्ययाकालोयावद्विगमिष्यति॥७६॥
तावज्जीवनमस्माकंदुर्लभंखलुसर्वथा॥एकैकपापकूटस्यगणनायांचकोटिशः॥७७॥कल्पास्तावत्प्रयास्यंतिसंख्यापित्वरयायदि॥पृथक्तत्पापसं
ख्यातुकदापिनभविष्यति॥७८॥अतःपरंकथंसंख्यातत्पापानांयदाधुना॥अहोकिंदुरदृष्टंमेदुष्टपापावलोकनैः॥७९॥तत्पापसंख्ययाप्यायुर्नश्यत्येव
क्षणेक्षणे॥तत्संख्याश्रवणेनैवलयाप्यायुर्विनश्यति॥८०॥नजप्यःशिवमंत्रोपिक्षणंवाभक्तिपूर्वकं॥तत्पापसंख्ययातावत्नास्माकंशिवपूजनं॥८१॥
कासृष्टिरावयोःकालकालकालकृपांविना॥अस्माकमप्यंतकालेशिवधर्मविलोकनात्॥८२॥यातनाभाविनीसातुकेनवाविनिवार्यतां॥रसनाप्यन्य
पापानांसंख्ययासफलाखलु॥८३॥अहोजन्मवृथाजातंशिवपूजाविवर्जितं॥शिवपूजाविहीनानांयातनेत्यवगम्यते॥८४॥तथापितस्यांनमतिःक्रि
यतेपिनसातथा॥यत्पूजयापरामुक्तिःसानास्माभिःकदापिन॥८५॥कृपाभक्त्यायथाशास्त्रंकिंकर्तव्यमतःपरं॥पातकानांगणनयापातकाजेनमेयदि॥
८६॥अतःपरमनेनापिनाधिकारेणनःसुखं॥किमनेनाधिकारेणकिंनःपातकसंख्यया॥८७॥शिवपूजावर्जितेनजीवनेनापिकिंफलं॥धिग्धिग्जीव
नमस्माकंशिवार्चनविवर्जितं॥८८॥परपापानुवादेनगतमायुःपुनःपुनः॥परपातकसंख्यार्थंपूर्वमायुःकिमर्जितं॥८९॥शिवपूजाविहीनस्यकेवलंमरणं
वरं॥मरणोत्तरमप्यस्ययद्यप्यस्त्येवयातना॥९०॥तथापिजीवनंव्यर्थमितिदुःखंप्रजायते॥शिवपूजाविहीनस्यजीवतःसुखमेवन॥९१॥दुःखमेवपरं
त्तुयातनाकिंनतद्दूर॥मित्रमध्येजीवतेपिनस्याद्यदिशिवार्चनं॥९२॥तदातद्दुःखमत्यंतंदुःसहंचायशश्चतत्॥अयशोराशिरेवायंमहेशानर्चकोजनः॥

883

धिग्धिग्धिग्जीवनंतस्य जीवनंमरणोपमं॥ शंकरानर्चकोलोकेयदिजीवितुमिच्छति॥९४॥ नशतस्यायशोवन्हिज्वालयानाशएवहि॥ अपकीर्त्यग्निसंदिग्धःकोवाजीवितुमिच्छति॥९५॥ शिवार्चनपरित्यागादयशश्चकिमस्तिनः॥ शिवार्चनपरित्यागस्वरूपाकीर्तिरातता॥९६॥ संपादयतिजीवस्यदेहस्यसुतरामपि॥ शिवार्चनपरित्यागस्वरूपाकीर्तिवन्हिना॥९७॥ वंशनाशेपिबहुधातन्नाशःसुतरामपि॥ कष्टानिविविधान्येवतेषुश्रेष्ठमिदंखलु॥९८॥ शिवार्चनपरित्यागस्वरूपंकष्टमक्षतं॥ सह्यान्यन्यानिदुःखानिसह्यमेतन्नसर्वथा॥९९॥ शिवार्चनत्यागरूपंकष्टंकष्टतरंस्मृतं॥ शिवार्चनत्यागरूपकष्टादेवपुरायम॥१००॥ अकांडप्रलयोन्नृतस्तत्रदग्धासुराअपि॥ शिवार्चनत्यागरूपप्रलयानलसंहृतः॥१॥ कोवाजीवतिलोकेषुजीवनाशापिकुत्रसा॥ जीवनाशाविनाशायशिवानर्चनकल्पनं॥२॥ अतस्तेननदाशापिविनश्यतिनसंशयः॥ शिवार्चनपरित्यागस्वरूपाशनिपातने॥३॥ कोवाजीवतिलोकेस्मिन्सएवप्रलयानलः॥ शिवार्चनत्यागकालोयःसएवविशेषतः॥४॥ महाप्रलयकालोतःतेनजीवनमेयन॥ अहोकष्टमिदंघोरंकष्टसागरमध्यगः॥५॥ शिवार्चनविहीनोतःतस्यतत्रैवमज्जनं॥ कोकेदुर्जनसंगत्याशंकरानर्चनेमतिः॥६॥ तथाकष्टतरेघोरेनरकेवसतिस्सदा॥ अशांकराणामधुनासृष्टिरस्माकमीदृशी॥७॥ यातनार्थमितिज्ञेयाकिंवापापंपुराकृतं॥ पापमुर्तिस्वरूपेणनकरोतिशिवार्चनं॥८॥ समहाप्रलयांतेपिनरकेस्यास्यतिध्रुवं॥ नरकाणामियंसृष्टिरशांकरजनायसा॥९॥ तत्सृष्टिरपिनव्यर्थाशिवानर्चनतत्परे॥ अतःपरंनाधिकारेममापेक्षायमाधुना॥११०॥ यत्रकुत्रापिगंतव्यंकर्तव्यंशिवपूजनं॥ मानुषंरूपमासाद्यस्थित्वाबिल्ववनेसदा॥११॥ संपाद्यनर्मदालिंगंबिल्वैरभ्यर्चयाम्यहं॥ योगर्भवासजननातिजरादिरूपरोगप्रणाशमभिवांछतिदुःखदीनः॥

तस्याशु बिल्वदललिंगसमर्चनेन तद्रोगनाश इति संप्रवदंति वेदाः॥१२॥ अस्माभिरिंदुशकलाभरणः क्षणं वा नाराधितोपि नवकोमलबिल्वपत्रैः॥ द्वित्रैर्जलैरपि न ना

मेदतुंगलिंगे तेनापि दुःखनिलयो भवति प्रकामं॥१३॥ इति श्री शिवरहस्ये हराख्ये तृतीयांशे उत्तरार्धे याज्ञवल्क्यजनकसंवादो नाम दशमोऽध्यायः॥१०॥

श्रीकाशीविश्वेश्वरार्पणमस्तु॥ याज्ञवल्क्य उवाच॥ इति तद्वचनं श्रुत्वा यमोपि परितापसः॥ समुवाचाति धैर्येण मुंचन्नश्रुकणान्मुहुः॥१॥ किं कर्तव्यमिहास्माभिरस्मा

कं दुरदृष्टतः॥ अधिकारेपि संप्राप्तः कष्टानुभवकारणं॥ अस्मत्कर्मानुसारेण प्राप्त एवायमीदृशः॥ अधुना परिहारोपि कथमस्य भविष्यति॥३॥ अस्मदीयानि दुःखानि

विचार्य स महेश्वरः॥ करुणाभिमुखो भूयात्तदा दुःखं प्रयास्यति॥४॥ स्वतंत्रः स महादेवो यद्यद्वा कर्तुमिच्छति॥ तत्सर्वं स करोत्येव कोवा तस्य निवारकः॥५॥ अस्माक

मल्पभाग्यानामधुनानशिवार्चनं॥ अतः परं चिंतयापि किं तया तिदुरत्यया॥६॥ तत्संयदर्थं च तपः तत्फलं जातमीदृशं॥ अतः परं किमस्माकं चिंतया फलमास्ति का॥

॥७॥ यद्युक्तं पिचुमंदबीजमधुना द्राक्षाफलं किं भवेत्तद्वीजांकुरजं न तिक्तमपि तत्पीयूषसंपपरं॥ तस्मादस्मददृष्टमीदृशमतो नाराधितः शंकरो न ध्यातोपि न बिल्वप

ल्लवजलैः लिंगेषु नाभ्यर्चितः॥८॥ किं कर्तव्यमतः परं बहुविधैः पापैरपापैरियं प्रारब्धा तनुरिक्षुमापतिपदांभोजार्चने धीर्मम॥ न ध्यातं च तदंघ्रिपंकजरजः पुंजं सकृ

द्वा स्मृतं हा हंतामितमायुरेवमनिशं क्षीणं किलानुक्षणं॥९॥ अक्षीणं करणं यदा सुकृतिनां धर्मैरपापैस्तदा श्री विश्वेश्वरलिंगपूजनमतिः जातानुवृत्ता भवेत्॥ अभ्यस्ताभव

तीति तादृशमहद्भाग्योदयः कस्य वा यस्य स्यादतिपुण्यगौरववशाद्भाग्याय तस्मै नमः॥१०॥ भावो भाग्यवशेन भावसहितो भावानुरक्तो मुहुः भावं पश्यति लिंगमुत्तमतमं श्री

बिल्वमूले मुदा॥ तस्मिन् बिल्वदलैः शिवार्चनरतो भूयादपायैर्विना तद्भाग्यं कथमस्मदादिभिरपि प्राप्यं तपोभिर्विना॥११॥ आयुस्तावदिदं गतं गतमिदं भूयो न याला

वनः॥पाषाणैरपिताडनेपि सिरसोप्युच्चैः कृतेरोदने॥घोराकारमहाघनीतमितितन्नायाति सर्वात्मना शंभोकारनिरस्यहंतवततेनातादयामप्यहो॥१२॥हाहाहंतवता तिदीनमधुनापश्यक्षणंवाप्रभो शंभोमयुनपाथि नायदिदयातर्हि प्रसीदाधुना॥त्वत्पूजानिरतंमनोभवतुमेकातावतातेक्षतिः क्षीणानामपिरक्षणेन करुणा किंतेक्षणार्धक्षणं॥१३॥एतस्मादधिकारतस्तुतिरियंसंपादनीयात्वया यामोबिल्ववनंनवारुणलसद्बिल्वीदलैः कोमलैः॥तुंगे निर्मलवि ल्वमूलनिहितेलिंगेसमभ्यर्चनं कृत्वाते निवसामितेनसफलंतत्तावदायुर्मम॥१४॥धिग्धिग्जन्मनिरर्थकं नियमतोयेनैवनाराधितो लिंगे बिल्वदलै र्जलैरपि शिवःशम्भुःसकृद्वाक्षणं॥तंपापिष्ठवरिष्ठनिष्ठुरवचोवीचीसमाकर्णनव्यासक्तं सततंमलाविलजलक्षिप्तंप्रपश्याम्यहो॥१५॥येतेनावदुमासहायचर णध्यानेनहीनाःपरं कुंभीपाकमहानलाविलमहाज्वालाकुलव्याकुलाः॥एतैर्नार्मदलिंगवीक्षणमपित्यक्तंनतत्संस्मृतंतल्लिंगेनवबिल्वकोमलदलं क्षिप्तं नसर्वात्मना॥१६॥एतैःपापरतैर्ननार्मदमहालिंगांगसंगःकृतस्तल्लिंगार्चनतत्परोपिननतोनप्रार्थितःसाधनैः॥वाक्यैर्नीतिमनोहरैःस्तुतमहोतत्पापभोगो धुना कुंभीपाकविशेषतत्परखदिरांगारप्रवाहेस्थितिः॥१७॥एतैर्भूपतिभिःप्रमत्तहृदयैःसर्वात्मनाशंकरध्यानाराधनपूजनोपकरणद्रव्यैःकदाचित्प्र भुः॥शंभुर्नार्चितएवतेनबहुलाज्वालाकुलाव्याकुलाः कुल्यायांमलपूयकीटचरणाघाताकुलायांस्थिताः॥१८॥एतैःप्रातरुमासहायचरणांभो जार्चनेप्यादरस्तावन्नैवकृतःकदापिखदिरांगारप्रवाहाग्निभिः॥एतैर्बिल्वदलार्चनंचनकृतंपापेनतेनाधुना संततपायसखंडमुंडितमहामुंडाच्च रंतिद्रुतं॥१९॥एतैर्नार्चितमेवलिंगमसकृद्धृद्धास्थितंदुर्जनैः तत्पापेनचरंतिवह्निकुहरज्वालाकुलव्याकुलाः॥एतैःशंकरदूषणंकृतमतस्तत्पायसंजिह्वया

कृत्वासंकल्पितंचरंतिवहुधासंतप्तकुल्याजले॥२०॥एतैर्नैवकृतं कृताघनिचयैर्हारोपहारादरःतत्पापेनमल्लेचरंतिवहुधातप्तेपुरीषेचिरं॥तिष्ठंत्येवलुठंतिसंततमपिक्लिश्यं

तिहंतेनितेसंतप्यायसवायसातिकुटिनाघातैरुदंत्यन्वहं॥२१॥एतैःफालतलेकदापिनकृतंभस्मत्रिपुंड्रंस्तुतंतेनैवायसवायसोरुचरणाघातैर्हताःकोटिशः॥रुद्राक्षैर्न

विभूषितातनुरतःतेभिंडिपालाहताः॥किंकर्तव्यमितिप्रधावनपराः॥क्लिश्यंतिहाहातुराः॥२२॥एतैर्नैव[illegible]शिवाभिषेचनजलंपीतंततोदुःसहंसंतप्तंकृमिसंकुलंमलयुतं

श्यन्ति

रेतःपिबंत्येवते॥संतप्तायसरास्त्रजालनिहताःक्लिशंति हाहंतहा हाहंत्येतिवतेतिहंतहतमित्येवाधुनावंत्यपि॥२३॥एतैर्भस्मविहीनपीनमदनव्यापार

दुर्नागनासंगेनैवनिशानिशापतिकरव्यापारहारादरैः॥नितांतेनचरंतिपावकगिरिप्राकारदारांगनाव्यासंगेनमुहुर्मुहुर्हतमहाहाहंतहंतेनिते॥

॥२४॥एतैर्नार्पितमीश्वरायसुरतव्यापारसौख्यंमुहुःमोहाविष्करणेनलोहरमणीतप्तासमालिंग्यते॥तिष्ठंत्येवहिहावतेत्यपिकशाघाताहताः

पीडिताःतद्देहत्वचपिबंतिनतसमसकृन्मूत्रंपुरीषान्वितं॥२५॥पूयप्रवाहेषुचरंतिदुष्टाःकष्टैःशिवाराधनवर्जितास्ते॥मलप्रवाहेषुचरंतिभूयोरे

ता

तःप्रवाहेष्वपिकोटिशस्ते॥तेषांशिवाचारविवर्जितानांनरक्षकःकोपिविशेषधर्मः॥अतोतिपीडाकरवन्हिशस्त्रसंघाहतास्तेशिवदूषकाश्च॥२६॥

तेषांगृहेनार्मदलिंगवार्त्तानास्त्येवलिंगार्चनसाधनंच॥अहोमहावन्हिगुहाप्रविष्टास्तिष्ठंतिविष्टाशनजातकष्टाः॥२७॥एतैःप्रणामोनकृतः

शिवायनर्तनंवाकृतमीश्वराय॥तेनाग्निसंतप्तशिलातलेषुपतंतिभूयःपुनरुत्पतंति॥२८॥नश्रुतातेनसहसामहेश्वरकथासुधा॥अतोविक

र्णैर्लुठंतिवन्हिकुल्यासुकोटिशः॥२९॥नानाविधायातनाश्चशिवाचारविवर्जितैः॥भोक्तव्याःसर्वदातेषांनरकेभ्योननिष्कृतिः॥३०॥रेरेमहा

देवकथासुधाब्धिविनिंदितः शंकरदूषणेन॥ तस्यापभोगस्त्वरयातथास्तु महाग्निकुंडेषु निपातनेन॥३१॥ हारोपहारमपहाय किमद्य भुक्तमन्नं भवद्भिरि
तिलोहकशाभिघातैः॥ तेपीडिताः प्रलपने प्रपतंति च वह्नौ भूयः पतंति पतिताः पुनरुत्पतंति॥३२॥ रेरे किमद्य मरणेपि नते त्रिपुंड्रं फाले शिरस्यपि गलेप्यु
रसीति हत्वा॥ छित्वा तदंगमसकृद्बहु वन्हिकुंडे तेन क्षिपंत्यपि पुनः पुनरग्निकुंडे॥३३॥ रेरे मुहुर्नमरणावसरेपि लिंगे दृष्टेसु बिल्वदलपूजितमित्य
पारे॥ घोरे विकारनरके प्रलपंतमेतं पश्यंति हंति हतचेतनमग्निकुंडे॥३४॥ रेरे न बिल्वदलसंयुतलिंगतीर्थं पीतं त्वया द्य मरणावसरेपि दुष्ट॥ ते
नाग्नितप्तमलसंकुलनीरपानपीनोदरो भव पुनः पुनरेव दुष्ट॥३५॥ ये नारीषु कृशोदरीषु विपुलोत्तुंगांगभेदप्रभासंभारानुविलोकनेन नयनव्या
पारसारंगताः॥ तेते वन्हिविकारलोहरमणीसंगोत्सुलिंगोत्सवो दृष्टो नेति न तत्र या कथमभूल्लिंगभ्रमस्तेक्षणं॥३६॥ मारापारविहारधीरमन
सा नारीपरं वीक्षिता॥ त्वच्चक्षुः शिवलिंगदर्शनरतं नाभूत्क्षणं वा कथं॥ लिंगादर्शनपातकेन बहुधा संतप्तलोहांगनासंगे नात्र वसेति तत्सन
लिकायंत्रांतराले स्थितः॥३७॥ एवं बहुविधा घोरा यातना केवलं जनैः॥ शिवार्चनविहीनैस्तैः प्राप्यते प्रतिवासरं॥३८॥ असह्योप्यधिकारोयं
सह्यः स्यादीश्वरेच्छया॥ न चैतत्परिहारोपि स्वतस्त्वनुचितः खलु॥३९॥ अस्वातंत्र्यं महेशेन सर्वेषामपि कल्पितं॥ अतोधिकारत्यागोपि स्वतः
संमत एव न॥४०॥ यत्किंचिदस्तु किं तेनेत्यपि न त्यज्यते यतः॥ अस्वतंत्रस्य तत्त्यागे स्वतंत्रः खलु कुप्यति॥४१॥ अस्माकमीशपादाब्जपर्यंतं गमनं न
च॥ क्व वयं क्व महादेवः क्व कैलासो तिदुर्लभः॥४२॥ एवं च जीवनं व्यर्थं विना शंकरपूजया॥ सातायत्काल साध्येति कालो प्यत्यंत दुर्लभः॥४३॥

दुष्टदोषविचारेण कालोयातिस्वतस्त्वतः॥ समयः शिवपूजायाः सर्वथा दुर्लभः खलु॥४४॥ यथाकथंचित्कर्तव्यं शंकरध्यानमेव नः॥ न तु पूजोपकरणं तस्य कालो
न दृश्यते॥४५॥ अस्मदर्थं महेशेन सृष्टं मानसपूजनं॥ तेन प्रीतो भवत्येव नूनं गौरीमनोहरः॥४६॥ गौरीमनोहरमहेश्वरमानसं वा लिंगार्चनं यदि तदा सफला
हृद
जनिः स्यात्॥ इत्येतदेव हृदये भव तु प्रभामे शंभो प्रसीद भगवन्निति संवसामि॥४७॥ एवं वदति काले स्मिन्नागताः शिवकिंकराः॥ विमानानि समारुह्य शि
वनामानुगायकाः॥ तान्दृष्ट्वा विस्मितः कालः किमाश्चर्यमिति द्रुतं॥ उत्पश्य भुविस्थितो दृष्ट्वा प्रणतश्च पुनः पुनः॥४९॥ ते यमं प्रणतं प्राहुः विमानस्थाः शिवार्च
काः॥ रे रे यम दुराचार तवलज्जा न सर्वथा॥५०॥ कियद्वारं ताडितोसि कशया शस्त्रधारया॥ न ताडनानां गणना विस्मृता वा कथं त्वया॥५१॥ दृढपाद
तलाघातैः कशयासहतद्दृतिः॥ समागता लोहितेन सहसा विस्मृता कथं॥५२॥ पश्चात्कृत्वा बाहुदंडौ बद्धो पृष्टे पिरज्जुभिः॥ अंतराले स्थापितोसि ता
डितोसि मुहुर्मुहुः॥५३॥ अधोमुखस्य बहुधा कशया घातनं कृतं॥ तव तद्धि स्मृतं किंतु ताडनास्मरणं कथं॥५४॥ तत्ताडनव्रणकीर्णैः अंकितानि तनुर्य
म॥ व्रणानि नूतनान्येव तव जातानि कानिचित्॥५५॥ आज्ञप्तो बहुधा पूर्वं तदाज्ञा स्मर्यते न वा॥ अतः परं कियद्वारं सोढव्यस्ताडनश्रमः॥५६॥
गतिः शांभव मार्गेषु मास्त्वित्युक्तं मुहुर्मुहुः॥ तस्मिन्स्मरणकालोयं केवलं मरणायते॥५७॥ त्वयि यद्यनुकंपा स्यात्तदा त्रिपुरवैरिणः॥ कोपोस्मा
नु भवत्येव साकं किं न करिष्यति॥५८॥ यथा न शांभवद्रोहं तथा चेज्जीवनं तव॥ अन्यथा नरकावासः तवतावद्भविष्यति॥५९॥ शांभवाः पूजनी
यास्ते प्रणामार्हाः परं तु ते॥ यातनामार्गगमनं कथं तेषां भविष्यति॥६०॥ इत्युक्तं तद्वचः श्रुत्वा स यमः कंपमागतः॥ कृत्वांजलिपुटः प्राह प्रणतश्च

पुनः पुनः॥६१॥ ॥यमउवाच॥ श्रीमद्भिरघुनाशिक्षासम्यगेवकृताखलु॥तथापिममविज्ञप्तिः श्रोतव्याकापिसादरं॥६२॥ रत्नसिंहासनेष्वत्रक्षणं
वास्थेयमादरात्॥भवदाज्ञोल्लंघनेयाकस्यशक्तिर्जगत्त्रये॥६३॥इतितद्वचनंश्रुत्वाश्रांतास्तेशिवकिंकराः॥रत्नासनेषुरम्येषुस्थितास्तेनसमर्चिताः॥
॥६४॥ततस्तानाहसयमः शैवद्रोहःकथंमया॥कर्त्तव्यः सोतिदुःखायस्यादित्येवमतिर्मम॥६५॥मरणेपिनकर्त्तव्यः शांकरद्रोहइत्यपि॥मतिर्दृढतमा

नूनंशपथः शिवपादयोः॥६६॥ माहेश्वरेषुयदिकश्चनदुष्टबुध्याद्रोहंकरिष्यतिकदाचनतत्कुलानां॥नाशोभविष्यतिनसंशयलेशवार्त्ताप्यत्रेति
शंकरपदांबुजयोःशपामि॥६७॥ यः शांभवः सतुपिताजननीसखाचभ्राताचबंधुरपिमित्रमपीतिमन्ये॥धन्यः सएवममसमान्यइतिस्मरामिगौरी
सहायचरणांबुजयोः शपामि॥६८॥ यः शांभवः सतुशिवापरविग्रहोतःपूज्यः समान्यइतिमेमतिराविरासीत्॥अत्राधिकारसमयावधिशैल
कन्यानाथांघ्रिपंकजयुगेशपथस्त्रिसत्यं॥६९॥दूतैर्नशांभवगृहाध्वनिगम्यतेपितैस्तद्गृहेषुगमनंनकृतंकदापि॥दृष्ट्वातिदूरशिवभक्तगृहांगणा
निनित्यंनमंतिमुहुरादरतोभटामे॥७०॥नज्ञायतेखलुशिवार्चकगेहवार्त्तातन्मंदिराणिनमनागघसंकुलानि॥दृष्टानिशांकरगृहाणिपुनंति
लोकान्गंगाजलामलतरंगसमानितानि॥७१॥नित्यंशिवार्चनपरायणपादरेणुपुण्यप्रभावगणनातिविचारणेन॥नीतंवयः खलुमयानतदंघ्रिसे
वात्यागः कृतः शिवपदांबुजयोःशपामि॥७२॥ शांभवेषुममसंप्रतिशंभुज्ञानमेवभवतीतिनचित्रं॥तत्रसाक्षिरपितावदुपेक्षांकिंकरिष्यतिशि
वोमयिदीने॥७३॥दीनबंधुरघुनायदिसाक्षीनक्षरक्षितिरपिक्षणदेशः॥भानुरप्यपदिगप्यनिलोपिअक्षपक्षनिहितोत्रशपामि॥७४॥

किंमया कृतमहोदुरदृष्टं निंदयातनुरियं तनुराशीत्॥ चिंतयापिशिवपूजकसेवा किंमयापिनकृतैवसुखाय॥७५॥ शांभवेषुममभक्तिरपारासास्वभावजनिताजननीया॥ केनवामधुरिमाजननीयाद्राक्षदुग्धदधिसारविशेषे॥७६॥ दुर्भगस्यपरमीश्वरभक्तेभक्तिरेवनभवत्यतएव॥ यातनाशतमुपेत्यशरीरं सूकरस्यजठरेसमुपेति॥७७॥ इत्युदीरितमाकर्ण्ययमस्यातिमनोहरं॥ तत्वविज्ञानदंप्राहुःसोसुकाःशिवकिंकराः॥७८॥ शिवकिंकराऊचुः॥ दृढाभक्तिर्महादेवेतवास्तियमवस्तुतः॥ अस्मिन्नर्थेनसंदेहः कस्यापिभुवनत्रये॥७९॥ शिवध्यानरतोनित्यं नित्यंधर्मविचारकः॥ त्वयानसदृशःकोपिकर्मवेदेषुवस्तुतः॥८०॥ आनीतोयंयमभटैःअग्निमार्गेणसत्वरं॥ अयंदृष्टोमहादेव्याश्रीमहादेवसंनिधौ॥८१॥ ततोतिकृपयागौरीप्राहशंकरमानता॥ विनयावनतामंदं मंदस्मेरपुरःसरं॥८२॥ ॥गौर्युवाच॥ पश्यपश्यमहादेवमहाकारुणिकोत्तम॥ नीयतेसोग्निमार्गेणयमभृत्यैर्मदोद्धतैः॥८३॥ तंमोचयमहादेवसतावद्दतिदुःखितः॥ इतोपियातनाघोराकावावदसदाशिव॥८४॥ तद्दर्शनेपिहृदयं विदीर्णंममशंकर॥ सतिष्ठतिकथंसोद्धावह्निमार्गावलुंठनं॥८५॥ अहोनरशरीरेणकष्टमेवप्रतिक्षणं॥ गर्भेपिदुःखमुत्पन्नेपुनर्दुःखंपुनःपुनः॥ धिक्धिक्नरशरीराणियातनाकल्पितान्यतः॥ इतोपियातनाकावाभविष्यतिमहेश्वर॥८७॥ मृदुलातत्तनुः शंभोतरुणव्रणपीडिता॥ व्रणरक्तसमाकीर्णावह्निमार्गेणनीयते॥८८॥ अंगारसागराकारसमार्गस्तस्यवीक्षणं॥ अत्राक्यंतत्प्रवेशास्तुदुरतःसुतरामपि॥८९॥ अहोपातकमेतेनकिमस्तिकृतमक्षयं॥ वह्निसागरमग्नोपिनमुक्तःपापबंधनैः॥९०॥ किमर्थंयातनासृष्टात्वयावाकरुणाकर॥ घोराघोरतराचान्याबहुदुःखप्रदायिनी॥९१॥ करुणालेशहीनत्वंअपकी

र्तिकरंनकिं॥ अहोतद्दुरदृष्टस्यविनाशः केनवावद॥९२॥ करुणारसरूपस्यहृदयस्यतवेश्वर॥ करुणारससंगः किंपुनस्तेसमपेक्षितः॥९३॥ किंज न्मकोटिघटितस्यनतस्यबुद्धिर्जाताशिवार्चकविशेषसमन्वयेन॥ शंभोकदापिकिमिदंनविचित्रमेवनामापितेशिववदन्नश्रुतमेवशंभो॥९४॥ किंकेनापिनजन्मनाशिवकथानाकर्णितानामवानश्रोत्रेपतितंमनागपिनवालिंगंनदृष्टंतव॥ द्वारंसुंदरमंदिरंचशिवदंदृष्टंनदृष्टेरथोयेनायंज्वलनार्ण वेनिपतितःकष्टंप्रकृष्टंगतः॥९५॥ इतिश्रीशिवरहस्येहरारव्येतृतीयांशेउत्तरार्धेयाज्ञवल्क्यजनकसंवादोनामैकादशोध्यायः॥११॥ श्रीकाशीविश्वे श्वरार्पणमस्तु॥ याज्ञवल्क्यउवाच॥ इत्थंबिकावचनरूपसुधांमहेशः पीत्वाप्रहृष्टहृदयःस्मितपूरपूर्णः॥ तामाहशैलतनयामवलंब्यतस्याःतूर्णंकरां बुजयुगंयुगमन्मनोज्ञं॥१॥ ॥शंकरउवाच॥ तेनामितानिदुरितानिकृतानिगौरितन्नाशकानिनरकाणिनसर्वथापि॥ भूपांसवोपिगणनाविषयाःकद चित्तपापराशिगणनानकदापिनूनं॥२॥ शिवेभसितधारणंनकृतमेवतेनासकृत्क्षणमपिक्षणाप्रथितभालभागेपिवा॥ नलिंगमपिवीक्षितंनचमनोज्ञ बिल्वीदलंनदत्तममलंजलंविमलतुंगलिंगेमम॥३॥ नदीपरचनाकृताकपिलगोघृतेनादरात्कदापिघनसारतःप्रबलदीपमालाकृता॥ फलंचननिवे दितंदधिमधुप्रशस्तंशिवेपयोपिघृतमेववाविमलतुंगलिंगालये॥४॥ नशांभवमुखेहुतंघृतसमेतमन्नंमुदापयःप्रभवसारतोदधिविशेषसारादपि॥ समेतसि तशर्करारुचिरहारचक्रेहुतानहारमुपहारमप्यशनमस्यमन्येशिवे॥५॥ नचंदनमपिप्रियेप्यमितमेचवासादरंनपुष्पमपिकेतकीप्रभवमद्रिमल्लीदलं॥ जपाकुसुममेववाविमलतुंगलिंगेशिवेकदापिनसमर्पितंभवतिसद्गतिस्तस्यका॥६॥ शिवेसुरतभोजनव्यसनमेवतस्याभवत्सदापिनकदापिवागिरिश

मंदिरावेक्षणं॥नशांभवजनप्रियः शिवकथारसाभिज्ञता नशांभवितत:कथंभवतितस्यकासद्गतिः॥७॥अनुक्षणमयंमुदानिजशरीरनारीमुखंविलोक्यपुनरा

दरादधमधीस्तदालिंगनः॥विनीतमसकृद्दिनंरतिविशेषवार्तारसैस्ततःकथमुमेगतिःभवतितस्यपुण्यात्मना॥८॥नबिल्ववनदर्शनंकृतमनेनदुष्टात्मना॥

नशंकरपुरीकथाकथमनेननाकर्णिता॥अनेनमणिकर्णिकापयनसेवनंवाकथंकृतंनगिरिकन्यकेभवतितस्यसासद्गतिः॥९॥रुद्राक्षमालानधृतैवतेनदु

रात्मनातस्यनतत्रभक्तिः॥भस्मत्रिपुंड्रंचनतस्यफालेबालेगतिस्तस्यकथंमनोज्ञा॥१०॥पंचाक्षराभ्यासरतोनजातोजातोपिजातप्रसभेनवार्यं॥नशांभवे

नान्वितएवमार्गेततःकथंवागतिरस्यगौरि॥११॥उदारदारोदरहारभारपरीक्षयाकिंक्षयमापनायुः॥अस्यांविवेकेनगतिःकथंवासतांभविनीबहुपुण्यलभ्या॥

॥१२॥कदापिनैवोच्चरिताशिवाख्याप्रसंगतोवागिरिराजकन्ये॥अतःकथंवागतिरस्यगौरिमहात्मनांशांभवपुंगवानां॥१३॥तत्कृताघविलयोनतावता

वन्हिगर्त्तविनिपातनेनवा॥तस्यदुर्गतिरवश्यमद्रिजेभाविनीसतुनभावनांगतः॥१४॥भवमार्गगमनेनभाविनीशोभनानभवतापविच्युतिः॥भाव

मार्गविरहेभवेभवेदुर्गतिर्भवतिसर्वथानृणां॥१५॥भावाएवभवंतिभाग्यनिलयास्तैरेवभाग्योदयस्तेषांतावदशेषदोषविषयाभावेभवोदुर्लभः॥

तस्यस्यात्सुलभंभवाब्धितरणंयद्भूषणंभस्मनारुद्राक्षैरपिशांभवोत्तमपदांभोजस्फुरद्रेणुभिः॥१६॥संसारेखलुकष्टमेवबहुधादुष्टात्मनांसंततिःन

ष्टादुःखकुलाकुलानलकुलज्वालाकुलालिंगिता॥लिंगाराधनवर्जनार्जितमहापापैरपारैःपरं॥घोरासाखलुयातनापुनरविश्रामःश्रमःसंततं॥१७॥

हाहाहानरकेपतंतिबहवोमोहादहोजातवाजन्मानंतरमंतरायरहितंशांगेषुलिंगेषुते॥बिल्वंवाजलमेववासकृदुमेनप्रक्षिप्तंयादराद्घोरापत्कुलयातना

लयभयग्रस्ताःपरंदुर्जनाः॥१८॥हाहाहायमयातनार्थमसकृत्कुर्वंतिपापंजनाःसर्वेमद्विमुखाःसुखभ्रमवशाद्भ्रांतचित्ताःशिवे॥नारीसंगतिमेवदुर्गति
करांनाराधयंस्यादराल्लिंगंनार्मदमेवशर्मदमहोदुष्टस्यकष्टागतिः॥१९॥एतेषांनमनागपींदुशकलालंकारलिंगस्पृहातल्लिंगस्मरणंचतद्गुणकथाबोधःक
दाचिन्मुदा॥तस्मिन्बिल्वदलार्पणंजललवैस्तत्प्रोक्षणंवीक्षणंतस्यानुक्षणमप्यतोतिभयदेवन्हौनिबद्धाःशिवे॥२०॥एतेभस्मकृतत्रिपुंड्ररहिताःतेनैवपुर्णा
र्णवैःसंबद्धाःपतिताःपुनःपुनरमीसंतप्तपूर्णार्णवे॥स्थित्वातत्रपिबंतिपश्यगिरिजेतेषांविमोक्षःकदासाचिंतापिनजायतेममयतस्तेशंकरद्वेषिणः॥
॥२१॥सकृद्वामन्नामस्मरणकरणंतस्यकरणंक्षणंवामल्लिंगस्मरणविमुखोयोभुविभवेत्॥सएवाघोरेस्मिन्पततिनरकेनिर्गतिकथानतेषांदुष्टानामिति
मतिरभूद्देवगिरिजे॥२२॥वृथालापैर्नीतं गिरिवरसुतेतेननुवयोनमन्नामप्रीत्यास्मृतमपिकदाचिन्मुहुरपि॥सकृद्वातेनायंज्वलननिलयःपश्यसदये
नतेनार्चाज्ञाताकथमपिचलिंगेषुकुसुमैः॥२३॥एतद्गृहेषुधनधान्यसमृद्धिरासीत्धान्येनलिंगमसकृत्सकृदेवबायं॥नाराधनोद्यतमतिर्ममतुंग
लिंगेतेनायमत्रपतितोयमयातनायां॥२४॥दीपोनतेनरचितःशिवमंडपांतदीप्तिर्यथातमसिनप्रणतंचलिंगं॥तेनायमायसमहानलतप्तकुंडे
क्षिप्तःप्रधावतिपुनःपतनायगौरि॥२५॥श्रीविश्वनाथगिरिजारमणत्रिनेत्रश्रीचंद्रशेखरशिवेत्यपिनामव्क्लो॥नाकर्णितितिकशयानिहितःसतावदग्नौ
प्रयातितपतिप्रलयोस्यजातः॥२६॥लिंगेनयेननवबिल्वदलंप्रदत्तंतस्यापिकिंभवतिदुर्गतिरेवनातः॥एतस्यघोरनरकालयतोनिवृत्तिर्नास्तीतिनिश्चि
तमसःकुगतिर्भवित्री॥२७॥यैर्नार्चितंकनकचंपकबिल्वपत्रैर्लिंगेमदीयमसकृत्सकृदेवयातैः॥प्रातव्यएवशुनकीजठरेनिवासःपश्चान्महानरकवास

जशोकराशिः॥२८॥प्रातर्नयस्य शिवलिंगसमर्चनेन प्रक्षीणमायुरसकृत्सकृदेववार्यं॥नित्यंमहानरकभोगमवाप्यभूयोभूमंडलेजनिमुपैतिस्रुनीषुगौरि॥२९॥
भक्त्यायैर्नकृता प्रणामरचनाप्रातःप्रदोषेषुवामल्लिंगेषुनतेप्रयांतिबहुधा सद्गर्भवासंपरं॥किंत्वत्यातुरसूकरीकृमिकुलव्याप्तेषुगर्भेषुतेजन्मप्राप्तपुनः
पुनःप्रतिभवेदुःखालयाःसंततं॥३०॥कालःपश्यतिकालकालविमुखान्केवाकलौतानहं॥ज्वालाव्याकुलवन्हिशैलनिरयान्पश्यमिदस्यून्निव॥इ
त्यालोक्यचराचरंचरतिकिंनेतिप्रपश्यादरात्॥कालंकालविशेषदोषनिवहान्पश्यादरादंबिके॥३१॥यमोधर्मविचारज्ञःधर्मराजइतिस्मृतः॥अतिक्रुरो
पिनक्रूरंशांकरान्प्रतिसादरः॥शांकराणामयंमित्रंकथंचिदपितेष्वयं॥नक्रूरदृष्टितनुतेतेषुशांतःसदाशिवे॥३३॥अनंतजन्मनामंतेयदियःकश्चिदादरात्॥
शांकरस्तंविलोक्यापिप्रणमत्ययमादरात्॥३४॥पापराशिःक्षणेनैवतेनतावत्परीक्ष्यते॥तत्रस्याद्यदिपुण्यांशःतदागृण्हातितंयमः॥३५॥विभूत्यनुत्धूननतत्पराणां
सगौरितावत्प्रलयानलाभः॥तदृष्टिपातात्प्रलयंप्रयांतितेतावदर्धक्षणलेशलेशे॥३६॥त्रिपुंड्ररेखाललितंनफालंतेषांयमोमृत्युरमृत्युरेव॥त्रिपुं
ड्ररेखातिविशुध्यफालान्शैवान्प्रतिप्रत्यहमेकएव॥३७॥नतस्यतावत्प्रलयेपिगौरिन्यूनाशिवाचाररतेषुतेषु॥पूज्यत्वबुध्दिःप्रतिवासरंस्यादनुक्षणंरक्ष
कतामतिश्च॥३८॥सशांभवद्रोहरताशनिस्यात्अशांकरापारवनानलोपि॥अशांभवाब्धेर्बडवानलोपिसगौरिमित्रंममनात्रचित्रं॥३९॥लिंगार्चकारा
धकशैवकान्वादृष्ट्वाप्रयत्नेननतोनयेन॥कृतांजलिःस्यादतएवमित्रंयमोमदीयंगिरिराजकन्ये॥४०॥यन्मंदिरेनार्मदलिंगपूजातन्मंदिरस्थान्
सयमोगवायेन्॥विलोक्यदूरात्प्रणतोतिनम्रःकरोतितस्यस्तुतिमादरेण॥४१॥धन्यंगृहंतस्यनदेवतावत्पवित्रमत्रत्रिपुरांतकस्य॥लिंगंमनोज्ञंवसती

तिमत्वानमत्ययं मंदिरमप्यपारं॥४२॥ तन्मंदिरं शंकरमंदिरत्वाद्वृंदारवंद्यं मुनिवृंदवंद्यं॥ तत्सर्ववंद्यं भवतीतिमत्वा पुनःपुनस्तत्प्रणमत्यवश्यं॥४३॥ यदंगेरुद्राक्षः सतु भवति फालाक्ष इति धीर्विभूतेर्वाले शो यदि भवति तत्फालफलके॥ सकृद्वामश्वामप्रजपनपरायस्य रसना तमालोक्यालोक्य प्रणमति पुनर्नृत्यतियमः॥४४॥ पिबंतिये या शिवनामरूपां सुधां मुहुस्तां प्रणमत्यवश्यं॥ ये ते महेशप्रियविग्रहत्वात् पूज्या इति स्तौति यमः सगौरि॥४५॥ यस्यैव मय्यव्यभिचारणी स्याद्भक्तिस्तमाशु प्रणतोतिभक्त्या॥ स्तौति प्रनृत्यत्यपि गौरि नित्यं स एव मित्रं मम नात्र चित्रं॥४६॥ लिंगालयं पश्यति यः प्रयत्नात्तमेव दृष्ट्वा स यमोतिभक्त्या॥ धन्योतिधन्यः सुतरां स धन्यो मान्यो ममेति प्रवदत्यवश्यं॥ लिंगानि ये वा रजनीमुखेषु दृष्ट्वा प्रयत्नेन नमंति धीराः॥ तानाशु दृष्ट्वा प्रणमत्यवश्यं कालोमदाराधनसक्तचितान्॥४८॥ ये प्रातरुत्थाय शिवं स्मरंति मामव्ययं पातकनाशहेतुं॥ तानाशु दृष्ट्वा प्रणमत्यवश्यं कालोमदाराधनसक्तचितान्॥ त्रिपुंड्ररुद्राक्षधरान्विलोक्य दूरादपि प्रांजलिरेव भक्त्या॥ तानाशु दृष्ट्वा प्रणमत्यवश्यं कालोमदाराधनस०॥५०॥ काशीपुरीदर्शनपूतचित्तान् शिवार्चनोत्पन्नसुखप्रवाहान्॥ तानाशु दृष्ट्वा०॥५१॥ मल्लिंगपूजाजनितोत्सवाये मल्लिंगसंदर्शनपावनाश्च॥ तानाशु दृष्ट्वा प्रणमत्यवश्यं कालोमदाराधनसक्तचितान्॥५२॥ कुंभीपाकमुखातिघोरनरकावासान्करोत्यादरात्सर्वान्मद्विमुखान् गिरींद्रतनये कालः सकालांतरे॥ तान्सर्वानपि रासभादिजठरायासान्करोत्यादरात्कुंभीपाकगतान्करोति युनक्तीगर्भस्थिरान् भूरिशः॥५३॥ प्रीतिस्तस्य तु शांभवे खलु महाधर्मे ततः शांभवान्दृष्ट्वा दूरत एव गौरि शिरसा नत्वा प्रबद्धांजलिः॥ धन्याग्रेसरदर्शनेन विकृतिः संसारजा निर्गता धन्योहं कृतकृत्य इत्यपि मुहुः संतोषवर्षाप्लुतः॥५४॥

560

मन्नामस्मरणोद्यतोयदिभवेच्छूद्रोथवापुल्कसस्तंतावत्प्रणमस्तुमेद्विजवरंहाराभिमानच्युतं॥कुंभीपाकगतंकरोतिसुरमप्यन्यस्यवार्तापिकाकालोहारमनोहरा
तिचतुरोलिंगार्चनेसादरः॥५५॥रुद्राक्षैःसितभूतिभास्वररजःपुंजैश्चपूतंवपुःयेषांतच्चरणांबुजप्रणतिषुप्रीतिर्यमस्याधिके॥तद्भिंनानरकेषुकेवलमयंसंपादय
त्यन्वहंव्यासंमद्विमुखैःयमालयमयंपश्यन्प्रवृत्यस्यापि॥५६॥एकेनापिनिजजन्मनायदिसकृल्लिंगानितुंगानिमेबिल्वीकोमलपल्लवैरभिनवैर्नाराधितानि
प्रगे॥दृष्टानिप्रणतानिवासकृदपिध्यातानिवाशैलजेतर्हिप्रापयतिप्ररोदनपरान्कालोनुलंभोनिधिं॥५७॥हेविश्वेश्वरचंद्रशेखरमहादेवस्मरारेहरश्रीकंठ
त्रिपुरांतकत्रिनयनश्रीकालकालावमां॥दीनंमामितियेवदंतिविलसद्रुद्राक्षभूतिप्रभासंवीताःसुकृतैस्तएवगिरिजेकालार्चिताःकेवलं॥५८॥गौ
रीवल्लभमन्मथांधकरिपोकालाक्षविश्वाधिकश्रीकंठप्रमथाधिपावभगवन्नित्यादराःसंततं॥दीनंमामितियेवदंतिविलसद्रुद्राक्षभूतिप्रभासंवीताः
सुकृतैस्तएवगिरिजेकालार्चिताःकेवलं॥५९॥येभर्गत्रिदशार्चितांघ्रिकमलश्रीपुंजविश्रामभूर्भूधराधीश्वरकन्यकाकुचगिरिश्रीपूरसारादर॥
दीनंमामवशंकरेत्यनुदिनंयेवाजपत्यादरात्तेसर्वेगिरिराजराजतनयेकालार्चिताःकेवलं॥६०॥शंभोर्नामदतुंगलिंगनिलयामेयप्रभावप्रभोसंसारार्त्तिभिष
क्तमोत्तममहादेवामराधीश्वर॥दीनंमामवशंकरेत्यनुदिनंयेवाजपंत्यादरात्तेसर्वेगिरिराजराजतनयेकालार्चिताःकेवलं॥६१॥रुद्राक्षप्रियभूतिभूषण
लसद्बिल्वीदलाभ्यर्चितश्रीशूलिन्मृगशावचिन्हितकरांभोजांबुजाराधित॥दीनंमामवशंकरेत्यनुदिनंयेवाजपंत्यादरात्तेसर्वेगिरिराजराजतन
येकालार्चिताःकेवलं॥६२॥श्रीमृत्युंजयकालकंठकरुणासिंधोकपर्दिन्विभोभक्ताभीप्सितदानलोललालितादेवीसमाराधित॥दीनंमामवशंकरेत्य

नुदिनंयेवाजपंत्यादरात्तेसर्वेगिरिराजराजतनयेकालार्चिताःकेवलं॥६३॥मीममेरुशरासनातिरुचिरव्यापारसारादरस्वामिन्चारुसुधाकरार्धघटि
तभाकोटिवीतांबर॥दीनंमामवशंकरेत्यनुदिनंयेवाजपंत्यादरात्तेसर्वेगिरिराजराजतनये कालार्चिताःकेवलं॥६४॥विश्वाधीश्वरहेमहेश्वरमहारुद्रांत
कारेहरज्ञातानंदघनानपायविलसत्सौभाग्यभाग्योदय॥दीनंमामवशंकरेत्यनुदिनंयेवाजपंत्यादरात्तेसर्वेगिरिराजराजतनयेकालार्चिताःकेवलं॥६५॥
भोशंभोभवभीमशंकरहरव्योमांतकेशानघब्रह्मांडोदयपालनव्ययकरव्यापारधीरेश्वर॥दीनंमामवशंकरेत्यनुदिनंयेवाजपंत्यादरात्तेसर्वे॥६६॥
मन्नामोत्सुकमानसामुहुरयं कालःप्रपश्यत्ययंमत्पूजानिरतांश्चपश्यतिमुहुर्भस्मत्रिपुंड्रांकितान्॥रुद्राक्षाभरणांश्चतच्चरणजंरेणुंशिरस्यादरात्
धृत्वानृत्यतिशर्वशंकरमहादेवेतिशैलात्मजे॥६७॥मन्नामामृतमेवजीवनमितिज्ञात्वास्मरंत्यादरात् मामीशेशिवमप्रमेयविभवंयेतेपरंशैलजे॥
कैलासंसमुपेत्यमत्पदरजःपुंजैःसहक्रीडनंकुर्वत्युत्तमभूतिभूषितमहारुद्राक्षवक्षस्स्थलाः॥६८॥नशिवालययातपोतवीतोप्यगजेयोमरणक्षणेक्षणं
वासनसंसृतिसागरांतमेतीत्यनुवारंकालयोक्तिमादरेण॥करुणानममांविकेकदापिप्रलयेवाविगतत्रिपुंड्रफाले।अनलेसपतत्यवश्यमेवेत्यसकृन्म
द्वचनेषुनादरःकिं॥६९॥भानोस्स्यादुदयोपिपश्चिमगिरिद्वारोदराभ्यंतरादिंदोर्वाभ्युदयःकदाचनतथाप्यायुक्षयेभूषणं॥भूतिर्यस्यनतस्यगौरिसह
सासंतोषवार्तापियाकिंवाकल्पमघोरदुःसहतरापारव्यथाभूरिशः॥७०॥यदिजारकिशोरसोदरःसुरनारीसुमनोहरस्तदा॥गिरिजेसुखवासना
भवेदशिवाराधनसक्तचेतसां॥श्वुनकीमृतपोतगर्भजोयदिवाजीसुखाजिसूस्तदा॥गिरिजेसुखवासनाभवेदशिवाराधनसक्तचेतसां॥७१॥यदिमर्क

टकुक्कुटोदरासुरधेनोरुदयोभवेत्तदा॥ गिरिजेसुखवासनाभवेदशिवाराधनसक्तचेतसां॥ यदिपुल्कसकुत्सितांगनाजनितोब्राह्मणपुंगवस्तदा॥ गिरिजे
सुखवासनाभवेदशिवाराधनसक्तचेतसां॥७२॥ यदिदुष्टमलान्मनोहरोदधिसारःसमुदेतिसर्वथा॥ गिरिजेसुखवासनाभवेदशिवाराधनसक्तचे०॥ न
दयापितयोचिताशिवे शिवनिंदानिरतेषुसंततं॥ श्रुतिसंस्तुतभूतिवर्जितःशिवनिंदापरएवसंततं॥७३॥ नकृपापितयांबिकेमतासततंमद्विमुखेषुसर्व
था॥ श्रुतिनिंदनतत्पराःपरंनरकेतेनिपतंतिसंततं॥ श्रुतिबोधितलिंगपूजनंनकृतंयेनदुरात्मनाशिवे॥ समहाघकुलाश्रयोनिशंनरकावासरतोनसंशयः
॥७४॥ श्रुतिबोधितभूतिधारणंनकृतंयेनदुरात्मनाशिवे॥ समहाघकुलाश्रयोनिशंनरकावासरतोनसंशयः॥ रुद्राक्षभूषणमुमेश्रुतिषुप्रसिद्धंतत्का
र्यमेवसततंद्विजपुंगवैस्तु॥ त्यक्त्वा (कृत्वा) तदंतसमयेनरकंप्रयांतिसत्यंत्रिसत्यमिदमूर्ध्वभुजोवदामि॥७५॥ शिवलिंगमतुंगमेस्तुतुंगंकिमनेनापिविशेषचिंतनेन॥
यदिनाम्मिदमीक्षितंस्मृतंवासकृदभ्येतिममांतिकंभवानि॥ नयनांबुजमीक्षणायसृष्टंशिवलिंगस्यसमर्चितस्यगौरि॥ तदवेक्षणहीनजन्महीनंन
रकावासनिवासहेतुभूतं॥७६॥ परमंखलुकर्णभूषणंशिवनामश्रवणंमनोहरं॥ तदपारसुखावहंसदानकृतंयेनसयातियातनां॥७७॥ कुसुमार्चित
लिंगचिंतनंमनसःकृत्यमितिश्रुतंततः॥ तदपास्यवसंतिदुर्जनाःप्रलयायप्रभवंतिकेवलं॥७८॥ कृत्यंलिंगसमर्चनंकरतलस्येतिश्रुतंतेनचेत्तन्नैवा
सकृदादरेणनकृतंयद्वासकृत्तेनकिं॥ तस्यस्यात्फलमित्यतःसपततिज्वालाकुलव्याकुलेकुंभीपाकजपावकेसशुनकीयोनिंप्रयास्यत्यपि॥७९॥
उद्धृत्याद्यभुजद्वयंनिगदितंलिंगार्चनंकेवलंमोक्षोपायतयाश्रुतंश्रुतिशतैस्तैनैवमुक्ती (कृतिः) परा॥ तत्रस्यादधिकारितापिभसितेनोद्धूलनंसर्वदातेनैवा

नुलवंत्रिपुंड्ररचनाभालादिकेवालिके॥८०॥मन्नामस्मरणेनकेवलमुमेप्राणप्रयाणेस्थितंभस्मांगेकरकंठकर्णयुगलेरुद्राक्षमालायदि॥मुक्तिःस्या
दनपायिनीममसखामस्मान्मदीयंधनंसर्वंतस्यसएषकेवलमहंसत्यंत्रिसत्यंशिवे॥८१॥इतिश्रीशिवरहस्येहराख्येतृतीयांशेयाज्ञवल्क्यजनकसं
वादोनामद्वादशोध्यायः॥१२॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥याज्ञवल्क्यउवाच॥इत्थंसागिरिराजराजतनयाश्रुत्वामुहुःशंकरंव्याहारामृत
सागरान्करुणयाप्राहप्रमोदावहं॥नत्वातत्पदपंकजंकरतलेधृत्वापिनत्वापिसातत्कृत्यंपुनरेवसस्मितमुखंस्मेराननाशंकरं॥पार्वत्युवाच॥स्वा
मिन्शंकरचंद्रशेखरमहादेवामराधीश्वरव्याहारामृतसारपूररचनाकर्णाधितंसायते॥अद्यापूर्वमपूर्वयुक्तिमणिभिर्व्योसपरंभूषणंसंपूर्णममक
र्णयोर्विरचितंतन्मेपरंभूषणं॥शंभोतस्यमहाप्रभावं(गुण)समयेतास्मिन्नरण्येशुभेदूरेशंकरमंदिरंरुचिकरंतस्मात्कि लाद्यानिलः॥जातस्तत्कुणपंस्पृशं
श्रुपगतोनूनंसधन्यस्ततः तस्यैवंयमयातनात्वनुचितामुक्तिश्चसंभाविता॥३॥तेनैवं(व)हितेननीतममलंतत्काननव्याहृतंयत्किंचिद्दवभस्मतेनचत
नुस्तस्यातिपूतातनुः॥यस्यैवंयमयातनाकथमयंमुक्तोस्तुकातावताहानिस्यादपराधिनामवतमप्यर्धेंदुमौलेस्मृतं॥४॥यस्यांगेदवभस्मरेणु
(पावन)पवनस्तंपायनंमेनिरेवातःशंकरादुपगतःपापापहारोद्यतः॥तेनाप्यन्वितएवसोयमधुनामुक्तोस्तुमय्यस्तिचेत्स्नेहस्तेस्मरशासकासकृदिदंव
क्तव्यमप्यस्तिकिं॥५॥दवसितभसिताणुव्यापवात्याविनीतश्छदपतनजभीतिव्यावृत्ताभूतसंघाः॥निजतनुमतिघोरांक्षुर्पे पासातिदूनांजहुरति
मुदितास्तेब्रह्मलोकंप्रपन्नाः॥६॥सितभसितकणानांयःप्रभावःसमेरैःकथमपिविदितोयानामरैर्गामयाया॥शिवसितभसितेनोद्धूलितस्तस्य

तत्वंस्तुतमपिनिगमांतैर्ज्ञायितेनत्वयाकिं॥८॥भूतप्रेतपिशाचघातुकतयाज्ञाताविभूतिस्त्वया सासंसारपिशाचनाशकतयाज्ञातानकिंशंकर॥तद्धूतेनविधूत
पातककुलास्तेकालकालाधुनासर्वेषामपिपावनासुरसरिद्धातान्पुनंस्येवते॥९॥हरजातुनजायतेनरस्मरणेनापिविभूतिधारिणः॥दग्धभूतिरजःप्रसार
जःपवनःपावयतीतिनाद्भुतं॥१०॥इतितद्वचनंश्रुत्वाप्रहृष्टःपरमादरात्॥हरोपिप्रेरयामासतमानेतुंस्वकिंकरान्॥११॥नंदिकेशंचभृंगीशंरिटिंचाहूय
सादरं॥प्राहप्रसन्नवदनोहरोगौरीमनोहरः॥ ॥शिवउवाच॥पश्यपश्यसभूपालोनीयतेयमकिंकरैः॥पातितोवन्हिकुंडेषुकशाघातातिपीडितः॥१२॥
तेनयद्यपिपापानिकृत्यान्येवप्रतिक्षणं॥तथापितस्यपापानिनष्टानिदग्धभस्मना॥१३॥अतस्तस्यनिवासोस्तुब्रम्हलोकेततःपरं॥सपुनर्भूपतिर्भूत्वालिं
गार्चनरतोभवेत्॥१४॥समोचनीयोयत्नेनयमोतिकुपितोधुना॥ससांत्वनीयोयत्नेनमदाज्ञावचनैर्मुहुः॥१५॥दग्धभस्मान्वयोभृत्तःतस्यैवमरणोत्तरं॥
इतितत्सांत्वनंयुक्तंअन्यथाकुपितोभवेत्॥१६॥इत्युक्तमीश्वरेणेतितैरुक्तावयमादरात्॥अतःसमागताएववयमप्यादरादिह॥१७॥याज्ञवल्क्यउवा
च॥इतिशंकरदूतदूतवाक्यैःसयमस्तावदतीवहृष्टचित्तः॥तमुपायनकल्पनैःप्रहृष्टंसचकारप्रयतोनृपंनृप॥१८॥शिवाज्ञावचनैःकालःससंतुष्टस्त
दानृपं॥रत्नासनस्थंकृत्वास्तुपूजयामाससादरं॥१९॥ततःप्राहातिसंतोषंचित्रगुप्तंसविस्मितः॥नंदिकेश्वरदूतेषुशृण्वत्स्वेवनृपोत्तम॥२०॥॥यम
उवाच॥करुणारससारसागरोहरएवैषमुहुःश्रुताश्रुतिः॥अतएवहितस्यसादयाप्यतिदीनेष्वपराधसिंधुषु॥२१॥महेशकरुणारसप्रसरमात्र
मेवक्षणंभविष्यतियदातदासकलशोकनाशःक्षणात्॥२२॥अपारकरुणानिधिस्त्रिदशवर्गवंद्यःशिवःसएवगतिरित्यहंदिवसयापनंमन्महे॥अहंत

वश्चान्यः सकलसुरवर्गेष्वपिगणाः क्षणंयामग्रामव्यवहरणयोग्यंकथमपि॥महादेवस्यासीदिदममितपुण्यैरितिमतिःप्रवृत्तासागौरीकरकमललीलासुकलि
ता॥२३॥परंब्रम्हानंदाभ्युदयसमयोयंममयतोमहादेवोदेवःप्रथमगणवृंदारकगणैः॥नदृष्टोवेदांतैरपिगिरिजयासाकमसकृन्मदीयावार्ताभूदमितदययाकेव
लमहो॥२४॥अहंतावद्गौरीरमणचरणांभोजरजसप्रभावज्ञस्तज्ञःप्रचरचरवार्त्तासुचतुरः॥हरोधीरोवीरः खलुकरुणयामय्यपिमुहुःदयापूर्व्यात्पेवितर
तिमुदामामकमिति॥२५॥माहादेवस्याहंहितकरवदत्वेनविदितोशिवेभक्तिश्चत्थाप्यनवरतमस्यास्तुनियता॥तयामुक्तिर्भाग्यंसकलजनवंद्यत्वमपिमे
भविष्यत्येवेतिप्रमितिरभवत्साशिवकृपा॥२६॥इतितद्वचनंश्रुत्वागणाः संतुष्टमानसाः॥तन्नीत्वाब्रम्हसदनंप्रापुर्यमसमर्चिताः॥२७॥तमागतंविधि
र्दृष्ट्वागणान्नीतंगणानपि॥पूजयामासविधिवत्संतोषंजनयन्मुदा॥२८॥ततःपरंगणाःसर्वेशिवलोकंययुर्मुदा॥सभूपतिर्ब्रम्हलोकेबहुकालंस्थितोनृप॥२९॥
ततःपरमवापायंदिव्यदेहमुपाश्रितः॥रेवातीरेबालदेहोरूपलावण्यसंयुतः॥३०॥तत्ररेवाजलेस्नात्वाभस्मनोद्धूल्यभक्तितः॥स्वांग[illegible]मील्यनयने
ददर्शविपुलान्नदीं॥३१॥ततःप्राहसबालोपिप्राहातिचतुरंवचः॥यद्वचनुः श्रवणादेवमुक्तिः करतलस्थिता॥३२॥ ॥बालउवाच॥नर्मदे श
र्मदेपाहिशंगंलिंगमनोहरं॥हरस्याप्यनुचारंतेविलोकनमहोत्सवः॥३३॥तीरजास्तरवोप्यंबलिंगरूपास्तवामले॥चरलिंगस्वरूपास्तेविचरंतिनरा
अपि॥३४॥अचलंयच्चरंतीरेनीरेवातवनर्मदे॥तत्सर्वंलिंगरूपेणदृश्यतेपापनाशनं॥३५॥ब्रम्हलोकेपिलिंगानितवदृष्टानिकोटिशः॥
ब्रम्हणा तेषु लिङ्गेषु क्रियते शङ्करार्चनम्॥३६॥शक्तिरत्यद्भुता दृष्टा तव लिङ्गे शिवात्मके॥ यल्लिङ्ग दर्शनादेव मुच्यते पापकोटिभिः॥३७॥ नर्मदा तीरतरवः प्रया-

न्ति शिवमन्दिरम् ॥ गणास्तत्पूजनोद्युक्ताः सर्वदा खलु मन्दिरे ॥३८॥ अतः परमहं तीरे तवैव हि निरन्तरम् ॥ वसामि शिवसायुज्यं तेन वा तद्भविष्यति
३९॥ इत्युक्त्वा नर्मदा लिङ्गं तज्जलैर्विमलैरपि ॥ अभिषिच्य प्रयत्नेन प्राप्य तच्च पुनः पुनः ॥४०॥ तत्तीरे बिल्वपत्राणि नवानि निर्मलान्यपि ॥ प्रक्षिपन्नेव
बहुधा चचार स शनैः शनैः ॥४१॥ तत्तीरवासिनः सर्वे तं दृष्ट्वा बालकं मुहुः ॥ परमाश्चर्यसम्पन्नाः प्रहृष्टास्ते पुनः पुनः ॥४२॥ ततस्तत्तीरनगरे
चित्रकेतुरिति श्रुतः ॥ तस्मै निवेदयामासुः बालवृत्तान्तमास्तिकाः ॥४३॥ प्रधानपुरुषा एव विनयानतमस्तकाः ॥ कृताञ्जलिपुटास्तज्ज्ञाः
शिवभक्तिपरायणाः ॥४४॥ प्रधाना ऊचुः ॥ राजन्नत्यद्भुतं दृष्टं रेवातीरे मनोहरे ॥ पुरा न दृष्टमस्माभिः तादृशं विस्मयावहम् ॥४५॥ राजन् बा
लोऽतिविमलः स जातः प्रायशः शम्भुप्रियः ॥ नेत्रयोस्तस्य माता वा पिता वा नैव दृश्यते ॥४६॥ सूर्यमण्डलसंकाशो मन्मथापरविग्रहः ॥ यादृशं तस्य सौंदर्यम्
तादृशं दृष्टमेव न ॥४७॥ विशालनेत्रकमलः स्वपादकमलश्रिया ॥ तिरस्करोति कमलान्यारक्तानि नृपोत्तम ॥४८॥ प्रदक्षिणप्रक्रमेण स्खलत्येव स
यद्यपि ॥ तथापि कुरुते राजन् स लिंगानां प्रदक्षिणम् ॥४९॥ नृत्यत्यग्रे स लिङ्गानां करसम्पुटघाततः ॥ स्वेदधारापरिक्रान्तशरीरमपि विस्मरन् ॥५०॥
क्षणं निमील्य नयने करोति ध्यानमादरात् ॥ पश्चादाश्चर्यसंयुक्तः पुनर्लिङ्गानि बालकः ॥५१॥ तं दृष्ट्वा मुनयः सर्वे रेवातीरे निवासिनः ॥ परमाश्चर्य
सम्पन्नाः तिष्ठन्ति परिवृत्य तम् ॥५२॥ ते तं पश्यन्ति मुनयः स बालस्तान्न पश्यति ॥ स चानिमिषया दृष्ट्या धीरो लिङ्गानि पश्यति ॥५३॥
उदरार्योऽपि पश्यन्ति गोभिः सह विशेषतः ॥५४॥ मधुरं शिवनामानि स गायति मुहुर्मुहुः ॥ गंधर्वगानविद्यायां निपुणः प्रायशः स तु ॥५५॥

इतितद्वचनंश्रुत्वाराजाविस्मितमानसः॥तद्दर्शनायत्वरयानिर्गतोवाजिवर्त्मनः॥५६॥वालकालोकनायतुभूपतिस्त्वरयागतः॥रेवातीरंतदाता
वत्गतिभेदोपिवाजिनम्॥५७॥नज्ञातस्त्वरयातस्यगमनोत्कण्ठयान्नृप॥तुरङ्गकोटिघटितोमत्तमातङ्गकोटिभिः॥५८॥संवृतोभूपतिस्तीव्रम्
रेवातीरमुपाययौ॥ततोदूरात्सराजापिमुनिवृन्दानिकोटिशः॥५९॥उपर्युपरिसंक्रान्तशरीराणिविलोकयन्॥आनन्दाश्रुसमाकीर्णःतुरङ्गाद्वती
र्यसः॥यया प्रधानसंवीतःसनकाद्यैःसमावृतः॥वालस्यनिकटेगत्वासराजाविस्मितःपरम्॥६१॥मन्दंप्रदक्षिणीकृत्यदण्डवत्प्रणतोभुवि॥
ततःसर्वेसमालोक्यवालकंविस्मयापहम्॥६२॥स्थिताःसर्वेपिपरितःतत्रचित्रार्पिताइव॥सनपश्यतिराजानंनप्रधानान्मुनीश्वरान्॥६३॥ना-
त्मानञ्चपरंलिङ्गंपश्यन्नभ्यार्चितंमुहुः॥नावदत्तैवकेनापिशिवनामपरंशिवम्॥६४॥उच्चैरश्रुच्चरन्धीरोप्यानन्दाश्रुपरिप्लुतः॥तंदृष्ट्वा
विस्मयाविष्टाःतेसर्वेविष्टराश्रयाः॥६५॥निविश्यसमंमत्वास्थानंहाराश्रितंस्थिताः॥सपुनःपुनरादायशीतलंविमलंजलम्॥६६॥अभि
षिञ्चतिलिङ्गानिविल्वैःसंपूजयन्मुहुः॥तंविलोक्यसलज्जास्तेसनकाद्याःमुनीश्वराः॥६७॥नत्वातमूचतुर्कोऽसि॥तेकृताञ्जलयस्त
दा॥६८॥ततःसोऽपिमहादेवसदाशिवइतीरयन्॥नान्यांवाचमुवाचापिनददर्शचतान्नृप॥६९॥ततःपरंजिताहारास्तेसर्वेविस्मया
कुलाः॥आसाद्यतंविलोक्यैवस्थिताःकेवलमादरात्॥७०॥स्नात्वारेवाजलेसर्वेत्रिपुण्ड्राङ्कितमस्तकाः॥७०॥उद्धूलिताङ्गाःशाङ्गा-
स्तेशाङ्गार्चनपरायणाः॥सोपिवालःपुनःस्नात्वाभस्मोद्धूल्यसादरम्॥७१॥त्रिपुण्ड्रधारणंचक्रेरुद्राक्षसमलङ्कृतः॥पश्चाद्विलोकितंतुङ्गम्

शाङ्कं लिङ्गं स सनार्मदम् ॥ अभिषिच्य नवैः बिल्वैः पूजयामास शङ्करम् ॥ ७३ ॥ तन्दृष्ट्वा ते जनाः सर्वे विस्मयाविष्टचेतनाः ॥ धन्योऽयङ्कृतकृत्योऽयङ्कोऽपि मानुष-
विग्रहः ॥ प्राहुः कोऽयमिति प्रीत्याहारो हारमनोहरः ॥ ७४ ॥ न चास्याहारलेशोऽपि प्रातरारभ्य सर्वथा ॥ तच्चरित्रं विचित्रं हि त्रिनेत्रार्चनया चिरम् ॥ ७५ ॥
कालं नयति बालोऽपि न चेदं बालचेष्टितम् ॥ न चास्य तत्त्वं विज्ञातुं शक्यते मनुजैरिह ॥ ७६ ॥ त्यक्त्वा बालं न गन्तुञ्च प्रवृत्तं मानसं खलु ॥ अनादरोऽयमाहारे किञ्चनाहार-
दोष्यतः ॥ ७७ ॥ न नारदोऽपि नो रवा तस्या नास्त्येव हि ॥ इत्यालोच्य नृपः सोऽपि कृपयापरया युतः ॥ ७८ ॥ गोक्षीराहारमादाय ययौ बालकसन्निधिम् ॥ एतस्मिन्नन्तरे
काले
विधिः सायं शिवार्चनम् ॥ ७९ ॥ कृत्वा रेवामवाप्याथ तं ददर्श स बालकम् ॥ भूतिरुद्राक्षधृताङ्गम् । शिवनामजपोत्सुकम् ॥ ८० ॥ चतुर्मुखं विलोक्याह बालकः शिव शिवेति
सः ॥ ततः परं स राजापि तं विलोक्याह चतुर्मुखम् ॥ ८१ ॥ पूजयामास हृष्टात्मा शिवभक्तिधिया परम् ॥ ततः परमुवाचायं राजा परमधार्मिकः ॥ राजोवाच ॥
कोऽयं त्वया ज्ञायते किन्न्वेति विनयान्वितः ॥ ८२ ॥ नृत्यत्यग्रे महेशस्य लिङ्गरूपस्य केवलम् ॥ प्रातरारभ्य सर्वेऽपि विप्रेन गरवासिनः ॥ ८४ ॥ नाहारे च्वादर
एव विहारे सुतरामपि ॥ अद्भुता बालचेष्टेयं दृश्यते गोधनैरपि ॥ ८५ ॥ न पीतञ्च जलं गोभिर्यवसञ्च न भक्षितम् ॥ अग्निहोत्रादिकर्माणि मुनिभिर्विस्मिता-
न्यपि ॥ ८६ ॥ लज्जयानीयते कालः केवलं तद्विलोकनात् ॥ मुनीश्वरकलत्राणाम् गात्राण्यपि विशेषतः ॥ ८७ ॥ विचित्राणीव दृश्यन्ते तेषु संचार एव न ॥
मुनिबालाश्च पश्यन्ति तस्य बालस्य चेष्टितम् ॥ ८८ ॥ आहारस्वैरपि त्यक्तः वार्ता नान्यस्य सर्वथा ॥ नायं मुनिर्न गन्धर्वः पन्नगो वानरोऽपि वा ॥ ८९ ॥ सुरोऽय-
मसुरो वापि सिद्धो वा यक्ष एव वा ॥ केयं सृष्टिर्महेशस्य लोकानां विस्मयावहा ॥ ९० ॥ न माता दृश्यते तस्य न भ्राता न च बान्धवः ॥ न सखा नोपदेष्टा

६७

हरस्थोपरि
रह०२
४१

स्तनवत्यपि बालकः ॥ ९१ ॥ नगरं प्रति गन्तुं वा न मनो जायते मम ॥ वृथैव गतमायुर्मे चिन्ता तावत्प्रजायते ॥ ९२ ॥ पञ्चवत्सरपर्यन्तं मा शिववार्तापि न श्रु-
ता ॥ गर्भवासे बहून्येव दुःखानि विविधान्यपि ॥ ९३ ॥ भुक्तान्येवानन्तेषान्तु गणना शक्यवेऽपि न ॥ जननीजठरानलेन तप्ता जठरे तावदियं तनुस्तनुर्मे ॥ अधुना-
पि न वासना गता मे वत हा हन्त गतेति हा महेश ॥ ९४ ॥ जठरानलतापपापभीतिर्न गता तावदिहापि नूनमस्य ॥ नरकालय एव गर्भवासः स न सह्यः ख-
लु सर्वथा समासीत् ॥ ९६ ॥ बहुधा खलु दुःखमेव भुङ्क्ते जननीयोनिविनिर्गमक्षणेऽपि ॥ तदनु क्षुधयातिपीडितोऽहं जननीस्तन्यमपेक्षितन्तदा-
हि ॥ ९७ ॥ न च वागपि निर्गता मभूद्वदनात्सा रसनातिकुण्ठिता ॥ मलसङ्कुलदेहयापि प्रबलं दुःखमभूत् पुनः पुनर्मे ॥ ९८ ॥ अङ्गारशकटीधा-
टीखट्वानिकरतापिनी ॥ सा पितापायतत्तापप्रनाशो नाभवत्खलु ॥ ९९ ॥ औषधानि कटून्येव तिक्तान्यपि कदाचन ॥ सेवितान्यपि दुःखाय
जातान्यपि विशेषतः ॥ १०० ॥ ततः परं दुर्व्यसनेन नीतं वयः कियत्कामविमोहितेन ॥ हा हन्त नाराधित एव शम्भुर्भूयो भवाम्भोनिधिकर्ण-
धारः ॥ १ ॥ हारेषु दारेष्वपि योऽनुरागः स एव हारे न हरेऽपि हारे ॥ लिङ्गेति तुङ्गे तत एव नायुः गतं किमेतस्य वृथा तदायुः ॥ २ ॥ यथा म-
मोत्तुङ्गतुरङ्गवाञ्छा मातङ्गवाञ्छापि तथा कदापि ॥ लिङ्गे न शाङ्गे खलु संस्पृहोऽहं हा हा हतोऽहं विधिसंहतोऽहम् ॥ ३ ॥ यथा ममोत्तुङ्ग-
कुरङ्गलोचनाविलोचनालोचनधीस्तथा चेत् ॥ उत्तुङ्गलिङ्गेष्वपि शाङ्गसङ्गेष्वत्यद्भुता तर्हि विमुक्त एव ॥ ४ ॥ न संस्तुतो न प्रणुत एव
नूनं हा हा हतोऽहं हत एव नूनम् ॥ दारप्रसङ्गेषु च न शाङ्गवार्ता यतस्तदा मारशराभिघातः ॥ ५ ॥ शराभिघातेन सुरोऽपि मूढः ततो

ह०तृ०उ०
अ०१३

मृडे भक्तिरभूद्गुहा का ॥ कौमारे वा यौवने वार्धके वा बुद्धिर्मे भी तुङ्गलिङ्गार्चनेषु ॥ ६ ॥ नाभ्यस्ता शांभवी ज्ञानविद्या लोके या मे कामतिर्न्नभविनी ॥ शंभो गौरीवल्ल

भ नाथ नाथ पाहि स्वामिन्पापराशिं कृपाशम् ॥ ७ ॥ कथ्यं मृत्युर्मा मबैति प्रकामं किं कामारे मय्युपेक्षा तवापि ॥ त्वं मे माता त्वं पिता मे सखा पितृत्वं भ्राता मे शाङ्करो

पित्वमेव ॥ ८ ॥ त्वं मे त्राता प्राणरक्षामणिस्त्वम् नान्यं जाने त्वां विना मे शरण्यम् ॥ ९ ॥ कदा रेवातीरे हर हर महादेव भगवन् महारुद्रेशान स्मरहर हरांधकरिपो ॥

उमाकान्त भ्रान्त प्रकटित जटाजूट भगवन् ॥ इति प्राणत्यागं हस्त क्वचिदपि करोमि प्रसभतः ॥ १० ॥ कदा सद्रुद्रस्म प्रकररुचिरास्यात्तनुरियम् ॥ महारुद्राक्षाणा

म पिवितत माला तिरुचिरा ॥ करे रेवातीरे रुचिर हर लिङ्गस्य निकटे ॥ शरीरस्य त्यागं शिव शिव महेशेति विलपन् ॥ मुहुर्भस्मकुलं शितभासित रुद्राक्षवल्ल

यं शरीरस्य त्यागं हर हर महेशेति कलये ॥ ११ ॥ कदा मुदा शाङ्करमन्दिरेषु वृन्दारमन्दार विजृंभितेषु ॥ लिङ्गेषु तुङ्गेषु विलोकितेषु महाप्रयाणावसरोऽस्य

भावि ॥ १२ ॥ भवस्य भावानुचरस्य शम्भो कथं भवाम्भोनिधि भञ्जनं स्यात् ॥ त्वच्चेद्भवाम्भोनिधिकर्णधारो महेश्वरः शाम्भव संघ बन्धुः ॥ १३ ॥ कदा रेवातीरे

हर हर महेशेति विलपन् ॥ मुहुः प्राणाँस्त्यक्त्वा शिवभट विमानोत्तमगतः ॥ यमेन्द्र ब्रह्मादि स्तुतिमुदित चित्तः शिवपदम् प्रपद्ये यत्प्राप्य पुनरपि न सं

सारकलनम् ॥ १४ ॥ कदा शरीरं भासितेन धूतम् रुद्राक्षमालाभिरलंकृतञ्च ॥ त्यक्ष्ये विरूपाक्ष विलोकनेन स्मरन् विरूपाक्ष तणार विन्दम् ॥ १५ ॥ मत्प्रार्थनीयं मर

णे महेश महेश नामस्मरणं सभस्म ॥ रुद्राक्षमाला मरणं मदङ्गे तुङ्गं च लिङ्गं मम नर्मदायाः ॥ १६ ॥ रेवा लिङ्गं मरणसमये यस्य नास्त्येव तुङ्गम् ॥ श्रौतं

भस्म स्फुटित रुचिरस्थूल रुद्राक्षमाला ॥ विद्या शुद्धा शांभवी तस्य मुक्तिः नास्तीत्युक्तं सर्वदा सिद्धसंघैः ॥ १७ ॥ संतोषोऽयं भूरि पुण्यैः कलभ्यः शम्भो शम्भु ध्यान

ह०शि०र०३ ४२

मात्रानुरागः ॥२६॥ मत्वन्नामोक्तिर्मुक्तिकान्तानुरागे हेतुर्नूनं सत्यमेतन्नि सत्यम् ॥२७॥ अस्माकं मरणक्षणे यदि मुदा रेवातटे नार्मदम् । लिङ्गं लोचन गोचरं नवलसद्बिल्वीदलाभ्यर्चितम् ॥ २८ ॥ अस्माकेऽपि विशेषतो यदि भवेद्रुद्राक्षमालाऽपि वा ध्यानं शाम्भवसंगतिः शिव शिवेत्युक्तिस्तदा किम् भयम् ॥ २९ ॥ शिवस्मरणपूर्वको यदि भवेद्विहारस्तदा जितं खलु जगत्त्रयं कृपमदुर्दृशा वासना ॥ कृ वासवचतुर्मुखाद्यमरभाववाञ्छा तदा महेश्वरपदाम्बुजस्मरणमेव मुक्तिर्मम ॥ ३० ॥ इति श्रीशिवरहस्ये हराख्ये तृतीयांशे उत्तरार्द्धे याज्ञवल्क्यजनकसंवादो नाम त्रयोदशोऽध्यायः ॥१३॥ याज्ञवल्क्य उवाच ॥ इति तद्वचनं श्रुत्वा सर्वपापहरं परम् ॥ तमाह धन्य धन्योऽसि धन्योऽसीति मुहुर्मुहुः ॥१॥ यद्वक्तव्यं मया तद्धि त्वयैवोक्तं नराधिप ॥ अतः परं किमत्रास्मिन्प्रसङ्गेऽवसरो मम ॥ २ ॥ रेवातीरनिवासिनः शिवपदध्यानामृतास्वादनात्क्षुत्तृड्बुद्धिरभूदिहेति किमिदं चित्रं स्वतस्ते यतः ॥ शुद्धान्तःकरणाः प्रमाणविषयाः तद्वीततस्ते परम् । रेवालिङ्गसमर्चकाः शिवपदं यान्त्येव नान्याद्भुतम् ॥३॥ मुक्तिः प्राप्य परा तावद्रेवातीराङ्कुरैरपि ॥ नैरेरिव किमत्र स्यादद्भुतं नरपुंगव ॥४॥ रेवातीरतरङ्गसङ्गतमहावाताभिघाता यदा तत्तीरे तरवः पतन्ति पतिताः ते तावदत्युत्तमाः ॥ सम्प्राप्यैव गतिं प्रयान्ति शिवामित्येतेऽपि धन्यास्ततस्तत्तीरप्रभवाः प्रभृति विभवाः सर्वे न लिङ्गानि किम् ॥५॥ यावद्रेवातीर(वात)प्रवाप्तिः तावन्मुक्तिर्जन्तुजातस्य सत्यम् ॥ जीवन्मुक्तो नर्मदातीरजन्तुः मुक्तिस्त्वान्ते स्यात्परार्ध्यन्तकाले ॥६॥ तस्माद्द्वारैर्नर्मदातीरवासो देवा(श्री)स्यः क्वापि काशिवासे(न) तुल्यः ॥ काशीरेवाप्रस्तरो नैव लिङ्गं रेवातीरप्रस्तरो लिङ्गमेव ॥७॥ पुरा नदीसमूहेषु तपस्तप्तं नृपोत्तम ॥ पाकत्वं (समः) प्रयत्नात्तु पावने त्वाति निश्चयात् ॥८॥ हिमवत्कन्दरे गङ्गा तपश्च-

हृ०त०३० अ०१३

के मनोरथैः ॥ युगानामयुतं राजन् देवानां विस्मयावहम् ॥ ९ ॥ ~~युसनदीसमूहेन तपस्तमं नृपोत्तम ॥ पावनत्वं~~ प्रज्वाल्य पावकान् पश्चात् पुरतः पार्श्वयोरपि ॥ पश्यन्ति मण्डल
मध्यानोर्ध्यायन्तो साम्बमीश्वरम् ॥ १० ॥ सूर्य्यमण्डलमध्यस्थं स्वर्णकुण्डलमण्डितम् ॥ स्वर्णाङ्गदप्रभाकीर्णं स्वर्णकेयूरभासुरम् ॥ ११ ॥ दिव्य रत्नाङ्गुलीयानाम्
शोभया च विराजितम् ॥ किरीटताराहाराणां राजिभिश्च विराजितम् ॥ १२ ॥ सुवर्णरचितानन्तमणिमेखलयावृतम् ॥ स्फुरन्नूपुरसम्भूतसिञ्जितै
श्च विराजितम् ॥ १३ ॥ दिव्याभरणसम्पूर्णवामाङ्गगिरिजायुतम् ॥ सेव्यमानं सुरगणैः प्रमथाद्यैश्च सेवितम् ॥ १४ ॥ स्तूयमानं वेदसंघैः नीलग्रीवं महे-
श्वरम् ॥ फाललोचनमाराध्यं त्रिशूलाभयपाणिनम् ॥ १५ ॥ कटाक्षैरमृताकारैः प्रपश्यन्तं मुहुर्मुहुः ॥ स्वभक्तान्नन्दिकेशादीन्मन्दारासारसेवितम् ॥ १६
गौरीमनोहरं धीरं जरामरणवर्जितम् ॥ अप्रमेयमनाद्यन्तमच्युतं केशं कपर्दिनम् ॥ १७ ॥ कल्याणरूपमानन्दमानन्दघनमद्वयम् ॥ उत्पत्तिस्थितिसंहारहेतुभूतं
सनातनम् ॥ १८ ॥ तडिन्मण्डलसंकाशं दिव्यवस्त्रविभूषितम् ॥ हिरण्यबाहुमीशानमपराजितमद्वयम् ॥ १९ ॥ महाक्रियाप्रदातारम् दातारम् सम्पदामपि ॥
स्मेरधाराधरधरं नित्यं गौरीमनोहरम् ॥ २० ॥ अपारकरुणापूरं परिपूर्णञ्च सुन्दरम् ॥ प्रतिक्षणेऽप्यभिनवं महेशं सुरस्तुतम् ॥ २१ ॥ अनन्तमप्रतिमामेयकल्याण
गुणसागरम् ॥ वरदानोन्मुखं शान्तं सर्वाभयवरप्रदम् ॥ २२ ॥ एतादृशं महादेवं ध्यायन्तो मनसा शिवम् ॥ गङ्गा परं तपस्तेपे दिव्यसुन्दरविग्रहा
॥ २३ ॥ देवास्तत्तपसा क्षुब्धाः सर्वे मुनिवरा अपि ॥ गिरिकन्दरसङ्कीर्णा चकम्पे सधराधरा ॥ २४ ॥ मेरुमन्दरमुख्याश्च गिरयस्तत्तयोग्निना ॥ सन्तप्ता
स्व हिमवान् प्रतप्तो गन्धमादनः ॥ २५ ॥ विन्ध्यश्च निषधश्चान्यैः शैलादः पर्वतेश्वरः ॥ अन्ये च गिरयः सर्वे संतप्तास्तत्तपोग्निना ॥ २६ ॥ रेवया च तपस्त

प्तं तथा यमुनया नृप ॥ सरस्वत्या तपस्तप्तं तप्तं शोणभद्रया ॥ २७ ॥ भद्रया च तपस्तप्तं फल्गुन्या शोणयापि च ॥ गोदावर्या तपस्तप्तं वेण्यया कृष्णया तथा ॥ २८ ॥ भीमयापि तपस्तप्तं कावेर्यापि नृपोत्तम ॥ कुमुद्वत्या तपस्तप्तं धारया क्षीरया तथा ॥ २९ ॥ अन्यैरपि नदीभेदैस्तपस्तप्तं सुदुस्सहम् ॥ सुब्धं लोकत्रयं तेन तपसा केवलं नृप ॥ ३० ॥ अत्युग्रतपसा तत्र रेवां दृष्ट्वा महेश्वरः ॥ प्रसन्नः पार्वतीयुक्तः तामुवाच दयानिधिः ॥ ३१ ॥ श्रीसदाशिव उवाच

नर्मदे शर्मदे देवि वरं वृणु मनोहरं ॥ किन्तवाभीप्सितं लोके तत्प्रयच्छामि सर्वथा ॥ ३२ ॥ इति तद्वचनं श्रुत्वा नर्मदा प्राह शङ्करम् ॥ मयि संवस गौरीश सर्वदा शिवया सह ॥ ३३ ॥ प्रार्थनीयं महादेव मम तावदिदं प्रभो ॥ एतावता कृतार्थास्मि सन्निधानं तवेप्सितम् ॥ ३४ ॥ सदा सन्निहितस्यापि सन्निधानं विशेषतः अपेक्षितं ममेशान तपसस्तत्फलं प्रभो ॥ ३५ ॥ मत्तीरतरुषु स्वामिन् मत्तीराङ्कुरराजिषु ॥ प्रस्तरे च त्वयि मत्तीरे सदा सन्निहितो भव ॥ ३६ ॥ न चागमप्रतिष्ठायास्त्वपेक्षास्त्वदनुग्रहात् ॥ मत्प्रस्तरार्चनेनैव तुष्टो भव सदाशिव ॥ ३७ ॥ यच्चल्प्रतिष्ठितं लिङ्गं इदमुत्तममुत्तमे ॥ मत्तीरनीरजो वायुः यद्देहे वाति तत्तनुः ॥ ३८ ॥ पवित्रा भवतु स्वामिन् त्वंनामस्मरणादिव ॥ मल्लिङ्गपूजया शंभो मुक्तो भवतु मानवः ॥ ३९ ॥ मल्लिङ्गसदृशं लिङ्गं मास्तु सर्वात्मना प्रभो ॥ काश्मीरे रसल्लिङ्गे चारत्नलिङ्गे च्चपि प्रभो ॥ ४० ॥ तत्राभिमानो न तथा यथा मत्प्रस्तरोत्तमे ॥ इदं सोमेश्वरन्नाम लिङ्गम् मङ्गलदायकम् ॥ ४१ ॥ एतद्दर्शनमात्रेण मुक्तिरस्तु सदाशिव ॥ सोमेश्वकुण्डलिङ्गानि भुजङ्गाभरणान्यपि ॥ ४२ ॥ भवन्तु तेषु सर्वेषु सदा सन्निहितो भव ॥ सोमेश्वकुण्डनिलयं स्थूलमस्थूलमेव वा ॥ लिङ्गं भुजङ्गाभरणं पूजितं भुक्तिमुक्तिदम् ॥ ४४ ॥ यः प्रार्थितो वरः शंभो मया त्वद्भक्तिपूतया ॥

तादृशो न वरो देयो मह्यं नाथ महेश्वर ॥४५॥ सर्वात्मना ह्यनन्य विलक्षणत्वं मय्यस्तु शम्भो त्वदनुग्रहेण ॥ अयं वरोऽन्योऽति विलक्षणो मे देयस्त्वया शङ्कर दीनबन्धो ॥४६॥
वरान्तराणां न ममास्त्यपेक्षा श्रीमान्विरूपाक्ष कृपाकराक्षैः ॥ अपेक्षितं ते मयि सन्निधानं मत्स्तस्तरेषु प्रार्थिते त्वयीश ॥४७॥ तवाप्यदेयो न वरो महेश देयो वृतावद्गण-
नीयस्व ॥ अयं वरः प्रार्थितस्य वनान्यैः मयापरं प्रार्थित इत्यवेमि ॥४७॥ सर्वज्ञमूर्तेः करुणाकरस्य किमस्त्यदेयं तव चन्द्रमौले ॥ अयं वरो लोकहिताय तावन्मयापि संप्रा-
फलं
र्थितस्य वनूनम् ॥४८॥ लोके पितावद्बहवोऽप्यधन्याः कदाचिदालस्यपराहताश्च ॥ तेषां विमुक्तिः कठिनेति मत्वा वरो मया प्रार्थितस्य च सोऽयम् ॥४९॥ बिल्वीदलं वा सजलं
न
वा दूर्वाङ्कुरं वासितभूतिपूतः ॥ मत्स्तस्तरेयः प्रददाति तस्य प्रियं भवत्वर्धशशाङ्कमौले ॥५०॥ ये नर्मदे देवि शिवप्रियेति मन्नाम निद्रासमये स्मरन्ति ॥ ते वं तु दुःस्वप्नभयानि तावद्ध-
न्तु शम्भो त्वदनुग्रहेण ॥५१॥ त्वत्पादसंदर्शनपूतचित्तां मां यः सकृद्वा स्मरति प्रभाते ॥ तस्यास्तु भक्तिस्त्वयि चन्द्रमौले तयास मुक्तोऽस्तु कृपानिधान ॥५२॥ ब्रह्मोवाच ॥ इति
तत्प्रार्थिता सर्वान्वरान्दत्त्वा महेश्वरः ॥ तत्रैवान्तर्दधे राजन्सर्वदेवपितामह ॥५३॥ ततः परं महादेवः कैलाशनिलयः प्रभुः ॥ गङ्गाकृतं तपो दृष्ट्वा परमं विस्मयं गतः ॥
र्थ
५४॥ को वा वरो मया देयः कस्तया प्रार्थितो वरः ॥ तपो घोरतरं तस्याः सर्वलोकभयङ्करम् ॥५५॥ इत्येवं स्मरतः शम्भोः गणाः सर्वे नृपोत्तम ॥ प्रणताः शङ्करं प्राहुः पाहि पाही-
ति सादरम् ॥५६॥ गणा ऊचुः ॥ स्वामिन् हिमगिरेः कन्या ज्येष्ठा गङ्गेति विश्रुता ॥ सा तपः क्रियते घोरं तपसामपि तत्तपः ॥५७॥ ते नैव तपसा सर्वे सन्तप्ताः पर्वता अपि ॥
सर्वे
विना संघर्षणेनापि तरुभ्यो वह्निरुद्गतः ॥५८॥ कुलाचलादयः सर्वेऽप्यचलाश्चलिता अपि ॥ आमितास्स्म कस्तपसा तेन क्षुब्धाः सुरा अपि ॥५९॥ अतः परं महादेव
प्रसीद करुणानिधे ॥ अन्यथा प्रलयोऽपि स्यादकाण्डे गिरिजापते ॥६०॥ इति तत्प्रार्थितः शम्भुर्गणकोटिसमन्वितः ॥ तूर्यध्वनिसमाकीर्णो गङ्गाप्रत्यक्षताङ्-

तः ॥ ६१ ॥ ततः परं महादेवे प्रसन्ने सति शङ्करे ॥ प्रणम्य दण्डवद्भूमौ गङ्गा तुष्टाव शङ्करम् ॥ ६२ ॥ गङ्गा उवाच । नमो नमस्ते गिरिजासहाय नमो नमस्ते पुनरिन्दु-
मौले ॥ नमो नमस्तेऽस्तु पुनर्नमस्ते नमो नमस्ते करुणासमुद्र ॥ ६३ ॥ श्रीमन्महारुद्र नमो नमस्ते श्रीवीरभद्राय नमो नमस्ते ॥ नमो नमस्ते गिरिश त्रिनेत्र विभूति
गात्राय नमो नमस्ते ॥ ६४ ॥ श्रीनीलकण्ठाय नमो नमस्ते भालप्रदेशानललोचनाय ॥ नमो नमस्ते स्तु कपर्दिने ते नमो नमस्तेऽस्तु सदाशिव प्रभो ॥ ६५ ॥ मार्तण्ड
मण्डलनिवास नमो नमस्ते ॥ मार्तण्डकुण्डल विराजितभूषणाय ॥ मार्तण्डचण्डकरसङ्कुलमण्डपाय ॥ तस्मै मृडाय भगवन्भवते नमोऽस्तु ॥ ६६ ॥ यद्वीक्षण
प्रवणमात्रविधूतपापाः सम्प्राप्नुवन्ति परमं पदमिन्दुमौले ॥ तैरेव मां मुहुरपि प्रणतां प्रपश्यपश्याद्य नाहि निकटाश्रित तत्पदे हम् ॥ ६७ ॥ माता त्वमेव भगवन्
जनकस्त्वमेव ॥ मित्रं त्वमेव मम चन्द्रकलावतंस ॥ भ्राता त्वमेव भगवन् गिरिजासहाय माता त्वमेव भगवन् हर नीलकण्ठ ॥ ६८ ॥ त्वं कालकूटविषधारण धीर
चित्त त्वं मारसंहरण कारणभूत एव ॥ ब्रह्माण्डमण्डलसुखण्डनहेतुभूतस्त्वामेव तावदधुना शरणं प्रपन्ना ॥ ६९ ॥ त्वन्नामकीर्तनसुधारसपानपीनो
दीनोऽपि दैन्यमपहाय दिवं प्रयाति ॥ यस्माद्दुपैति परमं पदमीश तत्ते तद्भाग्ययोग्य करुणाङ्कुर मामपीश ॥ ७० ॥ वरो वरः प्रार्थित एव देयः प्रागेव ज्ञाता(या) वदु-
मासहाय ॥ दत्तो वरः शर्मदनर्मदायै शर्मदा(सा) सर्वसुरासुराणाम् ॥ ७१ ॥ अतः परं तादृश एव देयो वरो न लोकेषु तथा च तस्य ॥ न प्रार्थनीय(त्व)मतो वरो मे देयस्तद-
न्यो मम मुक्तिहेतुः ॥ ७२ ॥ जलस्वरूपेण ममास्तु केशपाशो मदीयेन जलेन नित्यम् ॥ तवाभिषेकोऽस्तु कृपैकसिन्धो श्रीविश्वनाथात्मक लिङ्गरूप ॥ ७३ ॥
लिङ्गस्वरूपेण महेश काश्याम नास्थितिस्तत्र सिता भवातः ॥ तत्राभिषेकोऽस्तु जलैर्मदीयैरयं वरो मे वर एव शम्भो ॥ ७४ ॥ एतस्मादधिको वरोऽपि न वरो

५६८

येनैवकाश्यांस्थितिः॥मुक्त्यैसर्वमतोममापिसहसातस्माद्गुरोःशंकरः॥७५॥ एवंदेहिममाधुनावरमुमाकान्तायमेवप्रियः॥सर्वेषामितिरेवयाचितवरःसोऽयंखलुप्रार्थि
ते॥तत्रार्थितस्तुसवरोवरएवनूनंसर्वोऽपिकारकतयापृथितःपृथिव्याम्॥७६॥ स्वर्गेऽपिसत्यभवनेऽपिततस्तदन्योदेयोवरोभवतितेसतुदुर्लभोऽपि॥यःकाशीनगरेमदम्बु
पुमुहुःस्नात्वाकृतोद्धूलनःसर्वाङ्गेभसितत्रिपुण्ड्ररुचिरोरुद्राक्षमालावृतः॥७७॥ मन्त्रैरैरभिषिच्यलिङ्गममलंविश्वेश्वराख्यंनतस्त्रिःपीत्वाभिषेकवारिसततप्रायःप्रियो
स्तुप्रभो॥कल्यान्तेममुक्तिरस्तुभगवन्त्वन्नामसङ्कीर्तनैः॥तावज्जीवनमस्तुवस्तुविषयेमास्तुस्पृहामास्तुहे॥७८॥ काशीवासरतिःस्मितेऽपिभसितेरुद्राक्षमालास्वपि
श्रीविश्वेश्वरतुङ्गलिङ्गभजनेप्रीतिर्ममास्तुप्रभो॥इत्युक्त्वाप्रणतागङ्गातथास्त्वितिमहेश्वरः॥तत्रैवान्तर्दधेसांबःसर्वदेवगणस्तुतः॥७९॥ गोदावरीप्रमुखदेवनदीभिरे
वंसंप्रार्थितोऽपिसदयःपरमुक्तिरूपम्॥दत्त्वामुहुर्मुहुरभिष्टुतएवताभिःसंप्राप्यसौख्यनिलयंस्वकीयम्॥८०॥ तस्मात्सायंनर्मदाशर्मदास्यात्सर्वेषान्नःप्राणिनांमुक्तिहेतुः
यन्नीरंयस्त्रिःपिवेत्तस्यतावत्पापैर्नोपापतापैर्विभीतिः॥८१॥ सेयंरेवासेवितायेनलिङ्गंतस्यावश्यंमुक्तिरेवेतिमन्ये॥धन्यामान्याशर्मदानर्मदेयमङ्गावातुल्यारेवयावानदी
स्यात्॥८२॥ रेवातीरंप्रार्थयत्येवगङ्गातीरोत्पन्नोमुक्तिकामः[illegible]ङ्गावामम्॥रेवातीरेयस्तपस्तत्तपःस्यात्मुक्त्यैरेवालिङ्गरूपाविपापा॥८३॥ पापानिसंहरतिनिर्मलनर्मदा
म्भःसंसेवितंसकृदपारसुखन्तनोति॥तच्छ्रीमहेशनिहितांवितनोतिमुक्तिंरेवाजलेनसदृशंकिमिहास्तिलोके॥८४॥ इत्याकर्ण्यविधेर्वाक्यंसराजावीतमत्सरः॥बालक
स्यास्यवृत्तान्तंप्रपच्छनृपसत्तम॥८५॥ राजोवाच॥ कोऽयंबालःकिमेतस्यजनकोऽस्तिनवावद॥माताकुत्रसञ्जातःकथमत्रागतोविधे॥८६॥ कथमस्यामवस्थायाम्
शिवनामजयोत्सुकः॥शिवार्चनरतोधीरोनिराहारोगतस्पृहः॥८७॥ अहोकिमिदमाश्चर्यंदृष्टपूर्वमिदंनतु॥कथंगायतिनामानिमधुराणिमनोहरः॥८८॥ मनोहराणि

दिव्यानिमहादेवस्यभूरिशः ॥ नामानिमधुराण्यत्रगायन्नृत्यतिपश्यताम् ॥ ८९ ॥ ईदृशंकथमुत्साहःसमुत्पन्नश्चतुर्मुख ॥ अस्यबालस्यमाहात्म्यंवदसर्वंविशेषतः ॥ ९० ॥

ब्रह्मोवाच ॥ चित्रंचित्ररथैतस्यस्वरूपंशृणुसादरम् ॥ चरित्रेणपवित्रस्यपवित्रंगात्रमस्यतु ॥ ९१ ॥ अयंपूर्वभवेराजामहापातकपर्वतः ॥ नचैतत्पापगणनाकर्तुमेव हिशक्यते ॥ ९२ ॥ एतादृशोऽपिनरकार्णवमार्गमध्यसर्पोदरेषुगतएवविषार्दितोऽपि ॥ निष्कासितश्चगणदन्तनिघातचूर्णस्तद्वह्निकुण्डपतितःपरिसःप्रवृत्तः ॥ ९३ ॥ आनीलवृश्चिकगणैरपिदष्टएवतद्देहनार्णवनिमग्नशरीरयुक्तः ॥ ९४ ॥ तप्तेषुवह्निकुहरेषुपुनःप्रतप्तकुल्याप्रवाहपतितःपुनरुत्थितोऽपि ॥ ९४ ॥ सन्ताडितोप्यनल तप्तसमिण्डिपालतोहोरुदण्डकठिनाग्रविपाटितोऽपि ॥ एतादृशोऽपियममार्गमहाव्यथाभिरार्तिःशिवाननयनगोचरतांगतोसौ ॥ ९५ ॥ पश्चादयन्तुयमयातनयाविमु क्तःकालार्चितःशिवगणैःसहमामवाप ॥ पश्चान्मयापिबहुधैवसमर्चितोऽयंप्रीत्यामयासहमदालयसन्निविष्टः ॥ ९६ ॥ मल्लोकवासिभिरयंसहसर्वदापिस्थित्वा शिवार्चनकथाश्रवणेनपूतः ॥ लिङ्गानिपश्यतिमुहुर्मुहुरादरेणतान्यर्चयत्यनुदिनंचमयासहायम् ॥ ९७ ॥ हारंतत्रसुधूपहारमसकृत्पीत्वास्थितोभूपतिः ॥ योगेना यमयोनिजेन्नृपतेदेहेनरेवांगतः ॥ ९८ ॥ रेवालिङ्गसमर्चनोद्यतमतिःतृप्तःसदाभस्मनाभूताङ्गःसमलङ्कृतःशिवरतोरुद्राक्षमालागणैः ॥ एतच्चित्रचरित्रमात्र मधुनातावत्पवित्रामयादृष्टादृष्टविशेषपुण्यफलदंकष्टापहारोद्यतम् ॥ ९९ ॥ दृष्टन्तावदिहागतःशिवनदीदृष्टामयापुण्यतोदृष्टोसिल्वामिहातिशाम्भववरोरेवा विहारादरः ॥ १०० ॥ सोऽयंशुद्धिमुपेत्यशाङ्करवरोरेवाजलैःसर्वदारेवालिङ्गसमर्चनेनसकलंकालंनयन्भूपते ॥ भूपालत्वमुपेत्यशाम्भवगणैःसाकंमहीमण्डलेचण्डा लानपरिखण्डयन्प्रभुभजनासक्तोकरिष्यत्ययम् ॥ १ ॥ एतद्दर्शनमन्वहंमुहुरहंकर्तुंप्रवृत्तःसुरैः ॥ साकंस्वर्गनिवासिभिर्मुनिवरैःसिद्धैस्तथाकिन्नरैःगन्धर्वैरपियत्नपूर्वकमयं

भूयोयतः शाम्भवो रेवालिङ्गसमर्चनेषु नियतो विश्वेश्वरो रेवाजले ॥२॥ जन्मातिदुष्करमथापि मनुष्यजन्म तत्रापि शङ्करसमर्चनधीरतुल्या ॥ केनापि धर्मनि

चयेन स एव धर्मधर्मेषु तावदधिकः सविमुक्तिहेतुः ॥३॥ धर्मा सन्ति सहस्रशोऽपि निगमैरुक्तैस्तथा तेष्वयं धर्मश्रेष्ठ इति श्रुतो बहुविधैर्वेदान्तवाक्यैरपि ॥ लिङ्गारा

धनलक्षणं क्षणमपि त्याज्यो न सर्वात्मना लिङ्गाराधनमम्बिकापि कुरुते श्रीशाङ्गङ्कवासापि सा ॥४॥ लिङ्गाराधनमुत्तमोत्तममतिज्ञातं प्रवृत्तं ततः ॥ कर्तुं कर्तुमनन्तजन्मतप

सावुद्धिः परं जायते ॥ यद्वा शङ्करपादपद्मजरजःपुञ्जः प्रमादादियं बुद्धिः सम्भवतीति भूरिविभवैर्भाग्यं परं जायते ॥५॥ कोवा भूति विभूषणेभ विभवे दुःखासमालाश्र-

यो लिङ्गाराधनतत्परः शिव शिवव्याहारमात्रादरः ॥ हारो हारहितोपहारपरमप्रीतो न जाने समे वंद्यः पुज्जतमोऽपि शाङ्करगणश्रेष्ठोऽवशिष्टार्चितः ॥ अभ्यासेनम

ताहशी मतिरुदेत्याराधका वेक्षयात् किंवा कल्पकृतातिघोरतपसा भक्तिः शिवे जायते ॥ साभक्तिर्यदि संततञ्च तनुते सन्तानसम्पत्प्रभा वृद्धिं वृद्धिमुपैति सापि

सततं लिङ्गार्चनेनादरात् ॥७॥ ब्रह्मत्वं मम लिङ्गपूजनकृतं तेनैव सत्याभिधो लोको लोचनगोचरोऽपि नसतां प्राप्तो मया दुर्लभः ॥ लिङ्गाराधनपुण्यमेव नयता

मुक्तिः परं भाविनी तत्पुण्यन्तु विलक्षणं क्षणमपि त्यक्तुं न शक्यं मया ॥८॥ जारो जातु न जारिणीष्वनुरतः तस्माद्विरक्तो युवा नस्या तं तरुणी न पश्यति मुहुस्त्य-

क्तापि कार्यान्तरम् ॥ तद्वत्सः शिवलिङ्गपूजनरतो दूर्वाङ्कुराद्यैर्मुदा वारं वारमदृष्टभेदघटितो हारः सलोकोत्तरः ॥९॥ इति श्री शिवरहस्ये हराख्ये तृतीयांशे उत्त

रार्धे याज्ञवल्क्यजनकसंवादो नाम चतुर्दशोऽध्यायः ॥ याज्ञवल्क्य उवाच ॥ इमतितद्वचनं श्रुत्वा राजा विस्मयमागतः ॥ विधिं प्राहातिविनतः कृताञ्जलि

पुटो नृप ॥१॥ राजोवाच ॥ विधे मन्दिरमायाहि वर्तिकेन सहामुना ॥ शिवमन्दिरसङ्कीर्णं मन्दिरं मणिसुन्दरम् ॥२॥ रत्नमन्दिरमध्यस्थान्यपाराणि

६९

चतुर्मुख ॥ रवालिङ्गान्यर्चितानि दृष्टव्यानि त्वयाधुना ॥ ३ ॥ इति तद्वचनं श्रुत्वा विधिः सन्तुष्टमानसः ॥ ययौ सार्कं बालकेन नगरं नृपमन्दिरम् ॥ ४ ॥ तद्रत्नतो

रणाकीर्णं रत्नप्रासादसंवृतम् ॥ रवालिङ्गसमाकीर्णं ददर्श स विधिस्ततः ॥ ५ ॥ तत्र लिङ्गानि रम्याणि पूजितानि मनोहरैः ॥ बिल्वैर्दलादिभिः पुष्पैः रर्चिता

नि ददर्श सः ॥ ६ ॥ ततः स बालकस्तत्र तत्तल्लिङ्गावलोकनात् ॥ सन्तोषं परमं प्राप मुक्तिबीजमनुत्तमम् ॥ ७ ॥ अनायासेन दृष्टानि शिवलिङ्गानि कोटि

शः ॥ पूजितानीति सन्तुष्टो बालकः स मुहुर्मुहुः ॥ ८ ॥ पूजाद्रव्याण्यपाराणि ददौ तस्मै स भूपतिः ॥ स तैः समर्चयामास लिङ्गानि मुदितोऽर्भकः ॥ ९ ॥ दुर्ल

भाम सुलभं शम्भुपूजनमित्यपि ॥ बालकोऽपि पूजयामास लिङ्गानि शिवमन्दिरे ॥ १० ॥ पञ्चामृतप्रवाहाद्यैरर्चयित्वा स बालकः ॥ ननर्त प्रणतो

भूत्वा भूयो भूयः स भूपते ॥ ११ ॥ ततस्तद्बालकं दृष्टुं सर्वाश्च चित्ररथाङ्गनाः ॥ समागतास्तत्तमालोक्य संतोषं परमं ययुः ॥ १२ ॥ नृत्तप्रसङ्ग सन्तुष्टं तं बालं वीक्ष्य सादर

म् ॥ राजकन्या समागत्य मुदा नाट्यं चकार सा ॥ १३ ॥ ततस्तं (ब्रह्मा) नाट्यमालोक्य पूजयित्वा महेश्वरम् ॥ प्रणम्य प्राह राजानं कन्यकां वीक्ष्य सादरम् ॥ १४ ॥

॥ ब्रह्मोवाच ॥ राजन् केयं बालिका पि भूतिरुद्राक्षभूषणा ॥ शिवगानरता नृत्यं करोति प्रीतिमानसा ॥ १५ ॥ एतादृशं तु सौन्दर्यं नास्ति देवाङ्गनास्वपि ॥ वयो वि

शेषसम्पन्ना सम्पन्ना भाग्यराशिभिः ॥ १६ ॥ राजोवाच ॥ विधे वन विहारार्थं पुरा स्वाम मनोहरे ॥ तीरे स्थितं मया तत्र दृष्टेयं गिरिगह्वरे ॥ १७ ॥ तत्रैकं नामेदं लिङ्गं बि

ल्वमूले मनोहरे ॥ तत्पूजनेन सुप्रीता सेयं कन्या मनोहरा ॥ १८ ॥ गायन्ती शिवनामानि वीणामादाय शांभवीम् ॥ दृष्टा प्रहृष्टवदना लिङ्गार्चनपरायणा ॥ १९ ॥ ततः

सेयं समानीता शपथैर्विविधैर्बुधे ॥ नायाति सहसा कन्या शिवपूजनतत्परा ॥ २० ॥ एतद्दर्शनमात्रेण मम भक्तिरभून्नृप ॥ शिवार्चने शिवध्याने शिवनामजपेष्वपि

प्रो

सेयमत्युत्सवा दृष्टा मद्दृष्टा विशेषतः ॥ तत्पृष्टोसि त्वया तावेत्जन्म किमित्यपि ॥ २२ ॥ न ज्ञायते ततो ज्ञात्वा वक्तव्यमिति मे मतिः ॥ इयं कालत्रये गत्वा तत्र लिङ्गा
र्चनं मुदा ॥ २३ ॥ करोति विविधैर्द्रव्यैस्तत्र गानं करोति च ॥ अस्यास्तु न पिता नु माता न भ्राता न च बान्धवाः ॥ २४ ॥ न जातिरपि विज्ञाता तस्याः सर्वात्मना मया
एतद्दर्शनमात्रेण ममोत्साहः प्रजायते ॥ २५ ॥ ब्रह्मोवाच ॥ इयं पूर्वभवे राजन् सुता भिल्लस्य कस्यचित् ॥ स भिल्लो वनमध्यस्थः स्वकुटुम्बं सदाभरत् ॥ २६ ॥
तत्र बिल्वतरुः कश्चित्सदा नवपल्लवः ॥ तन्मूले लिङ्गममलं नामेदं स्थितमुत्तमम् ॥ २७ ॥ तत्रेयं कन्यका क्रीडां कृत्वा तिष्ठति सर्वदा ॥ क्रीडार्थं जलसेकञ्च
तत्र कृत्वाधितिष्ठति ॥ २८ ॥ तत्रेयं स्वविहारार्थं नित्यं संमार्जनादरा ॥ तरुणं बिल्वमालोक्य सा ददाति जलं मुदा ॥ २९ ॥ तरुमूलार्पितं नीरं लिङ्गोप
रि पतत्यपि ॥ तेनाभिषिक्तं तल्लिङ्गं तत्पत्रैरपि पूजितम् ॥ ३० ॥ एवं स्थिता तदा तत्र कन्या सेयं वनान्तरम् ॥ गता तत्र मृता दैवात्स्मृत्वा क्रीडास्थलं मुहुः
॥ ३१ ॥ ततो यमो गतस्तत्र सञ्चरन् पृथिवीमिमाम् ॥ तां मृतां स विलोक्याह चित्रगुप्तं विचक्षणम् ॥ ३२ ॥ केयं पुण्यं किमेतस्याः कृतं किमनया वद ॥ अन
या कादृशा प्राप्या सर्वमेव विशेषतः ॥ ३३ ॥ चित्रगुप्त उवाच ॥ इयं भिल्लस्य कन्या स्यात्सदा मांसं किलाशनम् ॥ एतत्पिता बिल्वमूले चकार विपिने कुटी
म् ॥ ३४ ॥ तस्य बिल्वस्य मूले तु रेवालिङ्गं स्थितं यम ॥ बिल्वं सिञ्चति यत्नेन छायार्थं ह्यौ जलैर्मुहुः ॥ ३५ ॥ तज्जलं पतितं लिङ्गे तुङ्गे रेवाजलोद्भवे ॥
हस्तलभ्यानि पत्राणि तान्यादाय मुहुर्मुहुः ॥ ३६ ॥ पातयत्येव सा लिङ्गे बिल्वमूलस्थिते यम ॥ सम्मार्जनं करोत्येव बिल्वस्य पुरतः सदा ॥ ३७ ॥ इय
न्तु नित्यं गिरिमल्लिकाभिर्बिल्वीदलैरर्चयति प्रभाते ॥ लिङ्गञ्च बिल्वञ्च जलाभिषेकमग्रे परं नृत्यति तस्य नृत्यम् ॥ ३८ ॥ संमार्जनाद्यैस्तदलङ्कृ

तत्र स्थलं विलोक्यासौ सैव हृष्टा ॥ एवं स्थितेयं विधितः समाप्य यत्पञ्चत्वमस्या स्तिल पातकानि ॥ ३९ ॥ इति तद्वचनं श्रुत्वा तां प्रणम्य यम स्ततः ॥ पुष्पके तां च संस्थाप्य प्रययौ स्वपुरं प्रति ॥ ४० ॥ तत्र स्थितेयं कल्याणी तेन नित्यं समर्चिता ॥ ततो मत्सदनं प्राप विमानवरमाश्रिता ॥ ४१ ॥ युगानामयुतं तत्र स्थिता लिङ्गार्चनप्रिया ॥ योगेनयोनिजं देहं प्राप कन्या मनोहरा ॥ ४२ ॥ इयं च लिङ्गार्चनवासनायां रक्ष्वाच लिङ्गानि मनो हराणि ॥ रेवाजलस्थे गिरिकन्दरेऽपि चकार वासं शिवपूजनाय ॥ ४३ ॥ राजोवाच ॥ भगवन्कौतुकं ज्ञातं सन्देहोऽपि गतो मम ॥ जात्यविज्ञान संदेहः समभूत्स गतोऽधुना ॥ अयोनिजेयं कल्याणी तेन नित्यं समर्चिता ॥ कस्मै देया मयाधुना ॥ प्रौढापि युवती सेयं विवाहार्हा विधे खलु ॥ ४५ ॥ ब्रह्मोवाच ॥ श्रेष्ठेयं कन्यका जाता यस्मादियमयोनिजा ॥ अयोनिजो वरो योग्यो योग्ये योग्येन युज्यते ॥ ४६ ॥ अत्युत्तमायाः कन्यायाः वरस्या दुत्तमोत्तमः ॥ न मन्ये नाधमोऽपि न जात्यन्तरसंयुतः ॥ ४७ ॥ ब्रह्मोवाच ॥ अयोनिजोऽयं बालः स्यात् पतिर्योग्योऽयमित्यतः ॥ अयोनिजत्व रूपातु जातिरेका तयोर्मता ॥ ४८ ॥ राजोवाच ॥ अयमद्यतनो बालः प्रौढेयं खलु कन्यका ॥ युवती युवयोर्योगः खलु लोके सुखावहः ॥ ४९ ॥ यद्यप्ययं प्रवृद्धोऽपि भविष्यति तथापि किम् ॥ विरक्तः शिवपूजायामनुरक्तः सदा खलु ॥ ५० ॥ विवाहयोग्यो न विरक्तचित्तो वृत्ते विवाहेऽपि वि रक्त एव ॥ किं वा विरक्तस्य विवाहकृत्यं विरक्तबुद्धिस्तु विलक्षणैव ॥ ५१ ॥ अस्यास्तु तावन्न विरक्तिरस्ति स्त्रीणां विरागः खलु दुर्लभो हि ॥ वैराग्यवार्तापि भवेदसह्या स्त्रीणामतो नात्र विवाहयोगः ॥ ५२ ॥ अयं वरश्चेन्मम भाग्यमेव वरत्वसम्पत्तिरिहत्वयापि ॥ किं कल्पनीया तव शालि

X पंक्ति २- सर्वं शंकर पूजनेन भवतीत्याह महाशांभवा स्तस्मात्त्वं भववर्य शोम्यमधुना बालं कुरुष्वादरात् ॥

रस्ति महेश्वराराधनसाधनेन ॥ ५३ ॥ माहेश्वराणां किमिहास्त्यशक्यं यस्मादयोज्ञोऽपि खलु क्षणेन ॥ योग्यो भवत्येव शिवप्रसादाच्छिवप्रसादात्सकलार्थसिद्धिः ॥ ५४ ॥ यद्दुर्लभमेव वस्तु तदपि प्रायः शिवाराधनेन तत्सर्वं सुलभं भवत्यनुदिनं किं दुर्लभं भूतले ॥ ५५ ॥ सोऽयं यौवनसंपन्नो युतो यदि भवेद्बालो नुरक्तोऽधुना तर्हि स्यात्त्वदनुग्रहेण शुभदः पाणिग्रहः सत्वरम् ॥ एवं स्यान्मदभीप्सितं पुनरयं कालो भवेद्दुर्लभः सम्पत्तिर्महती ममास्ति विविधा द्रव्या... वयोप्यस्ति मे ॥ ५६ ॥ इति तद्वचनं श्रुत्वा तमाह नृपतिं विधिः ॥ वृद्धिं यास्यत्ययं नूनमद्य षोडश वार्षिकः ॥ ५७ ॥ अधुनैव विहारोऽस्तु सुन्दरे शिवमन्दिरे ॥ शोभनद्रव्यसंवीतमिदं शङ्करमन्दिरम् ॥ ५८ ॥ इति तद्वचनं श्रुत्वा राजा सन्तुष्टमानसः ॥ नाम्ना चन्द्रमुखीं प्राह तरुणीं रमणीं स्वकाम् ॥ ५९ ॥ राजोवाच ॥ अयोनिजा पालितेयं कन्या कमललोचना ॥ इयन्तु युवती जाता प्रायशः पतिमिच्छति ॥ ६० ॥ अस्यास्त्वयोनिजो भर्त्ता दुर्लभः खलु भूतले ॥ देवादयं बालकोऽदृष्टः सोऽयमयोनिजः ॥ ६१ ॥ अस्मै कन्या मया देया शाम्भवाय महात्मने ॥ दुर्लभः शाम्भवो लोके दानपात्रं स्वभावतः ॥ ६२ ॥ राज्ञ्युवाच ॥ साचीकृताननानारी सस्मेरा विनयान्विता ॥ विशीर्णवेणी विदेशा सा विभग्नांगदकंकणा ॥ ६३ ॥ राजन्नभ्युदयः प्रियः परिणययोर्योग्ययोर्न योग्यैरन्वये ॥ योग्यस्यापतिकामनाद्य बहुधा तस्याः शरीरान्विता ॥ सा रम्भेव विभाति नेत्रयुगलं दृष्ट्वैव नीलोत्पलं तस्याः कज्जलमाविवेश सजलं क्वान्यत्र तथा स्यास्ति ॥ ६४ ॥ रम्भास्तम्भनिभोरुदेश सुषमा केनोपमेया मया तद्वाहुद्वयकान्तिरप्यनुपमा तद्वत्कुचकान्तिस्तथा ॥ तद्वेणीफणिकान्तिरप्यनुपमा वक्षोजकान्तिस्तथा ॥ राजन्नत्र घनच्छवि यद् रुचिर्हस्तच्छविर्वागपि ॥ सोऽयं

स्तन्यपा एवतावदधुना मातान तातोऽपिवा भ्रातायान सखान मित्रमथवा धार्य्यं धनं यानय ॥ योग्यस्तावदयं कथं परिणये योग्योऽ
जातेमनः राजन्तद्वरास्ययद्दुचिकरं तत्तेकुरुष्वादरात् ॥ ६६ ॥ कुलंशीलं मूलं कुशलमतुलंकालममलं विचार्यादौ पश्चात्कुलविहित
विद्यामपिवयः ॥ विचार्यायैर्देयाभवतिखलु कन्याप्यनुचितम् ॥ नयस्मैकस्मैचिद्धितरणम साम्यस्य वसुनः ॥ ६७ ॥ राजा स राज्ञीवच
नेष्वनादरः ताभाह राज्ञीं विधिरागतोऽस्ति ॥ उल्लंघनं तद्वचनस्यने ष्टं शुभावहं कर्माणि तस्य शक्तिः ॥ ६८ ॥ यन्मंगलद्रव्यमिहास्तिगेहे
तावत्तदासाद्धनमस्तुतूर्णम् ॥ अन्यद्विनिष्यत्यधुनेति मत्वा पुनर्विधिः प्राह मनोत्सवेन ॥ ६९ ॥ तस्मै स राज्ञीवचनानिनाह चतुर्मु
खायापि सतद्विदित्वा ॥ राजानमाह प्रियवागविधाता ज्ञातन्त्वराज्ञीवचनं मयेति ॥ ७० ॥ पश्चात्सराजानतकन्धरोभूत् तमा
हराजानमति प्रियोक्त्या ॥ अयं विचारो नसुरेषु युक्तः सोऽयं मनुष्येषु भविष्यतीति ॥ ७१ ॥ अयोनिजा सा खलु कन्यकापि तस्यान्नपि
तानापिनृपास्ति माता ॥ तस्याः कुलं किन्न विचारणीयं मिदं द्वयोरप्युपपन्नमेव ॥ ७२ ॥ वरस्य तावद्गुण वर्णनन्तु वरोऽयमुत्कृष्ट
तमोवयस्तु सदाप्ययं षोडशवार्षिकस्याज्जरा विचारोप्यतिदूरतोऽस्ति ॥ ७३ ॥ भूमण्डलस्याधिपतिः स एव भावीभवाराधनसाध्य
नत्रः ॥ भावत्वमुत्कृष्टगुणोऽस्य सोऽयं वरेषु तावत्खलु दुर्लभोहि ॥ ७४ ॥ इत्यालोचनतत्परे सति नृप बालः कुमारोऽभवत् पश्चाद्यौ
वनमाप कामसदृशः कामोऽपि दृष्ट्वैवनम् ॥ लज्जाकज्जलमञ्जनेन मलिनस्तातानुरूपोऽभवत्ताततो मालिनस्तमेवनेतीयं

दृष्ट्वापरं प्रायसूः॥७५॥ युवानं तन्दृष्ट्वा नृपतिरतिसन्तुष्टहृदयः विवाहोत्साहेन द्रुतमखिलमन्त्रिप्रमुयुतः॥ शिवं नत्वा भूयस्सकलशुभदानव्यसनिनम्
पुनश्चक्रे तावद्द्विजजनयुतो मङ्गलविधिम्॥७६॥ युवत्वं सम्प्राप्तः स इति महिला साहसमहान्॥ महीपालः शीलं शिवभजनशीलञ्च कुशलम्॥ विचार्य्यार्यां
कन्यामपि तव वरोऽयं वरवरो महावीरो हारः सुरसदनतोऽप्यागत इति॥७७॥ ततः सा लज्जया नम्रा चेष्टाभेदैः परन्तप॥ ज्ञापयामास हृदयं वरः सम्मत इत्यपि॥७८॥
ततो युवानं समुपेत्य राजा चतुर्मुखेनापि सहातिहृष्टः॥ विज्ञापितः प्राह विधिः स राजा विवाहदीक्षार्थमतिप्रमोदैः॥ विवाहकालस्तव सोऽयमद्य कन्यामनो
ज्ञायुवती नृपस्य॥ त्वं मङ्गलस्नानविधानयोग्यः प्राज्ञः शिवाराधनतत्परोऽपि॥८०॥ इति तद्वचनं श्रुत्वा स ततां शिवतत्परः॥ शिव शम्भो महेशेति वदन्रेवां गतः
पुनः॥८१॥ ततः परं स राजापि विस्मितो विधिना सह॥ रेवां गतो ददर्शाथ तमेवा शिवपूजकम्॥८२॥ स तत्रोद्धृत्य सर्वाङ्गं शीतलैर्नर्मदाजलैः॥ अभिषिच्यार्चयामा
स विल्वैर्लिङ्गं मनोहरम्॥८३॥ ततः परं स राजापि विधिश्चातीव विस्मितः॥ विचारनिरतो यावः किमन्यत्कार्य्यमित्यपि॥८४॥ किं कन्यका कालविलोकनानि लेख
दुःखान्यशेषाणि न संशयोऽत्र॥ एतादृशो दुर्लभ एव लोके वरो वराणां वर एव सोऽयम्॥८५॥ उत्साहवृद्धिं कथमस्य वृद्धता जाताऽपि सा तावदिहा नितान्ता॥ अ-
हो कथं लोचनयोर्न भाग्यं तयोर्विवाहानवलोकनेन॥८६॥ रत्नस्य कान्तेस्स्वरसंगमेन भवत्यवश्यं सुषमाप्रवृद्धा॥ तयोः पृथङ्नास्थितिरिष्टहेतुः॥ उत्साहवीजन्तु
न सर्वथापि॥८७॥ एतस्य वैराग्यविशुद्धवृत्तेः कदापि संसारविशेषवार्ता॥ नासीन्नचाग्रेऽपि भविष्यतीति सा कन्यकाऽकं वरमेत्य तुष्टा॥८८॥ तरुणीमणि
खसा तु कन्या रमणीनां रमणीमनोहरेण॥ वयसा रुचिरेण सामनोज्ञा कमनीयं कमवाप्य चाहरंवा॥९०॥ न ममात्र किलाति चातुरी चतुरः शङ्कर एव सर्वथा॥

पि॥ जगतामुदयोऽयं परस्तु वेऽप्यथवा विलये वा शिव एव सर्ववेत्ता॥ ९१॥ यः सर्वज्ञशिरोमणिर्मुनिगणाराध्यः प्रसाध्याङ्घ्रिको नायं तस्य तु सिद्धमेव सकलं किं दीपवद्भासकः॥ ९२॥ यद्वायं जनकः समस्तजगतां सर्वस्वतन्त्रः सदा॥ सर्वं कर्तुमतीव शक्तिमयि प्रवृत्त इति मे बुद्धिः परञ्जायते॥ ९३॥ इति चिन्ताकुलो ब्रह्मा राज्ञा सह तमर्भकम्॥ प्राह धृत्वा करं तस्य विनयेनैव सादरम्॥ ९४॥ ब्रह्मोवाच॥ श्रेष्ठेयं कन्यका जाता यस्मादियमयोनिजा॥ अयोनिजो वरो योग्यो योग्यं योग्येन युज्यते॥ ९५॥ अत्युत्तमायाः कन्यायाः वरः स्यादुत्तमोत्तमः॥ न मध्यमो नाधमो वापि न जात्यन्तरसंयुतः॥ ९६॥ विवाहाय प्रयत्नोऽयं कृतो भूपतिना खलु॥ अयं किलाति सन्तुष्टः शिवपूजनतत्परः॥ ९७॥ एतदाज्ञानुसारेण वर्तनं शिवपूजनम्॥ स्वाम्यलिङ्गार्चनेनैव नीतमेतेन जीवनम्॥ ९८॥ मुनीनामपि दाराणामस्त्येव हि परिग्रहः॥ शिवार्चनादिधर्माणां दारास्तु नविरोधिनः॥ ९९॥ हारदारानुयोगेन हारसंप्रवर्धते॥ हारोपहारकरणे दारास्युरधिकारिणः॥ १००॥ दारैर्हारसमापन्नैः सीतिभूतिविभूषणैः॥ रुद्राक्षमालाभरणैः धीरैः सुखमनुत्तमम्॥ १॥ ऋतुकालेषु दाराणां सङ्गोऽपि सुखदायकः॥ तत्सुखं शङ्करायेति यन्मनः स तु शाम्भवः॥ लोकेषु कस्य वा नास्ति वददारपरिग्रहः॥ पश्यन्ति सकुटुम्बास्ते मुनयः शिवतत्पराः॥ ३॥ इन्द्रादयः सुराः सर्वे सदारा एव सर्वदा॥ अहं सदारो विष्णवाद्याः शेषाद्याश्च कुटुम्बिनः॥ ४॥ कुमारो गणनाथश्च वीरभद्रश्च भैरवः॥ नन्दिकेशश्च भृङ्गिश्च [illegible] तायिडश्चारिटिरेव च॥ ५॥ रोहिण्यीप्रमुखाः सन्ति चन्द्रस्य वनिताः खलु॥ छाया सूर्यस्य रमणी वाग्निर्यस्तु पुलोमजा॥ ६

वाणी मे स्मर्णी विष्णोः क्व मत्का रमणी खलु ॥ ~~पन्नगेन्द्रस्य महिला केवला खलु~~ ॥ पन्नगेन्द्रस्य महिला केवला खलु सुन्दरी ॥ ७ ॥ तस्मात्त्वमपि यत्नेन कुरु दारपरिग्रह
म् ॥ कुरु मद्वाचि विश्वासमन्यथा नोच्यते खलु ॥ ८ ॥ यागस्नानाद्यः सर्वे धर्मकार्याः प्रयत्नतः ॥ भार्यया सह योगोऽपि न विरुद्धस्तपः सह ॥ ९ ॥ **बालक उवाच** ॥ अलं दारैर्धौ
रैरलमलमपारैरपि धनैरलं योगैर्दानैरलमलमशेषानुसरणैः ॥ परं हारं लिङ्गं सितमसितमप्यस्य शरणम् पुनस्तस्मै तावच्चरणमिह तन्मे पुनरपि ॥ १० ॥ मरणे समुपस्थिते
न दारैः निकटेऽपि स्थितिवारणं कृतं किम् ॥ क्व ममाभरणं क्व पदं कृतं क्व धनं बेत्यनुधावनं कृतं किम् ॥ ११ ॥ ~~क्व ममाभरणं क्व पदं कृतं~~ पूर्वं दारपरिग्रहेण बहुधा दुःखानि
भुक्तान्यहो नीतं जीवनमेव तैरनुदिनं शक्तिश्च नीता तराम् ॥ १ ॥ आयुः क्षीणमभूद्वृथाति सुरतैर्दारादैरन्वहम् ॥ मोहेनापि मुहुर्महेशचरणध्यानं कृतं नैव हि ॥
नित्यं कुङ्कुमकेसरादिसहितैः कस्तूरिकाकर्दमैः कर्पूरद्रवसंयुतैरपि लसन्नीहारनीरैरपि ॥ २ ॥ श्रीखण्डद्रवसेचनैरपि मुहुर्नीरैर्नारीवरोरोजयोः सेकेनैव
करश्रमोऽपि सकरस्तुङ्गेन लिङ्गे कृतः ॥ हारैरप्यनुहारदारकुचयोरावेष्टनं कल्पितं मन्दारामलमल्लिकादिकुसुमस्रग्वेष्टितौ तत्कुचौ ॥ ३ ॥ दृष्टौ तौ
दुरदृष्टतो मुहुरहो दृष्टं न लिङ्गं मया तुङ्गं नार्मदमद्रिकुन्दकुसुमैः बिल्वीदलैरर्चितम् ॥ व्याप्ता सा तरुणीगणे मुहुरहो शय्या मदीया शुभा तत्संमर्दवश
त्कथञ्चिदभवत् छायाचलेवास्थितिः ॥ ११ ॥ तस्माद्व्यवनीतले नियतितं दासीकराघातनैः साकं शङ्करलिङ्गपीठनिकटे नैवाभवल्लुण्ठनम् ॥ दुग्धं गो
घृतशर्करादिसहितं सौवर्णपात्रस्थितं यन्नारीगणपीतशिष्टमभवत् तत्पीतमत्यादरात् ॥ १२ ॥ तन्नोच्छिष्टमतिः कदापि न ममाभूद्देवभूयः परं
तत्पीतं न नु पीतमेव सुखदं रुद्राभिषेकोदकम् ॥ तन्नारीजघनोदरान्तरगते बातोऽपि गर्तेष्वभूत् मन्नेत्रप्रसरः पुनः पुनरहो पापैरपारैः परम् ॥ १

शि०र० उ० ५०

ह०त०उ० अ०१५

पं.१ बिल्वी पल्लव संकुलं च मनाग् दृष्टं न कुष्टं मया ॥ हा हा हा बहुजन्म संचित वयः पुष्टांगना लिंगनैः ॥ नीतं जन्म, कदापि लिंग मसकृत्तुंगं तु ना लिंगितं ॥११४

तुङ्गं लिङ्गमुमामनोहरवरं रेवाजलालिङ्गितम् ॥१४॥ बिल्वीकोमलपल्लवैः सकुसुमैर्नाभ्यर्चितं न स्मृतं न स्पृष्टं न विलोकितं च नतं नाराधितं वा मया । अद्येयं मतिरस्य शङ्करकृपालेशेन जाताधुना विघ्नो मास्तु मतेः पुनः पुनरियं वृद्धिं प्रयात्वन्वहम् ॥१५॥ कस्य स्यात्सुखसाधनं विषमिवा नङ्गाङ्गनासङ्गमस्त्याज्यो दूरत एव शङ्करपुरीकासेन नेयं वयः ॥ भुक्तं नातमनुस्मृतं दधियुतं क्षीरान्नमत्यादरान्नोक्तुं नेच्छति मानवः पुनरपि प्राप्तस्तथैवाङ्गना ॥१६॥ त्यक्तानां विषयस्पृहा तु न कदाप्यन्नेषु वान्तेषु किम् ॥ वाञ्छा सम्भवतीति बुद्धिरसकृन्मूढस्य वा किं न सा ॥ नवोढां मृदो वा दृष्टमपि सकृद्व्यपदि मुहुर्मुक्ता त्यक्ता पुनरपि न वान्ताशनाभिमा ॥ पुनर्भोक्तुं वाञ्छत्यपि सुकृतपाकेन विषयः परित्याज्यः पूज्यः पुनरपि महेशः पुनरपि ॥११७॥ इति श्री शिवरहस्ये हराख्ये तृतीयांशे उत्तरखण्डे याज्ञवल्क्यजनकसंवादो नाम पञ्चदशोऽध्यायः ॥१५॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥

याज्ञवल्क्य उवाच ॥ इत्येतद्वचनप्रवाहजनितोत्साहोऽपि तं केवलम् ब्रह्मा दारपरिग्रहोद्यतमतिः कर्तुं पुनर्बालकं ॥ ब्रह्मानन्दजलाकुलोत्तमतनुं लिङ्गार्चने नाभ्युद्यतं बिल्वीकोमलपल्लवैरभिनवैः धौतैश्च रेवाजलैः ॥१॥ ब्रह्मोवाच ॥ यद्यत्स्यादनुकूलमेव सततम् तत्कालकालार्चने ग्राह्यं तस्य परिग्रहेऽप्यनुदिनं तत्सेवने नाधिकं किम् ॥ तस्माद्दारपरिग्रहोऽपि न दुराचारैः ससारस्य ते हारस्यापि दुराग्रहस्त्वनुचितो दारेष्वधीरेष्वपि ॥२॥ इत्याकर्ण्य विधेर्वचोऽप्यनुचितं मत्वापि नत्वा च तं कृत्वा चेतसि धैर्यमेव समुहुर्हित्वैव दारेषणाम् ॥ हत्वा मोहरिपुं पुनः पुनरपि सत्वैव तां यातनां मुक्त्वा मुक्तिविरोधिनं स्मरहरं संसारहारः परम् ॥३॥ बाल उवाच ॥ गौरी मनोहर पदाम्बुजमादरेण वन्दे मुकुन्दनयना

म्बुज पूजितंमे॥आनन्दसुन्दरमरन्दविनोदधाराधारोधराधरमहंमुहुराश्रयामि॥४॥उमाकरिमनोहरतट स्फुरत्करिवराननालोकनप्रसन्नहृदयंधियास
दयमिन्दु चूडं मृडम्॥उमेपरिवृढं दृढं भजन मानदत्तेसितं सितानननमना मयंप्रियमुमासहायंमुदा॥५॥हाराणामपहारकः खलु खलः कोवाहराराधन
ध्यानानंद निमग्नमेव विषयैरुद्विग्नमज्ञोऽग्रिमत्॥ कर्तुंवायतते ततःस्वमपि चेद्धन्तुंप्रवृत्तस्तदागन्तव्यंममतावदत्रवसतिर्देहावसानावधि॥६॥
तुङ्गानि लिङ्गानिमनोहराणि हाराण्यपाराणि विहाय कोवा॥ हारादरस्यादमरत्ववाञ्छञ्जहाति किं मृत्युः वधूः शिशुर्वा॥७॥करतल कनकातिविम
पात्रस्थितमपि दुग्धमपास्य दिग्धमाज्यैः॥अमधुरमति दग्धदुग्धवद्धं कथमपिखर्परमर्पयेन्मुखे किम्॥८॥किंमुग्धामधुराधराधरसुधाधाराध
राधीरमेसानासावदनान्तरालगरलश्रेण्याकपालाकुला॥कालासाकुधियासुधेति विदिताधिक्‌धिक्‌धिगेवावधि धीराणामपिहारनाम सुसुधापा
नातिपीनत्मनां॥९॥पुरानारीपीनस्तन गिरि विहारेण कुधिया नहाराराणामनुसरणमार्येण नकृतम्॥नवातुङ्गंलिङ्गंकथमपिचशाङ्गं नवजलैःन
वैर्बिल्वैःपुष्पैरपिसकृदपि कृतं पूरितमहो॥१०॥मुहुःकोवाबालं पुनरपि गृहाणोलिवरूणाम् परित्यक्त्वा वक्तुं सुमुखयतते दुर्मुखमुखः॥अयंक्लेशः
सहः कथमपिवधू सङ्ग विमुखः सुखोलोकेशोकोनखलु वृतदारापसरणे॥११॥पुरीषकुहुरान्वितंयदिनमूत्रकुपं तदा यदिमतिः किमितिजायतेजग
तिनानुरागान्विता॥यतस्तदुभयान्वयः सपदितद्वधूसंगमेसताावदातिकुत्सितोभवतिकुत्सिताभीप्सितः॥१२॥यतोवधूनांविविधाकथापि
मतानमेतावदतःकथंना॥मतिर्वधूसङ्गतिगोचरास्यादिहापिहारस्य ममाधुनापि॥१३॥लज्जासागरमज्जनैरलमलंनालंकिमद्यापिमेकुम्भी-

शिवरह०२ | ४१

कं विलोकनागतभयायासोर्वदासञ्जनैः॥ तस्माद्गं जनमञ्जनाचलभिधध्वान्तप्रवेशेन मे यत्नेनाप्यलमप्यलं खलु खलैर्बालाभियोगैरलम्॥१४॥ कालेकालेकाल

कालानुकामम् लिङ्गं तुङ्गं शृंगमभ्यर्चयामि॥ इत्येषा मे बुद्धिरस्तु प्रवृद्धा बुद्धिर्नारीसङ्गमे मास्तु मास्तु॥१५॥ न दारुदारेष्वपि शैलदारेष्वशैलदारेष्वपि दुर्मतिर्मे॥ मास्त्वे

व मास्त्वेव ~~मास्त्वेव~~ पुनश्च मास्तु पुनश्च मास्त्वेव पुनश्च मास्तु॥१६॥ करोमि शपथं पुनः शिवपदाम्बुजे पञ्जसा वधूजनमदुर्जनो जनतया विहीने वने॥ नवेऽपिन

भजाम्यतः सजनताभिरमते पुनः न ताभिरनुवर्तनं सहसमृच्छति स्वच्छधीः॥१७॥ भवन्ति बहवो मुहुर्जगति दारभारादराः प्रयान्तु यममन्दिरं यमभयातिवाताहताः॥

स्वकीयहितचिन्तनं न विहितमेव सर्वात्मना ततस्त्रिनयनं परं परमसुक्तिदं प्रार्थये॥१८॥ अतः परमहर्निशं गिरिशमेव बिल्वीदलैः जलैरपि सुशीतलैरभिनवैः

समाराधये॥ विमुक्तिमपि साधये यमभटानपि त्रासये विहाय युवतीजनस्तनघनापहारं परम्॥१९॥ महाप्रयाणावसरेण नारीशरीरसङ्गेन सुखाभिवेशम्॥ उत्तुङ्ग

शृंगामित लिङ्गसङ्गादानन्दसङ्गाभिनवांगसङ्गः॥२०॥ क्व संसारभारापहारोद्यमो मे क्व दारानुरागानुकारोद्यमस्ते॥ क्व सर्पादिभीतोऽपि सर्पानुरागप्रकारोपका

रानुरक्तानुरक्तः॥२१॥ अत्युच्चातिमनोज्ञरत्नरुचिरे सिंहासनेऽधिष्ठितः॥ किं वान्ध्रं कुरुते मलाकुलजलावर्ताधिवासे ततः॥ नेच्छा शङ्कर पूजनोद्यतमते दारेषु हारे

षु वा तस्माद्दारविचारचातुरचिरं किं वञ्चितश्चञ्चुरैः॥२२॥ न दारव्याहारैरस्मपि विनेयं खलु नयो मया ध्येयं [ध्येयं] शिवचरणपङ्केरुहरजः॥ मुहुर्मेयं मेयं द मुहुरपि

च मृत्युञ्जयपदं मदान्धैः सिन्धुरप्रवरगाति निन्दाकरैः॥२३॥ पुरा यद्यद्भुक्तं तदपि न मया विस्मितमहो महादेवध्यानैः स्मरणपरिपाकैः स्मृतमपि॥ भयोद्वेग

यालं पुनरपि न तद्भोगरचना चिरं त्यक्तं त्यक्तं पुनरपि न तत्रादरमतिः॥२४॥ कृतो लोके कोऽपि प्रभवति कृतान्तान्तकहितः स्मराराति ध्यानप्रवणहृदयः

हृ०ल०उ० | अ०१६

पुण्यनिधयः॥ तवाराध्यंमत्वा शिवभजनचिन्तामणिधनाः॥ क्वचित्सन्तः सन्ति त्रिनयनवने बिल्वजवने॥२६॥ दूरदूर्वाङ्कुराहारो हारो धीरो मनोहर
म्॥ हरस्मरहरेत्येवं स्मरन् कालंनयाम्यहम्॥ पुनः पुनर्दारपरिग्रहाय दुराग्रहस्तेऽनुचितोयतस्ते॥ नवस्तुकस्तूरिकया समानं मुस्तापि शस्तापि नतत्समा
ना॥२७॥ अभिमानविहीनमानसानां नजनानां जनताप्रवेशवार्ता॥ अतएव निवृत्तिरार्तितः परिवृत्तेऽपि नदारसङ्ग्रहे॥२८॥ ग्राहग्रस्तैर्वातिदुस्तरमहासंसा
सहस्र।
रसाराद्दारोदारग्राहविमुक्तिमिच्छति यं भूमण्डले कोऽप्यतः॥ तस्मान्मुक्तिरपेक्षितैव दुष्टात्मनां दुर्गतिः किन्नामेध्यविलोलजन्तुसदृशो दारानुसारी जनः
॥२९॥ दारैर्दारुणयातना खलु मुहुर्दारानुषङ्गे सुखं न स्वप्नेऽपि महाप्रयाणसमये तेवान्न वार्ताप्यतः॥ सा वार्ता विषवद्विभाति नाविषं पातुं प्रवृत्तोपि किं जीवा
मीति सदापि दारवररैसा जीवनाशाकुतः॥३०॥ यत्र क्वापि नयामि जीवनमिदं रेवातटे केवलं ध्यायन् कालविलोचनं मुहुरहं तं कालकालं जलैः॥ रुद्रा
ध्यायजपेन लिङ्गममलं संसेचयन् कोमलैः आरक्तैर्नवबिल्वकोमलदलैः अभ्यर्चयन् शङ्करम्॥३१॥ आयुर्नेयं सारसारस्य भूयो भूयो भूयः पूजनेनैव
शम्भोः॥ तस्मादायुर्दारभोग्यैर्न नेयं यद्भोगार्थं तद्दिनं नोपयुक्तम्॥३२॥ जायानेया यामिनी नाथचूडध्याने नैया यामिनी नेयमन्या॥ एकाकारा सानदारो
पभोगे योगपायोग्या शङ्कराराधने सा॥३३॥ न वृथा खलु जन्मयापनं यमदूतावसराय नायुरस्य॥ न च मेरुसमानमायुरत्नं तदिदं दारपरिग्रहे वृथा स्या
त्॥३४॥ नदारोपभोगस्पृहः परिकल्पनीयः कोवात वाभिमतदूत्यपि तन्न विघ्नः॥ सर्वोऽपि शर्वभजनेन विनेय एव कालो यमायुरपि तेन वृथा न भूयः
॥३५॥ यमभटपददण्डभीषिवालज्वलनकुलाकुलचेतसां कदाराः॥ हरहरहरइत्यपार हारव्यतिकरनेयमिदं वयः प्रियं मे॥ मास्तु मास्तु मम

दारपरिग्रहे स्वेच्छा स्वेच्छाविहार हर हार पराक्रमस्य॥ को वा सुधामपि विहाय मलाशनेच्छा स्वच्छन्दवृत्तिरपि सूकरदारवृत्तिः॥३७॥

आकर्ण्य यद्‌मेध्यमात्मशनं वान्तं पुनः तत्पुनः॥ स्वीकृत्योदरदुर्विकारभरणं कर्तुं प्रवृत्तः कुधीः॥ को वा तं वद दारहारनिकर व्यापार

चौरैः परं हारो वाञ्छति चञ्चुरः परमतो हारो मम आस्वादरः॥३८॥ दारव्याहारवीराः कतिचन कतिचित्मारसंहारहार व्याहारासारसार प्रचुर

चिरकथामात्रचित्ताः पवित्राः॥ तत्रायेन प्रवेशो मम भवत्वयमागे प्रवेशो तेनाशोको न नाशोऽप्यनुदिनमिति मे शङ्कराराधनेच्छा॥३९॥ इच्छा शङ्कर पूजनेयदि त

द्धन्यं तदायुः परमं नीहाराचलकन्यकापतिपदांभोजार्चनं जीवनं येषां तत्पूजनेन च मया नेयं दिनं सादरम्॥ तत्तद्दुर्दिनमित्यवैमि बहुधा यस्मिन्न तच्चिन्तनम्॥४०॥

को वा सन्ततमन्तकान्तकपदांभोजार्चनं नादरात्कर्तुं वाञ्छति संचिताघविलये तावन्न दिच्छा भवेत्॥ अस्माकं दुरदृष्टकष्टविलयस्येदं परं सादरम् यद्देवातट तुङ्ग लि

ङ्ग भजनं बिल्वीदलैर्वा जलैः॥४१॥ सुधापानैः पीनः पुनरपि सुधामेव कलयन्परं क्षारं नीरं परिहरति दारानपि तथा॥ कथं वारं वारं परिहरति हारोऽपि न मुहुः महादे

वं ध्यायन् मुहुरमृतरूपं मुहुरपि॥४२॥ चित्तं तावदुमासहायचरणध्यानाय यत्कल्पितं तत्किं धावति धूर्तजव धूर्तं गाङ्गसंगेच्छया॥ नायं क्वापि सुधाकरो विषकरश्चि

न्तया शङ्कर ध्यानाराधनसाधनप्रवणमप्येतस्य दारा रतिः॥४३॥ दारा रतेर्दारुणयातनायास्तावन्न किं स्याद्विनिवारणाय॥ स्वकांधकारापगमेऽपि चक्षुर्न भानुग्रहणाय

शक्तम्॥४४॥ दारेषणामास्तु धनेषणापि शिवैषणा तावदनन्तरायाः॥ स्यादस्य तेनास्य शिवं शिवेनानि शिवोऽपि दास्यत्यनुवारमेव॥४५॥ चिरं हर हरेति मे मनसि हारनामामृ

तं महेश्वरकथारसप्रसवसिद्धिवृद्धिः परम्॥ पदं न विपदामिदं भवति सम्पदां तत्पदं तदेव मुहुरादरात्स्विव पिबाम्यहं सादरम्॥४६॥ वृथा किमिति नीपतेवद वपः

ओवरह०३ ५२

ह०त०३० अ०१६

म्रियन्तेवयः कियत्किमपितेन वानकृतमेव पुण्यंमुहुः॥ नतेनमहनीयतात्वयिकृता वृथाजल्पनं कृतं कृतमतःपरं कुरुमहेशवार्त्तां विधे॥४७॥ नवाणी वाणीनांस्मरण

मुचितंतेऽप्यवयमप्यन्तरस्तावद्गौरीरमणचरणाम्भोजभजनम्॥ धनं यावज्जीवं शिव शिव महेशेति विलपन्नरे रेवातीरे चर चर विचारैरलमलम्॥४८॥ अकस्मादेतस्मि

(बिल्वी)

न्पततिचशरीरे पुनरिदं क्व वारे वालिङ्गं भासितमपि रेखा दलमपि॥ क्व वायं व्याहारो हर हर महेशेत्यपिततो वृथा मुख्याहारं परिहर हराराधक विधे॥ विधेरपि विधिं विना

विविध शङ्कराराधनं प्रसाधन समाधयः प्रभवितुं समर्था अपि॥ अहो किमिदमम्बिकारमण चेष्टिते वञ्चितं मनः शरणमम्बिकारमणपादपद्मं मम॥५०॥ वनेवन हुताशन

प्रभवभूति भूषाश्रिया विराजिततनुः शनैः अनशनैरहं शर्वरीम्॥ नयामि शिवपूजया शमनदूतभीतो मुहुः मुहुर्मुहुरनुक्षणं भवति तेन नायुः क्षयः॥५१॥ क्षणार्धमपि

शर्वरीरमण खण्डचूडामणिम् निधाय हृदयाम्बुजे भजभजाद्यमृत्युञ्जयम्॥ हर स्मर हरामरप्रवर शंकरेति स्मरञ्जपन्नपि मुहुर्मुहुः कलय कालकालं विधे॥५२

कल्याणार्णव एव शङ्कर इति ज्ञेयः स कल्याणदः कल्याणी रमणोऽपि पुण्यकरुणाकल्लोल पूर्णार्णवः तस्मिन्चेतसि संस्थिते स्मरहरे न स्मारवार्ता दरोदारा

यान्तु कथा अतिदूरत इति ज्ञात्वा तमाराधय॥ नेयं दारकथा महेश्वरकथा यद्वा शिवाराधनं यद्वा पन्नगभूषणस्मरणमप्यर्धेन्दुचूडार्चनम्॥ यद्वा शङ्कर

पदेणास्थितिरतः त्याज्या वृथा सा कथा निर्वैरं भज शंकरं करुणया देवाधिदेवं परम्॥५४॥ हाहा जन्म वृथा गतं बहु विधैः फुल्लैः प्रसूनैर्नवैः विल्वैः कोमल

पल्लवैरपि शिवो नाराधितो न स्मृतः॥ रेवातीरवनेवनैः सपवनैः यात्यायुरायाति किं दुष्टं काल विलेखनं भवहरो भावोऽपि नालोकितः॥५५॥ दुरा

लापः प्रायः प्रचुरतरदारादि विषयः विषप्रायः प्रायः कथमयि न चित्तं व्यथयति॥ कथं मोहो वृत्तो मयि निरपराधे सति मुदा व्यथारोपं कर्त्तुं कथमिह

५६

समभ्यागत इति ॥५६॥ अतः परं किं न भवं भजामि निशावसाने स्मर शासनाय ॥ पूजा विधेया विविधोपचारैर्विल्वीदलैर्वा विमलैर्जलैर्वा ॥
गता रात्रिर्व्यर्था व्यथयति मनो मे पृथगयं विधिर्लग्नो भूयो विधिरपि विधिज्ञो अथयति ॥ कथं वा दौर्भाग्यं भवति पुरुषायुः क्षयमपि प्रया
त्येत्तावद्गिरिशभजनेनाभवद्धो ॥ अहंकारः को वा गिरिशभजनध्यानविधिभिः प्रवृत्तस्यास्यापि क्षणमपि न भाले क्षणकथा ॥५७॥ नवा
तुङ्गे लिङ्गे नवकमलविल्वीनवदलैः रखण्डैरभ्यर्चा वत वत वयः क्षीणमधुना ॥ महामृत्युः पश्यत्ययमनिशमीशार्चनरतो न जातो न ध्यातं शिवच
रणपङ्केरुहरजः ॥५९॥ अनेनेति प्रायः क्वगतिरिह हाहा हत इति व्यथा चिन्तारूढाकथमपि न चोढामवसिमे ॥ महामोहस्यायं कथमपि न कालस्मर
हरो हरस्मर्तव्यो मे यमभटविभीतस्य न निशा ॥६०॥ [illegible] प्रगे तुङ्गं लिङ्गं स्मृतमपि महापातकहरं सहारं दृष्टं चेत्सकलदुरदृष्टक्षयकरम् ॥ करोमि
करवीरजप्रसवमल्लिका मालया न लिंगपरिवेष्टनं कमलकुन्दमन्दारजैः ॥६१॥ अमन्दजलधारयाप्यनुलवं किमाशापरो पटुर्भसितभूषितो वि
गतपापतापोऽधुना ॥६२॥ गन्तव्यं विपिनेन वाम्बुजदलान्यानीय लिङ्गं मुदा तैरापूर्य पुनः पुनश्च भसितैर्भालं विलिप्यामलम् ॥ कृत्वा नाट्यम
होत्सवं च गिरिशं नत्वातिभक्त्या मुहुः ॥ भो शम्भो भगवन् भवेति बहुधा कालं नयाम्यादरात् ॥६३॥ कंदर्पाद्भुतसर्पदर्पदलनोपायो मयालङ्कृतः ॥
योऽपञ्चेतसि शङ्करस्मरणं रिपुः पापौघहारः स्मृतः ॥ तस्मिंश्चेतसि तिष्ठति स्मर कथा का का कथा वा वधूपीनोत्तुङ्गकुचान्तराल सुरतः स्वेदाप
हारस्य च ॥६४॥ नारीकुचोरुगिरिशेश्वर हीरहारभारापहारचतुरोऽपि कोऽमना भूत् ॥ तेनानुवेलमनलाचलकूटपातभीतोऽनुभूत विषयो वि

गतस्पृहोऽद्य ॥ ६५ ॥ मुग्धाधरामृतरसप्रविलोभमूले गाढान्धकारकुहरानलज्वालयाहम् ॥ तस्मात् पुनः पुनरतोऽस्य न तत्र वाञ्छा किन्त्वीशपाद
कमलस्मरणेऽस्ति वाञ्छा ॥ ६६ ॥ नारीघनस्तननिपीडनताडनाद्यैः संगारलोहमयीस्तनपीडनाय ॥ सन्ताडितोऽसकृदधमदण्डचूडाञ्वा
लाकुलैरिति न तत्र ममास्ति वाञ्छा ॥ ६७ ॥ गण्डामथुलगण्डमथुनमुखच्छायाच्छलालोचनेनेच्छा कस्य तथापि सापमभर्त्सटोपाटनैस्त्यज्यते ॥ आ
कल्पं खलु यातना खलु जनस्यातः क्षणार्धं मुखं तन्दृष्ट्वापि करोति वह्निनिकटे लोको दहति व्याकुलः ॥ ६८ ॥ का बाला निजलीलया न कुरुते
स्वाधीनमेवाधुना लोके तेन न यातनश्यमहितं तावत्स्वतंत्रस्य किम् ॥ तस्मादूरत एव तत्परिणया पेक्षाविरूपाक्षमे रुद्राक्षाभरणस्य दक्षतनया
नाथाङ्घ्रिपद्मं स्मृतेः ॥ ६९ ॥ पिकालापग्रामे स्तरुया तरुणी गाननिद्रैर्वयो नीतं नीतं धनमपि धनेच्छा धनमपि ॥ मुहुर्ध्यातं ध्यातं नपदम
सकृच्छैलतनयापतेर्भूतं भूतं पुनरपि न तत्रास्य तु मनः ॥ ७० ॥ आरक्तामलबालविद्रुमलताबालाधरे नादरस्तेन स्याद्वशो वशोऽप्यय
शसां राशिर्वशी वशी ॥ तस्मात्तत्परिहार एव वरमित्यस्यातुधीर्मे विधे साधीस्तावदिहाधुना विधिवशाज्जातापि सा जातु न ॥ ७१
काञ्चीकान्तिविजृम्भितत्रिवलिका संस्थापने जौवनम् ॥ नीतं तेन तु यातनातनुरभूत्तावत्तनुस्तापतः ॥ तत्पापौशमाय कायमसक
त्तापायमेवाभयेः ॥ मत्वा शङ्कर पूजनोत्तरमहं त्यक्ष्ये शिवेत्युच्चरन् ॥ ७२ ॥ यायापूर्वभवेषु दोषविषयैरेणीदृशा दुर्दशा भुक्ता
सा तु न गोचरापि वचसा यच्छानुवादे न मे ॥ तद्दूणी फणिवन्धनेन बहुधा निर्वन्ध एवाभवत्तत्काले खलु कालकालकलना

शे०र०ह० ३
५४

नासीन्मनो मानसम् हे मत्तेभमरालराजगमने हे चन्द्रबिम्बानने हे नीलोत्पललोचने विवसने [illegible] पश्येति नीतं नयः॥ तेनातत महासिना विरसना छि-
न्नेति हे शङ्कर श्रीविश्वेसर पाहि मामिति जपैः कालन्नयामः कदा॥७४॥ अमन्दानन्दा वामदनकदने कापि तरुणी मृणालान्तस्तंतुद्वयसनासा-
परमणी॥ मुहुर्दृष्टा पुष्टा किमिति बहुकष्टानुभवतः प्रनष्टा सन्तुष्टा कथमिह पुनः संमनसि चेत्॥ विवप्राया प्रायोभवति युवती कापि युवती सुधा
प्राया ताद्या शिवभजनहीनानुशरणा॥ द्वितीया सा गौरी रमणचरणांभोजभजना प्रवीणा सा पुण्यैरमर तटिनी वा विहरणे॥७६॥ कावास्याद्गिरि
शोपहारकरणे व्यापारमात्रादरी दारत्वं समुपेत्य हार विमुखा नीहारहारादरा॥ रुद्राक्षैरपि भस्मनापि ललिता भस्मत्रिपुण्ड्रांकिता॥ सा लोके
खलु दुर्लभैव तरुणी कामेरकाम प्रिया॥७७॥ कावा लोचनगोचरान तरुणी ३ कामातुरा कामिनी निष्कामानपि काम साधक करा कामातुरा
न्कातरान्॥ कर्तुं वाञ्छति पञ्चबाणरमणी त[illegible]त्प्राण संरक्षणे तावत सा ति विचक्षणेव करुणा का तत्र तस्याः प्रिया॥७८॥ दूरे सा तरुणी वने ऽपि तरु
णी वार्ता न मे रोचते सा नारी शबरी नराधम मृगव्याधस्य सा स्यात् स्त्रिया॥ नारीचारु गिरा नरोऽपि निरयं तद्दौरवं यात्यतः पश्य येऽपि न प्राणिनां
॥सा तस्मिन्नधमत्व मेव कुरुते तस्याः स्वभावस्तथा॥७९॥ सुधाकरकराकरं यदि न मान्दिरं
सुखं स्यामपीति मे मरणमेव तत्ताडने॥८०॥ अमन्द मद सुन्दरं जयातु रमणी मणिभूषण ताडनापीडितं॥ करोति रमणं तलः परिणये ऽपिन प्राणि
नां सुखं क्षणमपीति मे मरणमेव तत्ताडनैः॥८०॥ अमन्द मदनव्यथा नागरिकंधरा वासिनाम सार कणभक्षणे रूप्राजि शय्यासनैः॥
अतः कथमनुक्षणं स्मर हरार्चनाराधनैः॥ नयामि नमुदा वयो मुहुरुमासहायाश्रये॥८१॥ कर्णान्तदीर्घनयनानु विलोकनेन नीलोत्पलो

ह०त०३०
अ०१८

४पं.१ – नीतं वयः कियदतः परमिन्दुमौलि लिंगोपधान रचनेन मयामिकाले ॥८२॥ कः कालोऽपि वराक इत्यपि मनः कान्ताकाराधने ॥

चितकपोल तलोपधाने ः नूनं मे भवतीति निश्चितमतः पङ्केरुहैः शङ्करम् ॥ निःशंकं समुपास्महे मुहुरुमाकान्ताभिधानामृतं पीत्वा पीन वपुःस्मृतां तकरिपुस्त्यक्त्वैव नारि स्पृहाम् ॥ ८३॥ नारिमारमनोहरेति चतुरो हारे ऽनतस्यां रतो यस्मान्मार रिपुः प्रकुप्यति रिपुः प्रेमास्पदानास्पदम् ॥ प्रीतिस्तद्रिपुं मवस्य च ततो नारि न मे रोचते ॥ हारस्येति विचारितं पुनरिदं किंवा विचारास्पदम् ॥८४॥ वितानं यत्रासीदमृतकर रूपं दिगवला शिलाशय्या रेवाजल विमलमूलाति विपुला ॥ इदं लिङ्गं तुङ्गं बिबिधमुपधानं घनमिदं करादिः सेवायै मम भवति भाग्यैरिह विधे ॥ ८५॥ अधुनापि वधूजना विरोधे प्रतप्तः पापौघ स्मरण इहेनाप्यनुदिनं सदने तदुदस्तानुलोकनेन ॥ न किमस्य वयोऽपियाति वह्नौ पतितन्नीर पृषत्कवद्वृथाहि ॥ ८६॥ अहो नीराहारो मिहिर कातपः प्रतिदिनं शरीरत्यागेना प्यचिरसुचिधाराति रुचिरां वरां [illegible] नारीं रम्यां कथमपि न पश्यामि मनसा ॥ ८७॥ संसाराग्नि कदर्थितः कथमुमाकान्तार्चनाराधना धाराधार हरानुरक्त मनसां सङ्गे रभङ्गैः पुनः लिङ्गाराधनमेव [illegible] तावदधुना कर्तुं प्रवृत्तो मुहुः ॥ नानङ्गज्वरमारकातरतरां नारीं न पश्याम्यपि ॥ ८८॥ नारीतुङ्गतुरङ्ग लोचन चमत्कारा करावेक्षणं क्षीणं तावदहो वयः कियदपि प्रोत्साहकालोकनैः ॥ आलोकेष्वपि तद्विलोकनमतिः न्यूनानन्नूनं मुहुः नेहोङ्कूति विभूति भूषितवपुः भूयोऽपि भूयो भुवि ॥ ८९॥ प्रासाद वातायन वातपोतनीतोत्तरीयोन्नतनीवि बन्धाः ॥ बन्धाय जाता खलु दृष्टिबन्धैः यमालये ताभिरतः परं किम् ॥ ९०॥ वारं वारं वारनारि विहारैः मारणारसाररूपैः सपापैः ॥ नीतः कालः काल्यकालानुवेलं काले काले नार्चितः कालभूतेः ॥ ९१॥ न वातपोतानपि जातु सुन्दरी घनस्तनान्तः पतितानुपेतान् ॥ [illegible] मपोनमेवान्वहति तुङ्ग गङ्गा तरङ्ग लिङ्गानिल बाललोलम् ॥ ९२॥ रेवातीरसमीरनीर तरुजापार प्रसूनार्चितं तुङ्गं लिङ्गमभङ्गलानि हरतीत्यङ्गांगनांगानिलः ॥ नाप्या

तीति मुहुर्मुहुर्हरमहादेवेति कालं नयन्तन्त्वावधिकालकालकलनं मन्ये धनं जीवनम्॥ अनल्प संकल्प विकल्पनैर्गा कुलीलयालंकमला विलासैः॥ वरांगनापांग
तरंगसंगैः स्तंगमातङ्ग हरं भजामः॥९४॥ अभ्यर्थे मरणक्षणे तु रमणी निर्वाण वर्णार्पयं शर्वाणी रमणानुवर्णनमुदा कर्णे करोत्येव न॥ नैवांगे भसितं करोति न मनाग्रुद्रा-
क्षमालां गले लिङ्गं मङ्गलदायकं न हृदये बिल्वानि वा किं तया॥९५॥ दूरे देवपतिं विलोक्य पतितं दैवान्मृतञ्चावृतं दूतैः नेतुमुपागतैस्तु सुरताभावानुलापे रता॥ प-
श्चात्काम शराकराकुल वधूः संगुप्त तद्रोदनात्तद्भिन्ना जरयापि पीडित तनुं जारं परं पश्यति॥९६॥ उमासहायः शिवपूजनञ्च भूतिश्च रुद्राक्ष विभूषितञ्च॥ यथा
हितायास्य तथा हिताय माता न तातो न वरांगनापि॥९७॥ मुहुर्मुहुः कुंकुम पंकगौर गुरुस्तनान्तर्गृहारभारः॥ विलोकितो मारविहारकाले कर्पूरगौरो न हरस्मृतो
पि॥९८॥ उन्मत्तोऽपि करिकरेण विमले कुम्भस्थलेलंकृते मुक्ताजालक कल्पनेन तरुणी वक्षोज तुल्ये मुहुः॥ धूलिं प्रक्षिपति क्षणेन चरणे हारान्नु क्षिणोत्यहला
नाक्रोशत्यपि हा हतोऽहमिति किं लज्जा न तेनापि मे॥९९॥ पुरा नारि तुङ्ग स्तन भरकराघातनफलं गजत्वं सम्प्राप्तं पुनरपि कुचाभेन शिरसा॥ मुहुर्दुखं किं नेत्यपि शि-
रसि धूलिं क्षिपति किं ततो नारी दूरे विरतु मनो मे शिवा शिवे॥१००॥ उमाकान्तानंतान्यपि मम दुरन्तान्यघकुलान्यपारब्रह्माण्ड प्रलयकालान्यपि मुहुः॥ वि-
नष्टान्येवाय स्मरहर विहाराकर वरे वरे वातीरे स्थितिमति महाहार निकरे॥१॥ शिव शिव शिव शंभो चन्द्रमौले स्मरारे हर हर हर घोरापारसंसारभारम्॥ परि-
हर परनारी संगमं गारभंगं व्यतिकरवर रूपं पाहि पाहि स्मरारे॥२॥ शम्भो माम कला मतिस्तव सदा मय्यस्तु का तावता हानिः स्यादनुवारमेतदधुना संप्रार्थनीयं
मम॥ किञ्चादेयमुमासहाय तव किं सर्वामराधीश्वरे दातापीति पुनः पुनर्मम मनस्त्वय्येव गौरीपते॥३॥ भूतिः फाल तले सितातिविमले रुद्राक्षमाला गले

जिह्वायां शिवनाम चेतसि शिवध्यानं शिवा चिन्तनम्॥ भक्तिश्चाव्यभिचारिणी त्वयि महादेवे निवासः सदा काश्यां शंकरलिङ्ग पूजनमतिः भूयान्मम श्रेयसे॥
१०४॥ इति श्री शिवरहस्ये हरारव्ये तृतीयांशे उत्तरार्धे याज्ञवल्क्य जनकसंवादो नाम षोडशोऽध्यायः॥१६॥ याज्ञवल्क्य उवाच॥ इति तद्वचनं श्रुत्वा विधिर्व्याकुल
मानसः॥ राजापि राज्ञी कन्यापि व्याकुला भिमता दिति॥१॥ अहो कल्याण समयो नाद्याप्यस्याप्युपागतः॥ कन्याया श्च विशेषेण किं कर्तव्य मतः परम्॥
॥२॥ अत्युदारोऽपि धीरोऽपि हारो वीरोऽतिसुन्दरः॥ पञ्चरेफान्वितस्तावद्दूरोऽयमिति दुर्लभः॥३॥ सा तावद्युवती तावन्मदनज्वर पीडिता बध्दा वहानां
कमलनालानां तन्तुभिः शीतलैः परम्॥४॥ पश्यन्ती चित्ररूपाणि पुरुषाणां पुनः पुनः॥ तन्न पश्यति तच्चित्रे तत्तुल्यो प्यधिकस्तु न॥५॥
मनसा केवलं ध्यात्वा तं पञ्चशरखेद पीडिता॥ स्वप्निते याति विमला सा बाला कमलानना॥६॥ नावाप निद्रां मुद्राश्च पश्यन्ती सा पुनः पुनः
इतस्ततोऽपि दिङ्मात्रमन्यत्रूपं विपश्यति॥ सिनीवाली विधुकला कोमला विमलाकिला॥ सा बाला कमले वाली कमलैरपि लालि
ता॥८॥ न क्षीरेच्छा न नीरेच्छा न हारेच्छेतरामपि॥ हारेच्छा न तुषारेच्छा न नीहारकरस्पृहा॥९॥ नीहारकरदूरतः करतलाभिघाते र
लं न तेतव कथाः परं शरपरंपरा यामिनी॥ यमोनुसरतीत्यतस्सरति सा शरीरं परं हरिष्यति यमस्य साहरद्दयाविहीने मनः॥१०॥ तल्पान्य
नल्पानलरत्न कल्पान्यमंदकुन्दकुन्द सुन्दराणि॥ मन्दार माकन्द मरन्दधारा नीहारधाराकर काकुलानि॥११॥ सा नांवरं पश्यति
दृश्यमानं विहाय तावद्वसनं निशायाम्॥आ१२॥ विकारं परिहर्तुमिच्छां चकार धैर्य्यापगमेन धीरा॥१२॥ अयन्नतावद्रमणः

शिवरह०३
५६

सतावदूरो वरेण्यो रमणो मतेति ॥ तल्पान्तरं प्राप विकल्पमाना स्तंभेऽपि गम्भीर वरस्वरूपे ॥१३॥ तान्ता नितान्तमवनीतलमाप बाला लीला विलास[कमला]
कमलाकुलासा ॥ सभूति भूषिततनुः शमनावकाशमासं समानमनिशं चतिरश्चकार ॥१४॥ रेवातीरं सापि नीता विनीता तत्तीरे साशान्तवातेन वीता ॥ लिङ्गे
तुङ्गे संगता सापि दृष्ट्वा राज्ञा त्वष्टा तामुवाचाह बालम् ॥ ब्रह्मोवाच ॥ रेवातीरं परं ह्यरं शरीरं तुङ्गलिङ्गकम् ॥ विभूतिभासुरं पश्य तत्रापास्यति शङ्करः ॥१६॥
तदंग स्पर्शनेनापि पवित्रं गात्रमित्यतः ॥ ससेवनीयो यत्नेन स्पृष्टं चेद्दिष्टदं च तत् ॥१७॥ इति तद्वचनं श्रुत्वा सगतस्तत्र बालकः ॥ विधिना तेन राज्ञापि विधिना
प्रेरितस्तदा ॥१८॥ बालं सितभूति भूषितमिदं बालं विलोक्यादरात् दूरेणापि समा[र]भूल्लमिहतः [ता] सा बालिका चेतनां ॥ प्राप्ता बाल विलोकनेन विमलपुष्टा
तिहृष्टापि सा साचीकृत्य मुखं मुखेन सुसखी वृन्दैरमन्दैर्वृता ॥१९॥ ततः परं स बालोऽपि प्राह तं चतुराननम् ॥ इयं शिवरता बाला कमलामललोचना ॥२०॥
ईदृशी दुर्लभा लोके भाललोचनपूजने ॥ साधनं साधनं नूनं धनानामपि साधनम् ॥२१॥ इति तद्वचनं श्रुत्वा विधिः सन्तुष्टमानसः ॥ राज्ञापि बालिका सापि
हर्षवर्षपरिप्लुता ॥२२॥ ततः सोमेशकुण्डे सा बालिका भाललोचनम् ॥ स्मृत्वा स्नात्वा विभूत्यापि भूषिता भूतिभूषणा ॥२३॥ ततः सोमेशलिङ्गे सा हरं गौरी
मनोहरम् ॥ पूजयामास विविधैरुपचारैरनेकधा ॥२४॥ ततो दुकूलवसना मिमुण्ड निष्कालका ॥ दिव्याभरणसम्पन्ना ननर्तावर्तचेष्टया ॥२५॥ सोऽपि बा
लः प्रोस्नात्वा भूतिभूषित विग्रहः ॥ सोमेश्वरालयं प्राप सर्वसौभाग्यसंयुतम् ॥२६॥ ततः पूजोपकरणं दापयामास बालिका ॥ सं तया बालकायाय समर्च
यामास तेन तम् ॥२७॥ उपचारैर्बहुविधैर्दिव्यैः पञ्चामृतादिभिः ॥ उत्पधूपनैवतांबूलैः [वाद्यैं] पूजयमास बालकः ॥२८॥ स्मेराननं स्म[र]हरार्चनतत्परं सा बाला

रुन्त०३०
अ०१७

विलोक्य मुहुरादरतोऽतिधीरा ॥ मन्दस्मितेन मदनप्रसवायुधेन वीतेव सापि विरता विविधार्थनाद्यैः ॥ सीमन्तसिन्दूरविराजमानां त्रिपुण्ड्ररेखारुचिरानुका
लां। बालां विलोक्यादरतः स बालो नावाप धैर्यं मदनाश्रितोऽसौ ॥ ३० ॥ बालालोचनगोचरा यदि मुहुर्न स्यात्तदा धीरता पुंसां सा यदि दैवतो भवति चेत्तल्लो
चनालोचनम् ॥ नूनं वञ्चित एव चञ्चुरमनः पञ्चायुधेन क्षणं तद्धैर्यं यदि तर्हि शार्वनिभता स्यादेव सर्वात्मना ॥ ३१ ॥ रुरुरपि वरुमूले स्वानुकूलाबलानां कलनम
शूहीनो जीर्णपर्णाशनोऽपि ॥ कलमपि कुरुतेऽतः क्वानुरक्तो विरक्तो न खलु पुरुषभावे स्वानुभावानुभावे ॥ ३२ ॥ रोमाञ्चाञ्चितकाञ्चनाभतनुभिः संभाविता भामि
नी भावे भ्रूविजकेलिलोलनयनैः कैर्वाजनैः सज्जनैः ॥ कः संभावितमर्थमप्यनुदिनं व्यर्थं कथं वाध्यथां त्यक्त्वा ताञ्च कदर्थनामपि मुधा यद्दुर्जनानर्जितम् ॥ ३३ ॥
परस्परविलोकनस्मितवितानसंवीतयोर्विलोकनविलोभनैरपि मुहुर्मुहुर्धीरता ॥ गतेति ससखीजनो विरलएव मंदं मुदा स्मरावसरसूचकः खलु सकोऽपि
कालस्तयोः ॥ ३४ ॥ कमलामलरोचनानुरक्तः स विरक्तश्च विरक्त एव शक्तः ॥ अविरविवाह कामकालमिव चेष्टाभिरलङ्कृतानताङ्गी ॥ ३५ ॥ बालक उवाच ॥
कासि मध्यमनयस्य मध्यमे लोचने शफरगर्वमोचने ॥ फालमध्यमलमल्लसन्निभं दुर्लभं भुवनमण्डले खलु ॥ ३६ ॥ अभिनवकमलेन नाभिमूलं क्वापि तवे
दमभूतपूर्वमेवम् ॥ तदुपरि किमयं स रोमराजिः मदनविनोदविशेषकेतरेव ॥ ३७ ॥ मेरुद्वयं क्वापि न दृष्टमेव तच्चन्द्ररेखाभिरलंकृतञ्च ॥ अहो कपन्ते भुज
मध्यभागे रुद्राक्षमाला वलयानुकूलम् ॥ ३८ ॥ बाला विद्रुमवल्लिका कथमभूद्दम्भोजपार्श्वे कथं तन्मध्ये नवहीरजालरचना तास्मिन्कुमारत्तिमा ॥ बालेन्दुर्ध्रु
यमस्ति भालनिकटे वेणी फणिः कोऽप्ययं सृष्टिस्तावदिहाष्टमूर्तिकरुणाभेदेन जाता त्वयि ॥ ३९ ॥ आनन्दराशिरेवाय नारीरूपमुपागता ॥ नृत्यत्यग्रे महेशस्य

शिवरह०३
५७

महेशानुग्रहरूपा॥ तदित्थोदितं प्रभाकेवलेयं वधूरूपमासाद्य सयोनिजया॥ शिवाचार विस्तार चातुर्य्यराशी प्रकाशाय तावत् नृत्यत्यहो किम्॥४१॥ किमेवा सैतोषं वितरति मुहुर्मोहमसकृन्निजापांग्यासंगे स्वगतमातानंगानियतेः॥ कथं नीता कान्तिर्मलिनदलनीलोत्पलगता किमन्यायोन स्यादिह यदि भवेत्कूलजलजं॥ इत्यानन्दवचोवीचीप्रपञ्चमपि बालिका। निधाय हृदये मंद मनङ्गोद्रेकमाहसा॥४३॥ कन्यकोवाच॥ अप्रपाणिग्रहोत्तरमहं महलोत्सवाय राका सुधाकरकराकल्पतल्पे॥ आकल्पकल्पनपुरःसरमिवहारमाहारसारमुपभुज्य विज्यरक्ता॥४४॥ इति तद्वचनं श्रुत्वा स्मरासारपुरःसरम्॥ मरमानन्द सन्दोहसंवीत इव बालकः॥४५॥ ततः परं नात्य समाप्तिमाप्य कृत्वा सुखं श्रमसमाविवेश॥ सा राजकन्या सुखवन्दमानानवेन्दुरेखेव जनाभिरामा॥ ४६॥ सा दिव्यतूर्यध्वनिभिः प्रविष्टा स्वमन्दिरं शङ्करमन्दिरेच॥ सा शोभनाचारविचारयुक्ता चकार रात्रीमपितामभिन्ना॥४७॥ सा रात्रीतां विलोक्यामुहुर्हर्षवर्षसमावृता॥ मङ्गलाचारणोद्युक्तदेवदुंदुभिनिस्वनेः॥४८॥ सराजा विधिनासाकं स्नात्वोद्धूल्य च भस्मना॥ त्रिपुण्ड्ररुद्राक्षधरो ययौ सोमेश्वरालयम्॥४९॥ ततः परं महादेवमुपचारैरनेकधा॥ पूजयामास सविधिं भूपालो मुक्तिकांक्षया॥५०॥ ततः परं स राजापि तस्य बालस्य चेष्टितम्॥ पाणिग्रहानुकूलत्वं विचार्यातिप्रहर्षितः॥ ततः परं समाहूय मंत्रिवर्गान्विशेषतः॥ मंगलाचारसंपत्तिविचारनिरतोऽभवत्॥५२॥ अलङ्कृतञ्च नगरं मन्दिरञ्च विशेषतः॥ अलंकृतेन बालेन वि[illegible]धनांगमन्तुमुद्यतः॥५३॥ सितभूति समाक्रान्तं कर्पूरनिभमादरात्॥ विलोक्य राजा सन्तुष्टो रुद्राक्षाभरणेञ्चितम्॥५४॥ विलोक्य बालञ्च तुरंगयाने संवेष्टमिष्टाभरणं दुकूलैः॥ आरोपितं त्वष्टुरपीष्टमिष्टं प्रधानवर्गस्य च तं ददर्श॥५५॥ देवदुन्दुभयो नेदुः

ह०त०३०
अ०५७

खतूर्य्यध्वनिभिःसह ॥ मंदार पुष्प वृष्टिश्च बभूव गमनोत्सवे ॥५६॥ ततः परं स नगरं नगरस्थ्रकरार्चकः ॥ निवेशश्मारावासे वासवैरिव पूजितः ॥५७॥ केचि
द्विचिक्षिपुः लाजान् मंगलाचार सूचकान् ॥ विचिक्षिपुः पल्लवांश्च कुसुमान्यपि केचन ॥५८॥ मंदार मकरन्दानां धाराभिः पथिसेचनम् ॥ कृतमेवामरैः स
वैः नगरं समलंकृतम् ॥५९॥ चित्र वितान ध्वजमालाभिस्तोरणैरपि कोटिशः ॥ मुक्ताजालैरपारैश्च कृतं नगर मण्डनम् ॥६०॥ ततो दिगन्त विश्रान्त तूर्यध्वनि
विराजितम् ॥ मन्दिरं सुन्दरं प्राप रत्नप्राकारमण्डितम् ॥६१॥ रत्नसिंहासनाकीर्णं सुन्दरे शिवमन्दिरे ॥ उपविश्यार्चयामास स राजा सविधिः शिवम् ॥६२॥
ततः परं मंगलमंडपानां सतोरणानां कुसुमान्वितानाम् ॥ विलोकनेनैव सुखं स राजा प्रापामृतेनैव सुरेन्द्रवर्गः ॥६३॥ ततः परं स बालोऽपि दृष्ट्वा शङ्करमन्दि
रम् ॥ पूजयामास विधिवत् उपचारैर्महेश्वरम् ॥६४॥ राजा राज्ञी समेतः सन् तया कन्यकया सह ॥ चकार मंगल स्नानं मुहूर्ते विधिबोधिते ॥६५॥ नवग्रह
मखं कृत्वा नांदीं कृत्वा विधानतः ॥ सिंहासनाश्रितश्चक्रे स राजा बालकं मुदा ॥६६॥ मङ्गलाचार संयुक्तां कन्यकां भूतिभूषिताम् ॥ विलोक्य राजा सन्तुष्टो-
विधिना सहसादरम् ॥६७॥ कथं देया कन्यकेयमित्याह स महीपतिः ॥ गोत्रसूत्रादिकं नात्र न च पित्रादिकं विधे ॥६८॥ कः संकल्पोऽत्र कर्तव्यस्तमाहेति
स्मितैर्मुहुः ॥६९॥ ब्रह्मोवाच ॥ शिव स्वरूपाय शिवास्वरूपा कन्या शिवस्तु तुष्यतु दत्तयायम् ॥ इत्येव संकल्प्य विभूति पूतां प्रयच्छतां भूति विभूषणाय ॥
॥७०॥ कन्याप्रदानेन महेश्वरो मे तुष्टो भवत्वद्य शिवापि तुष्टा ॥ इति प्रदेया खलु कन्यकापि तेनाश्नुतावत्सुखमाप्नुवन्ति ॥७१॥ यः कन्यकां भस्म विभूष
णाय त्रिपुण्ड्र रुद्राक्ष विभूषितान्तां ॥ ददाति तेनाखिलभू प्रदान पुण्येन युक्तो भवतीति मन्ये ॥७२॥ धन्यं शाम्भव रूपमात्मनः परं भूतिप्रभाभूषितं कन्या
रत्नमिदं मनोहरतमं देयं ततो दीयताम् ॥ एतद्दानसमं न दानमिति मे सिद्धान्त एव ध्रुवम् ॥ तस्माच्छांभव दम्पती भातिरपि प्रापाद्यपुण्योदयैः ॥७३॥ इति

तद्वचनं श्रुत्वा ददौ तस्मै स कन्यकाम्॥तदा दुंदुभयो नेदुः पुष्पवृष्टि समन्विताः॥७४॥ विवाह होमे स तिलाज्य होमे चकार पाणिग्रहणं स बालः॥ स राजरा
जेव सरोहिणीं तां संप्राप्य रेमे विहारभूमिः॥७५॥ वधूवराभ्यां समुपेत्य मंद मानन्दधारां समुपेत्य नित्याम्॥ कृतानतिः शङ्करमन्दिरांतः सांबाय लिंगो
न्नत विग्रहाय॥७६॥ कृत्वा ततः परमुमारमणार्चनं च सायं शिवाय विनिवेदितमेव भुक्त्वा॥ राज्ञापि तेन विधिना द्विजपुंगवेभ्यः सन्तोषमाप स परं सवधू
समेतः॥७७॥ तस्मिन्विवाहसमये विधये स राजा कृत्वा हयामनघरत्नसमन्विताभिः॥ वस्त्रादिभिस्तदनु शांभवपुंगवानां पूजाञ्चकार सकलोत्सववत्स
लोऽयम्॥७८॥ चतुर्थदिनपर्यन्तमेवमुत्सवसंयुतः॥ ययौ विधिर्ब्रह्मलोकं निवेद्य स महीपतिम्॥७९॥ राजापि पाणिग्रहणोत्तरं मुहुः स्यानंदमाल्लाभि
र्नये विनोदम्॥ उत्पादयन्नेव निनाय कालं स्वाभीष्ट सिद्ध्या खलु हर्षवर्षः॥८०॥ सा राज्ञी मणिमंडपान्तरगते मञ्चे विपञ्चीयुते युक्ते पञ्चशरातिसुन्दर शरैः
कन्दादिभिर्भूरिया॥ संविष्टे भवदम्पती मनसिज क्रीडा विनोदोत्सवैः दृष्ट्वा स्मेरमुपागतागतमतिं मन्दाञ्चकारादरात्॥८१॥ तयोस्तु तावन्मदनोत्सवोऽपि वृत्तः
स्मरारिस्मरणैरपारैः॥ ताभ्यां महेशाय समर्पितोऽपि भक्त्याऽपरं मार महोत्सवोऽपि॥८२॥ ततः परं पुष्टिरियं प्रकृष्टा जाता प्रवृद्धा मदनोत्सवस्य॥ ततः परं सापि
बभार गर्भं शनैः शनैर्वृद्धिमवाप गर्भः॥८३॥ सा गर्भचिन्हैः परिचिन्हिताभूल्लज्जामवाप स्मरचेष्टयापि॥ ततः परं सा सुषुवे कुमारं कुमारकल्पं सुमुहूर्तयोगे
सजात एवाशु महेश शम्भो पाहीति नत्वा गिरिशाय भक्त्या॥ चकार पूजां वचनैरपारैर्महेश्वरारव्यानवपावनैस्तवैः॥८४॥ शिवनामसुधापानपीनमालोक्य
बालकम्॥ तत्पितातीव सन्तुष्टः स राजापि विशेषतः॥८६॥ सा राज्ञी तोषमापन्ना सखीभिः सहमंत्रिणः॥ नगरस्थाश्च सर्वेऽपि सन्तोषं परमं ययुः॥८७॥ जात

कर्मादिकं कृत्वा ब्राह्मणेभ्यो महोत्सवैः ॥ ददौ रत्नान्यपाराणि गास्तुरङ्गांश्च दन्तिनः ॥ ८८ ॥ एकादशेऽह्नि संप्राप्ते नामकर्म चकार सः ॥ पुण्याहवाचनं कृत्वा
भोजयित्वा द्विजोत्तमान् ॥ ८९ ॥ तदानीमागतो ब्रह्मा तदुत्साह विलोकनम् ॥ कर्तुमथागतं वीक्ष्य पूजयामास भूपतिः ॥ ९० ॥ ततः परं स
राज्ञापि तन्नाम करणोत्सवे ॥ केन नाम्ना चिह्नितः स्यादयमित्याह तं विधिं ॥ ९१ ॥ ब्रह्मोवाच ॥ भवनामेति वेदेन द्विजानां नाम बोधितम् ॥ तेनैव नाम्ना बालोऽ
यं चिह्नितोऽस्तु महीपते ॥ ९२ ॥ रुद्रोऽग्निरिति वेदेन रुद्रशब्दोऽग्निशब्दवत् ॥ शिवबोधक एवेति शिवशब्दान्वितः स्वयम् ॥ ९३ ॥ अग्निशब्दः शिवं प्राह वेदेषु बहुधा
ततः ॥ शिवः शिवंकरत्वेन सोऽयमित्युच्यतां सदा ॥ ९४ ॥ एवं कुमाराः शतशो भविष्यन्ति शिवाख्यया ॥ चिह्निताश्च भविष्यन्ति शूराः शांकरपुंगवाः ॥ ९५ ॥ इति
तद्वचनं श्रुत्वा शिवनामान्वितान् सुतान् ॥ चकार शिवभक्तार्यो शिवभक्तार्य संज्ञया ॥ ९६ ॥ ततः परं तमुत्साहं दृष्ट्वा धर्मावबोधनम् ॥ कृत्वा ययौ ब्रह्मलोकम्
ब्रह्मा संतुष्टमानसः ॥ ९७ ॥ स तावद्ववृधे बालः शिवपूजापरायणः ॥ तन्दृष्ट्वा परमं प्राप सुखं तज्जनको मुहुः ॥ ९८ ॥ शिवाया हि पश्येदमीशान लिङ्गम्
शिवार्घं प्रयच्छात्र विल्वं प्रयच्छ ॥ शिवत्वं शिवं वीक्ष्य हृष्टः शिवत्वं भजस्वेति माता पिता प्याह राजा ॥ ९९ ॥ शिवो भोजनीयः प्रदेयं च वस्त्रं शिवाय
नवं चन्दनं रत्नहारम् ॥ इति प्रीतिपूर्वं स तन्नाम नित्यं गृहीत्वा शिवाराधनाशक्तचित्तः ॥ १०० ॥ ततः परमभूत पुत्रः पुनरन्यो मनोहरः ॥ स शंकर इति ख्यातः
शंकरत्वेन शङ्करः ॥ १ ॥ अन्योऽप्यभूत् सुतस्तस्य स महादेवसंज्ञया ॥ प्रसिद्धस्तेन पुत्रेण सुखमाप महीपतिः ॥ २ ॥ तदन्योऽप्यभवत्पुत्रः स महारुद्रसंज्ञया
ख्यातस्तेन सुखं प्राप जनको जननी च सा ॥ ३ ॥ पुनरप्यभवत्पुत्रः स महेश्वर संज्ञया ॥ ख्यातः शिवाचाररतः शिवपूजकपूजकः ॥ ४ ॥ एवमष्टोत्तर

शतं पुत्राः तस्य मनोहराः ॥ शिवार्चनपराः सर्वे सर्वे सुन्दरविग्रहाः ॥५॥ तेऽपि ते सर्वे सकृद्देवेशं शिवाराधनतत्पराः ॥ हृष्टाः प्रकृष्टाः सन्तुष्टाः पित्रोः सन्तोषवर्धनाः ॥
६॥ तान्कुमारान्विलोक्यैव जनकौ हृष्टमानसौ ॥ तौ शिवाराधनोद्युक्तावहर्निशमनुक्षणम् ॥७॥ रेवालिङ्गानि तुङ्गानि ताभ्यां प्रत्यहमादरात् ॥ आसाद्य
मर्चितान्येव विल्वपत्रादिसाधनैः ॥८॥ पूजां प्रदोषकालीनां समाप्य प्रत्यहं मुदा ॥ भुक्तः शिवोपहारस्तु शिवचिन्तनपूर्वकम् ॥ तयोरहर्निशं नित्यं कृत्यं
शंकरपूजनम् ॥ तद्विहाय क्षणं वापि ताभ्यां नास्थितमेव हि ॥१०॥ ताभ्यां शिवप्रसादेन विश्वेशस्य समर्चनम् ॥ प्रत्यहं क्रियते काश्यां वीरेशस्यापि पूजनम् ॥११॥ पञ्चक्रो
शस्थलिङ्गानि पूज्यन्ते तैरनेकधा ॥ कुमारैः सहितैः सर्वैः शिवपूजापरायणैः ॥१२॥ रात्रिः शिवकथालापैः ताभ्यां सर्वापनीयते ॥ न जाता सुखभोगेच्छा तयोः
शङ्करपूजया ॥१३॥ सभस्मोद्धूलितां दृष्ट्वा रुद्राक्षवलया वृताम् ॥ शिवपूजनसंसक्तामवाप परमं सुखम् ॥१४॥ सापि दृष्ट्वा शिवाचारपरायणमनन्मयम् ॥ भ-
र्तारम् सुखसंपन्ना कुमारानपि शाङ्करान् ॥१५॥ चन्द्रचूड महादेव शिव रुद्र महेश्वर ॥ आयाहीति सुतानुक्त्वा संतोषं परमं ययौ ॥१६॥ हे विश्वनाथ गिरि
श त्रिपुरान्तकेति हे भूतिभूषण गिरीश मृडान्तकारे ॥ मृत्युञ्जयेति मुहुरादरतः कुमारानाहूय सा सुखमवाप सहैव भर्त्रा ॥१७॥ तौ धीक्ष्य शङ्कररतानतुवा
रमा गुरावी च भूपति सुता सुखमाप नित्यम् ॥ तौ सच्चरित्रकमनीय पवित्रगात्रौ नेत्रोत्सवाय जगतामुपकारकौ तौ ॥१८॥ तदाचारमालोक्य सर्वेऽपि
हारास्तिरस्कृत्य संसारवार्तां हरार्चा ॥ परं कृत्यमित्येव मत्वा स्थितास्ते चिरं नर्मदातीरलिङ्गार्चनेन ॥१९॥ तयोर्हराराधनमेव कृत्यं तेनैव तावत्सकला
र्थसिद्धिः ॥ ताभ्यां पवित्रं नगरञ्च सर्वं रेवा पवित्रापि पवित्रिता सा ॥२०॥ विचित्रतच्चरित्राणि विलोक्य मुनयोऽपि ते ॥ तत्तीरवासिनः सर्वे महाशांभवतां

गताः॥ कर्तुं तद्

नित्यं मुनिबन्धुवर्गाः कुर्वन्ति दर्शनं परम्॥१२२॥ समायाति प्रदोषेऽपि मध्याह्नेऽपि प्रगेऽप्यपि॥ तद्विलोकनमात्रेण पापिनोऽप्यति पावनाः॥२३॥ भवन्त्येव तयोस्ताव

द्दर्शनं खलु दुर्लभम्॥ ताभ्यान्तु व्यवहारेषु लौकिकेष्वपि शङ्करः॥२४॥ स्मर्यते शिवनाम्नैव पदार्थो व्यवहार्यते॥ यद्युत्कृतं सुकृतकर्म तदीश्वराय ताभ्यां समर्पितमथापि

हरं हराय। कृत्वा निवेदयति कर्म स एव मुक्तो युक्तोऽपि बन्धुजनदारकुमारवर्गैः॥२५॥ स्वाधीने मनसि स्थिते सति शिवे कः शंकराराधनं त्यक्त्वा तिष्ठति बिल्वपल्लवजलैः

तुंगेषु लिङ्गेष्वपि॥ रेवातीरगतेषु तेषु बहुषु व्यासेषु रेवातटं त्यक्त्वा याति हितार्थमर्थनिकरप्राप्त्यर्थमत्यादरात्॥२६॥ पूर्वं रेवातीरमासाद्य सर्वे मुक्तास्तेषां स

न्ततिश्च प्रवृद्धा॥ रेवा॰ लिङ्गाराधनेनैव नित्यं रेवालिङ्गं दुर्लभं भूतलेषु॥२७॥ रेवालिङ्गं सर्वचिह्नं सकृद्वा यो वा नित्यं पूजयेत्तस्य संगः॥ पापापारव्याधिनाशाय

नूनं तल्लिङ्गार्चा सर्वसंतोषहेतुः॥२८॥ जन्म मानुषमवाप्य सन्ततं नर्मदानिलयलिङ्गपूजनम्॥ यः करोति स तु वंद्य एव मे तत्पदाम्बुजरजोऽपि पावनम्॥२९॥ लोके

पावनपावनो विजयते यः कालकालार्चकः तत्पादांबुजरेणुरेणुरजसा गंगापि सा पावना॥ तस्मात्तत्पूजनेन मुक्तिरिति या मुक्तिः परं दुर्लभा॥ सा मुक्त्यै भवतीति मुक्तिव

निताडिंडीरिवो जायते॥१३०॥ उच्चैः शङ्कर शङ्करेत्यपि मुहुः यः कालकालार्चने ध्यानानन्दनिमग्न एव परया भक्त्या वदेदन्वहम्॥ तत्पादाम्बुजपूजनोद्यतमतिः ब्रह्मापि नार

यणः शर्वाणीरमणप्रसादमहिमा मर्त्यैः कथं ज्ञायते॥१३१॥ यो भक्त्या सकृदेव वा स्मरहरं स्मृत्वा कृतार्थं परम् मत्वा तच्चरणारविन्दभजनासक्तः सर्वशोन्नतेः॥ तत्सङ्गः ख

लु दुर्लभः शुभदइत्येव प्रसिद्धो बुधैः सर्वाशास्यतया प्रसिद्ध इति किं नाशास्य एवान्वहम्॥१३२॥ इति श्री शिवरहस्ये हरारव्ये तृतीयांशे उत्तरार्धे याज्ञवल्क्यजनकसंवादे

नाम सप्तदशोऽध्यायः॥१७॥ याज्ञवल्क्य उवाच॥ एवं शिवाराधनशक्तचित्ताः सुखांबुराशिं समवाप्य संज्ञैः पुत्रैः॥ पौत्रैः प्रपौत्रैरपि तत्प्रपौत्रैर्मुक्तोऽभविष्यत्पिनर्म-

दायाम्॥१॥ आख्यायमेनंपठति प्रभातेयः पुत्रकामी धनधान्यकामः॥ सतावदाप्नोति तमिष्टमादौ महेश्वरार्चानिरतोऽपिभूयात्॥२॥ इतिकश्यपवा
क्यानि श्रुत्वातावत्सभूपतिः॥ सन्तोषंपरमं प्राप पूजयामास कश्यपम्॥३॥ इतिनारद वाक्यानि श्रुत्वातावत्सभूपतिः॥ दृष्ट्वा पुत्रं सुखं प्रापपूतं
शाम्भवविद्यया॥४॥ स तावद्वर्धयेराजा नित्यं शंकर पूजया॥ सशिवाराधनं कृत्वा कदाचिद्विपिनं ययौ॥५॥ सबिल्वतरु संकीर्णं मन्दारतरुशोभि
तम्॥ जंबीरबीज पूरादितरुकोटिविराजितम्॥६॥ तद्वनं पूगपुन्नाग नारिकेलविराजितम्॥ सुवर्ण कदलीकोटिपनसाम्रविराजितम्॥ मल्लिकाकुन्द
वल्लीभिः सपुष्पाभिर्विराजितम्॥ शाला विद्रुमवल्लीनां कोटिभिश्चाविराजितम्॥ उत्फुल्ल हेम कमल सरोमालाविराजितम्॥९॥ तत्ररत्नसमाकीर्णं हेम
प्रासाद रञ्जितम्॥ हेमगोपुर संकीर्णं ददर्श शिवमन्दिरम्॥१०॥ तं दृष्ट्वातीवसंतुष्टोराजा शङ्कर पूजनम्॥ चकार सरसिस्नात्वा भस्मरुद्राक्षभूषणैः॥११॥
सेनांदूरेपरित्यज्य द्विजैः शाम्भव पुंगवैः॥ सह तत्र शिवध्यानं कृत्वा नाट्यं चकार सः॥१२॥ ततः परं रुद्रवीणां गृहीत्वा शिव गायनम्॥ चकारहर
गौरीश शिवशंकर इत्यपि॥१३॥ तदानीं तावदस्माभिर्गन्धर्व नगरात्परम्॥ तत्रागतं स दृष्टश्च भूपालो गानतत्परः॥१४॥ ततः परं सगानेन तोष
यामासशंकरम्॥ पुनः पुनः शिवानन्दतरंगपरिवारितः॥१५॥ ततस्तद्दर्शनेनैव ह्यदिपञ्चशरः परम्॥ प्रविष्टस्तेन नास्माकम् अन्यत्रासीद्गतं खलु॥
१६॥ तदा गन्धर्व राजापि तत्र शङ्कर पूजनम्॥ कर्तुमभ्यागतो देवाच्चकार शिव पूजनम्॥१७॥ गन्धर्वगानचतुरः सगन्धर्वः शिवप्रियं॥ गानञ्च-
कारमनसा संस्मरन्नेव शंकरम्॥१८॥ राजा तद्गानमाकर्ण्य शिवभक्त कृतं मुदा॥ प्राह गन्धर्व राजानम् शिव ज्ञान रतम् मुहुः॥१९॥ राजोवाच॥

गन्धर्वं वर किं यातेवरं तावदभीप्सितम्॥ गानेनानेन सन्तुष्टो शिवनामाङ्कितेन हि॥२०॥ शिवनामरतो यस्तु तस्यादेयं न मे भुवि॥ इतोऽपि नाधिकं लोके दानपात्रं च दृश्यते॥२१॥ इदन्तु शांभवं क्षेत्रं शांभवायात्र यद्वसु॥ दीयते तद्भवत्येव तत्कोटिगुणितं खलु॥२२॥ इति तद्वचनं श्रुत्वा गन्धर्वो हृष्टमानसः॥ शिवभक्तं तं प्राह राजानमतिसुन्दरम्॥२३॥ गन्धर्व उवाच॥ अन्ते कृते विरक्तिरभ्द्भुता भुवि तावद्बहुधा नृपोत्तम॥ न च सत्य महाकृते रतिः शिवभक्तस्य परन्तु तद्भुतम्॥२४॥ शिवः सत्यं तस्मात् शिवभजनकाले शिवरतः शिवं स्मृत्वा सत्यं वदति बहुधा सत्यमसकृत्॥ त्वया सत्यं तावद्व्रतमपि गृहीतं मुहुरपि॥ स्मृतो भक्त्या भावैः सह कृतमुमाकान्तभजनम्॥२५॥ सत्यं व्रतं यस्य निरन्तरायं स एव धन्यः शिवपूजकोऽपि॥ शिवालयं शांभवपुंगवेषु सत्यं वदन्त्येव विशेषतस्तु॥२६॥ दिव्यं सत्यं सत्यसंकल्पमाहुः सत्ये तावत्सर्वदा सर्वसिद्धिः तस्मात्सत्यं मय्यवश्यं त्वया तु वक्तव्यं ते सत्यमस्तु व्रतञ्च॥२७॥ मत्प्रार्थनीयमिदमेव नृपोत्तमास्ति कन्याशतं तदधुना यमुदा गृहाण॥ तत्तावदिन्द्रवनितागणतुल्यमेव प्रीतिस्तवास्तु नृपसंततमेव तत्र॥२८॥ अत्रास्ति कन्याशतकं प्रपश्य शिवार्चनार्थं समुपागतञ्च॥ राजन् सरस्तीरगतं प्रपश्य विलासयोग्यं च वनं किलेदम्॥२९॥ तासां शिवाराधनमेव तावद्व्रतं विभूतिः परमा विभूषा॥ रुद्राक्षमाला च शिवार्चकेषु तेषां खलु प्रीतिरनन्तरायाः॥३०॥ त्रिपुंड्रैरेवाललितोत्तमांगास्तास्तावदालोकनमात्रतोऽपि॥ हरत्यघानीति विनिश्चयो मे हरांगना हाररता विरक्ताः॥३१॥ एतावदेतत्खलु तावदद्य मत्प्रार्थनीयं मम भाग्यमेतत्॥ तुल्यस्त्वया कोऽपि न भूतलेऽपि जातो भविष्यत्यपि वर्ततेवा॥३२॥ आजन्मशुद्धोऽसि विभूतिपूतो रुद्राक्षमालाभरणो महेशः॥ त्वय्यास्ति मे प्रीतिरियं प्रवृद्धा भवाविहान्यन्न मयोक्तमेव॥३३॥ पश्य पश्य नृपपुंगव पश्चात्कन्यका शतमुतमुमापतिपूजाम्॥ कर्तुमेति विविधैरुपचारैरादरेण शिवनामरतास्ताः॥३४॥ शिवाशिव मृड रुद्र मौले स्मरहर शङ्कर शर्व नीलकण्ठ॥ इति वदति

मुहुः श्रुणुप्रणामैः अलमलमेव युवासि भूपते त्वम्॥ इति तद्वचनं श्रुत्वा सराजा सत्यवत्सलः॥ ओमित्याह शिवं पश्यन् शिवार्चनपरायणः॥३६॥ ततः समागताः कन्या-
स्तास्तावदति सुन्दराः॥ ददर्श शिव पूजार्थमुद्यताः प्रयता अपि॥ ३७॥ तां विलोक्य मदनातुर चितास्ताः शिवार्चनपरा अपि सोऽपि॥ पंचबाणशरामापतमोपेभीह
खेहरपूजनपूतः॥ ३८॥ शिवमभ्यर्च्य यताः सर्वाः प्रार्थयित्वा वरो ऽत्वयम्॥ हरास्माक मिति स्मृत्वा प्रणतास्ताः पुनः पुनः॥३९॥ ततः परं तुंगकुरङ्गलोचनास्तास्त-
मदानम्रमुखांबुजास्तम्॥ उद्वीक्ष्य सस्मेरमुखं स्मिताननाविनिर्गताः शंकरमन्दिरेभ्यः॥४०॥ ततः सरस्तीरगते मनोज्ञे हर्म्ये सुगन्धानिलपोतवीते॥ स्थिताः परं रत्नवरा
सनेषु वरं स्मरन्तोऽपि हरं स्मरन्तः॥४१॥ ततः स गन्धर्व विवाहमेव चकार गन्धर्वपतिः प्रमोदैः॥ समर्चयित्वा गिरिशं सराजा पुनर्विवाहोत्सवमेव कर्तुम्॥४२॥ ततः
परं ताभिरपारसौख्यप्रदानलोलाभिरलंकृतोसौ॥ उवास भुक्त्वा विविधान्नमन्नं दत्वा महेशाय विभूषणानि॥४३॥ ततः परं स गन्धर्वः सन्तुष्टः प्राह भूपतिम्
सुखासीनं सुखासीनः स्मरन्नेव महेश्वरम्॥४४॥ गन्धर्व उवाच॥ लक्षं गन्धर्वकन्यानामस्ति मन्नगरे नृप॥ ताः सर्वाः परिणेयास्ते ता अप्यत्यन्तसुन्दराः॥४५॥
कामना तासु कन्यासु सुराणामपि तिष्ठति॥ दुर्लभा एव ताः कन्याः प्रियाः सन्तु तवाधुना॥४६॥ एतावत्प्रार्थनीयं मे न तावदधिकं नृप॥ इत्युक्तन्तद्वचः श्रुत्वा
तव यद्वचनं तस्य कर्तव्यं परिपालनं॥ तेन सत्य प्रति ज्ञा मे भविष्यत्यन्यथा नुन॥
गन्धर्वं प्राह भूपतिः॥४७॥ किं च यद्यत्त्वया तावद्वक्तव्यं मे हितं भवेत्॥ तत्सर्वमपि कर्तव्यं यतः सत्यं व्रतं मम॥४८॥ इत्युक्तः प्रीतहृदयः प्रेषयामास चारणम्
गन्धर्वनगरस्थाय मन्त्रिणे स्वहितापरः॥४९॥ स मंत्री चारणोक्तानि श्रुत्वा वाक्यानि सादरम्॥ अनेकमन्त्रिसंयुक्तः कन्यकाभिर्ययौ वनम्॥५०॥ तदागमनका
लेषु पुष्पवृष्टिरभूत्परा॥ देवदुंदुभयो नेदुः जगुर्गन्धर्वकन्यकाः॥५१॥ अत्युत्सवसमाकीर्णास्ते तत्प्राप्य वनं मुदा॥ स्नात्वा सरसि पूजाञ्च चक्रुस्ते शङ्करस्य

तु ॥५२॥ कमलैः कमलैः पुष्पैः विमलै र्बिल्वपल्लवैः ॥ दिव्यैः परिमलद्रव्यै रुपचारैः सहस्रशः ॥५३॥ ताश्च कन्याः समालोक्य शिवपूजनतत्पराः ॥ स राजातीवसं
तुष्टस्तत्पाणि गृहणोद्यतः ॥५४॥ ताश्च सर्वाः समालोक्य राजानमतिसुन्दरम् ॥ ममैवायं ममैवाथ मित्यूचुस्ताः परस्परम् ॥५५॥ रत्नहर्म्येषु दिव्येषु पुष्पशय्याकुले
ष्वयम् ॥ चचार राजा सर्वत्राप्येको नेकत्वमागतः ॥५६॥ तेषु सर्वेषु हर्म्येषु स्वयमेकोऽपि भूपतिः ॥ दृष्टस्ताभि र्मया साकं मया साकमिति स्थितः ॥५७॥ एक एव स
भूपा[illegible]लः शतलक्षशरीरभाक् ॥ एकदा ताभिरानन्दक्रीडया परया स्थितः ॥५८॥ स राजा विस्मयं दृष्ट्वा मन्त्रिभिः सहसादरम् ॥ संतोषं परमं प्राप कृत्यं जातमिति स्व
कम् ॥५९॥ कृतं तत्रैव नगरं रत्नप्राकारवेष्टितम् ॥ रत्नमन्दिरसंकीर्णं शिवमन्दिरशोक्षयाम् ॥६०॥ कर्तुमायान्ति गन्धर्वाः कोटिशः प्रत्यहं मुदा ॥ तस्मिन्वने नित्य
महोत्सवानाम् विलोकनायामरसुंदरीणाम् ॥६१॥ गणाः समायाति गणेश्वराणां गणोऽपि गन्धर्वगणोऽपि नित्यम् ॥ भाग्यं प्रवृद्धं महदस्य राज्ञः संख्यानभाग्य
स्य विशेषतस्तु ॥६२॥ जाताः कुमाराश्च कुमारतुल्याः सर्वाः सुभार्याः सुशिवार्चकास्ते ॥ लक्ष्यं तदङ्गनिताः स्वभाग्यलालिताः भूतित्रिपुण्ड्रांकिताः ॥ रुद्राक्षैः सम
लंकृताः शिव महादेवेति गानोद्यताः ॥ सर्वास्ताश्च पतिव्रताः शिवकथाध्यानानुवादे रताः ॥ तन्मध्येवयमप्यपार विभवास्तत्पाणिसंस्पर्शनात् ॥६३॥
एतादृशं भाग्यमनेन लब्धं प्रदोषकाले शिवदर्शनेन ॥ शिवार्चनं च क्रियते प्रदोषे तत्पुण्यसंख्यागणनापि केन ॥६४॥ अयं महादेवपरायणत्वान्नाराय
णाद्यैरपि पूजनीयः ॥ प्रदोषकाले शिवदर्शनेन को वा नवा[illegible] सर्वा[illegible]सुखानि भुंक्ते ॥६५॥ पुण्यैरेव महाप्रदोषसमये दृष्ट्वापि लिङ्गं मुहु[illegible]र्नत्वा भक्ति
पुरःसरं जललवं दत्वा च बिल्वीदलम् ॥ भुक्त्वाहारमहोपहारमसकृत् कुत्वा कथं शांभवीं हित्वा भोगरतिं प्रयाति हि रिपुं हत्वा शिवं शांभवः ॥६६॥

इत्येतद्वचनं श्रुत्वा राज्ञी विस्मितमानसा ॥ तमेव प्राह राजानं प्रयता भक्तिपूर्वकम् ॥ ६७ ॥ तव प्रभावो विज्ञातः सर्वोऽपि नृपसत्तम ॥ उदारास्तव दारास्ते तिष्ठन्त्यत्र शिवालये ॥ ६८ ॥ तास्तु स्तनंधयान् बालान् गृहीत्वा सुधिता अपि ॥ अत्रैवागत्य तिष्ठन्ति शिवपूजापरायणाः ॥ ६९ ॥ अमात्यास्ते वनद्वारि तिष्ठन्त्यागत्य कोटिशः ॥ तुरङ्गमत्तमातंगकोटयोऽपि समागताः ॥ ७० ॥ नगरं वेष्टितं सर्वमस्माकं तैरतः परम् ॥ शाधि शाधि प्रपन्नां त्वां मां महीपालसत्तम ॥ ॥ ७१ ॥ इतितद्वचनं श्रुत्वा स राजा बहिरागतः ॥ दूरात्सेनां ददर्शापि दृष्ट्वा दारान्नाशी शिवालये ॥ ७२ ॥ ततो दारान्समुत्थाय बालकैः सह सत्वरम् ॥ प्रणताः स्मेरवदनाः साचीकृत्य मुखान्यपि ॥ ७३ ॥ ततस्ते बालकाः सर्वे भूतिरुद्राक्षभूषणाः ॥ जननीकटिभागेभ्यः च्युतास्तं प्रातिपेदिरे ॥ ७४ ॥ शिव शंभो महेशेति वदन्तस्तान्विलोक्य सः ॥ दृढमालिंग्य सस्नेहं पस्पर्श च शताधिकान् ॥ ७५ ॥ तेऽपि बालाः शिवं दृष्ट्वा रत्नैः सम्पूज्य शंकरम् ॥ प्रणम्य दण्डवद्भूमौ चक्रुर्नाट्यं शिवालये ॥ ७६ ॥ तान्विलोक्य मुदं प्राप स राजा तेऽपि बालकाः ॥ पुनः प्रवृत्तास्तन्नाट्यं पुनर्नाट्यायते पुनः ॥ ७७ ॥ बालकानां शिवाचारं शिवनाट्यमहोत्सवम् ॥ दृष्ट्वा राजा प्रहृष्टोऽभून्मेने धन्योऽहमित्यपि ॥ ७८ ॥ ततः परं तु सा ... राज्ञी तं प्रणम्य महीपतिम् ॥ कृताञ्जलिपुटा भूत्वा प्राह प्रसन्नाननानृपम् ॥ ७९ ॥ पुरा दुर्धीरभूद्राजन् सा बुद्धिर्विलयं गता ॥ अतः परं निवृत्तिश्च जाता दोषावलोकनात् ॥ ८० ॥ यावन्न विषये दोषो दृश्यते मोदसङ्गमात् ॥ तावत्प्रवृत्तिर्विषये तदभावेन सापि हि ॥ ८१ ॥ निवृत्ति ~~...~~ र्मनसस्ता वा दूषयेभ्योऽति दुर्लभा ॥ मंदं मंदं निवृत्तिः स्यान्महादेवप्रसादतः परम् ॥ ८२ ॥ इतितद्वचनं श्रुत्वा स राजा तुष्टमानसः ॥ पश्यन्सबालकानेव राज्ञीं तामाह तत्वतः ॥ ८३ ॥ सौंदर्यं विषया कान्ताः स्त्रियस्ता साधनं हि तत् ॥ स्त्रीणां निवृत्तिरत्यन्तं दुर्लभैव स्वभावतः ॥ ८४ ॥ बहुधा विषयापेक्षा

५०८

नारीणामुपजायते॥ विषयेषु ततस्तेषु तदन्तःकरणं खलु॥८५॥ किंच बालासि सुभगे निवृत्तिसमयो न ते॥ निवृत्तिरपि कालेन जाता दैवात्प्रवर्धते॥८६॥ सति भर्त
रि नारीणां वैराग्यमुचितं न च॥ तत्सेवया परं लोके यः स धर्मः परमः खलु॥८७॥ इति तद्वचनं श्रुत्वा सा राज्ञी खिन्नमानसा॥ प्रणता प्राह राजानं [भूपालं] मश्रुपूर्णविलो
चना॥८८॥ राज्ञ्युवाच॥ भर्तृसेवापरं धर्मः स्त्रीणामिति वचः परम्॥ सत्यमत्र न सन्देहः पतिः संसारलोलुपः॥८९॥ शिवनाम शिव ज्ञातं तेन भूपेन भूपते॥ न
श्रुता शिववार्तापि श्रोतव्यमिति धीरपि॥९०॥ त्रिपुण्ड्ररेखा कान्तिश्च न तद्भाले नृपोत्तम॥ रुद्राक्षमालावार्तापि न श्रुता तेन सर्वथा॥९१॥ न श्रुतः शिवलिङ्गा
नां महिमा पूजयस्य तु॥ शांभवैः सह वार्तापि न कृता तेन भूपते॥ इदं पुरातनं स्थानं शिवस्य परमात्मनः॥ न दृष्टमेव नृपते कदापि निकटस्थितम्॥९३॥ मुदावन
विहारार्थमागत्याप्यत्र सर्वथा॥ इदं न दृष्टं देवस्य लिङ्गं मंगलदायकम्॥९४॥ तरुणीगणसंकीर्णः सर्वदा पुण्यवर्जितः॥ तरुणीवार्तया जन्म कृतवान्व्यर्थमेव च॥
॥९५॥ लक्षशः सन्ति वनितास्तस्य तावन्मदोद्धताः॥ नीतं ताभिरहो राज्यं साकं भूपेन भूपते॥९६॥ ममापि बुद्धिरुत्पन्ना दुष्टपुरुषसंगमे॥ मनः पुनः पुनः प्रीतं विरक्तिर्नो
पजायते॥९७॥ त्वयापि सह संयोगः कर्तव्य इति धीरभूत्॥ तवैव धैर्यान्माभून्मे संगः पातकसाधनम्॥९८॥ तत्त्वबोधः कृतस्तेन विरतिर्मम जायते॥ अशांभवः
पतिः प्राप्तो मया दुर्भगया खलु॥९९॥ भर्तारं शांकरं प्राप्य भवन्तं भागवत्तरम्॥ एताः सुखेन तिष्ठन्ति भाग्यमेतादृशं कुतः॥१००॥ इहापि सुखमत्यन्तम् शांकरे सति
भर्तरि॥ परलोकसुखं तावत्सुलभं तेन संगमे॥१॥ सुखं सदा शांकरभर्तृयोगात् नारी समाप्नोति तपःफलेन॥ भर्तारमीशानपरं परत्र सुखाय यात्रापि न संशयोऽत्र॥२॥
तप्तं तपः पूर्वमथो रमाभिर्भर्तारमीशानपरं महेशा॥ देहीति दत्तः पुरुषः शिवेन त्वमेव सौभाग्यविधानदक्षः॥३॥ मयापि भर्ता दुरदृष्टयोगाद्शांकराग्रेसर एव

लब्धः॥ अतःपरंतस्यतुतेत्वयापिसदापरंदुःखपरंपरास्यात्॥४॥ अथांकंपश्यतियःप्रमादात्सयातितावन्नरकंसुतंवा॥ तातंतथाभ्रातंमाश्रितंवाभर्तारमन्यन्न
नसंशयोऽस्ति॥५॥ भर्तातावदुमासहायचरणांभोजार्चकोदुर्लभस्तस्मादेहविसर्जनेनभसितेनोद्धूल्यलिंगालये॥ अप्याशंकरशंकरेत्यपिमुहुर्यास्येपदंशांभवम् भो
गेच्छानममास्तिशंकरपदांभोजेशयामिध्रुवम्॥६॥ भर्तामेशिवएवमेशरणमित्यस्यास्तिकोदुर्लभोनस्त्रीणांपुरुषान्तरान्वयमतिःपापायसाकेवलम्॥७॥ तेना
शांकरभर्तयोगविरतिर्धर्मार्थमित्येवमेनस्यात्सायमयातनापिसुतरांजन्मान्वयोदुर्लभः॥ऽपिध्रुवम्॥८॥ भूयाशांभवभर्तभोगविरतिःपुण्यात्परंजायतेपुण्या
न्यथ्यमितानितावदधुनात्वत्पादसंदर्शनात्॥ जातान्यत्रनसंशयोऽत्रसुकृतक्षेत्रेपवित्रेऽधुनागोत्रेमेविरतिस्त्रिनेत्रकृपयासाक्षीसकालानलः॥९॥
उद्धूल्यांगान्यत्ररुद्राक्षमालाकंठेकर्णेवाहुयुग्मेललाटे॥ नासायामथ्यस्तुकिंमौक्तिकेनसीमंतेमास्तुमेरत्नमाला॥१०॥ अलंकनककंकणैरत्नमयाररत्नस्फुर
सुवर्णरचितांगदैरत्नममूल्यकांच्यादिभिः॥ अलंविविधवीटिकारसकुलानुरागैरलंहरस्मरणकारणाद्भवयामस्तुचित्तंमम॥१०॥ अलंविविधभण्डनस्फुरणरम्यहर्म्यस्फु
रन्मरंदरसलोलुपभ्रमरकुन्दशय्यासनैः॥ कुशेषुशयनंवरंहरपदांबुजास्मरणकारणाद्भवयामस्तुचित्तंमम॥ राधनंश्रमप्रभवानिद्रापरमभद्र्यामेगतिः॥११॥ अलं
रंडागनैरत्नमारवलचंडालतरुणीरसालकांचीरंगस्थलविपुलनाट्यांगगणगणैः॥ अलंमारारातेःस्मरहरपदाम्भोजयुगलंमुहुस्स्मृत्वात्यक्षेतनुमिहमहादेवकृप
या॥१२॥ हारोपहारपरिकल्पितनीरधारामाहारमेत्यकुहरोदरपूरणाय॥ विश्वेश्वरस्मरणमेवकरोमिचित्तेकृत्वाद्योपापतिपदांबुजमादरेण॥१३॥ रतिपति
हृतभूतक्रीडयाव्रीडयालंरमयचरणघातेरुत्तरत्वेष्टनेच्छा॥ अलमलमनुवेलंकालकालावलायाघ्राणकमलशोभामेवनित्यंस्मरामि॥१४॥ गौरीमनोहर

पदांबुजमादरेण स्मृत्वा तरन्ति खलु घातक पावकाब्धीन् ॥ तस्मादनन्यशरणः शिवपादपद्मं धङ्कापति प्रियमहं शरणं व्रजामि ॥१५॥ नान्यन्मनोहरमघापहम

कई
स्ति लोके गौरीमनोहरपदांबुरुहो विहाय ॥ तत्केवलं शरणमित्यहमादरेण स्मृत्वा वसामि विपिने शिवमन्दिरेषु ॥१६॥ संसारकूपमघदुःखकुलाकुलत्वा

त्याज्यं मनागपि न तेन सुखं [illegible] कदापि ॥ जन्मव्ययापायकरणं परमिन्दुमौलिपादारविन्दभजनं प्रवदन्ति धीराः ॥१७॥ नारी कदापि न सुखाय यतः स्व

ता   न्यघा
तन्त्रा नान्यस्य सेवनपरा परतन्त्रयाः ॥ सा तावदेकमसुखं तदनन्तरञ्च दुःखान्यपि न सा शिवभक्तियुक्ता ॥१८॥ भर्ता शांभवपुंगवो यदि भवेत्तत्सेवयां केव

लं भीतिः कालकृतान सा शिवपदांभोजार्चकाराधने ॥ सा तावन्न कदापि तावदसकृत्संभाविता सोऽपि तं कालः सेवितुमिच्छतीति स महान् कालांत

काराधकः ॥१९॥ कः कालान्तकपूजकः कलिमलप्रध्वंसको बालको व्याघ्रास्याधिक पुण्यकर्म जनको न स्यात्तपस्याफलैः ॥ तस्यानुस्मरणेन पा

पविलयः तस्मात्कराधनात् मोक्षश्रीरिति कालकालमहिमा सोऽयं किलात्यद्भुतः ॥२०॥ अहो महापातक पापराशिकोटितूलानला शंकरलिंगपू

जा ॥ सा दुर्लभा भाग्यवशेन लोके न यस्य यास्यात्सुलभा विमुक्त्यै ॥२१॥ नारीणां खलु गर्भधारणभयं सह्यं न सर्वात्मना तद्दुःखापनयाय केवलमुमा

कान्तार्चनं साधनम् ॥ तेनानन्दमवाप्नुवन्ति सततम् भूतिप्रभाभूषिताङ्गः ॥ सन्तः सन्तत मन्तकान्तक पदध्यानामृता स्वादनाः ॥२२॥ आरा

ध्यं जगतीतले शिवपदांभोजं तदभ्यर्चनादानंदांबुनिधेः प्रवृद्धिरसकृत्सा मुक्तिरित्यन्तकः ॥ तत्पादाम्बुज पूजक प्रणमतिं प्रस्तौतिसेन्द्रो मुहुः ल

यतो मत्पापहारस्त्वहम् ॥२३॥
क्ष्मीकान्तयुतश्चतुर्मुख ~~[illegible] वायुना ॥ तस्मादस्मत्पाद्रक कालान्तकलिंगपूजनरतो नाराधितो विश्रुतः सेन्द्रेणापि चतुर्मुखेन वियमेनान्येन वा~~

~~वायुना ॥ तत्पादस्मरणेन पापविलयः सद्यो भवत्यन्वहम् ॥ २३ ॥~~ कः कालान्तकलिंगपूजनरतो नाराधितो विष्णुना सेन्द्रेणापि चतुर्मुखेन नियमेनान्येन वा वायुना ॥ तत्पादस्मरणेन पापविलयः सद्यो भवत्यन्वहं कोयं शांभवपुंगवस्य महिमा लोके नरो मोचकः ॥ २४ ॥ अहमिह परिहाय मोहजालं शिवपदपूजनमेव सावधानम् ॥ धनमिति धनवाञ्छयापीति मन्ये धनमिदमक्षयमेव सर्वथापि ॥ १२५ ॥ लोके कः कमला विलासबिलपं दृष्ट्वापि मोहाश्रितो न स्यादेव पुनः पुनः सा विलयापेक्ष्यैव दृष्टा लनां कस्यापि स्मरवैरिपादस्मरणं ध्यानं धनं तत्परं पुण्यानां फलमित्यवैमि तपसां निश्श्रेयसं तेन मे ॥ २६ ॥ यः कश्चित् त्रिलोचनपदांभोजार्चकः सादरं हारत्वं समवाप्य हारसहितो दारैरुदारैरिह ॥ संसारानुरतोऽपि तस्य न भयं कालान्तकाराधने भीतिः कल्पलयेऽपि बहुधा गीर्वाणवार्यैः श्रुता ॥ २७ ॥ यस्य यस्य परपर्णा स्मथार्चनायां भक्तिः समुल्लभवतीति मन्ये ॥ स चानुरक्तोऽपि विरक्त एव दारेषु हारेषु विहारकाले ॥ २८ ॥ कमलानिलपल्लवे कदापि सलिलं तावदलग्नमेव वहूः ॥ पतितं सदपैति नाश्रमं मे शिवपूजाविरतस्तु नाश्रमेति ॥ २९ ॥ मयाधुना तावदुमासहायपादारविन्दस्मरणेन कालः ॥ नेयः प्रयासोऽपि न तानतामे पीयूषपाने ~~कालोऽप्यमृतमत्तु~~ श्रमोऽपि ॥ १३० ॥ इति श्रीशिवरहस्ये हरस्ये तृतीयांशे उत्तरार्धे याज्ञवल्क्यजनकसंवादो नामाष्टादशोऽध्यायः ॥ १८ ॥ याज्ञवल्क्य उवाच ॥ तद्गिरमाकर्ण्य सोऽप्यपर्णारमाश्रितम् ॥ तृप्तिर्ना वाय सत्सुधां पीत्वा ग्रीष्मातुरो यथा ॥ ॥ १ ॥ कस्तत्पः शिवनामसंयुतकथापीयूषपाने मुहुस्तत्पानानुरतो युवातितरुणीं रम्भामिवेन्दुः शिशुः ॥ स्तन्यं मेधमिवांकुरः कुलवधूर्भर्तृप्रियः शांभवः शांगं लिंगमुमामहेश्वरमिव प्राप्तं पुनर्वाञ्छति ॥ २ ॥ धन्यानां धनमिन्दुशेखरकथापीयूषराशिः परं तत्सेव्यं सततं तदेव हि सदा संरक्षणीयं मुदा ॥

प्यस्या

तत्स्वीयाय शिवार्चकाय सततं देयं प्रदत्तं मुहुः॥ वृद्धिं याति न नाशमेत्यपि कदाप्यरूपं धनं॥३॥ किं राज्यैरपि राजभोग निकरैर्मत्तेभसंघैश्च किम् किं वाजि प्रकरैरपारविभवैः किं नागवां कोटिभिः॥ सर्वं नश्वरमित्यतः शिवकथा पीयूषपानैः परं मर्त्यस्तावदमर्त्यतामुपगतो नित्यं न तत्स्यात्सुरैः॥४॥ अभिनवमिदमौषधं जनानां जननविनाशकमेकमेव लोके॥ शिवकथमपि गिरिशाभिधानरूपं शिव शिव सृष्टमिदं मनोहरं मे॥५॥ शिवाधीन शिव चातुरी किमेषा जनजननामयभोगनाशनाय॥ शिवपदरचनानुकूलरूपा शिवपदमेतदपूर्वमौषधं हि॥६॥ रेरे जनाः पिबत शङ्करनामधेयं पीयूषरूपमिदमौषधमारात्रेण॥ तेनैव जन्ममरणादिकरोगभोगः संभावितोपि न भविष्यति सर्वथापि॥७॥ अहो जनास्तावदतः परन्तु सर्वात्मना जन्मजरामृतिर्वा॥ नास्त्येव सृष्टं शिवनामरूपमभूतपूर्वं परमौषधं हि॥८॥ शिवशंकरनामरूपमेतद्गिरिशेनापि न सृष्टमौषधं चेत्॥ जरया मरणेन पीडितास्युः जननेनापि जगत्त्रयांतरस्था॥९॥ जन्तुर्वाञ्छति जन्मरोगमरणं विलयं तत्कारणेच्छापरं लोके कस्यचिदेव भूरितपसा पुण्यैरपारैरपि॥ तत्तावद्गिरिशाभिधानमसकृत्संसेवितं भाग्यतस्तज्जन्मापनयं करोति सकृदप्यावर्तनेनापि किम्॥१०॥ शिवाभिधानाभिधमौषधञ्च पीतं सकृत्सर्वरुजां विनाशम्॥ करोति तत्तुल्यमिदं विचित्रमेकैकसर्वामयनाशरूप॥११॥ श्रुतमपि शिवनामधेयरूपं परममिहौषधमामयप्रवाहान्॥ परिहरति विचित्रमेवमेतास्त्रिमिति न पीतमनामयाय लोके॥१२॥ संसारामयभेषजः श्रवणमप्यारोग्यहेतुः परं तत्तावद्गिरिशाभिधानमिति मे जिह्वाग्रयोः सर्वदा॥ नित्यत्वादरपूर्वकं शिवकथापीयूषधारान्वितम् तात्किं मे न भविष्यतीति सकलाभीष्टप्रदं चेन्मम॥१३॥ एकेनापि सकृन्मनःसंगवसतः पीतं तदेवौषधं शर्वाणीरमणाभिधानममरान् कर्तुं प्रवृत्तं श्रुतम्॥

S०९

तद्ध्यानविलानभीसितततभान् भृत्यानपीत्युद्गतं मन्ये शंकर(नाम)रूपमनघं दिव्योषधं दुर्लभम् ॥१४॥ निरामयोऽयं धनराशिभिः स्यात्पुत्रैः प्रपुत्रैः कमलाविला-
सैः ॥ व्याप्तश्रुतेनापि शिवाभिधान दिव्यौषधेनापि मति प्रभामे ॥१५॥ बहुधा बहवोऽपि सेविता स्सततं पूर्वभवेषु निर्जराः ॥ सुरवल्ल्या विमोहितो मया
स हतैर्जन्म जरामृतिर्मम ॥ अनुभूतमनेकधा पुरा जननं तैर्मरणञ्च दुःसहम् ॥ इति तद्विरतं मनोऽधुना शिवपूजाप्रवरां शिवप्रियम् ॥१७॥ अपि कश्चिदिमे
च्छुता मया मुहुर्मुहुराराधित एव मोहतः ॥ न हि तेन शिवं कदापि मुक्त्यां स्मृतं तद्भ्रम एव केवलं नः ॥१८॥ कामिनीकरकानिभूषणाद्यतः शुक्तिका
मुपगतो यथा तथा देवतान्तरसमर्चको यथा जनः सर्वथा नाधुना विभाति मूढधीः ॥१९॥ उन्मत्तोन्नतकुम्भिकुंभस्थलनान्मुक्ताफलं प्राप्यते तत्कुंभीनसकुंभ
योगस्थलनाम्नीलादिकं लभ्यते ॥ खद्योताहननेन केवलमर्थं संप्राप्यते शंकुतः सर्वाण्य(स्वर्ग)मरधुजनेन परमानन्दः शिवाराधनात् ॥२०॥ शिवाशिवाशिव
नामधेयरत्नं कथमिदमद्भुतमद्य सद्म मस्से ॥ अनवरतमिहास्तु कण्ठभागे कथमपि दृष्टिरिहास्ति दुर्जनानाम् ॥२१॥ जातो जाह्नजारिणी जठरतोयस्त
स्य नास्ति प्रियाः ॥ शर्वाणी रमयाभिधानमयापश्चिन्तामणिस्तैरभूत् ॥ तेरेवामरभूरुहा सम भवन् गौर्निर्जराणां सुधा स्वर्गश्रीरपि तैरभूदिति मुहुस्ते
रक्षणीयाः परम् ॥२२॥ शिवनाममणिप्रभावजालं भुवने वेद विदां वरः परोऽयः ॥ सुरसेवितकाशिका निवासप्रभया वेद सकोऽपि पुण्यरूपः ॥२३॥ संसार
भीरतिं विहाय सततं वीरेश्वराराधनैर्नीतं येन वयोऽप्युपोषणजलाहारैः परं तेन चेत् ॥ न ज्ञातः शिवनामदिव्यमहिमा ज्ञेयः स केनापि वा तज्ज्ञानाय
तपः कृतं खलु महद्वीरेशलिङ्गालये ॥२४॥ श्रीकालभैरवविलोकनपूतचित्तो वीरेश्वरार्चनरतो जलधारयापि ॥ यस्तेन तावदसकृद्गिरिशाभिधानमा

हात्म्यमारवशाद्विद्दितं विचित्रम्॥२५॥ किञ्चिन्नं शिवपादपद्मभजनं यस्याभवज्जीवनं तेनापाराशिवाभिधानमहिमा पीयूषराशिः परः॥ पीतस्तेनस
पीनतामुपगतो तं वेद विश्वेश्वरस्तेनेयं रजनीकृता शिवरतानंदाधिकं दालिका॥२६॥ शिवकथामृतमेवजीवनं यदि दिनेऽपि निशास्वपितज्जनिः॥ विष
मिव प्रलयाय भवत्यतः शिवकथामृतमेवहि जीवनम्॥२७॥ कति कति नवराकाः सन्ति लोकेषु काकाः कति कति पिकशोकाः शङ्करद्वेषिणोऽपि॥ परि
हृतनिजधर्मास्तेषु तावन्नभक्तिः शिवचरणसरोजे तावतामेन हानिः॥२८॥ शिवचरणसरोजराजहंसः खलु मम मानसमीशनामधेयम्॥ विष-
मिव सुधयाभिषिक्तमेतन्मुहुरनुधावति धीरमादरेण॥२९॥ अमन्दमन्दारतरुष्व्यपेक्षा न देवधेनुप्रवरे मनोवा॥ परन्तु मे सन्ततमन्तकारिनामाम्
तेनैव किलामृतः स्याम्॥३०॥ पुरा गन्धर्वनगरे विश्वावसुरिति श्रुतः॥ गन्धर्वस्तस्य विश्वासो सर्वदा शिवपूजने॥३१॥ तेनाहर्निशमीशाननाम
पीयूषसेवनम्॥ कृतं, तस्य न वार्तासु रातिर्गौरिषु सर्वथा॥३२॥ सगौरी लिंगमभ्यर्च्य हिमवत्कन्दरे पुरा॥ नन्दिकेश्वरमालोक्य विनयेनाह शांभव
म्॥३३॥ प्रणतः प्राञ्जलिर्भूत्वा पुष्पैरभ्यर्च्य सादरम्॥ पादसंवाहनं कृत्वा तद्रजः शिरसा वहन्॥३४॥ विश्वावसुरुवाच॥ नन्दिकेश महाप्राज्ञ प्रज्ञान
घ्यन पूजक॥ ईशान साधनं किं वा किमानन्दप्रवर्धकम्॥३५॥ किं वा मुक्तिप्रदं लोके किं सर्वाभयनाशकम्॥ सकृत्स्मृत्वा वा पीतं वा श्रुतं वा सर्वसिद्धिदम्
॥३६॥ नन्दिकेश्वर उवाच॥ विज्ञानं शिवपूजनेन स यतो विज्ञानदः शंकरो विज्ञानात्मक एव तेन परमानन्दोऽपि संवर्धते॥ मुक्तिः शङ्करपूजया भवति
सा सर्वामयध्वंसने शक्ता सा सकलार्थदाननिपुणा पुण्यैः परं जायते॥३७॥ नश्यन्त्यामयकोटयः खलु महादेवार्चनात्केवलं तन्नाशाय तदेव तावदु

१.५ – ४ तया श्रीविश्वेश्वरपूजापापि फलामित्येवाभिमानो मम ॥ ४१ ॥ येनानामयतां प्रयाति मनुजस्तद्दुर्लभं देहिनां पुण्यांभाय यीनिश्चयेन मु–

शिवरह०३ धुना शक्तं तदेवामृतम् ॥ तत्तावन्ममृत्युजन्मनिजरानाशाय हारोयतं तत्तावत्सुकृतात्मनां हृदि सदा भात्येव भानुप्रभम् ॥ ३८ ॥ सद्यः शिवाराधनभा ह०त०उ०

६६ नुनैव मोहान्धकारप्रलयः प्रजातः ॥ सगातु नो तिष्ठति सर्वथापि नष्टः कथं वा पुनरुत्थितः स्यात् ॥ ३९ ॥ मोहं नाशयतीति नाद्भुतमिदं संसाररोगस्य अ०१९

यः शर्वाराधनतस्तथा सति मुहुः संसारबीजक्षयः ॥ तत्कर्तुं क्षमभेव पर्वतलये शक्तः स कालानलः ॥ किन्तत्पर्वतशुष्कपर्णविलये शक्तो न सर्वात्मना

॥ ४० ॥ विपूयाकारमहाघकोटिविलयः सद्यः शिवाराधनान्नूनं जायत इत्यपारमहिमा कालान्तकः संस्मृतः ॥ तावत्पापकुलक्षयाय सपरं शक्तस्तत्

किं कृतांभोधिप्रवृद्धं परम् ॥ लिङ्गाराधनधीर्भवत्यपि पुनः सा वर्धते सर्वथा तत्पूजानिरतात्मनां सुकृतिनां सर्वात्मना सर्वथा ॥ ४१ ॥ श्रीरुद्रोभिषजां

भिषक्तम इति ख्यातः श्रुतौ तः क्रो संसारामयनाशनाय सहसा शक्तः स जन्मादिकम् ॥ दुःखं नाशयति स्मृतोऽपि मनुजां दृष्टः स कष्टापहः कस्तेनो

पिसमः सुरेषु स सुराराध्यः सुराधीश्वरः ॥ ४३ ॥ सुराधीश्वराय प्रणामः कृतश्चेन्महेशाय संसारदुःखापहारः ॥ भवत्येव सद्यः कुतस्तावदेतत्प्र

भावे भवक्लेशलेशावकाशः ॥ ४४ ॥ प्रणामोप्यमेनापि संसारनाशो प्रणामे न दुःखप्रणाशः कथन्न ॥ अतः शंकराय प्रणामो विधेयः सवे

दैकवेद्यः सविज्ञानरूपः ॥ ४५ ॥ सुरासुरनरोरगप्रवरकिन्नराराध्यता प्रभाकरमुमापतिं प्रणतिमाहुरत्यास्तिकाः ॥ इयं प्रणतिरम्बिकारमण

पादपद्मार्चनैर्भविष्यति न तैर्विना भवति सर्वथा दुर्लभा ॥ ४६ ॥ येनैव तत्प्रभाधारशंकराय समर्पितां तस्यैव दुःखविलयः सर्वथा भवति ध्रुवम्

॥ ४७ ॥ इदं दिव्यौषधं मन्ये संसारामयनाशकम् ॥ इदं दिव्यौषधं लोके दुर्लभं दुष्टवर्त्मनाम् ॥ ४८ ॥ पुरा कैलासगिरिशिखरे सुखासी

नं जगत्प्रभुं ॥ शम्भुं प्रणम्य गिरिजा प्राह भक्त्या प्रणम्य तम् ॥४९॥ गौर्युवाच ॥ हर संसारमग्नानां प्राणिनां दुष्टचेतसाम् ॥ संसारबन्धमुक्तिः स्यात् कथं वा तद्वदाधु
ना ॥५०॥ गर्भवासे महादुःखं तथैव जननक्षणे ॥ जननानन्तरं दुःखं क्षुत्पिपासादिना मुहुः ॥५१॥ मूत्रेण च पुरीषेणाप्याकुलैरन्वहं मुदा ॥ कटुतिक्तकषायाम्लरसोष्णधनि
षेवणात् ॥५२॥ उष्णोदकप्रदानेन शरीरस्यातिवेदना ॥ अङ्गारशर्करापारतेजसाप्यतिवेदना ॥५३॥ ज्वरादिव्याधियोगेन पीडा खलु शरीरिणाम् ॥ बाल्ये दुःखं बहुतरं
कौमारेऽपि तथा प्रभो ॥५४॥ यौवने विषयालाभाल्लब्धस्यापगमादपि ॥ दुःखान्यनुभवन्त्येवेति जरायामपि तत्समम् ॥५५॥ किं चाधिकं जरायान्तु दुःखं तत्सह्यमेव न ॥ जरा
तुरस्य वचनं विषेण सममुच्यते ॥५६॥ न शृणोति जराक्रान्तो न पश्यति विशेषतः ॥ जायापि जरया युक्तं तरुणी त्यजति ध्रुवम् ॥५७॥ विषयानर्जने दुःखं
मर्जितस्यापि रक्षणे ॥ रक्षितस्य व्यये दुःखमेवं दुःखकरं धनम् ॥५८॥ कलत्रपुत्रपौत्राद्यैः धनमाकांक्षितं मुहुः ॥ न च तत्पोषणाकांक्षा शुश्रूषा तस्य दूरतः ॥५९॥
कफादिव्याधिसंक्रान्ते पुरुषे म्रियतामयम् ॥ जीवन्मृतेन किं कृत्यं मृतेन सुतरामपि ॥६०॥ ततो मरणमेव स्यादित्याप्तैरुच्यते खलु ॥ न रम्यमन्नवसनं भूषणं वा न जी
वता ॥६१॥ दत्तमेतेन मरणे जीवनेऽपि समा स्थितिः ॥ यावत्तन्मरणं तावत्तिष्ठन्ति परिवृत्य तम् ॥ पश्चात्स्वकं स्वकं स्थानं प्राप्नुवन्ति विशेषतः ॥ तस्यैव श्लेष्मणा वे
श्म नष्टं दुर्गन्धदूषितम् ॥६३॥ तत्पुरीषेण तन्नष्टं तन्मूत्रेणापि केवलम् ॥ तत्कर्णे कटिदेशे वा करशाखास्वपि स्थितम् ॥६४॥ हरन्ति माषमात्रं वा सुवर्णं सदया खलु ॥
यद्दुकूलादिकं तस्य तदप्यपहरन्ति ते ॥६५॥ वाहनं शयनीयं च जलपात्रादिकं तथा ॥ मृतोऽयं त्वरया नेयः कार्यमस्तीति सत्वरम् ॥६६॥ नयन्ति तं पातयन्ति किमनेनेति दुर्जनाः ॥
जीवता दुःखमेतेन दत्तं भर्त्सितमित्यपि ॥६७॥ वदन्त्यपि कथं लोके शपन्त्यपि मुहुर्मुहुः ॥ परलोकः कथं तस्य स्यादित्यपि वदन्ति न ॥६८॥ पापार्जितानि वित्तानि निगृ-

गोरक्ष० ३ | ह०त०उ० | अ०१९
६७

ह्याति
स्वस्वभागत:॥ परन्तु तस्य पापस्य निष्कृतिर्नैव चिन्त्यते॥६९॥ तदङ्गभस्मलेशोऽपि पुत्रेणापि न दीयते॥ भार्या चेत्तरुणी तस्य भोगभाव विचिन्तनैः॥७०॥ अथ
हृत्य धनं सर्वं कालन्नयति दुर्मतिः॥ बालकश्चेन्मृतो दैवात्तं गृहीत्वा विमोहितः॥७१॥ नयन्ति कालं मोहेन शिरस्ताडनरोदनैः॥ व्याधिग्रस्ते बालके तु तन्मू
त्रमलदूषिताः॥७२॥ नाधीवा चारवार्तां वा कुर्वन्त्यशनमेव वा॥ वैद्याभावे साय सर्वस्वं प्रयच्छन्त्यति मोहतः॥७३॥ एतद्रोगं वारयेति वारं वारं विशेषतः॥ स
गृहीत्वा धनं सर्वं औषधाभासदानतः॥७४॥ प्रयाति पश्चान्मरणे धनार्थमपि दुःखितः॥ केचिन्मृतं नरं त्यक्त्वा प्रत्यहं दिनयापनम्॥७५॥ कृत्वा प्रयान्ति मरणं दुः
खेनैव ततः परम्॥ एवं बहुविधाः लोकाः सर्वे जन्मजरामयैः॥७६॥ मरणेनापि सम्प्राप्य दुःखं दुःखसमाकुलाः॥ संसारामय नाशकं वद महादेवाधुना सादर
म्॥ किञ्चितावदिहो बधं स्मृतमपि प्रायो रुजां नाशकम्॥ जन्मादिक्षयकारणं करुणया कालान्तकाशु प्रभो॥ शंभो यत्सुगमं तदेव बहुधा निश्चित्य निर्णीतं दम्
॥७७॥ मंदान्तःकरणाः प्रमाणविषयाः ज्ञाने विहीनाः परं॥ भ्रान्ता एव चरान्ति संन्तनमुमाकान्तातिनान्ताः परम्॥ तेषां का गतिरिन्दुशेखर कृपापूरस्य ते सा
दर नं॥ मुक्तिप्रदमेव वाक्यमधुना श्रोष्यामि शुश्रूषया॥७८॥ इति तद्वचनं श्रुत्वा शङ्करः करुणाकरः॥ सारभूतां गिरां प्राह महागौरीं मनोहराम्॥७९॥
॥ शङ्कर उवाच॥ शृणु गौरि वरारोहे सुधारूपां गिरां मम॥ विचार्य तावदधुना बहुधा तदिहोच्यते॥८०॥ औषधानि विचित्राणि सन्ति तद्वौधनं परम्॥ सुलभान्य
मितान्येव दुर्लभान्यपि शैलजे॥८१॥ औषधं गुप्तमेवास्ति महारोगादिनाशकम्॥ तल्लोपनं कृतं यस्मात् कलौ तावद्विशेषतः॥८२॥ कलौ कलुषचित्तानां निन्दि
तौषध विचारणा॥ न भवत्येव सह सा सा पुण्यानां फलं यतः॥८३॥ औषधे ह्यपि विश्वासस्तावदादौ भवेद्यदि॥ तत्सेवनेनामयस्य विनाशोऽपि प्रजायते॥८४

सर्वेषामपि दुःखानां नाशो दिव्यौषधे श्रुते ॥ भवत्यद्भुतमेतावज्ज्ञायते न कलौ जनैः ॥ ८५ ॥ यस्तु रोगो महान्भ्रमात् औषधं महदेव तत् ॥ दुर्लभं सुलभं यस्यास्तेव
लं मदनुग्रहात् ॥ ८६ ॥ तादृशो व्यौषधे तावन्न विश्वासो यथा तथा ॥ मोहसंपादितो गौरि सर्वथापि दुरात्मनाम् ॥ ८७ ॥ शिवार्चनविहीनानामशिवं भवति प्रिये
तस्याशिवस्य नाशस्तु दिव्यौषधमपेक्षते ॥ ८८ ॥ आशिवाचारनिरतैः औषधं तन्न लभ्यते ॥ अतः स्यादशिवं तेषां सर्वथा प्रतिजन्मनि ॥ ८९ ॥ आशिवाराध
नपरैः राशिवं प्राप्यते ततः ॥ शिवन्तेषां कथं भावि दुर्जनानां सदाधुना ॥ ९० ॥ संसाररोगनाशाय यदस्त्यौषधमुत्तमम् ॥ तत्राशिवाराधकानाम् विश्वासो
नोपजायते ॥ ९१ ॥ अतः सर्वामयच्छेदः सकृदेव कथं शिवे ॥ किन्तु तेनैव सर्वेषां मुक्तिः स्यादेकदा खलु ॥ ९२ ॥ ये[illegible]न पापान्यपाराणि कृतान्येव पुनः पु
[द्य]
नः ॥ तस्य तावन्न विश्वासस्तास्मिन्दिव्यौषधे शिवे ॥ ९३ ॥ ईदृशं विश्वासमुत्पाद्य तदौषधमनुत्तमम् ॥ इति तावन्न वक्तव्यं सस्वतो नोपजायते ॥ ९४ ॥ न
[भवेत्] [नाध्धा]
पञ्चगव्येन पवित्रः श्वा रासभो वाप्यथ सूकरो वा ॥ यथा तथा वा शिवपूजकोऽपि विश्वासजन्मस्थलमेव साध्या ॥ ९५ ॥ निम्बे क्षीरफलोदयो यदि
भवेद्विष्ठासु रत्नोदयः ॥ तर्हि स्यादशिवार्चकस्य गिरिजे दिव्यौषधासेवने ॥ विश्वासोऽपि भविष्यतीति बहवो जानन्ति किं सूकराज्जातो मत्तगजो भ-
विष्यति महान् पञ्चाननो वा शिवे ॥ ९६ ॥ वक्रं पुच्छं सारमेयस्य तावत् नैवावक्रं बन्धनेनापि नूनम् ॥ तद्वन्नैवाशङ्कराचारचित्ते विश्वासः स्यात्
शंकराचारमार्गे ॥ ९७ ॥ अहो दुष्टं कष्टं न भवति शिवाचारनिरतैस्तमाचारं हित्वा त्वशिवभजने यस्तु निरतः ॥ स कुंभीपाकेषु स्वजन-
[प्या]
सहितस्तिष्ठतु सदा । जनिं मृत्युं प्राप्य न वरतमेवागतनये ॥ ९८ ॥ अधृगांकरजनाश्रितं नरकमन्दिरं सर्वदा तदेव यमचिन्तितमनिल-

यमीश्वरद्रोहिणाम्॥ अशैवजनमन्दिरं नरकमाहुरत्यास्तिकाः कदाचिदपि ते शिवे नरकतो न निर्यान्त्यपि॥ ९९॥ पुनः पुनरनेकधा शुनकतामवाप्याम
ये प्रखिन्नहृदयाः परं नरकमेव यान्त्यन्वहम्॥ पुनः पुनरुमापतिस्मरणवर्जिता दुःखिताः सदापि मनुजा शिवे नरकसंयुताः प्रायशः॥ १००॥ प्रायः स्यादशैवा
र्चनेन गिरिजे पापं ततस्तत्फलम् कुंभीपाकनिवेशनं पुनरपि श्वा जन्मजन्मान्तरे॥ भूयो रासभतामुपेत्य मलभुक् स्यात्सूकरो वृश्चिकश्चाण्डालोऽपि ततः
प्रयाति नरकं पश्चात्पुनः सूकरः॥ १॥ अशैवजननी सदा नरकमेव याति ध्रुवम् सुतैः सह पुनः पुनर्नरकमेव सम्प्राप्य सा॥ न जातु सुखलेशमप्यनुभवत्य
तो दुःसहा ह्यन्यथा भवति सर्वथा शिवपराङ्मुखानां शिवे॥ २॥ धिग्धिग्धिग्धिगशैवजन्म धिगिदं धिक् शङ्करद्वेषिणां वंशस्तत्कुलजाननानि सततं विष्ठा
नुलिप्तान्यपि॥ तिष्ठन्त्येव पुरीषकुण्डकुजलव्यासोरुकीटाकुलान्याकल्पं व्यथया गिरीन्द्रतनये तेषां कथं निर्गतिः॥ ३॥ अशैवो महावह्निकुल्यासु वह्नेर्महा
वह्निर्~~...~~ शस्त्राभिघातप्रतप्तः॥ पुनर्भिण्डिपालैः प्रतप्तः प्रतप्तः पुनर्वह्निकुण्डेषु तिष्ठत्यवश्यम्॥ ४॥ अशैवं निरीक्ष्यैव ते कालदूताः प्र
बध्यैव पाशैर्महावह्नितप्तैः॥ ज्वलद्वह्निदण्डैः मुहुस्ताडयन्तो नयन्त्येव कालान्तिकं निष्कलङ्काः॥ ५॥ दृष्ट्वैव तादृशं कालस्तदाशांभवमित्यपि॥ मत्वा क्रुद्धो
भवत्येव मुञ्चन् वह्निं मुहुर्मुहुः॥ ६॥ रेरे दुराचार शिवान्यपूजाकथं कृता दुर्भग इत्यपारैः॥ कशाग्रघातैरदयेन हत्वा प्रपातयत्येव महाग्निकुण्डे॥ ७॥ प्रतप्त
मानीयतमग्निकुण्डाद्दशं करारा धकहस्तमग्नौ॥ निक्षिप्य दंशेन निकृत्य मांसं तदाननेन प्रक्षिपति प्रकोपात्॥ ८॥ रेरे दुराचार शिवान्यनाम स्मृतं कथं
विस्मृतमीशनाम॥ इति प्रदग्ध्वा हृदयं तदीयं पुनर्महाग्नौ क्षिपति प्रकोपात्॥ ९॥ रेरे दुराचार शिवेतरांघ्रिप्रणामदुष्टं धिगिदं शिरस्ते॥ इत्युच्चरन्नेव

सवह्नि शस्त्रैः स्थि

वेदास्यमध्ये बिल्वजलैः पूरयति प्रकोपात् ॥ छिनत्ति तन्मस्तकमस्तिभागम् ॥१०॥ पादौ तथैव पतितौ शिव याचयापि पापार्जनोपायतयापि दुष्टौ ॥ इत्युच्चै
रन्नेव छिनत्ति तस्य पादद्वयं लेशतरव वह्नौ ॥११॥ रेरे दुराचार तवास्यमध्यं हारो पवित्रं न पूतमेव इत्युच्चरन्नेव तदास्य मध्यं बिल्वजलैः पूरयति प्रकोपा-
त् ॥१२॥ रेरे दुराचार लोचनाभ्यां लिङ्गं न दृष्टं कमलार्चितं वा ॥ इत्युच्चरन्नग्निकणैः प्रदग्धं करोति तन्नेत्रयुगं प्रकोपात् ॥१३॥ रेरे शङ्कर शङ्करार्चनकथा
पीयूषधाराश्रुता न क्वापीति निधाय कर्णकुहरे तप्तायसां भः परम् ॥ वह्नौ पातयति प्रकोपदहनज्वालाकुलं कुर्वन्नेव यमः पुनः पुनरुमे धावत्यशैवा
न्प्रति ॥१४॥ अशैवकुलपावको जयति काल एवांबिके स तावद् शिवार्चकाननविलोकनेनानलैः ॥ प्रपूरयति तन्मुखं मुहुरपारवह्निस्फुरत्स्फुलिङ्गनि
कराकरज्वलनजालजालैर्भृशम् ॥१५॥ अमोघमयमंतको वदति काल कालेतर प्रयाम भजनादिकं सकलवेदधर्मप्रभुः ॥ अतः कथमुमे सकृत्सकलदुः
खनाशी यमः शिवेतरसुरार्चकप्रलयकालकालानले ॥१६॥ कः कालानलहान घोरदहनज्वालाकुलव्याकुलो न स्याद्गौरि शिवेतरार्चनपरो लिङ्गा
र्चनानादरः ॥ व्यक्तोद्धूलनफालभस्मविलसद्रुद्राक्षमालस्ततो मत्पूजानिरतः प्रयाति परमं मामेवमानन्ददम् ॥१७॥ इति श्री शिवरहस्ये हराख्ये तृतीयां
शे उत्तरार्धे याज्ञवल्क्यजनकसंवादो नामैकोनविंशोऽध्यायः ॥१९॥ नन्दिकेश्वर उवाच ॥ इत्याकर्ण्य शिवाशिवोक्तवचनं नत्वा मुहुः शंकरम् ॥ दृष्ट्वा स्मे
रवाननाति विनताश्रुत्वा मुहुः सादरम् ॥ प्राहानन्दवचः प्रपञ्चचतुरा धृत्वा करे षण्मुखं दृष्टवीशस्य चतुर्मुखादिविनुतं स्तन्यं पिबन्तं मुदा ॥१॥
स्वामिन् शंकर शंकुरुप्रातिभवे भक्ताय मुक्तः कलौ ॥ तावद्दुर्लभ एव पुण्यगिरिभिः भक्तिप्रवृद्धिर्भवेत् ॥ भाग्येनेति विचारितं मुहुर[illegible]तो भाग्यस्व

शिवस्त० ३
६९

रूपायते भक्तिर्भाव वरायभाव विषय व्यापार सारैः परम् ॥ २॥ स्वामिन्मय्यनुराग एव सततंतस्य च्युतिर्मास्तु मे मन्त्री त्यर्थमिदं महौषधमिति ख्या तं किमस्तिप्रभो ॥ तन्मह्यं वद सादरं करुणया तच्चित्र मत्यद्भुतं न ज्ञातं विधिनापि वेद निकरैरप्यंततः सन्ततम् ॥ ३॥ तस्यौषधस्य श्रवणात्स्मृते र्वा सर्वामयध्वंस इतिप्रसिद्धिः ॥ तदौषधं तावदुमासहायमह्यंवदाद्यादर साधनेन ॥ ४॥ श्रुतानि कुत्रापि किलौषधानि नरोगनाशाय भवन्ति शम्भो ॥ तदेतदत्यद्भुतमित्यवैमि प्रलोभनार्थं नतदुक्तमेव ॥ ५॥ वेदास्तावदुमासहायवचनान्यन्यानि शास्त्राण्यपि व्यक्तान्येव नचित्रमत्र भगवन्विद्यापतिस्त्वं यतः ॥ वाश्यन्ते मम वेद एव सततं विश्वासमेवास्ति मे शंकाशूक विवर्जितानि वचनान्यन्तादि शून्या न्यपि ॥ ६॥ नित्यत्वं खलु केचिदाहुरधुनावे देषु तेषां कथं नित्यत्वं परमाणु तुल्यमसकृज्जन्म श्रुतं वेदतः ॥ छन्दांसीति तथा च नित्यमतिरप्याप्तोक्त वाक्यत्वतो दूरे तावदतः परं खलु मतो नित्यप्र वाहादरात् ॥ ७॥ प्रवाह नित्यत्वमवेक्ष्य वेदे नित्यत्व मुक्तं शिवतेन तस्मिन् ॥ नित्यत्व वार्ताऽपि भविष्यतीति सेयं त्वदुक्तिष्वनुभूयते च ॥ ८॥ ईशानः सर्व विद्यानां, इति वेदे च निश्चितं ॥ विद्यादीश्वरता शंभो सिता त्वयि महेश्वर ॥ ९॥ अतस्त्वदुक्तं सकलं प्रमाण मभ्रान्त वाक्यत्व विशेषणे न ॥ ज्ञातं प्रमाणं तदिदं प्रमाणं श्रेष्ठ प्रमाणेषु विचिन्तमेव ॥ १०॥ अलौकिकार्थानवबोधकानां प्रामाण्यमात्रं क्वचिदानृतं च ॥ अलौकिकार्था वगमो विधिस्यात्सवेद एवेति विधेर्मतोऽपि ॥ ११॥ विधिरपि न विधीनां वेदतत्वं तत्वं ते विधिज्ञः त्वमिति तदविधीनामन्वयज्ञानमास्ति ॥ विधिजन न समर्थस्त्वं ततस्त्वं प्रमाणं वदति विधि विशेषज्ञान बोधेन कोऽपि ॥ १२॥ अतो महादेव वचः प्रमाणं तदेव वेदोऽपि तदेव शास्त्रं ॥ विश्वा

ह० न० ३
अ० ९६

सबीजंच तदेव शंभो न तत्र विश्वास विपर्ययोमे ॥१३॥ विद्यानामधिपं समस्त जगतां कर्त्तारमित्यादरा द्धर्त्तारं सुखसम्पदामपि सदा दातारमारात्परं
मत्वा त्वां शरणं गतास्मि भगवन् भाले क्षणानुक्षणं प्रत्यक्षेणाभवन्तमेव शरणं प्राप्ताः कृतार्थाः परम् ॥१४॥ यस्यादाम्बुज पूजया हरिरभूद् र्च्चोय
दं घ्र्यर्चनादर्च्चोभूत्कमला विधिप्रभृतयो प्यर्च्चायदं घ्र्यर्चनात् ॥ तं कामांत कमंत कान्त कमुमा कांतं मुहुः संततं सन्तः स्वान्त सरोज राज
(...न्य उवाच)
चरणां भोजं भजन्त्या दरात् ॥१५॥ वाणीतां गिरिराजराज तनया वक्त्रांबुजान्निर्गतां पीयूषार्णवपूर पूरितमहा कल्लोल जालोज्वलां ॥ श्रु-
त्वा स्नेह पुरःसरं गिरिसुता हस्तं स्पृशन्नादरात् ॥ तत्स्मेराननकांतिपूरकलिता माहां विकाशंकरः ॥१६॥ श्री शंकर उवाच ॥ यद्गोपनार्हं तदुमेक
दापि नूनं न वक्तव्यमितिस्मरामि गोप्यत्वमप्यस्ति विशेषतस्तु संगोपनीयेषु न संशयोत्र ॥ यद्यत्तावदुमे भविष्यतिमया संगोपनीयं धनं तत्सर्वं
विनिवेदनार्हमिति ते बुद्धिः कथं जायते ॥१७॥ नारीणामतिगोपनार्हमतिरप्याछादनीयाततो यद्वस्तु प्रकटं तदेव बहुधा संदर्शनार्हं शिवे ॥ संगो
पितं वस्तु खलु प्रसिद्धं करोति नारी परमादरेण ॥ पृष्ठाग्र विष्ठस्य ग्रहे विशेषाप्रलोभिता लोभरतायतःसा ॥१८॥ सा गौरी गरला काण्ठश्रु
त्वा हर गिरं पराम् ॥ उवाचोद्विग्नहृदया लग्नाभुग्नापि तत्पदे ॥१९॥ गौर्युवाच ॥ अविश्वासबीजं मयि श्री महेश त्वया क्वापि दृष्टं न सर्वा
त्मनापि ॥ मयागोपनार्हं प्रसिद्धं कृतं किं महार्हेषु वस्तुष्वपारेषु केषु ॥२०॥ नारी सामान्य बुध्या तव यदि न दयामप्युमाकान्तता
ते कृत्या नारी मतिर्वा कथमननुमतिर्मय्यपि ज्ञान रूपा ॥ वेदास्तावद्वदन्तीत्यपि विविध जगज्जाल निर्माण हेतुं मामाहुर्वेदवादाः

8/3

कीर्तन्न तपसा पूतचित्तास्तु सिद्धाः ॥ मामाराध्य मीदीनियां वदंतो मुक्ता सात्वत्प्रसादेन शम्भो ॥ तस्मादार्यां मां विदित्वा पि भार्यां यद्यद्रम्यं तद्रहस्यं वदाशु ॥२२॥ यद्यद्रहस्यं हि सिस्वभावात्तत्ता काशाहमुमा सहाय ॥ कलत्र कस्य रहस्य वार्ता ततः किमन्यद्वदेम रहस्यं ॥२३॥ यद्गोपनीयं च रहस्यमासीत्तदेव तावद्रहसि प्रसिद्धम् ॥ भर्तुः कलत्रस्य च तत्कलत्रं रहस्यं बाधेन विना कथं वा ॥२४॥ ददाति गृह्णाति वचस्तु रम्यं संगोपनीयं च रहस्य मासीत् ॥ पृच्छत्यथं भोजयते च भुङ्क्ते मित्रत्वमेतैः खलु निश्चितं च ॥२५॥ मयि चेदकृपा तवाधुना मम तावद्गतिर्भवत्वयि ॥ अनपाय रीतिममास्वतः करुणा मय्य न पायिनी तवास्तु ॥ त्वया कथं वा निधयो ऽपि दत्ताः प्रसिद्धरूपाश्च न ते यतस्ते ॥ संगोपनार्हाः खलु रत्नजातं दत्तं पुरा महामूल्यमेव ॥ मणीनां च प्रदत्तानां गणाना न गणाधिप अमूल्यानि दुकूलानि दत्तानि विविधानि मे ॥२८॥ अपरत्नाभरणानि दत्तान्यथैवतेषां तु न मूल्यमस्ति ॥ शय्यापि दत्ता तव चन्द्रमौले त्वया सदा मह्यमनामयेन ॥२९॥ अंकं दत्तं निष्कलंकत्वयामे कातंका शून्यमास्यैतिर्मे ॥ देहस्यार्धं दत्तमर्धेन्दुमौले दाता कोवात्वत्समो भूतले ऽपि ॥३०॥ कलंकी न मौलौ शशाङ्को धृतः किं सदर्पो ऽपि सर्पेश्वरः कंठभागे ॥ विषं कालकूटाख्यमप्यास्ति कंठे ततो नीलकंठत्व बुद्धिस्त्वयीश ॥ यद्यप्यास्मि महापराधसहिता का तावता मे भयं त्वत्पादाम्बुजरेणुभिः सह मया स्थेयं पदे ते प्रभो ॥ शम्भो मय्यनपायिनी तव दया स्यात्तावता का क्षतिर्मे पीयूषसागरादिषु समां वृत्तिं करोत्यंभसा ॥३२॥ अस्तु प्रस्तुतवस्तु वर्णनमुमा कांताधुनालक्षितं ज्ञातव्यं परमौषधं जनिजरा मृत्युव्यथाधुना ॥ तर्हि स्यादमृतत्वमेव

पु
भवधीर्नाशं प्रयात्यन्वहं तत्पानात्पृक्कौ च शोकरहितौ स्यातामुमाकांत मे ॥३३॥ श्री शंकर उवाच ॥ शिवपदमिदं शिवदमित्यवैमि प्रिये प्रिये मम शिवव्र
ते त्वयि यथानुरागो मम ॥ शिवपदमिदमौषधं भवाग्नि त्रिदश वैरमुनिभिश्च सिद्ध संघैः ॥३४॥ अनवरतमुपास्यमाधि मात्र व्यपनयनाय विनिर्मितं मयापि
॥इदं शिव पदं शिवे शिवदमित्यवैमि प्रिये प्रिये मम शिवव्रते त्वयि यथानुरागो मम ॥३५॥ अनुक्षणमुमे तथा शिवपदं पि यद्यत्परं तदेव पदमात्मनः परमितो
पि किं वा भवेत ॥ शिवनाम सुधा निशोनिशं यः स तु मृत्युञ्जय तीत्यनामयस्य ॥३६॥ इदमेकमनामयत्व हेतुः तदिदं मे परमं रहस्य भूतं ॥ पुरा
विंध्य गिरि प्रांते कश्चिद्ब्राह्मण वेषतः ॥३७॥ चचार द्विज गेहेषु शूद्र एव स्वभावतः ॥ तेन पापान्यपाराणि कृतानि गिरि कन्यके ॥३८
॥तत्पाप गणनायां तु न शक्तः स चतुर्मुखः पापेषु क्रियमाणेषु तेन तद्गणना परं ॥३९॥ अशक्या सर्वथेत्याह चित्रगुप्तो यमोपि
गौरमनेनापि तेन नीतं वपुः खलु
स ॥ सर्मार्गे ब्राह्मणान्हत्वा वञ्चयित्वा स्ववेशतः ॥४०॥ तद्धनं समुपादाय सुरापानरतोप्यभूत् ॥ जन[illegible] ॥४१॥ तस्यामुत्पादिता पुत्राः
तेन पापं लता शिवे ॥ कन्यकाश्च समुत्पन्नाः तस्यामेवातिसुन्दराः ॥४२॥ तासु रेमे स दुर्बुद्धिः तासु याताश्च कन्यकाः ॥ गोमांस भक्षणादीनि कुर्वन्नेव
स्थितः सदा ॥४३॥ तस्य भक्ष्यमभून्नित्यं सर्वदा लशुनादिकम् ॥ न स्नानं वा पर्वकालेषु कृतं तेन दुरात्मना ॥४४॥ शिवक्षेत्राटनं तेन
न कृतं सर्वदा खलु ॥ शिवक्षेत्राटनो युक्ते न कृतं परिभाषणम् ॥४५॥ न श्रुतं शिवनामापि कदापि दुरितापहम् ॥ न दृष्टः शिवयोगी
वा शिवध्यान परायणः ॥४६॥ भस्मोद्धूलित सर्वाङ्गो रुद्राक्षाभरण प्रियः ॥ शिवलिङ्गार्चकः क्वापि दृष्टस्तेन न सर्वथा ॥४७॥

591

:नाविल्वतरुमूलानि तेन दृष्टानि सर्वथा ॥ न विल्वाय जलं दत्तं रक्षणं वा कृतं क्वचन ॥४८॥ शांभव द्रोह निरतः शिव मार्ग निरोधकः ॥ न भस्म वात संवीतो भस्मानांकित एव सः ॥४९॥ न दृष्टो भस्मदेशोऽपि तेन दुष्टात्मना शिवे ॥ रुद्राक्षमाल्यानिलबाल लीला विलास हेतुश्च नजात एव ॥५०॥ रुद्राक्ष शब्दोऽपि न तेन तावच्छ्रीमत्या श्रुतः पाप विनाश दक्षः॥ पापानि सर्वाणि लयं प्रयान्ति रुद्राक्ष शब्द श्रवणेन गौरि ॥ स तादृशो न श्रुत एव शब्दस्तेनाति पाप व्रत तत्परेण ॥५१॥ प्रदोष कालीन शिवार्चनं वा दृष्टं न तेनाघ विनाशनाय ॥ शिवार्चकस्यापि मुखन्न दृष्टं प्रदोष कालेषु रति प्रियेण ॥५२॥ वराङ्गनाङ्गानि विलोक्य सायं पुनः पुनस्तेन विलोकनेन ॥ विनीतमायुः पुरुषाधमेन तेनैव तावद्वजनी मुखेषु ॥५३॥ अल्पायुरप्यनल्पानि कृत्वा पापानि भूरिशः ॥ नित्यं स्वोदरमात्रस्य करोति परि पूरणम् ॥५४॥ तस्यासीद्वनिता कापि ब्राह्मणी छिन्न नाशिका ॥ व्यभिचारेण विच्छिन्ना नासा तस्याः परं शिवे ॥५५॥ व्यभिचारिण गणना व्याकीर्णा जारजान्विता ॥ तस्यामनुरतः सोऽपि कुत्सितः साति कुत्सिता ॥५६॥ तथा संवसतस्तस्य मृत्युकालः समागतः ॥ तदा तद्वनिता दृष्ट्वा तं रुरोद तदोच्चकैः ॥५७॥ व्रण व्रातैः समाक्रान्ता तनुरालिङ्गिता त्वया ॥ ततः पर न कोप्यस्ति जारस्तुल्यस्त्वया मम ॥५८॥ व्रण गन्ध समाघ्राय जारो यात्याति दूरतः ॥ त्वया तु न गतं क्वापि जारस्तुल्यस्त्वया न मे ॥५९॥ इत्यादिभिर्बहुविधैः प्रलापैः सापि दुःखिता ॥ म-

रणावसरं प्राप्ता तेनैव पतिना सह ॥ ६० ॥ तदानीं शिवाचार पूतो विभूत्या त्रिपुण्ड्रेण रुद्राक्ष माला समेतः ॥ चरन्नाह कन्यां स्वकी
यां समार्गे शिवे पश्य मार्गं प्रयाहीति दैवात् ॥ ६१ ॥ स शब्दः श्रुतस्तेन वाताभिघातात्तयापि श्रुतः पाप तूलाग्निभूतः ॥ तदा तौ
निवेतुं प्रमत्ताः प्रदत्ताः महाकाल दूताः परं दण्डहस्ताः ॥ ६२ ॥ तदा तेन दुर्गन्ध वातेन सर्वे निवृत्ताः परं मृत्युदूताः समस्ताः ॥
ततस्ते विचारः कृत स्तौकथं वा यौ यमायापि दण्डाव घातैः ॥ ६३ ॥ दूतत्वमेतदपकारकमेव जातं दुर्गन्ध दुष्ट तनु दूरावि-
लोकनेन ॥ दुर्गन्ध दुःखमपि सह्यमिदं कथं वा पापिष्ठ देह नयनेन कृतः सुखल्लः ॥ ६४ ॥ एतादृशा कतिन सन्ति महाघ
रूपाः तेषां यमालय निवेशनतो ऽपि पापम् ॥ नाशाल्ल यास्यति महाघ्नलयाय का वा स्याद्यातनापि शा-
मनेन न सातुसृष्टा ॥ ६५ ॥ यमो ऽपि क्रोधार्तः क्षिपति बहुधा वह्नि निलये महाघोरे सर्प व्यतिकर महा वृश्चिक
कुले ॥ पुन र्वह्निज्वाला स्वापि नरक भेदेषु निरये पुनः कुम्भी पाके व्यसहहन येनः तेनाप्यवलयः ॥ ६६ ॥
शिव नाम सुधा कपल पीता सुलभा सा न दुरक्षरा वृतापि ॥ नवनीत नीभाक्षरान्विता सा दुष्ट दुर दृष्टे
न कदापि नैव पीता ॥ ६७ ॥ स्पष्टनाम शिवस्वरूपदमिदं पापाटवीनांदवः पापाम्भो निधि वाडवो व्य-
घ गिरि प्रध्वंस[illegible]नायाशनिः ॥ यौ वर्णौ शिव इत्यपार विभवौ तौ संश्रुतौ वा सकृ[illegible] सर्वापत्कुल

शिवरहस्य
७२

वरणाय परमानन्दाय मुक्त्यै परम् ॥ ६८ ॥ शिवनाम सुधापाने प्रीतिः स्यात्कस्य चिद्भुवि ॥ अपारपुण्यपुञ्जस्य सा नान्यस्येति निश्चयः ॥ ६९ ॥ मनुष्यदेहमासाद्याप्यास्वाद्यामुहुरादरात् ॥ शिवनामसुधां धन्यः प्रयाति शिवमेव सः ॥ ७० ॥ स्वाधीना रसना शिवामृतरसं पातुं प्रवृत्ता कथम् ॥ नासीदेव दुरात्मनां कथमिदं भाग्यं महापान्वये ॥ ७१ ॥ को वा जीवति तत्सुधाशनमहो रात्रं क्षणं वा सकृद्यस्य स्यादपकोटिनाशकतया ख्यातं सर्वं यः सुरैः ॥ अघकोटिविनाशाय दृष्टं शिवनाम श्रुतमेकमेव वेदैः ॥ अनुवारमिदं जनाः कथं वदन्ति स्मृतिमात्रतोऽपि मुक्तेः ॥ ७२ ॥ मुक्ताफलामलमिदं शिवनाम लोके स्पष्टं शिवेन सकलार्तिविनाशनाय ॥ तत्कोऽपि पुण्यपुरुषः श्रवणे निधाय भृत्यतयुमापतिपदाम्बुजदर्शनाय ॥ ७३ ॥ नामानि सन्ति बहुधा गिरिशस्य तानि तुल्यानि नैव शिववर्णयुगेन तत्र ॥ प्रीतिः शिवस्य शिवरूपमिति प्रसिद्धं नामापि तद्रुचिकरं खलु शङ्करस्य ॥ ७४ ॥ श्रीगंगापि लोके शिवपदसमेता शिवपदं ददात्युक्ता तावत्स्मरणपथमाप्तापि सहसा शिवदा ॥ अतो धन्यं नित्यं शिवाशिव शिवेति प्रजपनैर्नयन्त्यायुः प्रायः शिवपदसरोजार्चनवशात् ॥ ७५ ॥ यो वक्तुं यतते शिवाक्षरयुगं सायं प्रगे वा मुदा मध्याह्नेऽपि समर्चयन्ति विबुधाः सर्वे मुनीन्द्रा अपि ॥ तस्मादप्यधिकोन कोऽपि भुवनेष्वालोडितं भूतलं ब्रह्माण्डान्यखिलानि तावदसकृन्नालोडितान्येव किम् ॥ ७६ ॥ श्रीविश्वेश्वराय नमः ॥

ह० त० उ०
अ० २०

जम्बूद्वीपे जन्म सम्प्राप्य कोवा नारो दन्यो नाऽजाद्व्यपायः शैवं वक्तुं नामवैचायतस्य पापिष्ठानां तन्न तावन्न भक्तिः ॥ ७६ ॥ आकंठं शिवनामधेयमुसुधां पीत्वाऽतिपी-
नो मुदा यो वानृत्यति शांगलिंगनिलये तत्पादपङ्कं सुराः ॥ दृष्ट्वैव प्रणामास्तु वन्ति बहुधा तत्पादुकाराधने राधामाधवयोर्विधेरपि मनस्तावत्प्रवृत्तं मुहुः ॥
॥ ७७ ॥ तज्जन्मैव मनोहरं च सुकरं चानन्ददा सर्वदा यस्य स्याद्रसना शिवाक्षर सुधापान प्रवृत्ता मुहुः ॥ तन्माता सुभगा पिता च सुभगः तस्यैव तत्याद्
के लोकानामुपकारके स्मृतिपथं प्राप्ते विमुक्तिप्रदे ॥ ७८ ॥ अघकोटियुतोऽपि दैवयोगाच्छिव नामस्मरणेन पूत एव ॥ स पुनाति जगत्त्रयं सकृद्वा श्रुत
एव स्मृत एव वा विशेषात् ॥ ७९ ॥ शिवनामसमानमास्ति किं वा भुवनेषु प्रथितेषु भूतलेषु ॥ गिरिसुन्दरकन्दरेषु भूयो प्ययत्नेनापि न लभ्यते समानम् ॥
॥ ८० ॥ रे रे जनाः किमिति जन्म वृथैव नीतं भक्त्या श्रुतन्न शिवनाम कदा मुदापि ॥ हा हन्त हन्त हतजीवनमेव लोके लोकोपकारक शिवार्चक निन्दकोऽपि
॥ ८२ ॥ धिग्धिग्धिग्रसनापि तस्य बहुधा शैवं न नामादरात् ॥ उक्तं मुक्तिफलप्रदं मुहुरहो भक्त्या यया जिह्वया ॥ हा हा तस्य निरर्थका जनिरभूत्सा नातिभार
या किं सा तावद्रसना न किन्तु भुजगी कर्णं वृथा वेष्टितम् ॥ ८३ ॥ शिवाभिधानामृतपानपीनानदीनमानाननभिमा[illegible]गानान् ॥ पश्यत्यवश्यान् शमनोऽ
पि नत्वा नारायणास्तान्कमलासनोऽपि ॥ ८४ ॥ सुधाधारा का वा शिवपद सुरूपापि भुवने तया जन्मापायो न भवति जनिः किं शिवपदे ॥ श्रुते जन्मापा-
यो भवति न जरा नापि मरणं श्रुते मुक्तिस्तेनेत्यपि वदति वेदोऽपि सततम् ॥ ८५ ॥ सुधाराशिः कोऽयं विजयति शिवाख्यात्मकतया महानन्दाकाराञ्जनय
ति सुधांभूनगणितान् ॥ पुनस्तैरप्यन्येप्यमृतकिरणा एव जनिताः समाहारस्तेषां शिवचरणपङ्केरुहगतः ॥ ८६ ॥ न विज्ञातं सिद्धैः परममृतरसं

शिवपदं न कादेवैः कैरप्यमरमुनिसंघैरपि गेयैः ॥ नवा वेदैर्गीतं शिवपदमिदं वेदसशिवो महानन्दाकारो निरुपमनिजज्ञानमहिमा ॥८७॥ इदं तावत्कृतं
शिवपदमिदं तावदमृतं परन्नातः किञ्चिज्जगति सकलाघक्षयकरम् ॥ अनेनैवानन्दो भवति शिवपादाम्बुजरजः प्रसादात्केषां चिद्गिरिश चरणांभोजभजनात्
॥८८॥ न जानीमस्तत्वं शिवपदमहिम्नः परमिदं परां मुक्तिं दास्यत्यनुपदमविज्ञात विभवम् ॥ स्मृतं वा केनापि श्रुतमपि किमेतादृशमिदं पुरा स्पृष्टं दिव्यं जनि
मरणनाशार्थमनिशम् ॥८९॥ अहो कल्यान्ते वा न भवति कथंचिद्धि स्मयं महाकुंभीपाकप्रभृतिषु महाक्लेशविरतिः ॥ अकस्मादेतस्माज्जननमरणापायजनको महा
रोगापायो भवति शिवशब्दस्मरणतः ॥९०॥ यद्गोपनीयं बहुभिः प्रयत्नैः तन्नाम रत्नं तदिदं शिवस्य ॥ कंठे सदा तिष्ठति यस्य तस्य पदाम्बुजाराधनतोपि
मुक्तिः ॥९१॥ न ज्ञायते शंकर नाम शक्तिः केनापि तद्वस्तुनिभं न वस्तु ॥ इतः समस्तामवनीं शिवस्यादित्य वश्यं भजनीय मार्ग्यैः । सदा वतावत्परमास्ति
कश्च सदानतास्तु विपावनश्च ॥ यः शांकरं नाम मुहुर्मनस्थं कृत्वा स्मरत्यन्वहमादरेण ॥९३॥ शिवशब्द समान शब्दमस्मिन्भुवने वेद गणोपि नैव
विद्मः ॥ अमुमेव महौषधं विदित्वा भुवि धन्याः प्रचरंति रोगहीनाः ॥९४॥ मन्ये रोग कुलाशनिं शिवपदं धन्यैकमान्यं सदा धन्यानामपि धन्य
ता शिवपदं धन्येषु धन्यं परं ॥ मन्ये तं शिव शब्दमेव सततं धन्यं करोति स्मृतः सद्यः पाठयतीति तत्पदमहो दिव्यौषधं सौख्यदं ॥९५॥
किमौषधाभास विचारणेन दिव्यौषधे शंकर नाम रूपे तिष्ठत्यपारामयनाशकेस्मिन्नान्यं न वाञ्छा विषयी करोति ॥९६॥ करोति पापान्य
मितानि किं तैरपार संसार महामयैर्वा ॥ किं तद्यतः शंकर नाम रूपं दिव्यौषधं तिष्ठति कंठ भागे ॥९७॥ संसार रोग हरणाय शिवाभिधानं

दिव्यौषधं तन्मुहुरादरेण ॥ संसेवनीयं सकलाघशान्तिस्तेनैव संसार भयापहारः ॥९८॥ संसार रोगमपहर्तुमशक्त एव यः कोऽपि शंकर पद स्मरणानुरक्तः ॥
तं तारयत्यनुपदं पदमेतदेव तन्नान्यदिच्छति तदीय भयापहारः (हृत्यै) ॥९९॥ अहो केऽपि संसार रोगापहार प्रयास प्रवृत्ताः प्रमत्ताः परन्ते ॥ अनायास सिद्धेऽपि वि
श्वेशनाम्नि प्रकृष्टाघनाशाय के वा प्रवृत्ताः ॥१००॥ संसार रोग विनिवारकमेकमेव दिव्यौषधं शिव पदाभिधमामनन्ति तेनैव तस्य विलये भवतीति सिद्धं सि
द्धान्त एव मम तावदसंशयोऽत्र ॥१॥ एवं मुहुर्मुहुरुमेत्यरयावदन्तो दूताः प्रपद्य यममाहुरति प्रसन्नम् ॥ शंभो महेश गिरिशेति मुदा वदन्तो भीताः शनैः शिवप
दश्रवणोत्सुकं तम् ॥२॥ यमदूता ऊचुः ॥ स्वामिन्कश्चन पापसंघ मलिनो भूलोक शोक प्रदः ॥ दुर्गन्धेन समावृतोऽपि बहुभिः पूयव्रणैः संकुलः ॥ तत्रा जारिण्या
सहितोमृतस्तमधुनाप्यानेतुमिच्छानवो दुर्गन्धैर्गमनञ्च तत्र बहुधा तावन्न शक्यं प्रभो ॥३॥ संसारामय सागर क्षयकरं तेनादरान्न श्रुतं न ध्यातञ्च न की
र्तितं श्रुतमपि प्रायः प्रमत्तोऽपि सः ॥ पापार्तो भसितानुपानसहितं पीतं न दिव्यौषधं न ध्यातोऽपि भिषक्तमः सुभिषजां मध्येन रुद्राक्षभाक् ॥४॥ अपारघो
संसार रोग सागर वारकम् ॥ महेश्वराभिधानाख्य मौषधं भसितान्वितम् ॥५॥ श्रुतमपि शिव नाम रूपमेतद्भसितयुतं परमौषधं स्मृतं वा ॥ सकृदपि हरती
ति रोगजालं प्रलयमुपैति महामय प्रवाहान् ॥६॥ महामयानां यदुमासहाय पादारविन्द स्मरणौषधेन ॥ आत्यन्तिको नाश इति प्रतीतिर्वेदान्त वाक्यैः
खलु जायतेऽपि ॥७॥ संसारामय नाशनोद्यतमतिः को वा शिवाराधनं त्यक्त्वा तिष्ठति तन्महौषधमिति ख्यातं मुहुः शांभवैः ॥८॥ तस्मात्तत्सततं विभूतिरस
कृद्रुद्राक्षभूषैर्मुदा कर्तव्यं तदपार दुःख विलयं कर्तुं समर्थं खलु ॥ अमरैरपि संसार रोग सागर पीडितैः शिवनामौषधं पीतं तेन मुक्ताश्च ते तथा ॥९॥

59/2

कः संसारमहारोगसागरानपहारकः॥ शिवनामौषधं प्राप्य सकृद्वा भक्तिपूर्वकम्॥११॥ सकृदपि शिवनामरूपमेकं भसितयुतं परमौषधं स्मृतं वा॥ श्रु-
तमपि हरति प्रवाहभूतिरुजमघमूलमघानि कोटिशोऽपि॥१२॥ इति तद्वचनं श्रुत्वा यमः सन्तुष्टमानसः॥ चित्रगुप्तं विलोक्याह स तु कीदृश इत्य-
पि॥१३॥ चित्रगुप्त उवाच॥ यद्यदुक्तं कु(का)लदूतैः तत्सर्वमविशङ्कितम्॥ निष्कृतिस्त्वत्कृतापानां कदापि न भविष्यति॥१४॥ यावन्ति पापानि कृतानि तेन
तेषां न संख्याकरणं च शक्यम्॥ स्यात् सैकतानां गणनापि शक्या भूपांसुसंख्यापि ममैव शक्या॥१५॥ न तस्य फाले भसितं कदापि रुद्राक्षमाला न ग-
ले करे वा॥ कर्णप्रदेशेऽपि तथा च स (काल) पापमूर्तिः परिभावनीयः॥१६॥ न भाववार्तापि कदापि तेन कृता कृतान्तक नाम वार्ता॥ कृतान्यनन्तान्यपि
पातकानि॥ (?) विभूतिमात्रस्मरणेन तानि॥१७॥ नश्यन्ति तस्यां स्मरणं न तेन स्मृतं कदापि स्मरवैरिणः सा॥ न ब्रह्महत्यादिकपापराशेर्भीतिः कदा-
पि प्रलयेऽपि काल॥१८॥ यदि स्मरारिस्मरणं कदाचित्तत्तेन तावन्न कृतं क्षणं वा॥ श्रीकालकालस्मरणाग्निलेशात्क्षणेन पापामिततूलराशिः॥१९॥
विनश्यतीति स्मृतिरप्यपारा पापापहारप्रवणा श्रुता सा॥ पापान्यपाराणि लयं प्रयान्ति महेश्वराराधनचिन्तनेन॥२०॥ तत्तावदत्यद्भुतपापयो-
गान्न जायते कस्यचिदप्यभाग्यात्॥ कः शक्तो भुवि कर्तुमप्यघकुलं तावत्प्रयासेन वा यावन्नाशमुपैति शंकरपदध्यानेन वा तत्स्मृतेः॥ २२॥ तत्ता-
वत्सुलभं तथापि न करोत्यालस्यपापादिना तेनैव प्रविशन्ति घोरनिरयं संसारराशिं ततः॥२३॥ इत्याकर्ण्य यमोऽपि बहुधा वेदान्तवार्ताप्रियः
सन्तुष्टस्तमुवाच भाग्यनिलयः त्वं पावनोऽसीत्यपि॥ एतान् (ग) छिवपूजनादिमहिमा ज्ञातस्त्वया तावता धन्यो धन्यतमोऽसि मान्य इति मे मान्यातिमा

मान्योप्यसि ॥ २२ ॥ पापापारमहाराशितरणोपायः शिवाख्यास्मृतिः तद्दिव्यौषधमित्यवैमि बहुधा संसाररोगक्षये ॥ सा तावत्सुकृताम्बुराशितरणोपायः सुखांभोनिधिं साकर्तुं धनमेव साधनमपि प्राज्ञस्य पुण्यात्मनः ॥ २३ ॥ अद्यायं शिवदिव्य नाममहिमा तावच्छ्रुतो मुक्तिदो ब्रह्मानन्दद एव तेन भगवान् कालेक्षणस्तुष्यतु ॥ इत्युक्त्वा पुनरप्युवाच समुदा तं चित्रगुप्तं शिवे किं तत्पापविनाशकं किमपि किं तस्यास्ति किन्नेत्यपि ॥ २४ ॥ चित्रगुप्त उवाच ॥ स यत्रैव मृतस्तस्माद्दूरे शंकरमन्दिरम् ॥ बालबिल्वतरुस्तत्र तिष्ठत्येकं मनोहरम् ॥ २५ ॥ तदेव मन्दिरं तावत्सरोवरविराजितम् ॥ मंदारतरुसंकीर्णं वृन्दारकवरार्चितम् ॥ २६ ॥ अपारहारसंकीर्णं हारद्वारविराजितम् ॥ भूतिराशिसमाकीर्णं रुद्राक्षौघसमाश्रितम् ॥ २७ ॥ तत्र गन्तुं समुद्युक्तः कृत्वा गौरिसमर्चनम् ॥ दूरात्स कन्यया युक्तः शिवनाम स्मरन्मुहुः ॥ २८ ॥ तां कन्यामलसां दृष्ट्वा त्वया बाललीलया ॥ गन्तुमप्युद्यतमंब शिवे याहीति सादरम् ॥ २९ ॥ स शब्दस्तत्र वातेन सर्वपापविनाशकः ॥ वीचीन्यायेन तत्कर्णं प्राप पश्चान्मृतोऽपि सः ॥ १३० ॥ स शब्दस्त्रिक्षण स्थायी स तावन्नैव तिष्ठति ॥ यद्यप्यथापि शब्दान्यस्तज्जातीयो भविष्यति ॥ ३१ ॥ तस्मादपि पुनः कश्चित्तस्मादपि तथा भवेत् ॥ तज्जातीयत्वमेतेषां विच्युतं न च सर्वथा ॥ ३२ ॥ इति तद्वचनं श्रुत्वा त्वया समुपः शिवे ॥ ~~आश्चर्यं परमं ...~~ ॥ उत्थाय गन्तुमुद्युक्तः स यत्रास्ति मृतो नरः ॥ ३३ ॥ स गच्छन्वरुणोऽपि सह तद्देशमण्डलम् ॥ जलैः सम्पूरयामास तद्दुर्गन्धविनाशकैः ॥ ३४ ॥ ततस्तत्रगतः कालः तं प्रणम्य पुनः पुनः ॥ पूजयित्वा बिल्वपत्रैः ननर्त च सुरैः सह ॥ ३५ ॥ ततो विमाने संस्थाप्य तं तथा सहि

तं शिवे ॥ आश्चर्य्यं परमं प्राप चित्रगुप्तादिभिः सह ॥ ३६ ॥ तदानीमेव ते दृष्टाः कोटिशोऽपि महोरगाः ॥ संदश्य पुच्छभागास्ते दग्धास्य
रसना अपि ॥ ३७ ॥ तान्दृष्ट्वा विस्मयाविष्टाः ते सर्वेऽपि सुराः शिवे ॥ तदानीमागतो ब्रह्मा तं द्रष्टुं विष्णुना सह ॥ ३८ ॥ ततः प्रणम्य तं वि
ष्णुं यमः प्राह विचक्षणः ॥ किमेतदद्भुतं विष्णो वदेति प्रीतिपूर्वकम् ॥ ३९ ॥ विष्णुरुवाच ॥ शिवाख्या श्रुता तेन तत्पापराशिर्महासर्परूपेण
दग्धः प्रयाति ॥ अतः पुण्यवानेव सोऽयं महात्मा मया पूज्य एव त्वयाप्यन्त्यकाले ॥ ४० ॥ अनेनान्तकाले श्रुतं नाम शैवं तदेवाघकोटि
प्रणाशाय शक्तम् ॥ न तत्कृत्यमेतावदेवेति मन्ये शिवाग्रेऽपि नृत्यं करिष्यत्ययं हि ॥ ४१ ॥ अयं पुण्यवानस्यपुण्यस्य नान्तो यतो नाम दिव्यं
श्रुतं शांभवं हि ॥ कथं वा न धन्योऽपि पूज्यश्च देवैर्महद्भाग्यमेतस्य सौभाग्यमेवम् ॥ ४२ ॥ पुण्यानि सन्ति विविधानि तथापि किं तैरन्ते कृता
न्तभानि दुःखकराणि तानि ॥ पुण्ये प्रणाशमुपयाति पुनश्च गर्भे वासो भवत्यपि पुनर्मरणं जनिश्च ॥ ४३ ॥ एवं शङ्करनामरूपमनघं दि-
व्यास्त्रमत्यद्भुतम् ॥ तद्येन श्रुतमन्ततः स्मृतमपि ध्यातञ्च दैवात्सतु ॥ तेनैवाशु विनाशयत्यघकुलाकारान् रिपून् कोटिशः ॥ संसारामयल
क्षणं रिपुमपि स्वच्छन्दवृत्तिः स्वतः ॥ ४४ ॥ ध्यातं पुण्यमहां बुद्धिं जनयति ज्ञातं श्रुतं वा स्मृतं नामेदंयमशाम्भवं महदिदं शस्त्रं रिपूणां क्षये ॥
संसारामयरूपशत्रुविलयोपायः परं तत्पदं मुक्तिं दातुमपि प्रकामसकृद्वा सकृद्वा स्मृतम् ॥ ४५ ॥ एतं शङ्करनामरूपममतं सेव्यं सुरैः सर्वदा
पुण्यैः पुण्यसमाश्रयैः मुनिवरैः सिद्धैः फणीन्द्रादिभिः ॥ गन्धर्वैरपि किन्नरैरपि नरैः संसारभूरिव्यथाव्यर्थी यासकदर्थनाय बहुधा तत्तुल्य

मन्यत्तु न ॥४६॥ भक्तिश्चेत्समपेक्षिता शिवपदध्यानेरताः सन्ततं सन्तः सन्तु सहस्रशोऽपि निगमप्रोक्ताश्च धर्माः परम् ॥ किं तैर्मुक्तिरवाप्यते
यदि भवेत्स्वर्गः परं तैर्भवे दत्ते जन्म जरा च मृत्युरपि तैर्मुक्तिः कथं वा भवेत् ॥४७॥ ज्योतिष्टोमेनेति वाक्ये न तावत्स्वर्गकामो तत्फलं स्वर्ग एव ॥
ज्योतिष्टोमः तत्साधनं चेति तत्तो विज्ञानं चेत्तत्र मुक्तेः कथा का ॥ एतादृश्यानि वाक्यानि सन्ति तावद्बहून्यपि ॥ तादृशे मुक्तिवार्तापि सर्व
थान कृता खलु ॥४९॥ न ज्ञातोऽपि शिवाभिधानमहिमा वेदैर्मुनीन्द्रैर्मया सिद्धैर्वा परमिन्दुखण्डशिरसा ज्ञातः स तावद्यम ॥
तस्मिन्नेव शिखामणेरपि कृथा किं तेन तप्तं तपो तन्नामामृतवेदरत्नमिति तच्छ्रेष्ठञ्च वेदेष्वपि ॥५०॥ वेदास्तेऽपि शिवाभिधान
सहिताः पूताः परं पावनं मत्वा तं प्रवदन्ति तेऽपि बहुधा तन्नामसंकीर्तनम् ॥ कुर्वन्ति प्रणमन्ति वेदशिरसा रत्नं तदेवेत्यपि व्याहृत्या-
न्वह मादरेण बहुधा तत्प्रस्तुवन्त्यद्भुतम् ॥५१॥ सुलभं शिवनाम कीर्तनं तपसा तावदिदं विशेषतः ॥ अति दुर्लभमेव दुष्कृते सति तावन्म
हतामपि ध्रुवम् ॥५२॥ अर्भके यन्मधुतद्विहाय सुविपिनं यान्त्येव कं क्रीडया भिक्षुस्तद्वदघौघनाशकमुमाकान्ताभिधानामृतम् ॥ त्य
क्त्वा यान्ति वनानि तावदधुना कर्तुं तपः सन्ततम् ॥ व्यर्थायासफलाय गाढतिमिरे मूढाः पतन्त्येव हि ॥५३॥ यन्नामस्मरणादघौघ
विलयः सर्वापदां नाशनं संसारामय नाशनं च सुलभं तत्र श्रमः कोऽपि न ॥ तन्नामामृतपानमेव सततं कर्तव्यमित्यादरो लोके पुण्यव
तां परं भवति चेदन्यस्य नानादरः ॥५४॥ शिवस्मरणलालसं यदि भवेत्तदा मानसं पुनर्न जनि साध्वसं मरणसाध्वसं वा यम ॥ तत-

५१

स्तदमृतामृतं मृतजनस्य संजीवनम्॥ जरा मरण जन्मनामपि विनाशने साधनम्॥५६॥ इत्युक्तं तद्वचः श्रुत्वा यमः सन्तुष्टमानसः॥ त-
मेव पूजयामास विष्णुना ब्रह्मणा सह॥ तमुवाच ततो विष्णुः प्रणम्य शिरसा मुहुः॥ अर्चयित्वा बिल्वपत्रैः मन्दारकुसुमैरपि॥५७॥
विष्णुरुवाच॥ शिवाभिधानमरणक्षणे श्रुतं त्वया शिवानुग्रहपात्रभूतम्॥ मन्ये भवन्तं भगवन्तमेव त्वया न तुल्यो भुवनत्रयेऽपि॥५८॥
स्वच्छन्दवृत्त्या स्थितमेव पूर्वं तपः कृतं नो ग्रमघापनुत्यै॥ शिवाभिधानश्रवणेन सद्यो मुक्तोऽसि संसारमहांबुराशेः॥५९॥ कुर्वन्ति केचिद्गिरि-
कन्धरेषु दारान्विहायापि तथा कुमारान्॥ न तैरिदं प्राप्यमनन्तरायं शिवाभिधानं मरणक्षणेषु॥६०॥ अहो कृतार्थोऽसि शिवाभिधानं
श्रुतं यतो मोक्षविधानदक्षम्॥ साक्षाद्गिरिजाधवकृपाश्रयेण कालाक्षरूपोऽपि भविष्यसि त्वम्॥६१॥ अनायासेनेदं खलु फलमुमा-
कान्तकृपया त्वया प्राप्तं सत्यं मरणसमये शाम्भवमिदम्॥ श्रुतं नामानन्तामयविलयहेतुः शिवकृपा कथं वा त्वय्यासीदमितसुकृतानाम्
फलमिदम्॥६२॥ मनुष्याणां तावन्मरणसमये रोदनरवैः परं कालो याति प्रणयसहितानामपि दया॥ महादेवाख्यायाः सकृदपि न वो-
च्चारणमतिः वृथा हाहा हाहेत्यपि समय नाप्नोयतधियः॥६३॥ प्रयाणावसरेषु कण्ठभागे कफपित्तप्रभवे भवोद्भवस्य॥ स्मरणं शि-
वनामकीर्तनं वा न भवत्येव कदापि पापयोगात्॥६४॥ दारान्कुमारानपि वीक्ष्य तावन्मुमुर्षुरत्याहतोऽश्रुपूर्णः॥ रुदत्ययं न स्मरति स्मरा-
रिं न शाम्भवं नाम शृणोति दुष्टः॥६५॥ अन्तकालसमये सदाशिवध्यानमात्रमपि मुक्तिसाधनम्॥ तत्कथञ्चिदपि जायते नृणां शं-

करो यदि पुरा समर्चितः ॥६७॥ अन्तकाल विषये शिव स्मृतिर्भस्म धारणमघौघनाशनम् ॥ जायते खलु कथंचिदुच्चकैः नाम शांकरमतिश्रु
तं भवेत् ॥६८॥ भस्मोद्धूलित विग्रहोऽति विपुलां रुद्राक्षमालां वहन् कण्ठे कर्णयुगेऽपि शङ्करपदान्यप्युच्चरन्नादरात् ॥ दृष्ट्वा लिंगमनुत्त
मं मुहुरपि स्पृष्ट्वा च बिल्वीदलैः सम्पूज्याशु समर्पणञ्च कुरुते शंगाय शाङ्गोजनः ॥६९॥ शम्भो भर्ग भवेन्दु शेखर महादेवेति यः संवदन् ॥
रुद्राक्षामल भूति भूषित तनुः कृत्वा च लिङ्गार्चनम् ॥ शांगायाशु समर्पणञ्च कुरुते शांगः स शम्भुर्भवेत्तत्पादाम्बुजरेणुभिर्मम शिरः पूतम्भ
वत्वन्वहम् ॥ महाप्रयाणेषु महेशनाम श्रुतं स्मृतं वा यदि पुण्ययोगात् ॥ तदा स मुक्तो भवतीति मन्ये नान्यस्य मुक्तिः प्रलयेऽपि सत्यम् ॥७१
शपामि शिवपादयोः शिवपदस्मृते केवलं विमुक्तिरिति सा स्मृतिः भसित भूषणानां परम् ॥ भविष्यति भवान्वयो न भवतीति मन्ये पुनः
पुनः पुरहं भुजद्वयमिदम् समुधृत्यतु ॥७२॥ एतस्मिन्नन्तरे देवि मदीया अपि किंकराः ॥ विमानरत्नमारुह्य तमानेतुं गताः परे ॥७३॥
तदा तानागतान्दृष्ट्वा विष्णुर्ब्रह्मादयः सुराः ॥ कृताञ्जलिपुटाः सर्वे प्रणताश्च पुनः पुनः ॥७४॥ ततः परं तान्मुदितान्विलोक्य
दूतान् मदीयान् गिरिजे सुरास्ते ॥ ऊचुः क्व वा गम्यत इत्युपांशुर्कं पायमानाः शिरसा प्रणाम्य ॥७५॥ दूता ऊचुः ॥ अनेन मरण
क्षणे शिव पदं श्रुतं दैवतः प्रभूत बहु पुण्यवानयमभूच्छिवानुग्रहात् ॥ शिवान्तिकमयं सुराः सपदि नेय एवेदात विमानवरमा
श्रितः सुरगणाभिसेव्यो मुदा ॥७६॥ अपारकल्पेष्वपि येन तप्तं तपो भियोरं बहुवह्निमध्ये ॥ तस्यापि ताव महाप्रयाणे शिवाभि

६७

ल

धान श्रवणाधिकारः॥ अहो कृतार्थाः कतिचिन्महेश प्रसाद पात्रमुपेत्य धन्याः॥ कैलाश वासं समवाप्नुवन्ति पूज्याः सुराणामपि सर्वथापि॥ ७७॥ धनं परमिदं सुराः शिवपदं परं सम्परं विपत्कुल विनाशकं सकल पाप संहारकम्॥ स्मृतं सपदि पातकं हरति संश्रुतं वा मुदा ददाति शिवसन्निधिं निधिमपि प्रदत्वा मुहुः॥ ७८॥ अपारजननामयं हरति मृत्युवार्त्तादिकम् श्रुतं शिवपदं सुरा शिवपदांबुजानुग्रहात्॥ इतः किमधिकं धनं नवनिधि प्रदाने क्षमं विमोक्षस्मति प्रियं शिव पदार्चकानां सुराः॥ ७९॥ अतः परमिहाधुना खलु तथा विलम्बस्ततो विनेय इति निश्चये सति कथानुवादे खलम्॥ भवद्भिरपि पूजितो भवति सोऽयमत्यादरात्॥ इति प्रियतमे तदा शिवगणैः समाराधितः॥ ८०॥ ततः परं पुष्पकरत्नसंस्थं तमानयामासुरिहादरेण॥ समुक्त एवाशु शिवाभिधान माहात्म्यमेतच्छ्रुतमद्य गौरि॥ ८१॥ शिवनाम सुधा पानेन धन्याः कतिचित्तेगिरिजे ममापि मान्याः॥ इदमादरतोऽतिगोपनीयं मणिरेवायमहो महात्सु शैवैः॥ ८२॥ नन्दिकेश्वर उवाच॥ इति शंकर वाग्विहार लोला कमला पूजित पादपद्ममाला॥ शिवनाम सुधा प्रवाह लीला महिला कापि शिवस्य सा सुशीला॥ ८३॥ तस्मादन्यन्मुक्ति वीजं न विद्या लोके मुक्तिः शङ्करानुग्रहेण॥ तस्मादेकः शङ्करः शङ्करो मे सेव्यः सेव्यः सर्वदा सर्वदापि॥ ८४॥ इति तद्वचनं श्रुत्वा विश्वावसुरतिप्रियम् तुष्टाव नान्दिकेशं तं शिवभक्तवरं सुरा॥ ८५॥ विश्वावसुरुवाच॥ धन्योसि मान्योसि गणाग्रगण्य विश्वेश्वराराधन तत्परोऽसि॥ त्वत्पाद पद्मार्चनतोऽपि मुक्तिः संभाविता स्याद्गिरिश प्रसादात्॥ शंकराङ्घ्रि कमलार्चनादपि प्रीत एव भगवानुमापतिः॥ शांकरेषु खलु तस्य सर्वथा प्रीति

रेव गिरिशः शम्भवः ॥ ८६ ॥ समर्चितः स्याद्यदि शाम्भवस्तदा साक्षान्महेशोऽपि समर्चितः स्यात् ॥ ईशाभिमानः खलु शाम्भवेषु ते दु-
र्लभाः किं शिवयोगिनो न ॥ ८७ ॥ धन्यास्ते शिवयोगिनः शिवपदांभोजार्चनाराधनध्यानानन्दरसप्रसाधनपराः संसारवातीरसाः
तेषां पूजनमेव तावदधुना संसारदुःखापहं तत्सङ्गः खलु शाङ्गमङ्गलकथापीयूषधारार्णवः ॥ ८८ ॥ अहो विचित्रं खलु शाम्भवाना-
ञ्चरित्रमत्यद्भुतमप्यचिन्त्यम् ॥ चित्रं किमत्रास्ति पवित्रवार्तां करोति तावत्परमं पवित्रम् ॥ ८९ ॥ कः शङ्करार्चनपरो न सुरो नरोऽपि स
र्वे सुराः अपि तदङ्घ्रिसमर्चनेन ॥ धन्या भवंति बहवो भुवि शाम्भवाः किं वीरेश्वरार्चनपरः खलु कोऽपि शोकः ॥ ९० ॥ वीरेश्वरा
नुग्रहपात्रमेकः स बाल्यमारभ्य शिवार्चकः सन् ॥ वयः शिवाराधनसाधनेषु परं चकारामरहारधीरः ॥ ९१ ॥ भवानि हे को भगवत्प्र
सादादभ्यागतो मत्सुकृतैरपारैः ॥ त्वया तु तावद्गिरिशार्चनाय समागतं पावयितुं गृहं मे ॥ ९२ ॥ अस्माकं ग्रहमेधितापि बहुधा त्वत्पा-
दसंक्षालनात् तत्प्रक्षालनजातपुण्यसलिलासेकोऽनुपानादिना ॥ त्वत्पादाम्बुजरेणुभिः परमिदं सद्मापि मे पावनं महं शोध्यति
पावनः खलु महान् त्वं शाम्भवो दुर्लभः ॥ ९३ ॥ मनागपि तथा पुरा शिवकथासुधासागरश्रुतश्रवणपावनश्रवणपात्रपीतो मु
हुः ॥ अतः परमहं मुदा गिरिशपादपद्मार्चनं करोमि करुणानिधे शिवपदाम्बुजाराधक ॥ ९४ ॥ श्रोत्रं पवित्रं मम जातमद्य गा
त्रं मदीयं सुतरां पवित्रम् ॥ त्वदुक्तविश्वेश(कृपा)सुधाब्धितरंगमालाकलितोऽहमेव ॥ ९५ ॥ जन्मान्यतीतानि न हूनि तेषु महेश्व

रामार[illegible] कथा सुधाब्धिः ॥ नाकर्णितो नाप्यनु संहितो वा नावर्तितो मृतत्व सिद्ध्यै ॥ ७६ ॥ किन्तैर्वे जन्मभिरप्यपार तरुणी संसार वार्ता रस व्यग्रैरपराध कोटि सहितैः पुः शंकरो नार्चितः ॥ नध्यातोऽपि न च श्रुतोऽपि नयने दृष्टोऽपि कष्टार्णवादुद्धर्तुं स समर्थ इत्यनुदिनं नाराधितो वैभवैः ॥ ७७ ॥ ब्रह्माद्यैरपि यत्पदाम्बुज रजः पूजार्थमत्यद्भुतं तप्तं घोरतरं तपोऽपि बहुधा धर्माः कृताः कोटिशः ॥ तत्पादस्मरणं कदापि न कृतं दारैः परं वञ्चितः ॥ भोगैरप्यमितैरतः परमहं पूतस्त्वदालोकनात् ॥ ७८ ॥ अद्यागत्य महेश्वरामृत कथा पीयूषधारा परा दत्ता सा त्वदनुग्रहेण सततं संरक्षणीयं मया ॥ सेयं कण्ठमणिर्ममास्तु कथिते यैर्यैः श्रुता सा कथा ते सर्वेऽपि शिवाभिधान सुधया मुक्ता समं तादृशे ॥ ७९ ॥ इति श्री शिवरहस्ये हराख्ये तृतीयांशे उत्तरार्धे याज्ञवल्क्य जनक संवादे नाम विंशोऽध्यायः ॥ २० ॥ याज्ञवल्क्य उवाच ॥ इति तद्वचनं श्रुत्वा राज्ञी सन्तुष्ट मानसा ॥ राजानमाह विनता प्रणम्य च पुनः पुनः ॥ १ ॥ राजन् गुरुर्मम भवानिह तत्त्वबोध स्त्वत्तो ममाभवदतः परमादरेण ॥ मय्यद्य तावदधुनैव दया विधेया विद्यापि मोक्षवरदा परमात्र देया ॥ २ ॥ इति तद्वचनं श्रुत्वा राजा प्रीतमानसः ॥ साचीकृत्य मुखं प्राह साचीकृत्य मुखाम्बुजम् ॥ ३ ॥ राजोवाच ॥ त्वरयात्र न ते कृत्यं मनः परिणतं ततो ॥ कालान्तरे भावि भावि शिवयोग समागमे ॥ ४ ॥ अधुना मन्दिरे तावत्तान्तथ्यं सत्वरं त्वया ॥ अवलम्बेन भर्तापि कुपिता स्यात्तवान्यथा ॥ ५ ॥ यादृशास्त्वा रघ्रीवास्तु भर्ता न रोमिरादरात् ॥ यतो नु सर्वं यायो नतत्यागस्तवो चेतः ॥ ६ ॥ यावज्जीवतिभर्ता

पितावत्सेव्यः समादरम् ॥ मृते तस्मिन्तेन सार्कं मरणन्तु तवोचितम् ॥ ७ ॥ तेनानुगमनेनैव तव स्वर्गो भविष्यति ॥ तस्यापीति त्वया तावत्
कार्य्यं तत्सेवनं मुदा ॥ ८ ॥ अयन्तु कुल नारीणां धर्मो धर्मे विपर्ययः ॥ न कर्तव्यो न कर्तव्यो यतस्तत्पाप साधनम् ॥ ९ ॥ इति तद्वचनं श्रुत्वा
राज्ञी दुःख समाकुला ॥ अश्रु संकीर्ण नयना तमुवाच नतानना ॥ १० ॥ राज्युवाच ॥ योऽयमुक्तस्त्वया धर्मः केवलं पुण्य भर्तरि ॥ मृतेन गमनं तत्तु
पतितेन न सर्वथा ॥ ११ ॥ मद्यपानादिभिः पापैः भर्ता चेत्पतितो मृतः ॥ तेनाप्यनुगमनं कार्यमिति शास्त्रन्न दृश्यते ॥ १२ उद्धूलनं त्रिपुण्ड्रं च द्वि
जैः कार्यमहर्निशम् ॥ तत्यागे पतितो भूयात् इति वेद श्रुतिः खलु ॥ १३ ॥ लिङ्गार्चन परित्यागात्पतितो भवतीत्यपि ॥ वेदाः श्रुतास्ततस्तेन
सहानुगमनं कथम् ॥ १४ ॥ महापातक राशीनां अभ्यासात्पतितो यथा ॥ तथा शिवार्चन त्यागात्पतितोऽपि भवेन्नरः ॥ १५ ॥ पतितेनान्वय
स्तावत्पातित्याय भविष्यति ॥ समे पातित्य सम्पत्तिः सर्वथाप्यनपेक्षिता ॥ १६ ॥ पतितम्पतिमुत्सृज्य व्यभिचारं विहाय च ॥ स्थात
व्यमिति नारीणां धर्मोऽयं परमो मतः ॥ १७ ॥ किञ्च तद्वार्तया किं वा फलं तदनृतोपमम् ॥ चिन्तनीयामतिस्तावन्मम सर्वात्मना खलु ॥
॥ १८ ॥ इष्ट साधनता ज्ञानं सामान्येन प्रवर्तकम् ॥ अनिष्ट साधन ज्ञानाद्बालकोऽपि न वर्तते ॥ १९ ॥ बालो [illegible]ऽग्निमेकदा स्पृष्ट्वा
पुनः स्पृष्टुन्न वाञ्छति ॥ ततोप्यहं कथं मूढा तन्मूढत्वञ्च निर्गतम् ॥ २० ॥ किञ्चानुगमनेतेन जन्म तावत् वृथा भवेत् ॥ भर्तुश्च मृत
कल्पस्य सेवयापि न मे फलम् ॥ २१ ॥ मृतकल्प इतिज्ञेयः पतितस्तु पतिस्ततः ॥ न तेन रोचते सङ्गः कुत्सितत्वेन निश्चये ॥

शिवरह०३ मया जन्म समासाद्य शिवो नाराधितः खलु ॥ तदारा धनहीनानां जन्म तावन्निरर्थकम् ॥२३॥ लिङ्गं करसरोजेन न स्पृष्टमपि सादरम् ॥ त०
७८ न चन्दनेनानुलिप्तं कस्तूरीसहितेन तत् ॥२४॥ नव बिल्वदलैः शंभो लिङ्गरूपो न पूजितः ॥ पञ्चामृतैश्च शंभो वा लिङ्गं नाभ्यर्चितं खलु ह०३० अ०२१
२५॥ क्षीरसंपूर्णकलशो नोत्धृतोऽपि करबलान्मया ॥ शिवलिङ्गाभिषेकाय तेनाभूद्विफलः करः ॥२६॥ पक्वान्नानि च विनायामि मधुराणि कृतानि नो ॥
नार्पितानि कराभ्यां तान्युमाकान्ताय सादरम् ॥२७॥ करपद्माभिनयनैः न नाट्यञ्च कृतं मुदा ॥ शिवालये मार्जनं च करेण न कृतं खलु ॥२८
वीणामादाय विमलां विपुलां गिरिशालये ॥ न गानञ्च कृतं सम्यक् गतं जन्म निरर्थकम् ॥२९॥ न ध्यातं मनसा महेश्वरपदांभोजं मुहु
र्मानसैर्व्यापारैरपि सुन्दरैर्विरचिता पूजा न शर्वाय सा ॥ सर्वापद्विनिवारणाय सकलाभीष्टार्थसिद्ध्यै सदा किं कर्तव्यमतः परं जनिज
रारोगव्यपायः कथम् ॥३०॥ सरोजदलसन्निभं नयनयुग्ममेतद्वृथा बहुप्रसवपूजितं न शिवलिङ्गमुद्वीक्षितम् ॥ ***रयोऽपि न निरीक्षि
तः शिवमहोत्सवः शांभवो विभाति कृतभूषणो नयनगोचरो नादरात् ॥३१॥ हारोपहार संसारविवेकहेतुर्जिह्वापि नौति न तया शिवना
मवादः ॥ स तावदस्य विषतामुपयाति नूनं कृत्यं न यानहसेत्यापि भारहेतुः ॥३२॥ कर्णाभ्यान्न सदा शिवार्चनकथापीयूषपानं
कृतं मूर्ध्नान प्रणतोऽपि शैलतनयाकान्तो मुहुः सादरम् ॥ यन्नासीत् गिरिशार्चनाय तदभूत्सर्वं वृथा सर्वथा हा हन्तान्तकवार्तया
पि सततं चिन्तापरं जायते ॥३३॥ अपार रत्नैरपि हारमन्दिरं कृतन्न सौवर्णमणीभिमण्डितम् ॥ सरत्नकोशोऽपि वृथैव जातः

सुवर्णकोशोप्ययमितीवृथैव ॥ एवमुक्त्वा स्थिताराज्ञी तदानीमागतोनृपः ॥ तस्यास्तुभर्तासस्सुतो मुमूर्षु र्व्रणपीडितः ॥ ३५ ॥ तदासाभूपं दृष्ट्वा दूरेण व्रणपीडि
तं ॥ दुष्टैः स्वभृत्यैरानीतमाक्रम्यनगरंपरम् ॥ तद्भृत्यैः ताडितः शूरैर्बद्धः पाशैः सभूपतिः ॥ कोलाहलसमाक्रान्तोभर्त्सितोपिमुहुर्मुहुः ॥ ३७ ॥ ततः संराजा वहिर्गम
तोपि किमेवमासीदितिविस्मितः सन् ॥ पश्चादमात्यैः प्राप्तोति भक्त्या शूरैः कुमारैरतिदूरतोसौ ॥ ३८ ॥ पृष्टास्तेमंत्रिणस्तेन कोसाविति तदमूचिरे ॥ भिल्ल
पद्गणराजायमशांभववैरीनृप ॥ ३९ ॥ अयं दुरात्मा दुर्बुद्धिः भिल्लराजविशेषतः ॥ पुरं गृहीतमस्माभिरेतस्याद्यदुरात्मनः ॥ ४० ॥ अस्मदीयैः कथं तस्य नगरस्य
च रक्षणं ॥ सुवर्णकोशसंवीतं रत्नकोशसमन्वितम् ॥ ४१ ॥ अयंतु सर्वदास्वामिन् शिवयात्रानिरोधकः ॥ शिवयात्रारतद्रव्यमनेनापहृतं मुहुः ॥ ४२ ॥ सर्वदातरु
णीसक्तः शिवपूजाविवर्जितः ॥ त्वयिसासीति भूलोके किमयंस्थातुमर्हति ॥ ४३ ॥ नभूलोके रिपुः कोपि तव भूपालसत्तम ॥ उपेक्षितोयंतुच्छत्वादूक्षणीयोनसर्वथा ॥
४४ ॥ किंच भूमंडले राजन् शिवाचारविवर्जितः ॥ अयमेकः सनगरे नगरे न शिवालयः ॥ ४५ ॥ धिग्धिग्धिक् नगरं धिग्धिक् न यत्र शिवमन्दिरम् ॥ धिग्धिग्धिक्
जनतासोपि नयस्यां शंकरे रतिः ॥ ४६ ॥ पश्यपश्यमनोज्ञानि सुवर्णाभरणान्यपि ॥ एकोपि तेषु रुद्राक्षो नास्ति भूपालपावनः ॥ ४७ ॥ रुद्राक्षहीनाभरणानियानि तानि स्वभावेन नमंडनाय ॥
किंमंडनै [illegible] सूत्रहीनैः प्रचंडरण्डाभरणैर्विचित्रैः ॥ ४८ ॥ इति तद्वचनं श्रुत्वास्मृत्वा शंकरमादरात् ॥ पुनर्विशेषत्वरया तदेव शिवमंदिरम् ॥ ४९ ॥ तत्र दृष्ट्वा महादेवं लिंगरूपमनुत्तमं ॥
प्रणम्य बहुधास्तुत्वा शिवध्यानरतोनृपः ॥ ५० ॥ ततः सभिल्लराजातु ताडितोपिमृतस्ततः ॥ सावार्तातेनराज्ञापि श्रुत्वा तद्भार्ययापिसा ॥ ५१ ॥ ततः परंच साराज्ञी प्रणतातंनृपोत्तमम् ॥ पाहि पाहि
ति पाहीति खिन्नाननविलोचना ॥ ५२ ॥ ततस्ताहराजापि खेदं माकुरु माकुरु ॥ तवाभिलषितंभाविमयागम्यतइत्यपि ॥ ५३ ॥ मासानन्तरमत्रैव पुनरागम्यतेमया ॥ तावद्वसात्रनियमैः अस
त्वाशंकरालयं ॥ ५४ ॥ इति तद्वचनं श्रुत्वा तमप्युक्त्वातथास्त्विति ॥ उवासोद्यानभूदेशे राजा नगरं स्व ययौ ॥ ५५ ॥ पुत्रपौत्रादि संयुक्तो दारैरपि समावृतः ॥

शिवरह०
५०

निजं नगरमासाद्य शिवार्चनरतोभवत् ॥५६॥ ततः कालेन सा राज्ञी सूत कान्ते शिवार्चनम् ॥ कृत्वा स्थिता निराहारा भस्मभू-
षितविग्रहा ॥५७॥ तस्याः सपत्न्याः ताः सर्वाः सदा भर्तृवियोगतः ॥ दुःखिता ससुताएवस्थितास्तत्र वनाद्वहिः ॥५८॥ ततः शिवरतां दृष्ट्वा तां सपत्न्यः सुता अपि ॥
तदेव व्रतमाश्रित्य स्थिताह्यवतदाज्ञया ॥५९॥ त्रिपुण्ड रुद्राक्षधराः सर्वास्ताःशिवपूजने ॥ उद्यताएव सततं भस्मोद्धूलितविग्रहाः ॥६०॥
ततः परं सराजापि सत्यव्रतपरायणः ॥ तदुद्यान वनं प्राप वृतः परिजनैर्मितैः ॥६१॥ तत्रागत्य सरस्तीरे स्नात्वा भूतिविभूषणः ॥ चकार पूजनं शं-
भोः बिल्वपत्रादिभिर्मुदा ॥६२॥ ततोददर्श तां राज्ञीं भूति रुद्राक्षभूषणां ॥ शनैः शिव शिवेत्युक्त्वा स्थितामतिकृशामपि ॥६३॥ ततः परं सपत्न्य-
श्च तस्यास्ता वत्समागताः ॥ पुत्राश्च तासां रुद्राक्षैः भस्मना च विभूषिताः ॥६४॥ शिव शंकर विश्वेश पाहि पाहीत्यनुक्षणम् ॥ वदंत एव तत्रारात्तत्पुत्रा-
श्च समागताः ॥६५॥ तान्दृष्ट्वा सोपि भूपालो विस्मितः शिवतत्परान् ॥ ते सर्वे प्रणतास्तस्मै पाहि पाहीति (सत्वरम्) ॥६६॥ सापि राज्ञी निराहारा कृशा तं प्रणतानृपम् ॥ ता-
माह राजा विनतां क्व प्रीतिरितिसादरम् ॥६७॥ राज्ञ्युवाच ॥ प्रीतिर्महादेवपदारविन्दध्यानार्चनादौ नृपसर्वधाम्नि ॥ अतः परं किममकार्यमस्ति कृत्यं महेशेन कृतं विशेषात् ॥६८॥
॥ राजोवाच ॥ त्वं तावदंतः पुरवासयोग्या स्थितिर्वनेतेवनिः॥ तासि यस्मात् ॥ आयाहि नित्यं शिवपूजनाय पुरं प्रयाहि त्वरयाकिमत्र ॥६९॥ ॥ राज्ञ्युवाच ॥ कदारेवा-
तीरे रुरुनिकरबालातिरुचिरे चिरं तुङ्गं लिङ्गं नवरुचिर दूर्वांकुरजलैः ॥ समाराध्यध्यात्वा सितभसितपूता शिव शिव ॥ महेशेतित्यक्ष्ये तनुमिति मम प्रीतिरनि-
शं ॥७०॥ अतः परमुमापतिस्मरणमेवमेजीवनं विभूतिपरिवेष्टितातनुरियं त्रिपुंड्राङ्किता ॥ महेश्वर सम र्चनस्मरणसाधनं मन्मनः शिवार्पणमिदं कृतं नृपशपा-
मि शंभोः पदे ॥७१॥ सुधाकर शिलातले कुमुदगंधमन्दानिले प्रफुल्लकमलामले तुहिनमण्डले शीतले ॥ प्रचण्डकरजानलज्वलित सूर कान्ते पिवानमे
मतिरुमापतिस्मृतिसुधारसास्वादने ॥७२॥ प्रासादे तुहिनांशुकान्तविशदे मन्दारकुन्दच्छदस्वच्छन्दे क्षुरगो क्षुरव्यतिकरक्षा ~~सौम्ये सेवा~~-
रेपरे वा स्थितिः ॥ अस्तु न्यस्त समस्त वस्तु विषयापेक्षस्य किन्त्वावता चेतः सन्ततमन्तकान्तक ~~मुमु~~ मुमाकान्तं चिरं चिन्तये ॥७३॥

ह०लू०उ०
अ०२१

किमस्मिन् संसारे स्मरहर विहारा कर पुर प्रकारव्याहार प्रवर पर हारनुशरणम् ॥ खल: कालो नेय: कथमपि किलायं न कमला विलासानामाशां हर हर दयासा-
गरहरे ॥७४॥ निर्बन्धोऽपि गतो गत: पतिरत: संसार वार्त्ता गता तात: कोऽपि गतागतार्ति विगत: प्रांतिर्गता तावता ॥ चित्तं मत्त कृतान्त
दूत वचन व्यापार दूनं यथा न स्यादेव तथा विधेयमधुना विश्वेश्वर ध्यानत: ॥७५॥ दैनं दिनं प्रलयकाल भयं गतं मे सोमावतंस चरण स्मरणा
दरेण ॥ एतावता स्मि कृत कृत्यतमा किमस्ति कृत्यञ्च तावदधुना न च जीवितस्य ॥७६॥ प्रयातु स शिवं मन: शिवपदांबुजाराधनम् ॥ करोतु म-
म दुर्दशामपि निवेद्य स: पुन: ॥ पुनर्न जनिजं रुजं हरसि किं हराराधितो हर: परतरं सुखं वितरतीति तत्वं वद ॥७७॥ रेरे मन: शिव पदाब्जरस:
प्रसारं संसारभार परिहार करं परत्वम् ॥ दृष्टापि तावदधुना पुनरेहि मोहं हित्वा मुहुर्मुहुरुपेहि हराङ्घ्रिपद्मम् ॥७८॥ रेरे मन: पश्य शिवा
ङ्घ्रि पद्मं तत्रैव हिहार स्थलमुत्तमं ते ॥ तत्रैव तावद्बस वासुदेव नेत्राम्बुजं तिष्ठति तेन साकम् ॥७९॥ नारायणेनापि शिवाङ्घ्रि पद्मे समर्पि
तं नेत्रमतो मयापि ॥ समर्पितं चित्तमत: प्रयाहि तदेव गौरीरमणाङ्घ्रि पद्मं ॥८०॥ दैवास्थितिः शंकर पाद पद्मे सदा मनस्ते यदि तावतामे ॥
संसार घोरामित दुर्दशापि निवेदनीया समये सतीति ॥८१॥ अहो नरकभाजनं कथमहं भवामि त्वयि प्रिये मनसि संस्थिते स्मरहराङ्घ्रि
पङ्केरुहे ॥ त्वया सह समागमे मम किलापहार श्रमो न किन्तु शुभसंपदामुपगमो भवत्यन्वहम् ॥८२॥ मन: सत्यां वाणीं शृणु शृणु परंश्रा
न्त विगमे महोदारं धीरं हरमनुसरापार करुणम् ॥ मुहुर्मन्दं मन्दं वद हरहरापार करुणा रसासारासिक्तं कुरु कुरु मुहु: सत्वरमिति ॥८३॥ मरणा
वसरे न कोऽपि तावत्परिहर्ता मरणक्षण व्यथानाम् ॥ इति सन्ततमन्तकान्तकं परमंत: करणाश्रयोदरात् ॥८४॥ मरणो हित कृत्य कोऽपि ते कृत

60

पुण्यस्य हरार्चनं परम् ॥ हितकारकमित्यतः परं हरमेवानुसरादराद्धरम् ॥ ८५ ॥ कुमारे रुद्रौ नंदीश्वरे च कृत्यं मम प्राय निर्याणकालेषु वेलम् ॥ महाकालकाल स्मरारे हरेति स्मरापार गर्वापहारं वदाशु ॥ ८६ ॥ दयासागरापार पापापहार स्मरारे मदीयापराधान् क्षमस्व ॥ तथा च तद्दूराया विमुक्तं कुरुष्व त्वरा एतावदहो विधेया ॥ ८७ ॥ प्रयच्छाच्छ मोक्षं महोक्षध्वजाशु प्रपश्य प्रपश्येति शम्भुं वदाशु ॥ अहो हेतुमेते प्रवृत्ताः प्रमत्ताः कृतान्तस्य दूताः कृतान्तोऽपि याति ॥ ८८ ॥ समाने नु मे वो हृतौ नन्दिकेतो प्रपश्येति पाहीति तावद्वदाशु ॥ न कोऽप्यस्ति पाता त्वदन्यो न दाता ममान्त्यापवर्गस्य स्वर्गादि हेतोः ॥ ८९ ॥ दयावेक्षयेनाशु पश्य प्रपश्य विशेषात् इमां मोचयार्यातकाल त्वम् ॥ महाकालदूत प्रचण्डाट्टहासैः परन्तासवो यान्ति किं तानमत्तः ॥ ९० ॥ अतस्तेन दूरेतरां यान्ति शान्ता स्त्वयानुग्रहे तावदुग्रं प्रयान्ति अकस्मान्नयन्त्येव ते तात यावन्न तावत्प्रपश्यादरादिन्दुमौले ॥ ९१ ॥ त्वदालोकनेनैव ते यान्ति दूरं मम प्राय वायु प्रयाणे प्रसक्ते ॥ अखर्व गर्वामित दर्पसर्प मूर्खेषु दूताः खलु पातयन्ति ॥ तथा च तद्दर्शनया विमुक्तं कुरुष्व एतावदहो विधेया ॥ ९२ ॥ त्वदुत्सन्न दुःखापहार स्वयापास्यात ममेशान पाहि प्रपन्नं प्रसन्नः ॥ प्रपन्नार्ति संहार हेतुस्त्वमेकस्त्वदन्यो न कोऽप्यस्ति लोकत्रयेऽपि ॥ ९३ ॥ आशा मां तुच्छ पुच्छ व्यतिकरविलसद्वृश्चिक व्याप्तमार्गे ते दूताः पातयित्वा धरद्युगलमहापाशबद्धान्नयन्ति ॥ भीतावत्पातयन्ति प्रतपन धामितं राष्ट्रमध्ये प्रमध्ये वध्यं मत्वा विरित्याक्षणमपि करुणां पाहि शंभो विलोकय ॥ ९४ ॥ कालरात्रिस्तिष्ठतु दूरतो यम

भयास्तावन्नरन्त्यन्वहं यावन्नो यत एव तावदसकृत्संतप्तशैलाहतान् ॥ कुर्वन्त्येव ततो विलोकय दयादृष्ट्या तथा केवलम् ॥

ते दूताः प्रलयं प्रयान्तु कृपया शम्भो तवैवाधुना ॥ ९६ ॥ संतप्तामित लोहकण्टकयुते मार्गे नयन्त्याशु ते तेषां तात निवारकोऽपि

नरकादुत्तारको वा मितः ॥ तं तावद्यमशासकोऽपि कृपया पश्येति चक्षोऽप्यनैस्तं कालं कलयानु वेलमर्त्यं तं काल कालं वद ॥ ९७ ॥

वद वद वदयेत्यापाहि पाहीति मत्वा शिव शिव शिव एवं कालदण्डं विदित्वा ॥ भयमपि बहु हित्वा सावदत्वाशु नत्वा शिवशिव [शिव]

राजं चिन्तयित्वा महेशम् ॥ ९८ ॥ न कोऽपि खलु रक्षकः त्वयि सति दिशि दुर्लभा कथं मम महाप्रभो भवभवाभयं देहि मे ॥ अना

गसमिवादरात् ॥ दृशा विलोकयाद्याधुना कृतागसमपि प्रभुः प्रणतमाशु दृष्ट्वा वति ॥ ९९ ॥

मनः सततमम्बिका रमया पाद पंकेरुहं महार्हमति दुःसहामिति महापदां नाशकम् ॥ भजानघ मुहुर्मुहुर्महेश्वरेत्यादराद्दामदमदे

न किं मदन दुर्दशावर्धकम् ॥ १०० ॥ अपार करुणारसं गिरिकुमारिकालिङ्गन प्रकल्पितमहोरसं स्मरविहारहारालसम् ॥ शिवानुस

रणार्हण प्रवण वीक्षणे लालसं प्रपततु मम मानसं विधुकलावतंसं मुहुः ॥ १ ॥ सर्पे सर्पे वा गुणमणिगणे वा विश्व रणे व्रजे

वा भूणे वा कुमुदसदने वास पवने ॥ वने क्षीरे वा गरल गरले वाति सरले कथं चित्तं मत्तं वद मदन संहारक विभो ॥ २ ॥ अमित्रे मि

त्रे वा मदन कदने वा कुकदले कुवृक्षे द्राक्षे वा कुदल करतालं व कदलौ ॥ सपर्ये पर्ये वा विषदयसरे वा कुवसनं कथं चित्तम्

मत्तम्०॥३॥अरण्ये रण्ये वा मुनिवरकुले वा निजकुले ॥ऽप्यकाले काले वा मरण समये वा सुसमये ॥ विषे वापी यूथे प्रदरकर देवापि च
द्रे
लक्षे कथं चित्तं मत्तं नद मदन संहारक विभो ॥४॥ धराधर प्रवर सुन्दर सम्वरां तम् नृत्यं मयूरा गिरि कंधर कंदलानि ॥ विद्युल्लतादृत दिगन्तम-
पि प्रपश्यन् शैवो युवापि पथिकोऽपि न मोहमेति ॥५॥ चेताश्चिन्तय चिन्तयान्तकभयग्रस्तास्तु नामा सकृत्स्वास्ति स्वास्तिमति स्तव मुहुर्व्य
स्तेषु वस्तुष्वपि ॥ कालोऽसौ यदि काल काल कलनात्तर्हि स्वकालेऽप्ययं कालत्वं विजहाति हन्त सततं काल कालं भज ॥६॥ स्मरहरं हरं
पदं त्रिपुर वैरिणो नुष्मयं परं चरण पङ्कजं न निज राम्मृति व्यत्ययम् ॥७॥ करोति न सकृत्स्मृतं किमत एव गौरीकर प्रवाल कमलामलक्रविसम
र्चितं सादरम् ॥ किमस्माकं लोके शरणमगजाभ्यर्चितपदं महादेवं हित्वा शरणममराणामपि सदा ॥ ८ ॥ तमेवाहुस्तावच्छरणमसुराणामपि
नृणां तथा गन्धर्वाणामपि विदितमेवामरनुतम् ॥ अनभ्यस्ते मार्गे यम भट गणाकीर्ण तरुण ज्वलज्ज्वाला कार चिर तरवरो रुः सरयुते ॥९॥
अपारे संसारे कथमिति कथंचित्स्मरहरं स्मराप स्माराणामनुसरणमुत्सृज्य च मनः ॥ सहायो नास्माकं ~~तस्मिन्भवति भगवन् काल नयने~~
~~[illegible]~~ यमसदन मार्गेति कठिने महाव्याधि बाध व्यथितजन जात व्याधिके ॥१०॥ महाज्वालाकीर्णे जलम
पि न तत्रास्ति विमलं किमस्माकं तस्मिन्भवति भगवन् कालनयने ॥ उमा सहायो न सहाय भूतो यस्यैव तस्यापि कुतः सुखं स्यात् ॥
अतः सुखायायमुमासहायः सहाय भूतः पथि चिन्तनीयः ॥११॥ न मित्र वार्तापि न पुत्र वार्ता कलत्र वार्तापि न यत्र तत्र ॥

गन्तव्यमेवेति सहायभूतमुमासहायं परिकल्पयामः॥ श्रुतः सगौरी स्मयोऽपि मार्गे दुर्गेनु यातीति मुहुः स्मरामि॥ स्मरारिमेव त्रिपुरारिनाम
स्मरन्ति सन्तस्त्रिभुवनेव सन्तः॥१२॥ अद्यापि नाशां विजहाति देहे कथं महाभूतलयेऽपि काले॥ न काल काल स्मरणं प्रवीणं किमेतदन्तःकरणं क्षणं
वा॥१३॥ यः कालकालं कलयत्यकाले कालोऽपि वा कालभयं विहाय॥ स कालकालं समुपेत्य किं मे कालः करिष्य[illegible]त्यपि सानुभूतम्॥
॥१४॥ अहो मायाजालं परिहर महादेव शरणं प्रपन्नोऽहं भक्त्या हरचरणपंकेरुहमतः॥ क्व चायं संमोहः क्व च शिवपदाम्भोजभजनं महा
पत्काले वा कथमपि न दुःखं शिवमते॥१५॥ प्रपच्छति स्वच्छां शिव शिव पदे च्छाम सुलभां मतुच्छाम च्छाये जनपदविहीने सदहने॥
न गन्तुं शक्तिर्मे यमसदनदावाध्वनि वरैः कुमारैर्दारैर्वा न कृतमहहा मेनुसरणम्॥१६॥ वृथा जातमेतत्कथं वा मनो मे वने वा वने वा
वनैर्वा नितान्तम्॥ उमाकान्त लिंगं न सक्तं न दत्तं प्रसूनं जलं वा नवं बिल्वपत्रम्॥१७॥ तत्रपामात्रहीनं मनः किं ममेदं स्मरारातिचि
न्ताविहीनं क्षणं वा॥ शरण्यान्तरन्नेति निश्चित्य पश्चान्महाकालदूताद्भुताट्टहासम्॥१८॥ मनः पततु पावके यदि पुनः पुनः संततं म
स्मरत्यपि न भक्तितः स्मरहराङ्घ्रिपंकेरुहम्॥ महापदि कदापि वा स्मृतमुमासहायः स्फुरन्मनोहरपदाम्बुजं रहसि रंहसा सा
दरम्॥ परदारमनोहरोदरव्यभिचारादरमेव कातरम्॥ अनुवारमतः परं कथं ज्वलनायाप्यवदानमीदृशम्॥२०॥ लोकेन
कोऽपि कुतर्कपरलोकशोकनिर्वापणाय यतते सततं सदारः॥ भूभार एव सभराधरवद्विहारो हारेण साकमसकृत्सकृ

दिन्दुमौले ॥२१॥ नहीरदौर्वा रुचिकर कुमौरपि धनैः। फलं याम्ये मार्गे शिवभजनमेकं शरणदं ॥ अतः कृत्यं तावत्तव भवतु चेतश्चिरमिदं शिवध्यानं
तेन स्मरहर पदावाप्ति रधुना ॥२२॥ असकृन्नदुदीरितं त्वया न कृतं तेन कृपात्र चापि वा। तदिदं दुर दृष्टमेव तेन च दृष्टं गिरिशांघ्रि पङ्कजं ॥२३॥ रेरे मन
श्चिर मुमा रमणं सहायेन क्वापि भीतिरतावत मेव भक्त्या ॥ भूयस्स्मरस्मर हरं रुचिरेंदु खण्ड रेखावतंसमुमया सह सोपहासं ॥२४॥ कोवा कालःका
लदूताश्च के वातैः किं कृत्यं काल कालोनुवेलं ध्यातः सद्यो घोरसंसार बन्धान्मुक्तं तावत्कर्तुमेवातिशक्तः ॥२५॥ अतः परमुमापति स्मरण का
रण व्यत्यये परं प्रलय एव ... नः प्रलय काल कालानलः ॥ असह्यतम एवहि व्यसनमेतदत्युत्कटं कदापि विकटापति स्मरण पुण्य हीनात्मनाम् ॥२६॥
रेरे विचारय विचारय चारु शीलं पद्मस्फुरत् करतलामल शूल मूलम्। श्रीशूल पाणि चरण स्मरणानुकूलं श्रीकाल कालमकलं कलयानुवेलं
॥२७॥ कालान्तकं कोपि कृतान्त भीतः प्रयाति पुण्यैः सित भूति पूतः॥ सच्चानुभूतः सततं प्रभूतः करोति पापं प्रलयं विभीतः ॥२८॥ अन्त-
कान्तक पदाभिवन्दनैः मन्दधीरपि सनन्दनादिभिः॥ वंदनीय तमएवजायते जातु जन्म न विजायते पुनः ॥२९॥ जारः
परं जारज वृत्तजातो न जातु जानाति जनैर्विनाशम्॥ यतो नतं खिन्दुकला वतंस पादारविन्दा नमने प्रवृत्तिः ॥१३०॥
सद्वृत्तः खलु कोपि पुण्य विभवे र्भावो भवत्युत्सवैः॥ उत्साहात्मक मन्त कान्त कमुमा कान्तांघ्रि पङ्केरुहम् ॥३१॥
ध्यात्वा तच्चरणाम्बुजे रणु गणानां कुर्वन्परं क्रीडति क्रीडेयं परमुक्तिरित्यवगता संसार शान्त्यापरम्॥ कः संसारदवापहार चतुरो वीरोपि वीरेश्वर

दन्योमान्यतमोपितेनसभवेद्वीरेश्वराराधकः ॥३२॥ सामान्यः कथमिन्दुशेखर पदध्यानामृता[illegible]स्वादन ध्यानोत्सेकनमोदमानहृदयो दोरेषणानिर्दयः ॥
हरहर हर काल काल चित्तं धनमदमत्तमिदं भवत्पदाब्जं । अनवरत महाव्रतातिदूनं चिर तर शंकर लिङ्ग संगतिजन्म ॥३३॥ पुरा पुरा रति कथा विचारैर्वियो
ने नीतं नच भूति पूतम् ॥ अतःपरं वा भज सावधानं कालान्तकं भूति विभूषणेन ॥३४॥ शरद्राकालोक व्यतिकर सुधारश्मि सदृशं प्रकाशं तिग्मांशुस्फुरदुरुसु
धामंडल दृशम् ॥ महेशं वीरेशं भजभजभजापारकरुणारसासारासार प्रसर परिस न्तर्पित दृशम् ॥३५॥ किन्ते संतत मन्त कान्तकदया सार प्रसारैरयं अन्यत्वं समु
पैति पूत वितत स्वान्ते भवन्तं स्मरन् ॥ अश्रान्तामितभूत भीति रहितो निर्धूत पापप्रपा व्यापारोऽपि परापकार रहितः शान्तो नितान्तं तदा ॥३६॥ संसारे न
सुखं कृतातिसुकृतांभोधिः प्रवृद्धः पुनः ॥ नाशं याति सुखाम्बुराशि जननाद्योगादिधर्मार्जितः ॥ तस्मात्तत्परिहृत्य सन्ततमुमाकान्तं स्मरात्यादरात् ॥ तेनान्ते
तव नान्तकादपि भयं संसार रोगादपि ॥३७॥ उमाकान्त ध्यानैर्नगतमिदमायुः प्रियतमप्रयासोयो वृत्तः सुरत निगमोपायनियतः ॥ स एव व्यत्यस्तः पुनरपि स
माराजिरशर प्रसारव्यापारप्रकर करवीर प्रकरतः ॥३८॥ अहो दुष्टः कष्टं पतति पलितो मोह वडिशैः विषाकारापार व्यसन विषयोपायनियतैः ॥ अतिभ्रान्तः
स्वान्ते तुहिनकर कान्तेति निरतेऽप्युमाकान्तं शान्तो न भजति भुजंगांगदमहो ॥३९॥ विद्यांभोधि समर्जनेन भुवने सभ्यत्व लाभेन वा राज्यस्यापि समर्ज
नैर्नवनिधि प्राप्तापि कल्पायुषा ॥ वीरोदार कुमार दार निकरैः किंसादरैरप्युमाकान्ताराधनसाधनं यदि मनो न स्यात्तदा तद्वृथा ॥४०॥ नत्वा काल विला
स साधन धनापायव्ययं वायुषो भाग्यस्यापि लयं मुहुर्मुहुरुमाकान्तं भजत्वं ततः ॥ सन्तं स्वान्त मनंत मानसमिति ज्ञात्वा पुनस्तन्मुहुः ॥ दत्वा ज्ञानजलां

कुंजैरनुदिनं तत्पूजयं त्यादरात् ॥ ४१ ॥ ध्यात्वा स्वान्त निविष्टमन्तकरिपुं तत्ध्यान धारामृतं पीत्वा पीनमनो विलासपिशुनै रानंद वार्धेर्भृशम् ॥ शिक्ता केवल मन्तकान्तक महादेवेति नामामृतैरानन्दामृतराशि पूरण कराः तिष्ठन्तु हाराश्चिरम् ॥ ४२ ॥ भस्माभिः सकृदिन्दुमौलि चरण ध्यान प्रवीणैरयं संसारो विष सागरः परिहृतो नास्मान् समात्यायम् ॥ दारापार विहार नक्र विविध व्यापार सादरो हारोदार कथा सुधा निधि विधि व्यापार धीमान् परम् ॥ ४३ ॥ वारंवारमुदार हार चरण ध्यानामृतस्वादनैः संसारोरुद वानला कुलजन व्यापार दूरादरा ॥ द्वारास्तावदतो मुहुर्मुहुरहं हारैः परं सादरो दारनादर एव हार कथया कालव्यपायो द्यतः ॥ ४४ ॥ कुत्रानंग मतंग भङ्ग गहने लिङ्गानि तुंगानि मे गङ्गा तुंग तरंग सङ्ग ललितान्यालिंगनार्हाण्यपि ॥ कुत्र श्रीफ ल पल्लवाः सकमलाः कालान्तकाराधन ध्यानाराधन साधनानि सततं तानि प्रियाण्यथ स्वमे ॥ ४५ ॥ सन्त्यन्येतरवोपि विल्व तरवो यस्मिन्वने पावने तस्मिन्पावनपावनेपि रुचिरे रेवां वुतीरे वरे ॥ तत्तीरैरभिषिच्य लिंग ममलं विल्वीदलैरङ्कुरैः ॥ दूर्वाणामपि शंकरेति कलयेकालं न कालस्तदा ॥ ४६ ॥ यदा भूतिः फाले विमलतर रुद्राक्षवलयः ॥ करे लिङ्गं तुंगं विमल जल विल्वीदल युतम् ॥ ४७ ॥ पुरः शंभो भर्ग त्रिपुरहर पाहीत्यपि वचः ॥ तदा कालाद्भीतिर्नभवति शुभं भावि सततम् ॥ ४८ ॥ ॥ इति श्री शिव रहस्ये हराख्ये तृतीयांशे याज्ञवल्क्य जनक संवादो नामैक विंशोध्यायः ॥ २१ ॥ ॥ श्री काशीविश्वेश्वरार्पणमस्तु ॥ ॥ याज्ञवल्क्य उवाच ॥ ॥ इति तद्वचनं श्रुत्वा स राजा सत्य भाषणः तां राज्ञीं विनतामाह शिवव्रतपरायणाः ॥ १ ॥ त्वं शङ्करानुग्रह पात्रमेव चित्तं पवित्रं तव येन जातम् ॥ पवित्र मूर्तिः सततं त्रिनेत्रः स्मृतः सद्भिः

सकृद्वा स्मरणेन मुक्तिः ॥२॥ जिह्वा पवित्रा तव पुण्य मूर्तेराख्यामहेशस्य ययाप्रवृत्ता ॥ गङ्गा यथा तुंग तरंग भंगा हिमाचला पार दरी गुहाभ्यः
॥३॥ पानावगाहन विलोकन लोल चित्तान् गंगा पुनाति शिवनाम सकृच्छ्रुतं चेत् ॥ हन्त्येव पातक कुलान्यमितानि पश्चान्मुक्तिं प्रयच्छति
विलक्षणमेव नाम ॥४॥ एवं मनस्ते खलु पूतमासीदुमासहायस्मरणेन धन्या ॥ जिह्वा तवेति स्मरवैरि नाम स्मर स्मरापार सुखाय सद्यः ॥ संसार
रोग विनिवारकमेत देव मारारिनाम तदिदं सकलार्थ हेतुः ॥ श्रुतं स्मृतं वा हरतीह मोहं नयत्युमाकान्त पदार विन्दम् ॥६॥ त्वया पुरा शंकर
पाद पद्मं सम्यक्समाराधितमेव तेन ॥ भक्तिः प्रभूता खिल फाल नेत्रे तयैव मुक्तिर्बहुधा भवित्री ॥७॥ हन्त्येनांसि निहन्ति चान्तकभयं हन्त्या
पदो वैरिणो हन्त्यार्तिं च तथापि कीर्तिविकृति दैन्याज्ञतां दुर्धियः ॥ ८॥ शोभाप्रभव वैभवाभयशुभा रंभैक भूमौ प्रभो शंभो पाहि शिवेति वाग
पि परां मुक्तिं प्रयच्छत्यपि ॥ कदापि यदि न श्रुता शिव शिवेति वाणी तदा कथं भवति जीवनं मरण कालमेवेदृशम् ॥ ९॥ ज्वलत्वनलमध्य
गं भवतु भस्मसादप्यतः शिवस्मरण साधनं भवति जीवनं जीवनम् ॥ तृप्तिं नयाति मम चित्तमुमासहाय नामामृतं मुहुरपेक्षितमाशु पीत्वा ॥
धन्योऽस्मि तेन कृत कृत्य तमोऽस्मि यस्मात् धन्यः शिव स्मरण तत्पर एव मर्त्यः ॥१०॥ दुर्लभं खलु महेश्वर लिङ्गं दुर्लभं खलु
महेश्वर नाम ॥ दुर्लभः खलु महेश्वर भक्तो दुर्लभं खलु शिवामृतपानम् ॥११॥ अद्य धन्यमभवद्दिनं दिनं सर्वदाऽपि खलु
ने दृश्यते ॥ शाङ्क मङ्गल कथानु वर्तनं नीतमेव कि यदायुरादरात् ॥१२॥ वयः खलु शिवार्चन श्रवण साधनं पावनं तदेवध

608

नमित्यपिप्रवदति प्रमाणम्॥ अनुक्षणमिदं प्रियं गिरिशनामधेयालयं नभश्रवण लक्षणं शुभदमेवमन्ये पुनः॥१३॥ पुण पुण्यं किंवा किमखिलपापक्षयकरं न जाने जाने किं गिरिशचरणांभोजभजनम्॥ यदि ज्ञातं सद्यो न भवति कथं वा जनिभय प्रणाशोप्याशायः कथमपि ननाशो विधिवशात्॥१४॥ अहो जन्मरोगादि रोगव्यपायः पुरानानुभूतोनु भूतोयमद्य॥ यतः शंकराख्यामृतं पीत मासीत्॥ इदं दुर्लभं सर्वथा दुर्लभं हि॥१५॥ शाङ्गाङ्ग लिङ्गेन कदाचिदेव भवत्युमाकान्त कथाप्रसङ्गः॥ तेन प्रसंगेन सुखाभिषंगः शांगोभगं गोपि संमूलाय॥१६॥ यत्कल्याण परंपराकरणतां प्राप्तं यदापत्कुलमध्वं साशनितांच पातकुलापारटवी वन्हिताम्॥ तन्नामस्मरं वैरिणः शिव जनः स्वर्गापवर्ग प्रदं प्राप्तं करापिथं कथंचिदधुना पुण्यैरगण्यैः कृतैः॥१७॥ शिव नाम सुधा प्रवाह पूर व्यतिकर पात्रमिदं पवित्रमेकम्॥ अमिताद्भुत पुण्य पुण्य भूतं मम खलु चित्तमिदं प्रभूत पुण्यं॥१८॥ न ज्ञातं गिरिशाभिधान सुधया तुल्यं पदार्थांतरं यत्सद्यः प्रभुतमेव हन्ति बहुधा पापान्यपाराण्यपि॥ सम्पद्धान विधान दक्षमधुना स्वर्गापवर्ग प्रदं तत्तुल्यं जगतीतले खलु मितं लोकान्तरेवा ध्रुवं॥१९॥ तत्तुल्या निधयोपि नैव नवते शंखादयः तिष्ठन्त्येव न भोगसाधनतया ज्ञातातत्तस्तैः सह तुल्यं नाम न शांभवं शिव पदं तावत्कुतं मुक्तिं दं॥ सर्वापद्विनिवारकं च सुतरां तद्भाग्य भोगप्रदं॥२०॥ यः कश्चिद्भुवि वातुलो ति कलुषा व्यापारधी व्याकुलो यत्किञ्चिद्वदतु प्रधावतु मुहुर्मत्ताभिशस्तान्वितः॥ किं तेनाहममुना सहाय चरणा ध्यानाभिधानप्लुते मुक्तिः स्यादिति बाहुमूर्ध्वमसकृत्कृत्वा वदामि स्फुटम्॥२१॥ इत्याकर्ण्य वचः सुधामयमिदं राज्ञी प्रहृष्टा मुहुस्तं नत्वा शिव विद्यया व्यपरया पूतां परं मां कुरु॥ इत्येतद्वचनं मुहुः श्रुति पुट व्याप्तं च कृत्वा सकृत्तामाहान्यतावते भवतु सा विद्या गुरोः शांभवात्॥

इत्याकर्ण्य वचस्तस्य शिवविद्या विलम्बिता ॥ मूर्छिता भूतले सद्यः पपातातिकृशान्नृप ॥२३॥ ततः स भूपतिर्दृष्ट्वा मूर्छितां करुणानिधिः ॥ प्रभु व्याकुलं नेत्रान्तो नितान्तं तांत एवसः ॥२४॥ तां दृष्ट्वा पतितां प्राह राजा हाहा वृथा गता ॥ सेयं न धृता कल्याणी मुक्त्यै शाम्भव विद्यया ॥२५॥ प्राप्य शाम्भवीं विद्यां तनुत्यागं करोति यः ॥ समुक्तो न भवत्येव शिव भक्तोपि वस्तुतः ॥२६॥ शिव विद्याग्निना दग्धे महापातक पर्वते पश्चाद्भवति मुक्तिश्च शिवलोकावलोकने ॥२७॥ शिवाचारोपि सहसा न विना शिव विद्यया ॥ तदधीनं तदाचारं विदुः शाम्भव पुङ्गवाः ॥२८॥ अभिव्यक्ता यदि भवेत्सा विद्या शाम्भवात्तमात् ॥ तदाचार रतो देव तदाचारस्तदा भवेत् ॥२९॥ दीक्षिताचार नियमो यतो ना दीक्षितस्य सः ॥ अतो दीक्षानुयोगेन दीक्षिताचार सङ्गमः ॥३०॥ पुरा कश्चिदभूद्राजा गंगातीरे मनोहरे ॥ तुंग लिंग समाक्रान्ते चित्रकेतुरिति श्रुतः ॥३१॥ स शांभवो महाराजा सर्वभूचक्र पालकः ॥ अपारधनवान्तस्य मत्तमातंग कोटयः ॥३२॥ तस्यो तुंगास्तुरङ्गाश्च रत्नानि विविधानि च ॥ गोकुलान्यप्यपाराणि ग्रामीणामपि कोटयः ॥३३॥ रुद्राक्ष कण्ठास्ते सर्वे सदा भस्म विभूषिताः ॥ तस्यो षकाश्च ते सर्वे भूति रुद्राक्ष भूषणाः ॥३४॥ तुंगं तुरंगमारुह्य भूति रुद्राक्ष भूषितः ॥ स राजा विपिनं याति विहाराय कदाचन ॥३५॥ न तेन निहतो जन्तुर्वने प्याखेटके सति रुरूनगृह्णाति तरसा तुरगाधिष्ठितो नृपः ॥३६॥ तं गृहीत्वा रुरुं तस्य कंठे रुद्राक्षमालिकां ॥ दत्वा भूतिं त्यजत्येव शिवनाम समुच्चरन् ॥३७॥ व्याघ्रादीनां च कंठेषु दत्वा रुद्राक्ष मालिकां ॥ भूतिं दत्वा त्यजत्युच्चैः उच्चरन्शिव नामसः ॥३८॥ तस्मिन्राष्ट्रे वने क्वापि ना रुद्राक्षो मृगनृप ॥ नालिङ्गं विल्वमूलं च ना लिङ्गं च नदी तदम् ॥३९॥ आनम्र तरुशाखायां पत्राण्यस्थि मृगा अपि ॥ आनीय लिंगे दत्वैव प्रयच्छन्ति तृणान्यपि ॥४०॥ अरण्य तरु वृक्षेभ्यः फलान्यानीय सादरं विल्व मूले प्रयच्छंति शिव लिंगार्थमित्यपि ॥ तृणां शिवपरां कृत्वा जलं च नवमादरात् ॥ स्वयं गृह्णाति येतेन

शिव स्मरण पूर्वकं ॥ ये मयूरादयस्तस्मिन्नरण्ये ते विभूषिताः ॥ रुद्राक्षैः भस्म नाप्येवं ना रुद्राक्षो विलोक्यते ॥ वंद भस्मानि सर्वे पि कृत्वांग परिवर्तनम् ॥ शिवं स्मरंतः पश्यन्ति शिव लिङ्गानि ते नृप ॥ ४४ ॥ तुरंग मत्त मातंग भक्ष्यं भूति कराश्रितं ॥ न भूति रहितान्नानि भक्षणाहाणि भूपतेः ॥ ४५ ॥ भूतियुक्त यदेवान्नं तत्कृत्वा शंकरार्पणं ॥ अश्वादिभ्यः प्रयच्छन्ति गजाश्वादिक रक्षकाः ॥ ४६ ॥ तस्मिन्राष्ट्रे जनः क्वापि न शिवा नर्चको नृप ॥ शिवालयाश्च सर्वत्र भस्म राशि विराजिताः ॥ ४७ ॥ रुद्राक्ष माला संवीता लिंग संमर्द भास्वराः ॥ प्रति सद्मानि लिङ्गानि तुंगानि विमलान्यपि ॥ ४८ ॥ नार्मदानि विचित्राणि बिल्ववृक्षाः सपल्लवाः ॥ शिवार्चक समाकीर्णास्तद्देश वास भूमयः ॥ ४९ ॥ शिव शंकर विश्वेश महादेवेति वादिनः ॥ शिवाचार रता एव सर्वे तद्देश वासिनः ॥ ५० ॥ सर्वे शिव कथामेव शृण्वन्ति निर्विधात्स्वकैः ॥ बालकाश्च विशेषेण शिव नामामृतोत्सुकाः ॥ ५१ ॥ योषितामपि सर्वासां भस्म रुद्राक्ष भूषणम् ॥ रुद्राक्ष रहितं तासां कंठ सूत्रं न सर्वथा ॥ ५२ ॥ मंगलापति रूपस्य रुद्राक्षस्य विशेषतः ॥ नित्यं मंगल सूत्रेषु धारणं मंगलान्वयात् ॥ ५३ ॥ अमंगलत्वानि निराकरोति रुद्राक्षवन्मङ्गल सूत्र मेतत् ॥ विभूति युक्तं च विभूति दं स्यात् (तः परं मंगल सूत्रमुक्तम्) ॥ ५४ ॥ धिग् धिग्भालं भस्महीनं विहीनं धिग्धिग्गात्रं भस्म रुद्राक्ष हीनम् ॥ धिग्धिक्चित्तं शंकर ध्यान शून्यं धिग्धिग्गेहं लिंग संबद्ध शून्यं ॥ ५५ ॥ शिव शब्द विहीन वाग्विलासो धिगवश्यं धिगवश्यमेव धिग्धिक् ॥ सयतः परमायुषः क्षये निर्गिधुक्तः शिव शब्द वर्जितः ॥ ५६ ॥ श्लोके

शिवरह॰ ७

सदास्व समयापेक्षा[illegible]न तेषां कदाप्यार्तिर्नैव जनस्य कीर्तिसहितः सर्वोऽपि शैवो जनः॥ ६२॥ यदा यदा वृष्टिरपेक्षिता तदा वृष्टिर्भवेत्येव विलक्षणा सा॥ नात्यातपो नातिहिमञ्च तस्मिन्राज्ये नृपे शांभव पुंगवेऽस्मिन्॥ गवां तृणं नूतनमेव तस्मिन् राष्ट्रे शिवाचाररतेऽपि भूपे॥ सदा बहुक्षीरदुघाश्च गावो वत्साः प्रवृद्धाः पयसा पलन्ते॥ ६५॥ गवांनिरोधोऽपि वनेन तासां न व्याघ्रजाभीतिरघातुकास्ते॥ व्याघ्रादयः शाम्भव पुंगवेन संरक्षिता भूरि[illegible]ति सर्वदापि॥ ६६॥ गावश्चरन्ति नवघासचरार्थमेव रम्ये वने वन वनार्थमपि प्रवृत्ताः॥ दृष्ट्वैव बिल्व तरुमूलगतानि लिङ्गान्यालिङ्ग्य लिङ्गजलमेव पिबन्ति धन्याः॥ ६७॥ क्षीरप्रस्रवणेन बिल्वनिलयं लिङ्गं समभ्यर्च्य गाः॥ स्थित्वा शङ्कर शङ्करेति च मुहुर्वत्सोत्सवा कारणम्॥ ६८॥ श्रुत्वा गौरि शिवे शिवेति च वचः श्रुत्वा प्रयान्त्यादराद्गोपालैरभिनान्दिताः प्रतिदिनं पुष्ट[illegible]ण ग्रासतः॥ ६९॥ पुंव्यक्तिष्वखिलासु शङ्कर महादेवेति नाम्नादराःस्त्रीव्यक्तिष्वखिलासु गौरि गिरिजे कालीति नामादराः॥ तद्देशे शिवनामचिह्नितमभूत्सर्वं सदा भूपति यस्माच्छांभव एव तेन सुकृतांभोधिः प्रवृद्धो मुहुः॥ ६९॥ चरन्त्यरण्येषु वनेषु निर्भया श्चौरादयः स्तत्र न संश्रुताश्च॥ व्याघ्रादयो घातुकजन्तवोऽपि वृत्तिर्मुनीनां समुपाश्रितास्ते॥ ७०॥ तस्मिन्नुसति भूपाले भूलोके मरणान्यपि॥ भवन्ति स्वेच्छया तत्र न मृत्युगमनं खलु॥ ७१॥ मरणानन्तरं भूप सर्वे तद्देशवासिनः॥ पुष्पकाणि समारुह्य प्रयान्ति शिवमन्दिरम्॥ ७२॥ सशरीराः प्र

ह॰ त॰ उ॰ अ॰ २२

610

यस्मिन्नामनास्तीव सुर्व सोपिश्लोकः ~~किन्तु श्लोक~~ः किंतु शोकः परंसः ॥ सर्व शोकं हन्ति पापानि शार्वे यस्मिन् श्लोकेनामसद्यो विमुक्त्यै ॥५७॥ सा वाराणी खलु पुण्य दान निपुणा या शंभु नामान्विता शंभो शंकर चन्द्रशेखर महा देवेति संवादिनः ॥ सर्वे तत्पुर वासिनो पि सुतरां तद्देश संवासिनस्तन्नामध्वनि पूरितं जगदभूत्सर्वं सदा भूपते ॥५८॥ तं भूपालमरिं वदन्ति मुनयस्ते शंकराराधकं ॥ तं दृष्ट्वा प्रणमंति सोयम मरः कोपीति पुण्यां बुधिः ॥ केचित्तं प्रवदन्ति शंकर रतं दृष्ट्वा प्रहृष्टा परं दृष्टः कष्ट विनाशको पि सततं शिष्टोगरिष्ठो पि सः ॥५९॥ तद्देशमन्यमरस्त्रुन्नाः प्रति दिनं गत्वा तदीयांगनाः सर्वाराधन तत्पराः सितल सद्भूति त्रिपुंड्रांकिताः रुद्राक्षाभरणाः समीक्ष्य विनताः तत्पादपद्मान्यमो ध्य धन्या इत्यपि ताभिरीश्वर कथाः श्रृण्वन्ति नृत्यंति च ॥६०॥ शंभो भर्ग भवेति गायन्ति मपि ~~[illegible]~~ त्वेवताभ्योमुहुस्तद्गानाभ्यसनेन सादरमुमाकान्तार्चनालोकनैः ॥ नीत्वाकालमुमापतिं हृदि मुहुर्ध्यात्वा प्रयान्त्यन्वहं गत्वा ताः पुन रादरेण गमनोद्युक्ताः सुरप्रेषिताः ॥६१॥ तस्मिन्कुर्वति भूपाले भूलोके सुर संश्रिते ॥ अशांभव कथा वार्ता न वृत्ता सर्वथा नृप ॥ ॥६२॥ दुर्भिक्षादि भयल्लरतस्य नगरे देशे ऽपि वा सर्वदा सर्वं भूतल मुज्ज्वलाखिल फलं पुष्पै फलैश्चान्विताः ॥ तद्देशे तरवः

यान्त्यन्ये त्यक्त्वा केचित्तनुं मुदा ॥ शरीरान्तरमारुह्य भूति रुद्राक्षभूषितम् ॥७३॥ रुद्राक्षभूति समलंकृत दिव्यदेहाः
शम्भो महेश शिव इत्यभिलापनेन ॥ आरुह्य पुष्पक वरं गिरिशं प्रयान्ति तूर्याणि तावदभितो ह्यनुभूस तोषात् ॥७४॥
कैलास मार्ग गमने शिवपूजनस्य काले स्वभाव नियमेन शिवार्चनानि ॥ मन्दार मूल निलयेषु मनोहरेषु कुर्वन्ति
पुष्प नव बिल्व दलादिभिस्ते ॥७५॥ सर्वे कल्प तरु प्रभूत कुसुमैः पक्वैः फलै निर्मलैः ॥ शुद्धै देवनदी जलैरपि मु
दु लिङ्गार्चनम् सादरम् ॥७६॥ कृत्वा स्वादु शिवोपहारमसकृद्भुक्त्वा स्मरन्तः शिवम् दृष्ट्वा नृत्यमपि प्र
यान्ति शिव मां पाहीति सम्वादिनः ॥ कैलास मार्ग गमने पथि पुष्प शय्या कल्प द्रुमामल तलेषु सुधा
प्रवाहः ॥७७॥ पक्वानि तान्यपि फलानि मनोहराणि पुष्पाणि नीर लालितानि शिवोत्सवानाम् ॥
611
पुष्पासाराश्चारु कैलास मार्गे वीणा नादाः शङ्कराराधकाश्च ॥ मध्ये मध्ये रत्न नीराजनानि
~~पक्वानि फलानि मनोहराणि पुष्पाणि नीर लालितानि शिवोत्सवानाम् ॥ पुष्पासाराश्चारु कैलास मार्गे वीणा~~
~~नादाः शङ्कराराधकाश्च ॥ मध्ये मध्ये रत्न नीराजनानि~~ हर्म्यं रम्यं पुष्प शय्या समेतम् ॥७८॥
~~शय्या समेतम् ॥~~ चामीकराति रुचिरोन्नत चामरौघैस्ते वीजिताः पथिगणाधिपमन्दिरेषु ॥ मुक्ताकलाप रुचिरेषु मनोहरेषु विश्रम्य-

यान्ति शिवमन्दिरमीशभक्ताः ॥ ७९ ॥ नारायणादि सुरवृन्दगण प्रणामान्दृष्ट्वाकराभिनयनेन परं गृहीत्वा ॥ तैः संस्तुताश्च मुहुरुन्नतकन्ध
रास्तान्दृष्ट्वा प्रयान्ति शिवमन्दिरमीश भक्ताः ॥ ८० ॥ धन्याः प्रयान्ति शिवमन्दिरमंबुजाक्षि पद्मे विलोकय विलोकय तानपीति ॥ नारा
यणस्य वचनेष्वपि सादरास्ते श्रुत्वा प्रयान्ति शिवमन्दिरमीशभक्ताः ॥ ८१ ॥ रुद्राक्षभूषण विभूषित दिव्यदेहास्तेयांति शंकरपदं कमले
प्रपश्य ॥ पश्येति विष्णु वचने ष्वपिसादरास्ते श्रुत्वा प्रयान्ति शिवमन्दिरमीशभक्ताः ॥ ८२ ॥ भस्म त्रिपुण्ड्र रचनार्जित पुण्यव
न्तस्ते यान्ति शंकरपदं कमले प्रपश्य ॥ पश्येति विष्णु वचनेष्वपि सादरास्ते श्रुत्वा प्रयान्ति शिवमन्दिरमीशभक्ताः ॥ ८३ ॥ लिङ्गार्चना
र्जित मनोहर पुण्य पूर्णास्ते यान्ति शङ्करपदं कमले प्रपश्य ॥ पश्येति विष्णु वचनेष्वपि० ॥ ८४ ॥ पञ्चाक्षर श्रवण कीर्तन पूत चित्तास्ते
यान्ति शङ्करपदं कमले प्रपश्य ॥ पश्य पश्येति विष्णु० ॥ ८५ ॥ रुद्राभिषेक जलपान विशुद्धचित्ताः ते यान्ति शंकरपदं कमले प्रपश्य ॥
पश्येति विष्णु० ॥ ८६ ॥ हारोपहार कृत भोजन पुण्यवन्तस्तेयान्ति शंकरपदं कमले प्रपश्य ॥ पश्येति विष्णु० ॥ ८७ ॥ रमे दारास्तेषा
मनवरतमीशार्चनरताः कुमारास्तत्कन्याः शिवभजन चित्ता सुनिरताः ॥ विभूत्या धूताङ्गाः सितभासित रुद्राक्षललितास्तदीयास्ते
यान्ति स्मरहर पदं पश्य विमलान् ॥ ८८ ॥ रमे भाग्यं तेषां मदन हर पूजार्थमभवत्तदीयास्ते पुत्राः शिवभजन पूजार्चितधनाः ॥ प्र
पश्येदं भाग्यं किमपि नयनानन्द जनकं त्रिपुण्ड्रं तद्भाले कर रुचिर रुद्राक्षवलयम् ॥ ८९ ॥ रमे तेषां जिह्वा शिवशिव महेशेत्य

पिमुहुः सुधां पीत्वा पीनां पुनरपि पुनः पश्य विमलम् ॥ इयं धन्या मान्या भुजगपतिमान्यापि सततम् ॥ शिवं स्तोतुं याति स्मरहर महद्भाग्यमितिताम् ॥ ८० ॥ इयं वाणी पश्य त्यजति विनयनम्रान् शिवरतान् मुहुर्दृष्ट्वा हृष्टा पुनरपि शची पश्यति मुहुः ॥ इयं छाया पश्यत्यपि मुहुरसं धन्य इतितां शिवाचारं पश्य स्मरहरकथालोलममलम् ॥ ८१ ॥ धन्याः प्रयान्ति शिवमन्दिर मन्दिरे ते गौरीमनोहर पदाम्बुज पूजनेन ॥ पश्याधुना मुहुरयन्न महोत्सवः स्यादिते प्रयान्ति शिवमेवसदा प्रपन्नाः ॥ ८२ ॥ धन्यास्ते शिवलिङ्गपूजनरतास्तद्वीक्षणेनेक्षणम् ॥ धन्यं तावदतः परं शिवरतः क्वास्तीदृशे सुन्दरम् ॥ ८३ ॥ मन्दारैरपि कुन्द फुल्लकमलैस्तत्पादुकाराधनम् कर्तव्यं गिरिशालयं प्रतिमुदा त्यागर्थानिकालोकिताः ॥ ८४ ॥ कमलामललोचने विशाले नयने ते शिवभक्तपादपद्मम् ॥ मुहुरादरतो विलोक्य सद्यः कृत कृत्यत्वमवाप्य किल तुष्टे ॥ ८५ ॥ क्व पुनर्वेद शाम्भवो भवान्तः परमाविश्य नयाति सर्वपापि ॥ अतएव विलोकयाशुभ त्वया कमले नेत्रयुगेन पुण्यसिध्यै ॥ ८६ ॥ पुण्यं शाम्भव दर्शनेन महतां तत्पूजनेनाप्यतस्तद्दूरे गमनं न तत्र कमले तद्दर्शनं वा कुरु ॥ तावन्मात्रमदृष्टतोऽथ समभूत् त्पादुकालोकनात्पापपञ्जलराशयोऽपि सुतरां शुष्यन्ति नश्यन्ति च ॥ ८७ ॥ अहो पुण्यमस्माकमद्यानुकूलं शिवाराधकालोकनायानुकूलम् ॥ अलं जन्मनानेन जन्मान्तरे वा महादेव भक्ताङ्घ्रिपद्मं भजामि ॥ ८८ ॥ भवानीपते पाहि पाहीति शूलिन् भवत्पादुकाराधकालोकने वा ॥ मनो मे प्रवृत्तं भवत्पादुकेन प्रणाम प्रवाहस्तवायं महेश ॥ ८९

शिवरह० ३

२८५

ह० त० ३०

अ० २२

न दृष्टान्येव तन्मर्त्यैः पौत्रादिमरणानि वा ॥ ५ ॥
पृ. ६ — नपुत्रमरणं दृष्टं नृप तद्देशवासिभिः ॥

मार्ग्येन कैलाश विलास वास प्रसादने यद्यपि किं तपापि ॥ त्वत्पादपद्मस्मरणेनुरक्ति (भजने) विरक्तिरस्तु शिवा सहाय ॥ १०० ॥ इत्युद्धेहस्थलमसुर

गण सहितं वीक्ष्य लक्ष्मीपतिं ति दृष्टाते पुष्पकाग्राद्गिरिवरतनयाकान्तमेव समन्तः ॥ गत्वा कैलाशलोकं शिवचरणरजःपुञ्जसङ्गाद्विमु

क्तास्ते तावल्लिङ्गपूजाफलकमलमिदं प्रापुरेवानिवृत्यै ॥ १ ॥ तस्मिन्दृष्टाम्भव (पुंगवे) भुवि सदा भाव प्रभावोत्सवे तिष्ठन्त्यन्तकभीतिमात्ररहिताः

सर्वेऽपि लोकास्सदा ॥ रोगेभ्यो न भयं न भूतजनिता भीतिर्न वारातिजं नागेभ्यो न भयं जलादपि भयं भीतिर्न वात्यादिभिः ॥ २ ॥ पुत्रपौत्रादिस

म्पन्ना सर्वे तद्देशवासिनः ॥ धनधान्यादिसम्पन्नाः सर्वे नित्यमहोत्सवाः ॥ ३ ॥ शुभानि सततं तेषां गृहेषु शिवपूजया ॥ कदाप्यशुभवा

र्तापि तद्देशेषु न सर्वथा ॥ ४ ॥ सिन्दूररेणुसंपूर्णसीमन्तातिमनोहराः ॥ दाराः सर्वेऽपि तद्देशे दारा (न) पतिवर्जिताः ॥ ५ ॥ सति भर्तरि मारि

यां मरणं नैव सर्वथा ॥ न पुत्रक्लेशसंयुक्ताः तेऽपि तद्देशवासिनः ॥ ६ ॥ तद्देशे शोकवार्तापि नास्ति सर्वात्मनान्नृप ॥ शिवपूजारताः सर्वाः

पति सुश्रूषणप्रियाः ॥ ७ ॥ भर्तुरेव प्रियं नित्यं तद्दारैरभिवाञ्छितम् ॥ न दारकलहस्तत्र सपत्नीनां नृपोत्तम ॥ ८ ॥ शिवनामजपेनैव सम

यस्तैः समाप्यते ॥ अतो नावसरस्तेषां लौकिके कलहेऽपि वा ॥ १० ॥ कृत्वा लिङ्गार्चनं सर्वे प्रार्थयन्ति महेश्वरम् ॥ कृताञ्जलिपुटा एव प्रयाताः

सादरं मुहुः ॥ ११ ॥ भक्तिप्रदानसमयोऽप्युमासहाय (त्व)त्पाद(पद्म)भजनेन निरन्तरायम् ॥ त्वय्येव भक्तिमखिलाघविनाशनाय देहि प्रसीद

भगवच्छरणागताय ॥ १२ ॥ त्वत्पादपद्ममकरन्दरसाभिषिक्तं मा चित्तभृङ्गमसकृत्कुरु शर्व शंभो ॥ मत्प्रार्थनीयमिह नान्यदुमासहाय ध

३२

न्योऽस्मि तेन धनिकोऽस्मि जगत्त्रयेऽपि ॥ १३ ॥ यद्यन्ममाभिलषितं तदुमासहाय सिद्धं त्वदङ्घ्रिकमलार्चनभक्तिलेशात् ॥ अन्यत्र वाञ्छित मपीश किमस्ति लोके त्वद्भक्तिदुर्लभमिति प्रतिभाति नित्यम् ॥ १४ ॥ आकांक्षा शिवनाममात्रजपने भस्म त्रिपुण्ड्रे तथा रुद्राक्षाभरणेऽपि शांग विलसल्लिङ्गार्चनेऽपि प्रभो ॥ शङ्काराधन साधने ष्वपि मुहुर्लिङ्ग प्रणामेऽपि मे लिङ्गालोकने मेव सततं चित्तंममास्तु प्रभो ॥ १५ ॥ मन्नेत्राम्बुज कृत्यमस्तु सततं बिल्वादिकाभ्यर्चिता पाशानंग विहार तुंग विलसल्लिङ्गार्चनालोकनम् ॥ तेनैतज्जनञ्च धन्यमिति मे बुद्धिः प्रवृद्धाः मुहुर्भूयादित्यनुवासरं भवतु मे सम्प्रार्थनीयं प्रभो ॥ १६ ॥ श्रोत्रस्यापि न कृत्यमन्यदधुना विश्वेशपूजा कथा पीयूषार्णव पानमेव मुहुरत्यादरेणान्वहम् ॥ तत्कृत्यं तदपार पुण्य जलधि प्राप्यं तदेवान्तकम् दूरीकर्तुमलंच तावदसकृत्सर्वेऽसितार्थ प्रदम् ॥ १७ ॥ कृत्यं मत्करयो र्महेश्वर महालिङ्गालय प्रोक्षणं लिङ्गाभ्यंग विलेपनञ्च विलसत्पञ्चामृताभिषेचनम् ॥ उत्फुल्लामल कुन्दपङ्कजलसद्बिल्वीदलाभ्यर्चनं कर्पूरागरुसारकर्दमलसत्पाटीरसारार्पणम् ॥ १८ ॥ क्षीरान्नार्पण धूपदीप विलसन्नीराजनाद्यर्पणम् ॥ स्वच्छत्र समर्पणञ्च विपुल श्री चामराद्यर्पणम् ॥ यच्चामीकर स्वर्णार्पणमपि प्रायः प्रणामार्पणम् कृत्यं मत्करयोर्भवत्वनुदिनं गौरीविहारादर ॥ १९ ॥ जिह्वा कृत्यमुमासहाय चरणांभोजार्चनाराधन ध्यानानुस्मरण प्रभावकथनं तन्नाम संकीर्तनम् ॥ तद्गौरी रमणोपहार सुरसव्याख्यानमप्यादरात्तत्पूजाकरणानुवादनमपि श्री नीलकण्ठ ध्रुवम् ॥ २० ॥ नासाकृत्य

मुमा सहायचरणांभोजार्चितात्युल्लसद्विल्वीपल्लव कुल्लनीलकमलामोदाग्रहस्तद्रुहः ॥ अग्रानुग्रहतः समग्रत इतिज्ञेयो ग्रहानुग्रहो हाराहारसु

गन्धसुन्दरामिदं नासापुटं धूर्जटे ॥ २१ ॥ प्रणाम व्याजेन स्मरहररजत्पादरजसा शिरोमल्लक्रीडां सकृदपि करोतु प्रणमयुतः ॥ शिरः कृत्यं ताव

द्भवति खलु तेनैव तरसा नसा किं मोक्षश्री रमणमपि मामेव कुरुते ॥ २२ ॥ कृत्यन्न मे चरणयोरपि शङ्करान्यत्क्षौ काशिकानगरसञ्चरणाल

सौ तौ ॥ स्यातामतः परमुमारमणानुवारं कृत्यं तदेव न तयोरपि किं विशेष्यम् ॥ २३ ॥ शंभो भालतलं बिभर्ति विलसदृ्‌रेखांकितं सर्वदास्यादेते

न नवेन्दु खण्डु लितं कालं भवेत्तावता ॥ तत्कृत्यं च समाप्तमेवमसकृन्मत्प्रार्थनीयं त्वया कर्तव्यं खलु पूर्णमेव भगवन् सम्पूर्णमेव प्रभो ॥ २४ ॥ अर्पि

प्रार्थितमर्थजातमसकृद्दातुं समर्थो भवान् शंभो शांभव वत्सलाशु करणान्येतस्य सर्वाण्यपि ॥ त्वन्नाम स्मरणार्चनादि निरतान्येवादरा

त्सन्तु मे तान्येवास्मदभीष्टसिद्धिफलदानीति स्मरामि ध्रुवम् ॥ २५ ॥ अस्मत्सन्ततिरप्यनन्तविभवैर्भावैः प्रभूतैर्युता

लिङ्गाराधनसाधनोद्यतमतिः सा कालकालार्चनात् ॥ कालाङ्घ्रीतिमपास्य मौनिनिकराः शास्याशु पञ्चास्यते तावत्पुण्यकथाः शृणो

ति सततं सम्पत्प्रवृद्धापि सा ॥ २६ ॥ अस्माभिः शिवलिङ्गपूजनफलं प्राप्तं श्रुतेर्यत्कृतम् । तन्नारायणवाक्यमिति प्रभृतिभिर्देवैः मुहुः

सादरम् ॥ धन्योऽयं शिवपूजकस्त्रिभुवनाराध्योयमित्युच्यते नित्यं मत्सदनार्थितैरपि गृहव्यापारसारादरैः ॥ २७ ॥ भूलोकोप्यधुना

महेश कृपया कैलाश एवाभवन्नंदीशप्रमुखाश्च सन्ततमुमाकान्तार्चने सादरम् ॥ मन्दं मन्दिरमेत्य सुन्दरवरं बीरेश्वराराधको

धन्यो धन्यतमोयमित्यनुदिनं मां प्रस्तुवन्तीत्वतः ॥ १२८ ॥ शिव शिव शिव शम्भो चन्द्रमौले कपर्द्दिन्ननलविमलभालावाललीला विलास ॥ वस
वसवसवासे मन्मनस्येव लास्यं कुरु कुरु कुरु गौरीं सन्निवेश्यांकभागे ॥ १२९ ॥ उत्फुल्लं मम मानसाम्बुजवरं तत्कर्णिकायां शिवामालिङ्ग्यान्व
हमादरेण गिरिजा जाने शिवेमायते ॥ पाहीति शृणु तत्कराम्बुजमहावीणां गृहाण क्षणं तन्त्रीवादनलालसः शिव शिव कल्याणि गौरीति च
॥ १३० ॥ इति श्रीशिवरहस्ये हराख्ये तृतीयांशे उत्तरार्द्धे याज्ञवल्क्यजनकसंवादो नाम द्वाविंशोऽध्यायः ॥ २२ ॥ याज्ञवल्क्य उवाच ॥ भूयः सभ्रमण्डल
मण्डनत्वात्तेन्दुखण्डाभरणार्चनेन ॥ अखर्वशर्वार्चनजातपुण्याः सर्वे वरेण्याः सततं धरण्याम् ॥ १ ॥ उमाकान्तं शान्तं किमिति न भजामो
मुहुरहो महोदारैर्दारै रुरुतर विहारैः सहसदा ॥ महादेवध्यानप्रथितसुधया निर्मलधिया कथं वा न स्वान्तं कथमपि न विश्रान्तमधुना ॥ २ ॥ स्फु
रल्लागारव्यतिकरशरच्चारुचपलाविलासप्रासादप्रतरदुरुशीतांशुकिरणैः ॥ स्रवन्नीरं हारं रुचिकरमुपस्पृश्य च मुहुर्मुदा लिङ्गं वृन्दं करकम-
लसंगं न कलये ॥ ३ ॥ महादेवं बिल्वीदलकमलकल्लोलकमलप्रवालव्यालालि प्रजलजलजानन्ददरसैः ॥ समाराध्याराध्यं सत्यमुरसेसा
यमसकृन्मया नेयस्सोऽयम् समय इति बुद्धिः प्रसरति ॥ ४ ॥ न दैन्यं दैत्यारिस्मरहरपदांभोजभजनादराणां नां चित्तं कथमपि न चिन्ताकुलमतः ॥
प्रसन्नं पश्याम स्त्रिनयनमिहासन्नमसकृल्लसद्बिल्वीमूले नवविमलबिल्वार्चितपदम् ॥ ५ ॥ विपन्नाशस्यायं समय इति मन्ये मुहुरहं महादे
वीयसादसकृदधुना स्मर्यत इति ॥ अयं धन्यः सोऽयं समय इति मन्ये मुहुरहं महामोहो नाशं गत इति मुहुर्मोदसहितः ॥ ६ ॥ महोत्साहस्यायं सम

कष्टा

यद्गतिं मन्ये मुहुरहं मुहुर्मन्ये मन्ये मुहुरपि मन्ये मन्ये मुहुरपि ॥ यताङ्घ्रितांभोजे शिव चरण पंकेरुहरजः ॥ प्रविष्टं काष्ठानामपनयनमासी
न्मुहुरहो ॥ ७ ॥ किं किंदातुमभिवाञ्छति चन्द्रमौलिर्भक्त्या स्मृतोऽपि सकृदादरतः स्तुतोऽपि ॥ भक्त्यानतोऽपि सयतः प्रणतस्तुतो वा
भक्ताय भाग्य निलयाय पदं ददाति ॥ ८ ॥ वितरणगुण सिन्धुर्बन्धुरेव स्वभक्ता नयमगपतिकन्याकान्त इत्येवमन्ये ॥ अहमपि सकृ
दाशापाशनाशाय सायं शिव शिव शिव पाहीत्युच्चरामि स्मरामि ॥ ९ ॥ उच्चैरुच्चार्य नाम स्मरहर मां पाहि पाहीति शैवम् कृत्वा
नित्यं शिवाग्रे शितभासित तनुस्तूलरुद्राक्षमालः ॥ कैलासावास वार्तारुचिकरसुसुधापानपीनः कदा वा दत्त्वा प्राणोपहारं शिव
शिवाशिव ते यामि कैलासवासम् ॥ १० ॥ कल्याणानां वासमेवेति मन्ये तं कैलाशं सोऽपि कैलाश वासः ॥ या कल्याणी तत्पतेरर्चनाद्यै
रित्यस्माकं बुद्धिरत्र प्रवृद्धा ॥ ११ ॥ शर्वाणीरमणार्चने यदि मनः पुण्यैः प्रवृत्तं तदा कल्याणानि पदे पदेऽपि बहुधा संपत्प्रवाहोद
यः ॥ आपत्काननाश एव बहुधा पापाब्धिसंशोषणम् ॥ तेन स्यादिति बुद्धिरत्र सममभूद्वेदान्तवाक्यैर्मुहुः ॥ १२ ॥ यद्यत्क्षोभ
नमित्यवैमि भुवने तत्तन्महेशार्चनात्तावज्ञातमिति स्मरामि करणं कार्यैः परं जायते ॥ तत्कार्याणि विनानतेन करणाभावे
क्व कार्याणि वा सम्पन्नानि भवन्ति सन्ततमिति स्वान्तं वदत्येव मे ॥ १३ ॥ स्मृतोऽपि हरति व्यथामामितरोगजालोद्भवामपारकरु
णानिधिर्गिरिकुमारिकाकामुकः ॥ सकालजनितव्यथामपि हरत्य~~मस्केश्वर~~कस्मात्ततः ॥ सुरासुरशिरोमणिः स खलु शूलपाणिर्मणिः ॥ १४ ॥

अस्माकं कुलदैवतं शिव इति ख्यातो गुरुः शांभवः ॥ संबन्धी ऽपि सशाम्भवैः सह सहालापोऽपि शैवैः सह ॥ प्रीतिस्तैः सह सर्वदापि सहितैर्वासोऽप्य
शैवान्वयो मास्त्वेवामरणं ततः परमपि प्रायो न सन्त्येव ते ॥१५॥ अस्माकं सुकृतस्य नावधि रमाकान्तार्चनाराधन ध्यानासेवन कारणानि करणान्य
त्यद्भुतान्येव तैः ॥ कालोऽधिः कृत एव कालसदना वार्त्ता कुतः क्वास्माकं जननादिकादपि भयं संसारजं वा भयम् ॥१६॥ सर्वत्राभयमेव नः शिवपदांभो
जार्चनात्सर्वदा संतोषांबुधि वृद्धिरेव सततं सर्वापदां विप्लवः ॥ एतत्भाग्यम शांभवस्य न कदाप्यस्तीत्यतः शांभवेष्वास्ति स्वस्तिमती मतिः शिवतरस्या
नानुकूला सती ॥१७॥ श्रुत्वा शांभवतांपि तावदधुना भाग्यान्यपाराणि ण्यपि प्राज्यं राज्य [illegible] मसज्यमेव हि धनुः वीराः कुमारा अपि ॥ दारा अप्यमरी
सहारक वरी भार प्रणामादराः पार्वती रमयाङ्घ्रि पङ्कज रजो लेश प्रसादात्परम् ॥१८॥ इत्युक्त्वा स नृपाल शेखरमणिस्तं शूलपाणिं मुहुः स्तुत्वा काल
विलासजाल मसकृन्निर्मु[illegible] राज्ये स्वके ॥ दारैः शङ्कर सादरैः शिवपरैर्वीरैः कुमारैरपि प्राप्यापार सुखं शिवैकशरणः क्रीडावनान्तं ययौ ॥१९॥ तद्वनं
नागपुन्नाग नारिकेलि समाश्रितम् ॥ रसाल साल सरल कदली पूग वेष्टितम् ॥२०॥ केतकी माधवी जाती मधुक वन मण्डितम् ॥ हंसराज समाकीर्णं स
रोवर विराजितम् ॥२१॥ तत्राति सुन्दरं दृष्टं शांकरं रत्नमन्दिरम् ॥ रत्नप्रासाद संयुक्तं नक्षत्रगण वेष्टितम् ॥२२॥ मुक्ताहारा इवाभान्ति नक्षत्राणि विशे
षतः ॥ शिवालयस्य शिखरे प्रासादेष्वपि कोटिशः ॥२३॥ शिखराभरणत्वेन चन्द्रः सूर्यश्च सर्वदा ॥ भाति तत्र विशेषेण शिखरे शिवमन्दिरे ॥
२४॥ रत्नैर्विनिर्मितास्तत्र नन्दिकेश्वर विग्रहाः ॥ गणानामपि सर्वेषां विभान्ति मणि विग्रहाः ॥२५॥ चित्राण्यपि विचित्राणि मणिभित्तिषु कोटिशः

6/5

शीवाह०३ ६२

नादद्योत्सवोद्यतान्येव प्रदोषेषु विशेषतः ॥२६॥ परितो विल्वतरवो नवपल्लवमण्डिताः ॥ तेऽपि धन्याः वयं तावत् इत्यन्योन्यं वदन्ति हि ॥२७॥
शिवालयस्य निकटे जन्म जातं स्थितिः सदा ॥ रुद्राभिषेकपानीयैः पू[ल्व]लश्च प्रजायते ॥२८॥ अस्माकं पल्लवैरेव शंकरोऽयं प्रपूज्यते ॥ इतः किमधि
कं भाग्यं पुण्यं वा किमतोऽधिकम् ॥ आकारयन्ति तरवः तरसा शांकरान् परम् ॥ मदीयाः पल्लवाः रम्याः मदीयाः पल्लवा इति ॥३०॥ आरक्ताः कोमला
एव पल्लवाः कमलामलाः ॥ आयान्तु शांकराः सर्वे गृह्णन्त्विति वदन्ति ते ॥३१॥ अखण्डैरमलैरेते आरक्तैर्विल्वपल्लवैः ॥ पूजयन्त्विति नम्रा
स्ते भवन्ति तरवः स्वयं[तः] ॥३२॥ सरोजान्यपि सर्वाणि गृह्णन्त्विति विशेषतः ॥ आकारयन्ति सहसा शांकरान् भूतिभूषितान् ॥३३॥
मधुकाराश्च सर्वेऽपि तरवः पुष्पसंकुलाः ॥ हारानाकारयन्त्येव शिवपूजापरायणान् ॥३४॥ मदीयानि मनोज्ञानि पुष्पाणि विमलान्य
पि ॥ अद्य गृह्णन्तु गृह्णन्तु गृह्णन्त्विति वदन्ति ते ॥३५॥ दूरादाकारयन्त्यन्ये नत्वा शाखाभि[illegible]रादरात् ॥ अस्मदीयप्रसूनानि गृह्णन्त्विति
विशेषतः ॥३६॥ दूरस्थितास्ते तरवो वदन्ति नासीत्कथं वा शिवसन्निधानम् ॥ अस्माकमित्यार्तवचोभिरुच्चैः प्रियाणि वार्त्तादयिता विदे
श्रो ॥३७॥ तादृशं वनमासाद्य स राजा विस्मयं गतः ॥ किमेनं तरवो लोके वदन्ति मधुरां गिरम् ॥३८॥ इत्याश्चर्यसमाक्रान्तः सकुमार
समन्वितः ॥ दारैरपि युतो राजा हारैरन्यैः समावृतः ॥३९॥ ततः प्रविष्टः शिवमन्दिरान्तं सम्पूज्य देवेशमुमासहायम् ॥ प्रदक्षिणीकृत्य
पुनः प्रणम्य तत्रोपविष्टः शिवमेव पश्यन् ॥४०॥ ततः परं तत्र मुनीन्ददर्श बिभ्रति भूतानति पुण्ड्रकान् ॥ रुद्राक्षमालाभरणा

ह० न०३० अ०२३

नपारान् हारान् हराराधन पूत चित्तान् ॥ ४१ ॥ ततः परं तत्र ~~मुनीन्द्रवर्यो ऽभिप्रति प्रयान् अति पुण्य रम्यान्~~ ॥ ~~[illegible]~~
~~[illegible]~~ चतुर्मुखोऽपि समागतः शङ्करपूजनाय ॥ संपूजयामास शिवासहायं बिल्वैः प्रसूनैरपि पुण्यगन्धैः ॥ ४२ ॥ प्र
दक्षिणीकृत्य मुहुः स नत्वा ध्यात्वा महादेवमुमासहायम् ॥ तत्रोपविष्टः स ददर्श भूपं महेश्वर ध्यान निविष्टचित्तम् ॥ ४३ ॥ राजा तदा
मानस पूजनेन चकार हृष्टं गिरिजासहायम् ॥ दाराः कुमाराश्च तथैव राज्ञः चक्रुः शिवाराधन मादरेण ॥ ४४ ॥ तं विलोक्य स चतु
र्मुखस्तदा धन्य एव नृपति र्विलोकितः ॥ भूरि पुण्य विभवै रिति ब्रुवन् तुष्ट एव मनसा शिवार्चकः ॥ ४५ ॥ ततः परं ध्यान रतं कृता
र्थं मत्वा स भूपं मनसा प्रणम्य ॥ उच्चैः शिवं वाचमुदीर्य भक्त्या तत्रोपविष्टः शिव इत्युदारः ॥ ४६ ॥ तदुक्त शब्दं च ध्वनिभिः प्रपूर्णं
ब्रह्मांडमेतत्सकलं स राजा ॥ विलोक्य तं विस्मयमाप सद्यः कायं ध्यानिः कृत्य इति प्रहृष्टः ॥ ४७ ॥ ततः परं स राजापि विस्मयापन्न ए
व तं मम् ॥ चतुर्मुखं विलोक्याह नत्वा हराधिया मुदा ॥ ४८ ॥ राजोवाच ॥ दृष्टोऽसि बहुकालेन सद्दृष्टेन केवलम् ॥ दृष्टादृष्ट फलावा
प्तिसाधनम् वद सादरम् ॥ ४९ ॥ ब्रह्मोवाच ॥ धन्यो धन्यतमस्त्वं नृपशेखरस्त्वम् भूमंडलस्याभरणं त्वमेव ॥ अत्रेन्दुखण्डाभरणा
र्चनेन प्राप्तं त्वया भाग्यमपारमेवम् ॥ ५० ॥ भूचक्राधिपतिस्त्वमेव नृपते त्वं धार्मिकाग्रेसरस्त्वच्चित्तं गिरिजामनोहरपदांभोजार्चनैः
पावनम् ॥ त्वं मान्योऽसि नरेषु कोऽपि भुवने न त्वादृशो दृश्यते भाग्यं तावदपेक्षितं खलु भवेदेतादृशं सर्वथा ॥ ५१ ॥ उदारदारा अपि

6/8

शिवर०३
६३

ते मनोहरा यं सहारा अपि ते च हाराः॥ हाराः कुमारा अपि ते सधीराः ते ऽपि प्रवीरा अपि ते उदाराः॥५२॥ अपारमेतत्खलु भाग्यमेवं न संश्रुतः कोऽपि पुरापि भूपः॥ पुण्यस्त्वहं सोऽसि कृतार्थ एव धन्योस्म्यहं तावकदर्शनेन॥५३॥ पुण्यश्लोको कोऽपि लोके विशोको लोकालोकलोकनेनापि लभ्यः॥ पुण्यश्लोकस्त्वत्समानस्त्वमेव त्वत्तुल्योऽन्ये नेत्र यात्रं न नूनम्॥५४॥ त्वं लोकानां भाग्यराशिः तावद्भूलोकेऽस्मिन् भूरि पुण्याय तीर्थः॥ त्वं वै साक्षाच्छ्री विरूपाक्ष भक्तो भक्तः क्वा लात्वदृशो भूतलेऽपि॥५५॥ त्वयि शासति कालनेऽपि राजन्मुनयो घातुकजन्तवोऽपि गावः॥ सहसंतिचरन्ति सान्ति सन्तः क्वति नावद्भुवनेऽपि सान्ति हन्त॥५६॥ हन्त हन्त कथमीदृशभाग्यं दृष्टमप्यदुरदृष्टविनाशः॥ जात एव हि न संशयलेशो युक्तमेवमिदमेव हि सत्यम्॥५७॥ सत्यं सत्यं सत्यमेतत्त्रिसत्यं सत्यं सत्यं शांभवो भूतलेषु॥ त्वत्तुल्यो नास्ति नास्त्येव नूनं सामान्ये वा शांभवो नास्ति लोके॥५८॥ पश्य पश्य तरवोऽपि शांकराः शंकरालयगताः स्वभावतः॥ शंकरस्मरणमेव सर्वदा सादरं मृगगणः करोत्ययम्॥५९॥ नामानि हाराणि वदन्ति तावत्स्वो मृगाश्च॥ रुद्राक्षमालावृतकण्ठभागा मृगाश्चरन्त्यत्र विभाति कालाः॥६०॥ शाखिनाश्च तरुभिः शुकादयः शंकरस्मरहरेति वादिनः॥ संचरन्ति कथमीदृशं महाभाग्यमत्र मुक्तैरवाप्यते॥६१॥ अशांकर गिरा पुरा जगदभाद्दिनष्टं ततस्तपः खलु महत्तरं कृतमनेन विश्वेश्वरः॥ प्रसन्न इह जायते जगदपारहारादतं किमद्भुतमिदं मुहुर्नयनगोचरं जायते॥६२॥ अशांभव कथा ऽतीता त्वयि सतीह भूमण्डले महेश्वरकथा सुधा प्रभवति प्रभावैर्मुहुः॥

ह०न०उ०
अ०२३

अहो किमद्भुतं भुवनमेव जातं सदा सुधामयमतः परं न तपसापि कार्य्यं खलु ॥६४॥ कैलासः किमयं यतोऽत्र विभवः सोऽयं प्रभूतो महान्
भावो भाव विलोकनेन भगवानालोकितः केवलम् ॥ भावाकारमुपेत्य भालनयनो भूलोकरक्षामणिर्जातो धन्यमिदं जगज्जगदिदं कैलास
एवाद्भुतः ॥ अपार मणिमन्दिर व्यतिकरोरुहार स्फुरन् महार्हमणिलिङ्गजामितमनोज्ञशोभाश्रयः ॥ शिवप्रिय शिवालये स्वयमहो विभाति
॥ प्रमोदसहितः
स्वतः सदा शिवजनोऽपि शर्वार्चकः ॥६५॥ सोऽयं भाति शिवालयः खलु सुखांभोधि प्रभावालयो मुक्तिश्री विभवालयः किमिति मे चि
त्ते विकल्पः खलुः ॥ कैलासोऽयमुतान्य एव गिरिशावासः शिवासंगमव्यासंगाय विनिर्मितो गिरिजया यद्वा महेशेन वा ॥६६॥ भूपालकाते
महती तपस्या यया त्वदालोकनमात्रतोऽपि ॥ मुक्तो भवत्येव जनो जनानां अदृष्टमेवं फलितं तपोभिः ॥६७॥ अतः परं नोग्रतपो विचारो धर्मा
न्तरस्यापि कुतो विचारः ॥ त्वद्दर्शनेनाद्य विपर्ययोऽपि मुक्तिश्च संभावित एव सत्यं ॥६८॥ नासत्य वार्ता न च पाप वार्ता त्वयि स्थिते श्रास
ति भूतलेऽस्मिन् ॥ सर्वेऽपि सर्वप्रवणाः प्रमाणमन्येतदन्तःकरणं प्रवीणम् ॥६९॥ मोहान्धकारप्रलये किमिन्दुः किं भास्करो वा प्रलयानलो
वा ॥ तत्त्वं ज्ञ जाने भुवने त्वमेकः समस्त पापाद्रिकुलाशनिर्हि ॥७०॥ त्वमेव तावत्सुरधेनुरत्नं त्वमेव तत्कल्पतरुस्त्वमेव ॥ चिन्तामणिश्चेतिमति
र्ममासीद्यतः शिवाचाररताग्रगण्यः ॥७१॥ शिवाचारः शीलं गतकलुषजालं तव कुलं नलं मूलं यस्मादनुदिनमुमाकान्तभजनम् ॥ धनत्वे
धन्योऽतस्तव चरणफुल्लाम्बुजरजोजगज्जन्माकांक्षाविलयननिदानं ध्रुवमिदं ॥७२॥ अहो भित्तिचित्रैर्विचित्रैः पवित्रैः कथन्नेत्र

6/7

पात्रैः कृतं लास्यमेव हराग्रे हरानुग्रहार्थं तमुग्रं विलोक्यापि लोकोत्सवायायमेव ॥७३॥ प्रसूनैः सहायान्ति ते शाखिनोऽपि स्मरन्तीव
रुन्तः शिवे शंकरेति ॥ किमेतद्विचित्रं मयादृष्टमद्य प्रभूत प्रभावा प्रभावस्य भाति ॥७४॥ शिव शंकर शङ्करेति याशुकवाणी शरणं
भवेति च ॥ मुहुरादरतः श्रुता सती सकलापाद्विनिवारणोद्यता ॥७५॥ संकोचेन समागताश्च तरवः शाखाभिरत्यादरात् ॥ उत्फुल्लप्रस
वान्क्षिपन्ति बहुधा तत्तुंगलिङ्गे मुदा ॥७६॥ उच्चैरुच्चरणेन शंकर महादेवेति बिल्वीदलान्यानीतानि गृहाण तानि विविधानीति ब्रु
वन्तो मुहुः ॥ धन्यानि नेत्राणि तदीक्षणेन तदीयशब्दश्रवणेन तानि ॥ श्रोत्राणि धन्यानि मनः पवित्रं तच्चिन्तनेनापि पुनः पुनर्मे ॥
॥७८॥ प्रदक्षिणीकृत्य शिवालयं ते प्रयान्ति तावत्तरवः प्रणम्य ॥ अदृष्टपूर्वं खलु भाग्यमेतत्तवैव भाग्यं सकलं नृपेदम् ॥७९॥
इदं कथं कौतुकमेव स्पष्टं दृष्टं महेशेन मुहुर्मुहुः किम् ॥ तद्दर्शनात्स्याद्धृतं मनोऽपि तद्दर्शनं नेत्रं पुनरेव चिन्नम् ॥८०॥ शुकाङ्गनागान
मिदं मनोज्ञं शिवे शिवे शङ्कर शङ्करेति ॥ श्रुतं मुहुः सादरमेव तत्सं नाचित्रमेतस्य विशेषतोऽद्य ॥८१॥ धन्यं वनं हारमिदं सहारम्
यस्मिन्वने ते तरवोऽपि हाराः ॥ भृङ्गा कुरङ्गाः अपि नेतुरङ्गाः शाङ्गाः प्रसङ्गादपि तेऽद्य दृष्टाः ॥८२॥ नष्टं पातककाननं शिववनध्याने
न तद्दर्शनात् ॥ आपद्राशिलयोऽपि जात इति मे भाग्योदयो जायते ॥ अस्मिन्नेव वने वसामि शिव सा कृत्वा शरीरं परं ॥ यत्रावासम
पेक्षते मुहुरहो दाक्षायणीवल्लभः ॥८४॥ तरवो गुरवो वनेऽधुनास्मिन् शिवपञ्चाक्षरमक्षरं वदन्तः ॥ इदमेव किलातिपावनम्

6/१

व न्मीशानसमर्चनोयतम् ॥ ८५ ॥ अभूतमे पूर्वं खलु सर्वमेतद्गने विचित्रं चरितं पवित्रम् ॥ चिरं चरित्रं खलु नेत्रपात्रं चिनेत्र चित्रं तादृशं पवि
त्रम् ॥ ८६ ॥ धन्यं जगत्त्रयमिदं जगदीति मुक्तिर्भक्तिं विलोक्य सकृदाघुभवं तमेकम् ॥ त्वं पुण्यमूर्तिरसि पुण्यवतां वरिष्ठो निष्ठावशीष्टमधुना
कुरुते कनिष्ठम् ॥ ८७ ॥ शिवाचारनिष्ठो वरिष्ठोऽगरिष्ठाद्गरिष्ठोऽपि निष्ठां शिवाचारपूतात् ॥ समभ्यस्य मुक्तो भविष्यत्यतस्त्वं गरिष्ठोऽसि गौरी
पतेः पूजनेन ॥ ८८ ॥ नमस्कारमयस्त्वयं सकलदेश एवं कृतो यदस्त्वमसि भाग्यवानमित पुण्य पूर्णाम्बुधिः ॥ त्वमेव सततं मम प्रिय विधानदक्ष
क्षयं विलोचन विलोकनैरमित पुण्यकीर्णो नृप ॥ ८९ ॥ भूमण्डलं मंडितमेव राजन् त्वया विचित्रं तादृशं न चित्रम् ॥ यतस्त्रिनेत्रो हृदये पवि
त्रे तवास्ति नित्यं गिरिजासहायः ॥ ९० ॥ इत्याकर्ण्य वचस्तस्य वाक्पते भूपतिर्मुदा ॥ शिव धर्मोत्तमः को वा तं वदाद्य विशेषतः ॥ ९१ ॥ शि
व धर्म सुधांभोधि कल्लोलकुलमालया ॥ मम मानसहंसोऽपि विलासं समुपेक्षते ॥ ९२ ॥ इति राज वचः श्रुत्वा पीयूष सदृशं प्रियम् ॥ प्राह गी
र्गिरिया वाचा । शिव स्मरण पूर्वकम् ॥ ९३ ॥ ब्रह्मोवाच ॥ धर्मरत्नखनि रेव भूपते त्वं शिवार्चनरतो यतस्ततः ॥ धर्मतत्वमसकृन्नयामि तत्वत
कृतामित शिवार्चनादिभिः ॥ ९४ ॥ त्वयानोक्तो धर्मः कथमपि न य[illegible]द्याप्यनुदितम् ॥ तथापि त्वद्भक्तिः कथयति परं धर्ममधुना ॥ गुरुः
सामे भूप प्रतिहतमहापापसुकृत प्रपारूपापारव्यसनपरिपाकाहतकृपा ॥ ९५ ॥ धर्मास्तेयमशासको अपि यमस्तावद्विभेत्यन्वहं
येस्तल्लोक निवासिनामपि मुहुर्लज्जा प्रवृद्धाः पुराः ॥ सन्तापोऽपि महीभृतां नृप मुहुस्ते तावदत्युज्ज्वमास्त्वत्पादांबुज दर्शनादपि

भवन्त्येवेति मे प्रत्ययः ॥९६॥ इति तद्वचनं श्रुत्वा राजा सन्तुष्टमानसः ॥ शिवाविद्याप्रभावं मे वदेत्याह विचक्षणः ॥९७॥
॥ब्रह्मोवाच॥ सर्वासामपि विद्यानां शिवविद्या शिरोमणिः ॥ त्वत्प्रभावानुकथनं जायते पुण्यराशिभिः ॥९८॥ मादृशैस्तत्प्रभावो
पि वर्णनीयं कथं मुहुः ॥ तत्स्वरूपापरिज्ञाने तद्ज्ञानमति दुर्लभम् ॥९९॥ तद्ज्ञानार्थं तपस्तप्तं मया नारायणेन च ॥ तथापि सा
न विज्ञाता शिवविद्या महत्तरा ॥१००॥ यद्विद्याभ्यसनेनैव महापातकपर्वताः ॥ विनश्यन्ति न सन्देहस्तूलाद्रिर्इव वह्निना ॥१॥
शिवविद्याप्रभावज्ञः शम्भुरेव न संशयः ॥ तत्प्रभावपरिज्ञानमस्माकमतिदुर्लभम् ॥२॥ पुरा विद्याः समस्तास्ताः ॥ तुषारगिरिक
न्दरे ॥ तपः शिवप्रसादार्थं कर्तुमभ्युद्यतास्ततः ॥३॥ प्रज्वाल्य पावकान्पश्चात्पुरस्तात्पार्श्वयो रपि ॥ दृष्ट्वा भानुं प्रचण्डांशुं तपस्तेपुर्महीपते ॥१०४
युगानामयुतन्तत्र श्रान्तास्तास्तपसा ततः ॥ ओंकाररूपस्तत्रेशः प्रसन्नो मुनिरूपभाक् ॥१०५॥ तमागतं [illegible] समालोक्य विद्यामूर्त्तिरु
वाच तम् ॥ कोऽपि कोऽसि मुनिश्रेष्ठ वदेति मुहुरादरात् ॥ओंकार उवाच॥ ओंकार इति मे नाम मया तप्तं तपः पुरा ॥ शिवविद्यां नासिद्ध्यै
निराहारेण सन्ततम् ॥७॥ अत्रोंकाराभिधं लिङ्गं तुङ्गं मङ्गलदायकम् ॥ तदर्चितं पुरा गौर्या स्वेष्टसिद्ध्यर्थमादरात् ॥८॥ अत्रैव सा तपः
कृत्वा तपसः फलमाप च ॥ शिवार्धाङ्गप्राप्तिरूपं तन्नावद्यापि दुर्लभम् ॥९॥ दुर्लभानि फलान्यत्र सिध्यन्तीति विशेषतः ॥ अत्रैव तप्तं वहु
भिस्तपः पूर्वं मुनीश्वरैः ॥१०॥ वशिष्ठाद्यैर्मुनिगणैः सिद्धैश्च कपिलादिभिः ॥ नारदाद्यैश्च बहुभिर्गन्धर्वैरपि किन्नरैः ॥११॥ गणैश्च

ध्ये

नन्दिकेशाद्यैस्तपस्तप्तं महात्मभिः ॥ हिमाद्रिणा तपस्तप्तं मेरुणा मन्दरेण च ॥१२॥ विन्ध्येन गन्धमादेन श्रीशैलेन विशेषतः ॥ शेषेणात्र तपस्तप्तं तथा कर्कोटकेन च ॥१३॥ तप्तं नारायणेनापि तप्तं कमलया तपः ॥ इन्द्रेणापि तपस्तप्तं शच्या तप्तं तपः पुरा ॥१४॥ ब्रह्मणापि तपस्तप्तं सरस्वत्या तपः कृतम् ॥ अन्यैश्च मुनिभिर्देवैर्देवदारैस्तपः कृतम् ॥१५॥ शिव विद्या ज्ञान सिद्ध्यै कल्पावधि महत्तरम् ॥ तथापि तत्परिज्ञानमज्ञातं तदनन्तरम् ॥१६॥ ज्ञा
पुनर्घोरतरं तप्तं तैः कल्पशतमादरात् ॥ तेनापि तपसा शम्भुर्न प्रसन्नस्ततः परम् ॥१७॥ ततः परस्परविचार्यार्थमुपविष्टाः शिवालये ॥ संक्षीणास्तनवः कृतेन तपसा धन्याग्निमध्ये सदा वैरूप्यं समभूत्तनुष्वतितरामन्नाद्यभावादिह ॥ न प्राप्तं फलमल्पमप्यनुदिनं क्षीणं किलायुः पुनः ॥ नायुः किं तपसा विनेयमधुना किं तेन कृत्यं क्वचन ॥१८॥ येनानन्दघनस्यतस्य परमा विद्या न लब्धा नवां तद्ज्ञानञ्च विमुक्तिदं कथमपि प्राप्तं परानन्ददम् ॥ तेन त्याज्यमिदं वपुः पुनरपि ज्ञानार्थमेवादरात् यत्नः कार्य इति प्रधावति मनः सा दुर्लभा सर्वथा ॥१९॥ तपः शिवाराधनमित्यवैमि तद्दुर्लभं तेन कृतं फलन्न ॥ नाल्पं तपस्तत्फलसाधनञ्च सा दुर्लभा तेन मनोऽपि दूनम् ॥२०॥ सन्तुष्टं न मनः कृतेन तपसा लब्धं फलन्नेत्यतः किं तेनापि फलेन जीवनधन त्यागोपयुक्तेन वा ॥ त्यक्तेऽपि प्रसभेन तेन पुनरा(कां)क्षा न शांता ततः सर्वं व्यर्थमभूत्तपः फलमिदं किं जायते तत्वतः ॥२१॥ ततः स्वरूपं शिवपूजनं चेत्तज्ज्ञानसिद्धिं न करोति तर्हि ॥ किमास्ति तत्साधनमित्ययञ्च भूयो विचारः प्रकृते प्रवृद्धः ॥ अलं विचारैरपि

न कां

69

दुष्करैस्तैस्तदज्ञानसिद्धिः ~~कुम~~ कथमथवा स स्यात् ॥ अपार पापान्धनपहारकेण स्वल्पेन तावत्तपसाधुना किम् ॥ २३ ॥
अतस्तपो घोरतरं विसृज्य तज्ज्ञान वार्त्तामपि दूरतोऽपि ॥ आशां विहायापि फलेषु तेषु शिवं स्मरामः शिवमर्चयामः ॥ २४
अलभ्य लाभाय तपः कृतञ्चेत्किन्तेन ~~[illegible]~~ तत्सिद्धिरपेक्षिता स्यात् ॥ किं चन्द्रमादातुमपि प्रवृत्तो गृह्णाति तं कुब्जतरोऽतिबालः
॥ २५ ॥ न बालवत्क्रीडनमेव किन्तु तपोऽपि तज्ज्ञान फलस्य लाभः ॥ कथं भविष्यत्यधुना कृपाब्धिः ~~[illegible]~~ शंभुः
पन्तत्तपसा न तप्तः ॥ २६ ॥ सम्पूर्ण कामोऽपि महेश्वरो सौ पुनः पुनर्वाञ्छति तत्फलानि ॥ दातुं पुनः पूजनमेव लिङ्गे बिल्वा
दिभिः भूति विभूषणानाम् ॥ २७ ॥ भक्तिर्या व्यभिचारिणी हृदि मुहुः सा वह्निकल्पा मनः सन्तापाय विनिर्मिता भगवता तद्वि
लया केवलम् ॥ भक्त्या प्रीतिरतः परं खलु सदा सा दुर्लभा देहिनां सा चेन्मोक्षपदं ददाति गिरिशो सा याचनीया मुहुः ॥
॥ २८ ॥ प्राप्याप्यव्यभिचारिणी मति दृढां भक्तिं मुहुः सादरं यो लिङ्गार्चन तत्परो न विलसद्बिल्वी दलैः शङ्करे ॥ नस्यात्तस्य
गतिः कदापि न भवत्येवेति मन्ये ततः शर्वाराधनमेव साधु विविधैर्वि~~[illegible]~~ ल्वैर्विधेयं नवैः ॥ २९ ॥ अनल्पकल्पेषु तपः कृ
तञ्चेत्पूर्तं मनः स्यादिति पूतचित्तः ॥ करोति बिल्वादिभिरादरेण महेश लिङ्गार्चनमेव मर्त्यः ॥ १३० ॥ किं किं लिङ्गसमर्चने
न फलदं प्राप्तव्यमित्यादरे हारे हार समन्विते मुहुरपि श्री बिल्वपत्रादिभिः ॥ भक्त्या पूजितएव तावदसकृद्यद्वा सकृत्तत्क

X पं.११ "मेतन् मनः स्यात्तदा कालभीतिः कुतः स्यात्। वयं शंकराराधनेनैव कालं ॥ नयामो नयामो नयामो वयश्च ॥१०॥ इदं चेद् वयः शंकराराधनेन क्षयं याति पुण्यैरगण्यैस्तदा किं ॥ सकालोऽपि भीतो न नित्यं प्रपन्नः ॥ भवे दस्मदीयान्तदाऽस्मान्विशिष्य ॥ ११ ॥ ~~महाकालकालं विनासकृन~~"

स्य

लंदाख्यत्येव शिवापतिः करुणया कारुण्यपूर्णार्णवः ॥१३१॥ इति श्रीशिवरहस्ये हराख्ये तृतीयांशे उत्तरार्धे याज्ञवल्क्यजनकसंवादो नाम त्रयोविंशोऽध्यायः

याज्ञवल्क्य उवाच ॥ इत्युक्त्वा पुनरिन्दुशेखरपदांभोजार्चने नात्यादरात्पूतास्तत्तपसा पुनः श्रुतिलसद्कृत्यापि पूताः परम् ॥ लिङ्गाराधनमेवकृत्यमिति ते सर्वे प्रवृत्ताः परं तल्लिङ्गार्चनसाधनेषु विलसद्बिल्वोदलेष्वन्वहम् ॥१॥ शिवपूजनमेवकेवलं सकलार्थप्रदमर्थसिद्धिभिः ॥ तदपेक्षितमेवसाधनं विविधं तावदशेषसिद्धिदम् ॥२॥ मुनयोऽपि पुरा महेश्वरं नवबिल्वीदलगन्धचन्दनैः ॥ अभिपू[illegible]ज्यानि जोसितं मुहुः प्रतिपन्नाः खलु शांभवं पदम् ॥३॥ यं यं कामं येमनस्येवकृत्वा बिल्वैरीशं पूजयन्त्यादरेण ॥ तेतं प्राप्य विच्युतं प्राप्नुवन्तः कामानन्यान्मोक्षमन्ते प्रयान्ति ॥४॥ सन्तः परं शंकरमर्चयन्तः कृतान्तवार्तामपि ते कदापि ॥ नाकर्णयन्त्येव न दुःखभाजो भवन्ति सर्वे गतदुःखभाराः ॥५॥ संसारसागरविशोषकमिन्दुमौलिपादारविन्दभजनं प्रवदन्ति सन्तः ॥ तस्माद्विहाय सकलं विषयं विशोध्य गौरीपतिं सततमाशु वयं भजामः ॥६॥ दूर्वाङ्कुरै[illegible]रपिनवैर्नव [illegible] बिल्वपत्रैर्गङ्गाजलैरनिलशीतलपुष्पयुक्तैः ॥ अभ्यर्च्य लिङ्गमिह शाङ्गमनङ्गशालुं गौरीपतिं सततमेव वयं भजामः ॥७॥ उद्धूल्य गात्रमसितेतरभातिपूतभालत्रिपुण्ड्रललिताङ्गविशेषकान्ताः ॥ रुद्राक्षभूषणविभूषितपूतदेहाः श्रीविश्वनाथचरणौ शरणं व्रजामः ॥८॥ अलं देवभावेन जन्मान्तरे वा मनुष्यत्वमासाद्य तत्तद्द्विजत्वम् ॥ महाशाम्भवत्वं प्रपद्याम्बिकेशं भजामो महाकालदुःखापनुत्त्यै ॥९॥ यदा शंकराराधनासक्तचितः ~~क्षणं वा क्षणार्धं स स्व प्रबुद्धः ॥ तमासन्नपत्येव कालोऽपि नित्यं प्रप~~

६०

नोऽभवेदस्मदीयांतदस्मान्निसेव्यः ॥११॥ महाकाल कालार्चनासक्तचित्तः क्षणं वा क्षणार्द्धं य एव प्रबुद्धः ॥ तमाराधयत्येककालोऽपि नित्यं सभीतस्तदीयानतोऽराधयेच्च ॥१२॥ कः काल काल भजनानुरक्तो न लोके शोकापहार करणे यताचित्तवृत्तिः ॥ सर्वाघनाशक इति प्रथितः स शोकान्निर्मूलयिष्यति सदा शिव एव नित्यम् ॥१३॥ विशोकत्वमाप्नोति स स्वन्महेशम् समाराध्य पत्रैर्जलैर्वा पवित्रैः ॥ ततः कालभीतिर्न जातु प्रजाता यया श्रूयत्यव ध्रुवं पुनर्नैव मृत्युः ॥१४॥ महामृत्युमृत्युं महादेवमेकं समाराध्य कोपान यात्येव मुक्तिम् ॥ जराजन्मदुःखादिसंहारहेतुर्यथाधीश केनुहेता मोक्ष हेतुः ॥१५॥ जानिं प्राप्नुवन्त्येव भूयोऽपि मर्त्याः शिवाराधनाभावसम्भाविताः ते ॥ जरा मृत्युमन्तो प्रपन्ना भवन्ति प्रपञ्चयामं मुहुः सद्म दुःखैः ॥१६॥ अविज्ञेय विपुलेश पूजाप्रभावस्तमेवादरादन्वहं मार्गगम्यम् ॥ प्रभावं विदित्वा प्रयान्त्येव शम्भुनादस्थानतो यान्ति यामं पुरन्तु ॥१७॥ इतीनो निश्चित्य सर्वे भस्मोद्धूलितविग्रहाः ॥ रुद्राक्षमालाभरणाः शङ्करप्रवणास्तदा ॥१८॥ ततः परन्तु मुनयः सर्वे कृतनिश्चयः ॥ शङ्करं शंकरं ज्ञात्वा पूजयामासुरादरात् ॥१९॥ बिल्वपत्रैः समाराध्य जलैरपि विशेषतः ॥ तैः कालयापनं नाम कृतमेव प्रयत्नतः ॥२०॥ अतः परम्भवद्विष्ट्वा जयो मोहो विशेषतः ॥ भजनीयो महादेवः सर्वसिद्धिप्रदायकः ॥२०॥ सिद्धिप्रदे महादेवे तिष्ठत्य

त्र विशेषतः ॥ लिङ्गे तुङ्गे लिङ्गपूजा विधेया सादरं मुहुः ॥ २२ ॥ न तुष्टस्तपसा शम्भुः न दाने यजने यदि ॥ किन्तु लिङ्गार्चनेनैव प्रीतो भवति
शंकरः ॥ २३ ॥ निधानकलशाकारं शिवलिंगार्चनं परम् ॥ कस्त्यक्त्वा तपसे यत्नं करोति तदिहाद्भुतम् ॥ २४ ॥ कः करस्थसुधातुल्यं शिव
लिङ्गार्चनं जनः ॥ त्यक्तुमिच्छति मूढात्मा स को वा तन्न विद्महे ॥ २५ ॥ सुधां मुखस्थितां त्यक्त्वा तृषितः पथिकः पथि ॥ को वा रासभमूत्रा
दिपानाय यतते जडः ॥ २६ ॥ न जानीमो लोके कमपि गिरिजाकामुकपद प्रसादार्थं यत्नं कथमपि करोत्येव न मुदा ॥ तमेकं हित्वा यः श्रुन
कशुनको योगजनितो मलाशी पापानामपि खलु स राशिः र्भ्रमामपि ॥ २७ ॥ महेश्वरकथारसः सरसमानसे केवलं सुखानि जनयत्यहो
मुहुरपाररूपाण्यपि ॥ क्षणार्धमपि शंकरो यदि मुदा हृदंभोजगस्तदा खलु महोदधिः किमिति न प्रवृद्धो भवेत् ॥ २८ ॥ अपारसुखरूप
तामुपगतोऽपि मुक्तो भवेदुमापतिपदाम्बुज स्मरणलालसे मानसे ॥ कदापि न जनिर्भवेन्न च जरापि मृत्युर्भवेदिति स्मरहरं हरं स्मर
पुनः पुनः शंकरम् ॥ २९ ॥ नेयं वयः खलु सदा शिवचिन्तनेन लिङ्गार्चनेन चलसत्त्व विल्वपत्रैः ॥ आशास्य मीश चरणस्मरणं क्षणे वा कृत्यं
तदेतदिति मे मनसः प्रकाशः ॥ ३० ॥ क्लेशो ह्यल्पो विल्वपत्रार्चनादौ लिङ्गं तुङ्गं दुर्लभं नार्मदं न ॥ रेवातीरे रोशलिंगार्चने न प्राप्या मु
क्तिर्दुर्लभा प्रीतितन्मे मत्यमि ॥ ३१ ॥ हा हन्त हन्त कथमेव मिदं विनीतमायुः शिवार्चनविहीनजनैर्वृथा स्यात् ॥ इत्यादिवेदशिखरोक्तिरपि श्रु
ता सा सर्वात्मना न गुणिता न विचारितापि ॥ ३२ ॥ दुःखेन केवलमतः परमास्ति कृत्यं किन्नो वयोपि गलितं गलितं च पापम् ॥ हा

62

हन्त हन्त वत हन्त नितान्तमनो स्वान्तं शिवार्चनपरं कथमप्यजातम् ॥ ३३ ॥ श्रीकाल काल करुणा तरुणा किमासीत् अन्तेवयस्यवश
शरीरमस्य ॥ कर्तुं न वाञ्छति मनोऽपि शिवार्चनानि बिल्वादिकानयनमस्य न शक्यमेव ॥ ३४ ॥ अरण्ये सञ्चारे बलवति शरीरे शिव
श्रम कृपा कुतो बिल्वानां ग्रहण समये स्याच्छ्रम कृपा ॥ इदानीं दृष्टिर्वा प्रसरति न बिल्वेषु बहुधा किमस्माकं भाग्यं वयसि विगते यौ
वनवने ॥ ३५ ॥ महादेवास्माकम् कथमपि भवत्पूजन मतिर्न जाता जाता साऽठरपिठरी पूरण करी ॥ पुरातेनापार व्यसन कदनार्तेन मनसा
तथानीता सापि स्मरहरहतोहं मुहुरहो ॥ ३६ ॥ अहो माया मोहः कथमपि न नष्टः कथमपि स्मराराति र्ध्यातो न खलु मुहुरत्यादरहरेः ॥
स्मरापस्मारार्तं स्मरशर विहारा करपरं मनो दूनं नूनं स्मरहर हरो सीत्यपि हरा ॥ ३७ ॥ नरेवातीरे वा स्मरहर विहारे मम कदा मुदा लिङ्गे
तुङ्गे नव विमल बिल्वीदलयुते ॥ मनो वृत्तिर्नेनो कथमपि भविनो शिवकथा धारेणीमङ्कानं कथमपि न भाराय मनुते ॥ ३८ ॥ कृतान्तोपि
दूतैः प्रमत्तैः प्रवृत्तः कथं वा न नेष्यत्यपाराघयुक्तम् ॥ तदा मोचकः कोऽपि नास्त्येव लोके भवन्तं विना तावदर्धेन्दुमौले ॥ ३९ ॥ शिव
श्रीमहादेव गौरीपते, मां त्वदीयं नयापार संसारपारम् ॥ भवन्तं विना कोऽपि पाता न मे स्यान्न माता पिता वा न दाता महेश ॥ ४० ॥
अघोराहि संसार वृत्तिस्त्वपाराहराचार हीनस्य हारानुकारः ॥ कदाप्यस्य नेत्येव संसारपारं नयाशु प्रपद्ये शरण्यस्य प्रपद्य
॥ ४१ ॥ कदा वा मुदा वा महादेव देवे प्रपा[illegible]लम्भनेनापि कालो विनेयः ॥ स्वकालोऽपि नेयः सकालोऽय[illegible]मासी

रिति श्री महाकाल कालानुवेलम् ॥४२॥ अयं पुण्य कालो महाकाल काल स्मृतो येन कालोऽस्य भागोऽयमासीत् ॥ अयं शोभनस्यापि
कालोऽयमासीद् इतोऽभून्महेशः स्मृति मुक्ति दान प्रवीणाः ॥४३॥ संसार मोह प्रवाहो विनष्टः क्षणार्धादिहार्धेन्दुमौले कृपाले ॥
अयं भाव लीलाभिरित्येव कुर्म्मः शिवाराधनं बाल विल्वीदलाद्यैः ॥४४॥ संसार चण्ड खर घोर कर प्रचारैस्तप्तं शरीरमिदमेतदतः परं मे
गौरीमनोहर तरु प्रवरोपकण्ठ छायामुपेत्य निवसामि खलु प्रकामम् ॥४५॥ दुर्वृत्तवृत्तशमनोपशमाय सर्वं शश्वत् सुस्वत् समीहित समर्पण कारणे
षु लिङ्गेषु फुल्ल कमलैः कमलैश्च विल्वैरभ्यर्चयामि शितभाति विभूषिताङ्गः ॥४६॥ नातः परं कृत्यमुमासहाय पादारविन्द भजनादपि किंवद
न्यत् कृत्यं विशिष्यं सकलोऽसि दानदक्ष दाक्षायणी रमण मक्षर माश्रयामः ॥४७॥ गौरी मनोरमया ते चरणारविन्दमस्माकमस्तु शरणं तरुणे
न्दुमौले ॥ नक्षत्र मण्डल निभामल कण्ठमाला लीलावलोकन विलोचन काल लोलः ॥४८॥ अद्याप्यधुनापि यदि मानसमीशपाद पद्मार्चने
रतमतः परमस्मदीयम् ॥ संसार दुःखमखिलं गतमेव जातं तज्जन्म कृत्यमपि तावदतः परं किम् ॥४९॥ जन्मोत्तरं यदि कदाचिदपि स्मरारि शम्भो
पदारविन्द मकरन्द रसाभिषेकः ॥ चित्तभ्रमद्भ्रमर पुङ्गव मस्तके स्यात् स्यादेव तर्हि भव बन्ध विमोचनञ्च ॥५०॥ अद्याप्यघौघ विलयाय मनः
~~[illegible]~~ प्रवृत्तिर्नासीत् पुरा बहुतराघ समन्वयेन ॥ किन्तावतापि सकृदप्यधुनापि भक्त्या सद्यः स्मृतो हरति ~~[illegible]~~ जन्मभयं महेशः ॥५१
कृपाम्बुधिपूर्णः स्मरहरः स्मृतोऽपि कदाचिदप्यादरतोऽनुकाम् ॥ कृतान्यपाराण्यपि पातकानि हरत्यवश्यं हरस्व यस्मात् ॥५२॥ शिवा
622

र्चनाकारमहाग्निदग्धमपारपापोरुपतंगजातम्॥ भवत्यवश्यं तत एव नित्यं महेश्वराराधनमेव कुर्म्मः॥५३॥ शिवपूजनरूपमौ
षधं हृदये यस्य निविष्टमेकदा॥ तदपारमहाभयापहं महतोत्येव मतिर्ममाधुना॥५४॥ करुणाकरतामहेश्वरे विदिता यद्यपि सर्व
पापिसा। अनुकूलतया शिवार्चने ऽप्यनुवृत्ता न बभूव दुर्मतेः॥५५॥ सुलभेऽपि शिवार्चने रतिः सुलभा नेति न चित्रमेव हि॥ सुलभ
मुक्तिमभाग्यसंगमे सुगमं भाग्यसमागमात्खलु॥५६॥ अद्यापि शंकर पदांबुज पूजनाय चित्तं प्रवृत्तमपि नैव कृतार्थमासीत् प्रत्यूहकोटिसहि
ते मनसि प्रवृत्ते क्लिष्टेन तत्फलमपि विघ्नतामासु सिद्धिम्॥५७॥ धन्यास्ते शिव हृदि सन्ततं शिवपदांभोजं निधाय दरा दानंदामृत
धारयापि परया गम्भीरया सेवनम्॥ कुर्वन्तो विरतिं नयान्ति सुकृतै रधन्ना हीनै र्मुहुः॥ तद्भाग्यं भुवनेषु दुर्लभतरं तद्भुक्तिमुक्ति
प्रदम्॥५८॥ निधाय हृदि शंकरं यदि विधाय पूजां मुहुः प्रनृत्यति महेश्वर स्मरहरेति हारः परम्॥ तदा परमवाप्नुयाद्गिरिशपादु
काराधनप्रसादमतिदुर्लभम् शुभदमद्भुतं संततम्॥५९॥ तिरस्करोत्येव भयं यमादिभिर्विनापि तावत् सकृदादरेण॥ स्मृत्वा
सकृद्वा शिवमादरेण प्रयाति दुःखौघमहाब्धिपारम्॥६०॥ दुःखानि नैव गयायत्यपि पातकानि घोराण्यपार विविधानि
व लक्षयानि॥ स्मृत्वा सकृद्गिरिशपादरजः प्रसन्नं संसारशोकपरिहारकरं स्मरारिम्॥६१॥ अपारपापौघलयाय साम्ब
यं लिङ्गार्चनं कर्तुमपि प्रवृत्तम्॥ प्रबोधयत्येव शिव प्रभावः प्रभावमाधापरिपाकहीनम्॥६२॥ मुक्त्यङ्गनानपूयकच्च

623

लोके शिवार्चनं तावदिति स्मरामि ॥ तदेव सर्वार्थदमेत्ययौमे तदेव तावत्सुलभं पवित्रम् ॥ ६३ ॥ अनायासेनैव स्मरहर पदाम्भोज

भजने विमुक्तिः स्यादेषा कथमपि न केनापि तपसा ॥ अवश्यं तत्तावद्भजनमपि भावस्य भवतो त्यपारानन्दानां निधिरपि स एव स्म

रहरः ॥ ६४ ॥ शिव ध्यान सुधापान धीनानामपि दुर्लभम् ॥ जनानां लोचनं मन्ये धन्यं मान्यं पुनः पुनः ॥ ६५ ॥ शिवनामसुधा

मुहुर्मुहुर्यदि पीता सकृदेव वा तदा ॥ सकलाघ विपर्ययो भवेदपि मुक्तिश्च भवेदपि ध्रुवम् ॥ ६६ ॥ यन्नाम कीर्तन विनोद

रसाभिषिक्ता स्तेतावदन्तक रिपुः प्रमथाग्रगण्याः ॥ सद्यो भवन्ति भवताप विहीन चित्ताः सन्तो विभूति कृत धृत लसत्त्रिपुण्ड्राः ॥ ६७

अस्माकं किमिहास्ति दुष्करतरं लिङ्गेति तुङ्गे मुहुः बिल्वं पल्लवमात्रमत्र निहितं हन्त्येव पापाचलान् ॥ अन्ते दास्यति मुक्तिमेव किमतोप्यन्य

त्फलं वाञ्छितम् तुच्छं वाञ्छति कः फलं विधिहतं ब्रह्मादिकानां हितत ॥ ६८ ॥ वारं वारं शंकरध्यानरूपं पीयूषं चेत्पीतमत्यादरेण ॥

पापैर्भीति नैषयात्येव सत्यं मोक्षश्री स्यादरेणावृता स्यात् ॥ ६९ ॥ न कृतान्त कृतान्त पूजनं कृतमेवेति कृताकृतं कृतम् ॥ कृतमतमत्य

तददकृतं कुरुते तावदत्योप्य विलम्बम् ॥ ७० ॥ इत्युक्ता ते विचार्यान्ते कर्तव्यं शिवपूजनम् ॥ इत्याशु विनिवृत्याश्च तपसो देहशोष

कात् ॥ ततः परन्तु ते सर्वे गत्वा च सुखाहिनीम् ॥ गौरीरमण पादाब्ज निःसृतां ददृशुर्मुदा ॥ ७१ ॥ तत्र स्नात्वा प्रयत्नेन भस्मोद्धूलित विग्रहाः

त्रिपुण्ड्र रुद्राक्षधरा शिवनाम जपोत्सुकाः ॥ ७२ ॥ ययुर्बिल्ववनं सर्वे सर्वाघौघ विनाशकम् ॥ महेश्वर प्रियकरं माहेश्वर समावृतम्

॥७३॥ उत्तुङ्ग लिङ्ग सङ्गेन मनोहर महर्निशम्॥ समर्चितानि लिङ्गानि तानि सर्वाणि शांकराः॥७४॥ एकैक बिल्व मूलस्थं लिङ्गमेकै
कपूजितम्॥ दृश्यते अयुताः सर्वे बिल्वाराधन तत्पराः॥७५॥ तत्र दृष्टाः कश्यपाद्याः मुनयः शिवतत्पराः॥ लिङ्गाराधनमात्रेण सन्तु
ष्टाश्चाग्नि संमिताः॥७६॥ केचिन्नृत्यन्ति तन्मूले शिवाराधन तत्पराः॥ हर शम्भो महेशेति जपन्तः परमंमनुम्॥७७॥ स्तुवन्ति केचिद्गि
रिजा सहाय नमन्ति केचिद्वृषभध्वजकेतुम्॥ जपन्ति केचिच्छिवनाम धन्याः समर्चयन्तो नव बिल्व पत्रैः॥७८॥ समाराध्य गौरीश
पादारविन्दं नवैर्बिल्वपत्रैः पवित्रैः पवित्राः॥ जपन्त्येवनामानि शैवानि नूनं प्रनृत्यन्ति हस्ताग्र संघातनेन॥७९॥ महादेव
देवाधिदेवाधि देव प्रसीद प्रसीद प्रसीद प्रसीदात्॥ प्रसीद प्रसीद प्रसीद प्रसीद प्रसीद प्रभो चन्द्रमौले प्रसीद॥८०॥ अनाथैक
नाथस्त्वमेको महेश स्मरारे पुरस्तादधस्ताच्च पश्चात्॥ त्वमेवासि पार्श्वेऽपि पश्य प्रसीद स्मरन्तं भवन्तं कृतान्तान्तकृत्वम्॥
॥८१॥ भवन्तं विनान्यंतु जाने न जाने मतिस्त्वं गतिस्त्वं पतिस्त्वं महेश॥ पितासि त्वमेवेन्दुमौलेकमीडे भवन्तं विना कोऽपि
नेष्टोऽपि लोके॥८२॥ मदङ्गं चतुङ्गेन लिङ्गेन सङ्गं भवन्तं परं प्राप्नुमेवेति मन्ये॥ इदं बिल्व पत्रावृतं लिङ्गमीश समस्तार्थदा
नोद्युक्तं सर्वदापि॥८३॥ प्रपश्यामि तुङ्गानि लिङ्गान्यभङ्गान्यपाराधि तद्दर्शनेनैव मुक्तिः॥ भवित्री महेशान नूनं न याचे
न याचेऽन्यदन्यत्र वाञ्छा कुतः स्यात्॥८४॥ न चेन्द्रादि लोकेषु वाञ्छा महेश स्मरारे भवत्पादपद्मेश यामि॥ निधिं प्राप्य

कोला मुहुः काय खण्डं स्व तुण्डेन गृह्णाति चण्डाल वृत्तिः ॥ ७५ ॥ सदा भाक्तिरीशान पादारविन्दे समा स्वस्तु नित्यं ममास्त्वस्तु सामे ॥ समर्था हि धर्मार्थ काम प्रदाने तथा मोक्षदाने समर्था महेशा ॥ इति स्तुत्वा प्रहृष्टान्ता नत्वा देवास्ततः परम् ॥ तानूचुः शिव पूजायाः स्वरूपं किमिति प्रिये ॥ ७७ ॥ मुनयऊचुः ॥ साधु पृष्टमिदं प्राज्ञाः शिवपूजन साधनम् ॥ शिवार्चन स्वरूपञ्च वेदोक्तमधुनोच्यते ॥ ७८ ॥ स्नात्वा जलैः समुद्धूल्य भस्मनाङ्गानि सादरम् ॥ अग्निरित्यादिभिर्मन्त्रैः कृत्वा भस्माभिमन्त्रणम् ॥ ॥ ७९ ॥ त्रिपुण्ड्र धारणं कृत्वा कृत्वा रुद्राक्ष धारणम् ॥ बिल्व मूले सन्निविश्य जप्त्वा मन्त्रं षडक्षरम् ॥ ८० ॥ बिल्व वृक्ष नमस्तेस्तु शिवपूजन साधनम् ॥ मूलतो भव रूपाय मध्यतो मृड रूपिणे ॥ अग्रतः शिव रूपाय पत्रे वेद स्वरूपिणे ॥ स्कन्धे वेदान्त रूपाय तरु राजाय ते नमः ॥ ८२ ॥ नमस्ते बिल्व तरवे भानु सोदर ते नमः ॥ शिव पूजोद्यताभीष्ट साधनाय नमो नमः ॥ ८३ ॥ इति संप्रार्थितं बिल्व नत्वा कृत्वा प्रदक्षिणम् ॥ कृताञ्जलि पुटो भूत्वा प्रार्थयेत्पुनरादरात् ॥ ८४ ॥ वेद रूपाणि पत्राणि शिव पूजार्थमद्य ते ॥ प्रार्थयामीति सम्प्रार्थ्य भवेद्गृह्णीत तत्परः ॥ ८५ ॥ रुद्राध्यायं जपन्नेव स्मरन्नेव महेश्वरम् ॥ गृहीत्वा बिल्व पत्राणि ~~[illegible]~~) पूजयेद्गिरिजा पतिम् ॥ ८६ ॥ सुबिल्व पत्र वृन्तेन योजयेल्लिङ्गमुत्तमम् ॥ उत्तानैः पूजयेत्पत्रैः सुगन्धैर्जलान्वितैः ॥ ८७ ॥ यथोत्पन्नेन पुष्पेण पूजयेद्गिरिजापतिम् ॥ सर्वात्मनानन्त हीनं गृहनी पुष्पमर्पयेत् ॥ ८८ ॥

शिवरह० वृन्त हीनानि ~~शाखाणि~~ पद्मानि कुमुदानि नवान्यपि ॥ शिव पूजो पयुक्तानि नान्यानीत्यवधारितम् ॥ ९९ ॥ ~~अ~~ चम्पका मु- ह० त० उ०

१०१ ल्लिका जाती करवीराणि कानितु ॥ यथेष्टमेव देयानि सि~~ता~~ तान्यप्यसितान्यपि ॥ १०० ॥ अर्कं वा करवीरम् वा अ० २४

वकम् कनकमेव वा ॥ दत्वा लिङ्गे शिवम् स्मृत्वा भक्त्या पापैः प्रमुच्यते ॥ १०१ ॥ नवाल्पैर्विल्वपत्रैः पूजयित्वा

महेश्वरम् ॥ ब्रह्महापि विमुक्तः स्याद्[illegible] इति रुद्राक्ष भूषणः ॥ १०२ ॥ उद्धूल्य भस्मनाङ्गानि धृत्वा तिर्यक्

त्रिपुण्ड्रकम् ॥ विल्व पत्रैः समभ्यर्च्य मुक्तो भवति मानवः ॥ १०३ ॥ भक्त्या दत्वा महेशाय कोमलं विल्व

पल्लवम् ॥ कैलासं समवाप्नोति गृहं गृहपतिर्यथा ॥ ~~१०४ ॥ भक्त्या दत्वा महेशाय कोमलं विल्वपल्लवम्~~ ॥

~~कैलासं समवाप्नोति गृहं गृहपतिर्यथा~~ ॥ १०४ ॥ सानि पल्लाण्यनेकानि प्रसूनान्यपि कोटिशः ॥ विल्वपत्रा

र्पणेनैव तुष्टो भवति शङ्करः ॥ १०५ ॥ एकस्य विल्वपत्रस्य शिवलिङ्गे प्रदानतः ॥ यत्पुण्यं ~~समा समा~~ सम

वाप्नोति तद्वेद गिरिजापतिः ॥ १०६ ॥ विल्व पत्र प्रदानस्य पुण्यं मे तावदित्यपि ॥ वेदैरपि न विज्ञात

मन्येषान्तत्र का कथा ॥ १०७ ॥ विल्वे भस्मनि रुद्राक्षे शङ्करस्य यथा रुचिः ॥ ~~तथा नान्येर्भवान्या-~~

~~त्र तद्द्रव्य न रुचिर्भवेत्तु ॥ १०८ ॥ आरण्यानि स्वपुष्पाणि सपत्राणि विल्वपत्राणि तेष्वपि ॥ अतिप्रीति~~

तथा रुचिर्भवान्यां च तदन्यत्र रुचिर्नतु ॥८॥ अखण्डानि सखण्डानि बिल्वपत्राणि तेष्वपि ॥ अति प्रीतिरखण्डेषु दुर्लभान्येव तानि तु ॥९॥ लिंगानि दुर्लभा
न्येव बिल्वपत्राण्यपि स्वतः ॥ सुलभानि भवंत्येव कचिद्भाग्यवतां नृणाम् ॥१०॥ नवानि बिल्वपत्राणि दुर्लभानि भवंति च ॥ अनवान्यपि सम्पाद्य पूजयेत्तै
रुमापतिं ॥११॥ बिल्वपत्राणि देयानि शुष्काणि स्फुटितान्यपि ॥ भिन्नान्यपि च वा भागैः छिद्राण्यपि कदाचन ॥१२॥ यावत्तद्ग्रहणं शक्यं तावत्कृत्वैव सादरं
॥ देयं बिल्वं महेशाय तच्चूर्णमपि तत्प्रियं ॥१३॥ दुर्लभं बिल्व बिल्वचूर्णं चेद्बिल्वचंदनमेव वा ॥ दद्यान्नित्यं महेशाय तेन तुष्यति शंकरः ॥१४॥ बि
ल्व पत्रैरनभ्यर्च्य तच्चूर्णैस्तस्य चन्दनैः ॥ न भोक्तव्यं न शेतव्यं कदापि द्विजजन्मना ॥ अपाराणि सुगंधीनि प्रसूनानि महेश्वरः ॥ बिल्वाभावेन गृ
ह्णाति तेन प्रीतः सदाशिवः ॥१६॥ सूर्याभावे यथा ध्वान्तं न नश्येत्तथा सुराः ॥ बिल्वपत्रार्चनाभावे न पापं याति सर्वथा ॥१७॥ बिल्वी तरुजवाते वा
या प्रीतिर्गिरिजापतेः ॥ सा प्रीतिः पुष्पवाते पि शंकरस्य न जायते ॥१८॥ सूर्यः सृष्टो महेशेन ध्वांत संहरणाय सः ॥ बिल्वः सृष्टो शिवेनैव पापना
शाय केवलं ॥१९॥ आदित्यः समभूत्सोमात्सोमाद्बिल्वः प्रजायते ॥ उमया सहितः सोमः सतयोर्जनकोयतः ॥ नीलोत्पलकृतां मालां शंकराय समर्प
येत् ॥ प्रफुल्ल पद्ममालां कुड्मलैनार्चयेच्छिवम् ॥२१॥ करवीर प्रसूनानि प्रक्षिपेल्लिंग मस्तके ॥ मुच्यते पातकैः सर्वैः ब्रह्महत्यादिभिः सुराः ॥
२२॥ करवीर प्रसूनेन यो नार्चयति शंकरं ॥ स दरिद्रो भवत्येव स वंशः प्रतिजन्मनि ॥२३॥ मंदारैकेन केनापि यः सायं शिवमर्चयेत् ॥ समुक्तः पापको
टिभ्यः सत्यमेव न संशयः ॥२७॥ शतपत्र प्रसूनानि यः प्रयच्छति शंकरे ॥ द्रोणपुष्पाणि वा नित्यं स याति शिव मंदिरं ॥२८॥ अर्चयित्वा

महादेवं कुतुकी कुसुमैर्निशि ॥ अरातिभ्यः सर्वथापि न बिभेत्येव मानवः ॥२९॥ दूर्वांकुरैर्नवैः शुद्धैः अभिपूज्य सदाशिवं ॥ सर्व पुष्पार्चन
फलं प्राप्नोत्येव न संशयः ॥३०॥ यवतण्डुल गोधूमैश्च माषैः द्विदलैरपि ॥ सितासितैस्तिलैरीशं सर्षपैश्च समर्चयेत् ॥३१॥ प्रियंगुभिश्च
नीवारैः शामाकैः शालिभिस्तथा ॥ अणुभिश्च समाराध्य मुच्यते पाप कोटिभिः ॥३२॥ (नीचे) हिमशीकर संकाशनीर धाराभिषेचनैः ॥ महा
लिङ्ग प्रदानेषु महा पापैः प्रमुच्यते ॥३४॥ (ऊपर) दध्ना क्षीरे घृतेनापि मधुना सितयापि च ॥ समभ्यर्च्य महादेवं मुच्यन्ते पाप कोटिभिः
॥३३॥ क्षीराज्य मधु धाराभिः योऽभिषिंचेदुमापतिं ॥ स एव हयमेधादि याग कोटि फलं लभेत् ॥३५॥ आकल्पार्जित पापना
शकमिति ज्ञेयं शिवाराधनं सामान्येन तदाप्य खण्ड बिल्वलताङ्कुल्योद्दलैश्चेत्कृतं ॥ तत्किं किं फलमातनोति बहुधा तन्नैव जानेऽति
जं दास्यत्येव पदं सदा शिव इति ख्यातं तदन्यत्तथा ॥३६॥ मुक्तिः प्रसाद मार्ग प्रथितमणिलसद्दीर्घ सोपान मुक्तिः भुक्तिः श्रीपति
तेन पूजित शिवाकांतांघ्रि पङ्केरुहे ॥ सा भक्तिर्यदि बिल्व पल्लवलसन्मल्ली प्रसूनार्पिता शंभो लिङ्ग वरे तदार्जितमिदं त्रा
वज्जगज्जायते ॥३७॥ धन्यैर्जन्म सहस्र साधित महा पुण्यार्पणैः केवलं भक्तिः शंकर पाद पद्म भजने तावत्परं लभ्यते ॥ सा
लब्ध्वा जननादि दुःख निकरं हन्त्येव हन्त्यापदां राशीनप्यमितान्करोति परमानन्दाश्रमं सर्वदा ॥३८॥ इति श्री शिवरहस्ये
हराख्ये तृतीयांशे उत्तरार्धे याज्ञवल्क्य जनक संवादो नाम चतुर्विंशोऽध्यायः ॥२४॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥=॥

^पं-११ परमुदार गौरीकर ॥ प्रसार चतुरा हरा दुरविहार हारं परं ॥ ११ ॥ कदापि हर हारता न सुविचारता न लया ॥ किमेव मुचितामति गिरिकुमारिका कामुक ॥ स्मरज्वर पुरस्सर ज्वर विकार संहारक ॥ स्मर हरः पुनः पुनः स्मर पुनः पुन"

याज्ञवल्क्य उवाच ॥ इत्युक्तमुनिवाक्यानि श्रुत्वा सन्तुष्टमानसाः ॥ शिवलिङ्गार्चनोद्योगं चक्रुः सर्वे सुरास्तदा ॥१॥ भस्मनोद्धूल्य सर्वाङ्गं कोमलैर्बिल्वपल्लवैः ॥ कमलै रमलैः कालैः पूजयामासुरीश्वरम् ॥ उत्फुल्लनीलोत्पलमालिकाभिः सहस्रपत्रैः शतपत्रपुष्पैः ॥ प्रफुल्लमल्लीकरवीरजाती प्रसूनवृन्दैरपि पूजितस्तैः ॥३॥ द्रोणैरर्कैश्च पङ्कैः कुन्दपुष्पैर्मन्दाराद्यैर्बाणपुष्पैरपारैः ॥ धत्तूराद्यैरर्चितश्चन्द्रमौलिर्बालोत्फुल्लैः केतकीपुष्पसंघैः ॥४॥ कस्तूरिका संयुतचन्द्रभाग पाटीरसारैरपि लिङ्गपूजा ॥ कृतासुरैस्तैर्द्धवनेन पूजा कृता महेशस्य कृतान्तभीतैः ॥५॥ घनसारागोरिप्रभृतदीपैर्मधुरान्नैरमितैः सिताभिषिक्तैः ॥ दधि दुग्ध विशेषसारयुक्तैरुपहारोऽपि शिवाय कल्पितस्तैः ॥६॥ सुधाधाराहीरां नवकुसुमगन्धोत्करयुतां मुहुर्दत्तां दत्तं वसनमपि नीराजनमपि ॥ महाहारैर्हीरैर्हरहर गृहाणेति बहुधा प्रसूनानि क्षिप्तान्यमलमणियुक्तानि गिरिशे ॥७॥ सुवर्णरत्नाभरणान्यपाराण्यनेककौलोत्तरपट्टकूलैः ॥ संछाद्य दत्तान्यपि लिङ्गमूलं तल्लिङ्गपार्श्वेषु विशेषतस्तु ॥८॥ सुरत्नदण्डार्चितचामराद्यैः छत्रैरपारैर्विमलेन्दुतुल्यैः ॥ समर्चयामासुरुमासहायं प्रणम्य च नृत्यं च कृतं मुहुस्तैः ॥९॥ ततः परं तुष्टुवुरादरेण सुवर्णवर्णं गिरिजासहायम् ॥ सायन्निरस्ताखिलमायिमायं स्वमायया सप्रियमप्रमेय ॥१०॥ देवा ऊचुः ॥ अपारकरुणाकर स्मरहरामराधीश्वर स्फुरदुरःसर प्रवरहीरहाराकर ॥ विचारय पुनः पुनः^ हरिताम् ॥१२॥ असह्य जनिदुर्दशां हर जरातिभारं हर प्रसह्य हर दुःसहं मरणकारणं संहर ॥ यदेतदपकारकं तदपि पापरूपं हर

श्रीवर्‍ह०२ १०२ स्मर स्मर हरार्चन प्रवणमेव मे मानसम् ॥१३॥ अनाथजननाथता कथममुं सनाथाधुना तवापि कथयास [illegible]
[illegible] ॥ अस्वयम्बानि सख्य कृष्णनिजराज्यपर्यार्तायमे ॥ कदापि काथितान सामयिकरर्थनायामयाधिकमर्थमतीथितिर्थ्य
यां कथयतीश्वरार्थमुग्धा ॥१४॥ अतः परमपि क्रमो भव भवाब्धि पारं नय श्रियासदय सादया मायिनकिं विधेयात्वया ॥ न कोऽपिद
यनीयतामुपगतोऽपि लोके मयि स्थिते सति सतीपतिन्नतविद्धूनमाने सदा ॥१५॥ इति वद दयार्द्रता कु च महेशता वा कथामहाव्य
लय हेतुता कु सहतातदा सा नव ॥ अपार सुख हेतुताप्यमित भाग्य दत्तं क्वथा क दीन बन्धुता पगकुमारिका वल्लभ ॥१६॥ प्रभूतवि
भवे सति त्वयि महेश्वरे दक्षकेशयां अपि मे भूपं भवति दुःखलेशोऽपि वा ॥ प्रपञ्चय दयपाधुनाप्यहह हा कृपाभो निधोविधिर्य
दि वपीतदावद दरिद्रता वा कुतः ॥१७॥ कदापि न समर्पितं यदिमुदा न बिल्वीदलं नवं कमलमेव वा विमल शंग लिङ्गे तरा ॥
भवत्वहह दुःखमप्याभिनवाम्बु बिल्वी दलं यदर्पितमुमापते त्वयि तदादरेण स्मर ॥१८॥ हर स्मर हरामरप्रवर शङ्कुरेत्युच्चकैः ॥
ननात्यमपि किंमया कृतामुमा सहायक्षणम् ॥ स्मरस्मर पुनः स्मर स्मरहराघु गौरीश्वर प्रसीद दयायाधुना हृदयानिर्दयत्वं त्यज
॥१९॥ अपार करुणादिकाखिल गुणौघ पूर्णार्णव क्व तर्पमपि कर्मणा मयि च धार्म्मणानुक्षणम् ॥ अवारणमुमामनोरम
वचारणे कारणे निवारणामिदं कथं कथय विघ्नला याधुना ॥२०॥ भवोद्भव भवत्पुर प्रवरधीर दौवारिकैः पुरन्दरपुरःसरा

हृ०त०उ० अ०२५

दसुरमिदारं वारिता ॥ दयाकलकातरे ष्वमरभावमाशास्महे ॥ भवत्पद सरोरुह भ्रमर भाजो वयम् ॥ २१ ॥ यमादिभिर्नियमैरलं सकल
यागदानैरलं तपोभिरलमप्यलं कलिमलापहं केवलं सधूलममलामल ज्वलनभाल लीलारसैरनुक्षणमयं मयासमयमेव नेयो
वयः ॥ २२ ॥ शारदिन्दुभराति सुन्दरं गिरिजाधीरमनोहरं हरम् ॥ गिरिराजकुमारिका वरं कलये शंकरमिन्दुशेखरम् ॥ २३ ॥ शरणा
गत वज्र पञ्जरं परमच्युतरं परात्परम् करुणारससागरं कलये शंकरमिन्दुशेखरम् ॥ २४ ॥ अमरप्रवरं महेश्वरं रुचिरैः सरहारक
न्धरम् ॥ त्रिपुरासुरमारसंहरं कलये शङ्कर० ॥ २५ ॥ नवकोमल बिल्वपल्लवैः कमलैरप्यमलैरनुक्षणम् ॥ विषमेक्षणमर्चयाम्यहम्
कलये शंकर० ॥ २६ ॥ मनसा वचसापि कर्मणा शिवमस्मत्कुलदैवतं मुदा ॥ कलये पुनरेवसादरम् गिरिजावल्लभमिन्दुशे
खरम् ॥ २७ ॥ न जनिर्न जरा मृतिर्व्यथा कथमप्यर्धशशाङ्क शेखरे ॥ स्मृतिमार्गगते गतागतैः कलये शङ्कर० ॥ २८ ॥
करुणाकर शंकरेति वा हरशम्भो भगवन् शिवेति वा ॥ वृषभेश्वर केतनेति वा कलये शङ्कर० ॥ २९ ॥ त्रिदशाधिपभूति
भूषणा त्रिपुरारे मुरवैरिपूजितां चेकुरु मामकृतामतिक्षणं मयि नित्यं कलये महेश्वरम् ॥ ३० ॥ कलिकाल भयापहं मुदा गि
रिजाकामुकमेकमेकदा कलये कलये पुनः पुनः कलये कौतुकहेतुकं शिवम् ॥ ३१ ॥ शिवमित्यनुवेलमादरादनुवारं गिरिजामनो
हरम् कलये खलु कालकालमां दयया कैवल्यमा विक्रय ॥ ३२ ॥ दयनीयतमोऽस्मि ते दया मयि तावत्प्रसृता दक्षिणाम् ॥

627

क्यतरा तव हानिरातुरे हरहारे कुरु सादरं दयाम् ॥ ३३ ॥ विधूवासोऽपि यथा भवेदतिदृढस्त्वत्पादपद्मे तथा मय्यार्ते शरणागते करु-
णया तावद्विधेया ॥ सामर्थ्यं च कुलौघनाशनकरी सा मुक्तिदानक्षमा सार्यं यत्करणे ममापि भगवन् कांक्षे क्षणानुक्षणम् ॥ ३४ ॥
एकस्तावदहं कलौ कलिमलप्रध्वंसकं शासकं कालस्यापि विनाशकं जनिजरारोगस्य कामान्तकम् ॥ त्वां मत्वा शरणागतोऽस्मि
सर्वेभ्योऽपि निवृत्तमेव तदिदं जानासि गौरीपते ॥
शरणं चान्यन्न जाने मनः ॥ ३५ ॥ कदापि न शिवेतरामरकथासु नास्मादरे न तज्जन कातरं न च तदर्चने कातरम् ॥ मनो मम तरा
दरादिदितिमेव गौरीश्वर त्वया मयि दया कथं कथय सा विधेयाधुना ॥ ३६ ॥ यदेतस्य मनः शिवेतर सुरध्याने रतं तर्हि मे सद्यः
शासयन् मनोहर त्वत्पादपद्मं प्रति ॥ तेन त्वं हरतापि मात्वयि सदा सा राक्षिता स्यान्न चेद्विश्वासोऽपि न तत्र तेन हरता सम्पाद
नीया त्वया ॥ ३७ ॥ एतस्यामनोहरत्वमधुना शक्यं न चेत्तर्हि ते घोरापारससार सागर महासंसार संहारक ॥ कोवास्या
दिति चिन्तयैव मरणे संरक्षणीयस्त्वया ॥ ... कः स्यादित्यपि चिन्तयानुमरणं किं हन्त गौरीपते ॥ ३८ ॥ कल्पान्ते यदि रक्ष
णे तव मतिः स्यात्तर्हि सा किं वृथा कल्पः केन विलोकितोऽपि कलितः कालः सकल्पान्तरे ॥ ... भूयः स्याद्भवास्थितिः पुन
रपि स्यादेव मार्तिः पुनः संसारे सति रक्षणं गतमिदं हा हन्त गौरीपते ॥ ३९ ॥ किं मे दुष्कृतमीदृशं च सदृशो सादुर्दशा
दुर्दशां न प्राप्नोति कथंचिदधुना श्रीविश्वनाथे स्मृते ॥ ... किन्तु दुष्कृतकार्यमप्यहह मे कान्निर्दयो मय्य-

पि लय्येवास्तु मनस्तथापि शरणं त्वं चन्द्रमौले मम ॥ ४० ॥ कदाचिदपि मा दया भवतु मय्युमाकान्त ते भवच्चरण पङ्कज स्मरणमेव जीवनं मम ॥ अनन्य शरणे मयि त्वया दया विधेया न किं विधेय दयया तया किमयमेव नाकाङ्क्षितः ॥ ४१ ॥ आश्रयेयं समपेक्षते खलु दया रत्नं तदाधारता मय्येवास्तु निरस्त पातक कुले भूमण्डले व्यङ्कुरम् ॥ बीजं सञ्जनयत्यपास्त कुशले प्युत्पन्न बीजं तथा किं मय्यप्युपपादितं तव दया रत्नं न मोक्षांकुरम् ॥ ४२ ॥ हे गौरीश्वर हे कृपार्णव दया लेशोऽपि चेत्ते मयि भ्रातः पातक कानना नल शमोपायः स एवाधुना ॥ सिद्धिं किं मदपेक्षितां न जनयेत्किं वा कृतार्थोस्म्यहम् ॥ तेनैवेति न बुद्धिरद्भुततमा सिद्धा न किं मे वद ॥ ४३ ॥ अत्यार्ताय भिषक्त मोसि भगवन्नार्तिश्च संसारजा सा तावत्त्वदवेक्षणादपि लयं प्राप्नोति का तावता ॥ हानिः स्यादधुनापि ते यदि दया न स्यात्तदा जीवनं न स्यादेव ततः परं न ह्यपया कृत्यन्त वा भेषजैः ॥ यावज्जीवति तावदेव भिषजां भैषज्य चिन्ता भवेन्निर्वृत्तं यदि जीवनम् क्व भिषजां वार्तापि कार्ते स्वरैः ॥ कृत्यन्तत्र कृतान्त दूत कृतमप्यार्तं शरीरं तदा तत्कार्तार्त विलोकनेन कथमप्यर्धेन्दुमौले वद ॥ ४५ ॥ दातात्वा दृशोस्ति त्रिभुवन भुवने देय वस्त्वत्र भाति स्तल्लिप्सो वा महेशः प्रशमन समये यार्चकस्तो किलाहम् ॥ मद्दै मुख्यं सुमुखसह सानो चित्तेन्ते यतस्ते देयं सर्वस्वमेतात्किमिति हतमतिः पूर्ण कामस्य शंभो ॥ ४६ ॥ त्वया यदि न दीयते मयि दया पिसा किं दया ॥ स्वयं मयि पतिष्यति प्रियतमे मुहुः सादरम् ॥ ततः परमहो किमित्यपि न चिन्तया किन्तया स्वयन्न यदि दीयते क्वचिदपेक्षिता

स्याद्गतिः ॥४८॥ अनन्यशरणोयमित्यपि मतिर्न किन्तेततः॥ तथापि परिपालने मतिरुदेति तुभ्यमातुरे॥ ललाटलिखिताक्षरम् परिहराति दुष्टं मुहुर्ललाटनयनार्चनेष्वहह कष्टमेवं कथम् ॥४९॥ उपेन्द्रो नेत्राब्जं शिवचरणपङ्केरुहगतम् चकारातः प्रीतः शिव इति च विश्वस्य तु मया॥ नमस्त्वत्पादाब्जे निहितमिदमेवास्य हि धनम्॥ गृहीत्वा व्याकोचे किमिति कुरुषे शंकरफलम्॥५०॥ विमुक्तैरन्यैरहह वचनैरप्यलमलम्॥ महाकालव्यालप्रबलखलकालं भज मनः॥ हितन्तेतेनैव प्रभवति यसम्भावितमपि प्रभुर्नान्याधीनः परमकरुणासागर इति॥५१॥ इति स्तुतो महादेवः प्रसन्नः॥ ददौ सुरेभ्यः परमं सुखं सन्तुष्टाश्चते सुराः॥५२॥ अतः परं भवद्भिश्च विधेयं शिवपूजनम्॥ तेनैव तुष्टो भगवान् अभीष्टमपि दास्यति॥५३॥ ब्रह्मोवाच॥ इत्युक्त्वा भगवान् तत्र प्रणतस्तानिराद रात्॥ अदृश्यः समभूत्तेन ततस्ताः शङ्किता भृशम्॥५४॥ अहो कीर्यं दृष्टो नयनसुभगो रुद्रवपुषा महादेवः सोऽयं किमिति विदितो नेश्वर इति॥ अहोभाग्यन्नासोद्गिरिवरसुताकान्तभजने॥ न बिल्वं वा दत्तं शिवचरणपंकेरुहतले॥५५॥ अहो धिग्धिग्जन्म व्रजतु विलयं यातु निरयं॥ महाकालग्रीवा पततु भटितेव्यक्तमधुना॥ कथं भस्मीभूतन्न भवति शरीरं शिवपदं भवद् कष्टानामपनयनधात्तं क्षणमपि॥५६॥ उमाकान्तं शान्तं सकृदपि नमन्तो विधिमुखैर्मुहुर्देवैः सर्वैरपि सततमर्च्याः सुरपदम्॥ अन्तकाले तीत्यान्ते शिवचरणपंकेरुहरजः समासाद्यानन्दैश्चतुर्दिनमविश्रान्तहृदयाः॥ स्तुतो वायो भक्त्या सकृदपि स एवामरमणिः॥ करोति श्रीमन्तं परमपि सुरस्याधु हृदया॥ अनल्पानल्पान्वा नगमथयायति कारुण्यजलधि

महेशो देवः कथमपि न दृष्टो मुहुरपि ॥ ५८ ॥ न यद्रूपं दृष्टं सकृदपि विरिञ्चीन्द्रादिभिरपि प्रपन्नानामार्त्तिं शमयति सकृद्वा श्रुतमपि ॥ कथं
वारं वारं नयनकमलैरर्चितमपि स्वतो नासीन्मासीन्मनसि शिवबुद्धिः कथमपि ॥ ५९ ॥ निधानं कुलशैले गतः करगतोऽपि हा हा कथं वृथा किमि
ति जीवनं मृतसमानमेवाधुना ॥ महेशाङ्घ्रि-चरणाम्बुज स्मरणकारणे नु क्षणं कथं न कृतमेव समाप्तिरस्त्वकृत्यं कुण्ठिता ॥ ६० ॥ अपारपापाम्बुधिशो
षकस्य महेश्वरस्यार्पित विक्रमस्य ॥ पादारविन्दस्मरणं क्षणं वा क्षणार्धमप्याशु तनोति मुक्तिम् ॥ ६१ ॥ अहो भाग्यं लोके कथमपि कृतान्तान्त
कपदप्रसादार्थं यत्नो न भवति सुराणामपि नृणाम् ॥ कथं वा तद्भूयादिति मनसि चिन्तापि निरता महादेवैश्वर्यं कथमपि न चिन्ता पथि मितम्
॥ ६२ ॥ अपारं यस्य स्यादवितथमजातं सकृदपि प्रभूतं तद्भाग्यं श्रुतमपि न केनापि तपसा ॥ तदैश्वर्ये यत्ता श्रुतिगण विमृग्यापि न ततस्तमी
६९
शानं को वा भजति गिरिजा लिङ्गित तनुं ॥ ६३ ॥ उपेन्द्राद्याः सर्वे मुहुरपि सदा व्यग्रहृदयास्तमेवोग्रं मत्वा कथमपि शिवध्यान निरताः ॥ क
दा को वा भावीत्यपि समय इत्येव शरणं प्रपन्नास्तं देवाः शरणमनुवारं हर महो ॥ ६४ ॥ महामायापाशैर्जगदिह सबध्वा पशुपते विधिं
विष्णुं वायुं हिमकरमुखानप्युरुबलान् ॥ विलासैः कल्पान्ते खलु करुणया मुञ्चति मुहुः पुनर्बध्वा पाशे त्यजति विविधैः क्रीडति
तथा ॥ ६५ ॥ कल्पान्ते निजमायया जगदिदं दग्ध्वा तदा दुर्वह प्रच्छन्नोरु ज्वालातुलीन मशाकाकारान्महीन्द्रादिकान् ॥ दृष्ट्वोड्डीयगतान्मह
प्रलयजापाराग्निदग्धान्मुदा गौरीस्मेरविहारवीक्षणरतः क्रीडाङ्कुरोत्यादरात् ॥ ६६ ॥ रजोवृत्तिर्व्याजे सृजति पुनरित्येवमखिलं जगज्ज

लं लीलां किमपि स यथा पूर्वं पूर्वमुमया ॥ सह क्रीडां कुर्वन्भवति जगदेतत्स गिरिशः ॥ कथं वाध्येयस्यादमित विभवोऽयं भव इति ॥ ६७ ॥
भवन्त्यस्माल्लोका इति भवति सोऽयं भव इति स्वयं यस्माल्लोकान्हरति हर इत्येव भवति ॥ अतः सेयं लीलाप्यनल निटिलस्येति हृदयं वदत्येषा
लीला कलयति कृतान्ताद्भुतभयम् ॥ ६८ ॥ यन्नत्वा मुनयो नयन्ति मनसा तृप्तिं तमाद्येश्वरम् दृष्टुं भाग्यमहो न जातमधुना पापैर्वयं वञ्चि-
ताः ॥ किं दुष्टं निटिलस्थलेऽपि लिखितं धिग्धिग्धिगन्तद्यतो गौरीकान्तपदारविन्दमसकृद् दृष्टं प्रकृष्टं च न ॥ ६९ ॥ अहो मायाजालं प्रस
यमुपयातु क्षणमपि प्रयत्नेनापीह स्मरहरपदांभोजभजनम् ॥ न जातं दुर्जन्म प्रलयमुपयातु प्रसभतः कथं नाशो नासीदस्य कुलमहापर्वतगणे ॥
॥ ७० ॥ अलं काले काले कथमपि कृतं नेशाभजनं महामृत्योर्भीतिर्विलयमुपयात्येव सहसा ॥ यतस्तत्र किं भाग्यं भवति भगवान्कालनयनः
प्रसन्नः किं न स्यादिति खलु मनो व्यग्रमधुना ॥ ७१ ॥ तमालुस्ते धन्यं सततमपि लिङ्गार्चनरतं शिवध्यानानन्दामृतनिधिनिमग्नं मुनिवराः ॥
स धन्यो वन्द्यः स्यादनवरतमर्द्धाङ्ग विलसत्तटित्कूलाटोप प्रतिभट शिवा वल्लभरतः ॥ ७२ ॥ लोके कोऽपि त्रिविष्टपातक गिरिगौरी विहारोत्सव
व्यापार प्रवरं हरं परतरं मत्वैव गौरीश्वरम् ॥ ध्यात्वा तिष्ठति तादृशां यदि भवेद्भाग्यं तदा शंकरध्यानानन्दरसप्रवाह निवहव्याप्तं न चेत्तद्दु
तः ॥ ७३ ॥ शारदाकान्तं कलयति कलौ कोऽपि सुकृती तदीयं किं भाग्यं भवति सफलस्याप्यनुदिनम् ॥ क्व गौरीशध्यानप्रवणमनसः कोऽपि
तुलनां समारूढो रूढस्मृतरुचिर गौरीपरिवृढः ॥ ७४ ॥ स्मृत्वा पुनः पुनरुमापति दिव्य लीलां मत्वा कृतार्थमतिमप्यनुवासरेव ॥ कृत्वा शिवा

र्चनमहर्निशमादरेण श्रुत्वा स्थिताः शिव कथा कथनेन विप्राः ॥ ७५ ॥ याज्ञवल्क्य उवाच ॥ इति ब्रह्मवचः श्रुत्वा स राजा प्रीतमानसः ॥ शि
वार्चनरतस्तत्र चकार वसतिं नृप ॥ ७६ ॥ दारैरुदारैस्तैर्वीरैः कुमारैरपि सादरम् ॥ सहैव शङ्करध्यान निरतो भूपतिर्नृप ॥ ७७ ॥ तस्य भूपस्य
नाहारे दारेष्वपि रुचिस्ततः ॥ कुमारेष्वपि न प्रीतिः सपतः शङ्करादरः ॥ ७८ ॥ स नृपः शंकराकार सुधानिधि विलोकनात् ॥ तल्लीला लोलब-
लोलमालिका समलङ्कृतः ॥ ७९ ॥ यथा यथा शङ्कर पूजने रतिस्तस्य प्रवृद्धा बहुपुण्यराशेः ॥ तथा तथा तस्य निरस्ति खर्वा रे खु दारे ष्वपि
तेऽपि हाराः ॥ ८० ॥ महोदारस्य दारा दरानादरो सौध धराधीश्वरी हस्तीरश्ववीरः ॥ कुमारोऽपि हारत्वबुद्ध्या चकार स्वराकार रत्नास्यैः परा
प्रीतिमारात् ॥ ८१ ॥ विभवस्तस्य भूपस्य सर्वोऽपि शिव पूजने ॥ उपयुक्तस्ततस्तस्य बुद्धिरप्यभवन्मुहुः ॥ भाल लोचन पूजार्थं यद्भाग्यमपि
कल्पितम् ॥ तेन भाग्येन भाग्यानां भाग्यत्वमिति निश्चितम् ॥ ८३ ॥ त एव लोके खलु भाग्यवन्तस्ते पुण्यवन्तोऽपि य एव नित्यम् ॥ येश
ङ्कराराधन साधनेन स्वान्तेन तुष्टाः फलतः प्रकृष्टाः ॥ ८४ ॥ यावन्तः सन्ति लोके शिवभजनरतास्ते शिवं प्राप्य नित्यं भूयस्तत्प्राप्य
पुण्यैः पुनरपि सा शिवं प्राप्नुवन्त्येव धन्याः ॥ ते तावत्सर्वमान्याः प्रतिदिनममितायत्प्रणामाप्लुतेभ्यः पापाब्धिः शोषमेति प्रलयमु
पगतः कोऽपि संसारराशिः ॥ ८५ ॥ ये पूताः शिवविद्यया शिवरताः शाङ्केऽपि लिङ्गे मुहुर्बिल्वीपल्लवमात्रमेकममलं दत्वापि नत्वा
मुहुः ॥ नृत्यन्ति प्रलयानलादपि भयं त्यक्त्वा तदेवादरात् पूज्याः पूज्यतमाश्च दुर्लभतमास्ते भूतले भूपते ॥ ८६ ॥ तं भूपालं दृष्टुमा

६३०

शिवरह०२
१०७

हु०मा०उ०
अ०२५

मायान्ति नित्यन्देवाः सर्वे सादरास्वदारैः ॥ साकं तस्याप्यंगनाभिर्गगानं कृत्वा कालं यापयन्ति प्रमोदैः ॥ ८७ ॥ सम्पूप शिव विषयासतमे पूतः पुनस्तयानिज सुतानपिव्रत विशेषतः पावनान् ॥ स्वदार निकरानपि व्रतविशेषपूतान् मुहुः ॥ विलोक्य शिवपूजनश्रवणमानसोऽभून्नृपः ॥ ८८ ॥ स वंद्यो गन्धर्वैर्भवति सततं किन्नरवरैर्यक्षैः सिद्धैर्देवैरपि भवति पूज्यः शिवरतः ॥ तदा वासो जातः सततमपि कैलाशसदृशः शिवः साम्बो नित्यं निवसति गृहे तस्य नृपतेः ॥ ८९ ॥ कैलास ~~यक्षैः सिद्धैर्देवैरपि भवति पूज्यः शिवरतः ॥ तदावासो जातः सततमपि कैलाशसदृशः ॥ शिवः साम्बो नित्यं~~ वासानिरतोऽपि महेश्वरो भक्त दूत सद्मनि रतयो नियमेन नित्यम् ॥ तत्पुण्यराशिरमितो ववृधे बुधानामाश्चर्यसाधनमभून्नृपवर्य्य चेष्टः ॥ ९० ॥ तच्चे ष्टयापि स्मृतयेष्टलाभः साक्षनाशाय खलु स्मृतास्याम् ॥ सा शांभवानामपि दुर्लभास्यान्न तादृशः शाम्भवपुङ्गवोऽपि ॥ ९१ ॥ अमित विविध भाग्ये भर्गलीलार्चकानां अनुनयकरणेनाप्यन्वहं याति कालः ॥ कलयति खलु कालो व्यादरैः काल कालस्मरण भजन पूतानद्भुतं जातमेवम् ॥ ९२ ॥ जीवंति ते शंकरपादपद्म पूजारता एव निरन्तरायम् ॥ ये कालभीतिं परिहृत्य हित्वा मोहञ्च संसारभयाम्बुराशिम् ॥ ९३ ॥ सोप्यन्तकोप्यन्तकतां विहाय प्युमासहाय स्मरणानुरक्तान् ॥ समर्चयत्येव विहायदूतान् वेषान्तरेणैव निशावसाने ॥ ९४ ॥ शमनोपशमाय सोऽपि नित्यं कुरुते शङ्करपूजनं नृपालः ॥ अमलः खलु लोकपावनः शिवपूजाफलमात्रजीवनः ॥ ९५ ॥ नक्कापि श्रुत

एवम्भूपतिरुमाकान्ताङ्घ्रिपङ्करुह ध्यानाराधनजीवनो जनिजरा मृत्युर्व्यथासाधनः ॥ भूत्वापापावनएव भूतिनिवहे विश्वेश्वराराधनं कुर्वन्नेव जगत्त्रयार्जितजयो जातः सकोऽपि प्रभुः ॥ ९९ ॥ तस्यानन्दघनार्चनेन धनदो दत्वा निधीनन्यात्यतः तौरीशार्चन तत्परः पुनरपि प्राप्नोति भाग्यं नवम् ॥ तेनाप्यर्धशशाङ्कमौलि चरणध्यान प्रवीणो नृपो दृष्ट्वा पापविनाशनाय बहुधा पुण्याब्धिसंवर्धकः ॥ ९७ ॥ सायं शंकरपूजनाय यतते राजा यदा सादरं पुष्पाद्यैरमितैः प्रफुल्लहृदये हरिरेधूप दीपैस्तदा ॥ सर्वे तद्वनवासिनोऽपि मुनयः शार्दूल संघान्विते रेणी गोकुलमण्डलैः सह समागत्यार्चयन्तो भवम् ॥ नृत्यं कुर्वन्ति केचिन्नपवर विहितां शंकरार्चा विलोक्य प्राप्तं भाग्यं किमेतद्बहुविधमिति ते शाङ्करलिङ्गार्चनेन ॥ नत्वा ध्यात्वापि केचिद्गिरिवर तनयाकान्त लिङ्गानि दृष्ट्वा दृष्टाः पुण्यैरपारैरिति खलु विविध स्तोत्र वार्तानुरक्ताः ॥ ९९ ॥ अस्माकमिन्दुशकलाभरणार्चनेन भीतिः कदापि न यमादिति संवदन्तः ॥ नृत्यन्ति शान्त मनसः शिवशङ्करेति स्वानन्दराशि समलंकृत बाष्पपूराः ॥ १०० ॥ हरशंकर शंकरेति भूयः प्रवदन्तः खलु सन्त एव नित्यम् ॥ निवसन्ति शिवालयेषु तेषामभिवृद्धिः खलु सर्वदापि मोदैः ॥ १ ॥ रात्रिं न जानन्ति शिवार्चनेन दिनं न जानन्ति निशामुखं वा ॥ ते सर्वदा शंकरपूजनेन कालं नयन्तीति विशेषतस्तु ॥ २ ॥ बालैरप्यनिशं शिवार्चनरतिर्दारैश्च कन्याकुलैः ॥ सोत्साहैः शिवपूजनोत्थ तलसत्स्थानोत्सवैरपि ॥ ३ ॥ नीतिः काल इति प्रबोधसमयः सर्वोऽप्यबोधः कदा कस्य स्यादिति चिन्तयापि समयः कालं नयन्त्येव हि ॥ विश्वेश्वा

शिवरह० ३
१०८

र्चनजात पुण्य ~~विश्वके~~ विभवैर्जातं जगद्व्याप्तं भूपाले प्रवलेति शाम्भव वैरस्तावद्द्वरामण्डलम् ॥ सर्वं पावनमेव शांभववरापार क्रिया के वलम् तद्भाग्य न कदापि जातमधुना तत्सम्पर्यते शोभनम् ॥ १०५ ॥ इति श्री शिवरहस्ये हरारव्ये तृतीयांशे उत्तरार्द्धे याज्ञवल्क्य जनक संवादो नाम पञ्चविंशोऽध्यायः ॥ २५ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ याज्ञवल्क्य उवाच ॥ स राजा शाम्भवं देशं पालयन्नखिलानपि ॥ चकार शाम्भवानेव पावना न्क्षिव विद्यया ॥ १ ॥ स तावद्धन्य मात्मान मनन्यत महीपतिः ॥ शिवार्चनरतान्दृष्ट्वा सर्वानपि विशेषतः ॥ २ ॥ चतुर्मुखोऽपि स ययौ भूपालेना नुमोदितः ॥ कृत्वा शिवार्चनं नत्वा पुनः पुनरुमापतिम् ॥ ३ ॥ तदानीमागतः शेषः तं नृपं द्रष्टुमादरात् ॥ शिव पूजारतं धीरं शिवव्रत पराय णम् ॥ ४ ॥ तं दृष्ट्वा प्रणतो भक्त्या राजानं शैव पुंगवम् ॥ कृतार्थोऽस्मीति तं प्राह स शेषो भूतिभूषणः ॥ ५ ॥ स भूपतिश्च तं दृष्ट्वा शेषं कृतशि वार्चनम् ॥ शिवनामजपोद्युक्तं प्राह गम्भीरया गिरा ॥ ६ ॥ राजोवाच ॥ कस्मादकस्माद्द्याशु देशादिह समागतः ॥ किं ते व्रतं कुलं किं वा कुल नारी व्रतञ्च किम् ॥ ७ ॥ शीलञ्च तव किं नित्यं महिला शीलमेव वा ॥ केनाचारेण सततं क्रियते दिन यापनम् ॥ ८ ॥ इति तद्वचनं श्रु त्वा वपुषा मानुषेण सह ॥ शेषः प्राहाति विनयात्प्रणम्य गिरिजापतिम् ॥ ९ ॥ शेष उवाच ॥ पाताले वसतिः कुलञ्च नृपते मे पन्नगानां व्रतं शर्वाराधनमेव मत्कुलसती वृन्दस्य तावद्व्रतम् ॥ शाम्भलिङ्ग समर्चनं कुलसती शीलं शिवाराधनम् तन्मे शीलमनाकुलं मम म नः श्रीकालकालार्चने ॥ १० ॥ अन्यः कोऽपि न पूज्यतेऽपि नाश्रीमादन्यः समाराध्यते न ध्यातोऽपि न कीर्तितोऽपि न मनागद्रष्टः स्म

ह० तृ० उ०
अ० २६

तो वा मया ॥ नान्यस्य त्रिदशेषु कस्यचिदपि ज्ञातं स्वरूपं शिवं त्यक्त्वान्यस्य कदापि सादरधिया नामापि न श्रूयते ॥११॥ अन्याराधन

पूजनादि निरतं न स्यान्तमस्मत्कुले दारायामपि सर्वथापि सुतरां पुंसां शिवान्यामरः ॥ नास्मद्दृष्टिपथं प्रयाति सहसा शैवत्वमासाद्य

चेद्यायाति प्रयतो विभूतिसहितस्तेनैव संभाष्यते ॥१२॥ यः कश्चिद्भवतु त्रिलोचनरतो भूतिप्रभाभासुरो रुद्राक्षोज्ज्वलमालिकाति रुचिरो

लिङ्गार्चकाराधकः ॥ लिङ्गाराधनतत्परः शिवकथापीयूषधारादरस्तत्पानादपि पीन एव समया संभाष्यते सादरम् ॥१३॥ लिङ्गाराधन

मन्तरेण न तथा काले वसन्तेपि वा ग्रीष्मे वा विपिनेऽपि नीरनिकरे नीरे करस्थेऽपि वा ॥ तन्नीरं तु न पीयते फलकुलं न स्पृश्यते नेक्षतेना

न्नं वादपि शर्करादिककथा दूरे धराधीश्वर ॥१४॥ तद्वस्त्रं परिधीयते न च भवति श्लाघ्यं शिवायार्पितं तद्रत्नाभरणं परन्नममलं क्षीरं

फलं वा जलम् ॥ तत्सर्वं शिवभुक्तमित्यपि मितं भक्त्या परं गृह्यते तेनैवोदरपोषणादिकमपि प्रायेण मे जायते ॥१५॥ कस्तूरीघनसारकुंक

मरजः पाटीरसारादिकं भूत्या संयुतमेव सन्ततमुमाकान्तायतद्दीयते ॥ लिङ्गे तत्खलु गृह्यते सुकुसुमं बिल्वीदलं वापरं निर्माल्यं शिर

सा प्रगे परमुमाकान्तं समभ्यर्च्य तु ॥१६॥ अस्माकं ऋतुकाल एव वनिता सङ्गोपि तत्संगमं शंभुध्यानपुरःसरं सुखमपि ज्ञातं महेशा

र्पितम् ॥ नारी भस्मविभूषिता परमपि स्पृश्यापि दृष्टापि सा रुद्राक्षाभरणा शिवार्चनरता नीरे प्रगागनोत्सवा ॥१७॥ स्वप्नेष्व

प्यशिवव्रतावृतकथा व्यर्था सुधासाधनम् पापापारकलादिसाधनमिति ज्ञात्वैव न श्रूयते ॥ अस्माभिः शिववीक्षणेन

शिवरह०३ समयः सर्वैः सदा नीयते श्रीविश्वेश कथा विशेषकथने दारैः कुमारैरपि ॥१८॥ अस्माभिः स्मरवैरिपूजनरतैर्माराद्विपूजारतो यः कश्चिद्भुवनेषु ह०ग०३०
१०७ नेत्रपदवीं प्राप्तः समालिङ्ग्यते ॥ अन्यः स्पृश्यत एव नाति विमलो दृष्टोऽपि दूरादपि स्पष्टं दूरनिराकृतोऽपि भवतीत्यु(त्य)त्सवो जायते ॥१९॥ अ०२६
अस्मद्बालकसेवकैरपि मुहुर्लिङ्गार्चनात्युद्यतैः बिल्वाद्याहरणोत्सवैः शिवकथालापप्रवाहोत्सुकैः कालो नीयत एव कालजभयम्
त्यक्त्वैव तैर्बालकैः लिङ्गाराधनमेव साधु विविधं ध्येयं विधेयं च नः ॥२०॥ अस्माकं खलु कालकालभजनात्कालोऽपि रङ्कायते ॥
शङ्कातङ्कविवर्जितेन मनसा शङ्कुः परं स्मर्यते ॥ भूतिः शङ्करनिर्मितासितकृत्तरा नित्यं परं धार्यते दाराणामपि तद्व्रतं खलु सदा तल्लि-
ङ्गपूजादिकम् ॥२१॥ अस्मद्वंशसमुद्भवेन न शिवादन्यः समाराध्यते नाचिन्तापि न तत्कथापि सुतरां स्वप्नेऽपि वा जायते ॥ न शैवैः
सह सङ्गमोऽपि सहसा शैवी कथा धूयते ॥ शैवेभ्यः शिवतत्परैः सह सभा चौ(च)र्चा सदा वेश्मनि ॥२२॥ लिङ्गान्येव गृहेषु रत्नरचित
श्रीनन्दिकेशान्विता(त) श्रीभृङ्गी रिटि संयुतानि तरवो बिल्वस्य नापक्वकैः ॥ तन्मूले शिवपूजनं प्रतिदिनं शैवी कथा कल्प्यते ॥ तत्रैव
प्रतिवासरं शिवजनैः साकं शिवस्तूयते ॥२३॥ आराध्यं शिवलिङ्गमेव सततं ध्यायो महेशो मुहुः जप्यस्ताधरहर्निशं शिवमयः
पञ्चाक्षरः केवलम् ॥ वादोऽपि प्रतिवासरं शिवकथा तात्पर्यबोधापनः सर्वं भूषणयः शिवार्चनशिवध्याने विनीतं मया ॥२४॥
अस्माकं रसना महेश्वर शिव श्रीविश्वनाथाम्बिकाकान्तानङ्गहरान्तकान्तक महादेवेति नामामृतम् ॥ पीत्वा क्षीरसमन्विता

मपि सितां नापेक्षते न स्पृहां द्राक्षाणां कुरुते न भोजनरतिं नैवेक्षुकाण्डे रतिम् ॥ २५ ॥ हारं केवलमादराद्गुणविधिप्रासोपहारं परम्
गृह्णात्येव कदाचिदाधुरसमा तृप्तैव नामामृतैः ॥ चक्षुः पूजित शांग लिङ्ग निकरालङ्कारसंवीक्षणैः प्रीतं नान्य विलोकनाय यतते नि
द्राव सानेष्वपि ॥ २६ ॥ चित्तं शैलसुतासहाय चरणांभोजार्चनध्यानतः सन्तुष्टं करणान्तराधिपतरव्यापारहीनं परम् ॥ कोवा स्वामि
मतं विहाय पुनरप्यन्यत्र यात्यादराद्भ्रान्तं शिवपादपद्मभजनध्याने ~~सन्तुष्टं करणान्तर~~ श्रीशिव विधाने मम ॥ २७ ॥ श्रोत्रे शंकर
मित्र कृपापीयूषपूर्णार्णवे तन्नाम श्रवणोत्सुके शिवकथा सञ्जीवनी संयुते श्रीविश्वेश्वर दिव्यनाम भणयो मत्कर्णरूपा गुहां प्रासा
पापतमो निवारक तया प्रासा प्रसिद्धिं गते ॥ २८ ॥ अस्माकं कुलदेवतं शिवद्युति स्वप्ने ऽपि तत्पूजनात्तद्ध्यानादपि तत्कथाश्रवणतो नि
त्यं शिवं जायते नारीणामशिवाभिधानकथनं स्वप्ने ऽपि वा दुर्लभं स्वप्ने शंकर एव शैलतनयाकान्तो मया दृश्यते ॥ २९ ॥ स्वप्ने शङ्कर
एव शाम्बदुमया साकं प्रियं भाषणं कुर्वन्तत्करपङ्कजार्चितपदांभोजो मया दृश्यते ॥ भाग्ये शारदचन्द्रमण्डलनिभा स्ताराः रुहा
रावली शोभालङ्कृत एव भाति हृदये सर्वेष्टदानोत्सुका ॥ ३० ॥ सुस्वप्ने वृषभध्वजः स्फुरति मे चित्ते पिनाकी शिवः ॥ क्रीडन्ते
विषमाक्षरा गिरिजया क्रीड़ा विनोदादरः कुस्वप्ने गरुड़ध्वज स्फुरति मे चित्ते तदा ताड्यते दण्डैरेव किमागतोसि गिरिजा की
डारते शंकरे ॥ ३१ ॥ नित्यं मत्कुलकामिनीभिरसकृद्गौरीपते शंकर क्रीयिविश्वेश्वर चन्द्रचूड गिरिजा क्रीडाविनोदादरः ॥

६९९

नाहि नाहि सदेति गानकलनैः कालो मुदा नीयते ॥ बालक्रीडनलालसाभिरभितो दोलाकुलान्दोलनैः ॥३२॥ काकार्तस्वरडोलया
मणिमयाश्री व्याप्तया बालकं क्रीडानिरतं करोति परिव दृष्ट्वैवाद्य डोलोऽन्वयं डोलेयं भुङ्क्ते मृडानि सततं क्रीडां कुरुष्वेत्यपि व्याहार
व्यवहारशीलिनवरानस्मात्कुलेऽभूत्प ॥३३॥ डोलेयं गिरिजापते शितिभवे दादौ तदान्दोलनम् बालस्य प्रसवे शिवे तव शिवा डोले
ति कल्पोदये एवं कौतुकमेव शंकर कृपापात्रे कलनेऽपि मे दारैः शांकरपूजनेन समयः सर्वः प्रियो नीयते ॥३४॥ अस्माभिर्निज
बालकैः सहसदा विश्वेश्वरः पूज्यते तन्नामामृतमेव पूतहृदयैर्नित्यं मुहुः पीयते ॥ तन्नामध्वनिजल्पजे मुहुरुमाकान्तोति सागीयते
सद्भोज्यमपूपभुज्यते गिरिसुताकान्तोपभुक्तं मुदा ॥३६॥ कण्ववन्तः शंगलीलामतिसित भासिनो रुद्रमुद्धूलयन्तः शंभुं सम्प्रार्थयन्तः
कति कति भुवने शांभवा सान्ति सन्तः ॥ लिङ्गाराधनसाधनैर्द्विविधे भोग्ये वयं संवृताः कल्पानोकहमूलरत्नविलसद्देहान्तरे
ष्वास्थितिः ॥३७॥ अस्माकं न तथादि किञ्च न जरा मृत्युस्तु दूरे ततो रोगश्चापत एव नेति परमानन्द प्रवृद्धिः सदा ॥ एतद्भाग्यमुमा
सहाय चरणांभोजार्चनात्केवलं कालो दृष्टत एव नाति विमलश्री कालकालार्चनैः ॥३८॥ कः कालान्तक तत्परोऽपि भुवने मृत्युं प्रप
श्यत्यतो मृत्युर्दूरत एव याति बहुधा भीतः स्वदूतैः सह ॥ कान्तापीनपयोधरोद्वहनतः कान्ताणुम व्याप्नुगे नैवालिङ्गनमि
च्छति प्रियतमे नालं तपोत्कण्ठया ॥३९॥ कुर्वन्ती खलु नीलकण्ठभजनं तद्ध्यानधारामृतं पीत्वा सन्ततमन्तकान्तक महारे

वेति संवादिनी ॥ अस्माभिः शिवपूजनोत्तरमिदं सम्प्रार्थ्यते शंकर॥ आहि त्वत्पदपद्म सद्मनि मनो मे संवसत्वन्वहम् ॥ ४० ॥ अन्यस्त्वर्थनया विनाऽपि सकलं भाग्यं प्रलब्धं मया ॥ मद्देहाङ्गणमेत्य तिष्ठति सदा वन्दारुकाणां गणः॥ मद्देहद्वारि देवाः प्रतिदिनमभयं प्रार्थयन्ते न तासां॥ श्रीकण्ठाहारलेशो ऽस्त्वनुदिनमसकृत् पुष्टदेहाभिमोहात् ॥ ४१ ॥ अस्माकं लिङ्गपूजाव्रतनियमरतिः स्यात्प्रसादात्तवेत्य ॥ स्वाराज्या वाञ्छयापीत्यनुदिनमसकृत् नम्रवक्त्रा सुरेन्द्राः ॥ ४२ ॥ अतः परमसारतो रतिरपार संसारतो॥ निवृत्तिमुपयातु मे किमपि वाञ्छितं तन्न न॥ भवत्करुणया परं चिरमपारभाग्योदयः॥ प्रतिक्षणमभूत्ततस्त्वयि मनः स्थिरं जायताम् ॥ अतः परमुमापते जननकष्टमुत्कृष्टमप्यपास्यमिति मे मतिः मम कुलेऽपि जन्म व्यथाम् ॥ हरामरवरादरादपहरोरुजन्मव्यथां॥ नाथ जनताय मे कथय विश्वनाथाधुना ॥ अनन्यशरणोऽयमित्यपि मतिर्न किं ते ततस्तनापि परिपालने भवति हेतुमायातु रे ॥ अहो निखिललेखनं किमिति दुष्टमस्याभवत्॥ ललाटनयनार्चने व्यहह कष्टमेवं कथम् ॥ ४४ ॥ संसारे यदि पात्यते मुहुरयं भक्तस्त्वया किं ततः॥ स्वान्तं भोगिरिजामनोहर रतं नेतुं समर्थोऽस्ति कः ॥ बहिस्तावद्धोनिपातित इति ज्वालां तदीयामधः कः कर्तुं यतते मनागपि महाज्वालाप्यधो यात्यपि ॥ ४५ ॥ उत्फुल्लं नलिनं करोति मलिनं भानुः कृशानुः करोत्यामं पावनमंबुराशिरखिलं रथ्याजलं केवलम् ॥ दोषं किं गणयस्ययं खलमपि श्रीकालकालाधुना॥ मामीशान विलोकयाशु दयया त्वं तारकं मां

कुरु ॥४६॥ अंकं किन्न करोति कुत्सितमुमाकान्तार्भकसादरात् तल्पागं कुरुते न कोपि जनकस्त्वं मे पिता मामतः ॥ त्वद्भक्तं कुरु निर्मलं गतभयम्
संसाररोगातुरम् कालव्याकुलमन्तकान्तकगताशेषाघराशिं कुरु ॥४७॥ संसारार्णवकर्णधार इति या सिद्धा प्रसिद्धिस्ततः ॥ स्वामिन्
तामनुसृत्य वृत्तिरुचिता तेतावदेतस्य का ॥ हानिः स्यान्नगतागतेरपि पुनर्जन्मव्यपायेकथं कीर्तिस्स्यात्तवसा तदेव महती चिन्ता निरन्ता
मम ॥४८॥ इत्येवान्वहमीशपूजनरतैः सम्प्रार्थ्यते सादरम् ॥ नान्यत्सर्वमयत्नलभ्यमितितेनत्प्रार्थनीयं परम् ॥ यद्यत्स्यात्समपेक्षितम्
तदखिलं सिद्धूलभूतादिषु ॥ प्रीतिर्भूति विभूषणस्य परमं मद्भूषणं मेयतः ॥४९॥ हारो हारविभूषणायन तथा केयूरहीरप्रभा कोटी
रामलरत्नकुण्डलगणच्छायां कुबिर्वा परम् ॥ किन्तूद्धूलनभालभागविलसद्भस्मत्रिपुण्ड्रं यथा रुद्राक्षामलमालिका करतले लिङ्गं शिवाष्टाक्षरे
॥५०॥ प्रायोत्तरकरणप्रियाभरणतां विश्वेशपादाम्बुज ध्यानं शंकरनामकीर्तनमपि जिह्वागणालंकृतिः ॥ मत्कर्णाभरणञ्च शङ्करकथा
रत्नार्णवाकर्णनम् श्रीचामीकरकंकणेकरयुगस्येशाय बिल्वार्पणम् ॥५१॥ मन्नेत्राभरणं महेश्वरमहालिङ्गार्चनालोकनम् ॥ मद्भा
लस्य विभूषणं सितलसद्भस्म त्रिपुण्ड्रं परम् ॥ श्रीविश्वेशपदाम्बुजप्रणतयस्तावच्छिरोभूषणं मत्कंठाभरणं प्रकृष्टममलारुद्राक्ष
मालापरम् ॥ नासालंकरणं शिवार्पितलसद्बिल्वीदलाघ्राणनम् ॥५२॥ मदंसाभरणं शिवैकशरणस्तत्पादुकाराधनध्यानाभ्य
र्चनजातपुण्यविभवोभावः परं भावुकैः ॥ इत्याकर्ण्य विशिष्य शैववचनं भूयः समुत्थाय तं नत्वा सादरमादरेण बहुधा श्लांगां

X पं-४ दृष्टुमागतो गरुडध्वजः ॥ लक्ष्मीलङ्कृत वामाङ्गः सनकादि समन्वितः ॥५७॥ शंखचक्रगदा शार्ङ्ग कौस्तुभादि विभूषितः ॥ तं

गमालिंग्यच ॥५३॥ धन्योयं शिवतत्परोयमधुनादृष्टः शिवो वीक्षितः साक्षादक्षय पुण्यकोटिभिरयं किं शांभवो दुर्लभः ॥ इत्युक्त्वास
दृदौ हारो हारान्हाराय सादरम् ॥ हरेःकुमारैः दारैश्च सह नत्वा पुनः पुनः ॥५४॥ सम्भावितः अद्य सम्भोगै राजस्तेनाम्बिका वल्लभ भोजनाय ॥ स्व
लोकमयादरतस्तदीयां सम्भाव्य वृत्तिं बहुधा विशिष्य ॥५५॥ उवित्वा स कियत्कालं स्वालयं गन्तुमुद्यतः ॥ राजा तदानीमभ्यर्च्य शंकरं बिल्वप
त्रकैः ॥५६॥ तदानीमेवतं दृष्ट्वा विस्मयं प्राप्ताः सर्वे दौवारिकास्तदा ॥५७॥ त्वरया गरुडारूढः प्रविष्टुं शिवमन्दिरम् ॥ समुद्यतो निषिद्धोपिहा
रे दौवारिकैरपि ॥५८॥ तद्दौवारिक दण्डमण्डलमयं दृष्ट्वापि नारायणो भीतो दूरतरस्य कोपमभवत्कालो खलो दुर्दशम् ॥ महर्त्संजनय
त्यहो महेश करुणा हीनोति हीनोस्म्यहम् ॥ हाहा हन्त किमन्तकाइव कथं तिष्ठन्ति दौवारिकाः ॥ नाभूदेव किमन्तकान्तक कृपा येनाधुना
शाम्भवो भूपालो न विलोकितो गपि न ततः सम्भाषितो वा मुदा ॥ संभाषणमेव भूषणमिति ख्यातं तदेवं क्षणम् मोक्षस्यापि विलक्षणं
कारणमित्याहुर्महा शांभवाः ॥६१॥ विघ्ना एव भवन्ति तावदसकृन्नूनं खलु श्रेयसां तद्दौवारिक बुद्धिरेव समभवत् मां वा निषेद्धुं मुहुः ॥
उड्डीयापि न गन्तुमेव समुचितं दण्डाग्रभीतो धुना स्वामीयं गरुडो दृढोपि झटिति व्यग्रश्च चित्तं मम ॥ ६२ ॥ पुण्यान्यस्य बहूनि तावद
धुना सम्पादनीयान्यपि प्रायः पर्वतराजराजतनया कान्ताङ्घ्रि पंकेरुहम् ॥ न ध्यातं मुहुरादरेण सदनातीव्रेण किं निर्गमे न ध्यातं यदि
सादरं मुहुरिपं प्रत्यूह वार्ता कुतः ॥६३॥ सर्वाघौघ विनाशकं स्मरणतो गौरीपतेः स्यादतः ॥ प्रत्यूहो विलयं प्रयाति बहुधा प्रत्यूह

६३५

संघक्षये॥ श्रीविश्वेश्वरपादपद्मभजनं तावत्परं साधनम्॥ तस्मादप्यधिकं न साधनमिति ज्ञातं मुनीन्द्रैरपि॥६४॥ संसारोऽपि लयं प्रयाति बहुधा विश्वेश्वराराधनात्प्रत्यूहः स कथं न याति विलयं विश्वेश्वराराधने॥ तद्ध्यानं सुरभूरुहः सुरमणिस्तद्देवगौरीत्यपि शान्तिस्तेन न चार्पितोऽपि निश्चयः प्राप्ता भवन्त्येव हि॥६५॥ ब्रह्माण्डं प्रलयं प्रयाति गिरिजाकान्ताङ्घ्रिपंकेरुहश्रीपूजाकृशुभावतत्वलु सकृद्दूर्जा सकृत्सा यदि॥ तर्हि स्यात्सकलोदयास्थितिरपि व्यक्तात्ततस्तात्स्मृतेः॥ सर्वाभीष्टफलप्रियां समुदयस्यास्वि सर्वात्मना॥६६॥ न जानीमस्तावद्गिरिश चरणांभोजभजनप्रभावं भावानामभिमतसमस्तार्थफलदम्॥ तदेवाधाराधक्षयकसपूर्वाधितनुतेन वा पूर्वौ पक्षे व्यूहहना विजानन्ति विषयः॥६७॥ उमाकान्ते स्वान्ते यदि निहितमत्यादरवरैस्तदा तावल्लोको विजित इति मन्ये ध्रुवमिदम्॥ अघारेराकल्पं प्रतिदिनमहादानतपसां समूहैरेवस्यादिति मतिरभूदेव बहुधा॥६८॥ किमेवं प्रत्यूहः सम्भवदहो शाम्भवपदं मनाक् दृष्टं यत्ने सति तिमिररूपोयमधुना॥ अयं तावद्गौरीरमणचरणांभोजक्षालनप्रसादात्कीदृग्गुप्रशममुपयात्यत्यपि न किम्॥६९॥ दुंचरजनीमुखं शिवपदांबुजाराधनप्रसादनिधिसाधनं शनियुतोपि वा कोधुना पृथिवीधरिसमर्चितः सकलसिद्धिरस्यात्शुभे भविष्यति न संशयः शिवकृपा यदि स्यान्मयि॥७०॥ भृगैरपि महोत्सवैः सितविभूतिपूतैरहो प्रदोषसमये गतिः क्रियत एव दूर्वाङ्कुरैः॥ सुबिल्वदलसंयुतैरपि मनोहरैः सादरं महेशसदनं प्रति प्रियमयूर

गोभिः सह ॥७१॥ प्रयान्ति तरवो ह्यमी विविध पुष्पगुच्छावृताः कृताब्जजलसेचनाः सितिविभूतिपुण्ड्राङ्किताः ॥७२॥ शिवालय
ममी शुकप्रभृति पक्षिवर्गा अपि प्रभात विभवोन्मुखः शिवपदाम्बुजाराधकः ॥ भाग्यं शंकरपूजया शनियुते कामः परं लभ्यते ॥
लिङ्गे विल्वदलार्पणं च विविध श्रेयस्करं जायते ॥७३॥ तत्किं विघ्नितमेवमधुना तेनैव भाग्यं महत्प्राप्तो यास्यति साम्प्रतमी
श भजनाभावेन सर्वात्मना ॥ इति व्याकुलचित्तस्य वचनानीन्दिरापतेः ॥ श्रुत्वा सनन्दनः प्राह तमेव गरुडध्वजम् ॥७४॥
सनन्दन उवाच ॥ अयं पुण्यतमः कालः कालकालसमर्चने ॥ शनित्रयोदशी पुण्या प्रदोषोऽयं विशेषतः ॥७५॥ प्रदोषका
ले सम्प्राप्ते कृत्वा स्नानादिकं ततः ॥ पूजनीयो महादेवः शिवलिङ्गे शिवालिङ्गे ॥७६॥ स शुक्लवाससा पूज्यो भस्मनाभूषि
तेन च ॥ रुद्राक्षाभरणेनापि ततः पीताम्बरं त्यज ॥ स्नानं कुरु प्रयत्नेन शिवतीर्थे विशेषतः शिवप्रिये ॥ शिवपादाम्बुजोत्प
न्नमिदं तीर्थमघापहम् ॥७७॥ अत्रस्नानेन पापानि विनश्यन्ति न संशयः ॥ अनेनैव जलेनेशः ससर्ज जगतां त्रयम् ॥७८॥
ससर्ज जलमीशानी प्रथमं तदनन्तरम् ॥ अग्निं चन्द्रञ्च सूर्यञ्च भुवनं विधिमेव च ॥७९॥ ततः सर्वानिमाँल्लोकान् सस
र्जानेन केवलम् ॥ इदं खलु महत्स्थानमुमाकान्तस्य प्रियं हरे ॥ ८१॥ गौरीनिर्मितमेवेदम् लिङ्गं सम्पूजितं तया ॥ समर्च
यत्प्रयत्नेन भूतिरुद्राक्षभूषणः ॥ ८२॥ त्यज चक्रं गदां शंखं शार्ङ्गञ्च गरुडं त्यज ॥ अद्यप्रभृतिचिह्नानि सर्वाण्यपि परि

त्यज ॥८३॥ प्रदोषकाले सम्प्राप्ते शुचिर्भूतेन भस्मना ॥ पूजनीयो महादेवो बिल्वपत्रादि साधनैः ॥८४॥ अदूरे बिल्वतरवः सन्ति तद्दि
ल्वपल्लवैः ॥ करवीरैश्च कनकै लिंगमर्चय शाङ्करम् ॥ मुनयोपि प्रयत्नेन प्रदोषे गिरिशार्चनम् ॥८५॥ कुर्वन्ति बिल्वपत्राद्यैः शिवपञ्चा
क्षरोत्सवैः ॥ निवारितोऽपि प्रबले भूपदौवारिकै हरे ॥८६॥ अशाम्भवत्व चित्तानं त्वयि तावदसंशयम् ॥ भस्मोद्धूलित सर्वा
ङ्गस्त्रिपुण्ड्राङ्कितमस्तकः ॥८७॥ रुद्राक्षमालाभरणः शांभवः शिवतत्परः ॥ शांभवालोकनेनापि भीताः दौवारिकाः परम् ॥ शिवा
लय प्रवेशेषु न करिष्यन्ति वारणम् ॥ पश्य शार्दूलवृन्दानि भस्मपूतानि तान्यपि ॥ एणीमुखान्मृगान्पश्य सर्वान्भस्मवि
भूषितान् ॥ रुद्राक्षमालाभरणान् शिवध्यानपरायणान् ॥९०॥ तरून्पश्य तरसा हाररूपधरान् परान् ॥ विलोक्य प्रयत्नेन शिव
पूजन साधनान् ॥९१॥ प्रदोषकाले सम्प्राप्ते शांभवं वेषमावह ॥ अशांभवा[illegible]नाम् सहसा प्रवेशोऽत्र न सर्वथा ॥९२॥ भूतनाथार्चन
परीभू[illegible]दाति भूति भूषणः ॥ सभूति रहितं प्रायो न पश्यति विशेषतः ॥९३॥ भूमण्डलमिदम् सर्वं माण्डितं शाम्भवैः परम् ॥ अशांभ
वानां वार्त्तापि सर्वथात्र न दृश्यते ॥९४॥ किं वाऽशाम्भववेषेन स्थितिरत्रोचिता न ते ॥ प्रदोषेषु विशेषेण नाशाम्भव विलोकनम् ॥
॥९५॥ अशांभवं प्रदोषेषु यः पश्यत्यपि मोहतः ॥ स याति नरकं घोरं कुयोनिमपि गच्छति ॥९६॥ अशांभव मुखं दृष्ट्वा प्रदोषे
मोहितोपि वा ॥ दरिद्रो जायते मर्त्यः सुरोरासभतामियात् ॥९७॥ धिगशाम्भवजन्मानि भूतिहीनानि सर्वदा ॥ प्रदोशेषु वि-

ग्रोवेण भूति हीनो निरर्थकः ॥ ९८ ॥ त्रिपुण्ड्ररेखा रहितो यदि काले निशामुखे ॥ तदा तद्दिग्धिगित्येवं वदन्त्येव पण्डिताः ॥ ९९ ॥ रुद्राक्षधारणं श्रौत्रं स्मौत्रं तद्भस्मधारणम् ॥ तत्यत्क्येन सहसा स तावत्पतितो भवेत् ॥ १०० ॥ अस्माकमीशानपदा श्रितानां विभाति रुद्राक्षविभूषणानाम् ॥ उद्धूलनेनास्तु पवित्रमेतद्गात्रं प्रदोषेषु विशेषतस्तु ॥ २ ॥ किञ्च पीताम्बरधरं शंखचक्रगदाङ्कितम् ॥ विलोक्य सायं मनुजो दरिद्रो भवति ध्रुवम् ॥ ३ ॥ किञ्चायुधैः किमेतैस्तैः कृत्यमत्र जनार्दन ॥ पीताम्बरेण किं कृत्यं गरुडेनापि किं फलम् ॥ ३ ॥ किंवा शांभववेषदूषिततनुर्दृष्ट्वैव दौवारिकाः कुद्धा एव भवन्ति ते तु सहसा शान्ता कदापि त्वयि ॥ इन्द्रो वापि विधौ विधिप्रभृतिषु व्यग्राः स्वदण्डाहतिं व्यग्राः कर्तुमभीप्स स्वतोपि सहसा तावत्प्रवृत्ताः परम् ॥ ४ ॥ कश्शांभवेषु कुरुतेप्यभिमानवार्तां दुर्वेषदूषिततनुस्तु न तत्र याति ॥ देवाग्रतो यदि तदा सन्निपातितोपि तद्रुदभीषणरूपेण न ताडनेन ॥ धन्यः शांभवपुंगवेषु विनतो भूतित्रिपुण्ड्राङ्कितो रुद्राक्षाभरणो महेश्वर महादेवेति वा संवदन् ॥ तैरभ्यर्चित एव याति भवनं शंभोः परं शांभवः ॥ तं को वा जगतीतलेन नमति श्रीविश्वनाथप्रियम् ॥ ७६ ॥ इति श्रीशिवरहस्ये हराख्ये तृतीयांशे उत्तरार्धे याज्ञवल्क्यजनकसंवादो नाम षड्विंशोऽध्यायः ॥ २६ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ याज्ञवल्क्य उवाच ॥ इति तस्य वचः श्रुत्वा सोऽपि नारायणस्तदा ॥ युक्तमुक्तमिति प्रीत्या तमाह पुनरादरात् ॥ १ ॥ नरसामान्यवेषेण गम्यते यदि तन्मे ॥ प्रवेशो दुर्लभो नूनं सायंकाले विशेषतः ॥ २ ॥ सायं शनित्रयोदश्यां शांभवाः कोटिशः शिवम्

पूजयिष्यन्ति राजापि सामान्यः पूजयिष्यति ॥३॥ राजदाराः कुमाराश्च राज्ञः प्रज्ञा बलान्विताः ॥ तेषु सत्सु प्रवेशो मे कथं वा स्याच्छिवालये ॥४॥
अमानुषेणरूपेण गमनं स्याच्छिवालये ॥ केन रूपेण गन्तव्यं इति चिन्ता प्रजायते ॥५॥ मत्वा विलक्षणं रूपं शाम्भवाश्चर्यतां यदि ॥ तदा खलु शिवद्रोहः तेन स्यान्नरके स्थितिः ॥६॥ शिवद्रोहरता पूर्वं नरके पति-
ताः खलु ॥ तेषां निवृत्तिरद्यापि नरकस्थो न जायते ॥७॥ पापान्तराणि नश्यन्ति धर्मभेदैः कदाचन ॥ शिवद्रोहार्जितं पापं न नश्यत्येव सर्वथा ॥
॥८॥ शिवार्चनस्य विघ्नश्चेत् क्रियते, तेन मां यमः ॥ नयिष्यति न सन्देहो घोरं रौरवमद्भुतं ॥९॥ न रौरवान्निर्गमोपि कदाचिदपि सर्वथा ॥
भविष्यत्यत एवाद्य संकटं समुपागतं ॥१०॥ शिवार्चन परित्यागस्तद्विघातश्च सर्वथा ॥ प्रायश्चित्तसहस्रैर्वा न शान्तिमुपयास्यति ॥११॥ मन्ये पात
कपातकं बहुविधा पारव्यथा साधनमूं सायं शंकर लिंग पूजन परित्यागं तमस्त्यद्भुतम् ॥ साक्षात्तौरव हेतुभूतमसकृत्कोलोपि तं पातकं मत्वा विस्म-
यमेतितेन सहसा तस्मान्निवृत्तिश्चन ॥१२॥ किं ते नेति वदन्ति चेदति खलाः किन्त्वाव तात्तत्समं तस्मादप्यधिकं च पातकवरं नैव प्रपञ्चयामुतः ॥
नस्यादेव महेश्वरार्चनपरित्यागे मतिः सर्वथा सद्वंश प्रभवस्य साभवति चेत्स्याज्ज्ञारजानां परम् ॥१३॥ निधानमिक्षिवनः शिवपदाम्बुजाराधनं
तदेव सुरभूरुहः सुरभिराणधेनुः सुराराध्यमि ॥ तेनैवामर जीवनं सुरतरुं सूतेत देवाद्भुतं तच्चिन्तामणि मन्त्रतो नव निधीनां देवतानां सुधाम् ॥१४॥
न शिवार्चन सामर्थ्यं ज्ञायते मनुजैः सुरैः ॥ गन्धर्वैरपि तत्तावन्निधानमिति मे मतिः ॥१५॥ संजीवनी सा शिवलिंग पूजा लिंगार्चनाकार
सुधा निधानं ॥ लोके परं दुर्ल्लभमेव नूनं तद्येन लब्धं सुकृती कृतार्थः ॥१६॥ वन्दे शंकर पूजकांघ्रि कमलं वन्दे शिवाराधन
ध्यानाराधन साधनानि बहुधा तत्पादुकाराधकान् ॥ तत्पादाब्ज रजोपि पावनवरं तत्सेव्यमत्यादरात् तस्माद्धाम पदांबुजार्चन परो
धन्योति मान्यो मम ॥१७॥ जातिस्तत्र विचार्यते न मया यः शंकराराधकः सामान्येन सखा मे प्रियसखा तत्रापि द्विजश्चित्तदा ॥ मान्यः

स्यात्समुदा द्विजो यदि भवेद्विप्रः शिवाराधकः ॥ तं मन्ये गुरुमीश्वरं मम समे पूज्यं परं दैवतम् ॥१८॥ को वा शंकर पूजकेन सदृ-
शो विप्रेण तुल्यो भवेत्साक्षात् ब्राह्मण रूपमेत्य भगवान् शंभुः शिवाराधकम् ॥ कृत्वा दर्शयति प्रयोजनमिदं श्रेष्ठं नराणामि-
ति प्रातः सायमुमासहाय भजनं कर्तव्यमित्यादरात् ॥१९॥ न व्यग्राणि ममेन्द्रियाणि सकृदप्यभ्यर्चिते शाम्भवे तत्संभावनया
भवोऽपि स भवेत्संभावितः शांभवम् ॥ रूपं दुर्लभमेव शंभुभवनं तद्रूपमित्येव मे बुद्धिस्तत्पदपङ्करेणु तरणि र्मोहान्धकारापहः ॥
२०॥ हन्त्यापत्कुलमेकदा शिवरतो दृष्टीति भक्त्यानतः ॥ संपद्वृद्धिकरः स पाप निकर ध्वान्त प्रचण्डांशुमान् ॥ तस्मात्त्वत्प-
दाम्बुजार्चनरताः संतः क्वचित्सन्ति ते शान्तास्ते तु कृतान्त भीतिरहितास्तेनाव दत्युत्तमाः ॥२१॥ इत्याकर्ण्य वचस्तस्य सन-
को हृष्टमानसः ॥ गंभीरया गिरा प्राह नारायणमनाकुलः ॥२२॥ सत्यमुक्तमिदं विष्णो तत्वज्ञोऽसि न संशयः ॥ शिव प्र-
साद सम्पन्नस्त्वमित्येव हि मे मतिः ॥२३॥ जात कल्पः प्रदोषोऽपि स्नात्वा सत्वरमादरात् ॥ उद्धूलन त्रिपुण्ड्राभ्यां रुद्रा-
क्षैश्चाङ्कितो भव ॥ दुकूले परिधायाशु गृहीत्वा बिल्व पल्लवान् ॥ चलातित्वरयापात्रे गृहीत्वा जलमुज्वलम् ॥२५॥
कमले विमले त्वञ्च भूति रुद्राक्ष भूषिते ॥ तिलाक्षतान्गृहीत्वाशु ~~गृहीत्वा बिल्व पल्लवान् ॥~~ २५ ॥ चल नारायणा-
न्वित ॥२६॥ इत्युक्तः सोऽपि सन्तुष्टः तथेत्युक्त्वा हरिस्त्वरा ॥ ययौ सापद्मया सार्द्धं सनकाद्यैश्च संयुतः ॥२७॥

ततः प्रविष्टो निर्विघ्नं विष्णुर्दौवारिकैरपि ॥ अवारितो महादेवो मन्दिरं सुन्दरं परम् ॥ २८ ॥ कर्पूरदीपमालाभिरभितः परिवे-
ष्टितम् ॥ रत्नतोरणसंकीर्णं रत्नद्वारविराजितम् ॥ २९ ॥ रत्नगोपुरसंकीर्णं रत्ननन्दिगणावृतम् ॥ सुधाप्रवाहसंसिक्तं मन्दारकु
सुमावृतम् ॥ ३० ॥ फलमालासमाकीर्णं गुच्छमालाविराजितम् ॥ रत्नमालासमाकीर्णं शिवभक्तसमा
वृतम् ॥ ३१ ॥ शुकैर्मयूरैर्हंसैश्च परितः कमलाकरैः ॥ ध्यात्वा स्थितं तदा सर्वैः भूतिरुद्राक्षभूषणैः ॥ ३२ ॥ शार्दूलाद्यैर्मृगेन्द्रै
श्च भूतिरुद्राक्षभूषितैः ॥ सेवितं शंकरस्थानं शिवध्यानपुरःसरम् ॥ ३३ ॥ शिवनामजपोद्युक्तैः तरुभिश्च विराजितम् ॥ प्रफुल्ल
मण्डलाकीर्णैर्भ्रमरैरपि शोभितैः ॥ ३४ ॥ सुधूपधूमरेखाभिरलङ्कृतमितस्ततः ॥ उपहारगिरिश्रेष्ठैः षड्रसाख्यानसञ्च
यैः ॥ ३५ ॥ विपुलापूपसंघैः पूर्णघृतकुल्यादिभिर्युतम् ॥ मणिमंडपसंकीर्णं नानाफलविराजितम् ॥ ३६ ॥ द्राक्षाम्ररसकुल्याभि
रलंकृतमनेकधा ॥ दधिसाराचलाकीर्णं दुग्धसाराब्धिसंकुलम् ॥ ३७ ॥ एतादृशं शिवस्थानं दिव्यनाट्यांगनावृतम् ॥ ददर्श कमला
कान्तः सकैलाशमिवापरम् ॥ ३८ ॥ कल्पवृक्षसमानीतं फलपुष्पसमाकुलम् ॥ कामधेनुप्रसूतोरुक्षीरधारासमावृतम् ॥ ३९
विस्मितो दूरतो दृष्ट्वा सकृतार्थममन्यत ॥ स्वात्मानं कमलामाह पश्य पश्येति सादरम् ॥ ४० ॥ किं किं कृतं पुण्यमपूर्वमादौ दृष्टं शिव
स्थानमिदं मनोज्ञम् ॥ अतः परं जन्म कृतार्थमेव नेत्रे कृतार्थे चरणौ कृतार्थौ ॥ ४१ ॥ प्रदोषकाले गिरिशालयस्य विलोक

३ नेनापि कृतार्थमेव ॥ इदं परं जीवनमित्यवैमि जितञ्च लोकत्रयमेव तेन ॥४३॥ एतादृशं भाग्यमदृष्टसंचैः विनायकस्याप्यति दुर्लभ
त्वात् दृष्टं शिवाराधनसाधनं च तदप्यपूर्वं परमं पवित्रम् ॥ पञ्चामृताभिषेकस्य प्रवाहे व्योरतं वनम् ॥ एतादृशं न कुत्रापि दृष्टं पूर्वं मया खलु ॥४४॥ अयन्न राजा शिवएव सा-
क्षाद्भूमण्डलानुग्रह कारणत्वात् ॥ करोति लिङ्गार्चनमादरेण नरस्य किंवा मतिरीदृशी स्यात् ॥४५॥ सामग्री कथमीदृशी बहुविधा लिङ्गार्चनायाभवद्देवानामपि दुर्लभा सुरस-
रितुल्याश्च कुल्या अपि ॥ क्षीरस्यापि घृतस्य तस्य मधुनो दध्नः सिता पर्वताः सम्पन्नाः स्वयमागताः कथमयं राजा शिवः केवलम् ॥४६॥
अतः परं नेत्र विशालतायाः कृत्यंच सम्पन्नमिदं विलोक्य ॥ तृप्तं मनो मे जनिदुःखनाशः शिवालयं स्यास्य विलोकनेन ॥४७॥ नक्षत्र मंड-
लमतीत्य विभाति शृंगं तुंगं विलोकय विलोकय सावधानं ॥ एतं निधानमिति मे मतिराविरासीत् कैलाश तुंगमिव भाति शुभावहं मे ॥४८॥
शिवालयस्यास्य सहार तारा मालासमेतस्य मनोहरस्य ॥ दीपावली मण्डल मण्डितस्य शृङ्गस्य शोभां परिपश्य पद्मे ॥४९॥ आ-
मूल चूलामित दीपकान्ति विराजितं मन्दिरमीश्वरस्य ॥ मुक्ताप्रवाल प्रभया तिपीतं रत्न प्रभा मंडल मण्डितंच ॥५०॥ इन्द्र नील
मणि कान्ति समूहैः पश्य पश्य शिव मन्दिर मूले ॥ मौक्तिकादि सहितं गगनत्व भ्रान्तिमघु जनयत्यमितं मे ॥५१॥ पश्यहृ कार्त
स्वर कान्तिरेषा तडित्प्रसून्न वाह भ्रम मातनोति ॥ साचेन्द्र नील प्रभया समेता करोति मे नीरद बुद्धिमेव ॥५२॥ सुधाकरः शंकर मन्दि-
राग्रे वितानवत्तिष्ठति तस्य भानि ॥ मुक्ताफलान्यचल चंचलानि शोभेयमेतस्य मनोहराणि ॥५३॥ हर हर रुचिरेयं निर्मिता कान्ति
रेषा शिवजन हितहेतुर्धर्मसेतुः स केतुः ॥ शिवपद विभवस्य स्वंपदं नैतु रेवं तव शिव कथनीयं किंकि मत्राद्भुतं स्यात् ॥

करुणामयि तेन वर्त्तते यदिदं दृष्टमघापहं मया ॥ शिव शङ्कर मन्दिर महो किम पूर्वं तदिदं जगत्त्रये ॥ ५५ ॥ धन्यं मानसमीश पू-
जनरतं ध्यानानुरक्तं मुहुः ॥ धन्यं मे नयनाम्बुजं च गिरिशस्थार्चनार्चनावेक्षणौ ॥ ५६ ॥ एतावन्मम सिद्धिदं पुनरिदं सम्प्रार्थनीयं
मया ॥ कस्येदं सुलभं पुरातनमहा पुण्याब्धिलब्धं परम् ॥ ५७ ॥ काहं कुत्र शिवर्चकान्वितशिवस्थानार्चनावेक्षणौ ॥ एतावन्म-
म सिद्धिदं पुनरिदं सम्प्रार्थनीयं मया कस्येदं सुलभं पुरातन महा पुण्याब्धि लब्धं परम् ॥ ५८ ॥ काहं कुत्र शिवार्चकान्वित शिव
स्थानं तदा लोकनं तन्मध्यस्थितिरीश नाम कथनं तत्सर्व मत्यद्भुतम् ॥ ईशानुग्रह भेद लब्ध मधुना धन्योस्म्यहं सर्वथा धन्या
ग्रेसर शङ्कर पूजक पदां भोजानु रक्तं मनः ॥ ५९ ॥ साथं शंकर दर्शनेनेन विलयं प्राप्ता निपापान्यतः सर्वापत्विलयोऽपि जात इति मे
मुक्तिश्च सम्भाविता ॥ लिङ्गं मङ्गलदं विलोकितमिदं बिल्वीदलाभ्यर्चितं किं तस्मादधिकं प्रदास्यति फलं तेनैव जानेऽधु
ना ॥ ६० ॥ सव्यासव्य विधानतः प्रतिपदं व्यग्राः शिवाराधकाः सर्वे ते प्रणमन्ति भूति विलसद्गात्राः पवित्राः परम् ॥ स्वेदस्या
पनयेन भूतिमपि ते गृह्णन्ति फाले पुनः नृत्यन्ति प्रजपन्ति शङ्कर महादेवेति नामान्यपि ॥ ६१ ॥ आनन्दामृत सागरानपि
मुहुः सम्पादयन्त्येव ते शब्दाः शङ्कर चन्द्रशेखर महादेवेति मे च श्रुताः ॥ सम्पन्नं जनुषः फलं फलं च विदुषां सम्प्रार्थ
नीयं च किं तस्मादप्यधिकं तदेव सुकृतां बोधि प्रवृध्ये भवेत् ॥ ६२ ॥ इत्युल्कासन कादिभिः सह मया विष्णुः शिवा

प्तं

राधकः प्याप्तं शंकरमन्दिरं नृप वधू व्याप्तं प्रवेष्टुं तदा ॥ सायं शंकित एव तावदसकृद्गत्वा पुनर्निर्गतो मत्वा तुंगतरं गवादनरत स्तस्थौ सन्नत्यां
गणे ॥ ६३ ॥ शंकर शंकर पश्यय विनोदं दृश्यमवश्यं भवहर दुःखम् ॥ हर हर हर हर कुरु कुरु कुरु कुरु कुरु कुरु कौतुकमनुवेलम् ॥ ६४ ॥ शिव शिव
शिव शिव शिव शिव शंभो शिव शिव शिव शिव शिव शिव शम्भो ॥ शिव शिव शिव शिव शिव शिव शंभो शिव शिव शिव शिव शिव
शिव शम्भो ॥ ६५ ॥ भव भव भव भवभूति विभूषित भव भव भव भव भूतपते ॥ भव भव भव भव भगवन्नमनं भव भव भव भव भव भव
भवते ॥ ६६ ॥ शंकर शंकर शंकर शंकर शंकर शंकर शंकुरुमे ॥ शंकर शंकर शंकर शंकर शंकर शंकर शंकुरुमे ॥ ६७ ॥ इति मर्दल
~~वाद्य~~ वादनोत्सवं विनतं संहृतकण्ठ समादरात् ॥ पारितो ददृशुः शिवार्चकाः शिव लिङ्गार्पित शुद्धमानसम् ॥ ६८ ॥ स राजा साध
नैः शुद्धैः समभ्यर्च्य महेश्वरम् ॥ शिवध्यान रतो भक्त्या प्रणतश्च मुहुर्मुहुः ॥ ६९ ॥ राजदार कुमाराश्च पूजयित्वा महेश्वर
म् ॥ सदाशिवम् ॥ सन्तुष्टाः शंकरध्यान निरता एव सादरम् ॥ ७० ॥ दारैः कुमारैः गानानि कर्तुमारेभिरे मुदा ॥ प्रतिक्षणं पुष्पवृ
ष्टिर्मष्टदिक्ष्वपि विश्रुता ॥ ७१ ॥ पुनः पुनरभूदेव साकल्प तरु संभवा ॥ देव दुंदुभयो नेदुः मन्द मन्दानिला ववुः ॥ ७२ ॥ शि
वध्वनि समाकीर्णं तदा ब्रह्माण्ड मण्डलम् ॥ एवं शिवोत्सवेनैव सा नीता रात्रिरादरात् ॥ ७३ ॥ अरुणस्योदयो वृत्तः ततस्ता
तो नृपोपि सः ॥ स राजा पुनरादाय शिव पूजन साधनम् ॥ ७४ ॥ निर्माल्यं परिहृत्याशु पूजयामास शंकरम् ॥ ततः परं राजदार

670

कुमाराद्याश्च शंकरम् ॥७५॥ स्नात्वोद्धूल्य त्रिपुण्ड्रांकास्ते रुद्राक्षांकिता अपि ॥ शिव लिङ्गार्चनं चक्रुर्विल्वपत्रादिभिर्मुदा ॥ ॥७६॥ गन्धर्वाद्याश्चते चक्रुः सुराश्चाशिव पूजनम् ॥ ततः प्रसन्न वदनः स राजा शिव तत्परः ॥७७॥ सर्वान् संभावयामास शिव नैवेद्य दानतः ॥ राज प्रसाद सम्प्राप्तं शिवनैवेद्यमुत्तमम् ॥ मास्तिकाः ॥७८॥ संप्राप्य सर्वे संतुष्टाः सन्तुष्टः कमलापतिः ॥ इन्दिरापतिरादाय शिवनैवेद्यमुत्तमम् ॥७९॥ आनन्दाश्रुसमाकीर्णो ननर्त साशिवाङ्गणे ॥ हारोपहारोपहारोपमनेन युक्तो करौ वरौ पावन पावनौ मे ॥ अयं प्रसादो गिरिशस्य साक्षान्नैवेद्य रूपेण समागतो माम् ॥ ८० ॥ अपार पाप प्रलयानलोयम् हारोपहारोऽतिमनोहरो मे ॥ ८१॥ हरत्यशेषापदुपाधि सिन्धूनानन्दधारांबुधि वर्धकोऽयम् ॥ भाग्येन लब्धः सशिवोपहारः शिवोपहारार्हमिदं शरीरम् ॥ ८२॥ अनेन तावन्मम मुक्तिरेव प्राप्ति प्रपा हेतुरयं विशेषात् ॥ ८२॥ जिह्वाजाड्यं विनाशक्तो यमधुना तद्गो॑ना भाजनम् पुण्यानां भवतीति मे मतिरभूदत्यद्भुतं पावनम् ॥ हारं किन्न महोपहारमसकृत्संप्राप्य नन्दीश्वरो गाणापत्यमवाप्य भाग्यमतुलं तद्भाग्यदानोद्यतम् ॥ ८३॥ इति तद्वचनं श्रुत्वा राजा सन्तुष्टमानसः ॥ तमाहूयाह कोसीति स विष्णुं प्राह भूपतिः ॥८४॥ तदा स नन्दनः प्राह राजानं शिवपुंगवम् ॥ अयं नारायणो राजन् आगतोत्र निशामुखे ॥ ८५॥ इति तद्वचनं श्रुत्वा राजापि कमलापतिम् ॥ शिवार्चन रतं प्राह कुस्ते धर्मं इतिस्वतः ॥ ८६॥ विष्णुरुवाच ॥

६९/

धन्योऽसि धन्यः किमन्योऽपि न वास्ति लोके मन्ये शिवाराधनमेव धर्मम् ॥ अन्यत्र धर्मं भ्रमतः प्रवृत्तिर्जन्मानुवृत्यै मरणानुवृत्यै ॥ ८७॥ धर्मः शंक
र पूजनं नव लसद्बिल्वी दलैः कोमलैः ॥ भस्मांगे निटले विभाति विलसद्रेखावली केवला ॥ ८८। रुद्राक्षामल मालिका शिर शिवा कण्ठेऽ
पि वा कर्णयोः ॥ श्री पञ्चाक्षर मंत्र राजजपनं मन्ये परं मुक्तिदम् ॥ ८९॥ धन्यानां शिव पूजने खलु मतिः प्राग्जन्म पुण्यार्णवैः नूनं शंकर पूजने
न न जानिः संसार वार्त्ता कुतः ॥९०॥ भाग्येनैव परं महेश्वर पदांभोजार्चने जायते बुद्धिः सिद्धिरियं विशुद्ध मनसोऽप्यन्या न सिद्धिर्यतः ॥ ९१॥
न जानन्त्येवान्ये शिवपद[illegible] महाम्भोज भजन प्रभावं भावानाम् भवति परमा सा मतिरपि ॥ अपारं तत्पुण्यं गणितमपि केनापि गणना
मतीत्यास्ते वस्तु प्रकरमपि दृष्टं भवति किम् ॥ अखण्ड भूमण्डल दानतोऽपि वामार्धजानि प्रवणं मनः किम् ॥ परन्तु तत्स्याद्गिरिजा सहाय
पदाम्बुजाराधन मानतः स्यात् ॥ ९३॥ कति कति भुवि सन्तः सन्ति ते स्वान्त रूपे कनक कमल कान्त्यो शंकरं भावयन्तः ॥ सित भसित
विभूषाः शाङ्कर लिङ्गांगभोग…च्युत जल लव पानाः पीनमानानुमोदाः ॥ ९४॥ ये ये शाङ्कर लिंग पूजनरताः ते सर्वथा दुर्लभाः ॥ शम्भु
स्तुष्यति येन तेन सततं धर्मेण लभ्यं सुखम् ॥ ९५॥ लिङ्गाराधनमेव तावदसकृत् पुण्य संवर्धकं ब्रह्मानन्ददमप्यतः परमपि प्रा
यः किमन्यद्भवेत् ॥ यागैर्वा तपसापि वा शिव पदांभोज प्रसादं विना भाग्यं नैव तदेव भाग्यमसकृद्वृद्धिं शिवाराधनैः ॥ ९६॥
गौरीनाथ पदारविन्द भजनात् किं किं न लभ्यं भवेद्भाग्यानां निधिरेव शंकर पदांभोजार्चनं सर्वथा ॥ यत्पादाम्बुज पूजया कृतमह

शिवरह०
११८

पापक्षयः स्यात्ततः संपद्वृद्धिः सुखक्षणं प्रतिदिनं सन्तोषधारोदयः ॥ ९७ ॥ धीरोदारकुमारदारविभवः प्राप्तिश्च तं शैलजाकान्तं स्वान्तमपेक्षते मम सदा संसेवितुं सर्वथा ॥ यत्पादाब्जरजः प्रभावमहिमा नैवैर्न विज्ञायते वेदान्तैरपि सन्ततं मुनिजनस्वान्तैरनन्तैरपि ॥ ९८ ॥ तं देवोत्तममामनन्ति गिरिशं वेदाश्च तत्पादुका ध्यानाराधनसाधनं मम मनो नूनं न जाने परम् ॥ स्मृतोऽप्ययं सर्वसुरासुरेश्वरो ददाति मुक्तिं स शिवः कथं वा ॥ नाराधनीयो न च सेवनीयः स एव तावत्सुरभूरुहो मे ॥ ९९ ॥ यन्नामस्मरणप्रवीणचरणांभोजार्चकौ वासुकिब्रह्मेन्द्रादिमरुद्गणा अपि तथा गन्धर्वसिद्धादयः ॥ तस्यैश्वर्यमपारमप्रतिममव्यक्तिं प्रहायोद्यतं तं देवोत्तममन्तकान्तकमहं मन्ये सुराधीश्वरम् ॥ १०० ॥ यल्लिङ्गार्चनमात्रलब्धमधुना वैकुण्ठरूपं परं स्थानमेतदपारदिव्यमहिमा विज्ञायते केन वा ॥ तं मत्वा सकृदप्युमापतिमतन्वैश्वर्यसौभाग्यदम् प्राप्स्यैश्वर्यमपारमेव बहवः प्रापाश्च मुक्तिं परम् ॥ १ ॥ अस्माकं शिवलिङ्गमेव सततं पूज्यं तदभ्यर्चनात् प्राप्तं भाग्यमतः परं पुनरपि प्राप्तव्यमेवासकृत् सौभाग्यं सुखदाननालनिपुणः कास्यप पूर्णार्थवस्तं गौरीरमणं क्षणेन शरणं प्राप्ताः सुराः सर्वदा ॥ २ ॥ चक्रं प्राप्तमुमासहायचरणांभोजार्चनेनादरात्तेनैवामरवैरिशासनकरः सोऽहं तदाज्ञाकरः ॥ तद्भृत्यैरपि नान्दिकेश्वरमुखैः विज्ञायते मङ्गलं शर्वाराधनसाधितं तदपि मे वृद्धं शिवाराधनात् ॥ १०३ ॥ हंसः शंकरपादपद्मभजनप्राप्तबलग्लहंहतः पापसंघाचारो

हं॰रु॰उ॰
अ॰ २७

[illegible]पि मुरोपि तत्पदाब्जः पुञ्ज प्रसादान्नधा ॥ सर्वार्थप्रद एव शंकर इति ज्ञातास्तदा राधने किं वा दुर्लभमित्यवैमि सन्निधिः साक्षान्निधीनां निधिः
॥१०४ यन्नामामृत पान पीन मनसां सिद्धिः करस्था सदा सर्वेषां ते निश्चयोपि तद्गृहगतास्तं देवदेवं भवम् ॥ भक्ताभीप्सित दान लोल ममल ज्वालालवा
ल्लोलसद्भालं बाल सुधा करामल जटा लीला कलापं भजे ॥५॥ इति तद्वचनं श्रुत्वा राजा सन्तुष्टमानसः ॥ ददौ हारानपारांश्च हार वृक्षासनि
ध्यावे ॥६॥ कमला राजदाराणां निकटे शिवगायनैः ॥ वीणां गृहीत्वा सन्तोषं जनयामास सादरम् ॥७॥ तामिन्दिरामिन्दुकलावतंसगानानु
रक्तां नृपवर्यदाराः ॥ विलोक्य भाग्यं कमले तवेति तामूचुरत्यादरमब्धिकन्याम् ॥८॥ राजदारा ऊचुः ॥ वैकुण्ठभवने नित्यं किं [illegible]
ते कार्यं कथं त्वया ॥ समयो नीयते पद्मे वद सादरमद्य नः ॥९॥ लक्ष्मी उवाच ॥ तत्रास्ति सदनं रम्यं हर्म्यस्याधो मनोहरम् ॥ तत्र
लिङ्गानि तिष्ठन्ति नार्मदान्येव केवलम् ॥१०॥ तानि लिङ्गानि मन्दारैः कोमलैर्बिल्व पल्लवैः ॥ पूज्यन्ते परितस्तस्य मन्दाराः सन्ति कोटि
शः ॥११॥ त[illegible] (बिल्व) वृक्षाः सन्ति तावत्सहस्रशः ॥ अखण्डबिल्वपत्राणामाकारा एव सर्वदा ॥१२॥ तत्पूजनार्थमुद्योगे कृते सत्येव शाखिनः
892 अवाङ्मुखा भवन्त्येव करग्राह्यास्तथोन्नताः ॥ उपविश्यैव तत्पत्रैः कुसुमैरपि शंकरः ॥ पूज्यते सावधानेन पञ्चाक्षर पुरःसरम् ॥
॥१४॥ कर्पूरदीप मालाभिः मण्डितं शिवमन्दिरम् ॥ मुक्ताकलाप संकीर्णं मणि दीप विराजितम् ॥१५॥ तत्र हेममराला(नां) समूहाः
सन्ति कोटिशः ॥ ते च हेमाम्बुजैर्नित्यं पूजयन्ति महेश्वरम् ॥१६॥ एवं प्रदक्षिणीकृत्य शिवनाम जपोत्सुकाः ॥ नृत्यन्ति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति हंसाः सर्वेऽपि तस्मिञ्छिव गृहं गयो ॥१७॥ तेषां च कृत्यमन्यं तु हंसानां नैव दृश्यते॥ तिर्य्यञ्च त्वमपास्यापि कुर्वन्ति शिव पूजनम् ॥१८॥ ते सुवर्णमृणालानां माल्यान्यानीय सादरम्॥ प्रयच्छन्ति महेशाय सोपभोग्यानि सर्वदा॥ तेऽपि भूति त्रिपुण्ड्राङ्का स्थूल रुद्राक्षभूषणाः॥ तेषामालोकनेनापि भक्तिर्भवति शंकरे ॥१२०॥ तत्र ये ये विहङ्गाश्च ते सर्वे शिव पूजकाः॥ वदन्ति शिवनामानि तेऽपि तावन्मुहुर्मुहुः ॥२१॥ पूजान्ते शिवनैवेद्यं तैः सहैव हि गृह्यते॥ तेऽपि शंकर नैवेद्य भोजनासक्तमानसाः ॥२२॥ प्रति ग्रासे महादेव शंकरेति वदन्ति ते॥ शिवनामानुसंधाने निरता स्तेन सर्वदा ॥२३॥ गौरीपते महादेव शंकरामरनायक पाहि मामिति सर्वेऽपि ते वदन्ति प्रतिक्षणम् ॥१२४॥ शिवनामसुधाधारा पीतं शंकरमन्दिरम्॥ मदर्थमेव रचितं तत्तावदति सुन्दरम् ॥२५॥ मम व्रतं महेशस्य पूजनं सर्वदा खलु॥ व्रतान्तरन्न जानेऽहं शपथः शिवयोः पदयोः॥ २६॥ कार्य्यान्तरेषु व्यासङ्गाच्छिवलिङ्ग समर्चनम्॥ विघ्नितं स्यादिति त्यक्तं मया कार्य्यान्तरं खलु ॥२७॥ अन्य द्रव्यमलं मे किञ्चिच्छिवलिङ्गावलोकनात्॥ भिन्नं न स्वप्नवार्तादि निद्रा वार्त्तापि दूरतः॥२८॥ इति तद्वचनं श्रुत्वा राजदाराः परस्परम्॥ विलोक्य विस्मयाविष्टाः कमलाञ्चुरादरात् ॥२९॥ राजदाराः ऊचुः ॥ कमले बिमले भद्रे भद्रमस्त्यव्रतं त्यज॥ रहस्यमेकं वदमे सन्देहस्तत्र तिष्ठति ॥३०॥ पतिव्रतासि सुभगे समये पति सेवनम्॥ क्रियते किं न च रतिः भर्तर्यपि विहारिणी ॥३१॥ इति तद्वचनं श्रुत्वा लज्जानम्रानना तदा॥ प्राह सत्यव्रतरता कमला राजसुन्दरी ॥३२॥ लक्ष्मी उवाच ॥ अभिलाषोपनीतानि सु-

कभिलाषोऽनीतानि सुखान्यसुरवैरिणाम् ॥ अङ्गनालिङ्गनापेक्षा न तेषामिति मन्यताम् ॥ ३२ ॥ अमराणां स्वभावेन न तु कालोऽपि सर्वदा ॥ नव यौवनसम्पन्नाः सम्पन्नाः सुखसाधनैः ॥ ३३ ॥ भर्ता नियामकत्वेन शंकरेणापि कल्पितः ॥ अमराणां हि पुरुषे वाञ्छापि खलु सर्वथा ॥ ३४ ॥ अतो न सुरतापेक्षा परस्परमतः परम् ॥ समयो नीयते नित्यं केवलं शिवपूजया ॥ ३५ ॥ इति तद्वचनं श्रुत्वा दत्वा भूषणमुत्तमम् ॥ पुनस्तामाह रमलां कमलां स्मितपूर्वकम् ॥ ३६ ॥ सौंदर्य्यमेतत्तव तुंग शृङ्ग संकाश वक्षोजभराति शोभा ॥ अणोरणीयोऽपि समध्यभागः सुखाय कस्येति वदाधुना मे ॥ ३७ ॥ आस्यं स्यादरविन्द सुन्दरमिदं नेत्रारविन्द प्रभा वेणी नीलफणि प्रभापि जघना पार प्रभाप्यजजे ॥ कस्य स्यादुपभोगहेतुरियमप्यावर्त्त शोभा शुभा हित्वा सोऽपि नपुंसको हरेरपि प्रायस्त्वदुक्तोक्तिभिः ॥ ३८ ॥ तरुणीं रमणीमपास्य को वा विरतः स्यादिति शुद्धभोगयुक्तः ॥ न पुमानिति निश्चितोऽत एव प्रतिभाति त्विह विंबनेति नूनम् ॥ ३९ ॥ विनोदवार्त्ताभिरलं किलेदं वक्तं परं तावदिदं तथापि ॥ विचारितं सत्यमिदं वदन्ति श्रुत्वा वचस्तां पुनराह पद्मा ॥ १४० ॥ पतिव्रतानां परमः स धर्मः पाति प्रियालापन साधनानाम् ॥ सम्पादनं स्यादृतादिलागतानां न नामराणामिति निश्चयो मे ॥ ४१ ॥ यावत्तत्वविचारतत्परमतिस्तावन्न नारीमुखं द्रष्टुं वाञ्छति मानवोऽपि सुतरां देवस्य तत्वं यतः ॥ जानातीति सती पुतोऽपि न सती संगप्रभेदे मतिं कर्तुं वाञ्छति चित्तमेव न तथा नारीगतं जायते ॥ ४२ ॥ विषयेष्वपि निस्पृहं मनो न कदापीति निरस्य तत्कथम् ॥ त्रिदशास्य भविष्यतीत्यपि त्रिदशास्तत्वविनोदलालसा ॥ ४३ ॥ शिवध्यानानन्द प्रवणमनसा मत्प्रविषये न बुद्धिर्धीराणामिति खलु मनो न प्रसरति ॥ अतो नारीसंगे विर

613

ति रति सं भाग्येन महतां सुराणां सा तावद्गिरिश चरणांभोज भजनात् ॥ ४४ ॥ प्रसादं चेतस्य त्रिनयन पदांभोज भजनं करोति श्रान्तन्नु भवति म
नो दुष्टविषये ॥ अतः शर्वेः सर्वैरनुदिनमनु ध्येय इति मे सुधा रूपा बुद्धि र्भवति भवतामप्यभिमता ॥ प्रसादं मन्ये हं शिव चरण पंकेरुह भवं सु
राणामैश्वर्य्यं तदपि न मनो वाञ्छति यतः ॥ शिवा कान्ता श्रान्ता शिव तात कृपा रूप सुधया मनस्तृप्तं तस्मः क्वमपि विषयं वाञ्छति जनः ॥ ४६ ॥
कस्तूरिका कर्दम लेपनेन कर्पूर पाटीर रसाभिषिक्तः ॥ सिताभितांगार रजः प्रसारं किं याञ्छतीति प्रतिभाति चित्ते ॥ ४७ ॥ आमस्तमन्तः करणं
ममेदं उमासहायाङ्घ्रि सरोज भृङ्गः ॥ अतो न वाञ्छा विषयेति तुच्छे स्वभावतो वृश्चिक पुच्छ तुल्ये ॥ ४८ ॥ अमन्द मधुर स्फुर किरण पादपङ्कोल्लसन्
मरन्द रस धारणं खलु मनः परं क्रीडति ॥ तथा च मृड शंकर स्मरहरामराधीश्वर प्रसाद सुमुखो भवेत्यनुनय प्रवणं मनः ॥ ४९ ॥ शिवा शिव
पते शिव शिवेति नामामृतं पिबत्यनुदिनं मनो मम विचार एवात्र न ॥ अतः पशुमाधपति गिरिशं प्रपन्नं मनः किमन्यदपि वाञ्छतीत्यपि
विचार लेशोऽपि न ॥ १५० ॥ भाग्यस्याधिरेव नेत्यपि मतिर्जाता भवद्दर्शनात् नारीणां गिरिशार्चने सति यदि रातिः सा स्याद्भवानी खलु
नारी रूपमुपेत्य शंकर पदांभोजार्चनात्यादरा सा गौरीति विनिश्चयो मम समुत्पन्नः शिवाराधनात् ॥ १५१ ॥ इति श्री शिवरहस्ये हराख्ये
तृतीयांशे उत्तरार्धे य... ...क्य जनक ...वादो नाम सप्तविंशोऽध्यायः ॥ २७ ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ याज्ञवल्क्य उवा
च ॥ इत्युक्तं कमला वचः श्री भरता भीष्ट प्रदं सादरं श्रुत्वा नाम अभिनंद्य सुन्दरतरम् हारं मकल्पादरात् ॥ तत्कण्ठे कल कण्ठ कण्ठा निनद

नन्दालन्द प्रदानोद्यते तद्वीणामधुरध्वनि श्रवणजानन्देन पूर्णास्तदा ॥१॥ सा सप्तस्वर तानिबद्ध मधुरैर्गानैः सवीणोद्भवैः भो शंभो भव साम्ब शंकर महादेवेति [illegible] शब्दान्वितैः ॥ कृत्वा शंकर मन्दिरं प्रति स्वापूर्णं तु तूर्णं नयं पूर्णानन्द प्रमुच्चकारकमिति प्रेम्णो गरिम्णा तदा ॥२॥ तद्गान श्रवणादरेण स धराधीशो विनीत्वा मुहुः कालं काल भया पहार चतुरो धीरोऽतिहारः परम् ॥ तत्किं किं नर सुन्दरी सुरुचिकरं गानं किमन्यामरी गन्धर्वाधिप सुन्दरी सुचिकरं गानं किमित्याह सः ॥३॥ ततः परं तत्प्रतिहार नारी विचार्य द्वार समूहमध्ये ॥ निश्चित्य तावत्कमलाविलास गानं ययौ भूपति सन्निधानम् ॥४॥ प्रतिहार्युवाच ॥ स्वामिन्पूर्व भवार्जितामित महा पुण्य प्रभावैरुमा कान्ताराधन तत्परा हरिसती सायं समभ्यागता ॥ कृत्वा शंकर पूजनं पुनरियं गान प्रियं सात्त्विकं तं गौरी प्रिय मादराच्छिव परैः वर्णैः परं गायति ॥५॥ तद्गाने रसरंग योऽपि विवशाश्चित्तार्पितत्वं मुहुः प्राधापाराधीयाभिधान निनदैः दाराधूव ते तत्पराः ॥ आहाराद्विरताः कदापि न तथा तद्गान धाराधराश्चित्राणामपि चित्रतामुपगता स्तत्कौतुकं केवलम् ॥६॥ श्रुत्वा तु गानं मृगनायकानां दाराश्च शार्दूल वरांगनाश्च ॥ नयान्ति तावद्विपिनं स बालं मेणीकुलं तिष्ठति गानलोलम् ॥७॥ झंकारैर्विरता श्चरन्ति परितो भृङ्गाङ्गनानां गणाः ॥ तद्गान श्रवणात्तथा परभृतां नारी गणस्तिष्ठति ॥८॥ अत्युन्मत्त मराल राजवनिता पश्यन्ति तामादरात् ॥ तद्गान श्रवणाति लज्जित मनो वृत्या निवृत्तस्वराः ॥९॥ सा सप्तस्वर नव्यमेव कुरुते नामे ग्रामे मेकैकमप्यस्यानन्द समन्विता स्फुटतरं तच्छ्रूयते शांभवम् ॥ जामातः परमाद्रि

राणिपरह०३
१२२

रापि रुचिरं गानं विहायापि हा गन्तुं नेच्छति शंकराननं मुहुर्द्दोरान्ते पश्यति ॥१०॥ इत्याकर्ण्य नयः सम्भूपतिरपि प्राह प्रकृष्टं वचः ॥ तन्म त्यूह निवारणेन समयोऽनेयः श्रीनाराधनैः ॥ इत्येवं स्थिरतां गतो हरिरपि स्वच्छस्तदा कर्णेनैरानन्दांबुधिवर्धकैस्तादितैःस्थानन्दधाराव्रताः ॥११॥ एव तत्कान्तमलाकृतामितमहागीणाप्रभ्जं परं गानं शंकरनाम चित्र कृतमति ध्यायं स शृण्वन्नृपः ॥ सन्तुष्टो निरतो न तच्छ्रव णतो कालो ऽपिनीतस्ततो मध्याह्ने शिवपूजनोद्यतमतिश्चक्रे श्रीनाराधनम् ॥१२॥ ततः परं सम्भूपालो दापयामास भूषणम् ॥ विविधं रत्नसंकीर्णं कमलायै मनोहरम् ॥१३॥ ततस्तं प्रेषयामास नारायणमिलापतिः ॥ कमलासहितं सोऽपि ययौ वैकुण्ठमन्दिरम् ॥१४॥ ततः परं सम्भूपालः सायंकाले ऽपि शंकरम् ॥ पूजयित्वा विधानेन ययौ स्वनगरं प्रति ॥१५॥ ततोनन्तं महादेव नैवेद्यमुपभुज्य सः ॥ सदारे-श्च कुमारैश्च रेमे सुन्दरमन्दिरे ॥१६॥ एतादृशस्य स्मरणेनापि सिद्धयः ॥ सिध्यन्ति शम्भव श्रेष्ठाः सम्भूपालः शुभावहः ॥१७ तस्मिन्धासति तद्राष्ट्रे श्रीवि विद्यामनाश्रयः ॥ अबुद्धा स्य सर्वत्रैयं मुक्तिः सुलभा भवेत् ॥१८॥ अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥१९॥ तस्य श्रवणमात्रेण जायते गतकल्मषः ॥ तद्राष्ट्रे कोपि विपिने संचरंल्लिंगमुत्तमम् ॥ ददर्श सरस्तीरे चक्रे तस्यैव पूजनम् ॥२०॥ अकुर्वन् हेमपद्माद्यैर्न च बिल्वीदलैरपि ॥ तत्र सायमुषित्वापि कुर्वन्नेव श्रीवार्चनम् ॥ ददर्श कालमुन्मत्तं भूतप्रेतसमन्वितम् ॥२१॥ नागपाशायुत परं शूलादिसमलंकृतम् ॥ ततः सतावता भीतोऽपि तं दृष्ट्वा कालमद्भुतम् ॥२२॥ तन्निवारकमन्नाप्ति किमित्यासि भयातुरः ॥ दूराद्दृष्ट्वापि

ह०त०उ०
अ०२३

तं कालं कम्पमानाति भीषणम् ॥ तत्साक्षान्न च लोक्यापि तद्दूतानपि कोटिशः ॥ किं कर्तव्यं क्व गन्तव्यं गमनेऽपि बलं न मे ॥ २४ ॥ अकस्मादागतः का
लं क्रूरदृष्ट्या स पश्यति ॥ शिवलिङ्गाराधनेन पापनाशो भविष्यति ॥ २५ ॥ इत्याशा भूयसी नासीत् किमित्येवाति विस्मिता ॥ जीवतापि
मया दृष्टः कालोयमतिभीषणः ॥ २६ ॥ मरणानन्तरं किं वा भविष्यति भयं मुहुः ॥ भवार्चनभयं कालाज्जायते यदि जातु चित् ॥ २७ ॥ असकृ
न्नभवत्येव किमित्यपि न मे मतिः ॥ कालान्तकाराधनेऽपि कालभीतिर्भवेद्यदि ॥ २८ ॥ तदा तद्द्विजनाथः स्यात्केन वा तन्निवार्य्यते ॥ महामृ
भयदो यममोयो यदि तदा कथम् ॥ २९ ॥ अन्येषां जीवनं वा स्यादस्याधीपि कः परः ॥ लिंगार्चनरतस्यापि विपिने साधमोदयो ॥ ३० ॥ यदि कालं द्र
वेद्भीति सदा श्रुति कथा कुतः ॥ श्रुतयः शिवपूजनाद्भयं न जनिर्वा भवतीति सन्ततम् ॥ प्रवदन्ति वदन्ति तत्कथं मुनयोऽपीति विनिश्चयो-
मम ॥ हे कालानक हे महेश्वर महादेवाव मां दुर्दशामेनां संहर संहराशु विविधां कम्पायमानस्य मे ॥ ३२ ॥ पथ्यांगं परिपश्य गद्गदगिरा न स्तोतु
मिच्छापि मे गौरीकान्त पदारविन्द भजन ध्यानेऽपि वा मन्मनः ॥ भो शंभो करुणा कदा मयि तव स्यादृग्विधेयाधुना मृत्युः सन्निहितोऽतिभी
षणवपुः काकोदरान्विक्षिपन् ॥ ३३ ॥ आयात्यागत एव तेन करुणा किं मेन विश्वस्य ते पादाम्भोरुहमर्चितं सरसिजैर्भीतिप्रभीतिं कुरु ॥ आ
यस्याम्मदपेक्षितं तदखिलं प्राप्तं शिवाराधनात्तत्तावद्गिरिशार्चनाय सकलं जातं कुमारा अपि ॥ ३४ ॥ वीरा एव जरा कपोलमखिल
म प्रासाधुनाप्तं वपुः ॥ कावः कल्पित एव पक्व कदलीतुल्यो महे श्रायते ॥ विद्या राशिरपार रत्न जलधिप्रायः शिवायार्पितस्त्वत्पादा

म्बुरुहे मनोपि निहितं सर्वस्वमेतन्मम ॥ ३५ ॥ आशास्यं चन किञ्चिदिन्दुशकलालंकारपादाम्बुजध्यानानन्दरसानपदित्यलमलं संसार
वार्तारसैः ॥ युक्तं तावदतः परं मम शिवध्यानं शिवाराधनम् ॥ भस्मोद्धूलनमादरेण सततं रुद्राक्षसंधारणम् ॥ ३६ ॥ लिङ्गे बिल्वद
लार्पणम् शिवपुरे वन्द्या स्मरावर्तनम् हाराधारकथा सुधानिधि महाकल्लोलमालाप्लवः ॥ मूको वाक्पतितामुपैति जनितः पङ्गु
र्गिरेलङ्घनम् ॥ तावत्किल करोति किल धरणीनाथत्वमत्यातुरः ॥ ३७ ॥ मृत्युं वापरिचारकं धनपतिं गौरीश्वराराधनात्तत्साम
र्थ्यमशक्यमेवगदितुं वेदान्तवृन्दैरपि ॥ किं चिन्तामणिकोटिभिः सुरतरुश्रेष्ठैरपारैः सुराधारात्युत्तमगोकुलैर्निधिवरैर्गौरीश्वराराध
नैः ॥ ३८ ॥ सर्वाभीष्टफलोदये सति सतां स्वानां न संवर्तते तद्भिन्नेषु मरीचिकादि सदृशेष्वाशापि सर्वात्मना ॥ न कृतान्तकृतान्तपूज
याद्य दि नेयः समयो मयातदा ॥ नियमेन विनैव मायया समयो मे नियमं करिष्यति ॥ ३९ ॥ न योगयाग व्रतदानसाधनप्रसा
धनानामधुनास्ति कृत्यम् ॥ परन्तु काले खलु कालकाले लिङ्गार्चनेनैव नयामि कालम् ॥ ४० ॥ रेवातीरनिगूढनीरजरजः पुञ्ज
प्रभामञ्जुले नीलानीलमहोत्पलामलदलानीले शिलामण्डले ॥ दृत्वा बिल्वदलं सधूगितलं जलं भ्रमण्डलाखण्डलो बालोपि प्र
वलो भवत्यमलविकलस्यात्कालकालप्रियः ॥ ४१ ॥ रेवातीरवरप्ररोहरुचिरैर्दूर्वाङ्कुरैरादरात् क्षीरोदारविहारदारुचिरस्था-
पारहारात्परम् ॥ त्यक्त्वा सायमिहादरेण गुरुणा शार्ङ्गलिङ्गं कथम् ॥ निर्धूतव्यथमर्चितं सकृदपि ध्यातं विभूत्यासितम् ॥ ४२ ॥

श्रीवीरेश्वर लिङ्ग पूजक पदांभोजार्चितं यद्रजस्तत्साध्यामर वाहिनी जगदिदं तावत्पुनाति स्वयम् ॥ एतावन्महिमा शिवार्चन रतस्यातः कथं वायम-

स्तोयं मे भयदो भवत्यवरे प्राप्तेपि मृत्योः परम् ॥ ४३ ॥ यत्तम्पन्नगरं मनोहरवरं हारं तदत्युन्नतं प्राकार प्रवराति रोहणमभि व्याकीर्ण निश्रेणिका ।

तद्वारार्गल कुञ्चिका तदनघ श्री कामिनी नीविका चोलोच्छेदन साधनञ्च बहुधा श्री काल कालार्चनम् ॥ ४४ ॥ मेरुः कल्पान्त वह्नि प्रतिहत

शिखरो भस्म भूतोस्तु भूर्वा पातालं यातु यातु त्रिदशनगरमप्यन्ततो भस्मतां किम् ॥ कालोप्यायातु मृत्योरहमिह न महादेव भिन्नं प्रपन्नम्

सम्पन्नं मे मनोपि त्रिनयन चरणाराधनेन प्रपन्नम् ॥ कोयं कालोपि रङ्कः कथमपि मरणे तूर्णमभ्यर्णको ऽपि माया रूपोपि वामे मरणमपि

न मे काल कालार्चकस्य ॥ यस्यां के सा भवानी त्रिभुवन जननी तत्पदाराधकानां शंका तंका विहीनस्फुरदुरुमनसां कालभीतिः कुतो वा ॥ ४६

कालश्चेदागतो ऽयं प्रतिहत गतिरप्यस्तु यस्तु त्रिनेत्रे ध्याना रूढोति रूढः परहित करुणासक्त चित्तं तमेकम् ॥ हित्वान्यत्रैव यास्यत्ययमपि

चतुरः काल कालाद्विभीतो भूतिं स्मृत्वापि भीतिर्भवति भवाति वा भ्रान्ति चित्तो ऽपि मत्तः ॥ ४७ ॥ अस्माकं परमन्त कान्तक पदांभोजार्चना

राधनैर्दैन्यं तावदपाकृतं गतमिदं कालाद्भयं निर्भयः ॥ लोके शांभव एव केवलमतः कालाद्विभेतीति धीः धीराणां कथमित्यतः कथमि

तो भीति र्भविनी च मे ॥ ४८ ॥ हे कालान्तक शंकरामरवरापरामराराधित स्वामिन्काल मपाकुरुष्व ~~स~~भ्रमभ्येतु यातु स्वकम् ॥ घोरं मन्दिर

मे वरीवरमयं कः शांकराणां भयम् ॥ दातुं वा यततो कृतोकृतामनेनापीह पापम् खलु ॥ ४९ ॥ श्री काल काल पदि तेन तु कालनाशे

शिवरह०२
१२३

हं०गं०उ०
अ०२८

शक्तिस्तदा जनिजरामरणादिनाशे ॥ शक्तिः कथं वदति याति विनोदवार्ता सा तेऽपकीर्तिरपि ते कथमिन्दुमौले ॥५०॥ प्राण प्रयाण स
मये परमिन्दुमौलेः पादारविन्दमकरन्दरसाभिषेकम् चित्तभृङ्ग वरमर्तिभवात्वितीश सम्प्रार्थितोसि मुहुरीश न विस्मृतोसि ॥५१॥
अद्यापि पीरिह दधान तवेन्दुमौले डोलायितं मम मनः कथमद्य न स्यात् ॥ किं तस्य वारणमशक्यमुत ानिशाव्यं शार्वस्य तावदिति
शैलसुता सहाय ॥५२॥ कालं परं वरद सङ्कल्पमहं स्मरामि गौरी मनोहर पदाब्जरजः प्रसादात् ॥ एतान्निवारणमशक्यमिहास्ति
चेत् किं मे त्र्यम्बकेन मनुना मनसास्मृतेन ॥५३॥ अद्यान्त कान्त भयं यम वारणेन तावान्निवार्य निवार्य येन चित्तम् ॥ स्वस्थं
तदङ्घ्रिकमलामल पूजनादौ तद्विघ्नवारणमवश्यमपेक्षितं मे ॥५४॥ प्राण प्रयाण समयेऽपि न लिङ्गपूजा त्यागो मतो
न भवतीति विधिश्रुतोऽपि ॥ किं तेन तावदधुनात्वदनुष्ठितेन हा हन्त हन्त विधिरेव हतः कथं वा ॥५५॥ त्वत्पादपद्ममणिप
ञ्जरपिञ्जरस्मे चित्तं भवत्वनिशमिन्दुकलावतंस ॥ मन्मानसं परमहंसकुलावतंसां मत्वा भवच्चरणवासमिह प्रयच्छ॥५६
सोऽयं यमो यदि शरीरमिदं विनेतुमायाति तर्हि भयमस्य न मे मनः स्यात् ॥ त्वत्पादपद्मनिहितं धनमस्मदीयं नेतुं न तस्य खलु
शक्तिरुमासहाय ॥५७॥ धनं तावल्लोके मरणसमयेऽपि प्रियतमं न हातुं वाञ्छा स्यादिति खलु भवेद् गोपनमपि ॥ पुनः
प्रत्याशायामिति मम मनोरूप धनमप्युमाकान्ते दत्तं भवति सततं रक्षितमपि ॥५८॥ प्रत्याशा यदि जीवने तव यम

प्रायः प्रशान्ता तदा तावन्मामुपयाहि निर्दय यममुं मृत्युञ्जयं पश्य मे ॥ त्राता यं भयतः पिताऽपि स पुनर्दाताऽपि मुक्तेः प्रभोः सामर्थ्यं कथमद्य

विस्मृतमहो मोहस्तवायं कुतः ॥ ५९ ॥ तं मोहं परिहाय साम्प्रतमसकृन्मृत्युञ्जयं पश्य मामव्यग्रं कथमुग्रलिङ्गनिकटे पश्येयमस्याननम् ॥ उग्रानुग्रह

भाजने मयि कथं भीतिर्यमात्स्यादहो हाहा हन्तास्ति विमोहितो सि यमते भ्रान्तं च चित्तं खलु ॥ ६० ॥ हारेषु प्रणतोऽतिभीत इति ते कीर्तिः कीर्तिः कृतान्त

स्य वा सा तावद्विगता विनाशसमयः प्रायस्तवायं यमः ॥ प्रायः कस्य कृतान्तभीतिरधुना कर्तान्तवार्ताऽपि कः कालोऽपि न कालकालभजना

त्कालं न जानासि माम् ॥ ६१ ॥ इति तद्वचनं श्रुत्वा यमः प्राह तमास्तिकम् ॥ भयं मा कुरु मत्तस्ते न भयं जातु जायते ॥ ६२ ॥ धैर्यं विचार्य ते तावद्गिरिशा

राधकस्य ते ॥ वरं वृणु प्रयच्छामि यदपेक्षितमास्तिक ॥ ६३ ॥ आस्तिक उवाच ॥ महादेवे दातर्यपि ति वितत भाग्ये सति हिते सति स्फीते भूते किमि

ति परये हं परमपि ॥ वरं दातुं शक्तो न जगति तथा विष्णुरपि ते त्वया त्रातो नातः परमिति वरं नैव वरये ॥ ६४ ॥ त्रिदशेश महेशपादपद्मप्रवणान्तःकरण

स्य दुर्लभं किम् ॥ वरदेषु वरो हरः परो मे वरदत्वं तव केन निश्चितम् ॥ ६५ ॥ यद्यत्स्यात्समपेक्षितं तदखिलं प्राप्तं मयैवाधुना गौरीकान्तपदा

रविन्दभजनाद्देयं त्वया किं मम ॥ किन्ते तिष्ठति निष्ठुरं तव मनः कष्टप्रदानोद्यतम् ॥ स्वस्यस्यापि तयोर्भवत्यतिभयं तत्तः परं निर्दय ॥ ६६ ॥

लिङ्गाराधन विघ्न एव जनितस्तावत्त्वया तेन ते प्रायः स्यादपि शासनं खलु खलु श्रीकालकालार्चकः ॥ तस्माद्भीतिमुपैति कालविलयम् ॥

कर्तुं समर्थोऽप्ययम् कः कालान्तकपूजनेन कलये कालाद्भयं निर्भयैः ॥ ६७ ॥ न जानासि त्वं शिवाचार निष्ठप्रभावं च कालाधुनाकालका

617

लः॥ हित प्राय एवेति दुर्मतिः स्यात्स हारकः कोपि कालाग्निरूपः॥६८॥ महादेव पादारविन्दं मनो मे प्रायिष्टं प्रविष्टं विनष्टाघसंघम्॥
वदत्येव ते निष्ठुरं कृत्यमेतत् ततः कष्टमेवाद्य ते भावि काल॥६९॥ न रिक्तं मनो मे विरक्तं न गौरीसहायाङ्घ्रिपङ्केरुहाराधनेषु॥ समस्ता-
र्थदान प्रवीणेषु तेषु महेशेषु प्रसादेषु शक्तिप्रकृष्टम्॥७०॥ नास्माकं भयमिन्दुशेखरपदांभोजार्चनात्यादरात्संसारादपि कालतो न महा
पापौघतो वा यम॥ पाप लालिप्यते कृतोपि न भयं पापाम्बुराशिः क्षणात् नाशं याश्यति शंकरस्मरणतस्त्वत्तो भयं दूरतः॥७१॥ दृष्ट्वा हर
पदाम्बुजांचल रजोलेश प्रभूतानिलं पापाब्धिः प्रशमं प्रयाति सहसा लोकस्य सर्वस्य च॥ नाप्यं मामुपयाति तत्कथमपि प्रायस्त
मभ्यागतम् नाशं याति पतङ्गवत्खलु महादेवार्चकः पावकः॥७२॥ पापेभ्यो न भयं यदायमतदात्वत्तोपि भीतिः कुतः किं देयं तव वर्तते त्यज
महावाचालतां संत्यज॥ वाचालत्वमुमासहाय भजन सक्तेषु युक्तं कथं शान्तिः शांभव पुंगवस्य सहसा शातापि नैव त्वया॥७३॥ धा
र्ष्ट्येनागतमत्र भीतिमधुना सम्पादिता कापि सा तुभ्यं दास्यति भीतिमेव सहसा सा वृद्धिमध्येष्यति॥ उप्तं यत्र दवाप्यते खलु
खलैः खल्वाः समारोपिताः शालीनामुदयाय किं शिवजन द्रोहात्सुखं जायते॥७४॥ यद्यद्यावधि शांकरेषु विनयस्ते तर्हि
सर्वात्मना कः कालान्तकभीतितो रीतिते चित्ते परं तिष्ठतु॥ अस्माकन्तु भयन्न शाङ्कितमपि त्वत्तः श्री आराधने नित्यं स्याच्चिर
मेव तेन न भयं स्वप्नेऽपि सम्भावितुम्॥७५॥ अब्ध्यम्भवजमालयं प्रति गतिस्तव स्यात्सदा तदद्भुत भय प्रदस्त्वमसि तत्र तत्कष्ट

618

तः ॥ तदीय गृह संगमे तव न भीतिरप्यतो यथेष्टगतिरस्तु ते शिव पराङ्मुखानां गृहे ॥ ७६ ॥ अस्मिन्पावनपावने यम वने सिंहादयः सर्वदा
त्यक्त्वा वैरमुदार गोकुलयुताः तिष्ठन्तु ते शाम्भवाः ॥ तान्वा पश्य विशेषशान्तमनसा शान्तेन रूपेण ते दृष्टाः कष्टविनाशका अपि भवन्त्ये
वाति शान्तोभव ॥ ७७ ॥ त्वत्तो भीतिकृथापि मे न भवती त्येवावधार्यादरादैर्येणात्र शिवार्चनार्थमधुना तावत्परं स्थीयते ॥ सायं पूज
य शंकरं तव कथं भीतिर्न शंगाद्भवे ह्यङ्गाराधनसाधनेन मनसा शार्ङ्गं परं संस्मर ॥ ७८ ॥ इति वचनामृतं स कालः परमानन्दमित्यभू
तपूर्वम् ॥ अवधार्य ययौ नतोतिभक्त्या तम्भीतं वचनैः प्रसाध्य भूयः ॥ ७९ ॥ ततः परं विष्णुरवापदेशं तमेव तावद्गरुडध्वजः सन्
पीताम्बरालंकृतमूर्तिरिष्टं दातुं तदीयं कमलासमेतः ॥ ८० ॥ स दूरात्तं विलोक्यैव बिल्वैरवनताननः ॥ लिङ्गार्चनपरो जातः शिवध्यानपुरःस्स
रम् ॥ ८१ ॥ सायंकालीनमौनेन पूजयन्तं महेश्वरम् ॥ दृष्ट्वा विष्णुर्दूरतोऽपि शिवपूजारतोभवत् ॥ ८२ ॥ विष्णुः शिवाराधनसाधनानि संपा
द्य लिंगार्चनसादरोभूत् ॥ ततः समाप्याशु शिवार्चनं च स एव विष्णुस्तमुवाच गत्वा ॥ ८३ ॥ विष्णुरुवाच ॥ आस्तिकास्तिक वरोसि वरं ते
दातुमिच्छति मनो वृणु मे तम् ॥ किन्तवोसित महेशपदाब्जध्यानपूतहृदयोसि वरार्ह ॥ ८४ ॥ आस्तिक उवाच ॥ वेदैर्वेदान्यौतमभीष्ट्मे
कं मत्वा महादेवमुपाश्रितोहम् ॥ स एव मे सर्ववरप्रदाता दाता वराणां वरदोत्तमश्च ॥ ८५ ॥ यं यं वाञ्छति शाम्भवः प्रतिदिनं तं तं प्रयच्छत्युमा
कान्तः सन्ततमन्तकान्तक इति ख्यातोय एव श्रुतौ ॥ तस्मिन्मे वरदोत्तमे सति मनो दैन्यं न जानात्यतः ॥ किं वा दुर्लभमस्ति शंकरपरस्या

शिवरह० ३
१२५

ह०ता०उ०
अ० २०

नेन तन्मे मनः ॥ ७६ ॥ यो दाता जगतामवापि कमलाकान्तामराधीश्वरो गौरी चारु पयोधराधर महा हारावली लीलया ॥ लोकान्पालयति
स्वभावविभवः तद्वैभवस्यावधिः नास्त्येवेति सएवमेवरदइत्य न्यं न मन्यामहे ॥ ७७ ॥ स्वप्ने वा गिरिजामनोहरपदांभोजार्चनान्मम-
नो नैवासीद्विरतं न चान्य भजनासक्तं प्रमत्तं च न ॥ तेनैनो सितासिद्धि रित्यपि मति र्बुद्धिं प्रयात्येव मे दैन्या रातिरुमापतिः शरणमित्यन्यन्न
मन्यामहे ॥ ७८ ॥ यद्वो वारि क दण्डमण्डलकशाघातातिभीतो भवान् आदावेव चतुर्मुखोऽपि सभयं बिभायोऽपि तं केवलम् ॥ याचे पाच
क कल्पभूरुहमहं मोहं विहायाधुना ॥ मोहध्वान्तविनाशके सति शिवे लन्यं न म[illegible]न्यामहे ॥ ७९ ॥ अस्माकं गिरिजामनोहरहरापारादरात्या
दरैः स्वान्ते ध्वान्ततमे निरन्तरमुमाकान्तानुरक्ते सति ॥ अन्यत्सात्विकमपेक्षितं किमपि वा न्यूनं जगन्मण्डले पीयूषांशुकलावतंश भजनादन्यं न मन्या
महे ॥ ८० ॥ मृत्वा जन्मजराभिघातनिहताः शर्वान्य संसेवनाद्धानं मे मन एव तावदधुना तेभ्यो निवृत्तं ततः ॥ भूयस्तत्पदसेवनं न कुरुते दुद्ध
त्य कुन्द बुद्धापरम् ॥ तान्यत्का शिवपूजनं परमतो ध्यन्यं न मन्यामहे ॥ ८१ ॥ सुमृत्युर्यस्य जरापि जन्म जनितं दुःखं च यस्याभवत् तं मृत्युञ्ज-
यमेकमेव शरणं प्राप्ताः सदा सादरम् ॥ तस्मिन्नेव मदान्ध नायक वरे गौरी विहारे परे चित्तं क्रीडति तेन सिद्धिरभितो यन्यन्न मन्यामहे ॥ ८२ ॥ याव
द्ग्लानिरभूत्पराति विषमा तावत्पराराधने ध्यासक्तं त्वयि जन्म मृत्यु च भागे स्नाते निवृत्तं मनः ॥ को वा जन्मजराविहीन इतितान्वित्तं किय
र्याधुना श्री मृत्युञ्जय चिन्तने निरतमित्यन्यन्न मन्यामहे ॥ ८३ ॥ को वा रत्नविशेषरत्नविलसत्पात्रस्य दुग्धांशिवे दत्तं शर्करयास-

मेतमनघेनाज्येन युक्तं परम् ॥ त्यक्त्वा क्षारजलं पिबत्यनुदिनं नाल्मा द्विजान्यः सुरो नोपास्योपि न तेन फलमतोऽप्यन्यं न मन्यामहे ॥ ९४ ॥ को वा मेरुशरा

सनं त्रिनयनं गौरीविहारादरं व्याख्यान प्रवण प्रसाधनधनं कैलास सिंहासनम् ॥ त्यक्त्वान्यामरसेवनाय यतते भीतो यथा भीतिदं प्राप्नोत्येव विमोहितः प्र

कृतितो ऽप्यन्यन्न मन्यामहे ॥ ९५ ॥ कः प्राप्यापि सुधाब्धितीरमसकृद्वीरः पिपासातुरः ॥ तत्क्षीरं परिहाय दुर्मति युतः क्षाराम्बुराशिं व्रजेत् ॥ तस्माद्देव

शिखामणिं सुरमणिं श्रीशूलपाणिं मनस्त्यक्त्वान्यं न भजत्यपि स्वयमतोऽप्यन्यन्न मन्यामहे ॥ ९६ ॥ किं कष्टान्यपि विस्मृतानि भवता विश्वेश्वरा

राधन त्यागात्तायमियं गतैव कमला सिन्धुं ततः पीडया ॥ तन्निर्मन्थन कालकूट कलितज्वालाकुलः कृष्यातां प्राप्नोसि स्मर तत्परं स्मृतमतोऽप्य

न्यन्न मन्यामहे ॥ ९७ ॥ त्वं घोरे विपिने वराहवपुषा लक्ष्मीविहीनस्तदा तद्वन्याशन जीवनः शिवपदांभोजार्चनानादरात् ॥ तत्किं विस्मृतमे

व तत्स्मर पुनस्तेनापि ~~लज्ज~~ लज्जा न किम् ते तावद्गतेन तावदधुना त्वन्यन्न मन्यामहे ॥ ९८ ॥ स्वत्वं वस्तुषु भूतलेऽपि विदितं विश्वेश्वरस्ये

त्यतः सर्वं तस्य स एव तावदसकृद्दाता वदान्योत्तमः ॥ तस्मादेव समस्तवस्तु निचयः प्राप्तस्तदन्यस्य किम् ॥ स्वत्वं वस्तुषु ~~भूतलेऽपि विदि~~

~~तं विश्वेश्वरस्येत्यतः सर्वं तस्य स एव तावदसकृ~~ केप्यपीत्यपि भीतेरन्यन्न मन्यामहे ॥ ९९ ॥ वाञ्छा यत्र न सर्वथा न विदितं नापि श्रुत

म् सर्वथा तद्दातुं शिव पूजनाय यतते मृत्युञ्जयः सर्वथा ॥ तं देवोत्तममप्रयास फलदं त्यक्त्वा तदन्यं मनः गन्तुं वाञ्छति तुच्छमित्यपि कदा

प्यन्यन्न मन्यामहे ॥ १०० ॥ माता वासु शरीरपोषणरतो लि... र्चकानां सदा विश्वेशः स पिता पितेव विहिते भक्तिं लियुङ्क्ते पुनः ॥

६९

शिवरह०३
१२६

ह०त०३०
अ०२८

स्नेहाम्बुधि मौनिधिमालया परिवृतं भर्गं करोत्येव तं त्यक्त्वा तावदुमासहायमधुना त्वन्यन्नमन्यामहे ॥१॥ अस्मत्पूर्वजपूर्वजार्जितम
हापुण्याम्बुराशेः [illegible] फलम् सम्प्राप्तं किलामित्यवैमि बहुधा यस्मादुमावल्लभः ॥ अस्माकं कुलदैवतं परहितं कर्तुं समर्थः सदा तस्मादेव हिता
र्थलाभकलनादन्यन्न मन्यामहे ॥२॥ धन्यानां शिव एव दैवत[illegible]मिति ज्ञातं शिवप्रार्थनं धन्या एव परं विहाय सकलं संसारसंभ्रमम्॥
नित्यन्निर्मलचेतसाप्यविकलं कुर्वन्त्युदाराः परं हारास्त्व हरात्परात्परतरं त्वन्यन्नमन्यामहे ॥३॥ सम्प्राप्यापि शिवार्चनेन सकलं
सर्वं शिवाराधनोपायम्प्राह इति प्रभज विभवाः कुर्वन्ति शङ्कार्चनम् ॥ तस्मादप्यमितं फलं पुनरुमाकान्तादवाप्यान्ततः शान्ता एव
शिवं प्रयांति तमतोप्यन्यन्न मन्यामहे ॥४॥ यद्बिल्वीदलमप्युमापतिरति प्रीत्या गृहीत्वा नवम् ॥ क्लिन्नं वा शठितं पनीरसमपि कोपस्य
रङ्केवलम् ॥ मत्वा सर्वधनादिनाथ विततं दीनं करोत्यादरात् ॥ अन्ते मुक्तिमपि प्रयच्छति ततोप्यन्यन्न मन्यामहे ॥५॥ श्रीकण्ठाद्रिरि
राजराजतनया मेरुस्फुरच्छेखरापार श्रीपरिहारदक्षनिलसद्दृक्षोज वक्षस्थलात् ॥ इन्द्रादिप्रतिपक्षदक्षदलनात्कालानलाक्षा
त्परं स्वप्नेवा मरणेऽपि वा स्वकरणे त्वन्यन्न मन्यामहे ॥६॥ इति तद्वचनं श्रुत्वा विस्मितः कमलापतिः ॥ धन्योसीति तमुक्त्वैव प्रणतस्स
कृताञ्जलिः ॥७॥ ततः प्राह विष्णुः उपविश्यादरैः परम् ॥ तं विलोक्य कृपापूर्णकटाक्षैरुपलक्षितः ॥८॥ विष्णुरुवाच ॥ सर्वामरा
धीश्वर विश्वनाथ पादारविन्दे तव भक्तिरेवम् ॥ अनेकजन्मार्जितपुण्यसंचयैर्जाता प्रवृद्धाय पुनः पुनः सा ॥९॥ अहो महद्भाग्य

मभूत्तवेदम् यतः श्रीधाराधन सत्कमेव ॥ मनस्तदानन्ददमित्यवेमि ॥ तेनैव तावत्परमाप मुक्तिम् ॥ ११०॥ न क्वापि दृष्टा दृढ भक्तिरेव मुक्तिप्रसाधनमेव नूनम् ॥ पुण्येन केयमभजवेयमुमासहायाङ्घ्रि सरोजमात्रे ॥ ११॥ चित्तं पवित्रं तव गात्रमेतत्पवित्र मेवेति मतिर्ममासीत् ॥ धन्यस्त्वदन्यो भुवि कोऽपि मान्यः सामान्यतस्त्वं मनुजो न नूनम् ॥ १२॥ त्वमेव नन्दी किमुत प्रचण्ड-स्तण्डी स भृङ्गी किमु वीरभद्रः ॥ किं भैरवो नाथ षडाननो वा गजाननो वा वद तन्ममाद्य ॥ १३॥ आशास्या भक्तिरेवमसु सकल सुरगणाधीश्वरेष्वंकरेमे ॥ नित्यानन्दप्रदानव्रत निरत सदाचार धीरेति शूरे ॥ १४॥ गौरीवक्षोज हार प्रतिभट चटुलोद्द-घटुदोर्दण्डभार ॥ व्यापारासार सार प्रसर दुरुत्तरोरः सराधीश्वरे रे ॥ १५॥ दुस्तारापार पाप प्रवरा गिरिदरी दूर गाहान्ध-कार ॥ व्यापाराक्षेप टोप प्रतिभट निटिल लोल कालानल श्रीः ॥ १६॥ स्मृत्वा रुद्रापि पाप प्रदहन शमनोपाय एवेति मन्ये धन्या शास्या किमेषा लभवति महतां साऽपि सम्भाविताऽपि ॥ १७॥ यद्भाग्यापार पार व्यतिकर रुचिर स्फार गौरी कुचोरुव्या पारो दार हार प्रसर दुरुत रासार काश्मीर धीरा ॥ स्मृत्वा स्मृत्वानुभयोऽप्यनवरत हित स्वान्त सन्तान कान्तं गौरीकान्तं नितान्त-द्भुथमपि सततं स्वान्तमध्याश्रितम्मे ॥ १८॥ वारं वारं स्मरारे त्रिपुरहरापार संसार घोर व्यापारासार भीरु स्फुरदुरुखदिरांगार दाराप सारम् ॥ याचे याचे पुनस्तं पुनरपि च पुनस्तन्न याचे न याचे ॥ १९॥ त्वत्पादाम्भोज रेणु प्रकर परिवृत स्वान्त शान्तं द्विरेफः ॥

शिवरह०३ । त्वद्दर्शनं जातमिहाधुना मे प्रदोषकाले हृतपापजाले ॥ श्रीकालकालार्चकदर्शनेन सम्पत्सवृद्धिश्च भविष्यतीह ॥२०॥ ह०तृ०उ०
१२७ अयं पुण्यकालः शिवाराधनस्य स्वभावेन सर्वोपि कालस्तथापि ॥ विशेषो धुना शङ्कराराधनेन प्रसन्नो भवत्येव गौरीसहा अ०२८
यः ॥ २१ ॥ महादेव विद्या प्रभावोऽपि भाग्यैरपारैः कथंचिन्मया ज्ञात एव ॥ त्वया साकमल्पापि सम्भाषणेन प्रभूतञ्च पुण्य
मया लब्ध मेव ॥ २२ ॥ महादेव विद्या विहीनाश्रयाणां यमावास वार्त्तापि दूरे तथाहि ॥ तयाविद्यया सर्वसम्पत्स
वृद्धिः भवत्येव मुक्तिश्च तस्याः प्रभावात् ॥ २३ ॥ महादेवविद्यां विनाशंकरार्चा कथं वा फलाय प्रवृत्ता तथासा ॥ फलान्याशु
सूते फल प्राप्ति हेतुं वदन्त्येव तामेव सन्तः प्रशान्ताः ॥ २४ ॥ न वेदान्त विद्यापि मोक्ष प्रदाने समर्था यथा शर्वविद्या समर्था ॥
तया विद्यया तावदद्भुत रूप स्त्वमेवं कु स्फुरद्भानु रूपो विभासि ॥ २५ ॥ त्वमत्राति धन्यः शिवाराधनेन प्रसन्नः प्रसन्नं मन
स्त्वङ्करोषि ॥ त्वदीयं कुलं धन्यमे वेति मन्ये शिवाराधनेऽसकृत् चित्तोति धन्यः ॥ २६ ॥ महादेव एवाहमित्येव तावत्
स्वभावोऽस्तु यद्वा महादेव भक्तः ॥ भवामीति भक्तिर्भवत्वद्य मह्यं प्रसन्नो महेशो यदि स्वस्य पुण्यैः ॥ २७ ॥ महादेव पा
दाम्बुजाराधनादौ न भक्तिर्महापाप संघानु पङ्कैः ॥ नतन्नाश हेतुः शिवाराधनान्यः ततस्तेन तन्नाश सिद्धिर्भवि-
त्री ॥ २८ ॥ महादेव पादाब्ज सामर्थ्य मन्ये रविज्ञातमेवेति मन्ये किमन्यैः ॥ शिवाराधनेनैव मुक्तिर्यतः स्यात् ततस्तं महा

न जाने शिवार्च्य

देवमेकम्भजामि ॥ २९ ॥ न संसार दुःखापहर्त्तापि लोके शिवान्यस्तदन्यं न जाने न जाने ॥ न जाने शिवान्यन्न जाने शिवार्च्यं सुखावा प्ति हेतुम् ॥ २३० ॥ इत्युक्तवन्तं तं विष्णुमभिनन्द्यास्ति कोऽत्र मः ॥ शिव पूजारतो जातो विष्णुः स्वनिलयं ययौ ॥ ३१ ॥ एवं शिवा राधन तत्पराणां धैर्यं त्वधैर्यन्न कदापि तेषाम् ॥ न दैन्य वार्त्तापि न दुःखवार्त्ता संसार वार्त्ता त्वति दूरतः स्यात् ॥ ३२ ॥ यदेव देवं सकृद्दानमन्तः सम्प्राप्नुवन्तः सकलार्थसिद्धिम् ॥ तं शङ्करं कः प्रणतो न लोके मुक्तिं समाप्नोति सुखावसाने ॥ ३३ ॥ यं योगमार्गैः करतोऽपि योगी न पश्यति श्रीगिरिजासहायम् ॥ उमासहायं प्रणतो न को वा मुक्तिं समाप्नोति सुखावसाने ॥ ३४ ॥ सिद्धा प्रसिद्धा अपि योग सिद्धा यं वै न जानन्ति तमीशमीड्यम् ॥ उमा सहायं प्रणतो न को वा मुक्तिं समाप्नोति सुखावसाने ॥ ३५ ॥ यत्पादुकाराधन सक्तचित्तः करोति वाञ्छां विषयेषु तं किम् ॥ उमासहायं प्रणतो न को वा० ॥ ३६ ॥ यन्नाम संकीर्त्तन पूतजिह्वाः स्मरन्ति संसार सुखं न तं वै ॥ उमासहायं प्रणतो न को वा मुक्तिं समाप्नोति सुखावसाने ॥ ३७ ॥ विश्वेशनामामृत पान पीनाः केचिद्भवन्त्येव भवे पि धन्याः ॥ तेषां पदाम्भोज रजः प्रसाद वाञ्छां करोत्येव मनो ममापि ॥ ३८ ॥ यमभट गण वार्त्तां मन्तकस्यापि वार्त्तां मुरु नर सुख दुःखापार संसार वार्त्ताम् ॥ विषय विषम वार्त्तां न शृणोत्येव हारो हर चरण सरोज ध्यान राधानुरक्तः ॥ ३९ ॥

इति श्री शिवरहस्ये हराख्ये तृतीयांशे उत्तरार्धे याज्ञवल्क्य जनक सम्वादो नामाष्टाविंशोऽध्यायः ॥ २८ ॥ श्रीकाशीविश्वेश्वरार्पणम् -

लु ॥ याज्ञवल्क्य उवाच ॥ तस्मान्न मुक्तिः शिव विद्यया विना नानन्द सिद्धिश्च भवत्यतोस्याः ॥ तया विना मुक्ति कथापि दूरे किं मूर्च्छि-
तायाः इति मे विभाति ॥१॥ इत्युक्त्वा सोपि भूपालः सत्यव्रत परायणः ॥ परलोकः कथन्तस्याः स्यादित्यपि चिरं स्थितः ॥२॥ ततः परं
ददर्शायं तेजो मूर्त्तिं विलोकयताम् ॥ किमित्याश्चर्य्य सम्पन्नो विस्मितः समभूत्तदा ॥३॥ ततः परन्तत्र सनातनोपि सनन्दनोपि
स्मर वैरि वार्त्ताम् ॥ कुर्वन्समभ्यागत एव दृष्ट्वा तं प्राह राजा विनयेन नम्रः ॥४॥ सत्यव्रत उवाच ॥ सनन्दनापूर्वमिदं प्रपश्य
ज्योतिः कदाचिन्न विलोकितञ्च ॥ मया श्रुतं किं तदिदं वदाशु लोकस्य तत्वं विदितं त्वयातु ॥ सनन्दन उवाच ॥ श्रीपञ्चाक्ष
रविद्ययास्थिर मति र्नित्यं शिवाराधको भस्मोद्धूलित विग्रहः श्रुति लसद्भूति त्रिपुण्ड्राङ्कितः ॥ त्यक्त्वा देहमुमासहाय चरणं ध्याना-
ति यतोधुना गौरीनाथ पदारविन्द भजनं कर्तुं प्रयाति ध्रुवम् ॥६॥ अयं पुण्य पुञ्ज प्रमाणो (मत्तपोऽध्युषाणो) विनिर्धूत पापो विशेषेण दृष्टः ॥ अदृष्टं
समुद्भूतमेवाद्य सत्यं किमेतादृशं लोकनेशोकशूकः ॥७॥ अपार रविमण्डल प्रकर मालिका सन्निभम् प्रयाति शिवमन्दिरं सकल
लोक शोकापहम् ॥ विलोक्य विलोकय स्मरहरोरु विद्यानिधिं पुनर्नयन गोचरः ॥ किमयमद्य भूयो नृप ॥८॥ विभाति शिववि
द्यया तरणि मण्डलस्याप्ययं निरोधक तयामितो प्यमित भानु मालायितः ॥ इदं खलु महत्तरं भवति भाग्य मीशार्चनोदयं
भवति शंकर प्रवण मानसः सर्वदा ॥९॥ शिवार्चन फलापरं भवति तावदेतादृशं प्रभूत बहुपुण्यवानयमुमासहायार्चकः ॥

अयं गुरुरिति श्रुतः शिवपरायणानां परं प्रदर्शनमयं करोत्यनघमेनमार्गस्य किम् ॥१०॥ महान्खलु शिवार्चको भुवनमण्ड-
लारवण्डनः ॥ प्रचण्डतर पातक प्रबल पर्वतानां पविः ॥११॥ किमेवमिदमद्भुतं शिवपदांबुआराधनं महाघ्न वन पावकः
सकल लोकसन्तोषदः ॥ सयाति शिवमन्दिरं शिवपदाम्बुआराधनादिहैतदवलोकनाद्भवति पुण्यराशिस्तथा ॥१२॥
सुखाम्बुनिधिरुत्थिता शिवजनेष्टु चन्द्रोदयादहो भवति देहिनां शिवपदार्चनं पुण्यतः ॥ स किं मम सखा पिता किमु
तसोदरो वा हितः ॥ प्रयाति शिव पूजकः सकृदवेक्षितो वा सुखम् ॥१३॥ प्रयच्छति कथं सुरप्रवर शंकराराधकः ॥
कलावमरभूरुहो भवति कुः दुर्लभो दुर्लभः ॥ अनेन जननोत्तरं शिवपदाम्बुआराधनादवाप्तमतुलं भवद्भवति भाग्यमान-
न्ददम् ॥१४॥ सतेन शिव पूजनं पुनरपार भाग्यप्रदं चकार जगतीतले सकलमेव तत्पावनम् ॥ शिव व्रत रतः सदा शिवकथा
विचारैरतः शिव श्रवणमानसः शिवजनानुमोदप्रियः ॥१५॥ शिवं वदति सन्ततम् शिवाशिवेतिनाम स्मरन् शिवंशिव
भवति भावितं सुकृत राशिभिः केवलम् ॥ शिवं सुखं परं वदति साधु गीरेश्वरं शिवं भजति चेतसा कमलकुन्दबिल्वी
दलैः ॥१६॥ समर्चयति सादरं गिरिकुमारिका वल्लभं वरं स्वकुल दैवतं सततमेव मेने मुदा ॥ शृणोति शिव विग्रहं पर-
मुदार कीर्त्तिं हरं महेश्वर महेश्वरेत्यमर सार्वभौमं हृदि ॥१७॥ विचिन्त्य पुनरादरात्कनककेतकी चम्पकैः कुसु-

करोति विकटार्चनम् समभिपूज्य वीरेश्वरम् ॥ अपारजलधारया शिरसि चैव वीरेश्वरम् चकार सुमुखं मुहुः स खलु कालकालार्चने ॥ १८ ॥ चकार करणंवयो विरत एव संसारतो युवापि युवतीं वधूमपि विहाय तन्मातरि ॥ यदेव धनमर्जितं विविधशास्त्र विद्यात्मकम् ॥ तदद्र्यगसुतापति स्मरण-कारणं केवलम् ॥ १९ ॥ मनोपि शिव विद्यया परमपावनं तस्य वै प्रयाति शिवमन्दिरं सुरकृतार्थ डिण्डीरजैः ॥ न तेन सुखसाधनम् शिवपदाम्बुजाराधनादृतेमिलमपि निर्मितं नियमतोऽथवा निश्चितम् ॥ २० ॥ तदेव सकलार्थदं परममुक्तिदानक्षमम् ॥ महान्तमपि वाञ्छति प्रबल संकटेपि ध्रुवम् ॥ २० ॥ इति तद्वचनं श्रुत्वा स राजा विस्मयं गतः तमुवाच महात्मानं शंकराराधनप्रियम् ॥ २१ ॥ सत्यव्रत उवाच ॥ दयालुरसि धर्मात्मा दीनवत्सल सन्ततम् ॥ एनामुद्धर संसारान्मूर्च्छितां शिव विद्यया ॥ २२ ॥ पश्य भाति प्रभा युक्तां रुद्राक्षसमलंकृतां ॥ शिवार्चनपरा सोयमनुताप समन्वितम् ॥ २३ ॥ इति तद्वचनं श्रुत्वा स तां पस्पर्श भस्मना ॥ आलिप्यांगं पुनः सापि संज्ञां प्राप विशेषतः ॥ २४ ॥ ततः प्रणम्य सा राज्ञी राजानञ्च सनन्दनम् ॥ आनम्रवदनामन्दमुवाच चतुरं वचः ॥ २५ ॥ राज्युवाच ॥ भवद्दर्शनमात्रेण कृतकृत्यास्मि यद्यपि ॥ तथापि शिवविद्या मे देया सा मुक्तिसाधनम् ॥ २६ ॥ तथैव जीवनं धन्यं भविष्यति ममाधुना ॥ सा विद्या परमा विद्या श्रुताप्यघविनाशिनी ॥ २७ ॥ कन्यकायां यथा प्रीतिं करोति जनकस्तथा ॥ मयि प्रीतिं कुरु स्वामिन् अनाथजनपालक ॥ २८ ॥ इत्याकर्ण्य वचस्तस्याः स्थित बुद्धिं विचार्य च ॥ शिवविद्यां ददौ तस्यै सकृपालुः सनातनः ॥ २९ ॥ ततस्तद्देहतः पापान्यपारण्युग्राकृतिं

गृहीत्वा निर्गतान्याशु सापि विस्मयमागता ॥३०॥ ततः शिवार्चनं कृत्वा गत्वा [illegible] नगरमात्मनः ॥ राज्ञापि गुरुणा तेनाप्यादरादनुमो-
दिता ॥३१॥ ततः प्रविश्य नगरं सा राज्ञी धनपर्वतान् ॥ रत्नोच्चयान्पारांश्च दर्शयामास कोटिशः ॥३२॥ ततस्तेन धनेनैव कारयामा
स शंकरम् ॥ मन्दिरं सुन्दरं रत्नैर्भूषितञ्च विशेषतः ॥३३॥ रत्नप्रसादकलशैः स्वर्णगोपुरवर्धनैः ॥ सुवर्णरसनिर्माणैः साचकार शि
वोत्सवम् ॥३४॥ प्रत्यहं शिवपूजायां निरता रत्नभूषणैः ॥ पूजयामास गिरिशमहर्निशमतन्द्रिता ॥३५॥ पञ्चामृताभिषेकाद्यैस्सना
रैर्मनोहरैः ॥ अपाररत्नदीपैश्च पूजयामास शंकरम् ॥३६॥ सायंकाले समभ्यर्च्य सा शिवं रुद्रवीणया ॥ प्रीणयामास गानेन
नाट्येन च मुहुर्मुहुः ॥ तां विलोक्य स राजापि शिवपूजनतत्पराम् ॥ सन्तुष्टः प्राह स मुनिं शिवालोकनतत्परम् ॥३८॥ सत्यव्रत
उवाच ॥ पश्य पश्य मुनिश्रेष्ठ राज्ञीं शिवपरायणाम् ॥ स्त्रीणामेतादृशी बुद्धिर्दुर्लभा खलु वस्तुतः ॥३९॥ कामातुरा हि तरुणी रम
णं समपेक्षते ॥ सोऽपि तां रमणीं प्राप्य न मुञ्चति विशेषतः ॥४०॥ रमणे निस्पृहा सेयं निस्पृहा भूषणेष्वपि ॥ आहारमात्रनिरता
करोति शिवपूजनम् ॥४१॥ रत्नप्रासादवाञ्छापि नास्याः शंकरमन्दिरे ॥ वाञ्छा परा समुत्पन्ना शंकराराधनेष्वपि ॥४२॥ शि
वप्रभावो विदितो न केनाप्येषापि विश्वेश पदार्चनेषु ॥ आस्थाम वाप्याशु करोति पूजामुत्तमर्थमेवेति मतिर्ममाभूत् ॥४३
केयं पूर्वभवे विद्वन् किमस्याः सुकृतं वद ॥ केन पुण्यप्रभावेन शिवार्चनरता सती ॥४४॥ नाभ्यस्ता वेदविद्यापि वेदार्थो न श्रु-

६५३

ईश्वरह०२
१३०

तोपि हि ॥ न श्रुतान्यपि शास्त्राणि कथं वा शंकरे रतिः ॥४५॥ अधीत्य वेदं वेदार्थं शास्त्रैर्ज्ञात्वा विशेषतः ॥ शिवार्चनरतो लोके कोऽपि पुण्यैः प्रजायते ॥४६॥ वेदभागाश्च विविधाः तत्र तत्तात्पर्यावधारणम् ॥ सांगैः शास्त्रैर्भवत्येषां तदर्थत्वावधारणात् ॥४७॥ श्रुत्यादिभिः प्रमाणैस्तु वेदार्थेऽवधृते सति ॥ पश्चात्स्यात्तदनुष्ठानं तावत्तस्यात्कथं वद ॥४८॥ न केवलेन लिङ्गेन श्रुत्यर्थस्यावधारणम् ॥ न श्रुत्यापि न वा विद्वान् युद्ध्वः प्रकरणेन वा ॥४९॥ समाख्ययान वाक्येन स्थानेनापि विशेषतः ॥ तेषां पारस्पराकांक्षा श्रुत्यर्थस्यावधारणे ॥५०॥ प्रमाण परिपंथित्वमप्रमाणस्य निश्चितम् ॥ तन्निरासोऽपि तैरेव श्रुत्याद्यैरवधार्यते ॥ ॥५१॥ मन्त्रोऽपि विविधानर्थान्प्रतिपादयितुं क्षमः ॥ शब्दशक्त्यायतस्तस्य नयथेष्टा गतिः खलु ॥५२॥ श्रुत्याद्यैरंकुशप्रायैर्मन्त्र मत्तेभशिक्षणे ॥ तन्मंत्रार्थानुष्ठान्ने व्यक्षति निर्णये सति ॥५३॥ किञ्चित्तन्निर्णयस्तावत्फलम् केवलं खलु ॥ तदनुष्ठानपर्यन्तं व्यापारः खलु निश्चितः ॥५४॥ तन्मन्त्रैरेव नियतैस्तत्प्रमाणोपबृंहितैः ॥ तदर्थस्फुरणे पश्चादनुष्ठानं फलाय तत् ॥५५॥ तत्फलं सूक्ष्म रूपेण तदानीमेव जायते ॥ अपूर्वरूपं तद्रूपमुद्भूतिस्तदनन्तरम् ॥५६॥ कालान्तरोपभोग्यानि यानि कर्मफलान्यपि ॥ तानि तावदनुष्ठानैः सांगैरीति विनिश्चयः ॥५७॥ तत्राधिकारविज्ञाने सति कर्माणि केवलम् ॥ भवत्यधिकृतस्तेन विना तन्नोपजायते ॥५८॥ शास्त्राधीनमिदं सर्वं विना तेनाधुना कथम् ॥

ह०ग्र०३०
अ०२७

जायते फलमेतस्य कथं भवति तद्वद ॥५९॥ सनन्दन उवाच ॥ सत्यमुक्तं त्वया राजन् शास्त्रार्थः स तथा विधिः ॥ तस्य शास्त्रस्य च ज्ञानं कदाचित्स मुपेक्षितम् ॥६०॥ बहूनि जन्मानि गतानि येषां शास्त्रार्थ चिन्तान विशारदानाम् ॥ तेषामनुष्ठान विशेष लाभः कदापि नासीदिति नानुमेयः ॥६१॥ प्रत्यूहमात्र परिपन्थि विनाशकेन गौरीमनोरमण मूर्त्ति विचिन्तनेन ॥ कर्माणि तानि सफलानि फलाय तेन मुक्तानि तानि विफलानि न संशयोत्र ॥६२॥ कृतं शिवाराधन भक्ति सिद्ध्यै यत्कर्म वत्तस्य न विघ्नितं चेत् ॥ फलं भवत्येव ततो विमुक्तः संसार बन्धेन विमुक्त एव ॥६३॥ कालान्त रे विघ्न विनाशतः स्यात्सा भक्ति रीशान पदारविन्दे ॥ जाता तदभ्यर्चन साधनं स्यात् ततः फलेन श्रुतिरादृतापि ॥६४॥ उत्पन्नस्यापि मर्त्य स्य प्रतिबन्धक सम्भवे ॥ शंकराराधने भक्तिर्न भविष्यति सर्वथा ॥६४॥ बालकोस्तु युवा वास्तु वृद्धो वास्तु तथापि किम् ॥ प्रतिब[illegible]न्धक सद्भावे शिवे भक्तिर्न जायते ॥६५॥ अभाग्य सेतु प्रतिवद्धचिताः श्रीमन्महादेव सुधाम्बुराशिम् ॥ न प्राप्नुवन्त्येव मनागपीति भाग्यन्न ते पांदुर दृष्टकष्टैः ॥६६॥ भाग्यं यस्य स एव भूरि विभवः पुण्यैरगण्यैर्युतो भूलोकाभरणं स एव सुकृती तद्वंश एवोन्नतः ॥ तन्माता च पतिव्रता कुलसती तस्यांगना तत्पिता धन्यो यस्य मतिः शिवापति पदांभोजार्चने सन्ततम् ॥६७॥ भूमण्डले भूप विवेचनापि सर्वाभनो[illegible] दुर्ल भ एव यः स्यात् ॥ निरन्तरं शंकरलिङ्ग पूजानिविष्टचित्तः सितभूति भूतः ॥६८॥ भूतिर्यस्य सदा ललाट फलके रुद्राक्षमाला गले लिङ्गं तुङ्गमनङ्ग हर्तुरमलं रेवाजलासेचनैः ॥ सर्वार्थप्रदमाशुवाल बिलसद्बिल्वीदलाभ्यर्चितं तं मन्ये कृत कृत्यवर्य [illegible]

ममराराध्यनमेवादरात् ॥ ६९ ॥ कोवानेत्र वर्षं नयाति गिरिजाकान्ताङ्घ्रि पङ्केरुह ध्यानासक्तमतिः प्रकृष्ट सुकृताभावे भवांभो
निधेः ॥ तेनैवाशु विशेषयं सुरसरिद्रूपः सएवेतिमे तत्पादाम्बुजरेणु वायुरपियः सस्याज्जगत्पावनः ॥ ७० ॥ शिवनामसुधाशा-
नो न कोपि प्रथितो भूतल मण्डलेऽखिलेपि ॥ स पुनाति जगत्त्रयं स लीलागमनोत्पन्न रजो विशेषभागैः ॥ ७१ ॥ न क्वापि नारि
शिव पूजनेन वयो नयत्येव विनापि भोगम् ॥ तथा नरोपीति शिवैकनिष्ठः साक्षाद्वशिष्ठोपि यतो वरिष्ठः ॥ ७२ ॥ शिवाराधनश-
क्तानाम् जीवनं जीवनं परम् ॥ अन्येषां जीवनं तावन्मरणं मरणादपि ॥ ७३ ॥ यावच्छंकर पूजने मतिरुमा कान्ताङ्घ्रि पंकेरुह ध्याने तावदि
दं शरीरमसकृत्संरक्षणीयं बुधैः ॥ तत्यागे पतितो भवत्यनुदिनं तज्जन्म तावद्वृथा तन्माता व्यभिचारिणीति मतिरप्यद्याधुनाऽऽय-
ते ॥ ७४ ॥ को वा भूप शशांकशेखरपदांभोजार्चनात्यादरो भूत्वा भूषित विग्रहः स्वहृदये गौरीसहायं परम् ॥ ध्यात्वा तिष्ठति तत्कथापि
न कदाप्याकर्णिता तं विदुः ॥ साक्षादीश्वर एव सर्वजगतां पूज्यः स एव ध्रुवम् ॥ ७५ ॥ यस्याभीप्सितधर्मसिद्धिरसकृत्पादाम्बुजाराधना
भावेनापि तदीक्षणादपि भवे तं केवलं शांभवम् ॥ मन्ये दुर्लभमेव शांभववरं सामन्यतः शांभवो भूलोके खलु दुर्लभो भवति तं मन्येपर
म्पावनम् ॥ ७६ ॥ इयं पूर्वभवे राजन् विन्ध्याचल निवासिनी ॥ भिल्लकन्या सदा वन्ये रेतस्याः खलु जीवनम् ॥ ७७ ॥ इयं च युवती तत्र
भिल्लक्रीडारता वने ॥ सा तत्र सुतातैस्तु सहैरेमे यथा सुखम् ॥ ७८ ॥ ततः समभवद्वृष्टिः कापि कष्टायकाल्पिता ॥ तया वृष्ट्याक-

भ्रममाना त्वरूपाच पुष्पैस्तदा ॥ ७९॥ ततस्तद्वृष्टिधाराभिः वात्याभिस्तरुकोटरैः ॥ विच्छिन्नं वसनं सर्वं छिन्नमेव पुरातनम् ॥ ८०॥ ततो वात
विघातेन पतितां नव पल्लवाम् ॥ विल्वशाखां समादाय निवेश शिव मन्दिरम् ॥ ८१॥ ततस्तज्जल धाराभिः सरन्ध्रं शिवमन्दिरम् ॥
प्रविश्य चिन्तयाव्याप्ता क्व वा गन्तव्यमित्यपि ॥ ८२॥ तदनन्तरमुत्कृष्टं नार्मदं लिङ्गमादरात् ॥ विलोक्य सा जगादेयं धृत्वा तल्लि-
ङ्गमादरात् ॥ ८३॥ जलधारा विशीर्णास्ते पाषाणाख्यानिलाहताः ॥ लिङ्गमूर्ध्नि पतिष्यन्ति किं कर्तव्यमतः परम् ॥ ८४॥ प्रकृष्ट वृष्टि-
धाराभिः स रन्ध्रश्च भविष्यति ॥ स्फुटितश्च भवेदेव विशीर्णश्च भविष्यति ॥ ८५॥ लिङ्गरूपमहादेवस्तद्वृष्टि विनिवारणम् ॥ कथं वा न करो
त्यत्र किं कर्तव्यमतः परम् ॥ ८६॥ लिङ्गनाशन सामग्री वृष्टिरेषा महत्तरा ॥ एतन्निवारणं कर्तुं यतते किन्न शंकरः ॥ ८७॥ चिह्नमस्यम
हेशस्य लिङ्गमित्यब्रवीत् इत्यपि ॥ श्रुतो वाणी विशेषेयमशरीरसमुद्भवः ॥ ८८॥ यद्भावि तद्भावि न संशयोत्र भिन्नं यदेतद्यदि वृष्टि
सेकैः ॥ तदा तदालोकनमास्तिकेन कर्तुं न शक्यं खलु सर्वथापि ॥ ८९॥ लिङ्गं तदेव रमणीयमवेक्षणीयं यच्चन्दनादि समलंकृत
मादरेण ॥ कुन्दैश्च विल्वमसकृन्नव पल्लवैश्च संपूजितं भवति पाप विनाशनाय ॥ ९०॥ भाग्येन मे कुसुमचन्दन पूजि
तस्य लिङ्गस्य तावदसकृत्समवेक्षणेऽपि ॥ कल्याण दायकमिदं खलु लिङ्गमत्र रेवा तरङ्ग समलंकृत पुण्यकाले ॥ ९१॥
एतस्य तावदधुना न कृतैव पूजा विल्वैर्न वा स्फटिति चेत्स्फरितं जलेन ॥ व्यर्थी भवत्यपि स पल्लव विल्वशा

श्रीवरह०३ १३२ — ह० त०३० अ०२७

स्वा शाखया समर्पय मयीह कथं मुदे स्यात् ॥९२॥ एकैक बिल्व दल संग्रहणेन शक्तो हस्तोपि कम्प सहितोय तनुः स कंपा ॥ पापापनोदनस मर्थ मिदल लिङ्गं किं नार्मदं विमल पल्लव पूजितं चेत् ॥९३॥ इत्युक्त्वा साति दुःखार्ता तस्य लिङ्गस्य मस्तकम् ॥ सर्वतः छादयामास शुद्ध या बिल्वशाखया ॥९४॥ पुनरानीय सा शाखां बिल्वस्य नव पल्लवाम् ॥ छादयामास तल्लिङ्गं कम्पमानापि सा पुनः ॥९५॥ कम्पेन हस्तांगुलि चारणेन लिङ्गालये नाट्य वधूरिवाभूत् ॥ या बिल्व शाखापि समर्पिता सा लिङ्गस्य तत्पूजन हेतु भूता ॥९६॥ पटहीनाव धूटी व नाट्य वेगेन सा बभौ ॥ तेन नाट्येन सुप्रीतो भगवानपि शंकरः ॥९७॥ ततो वधूटिर्गता सापि सन्तुष्टा गिरिजापतिम् ॥ तुष्टाव पाहि मामी श पाहि मामिति शंकर ॥९८॥ शंभो वसनहीनां माम् नित्यं सवसनां कुरु ॥ हर पापानि सर्वाणि जारसंग कृतान्यपि ॥९९॥ दातात्वमेव भगवन् विश्वस्य सकलस्य च ॥ पालको नाशकश्च त्वं जनको पि न संशयः ॥१००॥ भूमण्डलोत्पादन कारणाय तत्पालनस्याप्यथ कारणाय तन्नाशकायापि नमो नमस्ते गौरीसहायाय महेश्वराय ॥१॥ अपार संसार विनाशकाय संसार दुःख प्रलयोद्यताय ॥ नमोस्तु ते कारण कारणाय नैकारणायापि नमो नमस्ते ॥२॥ वेदान्त वेद्याय नमो नमस्ते वेद स्वरूपाय नमो नमस्ते ॥ अपार कल्याण गुणार्णवाय नमो नमस्ते गिरिजा सहाय ॥३॥ नमो नमश्चन्द्र कलावतंस गौरी स्फुरन्मानस राजहंस ॥ गौरी विहारोन्नत कन्धरांस नमो नमो बिल्व वरोत्तमांस ॥४॥ कश्चन्द्रचूड चरणाम्बु रुहार्चनेन नाभीष्टसिद्धिमसकृत्समवाप रूपम् ॥ श्रीवं समेत्य

नवबिल्वदलांकुरैर्वा लिङ्गार्चनेन विजने रजनीमुखे वा ॥ ५ ॥ प्रदोषे बिल्वं वा यदि नवजलेनापि सहितं प्रदद्याद्यो भक्त्या सितभासित लिङ्गनति विमलः ॥ स तावत्सर्वेषामपि भवति पूज्यो जनिजराविनाशानां दुःखं परिहरति दृष्टो पि सहसा ॥ ६ ॥ पुण्यानि तावन्न पुराकृतानि यतः स्मरारिः स्मरणान्न पूर्वम् ॥ अद्यापि तावन्न कृतानि पुण्यान्यथापि लिङ्गं नयनातिथिर्मे ॥ ७ ॥ अलं पुण्यभारैरलं योगदानै रलं सर्वभूमण्डलावर्त्तनैर्वा ॥ यदा शार्व लिङ्गं नवैर्बिल्वपत्रैः पवित्रैः प्रसन्नं तदा तैश्च किं वा ॥ अहो महद्भाग्यमिदं वनेस्मिन्वृष्टि प्रसंगादपि शांगलिङ्गम् ॥ दृष्टं मम प्राणवियोगकाले न भावि कालाद्भयमल्पशोपि ॥ ९ ॥ सकृदप्यवलोकितो महेशः शिवलिङ्गेषु समर्पितोपि भक्त्या ॥ कृतकृत्यवरं करोति मर्त्यं स कृतान्तोपि विभेति तेन नूनम् ॥ १० ॥ कृतांतान्तकं कः प्रपूज्याति भक्त्या नवैर्बिल्वपत्रैर्जलैर्वा फलैर्वा ॥ न यातीशपादारविन्दं द्विरेफस्वभावं भवांभोधिराशेश्चपारम् ॥ ११ ॥ प्रपन्नार्तिनिर्वापणे शक्तमेकं महादेवमेकं प्रपद्ये महेशम् ॥ विशेषेण माता पिता बन्धुरेव प्रकृष्टानि कष्टानि दूरीकरोति ॥ १२ ॥ अनायासलभ्यैव मुक्तिर्महेशे श्रुतेऽपि स्मृतेपीति मन्ये तदन्यः ॥ न कोप्यस्ति भक्तार्ति संहारहेतुः स सेतुः सुखानां सकेतु~~र्मखानाम्~~ र्मखानाम् ॥ १३ ॥ महेशं भजन्तः स्मरन्तः सकृद्वा न संसारभीतिं प्रपश्यन्ति कालम् ॥

न पश्यन्ति दुःखानि कान्यप्यतोहं महेशं विनान्यन्न जाने न जाने ॥ १४ ॥ जनिस्ते न तावत्त्वयैव तेन स्थितिस्तेन संहारकाले समाप्तिः ॥ समस्तस्य लोकस्य तस्याधुनाहं प्रपश्यामि लिङ्गं कृतानंगभंगम् ॥ १५ ॥ गृहास्ताव दृश्याधुना मे प्रसन्नाः पुनस्तावदेकादश स्थानयुक्ताः ॥ समस्ताश्च ते तेन घोरे वनेस्मिन्प्रकृष्टं हि लिङ्गं मया दृष्टमेवम् ॥ १६ ॥ विनष्टानि कष्टानि दुःखप्रवाहः क्षये नैव कष्टो गता दृष्टिरेषा ॥ द्रुतं लिङ्गमप्यम्बुनासिक्तमेवं नवं बिल्वपत्रं गृहस्थाप्युदत्तम् ॥ १७ ॥ अनेनैव दत्तेन बिल्वेन पापं प्रनष्टं प्रकृष्टं सुखं दातुमेव ॥ समर्थं न सन्देहवार्तापि धन्यं शरीरं ममेदं तथा जीवनञ्च ॥ १८ ॥ बिल्वाङ्कुरेण गिरिजारमणः कथं वा प्रीतो भवत्यसुविनाशकरः कथं वा ॥ मुक्तिप्रपावितरणप्रवणः कथं वा वेदो न देव तरसं शिव कौतुकानि ॥ १९ ॥ धत्तूरपुष्पमपि केतकपुष्पतुल्यं कृत्वा जपाकुसुममप्यपराधिनापि ॥ गृह्णाति दत्तमसकृत्सकृदेव वायं किं कौतुकं तदिदमित्यपि नैव विद्मः ॥ २० ॥ किं कण्टकारिकुसुमान्यपि कौतुकेन गृह्णाति किं कुशदलान्यपि किं शुकानि ॥ भक्ताभितापहरणाय जलानि गृह्णाति त्यल्पानि तान्यभिनवानि नवानि वायम् ॥ २१ ॥ कल्याणसागर इति प्रथितो हरोयम् सर्वापराधहरणात्स हरो हरोपि ॥ तं तादृशं गिरिसुतापतिमाश्रयेहं भक्तोपसितार्थदमपारसुखप्रवाहैः ॥ २२ ॥ आलोक्य चैव चिरमेव मयापि लोके निर्णीतमीश चरणाम्बुजदर्शनेन ॥ मादरेण ॥ संसेवनीयमखिलाघविनाशनाय गौरीपतिं चिरमहं हृदि

भावयामि ॥२३॥ गौरी कुचोरु गिरिशेखर चारु हीर हार स्फुरांह्रिरिश पादसरोजभृङ्गः ॥ सन्मान सम्भवतु तेन विमुक्तिरस्य संभावितापि
जगतामपि माननीयः ॥२४॥ मदीय सुकृतापार पारावारो महेश्वरः ॥ कुलदैवतमस्माकमकस्मादभवत्कथम् ॥२५॥ क्वाहं क्व
वा वृष्टिरियं प्रभूता सन्तोषरूपा शिवदर्शनेन ॥ अलं कृतार्थं मम मानसं मे कृत्यञ्च नातः परमस्ति लोके ॥२६॥ इति स्तुत्वा महादे
वं सा स्थिता शिव मन्दिरे ॥ तदानीमागता [माता] तस्यास्तां द्रष्टुमादरात् ॥२७॥ तां विवस्त्रां कम्पमानां विलोक्यातीव दुःखिता ॥ पटखण्डं
ददौ तस्यै सा न जग्राह तं पटम् ॥ तमाह जननी तस्याः कम्पमानां सुतामिति ॥ गृहाण वसनं बाले नग्नासि किमिदं वद ॥२८॥ इति
तद्वचनं श्रुत्वा त्यक्त्वा सम्भाषणं तदा ॥ शिवमन्दिरमाश्रित्य स्थिता विह्वल मानसा ॥३०॥ ततः परं सायमुमासहायं नग्नैव वि
ल्वैर्गिरिमल्लिकाभिः ॥ समर्चयामास तनुं स्वकीयामुद्धूल्य शम्भुस्मरणानुरक्ता ॥३१॥ रात्रिर्जागरणेनैव नीता नाथेन सा तया
[पुनः] प्रातः समुत्थाय शिव पूजाञ्चकार सा ॥३२॥ अरुणोदयवेलायां काऽपि गन्धर्वकन्यका ॥ तल्लिङ्गाराधनं कर्तुमागता
बहुसाधना ॥३३॥ सा समागत्य तीर्थेषु स्नात्वोद्धूल्यापि भस्मना ॥ अर्चयामास विविधैर्लिङ्गं पुष्पादि साधनैः ॥३४॥
ततः परं सा चकार गानं गंधर्वविद्यया ॥ नाट्यञ्चकार बहुधा स्वसखीगणवेष्टिता ॥३५॥ सौन्दर्य्यनिधिरूपान्तां
दृष्ट्वा गन्धर्वकन्यकाम् ॥ शिवार्चनरतां दृष्ट्वा भिल्लकन्या मनोरमाम् ॥ सापि गन्धर्वतनया तां दृष्ट्वा भिल्लकन्यका

म॥ भस्मोद्धूलित सर्वाङ्गाम् नग्नामाह विचक्षणाम्॥ ३७॥ गन्धर्वकन्यकोवाच॥ कासि कन्यासि युवती नग्नतां गता॥ न दृष्टा हि वने क्वापि किन्ते कुलं मुदा वद॥ ३८॥ किन्नु भस्मनेयं तनुरित्युमा तव॥ केन नाशोक्षिता दीक्षा दत्ता केन महात्मना॥ ३९॥ लज्जामानं परित्यज्य वनेस्मिन् शिव मन्दिरे॥ एकाकिनी विचारेण विनातिष्ठासि निर्भया॥ ४०॥ एतैर्बिल्व दलैरीशः किन्त्वया सायमर्चितः॥ धन्यासि तव भाग्यस्य नान्तः सर्वात्मना खलु॥ प्रायस्तेनाद्य वेगेन वसनं वायुनाहृतम्॥ धन्यासि मम भाग्यासि समायाहि मया सह॥ ४२॥ इत्युक्त्वा तां गृहीत्वैव वस्त्राण्याभरणानि च॥ दत्वा ययौ स्वनगरं सापि गन्धर्व कन्यका॥ ४३॥ ततः प्रत्यहमागत्य सह गन्धर्व कन्यया॥ पूजयामास गौरीशं सापि भिक्षुस्य कन्यका॥ ४४॥ ततः कदाचिदागत्य बिल्वमारुह्य वेगतः॥ बिल्व पत्रार्थमेवातः पपातानिल कम्पिता॥ ४५॥ ततो विसृज्य सा देहं विमान वरमाश्रिता॥ ब्रह्म लोकं ययौ तत्र ब्रह्मणा पूजिता नृप॥ ४६॥ ततश्चतुर्मुखः प्राह सभायां ससुरान् प्रति भाग्यमेतादृशं लोके लब्धं शंकर पूजया॥ ब्रह्मोवाच॥ भिक्षुस्य कन्यका सेयं वनेपि व्यभिचारिणी॥ जारालिङ्गन सन्तुष्टा शिव मन्दिरमाश्रिता॥ बिल्वैः श्रीमार्चनं तावच्चकारेयं मनोहरे॥ तेन पुण्य प्रभावेन गन्धर्व नगरं गता॥ ४७॥ गन्धर्व नारी सहिता ताभिरत्याद्दता सदा॥ कदाचिद्बिल्व मारुह्य पातिता भिक्षु कन्यका॥ ५०॥ अभ्यासो

ह० तृ० उ० अ० २७

भिल्लुनारीणां तरोरारोहणे ततः ॥ तेनाभ्यासेन मातस्त्वं बिल्वादानसमुद्यता ॥ ५१ ॥ त्यक्त्वा प्राणान् प्राप लोकं मम दुष्प्रापमोजसा ॥ बि-
ल्वपत्रैः समभ्यर्च्य यदि स्यात्कृतजीवना ॥ ५२ ॥ तदा मुक्तिर्भवेद्देवि शिवसारूप्यलक्षणा ॥ अहो महेशमहिमा ज्ञायते न सुरैरपि
॥ ५३ ॥ न वेदैरपि विज्ञातः स कथं विज्ञेयः कथं सुरैः ॥ अविज्ञेय स्वरूपस्य प्रभवस्य शिवस्य परमात्मनः ॥ ५४ ॥ स्वरूपं केन वा
ज्ञेयं तज्ज्ञानमति दुर्लभम् ॥ कीर्तितः श्चिद्घनत्वेन श्रुतिभिः स सदाशिवः ॥ ५५ ॥ अम्बिकारमणत्वेन कीर्तितोपि सदाशि
वः ॥ स एव हि महादेवो निर्गुणत्वेन कीर्तितः ॥ ५६ ॥ शिवो निरञ्जनत्वेन कीर्तितो वेदराशिभिः ॥ ५७ ॥ शिवस्वरूपं सहसा न वेदै
र्विज्ञातमेवेति वदन्ति सिद्धाः ॥ ५७ ॥ अस्माकमीशानपदारविन्दध्याने परं भक्तिरभूदपूर्वा ॥ वदन्ति वेदाः शिव
वयं शिवाराधनमात्रसक्ता यद्वाऽस्तु तद्वास्तु शिव स्वरूपं ॥
मद्वितीयं सर्वामराधीश्वरमित्यपीति ॥ ५८ ॥ धन्याः शंकरलिङ्गपूजनरताः प्राप्यान्तकाले शिवम् ॥ भस्मालङ्कृतविग्रहं
गिरिसुताकान्तं मुहुस्सन्नतम् ॥ स्मृत्वा वासकृद्देवदानववरैराराधितः सादरम् कैलासे खलु शैलजापति पदांभोज
प्रसादाश्रयः ॥ ५९ ॥ धन्यानां व्रतमिन्दुशेखरपदांभोजार्चनं तेन ते कालेनापि समर्चिताः सुरगणैरभ्यर्चिताः किन्नरैः
गन्धर्वैरपि सर्वसौख्यसहिताः सम्पत्प्रवृद्धाः सदा पुत्रैः पौत्रवरादिभिश्च सहिताः कुर्वन्ति तम्मङ्गलम् ॥ १६० ॥
इति श्री शिवरहस्ये हराख्ये तृतीयांशे उत्तरार्धे याज्ञवल्क्यजनकसम्वादो नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥

६८०

याज्ञवल्क्य उवाच ॥ इति ब्रह्म वचः श्रुत्वा ते सर्वे शिव पूजकाः ॥ तमाहुर्विनयानम्राः शिवस्मरण पूर्वकम् ॥ १ ॥ सभा सदाः ऊचुः ॥ इतिब्रह्मवचः श्रुत्वा ते सर्वे शिव पूजकाः ॥ तमाहुर्विनयानम्राः शिवस्मरण पूर्वकम् ॥ ब्रह्मन्नस्याः कि यत्कालं ब्रह्मलोके स्थितिः पुनः ॥ कदा स्यादवतारोपि भुवि तत्पुण्य कोटिभिः ॥ २ ॥ इत एवन कैलासं यात्राभवति सर्वथा तत्राप्युपाय भूतस्य तत्पुण्यस्यापि दर्शनात् ॥ अत्राप्यस्या कियत्कालमवस्थानमतिर्भवेत् ॥ लोकान्तरविहारेच्छा किमस्या अपि भाविनी ॥ ४ ॥ बहवः पूर्वमागत्य लोकेस्मिन्नपि सादरम् ॥ स्थित्वा चरन्ति लोकेषु वैकुण्ठादिषु शांक राः ॥ ५ ॥ अत्र स्थितिश्शंभव पुंगवानां नातीव सन्तोषकरा कदाचित् ॥ स्थित्वापि यान्त्येव मनोहरेषु स्थानेषु हारेषु वि शेषतस्तु ॥ ६ ॥ अस्माकमत्र स्थितिरिन्दुमौलेः प्रसाद लेशात्तदनुग्रहश्चेत् ॥ विशेषतास्तर्हि भवेदवश्यं कैलाशवासः सतु कामधेनुः ॥ ७ ॥ स एव तावत्खलु कल्पवृक्षः स एव चिन्तामणि रित्यवैमि ॥ कैलासतो लोकादधिकोन लोकः स एव लोकः खलु शङ्करस्य ॥ ८ ॥ आनन्द रूपस्य महेश्वरस्य कैलास वासेऽपि मतिः सदाभूत् ॥ ~~...~~ ॥ शिवाभिमानस्थलमेवमन्ये कैलासमानन्द सुधानिवासम् ॥ ९ ॥ कैलासमासाद्य शिव प्रसादान मुक्तो भवत्येव शिवार्चकोत्तः ॥ शिवार्चकानाम सुल भैव मुक्तिः बिल्वार्पणेनापि महाघ नाशः ॥ १० ॥ मनुष्य रूपेण गणाः शिवार्चां कुर्वन्ति तेषां सुलभैव मुक्तिः ॥

अन्यस्य भक्तिर्न शिवार्चनेषु पुण्यैर्यथा वा विविधैश्च धर्मैः ॥ ११ ॥ धर्मस्तथा कोऽपि न दृश्यते यः धर्मः परं शङ्कर पूजनं नः ॥ धर्मस्वरूपोऽभग
वान्महेशः । तल्लीलया मुक्ति सुखादिकानि ॥ १२ ॥ किं सुखं भीतेन यतन्न विद्धः शिवार्चनं येन सुख प्रवाहः ॥ भवन्ति तावद्दुःखानि ते शांप्रवृ
द्धिरित्येव विनिश्चयोपि ॥ १३ ॥ सकृन्नत्वा स्मृत्वा शिवचरण पादाम्बुजरजः सुराराध्यं तीर्त्वा विषममपि संसार जलधिम् ॥ प्रयान्ति
ब्रह्माण्डस्थितिजनननाशादिकरणम् महादेवं तस्मिन्नद निहित चित्ताः शिवजनाः ॥ १४ ॥ इति तद्वचनं श्रुत्वा ~~...~~
~~...~~ सन्तुष्टः स चतुर्मुखः ॥ तानुवाचाति हृष्टात्मा प्रभावं शांकरं स्मरन् ॥ १५ ॥ भिल्लभूपाल महिला सेयं वाला भविष्यति ॥ इति
ब्रह्म वचः श्रुत्वा तेऽपि हृष्टाः सभासदः ॥ १६ ॥ एवं भाग्यमिदं लब्धमनया शिवपूजया ॥ याज्ञवल्क्य उवाच ॥ इति तद्वचनं श्रुत्वासो-
पि सत्यव्रतो नृपः ॥ सन्तुष्टः स्वपुरं प्राप स्मरन् शांकरवैभवम् ॥ १७ ॥ पुनः शृणु प्रवक्ष्यामि श्रीमहादेव वैभवम् ॥ तत्प्रभावानुकथना
द्धि रतं मनो मम ॥ १८ ॥ शिवार्चनप्रभावस्य कथनादपि मुच्यते अपार पातकाकार संसारादिति मे मतिः ॥ १९ ॥ पुरा ब्रह्मसभासद्भिः
शिवपूजन तत्परैः ॥ पृष्टः चतुर्मुखो भक्त्या कथां वदाशीवामिति ॥ २० ॥ ब्रह्मोवाच ॥ राजा निषधदेशानां नाम्ना पुरञ्जयः ॥ तस्य
पद्मावती नाम महिला शंकरप्रिया ॥ २१ ॥ सालिङ्ग पूजनरता रेवातीरे मनोरमे ॥ कारयामास मणिभिः मन्दिरं शांकरं परम् ॥ २२ ॥ तत्र
नार्मद लिङ्गानि स्थापयित्वा विधानतः ॥ पूजयामास विविधैरुपचारैर्मनोहरैः ॥ २३ ॥ तत्र शांकर पूजायां निरता रजनीमुखे

शिवरह० ३ १३६

बिल्वादिभिर्महादेवं पूजयामास सादरम् ॥२४॥ ततः परं सा चकार गानं गन्धर्व विद्यया ॥ नाट्यञ्चकार यत्नेन निराहा रेण भक्तितः ॥२५॥ प्रदोष कालापगमे शिवनैवेद्य भोजनम् ॥ कृत्वा शिवाचाररतां ददर्श रविमादरात् ॥२६॥ रविरीशान मभ्यर्च्य कोमले बिल्व पल्लवैः ॥ जलैरप्यमलैरीशं रेवायां प्रीतमानसः ॥२७॥ शिवं मन्दिरमालोक्य दीप मालाविरा- जितम् ॥ धूप धूम समाक्रान्तं शिवभक्तजनाश्रितम् ॥२८॥ दिव्योपहार सम्पन्नं मणि मण्डल मण्डितम् ॥ सन्तोषं पर मं प्राप शिव पूजा विलोकनात् ॥२९॥ तादृशं रविमालोक्य भूतिभूषित विग्रहम् ॥ कृताञ्जलि पुटा प्राह स्मरन्ती शंकरं मुहुः ॥३०॥ पद्मावत्युवाच ॥ कोसि शंकर भक्तोसि शंकरार्चन तत्परः ॥ शिवार्चने प्रभावं मे वदानिश्चित्य सादरम् ॥ ॥३१॥ कथं वा श्रीमहादेवः प्रसन्नः पार्वतीपतिः ॥ ध्येयः कथं वा पूजापि कथं कार्या प्रयत्नतः ॥३२॥ कुत्र वा पूजितः श्र म्भुः केन वा साधनेन सः ॥ प्रसन्नः परमां वृद्धिं प्रयच्छति कृपानिधिः ॥३३॥ भानुरुवाच ॥ धन्यासि कृत कृत्यासि पुण्यराशिरसि स्वतः ॥ प्रश्नोयं तव कल्याणि तनुते मङ्गलानि मे ॥३४॥ यः सर्व मङ्गलाक्रान्तस्तत्पादाम्बुजरेणुभिः ॥ स्मृतैः कल्याणराशीनामुदयो जायते मुहुः ॥३५॥ यस्य स्मरण मात्रेण शोभनानां परम्परा ॥ भवत्येव स गौरीशः स्मृतः पुण्य वशादिह ॥ यत्कथा पावनत्वेन पावने पुष्पिता शुभा ॥ सा कथा संस्मृता श्राव्या श्रवणेनापि मुक्तिदा ॥३७॥ शिवकथामृतसर

ह० त० ३०
अ० ३०

प्रकीर्तनश्रवणतोऽपि न तृप्तमिदं मनः ॥ अखिलपातकनाशनसाधनं स्मृतमपि प्रयत्नेन विशेषतः ॥ ३८ ॥ शिवकथामृतराशिरनेकधा श्रुत इति स्वत एव पुनः पुनः ॥ श्रवणमिच्छति पापविनाशने करणमेकमिदं भुवि मुक्तिदम् ॥ ३९ ॥ यन्नामस्मरणेन पापविलयो यन्नामसंकीर्तनादापद्रूप जलार्णवोघविलयो यन्नामसंकीर्तनात् ॥ सर्वाभीष्टसमृद्धिरेव तदिदं वन्दे मुकुन्दार्चितम् गौरीनाथपदारविन्दजरजःपुञ्जं लिकुञ्जालयः ॥ ४० ॥ यत्पादाम्बुरुहार्चनाय यतते नारायणः सन्ततम् ॥ तत्पादाम्बुरुहप्रभावमधुना स्मृत्वा मनः केवलम् ॥ प्रापानन्दमनन्तजन्मजमहापुण्याब्धिपूरैरिदं गौरीकान्तपदारविन्दभजनं जन्मापहं जायते ॥ ४१ ॥ धन्यं धन्यमिदं दिनं शिवपदध्यानेन नीतं पुनः ॥ तत्पादाम्बुजमेव चित्तमसकृत्स्मृत्वापि तृप्तं पुनः ॥ ४२ ॥ तृप्तिं यास्यति तत्प्रभावकथनात्तेनैव मुक्तिः परा ॥ पापानां विलयोऽपि पावनमिदं तेनैव नूनं मनः ॥ ॥ ४२ ॥ लिङ्गाराधनजातपुण्यविभवो वेदैर्न विज्ञायते ॥ किं देवैरपि किं मुनीश्वरगणैर्नारायणेनापि वा ॥ किं वाणीरमणेन नागनिलयाधीशेन तद्वर्णनम् ॥ शक्यं कस्य भविष्यतीति बुद्ध्वा चित्तं मम व्याकुलम् ॥ ४३ ॥ यद्यप्यर्धशशाङ्कशेखरपदांभोजार्चनानादरस्तज्ज्ञाने सति तत्प्रभावकथनं शक्यं कथञ्चिद्भवेत् ॥ तन्नेत्येव खलु स्थगितमप्येतन्मनः सर्वथा सर्वाशास्यमिदं कथञ्चिदधुना तावन्मयाप्युच्यते ॥ ४४ ॥ पुरा ब्रह्माण्डविलये जगत्स्रष्टुं महेश्वरः ॥

६०

क्रीडाविनोदसम्पन्नां भवानीमाह सादरम् ॥४६॥ सदाशिव उवाच ॥ ब्रह्माण्डानि विदग्धानि पश्य पश्य वरानने ॥ एतेषां सृष्टिरधुना तव किं समपेक्षिता ॥४७॥ यद्यानेति विचार्येदं वद सादरमम्बिके ॥ सर्गेऽपि तव शक्तिः किम् विद्यते गिरिकन्यके ॥४८॥ इति तद्वचनं श्रुत्वा गौरी ब्रह्माण्डमण्डलम् ॥ दग्धं विलोक्य तं प्राह महादेवं त्रिलोचनम् ॥४९॥
॥ गौर्युवाच ॥ भगवन् जनसम्मर्दः सर्वदा सर्जने सति ॥ एकान्तकालः सुलभः न कदापीति दृश्यते ॥५०॥ लोकं सृष्ट्वा किमस्माकं फलं व्यसनमेव तत् ॥ किन्तेन व्यसनेनापि कार्यमेतेन किन्तव ॥५१॥ नहि कार्य्यं विना लोके क्वचित्कश्चित्प्रवर्तते ॥ कृतयापि तया सृष्ट्या किन्नाशेन वा फलम् ॥५२॥ अद्य यावत्कृतं कार्य्यं तत्कृतं कृतमित्यतः ॥ लीलयाप्यलमेवालं विहरस्व यथासुखम् ॥५३॥ कस्यापि क्वापि सञ्चारो न ताद्विलयनादिह ॥ अतो विहारकालोयमलं सृष्ट्या महेश्वर ॥५४॥ यत्र क्वाप्यस्तु सञ्चारः शयनं वा यथेच्छया ॥ न कस्मादपि लज्जास्यादिह हरस्व सदाशिव ॥५५॥ अत्रदिङ्मण्डलान्येव भवंत्यावरणान्यपि ॥ अतो यथा सुखं शम्भो विहरस्व महेश्वर ॥५६॥ सुधाकरकराणां न वा प्रवेशः क्वापि दृश्यते ॥ नापि सूर्य्यकराणां वा सर्वेषां प्रलयादिह ॥५७॥ त्वया सह विहाराय तपश्चर्य्या कृता पुरा ॥ विहारसमयः सोयन्न सन्त्यत्र शरीरिणः ॥५८॥ न नक्षत्राणि पवनो भूधरा नाम्बुराशयः ॥ न ब्रह्मा नारायणो नेन्द्रो

न ब्रह्मा नोपि मानवाः ॥५९॥ कैलासे वा मन्दरे वा श्रीशैले वा सदाशिव ॥ काश्यां वा वसति स्तावत्पूर्वमासीज्जनान्वये

॥६०॥ अधुना यत्रकुत्रापि स्थातुं शक्यं तथा सति ॥ विहार विघ्न नाशोपि जात एवेति मन्महे ॥६१॥ इति तद्वचनं श्रु-

त्वा शंकरो हृष्टमानसः ॥ गौरी विहार चतुरो बभूव भगवान्शिवः ॥६२॥ तयो विंहार कालोपि यावान्वृत्तः पुरा तदा

सनत्सातोऽपि केनापि सकल स्तान्मनोहरः ॥६३॥ गौरी विहार रस सागर सेवनेन वृत्तः श्रमोऽपि शिवयोः सत-

योः श्रमेण ॥ स्वेदाम्बुराशिरभवत्तत एव जाता सृष्टिश्च सर्व जगतां च यथा क्रमेण ॥६४॥ स्वेदः स एव जलधित्व

मवाप कोपि गङ्गात्वमाप यमुनात्वमवाप कोऽपि ॥ वाणित्वमाप सरयूत्वमवाप कोपि क्षीराम्बुराशिमपि कोपि

स एव नूनम् ॥६५॥ स एव शोणभद्रत्वं नर्मदात्वमवाप सः ॥ गोदावरीत्वं सम्प्राप कावेरीत्वमवाप सः ॥६६॥

सम्प्राप कृष्णा ~~कावेरी~~ वेणीत्वं स्वेद पूरस्तयोस्तदा ॥ तेनैव स्वेद पूरेण ब्रह्माण्डं जल पूरितम् ॥६७॥ तेन वा

युः समुत्पन्नः जातश्च गगनं ततः ॥ अग्निरिन्दुश्च सूर्यश्च महाविष्णुश्चतुर्मुखः ॥६८॥ विन्ध्यश्च हिमवा

न्मेरुः मन्दरो गन्धमादनः ॥ कुलाचलाश्च नागाश्च सर्पाश्च मणि भूषणाः ॥ निश्चयः शंख मुख्या[illegible]

श्च लोकाः स्वर्गादयस्तदा ॥ वनान्यपि विचित्राणि धान्यान्यपि विशेषतः ॥७०॥ तेनैव स्वेद रूपेण

६६

वेदा अप्यागमाश्चापि ॥ विद्याः समस्ताः संभूताः गन्धर्वाः किन्नरा अपि ॥ तत एव समुत्पन्नाः सर्वे ते मानवा अपि ॥ मनवोऽपि समुत्पन्नाः पशु पक्षि मृगादयः ॥७२॥ एवमेतत्समुत्पन्नं जगदृष्ट्वा महेश्वरः ॥ विस्मयं परमं प्राप सापि गौरी शिव प्रिया ॥७३॥ ततस्तामाह गिरिजां गिरिजारमणः प्रभुः ॥ पश्य पश्य विलासोयं कथं परिणतः प्रिये ॥७४॥ सुस्पष्टोऽयं विलासस्ते विजनत्वावलोकनात् ॥ जनावलोकने वृत्ते स तावच्छान्त एव ते ॥७५॥ अतः परं विलासार्थं यदि स्थल[illegible]मपेक्षितम् ॥ तदा कैलास निलयमायाहि गिरिकन्यके ॥७६॥ तत्रोद्यान[illegible] वने रम्ये सर्व पुष्प समा[illegible]कुले ॥ भृंगांगना गान गीतेकर भृङ्गान संकुले ॥७७॥ सुधा प्रवाह संकीर्णे मन्दमारुत सेविते ॥ पुष्प शय्या समा कीर्णे फलराजि विराजिते ॥७८॥ रत्न मन्दिर संकीर्णे रत्न सिंहासनार्चिते ॥ रत्न पर्यङ्क सङ्कीर्णे रत्नमाला विराजिते ॥७९॥ इन्दु कन्दुक संवीते पुष्प माला विजृंभिते ॥ मणि दीप समाकीर्णे शरद्राका निशाकरे ॥ ८०॥ ब्रह्माण्ड प्रलयेप्यस्य प्रलयो न प्रजायते ॥ सर्व[illegible]तुगण संकीर्णं सर्वदा तद्वनं मम ॥ ८१॥ तत्र पक्वान्यपाराणि फलानि विविधान्यपि ॥ तेभ्यः पीयूष धाराश्च प्रस्रवन्ति मुहुर्मुहुः ॥ ८२॥ सरिद्वारापि परितस्तदुद्यानस्य शोभना ॥ उत्फुल्ल पुण्डरीकाणां मालाभिः सा विराजिता ॥ महादेव महादेव महादेवेतिनादिनी ॥ ८३॥ तत्तीरे सन्ति बहवो मरालाः स्वांगना युताः ॥ ते सर्वदा वदन्त्येव हरशम्भो शिवेत्यपि ॥ ८४॥ मराल नारी गानानि श्राव्याणि कमलानने ॥ तत्र गन्तास्यधुना डोला तत्रास्ति काञ्चनी ॥ ८५॥

डोलोत्सवोपि कर्तव्यं तत्र तावन्मनोहरः ॥ इत्युक्त्वा स महादेवो भवानी कर सम्पुटम् ॥ ८६ ॥ गृहीत्वा गमनन्तत्र सस्मारामरपु

ङ्गवः ॥ ८६ ॥ ततः प्रविष्टो गिरिशो गिरिजा कर सम्पुटम् ॥ ८७ ॥ धृत्वा करेण त्वरया तदुद्यानं मनोहरम् ॥ रत्न प्रासादमारुह्य

रत्न सिंहासने स्थितः ॥ शिवया पुष्प शय्यायां रेमे गण विवर्जितः ॥ ततः परं स डोलायामारुह्य शिवया सह ॥ ८८ ॥ इन्दुकन्दु

कलीलाभिश्चकार दिनयापनं ॥ तस्मिन्नेव दिने जाताः कोटिशः प्रलया अपि ॥ सर्गाश्च तावन्तेषाञ्च न संख्याऽपि दृश्यते

एवमेव महादेवः शिवया सह सर्वदा ॥ ८९ ॥ क्रीडां करोति क्रीडाञ्च त्यक्त्वा क्रीडापि तस्य न ॥ चिह्नः स महादेवः तस्य क्री-

डा कुतो भवेत् ॥ ९२ ॥ न तस्य सुरतेच्छापि तस्य स्नान ध्यनस्य सः ॥ ऋतं सत्यं परं ब्रह्म पुरुषं कृष्ण पिङ्गलम् ॥ ९३ ॥ ऊर्ध्वरे

तं विरूपाक्षं विश्व रूपं वदन्ति तम् ॥ सत्यं ज्ञानमनन्तञ्च तद्ब्रह्म परमं विदुः ॥ ९४ ॥ ततो भीतः सवातोपि वाति सूर्योप्यु-

देति सः ॥ ९४ ॥ अग्निरिन्द्रश्च भीतः स्यान्मृत्युर्धावति पञ्चमः ॥ ९५ ॥ इयमानन्दमीमांसा तत्त्वरूप भगोचरम् ॥ यस्य प्रसा

दलेशेन सर्वे नारायणादयः ॥ ९६ ॥ सुराः कृतार्था तं देवं शरणं यामि शङ्करम् ॥ संहार काले सम्प्राप्ते ब्रह्म नारायणादिकान्

॥ ९७ ॥ संहृत्य लीलां कुरुते यः स एव सदाशिवः ॥ यस्य प्रसादादपशिवापहारो यस्य प्रसादाज्जननापहारः ॥ यस्य प्रसादेन

जरापहारः तमेव देवं शिवमाश्रयामः ॥ ९९ ॥ शिव इत्युच्चरन्नेव मनुजस्याघ्रिवालयः ॥ तस्य देवस्य महिमा वेदानाम

662

प्यगोचरः ॥ १०० ॥ सहस्रजिह्वोऽपि न यस्य तत्वं स्तोतुं समर्थश्चतुराननो वा ॥ नारायणो यातमुमासहायमानन्दकन्दं हृदि भावयामः ॥ १ ॥ यमाहुरीशं परमं वरेण्यं सर्गस्थितीनामपि हेतुभूतम् ॥ तमेव देवोत्तममिन्दुखण्डशोभासमालङ्कृतमाश्रयामः ॥ २ ॥ तल्लीलास्वेदराशिः सुरसरिदचलाधीशकन्यायदंके यन्मौलौ चन्द्ररेखा विलसति सततं यज्जटाजूटमाला ॥ ताराणामेव हारोप्युरसि नवलसद्विल्वमाला विलोला तत्पादाम्भोज भृङ्गो भवतु मम मनस्त्यक्तसंसारगन्धम् ॥ ३ ॥ लोके भाग्यसुधाम्बुराशिरहिता स्तेये तदा शंकरध्यानानन्द विहीनहीन मनसस्ते दुर्भगाः सर्वदा ॥ कल्पान्तेपि न मुक्तिरित्यपि मिताः संसारिणस्ते सदा सर्वेना राकिणोपि तत्कुलमपि स्यात्पुल्कसानां कुलम् ॥ ४ ॥ यस्यान्तःकरणं महेश्वरपदांभोजार्चने सादरम् तन्नामस्मरणेऽपि तत्सुखकथावार्तानुरक्तं सदा ॥ ५ तम्प्राहुर्गतकल्मषं मुनिजनाः सर्वेऽपि तं केवलम् वंद्यं प्राहुरमन्द पुण्यविभवम् भावं भवाभ्यर्चकम् ॥ ॥ ५ ॥ आकल्पं विजयी स एव सशुभारम्भैकभूर्भासुरः सः स्यादिन्दुकलावतंशचरणांभोजार्चकानाम् प्रियः ॥ स स्यादुत्तम सम्पदामपि निधिः स स्यात्सुराणामपि प्रायः सेव्य इति प्रभूत विभवो भावो न किं दुर्लभः ॥ ६ ॥ स्वप्नेपि यस्य शिवलिङ्ग विलोकनेच्छा स्वच्छा भविष्यति भवार्चनजातपुण्यैः ॥ तत्पादपङ्कजरजोमणिमञ्जरीव धन्योत्तमो

रुशिरसि स्फुरतीह धीरे ॥ ७॥ अस्मात्त्वापि शिवप्रभवं च यः शंकराराधनध्यानालङ्कृतचित्तवृत्तिरसकृद्यद्वासकृत्सादरम् ॥ तं मुक्तं प्रवदन्ति पावनमिति प्राहुर्मुनीन्द्राः शिवाः तं स्वं जगतीतलस्य सततं वन्दे मुहुः सादरम् ॥ ८॥ यो भक्त्या रजनीमुखेषु गिरिशं सम्पूज्य बिल्वादिभिः नैवेद्यादिसमर्पणेन च मुहुर्नोत्येश्वमाप्येरपि ॥ सन्तुष्टः तमपास्तदुःखनिकरं मन्ये सरेवासरस्तीरे लिङ्गमभङ्गबिल्वकमलैराराध्य शंगं व्रजेत् ॥ ९॥ इत्याकर्ण्य वचस्तस्य तं प्रणम्याभिवन्द्य च ॥ नित्यं शिवकथामेवं वदेत्याह विचक्षणा ॥ १०॥ स सन्तुष्टस्तया साकमुषित्वा शिवमन्दिरे ॥ कृत्वा जागरणं पश्चादुदयाचलमाप सः ॥ ११॥ सापि राज्ञी प्रगे प्रातः स्नात्वा रेवाजले ततः ॥ परिधाय दुकूलानि भस्मरुद्राक्षभूषणा ॥ १२॥ शिवाचाररतापारसखीजनसमावृता ॥ विवेश मन्दिरं शंभोः शिवाराधनतत्परा ॥ १३॥ स्वकुम्भसमानीतरेवानीरैर्मनोहरैः ॥ पञ्चामृतैश्चाभिषिच्य पूजयामास शंकरम् ॥ १४॥ ततः परमृतुं प्राप सा राज्ञी स्वगृहं गता ॥ तत्र ध्यानरतासापि मध्याह्ने शिवपूजनम् ॥ १५॥ न जातमिति चिन्तार्ता पूजयामास चेतसा ॥ मानसं पूजनं कृत्वा महादेवस्य सादरम् ॥ १६॥ निनाय कालं दुःखेन रात्रीदिनचतुष्टयम् ॥ ततः स्नात्वा महादेवमुपचारैरनेकधा ॥ १७॥ सा चतुर्गुणितैश्चक्रे श्रीमहादेवपूजनम् ॥ ततः सायं रविं दृष्ट्वा शिवपूजो त्तरं नृप ॥ १८॥ सा राज्ञी तमुवाचापि धृतभूतिविभूषणा ॥ राज्ञ्युवाच ॥ त्वं गुरुर्मे जनकः त्वमेवासि शिवार्चकः ॥ शिवपूजापरित्यागे का गतिः स्याद्वदाधुना ॥ भानुरुवाच ॥ त्यक्त्वा महादेवपदाम्बुजार्चां को वा सुखं प्राप्तुमपि प्रवृत्तः ॥ २०॥

शिवरह०३ ९५०

ह०त०उ० अ०३०

सञ्जीवने चेन्मरणोन्मुखेन त्यक्त्वा कथं वा वद जीवनं स्यात् ॥२०॥ शंकराराधनं त्यक्त्वा न मूढोप्यधितिष्ठति ॥ शंकराराधनाभावे
जीवनम् मरणोपमम् ॥२१॥ ~~सञ्जीवने चेन्मरणोन्मुखेन त्यक्त्वा कथं वा वद जीवनं स्यात्~~ ॥ वरं मरणमन्वहं वरमघौघकोट्यर्जनम्
वरञ्च विषभोजनं वरमपारगोहिंसनम् ॥ वरं द्विजवधोऽपि वा न वरमीशलिङ्गार्चनव्यपाय इति मे मतिः किमिति तस्य (ना) जीवनम् ॥
॥२२॥ न मातृगमनेन वा भवति तादृशं पातकं सुरादिमधुसेवनादपि तथाविधं पातकम् ॥ द्विजोत्तमवधे (न) ऽपि वा न (च) तथाविधं पात
कं न [illegible] यादृशमुमापतिप्रियसमर्चनत्यागतः ॥२३॥ अनायासेन सिद्ध्यन्ति सर्वे धर्माः शिवार्चनात् ॥ तत्परित्यागतः पापान्य
नाया[illegible]सार्जितान्यपि ॥२४॥ शिवपूजनसामर्थ्यं न जानन्त्येव दुर्जनाः ॥ अतएव न कुर्वन्ति शिवलिङ्गे शिवार्चनम् ॥२५॥
पापान्यपाराणि लयं प्रयान्ति शिवार्चनेनैव शिवार्चकानाम् ॥ न तद्विनाशार्थमतिप्रयत्नः स्मृतेऽपि शाङ्के स महाघभङ्गः ॥२६॥
नकल्पकोट्यर्जितपातकेभ्यो बिभेति भावो भवपूजकश्चेत् ॥ संसारदुःखानि हरत्यवश्यं हरः स्मृतो वाथ समर्चितो वा ॥२७॥ पापा
पारगिरेः पविः खलु महादेवार्चनं तद्यतः ॥ संसारांबुधिबाडवोऽपि तदिति ज्ञात्वा शिवाराधनम् ॥२८॥ कुर्वन्त्युत्तमवृत्तयः शिवपदां
भोजार्चनात् द्भूतं तत्त्यागे पतितो भवत्यनुदिनं तस्मात्तदर्चापरा ॥२९॥ ~~कुर्वन्त्युत्तमवृत्तयः शिवपदांभोजा~~ अत्रैवोदाहरन्तीम-
मितिहासं पुरातनम् ॥ तस्य संश्रवणात्सद्यो मुच्यते पापबन्धनात् ॥३०॥ पुरा हिमागिरेरेव कन्दरे रुचिरे परे ॥ चचार चार-

णः कोऽपि सर्वदा युवतीयुतः ॥ ३० ॥ तेन नाराधितं लिङ्गं अन्याराधितमेव वा ॥ न दृष्टमति सन्तोषैः दीपैः कान्ति विराजितम् ॥ ३१ ॥ न
बिल्वतरुमूलानि शिवलिङ्गान्वितान्यपि ॥ नाराधिताः शंकराद्यूतैः सख्यं समर्जितम् ॥ ३२ ॥ सुरताचारनिरतस्तदाचारादरैः
सह ॥ रतिश्चकार तुष्टात्मा शिवपूजनवर्जितः ॥ ३३ ॥ अहोरात्रं स तरुणीं विहाय तु न तिष्ठति ॥ तेनैव कश्चिद्विपिने दृष्टो बिल्वतरु
र्महान् ॥ ३४ ॥ स च्छायनारुस च्छलं स बिल्वतरुमाश्रितः ॥ तया सह स्थितस्तत्र तरुण्या रजनीमुखे ॥ ३५ ॥ तदानीमागतः क
कश्चिच्छांभवः शिवपूजकः ॥ तं दुरात्मानमालोक्य विस्मितो मौनमाश्रितः ॥ ३६ ॥ अयं प्रदोषकालोऽत्र तरुणीरतिलालसः ॥
बिल्वमूलं समाश्रित्य तिष्ठत्यघकुलार्जकः ॥ ३७ ॥ दृष्ट्वापि मामयं लज्जां न प्राप्तो विरतोऽपि न ॥ सुरतानुरतो भूयो भूयोऽपि मदना
तुरः ॥ ३८ ॥ मयाद्य दुरदृष्टेन दृष्टोऽयं जारिणीरतः ॥ अतः परं क्व गन्तव्यं वने बिल्वोऽप्ययं महान् ॥ ३९ ॥ तन्मूले लिङ्गमुत्तुङ्गं शांगं तिष्ठ
ति शोभनम् ॥ तिष्ठन्ति बिल्वपत्राणि करप्राप्यानि कोटिशः ॥ ४० ॥ इदं गङ्गाजलं रम्यं अभिषेकार्हमुद्धृतम् ॥ गंगातीरे लिङ्ग
पूजा शंगप्रियतरा खलु ॥ ४१ ॥ गङ्गातीरतरुः सोऽयं गङ्गापतनशीतलः ॥ अतएव न तां तानि तत्पात्राण्यपि सर्वथा ॥ ४२ ॥ एतै
राराधिते लिङ्गे शंगो मङ्गलदो भवेत् ॥ अदृष्टं प्रतिबन्धं मे किमेवं रजनीमुखे ॥ ४३ ॥ प्रायः पापं कृतं पूर्वं तेन लिङ्गार्चनो
द्यमे ॥ वृत्तोऽपि प्रतिबन्धोऽयं कथं वा समुपस्थितः ॥ ४४ ॥ श्रेयसां प्रतिबन्धोऽपि भूयो नैव मुपस्थितः ॥ शिवपूजनलाभो-

६६१

यं सुलभः किं भविष्यति ॥४५॥ भाग्यान्यभ्युदयोद्युक्तान्यपाराणि भवन्ति चेत् ॥ भवत्येव न सन्देहो निष्प्रत्यूहं शिवार्चनम् ॥४६॥
धिगिदं ब्रह्मलिखितं काले धिगि[illegible]दमीदृशम् ॥ अस्मिन्काले यतो नाभूच्छ्रांग लिङ्गसमर्चनम् ॥४७॥ तदा संसारबन्धोऽपि विच्छि-
न्नः स्याद[illegible]संशयम् ॥ कृतादृशं भाग्यमभाग्ययोगे सायं शिवाराधनसाधनेषु ॥४८॥ सत्स्वेव लिङ्गार्चनमद्य तावत् न जातमेतत्प्रतिब-
न्धकेन ॥ अहो कथं वा प्रतिबन्धनाशो न जायते जातु कृतं न पुण्यम् ॥४९॥ विनान्तेनास्य कुतोऽधुना स्यात्सायं शिवाराधनवृद्धिसिद्धिः ॥
येषां विनष्टानि न पातकानि कृतानि [illegible] जन्मान्तरसाधनानि ॥५०॥ तेषां न सायं शिवपूजनेच्छा जातापि सा स्यात्प्रतिबन्धरुद्धा ॥
असारसंसारविहाररक्ताः कुर्वन्ति नारी कुशरीरयोगम् ॥५१॥ तेषां न तावद्गिरिशार्चनेच्छा ते दुर्भगा एव यतः स्वभावैः ॥ ज्ञात्वापि सं-
सारविषं पिबन्ति पुनः पुनर्जन्मजरादिरूपम् ॥५२॥ न तद्विनाशाय सुधां पिबन्ति महेशलिङ्गार्चनलक्षणान्ताम् ॥ कथं निधानम-
सुलभं महेशपूजास्वरूपं निधिरञ्जनेन ॥५३॥ विना न लभ्यं खलु पापनाशः तदञ्जनं केवलमित्यवैमि ॥ पापराशिरधुनानुमि-
तोऽपि विश्वनाथजनितप्रतिबन्धात् ॥ किं विधेयमधुना मम सायं शं गलिङ्गमपि नोक्षितमेव ॥५४॥ यदि लिङ्गविलोकनाद्भुतं
स्यादिदमायुः क्षणमेव तद्रमे ॥ सफला जनिरप्युमासहायस्मरणं दुर्लभमेव देहिनान्तु ॥५५॥ किं देहेन किमुत्तमेश्च नयनैः फुल्ला-
रविन्दप्रभैः किं हस्तैरपि पङ्कपत्रसदृशैः किं जिह्वया वा तया ॥ येनेशो न नतो नयैरपि मुहुः दृष्टोऽपि नाराधितो बिल्वैः संस्तुत

एव वा गिरिसुताकान्तः कृतान्तान्तकः ॥ ५६ ॥ भक्त्या यो न कृतान्तकान्तक । शिवध्यानाधिरूढो दृढं तन्तावत्पुरुषाधमं विदुरथः
पाताय तज्जीवनम् ॥ तद्दृष्ट्वा यमकिङ्कराः स्फुरतरं कृत्वोपहासानयं नेयः किं यममन्दिराद्द्रुतमित्युच्चैर्वदन्त्येव ते ॥ ५७ ॥ यमकि-
ङ्कर धीरधीवराणां वडिशैस्तावदशैव मत्स्य मत्स्यजालम् ॥ पततीव किमद्भुतं तदीयं विफलं जीवनमेव तादृशां हि ॥ ५८ ॥ वनेव-
नेनापि न काललोचनं बिल्वीदलैः सुम्भिर्वा कुसुमैर्नवैर्वा ॥ किमर्चयन्तीति भटा वदन्तो हसन्ति कालस्य विशेषकाले ॥ ५९ ॥
जलं प्रक्षिपन्तोऽपि बिल्वीदलं वा प्रसूनं नवं वा फलं तावदेकम् ॥ न किन्त्वद्भुतापारदुःखप्रणाशादपाराणि रम्याणि सौख्या
नि नूनम् ॥ वा महेशे ॥ तरन्त्येव संसारपापौघहीनं कष्टदाम्बुराशिं स्मरन्तोऽपि काशीं ॥ १६० ॥ अपारोरुपापाटवीपावकानां शिवा
राधनानां फलं तावदेकम् ॥ न किन्त्वद्भुतापारदुःखप्रणाशादपाराणि रम्याणि सौख्यानि नूनम् ॥ ६१ ॥ किं योगैरतितुच्छभोगफल
दैः स्वर्गोऽपि किं वाञ्छितः तुच्छत्वे न निराकृतः शिवरतैः स्वर्गस्तु तेषां फलम् ॥ सायं शंगसमर्चनेन सकलाभीष्टार्थसिद्धिर्यतो
मोक्षोऽप्यामलकायते करतले कालोऽपि रङ्कायते ॥ १६२ ॥ इति श्रीशिवरहस्ये हराख्ये तृतीयांशे उत्तरार्धे याज्ञवल्क्यजनकसं-
वादो नाम त्रिंशोऽध्यायः ॥ ३० ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ याज्ञवल्क्य उवाच ॥ इति स्थिरमतिः सोऽपि शंकरः शं
करार्चनम् ॥ कथं वा विघ्नितं तत्स्यादिति चिन्ताकुलोऽभवत् ॥ १ ॥ ततः सुरसरित्तीरे भूरुहान्परितो मुहुः ॥ पश्यन्नन्यं न सम्प्रा

पवने बिल्वतरुं परम् ॥ २॥ तद्बिल्वमूलाविलसल्लिङ्गं मङ्गलदायकम् ॥ दृष्ट्वा हृष्टोपि कुपितस्तां विलोक्याति विस्मितः ॥ ३॥
ततः परं चारणोऽपि रमणीभोगसाधनम् ॥ चन्दनादिकमादाय प्रपच्छ समुपस्थितम् ॥ ४॥ किं विलम्बः कृतश्चेटि कु-
पिताचटुलानना ॥ नाधुनाप्यागता सापीत्यनुवारं त्वमादरात् ॥ ५॥ क्व चन्दनं क्व वा माल्यं क्व कर्पूरादि कर्दमः ॥ कस्तूरि
का क्व वा रम्या क्व वा कुंकुमकेसरः ॥ ६॥ कुत्रास्त्यगरुसारोपि क्षीरं वा घृतसंयुतम् ॥ फलानि कुत्र पक्वानि
कुत्र वा दीपमालिका ॥ ७॥ पानार्हमधुना कुत्र शीतलं विमलं जलम् ॥ वितानं पुष्पशय्या वा ताम्बूलान्यपि कुत्र वा ॥ ८॥
क्व वा केयूरहारादि तदीयाभरणं नवम् ॥ क्व दुकूलानि रम्याणि कचालानि विमलान्यपि ॥ ९॥ इति तद्वचनं श्रुत्वा स्वामिन्स-
र्वमिहाहृतम् ॥ गतागताभ्यां कालोपि कश्चिदद्य विलम्बितः ॥ १०॥ अपराधोपि सोढव्य इत्युवाचाति विह्वला ॥ साम-
ग्रीमागतां पश्य सर्वामपि मनोहराम् ॥ ११॥ ततः सर्वं समादाय बिल्वमूले मनोहरे ॥ स्थापयामास सा चेटी भोगसाधन
मुत्तमम् ॥ १२॥ ततस्तद्रमणी दृष्ट्वा विलम्बः किमभूदिति ॥ भर्त्सयामास साभीता दृष्ट्वा परुषभाषिणी ॥
॥ १३॥ ततः परं समुत्थाय सावेगेन वरानना ॥ किमियं भोगसामग्री समानीता वनेऽधुना ॥ १४॥ दीपमालारचनया दर्शये
त्याह सत्वरम् ॥ रमणं तरुणं दृष्ट्वा विवर्णं प्राह सत्वरम् ॥ १५॥ ततस्तयापि परितो दीपमालाः प्रकल्पिताः ॥ तदीय

कान्त्या कान्तानि वस्तूनि सकलान्यपि ॥ १६ ॥ ततस्तानि विलोक्यापि स्वल्पानीत्यपि कोपतः ॥ आदौ तज्जलमादाय लिङ्गे क्षिप्तं तया रुषा ॥ १७ ॥ पश्चाच्चन्दनमादाय दिव्यगन्धसमन्वितम् ॥ चन्दनञ्च विनिक्षिप्तं लिङ्गे तुङ्गे मनोहरे ॥ १८ ॥ पुष्पाण्यपि विचित्राणि पारिजातादिकान्यपि ॥ तया क्षिप्तानि तल्लिङ्गे दुकूलान्यपि सत्वरम् ॥ १९ ॥ पश्चात्फलानि सर्वाणि त्यक्तानि विविधान्यपि ॥ लिङ्गमूले मनोज्ञानि मधुराणि विशेषतः ॥ २० ॥ ततः पपात सा कोपात् तस्मिन् लिङ्गाङ्गणे तदा ॥ ततः परं चारणोऽपि तां विलोक्याति विस्मितः ॥ तत्सर्वं शाम्भवो दृष्ट्वा दूरादेव पुनः पुनः ॥ विस्मयं परमं प्राप मानयन्नेव तामपि ॥ २२ ॥ शङ्कर उवाच ॥ धन्येयं कृतकृत्येयं सर्वलक्षणसंयुता ॥ पूजां चकार लिङ्गेऽस्मिन् बिल्वमूले मनोहरे ॥ २३ ॥ जन्मान्तरे कृतं किं वा तया पुण्यं निशामुखे ॥ विविधैः साधनैरेवं चकार शिवपूजनम् ॥ २४ ॥ अमरी किमियं किं वा कापि गन्धर्वकन्यका ॥ केन पुण्यप्रभावेन शरीरं प्राप्तमीदृशम् ॥ २५ ॥ लोकानां शिक्षणायात्र शरीरं धृतमीदृशम् ॥ एवं पूजा महेशस्य कर्तव्येति निशामुखे ॥ २६ ॥ दिव्यः कुंकुमकेसरादिसहितः पाटीरसारः परः कर्पूरागरुसंयुतो मृगमद व्याप्तोऽपि दत्तः शिवे ॥ मालान्यूर्मितानि तानि विमला सा पुष्पशय्या तया शर्वायाद्यनिवेद्य चन्दनयुता सा कल्पिता शंकरे ॥ २७ ॥ कर्पूरसारपरिक[illegible]ल्पितदीपमाला सेयं शिवारमणलिङ्गविशेषकान्त्या ॥ पुष्पा महाप्य वन पावक तामवाप

666

शिवरह० उ० १४३

ह० तृ० अ० ३१

धन्येममाय नयने। शिव वीक्षणनेन ॥ २८॥ आकल्पितः कोऽयमिहाय लाभो वृत्तः। शिवाराधन दर्शनेन ॥ एवं किमभ्यर्चितशंगलिङ्गं दृष्टं मया पूर्व भवे कदा वा ॥ २९॥ एतादृशं लिङ्गमनुत्तमं चेदभ्यर्चितं पूर्व भवे कदापि ॥ तदा कथं वा जनि रीदृशी स्याद्धृत्तो न दृष्टं खलु पूर्वमेव ॥ ३०॥ पुण्येन केनापि मयाद्य दृष्टं। लिङ्गं समभ्यर्चितमादरेण॥ एतादृशं पुण्यमतुल्यं धर्मार्थकामादिक साधनं मे ॥ ३१॥ भूतापि सेयं। शिवरात्रिरद्य सोमोपि पुण्यः खलु वासरोद्य ॥ आकल्पितः सोऽयमपापहारं करिष्यतीत्यत्र न संशयो मे ॥ ३२॥ मया तु बिल्वीदलमात्रमद्य प्रदेयमित्येव समागतश्च ॥ अकल्पितः सोऽयमिहायलाभः शैलात्मजा वल्लभ दर्शनेन ॥ ३३॥ पुष्पादिकाभ्यर्चित लिङ्गमद्य दृष्टं ततो नष्टमिहाति कष्टम् ॥ महेश्वरानुग्रह एव वृत्तः सायं। शिवाराधन दर्शनेन ॥ ३४॥ धन्याः क्व चित्सन्ति। शिवार्चकास्ते ज्ञेयाः कथं वा सुकृतै विनापि ॥ अन्यादृशी बुद्धिरिहाभवन्मे तद्बुद्धिजं पापमिहाद्य नष्टम् ॥ ३५॥ शैव स्वरूपाण्यपि पावनानि दृष्टानि पुण्यै रमितैः कदाचित् ॥ अशेष पापौघ विनाशनाय भवन्ति तावत्सुकृतै रपारैः ॥ ३६॥ अलमेतद्वेक्षणेन पुण्यैरपि यागादिभिरप्यपारदानैः ॥ शिवइत्यनुवारमेकदा वा वद जिह्वे प्रणतोस्मि तुभ्यमद्य ॥ ३७॥ अपराध सहस्र कोटिकूटः प्रलयं याति कदाचिदादरेण ॥ शिव इत्यभिधान मात्रतो वा वद जिह्वे शिवमेव तेनमोमे ॥ ३८॥ पूजाद्रव्य समर्जनाय न धनं शक्तिश्च नातः परं तद्द्रव्यार्ज

न साधनं च नमितं यल्लौकिकन्तन्मया ॥ त्वं तावत्समुपार्जितासि रसने पुण्यै रगण्यैरतः ॥ शम्भो शंकर चन्द्रशेखर महादेवेति वा सम्वद ॥ ३९ ॥ मा मा सम्वद सम्वदन्मधुरसने मोहात्प्रमादेन वा भ्रंशेनापि शिवान्य नाम सततं शंभो शिवेत्यादरात् ॥ त्वं ना वद्द्द शर्कराप्यतिशिवा तुभ्यं मया दीयते क्षीरं चाज्य समन्वितं शिव कथा पीयूष तृप्ताप्यसि ॥ ४० ॥ गौरी मनोरमण नाम सुधां विहाय वाञ्छापि ते खलु न सा रसने रसज्ञे ॥ कस्तादृशो भवति येन तवान्य वाञ्छा स्यादित्यतः परमुमारमणं वदाशु ॥ ४१ ॥ पुण्यैरपारै र्बहुजन्म सिद्धै र्यागैश्च योगैरपि साधितालम् ॥ अतो महादेव शिवेति नाम पीयूष मेवादरतः पिबाशु ॥ ४२ ॥ तिक्ता सदा सोमरसाव सिक्ता ततो विरक्तात्वमिहानुरक्ता ॥ महेश्वरापार सुधास्वरूपा नामावली केवरसेतुवेलम् ॥ ४३ ॥ विलोकयेदं नयनारविन्द मन्दार कुन्दार्चित लिंगमद्य ॥ इदं कदा वा सुलभं तव स्यात् इहाधुना पुण्य वशेन लब्ध म ॥ ४४ ॥ यथा धनं नैव जहाति दीनस्तथा प्रपश्याशु महेश लिङ्गम् ॥ एतादृशस्ते कथमुत्सव स्यात्कालान्तरे तेन निलो कयेदम् ॥ ४५ ॥ वन्ध्यालब्धकुमार वीक्षणरता कार्या नारा संगता तद्वत्त्वं शिव लिङ्गमर्चितमिदं पश्याधुना सादरम् ॥ स्वप्ने वद्भुतशंग लिङ्ग रचिता पूजा यतो दुर्लभा पश्येदं पुनरादरैः पुनरिदं पश्य प्रपश्यादरात् ॥ ४६ ॥ त्वन्तावत्मम पुण्य साधनमतः त्वं पुण्य वृन्दार्जितम मे ने शङ्कु विलोकनेन तदिदं सर्वात्मना दुर्लभम् ॥ आप्तत्वेन मयेद मुच्यत इति ज्ञेयं त्वया सर्वथा

मामाहं तव सर्वथापि नयने जानीहि जिह्वे तथा ॥४७॥ धन्यास्ते तरवोऽपि शाङ्कविलसल्लिङ्गांगणारोपिताः तत्सेवानिरताः पुनः पुनर
तिच्छायया ति दानैरलम् ॥ कुलं तीर्णं तेन चिरमत्र सुकृतं किं किं कृतं तैरपि ज्ञातुं शक्यमतः परं न सहसा तत्सन्निधानात्सदा ॥४८॥
धन्यास्ते तरवः स पल्लवकुलैरभ्यर्च्ययन्त्येव ते शांङ्गं लिङ्गमयत्नलब्धविभवास्ते पाण्डुपत्रैरपि ॥ पक्वैरप्यमलैः फलै
रनितान्तावत्स्वतः प्रच्युतै रेतद्भाग्यगुणानुवर्णनमपि प्रायोऽस्ति पुण्याब्धिभिः ॥४९॥ तरुरप्युरुशांगाल्लिङ्गभागे स्थिर एवाति-
तरां करोति सेवाम् ॥ अयमत्र सहानुभाव एवेत्यभिमानो मम तन्निधानमेव ॥५०॥ इयमालोकिता धन्या पुण्यैरेव मुहुर्मुहुः ॥
शिवपूजनसन्तुष्टा कथमेवं मनोरमा ॥५१॥ इयमप्यधुना प्रदोषकाले शीवमभ्यर्च्य सकृत्प्रणाममुक्ता ॥ सकृदप्यविलोकिता
शुभानाम् निधिमेव प्रयता प्रहास्यतीह ॥५२॥ अत्र प्रदोष समयः कथं ज्ञातस्त्वयाधुना ॥ कथमभ्यर्चितं लिङ्गं शांगं सायं शिवाश्रि
तम् ॥५३॥ कल्याणरूपः करुणानिधानम् निध्यानरूपः गिरिजासहायः ॥ तुष्टोऽधुना लिङ्गसमर्चनेन सा पन्न सन्देह विपर्य्य
यो मे ॥५४॥ किमप्येकं लिङ्गे यदि पतति पत्रं करगतं नवं वा पुष्पं वा शोभितमपि लिङ्गे तदखिलम् ॥ अयं तावद्दूरे सकृदपि
करोतीति विदितं प्रसूनाद्यैर्लिङ्गं पुनरिह किमर्चितमिति ॥५५॥ अहो महादेवमुमासहायं दयासमुद्रं न स वेद वेदः ॥ न वेदचन्द्रैर
पि तत्स्वरूपं विज्ञातमेवेति मतिर्ममाभूत ॥५६॥ इत्युक्त्वा स महाशैवः महापूजासमन्वितम् ॥ लिङ्गं दृष्ट्वा प्रहर्षेण प्रणतोऽपि

(मकरन्दः?)

मुहुर्मुहुः ॥५७॥ विमानं प्रेषयामास गणैर्भृङ्गीश्वरादिभिः ॥ दृष्ट्वा तेषां समारम्भं मार्गे नारायणादयः ॥५८॥ तैः सहैव तदा स-
र्वे तत्र तावत्समागताः ॥ तद्दृष्ट्वा लिङ्गमुत्कृष्टं पूजितं प्रणताः सुराः ॥५९॥ विस्मयं परमं प्रापुः ग णानूचुस्ततः परम् ॥६०॥
॥देवा ऊचुः॥ अहो गणोत्तमाः सर्वे यूयं शंकरपूजकाः ॥ अतीतानागत ज्ञान सम्पन्नाः शिव पूजया ॥६१॥ केनेदमर्चितं लिङ्ग-
न्तुङ्गं बिल्व समाश्रितम् ॥ तस्य पुण्य प्रभावस्य नावधिर्दृश्यते परः ॥६२॥ अथ प्रदोष समयः कामधेनुरिवागतः ॥ एतत्पूजक
भाग्यानि हीराकाराणि दास्यति ॥६३॥ कथं ना महती पूजा कृता पुण्य विवर्धनी ॥ एतत्पूजावीक्षणेनाप्यानन्दो वर्धते मुहुः
॥६४॥ पाटीरादि रसानुलिप्तमधुना कस्तूरिका कर्दमैः कर्पूरागरु सार सार सुरसैर्वन्यैः सुगन्धैर्युतम् ॥ लिङ्गं मङ्गलदाय
कं खलु वने दृष्टं प्रकृष्टं मुहुः कष्टं नाशयितुं प्रवृत्तमधुना पुण्यैरपारैः खलु ॥६५॥ पाटीर गन्धेन किलाधुनेदं वनं सगन्ध
म्प्रमावृतञ्च ॥ एतादृशश्चन्दन मद्य दत्तं केनाद्य लिङ्गे रजनीमुखेऽस्मिन् ॥६६॥ यो लिङ्गे रजनीमुखेऽति सुभगो द-
द्यात् मुदा चन्दनम् ॥ कस्तूरी सहितं स याति सदनं गन्ध प्रसन्नं मुदा ॥६७॥ यानं रत्न समेतमेत्य स महाभाग्यैर्युतः शांभव
न्तत्पुण्यावधिरेव नेति विदितं मानैरपारैरपि ॥६७॥ पुष्पौघैर्यो यं कथमद्य दत्तो लिङ्गे महापातक नाशकोयम् ॥
नाना विधापारनव प्रसूनैरभ्यर्चितं लिङ्गमिदं मनोज्ञम् ॥६८॥ अभिनव मृगमद पूरो हरति विषाद कोटि कूटानाम् ॥

६६०

समुदायमपहर्तुमेव भर्तुः गिरिराज विशेषकन्यायाः ॥६९॥ यत्र क्वापि समर्चितं यदि महालिङ्गं तदा सर्वथा सर्वाघक्षय एव लिङ्ग
मधुना बिल्वस्य मूले यदि ॥ पुष्पाद्यैरपि पूजितं यदि तदा सायञ्जलैर्वा फलैरिष्टांभोधि समर्पणाय यतते लिङ्गाश्रितः शंकरः ॥
॥७०॥ पुण्यान्यप्यमितानि तावदधुना तत्फलायोन्मुखान्येवेति प्रमितिः किलाभवदियं पुण्यैरपारैः खलु ॥ धन्यं धन्यमि
दं शरीरमधुना धन्ये च नेत्राम्बुजे लिङ्गं दृष्टमभूत पूर्वमसकृत बिल्वादिभिः पूजितम् ॥७१॥ इति देव वचः श्रुत्वा भृङ्गी मङ्ग
लदं वचः ॥ उवाच परम प्रीत्या तान्देवान् शिव पूजकान् ॥७२॥ भृङ्ग्युवाच ॥ तदिदं कौतुकन्दृष्टं महादेव विचेष्टितम् ॥ स शंकर
स्वभावेन नाम्नापि खलु शंकरः ॥७३॥ दीनबन्धुरिति ख्यातः करुणा सागरो हरः ॥ एतदानयनायाद्य प्रेषयामास मां शिवः ॥
॥७४॥ दूयन्तु जारिणी सोपि जारजोऽपि तत्परः ॥ चकार वासमत्रापि विजने सघने वने ॥७५॥ आनीतं स्वोपभोगार्थं चन्दना
दिकमुत्तमम् ॥ ~~सुरत कलशानीतं जलमप्यतिशीतलम् ॥७८॥ तल्लिङ्गे पातयामास दृष्ट्वा मादैशान्तः परम ॥ दृष्ट्वा कृत्यं मधु~~
~~कृत्यं सर्वं समर्पितं नः~~ ॥ एतदानयने कोऽपि विलम्बः समभूत खलु ॥७६॥ एतस्यास्तद्विलम्बेन रोषः खलु महा
नभूत् ॥ तेन रोषेण सा दुष्टा भर्त्सयामास तं पतिम् ॥७७॥ ततः परं दीपमाला तदानीन्तावलोकनम् ॥ कर्तुं विरचिता र
म्या स्थूलकर्पूरदीपिता ॥७८॥ ततः सर्वं विलोक्येयं चन्दनादिकमुत्तमम् ॥ सुरत कलशानीतं जलमप्यतिशी

तलम् ॥७९॥ तल्लिङ्गे पातयामास दुग्धमादौ ततः परम् ॥ दध्याज्यं मधुमिष्टञ्च शर्करा पातिता ततः ॥८०॥ पातितञ्च जलम्
पश्चात् चन्दनञ्च मनोहरम् ॥ कर्पूरेणान्वितं रम्यं तथा मृगमदान्वितम् ॥८१॥ पातितान्यपि पुष्पाणि दिव्यानि विवि
धान्यपि ॥ दुकूला[illegible]नि मनोज्ञानि सुरत्नाभरणान्यपि ॥८२॥ पुष्पशय्यापि दत्तेयं शिवलिङ्गस्य मस्तके ॥ दिव्या
न्यन्नानि दत्तानि लिङ्गमूले तया ततः ॥८३॥ शेषेण पातिता सेयं क्षणतेव विभाति सा ॥ भक्त्यानलिङ्गमनया पूजि
तं रजनीमुखे ॥८४॥ महेश्वरः कृपासिन्धुस्तुष्टेनेनार्पितेन च ॥ चन्दनादिसमूहेन लिङ्गे तुङ्गे मनोहरे ॥ पवित्रोपि
भूत्वा द्वेषभक्त्या लिङ्गसमर्चनम् ॥ करोति विल्वपत्राद्यैस्तद्दिशः स्वपदप्रदः ॥८६॥ शिवाभिमानस्थलमेकमेवलि
ङ्गं तदुत्तुङ्गमनामर्दं वा ॥ तन्नामर्दं वाथ मिलल्लिङ्गमात्रे गृह्णाति दत्तं स शिवो जलं वा ॥८७॥ कमलान्यमलानि विल्वमा
लान्नवदूर्वाङ्कुरसंकुलां महेशः स्वकम् ॥ शिवलिङ्गनिवेदनेन गृह्णात्यमितात्पौष्पनिवारणाय शम्भुः ॥८८॥ भक्त्या विना
पि किल दत्तनवप्रसूनविल्वीदलानि सकृदादरतो गृहीत्वा ॥ मुक्तिं ददाति सुबहूनि सुखानि दत्वा लिङ्गार्चका
य गिरिशः शिवलिङ्गसङ्गः ॥८९॥ रोषेण दोषवशगेन विमोहितेन लिङ्गे निपातितमनर्घ्यमघापहारि ॥ गृह्णा
ति तावदुदकं सुखमेव लिङ्गे शङ्करस्तावदिति मे मतिरित्यवैमि ॥९०॥ शंगाराधनसाधनानि विविधानि

शिवरह०३
१८६

ह०तृ०उ०
अ०३९

न्यानीय भक्त्या मुदायो लिङ्गार्चन तत्परः। शिवस्तस्मै महेशः स्वयम्॥ दातुं वाञ्छति वाञ्छितार्थमसकृन्नादेयमस्या
स्त्यतः तत्सर्वं खलु दुर्लभं च लभते विश्वेश्वरानुग्रहात्॥८१॥ फलमपि सजलं वा शङ्करे भक्तिपुञ्जैः निहितममल
लिङ्गे खण्डबिल्वीदलं वा॥ गिरिवरसुतयायं साकमेवाशु गृह्णात्यपि पुनरपि मूर्ध्ना तद्दधाति महेशः॥८२॥ स्नेह
ङ्करोति गिरिशो निज पादपद्मपूजारतेति विरते विषयेषु बाले॥ वृद्धोपि बास स खलु षण्मुखतुल्यमेव तं तावदाशु
मनुते तनुते सुखानि॥८३॥ भजनीयो यदि मुदा तदा मृत्युञ्जयः परं भजनीयतत्समानो दयालुर्न श्रुतः श्रुतौ॥ आन
न्दयत्यसकृदादरतः पितेव दत्वा सुखानि विविधानि विपद्विनाशम्॥८४॥ कृत्वा विमुक्तिमपि तां सदयातिभक्त्या
संपूजितः सकृदुमारमणोत्र लिङ्गे॥ तस्यादेयं नास्ति लोकेषु नूनं भक्त्या तावद्बिल्वदलापि मुक्तिम्॥८५॥ दत्वापस्य
त्यादरेणानुरक्तं लिङ्गार्चायाम् लिङ्गपूजाप्रियोयम्॥ लिङ्गे सन्निहितो यथा गिरिशः तद्वन्न कुत्राप्यतो लिङ्गाराधनमेव साधनमि
दं साक्षान्निधानं परम्॥८६॥ तत्ताबद्धिनयोति काम्य सकृन्मुक्तिमप्यच्छत्यतस्तस्माद्प्याधिकं किमस्ति भुवने तन्नैव जा
नीमहे॥ लिङ्गादेव समस्तमेतदधुना जातं जगन्मण्डलम् येनाखल कोटयोऽपि जानिताः पूर्वं विधीनां गणाः॥८७॥ कि
न्नारायण कोटयो न जनितास्तत्त्वतदत्युत्तमं शांगं लिङ्गमुमासहाय निलयं मन्ये तदभ्यर्च्यते॥८८॥ मृष्टं तदेकम् शि-

वलिङ्गरूपं निधानमीशान निधान दाने॥ समर्थमेवेति मतिर्ममासीदतोऽपि लिङ्गार्चनमिष्टहेतुः॥९९॥ प्रांगं लिङ्गमनुस्म
रन् शिव शिवेत्यभ्युच्चरन् सञ्चरन् काशीनाथ पुरे विभूति कवचो रुद्राक्ष भूषाश्रयः॥ श्री विश्वेश्वरमर्चयन्नभिनवै र्बि-
ल्वीदलैः कोमलैः रुद्रस्यापि चकार नैव गणना हारः प्रवीरः खलु॥१००॥ हाराणामति दुर्लभं न भुवने दृष्टं प्रकृष्टं धनम् हार-
त्वे सति दुर्लभे तदितरत्किं दुर्लभं वा भवेत्॥ लब्धो येन विशेषतः सुरमणिः तस्यापि किं दुर्लभः काचस्तस्य न काच खण्ड
विषये वाञ्छापि तुच्छा कथम्॥१॥ हारत्वं सुरभूरुहः सुरमणिस्तत्कामधेनुः परास्तस्मादप्यधिकं न वस्तु विषये दृष्टं
श्रुतं वा सुराः॥ तत्प्राप्याशु महेश पूजनरतः प्राप्नोति साक्षाच्छिवम्॥ सम्प्राप्याशु सुखांबुधीनपि ततो हारः सतो
कोत्तरः॥२॥ इत्युक्तं तद्वचः श्रुत्वा ते सर्वे त्रिदशास्तदा॥ विस्मयं परमं चक्रुर्दृष्ट्वा तां पतितामपि॥३॥ पश्चाद्दूती समागत्य
भूति पूताञ्चकार ताम्॥ ततस्तामाह सुभगे धन्यासि वरवर्णिनी॥४॥ एहि रत्न विमानन्ते समानीतमिहाधुना
प्रेषितं गिरिशेनेन्दु विचित्रमति सुन्दरम्॥५॥ इत्युक्तं तद्वचस्तावत् तया न श्रुतमेव सा॥ गाढ निद्रा समाक्रान्ता पश्य
न्ती स्वप्नमुत्तमम्॥६॥ स्वप्ने ददर्श सा लिङ्गमुत्तुङ्गं गिरिसन्निभम्॥ दृष्ट्वा तत्पूजनोद्युक्ता सा तावा~~र्~~ दिव्यसाधनैः
॥७॥ पञ्चामृत प्रवाहाद्यै रभिषिच्य महेश्वरम्॥ पूजयामास बिल्वाद्यैः पल्लवै रति कोमलैः॥८॥ पुष्पोच्चयैरपारैश्च

शिवरह० १४०

पाटीरैः रसकर्दमैः ॥ दिव्याभरणैर्दिव्यैर्दुकूलैरपि भक्तितः ॥ ९ ॥ धूपराशिसमुत्पन्न धूमराजिभिरुत्तमैः ॥ दीपमाला समूहैश्च नैवेद्यैर्गिरिभिर्मुहुः ॥ १० ॥ चन्द्रमण्डलसंकाशैर्वितानैरपि कोटिशः ॥ रत्नच्छत्रैस्सौरैश्च ध्वजैरप्युरु चामरैः ॥ ११ ॥ नाट्यैर्गानैश्च विविधैः पूजयन्ती सदा शिवम् ॥ ददर्श शाम्भवं स्वप्ने शिवार्चन समुद्यतम् ॥ १२ ॥ स्वप्ने तामाह भगवन् कुतोद्य समुपागतम् ॥ गन्तव्यं ते क्व वा विद्वन्निह संवस संवस ॥ १३ ॥ समर्चय महादेवं साधनैर्विविधैरिह ॥ अपेक्षितञ्च देयं ते मया धनमनुत्तमम् ॥ १४ ॥ उत्तमोसि सभाग्योसि शाम्भवोसि द्विजोत्तम ॥ शांभवाय धनं देयम् ॥ मया तावदुपार्जितम् ॥ १५ ॥ दान पात्रं मया दृष्टमद्यैव सुकृतैरिह ॥ त्वत्तुल्यदानपात्रञ्च न दृष्टं भुवनत्रये ॥ १६ ॥ हाराः मनोहराः सन्ति केयूरादीनि सन्ति मे ॥ दिव्यान्याभरणान्येव रत्नानि विविधान्यपि ॥ १७ ॥ गोधनानि विचित्राणि सन्ति मे रत्नमन्दिरम् ॥ तिष्ठत्वेकं गृहाण त्वं कृतार्थास्मि यतोधुना ॥ १८ ॥ किञ्चोपदेशं कुरु मे शैवमन्त्रस्य केवलम् ॥ विचित्राः सन्तु मन्त्रास्ते तेषां कृत्यन्न मे मुने ॥ १९ ॥ शिव पञ्चाक्षरेणैव पूजनीयः सदाशिवः ॥ स एव रोचते मह्यं देयः पुण्यदिने शुभे ॥ २० ॥ सर्वपापहरत्वेन श्रुतः पञ्चाक्षरो मया ॥ अतस्त्वमेव मे देहि सर्वपापविनाशकम् ॥ २१ ॥ मन्त्रराजतया ज्ञातः शिवपञ्चाक्षरः परः ॥ तं मे

ह० तृ० अ० ३

नोपदिष्टा यद्यापि पुण्यकालोयमद्भुतः ॥ २२॥ पञ्चाक्षरोऽपि द्विविधः संहितोपनिषद्भुतः ॥ तन्मयो रोचते मन्त्रः सदेयस्तावदा

दरात् ॥ २३॥ इति तद्वचनं श्रुत्वा सोऽपि शांभव पुंगवः ॥ तामुवाच विरक्तोसौ सर्व साधन निस्पृहः ॥ २४॥ शांभव उवाच ॥ किं

धनैर्नश्वरै र्भद्रे किमेते र्मणि भूषणैः ॥ न रत्न मन्दिरेणापि कृत्यमस्ति ममाधुना ॥ २५॥ न चित्र वसनैः कृत्यं नवा गोमण्डलैरपि ॥ कि

ञ्च भूमण्डलेच्छाऽपि न मे भवति सर्वथा ॥ २६॥ न स्वर्ग लोक वाञ्छा मे सत्यलोकोन वाञ्छितः ॥ वैकुण्ठ लोक वाञ्छापि नास्ति

सर्वात्मना मम ॥ २७॥ सर्वे ते प्रलयं यान्ति महाप्रलय वह्निना ॥ उदुम्बर फलोत्पन्न मशका इव भान्ति ते ॥ २८॥ न तन्मशक

वाञ्छास्ति लोके कस्यापि सुव्रते ॥ यादृतोदुम्बर फले स्वर्गे या तुल्य धीर्मम ॥ २९॥ दुर्भगा खलु वाञ्छेति स्वर्गवासं तथा

सति ॥ तत्रापि वाञ्छा नेत्यत्र वाञ्छा तव धने कथम् ॥ ३०॥ यद्यस्ति धनमुत्कृष्टं तदा तैरधुना धनैः ॥ पूजयस्व महादेवं वि

लम्बं कुरु मा प्रिये ॥ ३१॥ पद्मपल्लवजलोपमं मनो जीवनञ्च चलमेव तच्चिरम् ॥ नाधितिष्ठति ततस्त्वमीश्वरं पूजयस्व शिव

यदेव धनमुत्कृष्टं त[illegible]त्सर्वं लिंग मस्तके ॥

लिङ्ग मस्तके ॥ ३२॥ प्रयच्छेच्छाञ्च विषये तुच्छा सा खलु सर्वथा ॥ प्रार्थनीयो महादेवः पुनः पुनरुमापते ॥ ३३॥ विष-

येच्छा विनिर्मुक्तं कुरु मामिति सादरम् ॥ विषयास्ते विषप्रायाः सर्वे त्याज्याः स्वभावतः ॥ ३४॥ विषयेच्छानुरक्तानाम्

सुखं स्वप्नेपि दुर्लभम् ॥ विहाय विषये वाञ्छां कुरु शंकर पूजनम् ॥ ३५॥ शिव पूजन सामग्री सम्पन्ना खलु ते सदा ॥ दुर्ल

भं मानुषं देहमासाद्य शिवपूजनम् ॥ ३६ ॥ यदि न क्रियते मोहात्तदा जन्म निरर्थकम् ॥ भारभूतं शरीरं स्यात्तन्नो शार्चनसाध
नम् ॥ ३७ ॥ शरीरकृत्यमेतावत्सतां शंकरपूजनम् ॥ अभाग्यै यौवनोन्मत्तैः सर्वदा मदनातुरैः ॥ ३८ ॥ नाराध्यते महादेवस्ते
यान्ति नरकं ध्रुवम् ॥ तरुणीं रमणीं दृष्ट्वा प्रहसन्ति वदन्ति च ॥ ३९ ॥ न वदन्ति महादेवं पाहि पाहीति सर्वथा ॥ बाले
मामेहि मामेहि मामे हीति वदन्ति ते ॥ ४० ॥ उन्मत्तास्ते शिवं तावन्न वदन्ति कदाचन ॥ अमूल्यानि विचित्राणि दुकूला
नि प्रिये त्वया ॥ ४१ ॥ ग्राह्याणीति वदन्त्यस्मै शंकरानर्पितान्यपि ॥ दिव्यं मृगमदोपेतं चन्दनं दातुमिच्छति ॥ ४२ ॥ वधू
भ्यो न महेशाय लिङ्गे दातुं स वाञ्छति ॥ हारानुदारानादाय युवती स्तनमण्डले ॥ ४३ ॥ ददाति न महालिङ्गे हारं दातुं स
वाञ्छति ॥ रत्नताटङ्कमानीय वनितायै प्रयच्छति ॥ ४४ ॥ न शर्वलिङ्गे दातुं वा तस्य वाञ्छा प्रजायते ॥ दिव्यगन्धफलीमा-
लां मूढो बालाङ्गलेपनम् ॥ ४५ ॥ प्रयच्छति महालिङ्गे तां न दातुं स वाञ्छति ॥ अभाग्यास्ते समुत्पन्नाः सर्वे भूभारताङ्गताः
॥ ४६ ॥ न हा रत्नमनुं प्राप्य कुर्वन्ति शिवपूजनम् ॥ शिवं वाञ्छति यो नित्यं स एव शिवपूजनम् ॥ ४७ ॥ करोति तावदन्य
स्तु न करोति शिवार्चनम् ॥ तस्मात् शिवं जन्मनि जन्मनीति मन्ये न यस्यास्ति शिवार्चनेच्छा ॥ शिवार्चनेच्छा शिवहेतुभू
ता सा तावदत्युत्तमवाञ्छिता स्यात् ॥ ४८ ॥ कल्पान्तेऽपि जहाति यो न मनसा विश्वेशलिङ्गार्चने वाञ्छा तत्पदरेणुभि

जगदिदं पूतं भवत्यन्वहम्॥ तं वंदे मुहुरादरेण विरतं संसारवार्त्तारसे कंसारातिसमर्चिताङ्घ्रिकमलध्यानादरं सन्ततम्॥४९॥ सन्तः शंकरपुङ्गवा इति मया ज्ञातास्तदाराधनादीशः पूजित एव तस्य सुकृतां शेषैः पदाम्भोरुहे॥ दृष्टेच खल यं प्रयात्यघकुलं तस्मै नमस्तं परं मन्ये शाम्भवपुंगवादपि परं किं भूतले तिष्ठति॥१५०॥ शिवं वदति यः सदा शिवमनुस्मरत्यन्वहं शिवार्चनरतः सदा शिव शिवेति वाचो वदन्॥ पुनाति भुवनत्रयं स शिव एव तं केवलं परं परमलिङ्गमित्यपि वदन्ति धन्योत्तमाः॥१५१॥ इति श्री शिवरहस्ये हराख्ये तृतीयांशे उत्तरार्धे याज्ञवल्क्यजनकसम्वादो नाम (=शाकल्य) एकत्रिंशोऽध्यायः॥३१॥ श्री काशीविश्वेश्वरार्पणमस्तु॥ याज्ञवल्क्य उवाच॥ इति तद्वचनं श्रुत्वा, चारणस्यापि भामिनी,॥ तन्मुणम्याति विनता प्राह भक्ति पुरःसरम्॥१॥ चारणाङ्गनोवाच॥ यदुक्तमधुनाविद्वंस्तत्सत्यं नात्र संशयः॥ विषयेषु नवाऽभिलाषो यावदस्य प्रजायते॥२॥ शिवपूजनमानेच्छा तावदस्य प्रजायते॥ विषये विषरूपाद्धीसंजाताय विशेषतः॥३॥ शिव एव सदा किलार्चनीयः॥ शिवदानप्रवणे महेश्वरे मे॥ मतिरद्य कथञ्चिदेवमन्तःकरणं तत्र समर्पितं मयापि॥४॥ येनान्तः करणेन शङ्करपदध्यानं क्षणं वा मुहुः॥ जातं तत्सकलार्थदाननिपुणं मन्ये तदेवाधुना॥ दत्तं शंकरपादपङ्कजरजःपुञ्जे तदप्यर्जितम् तेन क्रीडति तावतापि जननं तावत्कृतार्थं मम॥५॥ शंगार्चने शंग कृपा सुधायां शङ्केन शङ्केपि

शिवरह०३ शिवालयेपि ॥ इच्छा प्रवृत्ता कथमद्यसेयं स्थिरा भविष्यत्यधुना वदेदम् ॥ ६ ॥ शंकर उवाच ॥ धन्यासि त्वं सुभगे त्वद्य

१४८ यतो मतिः शङ्करलिङ्ग पूजायाम् ॥ कर्तुं प्रवृत्ता किमितोपि भाग्यं ततोऽधुना तां कुरु सावधानम् ॥ ७ ॥ पुरा

कश्चिदभूद्राजा हिमवद्गिरि मण्डले ॥ स सर्व भाग्य सम्पन्नः पुत्र पौत्र समन्वितः ॥ ८ ॥ तस्य कन्याभवत् धन्या कम

लामल लोचना ॥ सा तावद्बाल्यमारभ्य शिवार्चन परायणा ॥ ९ ॥ शिव गान रता नित्यं शिवव्रत परायणा ॥ कुर्वाणा

शिव कथा मेव चकार दिन यापनम् ॥ १० ॥ सा हिमालय कूटस्थं ददर्श शिव मन्दिरम् ॥ प्रासादवरमारुह्य वीणावादन

तत्परा ॥ ११ ॥ शिवालय स्थूल भृङ्गात्कश्चिद्वायुरुपागतः ॥ तेन वातेन सम्बद्धः सुगन्धोप्यागतस्ततः ॥ १२ ॥ तेन

गन्धेन हर्म्याणि सुगन्धानि क्षणात् ॥ ततः परं पुष्पमालाप्येका तावदुपागता ॥ १३ ॥ तां मालिकां विलोक्याशु

भ्रमद्भ्रमर संयुताम् ॥ विस्मयं परमं प्राप केयं कस्मादुपागता ॥ १४ ॥ भूमण्डले न दृष्टानि पुष्पाण्येतादृशानि तु ॥ एत

त्प्रसून नामापि ज्ञायते न नरैः खलु ॥ १५ ॥ सुर मन्दार पुष्पाणां किमियं मालिकाथवा ॥ लोकान्तरस्थ मन्दार पुष्पमाला

किमीदृशी ॥ १६ ॥ गन्धर्व नगरोत्पन्न पुष्पमाला किमीदृशी ॥ यद्वा किन्नर लोकस्य पुष्पमाला भविष्यति ॥ १७ ॥

नाग लोक समुत्पन्न मन्दार कुसुमोद्भवा ॥ मालिकेयमुतान्येति चिन्ताव्याकुल मानसा ॥ १८ ॥ ततो विमानमारुह्य

हे० त० ३

अ० ३

सा ययौ शिवमन्दिरम् ॥ सा तत्र मन्दिरन्दृष्ट्वा शांकरस्याति विस्मिता ॥१९॥ रत्नगोपुरसङ्कीर्णं रत्नभित्तिविराजितम् ॥ हार तोरण संयुक्तं दिव्य पुष्प समर्चितम् ॥२०॥ हारकोटि समाक्रान्तं स्तुतं वेदैरनेकधा ॥ ददर्श कन्य कान्तत्र नाट्य गान विशारदाम् ॥२१॥ सौन्दर्य्य निधिरूपान्तां प्राह बालां मनोरमाम् ॥ कासि कन्ये विशालाक्षि सम्पूर्ण नवयौवने ॥२२॥ कः पिता तव माता का क्व भर्ता तव तिष्ठति ॥ गान विद्या समभ्यस्ता कुतो वा ते गुरुश्च कः ॥२३॥ इति पृष्टा मुदा प्राह सा तां गन्धर्व कन्यका ॥ गन्धर्व कन्यकोवाच ॥ गन्धर्व नगराधीशः पिता मम स शाम्भवः ॥२४॥ स एव मे गुरुर्गानमभ्यस्तमति सुन्दरम् ॥ मम व्रतमिदन्नित्यं श्रीमहादेव पूजनम् ॥२५॥ नित्यं गन्धर्व नारीणां सर्वासामपि तद्व्रतम् ॥ पुरुषाणां विशेषेण व्रतं शंकर पूजनम् ॥२६॥ श्रीमहादेव पूजायां चित्तं मे निरतं सदा ॥ अनेन जीवनं धन्यमस्माकं शिव पूजनम् ॥२७॥ धन्यं धान्यं निधानञ्च जीवनञ्च फलं महत् ॥ इति तद्वचनं श्रुत्वा सा बाला विस्मयं गता ॥२८॥ तामुवाचाति यत्नेन गृहीत्वा पुष्पमालिकाम् ॥ एतानि कानि पुष्पाणि पुष्पनामानि किं प्रिये ॥२९॥ कुत्रास्ति वनमेतेषां तत्प्रदर्शय सादरम् ॥ इत्युक्त तद्वचः श्रुत्वा नाट्य कालोऽयमीदृशः ॥३०॥ गानस्यापीति तामाह सा तत्रोवास मन्दिरे ॥ आसायं नाट्यानि

रता सायंकाले मनोहरे ॥३१॥ स्नानार्थं निर्गतास्तत्र स्नाता गङ्गाजले शुभे ॥ ततो गन्धर्वनगरादागतान् शिवपूजका
न् ॥३२॥ दृष्ट्वा तैः सहसा प्राप दिव्यं शंकरमन्दिरम् ॥ तत्रोपचारैर्विविधैः पूजयामास शंकरम् ॥३३॥ कुबेरपारै
र्विविधैश्चन्दनाद्यैर्मनोहरैः ॥ ततो निवृत्तास्ते सर्वे पूजयित्वा महेश्वरम् ॥३४॥ सा तत्र गाननिरता न ययौ मन्दि
रं स्वकम् ॥ ततस्तद्रमणो दृष्ट्वा तामाह युवतीं मुदा ॥३५॥ एहि भद्रे स्वनगरं समाप्तमपि पूजनम् ॥ प्रदोषकालोपि
गतस्त्वरयेत्याह सादरम् ॥३६॥ सा तमाह प्रियं लज्जां त्यक्त्वा भोगरतिं तथा ॥ गन्धर्वनार्युवाच ॥ गच्छ गच्छ
यथेष्टं त्वम् यत्र कुत्रापि रोचते ॥ ममात्रैव स्थितिस्तावद्यावद्देहविसर्जनम् ॥३७॥ दुर्लभं खलु सम्प्राप्तमिदं शङ्क
रमन्दिरम् ॥३८॥ अतः परं न गन्तव्यं कुत्रापि न रतिः शुभे ॥ कालो नेयो मया सोऽयं श्रीमहादेवपूजया ॥३९॥ अलञ्जी
वन वार्ताभिर्भोग वार्ताभिरप्यलम् ॥ अपूर्वभोगो न क्वापि यो भुक्तो विषयः पुरा ॥४०॥ तत्र तावन्मे वाञ्छा नाहारे
ऽपि मतिर्मम ॥ अत्र नास्त्येव गानेन पूजया च महेश्वरः ॥४१॥ प्रापणीयो मया प्राप्तं कैलाश स्थानमुत्तमम् ॥ अपारज
नि दुःखानि विनश्यन्ति शिवार्चनात् ॥४२॥ कत्र कैलाशे तु विशेषेण श्रीमहादेवपूजया ॥ व्यर्थं जीवनमित्येवे
मि गिरिशानभ्यर्चनात्केवलम् तत्तावत्सफलं भविष्यति तदा विश्वेश्वराराधने ॥ संसारे किमसम्भूत विषये बुद्धिः

सताञ्जायते किं तच्चर्वित चर्वणैरपि चिरं वार्तारसैरप्यलम् ॥४३॥ इत्युक्ता विरता तेन वार्ताभिरपि सादरम् ॥ गाननाट्यरता नारि शिवार्चनरतापि सा ॥४४॥ तां विलोक्य प्रहृष्टा सा राजकन्या मनोरमा ॥ चकार वसतिन्तत्र शिवार्चनपरायणा ॥४५॥ रात्रौ जागरणं कृत्वा नाट्यगानपुरःसरम् ॥ अवाप परमां प्रीतिम् पश्चान्मुक्ता तया सह ॥४६॥ एवं भाग्येन सम्प्राप्य जन्म शंकरमन्दिरे ॥ पूजयित्वा महादेवं प्राप्नुवन्ति परं सुखम् ॥४७॥ अतः संसारवार्ताभिरलं कमललोचने ॥ पूजनीयो महादेवो विभवे सति साधनैः ॥४८॥ तज्जीवनं व्यर्थमिति स्मरन्ति येनेशपादाम्बुजमर्चितन्न तज्जीवनं यर्थ्वमिति धन्यमिति स्मरन्ति ॥ येनार्चितं लिङ्गमपारपुण्यैः ॥४९॥ धन्यं मन्ये जीवनं तस्य लोके यस्येशान ध्यानमेकं वरेण्यम् ॥ आशास्यं स्यादन्यदाशास्यमस्मिन् लोके नास्तीत्येव मन्ये सतान्तु ॥५०॥ विरताः सततं शान्ताः पूजयन्ति सदाशिवम् ॥ लिङ्गे बिल्वैर्जलैर्वापि फलैरपि मुहुर्मुहुः ॥५१॥ को वा शिवमनाराध्य सुखं प्राप्नोति मानवः ॥ क्षुधितो भोजनेनापि विना तृप्तोऽपि किं नरः ॥५२॥ सौभाग्यकामा अपि पूजयन्ति महेश्वरम् ॥ पापविनाशकामाः ॥ तं स्वर्गकामा अपि पूजयन्ति तं मोक्षकामा अपि पूजयन्ति ॥५३॥ स्वर्गापवर्गप्रदमेकमीशं मत्वा शिवाचाररताः प्रशान्ताः ॥ लिङ्गे महादेवमुमासहायम् समर्चयन्ति प्रमथाधिनाथम् ॥५४॥ अल्पायासेनैव संसारबन्धो विच्छिन्नः स्यादस्य देहेत्यतो लिङ्गपूजाम् ॥ कुर्वन्तीति प्राणि

६५

नः प्राप्नुवन्तः स्वाभीष्टार्थान्ते पुनः पूजयन्ति ॥५५॥ कष्टानि नश्यन्त्यखिलानि तानि येरिष्टलाभोपि न सर्वथापि ॥ महेश लिङ्गार्चनमान्नतोतः शिवार्चनेनैव सुखानि नित्यम् ॥५६॥ शिव प्रसादोऽपि शिवार्चनेन भवत्यतस्ते न हितार्थ सिद्धिः ॥ नान्येन तात्सिद्धिरिति स्मरामि नान्येन सा मुक्ति कथापि नूनम् ॥५७॥ संसार दव संक्रान्ताः प्राणिनः परितापतः ॥ शिवार्चन महा वृष्टि धारां वाञ्छन्ति सन्ततम् ॥५८॥ पापानल महाज्वालाजाल विच्छेदसाधनम् ॥ शिवार्चन रसे स्नाः पूरयन्त्यभिवाञ्छितम् ॥५९॥ संसार कष्टे दुष्टानां दुरदृष्टे मतिर्भवेत् ॥ सा मतिः सहसा तावत् न नश्यत्या शिवार्चने ॥६०॥ शिवार्चनानलेनैव कष्टराशिर्विनश्यति ॥ सा किञ्जललवैः शान्तः कदाचिदपि जायते ॥६१॥ महा प्रलय कालाग्नि स्वरूपाघ कुलक्षयः ॥ ~~शिवार्चन रसे स्नाः पूरयन्त्यभिवाञ्छितम् ॥६२॥ संसार कष्टे दुष्टानामदुरदृष्टे मतिर्भवेत् ॥ सा मतिः सहसा तावत् न नश्यत्या शिवार्चने ॥६३॥ शिवार्चनानलेनैव कष्टराशिर्विनश्यति ॥ सा किञ्जललवैः शान्ता कदाचिदपि जायते ॥६४॥ महा प्रलय कालाग्नि स्वरूपाघ कुलक्षयः ॥~~ शिवानल महावृष्टि प्रवाहैः प्रभविष्यति ॥६५॥ यावन्न संसार महाग्नि तापजावच्छिवाराधन वारिपूरः ॥ सम्पादनीयस्त्वरया न दातुं तदर्जनं किं भवतीह शक्यम् ॥६६॥ संसार दुःखदव कोटि विनाशनाय लिङ्गार्च

नांबुधि तरङ्ग परंपराणाम् ॥ सृष्टिः कृता खलु शिवेन कृपार्णवेन नान्येन तस्य विलयो भवतीति मन्ये ॥ ६० ॥ ज-
म्बूद्वीप निवासिनां खलु महद्भाग्यं शिवाराधनाद्दापत्यवत नाशने सति दुर्भाग्योदयो जायते ॥ पश्चान्मुक्तिरथोति
भाग्यमतुलं सम्प्राप्यते केवलं लिङ्गे शंकर पूजनेन तादृशं सान्निध्यं स्मृतम् ॥ ६३ ॥ नस्वर्गे ऽपि तथाविधं सुखमिति
ज्ञातं मया सर्वथा कैलासेऽपि न सर्वथा भुवि यथा लिङ्गार्चनाल्लभ्यते ॥ लिङ्गाराधन पुण्यजात जनितः कैलासवासो
यतस्तल्लिङ्गार्चनमेव तावदधुना पुण्येषु पुण्योत्तमम् ॥ ६५ ॥ इति तद्वचनं श्रुत्वा सापि सन्तुष्टमानसा ॥ शिवपूजा
रता जाता विविधैः साधनैर्मुहुः ॥ ६६ ॥ ततः प्रबोधं संप्राप गणोच्चय वचनैस्तदा ॥ समुत्थयाति चिन्तार्ता निमील्य
नयनाम्बुजे ॥ ६७ ॥ ततः परं गणै रुक्त विमानवरमुत्तमम् ॥ आरुह्य याहि सुभगे कैलाश भुवनं प्रति ॥ ६८ ॥ इतितद्व
चनं श्रुत्वा सा ताना हाति विस्मिता ॥ रोषाक्रान्तापि तेष्वाशु हिताहित पुरःसरम् ॥ ६९ ॥ चारणनार्युवाच ॥
पुण्य साधनभूतस्य शिवलिङ्गार्चनस्य यः ॥ विघ्नं करोति कातस्य गतिर्भवति तद्वद ॥ ७० ॥ इतितद्वचनं श्रुत्वा भृंगी
प्राहाति विस्मितः ॥ शिवज्ञानाङ्कुरस्येदं भूरभूदिति सादरम् ॥ ७१ ॥ भृङ्ग्युवाच ॥ सम्यक् पृष्टमिदं भद्रे भद्र
मस्तु तवाधुना ॥ शिवार्चने कथं भक्तिस्तव जाता विमुक्तिदा ॥ ७२ ॥ धन्यासि कृत कृत्यासि मान्यासि

मनुजेश्वरैः॥ अभूत पूर्वाते बुद्धिः अधुना समभूत्कथम्॥७३॥ प्रश्नोत्तरस्यश्रवणादपि पापविनाशनम्॥ भवत्येव न सन्देहो प्रश्नीयघविनाशकः॥७४॥ अत्रैवोदाहरन्तीममितिहासं पुरातनम्॥ पूर्वमत्रैवसनकश्चकाराशिवपूजनम्॥७५॥ रम्यैः सुरसरित्तोयैः उत्फुल्लैः कनकाम्बुजैः॥ चन्दनाद्यैरपारैश्च कनकैरपि निर्मलैः॥७६॥ बिल्वै द्रोणैर्जपापुष्पैः केतकी कुसुमैरपि॥ करवीरैर्रकपुष्पैर्नव दूर्वाङ्कुरैरपि॥७७॥ अर्कैर्मन्दारकुसमै देवकाञ्चन संयुतैः॥ हेमगन्धफली पुष्पैः पुन्नागैरनघैरपि॥७८॥ कर्पूरदीपमालाभिर्धूपधूमैर्मनोहरैः॥ क्षीराज्यैरपि पक्वान्नैः कदलीफल संयुतैः॥७९॥ द्राक्षारसाल संयुक्तैर्जंबुजम्बीर संयुतैः॥ अन्यैरपि फलैर्युक्तैः पूजयामासशंकरम्॥८०॥ शिवार्चनप्रभावेण सकम्पमवनीतलम्॥ शिवार्चन तपो मूर्त्तिः किंकर्तुमभिवाञ्छति॥८१॥ दुर्दंपरं तपसस्तस्मात्किं वाञ्छति तत्फलम्॥ इति देवाश्च संक्षुब्धाः किमयं वाञ्छतीत्यपि॥८२॥ विचारेण परं भ्रान्ताः सुरा अपि परस्परम्॥ गन्धर्वाः किन्नराभ्रान्ताः चारणाः कमलानने॥८३॥ किंवा पदं वाञ्छति सोयमीशं लिङ्गे समभ्यर्च्य विशेषतो वा॥ वैकुण्ठवासादि पदाभिवाञ्छा न तस्यलिङ्गार्चन तत्परस्य॥८४॥ यतो पितुच्छत्व मतिः प्रभूता वैकुण्ठ लोकेपि विशेषतास्तु॥ स्वर्गादिलोकस्यन तस्य

678

वाञ्छा निदान भूतस्य स्वसंसृतेश्च ॥८५॥ एवं शिवाराधन तत्परोऽसौ तदर्थमेकं कथमिन्दुमौलिः। संपूजितः स्यात्किमभीप्सि
तं वा तस्यास्ति न ह्यायत एव सत्यम् ॥८६॥ अहर्निशं लिङ्गसमर्चनेन नयत्ययं कालमतः परं वा ॥ न जायते तद्विरतिः प्रकृ
ष्टा सा लिङ्गपूजा सकलार्थहेतुः ॥८७॥ इति सर्वे विचार्यादौ रंभामूचुः परस्परम् ॥ तत्पूजायां त्वया विघ्नः कर्तव्य इति
सादरम् ॥८८॥ इत्याकर्ण्य वचस्तेषां रम्भापि भयविह्वला ॥ तानुवाचातियत्नेन कृताञ्जलिपुटा तदा ॥८९॥ रम्भोवाच
तपोनिधिस्तत्र शिवार्चनेन कालं नयत्येव जितेन्द्रियोऽपि ॥ नाविघ्नमाचाचरणे प्रवृत्तिः कथं मम स्यादिति खिन्नचित्ता
॥९०॥ यामिनीवासरस्त(स्य) शिवार्चनरतस्य च ॥ कथं प्रत्यूहलेशोऽपि प्रसरिष्यति वस्तुतः ॥९१॥ तत्र प्रत्यूहकरणेन मनो
पि प्रवर्तते ॥ स्वारस्येन ततस्तन्न कथं विघ्नो भविष्यति ॥९२॥ यः शिवार्चनविघ्नार्थं यतते मोहतस्तदा ॥ प्रवृत्तस्यैव विघ्नस्य
प्रत्युतास्याप कारकः ॥९३॥ शिवार्चनेनाशुविताघ(कोटि)र्यस्तत्र विघ्नावसरोऽपि को वा ॥ सूर्योदयानन्तरमन्धकारः ॥ किं ले
शतो वा भवति प्रसक्तः ॥९४॥ महाघशैलक्षयहेतुभूतः शिवार्चनाकारपविः स विघ्नात् ॥ तृणस्वरूपान्न पहर्तुमाशुके
यन्न शक्तोऽवदत्ताद्विचार्य ॥९५॥ अस्माकं [illegible] भाग्यहीनानां सर्वदा शिवपूजने ॥ न बुद्धिस्तादृशं भाग्यं बहु[illegible]
पुण्यफलं खलु ॥९६॥ [illegible] यः शिवार्चनविघ्नार्थं मोहाद्यत्नं करिष्यति ॥ स तत्फलमवाप्याघु किं जानाति विशेषतः

॥९७॥ यः शंकराराधन विघ्नहेतुः तज्जीवनं व्यर्थमिति स्मरामि ॥ स एव तावन्नरके निवासं करोति कल्पावधि सर्वथापि ॥९८॥
मुदा शिवार्चकान्दृष्ट्वा येन मान्ति प्रयत्नतः ॥ ते पियामि शिवं गतं तैः सहैव शिवार्चकैः ॥९९॥ शिवार्चकः किला
पापातकानलएव सः ॥ विघ्नतूलांश्च भाम्भस्य साकिन्नेव यिना शकः ॥१००॥ पूज्या पूजनीयोपि वन्द्योपि मा
न्योपि शिवपूजकः ॥ तद्विघ्नाचरणेनैव कृतं स्यात्पातकार्जनम् ॥१॥ अहो दुर्बुद्धिरुत्पन्ना तद्विघ्नायातिमोहतः ॥ पापं
तादृशबुद्ध्यापि समुत्पन्नं न संशयः ॥२॥ देवत्वमेतद्व्रततां वृथास्या तद्विघ्नहेतुत्व विचारणेन ॥ कोवा विषं वाञ्छ
ति जीवनेच्छां कर्तुं प्रवृत्तोपि न राक्षमोपि ॥३॥ इति तद्वचनं श्रुत्वा रम्भामूचुः दिवौकसः ॥ सत्यमुक्तं त्वयाद्यापि
तद्विघ्नो हृदि चिन्त्यते ॥४॥ शिवार्चनाकारतजः प्रभावः प्रकम्पयत्येव सुरान् तरस्त्वम् ॥ तद्विघ्नमुत्पादयतावतानः स्व
स्तं मनः स्यात्खलु नान्यथा तु ॥५॥ इत्युक्तं तद्वचः श्रुत्वा भावि भावीति निश्चयात् ॥ सा ययौ तत्र यत्रास्ति स महादे
वपूजकः ॥६॥ सा तत्र गत्वा स्वविलास हेतून्सम्पाद्य तेनापि विलोकितापि ॥ ततः तदन्तः करणं सकोपं जातं सचिन्ता
कुलचित्तवृत्तिः ॥७॥ स्थिरं मम मनः कथं सपदि चञ्चलं जायते ॥ शिवार्चनरतिर्न मे किमिदमद्भुतं दृश्यते ॥८॥
अपूर्वमिदमीदृशं भवति नानुभूतं पुरा किमेतदिति चिन्तया विगतविभ्रमा पार्वनः ॥९॥ ततः परं समुत्पन्ना कापि

वाग शरीरिणी ॥ सा श्रुतारम्भया वाणी तया विस्मयमागता ॥ १० ॥ अयञ्जितेन्द्रियो रम्भे स्त्री रूपस्तोन सर्वथा ॥ अत्रप्रव
त्ति र्विफला केवलं पापसाधनम् ॥ ११९ ॥ संसार वासना यस्य तस्य नारीविलोकने ॥ प्रीतिः स्यादेव सहसा न प्रीति
स्त्वयि वस्तुतः ॥ १२ ॥ शिलानारीं दृष्ट्वा यदि भवति बुद्धिः कलुषिता तदा तावद्रूपं भवति तव दृश्यं यदि नसा ॥ तदा किन्ते
कृत्यं भ्रममपि विहायात्र तरसा न तस्य स्वर्गेच्छा भवति खलु याहि स्वभवनम् ॥ १३ ॥ प्रस्तरो यदि तवावलोकनात्प्रीतिमा
भवति तर्हि तन्मनः ॥ त्वय्यपि प्रसरतीति मे मतिः कान्तवापि रमणीयता वद ॥ १४ ॥ स्थूलोपलालोकनतः सुखञ्चेत्त
दा त्वदालोकनतः सुखं स्यात् ॥ कुचेपि तस्योपल बुद्धिरेव स वस्तु र्तुल्य प्रस्तर इत्यवैमि ॥ १५ ॥ संसारिणामेव हि बुद्धि
रिष्टा नारीषु संसार विरक्त चित्ताः ॥ नारीपरं प्रस्तरमेव मत्वा तिष्ठन्ति विश्वे श्वरसक्त चित्ताः ॥ १६ ॥ न लोहितं तस्य तथा श
रीरेन मांस मज्जादिक वासनापि ॥ ततः कथं वा त्वयि चित्तमस्य यदानुरक्तं विरतं विशिष्य ॥ १७ ॥ तद्देहचेष्टाकर
णाय चित्तं यदि प्रवृत्तं तव मोहतः स्यात् ॥ तदा स शापेन विनाशमेव करिष्यतीति प्रमिति र्ममासीत् ॥ १८ ॥ नायं ब्रह्मा ना
पि नारायणो सा विन्द्रश्चन्द्रो भानुरग्निर्यमो वा ॥ वायुर्नायं किन्तु शैवाग्रगण्यो नार्या भस्य प्रस्तरे वा समाधीः ॥ १९ ॥
भीतै र्देवगणैस्त्वमस्य तपसा संप्रेषिता किन्नतो भीतिर्मास्तु न तत्पदेषु सहसा वाञ्छां करोत्येव न ॥ तुच्छत्वेनाविनि

६२

ञ्चितादिति मतिं कृत्वा प्रयाहि प्रियेतस्येष्टं । शिवपादपद्मभजनं कल्पायसानेष्वपि ॥२०॥ इति तद्वचनं श्रुत्वा साऽम्भापितवो
गता ॥ तद्विघ्नाचरणे पापं भवतीत्यपि निश्चयात् ॥२१॥ पुरा तु बहुभिर्भीतैः शिवार्चनविघातकैः ॥ सम्प्राप्तो नरकावासस्तै
=वीरगणी ~भृंगिगणं
तेनैवातिदुःखिताः ॥२२॥ इति तद्वचनं श्रुत्वा सा तमाह गणेश्वरम् ॥ अयमर्थस्त्वया ज्ञातः सर्वत्र त्वाभिमानतः ॥२३॥ अहञ्च
शिवपूजार्थं स्वप्ने खलु समुद्यता ॥ तद्विघ्नः किं कृतो ज्ञात्वा कथं वा ते भ्रमो भवेत् ॥२४॥ स्वप्ने भ्रमे जागरणे वापि । शिवलि
ङ्गार्चनं समम् ॥ तद्दर्शनेन यत्पुण्यं तत्तुल्यमुभयोरपि ॥२५॥ येनानन्देन पूजायां प्रवृत्ता लिङ्गमस्तके ॥ तद्विघ्नाचरणे पा
पं कथन्तेन भविष्यति ॥२६॥ शिवपूजनसामग्र्यास्स्वप्ने सा कथं मया ॥ प्राप्तव्या तादृशं भाग्यं न कृतं खलु सर्वथा ॥२७
तादृशं लिङ्गमुत्कृष्टं स्वप्ने दृष्टं तदा मया ॥ तल्लिङ्गसदृशं लिङ्गं नास्ति ब्रह्माण्डमण्डले ॥२८॥ नक्षत्रलोके तल्लिङ्गं
शरच्चन्द्रसमं खलु ॥ तादृशान्तत्र वा लिङ्गं क्वेदं ब्रह्माण्डमण्डले ॥२९॥ प्रलयानलसंकाशा दीपमालापि कुत्र
सा ॥ पुष्पोच्चयाश्च ते कुत्र पुष्पमाला समुच्चयाः ॥३०॥ कुत्रोपहारगिरयः तादृशास्सन्ति तान्वद ॥ क्वतान्याभरणा
न्यंबरचन्दनादीनि तानि वा ॥३१॥ कलवादिगन्तविश्रान्ते दुकूलान्यपि कोटिशः ॥ पञ्चामृतप्रवाहाश्च तादृ
शास्सन्ति कुत्र वा ॥३२॥ पुष्पवृष्टिश्च सा कुत्र पुनः पुनरनश्वरा ॥ ब्रह्माण्डमण्डलव्याप्तरत्नछत्राणि कुत्र वा ॥३३॥

~~पुण्यराशिश्च साकुत्र पुनः पुनरनश्वरम् ॥ ब्रह्माण्डमण्डलव्याप्त रत्नकृत्याणि कुत्र वा ॥३३॥~~ ईदृशं परमं भाग्यं दृष्ट्वा हृष्टास्मि सादरम् ॥ तद्भागस्यापि हरणं कृतमेवं त्वया वद ॥३४॥ मूढचेष्टा समाना ते चेष्टापि खलु सर्वथा ॥ तदानन्द विनाशाय प्रवृत्तिस्ते कथं वद ॥३५॥ हा हताहमधुना गतजीवा हा कथं धनमिदं गतमेवम् ॥ हा कथन्न करुणा गिरिशस्येत्थम् दुष्कृतकृत्ता तववृत्तिः ॥३६॥ न यमोपि करोति लिङ्ग पूजा जनितानन्द विघातमीदृशस्त्वम् ॥ सुखभूर विनाशको यमेनाप्यधुना नेय इतिस्व पापशान्त्यै ॥३७॥ कृतपाप विनाशहेतुभूता यमलोकस्थितिरेव तेन नूनम् ॥ तव यातनया विना न मुक्तिः खलु पापस्य शिवार्च नापराद् ॥३८॥ हा हा हताहं हृतपुण्यराशिस्तत्पुण्यराशिश्च कुतो मम स्यात् ॥ इत्युच्यके वीचमुदीर्य्य सैव पपात लिङ्गाङ्गण दत्तदेहा ॥३९॥ तां दृष्ट्वा शोकसन्तप्तां पतितामवनीतले ॥ ते सर्वे विस्मयं प्राप्ताः किमासीदिति सत्वरम् ॥४०॥ महेशकृपया सेयं शिवभक्ति परायणा ॥ जन्मान्तरार्जितं पुण्यं तस्याः खलु महत्तरम् ॥४१॥ अपारैः पुण्यगिरिभिः भक्तिरेवं प्रजायते ॥ तत्पुण्य परिपाकोऽपि भक्ति रूपेण वर्धते ॥४२॥ कानि पुण्यानि चीर्णानि पुरा तेषां फलं कथम् ॥ भक्तिरूपं समासाद्य सम्पन्नमधुना नवम् ॥४३॥ ईदृशी भक्तिरेतस्याः शङ्करानुग्रहात्परम् ॥ समुत्पन्ना न सन्देहः सर्वपापविनाशिनी ॥४४॥ दुर्लभा भक्तिरस्माकं मोदृशी खलु सर्वथा ॥ त्यक्त्वा विषयवाञ्छा सा भक्तिमाप कथं शिवे ॥४५॥ आशास्यभक्ति

शिवरह० रस्माकमीदृशी खलु सर्वथा दुर्लभा खलु ॥ वाञ्छ्यापि न तत्प्राप्तिर्मुनीनामपि दुर्लभा ॥ ४६ ॥ तपो घोरतरंतप्तं वनेषु मुनिपुङ्गवैः ॥ तथापि तादृशी भक्तिर्न प्राप्ता तत्तपस्यया ॥ ४७ ॥ अपाराण्यपि दानानि कृतानि जगतीतले भूपालैस्तादृशी भक्तिर्न प्राप्ता शंकरे खलु ॥ ४८ ॥ गोकुलानां प्रदानैर्वा तादृशी भक्तिरीश्वरे ॥ न भवत्येव सहसा शंकरानुग्रहं विना ॥ ४९ ॥ रत्नाभरणदानैर्वा तादृशी भक्तिरीश्वरे ॥ न भवत्येव सहसा शंकरानुग्रहं विना ॥ ५० ॥ दुकूलगिरिदानैर्वा तादृशी भक्तिरीश्वरे ॥ न भवत्येव सहसा शङ्करानुग्रहं विना ॥ ५१ ॥ घृतकम्बलदानैर्वा तादृशी भक्तिरीश्वरे ॥ न भवत्येव सहसा शंकरानुग्रहं विना ॥ ५२ ॥ रत्नराशिप्रदानैर्वा तादृशी० ॥ न भवत्येव सहसा० ॥ ५३ ॥ तुलाकोटिप्रदानैर्वा तादृशी भक्तिरीश्वरे ॥ न भवत्येव सहसा० ॥ ५४ ॥ दिव्यचन्दनदानैर्वा तादृशी भक्ति० ॥ न भवत्येव सहसा० ॥ ५५ ॥ कर्पूरराशिदानैर्वा तादृशी भक्ति० ॥ न भवत्येव सहसा० ॥ ५६ ॥ कन्याकोटिप्रदानैर्वा तादृशी भक्ति० ॥ न भवत्येव सहसा० ॥ ५७ ॥ गजकोटिप्रदानैर्वा तादृशी भक्ति० ॥ न भवत्येव सहसा० ॥ ५८ ॥ वाजिकोटिप्रदानैर्वा तादृशी० न भवत्येव सहसा० ॥ ५९ ॥ अन्नराशिप्रदानैर्वा तादृशी० ॥ न भवत्येव सहसा० ॥ ६० ॥ केन स्वरूपेण महेश्वरोऽपि भक्ताघनाशाय करोति यत्नम् ॥ केनापि न ज्ञायत एव नूनं तज्ज्ञानमभ्यस्य पुण्यहेतुः ॥ ६१ ॥ धन्याः कृतार्था

श्च शिवार्चनेन भवन्ति मुक्ताश्च महाघ बन्धात् ॥ संसार बन्धोपि सुनाशमेति महेशलिङ्गार्चन पुण्य लेशात् ॥ ६२ ॥ धर्मास्तु

संत्येव सहस्रशोपि किन्तैः फलं शंकर पूजनेन ॥ यथाङ्ग चेत्तत्तु समाप्यनल्पं न पुण्यमित्यस्ति मतिस्वभावात् ॥ ६३ ॥ अहोमह

द्भाग्य फल प्रदानैः समर्थमेतद्गिरिशार्चनं हि ॥ दृष्टं कथं पुण्य महाब्धि पूरैः येनाभविष्यत्यपि दुर्लभत्वात् ॥ ६४ ॥ एतल्लिङ्ग

विलोकनेन बहुधा नष्टेषु पापेष्वियं तल्लिङ्गे बहुपुण्यराशिरधुनाक्षिप्तस्ततः शंकरः ॥ सन्तुष्टो गिरिशस्वभावतइति ज्ञेयः स

लिङ्गार्चनात्प्रीतः स्यादिति तस्य दिव्य महिमा ज्ञेयं कथं मादृशैः ॥ ६५ ॥ अस्माभिरपि पुण्येन दृष्टं लिङ्गमिदं शुभम् ॥ दास्यत्येव न

सन्देहः शुभलिङ्गमिदं यतः ॥ ६६ ॥ शुभ प्रदानोद्यतमेव लिङ्गं शाङ्गं न तुङ्गं किमिदं प्रकृष्टम् ॥ समर्चितं दृष्टम घौघनाशो वृतः

परं कौतुक राशि हेतुः ॥ ६७ ॥ अङ्कुर संसार महाघ पाशं विनाशहेतुः शिव लिङ्ग पूजा ॥ दृष्ट्वा प्रहृष्टश्च मनो निरस्तः कष्टाम्बुराशिः

स च पापराशिः ॥ ६८ ॥ प्रेरितास्मः कथं वाद्य महेशेन महात्मना ॥ एतल्लिङ्गं दृष्टमेव प्रकृष्टाघविनाशकम् ॥ ६९ ॥ अस्मत्पु

ण्य महाम्बुधिश्च परधे विश्वेश्वरानुग्रहाल्लिङ्गं दृष्टमिदं वनेपि वनजैरभ्यर्चितं पुण्यतः ॥ एतस्मादधिको न लाभइति

मे तावत्प्रकर्तुं मनः ॥ संसारेपि नवा[illegible] धुना भवति नो लिङ्गार्चनालोकनात् ॥ ७० ॥ नारीणामपि बुद्धिरद्भुततमा लि

ङ्गार्चनाद्(लोकना)स्तापारतापि वानरगुणो नष्टेपि तुष्टः शिवः ॥ तत्कष्टं विलयं गतं किमधुना लिङ्गं वने दृश्यते कर्पूरागुरु चन्दनादि

679

बिलसङ्कुथान्वितं शर्मदम् ॥ ७१ ॥ अस्माभिः शिवलिङ्गमूर्तिरधुना विश्वेश्वरो दृश्यते काशी क्षाप्तिरनेन तावदधुना सम्भावि
तास्सर्वथा ॥ ७२ ॥ वीरैश्वैनव बिल्वपल्लव युते गङ्गाजलैरर्चितस्तत्पुण्येन किलेदृशं शिवमहाधिष्ठानमालोकितम् ॥ ७३
शिवरहस्ये हराख्ये तृतीयांशे उत्तरार्धे जनकयाज्ञवल्क्यसम्वादे नाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ श्रीकाशी
विश्वेश्वरार्पणमस्तु ॥ याज्ञवल्क्य उवाच ॥ इति ते तावदुक्त्वापि गणास्मिन्दृश्य संयुताः ॥ अतः परं विधेयं वा कि
मन्तेत्याति विस्मिताः ॥ २ ॥ अस्मद्वाक्याच्च संबद्धान स्मानेव चकार सा ॥ अतः परं किमस्माभिः कर्तव्यन्तन्न विद्महे ॥ ३ ॥ कथं
वा शंकराज्ञायाः कर्तव्यं परिपालनम् ॥ एतां नेतुं वयं तावदशक्ताः कुण्ठिता गतिः ॥ ३ ॥ कदाप्यकुण्ठिता शक्तिः कथमद्याति
कुण्ठिता ॥ किमुत्तरं परं देयमुमाकान्ताय सत्वरम् ॥ ४ ॥ कथनं कृतकार्याणाम् अवश्यं प्रभुसन्निधौ ॥ सा सोढव्या कथन्त
न्ननन्दिकेशादिसन्निधौ ॥ ५ ॥ शिवाज्ञोल्लंघनादेव पापं तावदुपागतम् ॥ तदुल्लंघनमात्रेण शंकरः कुपितो भवेत् ॥ ६ ॥
कुपिते शंकरे तस्य कोपज्वालाकुलं जगत् ॥ कथा कुत्र्यं भवत्येवाद्य कर्तव्यमतः परम् ॥ ७ ॥ अत्युग्रशासनः शम्भुर्यस्मादुग्र
इति स्मृतः ॥ उग्रोग्रभालज्वलनाज्ज्वालामालाकुलं जगत् ॥ ८ ॥ कोपितत्कोपज्वालाशामको नास्त्यतः परम् ॥ किम
कर्तव्यं कुत्र गन्तव्यं गमने वा कुतः सुखम् ॥ ९ ॥ न शरण्योऽस्ति लोकेषु कुपिते श्री महेश्वरे ॥ तत्कोपानलसन्दग्धं ब्रह्मा

ण्डुमखिलं पुरा ॥१०॥ ब्रह्माण्ड मण्डलन्दग्ध्वा लीलया स महेश्वरः ॥ क्रीडाङ्करोति शिवया कैलाशमणि मण्डपे ॥११॥ नायाति सहसा
कोपः शङ्करस्य कृपाम्बुधेः ॥ आयाति चेत्कोपः स्याद्ब्रह्माण्ड दहन क्षमः ॥१२॥ दग्धान्यनेक शतानि ब्रह्माण्डान्यमितान्यपि ॥ अपार
नारायण नाशकोऽयमपार वाणीपति नाशकोयम् ॥१३॥ अपार चन्द्रेन्द्र विनाशकोयम् मृत्युञ्जयो मृत्यु विनाशकोऽयम् ॥ कल्याणरूपो
यमुमा सहायः कल्याणदाता करुणा करोऽयम् ॥१४॥ यद्यदैवात्कुपि तस्तदानीं न कोपि संरक्षक इत्यवैमि ॥ नारायणाद्यमर कोटि विनाश
की भूयत्कोपजानल कणोपि सदेव देवः ॥१५॥ अस्माकमद्य सुमुखः स भवेत्कथं वा स्वोत्कृष्ट कार्य विलये सति चन्द्रचूडः ॥ अस्माक
न्दुरदृष्टमेतदधुना जातं किमेवा मया गन्तुं सत्वरमेव हस्तनिहता साप्युत्थिता कोपतः ॥१६॥ तत्कोपादपि पापमर्जितमिदं तत्तुङ्ग लिङ्ग
चैनं स्वप्ने कर्तुमिहोद्यता पुनरपि क्रुद्धा निरुद्धा न सा ॥ ततः परं स पुनः स्वप्ने साददर्श शिवार्चकम् ॥ तमाहसा शिवरतं प्रणम्य विन-
यान्विता ॥१७॥ चार्विण्युवाच ॥ स्वामिनद्याधुना दृष्टं स्वप्ने शंकर मन्दिरम् ॥ तत्र लिङ्गं मया दृष्टं पूजितं तदनन्तरम् ॥१८॥ मया
पि पूजितं लिङ्गं पुष्पाद्यैश्च मनोहरैः ॥ नर्तनं च कृतन्तत्र शिवलिङ्गाग्रगे मया ॥१९॥ तदानीं युवती कापि दृष्टा नर्तन लालसा ॥
सखीसमूह संयुक्ता नानाभरण भूषिता ॥२०॥ तदानीमागतस्तत्र तद्भर्त्ता मदनातुरः ॥ तामाह युवतीं सोपि धृत्वा उत्तरमादरात् ॥२१॥
एहि भद्रे गृहं रम्ये हर्म्ये पुष्प विराजिते ॥ विलाससदने स्थित्वा रात्रिर्नेया यथा सुखम् ॥२२॥ इति तद्वचनं श्रुत्वा रमणी रमणं प्र

◼ति ॥ याहि याहीत्युदासीन वचनैराह सत्वरम् ॥ २३ ॥ उदासीन वचः श्रुत्वा स युवा मदनातुरः ॥ बलादारोप्य गोयाने ययौ स्व नगर
म्प्रति ॥ २४ ॥ ततस्तन्नगरे दृष्टं तया शंकरमन्दिरम् ॥ ततस्तमाह सा बाला भर्तारं मदनातुरम् ॥ २५ ॥ दृष्टे शिवालये तत्र कर्तव्यं लिङ्गपूज
नम् ॥ दृढं व्रतं मया बाल्ये स्वीकृतं गुर्वनुज्ञया ॥ २६ ॥ एतद्व्रतं परित्यागे प्राण हानिर्भविष्यति ॥ मर्तव्यं वा मया तत्र न त्याज्यं लिंग
पूजनम् ॥ २७ ॥ प्राण प्रयाण समये प्राप्तेऽपि शिव पूजनम् ॥ न त्याज्यमिति मे भक्तिर्जाता बाल्यावधि प्रिया ॥ २८ ॥ तद्विघ्नाचर
णोद्योगस्त्वया यदि कृतस्तदा ॥ तवापि नरकावासो भविष्यति न संशयः ॥ २९ ॥ शिव लिङ्गार्चने भक्तिः न भाग्येन विना ततः ॥
उत्पन्नापि शिवे भक्तिः विघ्निता दुरदृष्टतः ॥ ३० ॥ संसार रूप विघ्नोऽयं स तावदनुवर्तते ॥ तत्रापि मध्ये विघ्नोऽयं भर्तृरूपः
समागतः ॥ ३१ ॥ काल भेदपरिज्ञानं न ते मदन विह्वल ॥ शिवार्चनस्य कालोऽयमस्तं याति दिवाकरः ॥ ३२ ॥ धिग्धिग्यौवनमेत
त्ते धिगिच्छां युवतीजने ॥ गच्छ गच्छ दुराचार मन्दिरं प्रति सत्वरम् ॥ ३३ ॥ बलान्मां नेतुमधुना यदीच्छसि तदा यदि ॥ हानिः संभ
वितो दृष्टो दृष्टोप्याशु भविष्यति ॥ ३४ ॥ यदि ते मन्मथावेशस्तदा तां गर्दभीं मृताम् ॥ अनुयाहि रतिं तत्र कुरु तावद्यथेच्छ
या ॥ ३५ ॥ संसार विरतां नारीं मृतामिव विलोकय ॥ सुरतार्थे यतस्तस्याः सुरते न मतिर्मता ॥ ३६ ॥ मूढास्तत्त्वं न जानन्ति
विरतिश्च न जायते ॥ शंकरानुग्रहाभावान्महादेव पराङ्मुखाः ॥ ३७ ॥ शंकरानुग्रहे वृत्ते संसाराद्विरतिर्भवेत् ॥ तदभावे

रतिस्तत्र कल्पान्तेऽपि न शाम्यति ॥ ३८ ॥ वार्ताभिरल्पमेवालं सायङ्कालः प्रजायते ॥ इति तद्वचनं श्रुत्वा सूतं याहीति त्युवाच सः ॥

॥ ३९ ॥ ततः स ताडयामास हुंकारैः कशया वृषान् ॥ तेन प्रचलिता एव बहुधा ताडिता अपि ॥ रथो विभग्नः स तदा तद्भर्ता व्याकुलस्त-

दा ॥ ततः प्रविष्टा त्वरया सा बाला शिवमन्दिरम् ॥ ४१ ॥ युवतीं चलितां दृष्ट्वाप्यनुगन्तुं समीद्यतः ॥ दण्डरुद्धश्चातीव क्रुद्धोऽभूत्स्त-

तिवन्धुतः ॥ ४२ ॥ ततः सा सरसि स्नात्वा शिवालयगता मुदा ॥ उद्धूल्य भस्मनाङ्गानि धृतरुद्राक्षभूषणा ॥ ४३ ॥ दुकूलवसनादिभ्यै-

र्हरेरेव महेश्वरम् ॥ पूजयामास सा भक्त्या भस्मना च यथाविधि ॥ ४४ ॥ ततः सस्मार सा बाला पूजाद्रव्यमनुत्तमम् ॥ तदा श्राप्याति

दुःखेन प्राह वाचं मनोरमाम् ॥ ४५ ॥ अहो गौरीपते शम्भो पूजासाधनमुत्तमम् ॥ नप्राप्तमीदृशं भाग्यं दुर्भगायाः कथं प्रभो ॥ ४६ ॥ क्षी-

रैरपारैर्घृतसंयुतैस्तैः लिङ्गं न सिक्तं मधुना च दध्ना ॥ न शर्करापर्वतराशिनीरैरिहाभिषिक्तं तव लिङ्गमद्य ॥ ४७ ॥ पुष्पैरनेकैर्घृत-

सारयुक्तैः पाटीरसारैरपि नार्चनं ते ॥ लिङ्गं न धूपोद्भवधूमपंक्त्या कर्पूरदीपैः प्रभयापि शंभो ॥ ४८ ॥ दूर्वाङ्कुरैर्वा न समर्चि-

तं [illegible]तो लिङ्गं न बिल्वैरपि पूजितञ्च ॥ अतः परं हारसमर्पणेन प्रीतो भवाद्याशु कृपानिधान ॥ ४९ ॥ नानोपहारैश्च मधुरैश्च

पक्वैः फलैश्च नाभ्यर्चितमेव लिङ्गम् ॥ दुःखं तवेदं भयभङ्गहेतुः संसारभङ्गः कथमद्य नास्यात् ॥ ५० ॥ संसारभङ्गाय शिवार्च-

नानि कुर्वन्ति सन्तः सततं महेश ॥ ददा[illegible]ति मुक्तिं ददतः कृपाब्धेः ॥ सत्यं महामोहविनाशकोपि ॥ ५१ ॥ मोहेन संसाररति

शिवरह॰
१५८

श्राय

स्ततः स्यात् ततश्च भूयो नरकादि भोगः ॥ ततश्च तन्नाश्रय मोहमाद्यै मोहान्धकारार्के सह भ्रमूर्त्ते ॥५२॥ आर्त्तिर्नश्यतुमुपै
ति शंग कृपया लिङ्गार्चने सन्ततम् ॥ लिङ्गाराधनमेव तावदधुना कर्तव्य मित्येव धीः ॥ जाता सा कृपया तवैव बहुधा बुद्धि
म्नयातु प्रभो तद्वद्भ्यापरमिन्दु शेखर न सं सारे रति र्जायते ॥५३॥ इति स्तुत्वा महादेवं प्रणतापि पुनः पुनः ॥ न सन्तुष्टा
(=गन्धर्वः-अ.३१/२८)
शिवार्चायाम प्राप्ते साधने सति ॥५४॥ तदानीमागतः कोपि किन्नरः शंकरार्चकः ॥ शिवार्चनस्य सामग्रीं गृहीत्वा विवि
धामपि ॥५५॥ तमुद्धूलित सर्वांगं रुद्राक्षाभरणान्वितम् ॥ तमागतं समालोक्य दृष्टा शांभव दर्शनात् ॥५६॥ ततस्तत्र समा
गत्य लिङ्ग पूजां चकार सः ॥ पञ्चामृताद्यै रुत्कृष्टै श्चन्दनैः कुसुमै रपि ॥५७॥ उपहारादिकैः सम्यक् पूजयित्वा महेश्वर
[illegible] म् ॥ ननर्त नाट्य निपुणः शिव लिङ्गांगणे स्थितः ॥५८॥ ततः परं गान लोलो गानैः प्रीतं महेश्वरम् ॥ चकार गानवि
द्यायास्तदर्थाभ्यसनादपि ॥५९॥ ततः परं तमालोक्य बाला पूजित शंकरम् ॥ एतादृशं कथं भाग्यमिति चिन्ता समाकुला
॥६०॥ तदानीं व्याकुलां बालां स दृष्ट्वा किन्नरस्ततः ॥ तामाह विनयेनैव किमम्बा व्याकुलेत्यपि ॥६१॥ खिन्नासि किमिह
म्ब त्वं सर्व खेद हरो हरः ॥ नाराधितः किं खेदस्य वार्त्तामपि परित्यज ॥६२॥ संसार दुःख हरमीश्वरमाशु दृष्ट्वा लिंगञ्च
साय मसकृन्नव बिल्व पत्रैः ॥ पुष्पैश्च गन्ध सहितैश्च समर्चयित्वा मुक्तो भवत्यसकृदेव सकृद्विलोक्य ॥६३॥ संसारा

ह॰त॰उ॰
अ॰ ३५

णेव शोषकं खलु महादेवार्चनम् मेनिरे धन्याः सन्तताभिन्दुशेखरपदांभोजार्चनात्यादराः ॥ तल्लिङ्गानवलोकने सति भवेद्दुः
खं नदालोकने तद्वार्तानसर्वथेति विदितं तल्लिङ्गमालोकय ॥ ६४ ॥ शिवलिङ्गविलोकने रतिर्यदि जाता बहुपुण्यवर्त्ततैः ॥
अमितं सुखमश्नुते सदा न च संसाररतिश्च सर्वथा ॥ ६५ ॥ शरीरमासाद्य शिवार्चने चेत्करोति बुद्धिं विबुधः स्वसिद्धिम् ॥
प्राप्नोति तत्रापि न संशयोऽत्र मुक्तो भवत्येव शरीरपाते ॥ ६६ ॥ जीवन्मुक्ताः शंकराराधकास्ते तेषां दुःखं स्वप्नकालेऽपि नातः
दुःखान्तं ते प्राप्नुवन्त्येव नूनं वार्ता तावत्तेन कुर्वन्ति दुःखे ॥ शंकरे वसति दुःखनाशके शांकरस्य कथमीदृशं वद ॥ दौर्मन
स्यमपि शंकरो यतो नाशयत्यखिलदुःखसागरम् ॥ ६८ ॥ तावद्दुःखपरंपरातिमहती संभाविता सर्वथा यावच्छंकरलिङ्गपूजन
रतिर्नो दृढा चित्ते मुहुः ॥ सा चेत्तत्क्षणमेव दुःखविलयः संभावितः सर्वथा तद्वार्तापि न जायते खलु सतां विश्वेश्वरा
राधने ॥ ६९ ॥ विश्वेशः स्मृत एव नाद्य सहसा वीरेश्वरो विस्मृतो न ध्यातं विकटापदाम्बुजयुगं सिद्धेश्वरी न स्मृता
ढुंढीशोऽपि स विस्मृतः किमिति वा श्रीभैरवो न स्मृतो दुःखांभोधिविनाशकः खलु महादेवः स्मृतोऽनुक्षणम् ॥ ७० ॥
इति तद्वचनं श्रुत्वा काश्याः संस्मरणे सति ॥ विलोकिता न काशीति सापि दुःखसमाकुला ॥ ७१ ॥ हा काशी न मया दृष्टा विश्वेश
निलयो मुहुः ॥ संसारपाशसम्बद्धा किं कर्तव्यमतः परम् ॥ ७२ ॥ विश्वेश्वराराधनाय न प्रवृत्तं मनो मम ॥ संसारवार्ताविरत

ल मनः पाप सञ्चितम् ॥७३॥ श्रीवीरेश्वर लिङ्ग पूजनरति र्जाता न जन्मान्तरे ॥ तेनेदं जननं ममाभवदतो नष्टं वयो मे
वृथा ॥ हा हा किं हत जीवनेन जननी क्लेश प्रदानोद्यतम् ॥ व्यर्थं जन्म शिवार्चनेन रहितं कष्टानि कष्टं वयः ॥७४॥ कर्पू
रगौरचरणाम्बुजरेणुभिर्मे न क्रीडतीत्यपि मनोरमणं वरं मे ॥ किं जीवनेन शिव पूजन वर्जितेन धिग्धिग्धिगेतदधुना
किमिहास्ति कृत्यम् ॥७५॥ विश्वेश्वरो न नत एव न नाथ संस्मृतोऽपि बिल्वोदलैश्च कुसुमैरपि नार्चितोऽपि ॥ व्यर्थं गतं जननमेतदतः
परं किं दग्धेगृहेन फलमस्ति जनाय सेव्यैः ॥७६॥ हाहा हन्त दुरात्मना कथममूसंयोगोऽपि चित्तं यतः स्वस्थं नाम यदिन्दुशेखर
पदाम्भोजार्चने सर्वथा ॥७७॥ तद्दग्धं भवतु त्रिलोचन पुनर्जन्मान्तरे वा भवत्पादाम्भोजरजः प्रसादनिरतं चित्तं मम
मास्तु प्रभो ॥७७॥ धिग्धिक्पातक सागराकरमिदं चित्तं धिगाद्य प्रभो त्वत्पादाम्बुरुहार्चनेन रहितं चेतस्त्वदद्याधुना ॥ नि
र्मूलं भवतु त्वदीय कृपया चित्तान्तरेणान्वये तेनाद्य महेश पूजनरतं चित्तं भवेत्सादरम् ॥७८॥ हर हर हर पापं पावनाशाय यस्मा
त्स्मरणमपि तव शंभो शंकरेति प्रवृत्तम् ॥ यदि भवति मनो मे घोरसंसारना~~शकमिरलमेवाल्लं सासं कान्त्वः प्रजायते ॥ इति तद्वचनं श्रु~~
~~त्वासौ पाहीत्युवाचसः ॥ ३९॥ ततः स ताडयामास हुंकारेणाऽधमान् ॥ तेन प्रज्वलितास्यश्च ऋषि ॥ रुषो~~
~~न्मिश्रः स तदा तद्दृतौ व्याकुलस्तदा ॥ ततः प्रविश्य त्वरया सबाला शिवमन्दिरम् ॥४१॥~~ युवतीं चलिताम्…

६०३

श्रो भवति भवति दृष्टिर्मय्यनाथे तवेश्वर ॥७९॥ इति तद्वचनं श्रुत्वा किन्नरो विस्मितस्तदा ॥ शिवपूजनसामग्रीं ददौ तस्यै प्रणम्य सः ॥८०॥
सामग्रीं तां समासाद्य प्रहृष्टा सापि शंकरम् ॥ पूजयामास यत्नेन पञ्चाक्षरपुरःसरम् ॥८१॥ ततः स किन्नरः प्राह तामेव नवयौवनाम्
शिवार्चनरतां दृष्ट्वा प्रहृष्टोतीव विस्मितः ॥८२॥ किन्नर उवाच ॥ किमम्बापेक्षितं लोके तद्वदाद्याधुना मम ॥ तत्सर्वमपि दातुं मे
शक्तिरस्ति शिवार्चनात् ॥८३॥ अम्ब मां पुत्रभावेन पश्य पश्यामि सादरम् ॥ शिवभक्तासि मे माता तत्त्वं तदिति मे मतिः ॥८४॥
संसारविरतायास्ते शिवलिङ्गार्चने रतिः ॥ समुत्पन्ना ततो नित्यं पूजयस्व महेश्वरम् ॥८५॥ मनुष्याः प्रायशः सर्वे मातः संसारि
णस्ततः ॥ तैः संहैकत्र संवासे पूजाविघ्नो भविष्यति ॥८६॥ विघ्नितायदि पूजा स्यात् पुनः संसारचेष्टया ॥ नाशिवार्चनमि-
त्याशु कर्तव्यं शिवपूजनम् ॥८७॥ श्रेयः परं विदुरिदं शिवपूजनन्तु विघ्नैर्विना भवति चेदभिवाञ्छितानि ॥ सिध्यन्ति तावद
सकृत्सकृदेव वास्तु त्वत्तात्सिद्धिदायकमिति प्रवदन्ति शैवाः ॥८८॥ इति तद्वचनं श्रुत्वा प्रणतं किन्नरं मुहुः ॥ शांकरं प्राह सा
साध्वी श्री महादेवसन्निधौ ॥८९॥ राजकन्योवाच ॥ सन्ति भाग्यान्यपाराणि तेषां संख्या न दृश्यते ॥ शिवार्चनोपयुक्ता
नि न भवन्तीति दुःखिता ॥९०॥ तेन दुःखेन सततं खिन्नं मम मनस्ततः ॥ तद्दुःखनाशनोपायश्चिन्तनीयस्त्वयाधुना
॥९१॥ सन्ति रत्नान्यपाराणि तैरेकं शिवमन्दिरम् ॥ कर्तव्यमिति मे बुद्धिस्तत्कथं स्याद्वदाधुना ॥९२॥ भर्ता किलातिभूरि

मे सर्वदा मरणातुरः॥ सएव शिवपूजायां विघ्नमाचरितः स्वतः॥ ९७॥ न तस्य शिवपूजायां वाञ्छा सर्वात्मना यतः॥ जन्मान्तरेऽपि संसारी मतद्वासनया युतः॥ ९४॥ संसारवासना दुष्टा सत्तावद्भूत सन्निभा॥ पिशाच निकराकाराशिव ध्यानविरोधिनी॥ ९५॥ पिशाचयोगे मन्त्रेण कृत्वा चित्तं निवारणम्॥ आविश्यति न संसारं वासना चानिवर्तते॥ ९८॥ संसारवासनोन्मत्ताः स्त्यक्त शंकर पूजनाः॥ चरन्ति मरणान्ते ते यास्यन्ति यम मन्दिरं॥ ९९॥ शंकरार्चाविहीनेभ्यः कल्पितं यममन्दिरम्॥ अतस्तद्वासनाक्रान्तास्त्यक्त शंकरपूजनाः॥ चरन्ति मरणान्ते ते यास्यन्ति यम मन्दिरे॥ ९९॥ शंकरार्चाविहीनेभ्यः कल्पितं यममन्दिरम्॥ अतस्तद्वासनाक्रान्तास्तत्र यान्ति न संशयः॥ यतते कामिनी योगं कर्तुं मर्त्यो यथा तथा॥ न कुरोति महादेवे पूजने मतिमादरात्॥ १००॥ इति तद्वचनं श्रुत्वा किन्नरो हृष्टमानसः॥ तामाह राजतनयां शिव संपूजमानसाम्॥ १॥ राजकन्यापि सुभगे सर्वलक्षणसंयुता॥ शिवपूजन संसक्ता जातासि खलु भाग्यतः॥ २॥ असंसारी न कोप्यस्ति महादेवं विना प्रभुम्॥ सर्वे संसारिणो देवाः किन्नराश्चारणा अपि॥ ३॥ गन्धर्वा अपि सिद्धाश्च मुनयोप्यन्ततः ततः॥ असंसारी न दृष्टोऽस्ति सर्वे संसार संकुलाः॥ ४॥ अज्ञानिकोऽयं मार्गो ति तन्मार्गस्य निरोधनम्॥ अथाकथमेव सहसा तत्प्रयत्नो न जायते॥ ५॥ शंकरेणैव सृष्टोयं संसारः सतु सर्वथा॥ नापकाराय धन्यानामुपकारोऽपि जायते॥ ६॥ अभाग्यानां तु संसारादुः

एवमेव प्रजायते ॥ तदेक ध्यानानान्तु विरता ना सर्वथा ॥ ७ ॥ विरतिश्च भवेदेव कालभेदे तथा सति ॥ तेन दुःखेन सहसा

विवेकेन महात्मनाम् ॥ ८ ॥ विवेकोऽपि भवेदेव शंकरानुग्रहात्परम् ॥ तेन संसार दुःखानि न भवन्त्येव सर्वथा ॥ ९ ॥ सन्ता

नार्थेऽपि संसारे प्रवर्तन्ते मुनीश्वराः ॥ तेन सन्तति वृद्धिश्चेत्सा सुखाय भविष्यति ॥ १० ॥ न यस्य सन्तति स्तस्यापि तरो दुःखि

तास्ततः ॥ तद्दुःखनाश सन्तत्या भविष्यंति न संशयः ॥ ११ ॥ अत्रैवोदाहरन्तीमामितिहासं पुरातनम् ॥ गन्धर्व नगरे कश्चि

द्विश्वावसुरितिस्थितः ॥ १२ ॥ तस्यैश्वर्यं महत्तस्य कलत्राणि बहून्यपि ॥ तेन संसार वार्त्तापि व्यक्ता परिणयोत्तरम् ॥ १३ ॥

ततस्तस्य कलत्राणां संसारेच्छा महत्तरा ॥ जाता तथापि तैः सर्वैः सत्प्रासान्न कृता तदा ॥ १४ ॥ तद्युक्तोऽपि न संसारे करोति विरति

न्ततः ॥ अतोऽसौ अकुर्वन्नपि भार्याभिः संगन्तु न चकार सः ॥ १५ ॥ शिवार्चन परो नित्यं सर्वदा शिव मन्दिरे ॥ चकार वसतिन्तत्र

निश्चापन यनच्चसः ॥ १६ ॥ शिवध्यानानुरक्तस्य ~~ध्यानानुरक्तस्य~~ ध्यानच्छेदः कदापि न ॥ तथा च तस्य नारीषु न जाता

रतिधीरपि ॥ १७ ॥ एवमेव विनीतोऽपि कालस्तेन महात्मना ॥ शिवार्चनान्न विरतिः कलत्राणां च तस्य तु ॥ १८ ॥ तदानीं ऋषे-

तरस्तस्य द्विजवेषमवाप्यते ॥ समागताः शिवध्यान निरता भूति भूषणाः ॥ १९ ॥ रुद्राक्षमालावलयास्त्रिपुण्ड्रांकित

मस्तकाः ॥ महादेव महेशेति वदन्तः सादरं मुदा ॥ २० ॥ तान्दृष्ट्वा शिव पूजान्ते प्रहृष्टहृदयस्तदा ॥ आसनानि

दृष्टो तेभ्यः पूजयामास सादरम् ॥२१॥ ततः परमुवाचापि तान्दृष्ट्वा विनयान्मुदा ॥ कुतः समागतं पुत्रकृतं शंकरपूजनम् ॥२२॥ इति तद्वचनं श्रुत्वा तेतमाहुर्विचक्षणाः ॥ स्वस्तिपूर्वकमेवादौ शिवस्मरणपूर्वकम् ॥२४॥ पितर ऊचुः ॥ सुमेरु शृङ्गादस्माभिरागतं शिवपूजनम् ॥ कृतं कैलाससदने शिवलिङ्गे शिवात्मके ॥२५॥ शिवप्रसादसम्पन्नाः सर्वदा शिवपूजकाः ॥ न चासाध्यं किमस्माकं भुवनेषु विशेषतः ॥२६॥ शिवप्रसादेन वयं सुराणां पूज्याः सदा प्राप्तसमस्तकामाः ॥ सर्वेषु लोकेष्वपि संवसामः स्मृत्या परं तत्र गतिर्न नूनम् ॥२७॥ अस्माभिरागतं त्वैवात्स्वर्गलोकमयत्नतः ॥ तत्रेन्द्रेणार्चिताः सर्वे वयं तत्र यथाविधि ॥२८॥ ततः परं गतं सर्वैर्ब्रह्मलोकमनामयम् ॥ तत्रार्चिताश्च सर्वेपि ब्रह्मणापि वचनादरात् ॥२९॥ तत्राद्भुतं तदा दृष्टमस्माभिर्ब्रह्ममन्दिरे ॥ तद्वृत्तान्तं प्रयत्नेन वक्ष्यामः शृणु सादरम् ॥३०॥ तत्र ब्रह्मसभामध्ये प्रहृष्टाः सर्वदा स्थिताः ॥ प्रफुल्लवदनांभोजाः शिवध्यानपरायणाः ॥३१॥ शिवतत्त्वज्ञानरूपसुधापानादिसुन्दराः ॥ तेषां प्रभावः केनापि ज्ञातुमेव न शक्यते ॥३२॥ हृदि ध्यात्वा महादेवमानन्दरससंश्रयाः ॥ शिवानन्दनिमग्नास्ते नान्यमाशृण्वन्ति सर्वथा ॥३३॥ न शृण्वन्ति कथामन्यां रहस्यं शैवमुत्तमम् ॥ श्रुत्वा तत्त्वकथारससुधया हृष्टमानसाः ॥३४॥ पञ्चाक्षरजपासक्ताश्च रुद्राध्ययनप्रियाः ॥ भस्मोद्धूलितसर्वाङ्गास्त्रिपुण्ड्राङ्कितमस्तकाः ॥३५॥ शिवलिङ्गानि दिव्यानि कोमलैर्दि

बिल्वपल्लवैः ॥ कुसुमैरपि मन्दार तरुजैः पूजयन्ति ते ॥ ३६ ॥ धन्याः कृत कृत्याश्च सर्वे वैक्लव्य वर्जिताः ॥ शोक वार्त्तां न जानन्ति शोकस्तेषां च सर्वथा ॥ ३७ ॥ तत्र केचन विश्वेशं पूजयन्तोपि साधनैः ॥ निस्तेजस्काः स्थितास्तेषां मनः शोक समन्वितम् ॥ ३८ ॥ तद्वीक्षणेन स्वच्छन्त्याखिलमेव हि नो मनः ॥ तदा पृष्टो गिरिभिः केतोरखिला दुःख्यसम्प्रदादिभिः ॥ ३९ ॥ ब्रह्मोवाच ॥ शृणुध्वं सावधानेन वक्ष्ये तत्क्लेशकारणम् ॥ एतद्देशे समुत्पन्नः कश्चिच्छिवपरायणः ॥ ४० ॥ विश्वावसुरिति ख्यातः सर्वसौभाग्य संयुतः ॥ सदा शंकर पूजायां निरतो भस्म भूषितः ॥ ४१ ॥ पूर्णार्थस्यापि न लयो विना शंकर पूजया ॥ नित्यं शिवार्चनेनैव वयस्तेन विनीयते ॥ ४२ ॥ न जहाति शिवध्यानं कामुकः कामिनीमिव ॥ युवापि कामिनी संगं न जानात्येव सर्वथा ॥ ४३ ॥ शतान्तस्य कलत्राणां तद्यौवनमनुत्तमम् ॥ रूपञ्च तेषामुत्कृष्टं भाग्यमप्यविनश्वरम् ॥ ४४ ॥ मन्दिराण्यपि रत्नानां प्रासादाश्च विशेषतः ॥ गृहशोभा न वचसो विषयः सर्वदा खलु ॥ ४५ ॥ वन क्रीडापि सदने तेषां यदि कदाचन ॥ इति चेत्तद्वनं सर्वं पुष्प वृन्द विजृम्भितम् ॥ ४६ ॥ पुष्पाणि यानि नान्यत्र तानि पुष्पाणि तद्वने ॥ तिष्ठन्ति पुष्पकन्यास्तु तरवः सन्ति तद्वने तु न ॥ ४७ ॥ मणि सोपान सम्बद्ध दीर्घिकाः सन्ति कोटिशः ॥ तस्मिन्वने सुरनदी कुल्यारूपेण वर्तते ॥ ४८ ॥ प्रति पादपमूलेपि पूर्णा गंगा स्रवतस्ततः ॥ तद्वनाद्बहिरायाति दीर्घिकास्वपि तिष्ठति ॥ ४९ ॥ स्वर्गरूपाण्येव पुष्पाणि तस्मिन्नुद्यान मण्डले ॥ तत्रास्त्येकं शिवस्थानम् रत्न

६८५

मण्डल मण्डितम् ॥ ५० ॥ रत्नगोपुर संयुक्तं रत्न प्राकार मण्डितम् ॥ रत्न नन्दिगणाकीर्णं रत्नं दिध्वजान्वितम् ॥ ५१ ॥ तस्मि न्नेव शिवस्थाने लिङ्गं मणिमयं महत् ॥ तिष्ठत्येकं तदुत्कृष्टं तद्देवैरपि पूज्यते ॥ ५२ ॥ नागलोकात्समागत्य शेषस्तल्लिंग पूजन म् ॥ करोति प्रयतो भक्त्या रत्नैरेव मुहुर्मुहुः ॥ ५३ ॥ तत्र विश्वावसुर्नित्यं करोति शिवपूजनम् ॥ अपार वन पुष्पैस्तैः सुगन्धैरन्वह मुदा ॥ ५४ ॥ स्वतस्ते तरवः सर्वे पुष्पाण्यानीय सर्वशः ॥ प्रयच्छन्ति प्रयत्नेन शिवलिङ्गार्चनाय ते ॥ ५५ ॥ स तैरभ्यर्चनं कृत्वा तत्फलैरन्नतोपमैः ॥ उपहारैश्च संपूज्य तिष्ठत्याहार वर्जितः ॥ ५६ ॥ न तस्य विषये वाञ्छा कलत्राणि न पश्यति ॥ पुत्र पौत्रादि वाञ्छापि तस्य तावन्न जायते ॥ ५७ ॥ तस्यैते पितरः सर्वे तत्कृते प्रार्थनादिह ॥ तिष्ठन्त्यत्रापि ते खिन्नास्तस्य सन्तत्यभावतः ॥ ॥ ५८ ॥ सन्तत्यभावे तद्दृष्टौ निरुद्धं शिवपूजनम् ॥ तस्मिन्निरुद्धे पातः स्यादस्माल्लोकादतः खलु ॥ ५९ ॥ अधःपातभयादेते खिन्नास्तिष्ठन्ति सर्वदा ॥ न पिबन्ति सुधामेते तेनानन्दो न जायते ॥ ६० ॥ शिवार्पितापि सुसुधा तैरन्यस्मै प्रदीयते ॥ किन्तया सुधयेत्येव सुधा विच्छेद दर्शनात् ॥ ६१ ॥ गृहीतयापि सुधया कदाचिन्न सुखोदयः ॥ तत्सन्तति निरोधेन दुःखितं तन्म नो यतः ॥ ६२ ॥ अमुमर्थन्न जानाति स विश्वावसुरीश्वरम् ॥ पूजय[illegible]न्न[illegible]निघ्नं तस्य नास्ति संसार वासना ॥ ६३ ॥ स शिवा र्चन पीयूष पान पीनो निरन्तरम् ॥ तेनाहाररसस्तावन्न ज्ञातोपि कदाचन ॥ ६४ ॥ आहार सेवनेनैव यदि पुष्टा भवेत्तनुः

तदा रतिः कलत्रेषु पुंसां भवति वस्तुतः ॥९५॥ आहारोपि न रोचते खलु सदा विश्वेशपूजारते चित्ते तुच्छमतिश्च भोगविषये नारीजने दुर्जने ॥ धन्यानां शिवलिङ्गमात्रभजने नित्यं मयोध्यापनम् ॥ तत्तावद्बहुनामित्स्वयोमि महतां विश्वेश्वराराधनम्
१९६
॥९६॥ इति श्रीशिवरहस्ये हराख्ये तृतीयांशे उत्तरार्द्धे याज्ञवल्क्यजनकसम्वादे नाम त्रयस्त्रिंशोध्यायः ॥ ३३॥
इतितद्वचनं श्रुत्वा वपमप्यति दुःखिताः ॥ ब्रह्मलोकेऽपि न सुखं किमेवमिति विस्मिताः ॥१॥ अतः सन्ततिरत्यन्तं पावना शुद्धवंशजा ॥ संपादनीया यत्नेन विद्याविनयसंयुता ॥२॥ शांभवी सन्ततिर्भाग्यै यदि तावद्भविष्यति ॥ तया शंकरपूजायां तुष्टो भवति शंकरः ॥३॥ शैवी न सन्ततिर्यस्य तद्वंशे न शिवार्चनम् ॥ तदभावे पतन्त्येव पितरो नरके पुनः ॥४॥ श्रुतिर्या जायमानो वै ब्राह्मणस्त्रीभिरित्यपि ॥ तथा प्रजापि यत्नेन साधनीयेत्यपि श्रुतम् ॥५॥ तस्मादधीत्यस्वाध्यायादित्यपि वेदात्प्रजापरम् ॥ सम्पादनीया यत्नेन सा सुखाय भविष्यति ॥६॥ यदिदं पूज्यते लिङ्गं त्वया यस्य पुनः कथम् ॥ पूजा भवति देहान्ते तव शून्यमिदं भवेत् ॥७॥ पूजाशून्यं गृहे लिङ्गं यस्य तावद्भविष्यति ॥ तद्वंशजा ब्रह्मलोकवासिनोपि च्यवन्ति हि ॥८॥ लिङ्गरूपो महादेवः पूजाभावविनिश्चयात् ॥ तत्पूजकाय मुक्तिं च न प्रयच्छति सर्वथा ॥९॥ अविच्छिन्नां लिङ्गपूजां यः सम्पादयितुं क्षमः ॥ तेन पुत्रः समुत्पाद्यस्तेन तावन्न मुह्यति ॥१०॥ यदि शंकरपूजायां विरतः सुरते रतः ॥ स याति नरकं घोरमन्यथा सुखमश्नुते ॥

शि०र०उ०अ०
१६२

॥११॥ पुत्राः सम्पादनीयाश्च शिवनामाङ्किताः प्रियाः ॥ पूजातेः स्यादविच्छिन्ना लिङ्गे तत्र प्रपूजिते सदा ॥१२॥ इदं लिङ्गं मणिमयं त्वया सम्पादितं खलु ॥ एतत्पूजात्व विच्छिन्ना कुले तव महामते ॥१३॥ अति प्रियतमं लिङ्गं तवेदं सर्वकामदम् ॥ सम्पादितं प्रयत्नेन पूजाहीनं कथं भवेत् ॥१४॥ महती यदि पूजायाः स्याल्लिङ्गेस्मिन्बहुसाधनैः ॥ तदा मुक्ते त्वयि स्नेहं महादेवः करिष्यति ॥१५॥ लिङ्गार्चनमविच्छिन्नं तव पुत्रैः कृतन्ततः ॥ धन्योसीति महादेवस्त्वयि तुष्टो भविष्यति ॥१६॥ भाग्येन शांभवांस्तावत् सुतान्संपादयास्म दरात् ॥ तेजाताः शिवविद्याश्च सम्पाद्याति प्रयत्नतः ॥१७॥ शिवार्चनरतास्तावद्भविष्यन्ति न संशयः ॥ तान्दृष्ट्वा तव सन्तोषो वृद्धिं यास्यत्यसंशयम् ॥१८॥ शिवभक्तप्रियोसि त्वं शिवार्चनरतान ^रतः सदा ॥ शिवार्चनै समादृष्ट्वा प्रीतोसि शांभव ॥१९॥ शिवार्चकस्त्वं सन्तोषबीजमस्मासु दृश्यते ॥ त्वया सह न सम्बन्धः कदापि खलु शाम्भव ॥२०॥ तथापि शाम्भवत्वेन स्नेहः खलु विजृम्भते ॥ यः कश्चिदस्तु लोकेस्मिन् सामान्येनापि शाम्भवः ॥२१॥ तत्रापि महती प्रीतिस्तव तावत्प्रजायते ॥ यः शाम्भवोत्तमः स्वीयस्तस्मिन्प्रीतिस्तवाधुना ॥२२॥ कथं प्रवृद्धा न भवेत् शाम्भव प्रवरस्तुता ॥ शंकराराधकान्पुत्रान् अपारान्पश्य सादरम् ॥२३॥ पौत्रान्प्रपौत्रानानिशं ससन्तोषो महान्खलु ॥ यस्तु शाम्भव पुत्राणां सभां पश्यति मानवः ॥२४॥ सोपि मुक्तो भवत्येव तत्पिता मुक्त

ह०त०उ०
अ०३४

एवहि ॥ धन्यस्तस्य पिता धन्या जननी तस्य सन्ततम् ॥ २५ ॥ यस्य भक्तिर्महादेवे तत्कुलं धन्यमुत्तमम् ॥ यस्मिन्कुले न सञ्जातः
शांभवाग्रे सरोत्तमः ॥ २६ ॥ तत्कुलं नरके तावत्पतितल्लात्र संशयः ॥ तव पुत्राः भविष्यन्ति शाम्भवा एव सर्वथा ॥ २७ ॥
न तत्र संशयः कार्य्यः तद्बीजमधुनोच्यते ॥ भूति रुद्राक्षधृताङ्गामंगनां शिवतत्पराम् ॥ २८ ॥ ऋतुकाले शिवं ध्यात्वा सुरतैः प्री
णयस्व ताम् ॥ तेन ■ ते शांकरा एव कुमारा कुशला अपि ॥ २९ ॥ भविष्यंति न सन्देहो यथा तव पितुर्भवान् ॥ एवं सति सुखं य
त्ते सम्भवत्यधुना मुहुः ॥ ३० ॥ ततः सहस्रगुणितं सुखन्तावद्भविष्यति ॥ इति तद्वचनं श्रुत्वा विश्वावसुरघापहम् ॥ ३१
तथास्त्वित्याहृता नादौ पूजयामास सादरम् ॥ तद्भागमृतधाराभिः स्तर्पिताः पितरस्ततः ॥ ३२ ॥ तेययुर्ब्रह्मसदनं सन्तोषपरि
पूरिताः ॥ ततः सोपि कलत्रेषु पवित्रेष्वति शांभवः ॥ ३३ ॥ ऋतुकाले रतिञ्चक्रे पुत्रार्थं शंकरं स्मरन् ॥ ततः पुत्राः समुत्प
न्नाः शंकरध्यानतत्पराः ॥ ३४ ॥ जटामण्डलवीताङ्गाः शंगलिंगार्चनप्रियाः ॥ भूतिरेखालसद्भालान्बालानालोक्य केवल
म् ॥ ३५ ॥ तान् बालेकान्प्रहृष्टोयं शिव नाम जपोत्सुकान् ॥ उमाकान्त महादेव नीलकण्ठ सदाशिवम् ॥ ३६ ॥ त्रिपुरान्तक शर्वेति नाम तेषा-
ञ्चकार सः ॥ स तान ध्यापयामास पुत्राञ्छिवरतान्पिता ॥ ३७ ॥ भूति रुद्राक्षभूषाढ्यान् गौरीपरिवढोत्सुकान् ॥ अ० आदाव
ध्यापयामास रुद्राध्यायमघापहम् ॥ ३८ ॥ रुद्रसूक्तान्यपाराणि रुद्रनामाङ्कितान्यपि ॥ शिवस्तोत्राणि पुण्यानि तथा

६०१

शिव कथास्तथा ॥ ३९ ॥ शिव धर्मांश्च विविधान् सर्वसिद्धिप्रदानपि ॥ ते सर्वे शिवनामांक वेदभागावबोधिनः ॥ ४० ॥ शिवार्चन परा एव जाताः सर्वे सुताः खलु ॥ शिवपूजारतान्दृष्ट्वा तान्पुत्रानतिशोभनान् ॥ ४१ ॥ प्रहृष्टः परमं प्राप सन्तोषं शिवतत्परः ॥ विलोक्य तान्मुनीन्द्रांश्च शिवपूजनतत्परान् ॥ सन्तोषं परमं प्रापुः तद्दर्शन विशेषतः ॥ कदाचित्सुतान्दृष्ट्वा शिवलिङ्गार्चनप्रियान् ॥ ४३ ॥ आलिंग्य स्वसुतानाह जीवजीवेति सादरम् ॥ ततस्तमाहुस्ते पुत्राः प्रणम्य शिरसा मुदा ॥ ४४ कृताञ्जलिपुटाः सर्वे दृष्ट्वा तातं शिवार्चकम् ॥ कुमारा ऊचुः ॥ प्रसीदतातवदनः शिवधर्मान्सनातनान् ॥ ४५ ॥ यद्धर्म श्रवणादेव शिवभक्तिः प्रजायते ॥ सर्वारिष्ट विनाशश्च पापनाशश्च जायते ॥ ४६ ॥ जायते सम्पदां वृद्धिरनुवारमसंशयम् ॥ इति तद्वचनं श्रुत्वा पुत्राणां वेदसंमतम् ॥ ४७ ॥ प्रहृष्टो धन्यमात्मानममन्यत शिवार्चकः ॥ विश्वावसुरुवाच ॥ ध्येयः परः शंकर एव धीरैर्हरिरपारैरभिसेवितोऽयम् ॥ अभीष्टदानोद्यत एव नित्यं हराय धीराय विशारदाय ॥ ४८ ॥ मत्तेभप्रगलंमदोदकधुनी कल्लोलमालाकुला नीलानील प्रलोद्यपोच्चपरिघां संचावते नैव तैः ॥ व्याप्ताधारपुराणि तानि कृपणान्युत्सृज्य हारः परं हारापारविचारसादर मनो वल्यानिवल्याचिरम् ॥ ४९ ध्येयं शंकरपादपङ्कजमजोपेन्द्रादिभिः सादरम् ॥ ध्येयं तत्सदृशान्न वस्तु भुवने दृष्टं श्रुतं वा सुताः ॥ तद्ध्याने

न स्य सुखाम्बुराशिरसकृत् संवर्धते मानसे तस्मादेव भवन्ति तावदसकृल्लोकाः समस्ता अपि ॥५०॥ तत्पादाम्बुज पूजने
न सुकृतांभोधिः प्रवृद्धो भवेत् ॥ पापापारदवानलोपि सुतरां शान्तो भवेदन्ततः ॥५१॥ संसार भ्रम राशि नाशकमिदं विश्वेश्व-
राराधनम् ॥ तत्पुत्राः सुनिधानमेवानिधय स्तेन प्रसूताः खलु ॥५२॥ देवो महादेव इति प्रसिद्धो देवेषु सर्वेष्वपि तन्महा
न्तम् ॥ आदित्यवर्णं तमसः परस्तात् वदन्ति वेदाश्च मुनीश्वराश्च ॥५३॥ पुत्रान्यदेव सदृशो न महेश्वरोयं देवोत्तमोयमि
ति ते मतिरस्तु नित्यम् ॥ तत्रान्यदेव सदृशत्व मतिर्यदि स्यात्सानात्र हेतुरिति वेदविदो वदन्ति ॥५४॥ अत्रैवोदाहरन्तीममि
तिहासं पुरातनम् ॥ अस्य श्रवणमात्रेण दृढभक्तिः शिवे भवेत् ॥५५॥ पुरा नारायणस्याभूत् कुमारो मदनाभिधः ॥ तस्या
न्यदेव तुल्यत्व मतिरासीन्महेश्वरे ॥५६॥ सैवाभवन्मतिस्तस्य प्रलयानल मालिका ॥ तमालोक्यापि मदनो दूराद्विह्वल
मानसः ॥५७॥ ययौ वैकुण्ठभुवनं यत्र नारायणः पिता ॥ तस्यान्तं कम्पमानोसौ नत्वा प्राहातिविस्मितः ॥५८॥ मदन उ
वाच ॥ महाप्रलयकालोयमागतः प्रलयानलः ॥ अतः परं क्व गन्तव्यं को वा स्याच्छरणं प्रभुः ॥५९॥ पश्य पश्यानल
ज्वालां दीर्घां व्याप्त दिगन्तरम् ॥ तन्निवारण सामर्थ्यं तव किलाधुना वद ॥६०॥ चक्रं प्रेषय यत्नेन तेन वातान्निवार
याम् ॥ महावात दिशाशाय नो चेज्जीवनमेव न ॥६१॥ एतस्मिन्नन्तरे काले ब्रह्मापि समुपागतः ॥ इन्द्रादिदेवैः सहितः

६९०

सकलत्रैर्गिरासह ॥ ६२ ॥ स समागत्य तमाह कमलासहितं हरिम् ॥ परि म्लान मुखाम्भोजो मुञ्चन्नयनजं जलम्

॥ ६३ ॥ मन्दं मन्दं गद्गदाभिर्वाग्भिः कम्पाकुलो विधिः ॥ त्यक्त्वा विनय वार्त्ताञ्च किं करोमीति सत्वरम् ॥ ६४ ॥ ब्रह्मोवाच

पश्य पश्याधुना विष्णो प्रलयानलमागतम् ॥ तत्तेजसा परं तावद्ब्रह्माण्डं नाशमेष्यति ॥ ६५ ॥ अतः परं क्व गन्तव्यम

कस्मादयमुत्थितः ॥ प्रलयाग्निः किमस्माभिरपराधः कृतः शिवे ॥ ६६ ॥ मया शिवार्चनं कृत्वा स्थितं मत्सदने खलु

अद्यापराधो न कृतः कोपि रुद्राग्नि कल्पकः ॥ ६७ ॥ रौद्रश्वानलः सोयं सर्वसंहारसाधनम् ॥ एतदुत्पत्तिबीजं कि

ञ्चिंतनीयमिहाधुना ॥ ६८ ॥ त्वया न शिव पूजायाः संकोचो द्य कृतः खलु ॥ शिव पूजासाधनं वा विस्मृतन्न ख-

लु त्वया ॥ ६९ ॥ म्लान पुष्प प्रदानं वा न कृतं खलु मोहतः ॥ कीटादि दूषितैः पुष्पैर्नार्चितः खलु शंकरः ॥ ७० ॥ उ

ध्दूलनं वा न कृतं किं वा शंकरपूजने ॥ त्रिपुण्ड्रधारणे मन्त्रो नान्यथा पाठतः खलु ॥ ७१ ॥ स्वरहीनो न मन्त्रः किं प्र-

युक्तः शंकरार्चने ॥ अक्षालितैर्बिल्वपत्रैरर्चितः किं महेश्वरः ॥ ७२ ॥ भूतिहीनं चन्दनं वा शंकराय समर्पितम् ॥

धूपदीप प्रदानं वानादरेण कृतन्त्वया ॥ ७३ ॥ परिष्कारोद्य न कृतोप्यभिषिक्तो न किं शिवः ॥ दत्तः किमुपहा

रोपि कीटकेशादि दूषितः ॥ ७४ ॥ शाकादिकं वा न कृतं शिवनैवेद्यसाधनम् ॥ न दत्तं वा घृतं पात्रे तत्पात्रपरिशो-

धकम् ॥ पञ्चाक्षरेण न कृतं किल नैवेद्य निवेदनम् ॥ ध्यानं वा न कृतं सम्यक् वेदमार्गेण शाम्भवम् ॥ ७५ ॥ रोगे वा न कृता पूजा महेशस्याति सादरम् ॥ महेशध्यान समये न वा ध्यातोऽपि किं मुहुः ॥ ७६ ॥ अम्बा नाराधिता भक्त्या तया कमलया पि वा ॥ साम्बशिवाराधना सक्ता न किमद्य प्रयत्नतः ॥ ७७ ॥ तया वा लिंग पूजायां विलम्बः किं कृतो भवेत् ॥ शिवार्चने उपचाराणां लोपः किं वा कृतस्त्वया ॥ ७८ ॥ प्रणति र्वा विस्मृता किं तया ध्यानं कृतन्न वा ॥ साम्बस्य परमेशस्य भक्त्याति विनयेन च ॥ ७९ ॥ इति तद्वचनमश्रुत्वा विस्मृतो विष्णुरादरात् ॥ प्राह मन्दोऽपि भीतेन शिथिलं नाराय(ण)स्त(ज्य)दा ॥ ८० ॥ **श्रीनारायण उवाच** ॥ प्राण प्रयाणेऽपि मया कथं वा त्याज्यं शिवाराधनमादरेण ॥ त्याज्येषु तावन्न शिवार्चनस्य त्याज्यत्व मुक्तं प्रलयेऽपि नूनम् ॥ ८१ ॥ किं प्राणैरपि रक्षितैर्यदि महादेवार्चने नादरो देहेनापि किमस्ति कृत्यमधुना दानैर्धनैर्वा सुतैः ॥ यस्मिन्नेव कृतन्न शंगभजनं काले तदा किं तनुः श्रेष्ठा किन्तु विसर्जनेन परमं प्राणस्य सौख्यं भवेत् ॥ ८२ ॥ को वा न विहिते काले करोति शिवपूजनम् ॥ आहारमपि सन्त्यक्त्वा विभुर्जनकोटितः ॥ ८३ ॥ धिग्जन्म तस्य दौर्भाग्यं येन नाराधितः (शिवः) ॥ सर्व देवोत्तमत्वेन शान्तो गौरी मनोहरः ॥ ८४ ॥ त्यक्त्वा शंकरपूजनं यदि मनः पातुं सुधां वा तदा तत्तावज्ज्वलन प्रविष्टमथवा चक्रेण तच्छेद्यताम् ॥ किन्तेनापि नयेन साधु मनसा नाराधितः शंकरो न ध्यातो न निरीक्षितोऽपि मुहुरप्ययादरेणार्च्चितः ॥ ८५ ॥ लब्धं तत्तपसा मनः खलु मया विश्वेश्वराराधन

ध्यानार्थं नियमेन तद्यदि शिवध्यानारतं तन्मनः ॥ यास्यत्येव लयन्तेन फलमथ्यस्यास्ति सर्वात्मना तद्द्वारा वहमेव शंकरपदध्यानानुरक्तं न चेत् ॥ ७६ ॥ देहस्यास्य विलक्षणेन महता यत्नेन संरक्षयन्तावत्कार्यमुपायकोटिभिरयं याव च्छिवाराधने ॥ कर्तव्ये मतियद्दि दृढो यदि भवेत्तत्रानुकूलस्तदा सोऽचेद्यत्र विपर्ययेन शतधा च्छिन्नो भवेदेव हि ॥ ७७ ॥ जिह्वा चेद्दशिवाभिधानमधुना कर्तुं प्रवृत्ता तदा किं तत्कर्तनमत्र सत्वर मति क्रूरेण यन्त्रेण नः ॥ अह्ना साशिवनामधेय सुधया साध्वी प्रवृद्धा तया नाशैवं खलु नाम गृह्णतदृति स्मर्तुं मुहुः सादरम् ॥ ७९ ॥ मल्लः कोपि न विस्मृतः शिवपदाम्भोजा र्चने सर्वथा पूजसाधनमर्जितं च बहुधा किं भस्मनोद्धूलनम् ॥ त्यक्तं विस्मृतमेव वा किमधुना भाले त्रिपुण्ड्रं विधेयश्चेदं नि टिलं विभाति विपुल श्री जाललोलं मुहुः ॥ ७० ॥ यद्यस्मद्विलयाय मोहतिमिराक्रान्तं भवेन्मानसम् ॥ तर्हि स्याद्दशिवार्चनो द्यतमिदं भाग्येति मन्दे वसति ॥ ७० ॥ तद्वृन्दारकवृन्दवन्दित शिवाकान्ताङ्घ्रि पंकेरुह ध्यानानन्दरसाभिमग्नमसकृत्य त्रिसत्यं पुनः ॥ ७१ ॥ गौरीकान्त पदाम्बुजे ऽपि पथस्तावत्कृतः प्राङ्मया ॥ यस्मिन्नेव दिने त्रिलोचनपदध्यानारत मन्मनः ॥ तस्मिन्नेव दिने शरीरमसकृत्स्थित्वापि कालानले प्रक्षेप्तव्यमिति प्रबोधसहितामेवं प्रतिज्ञां मम ॥ ॥ ७२ ॥ अन्यत् किं मम कृत्यमास्ति गिरिशध्यानं शिवापूजनं त्यक्त्वा तौ पितरौ ममेति मुहुरप्य त्यादरादर्पितौ ॥

६०

तावेवान्वहमित्यवेत्यापि मनः कस्मै मया तत्पुनः वक्तव्यं शिवपूजनं प्रतिदिनं कर्तव्यमित्यादरात् ॥९३॥ किञ्चान्यन्नचरोच
ते मम शिवध्यानं विना तत्परं सर्वत्राप्याशिवानिहन्त्यनुदिनं सम्पत्सदानोऽन्मुखम् ॥ सर्वस्यापि शिवं ददाति शिवदं यस्मा
त्स्वरूपं तथा ॥ सिद्धन्तस्य तथास्तति प्रियतमं साम्बं परं धीमहि ॥९४॥ शिवध्यानन्तावद्धनामिति मतिर्मे समुद्भूद्ततः को वा
लोके त्यजति धनमप्यर्जितमहो ॥ धनं वा सन्त्याज्यं शिवदशिवपादाम्बुजरजः ॥ प्रभावध्यानाख्यं धनमति महादुस्त्यजमपि ॥
॥९५॥ ब्रह्माण्डप्रलयोत्तरामित शिवक्रीडाश्रमस्वेदजा पारांभोधि नदीनदादि विलसत्कल्लोलमालाजलैः ॥ स्पृष्टं येन जग
त्पुनः पुनरुमाक्रान्तः स तावन्मया मायातीत इति स्मृतोऽपि मुहुरप्याराधितः सादरम् ॥९६॥ इति तद्वचनं श्रुत्वा ब्रह्मा विष्णुं
शचीपतिम् ॥ सूर्यादीनपि तानाह क्रोधसंकुलितेक्षणः ॥९७॥ **ब्रह्मोवाच** ॥ भवद्भिस्तावदुन्मत्तैः न कृतं शिवपूजनम्
अतएवागतः सोयं महाप्रलयपावकः ॥९८॥ मयासमाराधितएव काले स कालकालो हरिणापि लक्ष्म्या ॥ अतः परन्त
स्य भवद्भिरेव कृता न पूजेति विनिश्चयो मे ॥९९॥ परिशेषतएव निश्चयो यं कृत इत्यत्र भवद्भिरेव पूजा ॥ न कृता
गिरिशस्य सर्वथा तत एवायमुपैति पावकः ॥१००॥ किं वा विधेयमधुना मधुसूदनाय सर्वान शांकरवरान्प्रलयान
लोयम् ॥ दग्ध्वा न शान्तिमुपयास्यति मान्नमुञ्चत्येवं भवन्तमपि तत्सुरसङ्गमेन ॥१॥ हा हन्त हन्त विषमः खलु काल

एव भो कालकालकलना रहितः किलायम् ॥ गन्तव्यमप्यहह कुत्र किमद्भुतोग्निरायाति मृत्युगण सन्निभएव नूनम् ॥२॥
हरेः सहाय भुवनानि विसृज्य दूरे गन्तव्यमेव गमने प्रपलाय्य दैवात् ॥ नायाति चेदयमिह प्रलयानलोपि स्याज्जीवनं खलु
दिगन्त निवासतो वा ॥३॥ विश्वावसुरुवाच ॥ इत्युक्त्वा हरिणा सार्कं कुटुम्बेनान्वितेन सह ॥ स्वपुत्रेण मया देवैः सपुत्रै
र्वनितान्वितैः ॥४॥ स कुटुम्बाः सुराः सर्वे सपुत्राः सानुगा अपि ॥ ययुः पातालमेवाशु विनाशभयविह्वलाः ॥५॥ तानागता
न्फणिपतिः दृष्ट्वा नारायणादिकान् ॥ अति खिन्नानुवाचेदं किमासीदिति सत्वरम् ॥ देवा ऊचुः ॥ अस्मास्वेकेन केनापि
प्रायशो न शिवार्चितः ॥ अतः प्रलयकालाग्निः सुरनाशार्थमुत्थितः ॥७॥ यस्यां सभायामेको वा पातकी सा सभापरम् ॥
निंद्या तावद्बहिष्कार्या तत्सङ्गेन वस्तुतः ॥८॥ एवमेवसुरः कोपि शंकरानर्चकोथ हि ॥ तदा सुराणां सर्वेषां विनाशः
समुपस्थितः ॥९॥ अतो न शरणं लोके शंकरानर्चकान्वयात् ॥ अस्माकमित्यागतञ्च तद्भीत्या त्या तवमन्दिरम् ॥१०॥
अमितास्ते विषज्वालाः प्रलयानलनाशने ॥ स्तम्भने वा समर्थास्ते कुरु यत्नं तथा फणे ॥११॥ प्रायः कृतोपि यत्नस्ते विफलो
ह्यभविष्यति ॥ रुद्रकोपानलस्तम्भे कः समर्थो जगत्त्रये ॥१२॥ अस्माकं कुण्ठिता शक्तिः शिवानर्चकसंगमात् ॥ अतः प
रं क्वगन्तव्यमत्राप्यायाति चेत्स्तु ॥१३॥ कूर्मस्तिष्ठति यत्रैव तत्रापि गमने सति ॥ रुद्रकोपानलो वा नौ न त्यक्ष्यति

न संशयः ॥ १४ ॥ अकाण्डप्रलयः कोयमद्यतावदुपागतः ॥ इत्युक्त्वा कूर्मनिलयं प्रापुर्नारायणादयः ॥ १५ ॥ स कूर्म्मः प्राह तान्भीतान् दृष्ट्वा नारायणादिकान् ॥ किमत्रागतमित्युच्चैः घनगम्भीरया गिरा ॥ १६ ॥ तमाह हरिरित्युच्चैः किं कुद्धः कूर्म कर्म्मणा ॥ प्रलापानलभीतानां दृष्टमागमनं न किम् ॥ १७ ॥ पृष्टं कुशलं किञ्चित् किमेवमुचितन्तव ॥ आतीयार्त्ति प्रदानेन पुनरार्त्तिर्भविष्यति ॥ १८ ॥ तन्निवर्तन चिन्तापि कापि कार्या त्वयाखलु ॥ इत्युक्तो हरिणा सोपि कूर्म्मः प्राह पुनः सुरान् ॥ १९ ॥ श्रीकूर्म उवाच ॥ येन नाराधितो रुद्रः तन्नाशाय परं महान् ॥ रुद्रकोपानलो जातो सन सर्वविनाशकः ॥ २० ॥ रुद्रकोपानलो वेद सर्वज्ञो रुद्रदूषकम् ॥ स तं संहृत्य सहसा प्रयास्यति न संशयः ॥ २१ ॥ सर्वेषामपि नाशाय न प्रवृत्तस्तु सर्वथा ॥ महाप्रलयकालः किं सोयं येन भयं भवेत् ॥ २२ ॥ इति तद्वचनं श्रुत्वा विस्मितो हरिराह तम् ॥ सम्यगुक्तमति प्रीतः सविचारस्ततोभवत् ॥ २३ ॥ महेशानर्चनं येन कृतं वा शिवदूषणम् ॥ तन्नाशाय समुत्पन्नः सोयमित्यवधारितः ॥ २४ ॥ यन्नाशाय समायाति रुद्रकोपानलो महान् ॥ स बहिष्कार्य एवास्ति तेन स्यामसुखिनो वयम् ॥ २५ ॥ एकार्थमद्य सर्वेषां नाशः सद्यः कथं भवेत् ॥ अतः परं शिवद्रोही कः सुरेष्विति निश्चयः ॥ २६ ॥ न दिव्येन विना तावत्तस्य तावद्विनिर्णयः ॥ दिव्यं किमस्ति वा तीक्ष्णमिति चिन्ता प्रजायते ॥ २७ ॥ इति तावद्विचारेण तप्ततैलनिमज्जनम् ॥ परमं दिव्यमि-

६९

त्युक्ता दृष्टो नारायणस्तदा ॥ २८ ॥ ततः परं समाहूय लक्ष्मीकान्तः शिवार्चकः ॥ चतुर्मुखं समालोक्य प्राह सन्तुष्टमानसः ॥ २९ ॥

नारायण उवाच ॥ दिष्ट्येन निर्णयस्तावदशैवस्य भविष्यति ॥ तेनैव तावन्नाशो भवत्वन्यादरेणतु ॥ १३० ॥ अशैवादरमात्रेण सर्वनाशो भविष्यति ॥ नरकेष्वपि संवासः भविष्यति न संशयः ॥ १३१ ॥ किमशैवादरेणापि कार्य्यमत्र विचक्षणैः ॥ तन्निर्णयोत्तरन्तस्य मतो नाशो भविष्यति ॥ १३२ ॥ अशैवनाशनायाहं स्रष्टः शंकरलीलया ॥ अतो मदीय कार्य्यस्य न कर्तान्यो भविष्यति ॥ १३३ ॥ नाशिवद्रोहिणां संगो मंगलाय भविष्यति ॥ अमंगलप्रदत्वेन तत्संगो निश्चितो यतः ॥ ३४ ॥ अलं किलाशैवजनानुरञ्जनैः महाघसम्पादनहेतुभूतैः ॥ वधाद्धमेनाखिलदुःखभोगो भविष्यतीत्येव विनिर्णयो मे ॥ ३५ ॥ अशैवसंगाघविनाशनाय यत्नः कृतश्चेत्सफलं समहत्यम ॥ सुखाय तावद्भवतीति मन्ये धन्योऽपि तेनैव भवामि नूनम् ॥ ३६ ॥ अशैवरूपाखिलपापरूपस्तन्नाशनायाद्य कृतः प्रयत्नः ॥ सुखप्रवाहाद्य नयत्यवश्यन्तन्नाशनोपायविनिश्चयो मे ॥ ३७ ॥ यत्र शैवाः सन्ति तत्रैव गत्वा चक्रे तावत्तच्छिरः कृन्तनानि ॥ कृत्वा तावद्दूरतां याति तादृक् तस्य शक्तिः कुंठिता तत्र नूनम् ॥ ३८ प्रबलारिः विनाशनाय चक्रं गिरिशेनापि तथा पुरैव सृष्टम् ॥ प्रबलारिरशाङ्कुरस्ततः स्यात्खलु चक्रेण विनाशएव तस्य ॥ ३९ ॥ चक्रेणाशैवनाशो कथमपि न सुखाभाव बुद्धिर्भवेन्नो ॥ तेनानन्दप्ररूढिर्भवति च बहुधा तत्कृतानाशाय

मन्यत्

चक्रम् ॥ ४० ॥ उद्युक्तश्चेति मन्ये स ततमयि मन तत्कृत्यत्किमेवं दुःखलोभावि रौद्रादपि दहनकुलादन्यतो वा यमाद्वा ॥ ४१ ॥ धन्यञ्जी
वनमेव तावदधुना विश्वेश्वराराधनात्तद्धि मुख्यार्तिसाधनपरम् चित्तं यतो जायते ॥ पुण्यै रेवमुपार्जितं खलु मनस्तेनास्य तोषो
महान्वृद्धिं यास्यति सम्पदा सह सदा श्रीविश्वनाथेच्छया ॥ १४२ ॥ इति श्रीशिवरहस्ये हराख्ये तृतीयांशे उत्तरार्धे ज-
नक याज्ञवल्क्य सम्वादो नाम चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ याज्ञवल्क्य-
उवाच ॥ इत्युक्त्वा स हरिस्तत्र चतुर्मुखमुखान् सुरान् ॥ तत्रैव दिव्यसामग्री सम्पादनरतोऽभवत् ॥ १ ॥ ततः सम्पाद्य साम
ग्रीं दिव्यस्य स हरिस्तदा ॥ तप्त तैल कटाहेषु प्रविष्टः स्वयमास्तिकः ॥ २ ॥ महेश्वरानर्चनदूषणाद्यैर्जातानि पापानि ल
यं प्रयातु ॥ अनेन दिव्येन ममेति मत्वा तेषु प्रविष्टः कमलान्वितोऽपि ॥ ३ ॥ पश्चाच्चतुर्मुखस्तत्र प्रविष्टस्तदनुज्ञया ॥ सरस्व-
स्वत्या सह प्रीत्या शिवपूजापरायणः ॥ ४ ॥ इन्द्रः पुलोमजा युक्तो जयन्तेन समन्वितः ॥ ~~तदा तेषु प्रविष्टस्ता~~ ॥ तप्त तैल क
टाहेषु प्रविष्टस्तदनुज्ञया ॥ ५ ॥ सूर्यादयः प्रविष्टास्ते स्व कुटुम्ब समन्विताः ॥ स्वपुत्रैरपि संयुक्ताः स्वदायाद समन्विताः ॥
॥ ६ ॥ तदा तेषु प्रविष्टांस्तान कटाहेषु सुरान्मुहुः ॥ पश्यन् खिन्नाननो जातो मदनः शिवदूषकः ॥ ७ ॥ ततः सर्वे समुत्था
य कटाहेभ्यः प्रहर्षिताः ॥ तान्दृष्ट्वा सुतरां खिन्नो मदनो विनताननः ॥ ८ ॥ ततस्तं मदनं दृष्ट्वा दुष्टं नारायणस्तदा

प्राहतं मदनं मत्तं शिवनिन्दानलाश्रयम् ॥ ९ ॥ नारायण उवाच ॥ रेरे मदन दुर्वृत्त किं त्वया दूषितः शिवः ॥ अयं प्र
लय कालाग्निः स्वदर्थं समुपागतः ॥ १० ॥ रेरे मार दुराचार दुष्ट शिष्टा विदूषक ॥ शिवः शिव प्रदत्वेन न ज्ञातो निन्दि
तः कथम् ॥ ११ ॥ सर्वामराधीश्वरमिन्दुखण्ड कर प्रसादाकर शेखरं तम् ॥ जानन्ति सर्वे मुनयः सुराश्च स निन्दितः
किं स्वविनाशकाले ॥ १२ ॥ अकाल मृत्युः खलु काल काल निन्दानलो नूनमुपैति दूरात् ॥ तेनैव दाहो भविता तवेति
हा तात किं दुष्कृतमीदृशं न्ते ॥ १३ ॥ मनोहर विग्रहोसि सौन्दर्यराशिस्त्वमिह त्रिलोक्ये ॥ कथं त्वयासीद्गिरिशापरा
धो हा पुल हा पुल हतो हतोस्मि ॥ १४ ॥ इदं न्न विज्ञात महो विचित्रं पुत्रोपि शत्रुत्वमुपागतोसि ॥ त्रिनेत्र निन्दा
करणेन तावच्चक्र प्रवृत्तिस्त्वयि नोचिता किम् ॥ १५ ॥ महेश निन्दाकरणोद्यतानाम् ॥ नाशाय चक्रं खलु सृष्टमादौ ॥
अतः परं चक्रमिदं शिरस्ते हत्वा श्रमं यास्यति वह्नितुल्यम् ॥ १६ ॥ कोवा जीवितुमिच्छति त्रिनयनाहंकार शंकारोरेकं
नैव स पश्यति त्रिपुरस्म दावानलो लीलया ॥ सर्वानप्यमरानपार कुशलः श्रीकालकालः स्वयम् ॥ कस्तेनापि समः
सुरेषु स शिवो देवाधिदेवोभवः ॥ १७ ॥ खद्योतानिव पश्यति त्रिनयनस्त्वस्मान्सुरान्सर्वथा कोवा तत्तुलनीयतामुपाग
तो यद्भृत्य भृत्यैरपि ॥ ब्रह्माण्ड प्रलयः कृतोपि बहुधा दग्धाः सुराः सोरगाः ॥ पूर्वं शंकर निन्दया भ्रमवशा

स्तेनापि तुल्योऽस्तिकः ॥१८॥ श्री विश्वेश्वर सागरे वयममी नीरार्णवः केवलम् ॥ कः कालोपि पुरन्दरो विधिरपि व्यग्रस्तथैवास्म्यहम् ॥१८॥ तत्कम्पेन परन्तयामि दिवसान्मां कालकालः ॥१९॥ कदा कर्त्तुं वाञ्छति कालपाशवशगं क्रोधानलेनेत्यपि ॥१९॥ अन्धास्तत्र दृशौ वयं सुरगणाः सर्वेऽपि वेदास्तथा गन्धर्वा अपि किन्नराश्च मुनयः सिद्धाश्च तद्वैभवः ॥ पारावार इवामरैरपि न विज्ञातोऽथ्यगाधो यतः ॥ यतः तं देवं वयमप्रमेयविभवं गौरीधवं भावयेत् ॥२०॥ यद्भालानलकोटिकूटपटलासंग स्फुलिङ्गांगजज्वालाजाललवोपि लोकविलयं कर्त्तुं प्रवृत्तोऽधुना ॥ तत्सामर्थ्यमपारवेदनिकरागम्यञ्चरम्यं महत्काम्यञ्चोतिन कामनाविषयतां प्राप्तः स वेदः शिवः ॥२१॥ वक्तुं कोपि सहस्रकोटिरसनाजालाश्रयो नास्वयं सामर्थ्यं गिरिशस्य शक्त इति वा बुद्धः प्रवृद्धो भवेत् ॥ तं वेदान्तवचोविचारविरत व्यापारसारं हरं वन्दे शंकरमिन्दुशेखरमुमाहारादरं सादरम् ॥२२॥ धिग्धिग्जीवनमार तव किं तन्निन्दया जीवनं किं मेरोरपि निन्दकः परमणुर्हा हा कुबुद्धिः कथम् ॥ वत्ताते विलयाय केवलमियं सा मृत्युरित्येवमे तन्निन्दामतिरित्यवैमि धिगिदं ते जीवनं दुर्मते ॥२३॥ इति तद्वृत्तसंयोगे युक्ते सति नारायणे तदा ॥ विधिराह हरिं कोपाद्भृकुटीकुटिलाननः ॥२४॥ ब्रह्मोवाच ॥ किं दृश्यते तच्छिव निन्दकास्यं तवापि किं दुर्मतिरेवमासीत् ॥ पापिष्ठवर्यः शिवनिन्दकोऽयं तद्दर्शनेनाप्यघकोटयः

स्युः ॥ २५ ॥ लोके कोऽपि न दृष्ट एव बहुधा देवेषु चान्येषु वा गौरीनायकनिन्दकोऽयमदनं त्यक्त्वा प्रमत्तं परम् ॥ एतत्संहरणाय तावदधुना ब्रह्मास्त्रमभ्यागतम् । नूनं जीवनमस्य नेति विदितं तज्जीवनाशात्त्यज ॥ २६ ॥ चक्रेण त्रिपुरारिनिन्दकमुखच्छेदेन तज्जिह्वया सार्कं तन्मुखमप्यमेध्यपतितं दृष्ट्वा प्रहृष्टा वयम् ॥ यामो याम्यपदं प्रयातु मदनस्तद्दूतपादाहतस्तत्क्रूरनखाग्रदारितवपुः पापैः परान्तिष्ठतु ॥ २७ ॥ इति तद्वचनं श्रुत्वा कमलाकुललोचना ॥ कमला कमलाकान्तमशान्तं मन्दमाहसा ॥ २८ ॥ कमलोवाच ॥ अनेन यद्यप्यपराध एव कृतः शिवाकान्तविनिन्दकेन ॥ एतद्विना शापकथं प्रवृत्तिः पितुस्तवापीति निवृत्तिरिष्टा ॥ २९ ॥ शिवार्चनायामिह सः प्रवृत्तः कर्तव्य एवाद्य विलम्बमान्तम् ॥ विहाय सायं ससहाय एव करोतु विश्वेश्वरपूजनञ्च ॥ ३० ॥ विश्वेश्वराराधनसक्तचित्तं कुमारमेनं कुरु मारमाशु ॥ एतत्समः कुत्र सुतोऽस्ति लोके पश्यास्य सौन्दर्यमपारमेनम् ॥ ३१ ॥ कथं पुरा शिक्षित एव नायम् ॥ त्वया विरूपाक्षसमर्चनाय ॥ आशिक्षया तावदयं किलासीद्विश्वेशनिन्दानिरतोऽपि मारः ॥ ३२ ॥ पित्रा सुतः शिक्षित एव बाल्ये सदा सदाचाररतः परं स्यात् ॥ दोषस्तवायं जनकस्य नूनं दुःखं कथं वा तव नाधुनापि ॥ ३३ ॥ पुत्रः शाम्भवविद्यया यदि भवेद्देवापवित्रस्तदा तत्पुत्रानवलोकनेन जनकः किं जीवनं वाञ्छति ॥ ३४ ॥ स्वस्य प्रीतिकथनं ते मतिरभूत्पूर्वं सुतः शिक्षितः ॥

तातानन्दसमृद्धिहेतुरिति किं न ज्ञात एवादरात् ॥ हा हा मारसमः कथं भुवि भवेत्पुत्रः जिनेन्द्रार्चकः ॥ सोयं वेदमृतो मृतामृत
मयं भाग्यन्ततः किं भवेत् ॥ एतद्भाग्यसमन्न भाग्यमिति मे भात्येव सा दुर्भगा यत्पुत्रस्त्यन फाललोचन पदांभोजार्चनात्या
दरः ॥ ३५ ॥ इति तद्वचनं श्रुत्वा हरिः खिन्नः पुनः पुनः ॥ खेदाश्रुलोलनयनः कमलामाह दुःखिताम् ॥ ३६ ॥ शिक्षितोपि ब-
हुधा मदनोयमनेशपूजनरतो रतिलोलः ॥ दुर्भगोयमत एव लयोस्य प्राप्त एव दुरदृष्टवशेन ॥ ३७ ॥ शङ्करार्चनपरो भव मा
र प्रातरित्यपि मुहुर्मुहुरुक्तः ॥ सुप्त एव बहुधा न करोति प्रातरिन्दुमुकुटाभरणार्चाम् ॥ ३८ ॥ शंगालिंगकलनं मदनोयम
संगवेपि न करोति कुशीलः ॥ दुर्भगोयमत एव न सायं शङ्करलिङ्गभजनं न करोति ॥ ३९ ॥ किं करोमि कमले मम भाग्यं तादृशं
खलु न जातमपारम् ॥ येन मत्तनयतामुपयातो नाभवद्गिरिश पूजनशील ॥ ४० ॥ शूलपाणि चरणाम्बुज पूजाजी
वनो यदि सुतोऽपि न जातः ॥ दुर्भगः खलु स एव पिता स्यादित्यवैमि कमले स कुशीलः ॥ ४१ ॥ शंकरार्चनपरोयदि
मारो किं कुमारगणनापि समस्यात् ॥ किन्तु केवलमयं शिव एवेत्यादरो हरपदेपि शयामि ॥ ४२ ॥ मारस्यापि यदि
त्रिलोचनपदांभोजार्चनात्यादरस्तर्हि स्यात्कुशली सदाप्यहमहो मे कालभीतिः कुतः ॥ ४ ॥ भीतिर्मे प्रलया
नलादपि तथा भाग्यं कुतः स्यादिदं भाग्यं शंकरपूजनैरगणितैः स्यादित्यवैमि प्रिये ॥ ४३ ॥ एतद्रक्षणसाधन

न्नकमले विश्वेश्वराराधनं जातं पूर्वमतः परं किमधुना तन्नाशकाले मति॥ किन्तत्पूजन योग्यतापि दृहनाक्रा
न्ते कथं मन्दिरे कूपस्या[illegible] त्खनितो जलेन स कथं तच्छान्तिहेतुर्भवेत्॥४४॥ इति तद्वचनं श्रुत्वा कमला
व्याकुला मुहुः॥ विललाप तयासाकं रतीसुरतलालसा॥४५॥ तद्विलापं परं श्रुत्वा विललाप पुलोमजा॥
वाणी च चुक्रुशुर्देवाः किन्नरा अपि चुक्रुशुः॥४६॥ तद्रोषं रुदनध्वनियुताः सर्वोपागिरि कन्दराः॥ प्रतिध्वनि
समाक्रान्तास्ते विलापाकुला इव॥४७॥ चकम्प वसुधा चेलुः शैला अपि कुलाचलाः॥ दिग्दन्तिनः सशेषा
स्ते सकूर्मा अपि सिन्धवः॥४८॥ ध्वनिः श्रुतास्तएवासीत् गौर्य्या कैलाशमन्दिरे॥ सापि कम्पसमाक्रान्ता
जयामाह विचक्षणाम्॥४९॥ गौर्य्युवाच॥ जयेकोयं ध्वनिः कस्मादुत्पन्नः कम्पसाधनम्॥ किं कैलासाचल-
स्यापि वार्ताप्यन्यस्य का भवेत्॥५०॥ सप्त पातालमूलानि भित्वा मूलानि केवलम्॥ कैलासस्यास्य तिष्ठति कम्पः
कस्मादभूदिह॥५१॥ रोदन ध्वनिरेतावानशान्तो गिरि गह्वरे॥ कथमद्य समुत्पन्नः प्रलयः [illegible] किमुपागतः॥५२॥
महाप्रलयकालीन ध्वनि तुल्य ध्वनिः खलु॥ समुत्पन्नोयमधुना किं भविष्यति॰ तद्वद॥५३॥ [illegible] इति
तद्वचनं श्रुत्वा जयाप्यत्यन्त[illegible] विस्मिता॥ तामाह गिरिजे नाहं जानामीति विशेषतः॥५४॥ ततः

ग्यमहो भवानि प्राप्तं त्वया शंकरपूजनेन ॥ इतोऽपि किं वद भाग्यमम्ब लम्बोदरस्ते स सुतः कुमारः ॥ ६९ ॥ अस्मा-
स्माकमिदं खलु महद्भाग्यं सभाग्या वयं त्वत्पादाम्बुरुहावलोकनसमुत्पन्नोरुधर्माश्रयाः ॥ ~~धन्या एव जगत्त्रयेऽ~~
~~पि बहुधा मान्यास्त्वदीया वयम् ॥ त्वत्पादाम्बुरुहावलोकनसमुत्पन्नोरुधर्माश्रयाः ॥~~ इत्थं ॥ धन्या एव जगत्त्रयेऽपि
बहुधा मान्यास्त्वदीया वयं किल स्यात्कृतकृत्यतामुपगतस्त्वत्पादुकाराधकः ॥ ६८ आद्या शक्तिरुमे त्वमेव जननी
लोकस्य सर्वाप्रिया तल्लीलेयमुमा सहाय चरणाम्भोजार्चकाः केवलम् ॥ सृष्टिञ्च प्रलयञ्च कर्तुमसकृत्कृत्वा
स्थितिं मापरं शक्तिः शंकरलीलयैव भवतीत्यस्माकमासीन्मतिः ॥ ७० ॥ भाग्यन्ते गिरिराजराजतनये किं वर्णनी-
यं मया यद्वेदान्तगुणैरपि प्रथमतो न ज्ञेयमेवामरैः ॥ गन्धर्वैरपि किन्नरैरपि तथा सिद्धैर्मुनीन्द्रादिभिर्दुर्ज्ञेयम्
खलु तत्रपारसहितं तन्नाशनार्तोऽपि न ॥ ७१ ॥ एवं सम्भाषयेव युगास्तावद्गतास्ततः ॥ शिवनिन्दानलज्वालाप्रवि-
ष्टसुरमन्दिरम् ॥ ७२ ॥ वैकुण्ठभुवने प्राप्ता सत्यलोकन्ततः परम् ॥ स्वर्गलोकं ततः प्राप्ता दिगन्तान्यपि सत्वरम्
॥ ७३ ॥ ततः प्रविष्टा सा पातालं भोगिमण्डलम् ॥ कम्पयामास शेषेण प्रपलाय्य गतन्ततः ॥ ७४ ॥ सासप्तपा-
ताल विभेदनेन सम्प्राप कूर्मं स च कम्पमाप ॥ ततः स कूर्मः प्रलयानलन्तम् प्राहार्तिमन्दं प्रणतोऽपि नम्रः

शनैराह गिरिजा विजये परम् ॥ गिरिशो वेद सर्वज्ञः प्रष्टव्य इति सादरम् ॥ ५५ ॥ ततस्तामाह विजया गिरिक्वमहेश्वरः ॥
क्वाहं साकं महेशेन वक्तुमिच्छामि वा कथम् ॥ ५६ ॥ अधुना शंकर प्रायः कुपितोऽप्यन्यथा कथम् ॥ कैलाशाचल
कम्पोपि धराकम्पोऽपि वा शिवे ॥ ५७ ॥ प्रायः सुरेषु यः कोपि दुरात्मा त्रिपुरान्तके ॥ चकार सुरसामान्य मतिं स्वविलयो
द्यतः ॥ ५८ ॥ देवाधिदेवो गिरिजे धवस्ते सर्वामराराध्यतमः स सोमः ॥ अवाप्त कामोन्य सुरास मानस्त्रिलोचनोपीति
वदन्ति वेदाः ॥ ५९ ॥ तं काल कालं विदुरिन्दुमौलिमतः स मृत्युञ्जय इत्यपारैः ॥ वेदान्त वाक्यैः स्तुत एव तेन तुल्यो न
कोप्यस्ति सुरेषु गौरी ॥ ६० ॥ सुराः परं शङ्कर किङ्करास्ते सर्वेऽप्युपेन्द्रेन्द्र चतुर्मुखाद्याः ॥ तज्जन्म नाश स्थिति हेतुभू
तः समस्तनाथः खलु विश्वनाथः ॥ ६१ ॥ यल्लीलया विष्णु चतुर्मुखाद्याः सर्वे सुराः स्थावर जङ्गमाद्याः ॥ जन्म
स्थितिन्नाशमपि प्रयान्ति भवान्ति तावद्भव पूजकास्ते ॥ ६२ ॥ अपार कल्याण गुणार्णवस्य महेश्वरस्यामितवि
क्रमस्य ॥ को वा समः स्याद्भुवनेषु गौरि स सर्व देवार्चित पादपद्मः ॥ ६३ ॥ क्षणेन नारायण पद्मजादीन् शिवः
समुत्पाद्य स पालनञ्च कृत्वापि संहार वशान्करोति स्वलीलया केवलमिन्दुमौलिः ॥ ६४ ॥ उमे तपस्तावदपारमेत
तवापि येनेन्दुकलावतंशः ॥ भर्त्ता तवासीत्कमलापि दासी दासाः सुरास्ते हरिपद्मजाद्याः ॥ ६५ ॥ इदम्महद्भा

~~सतासेतु~~ कूर्म उवाच ॥ नमो नमस्ते प्रलयानलाय नदी नदांभोनिधि शोषकाय ॥ भूमण्डलाखण्डलनाशनाय शैलेन्द्र
शृङ्गाग्र विनाशकाय ॥ ७६ ॥ नमो नमः फाल विलोचनाग्नि प्रभूत सूक्ष्मावयवाय तुभ्यम् ॥ तवाहुतिस्याज्जगदेव नूनम्
आपोशनायाब्धि जलं समस्तम् ॥ ७७ ॥ नारायणस्याद्दुपदंश एव चतुर्मुखः पेयतया प्रसिद्धः ॥ लेह्यस्तयेन्द्रस्तव शक्ति
रेवं नमो नमस्ते वरद प्रसीद ॥ ७८ ॥ कालानलत्वेन जगत्त्रयेपि नमः प्रसिद्धाय नमो नमस्ते ॥ अद्याधुनैव प्रणतार्ति
नाशं कुरु प्रसीद प्रणतोऽस्मि तुभ्यम् ॥ ७९ ॥ आर्त्तार्तिनाशाय तव स्वरूपं सङ्कल्पितं भाल विलोचनेन ॥ स सत्य संक
ल्प इति प्रसिद्धं तस्मै नमस्तेऽस्तु पुनर्नमस्ते ॥ ८० ॥ येनापराधोऽस्ति कृतः स एव विनाशनीयः स न रक्षणीयः ॥ तद्र
क्षणे प्रत्युत नाश एव स्वस्यानुकूल्यं खलु तन्न नेष्टम् ॥ ८१ ॥ सर्व स्वतन्त्रं तमुमासहायं मन्ये तदन्यः परतन्त्र
एव ॥ ~~त्वामिन्द्र~~ त्वां विष्णुरिन्द्रोपि विधिर्यमोपि सूर्योपि चन्द्रोप्यहमप्यवश्यम् ॥ ८२ ॥ अत्रास्म्यहं स्थापि
त एव पूर्वं महेश्वरेणैव यमान्तकेन ॥ अतस्तदाज्ञावशगाय मह्यं दया विधेया गिरिशेन नूनम् ॥ ८३ ॥ त्वयापि
तावन्न दया विधेया किमद्य मह्यं शिवपूजकाय ॥ शिवार्चनेमेव्रतमिन्दुमौलिः पिता च माता च सखा च बन्धुः
॥ ८४ ॥ अत्रेदमत्यद्भुत शंभुलिंगं प्रपश्याधुना पश्य समर्चयाशु ॥ कालानलाभं कमलासनाद्यैरिदं सुरा पूजित

मेघ लिङ्गम् ॥ ७५ ॥ इदं घनं बिल्ववनं प्रपश्य पश्यामृत संकुलानि ॥ नीलोत्पलान्यत्र विलोकयाशु तैरर्चयेमं गिरिजासहायम् ॥ ७६ ॥ दृष्ट्वापि लिङ्गं पुरतोऽपि शार्ङ्गं योनार्चयित्वाऽप्ययतः प्रयाति ॥ सयाति नाशं नरकं च याति त्वयापि तत्वं विदितं शिवस्य ॥ ७७ ॥ इत्युक्तं तद्वचः श्रुत्वा स तदा प्रलयानलः ॥ मूर्तिं धृत्वा विशेषेण पूजयामास शंकरम् ॥ ७८ ॥ नीलोत्पलैर्विल्वपत्रैः कमलैरमलैरपि ॥ ततः प्रणम्य सन्तुष्टः कूर्ममाह सपावकः ॥ ७९ ॥ प्रलयानल उवाच ॥ धन्योसि कूर्म सततं शिवपूजापरो भव ॥ इदमत्युत्तमं लिङ्गमुमाकान्त प्रियं खलु ॥ ८० ॥ एतल्लिङ्गार्चनान्मुक्तिः प्रवृद्धा ते भविष्यति ॥ धन्योसि कृतमेतच्च रक्षणीयं प्रयत्नतः ॥ ८१ ॥ एतैर्विल्वदलैर्नित्यं पूजयस्व महेश्वरम् ॥ स एवाभीष्टदो लोके पूजितः शंकरः खलु ॥ ८२ ॥ इति तद्वचनं श्रुत्वा स कूर्मः प्राह पावकम् ॥ अति श्रान्तोसि विश्रम्य कियत्कालं व्रजादरात् ॥ ८३ ॥ मधुरा घृतकुल्येयं घृतं पिब यथेच्छया ॥ घृताहारस्य ते तावदपारं घृतमस्ति च ॥ ८४ ॥ युगाश्च बहवो जातास्तव पर्यटनादपि ॥ गतं दिगन्तपर्यन्तं त्वया तिष्ठ यथा खलु ॥ ८५ ॥ अपूर्वं क्वापि न प्राप्तं दृष्टं केनापि नांशमम् ॥ यस्मादुद्वासिता लोकाः प्रलयानलभीरुभिः ॥ ८६ ॥ इति तद्वचनं श्रुत्वा स श्रान्तः प्रलयानलः ॥ पपौ युगान्तपर्याप्तं तद्घृतं शंकरार्पितम् ॥ ८७ ॥ मधु पीत्वा

ततः साधु सुधां पीत्वा मुहुः पुनः पुनः ॥ प्रहृष्टः कूर्म्ममासाद्य तमुवाच कृताञ्जलिः ॥ ९८ ॥ प्रलयानल उवाच ॥
पुष्टोऽसि घृतपानेन तुष्टोऽस्मि गिरिशार्चनात् ॥ अतोऽन्न गतकष्टोऽस्मि शिष्टः प्राणैः किलाधुना ॥ ९९ ॥ युगानाम
युतं जातं मम पर्यटनात्परम् ॥ शिवलिङ्गानि दृष्टानि वै कुण्डादिषु कोटिशः ॥ १०० ॥ न दृष्टमीदृशं लिङ्गं कुत्रापि सु
खदं परम् ॥ भुक्ति मुक्ति प्रदं लिङ्गमिदमेवेति मे मतिः ॥ १ ॥ शिवार्चनरतोऽसि त्वं शिवधर्मान्वदाधुना ॥ यद्धर्म श्रवणादेव
स्यादेव स्यादेव मम विप्लवः ॥ २ ॥ दुःखान्यज्ञान मूलानि तन्नाशो येन जायते ॥ तद्धर्मान्वदानिश्चित्य सखासि त्वं
यतो मम ॥ ३ ॥ शिवार्चकः सखा भ्राता पिता माता च जीवनम् ॥ शिवार्चकात्परः को वा हितवक्ता जगत्त्रये ॥ ४ ॥
इति तद्वचनं श्रुत्वा कूर्मो भस्मविभूषितः ॥ रुद्राक्षमालाभरणः स्मृत्वा प्राह महेश्वरम् ॥ कूर्म्म उवाच ॥ ऋतं सत्
परं ब्रह्म पुरुषं कृष्ण पिङ्गलम् ॥ ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः ॥ ६ ॥ एतादृशं महादेवं ज्ञात्वा यः पूजयेत्सदा ॥
स तरत्येव संसार सागरं पातकाकरम् ॥ ७ ॥ संसार प्रलयानलेन बहुधा तप्ताः परं शंकरं विस्मृत्यैव पुनः पुनर्जननानि जरा
नाशान्प्रयान्ते वै तेषां शङ्कर पूजनेन रतिरित्यज्ञान गर्त्ते परं मग्ना एव भवन्ति भग्न मनसो भुग्नाश्च संसारतः ॥ ८ ॥ अहो
न जानन्ति महेशशक्तिं संसार बन्ध प्रलय प्रसक्ताः ॥ सा शक्तिरीशस्य परं समग्रा ज्ञातुं न शक्या विबुधैर्न

वाचः ॥९॥ यथाकथञ्चिद्गिरिशार्चनेन कालो विनेयः खलु सावधानम् ॥ विना न तेनास्ति च जीवनन्तु तदेव तावत्खलु
जीवनञ्च ॥१०॥ अस्माभिः शिवलिङ्गपूजनविधिर्ज्ञातो न सर्वात्मना । ब्रह्माद्यैरपि केवलं श्रुतिमता भातिर्ललाटे परं ।
द्राप्य
कैश्चिद्भाग्यातिभाग्यतः ससलिलं बिल्वीदलं दीयते लिङ्गे मङ्गलदायके शिवाशिवे त्युक्ता नमोन्तं पदम् ॥११॥ अ-
स्माभिर्मन एव तावदधुना लिङ्गे प्रदेयं मुदा तेनैवादरतो महेश्वरपदाम्भोजार्चनम् सिध्यति ॥ शसिद्धन्त्येव फला
नि तावदसकृत् रम्याण्यपाराण्यतः ॥ चित्तं स्वच्छमिदं भविष्यति परा मुक्तिर्भविष्यत्यतः ॥१२॥ महेश लिङ्गार्चनमेक
रूपं लब्धन्निधानं निधयोपि तेन ॥ न भापिता वत्स्नभवन्ति सत्यं तो किं पुनस्साधिन तेन मुक्तिः ॥१३॥ लिङ्गात्मकं
साधनमेकमेव सृष्टं महेशेन विशेषतस्तु ॥ तन्मुक्तिबीजं मुखबीजमेकम् सर्वार्थसम्पत्करमेकमेव ॥१४॥ किंकि
न्मुरा पुण्यमपारमादौ कृतं शिवाराधनबुद्धिहेतुः ॥ इदं परं जीवनमेव पुण्यं धन्यं शिवाराधनसाधनं मे ॥१५॥
ते साधवस्ते कृतपुण्यरूपास्ते पुण्यमूलैस्तु परं प्ररूढाः ॥ ये शंभलिंगार्चनसाधनेन पूताः प्रहृष्टाश्वतयाति पुष्टाः ॥
॥१६॥ लोके दुर्लभ एव साधुरिति मे बुद्धिः स साधुः परं शंभाराधनतत्परः सितिलसद्भूतित्रिपुण्ड्रांकितः ॥ तेनैवेन्दु
कलावतंसभजनानन्दप्ररूढे न मे प्रीतिर्वृद्धिमुपैति तेन सह मे सङ्गः सदा वाञ्छितः ॥१७॥ शिवार्चनालापन

मेव लोके संसार दावानल जालरूपम् ॥ ~~मन्येततस्तेन सहास्तु लोके संसारदावानलमेव जालरूपम्~~ ॥ मन्ये ततस्तेन
सहास्तु सङ्गः समङ्गलानायक लीलयास्यात् ॥१८॥ अस्माभिरर्धेन्दु कलावतंस प्रभावविज्ञान विशेषशून्यैः ॥ शं-
गाङ्गः सङ्गेनाविनेय एव कालः कथञ्चित्कलिनाश हेतुः ॥१९॥ अभूत पूर्वं फलमेकमेव यच्छङ्क लिङ्गार्चन लक्षण
मे ॥ अनेन तावत्प्रभवन्ति लोकाः कीलाल मात्रार्पणतोपितत्स्यात् ॥२०॥ सकीलाललवेनापि काल कालः समर्चितः
ददाति मुक्तिं भुक्तिञ्च किं पुनः कुसुमार्चितः ॥२१॥ जीवने नार्चितो जीवान् जीवयत्येव शंकरः ॥ अतो जीवैर्मनुष्या-
धर्चनीयः सदाशिवः ॥२२॥ यदिस्याज्जीवनापेक्षा जीवानां जातु जीवनैः ॥ पूजनीयः सकृद्वापि जीवने सति
शंकरः ॥२४॥ [२३] करोति कौतुकं लोके सगौरीकामुकः खलु ॥ किल पत्रार्पणेनापि तुष्टो मुक्तिं प्रयच्छति ॥२५॥ [२४]
कैवल्य कान्ता रमणं करोति करोति भूमण्डल नायकञ्च ॥ सकृत्स्मृतो वा प्रणतोऽपि भक्त्या समर्चितो वा गिरिजासहा
यः ॥२६॥ [२५] एतादृशो यद्गिरिजासहायः कृपाम्बुराशिः सकृतापि पुण्यैः ॥ नित्यं समाराध्यत एव तेभ्यो ददाति मु-
क्तिं प्रददाति भुक्तिम् ॥२७॥ [२६] अ त्रापरं शंकरपादपद्म प्रणाम पूजानिरतान नूनम् ॥ तेषां कृतान्तालय पूरणाय
निर्माणमित्येवमतिर्ममाभूत् ॥२८॥ लोके कोपि न शङ्करार्चनपरो दुःखालयो जायते ॥ संसारानभिभ

शिवरह०
१२६

तत्रैव सपरं भुक्त्वापि भोगान्बहून् ॥ मुक्तः शंकरकिङ्करैः सह सदा कुर्वञ्छिवाराधनम् ॥ कैलासाचलमन्दिरान्तरमहोद्यानेपरं क्रीडति ॥ २७ ॥ उन्मादेन विना शिवार्चनपरो भूतिस्त्रिपुण्ड्रांकितो रुद्राक्षाभरणो रमापतिलसन्नेत्रारविन्दार्चितम् ॥ स्मृत्वा शंकरपादपद्ममनिशं बिल्वोदलैरर्चयन् लिङ्गे शंकरमिन्दुमौलिभजनासक्तः कृतार्थो भुवि ॥ १२८ ॥ इति श्रीशिवरहस्ये हराख्ये तृतीयांशे उत्तरार्धे याज्ञवल्क्यजनकसम्वादे नाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ याज्ञवल्क्य उवाच ॥ इति तद्वचनं श्रुत्वा काललोचनपावकः ॥ कूर्ममाहात्म्यहृष्टात्मा सन्तोषं जनयन्परम् ॥ १ ॥ अग्निरुवाच ॥ धन्योसि शंकराचाररत तत्पर शंकर ॥ त्वद्दर्शनेन सन्तोषः समभूदद्य मे ध्रुवम् ॥ २ ॥ काललोचनसङ्गेन यत्सुखं समभूत्पुरा ॥ तत्तद्वियोगतो नष्टं तेन दुःखमभून्मम ॥ ३ ॥ तद्दुःखापगमोऽन्त्यो लिङ्गस्यास्य विलोकनात् ॥ एतल्लिङ्गार्चनेनापि श्रमोऽपि विवेदतोऽधुना ॥ ४ ॥ शिवोपहारभक्तस्याघ्राणादपि ॥ शिवोपहारलाभोऽयमपूर्वः खलु देहिनाम् ॥ ५ ॥ हरत्यघानि ऽन्यपापानि दर्शनादपि वस्तुतः ॥ हारोपहारस्तत्पानभोजने मुक्तिरिष्यते ॥ ६ ॥ हारोपहारमाघ्राय मुक्ताः पूर्वं मुनीश्वराः ॥ सन्तानमुक्तिकरणं यथा शंकरपूजनम् ॥ ७ ॥

ह० तृ० उ०
अ० ३६

हरोपहाराधनवीतपापाः शिवस्वरूपाः सुकृतानुरूपाः ॥ विध्वस्तसंसारविशेषतापाः प्रनष्टकोपाश्च गतापि शापाः ॥८॥
किंच त्वया भूरितरोऽतिभारो धृतः कथं वाविधृतोऽतियत्नैः ॥ विना नतं धारणमित्यवैमि धैर्यं कथं वा तव ज्ञातमेवम् ॥
॥९॥ इति तद्वचनं श्रुत्वा कूर्मः प्राहातिहर्षितः ॥ तस्यापि जनयन्तोषं स्वरूपकथनादपि ॥१०॥ कूर्म उवाच ॥ धृता महीश
ङ्कर लीलयैव निमित्तमेवाहमिति प्रयत्नः ॥ न कोऽपि मे पावक तावको वा लोकस्य कस्यापि विशेषकार्ये ॥११॥ कार्य्या
णि तावद्बहुधा भवन्ति महेशलीलाप्रसरादवश्यम् ॥ स एव कर्ता स च रक्षकोऽपि स एव हन्ता निजलीलया हि ॥१२॥ यल्ली
ला प्रसराद्भवन्ति भुवनान्यत्यद्भुतानि प्रभोः शम्भोस्तस्य किमस्त्यशक्यमधुना भूधारणादीन्यपि ॥ तत्पादाम्बुज
रेणुरेणुकलनात्संसारभारो महान्नाशं याति तदङ्घ्रिपङ्कजरजःसंसेवनैः किं भयम् ॥१३॥ तं प्राहुर्निगमाः परं शिवमि
ति व्यक्तेतरैर्गद्गदैः ॥ वाक्यैरिन्दुकलावतंसमगजाकान्तं प्रशान्तं मुहुः ॥ तं देवोत्तममप्रमेयविभवं यः पूज
येदादरात् दानन्दोदय एव तस्य हृदये संसारपीडा कुतः ॥१४॥ तं जानन्ति परं परात्परतरं ते शांकराः शंकरध्याना
राधनपूजनादिकथनास्ते मानहीनाः परम् ॥ धन्यं तं विदुरिन्दुशेखरपदांभोजार्चकं तं परं संसारार्णवकर्ण-
धार गिरिश श्रीपादपद्मार्चनम् ॥१५॥ लोके दुर्लभमेव तेन बहुधा सम्पत्समृद्धिर्भवेत् ॥ इष्टावाप्तिरनिष्टनाशनमपि

व्यक्तं मदीयं वचः ॥ भ्रान्ताः केचन कार्यमेतदधुना तावन्मयासाधितं सन्धानेन परेण तावदिति ते तावज्जगद्वञ्चकाः ॥१६॥ कर्ता शंकर इत्यवैमि विमलो मानाभिमानैर्विना तत्त्वज्ञः स इति त्वयापि विदितो लोके मयापि ध्रुवम् ॥ अत्युच्चोपल मध्य संस्थित महामण्डूक नीरप्रदः को वा तिष्ठति भूतलेति चतुरः स्वर्गेऽपि सत्येऽपि वा ॥१७॥ वैकुण्ठेऽप्यतिकुण्ठिताः सुरगणास्स्वाङ्गानि योगेऽपि ते तस्मादम्बर चुम्बि सुंदर जटाजूटो दितो धूर्जटिः ॥ नारी दुर्भरगर्भ धारण गुण व्यापार पारं गतो नोपेन्द्रो जननी कठोर जठरावासः प्रयासालसः ॥१८॥ इन्द्रो वा न चतुर्मुखोऽपि स तथा भूतस्ता[illegible] दृन्यस्तथा तस्मादम्बर चुम्बि सुन्दर जटाजूटोदितो धूर्जटिः ॥ आरक्तांबुदगर्जितान्वितधरासारांकुरोत्पादनव्यापारः प्रवदारोऽन्ते चतुरः को वा महेशादृते ॥१९॥ को वास्त्याद्यधुना शिवेतर[illegible] सुरेष्वन्येषु वा भूतले ॥ तस्मादम्बरचुम्बि सुन्दर जटाजूटोदितो धूर्जटिः ॥ तत्तावद्गिरिशं जगत्त्रय हिते तावत्स्वतत्त्वात्मकं संसाराम्बुधि तारकं विदुरुमा कान्तं प्रशान्ताश्रयाः ॥ २०॥ ते तावत् त्वदनुग्रहेण हृदये तं भावयन्तः परं गौरीकान्तमनन्त शोक विलयं कर्तुं प्रवृत्ताश्चिरम् ॥ २१॥ त्वयापि तावद्गिरिश प्रसादादन्नागतं कः किमिहागतोऽसि न नाम्नाभिमानः खलु सम्भृतस्ते महेशलीलेयमिति स्मरामि ॥ २२॥ तमेव तावन्महतो महान्तं महे-

भ्वरम् प्राहुरुमापतिं तम् ॥२२॥ भजामि तावत्तदनुग्रहेण तमेव लिङ्गेन समर्चयामि ॥ भूभारलेशोपि ममाधुना
किं लिङ्गार्चकस्यास्य महान्बिभर्ति ॥२३॥ महेश लीलापरमित्यवैमि नो चेद्गतं जीवनमेव नूनम् ॥ कालस्त्वा
वद्गतो भूयाद्देवं सम्भाषणात्तयोः ॥ तदानीमद्भुतं तेजः ताभ्यान्दृष्टं भयापहम् ॥२५॥ तन्दृष्ट्वा पावकः प्राह तं कूर्ममतिभी
षणम् ॥ किमेतद्दिव्यवपुष्म्य वृत्तान्तं वद सादरम् ॥ कूर्म उवाच ॥ देवाः समागतास्तावत्सर्वे नारायणादयः ॥ त्व
द्वीयेन भयेनैव व्याकुलाः खलु सत्वरम् ॥२७॥ प्राशनीयोपि निर्णीतः तैरेव बहुधा ततः ॥ तच्छासनाय शस्त्राणि
प्रयुक्तानि बहून्यपि ॥२८॥ नारायणास्त्रं चक्रञ्च तद्विनाशाय केवलम् ॥ प्रयुक्तं विष्णुना ताभ्यामादृतो मधुनो
धुना ॥२९॥ ब्रह्मास्त्रं ब्रह्मणानेन प्रयुक्तं तद्विनाशकम् ॥ वज्रं प्रयुक्तमिन्द्रेण तेजोमयलसन्निभम् ॥३०॥ अन्यै
रपि सुरैः सर्वैः स्वशस्त्राणि केवलम् ॥ कोटिशः ॥ प्रयुक्तान्येव तन्नाशः तावतापि न जायते ॥३१॥ महादेवप्रसा
देन लब्धः कमलया पुरा ॥ संसारस्तस्य संहारः चक्राद्यैर्न प्रजायते ॥३२॥ तेन शंकरानिन्दा चेन्न कृता तर्हि तत्समः ॥
को वा स्वर्गादिलोकेषु स तावद्भूरिविक्रमः ॥३३॥ यस्य स्मरणमात्रेण मुनयोऽपि तपः परम् ॥ त्यक्त्वा दारादृता स्वभव
न्ति प्रतिवासरम् ॥३४॥ शस्त्राणि तस्य पुष्पाणि कोमलान्यमलान्यपि ॥ तानि मौनिमनःशैलान्भिन्दन्तीत्ये

७०

पंक्ति १- शस्त्रं प्रयोक्तुं मदनः शंकुलत्वप्यपि सत्वरं । येन साहालिंगनेन नेयः कालो मुहानपि ॥३७॥ दैवात्स तावदधुना शस्त्रमण्डलसंवृतः । भगवन्तं न जानाति स्वनाशाय समागतम् ॥३८॥ मदनो यदि धीर त्वां दैवात्पश्यति, ते तदा । अंगनालिंगना सक्तिर्भविष्यति न संशयः ॥३९॥

शिवरह० ३ १०८

ह० त० ३० अ० ३६

तदद्भुतम् ॥३५॥ सौन्दर्यराशिरेवायं मदनोमदविह्वलान् ॥ मुनीन्करोति सहसा सदुर्जेयो न संशयः ॥३९॥ तदा ते कार्यहा
निः स्यात् स्वामिद्रोहः परं भवेत् ॥ स्वामिकार्यार्थमागत्य तद्विरोधप्रवर्तनात् ॥४०॥ किञ्चास्माकं (मार) स्वरूपं त्वं मा
मा स्मर विशेषतः ॥ तस्य स्मरण (मात्रेण) मनः स्यान्मानिनो वशम् ॥४१॥ अकस्मायाहितं मूर्ध्नि पतित्वा भस्मसात्कुरु ॥ तावता
तव कीर्त्तिः स्यादपकीर्त्तिः किलान्यथा ॥ (४२) तदा हरिरधुना तावन्नोर्ध्वदेशं गन्तातः ॥ अधुनावसरस्तस्य मूर्ध्नि ते पतने
खलु ॥ (४३) तत्सौन्दर्यविलोकनाय यदि ते चित्तं प्रवृत्तं तदा दैवाद्द्भुतमित्युपेक्ष्य सहसा कार्यं महेशस्य वा ॥ तर्हि स्यात्त
वहानिरेव विजयस्तस्याद्भुतः स्याद्तः सर्वं कार्यमनाकुलं भवति किं शम्भोः प्रभोः केवलम् ॥४४॥ किञ्चान्यच्छिव
निन्दकस्य सहसा दृश्यान दृश्यात्तनुः ॥ तस्यापि च विलोकनादपि भवेत्सा यातना ते यथा ॥४५॥ निस्तारो न भवेद्ततः
परमपि त्याज्यो भ्रमः सर्वथा पापिष्ठानवलोकनेन समयो नेयः कियान्वा तथा ॥४६॥ किञ्च (हन्तुं) हत्य त्वया तावन्न गन्त
व्यं प्रयत्नतः ॥ तत्सान्निध्यादपि ते पातकं स्यादसंशयम् ॥४६॥ शिवनिन्दकमालोक्य दूरादपि विवेकिनः प्रायश्चि
त्तार्थमुद्योगं कुर्वन्त्येव विशेषतः ॥४७॥ लयं प्रयान्ति पापानि प्रायश्चित्तशतैरपि ॥ शिवनिन्दातिरिक्तानि सा
तावद्यातनावहा ॥४८॥ तावच्छंकरभक्तस्य शिवनिन्दकसंगमः ॥ अपुत्र एव सहसा स न कार्यो महात्मना ॥४९

महानुभावाः शिवनिन्दकानामिच्छन्ति नाशं स्वं स्वनाशः॥ यदिच्छयाकेवलयापि किन्न ततो न तत्संगतिरिष्टहेतुः ॥५०॥ तेज स्वरूपस्य तवोग्रतेजो यत्तस्य लेशोप्यणुतोप्यणु स्यात्॥ सत्येतल्लाशकतामुपेत्य करोतु कार्यं तव सावधानम्॥५१॥ इतितद्वचनं श्रुत्वा स्वहितं मुक्तिसाधनम्॥ सन्तुष्टः प्राह तं कूर्मं फाललोचनपावकः॥५२॥ कृतकृत्योसि कूर्म त्वं कर्मणा महताधुना॥ हितोपदेशकस्त्वं मे त्वत्तुल्यो न सखा मम॥५३॥ पापलेशरहितोसि सर्वथा तमभि रमापतिं परम॥ वाञ्छतीति तव भाग्यमीदृशं दुर्लभं जगति देहिनामिदम्॥५४॥ जन्मान्तराराधितशंकराणां सा शांकरी शक्तिरुदेति यस्मात्॥ आनन्दहेतुः सुकृताब्धिसेतुः सा तावदत्यद्भुतधर्मकेतुः॥५५॥ इत्युक्त्वा वचने तस्य कृत्वाविश्वासमास्तिकः॥ हरभालानलतेजः ससर्जाणु रतन्तदा॥५६॥ त्यक्तन्तदेव तत्तेजः प्रवृद्धं भुवनत्रयम्॥ दग्धुं समर्थमभवत् तेन भीताः सुरा अपि॥५७॥ किमद्भुतमिहायाति तेजोमण्डलमुन्नतम्॥ ब्रह्माण्डमण्डलं सर्वं दग्धुमिच्छति लीलया॥५८॥ क्व गन्तव्यमितोस्माभिः न मार्गो गमनेधुना॥ सर्वान्लोकानिदं व्याप्यतिष्ठतीति भयाकुलाः॥५९॥ स कूर्मोपि विलोक्याशु तत्तेजो भयविह्वलः॥ शिवप्रभावं सस्मार सर्वोपद्रवनाशकम्॥ ॥६०॥ ततस्तत्पावकोत्पन्नपावकांशातिभीषणः॥ प्राह तं पावकं कृत्यं वद मह्यमिति स्मरन्॥६१॥ ब्रह्माण्डान्

कदा दग्धुं स्रष्टः किमि महमौद्दाम ॥ यदान्क्रमेण तद्दाहः कर्तव्यो वद सत्वरम् ॥ ६२ ॥ मत्तेजः प्रभवा एव कणाः सन्त्य
न्त्र कोटिशः ॥ तत्कणानां प्रभावोपि वर्णना विषयो न मे ॥ ६३ ॥ तन्मात्यल्पः कणोग्रस्तु सोऽपि ब्रह्माण्ड मण्डलम् ॥
दग्धुं समर्थ एवेति प्रधावति पुरः पुरः ॥ ६४ ॥ को वा ममाहुतिर्भूयात् इन्द्रोपेन्द्रादिषु स्थितः ॥ अन्यथा सर्व वि-
लयः कर्तव्य इति सत्वरम् ॥ ६५ ॥ जगत्संहरणे तावद्दाया सोपि न मे ततः ॥ समर्थ एव स्रष्टि मे किमर्थं वा कृतं वद ॥
॥ ६६ ॥ नमत्संसार विषयः कोऽपि दृष्टो जगन्मये ॥ सर्जनं च कृतं तेन हेतुना वद सादरम् ॥ ६७ ॥ को वा फलमनुद्दिश्य
विवेकेन प्रवर्तते ॥ मत्सर्जनस्य किं कार्यमद्भुतं तद्वदाधुना ॥ ६८ ॥ इति तद्वचनं श्रुत्वा कूर्मो विस्मितमानसः ॥ काला
नलोपि तं दृष्ट्वा प्राह गम्भीरया गिरा ॥ ६९ ॥ कालानल उवाच ॥ मा रुष्य कार सोन्मादो निन्दां गौरीपतेस्तथा ॥ सत्त्वा
लयाति यत्नेन गत्वा तन्मस्तकाश्रितः ॥ ७० ॥ अन्यथैव समत्वेन ख्यातस्तेन महेश्वरः ॥ इयं महेशनिन्दा स्यात्तद्विना
शाय केवलम् ॥ ७१ ॥ इति तद्वचनं श्रुत्वा सकोपेनाह तं ततः ॥ किमेतदर्थं युक्ता ते मम स्रष्टि विशेषतः ॥ ७२ ॥ मदी
य कण लेशेनाप्यमारायान्वितं जगत् ॥ दग्धं तावद्भवत्येव शिवलीलापि तादृशी ॥ ७३ ॥ भवेदुरुतरं कार्यं यदि
तर्ह्यस्तु सर्जनम् ॥ ममाप्यत्यल्प कार्यार्थं स्रष्टिरेव कथं मता ॥ ७४ ॥ नरवक्त्रे देववस्तुन्यपि कालिशमा हाययतते

पुमान्लोके को वा बलमपि किमस्त्यल्प विषये ॥ गिरिं को वा लोकाचल सदृशमादाय मशकं निहन्तुं शक्तो वा भवतियतिमा
नोति सुमतिः ॥ ७६ ॥ हन्तव्यः शिवनिन्दको विधिरपि श्रीमान्हरिर्वा मया किन्त्वेन्द्रादि मरुद्गणोपि गिरिश स्मृत्यापरं ली
लया ॥ हन्तुं शंकर एव तावदधुना नूनं प्रवृत्तः परं लोके शंकरनिन्दको विधिरपि पि स पुनः किञ्जीवतीति भ्रमः ॥ ७७ ॥
इति तद्वचनं श्रुत्वाप्यभिनन्द्यापि सादरम् ॥ मारनाशं कुरुष्वेति प्राह कालानलस्तदा ॥ ७८ ॥ ततस्तदाकर्ण्य स पावकोवचो
हिताबहं स्वामिततेजसः कणम् ॥ संप्रेरयामास रतीपतिस्त्वया स नाशनीयो भवतीति वेगात् ॥ ७९ ॥ तत्प्रेरितः सोऽग्निकणः
प्रवृद्धो विवेश पञ्चायुधि धमूर्ध्नि तेन ॥ नारायणास्त्रादिक शास्त्रजालम् खद्योत संकाशमभूत्पुरस्तात् ॥ ८० ॥ ततः स
भस्मसाज्जातो मदनः शिवनिन्दकः ॥ तन्दग्ध्वा स गतो वह्निः शान्तः कोलाहलोऽपि सः ॥ ८१ ॥ हतोऽधुनायं शिवनिन्द
कोत्र मारः प्रमत्तः शिवलीलयेति ॥ गताः सुराः स्वस्व कलत्र युक्ताः स्वकं परं वासमवाप्तमोदाः ॥ ८२ ॥ ततः परं स्वस्व
पदाश्रितास्ते स्मरन्त एवाद्भुतवीर्य्यमैशम ॥ कम्पायमानाः शिव पादपङ्के स्थित्वा स्थितास्तोशिवमादरेण ॥ ८३ ॥ अतः
परं शंकर पूजयायन्नेयः कियान्काल इति प्रबुद्धाः ॥ बुधाः शिवाराधन तत्परास्ते विश्वासमासाद्य हृदि प्रधानम्
॥ ८४ ॥ विश्वावसुरुवाच ॥ रेरे कुमाराः सुरवृन्द वन्द्यो गौरीसहायः स सुराग्रगण्यः ॥ न तत्समः कोऽपि सुरेषु दृष्टो ना-

रावणादिष्वपि सत्यमेव ॥ ८५ ॥ शिवं सर्वोत्तमं मत्वा भजध्वमति यत्नतः ॥ अन्यथा मन्दनावस्था भविष्यति न संशयः
॥ ८६ ॥ शंकरे सर्वदा प्रीति र्विधेया सदयार्णवे ॥ अपर्णारमणः प्रीतः प्रणतो मुक्तिदायकः ॥ ८७ ॥ प्रीतश्चेत्स ददाति शैल
तनया कान्तः प्रभुत्वं परं लोकानामविनश्वरं सततमप्यन्तेऽपि मुक्तिं पराम् ॥ तं तावल्लिंगमान्त वाक्य विनुतं सन्तः
कृतार्थाः परं संसाराद्विरताः प्रयान्ति शरणं देवाग्रगण्यं मुहुः ॥ ८८ ॥ यावत्पूजासावधानं क्रियते गिरिजापतेः ॥
तावन्महाग्नि वार्त्तापि हानि दूरतरा यतः ॥ ८९ ॥ शंकराराधनोद्युक्ते सिद्धयः स्युः पदे पदे ॥ अतो न दुर्वार्तापि भो
पुन्नाः शम्भुपूजकाः ॥ ९० ॥ शिवपूजासाधनानि कुसुमानि वने वने ॥ अतिरम्याणि तिष्ठन्ति पूजयध्वं सदाशि
वम् ॥ ९१ ॥ अरुणोदय वेलायां कुरुध्वं शिवचिन्तनम् ॥ ध्येयः साम्बो महादेवः सर्वमङ्गलविग्रहः ॥ ९२ ॥ ततः
स्नात्वा भस्मनापि सम्यगुद्धूल्य सादरम् ॥ त्रिपुण्ड्रधारणं कार्यं कार्यं रुद्राक्षधारणम् ॥ ९३ ॥ ततः परं शंकरम-
न्दिरेषु सम्यक् शिवाराधनसाधनानि ॥ सम्पाद्य पूजाविविधैर्विधानैः कार्या प्रयत्नेन च शंभुलिङ्गे ॥ ९४ ॥
शिवलिङ्गार्चनं काले काले कार्यं निरन्तरम् ॥ तेनैव पापनाशः स्यात्सुखं मुक्तिश्च जायते ॥ ९५ ॥ यद्यप्यत्य-
न्तसुलभं शाम्भवानां शिवार्चनम् ॥ तथापि दुर्लभं मन्ये प्रमादे सति सर्वथा ॥ ९६ ॥ अप्रमादेन कर्तव्यं शीम

हादेवपूजनम् ॥ स्वप्नेप्यन्यसुरार्चायामादरस्त्याज्य एव हि ॥ ९७ ॥ त्याज्यं सर्वात्मना त्याज्यं शिवान्यसुरपूजनम् ॥ स्वप्नेऽपि शिवपूजैव कर्तव्याति प्रयत्नतः ॥ ९८ ॥ अशिवानि भविष्यन्ति शिवान्यसुरपूजनात् ॥ अतस्तन्नैव कर्तव्यं न कर्तव्यं कदाचन ॥ ९९ ॥ वाञ्छितं शिवमस्माकम् अतः कार्यं शिवार्चनम् ॥ यतः स्वयं शिवं क्षीरं कामधेनुः शिवार्चनम् ॥ १०० ॥ शिवार्चनस्य माहेमा न ज्ञातो ब्रह्मणाप्यतः ॥ तज्ज्ञान विरहेप्याशु कर्तव्यं शिवपूजनम् ॥ १ ॥ कालान्तरे मया कार्यं शिवपूजनमपि ॥ आलस्येनैव कर्तव्यं न कर्तव्यं कदाचन ॥ २ ॥ कालोऽति कठिनो यतः ॥ २ ॥ क्व तावदायुरस्माकम् इत्येवाद्भुत चिन्तया ॥ कर्तव्यमिति यत्नेन सत्वरं शिवपूजनम् ॥ ३ ॥ विषमप्यमृतं भूयात् आलस्येन तत्तः सुताः ॥ कर्तव्यमति यत्नेन लिङ्गमङ्गार्चनमुदा ॥ ४ ॥ शाङ्गलिङ्गार्चनं लोके सर्वदा दुर्लभं सुताः ॥ विघ्नानपि निराकृत्य कुर्वान्ति शिवपूजनम् ॥ ५ ॥ शिवार्चनस्य समये यदि विघ्नो भविष्यति ॥ तदा तन्नाशयत्येव कर्तव्यं शिवपूजनम् ॥ ६ ॥ शिवार्चनं खलु श्रेयः श्रेयसां विघ्नसम्भवः ॥ सम्भावितं ततस्तस्यास्ति नाशोऽपि शिवपूजया ॥ ७ ॥ शिवार्चनं परं तावत्सर्वारिष्टविनाशकम् ॥ सर्वेष्टदायकञ्चेति कर्तव्यं शिवपूजनम् ॥ ८ ॥ शिवार्चन समं लोके किं वा पुण्यं भविष्यति ॥ तत्पुण्यं सममित्येव ज्ञातव्यं सर्वथा

८०३

बुधैः ॥९॥ येन केनापि वा भक्त्या कृतं यदि शिवार्चनम् ॥ तदा ददाति गौरीशस्तस्मै मुक्तिं न संशयः ॥१०॥ अपार सुकृतां बुद्धिर्यदि भवेत्प्रबद्धस्तदा शिवार्चन रति र्भवेदिति मतिः प्रवर्धतातत ॥ अवप्युयमसकृत्स्मृतः प्रणत एव पूजितो ददाति परमं पदं गिरिश इत्यवैमि ध्रुवम् ॥११॥ विनाशयाति पातकामित महागिरीनेकदास्मृतोऽपि गिरिश स्तुतः सकृदपार पुण्यप्रदः ॥ स एव मुनिपुङ्गवैर्मनसि सर्वदा पूज्यते स एव सुरपुङ्गवैरपि समाधिनिष्ठैरपि ॥१२ अपूर्वमीशार्चनमेकमेव लोके प्रसिद्धं सकलार्थहेतुः ॥ तत्तुल्यमन्यन्नमयापि दृष्टं वेदेर्नेदृष्टं सुरपुङ्गवैर्वा ॥१३॥ न यागदानाध्ययनादिभिर्वा लिङ्गार्चनाराधनपुण्यतुल्यम् ॥ पुण्यम्भविष्यत्यत एव तावत्तत्पुण्य पु[illegible]ण्यं विदु रास्तिकास्तु ॥१४॥ रहस्यमन्यद्वक्ष्यामि शृणुध्वं मति सादरम् ॥ श्रुते तस्मिन्शिवाचारे भक्तिवृद्धिर्भविष्यति ॥१५ या शिवार्चन सामग्री सा सर्वा भूतिपावना कर्तव्या मूलमन्त्रेण तया तुष्टो भवेच्छिवः ॥१६॥ अत्रैवोदाहरंतीममि तिहासं पुरातनम् ॥ विजया नगरे कश्चित्स्थितः शाम्भव पुङ्गवः ॥१७॥ स समाराधयन्नेव भालेलिङ्गं शिवात्मक म् ॥ भस्मोद्धूलित सर्वाङ्गो ददर्श स्वप्नमेकदा ॥१८॥ तेन तीर्थे [illegible]र्थेश्वरो दृष्टो स्वप्ने सर्व सुरेश्वरः ॥ दृष्टाश्च शाम्भवास्त त्र शिवध्यान परायणाः ॥१९॥ भस्मोद्धूलित रुद्राक्ष त्रिपुण्ड्रांकित मस्तकाः ॥ शिवलिङ्गार्चनेनैवं सन्तुष्टाः सत

तं मुदा ॥२०॥ तल्लिङ्गं पूजितन्दृष्ट्वा विमलै बिल्वपल्लवैः॥ नीलोत्पलैः पुण्डरीकैः कुन्दैश्च कुमुदैरपि ॥२१॥ रत्नाभरणसंयुक्त-
दुकूलपरिवेष्टितम् ॥ दिव्योपहारसङ्कीर्णम् फलराजितम् ॥२२॥ धूपधूमसमाक्रान्तं पुष्पगन्धविराजितम् ॥ कर्पूर
दीपमालाभिः परितः परिवेष्टितम् ॥२३॥ वेदैर्मूर्तिधरैरेव स्तुतं सर्वार्थसिद्धिदम् ॥ सर्वमङ्गलदन्नित्यं स्मरणेनापि
तत्परम् ॥२४॥ गीतनाट्यसमारम्भतुर्य्यध्वनिविराजितम् ॥ देवदुन्दुभिनिर्घोषप्रतिध्वनिविजृम्भितम् ॥२५॥ देव
गन्धर्वनारीणां समूहैश्च विराजितम् ॥ गौरीपूजनसंसक्तसुरनारीसमन्वितम् ॥२६॥ तादृशं मन्दिरन्दृष्ट्वा तीर्थेशस्य स
शाम्भवः ॥ पूजां तीर्थेशलिङ्गस्य चकारातीव भक्तितः ॥२७॥ पञ्चामृताभिषेकाद्यैश्चन्दनैश्च विशेषतः॥ दुकूलैः कुसुमै
र्दिव्यैर्मन्दाराद्यैर्विशेषतः॥२८॥ धूपदीपादिभिर्दिव्यैर्नैवेद्यैरपि सादरम् ॥ नीराजनैश्च विविधैर्दिव्यकर्पूरसम्भवैः ॥२९॥
प्रदक्षिणानमस्कारान्कृत्वा भक्तिपुरःसरम् ॥ उपविष्टः शिवं पश्यन्जपन्पञ्चाक्षरं परम् ॥३०॥ तावन्नियममासाद्य तृषि
तेन जलान्यपि ॥ न पीतान्येव तेनातः पिपासावृद्धिमाप सा ॥३१॥ ततः परं समानीतं पानीयमतिशोभनम् ॥ कृत्वा शिवा-
र्पणं पातुं स चकार मतिन्तदा ॥३२॥ तदानीमागतः कोऽपि तस्माद्गिरिश मन्दिरात् ॥ भूतिरुद्राक्षवीताङ्गः शिवनामजपो
त्सुकः ॥३३॥ स एवागत्य तम्प्राह शाम्भवाग्रेसरप्रियम् ॥ मा मा पिब जलं विप्र तदीशानार्पितं यतः ॥३४॥ शिवभक्तोसि धन्यो

सि शंकरानर्पितञ्जलम् ॥ पातुमिच्छसि किन्तत्तु गिरिशाय समर्पितम् ॥ ३५ ॥ तज्जलं भूतिसंयुक्तं कुरु भस्मविवर्जितम् ॥
न गृह्णाति जलं शम्भुः गां गंवा किमुतेतरत् ॥ ३६ ॥ यज्जलं भूतिसंयुक्तन्न भविष्यति तज्जलम् ॥ अदेयं शंकरायेति न ज्ञात
ङ्कि त्वया पुरा ॥ ३७ ॥ यद्यद्देयं महेशाय तद्भस्मरहितं यदि ॥ न गृह्णाति महादेवः स्ततो मा पिब तज्जलम् ॥ ३८ ॥ ततः प
र्रं विभूतिर्वा क्वास्तीत्युक्तः सशंकरः ॥ प्राह भूतिं गृहाणेति शाम्भवाय महात्मने ॥ ३९ ॥ ततो गृहीत्वा तां भूतिं भूति
दामाति भक्तितः ॥ प्रक्षिप्य जलमध्ये तां मूलमन्त्रेण सादरम् ॥ ४० ॥ ततस्तेनैव मन्त्रेण तत्कृत्वा शंकरार्पणम् ॥ पयो शिवं
स्मरन्नेव कृत्वा तार्थो स्मीति सादरम् ॥ ४१ ॥ तत्र स्थित्वा कियत्कालं शिवधर्मान्विशेषतः ॥ स तस्मादेव शुश्राव सर्वपाप
विनाशकान् ॥ ४२ ॥ धर्मोपदेशके तस्मिन्तस्याभूत गिरिशात्मधीः ॥ तेन धर्मेण विप्रस्ताः तदुक्तेष्व भवत्तदा ॥ ४३ ॥
ततः परं समुत्थाय तम्प्रणम्याति भक्तितः ॥ त्वमेव गुरुरित्युक्त्वा त्यक्तनिद्रो व्यभद्द्विजः ॥ ४४ ॥ तस्मात्कुमाराः सर्वा
णि पुष्पादीनि विशेषतः ॥ भूतियुक्तानि देयानि मूलमन्त्रेण शम्भवे ॥ ४५ ॥ अपूतमपि पूतं स्याद्भस्मना संयुतं यदि
तस्माद्भस्मना संयुतं यदि ॥ तस्माद्भस्मयुतं देयं शिवलिङ्गे बिल्वादिकं सुताः ॥ ४६ ॥ यदि स्याद्भस्मरहितं पीयूष
मपि तत्परम् ॥ विषमित्येव मन्तव्यं ततो नेशार्पणं हि तत् ॥ ४७ ॥ हारेष्वपि दुकूलेषु सुवर्णाभरणेष्वपि ॥ भूतिर्दे

धेय

या प्रयत्नेन महेशाविनिवेदने ॥४८॥ शिव नैवेद्य पाकार्थं प्रवृत्तैर्भूति संयुतैः ॥ पाकागार प्रवेशोऽपि कर्तव्यो यत्न पूर्वकम् ॥४९॥ पाकागारेऽपि देयं स्याद्भस्म किञ्चिज्जलान्वितम् ॥ शाके जले तण्डुलेषु मुद्गादिष्वपि यत्नतः ॥५०॥ तेन कीटादि सम्बन्ध दोषोऽपि स विनश्यति ॥ भूति नैवेद्य पात्रेऽपि प्रदेया जल संयुता ॥५१॥ भूतिरुद्राक्ष पूताङ्गैः नैवेद्यमपि यत्कृतम् ॥ तद्गृह्णाति महादेवस्तं देवा हि सुधामयम् ॥५२॥ किन्तया सुधया पुत्राः किञ्चिद्भस्मान्वितं यदि ॥ जल मध्यर्पितं भक्त्या तदीयं सुधां विदुः ॥५३॥ पूजनञ्च महेशस्य भूति रुद्राक्ष भूषणैः ॥ कर्तव्यमतियत्नेन मूलमन्त्रेण भक्तितः ॥५४॥ यः पञ्चाक्षरमुच्चरन् अतिसितां भूतिं वहन् मस्तके ॥ भालेवक्षसि बाहुदण्डयुगले रुद्राक्षमाला अपि ॥ श्रीशाराधन तत्परो जल लवै बिल्वैश्च दूर्वाङ्कुरैः ॥ पुष्पैर्वा शिवं प्रयाति स परं धन्योत्तमो वस्तुतः ॥५५॥ त्यज त्यज तरुणी कटी विधवधूकटिका चेटिका विकारकरमिन्दिरा रुचिर भवविहारं परम् ॥ भजाशु भज धूर्जटिं पदकृपा दृशो निस्फुरल्ललाट पटलोल्लसन् सम्भिभूत भानु प्रभम् ॥५६॥ इति श्रीशिवरहस्ये हराख्ये तृतीयांशे उत्तरार्धे षट्त्रिंशोऽध्यायः ॥३६॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ याज्ञवल्क्य उवाच ॥ इति पित्राकृतां श्रीशिक्षां गृहीत्वा शिरसा सुताः ॥ प्र-

205

णम्योचुः परं तातं शिवभक्तरतं मुदा ॥१॥ कुमारा ऊचुः ॥ धन्यास्मः कृतकृत्यास्मो यस्मादस्माकमास्तिकः ॥
जनको गिरिजाकान्तपादुकाराधको सुतः ॥२॥ भवन्ति कर्मपाकेन बहवो जनका अपि ॥ शांकरो जनको लोके
भवत्यन्त्यंत दुर्लभः ॥३॥ अनादिमति संसारे सर्वदुःखाकरेऽपिनः ॥ जनकाश्चाभवन् पूर्वमीदृशो जनकः कुतः ॥
॥४॥ यदि स्याच्छांकरः स्तातः पूर्वं पूर्वं भवेत्तदा ॥ जनिरेव ततो न स्यादेह योगोऽपि दुःसहः ॥५॥ ततः फलितमस्मा
कं त्वत्पुत्रप्रभावतः ॥ अतः परन्दुःखानि पितः सम्भावितान्यपि ॥६॥ अभ्यस्ता शांभवीविद्या परन्त्वत्कृपया
तया ॥ विद्यया केवलन्तात दुःखसम्भावनापि न ॥७॥ अतः परमनेनैव जन्मना मुक्तिरेव नः ॥ भविष्यति न सन्देहः
शिवभक्तसुत त्वतः ॥८॥ ये शांकरकुमारास्ते कुमारेण सहादरात् ॥ क्रीडां कुर्वन्ति ते तावत् धन्य धन्याः इतिस्मृ
ताः ॥९॥ हारोपहारसंपुष्टशरीरयोगाज्जातं शरीरमिति जन्मजराविनाशः ॥ नैव स्वशान्ति सकृदप्यत एव धन्या
सर्वेऽपि शांकरकुमारवराः कुमाराः ॥१०॥ अस्माभिरिन्दुधरकलाभरणार्चनेन नेयः क्रियानपि खलः खलु
कालएव ॥ तं कालकालकलनेन नयन्ति कालम् तेनैव कालजनितापि न भीतिरेव ॥११॥ संसारदुःखविनिवार
कमिन्दुमौलिमाखण्डलादिसुरवन्दितपादमूलम् ॥ आजानुदीर्घकरपद्मधृतोर्ध्वशूलम् वन्दामहे गलतला

पंक्ति १० – इति पुत्रवचोवीची प्रपंचचतुराननः ॥ हारो विश्वावसुः प्रीतः कुमारानाह विस्मितः ॥१९॥

मलनीलजालम् ॥१२॥ देवाधिदेव इति शंकर एव वेदैर्वृन्दारकैरपि तथा मुनिसिद्धवृन्दैः ॥ यः संस्तुतो मुहुरपारगुणप्रवाहः तन्त्वा वृहादरवरैर्हरमाश्रयामः ॥१३॥ यो कालकालनयनेति प्रथितः सुरेषु ॥ यश्चन्द्रखण्डललितदीर्घमौलिः ॥ यः सर्वदेवमुनिकिन्नरसिद्धसेव्यः ॥ तं शैलराजतनयापतिमाश्रयामः ॥१४॥ यः स्वाश्रितपालनविनाशकरोति भूयो गौरीविहारचतुरो मुहुरादरेण ॥ यः कालजातभयजातनिवारकोऽपि तन्नीलकण्ठमनिशं शरणं व्रजामः ॥१५॥ अस्माभिरीश्वरपदाम्बुजरेणुगौरगौरीकराननविलोचनचिन्तनेन ॥ नेयं वयो नवयमन्यदुपाश्रयामः प्राणप्रयाणसमयेऽपि शिवं श्रयामः ॥१६॥ गौरीमनोरमणचारुतराङ्घ्रिपद्मसद्मानुधावनविधानमनः प्रसादैः ॥ अस्तावसादगिरयो गिरिराजकन्याविन्यस्तहस्तमनिशं शरणं व्रजामः ॥१७॥ गौरीमनोरमणचारु~~तराङ्घ्रिपद्मसद्मानुधावनविधानमनः प्रसादैः ॥ अस्तावसादगिरयो गिरिराजकन्याविन्यस्तहस्तमनिशं शरणं व्रजामः ॥१८॥~~ भुजान्तरालकाश्मीरसारघनसाररसातिगौरम् ॥ हारातिधीरतरुणारुणरेणुवाणीपूरातिशोणचरणाम्बुरुहं भजामः ॥१८॥ विश्वावसुरुवाच ॥ धन्यं ममापि भवतामपि सङ्गमेन जन्मेदमुत्तमकुलप्रभवस्यभावैः ॥ सम्भावितः खलु समागममत्युपेन्द्रो ब्रह्मापि वेद तदिदं सफलं शरीरम् ॥२०॥

एतच्छ्रीमनिशं शिवपूजनेन तावत्पवित्रमधुना शिवपूजकानाम् ॥ युष्माकमप्यभिनवामितहारवार्त्ता पीयूषपानपरिपुष्टमति प्रकृष्टम् ॥२१॥ श्रीविश्वनाथस्य फलन्न जाने किं किं भवत्यनुपमं परिमाणशून्यम् एषाति शाम्भवसभा मुहुरादरेण दृश्याद्दृशीमभिनवामृतमित्यवैमि ॥२२॥ कालोऽपि शाम्भवसभाभिनवाभिमान वार्त्ता निरस्त निजदूतममहवृत्तिम् ॥ श्रुत्वापि तत्सहृदयो निलये स्वकीये वार्त्तां करिष्यति मुहुर्मुहुरिन्दुमौलेः ॥२३॥ अस्माभिः शिवलिङ्गपूजनरतैरेकत्र नित्यं सदा स्थातव्यं नियमेन शंकरकथालापैर्विनेयो मुहुः ॥ कालः कालभयावहः स हि महादेवार्चकात्यादरो दूरे तिष्ठति तद्गुरोऽपि सा शिवाचारव्रतात्यादरः ॥२४॥ ये संसारपराभवाय बहवो भालाः प्रवृत्ताः पुरा तेता नद्रिशार्चनेन गिरिशध्यानामृतैः केवलम् ॥ सन्तुष्टाः प्रचरान्ति सन्ततमुमाकान्तं नितान्तं हृदि ध्यात्वा त्यक्त शिवेतरामरकथा वार्त्ताः कृतार्थाः परम् ॥२५॥ एवं पुत्रैश्च पौत्रैश्च प्रपौत्रैश्चिर न्त कर्मभिः ॥ शाम्भवैरन्वितो रेजे विश्वावसुरितीयथा ॥२६॥ तस्मादम्ब त्वया तावच्चिरं शंकरपूजया ॥ कालो नेयः ~~कुमा~~ कुमारास्ते भविष्यन्त्येव शांकराः ॥२७॥ यदि संसार आर्त्ताभिः सदा मग्नं मनस्तदा
(-किंनरः ३२१)
(-किंनरः ३२५)
नरकावास एवेति शंकर त्वा यदर्चय ॥२८॥ इति गन्धर्ववाक्यानि श्रुत्वा सा राजकन्यका ॥ तामाह हारगन्धर्वं सग

वें शर्वपूजया ॥ २९ ॥ राजकन्यकोवाच ॥ सत्यमुक्तं तथा तावदितिहासः पुरातनः ॥ श्रुतः पापापहाराय सुसंपद्वृद्धिसाधनम् ॥ ३० ॥ क्व विश्वावसुभाग्येन मम भाग्यं भविष्यति ॥ शांकराग्रेसराराध्यः शिवाराधनलालसः ॥ ३१ ॥ यत्पुण्यमर्जितं तेन शंकराराधने मुहुः ॥ तत्पुण्येनैव तत्पुत्राः तादृशाः शाङ्कराः खलु ॥ ३२ ॥ तत्कुलेऽपि बहुधा त्रिनेत्राराधनं कृतम् ॥ तेनापि पुण्यपुञ्जेन कुमाराः शांकराः खलु ॥ ३३ ॥ अत्युत्कृष्टं बीजमासाद्य काले भूरुत्कृष्टाकृष्ट पच्यमानोऽत्रान् ॥ मृते किन्तैर्वाङ्कुरान्तान् दुष्टैर्बीजैस्तेषां जन्म वा किं वदाम्यु ॥ ३४ ॥ कुमाराः शांकरास्तावद्वस्तुतः पुण्यमूर्तयः ॥ त एव पावनास्तेषां दर्शनादघसंक्षयः ॥ ३५ ॥ पुण्यमाकारमासाद्य शांकरः शंकरार्चनम् ॥ करोतीति मतिस्तावत्सतामेवोपजायते ॥ ३६ ॥ अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥ शृणुतस्य श्रवणतः शांकरो जायते नरः ॥ ३७ ॥ तत्कथा कथनेनापि मुहुरानन्दराशयः ॥ उद्वेलास्त्व सहसा भविष्यन्ति न संशयः ॥ ३८ ॥ भाग्यं किल ममाद्यापि शांकरः शाङ्करालये ॥ दृष्टः प्रहृष्टस्तेनैव शांकरः खलु शंकरः ॥ ३९ ॥ इतिहासो वक्ष्यमाणो ब्रह्मलोकादिषु श्रुतः ॥ समयासंश्रुतः पूर्वं कदा तत्पापनाशकः ॥ ४० ॥ पिता मम महादेवपूजनासक्तमानसः ॥ तेनार्जितं बहुधनं रत्नराशिसमन्वितम् ॥ ४१ ॥ कुबेरः स्वयमागत्य मत्पितुः सदने मुदा ॥ सदा सख्यं चकारातो जातो धनपतिस्त

तः ॥४२॥ धर्मधेनुरिति ख्यातो मास्यिता भुवनत्रये, स तु शांकरधर्माणाम् उत्पत्तिस्थानमेव हि ॥४३॥ तादृशस्यापि
तु गेहे मम अस्ति शिवमन्दिरम् ॥ अपार रत्न रचितं रत्नच्छायाविजृम्भितम् ॥४४॥ रत्नप्राकार परिघाशोभाराजि विरा
जितम् ॥ तत्प्राकारस्य ते रेख्ये वनमेकमशोकभूः ॥४५॥ रसाल ताल हिन्ताल तमाल परिवेष्टितम् ॥ तत्रोरु बिल्व
तरवो बाल बिल्व महीरुहाः ॥४६॥ नाग पुन्नाग तरवो मधूकतरवः परम् ॥ केतकी माधवी जाती मालती मालि
काबृतम् ॥४७॥ सुवर्णचम्पकाक्रान्त शतपत्र तरू[illegible]ञ्चितम् ॥ धत्तूर द्रोण सङ्कीर्णं भृङ्गराजविराजितम् ॥४८॥ उत्फुल्ल
हेमामल पद्मरेणु किञ्जल्कसंवीत सरोवराणि ॥ रम्याण्यपाराणि मरालराजी विराजमानानि वसन्ति तत्र ॥४९॥
तेनाबत्तारवः स्वतः शिवमहादेवेति नामामृतं पीत्वा वृद्धिमुपेत्य गुच्छनिबहैस्तारापति स्पर्धया ॥ तत्रार्धेन्दु
कलावृस भजनं फुल्लप्रसूनैर्नवैः प्रीत्यै वा नुदिनं प्रगा बधि मुहुः कुर्वन्ति नृत्यन्तिवा ॥५०॥ तस्मिन्नेव वने
मनोहरवने धीराः पराः शाङ्कराः ॥ शाङ्गं लिङ्गमुपेत्य सत्य हृदया सत्याश्रयं शंकरम् ॥ ध्यात्वा यान्ति नमान
सं प्रतिनवा गङ्गातटं वोल्कट वैकुण्ठादिक वाट घारन धुनो धाटिवराटावृतम् ॥५१॥ मत्ताताः स्तमपारपुष्प
विलसन्मालाकुलात्याकुला नीलानील विलोल बिल सल्लीलालिमालाप्रभाः ॥ ग्रस्ताभिः शिवमन्दिर

न्ताविलसन्नील प्रभास्पर्धया तावद्भिः स चकार तत्र यमुना गंगा प्रवाह भ्रमम् ॥५२॥ तैरेव प्रसवैः महेश सदनान्या
पूर्य तूर्य ध्वनि व्यापार प्रवरान्वितान्यपि करोत्यत्यारोहारम्भः॥ तद्भागयांबुधयः प्रवद्द्गिमधुमन् तत्पूजयाके
वलम् तत्तुल्यो न जगत्त्रयेऽपि गिरिश श्रीपादुकाराधकः ॥५३॥ तस्मिन्नेव वने तातः शंकरैः सह सर्वदा॥ क-
रोति पूजनं शंभोः शृणोत्यपि कथां प्रभोः॥५४॥ तत्र तावत्कथा[illegible] कापि श्रुता सातीवपावना॥ नारदोक्ता विशे
षेण शिवे भक्ति रसाश्रया ॥५५॥ श्रीनारद उवाच॥ पुरा पुण्य वतां लोके पुण्यानेव परस्परम्॥ सुमेरु शिख
रे स्थित्वा मूर्तिं धृत्वा जगुः शिवम्॥५६॥ तत्रात्यद्भुत पुण्यमूर्तिरसकृत स्मृत्वा महेशं परम्॥ स्तुत्वा शंकर
पूजनायन तथा सत्साधनानीत्यापि तत्प्राप्त्यर्थमतः परं किमधुना कर्तव्यमित्याह तान्पुण्याकारवरान्पारगि
रिश ध्यानोल्लसत्सागरान्॥५७॥ पुण्यमूर्तिरुवाच॥ अस्माभिर्गिरिशार्चनायन तथा प्राधानि रत्नादिकान्यु
त्कृष्टान्यपि साधनानि बहुधा प्राप्यानिकैः साधनैः॥ शृंगाराधन साधनैरपि विना किं जीवितेनाप्यहो व्यर्थ-
मेतज्जन्म महेशलिङ्गभजनाभावे भवे भावनम्॥५८॥ रत्नाकरे सन्ति मनोहराणि रत्नानि तावत्खलु नूतनानि
तैरेव लिङ्गार्चनमद्य कार्य्यं प्रीतिः शिवो रत्न समर्पणेन॥५९॥ धत्तूरवने कोमल बिल्वमालाः सम्पादनी-

मा: शिव पूजनाय ॥ यद्वा सुवर्णमलपङ्कमाला सम्पादनीयाकनकारिमाला ॥ ६० ॥ प्रफुल्लनीलोत्पलमालयावा समर्चनीयो गिरिजा सहाय: ॥ मन्दार कुन्दादिभिरर्चनीय: केमय सद्य: समुरेन्दुमौलि: ॥ ६१ ॥ मृगमदरसधारा सारकर्पूरधारा परिरतघनसारा पारपारीरधारा शिवशिरसि विधेया तुंगलिंगस्वरूपे सकृदपि सुकृताम्भोराशि सञ्जीवनाय ॥ ६२ ॥ इत्यालोच्य ययु: सर्वे स्मृत्वा शंकरपादुके ॥ रत्नाकरस्य रत्नानि गृहीत्वा मत्युत्तमान्यपि ॥ ६३ ॥ तत: सागरतीरे तै: हाटकेश्वरमन्दिरम् ॥ दृष्ट्वा प्रहृष्टास्तत्पूजां चक्रु: पुष्पादिभिर्नैवे: ॥ ६४ ॥ ततस्तल्लिङ्गपूजार्थं सागरोपि समागत: ॥ चकार रत्नैर्विविधै र्भूतिपूतै: शिवार्चनम ॥ ६५ ॥ कृत्वा बिल्वदलै: पूजामखण्डै रति कोमलै: ॥ तथा पञ्चामृताद्यैश्च बहुभिर्यत्नपूर्वकम् ॥ सम्पूज्यान्ते प्रणम्याथ कृत्वा नाट्यं प्रयत्नत: ॥ दध्यौ चन्द्रकलाजुष्टम् पञ्चाक्षरपुर:सरम् ॥ ६६ ॥ ततस्तुष्टाव समुद्रा सागर: शङ्करम्परम् ॥ रुद्राध्यायेन सूक्तैश्च रौद्रैर्भद्रपदैर्मुदा ॥ ६७ ॥ एवं सम्पूज्य तल्लिङ्गं शाङ्करमालिङ्ग्य सादरम् ॥ प्राह प्रसीद भगवन् इति कुर्वंस्तदा स्तुतिं ॥ ६८ ॥ रत्नाकर उवाच ॥ क्व महेश्वरता क्व शम्भुता क्व कृपासागरता क्व वाऽऽप्तता ॥ क्व निरन्तरदीनबन्धुता क्व

शिवायाः प्यकृपैव मय्यपि ॥७०॥ क्व ललाट क्व पीठयोनिता क्व जटाजूटतटेन्दुखण्डता ॥ क्वतटित्तटिनी
वधूरिता क्व शिवाख्यया० ॥७१॥ क्व चतुर्दशलोकनाथता त्रिदशाधीश्वरता स्यार्हता ॥ क्व विलक्षण दक्षतापि
ते क्व शिवाय्या० ॥७२॥ क्व तवामित वेदवेद्यता क्व तवापार गुणाम्बुराशिता ॥ क्वापिनद्रुण शैलसत्रता क्वशिव
॥७३॥ क्वतवाद्भुत भूति हेतुता क्व विभूति व्रतपूतला तला ॥ क्व तवामित पुण्यकीर्तिता क्वशिवा० ॥७४॥ क्व
सुरासुरगन्धर्ववन्द्यता क्व महाशैवमहार्हणार्हता ॥ क्व महोत्सव दानलोकता क्वशिवा० ॥७५॥ क्व तवैव
त्रिपुरारिता क्वमहाशूलविराजमानता ॥ क्व सुमेरुपिनाकपाणिता क्वशिवा० ॥७६॥ क्व तवामरसुन्दरीक
रपारसरोपूज्यता ॥ क्व सुमेरुशरासनेज्यता क्वशिवा० ॥७७॥ क्व तवामित कालकालता क्व च हलाहल
नीलकण्ठता ॥ क्व दिगम्बरतापि साम्बता क्वशिवा० ॥७८॥ क्व परात्परतापि भिन्नता क्ववरीरःस्मरराज
हारता ॥ क्व तवोन्नत पञ्चवक्त्रता क्वशिवा० ॥७९॥ क्वशिवार्चक जीवनार्थिता क्वमहापाप वनाग्निता
पि ते क्वशिवव्रतचित्तसङ्गिता क्वशिवा० ॥८०॥ क्वभवांबुधि कर्णधारता क्व महामृत्युभयापहारिता ॥
क्वशिवार्चककल्पवृक्षता क्वशिवा० ॥८१॥ किन्तत्काहणिकत्वमप्यघकुलारण्यानलत्वं च ते किन्त्व-

दृक्त विमोक्षदत्वमपि ते नीतं गतं वा स्वतः ॥८२॥ तच्चेद ··· स्ति वशोत्तथापि किमिति त्वत्पादुकाराधक
मामत्येवमुपेक्ष्य तिष्ठसि कथं श्रीनीलकण्ठाधुना ॥ विश्वस्येन्दुकलावतंसममकृद्बिल्वीदलैः को
मलैः ॥ गङ्गातुङ्गतरङ्गधूतिलजलैर्गौरीशलिङ्गं मुदा ॥ घ्राणाद्यैरुपहारतामुपगतैरभ्यार्चितं किं मया
श्रीवीरेशानदुर्दशापरिहृता संसारजातार्जिता ॥८३॥ इति स्तुत्वा महादेवं प्रणम्य च पुनः पुनः ॥ गन्तुमभ्यु
द्यतस्तत्र स ददर्श शिवार्चकान् ॥८४॥ भस्मोद्धूलित सर्वाङ्गान् त्रिपुण्ड्रांकितमस्तकान् ॥ रुद्राक्षमालाभर
णान् शिवलिङ्गार्चनप्रियः ॥८५॥ शिवनाममुधाधारापानपीनान्मनोहरान् ॥ शिवध्यानसुधाराध्रि-
कल्लोलालोलमानसान् ॥८६॥ अपूर्वानमितान्दृष्ट्वा सागरः प्रणतो मुहुः ॥ तानुवाच महाभागान् केयूयमिति
सादरम् ॥८७॥ पुण्यविग्रहा ऊचुः ॥ शिवार्चनध्यानविधूत पापाः पुण्यप्रपारूप कृपा स्वरूपाः ॥ येत्वत्परा
राधक सक्तचित्तास्तद्भृत्यभृत्या इति संस्मरस्मान् ॥८८॥ अस्माकमिष्टं शिवधर्मधर्म धर्माङ्घ्रिपद्मार्चन
मादरेण ॥ तत्सङ्गतिस्तावदुपेक्षिताता दृष्टस्त्वमस्माभिरुदारहारः ॥८९॥ इदं दिनं धन्यमभूदिदानीमतः
परं धन्यमिदं शरीरम् ॥ धन्ये च नेत्रे गिरिशार्चकाङ्घ्रि सरोजसन्दर्शनमात्रतोपि ॥९०॥ अतः परंस्मा

म मवपुंगवत्वमम्भोनिधे शंकर धर्मतत्त्वम् ॥ यदाधुना येन वयम्पुनीताः कुलञ्च धन्यं मम मानसञ्च ॥ ९१ ॥ दैवा
त्वदभ्यागमनं किलासीदथेन्दुखण्डाभरणार्चनाय ॥ अस्माभिरभ्यागतमेव तेन यो गोघृत क्षीर सितान्वयाभः ॥ ९२ ॥
कथत्यस्त्वं गिरिशार्चकोत्तमतमः कथल्याः परं वा वयं त्वत्संगोऽयमपूर्व एव किमयं योगो न मुक्तिप्रदः ॥ वाञ्छा शांग
वराङ्ग सङ्गविषयं प्राप्याधुना स्वर्धुनीस्पर्धामेव करोति साधु बहुधाप्यथैन्दुखण्डालये ॥ ९३ ॥ संसारापार
पाशव्यतिकरविलयोपाय एवायमासीत् श्रीशांगासंग एव स्वयमपि नयमायाम पीडाहराकिम् ॥ अस्माकं वाञ्छि
तं वा किमपि तदितरन्नेति मन्ये तदन्यत्किं वालोकेऽपि शोक व्यपनय नियत स्वापराचारमेकम् ॥ ९४ ॥ इति तद्वचनं
श्रुत्वा हृष्टो रत्नाकरस्तदा ॥ अभिवाद्याति यत्नेन शांकरानाहतान्मुदा ॥ ९५ ॥ रत्नाकर उवाच ॥ अपूर्वमिदमद्भुतं ख
लु शिवार्चकालोकनम् ॥ ददाति मुदमादरात्प्रतिपदं विनोदावहम् ॥ मुहुर्मुहुरपेक्षितं भवति दुस्त्यजं सर्वथा ॥
कृतार्थमधुना मनः किमिति वर्णनीयं मया ॥ ९६ ॥ इति तद्वचनं श्रुत्वा ते तं शंकरपूजकम् ॥ प्राहुर्लिङ्गस्य माहात्म्यं
किमस्येति मुहुर्मुहुः ॥ ९७ ॥ तद्वाक्यामृतपानपीनमनसा तेनापि सद्यः स्मृतः ॥ तस्याभून्महिमा स एव निग-
मैः सर्वैः स्तुतः सन्ततम् ॥ संवक्राशीतभूतिभूषितवपुः स्पष्टा च लिङ्गं मुहुः हृष्टः प्राह शिवाभिधान सुध-

शिवरह० १८७ १८८

ह०तृ०उ० अ०३९

यावीतोऽति पूतो बुधैः ॥९८॥ एतन्नामानि रम्याणि लिङ्गस्यास्य विशेषतः ॥ श्रोतव्यानि प्रयत्नेन पापनाशक
राण्यपि ॥९९॥ हाटकञ्जातमेतस्मात्तल्लिङ्गं मनोहरम् ॥ तेनेदं हाटकन्नाम लिङ्गमित्युच्यते बुधैः ॥१००॥ एत-
स्मात्सदृभूत हेम तेनाभून्मेरुरुत्तमः ॥ सर्वामरालयो जातः स तावदतिसुन्दरः ॥१॥ स भूमण्डलमध्यस्थो भू
सङ्कुस्तम्भसन्निभः ॥ तत्रामराणां सर्वेषां तिष्ठन्ति सद्मान्यपि ॥२॥ तस्यैव सागराः सर्वे परिखात्वमुपागताः ॥
तन्मूलभागनिलया सप्तद्वीपा वसुन्धरा ॥३॥ सुमेरुसानुनिलयः कश्चिदस्ति यमालयः ॥ यमालयस्य मूले
तु तिष्ठत्यंगारवाहिनी ॥४॥ विषज्वालासमाक्रान्ता कापि सर्वतरङ्गिणी (गाम्) ॥ महापर्वतसंकाशा वृश्चिकाणां तरङ्गि
णी ॥ कण्टकानां च तीक्ष्णानां तिष्ठत्येका तरङ्गिणी ॥५॥ कण्टकानां च तीक्ष्णानां परितः सन्ति पर्वताः ॥
तत्तरङ्गिणीतीरे पिशाचाः सन्ति कोटिशः ॥६॥ तदालोकनमात्रेण भीतिर्भवति दुःसहा ॥ तस्मिन्यमालये
सन्ति रम्याणि सद्मान्यपि ॥७॥ मणिमुक्तामयान्येव सुधायुक्तानि कोटिशः ॥ तत्रोद्यानानि सन्त्येव तानि
कल्पतरुव्रजः ॥८॥ समाक्रान्तान्यपाराणि दिव्यपुष्पयुतान्यपि ॥ तेष्वेव बिल्वतरवः कोटिशः सन्ति शोभ-
नाः ॥९॥ तेषां प्रभावः केनापि वक्तुमेव न शक्यते ॥ तत्रैव तावच्छिवमन्दिराणि तिष्ठन्ति रम्याणि मणि

प्रभाभिः ॥९॥ कूलानि दिव्यग्रमवैरपारैः सुधासमुद्रैश्च समावृतानि ॥१०॥ तत्राति शांकराः सन्ति शिवाराधनतत्पराः ॥ तस्माद्बहिर्निर्गमस्तेषां कदाचिज्जायते मुदा ॥११॥ रम्याणि दृष्ट्वा शिवमन्दिराणि न जायते जातु मनो निरस्तं ॥ तत्रैव तावन्नियमेन नित्यं यमः शिवाराधनतत्परोऽभवत् ॥१२॥ यमः स तत्रैव शिवार्चनेन कालं नयत्येव शिवार्चकाश्च ॥ तत्रैव तिष्ठन्ति शिवालयेभ्यः शुभानि सम्प्राप्य सुखानि नित्यम् ॥१३॥ यमो यत्रास्ति सन्तुष्टो रत्नशंकरमन्दिरे ॥ तत्राद्भुतं लिङ्गमेकं रम्यं मणिमयं यतः ॥१४॥ तत्पूजनेन सन्तुष्टो यमः प्रतिदिनं मुहुः ॥ तत्स्नानान्तरं कार्य्यं करोत्यन्यं शिवार्चनम् ॥१५॥ तल्लिंगदर्शनादेव कार्य्याकार्य्ये विनिर्णयः ॥ चित्रगुप्तादिकानाञ्च यमस्यापि विशेषतः ॥१६॥ तदधोऽन्धान्धकारान्धु मि सिन्धु बन्धुर कोटयः ॥ तिष्ठन्ति तत्र शैलाश्च प्रलयानलसन्निभाः ॥१७॥ विषज्वालान्धवः केऽपि केऽपि घ्राणिक ... सिन्धवः ॥ अमेध्यां धुगणाः केऽपि रेतोमूत्रान्धवस्ततः ॥१८॥ तप्तलोहितपूयादिसिन्धवः सन्ति कोटिशः ॥ कृमिकीटान्धवस्सन्ति वज्रदन्ताश्च कोटयः ॥ सन्तप्ताग्निज्वालाश्च कोटयः सन्ति भीषणाः ॥१९॥ सन्तप्ता स्फुलगिरयः सन्ति तत्राति भीषणाः ॥२०॥ तप्तलोहाङ्गनास्सन्ति कोटिशस्तत्र दुःसहाः ॥ सन्ति तत्रैव सन्तप्तशरपञ्जर

कोस्य: ॥ २१ ॥ अशाम्भवानाम सर्वेषां तेतावद्भयदा: सदा ॥ तदर्थमेव निर्माणं तेषामितीति विनिश्चय: ॥ २२ ॥ तन्निर्माणेन मनुष्य: कालकालाज्ञयायम: ॥ तद्दूतका: कालदूता: कोटिशो गयनापिना ॥ २३ ॥ अशाम्भवान्समानीय पातयन्ति प्रयत्नत: ॥ तेषु तेषु प्रदेशेषु कोटिश: क्रोधपूर्वकम् ॥ २४ ॥ अशाम्भव मुखेरुष्टेयमदूतमुखान्यपि ॥ अग्निकल्पानि जायन्ते सर्वदा यमशासनात् ॥ २५ ॥ यमशासनवार्त्तापि स्वदूतान्प्रति या पुरा ॥ रक्ता सापि परं श्रव्या तेन भक्तिर्भवे भवेत् ॥ २६ ॥ यैः सन्ध्यात्रयकालभागे त्रिपुण्ड्रं रुद्राक्षाणां धारणं सर्वथापि ॥ ते स्ते दूता: सर्वथा व्यापृतास्ते दुःखापाराम्बोधिमग्ना वसन्ति ॥ २७ ॥ यैरुद्धूलनमाचरन्ति न कृतं भाले त्रिपुण्ड्रं मुदा रुद्राक्षाभरणं च कर्णयुगले कण्ठे ऽपि वा हृद्वये ॥ ते सम्प्राप्य तथाविधस्थलकुलव्यापारहीना: परम् ॥ तिष्ठन्त्येव तदर्थमेव रचना तेषां यत: संमता ॥ २८ ॥ यैर्लिङ्गार्चनमादरेण न कृतं प्रात: प्रदोषेषु वा तैरेवामितपातकौघनिलयैर्दुःखालयै: सन्ततम् ॥ तत्तद्दुःसहयातना स्थलकुलव्यापारदुःखे: परं दुर्जेय: समयो विनेय इति ते तेभ्यो न नैर्यान्त्यपि ॥ ३० ॥ यैः पञ्चाक्षरमन्त्रराजजपत: पूतान ते सर्वथा ते ते त्वग्निमहाग्निसिन्धुमुसरानातिष्ठन्ति विघ्नाशना: ॥ तेभ्यस्तैश्च निवारिता अपि न कैरप्युद्धृता यातना ॥

घ्रातव्या खलु कल्पकोटिगणना नास्त्येव सर्वात्मना ॥१३०॥ नीतो येन दुरात्मभिः खलु निभः कालक्षणं
मुदा श्रीमृत्युञ्जयपूजनेन सुकृतांभोधिप्ररूढ्यै सदा ॥ ते तावन्निरयं प्रयान्ति सहसा तन्निर्गमो दुर्लभः ॥ तौ किं दु
र्भगदुर्भगा अपि न ते दुःखक्षालया: ॥ ३१॥ श्रीकाशीनगरादिशंकरपुरीवासप्रभावप्रथा वोधापारकथासुधा
निधिलसत्कर्णार्णवास्त्पूर्णतः ॥ आनन्दामृतधारया शिवकथासारप्रजातया तुष्टास्तत्र न यान्ति शंकररतास्ते
यान्ति तं शंकरम् ॥ ३२॥ येये शंकरपूजकाः कतिपय ग्रामाश्रयाः सन्ततं लिङ्गाराधनतत्पराः शिवजनासंगो
त्सवाः सन्ततम् ॥ तन्दृष्ट्वा यममेव सुन्दरतरम् धीरं प्रसन्नं परम् ॥ हृष्टास्तेन समर्चिताः शिवपदं यान्तीति सत्य
मवचः ॥३३॥ शंकरान्प्रति यमो न यमोसौ धर्म एव परमः सतु तेषाम् ॥ सेवकः खलु स तत्पदपङ्काराधना
तिनिपुणः सगुणोच ॥ ३४॥ शूलपाणिचरणस्मरणञ्चेत्पापिनापि यदि दैववशेन शिवसंगेति ममाप्यकृतार्थे-
स्तर्हि संसारमहाहितमस्मात् ॥३५॥ यमोपि साक्षान्नु यमान्तकार्चापरायणान्निष्ठुरदृष्टिपातैः ॥ नपश्यतीति स्फुटमे
तदुक्तं श्रीनीलकण्ठार्चनभक्तिलेशात् ॥३६॥ लिङ्गाराध धनतत्परस्य महिमा न ज्ञायते सर्वथा तावत्साधुयमो न
वेदनविधिर्नारायणो वा ततः ॥ तत्सामर्थ्यविशेषलेशकलनात्कालोपि तत्पूजनव्यासक्तो भवतीति केवलमहञ्जा

नेऽज्ञाने कथम ॥ ३७ ॥ यः शर्वं सकृदप्यखर्वहृदयानन्देन सम्पूजयेत्तत्पादार्चनतत्परं यदि मनस्तर्हि प्रसन्नः शिवः ॥ आसन्नस्मरणेन केवलमुमाकान्तः सशान्तस्ततः सन्तस्तत्पदपंकजं हृदि मुहुर्ध्यात्वा वसन्ति ध्रुवम् ॥ ३८ ॥ यो बिल्वांकुरपूजयापि सकृदप्यार्त्तिं हरत्यन्वहम् प्रीत्या सन्तत मन्तकान्तकपदांभोजार्चना त्यादरः ॥ संसारादघसागरादपि तरत्यत्यद्भुतं केवलं तत्पादस्मरणेन मुक्तिरिति मे बुद्धिः प्रवृद्धा खलु ॥ ३९ ॥ संसारान्न बिभेति पातककुलात्कालानलात्कालतः तद्भक्तामित विक्रमादपि महादेवार्चकः केवलम् ॥ कालेनापि समर्चितो भवति तं कः कालकालार्चकम् भक्त्यानर्चयति प्रसन्नहृदयं त्यक्त्वा परं दुर्जनम् ॥ ४० ॥ महोत्सवपदं परं शिवपदाम्बुजाराधनम् तदेव धनमुत्तमम् ज्ञानिजरातिदुःखापहम् ॥ तदुत्तमकुलोद्भवैः कृतमघौघतूलानलं सुधापि तदिति स्मृतं परमदुःखहानौ सुखम् ॥ ४२ ॥ अहो खलजनः परं शिवपदाम्बुजाराधनप्रसादविभवं परं न च विचारयत्येव सः ॥ अतः पतितदुष्कृतप्रबलवक्रनक्राकरे सशोककुलसागरे सपदि सान्धकारे मुहुः ॥ ४३ ॥ मतात्पाय सभिण्डिबालनमुदव्यालमुरन्मण्डले चण्डालाः खलु चन्द्रखण्डविमलालंकारनिन्दारताः ॥ तिष्ठन्त्येव मुहुर्मुहुर्न भसितं यैर्वा ललाटे धृतम् ॥ रुद्राक्षो

पिनकण्ठकर्णयुगलेजस्वोनपञ्चाक्षरः ॥४४॥ भजन्ति विमलाशयाः शिवमुमासहायं परम् ॥ सरव समये मुहुर्मम सहाय इत्यादरात्

तमन्तकरिपुर्मुहुः स्मरति यः प्रयाणक्षणे सतावदपराजितो हितहितः प्रयाति ध्रुवम् ॥४५॥ यथ्यापि खलु कामनां सततं कामारिपादा-

म्बुजध्यानादिव भजत्यपारमहिमा कामारिनित्यादरात् ॥ वेदो वेदविधिर्न वेद सम्भुधा नारायणो वापरं कामारिस्मरण प्रवीण मनसा ज्ञेयः

कथंचित्खलम् ॥४६॥ अर्धार्धेन्दुकलावतंसचरणध्यानामृतास्वादनात्तृप्तो मानसराजहंस इति मे चिन्ता कृतान्तात्कुतः ॥ संसारा

दपि भीर्न मे न च महाव्याधिप्रवाहादपि व्यालेभ्योऽपि न दुष्कृतेरपि कृतेर्भूतैरनन्तैरपि ॥४७॥ इति श्री शिवरहस्ये हराख्ये तृतीयांशे उ-

त्तरार्धे याज्ञवल्क्यजनकसंवादो नाम सप्तत्रिंशोऽध्यायः ॥३७॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ याज्ञवल्क्य उवाच ॥ यत्सम्नुभा

गे यममन्दिराणि तदूर्ध्वभागे पवनस्य गेहाः ॥ ॥ तदूर्ध्वभागेष्वनलस्य गेहास्तदूर्ध्वभागे वरुणस्य गेहाः ॥१॥ तदूर्ध्वभागे खलु नै

ऋतेश्च तदूर्ध्वभागे धनदस्य गेहाः ॥ ॥ तदूर्ध्वभागे बुधशचीपतेश्च तदूर्ध्वभागे खलु सप्त लोकाः ॥२॥ वैकुण्ठलोकोऽपि तदूर्ध्वभागे

सूर्यस्य लोकोऽपि तदूर्ध्वभागे ॥ नक्षत्रलोकोऽपि तदूर्ध्वभागे सुधांशुलोकोऽपि तदूर्ध्वभागे ॥३॥ ईशानलोकोऽपि तदूर्ध्वभागे त्रिशू

लगेहोऽपि तदूर्ध्वभागे ॥ तदूर्ध्वभागेष्वनलाम्बुराशेः सुमेरुशृङ्गं प्रतिभाविभूतः ॥४॥ सुमेरुशृङ्गाग्रविराजमानः कैलाशलोकः सवरो बरि

ष्ठः ॥ सुमेरुशृङ्गाण्यमितानि तेषु सर्वाणि कार्तस्वरमन्दिराणि ॥५॥ तान्येव तावत्खलु सुन्दराणि रम्याणि हर्म्याणि यद्यपि तत्र

शिवर०
१६६
१८२
१९१

त० ह० उ
अ० ३८

तानि ॥ संख्या विहीनानि विचित्र चित्र व्याप्तानि चित्र प्रतिमान्वितानि ॥ ६ ॥ तत्रोद्यानवनानि सन्ति विपुलान्यन्तो नतेषाम्भु
तेतावत्सततं फलैरभिनवैः पुष्पोच्चयैः संकुलाः ॥ सर्वर्तु प्रभवाः प्रभूतविभवास्ते तावदत्युन्नताः ॥
तो दृष्टा यातरवो ऽपि तत्र बहवो नान्यत्र ये सर्वथा ॥ ७ ॥ ते तावद्विनता भवन्ति बहुधा विश्वेश्वराराधने कर्त्तव्ये सति सञ्चरन्ति ब-
हवो लिङ्गेषु तुङ्गेषु ते ॥ छत्रं त्वच्छ सुगुच्छराञ्जित निजच्छायाच्छदि व्यावृत्तान्या लिङ्गस्य प्रसवार्चितानि सततं कुर्वन्ति तेते स्वतः ॥
॥ ८ ॥ तत्रापार मरन्द सुन्दर सरित्कुल्यामृताम्बु प्रभा सिन्धुभ्राज विराजमान वनजैरभ्यर्च्यते शङ्करः ॥ तत्तीरे शिवलिङ्ग सुन्दर
लसन्मन्दारधारीतरे पारीरद्रव वाहिनीमृगमहापार प्रवाहान्विते ॥ ९ ॥ तत्रैवैक मणि प्रभा विरचिताः प्रासाददेशाः परन्तेषा
न्तावदपार कान्ति सरितासङ्गेन तुङ्गेष्वपि ॥ लिङ्गेषु प्रथितेषु तेषु गिरिजा पूजाङ्कुरोत्यादरात्सौवर्णैः कमलैस्तथा मणिमयैरुत्कु
ल्लपुष्पैरपि ॥ १० ॥ मणि प्रवरैश्च पूजितो भवति शंकरः सर्वदा विहार सदनालये गिरिजया समेतः सदा ॥ जहाति तं न पदं मुदा
तदिदमुत्तमं सर्वदा मणि प्रवरराञ्जितं कुसुमवृष्टि संप्लावनम् ॥ ११ ॥ मणि प्रभामण्डल मण्डितानि हर्म्याणि तेषां गणना कुतः
स्यात् ॥ आयाममौन्नत्यमपि प्रभाभिः न ज्ञायते दृष्टिमपि प्रयाति ॥ १२ ॥ न तत्र चण्डांशुकरप्रचारः सुधाकरांशु प्रसरोऽपि नातः ॥
विद्युद्गणानाञ्च न तत्र वार्त्ता तारागणानाञ्च न तत्र वार्त्ता ॥ १३ ॥ महेश्वरापार शरीर कान्त्या दीप्तानि तावत्खलु मन्दिराणि ॥
हर्म्याण्यपाराण्यपि सुन्दराणि हाराणि हार प्रवराञ्चितानि ॥ १४ ॥ यत्रैवायुतयोजनोन्नत मणिस्तम्भार्बुदान्यर्बुदाश्चासिंहा

सन मञ्च कोरिघारितं यत्सुन्दरं मन्दिरम् ॥ तत्तावद्धनरत्न विलसत्तल्पावृतं कल्पजापारात्युत्तम गन्धसिन्धुसहितं तत्राम्बिका क्रीडति ॥१५॥ सम्पूर्णामित भासार्पितसुधा रस्मिप्रभामंडलव्यापाराः स्वगतारका इव सुधा तिष्ठन्ति यत्कान्तिभिः ॥ तत्ताव-द्गिरिराजराज तनया कान्तिश्रितं सन्ततम् स्वान्तं मे सुतनोति सन्ततमतस्तां चिन्तयामि स्वतः ॥१६॥ वैकुण्ठादिक रत्नकान्ति भवनाग्वासाः सुरास्तां शिवं ध्यात्वा साम्बमहर्निशं शिवकथालापैः परं चेतसि ॥ स्वस्थे तत्पद सङ्ग चिन्तन गतक्लेशाः शिवाराधनं कृत्वा सन्तत चन्द्रचूड चरणध्यानाम्बुराशिं श्रिताः ॥१७॥ नित्यं सुराणामपि मन्दिरेषु लिङ्गानि यान्य प्रतिमानि तेषु ॥ कुर्वन्ति पूजाममराः प्रभाते साम्बं विशेषेण विशिष्ट वृत्या ॥१८॥ देवानामपि भाग्यमिन्दुशकलालङ्कारपादाम्बुज ध्यानं देव तदर्चनादविरतं सौख्यं सुराणामपि ॥ देवस्नामधिदैवतं शिव इति प्राहुर्मुनीन्द्राः सुराः सर्वे ते निगमाश्च तद्भजनतो मुक्तिः पराजायते ॥१९॥ तस्मिन्नेव सुमेरु शृङ्ग निलये स्थित्वा शिवासंयुतो लोकोत्पादन पालनादि कुसुमाकान्तः स्वलीलाकुवैः ॥ कृत्वा तिष्ठति तं परात्परमिति प्राहुस्तदन्ये सुराः ॥ तल्लिङ्गार्चन तत्पराः शिवरतास्तेन स्वतन्त्राः स्वतः ॥२१॥ स्वतन्त्रास्मिन्नेच स्तथा तत्कृलत्रं पवित्रं स्वतन्त्रं विचित्रन्तदेव ॥ जगज्जालनिर्माण निर्वाण दानेसमर्थं तदेवेन्दुमौलिः प्रसादात् ॥२२॥ भजन्त्यन्यमन्त्राः शिवान्यं सुरं तेन ते गर्भवासादि दुःखानि तस्य ॥ स्मरन्तीतिमन्ये महामोहपाश प्रवद्ध स्वचित्ताः प्रमत्तास्ततस्ते ॥२३॥

शिवरह०
१८०
१८२
१९२

यो जन्मादिक दुःखभाजनतया जातोऽस्ति गर्भाश्रितो तद्योनिव्रणपूयपूरिततनुस्तद्योनिमार्गोगतः ॥ कंसादिप्रबलादिशत्रुनिहितः किं पूजितो दुर्दशां स्वीयांस्तान्निर्दहाति तिष्ठति शिवे नान्यं भजामो वयम् ॥२४॥ नत्वा मृत्युंजयं मर्त्यो न मृत्युमुपयास्यति ॥ मर्त्यलोकमनुप्राप्य तेन मृत्युञ्जयो भवेत् ॥२५॥ मृत्युञ्जयं सन्ततमाश्रयामो मृत्युर्विभेत्येव यतः स्वतोऽपि । त्यक्त्वा न मृत्युञ्जयमन्यदेवं स्वप्नेऽपि पश्यामि भजामि नाहम् ॥२६॥ दृश्यन्ते बहवः शिवेतरसुरा वन्नाम कृत्वा मुहुर्मोहेन वृतमचिन्तयस्य बहुधा योनिप्रवेशेच्छया ॥ तो किन्नारकिणो न दुःखमिलयास्तेषां शिवावज्ञया दुर्जने सति दुःखमेव सततं ते दुर्भगा यान्ति किम् ॥२७॥ न जानन्त्येव बहवः प्रभावं मुनिशाम्भवम् ॥ अतः पतन्ति नरके योनिमार्गविनिर्गताः ॥२८॥ यो योनिमार्गपरिमार्गणसक्तचित्तो मत्तप्रमत्तपरिसेवितचित्तवृत्तिः ॥ नो चानुवर्तिनिरतः स कथं महेशं जानाति जन्तुरशिवार्चनपापरूपः ॥२९॥ कोपेनापि महेश्वरं यदि नरः स्मृत्वा गृहान्निर्गतः ॥ स्वर्गद्वारमुपेत्य धीरहृदयस्तत्तत्क[illegible]पारान्यपि ॥ भित्वा स्वर्गपुरं प्रविश्य स शचीनाथार्चितः सन्ततं सत्यादिष्वपि संस्थितः शिवपदं यात्येव सत्यं वचः ॥३०॥ न जानन्ति मूढा मूढाः शिवापरिकृदुन्दरम् ॥ नरके भिण्डिपालेषु तप्तेषु प्रतपन्ति ते ॥३१॥ यमकिंकरपादस्थातशंकानभवत्येव हि शंकरार्चकानाम् ॥ अतएव भजामहे महेशं मुहुरर्धेन्दुकलावतंसमीशम्

ह०त०उ०
अ०३८

म्॥३२॥अस्माभिरेवमनिशं शिवनामधेय पीयूषपान निरता रसनापि लब्धा॥ दुग्धं न वाञ्छति घृतेन युतं लाजि

हासाशर्करमतिशितामपि तेन तृष्णा॥३३॥ येनाशु पीतमसकृद्धृत दुग्धजातं तेनारनाल कलनं क्रियते कथं वा॥त-

स्मादुमापति पदाम्बुजचिन्तनेन नेयं दिनं तादितरामरहान पूर्वम्॥३४॥ महादेवः परोदेवो महादेवः परात्परः॥ महा

देवः परञ्ज्ञानं महादेवो महानतः॥३५॥ महादेवोरसस्तावन्महात्मामहतामपि॥ सेवनीयः प्रयत्नेन महादेवो मनोह-

रः॥३६॥ महादेव विहाराणां स्थलं शाम्भव मानसम्॥अतः सम्पूज्यः सततं शाम्भवाः शिवतत्पराः॥३७॥ शि

वाभिमानस्थलमेकमेव तदेतदेकान्त शिवार्चकस्य॥ शिवार्चकादप्यधिकोऽस्ति कोवा यतः स एवाप्रतिमप्रभावः

॥३८॥ तंभावमेवाप्रतिम प्रभावं मन्ये सुराणामपि सेवनीयम्॥ स एव मृत्युञ्जय पूजनेन धन्योऽपिमान्योऽपिमहा

नुभावः॥३९॥ योयस्तिष्ठति शाङ्करो भुवि समे पूज्यः स पूजार्हताम्॥ प्राप्तः शङ्कर पूजया सुरगणास्तत्पूज-

नैः पावनाः॥४०॥ तत्पादप्रणतास्तदङ्घ्रिजरजो लेशप्रसादं परं वाञ्छत्येव सुधांसुधामपि मुहुः त्यक्त्वा वृषेत्यादरा

त॥४०॥ कालादीति कालकालार्चनाद्ये नोभूदेवः प्रत्युतास्माद्यमोऽपि॥ तस्मात्कोवाकालकालान्यदेवं मोह

हादृत्यातुं पूजितुं वा प्रवर्त्तेत॥४१॥ प्रवृत्तिरीशानन्य सुरार्चनेषु नस्याच्छिवाराधन तत्पराणाम्॥ यस्माच्छिवान्यामर

शिवरह० ११८ १६३ १९३

रूपबुद्धि हीनाय तावद्भवतीति मन्ये ॥४२॥ असद्वस्तुहानाय सद्वस्तुबुद्धिः प्रवृत्तापि तत्कार्यहेतुः स्वतः स्यात् ॥ उपासनमप्यस्ति सद्ज्ञान वृद्ध्या सदित्येव बुद्धिः शिवे ब्रह्मणीति ॥४३॥ यदुक्तं तत्तावदुमासहायस्वरूपमासाद्य हृदि प्रविष्टम् ॥ कष्टानि दुष्टानि निराकरोति तत्कष्टनाशायुपतः प्रवृत्तम् ॥४४॥ अथ शिवार्चनभावनानिवृत्तिः यदि जाता बहुपुण्यसञ्चयैः ॥ शिव एव तदा विचिन्तनीयो मनसः सुस्थिरपीठपूजनाय ॥४५॥ मनो महेशे न यदा प्रकृष्टं सुष्ठु तदा तस्य शिवार्चनेन ॥ गतो भवत्येव स काल कालं किं काल कालप्रवणस्य तस्य ॥४६॥ कालान्तकारात्कृपा दुकार्यो चर्योपि वर्चोभिरमातनोति ॥ तेनैव पापौघलयोऽपि तेन स्वर्गोपि मुक्तिश्च भवत्यवश्यम् ॥४७॥ अहो वदन्ति भ्रमशाधिनापाःकृत्वा कथाश्चिद्धरिशार्चनानि ॥ धन्याः परं शंकरपूजनेन नयन्ति तावद्दिवसानपीति ॥४८॥ इदं परं भाग्यमिति स्मरन्तः संसारवार्तामपि विस्मरन्तः ॥ महेशनामानि सदा जपन्तः शिवालयेषु व प्रचरन्ति सन्तः ॥४९॥ सन्तस्तावत्सन्ततं शान्तमीशं स्मृत्वा स्मृत्वा देवदेवञ्च मत्वा ॥ दत्वा चित्तं ~~[illegible]~~ शंकरे साधु नत्वा कृत्वा पूजां यान्ति साम्बं ~~मत्वा~~ महेशम् ॥५०॥ अपर्णारमणं मत्वा कृपार्णवमनामयम् ॥ महामृत्युञ्जयं शैवाः पूजयन्ति ~~[illegible]~~ प्रयत्नतः ॥५१॥ कः शाम्भवेन सदृशस्तत्त्वदर्शी भावे भ्याति ॥ तेन तत्त्वं यथा ज्ञातं तथान्येनान्येन बुध्यते ।

ह० त० ३ अ० ३

॥५२॥ एवं शिवंकरत्वेन ज्ञात्वा केवलमव्ययम् ॥ सर्वमन्यत्परित्यज्य निरान्तं कोऽधितिष्ठति ॥५३॥ महद्भाग्यमितिज्ञातं तस्यानन्यैव कुर्वते शाम्भवज्जन्म केवलम् ॥ जन्मनामुत्तमञ्जन्म शाम्भवन्तत् किलोत्तमम् ॥५४॥ शाम्भवञ्जन्म सम्प्राप्य शम्भुपूजाङ्करोति यः ॥ स एव धन्यः श्रेष्ठश्च वरिष्ठोऽपि प्रतिष्ठितः ॥५५॥ सर्वकष्टविनाशाय शिवपिण्डार्चने रताः ॥ भवन्ति बहवो लोके मुक्तास्ते सर्वथा ध्रुवम् ॥५६॥ शिवस्मरणमात्रेण जीवन्मुक्तो भवेन्नरः ॥ शिवशब्दोच्चारणेन देवपूज्यो भविष्यति ॥५७॥ शिवनामामृतासक्त जिह्वालोलमनाकुलम् ॥ प्रणमन्ति सुराः सर्वे मुहुर्दृष्ट्वापि दूरतः ॥५८॥ इन्द्रादिदेवपूज्यत्वं यो वाञ्छति नरोऽपि सन् ॥ सम्पूजयति गौरीशं लिङ्गरूपमनामयम् ॥५९॥ अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥ शृणुध्वं सावधानेन शिवध्यानपुरःसरम् ॥६०॥ पुरा रेवा सरित्तीरे द्विजः कोऽपि सुशंकरः ॥ सकुटुम्बसाम्बपूजां चकार शिवतत्परः ॥६१॥ दूर्वाङ्कुरैरभिनवै धत्तूरप्रभवैरपि ॥ पूजयामास गिरिशं नवबिल्वीदलैरपि ॥६२॥ एवं कालं नयत्येव कालकालार्चने मुदा ॥ आहारमपि सन्त्यक्त्वा स्थितः शर्वमनुस्मरन् ॥६३॥ तादृशं शाम्भवन्दृष्ट्वा तत्कुटुम्बमुवाच तम् ॥ प्रणिपत्य प्रयत्नेन कृताञ्जलिपुरा मुहुः ॥६४॥ द्विजभार्योवाच ॥ स्वामिन्मां प्रणतां पश्य दीनवत्सलवत्सल ॥ विना तितिक्षा शोतव्या नैष्कुर्व्यं त्यज मय्यपि ॥६५॥ शिवाचाराः श्रुतिप्रोक्ताः सन्त्येव विविधा अपि ॥ तेषु कस्य परित्यागे पापमाप्नोति मानवः ॥६६॥ इदं वक्तव्यमधुना पुण्यपापविवेचनैः ॥ पुण्यापुण्यविवेकेन प्रवृत्तिश्चानिवर्तनम् ॥६७॥ पुण्यकर्माणि पुण्यात्मा प्रवृत्तः पुण्य

२/६

शिवरह० १८७ २८४ १९४

कर्म्मणा ॥ पापकर्म्माणि पापात्मा प्रवृत्तः स्याद्विवेकतः ॥ ६८ ॥ इदं पुण्यमिति ज्ञात्वा पुण्यैः पुण्येच्छया पुमान् ॥ पुण्यं करोति तेनैव पुण्यराशिः प्रवर्धते ॥ ६९ ॥ परदाराभिगमनं पापमित्यवधारणम् ॥ पुनः कामस्तु तस्मान्निवृत्तो न प्रजायते ॥ ७० ॥ एवं सति विवेकीयः स्यात्सापायापगोचरः ॥ स तावदुपयुक्तः स्यात्प्रवर्तकतया मतः ॥ ७१ ॥ इति तद्वचनं श्रुत्वा स विप्रः सत्यतत्परः ॥ तामाह युवतीं भार्य्यां स्मरन्नेव महेश्वरम् ॥ ७२ ॥ सत्यव्रत उवाच ॥ सन्ति धर्माः श्रुतिप्रोक्ताः पुराणोक्ताश्च कोटिशः ॥ तेषु धर्मेषु सर्वेषु धर्माः पञ्च मनोहराः ॥ ७३ ॥ विभूतिधारणं धर्मस्तथा रुद्राक्षधारणम् ॥ रुद्राध्यायजपो लिङ्गे बिल्वैः शंकरपूजनम् ॥ ७४ ॥ पञ्चमः शिवनैवेद्यभोजनं तत्परो नरः ॥ कृते मुक्तो भवत्येव महापातककोटिभिः ॥ ७५ ॥ नारीणाञ्च नराणाञ्च धर्मोऽयन्तुल्य इत्यतः ॥ अविशेषेण कर्त्तव्यं सर्वेषामपि सर्वथा ॥ ७६ ॥ रुद्राध्यायजपे शक्तिः स्त्रीणां न यदि सर्वथा ॥ तदा पञ्चाक्षरो जप्यः रुद्राध्यायजपः परम् ॥ ७७ ॥ अधीता एव सर्वेऽपि वेदास्तेन महात्मना ॥ येन पञ्चाक्षरो जप्तो वेदसारतया स्मृतः ॥ ७८ ॥ दधिमन्थनसम्प्राप्यनवनीतनिभं विदुः ॥ पञ्चाक्षरं महामन्त्रं वेदराशिविनिर्गतम् ॥ ७९ ॥ अयं मन्त्रः परो मन्त्रः सर्वमन्त्रोत्तमोत्तमः ॥ मन्त्रराजाधिराजोऽयं मन्त्ररत्नमिति स्मृतः ॥ ८० ॥ वेदैः परमयं मन्त्रो जप्तः पञ्चाक्षरः परः ॥ महेश्वरेण जप्तोऽयं जप्तो व्यम्बिकया मुदा ॥ ८१ ॥ कुमारेणापि जप्तोऽयं गणेशेन पि सादरम् ॥ श्रीकालभैरवेणापि जप्तः पञ्चाक्षरः परः ॥ ८२ ॥

ह० त० अ० ३

वीरभद्रेण जप्तोऽयं नन्दिकेशेन सादरम् ॥ सभृङ्गि प्रमुखैः सर्वै गणैर्जप्तः सकिन्नरैः ॥ ८३ ॥ गन्धर्वैरपि जप्तोऽयं सकलत्रैश्च पन्नगैः ॥ नारायणेन जप्तोऽयं जप्तोऽयं पद्मया मुदा ॥ ८४ ॥ ब्रह्मणापि सारस्वत्या जप्तोऽयं परमो मनुः ॥ इन्द्रेण जप्तः शच्यापि जयन्तेनापि यत्नतः ॥ ८५ ॥ सूर्येण छायया जप्तः चन्द्रेणापि प्रयत्नतः ॥ अग्निनापि प्रजप्तोऽयं स्वाहयापि प्रयत्नतः ॥ ८६ ॥ वायुनापि प्रजप्तोऽयं भूत्या जप्तो विशेषतः ॥ यमेनापि प्रजप्तोऽयमन्यैरपि सुरैस्ततः ॥ ८७ ॥ दधीचि प्रमुखैः सर्वैः जप्तोऽयं मुनिभिः सदा ॥ अयमेव परो मन्त्रः सर्वेषां मोक्षदायकः ॥ ८८ ॥ पञ्चाक्षराकार सुधासमुद्रं श्रुत्वा महारुद्रमिवापरन्तम् को वा न तम्मन्त्र जपानुरक्तः त्यक्त्वा पशुत्वं कृत पापराशिम् ॥ ८९ ॥ इतोऽधिकः कोऽपि न वेद मध्ये मन्त्रोऽस्ति मन्त्राणि क एव सोऽयम् ॥ अयं स्मृतश्चेन्मरणावसाने मुक्तिः करांकेन करप्रपन्ना ॥ ९० ॥ मन्त्रेष्वयं शाम्भवमन्त्रराज- राजाधिराजः खलु शैवमन्त्रः ॥ अतः स एवामित पुण्यहेतुः स एव मोक्षाय विनिर्मितोऽपि ॥ ९१ ॥ इति तद्वचनं श्रुत्वा प्राह सत्यव्रतं सती ॥ अयं महेश्वरेणापि मंत्रो जप्तो जप्तः कथं वद ॥ ९२ ॥ मोक्षाय जप्यते मन्त्रो मुमुक्षुभिरयन्ततः ॥ किमस्ति कृत्यमीशस्य तज्जपेन विशेषतः ॥ ९३ ॥ चतुर्थ्यन्तम्परं प्राह शंकरं लोक शंकरम् ॥ तस्मै नमः परेणापि पूजा तावद्विधीयते ॥ ९४ ॥ पूजा विधेऽपि विधा सा तु तस्य सा स्यान्नमस्क्रिया ॥ कापि पूजा तया मर्त्यो मुच्यते पापबन्धनैः ॥

॥९५॥ सत्यव्रत उवाच ॥ सत्यमुक्तन्त्वया बाले तत्रोत्तरमिदं शृणु ॥ येन स्यात्संशयोच्छेदः पापराशिलयोऽपि ते ॥९६॥ वेदाः सृष्टाः शङ्करेण तेषु वेदेषु कः परः ॥ वेदभाग इति श्रीत्या शंकरेण विचारितः ॥९७॥ बहुकालं विचारेण रुद्राध्यायः परः स्मृतः ॥ स मन्त्ररत्नकलशः तत्तुल्योपि सर्वबहि ॥९८॥ लोके न तादृशं वस्तु दृश्यते मुक्तिसाधनम् ॥ तथा च तत्समं वस्तु तद्वेत्यवधारितम् ॥९९॥ तत्रापि मन्त्राः सन्त्येव बहवः शांभवाः शुभाः ॥ मन्त्ररत्नस्वरूपास्ते तेषां शक्तिर्विलक्षणा ॥१००॥ मन्त्रेषु तेषु सर्वेषु कः श्रेष्ठतम इत्यपि ॥ विचारितो महेशेन गौर्य्या सह विशेषतः ॥१॥ देवि देवि वरारोहे रुद्राध्यायगतेष्वपि ॥ मन्त्रेषु कः प्रियस्तावन्मन्त्रस्तव वदाधुना ॥२॥ इत्युक्तं तद्वचः श्रुत्वा शंकरस्य महात्मनः ॥ अति सन्तुष्टहृदया प्राह शंकरमादरात् ॥३॥ गौर्य्युवाच ॥ देवोत्तम महादेव प्रश्नोयस्ते तदुत्तरम् ॥ त्वयाने वक्ष्यामि क्षमा तत्रास्तु मय्यपि ॥४॥ भूर्जत्वचमेरमादाय रुद्राध्यायो निजाक्षरैः ॥ लेखनीयः प्रयत्नेन सलोचनमनोहरः ॥५॥ ततः परं पृथक् तेषां मन्त्राणामभिवीक्षणे ॥ तद्वर्णाकलने नैव तत्वं ज्ञेयन्न चान्यथा ॥६॥ यस्य मन्त्रस्य सामर्थ्यं यावानर्थोऽपि यादृशः ॥ तद्बोधस्तावदधुना कृपया तव जायते ॥७॥ ततः परं विशेषोऽपि स्यैयो भवति शंकर ॥ अन्यथा तस्य सामर्थ्यं दुर्ज्ञेयमिति मे मतिः ॥८॥ इति तद्वचनं श्रुत्वा शंकरो हृष्टमानसः ॥ तामालिङ्ग्या

हागिरिजां सम्यगुक्तं त्वयेत्यपि ॥९॥ ततः परं महादेवो लिखित्वा पुस्तके शुभे ॥ ददौ तस्यै पुस्तकञ्च साद्ध्यारस्वमस्तके ॥१०
नत्या ददर्श तान्मन्त्रान् अगाधार्थाननेकधा ॥ तन्मन्त्रालोकनेनापि परमानन्दमापसा ॥११॥ ततः परं महादेवः सर्ववि-
द्यानिधिस्तदा ॥ तद्व्याख्यानं मुदा तावच्चकारातिमनोहरम् ॥१२॥ तद्व्याख्यानेन कालोऽपि गतो यावद्युगाननै ॥ तावांस्ता
भ्यान्न विरतिः शिवाभ्यामपि केवलम् ॥१३॥ प्रकृत्यर्थे प्रत्ययार्थे भावनानां विचारणैः ॥ एकैकस्यापि मन्त्रस्य भू-
यान्कालो गतः खलु ॥१४॥ सम्पूर्णमुक्त्वा मन्त्रार्थं तदर्थार्थं स पुनः पुनः ॥ तदर्थख्यापनङ्कृत्वा स्थितस्तन्मन्त्रमु
च्चरन् ॥१५॥ यएव मंत्रः व्याख्यातः सएव पुनरादरात् ॥ जप्तोऽप्यर्थानुसन्धानपूर्वकं पुनरादरात् ॥१६॥ एकैक
मन्त्रमुच्चार्य्य तदर्थं स पुनः पुनः ॥ वक्तुमिच्छति गौरीशो विरतो न प्रजायते ॥१७॥ एकैकमन्त्रव्याख्याने ऽसंख्यातैरनेक
धा ॥ कल्पावर्त्तैरभूदेव न कल्पेष्वपि तन्मनः ॥१८॥ अङ्गषट्काभिधानेन निष्पन्नार्थो मनुस्तदा ॥ तदापि न जहात्येव
पुनर्जपति तं मनुम् ॥१९॥ पीतापि या सुधाधारा तां पुनः पातुमिच्छति ॥ तथा तया महादेवो मनुं तं वक्तुमिच्छति ॥२०॥
अम्बा पृच्छति तत्तत्वं सा पुनः पुनरादरात् ॥ न सापि विरता तस्य प्रश्नाद्युत्तराद्विरतो न सः ॥२१॥ समन्त्रमहिमाज्ञातः
शिवाभ्यामेव केवलम् ॥ ज्ञाता मधुरिमा तस्य ताभ्यामेव न चेतरैः ॥२२॥ द्राक्षा फलरसाभिज्ञस्तं पुनः पुनरिच्छति

2/8

१ यथा तथैतन्महिमा ताभ्यां ज्ञातः पुनःपुनः ॥२३॥ मन्त्रार्थज्ञानधारायासविच्छिन्ना न जायते ॥ तन्मन्त्रार्था-
नुसन्धानधारायाः सा सुधा परा ॥२४॥ एवं प्रत्येकं मन्त्राणां व्याख्यानेन महेश्वरः ॥ सन्तोषधारयाक्रान्तस्तया गौरि-
जयासह ॥२५॥ ततः पञ्चाक्षरान्तं शिवासायं मनुं परम् ॥ दृष्ट्वा सन्तोषमापन्नो न तस्माद्विरतः शिवः ॥२६॥
तदर्थाः कोटिशः प्रोक्ताः शंकरेण महात्मना ॥ श्रुता च्व्यशिवया भक्त्या त्यक्तामन्त्रान्तरन्तदा ॥२७॥ गुण-
बोधकमन्त्रेषु तदन्येषु तथाहरः ॥ न यथा स्वस्वरूपावबोधके तादृशे मनौ ॥२८॥ मनवः सन्तु बहवः किन्त्वे-
ष रत्यन्तदुर्लभः ॥ अयमेवेति विज्ञातः शंभुना संयुतोऽन्वितो मनुः ॥२९॥ तमेव मन्त्रमुच्चार्य्य कल्पेष्वपि गतेष्वपि
विरतो नाभवत्तस्य तन्माधुर्य्यानुसेवनात् ॥३०॥ ततः परं महादेवं तन्मन्त्रावर्तनोत्सुकं ॥ दृष्ट्वा गौरी प्रयत्नेन
प्रणम्य च कृताञ्जलिः ॥१३१॥ **गौर्य्युवाच** ॥ कृतार्थास्मि महादेव तद्वाध्यायावलोकनात् ॥ तावतैव प्रहृष्टाहं
सएवानन्दसाधनम् ॥१३२॥ तत्रयेमनवः श्रौताः तद्व्याख्याश्रवणादपि ॥ सएव परमानन्दः पुनरुक्तद्रव
स्थितः ॥३३॥ य तत्राप्ययं शिवाराध्यो मन्त्रोमन्त्रमणिः श्रुतः ॥ इतोऽधिको न कोऽप्यत्र मन्त्र इत्येवमे म
तिः ॥३४॥ यद्व्याख्यानेन कल्पानाम् अयुतानि गतान्यपि ॥ तद्व्याख्यानान्न विरतिः स्तवाद्यापि प्रजा-

यते ॥ ३५ ॥ अयन्धन्यतमः कालो यद्व्याख्यानेन नीयते ॥ एतद्व्याख्यानतः सन्तु सन्ततं कल्यकोटयः ॥ ३६ ॥
तद्व्याख्यान श्रवणतो विरतिर्मास्तु मे प्रभो ॥ अयमेव वरो देयः कृपया परया धुना ॥ ३७ ॥ अयं वरो वरमाणि
वराणामपि केवलम् ॥ अयान्निधाननिधकः सर्वस्वमपि मे प्रभो ॥ ३८ ॥ ~~एतद्दृष्टिं सुधां मन्ये सुधायामपि सर्वथा~~ ॥
पुनः पुनर्मधुरिमा तेनाभिनव एव मे ॥ संपादितोऽयं व्याख्याने रपारैरकलङ्कितैः ॥ ३९ ॥ पुनः पुनर्वर्धनीयः
सोऽयं मधुरिमा प्रभो ॥ एतद्दृष्टिं सुधां मन्ये सुधायामपि सर्वथा ॥ ४० ॥ इति तद्वचनं श्रुत्वा शंकरो लोकशंकरः ॥
तद्व्याख्यानरतो नित्यं कुमारं प्राह सादरम् ॥ ४१ ॥ शंकर उवाच ॥ कुमार शृणु मे वाक्यमशाक्यमपि सर्वथा ॥
कुमार कृत्यं यत्तत्ते कर्तव्यमधुना खलु ॥ ४२ ॥ अधुना मल्लराजार्य व्याख्यानेरतो सम्यतः ॥ कार्य्या-
न्तरे न मे प्रीतिः रम्विकायाश्च सर्वथा ॥ ४३ ॥ सृष्टिपालनसंहारान कुरु यत्नपुरःसरम् ॥ अद्यावधि विशे-
षेण न तत्रास्था मम ध्रुवम् ॥ ४४ ॥ यद्यत्कार्य्यं मया तावद्ध्यान पुरःसरम् ॥ अद्यावधि विशेषेण न तत्रा-
स्था मम ध्रुवम् ॥ ४५ ॥ कृतन्तत्तावदधुना त्वया कार्य्यं षडानन ॥ ४६ ॥ कदा वा मल्लराजस्य व्याख्या पूर्णा भ-
विष्यति ॥ स कालोप्यधुना तावद्गणनागोचरो न मे ॥ ४७ ॥ सृष्टिं च पालनं प्रीत्या कुरु यत्नपुरःसरम् ॥ संहार

कुरु प्राप्तसर्वदापि मदाज्ञया ॥ ४८ ॥ नोल्लंघनीयसहसा मदाज्ञापि तवाधुना ॥ मदाज्ञा पालने नैव तवानन्दः प्रवर्धताम् ॥ ४९ ॥ गणाध्यक्ष कोटिशः सन्ति सहायास्तव तैः सह ॥ त्वया सर्गादिकार्याणि कर्तव्यानि यथायथम् ॥ ५० ॥ मध्ये मध्ये समागत्य कुरु कार्यनिवेदनम् ॥ तदेव कार्यं यत्नेनाविरतं मे ततो मनः ॥ ५१ ॥ इति शंकरवाक्यानि श्रुत्वा वाक्यविशारदः ॥ तमाह गिरिशं नत्वा षण्मुखः सकृताञ्जलिः ॥ ५२ ॥ कुमार उवाच ॥ स्वामिन्मयापि मन्त्रार्थः साकल्येन श्रुतो न सः ॥ तन्मन्त्रार्थ श्रवणतो विरतश्चन मे मनः ॥ ५३ ॥ तदर्थाः कति तेषाञ्च तात्पर्यं कुत्र वा प्रभो ॥ तज्ज्ञानेन विना तावन्मदानन्दो न प्रवर्धते ॥ ५४ ॥ आम्बिका सन्निधानेन तदर्थ श्रावणे सति ॥ पुनरर्थान्तराकांक्षा मम तावत्प्रजायते ॥ ५५ ॥ कालान्तरेषु तत्प्रश्नः कर्तुमेव न शक्यते ॥ अर्थप्रवाहकल्लोलमालाकुलाविजृम्भणात् ॥ ५६ ॥ अशक्यमेव सहसा न तत्तदर्थावधारणम् ॥ पुनः प्रश्ने नावकाशः सर्वदा पि प्रजायते ॥ ५७ ॥ यं यमर्थं महादेवी पृच्छत्यादरपूर्वकम् ॥ तदर्थ कलने शक्तिर्मम तावन्न जायते ॥ ५८ ॥ त्वत्तश्चोदियमभ्यस्ता विद्या भवति शंकर ॥ तदा धन्यं परन्त्वन्यं वं धन्ये स्वात्मानं नान्यथा खलु ॥ ५९ ॥ मनोज्ञा शिवमन्त्रार्थ व्याख्या पीयूषवाहिनी

२८०

व्याख्या प्रवाहा स्खलिताः कथं वा ते मन्त्र राजस्य महे शतेकैः ॥ ग्राह्याः क
केन त्याज्या महादेव कृपा यदि भवेत्तदा ॥ १६० ॥ मत्कर्णार्णव पूर्ण वर्णतरिनी निर्माणदक्षाधुना त्वत्साक्षीपार्थिव
थं कर्ण महासुरेन्द्रः त्वया परं तात विनिर्मिताश्च ॥ १६१ ॥ सन्ततमुमा
र्जितेन मनसा तावत्त्वया तत्कृतम् ॥ १६२ ॥ अन्येनापि भवेन्न तद्विरिजया तेनाधुना मे मनो भूयस्तच्छ्रवणाय
कान्ताश्रितं वाञ्छति ॥ १६३ ॥ एतन्मन्त्र महोल्लसन्मधुरिमाराशिः समुज्जृम्भते ॥ तत्कल्लोल परापरंतरालिमाभूमा
सीमापि कः ॥ कामं काममयं मयं वितनुते तावदभ्यार्थितन्दैवाज्ञायत इत्यवैमि किमितोप्याशास्यमन्यत्प्रभो ॥
॥ १६४ ॥ इति श्रीशिव रहस्ये हराख्ये तृतीयांशे उत्तरार्धे याज्ञवल्क्यजनक संवादे नामाष्टत्रिंशोऽध्यायः ॥ ३८ ॥ श्री
काशी विश्वेश्वरार्पणमस्तु ॥ याज्ञवल्क्य उवाच ॥ इत्याकर्ण्य कुमार वाह वचनं हारावलीसन्निभं तत्पीयूषतरङ्ग
सान्निभं कुमुमा पीयूष कर्णार्णवैः ॥ पेयम् पातुं प्रियमति प्रायः स्वयं वाञ्छया पातुं कण्ठमणिं चकार
दयया प्युत्कण्ठया केवलम् ॥ १ ॥ श्रीशंकर उवाच ॥ कुमार साधूक्त मिदं त्वयाद्य पञ्चाक्षरार्थावगमाय यत्नः ॥ कृतस्त
तावत्परमार्थतस्तु सर्वोपकाराय न संशयोऽत्र ॥ २ ॥ लम्बोदरेण सह सादरमत्र नित्यं स्थित्वा विचार्य पुनरर्थ विशेषवचा-
तो ॥ सम्यग्निधाय हृदयेऽपि विनेय कालः कियानपि विशेष मयूख तुल्यः ॥ ३ ॥ इति तद्वचनं श्रुत्वा कुमारगणकोऽपि

सः ॥ आनन्दसागरापार तरंगासंग लीलया ॥४॥ ततः परं कुमारोऽपि (गणेशो) स्कन्दोऽपि ऋषियो मुहुः ॥ प्रणम्य चरणांभोजम् स्थितः शंकर सान्निधौ ॥५॥ महाप्रलय कालीन भयापहरण क्षमाम् ॥ मुहुः पञ्चाक्षर व्याख्यां सुश्राव षण्डाननः ॥६॥ ततः परं ददर्शायं कोटिशः शिव विग्रहान् ॥ स्कन्दः पञ्चाक्षरव्याख्या विशेष कथनोद्यतान् ॥७॥ पञ्चाक्षरार्थ व्याख्यान विग्रहानपि कोटिशः ॥ शंकराभिमुखान् सर्वान् भूति रुद्राक्ष भूषणान् ॥८॥ प्रहर्ष स्मेर वदनान् जटा मण्डल मण्डितान् ॥ तत्तदर्थावबोधादि सुधापान विजृम्भितान् ॥९॥ दृष्ट्वा तान्स्कन्दं करास्तकान् श्म शंकरानपि कोटिशः ॥ विचित्र माल्याभरणान् नव चन्द्रविभूषणान् ॥१०॥ सोमसूर्याग्नि नयनानुमालिङ्गित विग्रहान् त्रिशूलहस्तान्वरदान् नीलकण्ठान्मनोहरान् ॥११॥ दृष्ट्वा तान्विस्मयापन्नो लम्बोदर उवाच सः ॥ लम्बोदर उवाच ॥ किमिदं दृश्यते भ्रातः सहस्राणि सहस्रशः ॥१२॥ उग्राणामुग्रवीर्याणामपाराणां महात्मनाम् ॥ घन गम्भीर वचसामधुनाप्रतिमौजसाम् ॥१३॥ दिङ्मण्डलानि व्याप्तानि तै रेवामित विक्रमैः ॥ प्रतिक्षणं वृद्धिरेवतेषामाशु प्रजायते ॥१४॥ इति तद्वचनं श्रुत्वा स्कन्दः प्राह गणेश्वरं ॥ धैर्यमावह ते सर्वे शंकरस्येव विग्रहाः ॥१५॥ पञ्चाक्षरार्थ व्याख्यान मूर्तयः समुपस्थिताः ॥ कोटिशः कोटिशस्तेषां मुखानि रसना अपि ॥१६॥ रसनाको-

रिभिर्वास्य तद्दर्शाख्यापनं कथम् ॥ रुद्राणां कोटिभिर्वात्र ततो वृद्धिः प्रजायते ॥१७॥ अपारकल्पानगमेप्यपाराजेहाभि
रानन्दकरेन्दुमौलिः पञ्चाक्षरार्थानखिलान्सवक्तुं शक्तः कथं वा गिरिजापि शक्ता ॥१८॥ तस्य पञ्चाक्षरस्यैव यानर्थाना
ह शंकरः ॥ तद्दर्शाविग्रहान्पश्य कोटिशः समुपस्थितान् ॥१९॥ एतेषां गणना तावत्कर्तुमेव न शक्यते ॥ पुनः पुनर्भ
वन्त्येव कोटिशस्तेक्षणे क्षणे ॥२०॥ दृष्टः किलायमानन्दः स्त्वदालोकनमात्रतः ॥ आनन्दविग्रहान्पश्य शङ्करस्य
महात्मनः ॥२१॥ नादृष्टं कौतुकं लोकेन केनाप्यवलोकितम् ॥ शंकरानुग्रहेणैव मयादृष्टं त्वयापि तत् ॥२२॥ अपू
र्वा खलु सा सृष्टिरष्टमूर्त्तिकृता यतः ॥ विलक्षणैव लोकेभ्यः सर्वेभ्योऽपीति निश्चिता ॥२३॥ भाग्यानां परिपाकोय
म्पुण्यानामपि कोटिशः ॥ किमितोप्यधिकं भाग्यं भाग्योत्तममिति स्मृतम् ॥२४ इति तद्वचनं श्रुत्वा स्कन्दः सन्तु
ष्टमानसः माहेशेश्वरः ॥ ~~धैर्यमावहते सर्वे शंकरस्यैव विग्रहाः~~ ॥ सन्तुष्टमानसः दृष्ट्वा पुनः पुनः साम्बं ~~ममा~~ प्रापान
न्दमहोदधिम् ॥२५॥ ब्रह्मकल्पेष्वपारेषु गतेषु तदनन्तरम् ॥ नंदीशः स्कन्दपादाब्जं सस्मार प्रीतिपूर्वकम् ॥२६॥
सभक्तवत्सलस्तावन्नन्दिकेशेन संस्मृतः ॥ स च तेन सहोवाच किमित्याश्चर्यमावहत् ॥२७॥ स्मृतः किमर्थम
धुना किं वा कार्यमुपस्थितम् ॥ ~~२८~~ ॥ आनन्दांभोधिकल्लोललोलं क्षिप्तदाधुना ॥२८॥ नन्दिकेश्वर उवाच ॥

शिवरह०
१८८
१८८
१९९

अतीत ब्रह्म कल्पानां गणनापि न सर्वथा ॥ न जातमेव सहसा त्वत्पादाम्बुज दर्शनम् ॥ २९ ॥ व्यर्थः सर्वोगतः कालः न श्रुता क्वांभवीकथा ॥ ततस्त्वन्मुखमालोक्य जीवतैव स्थितं मया ॥ ३० ॥ त्वन्मुखालोकनाभावे मृत कल्पमिदं वपुः ॥ जीवनं मे कथं वास्यात् किन्न ज्ञातमिदन्त्वया ॥ ३१ ॥ भक्त वत्सलताम्बत्यात् तव मय्यपि यास्थितः ॥ स्नेह प्रवाहः सगतः किं विधेयमतः परम् ॥ ३२ ॥ महेश्वराज्ञया लोकाः प्रभवन्ति पुनः पुनः ॥ स्थितिं प्राप्य विनश्यन्ति स्वस्व कालेयथाक्रमम् ॥ ३३ ॥ शिवलीला प्रसारोयः सत्सृष्ट्यादीन्करोत्यतः ॥ नतत्क्रमः कस्यापि न विचारेऽपि तन्न हि ॥ ३४ ॥ गणानामपि सर्वेषां त्वद्दर्शनमपेक्षितम् ॥ ~~महेश दर्शनाकांक्षया पिवि फलेयमा~~ ॥ ॥ महेश दर्शनाकांक्षाजा[?]पि विफलेयसा ॥ ३५ ॥ क्व महेश पदाम्भोजालोकनं सुकृतैर्विना ॥ क्वतादृग्गानि पुण्यपुण्यानि राशीभूतानि कोटिशः ॥ ३६ ॥ तवापि दर्शनन्तावदस्माकमति दुर्लभम् ॥ अद्य स्नेह वशादेव कारितन्तत्षडानन ॥ ३७ ॥ इति तद्वचनं श्रुत्वा घनगम्भीरयागिरा ॥ प्राह स्कन्दस्तमेवादौ कृत्यमस्तीति सत्वरम् ॥ ३८ ॥ कैलासराजे कथने गिरिशः प्रवक्तं स्वर्धाङ्गभाग विनिविष्ट शिवासहायः ॥ धृत्वाप्यपार शिवा विग्रह कोटि कोटि जिह्वांगणो गणनयापि विना तदन्न ॥ ३९ ॥ तद्दर्शनान्नाविरतञ्च मनोधुनापि नूनं तदर्थकथनामृतवर्षिपूरैः ॥ पूर्णन्त-

ह० त० उ०
अ० ३९

थापि समुपागतमेव तावत् त्वच्चिन्तनेन किमिति [struck] स्मृतमेव मया ॥४०॥ त्वदर्थास्त्वपारास्तदर्थावबोधास्ततश्चित्तमेत-
न्निवर्तं कथं वा ॥ त्वया कोऽपि विघ्नः कृतः सोऽपि सद्योन कालोऽपि वार्ता विशेषेऽपि नन्दिन् ॥४१॥ सुधाप्रवाहाश्चलिताश्च-
यान्ति वा तदर्थरूपाः सहसाति वृद्धाः ॥ न ते भवन्त्येव तथाविधास्ते ते नूतना एव पुनः पुनर्हि ॥४२॥ आनन्दाब्धितरङ्गसङ्ग-
तमिदं चित्तं [struck] कथं वा भवेत् ॥ इत्येव प्रतिकल्पमीश्वरपदांभोजार्चनेऽविनम् ॥ नीतान्तैरधुनाखिलानि विविधान्यप्यु-
द्गतान्यहो जायन्त्येव पुनः पुनर्नवकथापीयूषधारावृताः ॥४३॥ शृणु शृणु शृणु तावत्त्वं ध्यानं सावधानां शिववचनविलासः
सोऽयमत्यद्भुतोऽभूत् ॥ परिहरति सगङ्गातुंगकल्लोलमाला विलसितमपि नूनं किं पदाम्भोविचित्रम् ॥४४॥ पञ्चाक्षरार्थ [struck]
[struck], समयापरिवीतमेवादिग्मण्डलं विपुलमाधुनिधान सन्ध्या ॥ ज्ञातानतादृगधुनादिनधीरपीति धैर्यं प्रवदृस
मकृत्कथया तथा मे ॥४५॥ पञ्चाक्षरार्थश्रवणेन तावद्गात्रं पवित्रं श्रवणानि तानि ॥ पूतानि सद्यः सुधयापि सिक्तान्यतः प
रं किं वद कार्यमस्ति ॥४६॥ वक्ता शंकर एव सापि गिरिजा श्रोतुं प्रवृत्ता मुदा ॥ तद्व्याख्यानसुधारसे रविरले स्तम्भः सवि
श्वेश्वरः ॥४७॥ तस्मात्सा गिरिराजराजतनया श्रोतुं पुनर्वा स्पृहा शम्भुं प्रेरयतीति नाद्भुतमिदं व्याख्यैव सा तादृशी ॥ याऽपूर्व
कल्पिता शिवेन बहुधा यत्नैः कथा सा कथाभिलाषा मुहुरेव तत्कथयतो नेशो निवृत्तः खलु ॥४८॥ कोना[सतत]लाशिवस्य न कुत्र

वृत्तस्तदथैरपि शम्भोस्तै मुरवरिकृतः करुणयासोऽयंविलासः प्रभो ॥ पुनः पुनर्नूतनमर्घ मुत्काहर्षोभवत्येव सदाशिवोपि
॥४७॥ तदर्थमूर्तिञ्चपुनः सदृष्ट्वा प्रदर्शयत्येव सदाशिवार्थे ॥ अतः परं शंकरसन्निधाने स्थैर्यं सदासादरमित्युदीर्य ॥
॥५०॥ स्कन्देगतोऽतित्वरया तदानीं नन्दीश्वरं विस्मयमापन्नजम् ॥ ततः परंनन्दिकेशो भृङ्गीप्रभृतिभिर्गणैः ॥५१॥
सहैकत्र सभां कृत्वा कैलासद्वारमाश्रितः ॥ ततः पञ्चाक्षरस्यैव मुहुर्व्यारव्यान कौशलम् ॥५२॥ व्याजहार महेशस्य ज
हार चरणं स्थिरम् ॥ ततः स मागता गरास्तत्र ब्रह्मनारायणादयः ॥५३॥ आगत्य नन्दिकेशन्तं प्रणताः सन्नतानताः नाः ॥
तानागतान्समालोक्य नन्दिकेशः शिवव्रतान् ॥५४॥ नारायणादीनाहाद्यौ किमागतमिहेत्यपि ॥ **नारायण उवाच** ॥ कल्प
न्ते सृष्टि रचासीदस्माकं शिवलीलया ॥ किन्तः कार्य्यमकार्य्यं वा तत्सर्वं वद तत्वतः ॥ महेश्वराज्ञयालोकाः सर्वेसृष्टा
स्थिता अपि ॥५६॥ अस्माकं शिवसन्निधानमधुना सम्भावितं किन्न वा दुण्ढेर्गणनायकस्य समयस्कन्दस्य वाकः
प्रियः ॥ अत्राभ्यागमनं निवेदयति यः कृत्यन्नयस्माद्भवेत्तं वा प्रेरय नन्दिकेश्वर परं कृत्यैर्विलम्बैरलम् ॥५७॥ त्वन्तः शो
पि महेश्वरस्य परमो भक्तोऽपि नाप्तस्तया देवानां नियामकोऽपि महता तत्कार्य्य कर्तापि न ॥ सर्वत्रत्वमुमासहायचरणांभो
जार्चनाद्यैस्त्वया प्राप्तम्भाग्यमितोऽपि ऽपि नाधिकमिति व्यालं फलैः केवलम् ॥५८॥ इति तद्वचनं श्रुत्वा यथापूर्वं

प्रकल्पितम् ॥ नारायणादिकान् दृष्ट्वा प्राह नन्दी सविस्मितः ॥५८॥ नन्दिकेश्वर उवाच ॥ किं किं पुण्यं पुराचीर्णं भवद्भिरमराः परम् ॥
तद्ब्रूध्वं विचार्येण कुतो ग्राममुपागतम् ॥५९॥ देवा ऊचुः ॥ स्थितमस्माभिरनिशं श्रीशैलाब्धिपारकन्धरे ॥ तत्कन्धरेति विस्तीर्णे
मनोज्ञं कदलीवनम् ॥६०॥ तिष्ठन्त्यम्बुजनीतानि सन्त्यपारसरांस्यपि ॥ न तत्र सूर्य्ये सञ्चारः चन्द्रस्यापि न रश्मयः ॥६१॥ अत्युच्च
बिल्वतरवः सन्ति तत्र मनोहराः ॥ मन्दाराद्याश्च तरवस्तत्र सन्ति मनोहराः ॥६२॥ ~~तत्रास्ति रत्नप्रासादे रत्नमन्दिरमण्डितः~~ ॥
तत्र सर्वर्तु पुष्पाणि सर्वदा सन्ति कोटिशः ॥६३॥ तत्रैवामृतकुल्याश्च सन्ति रम्याः सहस्रशः ॥६३॥ तत्रास्ति लिङ्गमुत्कृष्टं त्रिपु
रान्तकनामकम् ॥ तत्रास्ति रत्नप्रासादो ~~रत्नकुसुमाङ्के~~ रत्नमन्दिरमण्डितः ॥६४॥ तद्रत्नकान्तिभिः सर्वं तदालोकसमन्वितम्
न चालोकान्तरापेक्षा तत्रत्यानां महात्मनाम् ॥६५॥ तेषां प्रभावः केनापि वक्तुमेव न शक्यते ॥ भस्मोद्धूलितसर्वाङ्गाः त्रिपुण्ड्रा
ङ्कितमस्तकाः ॥६६॥ रुद्राक्षमालाभरणाः शिवपूजापरायणाः ॥ तत्र प्रलयवार्त्तापि सर्वथापि न श्रुता खलु ॥६७॥ न तत्र
यमसञ्चारः पापवार्त्तापि दूरतः ॥ शिवलिङ्गार्चनेनैव तत्र स्यात्कालयापनम् ॥६८॥ नित्यं श्रीशैलनाथस्य विहारस्तत्र जा
यते ॥ स विहारोप्यनुमितो दिव्यैः परिमलादिभिः ॥६९॥ श्रूयन्ते दिव्यगानानि ध्वनयस्तत्र केवलम् ॥ गायकास्तु न दृश्य
न्ते न च गोणादयस्तथा ॥७०॥ पुष्पसारः सदा तत्र सर्वदा मणिदीपिकाः ॥ चन्द्रमण्डलसंकाशं तल्लिङ्गमतिकोमलम् ॥७१

723

बिल्वमन्दारपुष्पाद्यैः क्रियते तस्य पूजनम् ॥ तत्राकल्पितदीपानाम् प्रभाः सन्ति सहस्रशः ॥७२॥ तत्सभाकन्धरव्याप्ता कोटिसू-
र्य्यसमप्रभासमा ॥ न तत्सभानिभा कापि प्रभात्वन्यत्र दृश्यते ॥७३॥ तन्मध्ये धाम्भवास्सन्ति शिवपूजापरायणाः ॥ तद्भृत्यभृत्य
भृत्याश्च वयन्तत्सेवकाः खलु ॥७४॥ हारोपहारलेशेन तद्भुक्तोवरितेन च ॥ अस्मदीयशरीराणां पोषणं प्रतिवासरम् ॥
॥७५॥ कल्पवृक्षसमानीतैः ह्युपहारः प्रकल्प्यते ॥ फलाद्यैर्विविधैर्भक्ष्यैः शङ्करायानुवासरम् ॥७६॥ तद्भुक्तभुक्तशेषाणां फलांशे
नविशेषतः ॥ भक्षणे नैव पुष्टाश्च देवस्त्वस्माकं मन्वहम् ॥७७॥ तैर्यदा पूज्यते लिङ्गं त्रिपुरान्तकसंज्ञकम् ॥ अस्माभिर्दृश्यते दूरात्त
वङ्गमनमेव न ॥७८॥ प्रज्वलत्पर्वताकारं तल्लिङ्गं भाति शोभनम् ॥ महासिद्धिगणस्तत्र सर्वदा समुपस्थितः ॥७९॥ तत्र वत्सरपर्य्य
ल्लेनैकैककदलीफलैः ॥ तृप्ति र्भवति सर्वेषां दिव्यैः शिवसमर्पितैः ॥८०॥ सुवर्णवर्णमुत्कृष्टं तन्महत्कदलीफलम् ॥ सहस्र
तद्भिरेकेन फलेनैव प्रजायते ॥८१॥ द्राक्षाफलानि रम्याणि तादृशान्येव तान्यपि ॥ कपित्थानि न्यपि तुल्यानि ण्यपाराणि
वने वने ॥८२॥ तादृशं भाग्यमन्यत्र भूलोके न दृश्यते ॥ ताद्विहारस्थलं रम्यं मपूर्वं परिकल्पितम् ॥८३॥ तस्मिन्नेव गिरौ रम्या-
ण्यपाराणि स्थले स्थले ॥ तिष्ठन्त्यालोकनादेव सर्वपापहराण्यपि ॥८४॥ तानि स्वयम्भूलिङ्गानि वह्निकल्पानि को
टिशः ॥ कोटिशः सन्ति कुण्डानि सर्वसिद्धिकराणि च ॥८५॥ तत्रैव मत्तमातङ्गाः कोटिशः सन्ति तेऽपि ॥

ऐरावतावतारैस्तैः व्याप्तं तद्गिरिकाननम् ॥ ८६ ॥ पाताल वाहिनी गंगा तत्र तिष्ठति शोभना ॥ तद्विलोकन मात्रेण पाप नाशः प्र-
जायते ॥ ८७ ॥ तत्र स्नात्वा महादेवम् पूजयन्बिल्व पल्लवैः ॥ अभीप्सितार्थान्लभते तत्किलात्यन्त दुर्लभम् ॥ ८८ ॥ तत्रत्यास्तु
शिलाः सर्वाः शिवलिङ्गानि केवलम् ॥ गुल्मानि तरवः पत्रा[illegible]ण्यपराण्य[illegible]मितान्यपि ॥ ८९ ॥ भ्रमराम्बा विशालाक्षी सा-
भवानि तिशिवा शुभा ॥ तत्रास्ति तत्पदाम्भोज पूजया भाग्यमश्नुते ॥ ९० ॥ यस्ताममित भूतायां समभ्यर्च्य महानिशि ॥ कुर्या-
त्प्रदक्षिणन्तस्याः ससिद्धिम्प्राप्नुयान्नरः ॥ ९१ ॥ अस्माभिरेकदा देवी भूतायां निशि वीक्षिता ॥ प्रदक्षिणी कृता सैव शतवारस्त्वथ-
न्ततः ॥ ९२ ॥ नग्नै र्विभूतिकक्षैर्जटामण्डलमण्डितैः ॥ तदानीमागतास्तत्र कोटिशो भैरवास्तदा ॥ ९३ ॥ एकैकः पर्वताकारो ज्वलत्प-
र्वतमस्तकः ॥ हस्तैरपारैर्धृत्वैव वह्निरूपान्नगोत्तमान् ॥ ९४ ॥ सिंहाः समागतास्तत्र ते हिमाचल सन्निभाः ॥ व्याघ्राः समागता-
स्तत्र कालकूट विषोपमाः ॥ ९५ ॥ सहस्रजिह्वाः सर्पाश्च कोटिशः समुपागताः ॥ तद्दर्शनात्संकम्पोऽपि समभवच्चलस्तदा ॥ ९६ ॥ तस्या-
नुवृत्तिरद्यापि शरीरेष्वनुवर्तते ॥ तदा तद्दर्शनादेव धैर्यमाशु विनिर्गतम् ॥ ९७ ॥ ते कोटियोजनायामरसना व्याप्तविग्रहाः ॥ ज्वालामाला-
समाकीर्णे पर्वता इव संस्थिताः ॥ ९८ ॥ ततः परं कृतं धैर्यं मरणात्किं भयं भवेत् ॥ एतेभ्य इति निश्चित्य ततस्ते निर्गता अपि ॥ ९९ ॥
ततः परं भवानी सा दिव्यसुन्दरविग्रहा ॥ प्रसन्ना प्राह विमला कमलामल लोचना ॥ १०० ॥ यत्सौन्दर्यन्तदा दृष्टम्भवायास्तत्र

रम्भुवि ॥ न दृष्टं क्वापि तत्तावत्प्रसन्नमति शोभनम् ॥१॥ तदुद्वीक्षणमस्माकमशक्यमभवत्तदा ॥ तत्पदाम्बुरुहे दत्तं सचित्त-
नयनाम्बुजम् ॥२॥ ततः श्रव्याभवद्वाणी नभोमण्डलमध्यतः ॥ सा श्रुत्वा दुःखनाशाय सर्वसौभाग्यदायिनी ॥३॥
॥ अशरीरवाक् उवाच ॥ किमपेक्षितमस्त्यत्र भवतान्तद्वदन्तु वः ॥ तद्भविष्यति सन्देहो न कार्यः सर्वदा खलु ॥४॥ तदानी
मुक्तमस्माभिः सुरत्वं समुपेक्षितम् ॥ नान्यदित्येव तेनैव तथास्त्वित्युक्तमादरात् ॥५॥ ततः परन्तु सा दृष्टा भवानी
भववल्लभा ॥ वयञ्च विस्मयाविष्टाः सर्वेऽपि समुपागताः ॥६॥ कार्य्यमस्ति किमस्माकं तत्सर्वं वद सादरम् ॥ कस्मिन् कर्मा
णि योग्यत्वमस्माकमवधारितुम् ॥७॥ इति तद्वचनं श्रुत्वा नन्दीशो हृष्टमानसः ॥ तैरपारैः सुरैः साकम् (विष्णु) वैकुण्ठमगमत्तदा ॥८॥ पूर्व
शोभासमायातन्दृष्ट्वा वैकुण्ठमादरात् ॥ स्मृत्वा महेशपादाब्जं तेष्वेकम्प्राह सादरम् ॥९॥ आयाहि पुण्यरूपत्वं वैकुण्ठमिदमुत्तमम् ॥ भव
नन्देवदेवेन महेशेन विनिर्मितम् ॥१०॥ एतस्य भवनस्यैव कर्तव्यं रक्षणन्त्वया ॥ अप्रमादेन कर्तव्यमत्र शंकरपूजनम् ॥११॥ इमानि दिव्य
लिङ्गानि शिवरूपाणि कोटिशः ॥ पश्य पश्य विशेषेण रम्यान्वितमरून्यपि ॥१२॥ मणिमण्डलसंक्रान्तं बिल्वमूलेषु पूजया ॥ शिव-
लिङ्गानि यत्नेन कोमलैर्बिल्वपल्लवैः ॥१३॥ एते शुभे शिवलिङ्गेषु सर्वदा बिल्वपल्लवाः ॥ अपापान्यपि पुण्यानि सफलानि विशेषतः
॥१४॥ पूजा धन्यानि लिङ्गानि भविष्यन्ति यदा तदा ॥ अधिकारश्च यस्ते भविष्यति न संशयः ॥१५॥ एतल्लिङ्गार्चनायासौ न्नि-

निर्माणन्तव वस्तुतः ॥ धन्योऽसि कृतकृत्योऽसि शिवार्चनपरो भव ॥ १६ ॥ तवात्र नामकरणं करोमि शिवलीलया ॥ नारायणो

ऽसि विष्णुस्त्वं वैकुण्ठोऽसि जनार्दनः ॥ १७ ॥ त्वमेव कमलाकान्तो गोविन्दो गरुडध्वजः । चक्रलाभे तु चक्रीति नाम ते भावि व-

स्तुतः ॥ १८ ॥ तवास्ति कृत्यमग्रेऽपि तत्कालेन भविष्यति ॥ पञ्चाक्षरजपं प्रीत्या कुरु सन्ततमास्तिक ॥ १९ ॥ उद्धूलन

त्रिपुण्ड्राभ्याम् रुद्राक्षैरपि संस्कृतः ॥ पूजयस्व महादेवं प्रमादो मास्तु सर्वदा ॥ २० ॥ इत्युक्त्वा स्थापयित्वा च वैकुण्ठे

तं जनार्दनम् ॥ (ब्रह्मा) सत्यलोकं ययौ (नदी तट) दृष्ट्वा सुन्दरं शुभम् ॥ २१ ॥ सत्यलोकेऽपि दृष्टानि शिवलिङ्गानि कोटिशः ॥ ता-

नि दृष्ट्वा प्रहृष्टात्मा पूजयामास सादरम् ॥ २२ ॥ ततः परं समाहूय तेष्वेकं शिवपूजकम् ॥ तमाह सादरं भक्त्या स्मृत्वा शङ्क

र पादुके ॥ २३ ॥ सुभगोऽसि शिवाचारे एत्र लिङ्गानि पूजय ॥ अस्य लोकस्य कर्तव्यं सत्यस्य परिपालनम् ॥ २४ ॥ सत्य

लोक इति ख्यातः सोऽयं शङ्कर सम्मतः ॥ अस्य बिल्ववनस्यापि कर्तव्यं रक्षणन्त्वया ॥ २५ ॥ एतत्पालन पुण्येन नाधि

कार विपर्ययः ॥ अन्यथा सदनादस्मात् प्रच्यवस्ते भविष्यति ॥ २६ ॥ तव नामानि वक्ष्यामि महादेवाज्ञयाधुना ॥ चतुर्मु

खो विधि ब्रह्मा वाणीरमण इत्यपि ॥ २७ ॥ इत्युक्त्वा स्थापयित्वा तं सत्यलोके मनोहरे ॥ (इन्द्र) स्वर्गलोकं ययौ पश्चात्ते देवैः सह

सादरम् ॥ २८ ॥ तत्र तेष्वेकमाहूय नन्दी प्राह शिवं स्मरन् ॥ स्वर्गलोकः सुखायायं शिवेन परिकल्पितः ॥ २९ ॥

एतस्य पालनं कार्य्यन्त्वया सादरमन्वहम् ॥ इमानि शिवलिङ्गानि पूजनीयानि यत्नतः ॥१३०॥ इदं खलु शिवोद्यानमेतद्द्रुमसमुद्भवैः ॥ पुष्पैरपारैरनिशं महेश्वरमिहार्चयेः ॥३१॥ महेश्वरार्चने विघ्नो यदि सम्भावितस्तदा ॥ तदातवाधिकारोपि गत इत्यवधारय ॥३२॥ तुभ्यन्नामानि दास्यामि (इयम्) महेश्वरलीलया ॥ इन्द्रः शक्रः शचीकान्तः वज्री वृत्रारिरित्यपि ॥३३॥ ततः परञ्च तेष्वेकं समाहूय तमाह सः ॥ तदिदं सुरकान्तारं पालनीयन्त्वयाधुना ॥३४॥ सन्त्यत्र शिवलिङ्गानि पूजनीयानि सादरम् ॥ एतदुद्यानवनजैः पुष्पैरर्चय शङ्करम् ॥३५॥ एतल्लिङ्गार्चनाभावो यदि ज्ञातस्तदा तव ॥ अधिकारप्रच्यवोपि जात इत्यवधारय ॥३६॥ एतल्लिङ्गार्चनं कर्तुं स्थापितोऽस्त्यत्र सर्वदा ॥ लिङ्गार्चनपरित्यागो न कार्य्यः सर्वथा त्वया ॥३७॥ महामृत्युञ्जयं मत्वा महादेवम्प्रयत्नतः ॥ पूजयस्वानिशं शक्या विहाय भ्रममादरात् ॥३८॥ एतस्मिन्सुरकान्तारे शांकराणामागमनं यदि ॥ तदा तानति यत्नेन पूजयस्व विधानतः ॥३९॥ अनेनैव हि मार्गेण कैलासगमनोत्सुकाः ॥ यदि स्युः शांकरास्तर्हि तानभ्यर्चय सादरम् ॥४०॥ अशांकराणां निलयाः कल्पिताः सन्ति कोटिशः ॥ तेषु तान्पातयेत्येव घातयस्वातिदारुणम् ॥४१॥ विदारयस्व ककचैः तच्छरीराणि कोटिशः ॥ कोटिशश्चाग्निकुण्डेषु तान्पातय निपातय ॥४२॥ अग्निकुल्यासु-

सर्वासु तानाप्लावय दुर्जनान् ॥ अशैवानान्तत्र शैलेष्वारोहणमनेकधा ॥४३॥ भवत्वशैवदुःखायतेषामस्त्वनिव
र्त्तनम् ॥ अशैवार्थङ्कल्पितास्तु ते वृश्चिकसागराः ॥४४॥ विषज्वालासागराश्च दन्दशूकसमाश्रयाः ॥ अशांकर विना
शाय कल्पिताः सन्ति कोटिशः ॥४५॥ प्रतप्तशस्त्रगिरयः प्रतप्ताय सपर्वताः ॥ अशाम्भवाभितापाय कल्पिताः स-
न्ति कोटिशः ॥४६॥ कोटिशः सन्ति तान्पश्य तप्तपूयान्धुसिन्धवः ॥ तेष्वस्तु मज्जनन्तेषामशैवानां दुरात्मनाम्
॥४७॥ तत्रैव यातनास्थानान्यपाराण्यपि सन्त्यतः ॥ तान्यशैवातिदुःखाय कल्पितानि विलोकय ॥४८॥ अशाम्भवस्व
रूपाणि वक्ष्यामि शृणु सादरम् ॥ अशाम्भवाचारयुक्तमशाम्भवमिति स्मर ॥४९॥ भस्मत्रिपुण्ड्ररहितानशैवानिति
संस्मर ॥ उद्धूलनविहीनायेतानशैवानिति स्मर ॥५०॥ पञ्चाक्षरविहीनायेतानशैवानिति स्मर ॥ शिवार्चनविहीना
येतानशैवानिति स्मर ॥५१॥ शिवार्चनध्यानविहीनचित्तास्त्रिपुण्ड्ररुद्राक्षविहीनदेहान् ॥ दुष्टानशैवानि-
ति पातयात्र तानेव घोरे निरये यथेष्टम् ॥५२॥ दूतास्तु लोके विचरन्तु तावत्ते कोटिशः ॥ शैवगृहान्विहाय ॥
अशैववेश्म स्वान्ति घोररूपास्तेषां विनाशाय पुनः पुनश्च ॥५३॥ तावत्कृत्यमिदान्नित्यं शिवपूजनपूर्वकम् ॥
शिवार्चनपरित्यागेन कार्य्यः सर्वथा त्वया ॥५४॥ तवनामानि देयानि मया शंकरलीलया ॥ यमः कालो महा

मृत्युः तथा शमन इत्यपि ॥५५॥ एवमुक्त्वा स तत्त्वज्ञा नन्दिकेशं कृताञ्जलिः ॥ तथेत्युक्त्वा तदाज्ञाञ्च दधार शिरसा परम् ॥
॥५६॥ ततः पञ्चाक्षरान्यान्दिक्पालान्महेश्वरम् । नन्दिकेश्वरः ॥ तेषामपि ददौ नामान्युमाकान्तस्य लीलया ॥५७
नक्षत्र रूपानन्यांश्च सचकार गृहानपि ॥ चकार मुनि निर्माणं गिरि निर्माणमादरात् ॥५८॥ गन्धर्वाणाञ्च निर्माणं किन्
राणां विशेषतः ॥ तथा व्याघ्रादि जन्तूनाम् पतङ्गानाञ्च कोटिशः ॥५९॥ समुद्राणाञ्च निर्माणन्नदीनाञ्च विशेषतः
चारणाञ्च निर्माणं मनुष्याणांञ्च विशेषतः ॥६०॥ सर्पाणामपि निर्माणं वृश्चिकाणां नां विशेषतः ॥६०॥ सरसामपि निर्माण
मोषधीनां विशेषतः ॥ वनानामपि निर्माणं सिंहानाञ्च विशेषतः ॥६१॥ तथा व्याघ्रादि जन्तूनां पतङ्गानाञ्च कोटिशः ॥ पशू-
नामपि निर्माणं कीटकानां विशेषतः ॥६२॥ एवं कृत्वा सनिर्माणं सर्वेषां नन्दिकेश्वरः ॥ ययौ कैलासनगरं पूजितः सकलैः
सुरैः ॥६३॥ तत्रापार गणैर्युक्तः श्रीकैलाश स पत्तने ॥ प्रभावं देवदेवस्य ससार गिरिजापतेः ॥६४॥ ततः पञ्चाक्षर व्या-
ख्या ध्वनिं श्रुत्वा निरन्तरम् ॥ उवास नन्दिकेशोऽपि भृङ्गि तण्डि समन्वितः ॥६५॥ इति सत्यव्रतस्यैव श्रुत्वा वचनमाद
रात् ॥ तत्पत्नी शुकवाणीति सु सन्तुष्टा पुनराह तम् ॥६६॥ शुकवाणी उवाच ॥ पञ्चाक्षरार्थ व्याख्यानात् कदास्याद्विरतः
शिवः ॥ विरता सा भवानी च तदर्थ श्रवणाद्भवेत् ॥६७॥ तयोः कार्य्यान्तरापेक्षा शिवयोः किन्नजायते ॥ षण्मुखस्य

गणेशस्य किल कार्य्यान्तरं वद ॥ ६८॥ इति तद्वचनं श्रुत्वा शुकवाणीमुवाच सः ॥ सस्मार गिरिजाकान्तं मुहुर्मुहुरनामयम् ॥ ६९॥
सत्यव्रत उवाच ॥ शृणु सत्यमिदं वाक्यं सावधानं वरानने ॥ देवदेवस्य महिमानं मनो वा विषयोऽपि न ॥ ७०॥ शङ्करः
करुणासिन्धुर्यत्कार्य्यं कर्तुमिच्छति ॥ तत्र नायासलेशोऽपि महादेवस्य शूलिनः ॥ ७१॥ तदिच्छयापरं कार्य्यं भवत्येव
सहस्रधा ॥ इच्छामात्रेण सिद्धार्थः तत एव शिवः प्रभुः ॥ ७२॥ अन्येन कल्पपर्य्यन्तं कृते यत्नेऽपि सर्वथा ॥ कार्यलेशोऽ
पि सहसा न सुरेण प्रजायते ॥ ७३॥ अभ्रंकषाद्रिनिर्माणं क्षणेनैव करोति सः ॥ तदिच्छया तदुत्पत्तिः केवलं जायते यतः ॥
॥ ७४॥ समुद्राणाञ्च निर्म्माणं स करोति महेश्वरः ॥ न तत्रायासलेशोऽपि गिरिशस्य महात्मनः ॥ ७५॥ क्षीरसागरनिर्म्माणं
कृतं तेन महात्मना ॥ स्वेच्छालेशेन तेनैव गौरीकान्तेन लीलया ॥ ७६॥ घृतसागरनिर्माणं शङ्करेणेच्छया कृतम् ॥
इक्षुसागरनिर्म्माणं शङ्करेण कृतं खलु ॥ ७७॥ अन्येषां सागराणाञ्च निर्म्माणं लीलया कृतम् ॥ भूनिर्म्माणञ्च तेनैव ली-
लया खलु तत्कृतम् ॥ ७८॥ भूधराद्याश्च शैलाश्च निर्मितास्तेन लीलया ॥ भूमं चकस्तंभरूपास्ते शैलाः ससुन्दरि
॥ ७९॥ पातालरूपो लोकोऽपि सृष्टस्तेन स्वलीलया ॥ लोकः करण्डकाकारः काकोदरपराश्रयः ॥ ८०॥ तस्मिन् लोके शि
वस्थानमेकमस्ति वरानने ॥ तल्लिङ्गं काञ्चनाकारं शेषभूषणनामकम् ॥ ८१॥ तत्रापि निर्मितं रम्यं मन्दिरं रत्नसुन्-

शिवरह० २०५

रम् ॥ रत्नप्रसादशृङ्गाग्रकोटिकोटिविराजितम् ॥ ८२ ॥ तस्य शृंगस्य रत्नानि विविधान्यपि कोटिशः ॥ तत्प्रभाभिः स लोकोऽपि
भासुरः सर्वदा खलु ॥ ८३ ॥ तत्र शेषादयो नागाः पूजयन्ति महेश्वरम् ॥ तदुद्यानवनोत्पन्नप्रसूनस्रग्भिरादरात् ॥ ८४ ॥ अख
ण्डबिल्वपत्राणि सुवर्णकमलान्यपि ॥ तत्रामितानि तैः पूजां कुर्वन्ति मुनिपुङ्गवाः ॥ ८५ ॥ तत्र शेषोऽपि नागाद्यैः (रत्ना) अपारैर्गि
रिजापतिम् ॥ पूजयत्यनिशं शम्भुं बिल्वैश्च कनकाम्बुजैः ॥ ८६ ॥ तत्र केतकपुष्पैश्च मन्दारैरति शोभनैः ॥ सुवर्णचम्प
काकारप्रसूनैः पूजयन्ति तम् ॥ ८७ ॥ नागकन्यासहस्राणि पूजयित्वा महेश्वरम् ॥ नृत्यं कुर्वन्ति यत्नेन तस्मिञ्छङ्करमन्दि
रे ॥ ८८ ॥ सकुटुम्बः पूर्णपतिः सपुत्रोऽपि महेश्वरम् ॥ पूजयित्वा प्रसूनाद्यैः कालन्नयति सादरम् ॥ ८९ ॥ कोटिशस्तत्कुटुम्बा
नि तत्पुत्रा अपि कोटिशः ॥ पूजयन्ति महादेवमति यत्नेन सन्ततम् ॥ ९० ॥ तेषां शिवार्चनङ्कार्य्यं नास्ति कार्य्यान्तरन्तथा ॥
विद्यमानानि कार्य्याणि सन्त्यक्तान्येव तैः सदा ॥ ९१ ॥ शिवपूजनमस्माकं परमं कार्य्यमित्यपि ॥ तिष्ठन्ति नागलोकस्थाः
सर्वे काकोदरा अपि ॥ ९२ ॥ शिवपूजाविनिर्मुक्तः कोऽपि काकोदरोऽपि न ॥ अन्येषां तत्र का वार्त्ता तेषां कार्य्यं शिवार्च
नम् ॥ ९३ ॥ तेषान्तथाविधा भक्तिः शिवेनोत्पादिता ततः ॥ तथैव तेऽपि कुर्वन्ति लीलया शिवपूजनम् ॥ ९४ ॥ ली-
लामात्रकृतामिताखिलजगज्जालाय तस्मै नमः ॥ तस्मै कारणकारणाय करुणापूर्णार्णवाया सकृत ॥ [illegible] तस्मै सृष्ट

ह० तृ० उ० अ० ३९ २०५

प्ता

जगत्स्थिति ह्रुति पर व्यापार लीला रस व्याख्यायापि नमोनमः पुनरिदं शाम्बाय तस्मै नमः ॥१९५॥ इति श्री शिवरहस्ये हराख्ये तृतीयांशे उत्तरार्द्धे याज्ञवल्क्य जनक सम्वादो नामैकोनचत्वारिंशोऽध्यायः ॥३९॥ रत्नाकर उवाच ॥ इति सत्यव्रतोक्तानि बचनानि विशेषतः ॥ श्रुत्वा तमाह भर्तारं हर्तारं पापकर्म्मणाम् ॥१॥ शुकवाण्युवाच ॥ यदुक्तमधुना विद्वन् तत्सर्वं मापनाशकम् ॥ पुनः प्रश्नान्तरं कार्य्यन्त्वन्न देहि ममोत्तरम् ॥२॥ कृपालुत्वेन विज्ञातः सर्वैरपि तथा सति ॥ दया विधेया दयया पालनीयास्मि सर्वथा ॥३॥ गौरीमनो विलासाना मपाराणां महेश्वरः ॥ कथमासीद्धलयोऽयं वद सर्वं विशेषतः ॥४॥ एतादृशं कृतं पुण्यं किंवा गिरिजया तथा ॥ येन सर्वामराधीशो महेशस्तत्पतिः प्रभुः ॥५॥ महेश्वर पतिर्यस्माद् दम्बिकायास्ततः परम् ॥ सुराः ॥ नारायणाद्यो दासाः ॥ तस्याः दास्यः सुराङ्गनाः ॥६॥ गन्धर्वाः किन्नराः सिद्धाः चारणा अपि सेवकाः ॥ गौर्य्यास्तदङ्गनाः सर्वा स्तच्चेटो चेटिकाः खलु ॥७॥ इदं खलु महद्भाग्यं प्राप्तं गौर्य्या तथा कथम् ॥ किं वा व्रतं पुराचीर्णं येन भाग्यमिदं महत् ॥८॥ किञ्च मृत्युञ्जयो भर्त्ता तथा प्राप्तो महेश्वरः ॥ सा सर्व मङ्गला जाता वैधव्यं नैव पश्यति ॥९॥ तदिदं कौतुकं श्रोतुमिच्छा जाता ममाधुना ॥ वद सर्वं विशेषेण यथा ज्ञातन्तथा मुने ॥१०॥ इतीतद्वचनं श्रुत्वा हृष्टः सत्यव्रतस्तदा ॥ तामुवाचाति विनतां कृताञ्जलि पुटां मुनिः ॥११॥ सत्यव्रत उवाच श्रृणु भद्रे कौतुकानि महात्म्यं गिरिशस्य च ॥ पाप राशि हरन्तस्य माहात्म्य श्रवणादपि ॥१२॥ देवासुरमभूद्युद्धं पूर्वं शतयुगाव-

श्रीविरह० २०६

षि ॥ तत्र दैत्येश्वरः कोऽपि जातश्चण्डपितामह ॥ १३ ॥ अग्निचक्राकुलं नामनगरन्तस्य शोभने ॥ तदेव नगरन्तावदग्निप्राकार वेष्टितम् ॥ १४ ॥ प्रचण्ड नाम दैत्येशः कामरूपोऽतिभीषणः ॥ सूर्य्यमण्डल पर्य्यन्तं तस्य कायः प्रवर्त्तते ॥ १५ ॥ शिरांसि कोटिशस्तस्य करास्तस्यैव कोटिशः ॥ नेत्राणि कोटिशस्तस्य चरणा अपि कोटिशः ॥ १६ ॥ एकैकस्मिन्मुखे तस्य रसना अपि कोटिशः न दन्तानान्तु गणनादन्ताः कुलिश सम्भवाः ॥ १७ ॥ ज्वालामाला समाकीर्णा स्ते दन्ता अपि कोटिशः ॥ तस्य मन्त्राणि वाक्यानि गज तुल्यानि कोटिशः ॥ १८ ॥ तच्छरीर प्रभा पूरैः पूरितं सकलं जगत् ॥ तन्निश्वास कुलोद्वेलाः समुद्राः सप्तसागराः ॥ १९ ॥ सगिरीनखिलानुग्रैः सिकतानिव पश्यति ॥ तत्क्रूर दृष्टिपातेन भस्मीभूता भवन्ति ते ॥ २० ॥ तदुत्पन्नं महादैत्यं देवा नारायणादयः ॥ श्रुत्वा पातालमगमन् तस्मात्तत्तेजसा परम् ॥ २१ ॥ ते पाताले भयग्रस्ताः किङ्कर्त्तव्यमिहेत्यपि ॥ चिन्तया परया ग्रस्ताः स्थिताश्शेषादिभिस्तदा ॥ २२ ॥ युगानामयुतन्तत्र स्थित्वा दुःखातुरास्ततः ॥ विचार निरता जाताः कार्याकार्य विवेकतः ॥ २३ ॥ तदा नारायणं प्राह ब्रह्मा म्लान मुखाम्बुजम् ॥ इन्द्रेण प्रेरितो देवैस्तदन्यैरपि दुःखितः ॥ २४ ॥ **ब्रह्मोवाच** ॥ नारायण कियत्कालमत्रस्थेयमतः परम् ॥ मरणं वा वरन्नूनं न चान्य सदने स्थितिः ॥ २५ ॥ अन्याधीनतया नेयः कियान्कालो वदाधुना ॥ सचेद्यातिसंक्रुद्धो दैत्यः किंवा तदा वद ॥ २६ ॥ स समागत्य ससुतान्सकुटुम्बान्सुरान्यदि ॥ दग्ध्वा याति तदा को वा वदतस्य निवार

ह० त० उ० अ० ३१ २०६

कः ॥२७॥ अस्माभिरेव गन्तव्यं सन्नद्धैः शस्त्रपाणिभिः ॥ जयोऽस्तु मरणं वास्तु किन्तया चिन्तया वद ॥२८॥ कुटुम्बान्यत्र तिष्ठन्तु सुता अप्यति बालकाः ॥ प्रौढाश्च पुत्रास्तिष्ठन्तु कामधेनुश्च तिष्ठतु ॥२९॥ तिष्ठन्तु कल्पतरवः शिवलिङ्गानि कोटिशः अधुना तत्र गन्तव्यं भावि सर्वं भविष्यति ॥ अद्यास्माकमदृष्टेन जयो यदि भविष्यति ॥३०॥ तदा तत्र कुटुम्बानि समायान्तु सुतैः सह ॥ इति तद्वचनं श्रुत्वा चक्रमादाय केशवः ॥३१॥ युद्धाय निर्गतस्तीव्रं ब्रह्मादि सुरसंयुतः ॥ ततस्तन्नगरं प्रापुः अग्निमण्डलसन्निभम् ॥३२॥ ततस्ते मूर्च्छिता एव तत्पुराद्भुततेजसा ॥ गतेषु तेषु युद्धार्थं कमलाद्याः सुराङ्गनाः ॥३३॥ मूर्च्छितान्पतितान् श्रुत्वा चुक्रुशुर्भयविह्वलाः ॥ ततस्ताः शेषमखिलाः प्राहुः खिन्नानना स्त्वया ॥३४॥ गन्तव्यं देवकार्यार्थं असहायाः सुराः खलु ॥ इति तद्वचनं श्रुत्वा स शेषः खिन्नमानसः ॥३५॥ चुक्रोशोच्चैर्हाहन्ततोऽभूत् गोविन्दोऽपीति सत्वरम् ॥ ततः परं कियान्कालो विनीतो रोदनैः परम् ॥३६॥ सुरदाराः विसंज्ञास्ते युगानामयुतं खलु ॥ उत्थिताः कमलाद्यास्ताः सर्वा वैधव्यविह्वलाः ॥ ॥३७॥ कपिलं प्राहुरत्यन्ताः शिवार्चनपरायणम् ॥ देवांगना ऊचुः ॥ मुनिप्रवर देवास्ते युगानामयुतं खलु ॥ मुनिप्रवर देवानान्दुर्दशा किल संश्रुता ॥ प्रचण्डेन हताः सर्वे दैत्यानामधिपेन ते ॥३९॥ अतः परं किमस्माभिः कर्तव्यं तद्वदाधुना ॥ कार्याकार्यविवेकोऽपि नास्माकमधुना खलु ॥४०॥ इति तद्वचनं श्रुत्वा कपिलः सिद्धसेवितः ॥ कपिलोऽभिमुखो भूत्वा प्राह स्मृत्वा महेश्वरं

रम् ॥४१॥ कपिला ऊचुः ॥ इन्दिरे शरणं याहि शंकरं लोकशंकरम् ॥ स सर्वमंगलाकान्तो मङ्गलानि प्रयच्छति ॥४२॥ स सर्वमंगलाकारः सर्वमङ्गलदायकः ॥ मङ्गलानां स जनकोऽप्यमङ्गलहरो हरः ॥४३॥ अमङ्गलहरे साति त्रिपुरकाननध्वंसकृत ॥ प्रचण्डतर पावके मदनमर्दके संस्मृते ॥४४॥ अमङ्गल सरिद्दुर प्रलय एव तावद्भवेत् ॥ समुद्रतनये सदा शुभनदी समूहोदये ॥ नकोऽपि जानाति शिव प्रभावं मती न तस्य स्मरणे प्रवृत्तः ॥ अतो विनाशो भवतीति मन्ये सदा महादेव पराङ्मुखानाम् ॥४६॥ अहो कथं कौतुकमेतदासीत्सुरार्चितेशान पदाम्बुजानाम् ॥ नाशः सुराणामभवत्किमत्राप्यत्यद्भुतं किं चिरगम्यमस्ति ॥४७॥ केनापि दृष्टम् महेशरूपं शुभ प्रवाहात्मकमप्रमेयम् ॥ स्मृते शिवे चेतसि मङ्गलानि पदे पदे शोभनदानि नित्यम् ॥४७॥ अहो कथं कौतुकमेतदासीदनर्चितेशान पदाम्बुजानाम् ॥ नाशः स्थिरत्वं सुराणामभवत्किमत्राप्यत्यद्भुतं किञ्चिद्दुरगम्यमस्ति ॥४८॥ दैवैरहङ्कार विमूढचित्तैः प्रचण्डयुद्धाय गतं प्रमत्तैः ॥ वेगादकृत्वैव शिवार्चनानि ततः प्रनष्टा किमिहास्ति चित्रम् ॥४९॥ संरक्षको तिष्ठति देवदेवे महेश्वरे देवगणस्य तस्मिन् ॥ तत्पूजनार्थं न कृतः प्रयत्नः ततः प्रनष्टाः किमिहास्ति चित्रम् ॥५०॥ भ्रष्टास्ततानन्दराज्याश्च लोके नष्टात्मानः शैव धर्मैर्विहीनाः ॥ तस्मान्नाशो नामरणाश्चचित्रं विश्वेशार्चात्यागजं तत्फलं हि ॥५१॥ उमासहायाङ्घ्रि सरोज पूजा पराङ्मुखस्यापि सुखं यदि स्यात् ॥

तदा विषाणादपि निरिण्धारा स्यादम्बुमस्य वाहादिव वृष्टिकाले ॥५२॥ इत्युदीर्य स्थिते तत्र कपिले तावदागतः॥ गरुडः

शोकसन्तप्तः सुरनाशेन सत्वरम् ॥५३॥ स समागत्य कपिलं भस्मोद्धूलित बिग्रहम् ॥ त्रिपुण्ड्र रुद्राक्षधरं नत्वा प्राह कृताञ्जलिः

॥५४॥ गरुड उवाच ॥ प्रचण्ड पुर तेजोभिः सतप्ताः त्रिदशाः परम् ॥ चेतुः पृथिव्यां निःसंज्ञा किङ्कर्तव्यमतः परम् ॥५५॥ इतितद्ब

चनं श्रुत्वा कपिलः प्राह सादरम् ॥ वृत्तान्तमखिलं तावद्वदस्वेति बिशेषतः ॥५६॥ गरुड उवाच ॥ पातालगतमस्माभिर्दैवैर्दै

त्यजयेच्छया ॥ दिव्यशास्त्रौघ संकीर्णैः गन्धर्वादि समान्वितैः ॥५७॥ शार्ङ्ग शंखध्वनि व्याप्तं तदाभ्रमण्डलं मुने ॥ देवदुन्दुभि

निर्घोषैः सुकोलाहलैरपि ॥५८॥ प्रतिध्वनि समाकीर्णाः सर्वेऽपि गिरयस्तदा ॥ चक्रुः स्फुरण सम्भूतैः स्फुलिङ्गैरा

वृतञ्जगत् ॥५९॥ तदानीन्तद्ध्वनिं श्रुत्वा प्रचण्डाख्यो महासुरः ॥ स्वप्रधानं महोग्रास्यं विडालञ्चाह सत्वरम् ॥६०॥

प्रचण्ड उवाच ॥ कोऽयं कोलाहलः क्रूरः कठोरः श्रूयते मुहुः ॥ स्फुलिङ्गाश्च समायान्ति शतशोऽथ सहस्रशः ॥६१॥

अभूतपूर्वमेतावद त्यद्भुतमिदं खलु ॥ प्रतिष्ठो हृदयाकाशे समर्वभयदोऽधुना ॥६२॥ केन सृष्टो ध्वनिः सोऽयं कस्य चेद

मविजृम्भणम् ॥ महीस कम्पास कला गिरिकानन संवृता ॥६३॥ लोके प्रतिभटः कोऽपि किंमुसन्नो ममाधुना ॥ केन

स्यात्तादृशोत्पत्तिः शक्तिस्तस्यापि कीदृशी ॥६४॥ इदम्बिचार्य्य सकलं वदयत्न पुरः सरम् ॥ आहारेऽपि न मे बुद्धिः रधुनातु

२९०

प्रजायते ॥ ६५ ॥ इति तद्वचनं श्रुत्वा क्रूरः प्राह महासुरः ॥ विचारः कोऽयमधुना किमाहारो न रोचते ॥ ६६ ॥ प्रबलस्य तवाप्येवम् कथं बुद्धिः प्रजायते ॥ लोकत्रयेऽपि दृष्टोऽस्ति न ते प्रतिभटः खलु ॥ ६७ ॥ यत्प्रतिममैश्वर्य्यं तव तन्न विनश्यति ॥ अतश्चिन्ता न काप्यस्ति भयन्त्यज महासुर ॥ ६८ ॥ देवैः सर्वैः सगन्धर्वैः किन्नरैः सह दुःखितैः ॥ सकुटुम्बैः सपुत्रैश्च गतं पाताल मण्डलम् ॥ ६९ ॥ अतः परन्न कोऽप्यस्ति भूलोके तादृशो रिपुः ॥ स्वर्गलोकोऽधुना शून्यः सत्यलोकोऽपि सर्वथा ॥ ७० ॥ वैकुण्ठेऽपि न कोऽप्यस्ति न वा नक्षत्रमण्डले ॥ न च गन्धर्वलोकेषु यमलोकेऽपि सर्वथा ॥ ७१ ॥ कैलासवासी भगवान् एकोऽस्ति क्षाति शङ्करः ॥ तत्पूजकानामस्माकं भयं सम्भावितन्न च ॥ ७२ ॥ पूजयस्व महादेवं लिङ्गरूपिणमव्ययम् ॥ अपारैरुपचारैस्तु भयं सन्त्यज सन्त्यज ॥ ७३ ॥ यदा मोहेन नास्माकं शिवे भक्तिर्भविष्यति ॥ तदा भयं भवत्येव दुःखधारा पदे पदे ॥ ७४ ॥ येन स्मृतो महादेवः स संसाराद्विमुच्यते ॥ भयानान्तत्र का वार्ता भयलेशोऽपि वा कथम् ॥ ७५ ॥ अस्माकं बलमेतावत्प्रचण्ड रिपुसंक्षये ॥ महादेवार्चनन्तत्र शपथः शिवपादयोः ॥ ७६ ॥ अस्मासु सत्कथा भीतिः शाङ्करेषु तवाधुना ॥ प्रलयावधि नास्माकं दुःखवार्तापि लेशतः ॥ ७७ ॥ इति तद्वचनं श्रुत्वा प्रचण्डो भीमविक्रमः ॥ ~~महोग्रास्य सुवाचेदं वचनं विस्मयावहम्~~ ॥ महोग्रास्य सुवाचेदम् वचनम् विस्मयावहम् ॥ ७८ ॥

प्रियसहः ॥ प्रचण्ड उवाच ॥ सत्यमुक्तं त्वया नात्र सर्वथा न विपर्ययः ॥ अयं कोलाहलं शान्तो भविष्यति यदा तदा ॥ ७९ ॥ भोक्तव्यमन्यथा तत्र न रुचिर्मम जायते ॥ उग्रज्वालं समाहूय प्रेषय त्वरणायतं ॥ ८० ॥ प्रेषयामास धर्मात्मा दैत्य कोटि समावृतम् ॥ तदा तमाह ज्वालास्यं तत्कोलाहलकारिणः ॥ ८१ ॥ हन्तव्यास्त्व बहुधा नात्र कार्या विचारणा ॥ इति तद्वचनं श्रुत्वा सोऽपि वीर्य बलोद्धतः ॥ ८२ ॥ जगाम दैत्य प्रवरैः सम्वृतो रथमाश्रितः ॥ अभ्रंकषं रथं दृष्ट्वा पताकावृंद संयुतम् ॥ ज्वाला कुल समाकीर्णं भयमापुस्तदासुराः ॥ तदा नारायणः प्राह चतुर्मुख मुखान्सुरान् ॥ ८४ ॥ ज्वलत्पर्वत संकाशो रथो दृष्टो नवेत्यपि ॥ अत्याश्चर्य करः सोऽयं रथो वह्नि गुणाकुलः ॥ ८६ ॥ किमतः परमस्माभिः कर्तव्यं तद्वदंतु वः ॥ आयात्येवाति वेगेन वात वेग निवारकः ॥ ८७ ॥ तद्रथ ज्वालयास्यातु मशक्य मिति भाति मे ॥ अतः परं क्व गन्तव्यं दिगन्त व्याप्तवासः ॥ ८८ ॥ रथो महाग्नि संकाशः श्रुत पूर्वोपि न ध्रुवं ॥ पश्य पश्य रथं दैत्यं रथस्थमपि सत्वरम् ॥ ८९ ॥ चतुर्मुखेणाधुना पश्य रथ वाजि रथं परम् ॥ अतः परं न पातालं गन्तु कालोऽपि वर्तते ॥ ९० ॥ गमनेपि मुखं तत्र कथं सम्भावितं वद ॥ इति तद्वचनं श्रुत्वा प्राह नारायणं विधिः ॥ ९१ ॥ चक्रं गृहाण का भीतिः कुरु युद्धमिहेत्यपि ॥ ततः परमभूद्युद्धं युगानामयुतं तयोः ॥ ९२ ॥ परस्पर परिक्षिप्त शस्त्रौघै मुनि पुंगव ॥ ततो नष्टरथः सोभूत्नष्टाश्वो नष्ट सैनिकः ॥ ९३ ॥ ततः परं गदायुद्धं जातं युग चतुष्टयम् ॥ ततः परं खमाश्रित्य सचकारासुरोवरम् ॥ तत्रापि सगतो विष्णुस्तत्र युद्धमभूत्तयोः ॥ ततः पपात भूपृष्ठे हतो नारायणस्तदा ॥ ९५ ॥ संज्ञां प्राप्य गतो भूयो योद्धुं यकृत निश्चयः ॥ मुष्टियुद्धम-

२०९ | ८३

भूत्तत्र युगानामयुतं तयोः॥ ९६॥ ततः सदैत्य सैन्येनैव निहतो हरिणा तदा॥ ततः सैन्यं हतं सर्वं चक्रिणा तेन दुःसहम्॥ ९७॥ ततश्शरार्धां सुखिनः सुराः सर्वे तदास्थिताः॥ ज्वालास्यं निहतं दृष्ट्वा प्रचण्डस्तप्तमानसः॥ ९८॥ किं कर्तव्यमिति प्राह प्रधानमुरुविक्रमम्॥ **प्रधान उवाच**॥ अपारेष्व सुरेष्वेकः कश्चिज्ज्वालास्यनामकः॥ ९९॥ मृतः कातावता हानिः स तावदतिदुर्बलः॥ वह्निकूट इति ख्यातः कश्चिदस्ति महासुरः॥ १००॥ स युद्धनिपुणः सोऽपि युद्धाय कृतनिश्चयः॥ तेनैव सह निर्यान्तु कोटिशो प्यसुरा अपि॥ १॥ युद्धदर्पसमाक्रान्तः सोऽपि सोऽपि महाबलः॥ गजानामर्बुदं यान्तुन्यर्बुदं वाजिनामपि॥ २॥ रथान्यर्बुदं यान्तु युद्धायातिप्रयत्नतः॥ इत्युक्त्वा सोऽपि संक्रुद्धं वह्निकूटमुवाच तम्॥ ३॥ याहि युद्धाय वेगेन विलम्बं संत्यजेद्यपि॥ इत्युक्तः स ययौ तेन बलैस्तैः प्रबलैर्युतः॥ ४॥ नारायणा द्वयो यत्र ते सुरास्तत्र सत्वरम्॥ ततः परं सुरैः सार्कं युद्धं घोरमभूत्तदा॥ ५॥ चक्री चक्रं समादाय चिच्छेदासुरपुंगवान्॥ तदा शोणितवाहिन्यः समुत्पन्नास्ततः सुराः॥ ते रक्तवाहिनीनीताः सर्वेऽपि भयविह्वलाः॥ ततः परं गताः सर्वे समुद्रे पतिताः सुराः॥ ७॥ रक्तप्रवाहवेगेन तत्तरंगाहताऽपि॥ ततः परं कियत्कालं स्थित्वा तीरे सोत्पतेः॥ ८॥ पुनर्युद्धमुपाजाताः क्रूरैरसुरपुंगवैः॥ पश्चाद्द्वन्द्वयुतं जातं युद्धं घोरतरं मुने॥ ९॥ ततस्ते निहताः सर्वे राक्षसाः सुरपुंगवैः॥ अग्निकूटं मृतं श्रुत्वा प्रचण्डो भयसंकुलः॥ ११०॥ प्राह प्रधानं हाहा हा किमभूदिति सत्वरम्॥ तं पुनर्वचनैर्धीरैः आह क्रूरो विचक्षणः॥ ११॥ धैर्यं हृदि निधायैन महादेवमनुस्मरन्॥॥ ॥॥ ~~प्रधान उवाच~~॥ **क्रूर उवाच**॥

युद्धकालेषु मरणं भरानां किल जायते ॥१२॥ अधैर्य्यन्तत्र सहसा न कर्त्तव्यन्त्वयाधुना ॥ अस्मद्गणानां गणना कर्तुमेव न शक्यते ॥१३॥ तत्र

केचिद्धता युद्धे तावता भीतिरल्पका ॥ पुनः पुनः प्रेषणीयाः पुरास्ते प्रबलाः खलु ॥१४॥ कल्पावसान पर्य्यन्तं युद्धे सैन्यं न नश्यति ॥ अपारसे

नापतयः सन्त्यपाराः किलाधुना ॥१५॥ प्रेषणीयास्त्वया तत्र चिन्ता कार्य्या न सर्वथा ॥ इत्युक्त्वा प्रेषयामास क्रूरो दैत्यान्सकोटिशः ॥१६॥ तैः पु

नर्युद्धमभवत् देवानामपि दुःसहम् ॥ चक्रेणैकेन निर्भिन्नाः कोटिशोऽप्यसुरास्तदा ॥ तथा वज्रेण निर्भिण्णाः दैत्यानां कोटिकोटयः ॥ तदा तान्निहता

न्श्रुत्वा प्रचण्डश्चण्डविक्रमः ॥१८॥ पुनः क्रूरमुवाचेदं ज्वलन्निव महागिरिः ॥ प्रचण्ड उवाच ॥ प्रेषिते स्तैरसंख्यातै रसंख्यात बलोद्धतैः ॥

॥१९॥ मता दैत्याः सुरास्त्वौघैः किं कर्तव्यमतः परम् ॥ प्रबला एव निहता स्ते सर्वे राक्षसाः खलु ॥२०॥ तादृशास्ताबदत्यल्पाः

कोचेत्तिष्ठन्ति तैरलम् ॥ अतः परं किमस्माकं बलं क्व विजयोन्मुखम् ॥२१॥ केनोपायेन जेतव्यासुरास्ते दैत्य पुङ्गव ॥ क्रूर उवा

च ॥ न केवलम् राक्षसानाम् बलेन विजयो भवेत् ॥ शङ्करानुग्रहाभावे जयवार्त्तापि दूरतः ॥ त्वयाद्यापि त्वरया

कार्य्यं त्रिपुरान्तक पूजनम् ॥२३॥ अपारैरुपचारैस्तै र्येन तुष्यति शङ्करः ॥ मृत्युञ्जयाभ्यर्चनेन जयः खलु पदे पदे ॥२४॥

अतो जयार्थं यत्नेन यज मृत्युञ्जयम्प्रभुम् ॥ भूषणायपरां सेना न जयाय कदाचन ॥२५॥ जयः शिवार्चनेनैव केवलेन भविष्य

ति ॥ इति तद्वचनं श्रुत्वा तमुक्त्वा सम्यगित्यपि ॥२६॥ सा शिवाराधनोद्युक्तः प्रचण्डो भूरि साधनैः ॥ यावदर्जितमैश्वर्यं

त्तावदर्पितं मे मीश्वरे ॥२७॥ अभिषेकादिभिर्दैत्यः पूजयामास शंकरं ॥ ततः परं सुराः सर्वे दैत्यास्तेनिहता इति ॥२८
प्रचण्डासुराधाय जग्मुस्तन्नगरम्प्रति ॥ ततस्तन्नगरा पार वहि प्राकार तेजसा ॥२९॥ हतास्ते मूर्च्छिताः सर्वे सञ्ज्ञा
तेषान्न दृश्यते ॥ अतः परं विधेयं किम् मया कमलयापि वा ॥३०॥ शच्या गण्यापि भगवान्न शशि नस्त्वं विभो
वतः ॥ इति तद्वचनं श्रुत्वा कापिलः सिद्ध पुङ्गवः ॥३१॥ प्राह गम्भीर वचनैः लक्ष्मीमभिमुखीं तदा ॥ दैत्योऽपि शङ्करपद
म्बुरुहार्चनेषु विश्वस्य शङ्कर पद्माम्बुज पूजनानि ॥ ३२॥ कृत्वाधितिष्ठति जयोऽपि स तेन लब्धस्तैरेव पुण्यमधिकं ख
लु तस्य नूनम् ॥३२॥ नध्याती गिरिशो मुदा यदि तदा दुःखार्णवे मज्जनं किन्न स्यादिति निश्चयोपि न कथं नारायण
स्याभवत् ॥ इन्द्रस्यापि विधेरपीति बहुधा हा कष्टमासीदतो दुष्टच्चित्तमभूत्कथं सुरगणस्याद्यापराधो महान् ॥३३॥
शिवार्चन परित्यागे स्वरूपास्यपराधतः ॥ जातमेवमभूत्कष्टं त्रिदशानां विशेषतः ॥३४॥ नरोऽपि गिरिशार्चन क्षणमा
नसः सर्वदा सुखन्न खलु तिष्ठति इत्यवगत न्न दैवैरपि ॥ अहो वत वताधुना बहुविधोऽपि ~~कोधो~~ मोहो महान् शिवार्चन पराङ्मुखा
नापि करोति देवानहो ॥३५॥ इति तद्वचनं श्रुत्वा कमला कापिलं मुनिपुङ्गवम् ॥ नत्वाश्रुपूर्ण नयना प्राह गद्गदया गिरा॥
॥३६॥ श्रीलक्ष्मीरुवाच ॥ न मोह रहितः कोऽपि सुरेषु मुनि पुङ्गव ॥ मोह प्रवाह सम्बीतो नाराधयति शङ्करम् ॥३७॥

पुनः पुनरिदञ्ज्ञातं शंकराराधनं बिना ॥ सुखन्नेति विशेषेण ज्ञातमद्य न संशयः ॥३८॥ अतः परं स्यादसुरारि जीवनम् कथम्
विसञ्जल विनाशनञ्च ॥ अस्मासु वैधव्य विनाशनञ्च सौभाग्य वृद्धिञ्च कथं मुनीश ॥३९॥ नमहाप्रलयेऽपि येन नाशो विनि
वार्यो नतथा च केन वा स्यात् ॥ पुनरागमनं यदाशु तेषां पुनरुज्जीवन मप्यपारभाग्यम् ॥१४०॥ सर्वज्ञेन ज्ञायते धर्मतत्वं योगा
भ्यासाच्छंकराराधनेन ॥ ये तत्सर्वं निश्चयेनाशु तावदुक्तव्यं मे येन दुःखापहारः ॥४१॥ इति तद्वचनं श्रुत्वा कमलां व्याकुला
न्तदा ॥ कपिलः प्राह निश्चित्य व्रतञ्जीवन साधनम् ॥४२॥ कपिल उवाच ॥ रहस्यं व्रतमस्त्येकं कमले कमले शृणु ॥ गोपनीय
म्प्रयत्नेन शंकरोक्तमिदम् व्रतम् ॥४३॥ व्रतानामपि सर्वेषा मिदमेवोत्तमं व्रतम् ॥ यद्व्रता चरणेनैव सर्व सौभाग्य सम्पदः ॥४४
पुरा कैलासशिखरे रत्न शृङ्ग बिराजिते ॥ भ्रमद्भ्रमर संघोष प्रतिध्वानि विराजिते ॥४५॥ मराल राज संकीर्णे वरदा परिवेष्टि
ते ॥ तत्रैक रत्न प्रासादः कोटि योजनमुन्नतः ॥४६॥ तत्र सिंहासन न्दिव्यं रत्न कान्ति विराजितम् ॥ पुष्प शय्या समाक्रा
न्तन्नाना मणि समन्वितम् ॥४७॥ चन्द्रमण्डल मालाभिः परितः परिवेष्टितम् ॥ तत्र शंकरमासीनं प्रसन्न वदनं नवम् ॥४८
प्रतिक्षणं सुधाम्भोधि तरङ्ग परिवेष्टितम् ॥ रत्नाहार समाक्रांत किरीट कर [illegible] कावृतम् ॥४९॥ रत्नांगुलीय-
कापार कान्ति कुञ्ज विराजितम् ॥ सुवर्ण कटिसूत्रस्थ मणि मण्डल मण्डितम् ॥५०॥ कस्तूरी घन सारादय पाटीर

र रस रूषितम् ॥ स्फुरन्मणिगणाकीर्णकर्णभूषणरञ्जितम् ॥ ५१॥ मणिरत्नसमाकीर्णं स्फुरन्नूपुरपादुकम् ॥ क्षीरसागर
संकाशवसनैः परिवेष्टितम् ॥ ५२॥ अभयप्रदमीशानं वरदं गणवन्दितम् ॥ सोमसूर्याग्निनयनं सोमार्धकृतशेखरम् ॥
॥ ५३॥ त्रिशूलमूलहस्तं तं खलशानुशासनम् ॥ सस्मेरं हीरहाराभ कर्पूरगिरिसन्निभम् ॥ ५४॥ प्रसादाभिमुखम् ।
देवमुमा प्राहातिशोभना ॥ गौर्युवाच ॥ महादेव महेशान करुणासागर प्रभो ॥ शंभो प्रसीद भगवन् दयां कुरु सदामयि ॥
५ किमन्यत्करुणापात्रं तव चन्द्रकलाधर ॥ ५६॥ मदन्यदपि लोकेषु सर्वेष्वपि सदाशिव ॥ कृपामूर्तिस्त्वमीशानतया करुण
यामयि ॥ ५७॥ स्नेहोऽपि क्रियते त्वं स्नेहपात्रमहं यतः ॥ अद्यैकं प्रष्टुमिच्छामि सर्वलोकहितावहम् ॥ ५८॥ व्रतं महेश
तत्तावत् वद स्नेहपुरःसरम् ॥ इत्यम्बिकावचनरूपसुधां महेशो मत्वा प्रहृष्टहृदयः सदयः स्वभावैः ॥ आलिङ्ग्य
शैलतनयां विनयानताङ्गीं अङ्गीकृताखिलशिवानुनयोऽभ्युवाच ॥ ५९॥ श्रीसदाशिव उवाच ॥ अस्ति व्रतोत्तमं गौरि
ब्रसिर्णमेव केवलम् ॥ किं व्रतं प्रष्टुमिच्छा ते गौरि स्मेरवरानने ॥ तद्गोपनीयमप्यद्य वक्ष्ये विद्यामये शिवे ॥ ६०॥ तवापि
किं वा वद गोपनीयं तवैव सर्वं गिरिराजकन्यके ॥ इदं महद्भाग्यमपारमेतत्तवैव कस्येदृग्भाग्यमस्ति ॥ ६१॥ इत्याक
र्ण्य महेशसादरवचो वीचीमुवाचाम्बिका त्वत्पादाम्बुरुहावलोकनरता धन्यास्मि धन्योत्तमम् ॥ अर्धाङ्गे विनिवेशि-

त्वास्मि किमतो भाग्यं भवेदित्यहम् ॥ सानन्दा सततं कृपैवमनिशं सम्प्रार्थनीया मम ॥६२॥ सौभाग्य वृद्धिदं किम्वा व्रतं मङ्गल
दायकम् ॥ पुत्र पौत्रादि सम्पत्ति साधनंच वदाशु मे ॥६३॥ यद्व्रताचरणेनैव न नारी विधवा भवेत् ॥ जन्मान्तरेऽपि सुभगा
सुपुत्रा भवति प्रभो ॥६४॥ यद्व्रताचरणाभावे विधवा स्याच्च दुर्भगा ॥ अपुत्रा मृत पुत्रा च मृत बन्धुजना सदा ॥६५॥ एतादृशं
व्रत किञ्चिद्व्रत नारी मनोहरम् ॥ यद्व्रत श्रवणेनापि मुच्यते पाप कोटिभिः ॥६६॥ इति तद्वचनं श्रुत्वा शिवामालिङ्ग्य शङ्करः ॥
प्राह व्रतोत्तमं धन्यमम्बिकायै मनोहरम् ॥६७॥ श्री सदा शिव उवाच ॥ अस्ति व्रतोत्तमं गौरि नारीणामेव केवलम् ॥ तद्व्रताचरणेनैव
नारी सुखमवाप्नुयात् ॥६८॥ सत्कुले जन्म सम्प्राप्य सौन्दर्य्यमति सुन्दरम् ॥ शोभनम् ॥ भाग्यञ्च प्राप्नुयान्नारी तद्व्रताचरणाद्ध्रुवे ॥६९॥ न प्राप्नुयाति वैधव्यं तद्व्रताचरणोत्सुका ॥ अपुत्रा न भवत्येव दुर्भगापि न सर्वथा ॥७०॥ रूप लावण्य सम्पन्ना सम्पत्की-
र्त्ति समन्विता ॥ बन्धु पोषण संसक्ता नारी तस्माद्व्रता भवेत् ॥७१॥ न तद्व्रत समं लोके नारीणां व्रतमस्त्यपि ॥ अतस्तद्व्रतमत्यन्तं भक्त्या
कार्य्यम्प्रयत्नतः ॥७२॥ मासि भाद्रपदे शुक्ले पक्षे हस्तर्क्ष संयुता ॥ या तृतीया भवेत्तस्यां तद्व्रताचरणं भवेत् ॥७३॥ सायंकालात्पू-
र्वमेव पूजासाधनमुत्तमम् ॥ सम्पादनीयं यत्नेन फल पुष्पादिकं नवम् ॥७४॥ मनोहराणि पुष्पाणि यावन्ति वरवर्णनि ॥
तानि सम्पादनीयानि परिपक्व फलान्यपि ॥७५॥ पुष्पाण्यपि विशेषेण फलान्यपि सदाशिवे ॥ यानि सम्पादनीयानि

करवीराणि शोभने ॥७६॥ कुन्द मन्दार कमल नीलोत्पल कुलान्यपि ॥ बकुलानि मनोज्ञानि कनकान्यपि शोभने ॥७७॥
विविधानि प्रफुल्लानि करवीराणि शोभने ॥ जपा ~~कल्हार~~ चम्पक पुष्पाणि पुन्नाग कुसुमान्यपि ॥७८॥ द्रोणापामार्ग
कल्हार केतकी कुसुमान्यपि ॥ कुब्जार्जुन प्रसूनानि शत पत्राणि शोभने ॥७९॥ कण्टकारि प्रसूनानि श्वेतार्क कुसुमान्यपि
तथा विल्व प्रसूनानि साधनीयानि यत्नतः ॥८०॥ तथा कदम्ब पुष्पाणि तथा दमनकान्यपि ॥ आम्रामलक पत्राणि विल्व
पत्राणि शोभने ॥८१॥ अन्यान्यपि सुगन्धीनि साधनीयानि सादरम् ॥ फलानि नारिकेलाम्र बीजपूरादिकान्यपि ॥८२
शास्त्रि पु(यी)ण फल पुष्पादि साधनेसा गुणावहा ॥ अतः प्रयत्नै र्विविधैः साधनीयानि तान्यपि ॥८३॥ सुन्दरं मन्दिरं कार्य्यम्
सुधालेपनादिभिः ॥ अलङ्कृतञ्च कर्तव्यं वितानै र्ध्वज मण्डपैः ॥८४॥ विचित्र वसनैः कार्य्यं विचित्रं शिवमन्दिरम् ॥
तोरणालङ्कृत द्वार्यं हार राजितम् ॥८५॥ पुष्प गुच्छ समाकीर्णं पुष्पमाला समावृतम् ॥ सुगन्धद्रव्य संलिप्तं रङ्गवल्ली
समावृतम् ॥८६॥ तूर्य्य ध्वनि समाकीर्णं शिव गान विजृम्भितम् ॥ रम्भास्तम्भ समाकीर्ण पूर्णकुम्भ विराजितम् ॥
पुण्याह वचनोपेतम् द्विज मण्डल मण्डितैः ॥८७॥ एवङ्कृत्वा शिवागारं दीपमाला विजृम्भितम् ॥ रम्भास्तम्भ समाकी
र्ण पूर्ण कुम्भ विराजितम् ॥८८॥ एतादृशे शिवागारे प्रविश्य च शुचि स्मिता ॥ पूजयेदुत्तमं लिङ्गं हेम रौप्यादि लक्षण-

म् ॥ ८९ ॥ अथवा सैकतं लिङ्गं पूजनीयं प्रयत्नतः ॥ तत्रैव सैकते लिङ्गे ध्यायेन्मामव्ययं प्रभुम् ॥ ९० ॥ ध्यायेदिन्दुकला वतंसमसकृद्वामांगभागोल्लसद्गौरीचारुतराधराननसुधारश्मिस्फुरद्वीक्षणम् ॥ तत्पीनोरुपयोधराग्रविलसत्काश्मीरधारांकुरम् धीरं शंकरमिन्दुसुन्दररुचः कर्पूरगौरं हरम् ॥ ९१ ॥ रत्नापारकिरीटकोटिघटितं कर्णस्फुरन्मौक्तिकम् ॥ सग्रैवेयकमिन्दुखण्डमुकरव्यापारसारान्वितम् ॥ ९२ ॥ हारापारविहारराजिरुचिरं रत्नाङ्गदालंकृतं सौवर्णामितकङ्कणाङ्गुलिलसद्भूषासमेतं शिवम् ॥ ९२ ॥ गौरीनीलकुलाचलाभकवरीभारस्फुरल्लीरभाधारालङ्कृतकंबुकण्ठविलसन्मूलं त्रिशूलामलम् ॥ हस्ताम्भोरुहफुल्लपङ्कजमृगस्फाराङ्कसङ्गं मुदा ध्यायेन्मामगजाकराम्बुजपदांभोजं चिरं सादरम् ॥ ९३ ॥ हस्तन्यस्तसमस्तगन्धविलसत्कस्तूरिकाकर्दमं प्रक्षेपाभिमुखाम्बिकाकुचतटालङ्कारशङ्काकरम् ॥ शङ्कातङ्ककलङ्कपङ्करहितं शान्तं प्रसन्नाननम् सव्यासव्यपदाम्बुजातिसुषुमासञ्जातगङ्गाजलम् ॥ ९४ ॥ एवं ध्यात्वा महादेवं महाद्रितनयान्वितम् ॥ तस्मिन्नावाहयेल्लिङ्गे सर्वदा मङ्गलावहे ॥ ९५ ॥ उमाकान्त महादेव लिङ्गे सन्निहितो भव ॥ सैकतेऽस्मिन्प्रसीद त्वं मङ्गलानि प्रयच्छ मे ॥ ९६ ॥ नवरत्नगणोपेतं सुसुवर्णविराजितम् ॥ सिंहासनं गृहाणेदं त्रिलोचन शिवायुत ॥ ९७ ॥ पाद्यं गृहाण गौरीश घनसारसमन्वितम् ॥ गङ्गाजलनिर्मितञ्च शीतवातातिः

285

शीतलम् ॥ ९८ ॥ गृहाणाचमनीयञ्च रत्न पात्र समर्पितम् ॥ आनीतं रत्न पात्रेण मुक्ता फल विराजितम् ॥ ९९ ॥ ततः
पञ्चामृतैः शुद्धैः आभिषेकं पृथक् पृथक् ॥ समर्पणीय मीशाय महापूजापुरःसरम् ॥ २०० ॥ क्षीराभिषेकोत्तरमाद
रेण जलाभिषेकोऽपि समर्पणीयः ॥ वस्त्रे च देये तदनन्तरन्तु यज्ञोपवीतन्नव चन्दनञ्च ॥ १ ॥ पुष्पाणि देयानि ततः
परञ्च सुगन्ध वस्तूनि विशेषतश्च ॥ धूप प्रधूपोऽपि ततश्च दीपः घृतेन गव्येन समन्वितोऽपि ॥ २ ॥ तत्र प्रदेयाः खलु
वर्तिका स्यादेकादशावर्त्ति ततन्तु युक्ता ॥ तथा विधाष्टाङ्गुल वर्त्तिकाभिः तास्तावदेकादश वर्तिकाःस्युः ॥ ३ ॥
देयं गोक्षीर पक्वान्नं महान्दध्योदनादिकम् ॥ पश्चादाचमनीयञ्च करस्योद्वर्तनन्तथा ॥ ४ ॥ ताम्बूलं व्यजनं
छत्रं चामरन्दर्पणन्तथा ॥ पुन र्धूपश्च दीपश्च पश्चात्पूजा समर्पणम् ॥ ५ ॥ एवम्पञ्चाभिषेकेषु पृथगभ्यर्च
नम्भवेत् ॥ पश्चान्महाभिषेकःस्याद्रुद्र सूक्तादिभिः परम् ॥ ६ ॥ रत्न कुम्भ समानीतं स्नानाय जलमीश्वर ॥
गृहाण विमलन्देव प्रसीदेति समर्पयेत् ॥ ७ ॥ पश्चादुद्वर्तनन्दद्याद्बिल्व पत्रै र्मनोहरैः ॥ फल गन्धोदकैः प
श्चादभिषेकं समाचरेत् ॥ ८ ॥ पश्चादाचमनीयञ्च पश्चाद्वस्त्र समर्पणम् ॥ पश्चात्स्यात्केश संस्कार समर्पण
मघापहम् ॥ ९ ॥ क्षीर सागर संकाशे दुकूले गिरिजापते ॥ गृहाणेति प्रयत्नेन देयं वस्त्र द्वयम्मुदा ॥ १० ॥

उपवीते समानीते गृहाणाति सिते प्रभो ॥ शम्भो ताभ्यां पवित्रत्वं गृहीताभ्याम्प्रयच्छ मे ॥११॥ मृग मद रस सारासार पाटीर
सारद्रव रस घन सारापार काश्मीर पूरान् ॥ कनक कमल गन्धामन्द सिन्दूर धारा परिवृत बहु गन्धान् संभ्रमं भो गृहाण ॥१२॥
अपार रत्नाभरणानि शम्भो किरीट हार प्रमुखानि साम्ब ॥ गृहाण तैराभरणैर्गृहीते रपार भाग्यानि मम प्रयच्छ ॥१३॥
मन्दार कुन्द नव कुंकुम केसराणि नीलोत्पलानि कमलानि मनोहराणि ॥ श्री केतकी कनक चम्पक पारिजात मल्ली
प्रसून सहितानि गृहाण शम्भो ॥१४॥ जाजी प्रसून करवीर कुट प्रसून पुन्नाग नागनद कोकनदानि शम्भो ॥ गृह्या-
णि तानि मुकुरेशाय संयुतानि द्रोणार्क पुष्प सहितानि मनोहराणि ॥१५॥ दमन कनक बिल्वी पल्लवैः र्चयेत्वा
माभि नव सित दूर्वा स्वर्ण पुष्पादिभिश्च ॥ बहु विध बहु पुष्प स्त्रग्भि रर्चयेत्वां विविध रुचिर गन्धैः पौष्पजा
जानि मीशम ॥१६॥ धूप धूमं गृहाण त्वं मा मुकान्त मनोहरं ॥ धूप धूम प्रदानेन हर पापानि संहर ॥१७॥ कपिला घृत संयु
क्त वर्तिकान् ललितान्बहून् ॥ दीपं गृहाण संवाद्य प्रसीद करुणानिधे ॥१८॥ नैवेद्यं परमान्न राशि सहितम् गोक्षीर फेन
प्रभं लड्डूकैर्वटकै रपूप सहितैः भक्ष्यै रपारै रपि ॥ शाकै रप्यमितैः फलै रपि युतं द्राक्षा रसालादिभिः साज्यं शर्कर
या समेत मसकृत्तुभ्यं भवानी पते ॥१९॥ दृष्यलानि गृहाण तानि विमलं पानीयमानीय ते ॥ ताम्बूलानि गृहाण

सुसूक्ष्म तानि विमलानेला लवंगादिकान् ॥२०॥ कर्पूरामित दीपजाल घटितम् नीराजनं दीयते ॥ तुभ्यं शंकर तद्गृहाण गिरिजा कान्तातिकान्तं मुदा ॥ २१ ॥ पुष्पाञ्जलिं गृहाणेश प्रसीद गिरिजापते ॥ प्रयच्छ मह्यं सौभाग्यान्यपारापाराणि महाप्रभो ॥२२॥ अङ्ग पूजा ततः कार्य्या पुष्पैः पादनखावधि ॥ जटा मण्डलपर्य्यन्तं साम्बध्यान पुरःसरम् ॥२३॥ सुरासुर शिरः कोटि कोटीर मणि कान्तिभिः ॥ आर्चितान्ते नखाञ्छम्भो पूजयामि प्रसीद मे ॥२४॥ त्वत्पादांगुलिसापार सुषुमापरिवेष्टितः ॥ अरुणोरुणतां प्राप तानीशाभ्यर्चयाम्यहम् ॥२५॥ विष्णुना नेत्रारविन्देन यत्पादतलमर्चितम् ॥ तदर्चयामि गौरीश स्वर्ण पद्मैर्मनोहरैः ॥२६॥ इन्दु कन्दुक संयुक्तं यज्जानु युगलं प्रभो ॥ तद्दय गिरिजाजाने पूजयामि प्रसीद मे ॥२७॥ यदूरुभाग संयुक्तं सौन्दर्य्यं मृदुलत्वादिका गुणाः ज्ञाता भवान्या तत्पुष्पैः पूजयामि प्रसीद मे ॥२८॥ तडित्कूट निभं यत्ते शम्भो कटितटं प्रभो ॥ तदर्चयामि प्रसवैरुत्फुल्लैः कोमलैरपि ॥२९॥ यल्लिङ्गमद्भवन्नुपेन्द्र विधयः सेन्द्राः सुराः सागराः ॥ गन्धर्वोरग किन्नरा अपि मुदुस्तैरर्चितं यन्मुदा ॥३०॥ तत्तावत्कुसुमैः सुगन्ध ललितै रभ्यर्चयामि प्रभो लिङ्गं मङ्गलदायकं गिरिश मे पुत्रान् प्रयच्छोत्तमान् ॥ यल्लाभिर्देशं सरसी रुहाक्षी विलोक्य गौरी पुनरादरेण ॥ आवर्त शोभेयमिति प्रसन्ना

तड़ित्कुर निभं यत्ते शंभोः करि तर स्वभो ॥ तदर्चयामि प्रसवैः रत्कुलैः कोमलेरपि ॥ २९ ॥ यल्लिङ्गसम्भवन्नुपेन्द्र विधयः सेन्द्राः सुराः सागराः ॥ गन्धर्वा रग किन्नराः अपि मुद्ग स्तोरर्चितं यन्मुदा ॥ तत्तावत्कुसुमैः सुगन्ध ॥ ललिते रभ्यर्चयामि प्रभो लिङ्गं मङ्गल दायकं गिरिशमे पुत्रान् श्रयच्छोत्तमान ॥ ३० ॥ यन्नाभिदेशं सरसी रुहाक्षी विलोक्य गौरी पुनरादरेण ॥ आवर्त शोभेय मिति प्रसन्ना तन्नाभिदेशन्तव पूजयामि ॥ ३१ ॥ यद्वक्षःस्थल मम्बिका कुच तटापार स्फुरत्कान्तिभिः ॥ तत्पारीर रसाभिषिक्त विलसत्कस्तूरिका कर्दमैः ॥ ३ (आनन्दयामि...) व्याप्तन्तव तत्पूजयामि भगवन् आनन्दं मम सन्ततम् ॥ ३२ ॥ श्रीकण्ठाय कृपा निधान सततम् दीनार्ति संहारक ॥ गौरी चारु कुचोरु मेरुशिखर स्फुर (स्फूर्ज) स्वभा सम्भ्रम व्यापार व्यवहार सार निकरा भि व्यावृत्तौ ते करौ ॥ ३३ ॥ उत्फुल्लामल केतकीदल युतापार प्रसूनान्वितौ ॥ गौरी सुन्दर कङ्कणाङ्गद मणि व्याप्तौ समभ्यर्चये ॥ ३४ ॥ यद्वाहु मण्डल तरिस्पदु मण्डलनेन ॥ गौरी शरीर सुषुमाप्यति मण्डिताभूत ॥ ३५ ॥ तद्वाहु मण्डल मणि प्रकर प्रभाढ्य मधुना करवाणि शम्भो ॥ गौरी मनोहर विहार वरावतार स्वेदोदकामित मनोहर मौक्तिकाढ्यम् ॥ ३६ श्रीकण्ठ कण्ठमनिशं तव पूजयामि सोत्कण्ठ माधु कुसुमै रसमैः शिवाय ॥ लोक त्रयामित विशेष फल प्रभूतन्तद्र सामि सुरवमीशा मुखं प्रसूनैः ॥ ३७ ॥ अभ्यर्चयामि रसनामपि नासिकाञ्च गन्ध प्रवाह सहितैः शिवते प्रसूनैः ॥

२९२

नेत्राणि सोम रवि वह्नि मयानि शम्भो कर्ण द्वयं च विलसन्मणि कुण्डलाढ्यम् ।। ३८ ।। अभ्यर्चयामि कुसुमै रव मां महेश
मोहं विनाशय विधेहि (पराम्) श्रियं मे ।। उद्वेलमुद्धत सरिद्वर सागरादि नीर प्रवाह निकरोऽप्यणु कल्प एव ।। ३९ ।। यन्मौ-
लि देश तुहिनांशुकराभि भूतस्तन्मौलि माशु कुसुमैः शिवम्पूजयामि ।। इत्यङ्ग पूजां विधिवत्कृत्वा कुर्यात्प्रदक्षि
णम् ।। प्रणम्य नत्वा स्तोत्रैश्च सन्तुष्टः कर्त्तव्योऽहं मुहुर्मुहुः ।। ४० ।। स्वर्णाकार जटा धराय भगवन् तुभ्यन्नमस्तेनमः
शम्भो भर्ग भवाम्बु राशिजभयापार व्यथां नाशय ।। ४१ ।। दीनानाथ शरण्य पुण्य विभव प्राप्याम्बिका वल्लभ
स्वामिन् शोभनदायमद्य कुरु मे गौरी विनोद प्रद ।। यत्पादाम्बुज पूजनानि सकल श्रेयो निदा(धा)नानि मे पापापा
र तराङ्गिणी दिनकरा कारण्य तुल्यान्यपि ।। ४२ ।। दुःखापार घनानलानि सकृदप्यालोकि तानि प्रभो शम्भो ता
नि करोमि तावदधुना सम्पत्प्रदानाय मे ।। यल्लिङ्गार्चन वीक्षणेन सकृदप्यानन्द सिन्धुर्मुहुः ।। सम्पद्रूपतरङ्ग
सङ्ग ललितः प्राप्तो भवत्यन्वहम् ।। ४३ ।। तल्लिङ्गार्चनमेव सन्ततमहं कर्त्तुं प्रवृत्तः फलं तन्मे वाञ्छितमिच्छया
पि तनुते दृष्टं सकृद्वा नतम् ।। इन्द्रोपेन्द्र पुरःसरै रपि सुरैर्लिङ्गं यदाराध्यते गन्धर्वैरपि किन्नरै रपिमुनिश्रेष्ठै
स्सिद्धै रपि ।। ४४ ।। तत्पूजां करवाणि शूल विलसत्पाणे क्षणं कारणे निर्वाणे मरणेऽपि वासकरुण प्राणप्रयाणे-

पि वा ॥ प्रीत्या सन्तत मन्तकान्तक पदाम्भोजार्चनात्यादरास्ते धीराः सुर पूजिताङ्घ्रि कमलाः कल्याण लीलय ॥४५॥
तत्सर्वं कमला विलास निलयं राङ्गणात्युन्नतानन्तोन्मत्त मतङ्गजावृत पुर द्वारा नराधीश्वर ॥ यल्लीला लवएव
सृष्टिकरणोपायो नपायः प्रिये देवानामपि तं भजामि सकृदप्याराधितो यः शिवः ॥४६॥ इत्युक्तः सकलोपि
तान्यपि मुहुर्दातु नतः शंकरं लत्यक्ष्यामि समर्चयामि मनसा बिल्वैः प्रसूनैरपि ॥ यल्लिङ्गार्चनतो भवन्ति
वहवः पुत्राश्च पौत्रादयो वृद्धिं सन्ततिरेति सम्पदपि सा वृद्धिं प्रयास्यत्यतः ॥४७॥ लिङ्गाराधनमेव मे सुखद
मित्यन्यद्विहायादरात्कर्तव्यं करुणाकरः सभगवानिष्टार्थदस्ते नमेत् ॥ इति स्तुत्वा महादेवम् प्रणम्य च पुनः पुनः
पुनः पूजा यथाकामम् कर्तव्या कुसुमादिभिः ॥४८॥ मत्कथा श्रवणेनैव रात्रौ [illegible] जागरणं शिवे कर्तव्यमपि
यत्नेन तुर्य्यादिभिरपि प्रिये ॥४९॥ कार्य्य लास्य च्च कारीभिः सिकता लिङ्ग सन्निधौ ॥ पश्चादुपायनन्दद्यात्
फलात्पूतादिभिर्वृतम् ॥ शैवेभ्यः सकुटुम्बेभ्यो दक्षिणादान पूर्वकम् ॥ दक्षिणा लक्षमाषं स्यात् सुवर्णानां वरा
नने ॥५१॥ सा यथा विभवं वा स्यात् वित्त शाठ्यं न कारयेत् ॥ सौवर्णं राजतं वा स्याद्द्रौणवं भूपमुत्तमम् ॥५२॥
तत्फलैः पूरितं कार्य्यमपूपाद्यै विशेषतः ॥ दुकूल वेष्टितं कार्य्यं स्वर्ण लिङ्गं समान्वितम् ॥५३॥ तच्छाम्भवा

य दातव्यं शिव ध्यान पुरः सरम् ॥ उपायनं गृहाणेदम् अम्बिकारमण प्रभो ॥ ५४ ॥ अभीप्सितार्थद स्वामिन्
शोभनानि प्रयच्छ मे ॥ इति मन्त्रं समुच्चार्य दद्योपायनमादरात् ॥ ५५ ॥ भोजनीयाः प्रयत्नेन शाम्भवाः स्वादु
भोजनैः ॥ एवङ्करोति या नारी व्रत मेतद्वरानने ॥ ५६ ॥ सा पुत्र पौत्र संयुक्ता सर्व सम्पद्युता भवेत् ॥ सा न प्राप्नोति
वैधव्यं दुःखं नाप्नोति सर्वथा ॥ ५७ ॥ कीर्ति युक्ता भवेन्नित्यं मप कीर्त्ति विवर्जिता ॥ इदं व्रतोत्तमं देवि सर्व सम्पत्करम्
परम् ॥ ५८ ॥ इतोऽपि नाधिकं शास्त्रे व्रतं दृष्टं मया शिवे ॥ कपिल उवाच ॥ इतीशा वचनं श्रुत्वा गौरी शंकर वल्लभा
सन्तोषं परमं प्राप व्रत माहात्म्य कीर्तनात् ॥ ५९ ॥ सोम वासर संयुक्ता तृतीया च स्वभावतः ॥ ६० ॥ अयं खलु
महा योगः शिवयोगः शिव प्रदः ॥ अतस्तयापि कर्त्तव्यं मन्दिरे व्रतमुत्तमम् ॥ ६१ ॥ शाम्भवं शुभदम्मन्ये
व्रतमेतद्व्रतोत्तमम् ॥ अयं भाद्रपदो मासः च स्ततीयापि शोभने ॥ ६२ ॥ हस्त नक्षत्र संयुक्ता शुक्लपक्ष शुभावहा
तव भाग्यामिदं प्रायः सम्पन्नं कमलेऽधुना ॥ ६३ ॥ च स्ततीयापि सम्प्राप्ता सेयं व्रतातिथिः खलु ॥
सिद्धैव सर्व सामग्री तया पूजय शङ्करम् ॥ ६४ ॥ अत्रैवाति प्रयत्नेन कापिलेश्वरस्य सन्निधौ ॥ गरुडः शिवभ
क्तोयमानायिष्यति साधनम् ॥ ६५ ॥ सर्वाभरांगना युक्ता कुरु शङ्कर पूजनम् ॥ विसंज्ञो मूर्च्छितो वापि

मृतो वा दैवयोगतः ॥ ६६ ॥ आयास्यत्येवते भर्ता तद्व्रताचरणाद्ध्रुवम् ॥ संशयोऽत्र न कर्तव्यः कमले विमले त्वया ॥ ६७ ॥ शाम्भवं व्रतमेवे
दं सुर सञ्जीविनी खलु ॥ सर्व लोकोपकाराय शिवाये गिरिशोदितम् ॥ ६८ ॥ अवश्य मेतत्कर्तव्यं वैधव्य विनिवारकम् ॥ वैधव्या
शने रूपमेव कमले शैव व्रतं सादरं ॥ त्वः कर्तव्यमनेन ते पतिरिहा यास्यत्यवश्यं सुरैः ॥ साकं पद्मपमदीय मेव वचनं विश्वस्य
सत्यं मया ॥ प्रोक्तं शंकर पादयोरपि शपाम्यत्रार्थ वाद्योऽपिन ॥ ७० ॥ अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥ शृणु पद्मे
प्रवक्ष्यामि सर्व दुःख विनाशकम् ॥ ७१ ॥ पुरा त्रिपुर संहारं कर्तुमभ्युद्यतः शिवः ॥ प्राह गौरीं प्रयत्नेन समालिङ्ग्य पुनः
पुनः ॥ ७२ ॥ श्रीशंकर उवाच ॥ त्रिपुरासुर इत्येकः दैत्यानामधिपः शिवे ॥ स सर्व सुरनाशाय प्रवृत्तः स महान्खलु ॥ ७३ ॥ तच्छ
रीरं गिरिसुते कोटि पर्वत सन्निभम् ॥ ज्वलद्वह्नि गणाकारमाकाशे चरति स्वयम् ॥ ७४ ॥ पुराणि तस्य विमले त्रीण्यम्बर
चराण्यपि ॥ तेषु तेषामवस्थानमसुराणां दुरात्मनाम् ॥ ७५ ॥ तारक्षोमकराक्षश्च विद्युन्मालीति ते त्रयः ॥ ते जगत्त्रय
संहारं कर्तुमद्य समुद्यताः ॥ ७६ ॥ नारायणादयः सर्वे तद्भीत्यैव दिगन्तरम् ॥ प्राप्ताः कुटुम्ब सहिताः पुत्रैरपि समान्विताः
॥ ७७ ॥ तेषां प्रति भटो लोके न कोऽप्यस्ति वरानने ॥ तत्संहारोऽपि कर्तव्यः प्रयत्नै र्बहुभिर्मया ॥ ७८ ॥ त्वया सह न गन्तव्यम्
विलम्बोऽपि भविष्यति ॥ युद्ध प्रदेशे न गन्तव्यं नारीणां उचितङ्गमनन्तु न ॥ ७९ ॥ सम्भावितः प्रयासोऽपि तत्र युद्धे महा

२३१

शिवरह० ३
~~२९६~~
२१७

हं०तं० ३०
अ०५०

महासुरैः ॥ कुमारो गणनाथश्च रक्षणीयस्त्वया शिवे ॥ २८० ॥ भाद्र शुक्ल तृतीयां यत्सौमङ्गल्यदं व्रतम् ॥ तत्कर्त्तव्य न्त्वया गौरि यन्मयोक्तं पुरामुदा ॥ ८१ ॥ वैधव्य नाशकत्वेन तद्व्रतं परिकीर्त्तितम् ॥ तदवश्य न्त्वया कार्य्यं प्रमादं मा कुरु प्रिये ॥ ८२ ॥ पुरा तेनासुरेणाशु मुनयो निहताः शिवे ॥ ऋषिपत्नी स्तदा सर्वाः प्रलाप व्याकुला अपि ॥ ८३ ॥ दृष्ट्वा तास्तत्र सम्प्राप्तो नन्दिकेशो गणाधिपः ॥ उवाच तासां दुःखानि निवारयितुमादरात् ॥ ८४ ॥ नन्दिकेश्वर उवाच ॥ अरुन्धतिमुखा सर्वाः किमेवं दुःखसागरे ॥ निमग्नाः शङ्कर ध्यानं कर्त्तव्यमिति यत्नतः ॥ ८५ ॥ किञ्च वैधव्य नाशाय तृतीयाव्रतमीरितम् ॥ तत्कर्तव्यं प्रयत्नेन सौमङ्गल्यं भविष्यति ॥ ८६ ॥ मृतो यमान्तकं नीतो ध्यायात्येव व्रते कृते ॥ तस्मादवश्यङ्कर्तव्यं तद्व्रत म्पाप नाशकम् ॥ ८७ ॥ इति तद्वचनं श्रुत्वा सर्वाः सन्तुष्टमानसाः ॥ यथोक्त विधिना चक्रुस्तृतीयाया व्रतं शिवे ॥ ८८ ॥ समागताश्च मुनयः तद्व्रताचरणोत्तरम् ॥ तान्दृष्ट्वा विस्मिताः सर्वाः पुलकाञ्चित विग्रहाः ॥ ८९ ॥ आनन्दाश्रु समाकीर्णाः प्रणता स्तत्पदाम्बुजे ॥ तेऽपि प्रहृष्टाः मुनयः ताः प्रोचुः प्रीतिपूर्वकम् ॥ २९० ॥ मुनय ऊचुः ॥ किमुत्तमं व्रतञ्चीर्णं अस्माभिः समुपागतम् ॥ सर्वदुःख विनिर्मुक्तैः सुखोदर संस्थितैः ॥ २९१ ॥ कलत्र कृत्यमधुना कृतमेव महत्तरम् ॥ एतादृशां कलत्राणाम् लाभः पुण्यै र्महत्तरैः ॥ ९२ ॥ कथं वा तद्व्रतं चीर्णं केनोक्तं महताव्रतम् ॥ कानि वा साधनानीति वक्तव्यमति सादरम्

॥९३॥ ततस्तद्वचनं श्रुत्वा ऋषिपत्न्यः प्रणम्य तान् ॥ नन्दिकेशोक्तमित्याहुः व्रतं श्राम्भवमुत्तमम् ॥ ९४॥ ततः परं प्रहृष्टा-
स्ते गताः स्व स्वाश्रमम् प्रति ॥ तदा प्रभृति तैः सर्वैः तद्व्रताचरणं कृतम् ॥ ९५॥ तेनैव सुखमासाद्य स्थिताः सर्वे निरन्तरम् ॥
ततः कुरु प्रयत्नेन गिरिजे तद्व्रतं मुदा ॥ ९६॥ इत्युक्त्वा स महादेवो ययौ युद्धाय सादरम् ॥ तया च तद्व्रतं च्चीर्णं शिवयाप्यद्रि
कन्यके ॥ ९७॥ ततस्त्रिपुर संहारं कृत्वा गौरीमनोहरः ॥ समागतो गिरिजया सहरेमे महेश्वरः ॥ ९८॥ अम्बिका
तं महादेवम् दृष्ट्वा त्रिपुर नाशकम् ॥ तद्व्रतस्यैव महिमा भूयानिति तुतोष सा ॥ ९९॥ तस्मात्त्वयापि यत्नेन कर्तव्यन्तद्व्रतम्मुद
अविश्वासो न कर्तव्यो दुःखन्त्यज विशेषतः ॥१००॥ इति तद्वचनं श्रुत्वा सुरदारास्ततः परम् ॥ चक्रुस्तद्व्रतमत्यन्तं सन्तुष्ट
हृदयास्तदा ॥१॥ गरुडेन समानीता सामग्री विधिचोदिता ॥ तया सम्यग्व्रतं च्चीर्णं कपिलेशस्य सन्निधौ ॥२॥ ततः पर
म् मुनिवरम् दृष्ट्वा कपिल नामकम् ॥ प्राह नारायण सती शच्यादिक समन्विता ॥३॥ श्री गुरु उवाच ॥ व्रतं च्चीर्णम्मयत्नेन
विध्युक्तैरेव साधनैः ॥ नाङ्ग लोपोऽपि सम्वृत्तो विभवोऽपि स्थितस्तथा ॥४॥ अद्यापि नागता एव देवाः केऽपि मुनीश्वर ॥
अतः परं व्रते तस्मिन् विश्वासोऽपि कथं वद ॥५॥ व्यंगञ्च क्रियते कर्म तदा न फलसम्भवः ॥ सांगेऽपि तत्फलाभावः कथं-
वा वद सत्वरम् ॥६॥ नार्थवादोऽपि तन्नेति शपथोऽपि कृतस्त्वया ॥ अतः परं किं विधेयमिति चिन्ता समाकुला ॥७॥

ततः परमुवाचेत्थं कमलां कपिलाभिधः॥ मुनिस्तत्र विदां श्रेष्ठो वरिष्ठः शाङ्करेष्वपि॥८॥ कपिल उवाच॥ इन्दिरे सुर संगीतः समायास्यतिते पतिः॥ विषादो नैव कर्त्तव्यः विश्वासं कुरु तत्कृते॥९॥ तत्तादृशं व्रतेनैव येनेष्टं फलम्भवेत्॥ तस्य व्रतस्य महिमा दृष्टव्यश्च त्वयाऽधुना॥१०॥ एतस्मिन्नन्तरे काले दुन्दुभिध्वनिरुत्थिता॥ श्रुतस्स्तया कमलया सुरदा रैश्च तैरपि॥११॥ ततः परं प्रहृष्टा सा विलोक्य गरुडं मुहुः॥ कुतोऽयं ध्वनिरित्याह कमला विमलानना॥१२॥ सोऽपि श्रुत्वा ध्वनिं तस्याः श्रुत्वा च वचनं मुदा॥ तामाह प्रणतो भक्त्या दुन्दुभिध्वनिरित्यपि॥१३॥ ततः स नत्वा कपिलं कपिलं कपिलेश्वरम्॥ तद्दर्शाभिमुखो भूत्वा गरुडः प्रययौ तदा॥१४॥ ततो दूराद्धिमेक्षित्य सुरागमनमादरात्॥ आगता नमरानाह लक्ष्मीं कुशल पूर्वकम्॥१५॥ ततः प्रसन्न वदना कमला कपिलेश्वरम्॥ नत्वा तत्कपिलं प्राह कृताञ्जलि पुटा तदा॥१६॥ लक्ष्म्युवाच॥ व्रतोत्तमोपदेशेन धन्यास्मि मुनिपुङ्गव॥ अविश्वासलयो जातो विश्वासो मे प्रवर्द्धते॥१७॥ देवाः समागताः सर्वे जीविताः शिवपूजया॥ धन्यं व्रतमिदं धन्यम् धन्यम् धन्यम् व्रतोत्तमम्॥१८॥ न जाने न जाने न जाने न जाने न जाने न जाने शिवान्यन्न जाने॥ शिवाराधनेनैव सौख्य प्रवृद्धिः शिवाराधनेनैव सम्पत्प्रवृद्धिः॥१९॥ शिवाराधनेनैव देवाः सजीवाः शिवाराधनन्त्वन्न सञ्जीविनीच॥ व्रतस्यास्य माहात्म्यमद्भुतम् च

प्रकृष्टं प्रयुञ्जानमेवं कथं वा ॥ ३० ॥ व्रतानामिदन्तावदत्युत्तमं हि व्रतं श्रेष्ठमेतत्कृतं तन्त्रैवयोगात् ॥ मृता येन देवाः पुनस्तेन सर्वे कथं वा प्रजाताः कथं वास्य शक्तिः ॥ २१ ॥ अहो न जानन्ति विमूढचित्ताः शिव प्रभावं शिव पूजनस्य ॥ सामर्थ्यमेवं मृतजीवनाय व्रतञ्च तेनोक्तमिदं प्रकृष्टम् ॥ २२ ॥ इत्यानन्द वचो वीचो सुधा पान रता तदा ॥ कमला पितदा देवाः सर्वे ते समुपागताः ॥ २३ ॥ आगत्य ते सुराः सर्वे नत्वा तङ्कपिलेश्वरम् ॥ पुष्पाद्यैः पूजयामासुः जीवितास्त्वयेत्यपि ॥ २४ ॥ ततः परं मुनिन्नत्वा कपिलं भस्म भूषितम् ॥ सद्रुद्राक्ष भूषणं शैवम् प्राहुः शाम्भव संयुतम् ॥ २५ ॥

देवा ऊचुः ॥ शाम्भवाय नमस्तुभ्यं शम्भु पूजापरायच ॥ भस्म भूषित देहाय रुद्राक्षाभरणाय च ॥ २६ ॥ त्वत्तस्तादृशो लोके न दृष्टो न श्रुतो यतः ॥ व्रतमुक्तम् त्वया शैवम् असञ्जीवन साधनम् ॥ २७ ॥ यदुक्तन्तद्व्रत ञ्चीर्णं सुरदारैर्विशेषतः ॥ तेनैव जीवन ञ्जातमागतञ्च सुराधुना ॥ २८ ॥ दीर्घ निद्रा प्रविष्टानाम् जीवनाय समीरितम् ॥ शाम्भवं व्रतमेतावद्व्रतानामुत्तमं व्रतम् ॥ २९ ॥ शेषेण तावदस्मभ्य मुक्तमेतद्व्रतङ्कृतम् ॥ सुरदारैस्त्वया प्रोक्तम् इति पीयूष सन्निभम् ॥ ३० ॥ अकस्मादेतदुत्थानं यदासमभवत्तदा ॥ किङ्कृतं व्रतमित्येव दारैरिति विचारितम् ॥ ३१ ॥ मृत्युञ्जय व्रते नैव मृत्युर्नास्ति सर्वथा ॥ नान्यथेत्यपि निर्णीतं तत्र ताथैवाभवन्मुने ॥ ३२ ॥ अतः परञ्जीवनन्तु जातमेव शिवा-

त्वया ॥ कथं स्व स्वालय प्राप्तिर्भविष्यति वदाधुना ॥ ३३ ॥ इति तद्वचनं श्रुत्वा कपिलो मुनि पुङ्गवः ॥ प्राह गम्भीरया
वाण्या वाणीपतिमुखान्सुरान् ॥ ३४ ॥ कपिल उवाच ॥ शिवाराधन सामर्थ्यं न ज्ञातं निगमैरपि ॥ अतः कथन्तदन्येन
ज्ञेयम्भवति तत्वतः ॥ ३५ ॥ महादेवः कृपासिन्धुर्यदा जीवनमिच्छति ॥ सुराणामसुराणाञ्च तदा भवति जीवनम् ॥ ३६ ॥
उपायमपि वक्ष्यामि दैत्यानाम् विजये सुराः ॥ स्वदार सहिता स्तावात्तिष्ठन्तु सुखिनोऽधुना ॥ ३७ ॥ इति तद्वचनं श्रु
त्वा पूजयित्वा महेश्वरम् ॥ नत्वा च मुनि शार्दूलं स्व कलत्रैः समान्विताः ॥ ३८ ॥ स्व स्वाङ्गनाङ्ग सङ्गेन तत्तदालिङ्गने
रपि ॥ सुधापानैश्च सन्तुष्टाः सर्वे नारायणादयः ॥ ३९ ॥ ततः सन्तुष्ट हृदयाः कृत कृत्याश्च ते सुराः ॥ नत्वा तं कपिल
म्प्राहुः कृताञ्जलिपुराः पुनः ॥ ४० ॥ देवा ऊचुः ॥ प्रचण्ड नगरागार ज्वालामाला समाकुलाः ॥ मुने वयं सुराः
सर्वे जीवनञ्च गतं खलु ॥ ४१ ॥ शिव व्रत प्रसादेन पुनर्जातञ्च जीवनम् ॥ अतः परं कथन्तस्य बल हानिर्भविष्य
ति ॥ ४२ ॥ मुनिरुवाच ॥ सुरा शृण्वन्तु मद्वाक्यम् प्रचण्डः प्रबलो महान् ॥ ततः पराजयस्तस्य कथं सम्भाविता
वद ॥ ४३ ॥ अपार न्तस्य तत्सैन्यं सोऽपि शूरतरः परः ॥ शांकराग्रेसरस्तस्य कदापि न पराजयः ॥ ४४ ॥ स्वप्नेऽ
पि शांकरैः साकम् शांकराराधनप्रियः ॥ अतएव बलन्तस्य वर्द्धते च प्रतिक्षणम् ॥ ४५ ॥ अत्युत्कृष्टा शिवार्चनस्य

फलमित्येतन्मया निश्चितन्तत्सामर्थ्यमखण्डितं खलु सदा सम्पत्स्यमद्दोऽपि सः ॥ तं को वा भुवनत्रयेऽपि वद मे जेतुं सम
र्थः सुरै गौरीकान्तपदारविन्दभजनासक्ताः सदा राक्षसाः ॥४६॥ प्रचण्डो ऋषिशार्दूलः स तावद्बहुलाभिधः ॥ पूर्वं पूर्व
भवे तेन शङ्कराराधनङ्कृतम् ॥४७॥ तेनार्चितानि लिङ्गानि प्रत्यहङ्कोटिशः सुराः ॥ कमलैरमलैः पुष्पैर्नवबिल्वदलैरपि ॥४८॥
उत्फुल्लापार कनकप्रसूनैरपि पूजितः ॥ द्रोणपुष्पैरपामार्गैः शिवस्तेन समर्चितः ॥४९॥ लिङ्गानि स्थापितान्येव कोटिशस्ते
न सादरम् ॥ सुवर्णमन्दिरेष्वेव पूजितान्यपि कोटिशः ॥ ५०॥ स सु शाम्भवविद्यायाम् प्रवीणो निपुणो बली ॥ शङ्करा
एव तद्दारा स्तद्भृत्या अपि कोटिशः ॥५१॥ तन्नादृश्यं शिवस्तं दृष्ट्वा कम्पमुपागताः ॥ भवन्तः पूर्वममरास्तद्विघ्नाचर
णोद्यताः ॥५२॥ भवद्भिर्यतिरूपेण गत्वं पूर्वन्तदाश्रमम् ॥ अशैवरूपमासाद्य तदा तत्कोपवर्धकम् ॥५३॥ तदाग्रहस
शैवेन्द्रो दृष्ट्वा देवानशाम्भवान् ॥ हन्तव्या एव सर्वेऽपि सुरा इति पुनः पुनः ॥५४॥ अशाम्भवेभ्योऽपि महेश्वरेण स्व
ङ्क्रिमैश्वर्यमाप्तं प्रकृष्टम् ॥ एते वध्या ही इति मन्म्हेहि स एव तावत्प्रबलो महात्मा ॥५५॥ ततः परं स तेनैव शरीरेणाति
दारुणश्चवध्ये सुरसंहारम् कर्तुमेवाति कोपनः ॥५६॥ तस्याभव [illegible] तथा रूपं शिवपूजाप्रसादतः ॥ यद्दृष्टुमपि
शक्यन्न सर्वेषा भवदादिभिः ॥५७॥ स जन्मना न दैत्योऽपि मुनिरेव शिवार्चकः ॥ दैत्यकर्मकरत्वेन दैत्य इत्यभि

धीयते ॥ ५८ ॥ गतः शिवाराधनकाल एव भवद्भिरित्याकुलमानसोऽभूत् ॥ अशेषवृद्धैव भवत्स विघ्नोत्र-
तोऽपि विश्वेषु सपदार्चनेषु ॥ ५९ ॥ अतस्तेनैव कोपेन नृपोऽपि ~~तस्य तावन्महामुने~~ ॥ सम्भून्महत् ॥ तेनाग्नि-
कल्प एवासीत्तस्यैव मुनिपुङ्गवः ॥ ६० ॥ अतः परं मया ज्ञातो भवतान्तु पराभवः ॥ तेन शान्तः स कोपोऽपि
तस्य तावन्महामुने ॥ ६१ ॥ अधुना शिवपूजायाम् प्रवृत्तः स सुतः परम् ॥ सकलत्रः स सैन्यैश्च यास्यत्येव शि-
वं प्रभुम् ॥ ६२ ॥ तस्य तावत्कलत्राणि शिव विद्यात्मकानि हि ॥ शिवविद्यामूर्त्ति पाङ्क्ति दाराकारमुपाश्रि-
ता ॥ ६३ ॥ तत्सैन्यं तस्य शिष्यास्ते हारगिरः प्रकीर्त्तिताः ॥ तस्य तन्नगरन्तावन्नाश्रमस्तस्य पावनः ॥ ६४ ॥
आश्रमास्तरयान्येव कुशानां केवलं खलु ॥ अग्नि प्राकार रूपाणि जातानि विमलान्यपि ॥ ६५ ॥ अथ सा-
यम्महादेवम् प्रयास्यति महोत्सवैः ॥ कैलास‘निलयं प्राप्य स्थास्यत्येव गणैः^सह^ ॥ ६६ ॥ पराभवार्थं भवतां
त्तेन रूपन्धृतन्तथा ॥ वृते पराभवे तस्य कोपः शान्तोऽपि सर्वथा ॥ ६७ ॥ कैलासमिन्न भुवनेष्वशेषेष्व-
पि सर्वथा ॥ तत्र कल्पमतिस्तस्य स यतः शंकरः परः ॥ ६८ ॥ एतस्मिन्नन्तरे काले संवृत्ताप्यशरीरवाक् ॥
प्रचण्डः शंकरम्प्राप समिन्न इति सा श्रुता ॥ ६९ ॥ तदा सन्तोषसम्पन्नाः सर्वे नारायणादयः ॥ कपिलेश्वरमु-

भ्यर्च्य नत्वा प्राह मुनीश्वरम् ॥ ७० ॥ देवा ऊचुः ॥ ब्रूत ॥ प्रसादात्परमात्स जीवाः सर्वे वयं त्वत्कृपयाधुनानः ॥ स्व स्वालये कि-
ङ्गमनन्न युक्तमित्यूचुरुच्चै स्वकलत्र युक्ताः ॥ ७१ ॥ ~~देवा ऊचुः ॥ ब्रूत प्रसादात्परमात्स जीवाः सर्वे वयन्त्वत्कृपयाधुनानः ॥ स्वस्वा-
लये किं गमनन्न युक्त इत्यूचुरुच्चै स्वकलत्र युक्ताः ॥ ७१~~ ततस्तानाह स मुनिः स्तथास्त्विति ततः परम् ॥ प्रययुस्ते सुराः
सर्वे सकुटुम्बाः सुतैः सह ॥ ७२ ॥ गत्वा तैःस्व स्वनिलयं यथा पूर्वमवस्थिताः ॥ परमानन्द सम्पन्नाः स्व स्वदार समान्विताः
॥ ७३ ॥ शिव प्रसादेन निजालयेषु स्थित्वा शिवाराधनमादरेण ॥ कृत्वा शिवाराधन साधनानि सम्पाद्य नित्यं सुरव
मापुरार्ये ॥ ७४ ॥ किं किं फलं वान शिवार्चनेन भविष्यतीति प्रवदामि वाले ॥ शिव व्रतस्यास्य फल प्रकृष्टं दृष्टं मया
देव गणैश्च दृष्टम् ॥ ७५ ॥ कर्ता शंकर एव सर्व जगतां देवादि देवो भवो भर्तापीति स निश्चितो मुनि वरै र्देवैश्च दे-
वैरपि ॥ दातापि त्रिपुरान्तको गिरिकुल श्रेष्ठात्मजा कार्मुकः ॥ संहर्तापि सुरासुरै र्नत शिरो रत्नस्फुरत्पादुकः ॥
॥ ७६ ॥ जानन्त्येवं वेदराशी विभवास्तद्वै भवम् शाम्भवम् ॥ तं को वा वद विस्तरेण गदितुम् शक्नोति शक्तोऽ
पि वा ॥ को वा तिष्ठति भूतलेऽपि सुतराम् ॥ स्वर्गेऽपि सत्येऽपि वा वैकुण्ठेऽपि सुरासुरार्चित पदाम्भोजः
स मृत्युञ्जयः ॥ ७७ ॥ यत्सामर्थ्य मपार वेदानेकसौ रै र्न ज्ञायते सर्वथा ॥ यत्पादाम्बुज पूजया जडमति र्वा-

२५३

गौश्वरीवल्लभः॥ स्याल्लक्ष्मीरमणः शचीपतिरपि स्यादग्निरिन्दुस्तथा। भानुर्भ्येति तमोऽध्वरम् गिरिसुताकान्तम्
भजे सन्ततम्॥७८॥ यंभक्त्यामरभूरुहं सुरकुलाराध्यंच सिद्धार्चितम्॥गन्धर्वादि समर्चितंच्च परमं प्राहुस्तमे
कं शिवम्॥ध्यात्वा चित्तमनन्त पातककुलापारारटवी कौरशं पारागिं मुखस्वरूपमेत्य सततं तच्चिन्तनाभ्युद्यत
म॥७९॥ तंवन्दे मुहुरादरेण गिरिजा वक्षोज काश्मीरजापार श्रीरसरञ्जिता प्रविलसत्कस्तूरिका चर्चितम्॥
तत्पाटीर रसाभिलूषितमपि व्याप्तं दुकूलोत्तमे र्हैमैर्हारापार विराजमान वपुषं जोषं प्रदोषेष्वपि॥८०॥ यद्लि-
ङ्गादभवत्समस्तमसकृद् ब्रह्माण्डलं कुण्डली यत्कर्णोत्तम कुण्डलं मणिगण श्रीमण्डलालङ्कृतम्॥ तं हारोत्तम
मानसाम्बुज वरः श्री कर्णिका संश्रितम् श्रीकान्तार्चित पादुकं भज मनः शैलात्मजा कामुकम्॥८१॥

इति श्री शिवरहस्ये हराख्ये तृतीयांशे उत्तरार्धे याज्ञवल्क्य जनक सम्वादो नाम चत्वारिंशोऽ
ध्यायः॥४०॥ इति तद्वचनं श्रुत्वा शुकवाणी विचक्षणा॥ मुहुः प्रणम्य भर्त्तारम् प्राह सत्यव्रतम्मुनः॥१॥
भगवान् गिरिशं शाप गिरिराजसुता कथम्॥ आविर्भूता कथमुमा श्रीगिरीश्वरमन्दिरे॥२॥ तेन वा किम् तप
स्तप्तम् येन गौरीविलोकनम्॥ तद्वात्य लीला कलनं जातम्पीयूष सन्निभम्॥ इदं सर्वं विशेषेण वद कारुणि

कोत्तम ॥ इति तद्वचनं श्रुत्वा प्राह सत्यव्रतः सतीम् ॥ ४ ॥ सत्यव्रत उवाच ॥ पुरा हिमाचलः स्रष्टः शंकरेण कुलाचलः ॥ भूधा
रणार्थमेतस्य सृष्टिरासीद्वरानने ॥ ५ ॥ धृतस्तेन धराभारः सुमेरुप्रमुखैः सह ॥ तेन तावद्धृतं पूर्वं मतलम्प्रति निर्मले ॥ ६ ॥
तत्र कस्यापि व्यसञ्चारः केवलं स स्वयं परम् ॥ शिवप्रसादलेशेन कूर्माधारतया स्थितः ॥ ७ ॥ तन्मूलसानुनिलयः कूर्मस्तत्
सानुसंगमात् ॥ नभभारमयम्प्रापि सत्सङ्गः खलु तादृशः ॥ ८ ॥ महावायुसमाक्रान्तमतलन्तत्र निर्मितम् ॥ लिङ्गमेकं महेशे
न निर्मितं रत्नमन्दिरम् ॥ ९ ॥ तस्मिन्नेव महादेवो मन्दिरे सुन्दरे स्थितः ॥ गौर्या सह विलासेन तदेकान्तस्थलं यतः ॥ १० ॥ तस्मि
न् लिङ्गे स गौरीशः करोति शिवपूजनम् ॥ कमलै रमलैः फुल्लैः कोमलैः बिल्वपल्लवैः ॥ ११ ॥ दूर्वाङ्कुरैरभिनवैः कनकैर्मनै
रपि ॥ पञ्चकैः केतकीपुष्पैः जपापुष्पैश्च कोटिभिः ॥ १२ ॥ तत्र सायं महेशानन्दद्रष्टा गिरिजापतिम् ॥ नृत्योत्सवेन सन्तु
ष्टमम्बिका वीक्षणप्रियम् ॥ १३ ॥ यदा तेन शिवा दृष्टा तदा सा शिववल्लभा ॥ क्रीडारता बालिकेव यौवनेनापि संयुता ॥
युवतीत्वेन दृष्टा सा यदा शंकरवल्लभा ॥ तदा पर्वतमालोक्य शङ्करः प्राह तं गिरिम् ॥ १५ ॥ तेनार्चितोऽति सन्तुष्टः तस्मि
न् लिङ्गे मनोहरे ॥ किं त्वया दृश्यते मूर्तिः कापि सा शोभनेत्यपि ॥ १६ ॥ हिमवानुवाच ॥ भगवन्दृश्यते लीला कापि
बालेन ते मया ॥ सा तु सद्यः समुत्पन्ना कन्यकेव विराजिता ॥ १७ ॥ अपूर्वमिदमत्रेदं जननी नात्र दृश्यते ॥ स्तन्यपा

नोमुरला सेयं का वा तज्जननी शिव ॥१८॥ कस्तस्याः स्यात्पिता शम्भो नात्रान्यः कोऽपि दृश्यते ॥ अतः परं पालन
म् वा कथमस्याः सदाशिव ॥१९॥ श्रीसदाशिव उवाच ॥ शैलेश्वर प्रसन्नोऽस्मि सम्यक्त्वत्कृत पूजया ॥ अपूजि
तमिदं लिङ्गम्पूज्यते सादरं त्वया ॥२०॥ नात्रामराणां सञ्चारः किन्नराणां विशेषतः ॥ गन्धर्वाणाञ्च सञ्चारः सि
द्धानाञ्च सर्वथा ॥२१॥ अतएव परं लिङ्गमिदं संपूज्यते मया ॥ नवाध्येतालिकाभार धाराधारत्व साधनम् ॥२२॥
इदं दृष्टं त्वया रूपमपारं तपसाऽगिरे ॥ धन्योऽसि कृतकृत्योऽसि मत्पूजाफलमीदृशम् ॥२३॥ इयं बाला पालनीया लाल
नीया च सादरम् ॥ मन्दिरं प्रति नेयाऽपि विनयाभिनयैः परम् ॥२४॥ एतदालोकनायापि यावदाभम्यते मया ॥
~~ध्येतालिकाभार धाराधारत्व साधनम् ॥~~ तावत्पालनमेतस्याः कर्तव्यमति यत्नतः ॥२५॥ इत्युक्त्वा तिरोदधे साम्बः
तस्मिन् लिङ्गे मनोहरे ॥ स गौर्याः कामरूपाणि स्मरंस्तद्धैर्मवार्णवात् ॥२६॥ ततः परं स शैलेन्द्रो विस्मयसम्पासङ्ग
तः ॥ कथमेतत्पालनं स्यादिति चिन्ताकुलस्तदा ॥२७॥ ततः सस्मार मेनां तां मातुमेतां सुतामिव ॥ साप्यागता
तदा मेना तान्दृष्ट्वा विस्मयङ्गता ॥२८॥ मेनोवाच ॥ केयं बालाति विमला बाल विद्युल्लतानिभा ॥ केन भाग्येन
दृष्टेयमपूर्वा मूर्तिरीदृशी ॥२९॥ एतत्सन्दर्शनादेव ममानन्दः प्रवर्धते ॥ आनन्दमूर्तिरेवेयमानन्दन्दातु-

मिच्छति ॥ ३० ॥ इति तद्वचनं श्रुत्वा प्राह मेनां स तत्पतिः ॥ वीक्षिष्य पूर्व वृत्तान्तम् स्मृत्वा स्मृत्वा यथाक्रमम् ॥
॥ ३१ ॥ ततस्तदुक्तमाकर्ण्य सापि मेनाति विस्मिता ॥ शिवा संकल्पिता सेयम् शिवा नूनं शिवप्रदा ॥ ३२ ॥
इत्युक्त्वा साति सन्तोषैः दुन्दुभिध्वनि पूर्वकम् ॥ तामादाय ययौ मन्दं सुन्दरा निज मन्दिरम् ॥ ३३ ॥ यदा प्रवि
ष्टा गिरिराज राज कार्तस्वराकार मृगेन्द्र जुष्टम् ॥ तदैव पद्मादि सुराङ्गनाश्च समागतास्तत्पद सेवनाय ॥
॥ ३४ ॥ देव दुन्दुभि निर्घोष तूर्य ध्वनि विराजितम् ॥ तदा तन्मन्दिरञ्जातं सुरनारी समावृतम् ॥ ३५ ॥
अत्यन्तकान्तक मनोहर कान्ता सेयमित्यभिनवै रुपचारैः ॥ तामपार सुर किन्नर दाराश्चा मरै रपि सिषेवुरपारैः ॥ ३६ ॥
सुर दारानपारांस्तान् तदाराधन तत्परान् ॥ विलोक्य परमं प्राप सन्तोषं गिरिनायकः ॥ ३७ ॥ सुराङ्गनानाञ्च सुमङ्ग
लानि गानानि डोलान्तर तल्प सङ्गे ॥ तस्याः प्रजातानि सुमङ्गलेऽपि सम्प्राप्य दीप्ताखिल मण्डलेति ॥ ३८ ॥ श्रीसर्वमङ्ग
ले डोलितवेय मृदु मण्डलैः ॥ अलङ्कृता पश्य पश्येत्यान्दोलन पराः सुराः ॥ ३९ ॥ हिमवानपि तान्दृष्ट्वा सदारसहिता
न्सुरान् ॥ सन्तोषं परमं प्राप मङ्गलञ्जातमित्यपि ॥ ४० ॥ तदा प्रभृति ते दाराः सुराणां शैलमन्दिरे ॥ तत्सेवार्थं नि
वासञ्च चक्रुरानन्द संवृताः ॥ ४१ ॥ सा बालिका सादर शुक्ल पक्ष नवेन्दु रेखेव सुखाय तेषाम् ॥ शनैः शनैः ॥

वृद्धि मवाप सापि मनोज्ञ रूपाच कृपा स्वरूपा ॥४२॥ सुरदार कुतूचार मारादनिवार्यैव विनोदस्नान शीला ॥ महिलेति शिवस्य तैरुदारै रनुचारं परिसेवितापि बाला ॥४३॥ रूप यौवन सम्पन्नामेनां मेना मुहुर्मुहुः ॥ विलोक्य परमानन्दं प्राप दुष्प्राप मन्वहम् ॥४४॥ ततः परङ्किन्नर सिद्ध गुह्य गन्धर्व नारी परिसेवितासा ॥ चचार शैलेन्द्र गृहे मनोज्ञी विद्युल्लतेवा मित मूर्त्तिरूपा ॥४५॥ श्रुत्वातो मूर्त्ति सौन्दर्यं वाहिनी सेयमित्यपि ॥ मेनावचन धाराभि रानन्द मवाप शैलराट् ॥ ४६॥ ततः पर म्परिणयः कथम्भावीति चिन्तया ॥ मेनया सह शैलेन्द्रो विचार ञ्चचकार सः ॥४७॥ शैलेन्द्र उवाच ॥ त्वदुक्तिभिस्तावदियम्मयापि ज्ञातैव सम्पूर्ण वयः प्रमाणा ॥ अतः परङ्किं समयोऽपि वृत्तः पाणिग्रहस्यापि शुभ ग्रहेषु ॥४८॥ कोवाभविष्यति पति र्भाग्यवानामित प्रभः ॥ न जाने स पतिः प्रायः प्रियमेतादृशं वसु ॥४९॥ विद्युल्लतानामपि कोटयो ये ते तत्स्वरूपो स्मरणेऽपि दूरम् ॥ प्रायः प्रयान्त्येवनलज्जया किं कस्तत्समानः पतिरस्ति लोके ॥५०॥ सा सर्व देवासुरदार वन्द्या प्रायः शिवानीति मतिर्ममापि ॥ जातो विवाहो भविता कथं वा क्वाहं शिवः क्वामरवन्द्यपादः ॥५१॥ इत्येव ञ्चिन्तया नित्यं गिरिराहारवर्जितः ॥ विचार सागरे मग्नो पुनः पुनरुदारधीः ॥५२॥ या सर्व मङ्गला सापि शङ्करार्धाङ्गभामिनी ॥ स्व स्वरूपमनु प्राप्य चकार गौरि मन्दिरम् ॥५३॥

तेन स्वरूपेण पुनर्महेशम् प्राप्तुं भवानी शिव पूजनेन ॥ माति ञ्चकाराति मनोज्ञ रूपा शिव व्रतेनापि पुनः स्मृतेन ॥ ५४
सा गौरी । विजया युक्ता जययापि समन्विता ॥ तृतीया व्रत कालञ्च प्राप्य प्राह वचो मुदा ॥ ५५ ॥ जये सुरसरित्तीरे
नीरजाति मनोहरे । स्थित्वा नेयः कियान्कालो मयेत्याहाति शोभना ॥ ५६ ॥ ततः परं साप्यतुरंस्य तु यानेस्थित्वा
सखरवीवृन्द निवारितापि ॥ ययौ सरित्तीर मुदारमम्बा शनैः शनैरम्बुरुहातिधीरम् ॥ ५७ ॥ ददर्श सा सरित्ती
रे मुनि नारि गणं निशि ॥ सा तृतीया व्रत ङ्कर्तु मुद्यतं सर्व साधनैः ॥ व्रतञ्चकार सा गौरी मयुक्तं पुरः वैरिणा
तदैव वेदामिति स्मृत्वा सन्तोषम्परमं ययौ ॥ ५९ ॥ ततः परञ्जयामाह ताभिः क्रियते जये ॥ व्रतं विचार्य्या
येति सर्वस्तापि शिव प्रिया ॥ ६० ॥ ततः प्रणम्य ताङ्गौरीङ्कृत्वा मुनि वराङ्गनाः ॥ प्राह किं वा व्रत ङ्कर्तुमार
ब्धमिति सादरम् ॥ ६१ ॥ मुनि पत्न्य ऊचुः ॥ इदन्नि तृतीया व्रतमेतदेव सौभाग्य सम्पत्ति करं मनोज्ञम् ॥
सन्तान वृद्धिप्रदमेतदेव वैधव्य दौर्भाग्य विनाशकञ्च ॥ ६२ ॥ इदम्पुरा शङ्कर वल्लभाये शिवोक्तमेवं व्रतमादरेण
अस्माभिरप्येवं शिव प्रसाद लाभाय तावत्क्रियते निशायाम् ॥ ६३ ॥ कन्यकापि व्रतङ्कृत्वा पतिमाप्नोति सुन्द
रम् ॥ धीरं मनोहरं वीरान्कुमारानपि सुन्दरान् ॥ ६४ ॥ एतद्व्रताचरणमेव निधान भूतम् एतद्व्रतं सुरतरुः खलु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० २२३ २२४

कामधेनुः ॥ एतेन तावदखिलेप्सित सिद्धिरेव माङ्गल्यदं व्रतमिदं प्रवदन्ति वेदाः ॥ ६५ ॥ अथोत्सवेन निशि जाग रणेन पूजा कार्या शिवस्य कुसुमादिभिरादरेण ॥ लिङ्गे मनोज्ञे सिकतामये स्मिन्नभ्यर्चितो दिशति भाग्यमपारमी पाः ॥ ६६ ॥ इति तद्वचनं श्रुत्वा जया तामाह शाम्भवीम् ॥ प्रहृष्टा हृष्टवदनां व्रतम् क्रियत इत्यपि ॥ ६७ ॥ व्रतञ्च श्रीमहादेवं पूजारूपं मनोहरम् ॥ लिङ्गे च सिकतारूपे कृतन्ताभिर्मनोहरम् ॥ ६८ ॥ वितानाद्ये र्मण्डपा नि मनोज्ञानि कृतान्यपि ॥ अर्चनार्थे समुद्युक्तं मुनिदारे र्मनोरमे ॥ ६९ ॥ शैव व्रतमिदङ्गौरी कर्तव्यमधुना त्वया ॥ सम्पादनीया सामग्री क्षणेनेत्याह साजया ॥ ७० ॥ आम्बिकापि तदुक्तानि श्रुत्वा वाक्यानि सम्त तान्यपि तथास्त्विति मुदा प्राह सा ययौ गिरिमन्दिरम् ॥ ७१ ॥ सानत्वा मेनकाम्प्राह माता सा सर्वमङ्गला ॥ शिव व्रतम्मुदा कर्तुमद्य तावत्समुत्सुका ॥ ७२ ॥ त्वयापि तद्व्रतङ्कार्य्यमम्बया सह सादरम् ॥ तद्व्रतोत्तममित्युक्तं मुनिदारैर्विशेष तः ॥ ७३ ॥ अम्बा सुरसरित्तीरे तिष्ठति प्रीतिमानसा ॥ त्वयाप्यागत्य कर्त्तव्यं तद्व्रतं मङ्गलावहम् ॥ ७४ ॥ इति तद्वचनं श्रुत्वा निवेद्य गिरये तदा ॥ पूजासम्भारसंयुक्ता सरित्तीरं ययौ मुदा ॥ ७५ ॥ तत्रैव कारयामास रत्नमण्डलमण्डितम् ॥ सुन्दरं मन्दिरं भक्त्या वितानादि समन्वितम् ॥ ७६ ॥ अपारै रुपचारैः सा भवान्या

शि०त०उ० अ०४०

सह सादरम् ॥ पूजयामास गिरिशं गिरिणापि समन्विता ॥७७॥ निशि जागरणं कृत्वा प्रातः सम्पूज्य शंकरम् ॥ सा ददौ मुनि मार्य्याभ्यो मुनिभ्योऽप्यन्न सादरम् ॥७८॥ ~~पूजयामास गिरिशं गिरिणापि समन्विता~~ ॥ सुवर्ण शूर्प सम्पूर्ण फलोपायन कोटिभिः ॥ चकार मुनि शार्दूला स्त्रहृष्टान्वानिता युतान् ॥ ततः प्राप स्वभवनं सर्व मङ्गलया सह ॥ ततः स्वप्नस्तया दृष्टो मेनयाप्यम्बया शुभः ॥ ८०॥ अत्युच्च रत्नप्रतिमा समेत सिंहासनारूढ शिवा सहायः ॥ दृष्टस्तया मेनकयापि याहं मनोत्सवो प्युत्सव राशि हेतुः ॥८१ अम्बा शिवांकमधिरुह्य शिवेन साकं स्मेराधरा हृदमनोहर वाहुवीताम् ॥ भूयो विलोक्य मुहुरादरतः प्रहृष्टा भक्तो स्वां सा ददर्श तदनन्तरमुत्थितापि ॥ ८२॥ ततः परं समारम्भो महानेवाभवत्तदा ॥ जातकल्पो विवाहोऽपि पीत्यापि हृष्टापि मेनका ॥८३॥ निवेदितः स शैलाय स्वप्नो मेनकया तदा ॥ तेन स्वप्नेन सन्तुष्टो गिरिराजो विशेषतः ॥ ८४॥ ततः शूने मेनकापि शिवायै प्राह सादरम् ॥ स्व स्वप्नमादरेणैव जनयन्ती सुखाम्बुधिम् ॥ ८५॥ ततः परं शिवा प्राह स्व स्वप्नमपि सा मुहुः ॥ पृष्टा मन्द लज्जैव लज्जयैव स्मेरधारा ति राजिता ॥ ८६॥ ततः परं महादेवः प्रसन्नः समुपागतः ॥ गण कोटि समाकीर्णः सर्व देवनम

स्कृतः ॥ ८७ ॥ अपारमंगलाकारः सर्वमंगलदायकः ॥ स सर्वमङ्गलाकान्तः छत्रार्बुदविराजितः ॥ ८८ ॥ चामरार्बुदसंकीर्णस्तूर्य्यध्वनिसमावृतः ॥ अपारविभवोपेतः तन्ददर्श गिरिस्तदा ॥ ८९ ॥ ततः प्रणम्य बहुधा स्तुत्वा सर्वमीश्वरम् ॥ शङ्करम्प्राहाविनतः कृतार्थोऽस्मीति सादरम् ॥ ९० ॥ ततो महोत्सवेनैव मान्दिरे समलङ्कृते प्रविष्टः शंकरं स्मृत्वा तत्प्रवेशवचो मुदा ॥ ९१ ॥ ततः समागतङ्गौरी श्रुत्वा शंकरमादरात् ॥ प्रहृष्टा शोभनस्यायं समयोयामीति प्रियः ॥ ९२ ॥ मधुपर्कादिकङ्कृत्वा शंकराय महात्मने ॥ ददावपाररत्नौघसंवीताभरणान्यपि ॥ ९३ ॥ ततस्तां भूषिताङ्कृत्वा गौरीममरवन्दिताम् ॥ आहूय मेनका प्राह परमानन्दसागरम् ॥ ॥ ९४ ॥ मेनकोवाच ॥ अम्बांबापारविभवैः सभव स्त्व स्तव वल्लभः ॥ आवेिता भूरिभाग्यैस्त्वं भवित्रीभव वल्लभा ॥ ९५ ॥ सौभाग्यनिर्णयः प्राप्ताः तद्कृता चरणात्त्वया ॥ एतादृशं भाग्य महद्भाग्यं कस्य स्याद्भुवि शांभवि ॥ ॥ ९६ ॥ व्रतं कथं शाम्भवमम्ब तेन शम्भुः प्रसन्नः शुभदो भवानि ॥ यद्वाञ्छितन्नादम ... वि हिदानीं लिधान मस्यव्रतमेव नूनम् ॥ ९७ ॥ इतोऽधिकन्न व्रतामित्यवैमि व्रतं व्रतानां नाशिरोमणिः किम् ॥ इतस्त्वपरं शाम्भवमम्ब सिद्धिः सद्यः ... किमेवं व्रतमस्ति लोके ॥ ९८ ॥ कस्तूरीघनसार पंककलिते किं शांकरं कांकितोऽयंकोलामल

बालिकाकुल युतौ निःशङ्कं पङ्केरुहे ॥ निःशङ्कैर्न सशांक मण्डल कुलव्यक्तोल्लस त्कन्दुके रानन्दाम्बुधिवर्धके मृड ददत्क्रीडाम्मृडा
नि त्वया ॥ ९९ ॥ इति मेनावचोवीची धारां धीरां मनोहराम् ॥ स्वकर्ण रत्न चषक परिपूर्णां पपौ शिवा ॥ १०० ॥ सा गौरी रमणांक
मंक निहिता संप्राप शंकाङ्किता ॥ सा मूर्तिः सुमुहूर्ते कीर्त्तिरपरा रेजे निजं वल्लभम् ॥ १ ॥ ततो महोत्सवो यत्तः स महान् गिरिमान्दि
रे ॥ सुरलोकेऽपि संवृत्तो गन्धर्वनगरेष्वपि ॥ २ ॥ देव दुन्दुभिनिर्घोष व्याप्तं भूमण्डलन्तदा ॥ शोभनं सूत्रयन्नेव शिवं वचश्चे
तदा ॥ ३ ॥ सा शंकराङ्कं सन्निवेश निलया रुरुचे भवानी विद्युल्लतेव शारदम्बर कम्भराङ्के ॥ तेनोत्सवेन गिरिशोऽपि सुखाम्बुराशि
कल्लोल लोल हृदयः सदयः सरेजे ॥ ४ ॥ इति तद्वचनं श्रुत्वा शुकवाणी शुचिस्मिता ॥ किमुद्यापन मस्येति सत्यव्रतमुवाच
सा ॥ ५ ॥ सत्यव्रत उवाच ॥ शृणु भद्रे प्रवक्ष्यामि तद्व्रतोद्यापनं मुदा ॥ उद्यापन श्रवणतो यस्मि वृद्धिः सुखं भवेत् ॥ ६ ॥ अस्मिन्व्रते
षोडश वत्सराणाम् अन्ते कृतान्तान्तक पूजनेन ॥ महोत्सवोद्यापनतोऽपि पूर्णं व्रतं भवत्येव कृतञ्च साङ्गम् ॥ ७ ॥ षोडशे वत्सरे
प्राप्ते तद्व्रतोद्यापनोत्सवः ॥ कर्तव्योऽति यत्नेन बहुभिः साधनैर्मुदा ॥ ८ ॥ शंकरोक्त प्रकारेण व्रताचारं समाप्यते ॥ उद्यापन व्रतस्यापि
कार्य्या साधनकल्पनम् ॥ ९ ॥ पूर्वोक्तै रेवविविधैः फलैरपि समन्वितैः ॥ शूर्पैः षोडश संख्याकैरुपचारैः समन्वितैः ॥ १० ॥
फलैः षोडश संख्याकैर्विविधैः स्वर्णसंयुतैः ॥ पूरणीयानि सर्पाणि रत्नैर्मुक्ताफलैरपि ॥ ११ ॥ तानि शैवकुटुम्बेभ्यो देयानि

२१०

प्रीविरह०२ | ह०त०उ
२२६ | अ०४१

प्रीतिपूर्वकम् ॥ दुकूल चोल युक्तानि षोडशत्व प्रकल्पनात् ॥१२॥ ततश्च स कुटुम्बेभ्यो शाम्भवेभ्यो धनान्यपि ॥ अन्नान्यपि
प्रदेयानि धेनवोऽपि गृहा अपि ॥१३॥ भूषणान्यपि देयानि यथा विभवमास्तिकैः ॥ विभवे सति तत्रापि वित्त शाठ्यन्नकार
येत् ॥१४॥ एवं कृतोद्यापनाना मङ्गलानां पदे पदे ॥ भवन्त्येव सुखानीति वेद डिण्डीरवः श्रुतः ॥१५॥ एवम्व्रते कृते पूर्णे मृतो
पि पतिरेष्यति ॥ अतः सौभाग्यदं मन्ये व्रतमेतदसंशयम् ॥१६॥ व्रतमेतत्कन्यकापि कृत्वा प्रियतमं पतिम् ॥ प्राप्नोति नात्र सन्दे
हस्तत्कृत मन्तादृशं यतः ॥१७॥ अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥ यस्य श्रवण मात्रेण सौभाग्यं वृद्धिमेष्यति ॥१८॥
स्कन्दमुद्यापनं पूर्वं पृष्टो गिरिजया शिवः ॥ प्राह प्रसन्नवदनः सर्वदेवशिरोमणिः ॥१९॥ पुरा कश्चिदभूद्राजा ब्रह्मवे
त्ता वरानने ॥ तस्य भाग्यं वरारोहे विनाश रहितं सदा ॥२०॥ स शाम्भवपरस्तस्य वयः शंकर पूजया ॥ आतम्पणित न्तेन तो
षिता शंकरा अपि ॥२१॥ पूजितान्यपि लिङ्गानि चित्ररत्न मयान्यपि ॥ शिव मन्दिर निर्माणं रत्नै स्तेनैव कारितम् ॥२२
स्थापितान्यपि लिङ्गानि चित्र रत्नमयान्यपि ॥ तेषु पूजा कृता तेन यया तुष्यति शंकरः ॥२३॥ तस्य भाग्यस्य नेयत्ता
स महासुर वन्दितः ॥२४॥ तस्य पुत्राः शत न्तेषां शिव भक्ति दृढा सदा ॥ तैश्च शूरै रपारैश्च रिपवो विजिता अपि
॥२५॥ तेषां रिपुं जये शक्तिः केवलं शिव पूजया ॥ सैन्य मन्यत्परन्तेषां सामान्य परिसेवने ॥२६॥ तस्यैव राज्ञा कन्या

पि कापि शोभन वर्धना ॥ तया बाल्यं समारभ्य कृतं शंकर पूजनम् ॥ २७ ॥ तन्माता विमला नाम्ना सापि शंकर पूजने ॥ सर्वदा
पि समुद्युक्ता कन्यामाह कदाचन ॥ २८ ॥ विमलोवाच ॥ कल्याणन्तव कल्याणि भावि शंकरमर्चया ॥ शिवार्चनेन भर्तापि तव
स्यादेव भाग्यवान् ॥ २९ ॥ किञ्चिन्नित्यं शिवाचार निरतापि शिवार्चनम् ॥ सौमङ्गल्य व्रतान्नित्य कुरु तावद्विशेषतः ॥ ३०
अयन्तु श्रावणो मासः पूर्वकल्पस्ततः परम् ॥ सौमङ्गल्य व्रतस्यापि समयः स्यादुपस्थितः ॥ ३१ ॥ भाद्र शुक्ल तृतीयां हस्तार्क्षे
सोमवासरे ॥ तद्व्रतं सर्वथा कार्य्यं नारीभिः पुरुषैरपि ॥ ३२ ॥ सोद्यापन व्रतङ्कृत्वा भाग्यम्प्राप्नोति मानवः ॥ व्रतरत्नमि
ति प्रोक्तं तद्व्रत कमलानने ॥ ३३ ॥ मयापि क्रियते बाले तस्मिन्काले त्वयापि तत् ॥ अवश्यमेव कर्तव्यम् तेन स्याद
क्षयं सुखम् ॥ ३४ ॥ इति तद्वचनं श्रुत्वा सा सन्तुष्टा कुमारिका ॥ व्रतकालमनु प्राप्य चकार व्रतमादरात् ॥ ३५ ॥ पश्चा
त्परिणयोत्साह समेता सा कुमारिका ॥ भर्त्ता मे शंकर श्रेष्ठो ~~वीर~~ वीरश्चास्त्विति सादरात् ॥ ३६ ॥ ततः पं सराजा
पि सर्व सौभाग्य संयुतम् ॥ वरन्द्रष्टुं समुद्युक्तः चिन्ता व्याकुल मानसः ॥ ३७ ॥ वरश्च सं शांकरो धीरः सर्व सौभाग्य
संयुतः ॥ वरो दुर्लभ इत्येवाचिन्तया प्राह कन्यकाम् ॥ ३८ ॥ राजोवाच ॥ बाले भूमण्डले कोऽपि पञ्चरेफ समन्वि
तः ॥ न लभ्यते वरः किं वा कर्त्तव्यमधुना वद ॥ ३९ ॥ उदारः शांकरो वीरः सुंदरः श्रीकरोऽपियः ॥ वरोति दुर्लभो

२५९

शिवरह०
~~२२६~~
२२७

लोके किं कर्तव्यमतः परम् ॥१४०॥ क्वचित्क्वचिद्गुणः कश्चित् कश्चिद्दतस्तथा ॥ नपञ्चैक संयुक्तः चरोदृष्टि पथं मतः ॥४१॥ इति तद्वचनं श्रुत्वा सा कन्याखिन्नमानसा ॥ व्रतस्य महिमा कोवा नस्येत्याह स्वमातरम् ॥

~~विमल उवाच~~
~~राजोवाच ॥ बाले भ्रमस्य... पञ्चैक समन्वितः ॥ ... किं वा कर्तव्यमधुना वद ॥४२॥~~

विमल उवाच ॥ बाले व्रतस्य महिमा भूयानेवाभितिष्ठति ॥ तत्साङ्गं यदि तर्हि स्यात्फलं सर्वमपेक्षितम् ॥ यतः साङ्गानि कर्माणि सर्वाणि फलदान्यतः ॥ अङ्गहीनेन न फलं कर्मणेत्यवधारय ॥४३॥ तत्र तावत्प्रसूनानि विविधान्यपि निष्फलान्यपि ॥ भक्त्या संपादनीयानि स्वहस्तेन विशेषतः ॥४४॥ अशक्यमिदमेतावत्तथा जागरणादिकम् ॥ अतः कथं वा सफलं कर्म तत्स्याद्ददाधुना ॥४५॥ विधियुक्तकर्मणा तावत्फलं भवति सर्वथा ॥ तत्र वैगुण्य शंकापि यदि स्यात् किं फलं तदा ॥४६॥ इति तद्वचनं श्रुत्वा सापि बाला मनोरमा ॥ कोवा गुरुर्मया प्राप्यः केन साङ्गं व्रतं भवेत् ॥४७॥ ~~इति तद्वचनं श्रुत्वा~~ कथं स्यात्फलावाप्तिः रिति चिन्ता समन्विता ॥ ययौ सुरसरित्तीरे सखी निकर सम्वृता ॥४९॥ तत्र स्नात्वा महादेव प्रयागेश्वर पूजनम् ॥ चकार भक्ति निरता रुद्राक्षकर कङ्कणा ॥१५०॥ तदा तल्लिङ्ग पूजार्थं गङ्गा स्नानादि वासनः ॥ भृगुः समागतस्तत्र भक्ति रुद्राक्ष भूषणः ॥५१॥ स समागत्य तत्रैवम् बिल्वपत्रादि

ह० त० ड०
अ०४१

भिर्मुदा ॥ पूजयित्वा प्रणम्यापि प्रविष्टः स्वकुशासने ॥ ५२ ॥ तमुवाच प्रणम्याथ भृगुं राजकुमारिका ॥ प्रसन्नवदनम्
शान्तम् शिवनाम जपोत्सुकम् ॥ ५३ ॥ राजकन्योवाच ॥ केन वाञ्छित सिद्धिः स्याद्भृगो शांभव पुंगव ॥ तन्मे वद विचार्याद्य
येन स्यात्सुख मक्षयम् ॥ ५४ ॥ भृगुरुवाच ॥ सौभाग्यदं व्रतं लोके नारीणां श्लाघितं खलु ॥ तद्व्रता चरणेनैव सर्वसिद्धिर्भवि
ष्यति ॥ ५५ ॥ तदम्बया कृतं पूर्वं शंकरोक्त विधानतः ॥ सा सर्वमङ्गला जाता तद्व्रताचरणाच्छिवा ॥ ५६ ॥ तद्व्रताचरणेनैव दग्ध्वा त्रिपुर
काननम् ॥ महेश्वरेण तेनैव कृतस्त्रिजयस्तदा ॥ ५७ ॥ नारायणादयः सर्वे प्रचण्ड नगराग्निना ॥ दग्ध्वा अपि समुत्पन्नाः कमला कृततद्व्र
तात् ॥ ५८ ॥ ऋषयोऽपि समुत्पन्नास्तद्व्रता चरणात्परम् ॥ असुरोदर संक्रान्तास्तत्कलत्र कृतात्पुरात् ॥ ५९ ॥ अन्येऽपि ये मृताः पूर्वं
तत्तद्व्रत प्रवि विशेषतः ॥ सम्प्राप्त जीवनाः सर्वे तद्व्रतं हि महत्तरम् ॥ ६० ॥ सर्व सौभाग्यदं पुण्यं नादेव व्रतमुत्तमम् ॥ तेन वाञ्छित सिद्धिः
स्यान्नात्र कार्या विचारणा ॥ ६१ ॥ व्रतं सौभाग्य दत्वेन प्रसिद्ध नङ्कुरानने ॥ सांगं कुरु विधानेन तेन सिद्धिर्भविष्यति ॥ ६२ ॥ परश्वो
हस्तनक्षत्रे तृतीया सोमवासरे ॥ शुक्ले भाद्रपदस्यास्य तद्व्रतं शुभदायकम् ॥ ६३ ॥ इति तद्वचनं श्रुत्वा सापि सन्तुष्टमानसा ॥
तेनोपदिष्टा गुरुणा महता करुणात्मना ॥ ६४ ॥ ततस्तदुक्त मार्गेण तत्रैव नृप कन्यका ॥ सांगं व्रतञ्च कारायु सोद्यापनमनामय
म् ॥ ६५ ॥ ततः परं ययौ सापि मुदा जनक मन्दिरम् ॥ सन्तुष्टा न्तामुवाचाथ स राजा स्वकुमारिकाम् ॥ ६६ ॥ राजोवाच ॥

450

किं वा व्रतन्त्वया चीर्णं मययेन तवाधुना ॥ प्रहृष्ट हृदयश्चेदं वदेति प्रीति मानसः ॥ ६७ ॥ कन्यकोवाच ॥ शृणु तावद्यथोक्तं सौमङ्ग
ल्य व्रतम्मम ॥ तत्कृत न्तेन सन्तुष्टः वाञ्छितो मे भविष्यति ॥ ६८ ॥ इति तद्वचनं श्रुत्वा सोऽपि सन्तुष्टमानसः ॥ तद्द्वारा आपि सन्तुष्ट
स्तथास्त्विति सुता अपि ॥ ६९ ॥ तदानीन्तद्व्रतेनैव सन्तुष्टः शंकरोवरम् ॥ विचार्य प्रेषयामास किन्नरं सर्व सुन्दरम् ॥ ७० ॥ ततः स
सर्व सौभाग्यैः संयुतः प्रययौ मुदा ॥ प्रयागमेव बहुभिः किन्नरैरपि संयुतः ॥ ७१ ॥ ततः स्नात्वा स गंगायां प्रयागेश्वर पूजनम् ॥
कृत्वा विल्वादिभिः सम्यक् गंगातीरे चचार च ॥ ७२ ॥ तदानीं सा वरारोहा रत्न प्रासाद मण्डपे ॥ आरुह्य स्वसखी युक्ता तन्ददर्श
च किन्नरम् ॥ ७३ ॥ दिव्य न्तुरंगमारुह्य प्रेरयन्त मति सुन्दरम् ॥ धावन्तमति धैर्य्येण किन्नरं वरमुत्तमम् ॥ ७४ ॥ तं विलोक्यातित
सुभगः कोऽयमत्यद्भुतो मया ॥ दृष्टो नास्य किं रूप मीदृश न सुरस्य वा ॥ ७५ ॥ एतादृशो यदि वरो वृत्तः स्याद्भाग्यमुत्तमम् ॥
~~तं विलोक्याति सुभगः कोऽयमत्यद्भुतो मया ॥ दृष्टो नास्य किं रूप मीदृश न सुरस्य वा~~ पञ्च रेखाकरः सोऽयं वर लक्षण संयुतः
॥ ७६ ॥ अयं सुरो वा गन्धर्वः किन्नरो वा विचार्य्य ताम् ॥ यद्वा पञ्चसरः सोऽयं सर्व सौभाग्य संयुतः ॥ ७७ ॥ एवं विचार्य्य सा चित्ते प्राह
मातरमादरात् ॥ पश्यैतं भाग्य वन्तं सकोवा तं विचारय ॥ ७८ ॥ इति तद्वचनं श्रुत्वा माता प्राह विचक्षणा ॥ अपि बाले न
रो नायं सुरश्चापि किन्नरः ॥ ७९ ॥ यद्वा गन्धर्व एवायं गङ्गातीरे मनोहरे ॥ ईदृशो न नरः कोऽपि दृष्टोवा न श्रुतः खलु ॥ ८० ॥

अथापि तावदधुना चारद्वारा विचार्यताम् ॥ कोऽयमित्यधुना राज्ञे निवेद्य परं परम् ॥ ८१ ॥ इति तद्वचनं श्रुत्वा सा तामाह विच

क्षणा ॥ बाले त्वयैव वक्तव्यं कोऽयमित्यपि सादरम् ॥ ८२ ॥ ~~एवञ्चिन्ता समाक्रान्तं तम्विलोक्याति विस्मिता ॥ तेऽपि चाराः परं~~ ततः परम् ॥

~~भूपं सा विचाराः समागताः~~ ॥ ८२ ॥ इति तद्वचनं श्रुत्वा स राजान्तिकं ययौ ॥ तमाह तस्य वृत्तान्तं स तमाह विचक्षणा ॥ ८३ ॥

मया विचार्यते बाले तादृशः क्लिष्टो भवेत् ॥ यो शीघ्र्य वासुरो वास्यातस कथं ना वरो भवेत् ॥ ८४ ॥ इत्युक्त्वा प्रेषयामास चारान्

बहुविधान्स्वकान् ॥ तद्वृत्तान्त विचारार्थं निपुणानति कोविदः ॥ ८५ ॥ ते गतास्तस्य निकटे तदा सोऽपि विलोक्य ताम् ॥ प्रस

प्रासाद शृङ्ग मध्यस्थां नददर्शान्य मागतम् ॥ ८६ ॥ स किन्नरो विलोक्याशु तामेव मदनातुरः ॥ तत्संगमोपाय चिन्तां चकार

नितरामपि ॥ ८७ ॥ कथं वा सा समायाति तुङ्गप्रासाद संस्थिता ॥ मया वा तत्र गन्तव्यं कथं वा राजमन्दिरे ॥ ८८ ॥ प्रेरितः

शङ्करेणाहं तत्परिग्रह वाञ्छया ॥ तत्पाणिग्रहणं केन साधनेन भविष्यति ॥ ८९ ॥ एवञ्चिन्ता समाक्रान्तं तम्विलोक्याति विस्मि

ताः ॥ तेऽपि चाराः परं भूपम् सा विचाराः समागताः ॥ ९० ॥ ततस्तेन तस्य चिह्नानि निवेद्याशु यथार्थतः ॥ सन्तुष्टस्तन्नृपश्च

कुः वरः प्राप्तोऽयमित्यपि ॥ ९१ ॥ ततः सोऽपि वरारोहां दृष्ट्वा किन्नरविग्रहां ॥ तद्विलोकन संसक्तां नान्यालोकन तत्पराम् ॥ ९२ ॥

तदानीमागतो राजा स्वकन्यानिकटं तदा ॥ किन्नरालोकनोत्सुक्य जनकं न ददर्श सा ॥ ९३ ॥ तमायान्तीं विमलान्तदा-

लोकन तत्परम् ॥ दृष्ट्वा सरित्तटमायामितैः परिजनैः सह ॥ ९४ ॥ बाला विलोक्य रतं दृष्ट्वा किन्नरमादरात् ॥ प्राह कोऽसीति तं राजा प्रहृष्टहृदयस्तदा ॥ ९५ ॥ किन्नर उवाच ॥ किन्नरः शंकरेणैव प्रेषितोऽहमिहाधुना ॥ मया समर्चितः पूर्वं सौमङ्गल्य व्रतेन सह ॥ ९६ ॥ इति तद्वचनं श्रुत्वा राजा सन्तुष्टमानसः ॥ किन्त्वया दृष्टमधुना तद्वदेत्याह सादरम् ॥ ९७ ॥ किन्नर उवाच ॥ विद्युल्लता मया कापि मयाऽद्य दृष्टा ॥ प्रासादशृङ्गोज्वलमण्डलस्था ॥ ९८ ॥ तद्दर्शनासक्तमिदं मनो मे सादृष्टपूर्वा न मया कदापि ॥ ९९ ॥ सापि प्रपश्यत्यधुना मनोज्ञा मामेव योगो भविताऽपि नूनम् ॥ महेश्वराराधनजं विचित्रम्फलं यतः स्यादिति निश्चयो मे ॥ ९९ ॥ इति तद्वचनं श्रुत्वा तथास्त्विति महीपतिः ॥ सा तस्मै कन्यकां दत्त्वा वरश्रेष्ठाय धीमते ॥ ॥ २०० ॥ तत्पाणिग्रहणेन सोऽपि परमानन्दाम्बुराशिं श्रुतो ॥ राजाप्यम्बु युतो नृप सती तत्कन्यकापि प्रियम् ॥ सम्प्राप्य प्रमुदान्विता शिवपदाम्भोजार्चनस्येदृशं ॥ सौभाग्यं महदित्यपूर्वविभवं सस्मार सा तद्व्रतम् ॥ २०१ ॥ सौमङ्गल्यविवर्धकं व्रतमिदम् सौभाग्यवृद्धिप्रदम् ॥ श्रोतृणामपि वाञ्छितार्थदमिदम् सा तेव कुर्वन्ति ये ॥ तेनैवाद्भुत भूरिभाग्यमतुलम् सम्प्राप्य जन्मान्तरे ॥ अन्ते व्युत्क्रम्य शिवाश्रया शिवपदं यान्त्येव देवार्चिताः ॥ २०२ ॥ इति श्रीशिवरहस्ये हरारव्ये तृतीयांशे उत्तरार्धे रत्नाकर पुण्यकीर्ति सम्वादो नामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥ श्री काम्पी

विश्वेश्वरार्पणमस्तु ।। रत्नाकर उवाच ।। इति तद्वचनं श्रुत्वा सापि सन्तुष्टमानसा ।।। सत्यव्रतमुवाचेदं वचनं
प्रीतमानसा ।।१।। पंचाक्षरार्थ कथन प्र भवं प्रसंगा देतादृशं व्रतमुदीरित मिष्टसिद्ध्यै । नित्य व्रत
वदविशेषतरावमह्यं तद्वत्सरे खलु सक्रियते विशिष्य ।। इति तद्वचनं श्रुत्वा विलोक्य स्व सतीं
द्विजः ।। धन्यासी त्वादरेणोक्त्वा प्राह नित्यं व्रतान्तरं ।।३ ।। नारीणां च नराणां च नित्यव्रतमिहो-
च्यते ।। तच्छृणुष्व वरारोहे सर्वपाप हरं परं ।।४।। लिंगे शिवार्चनं नित्यं अचरे वा चरे अपि वा
।। कर्त्तव्यं बिल्वपत्राद्यैर्जलैर्वा विमलैर्नवैः ।।५।। तत्राधिकारोपि निभूति धारणो भवत्स्वयं
न विना पि तेन ।। रुद्राक्षमाला भरणोपि ताभ्यां विना शिवार्चापि कृतो न नूनं ।।६।।
शिवार्चनं पापहरं प्रकृष्टं तद्येन वा नूतनबिल्वपत्रैः ।। कृतं भवेन्नीरल्वैव चन्दनेन कृतानि पुण्या
न्यमितानि नूनं ।।७।। अवबुध्य मेषा शिवलिंग पूजाकार्या मया बिल्वदलैर्जलैर्वा ।।
तथा मया पापकुलानि नूनं विनाशनीयान्यनिशं सकृच्छ्रा ।।८।। इति निश्चित्य यो नित्यं करोति शिवपूजनं ।।
तस्य पापानि नश्यंति कृतान्यपि विशेषतः ।।९।। कृत्वा शिवार्चनारंभं कर्त्तव्यं तत्समापनं ।। यतः सम्मा-

समापनाभावे तस्य तेन फलं च न ॥ १० ॥ नारंभमात्रेणाशास्त्रार्थं किंत्वारब्धस्य कर्मणः ॥ समापनं तेन ताव त्फलमित्यवधारितं ॥ ११ ॥ कृते शिवार्चनोद्योगे यदि विघ्नकरो भवेत् । तदा तद्वारणं कार्यं तेन पूजाफलं लभेत् ॥ १२ ॥ अत्रैवोदाहरंतीममितिहासं पुरातनं ॥ शृणु भद्रे प्रवक्ष्यामि तं पापौघनिसंन्निभं ॥ १३ ॥ रेवा तीरे पुरा कश्चिद् राजा परम धार्मिकः ॥ शिवार्चन रतो नित्यं शिव पूजक पूजकः ॥ १४ ॥ स कृत्वा पूजनं शम्भो र्नर्मदातीरमाश्रितः ॥ अपारे रूप चौरैस्तैर्तावदतिदुर्ल्लभैः ॥ १५ ॥ ततः स राजा पूजांते शिवनैवेद्य मादरात् ॥ गृहीत्वा स सरितीरे च चारनिजलीलया ॥ १६ ॥ तदा दूरान्महादेव पूजानिरतमास्तिकं ॥ ददर्श नर्मदातीरे तरुगुल्म समावृते ॥ तदानीमागतः क्रूरः शार्दूलोपिपिपासया ॥ तम् ददर्शाति- दूरेण व्याकुलः समभूत्ततः ॥ १८ ॥ अयं करोति त्यत्र महेशपूजामे तस्य विघ्नो भविता द्विजोयं ॥ संरक्षणीयः खलु राजधर्मो यतो नराणां परिपालनं स्यात् ॥ १९ ॥ मनुष्यमात्रस्य विघातकानि निवारणीयानि शिवार्चकाय । निवारणीया नि विशेषतोत्र पूजापरो यं गिरिशस्य नूनं ॥ २० ॥ शिव पूजक दुःखवारणानां फलमीशार्चनमेव तेन दुःखं ॥ न भवत्यतः सुखदुःखनाशे प्रयत

स्तावदहं भवामि नूनम् ॥२१॥ अयन्तु पर्वताकारः शार्दूलोऽपि निवारकम् ॥ दृष्ट्वा मांपादघातेन हनिष्यति न संशयः ॥२२
पिपासयापीडितस्य कथङ्कार्य्यन्निवारणम् ॥ तदिदं संकरन्तावत्त्स्तन्निवार्यमुपागतम् ॥२३॥ तत्पिपासावारणाय शैवसंर
क्षणायच ॥ रक्षणाय ममाप्यत्र साधनन्दुर्लभंखलु ॥२४॥ एवं व्याकुलचित्तस्य सुतस्यत्वोऽपिभामिनि ॥ प्रासाद
वरमारुह्य तन्ददर्श पतिन्तदा ॥२५॥ व्याघ्रञ्च दूरादालोक्य शांकरं शिवपूजकम् ॥ राजानञ्च स्वभर्त्तारञ्ज्ञाता
व्याकुलमानसा ॥२६॥ त्रयाणां रक्षणोपायः कोवा तावत्सुदुर्लभः ॥ अतः परंविधेयं किंमयेत्यपिसमागता ॥२७
प्रसादादवरुह्याशु सखीजनसमावृता ॥ रथमारुह्य बहुभिर्भटैरपिसमावृता ॥२८॥ सासमागत्य राजानं प्राहाति
विनयान्मुहुः ॥ प्रणयादति यत्नेन कृताञ्जलिपुटा शुभे ॥२९॥ राजपत्न्युवाच ॥ कथमत्रागतं राजन् संकटं समुपाग
तम् ॥ त्रयाणां रक्षणंकेन साधनेन वदाधुना ॥३०॥ अयन्तु शाम्भवः श्रेष्ठः शिवपूजापरायणः ॥ रक्षणीयः प्रयत्नेन
तदुपेक्षा तु नोचिता ॥३१॥ तृषार्तोऽपि स शार्दूलः ॥ प्रतप्तो भानुभानुभिः ॥ अधुना तस्य हनने पापमेव प्रजायते
॥३२॥ एकएव न शार्दूलः सकुटुम्बः समागतः ॥ शिशुभिः सहतेप्यार्त्ताः शिशुस्तृषया नृप ॥३३॥ नचमा
र्गान्तरम्पश्य गिरिसानु समाकुलः ॥ अत्यल्प एव मार्गोऽयन्नपरावृत्य यान्ति ते ॥३४॥ अयञ्च युवती युक्तः

शांभवः शिवपूजकः ॥ प्रायशः शैलपत्नी सा गुर्विणी चलनाक्षमा ॥ ३५ ॥ समाप्यैतद्वृतं राजन् दीनानाम्परिरक्षणम् न कोऽपि रक्षणोपायो दृश्यते किं करोम्यहम् ॥ ३६ ॥ एवमुक्त्वा स्थिता तत्र सा राज्ञी भूपतिन्तदा ॥ तदानीं सापि सुषुवे कुमारं शैव भामिनी ॥ ३७ ॥ स कुटुम्बः सशार्दूलः तत्तीरं समुपागतः ॥ बालकस्य ध्वनिं रम्यं सुश्रावापूर्वमादरात् ॥ ॥ ३८ ॥ श्रुत्वा तं ध्वनिमप्याह शार्दूलः स्वसतीम्प्रति ॥ अयमश्रुतपूर्वोऽत्र शब्दस्तावदिहश्रुतः ॥ ३९ ॥ इति तद्व चनं श्रुत्वा साप्याह स्वपतिन्तदा ॥ मनुष्यनारी सा तावदधुना सुषुवे सुतम् ॥ ४० ॥ तत्र तावन्न गन्तव्यमस्मद्दर्श नमात्रतः ॥ भीतास्तावद्भविष्यन्ति मनुष्याः स्व स्वभावतः ॥ ४१ ॥ अस्मद्दर्शनमात्रेण तदिच्छा अपलायने ॥ भवि ष्यति न सामर्थ्यमधुना तु पलायने ॥ ४२ ॥ तद्वधार्थं नु नोद्योगो यद्यप्यस्माकमास्तिक ॥ तथापि भयदं रूपम् दृष्ट्वा भीता भवन्ति ते ॥ ४३ ॥ मार्गान्तरञ्च नास्माकं जलार्थं गमनेऽधुना ॥ आर्त्तिश्च तृषया तावद्बालानामपि जायते ॥ ४४ ॥ अहो महदिदं कष्टं प्राप्तं देहविसर्जनम् ॥ वरं न हारपीडा तु नरामित्यव धारितम् ॥ ४५ ॥ किञ्च रेवातटे लिङ्गा न्यपूर्वाणि तदर्चनम् ॥ कर्तुमायान्ति ते सन्त स्तावदेकान्तमित्यपि ॥ ४६ ॥ शिवपूजार्थमुद्युक्ते नारीभर्त्तरि सादरा उपचारप्रदानाय प्रायशः समुपागता ॥ ४७ ॥ ततः पतिव्रता सापि शैवस्य महिला ततः ॥ तद्दुःखदानमात्रेण

नरकः स्यादसंशयम् ॥ हर दुःख प्रदानेन व्याघ्ररूपमुपागतम् ॥ पुनस्तद्दुःख नाशेन दानेन नरकान्निर्गमः कथम् ॥ ४९ ॥ मरणं वा भवे
त्तत्र तवया परया परम् ॥ न शांभराय दुःखानि देयानीत्यवधारय ॥ ५० ॥ प्रायः शिवार्चनस्यापि कालोऽयं शाम्भवो यतः ॥ मध्याह्नेऽ
पि प्रयत्नेन करोति शिवपूजनम् ॥ ५१ ॥ शिवपूजासमारम्भे न विघ्नाचरणं मतम् ॥ तद्विघ्नाचरणापार पाप नाशः कथम्भवेत् ॥ ५२ ॥
न ब्रह्महत्यादिक पातकेभ्यः तथा भयं भावि यथा भयं स्यात् ॥ महेश्वराराधन विघ्नतोऽतः तद्विघ्नमात्रा न्नरके स्थितिः स्यात् ॥ ५३ ॥
महेश्वराराधन तत्परेभ्यो नैवोपकारः कृत एव तेन ॥ कुयोनि मार्गागमनं प्रसक्तम् अतो न तेषां भयदत्व मिष्टम् ॥ ५४ ॥ भक्त्यायो वचनै
र्जलैरपि शिवाचाराय तोषं प्रदो मुक्तो दोषणे भवत्यगणिते मुक्त्यङ्गना वल्लवः ॥ स्यादेवेति मुहुः श्रुतं मुनिवरै रुक्तं वचोऽस्मिन्व
ने किं न स्मर्यत एव संस्मर पुनः संस्कारमावर्त्तय ॥ ५५ ॥ अलन्देहेनालं विमल कुल शार्दूल वपुषाप्यलं दुःखं येन प्रभवति मुहुर्मोहमधु
ना ॥ विहायाङ्ग त्यागे कुरु मतिमतो भूतिमधुनादवोत्पन्नां काले कुरु कुरु महापातकहरम् ॥ ५६ ॥ इति तद्वचनं श्रुत्वा शंकरो द्विजपुंग
वः ॥ विस्मयं परमं प्राप तद्भार्यापि नव प्रसूः ॥ ५७ ॥ सुश्राव वचनं राजा स शार्दूलांगनोदितम् ॥ सुश्राव राजपत्नी च विस्मयावहमुत्तम
म् ॥ ५८ ॥ ततः परं नृपाक्रान्ताः शार्दूलास्ते परस्परम् ॥ प्रोचु र्विनाशकालोऽयमस्माकमिति निश्चयात् ॥ ५९ ॥ सम्यगेवाधुना
जातं शरीरं ह्लभस्मना ॥ पावनं, पावनं प्राप्तं रेवातीरं मनोहरम् ॥ ६० ॥ रेवातीरे तनुत्यागो यदि देवाद्भविष्यति ॥ तदापरम्

थीस्मः प्य

~~कृतार्थोऽस्मि~~ कृतार्थोस्मि किमितोऽधिकं फलम् ॥ ६१॥ रेवातीरे यः शरीरव्ययार्थं पूतो भूत्वा तिष्ठति धीति चित्तः ॥ देवैरादावर्चि तः स्यात्तदा स्याद्गौरीकान्ता राधकः स्यान्नरोऽपि ॥ ६२॥ पुण्यैरपारैः खलु शाम्भवत्वं तत्रापि रेवातट संश्रयत्वम् ॥ तत्रापि तल्लिङ्ग समर्चकत्वम् तत्रापि तद्देहविसर्जकत्वम् ॥ ६३॥ वदत्युच्चैरेवं भव भव भवांबोधित रणप्रवीणं कृत्वा मामव भव भवानीरमणमे क्षणैः प्राणाहारं हरहर हरापारकरुणा रसाकारासारं हरहर स संसारनिकरम् ॥ ६४॥ अतः परञ्जन्म शतान्तरेवा रेवासरित्ती रतरुप्ररोहः ॥ भवामि संसार भयानलार्त्त कृतान्त वार्त्ता वृत्तमान सार्त्तः ॥ ६५॥ जन्मावसान समयोऽपि समागतोऽयं काय व्ययोत्तर मतः परमिन्दुमौलिः ॥ रेवासरित्सलिल यात विधूत पापानस्मान्स्वपाद कमलालि कुलान्करोतु ॥ ६६ न रेवातीरेऽस्मिन्किमिति तनु नाशो विभवतीत्युमाकान्तं स्मृत्वा पुनरपि महादेव हरमाम् ॥ हरेत्युक्त्वा त्युच्चैस्त्यज तनुमिमां भूति ललितां कथं जन्मापाये भसित तनु योगोऽपि सुलभः ॥ ६७॥ इति तद्वचनं श्रुत्वा सञ्चरत्गगनान्तरे ॥ नर नारदस्तानुपागत्य शार्दूलान्प्रणतो मुदा ॥ ६८॥ ततस्तानाह स मुनिः विस्मयं परमङ्गतः ॥ शार्दूलान्मरणोद्युक्तान्कम्प नानव
मानो नराननने ॥ ६९॥ नारद उवाच ॥ पूर्वजन्मनि के यूयं परमज्ञान संयुताः ॥ केन पापेन सम्प्राप्तं शार्दूलवपुरीदृशम् ॥ ७०॥ अति पुण्यवतामेव रेवातीरसमागमः ॥ तत्रापि शिवभक्तिर्या सा पुण्यगिरिकोटिभिः ॥ ७१॥ येन पुण्यान्यपा

राणि कृतान्यमितजन्मभिः ॥ तेनैव प्राप्यते भक्तिः सुराधीशे महेश्वरे ॥ ७२ ॥ कुर्वन्त्यत्र तपश्चर्य्यां शिव भक्त्यर्थमादरात्
कोटिशो नर्मदातीरे निराहाराः परं सुराः ॥ ७३ ॥ शिव भक्ति सुधा लाभो दुर्लभः खलु देहिनाम् ॥ अपार जन्म सुकृतैः
शिव भक्तो भवेद्भुवि ॥ ७४ ॥ शांकराचार निरताः शांकराः शंकरप्रियाः ॥ अतो न तत्समो लोके कोऽपि दृष्टः श्रुतो
पि वा ॥ ७५ ॥ तृणीकृत्य शरीराणि स्थितं मरण कांक्षया ॥ रेवातीरे भवद्भिस्तु भवत्तुल्यः सुरोऽपि किम् ॥ ७६ ॥ दव
भस्माङ्कितः तद्गत्वा शरीरमधुना कथम् ॥ अकस्मात्त्यक्तुमुद्युक्तं भवद्भिर्भव विह्वलैः ॥ ७७ ॥ इति नारद वाक्यानि
श्रुत्वा दूरेण भूपतिः ॥ समागतः सतीयुक्तः कौतुकालोकनोत्सुकः ॥ ७८ ॥ तत्रोपविष्टास्ते सर्वे छायायामति विस्मि
ताः ॥ ततः परं सर्वशैवोऽपि त्वरया समुपागतः ॥ ७९ ॥ प्रणम्य तानुवाचादौ तृषार्तान्सदयो द्विजः ॥ भस्मोद्धूलित सर्वा
ङ्गाञ्छार्दूलमरणोन्मुखान् ॥ शाम्भव उवाच ॥ अयं मध्याह्न समयो रेवायां शिव पूजनम् ॥ कर्तव्यमादौ वार्त्ता
पि पश्चात्संभाविता खलु ॥ ८१ ॥ पिपासवो बालकाश्चैते शुष्क रसना अपि ॥ तत्राभ्यागमने कालो भूयानेवाभ
वत्खलु ॥ ८२ ॥ इति तद्वचनं श्रुत्वा नारदेनापि संयुताः ॥ रेवायां गन्तुमुद्युक्तास्तथाहुः शैव पुङ्गवम् ॥ ८३ ॥ शार्दूल
उवाच ॥ नव प्रसूता महिषी तव शांभव पुंगव ॥ तस्याः स्पर्शं परित्यज्य महिषीं तव स्पृशाम्य ... तस्याः स्पाद्दूप मस्माक न्दर्शनादिति सत्वरम् ॥ ८४ ॥ ततस्ता

नाहं शैवोऽपि तथैव प्रेषितोऽस्म्यहम् ॥ तमालकुञ्जसंगीता प्रस्तर द्रुमशोभिता ॥ ८५ ॥ शृणोति वचनान्येव मधुराण्यपि सादरम् ॥ भवतान्नयना प्राक्षप्या साकुञ्जापि हिताय सः ॥ ८६ ॥ किञ्च सापि हिता वास्तु मास्तु वा किन्ततः फलम् ॥ धातुकूलमतिस्तावन्न भवत्सु प्रजायते ॥ ८७ ॥ इति तद्वचनं श्रुत्वा रेवां गत्वापि सत्वरम् ॥ निमज्ज्य भस्मनाङ्गानि चक्रुर्लिप्तानि सादरम् ॥ ८८ ॥ ततः परं प्रयत्नेन रेवालिङ्गेषु सादरम् ॥ दत्तञ्जलं बिल्वपत्रसमेतमतिभक्तितः ॥ ८९ ॥ ततः प्रदक्षिणीकृत्य प्रणम्य च पुनः पुनः ॥ जलग्रहणमाकण्ठं कृतमेनाति तृष्णया ॥ ९० ॥ तान्विलोक्य सराजापि नारदोऽपि सशम्भवः ॥ परमाश्चर्यसंयुक्तः किमेतदिति निश्चयात् ॥ ९१ ॥ ततः परं सराजापि तत्तीरं शैलमन्दिरम् ॥ ययौ शार्दूलसंयुक्तो नारदेनापि संयुतः ॥ ९२ ॥ तत्रोपविष्टस्तानाह नत्वा शंकरमादरात् ॥ के यूयमिति यत्नेन शंकरध्यानपूर्वकम् ॥ ९३ ॥ शार्दूल उवाच ॥ अहं पूर्वभवे राजन् तुषारगिरिसंस्थितः ॥ तस्य देशस्य राजाहं महदैश्वर्यसंयुतः ॥ ९४ ॥ शिवपूजारतो नित्यं कदाचिद्विजनीमुखे ॥ दृष्टा स्नानोद्यता भार्या सम्पूर्णनवयौवना ॥ ९५ ॥ तदा पञ्चशरावेशात्तदालोकनसम्भ्रमे ॥ ममाह सांऽति युवती शिवाराधनतत्परा ॥ ९६ ॥ अहो नृप वराद्यायं प्रदोषः सोमवासरे ॥ भूताकामान्वितःपातः शिवनक्षत्रसंयुतः ॥ ९७ ॥ माघमासेऽप्ययन्तावत् असितः पक्ष इत्यपि ॥ न स्नातः किन्त्वया तावद्राजसोऽसि न संशयः

॥९८॥ अहो महदिदं पापं कर्तुमभ्युद्यतो मया ॥ सुधामयोऽयं कालोऽतः काल कालं समर्चय ॥ ९९ ॥ दुर्लभः खलु देहोऽयं कालोऽयमति दुर्लभः ॥ १०० ॥ बहु पुण्य प्रभावेन समयोऽयं हि लभ्यते ॥ किं किं पुण्यं कृतं पूर्वम् पूर्वे पूर्वे भवे मुहुः ॥ १ ॥ न जाने समयः प्राप्तः सोऽयमीशार्चनाय मे ॥ वाञ्छन्ति मुनयस्तावत्कालमेतादृशं सुराः ॥ ॥ २ ॥ गन्धर्वाः किन्नराः सिद्धाश्चारणा अपि सर्वथा ॥ इतोऽधिकः पुण्य कालो न भविष्यति सर्वथा ॥ ३ ॥ एतत्समोऽपि नास्त्येव पुण्यकाल इति श्रुतम् ॥ ॥ किन्तैर्वा ग्रहणार्धोदै रपि तथा किन्तैरपारायनैः ॥ एतत्काल समो न काल इति श्रीमे धीरागमैर्जायते ॥ तस्मादर्चय शंकरं बहुविधै द्रव्यैरपारैः स्वयं कालो दुर्लभ एव तावदधुना कायोऽप्ययन्दुर्लभः ॥ ४ ॥ कल्पास्ते बहवो गता अपि तथा कल्पेषु तेषु प्रियः ॥ कालोऽयं शिव पूजनस्य न गतो यस्मिन् समभ्यर्चितः ॥ ५ ॥ दास्यत्येव परः लिंगं गिरिजया साकं कुचे द्यास्यति ॥ श्रीमृत्युञ्जय इत्ययेमि समयः तस्मादयन्दुर्लभः ॥ ६ ॥ सम्भाषणेनापि रुचिः कुतः स्यादयं शिवाराधन काल एव ॥ प्रयाहि गेहात्परतः प्रयाहि चेटी कुटिंवा विटं वाटिकां वा ॥ ७ ॥ इत्युक्त्वा विरता सापि सम्भाषण पराङ्मुखा ॥ मह्यं शापस्तयादत्तः शार्दूलस्त्वम्भवेत्यपि ॥ ८ ॥ ततः कामातुरेणैष चेटी संसेविता मया नाराधितो महादेवो नार्चितोऽप्ययं त्रिलो-

शिवरह॰
२२२
२३४

ह॰ त॰ ३
अ॰ ४२

कित: ॥११०॥ चेटी गर्भे समुत्पन्ना: सुता अपि मदन्वयात् ॥ स एवाहमहं पापि शिवपूजा पराङ्मुख: ॥
॥११॥ शार्दूल देहमापन्न:, सेयं चेटी ममप्रिया ॥ एते बाला: सुता: सर्वे शार्दूलत्वमुपागता: ॥१२॥ मोहेन
पापाचरणा दुष्ट योनिमुपागता: ॥ दु:खं चैतेन पापेन प्राप्यते सत्यमुच्यते ॥१३॥ तद्देहाविगमे जाते यमदूतै:
समागतम् ॥ आगता: पादघातेन ते सर्वे ताडनोद्यता: ॥१४॥ रे रे त्वया शिवदिने शिवपूजनानि त्यक्तानि
तानि शिवदान्यपि मुक्तिदानि ॥ तत्यागजातफलमेतदिति ब्रुवन्त: पादाभिघात निकरं परित: क्षिपन्ति
॥१५॥ तप्तायसाकार नखांकुशानां संघै: शरीरञ्च विदीर्णमेव ॥ तत: पन्नीतमध्ये घोरमध्ये निक्षि
प्तमाशु ज्वलनैश्च तप्तम् ॥१६॥ तत: परं कालमुपागतोऽहं तैरेवघातै: कुलिशाभिघातै: ॥ कशाभिघा
तैरति पीडितं मां ददर्श काल: कुपितोऽति तीव्रम् ॥१७॥ तत: परं चित्रगुप्तं प्राह गम्भीरयागिरा ॥ कृत
म्पातकमेतेन कृतं किमति चिन्तय ॥१८॥ चित्रगुप्त उवाच ॥ अनेन माघासित भूतरात्रि नीताशु चेटी पट्
चुम्बनाद्यै: ॥ तिरस्कृतोऽयं रजनीमुखेऽपि स्व भार्यया शंकरपर्ययार्थम् ॥१९॥ यस्मिन्काले विश्वना
थार्चनाद्यै रानन्दाब्धि वर्धते पुण्यसंघै: ॥ सार्क तामिन्पापराशी: प्रवृद्धो चेटीवारी वीटिकास्फोर

नाद्यैः ॥१२०॥ अनेन पुण्यानि पुरा कृतानि यावान्ति तावान्ति लयं गतानि ॥ भूताव्रत त्यागत एव पश्चात्प्रा
प्तान्यपाराण्यपि पातकानि ॥१२१॥ अहो धृतं पुण्यमनेन तावद्यावन्न केनापि कृतन्तथापि ॥ तावद्दिनद्व
म् शिवरात्रि काल शिवार्चन त्यागत एव सत्यम् ॥ २२॥ अहो शिवार्चन त्यागं पुण्याद्रिकुलिशं विदुः॥
पुण्यारण्य दवं प्राहुर्वेद वेदान्तपारगाः ॥२३॥ नवनीतागिरिर्यथानलात्प्रलयं याति तथैव सर्वथा ॥
सुकृताद्रिलयोऽपि जायते शिवपूजा विरहाद्विशेषतः ॥२४॥ सिकतामित पर्वतक्षयः सरितां कालयथा
तथा परम् ॥ सुकृताद्रि लयोऽपि जायते० ॥ २५॥ प्रलयानल सङ्गमाद्यथा विलयं याति धरा तथा परम् ॥
सुकृताद्रिलयोऽपि० ॥२६॥ शरत पीत लयेयथा जनाः प्रलयं यान्ति ~~तथैव सर्वथा~~ नदीरयैस्तथा ॥ सुकृ
ताद्रिलयोऽपिजायते शिव पूजा० ॥ २७॥ शुष्यन्त्यघांभोनिधयः क्षणेन नश्यन्त्यपारापद कालमे
घाः ॥ भूता निशायां शिवपूजनेन तत्केन पुण्येन समं वदामि ॥२८॥ भूतायां निशि बिल्व पल्लवमुमा
कान्ताय लिङ्गे मुदा ॥ दातुं वाञ्छति यः स एव सुकृतां ~~नो~~ भोधिः सपुण्याकृतिः ॥२९॥ भूतायाव
द्दुपैति तावदुभयं पापाम्बुराशिर्भवेत् ॥ साचेदन्तिकमेति कम्पमतुलं प्राप्नोति पापार्णवः ॥३०॥

श्रीवर० हि०त०अ०
२२४ अ०४२
२३५

किं कर्तव्यमतः परं लानिलयः कोऽपीति वेगात्परं यात्येवाशिव पूजकं शिवरते आते स्वान्चित्ते सति ॥ नूनं भूतशिवार्चनस्य न फलं वक्तुं समर्थो भवेत् वेदोऽपीति चतुर्मुखोऽपि बहुधा नारायणो वा यम ॥ क्रोधो वा गुरुरेव वास महिमा वाचां किलागोचरः शंकामेन स शंकरोऽपि साक्षीनो वक्तुं करोति ध्रुवम् ॥ ३१ ॥ किं वर्णयामि यम भूत निशा शिवार्चापुण्याब्धि शक्तिमिह मुक्तिमियं ददाति ॥ मुक्तिश्च देहविलये सति देहमन्यन्नास्तीति सा बहु विचाररतापि नूनम् ॥ ३२ ॥ एवं ब्रुवन्तमसकृत्स्व यमो यमोऽपि दृष्ट्वा तच्चित्रगुप्त मसितेतर भूति भूषम् ॥ रुद्राक्ष कङ्कण करं शिवलिंग हस्त मानन्दजाश्रु नयनं प्रणतो बभाषे ॥ ३३ ॥ यम उवाच ॥ धन्या कृता सभा सेयं त्वया धन्येन केवलम् ॥ अहञ्च न्यः कृतो मान्यः शिवाराधन वाग्रसैः ॥ ३४ ॥ भो चित्रगुप्त शिवपूजन पुण्य शक्ति वार्त्ताविशेष कथनेन सुधा न तुल्या ॥ सा तृप्तिमात्र करणं, नरकाद्रि नाशं कृत्वा करोति खलु मुक्तिमपि स्वहस्ते ॥ ३५ ॥ धन्योऽसि त्वमुमासहाय चरणांभोजार्चनात्पादरौ हारोहार विहार वर्णनरतो हारोपहारादरः ॥ व्याहारैरपि हार कीर्त्तिकृपना विष्टैः प्रकृष्टे मुहुः तुष्टोऽहं पूर्णापि वि... प्रकीर्त्ति

२१०
२०५०

शिवरह० सुधया पुष्टोऽपि कष्टक्षये ॥३६॥ एवमुक्त्वा स्थिते तत्र यमे केचिदुपागताः ॥ मेचकाचल संकाशाः ह० त०
२३५ तप्तायस संहताः ॥३७॥ प्रदग्ध बाहुदण्डाश्च दग्धमुण्डाश्च कोटिशः ॥ संदग्ध करपादाश्च रक्तधा अ०४
रासमावृताः ॥ पूय प्रवाह संवीताः कुर्वन्तो रोदनं मुहुः ॥ पिबन्तोऽथ पूय संवीतां पूयधारां क्रिमिमिश्रि
ताम्बुन ॥ तान्दृष्ट्वा सभयग्रस्तो यमः प्राहाति विस्मितः ॥ चित्रगुप्तं विलोक्यापि केन ते वद ममेत्यपि ॥१४०
चित्रगुप्त उवाच ॥ मयाऽसित चतुर्दश्यामेते मुक्तं दुरात्मभिः ॥ आशिवाराधकैरेते नाराधि गिरिजा
पतिः ॥१४१॥ न लिङ्गं शिव पूजायामर्चितं बिल्वपल्लवैः ॥ एतैः पापरतैर्दृष्टानि हतैः समुपागतैम् ॥
॥४२॥ आशिवाचाररता ते सर्वेऽपि यमाधुना ॥ पातनीयाः प्रयत्नेन तप्तपूय सरिद्वरे ॥४३॥ सन्त-
प्तशोणिताम्भोधि रेतदर्थं विनिर्मितः ॥ ~~सन्तप्त शोणिताम्भोधिरेतदर्थं विनिर्मितः~~ ॥ सन्तप्त मूत्र कूपाश्च
दीर्घिकाश्च विनिर्मिताः ॥ सन्तप्त मल वाहिन्यः तदर्थं किल निर्मिताः ॥४४॥ सन्तप्त शस्त्रागिरयः तत्रापा
यविनिर्मिताः ॥ कल्पावसानेऽपि न मुक्तिरेषां द्रोषाकराणामशिवार्चकानाम् ॥ सृष्टिश्च तावन्नरका
र्णवानां प्रपूरणायेति मतिर्ममैषा ॥४५॥ कष्टान्यपराणि भवन्ति तेषां येषाम्प्रदोषेन शिवार्चनेच्छा

तत्रापि भूतायदि सासितान्यामाप्नीसपातापि शिवोडुयुक्ता ॥ सामान्यावाथापि भूता सितान्यामा
षी तस्यां योऽपि मोहेन भुङ्क्ते ॥ तस्या पारायातना स्यादवश्यं सत्यं सत्यं विश्वनाथे शपामि ॥४८॥
इति तद्वचनं श्रुत्वा स यमः प्राह किङ्करान् ॥ नेनास्ते त्वरया दूरे घोरेषु पतन्तु ते ॥४९॥ इति तद्व
चनं श्रुत्वा स यमः प्राह किङ्करान् । क्रूरास्ते यमकिङ्कराः ॥ नीत्वा तान्यातयामासुस्तत्रामेध्यह्रदा
दिषु ॥१५०॥ ततः परन्तत्र भृगुः समागतो भूत व्रताचार विशुद्धचित्तः ॥ विभूति पूतो भासित त्रिपुण्ड्रो
रुद्राक्षमाला कलितः सहारः ॥१५१॥ तन्दृष्ट्वा शाम्भव श्रेष्ठं भृगुं भूति विभूषितम् ॥ रुद्राक्षमालाभर
णः प्रणतः सम्यगो मुदा ॥१५२॥ शिव शंकर पार्वती पते गिरिशेशान महेश पाहि माम् ॥ इति नाम सुधा
रसं मुहुः कलयन्तं तमुवाच चारु कालः ॥१५३॥ यम उवाच ॥ भृगो तत्त्वविदां श्रेष्ठ वेदवेदान्त पारग ॥
शिवध्यान सुधापान पीन मानस ते नमः ॥५४॥ धन्यस्त्वदभ्यागमनेन नूनं स्थलं पवित्रम्
कृतमेतदद्य ॥ गात्रं पवित्रं मम जातमेव श्रोत्रं सनेत्रं मम तत्र मद्य ॥५५॥ अपार पुण्यामरभूरुहास्ते
फलोन्मुखा एव न संशयोऽत्र ॥५६॥ यतः शिवाचाररतस्य तावत्तवाधुना यागमनं प्रसक्तम् ॥५६॥

अतः परन्तावदिदं विचार्य्य धर्म स्वरूपं वद सावधानम् ॥ निर्मथ्य वेदार्णव मद्य पूर्णं स्मृत्याप्यपर्णा रमणं क्षणेन ॥ ५७ ॥
धर्माधर्म ज्ञान मस्यस्य लोके नानन्देशोपीति मन्ये, किमन्यैः ॥ धर्मैः कृत्यं, येन धर्मेण मुक्तिः धर्मं तंमे सावधानं वदाशु ॥
॥ ५८ ॥ इति तद्वचनं श्रुत्वा स भृगुः श्राम्भवोत्तमः ॥ आहात्युच्चै महादेव महादेवेति सम्बदन् ॥ ५९ ॥ भृगुरुवाच ॥ सन्त्ये
वान्येकाल सामान्यधर्माः किन्तै धर्मैः धर्मरत्नं बदामि ॥ तद्रत्नन्ते कण्ठभूषास्तु नित्यन्तेनैवोमा कान्त कान्त प्रसादः ॥ ६०
शिव धर्म समान धर्ममन्यं नविजानामि न वेद बोधितोऽपि ॥ स तु धर्म वरः स एव धर्मः ससुराणामभिसेवनीय एव ॥ ६१ ॥
सुरैरपीरैः शिवधर्मधर्मो नारायणाद्यैः कृत एव सर्वैः ॥ मुनीश्वरै रप्युरगेश्वरैश्च सिद्धैश्च गन्धर्ववरैश्च नित्यम् ॥ ६२
यं सर्वदेवोत्तम मामनन्ति सोमावतंसं गिरिजावृतांसम् ॥ तं दारितापार नृसिंहभासं वन्देशिवाक्मानस राजहंसम्
॥ ६३ ॥ यत्पादुका राधक सेवकानाम् पादारविन्दान्यरविन्दजातः ॥ गोविन्द वृन्दारक वृन्दमौलि मूलानि चक्रे त-
महो भजामि ॥ ६४ ॥ यस्यैश्वर्यं मान गम्यन्न नूनम् यं वेदान्ता नैव जानन्ति सर्वे ॥ तन्देवेशं पूजयामि प्रभाते
मध्याह्ने वा सायमभ्यन्तरे वा ॥ ६५ ॥ यल्लिङ्गादिन्दिराकान्तमुख्याः सर्वे देवास्तावदुत्पत्तिमापुः ॥ तन्त्यक्त्वा
न्यं कं व्रजामः शरण्यन्तन्देवानामग्रगण्यं भजामि ॥ ६६ ॥ यत्पादांगुल्यग्ररेखाभिजातं चित्रं विष्णोर्भूषण

न्तं बरेण्यम् ॥ वन्दे गौरीकान्तमेकं नितान्तं स्वान्ते शान्ते सन्ततं संवसन्तम् ॥ ६७ ॥ न भजामि शिवान्यमन्यवार्ता
न्न करोम्येव न धीरहारकण्ठः ॥ कंदर्पदमालिका समेतो भवति प्रीति विशिष्टमानसोऽपि ॥ ६८ ॥ न स्वप्नेऽपि शिवो
वान्य नाम कथने प्रीतिः सुधाधारया प्रीतः काञ्जिकमिच्छतीति कुमतिः को वा जगन्मण्डले ॥ ६९ ॥ नाख्योपेन्द्रवि
रञ्चिनाम कथनेन सुजने वामतिः स्वप्नेऽपीति शपामि कालिशिवयोः पादारविन्दे मुदा ॥ ७० ॥ पूज्यः शंकर एव
शंकरकृपा भाव्या सदा भूपते ॥ भाव्यं साधनमेव साधनवरैर्बिल्वादिभिः साध्यते ॥ ७१ ॥ नेयं स्पादानिशं तपा
पिसततं तं तुङ्गलिङ्गार्चनैः ॥ शंभोराधनमेव मेधनमिति ज्ञेयन्निधानम्परम् ॥ ७२ ॥ भस्मोद्धूलन पूर्वकं सि
तलसद्भूत्या त्रिपुण्ड्रं मुहुः ॥ धृत्वा भाल तले गले करतले रुद्राक्षमालामपि ॥ ७३ ॥ तम्पञ्चाक्षरमन्त्रमेव सततं
जप्त्वा शिवाराधकं कृत्वा बिल्वदलैर्वसामि भुवने जीवामि यावत्क्षम ॥ ७४ । दक्षलोचनाञ्चल विलोचन गात्रपा
त्रन्तावत्पविलमपि मुक्ति कलत्र गात्रम् ॥ तत्त्रिकभानुनयनं शरणं भजामो माहेश्वरामरतरुं हरमेकमेव ॥ ७५ ॥
याजिह्वा मधुराणि वाञ्छति मुहुः सा सर्वदा नर्मदम् शर्वं वाञ्छति वक्तुमिच्छतितरं तन्नाममात्रं परम् ॥
किञ्चित्रन्तदिदं सुधा रससरित्पानोद्यता सा कथं वाञ्छंत्यपि तुच्छकाञ्जिकरसं सा स्व स्वभावादपि ॥ ७६ ॥

चक्रं वा किमनेन यद्यगसुताकान्ताङ्घ्रिपद्मार्चनं ध्यानानन्दरसप्रवाहरसिको भीतिः कुतो वा भवेत् ॥ जन्मान्य
घमितानि तानि विविधान्यायन्तु किं नो भयं यद्यन्तःकरणं क्षणार्धमपि वा मुग्धेन्दुमौलिं व्रजेत् ॥ ७६ ॥ तान्य
घस्य सुधामयानि सततं मन्येति धन्यान्यपि न्यस्तान्यामरपूजनस्य गिरिजाकान्तार्चकस्याधुना ॥ कल्याणकु
लयामि काममधुना कामान्तकाराधनात्कः कामान्तकपूजनेन कमपि प्राप्नोति कामं यम ॥ ७८ ॥ कामप्रापकमे
कमेव जगतां कामान्तकं मेनिरे सर्वे ते मुनयः सुरासुरगणाः सिद्धाः मुनीन्द्रा अपि ॥ यत्र स्याद्गमनं विधेर्विधिव
लात्तत्रान्तकस्यां ततो विल्वीकोमलपल्लवैर्जललवैर्लिङ्गार्चनं जायते ॥ ७९ ॥ एतस्मादधिकं किमस्ति
सुकृतं तन्नैव जाने परम् तेनैवामृततामुपैमि शिवतां प्राप्नोति सत्यं यम ॥ ८० ॥ एतस्मात्किमिहास्त्यपूर्वम
मराधीशो महेशो मुहुः ॥ भाग्यैः स्मर्यत एव दुःखविलयः सञ्जायते तावता ॥ मुक्तिः सा करपङ्कजामलकतां प्रा
प्नोति यां साधयो दूरादेव लयं प्रयात्यघकुलं निर्मूलमात्राकुलम् ॥ ८२ ॥ धन्यन्तावदिदं दिनं यमसुधा तु
ल्यं विशाल्यं मनो भागिरिस्मरणादिना गतमतः पापाति भीतिः कुतः ॥ तत्तावद्विपुला तपश्च ममलं धृत्वाकुलन्नम
हरेरीशाराधकसेवकाननुपरं प्रीत्यानु साधावल्यपि ॥ १८३ ॥ इति श्रीशिवरहस्ये हराख्ये तृतीयांशे उत्तरार्धे पु

260

पुण्यमूर्ति रत्नाकर संवादो नामाद्विचत्वारिंशो ऽध्यायः ॥४२॥ सत्यव्रत उवाच ॥ इतितद्वचनं श्रुत्वा यमो विगतकल्मषः॥ विभूतिभूषणं प्राह भृगुं शिवपरायणम् ॥१॥ यम उवाच ॥ मन्ये ऽहन्त्रिपुराराति स्मृतिमेवाति पावनीम् ॥ तां पुण्यवाहिनीं प्राहुः सा सुधावाहिनी नाकिम ॥२॥ तिरस्करो ति सा तावत्स्मृताप्यमरवाहिनीम् ॥ चतुर्वर्गफलाकार कल्लोल कुल संकुला ॥३॥ पुनः पुनर्वदमुदा त्रिपुराराति पूजने ॥ यत्फलन्तत्फलं श्रोतुं प्रवृत्तमधुना मनः ॥४॥ इति तद्वचनं श्रुत्वा भृगुः शिवमनुस्मरन् ॥ महादेव कृपासिन्धुं संस्मार प्रीतमानसः ॥५॥ भृगुरुवाच ॥ महेश्वरापारकृपानिधीनामन्तो न दृष्टो ऽस्तिन मध्यभागः ॥ आदिश्च नैवावभृतो मयातु वेदैरपारैरपि सेतिहासैः ॥६॥ कैलासवासनिरताः प्रमथाः प्रभातमारभ्य शंकरकथासुधया दिनानि ॥ नीत्वा व्यसान्तिगिरिशो ऽपि नयत्यपारान्कल्पान्तथापि न समाप्तिकथा कदापि ॥७॥ पुराकैलासशिखरे रत्नप्रासादमण्डपे ॥ कल्पद्रुमसमुत्पन्नकुसुमासारसम्वृते ॥८॥ रत्नसिंहासनासीनं प्रसन्नवदनं मुदा ॥ सम्पूर्णपूर्णकामं मन्तं ददर्श गिरिजाशिवम् ॥ अपाररत्नाभरणप्रभाराशिविराजितम् ॥ समरधारा परिक्रान्त दिव्याम्बरविराजितम् ॥१०॥ राजीवराज कल्लोल

मालया समलङ्कृतम् ॥ सारस्तीरे लिङ्गमेकं पश्यन्तं मुहुरादरात् ॥ ११ ॥ सुच्छत्र मण्डलाकार माणिक्यकान्तिविराजितम् ॥ चामराकार काश्मीरप्रभामण्डलमण्डितम् ॥ १२ ॥ सुमेरुशिखरस्पर्धि गौरीकुचरुचप्रभम् ॥ तदङ्गालिङ्गनासक्तं वभाषे वचनं शिवा ॥ १३ ॥ श्री गौर्युवाच ॥ स्वामिन्महेश कृपया त्वया शिव कथा सुधा ॥ निर्मितासा मुहुः पीता न तृप्तिरुपजायते ॥ १४ ॥ ब्रह्म कल्पाश्च बहवः कथा कथनलीलया ॥ नीतास्त्वद्गुणना तावन्नकर्तुमिह शक्यते ॥ १५ ॥ कथासुधाराशिरपूर्व एव दिने दिने नूतन कौतुकानि ॥ करोति नान्तोऽपि न मध्यभागस्तस्यादिभागोऽपि न चन्द्रमौले ॥ १६ ॥ शिव कथामृत राशि विवेचने चतुरमेव मनो नममाधुना ॥ किमयमेतदिति स्मय संयुतं कथय तत्त्वमिहाशु सदाशिव ॥ १७ ॥ इत्याम्बिका वचनरत्न मनोज्ञहारं कर्णावतंसमस कृद्गिरिशोऽनुभूतम् ॥ स्मृत्वा पुनः पुनरुमावचनामतेन तस्यौ व्युवाच वचनैरभिवंद्य गौरीम् ॥ १८ ॥

सदाशिव उवाच ॥ गिरिराज कुमारिके वचः परमन्तावदिदं शृणु प्रिये ॥ प्रियमेव वदामि सावधानं धनमेतन्मम सत्यमेव नूतनम् ॥ १९ ॥ वेदास्तावदनन्तास्ते सर्वा शिव कथामयाः ॥ अतस्तासामादि मध्यान्ताः श्रुता अपि न सर्वथा ॥ २० ॥ कथा सुधासमुद्रेषु सूक्ष्मबिन्दुसमा कथा ॥ श्रुता कल्पेष्वपारेषु गतेष्वपि विशेषतः ॥

शिवरह० ॥२१॥ मत्कृपा कृपने गौरि ममापि सहसा तथा ॥ नष्टाऽस्ति रीति विदृष्टिस्त्वन्तत्पादादर्शनादपि ॥ २२॥ मत्कृपापा हृ०तृ०अ
२३६ ॥ त्यानित्य न ममापि तथाऽसति ॥ कोवा तत्पाणो भूयो गौरिजे तव वदाधुना ॥ २३॥ नास्माकं प्रलयादिभीतिरिग अ०४
जे कल्पाः प्रयान्तु प्रिये, ते तावद्यदि कोटिशोऽप्यविलयं यास्यन्ति का तावता ॥ हानिः स्यादसकृत्कृपा कृपनतो
नैयं दिनं, कोटिशः कल्पा ह्यो दिन कोटिभाग तुतिमे सर्वभिरणामपि ॥ २४॥ निर्ममैरपि विरूपो विभवो नम-
मास्विके ॥ तस्माद्राश्यन्तरहितो विभवो मम सर्वथा ॥ २५॥ उक्ता मोक्षा कृथा गौरी मया तावत्पुनः पुनः ॥
सिद्धेव नूतना प्रोक्ता काचि कापि कथा सुधा ॥ २६॥ लिङ्गार्चनस्य महिमा हिमशैलकन्ये नान्तम्प्रयाति
न तसादिकथा तथाच ॥ तन्म ... भाग कथनावसरः कदा वा भावी भविष्यति कथं कथयाशु मह्यम् ॥ २७
एवमुक्ता भवानी सा महादेवेन सादरम् ॥ आनन्दसागरेणाशु सम्यगालिङ्गिता मुहुः ॥ २८॥ अतः कथंका
यमशंकरस्य कथां कथाञ्चित्प्रवदामि सामि ॥ स्मरामि मुहुं हृदयङ्करोमि जिह्वां न्तया तामधुरां करोमि ॥
॥२९॥ अहो शिव कथा सुधानो परिपार पुण्यैरयं स्मृतोऽपि तनुते मुदं किमिदमत्राश्चर्यं कृतम् ॥ शिवेन
च दयालुना शिवजनैकसञ्जीवनी कृता शिव कथा स्मिता मधुरवाहिनी सा कृपम ॥ ३०॥ २० मन्ये शिवाराधनमे

यशुद्धं शुद्धङ्करोति प्रवरञ्च सिद्धम् ॥ तत्तुल्यमन्यं [illegible]नमया श्रुतञ्च वेदान्तवाक्यैरपि कोटिशोऽपि ॥
॥३१॥ शिवार्चनं धनं काल नि[illegible]धयोऽपि शिवार्चनम् ॥ शु शिवार्चनं सुधानूनं मोक्षोऽपि शिव
पूजनम् ॥ ३२॥ शिवार्चनेनैव कृताः कृ[illegible]तार्थाः शिवार्चनेनैव सुधाम्बुराशिः ॥ उद्वेलतामेति न संशयोऽ
त्र तस्य प्रभावं शिव एव वेद ॥३३॥ अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥ तं सुधासागराकारं शृणु
शंकरमर्चय ॥ ३४॥ पुरा गोदावरीतीरे गौतमं मुनिपुंगवम् ॥ शिवमर्चकन्दृष्ट्वा प्राह नारायणः स्व
यम् ॥३५॥ पूजयित्वा महादेवमुपचारैरनेकधा ॥ प्रणम्य बहुधा श्रान्तं स्वेदधारासमावृतम् ॥३६॥
श्रीनारायण उवाच ॥ कुतः समागतं विद्वन् श्रमोऽपि त्वयि दृश्यते ॥ शिवतीर्थाटनेनैव तव कालः प्रया
तिहि ॥ ३७॥ किं किमद्य शिवस्थानं त्वया दृष्टं महामुने ॥ किं किं लिङ्गं पूजितं च बहुभिः साधनैस्त्वया ॥३८
क्वापूर्वं वा त्वया दृष्टं यदुत्साहकरं परम् ॥ तदद्य वद निश्चित्य स्मृत्वा स्मृत्वा पुनः पुनः ॥३९॥ गौतम
उवाच ॥ शिव[illegible]भक्ताय वक्तव्यं कौतुकं परहेतुकम् ॥ तदिदानीं शृणु प्रीत्या भक्तोऽसि कमलापते ॥४०
नेत्रारविन्देन शिवाङ्घ्रिपङ्कं त्वया समभ्यर्चितमादरेण ॥ एतादृशस्त्वं शिवभक्त भक्तो मुक्तिप्रपारूपकृपा

४६२

ष्टं
म शृणुष्व ॥४१॥ पूर्वेद्युरत्यद्भुतन्दृष्ट्वा दुरदृष्टविनाशकम् ॥ अस्मिन्गिरिवरे रम्ये चत्वारो वानराः स्थिताः ॥४२

तैरानीतानि रम्याणि बिल्वपत्राणि तैर्मुदा ॥ कृतं लिङ्गार्चनं भक्त्या रसालजफलैरपि ॥ ४३॥ ततः प्रदक्षि
णीकृत्य नमस्कृत्य महेश्वरम् ॥ उपविष्टाः शिवध्यानं कृत्वा भस्मविभूषणाः ॥ ४४॥ तन्मध्ये कश्चिदाहान्या
नाशिवलिङ्गावलोकनम् ॥ कृत्वा भस्म ललाटादौ धृत्वा स्मृत्वा महेश्वरम् ॥४५॥ वानर उवाच ॥ मयानिमी
लिता क्षेण स्वप्नो दृष्टो महानिह ॥ कश्चिदत्रागतः शैवः शिवनामजपोत्सुकः ॥४६॥ भाति रुद्राक्ष धृताङ्गो लि
ङ्गं दृष्ट्वा समार्चितम् ॥ केन बिल्वदलन्दत्तम् कोमलं लिङ्गमस्तके ॥४७॥ एतादृशं बिल्वपत्रं माघासित चतु
र्दशीम् ॥ प्राप्य रात्रौ शिवलिङ्गे दत्वा मुक्तो भवेद्ध्रुवम् ॥ ४८॥ कुतः केन समानीतो प्यास्को बिल्वपल्लवः ॥
तस्मै नमः पुनस्तस्मै सबिल्वतरवे नमः ॥४९॥ अद्यैव गत्वा द्रष्टव्यो विपिने बिल्वभूरुहः ॥ जलादिभिः पोषणी
यो यथायोग्यम्प्रयत्नतः ॥५०॥ अतः परं समायाति माघासित चतुर्दशी ॥ तैरपि पूजा कर्तव्या तत्र बिल्व
दलैर्नवैः ॥५१॥ तदिदन्नार्मदं लिङ्गं नेयन्तत्र वने मुदा ॥ बिल्वमूले स्थापनीयं स्थातव्यन्तत्र सर्वदा ॥
॥५२॥ अतः परम्भाविनीका कदा भूता विभूतिदा ॥ तावच्छरीरमेतत्तन्मे रक्षणीयम्प्रयत्नतः ॥५३॥ कथन्ता

वद्भाग्यं भवति बहु पुण्यांबुधि कृतम् ॥ तथाभूताभूतानवविमल बिल्वीदलकुलम् ॥ ५४ ॥ तथा भाग्यं लिङ्गन्ताद्दि
दृमति तुङ्गः तनुरियम् ॥ चतुर्णां योगोऽयं शिवकरुणया जायत इति ॥ ५५ ॥ यदि प्रपश्यामि मिते रपूर्वैः पुण्यैस्त
दा बिल्व दलं सलिङ्गम् ॥ तदा जितो मृत्युरघाद्रिनाशो जातोऽपि जातिस्मरतापि मुक्तिः ॥ ५६ ॥ तत्साधनीयं बहु
भिः प्रयत्नै नैचेदिदं जन्म कृतं वृथा स्यात् ॥ तस्माद्यवश्यं शिवलिङ्गबिल्वे ते दुर्लभे जन्मानि जन्मनीति ॥ ५७ ॥ कैश्चि
त्पूर्वभवार्जितै र्बहुनिधैः पुण्यैः शिवाराधनं स्मृत्वा मृत्यु तिरस्क्रियामपि मुहुर्जन्मादि दुःखक्षयम् ॥ ५८ ॥ पश्यत्येवमहा
निक्षिन्निरयनं सम्पूज्य बिल्वी दलैः ॥ भूतायां धृतभक्तिपूत हृदयः शुद्धासितायां मुहुः ॥ ५९ ॥ महेश्वरा
नुग्रहभाजनाना न्नत्पुण्य लाभो भवतीति मन्ये ॥ अतः कथन्तादृशमस्ति पुण्यं कथन्तदन्वेषण चिन्तनं वा ॥
॥ ६० ॥ एवं मुक्त्वा महादेवं नत्वाभूयः प्रयत्नतः ॥ क्वा बिल्व तरुरस्तीति निर्गतः शिवमन्दिरात् ॥ ६१ ॥
एवं स्वप्नोमयादृष्टः शरीरं पुलकांचितम् ॥ आनन्दोऽपि प्रवृद्धो मे तत्कथा श्रवणादिह ॥ ६२ ॥ इत्युक्तनाद्व
चस्तावच्छ्रुतमेव मयाहरे ॥ तदानीमागतः कश्चिद्भिक्षुर्मे त्कुशलो भिक्षुमास्तिकः ॥ ६३ ॥ वानर उवाच ॥ किम
स्माकं कृत्यं वद वद मुदा भिक्षु वचनैः ॥ शिशूनां क्रीडार्थं मठ सदन निर्माल्यमधुना ॥ विनेतुं आतं मे गमनमधु-

नाते ऽपि शिवेः प्रतीक्षां कुर्वन्ति प्रतिलव महो मातृ निकटे ॥ ६६ ॥ इदन्निर्माल्य मादाय धृत्वा शिरसि केवलम् ॥
धृत्वाभूतिं स्तन्यपानं कर्तुमिच्छन्ति बालकाः ॥ ६७ ॥ पुत्राः शिवरता एव भवन्त्विति विशेषतः ॥ सातावच्छिव
निर्माल्य भोजन प्रवणासति ॥ ६८ ॥ मया गृहीत्वा निर्माल्यं गन्तव्यमिदमादरात् ॥ देयन्तेभ्यस्ततस्तेस्युस्तन्यापा
भ्युद्यता अपि ॥ ६९ ॥ स्तन्याभावे शिशूनान्तु न जीवनमितिस्मर ॥ अतस्त्यजाधुनातेषु कृपायादि भवेत्तदा ॥ ७० ॥
इति तद्वचनं श्रुत्वा कौतुकं सधनुर्धरः ॥ स्थितो जालञ्च विच्छिद्य तन्मध्येतो विनिर्गताः ॥ ७१ ॥ त्वरया ते वनङ्गत्वा
बिल्वानारुह्य भूरुहान् ॥ विचारनिरता जातास्ते सर्वे ऽपि परस्परम् ॥ ७२ ॥ वानराः ऊचुः ॥ अहो कथं स्वप्न कथा श्रु
ता सा तत्रापि भूतानिशि बिल्व पूजा ॥ साढुर्लभेत्युक्तमथापहारे शक्त्यापि मुक्त्यै भवतीति सत्यम् ॥ ७३ ॥ सम्भाविता
एव भवन्ति विघ्नाः शिवार्चने तेन सविघ्ननाशः ॥ अपेक्षितः स्यादिति चिन्त्यते कथं कथं भविष्यत्यधुना वदे
वम् ॥ ७४ ॥ इत्युक्त्वा ते स्थितास्तत्र निहताश्च शरैस्ततः ॥ क्व गताः सविचारोऽपि कर्तव्य इति भाति मे ॥ ७५ ॥ भृगु
रुवाच ॥ इति तद्वचनं श्रुत्वा सविष्णुः प्रीतिमानसः ॥ इदं कौतुकमित्युक्त्वा गौतमेनान्वितो ययौ ॥ ७६ ॥
यत्र ते शरपातेन पीडितास्तरु कोटरे ॥ पतितास्तान्विलोक्यायं गौतमः प्राह माधवम् ॥ ७७ ॥ गौतम उवा

च ॥ सर्वां शरकृतापीडा यथा न स्यात्तथा त्वया ॥ कर्तव्य म्पालनं धर्मः सोऽयमत्यन्त दुर्लभः ॥ ७८ ॥ ये पूजयन्ति शिवमादरपूर्वकन्ते वंद्याभवन्ति सततं परिपालनीयाः ॥ जातिर्न तावदधुनानुविचारणीया किञ्जाति भेद विषयेण विचिन्तनेन ॥ ७९ ॥ इति तद्वचनं श्रुत्वा चकार परिपालनम् ॥ सोऽपि नारायणस्तेषां गौतमेन सहादरात् ॥ ८० ॥ ततः कालेन भूतापि समाधश्रीसमुपागता ॥ तदामीं वानराः सर्वे सन्तुष्टाः शिवतत्पराः ॥ ॥ ८१ ॥ साऽयमभ्यागता भूता पुण्यभूता शिवप्रदा ॥ शिवरात्रिरियन्दृष्टा धन्यास्मो नात्र संशयः ॥ ८२ ॥ इत्युक्त्वा सायमभ्येत्य गङ्गाजले मुदा ॥ स्नात्वा चक्रुर्ललाटादौ दृवभस्म त्रिपुण्ड्रकम् ॥ ८३ ॥ ततः परं विल्व पत्राण्यादाय विमलान्यपि ॥ आगताः शिवपूजार्थं तस्मिन्नेव त्रियम्बके ॥ ८४ ॥ तदा शिवालये कश्चित्तुलस्तिरीति विश्रुतः ॥ कृत्वा द्वारावरोधानि चकार शिवपूजनम् ॥ ८५ ॥ पूजां कृत्वा मुनिश्रेष्ठो रात्रौ याम त्रयावधि ॥ प्रणामान्कर्तुमीशाय द्वारमुत्पाद्य निर्गतः ॥ ८६ ॥ तदा तान्वानरान्दृष्ट्वा शिवपूजोद्यतानपि ॥ स्वांगांगतांश्चुक्रोपाथ तेन क्रोधाग्नि क्राथितः ॥ ८७ ॥ क्रोधाग्निना समाक्रान्तास्ते सर्वे वानरास्तदा ॥ तथापि हननं कार्य्य मिस्युनुस्ते ततो मृताः ॥ ८८ ॥ ततः परं विमानानि समारुह्याति पामराः ॥ वानरा अपि ते प्रापुः

ब्रह्मलोकमनामयम् ॥८९॥ ब्रह्मा तानागतान्दृष्ट्वा दूरादुत्थाय सादरम् ॥ पूजयामास यत्नेन स्वासने सन्नि
वेश्य च ॥९०॥ तान्प्रपूजितान्विलोक्यापि चतुर्मुखसभासदः ॥ तमूचुः कृतकृत्यं तं विधिं शिवरतार्चकम्
॥९१॥ सभासद ऊचुः ॥ किं पुण्यमेतैः कृतमत्र येन त्वदर्चितैः भाति किमस्ति भव्यम् ॥ इदं विधे प्राप्य
वदाशु येन स्यादस्मदीयं च मनः प्रहृष्टम् ॥९२॥ ब्रह्मोवाच ॥ भूतायां शिवपूजनार्थमसकृद्यत्नः कृतो वानरै
रेतैरेव हि पामरैरपि तदा यत्नो वृथैवाभवत् ॥ तद्धूतनाथस्मागताः खलु मया सम्यक् समाराधितास्तं यत्नं प्रवदन्ति
सन्ततमहो वेदाः सुधामित्यपि ॥९३॥ एते तावदहो पुलस्ति यदुलक्रोधाग्नि तप्तास्ततः ॥ तन्तावाद्देनिहन्तुमेव
बहुधा चक्रुः प्रयत्नन्ततः ॥९४॥ सयतः शिवपूजान्ते पुलस्तिः क्रोधसंकुलः ॥ रावणो भविता भाव्ये रामि
ते लोके रावणः ॥९५॥ शिवपूजाप्रभावेण सर्वामरदण्डनम् ॥ करिष्यति न सन्देहो महदैश्वर्यसंयुतः ॥९६॥
अजेयो भविता लोके सुरवध्यः स रावणः ॥ नरान्न गणयत्येव वानरांस्तु विशेषतः ॥९७॥ नारायणोऽपि भवि
ता नरो नन्दीश्वरापतः ॥ स रावणस्य हन्ता स्याद्वानरैरेभिरीशः सह ॥९८॥ अयं हनुमान्भविता सुग्रीवोऽप्ययम
दोप्ययम् ॥ बालीसोऽयममीमुख्या स्तत्सहायार्थमुद्यताः ॥९९॥ उपकारः कृतम्पूर्वन्तेन नारायणेनयः

(सूत उवाच)

वानराणां वने तेन सहायस्तेन सम्मतः ॥ १०० ॥ इति तद्वचनं श्रुत्वा सर्वे विस्मितमानसाः ॥ कथं भ्रातु इति प्राहु नन्दिकेशेन केशवः ॥ १ ॥ (ऋषि उवाच) पुराशिव प्रसादेन वैकुण्ठम्प्राप्य माधवः ॥ रमया रममाणः सन्नरस्वरूपेण संस्थितः ॥ २ ॥ प्रदोष कालीन शिवार्चनानि नारायणो सौ रममाणएव ॥ लक्ष्म्या विहाय स्थित एव दृष्टो नन्दीश भृत्यैरनिवृत्य लोके ॥ ३ ॥ ततः कदाचित्कैलासे स्थित्वा नन्दी स्वकिङ्कुरान ॥ कुत्र कोवा सुरः किं वा करोतेति त्याह सादरम ॥ ४ ॥ तत्रार्बुदाक्षको प्याह नन्दिकेशस्य किङ्कुरः ॥ प्रणम्य दण्डवत्सम्यक् नन्दिकेशं कृताञ्जलिः ॥ ५ ॥ अर्बुदाक्ष उवाच ॥ सञ्चारः क्रियते नित्यं सर्वेषु भुवनेष्वपि ॥ दृश्यन्ते मानवाः सिद्धाः किन्नराश्च सुरा अपि ॥ ६ ॥ तेतावत्स्वधुना सर्वे स्वस्वाचार रता नराः ॥ गन्धर्वाः किन्नराः सिद्धाः मुनयो ऽपि विशेषतः ॥ ७ ॥ सुरेषु सकलान् हित्वा लक्ष्मीनारायण(रमण)मास्तिकाः ॥ सुरास्त्वाचार निरताः शंकराराधनोत्सुकाः ॥ ८ ॥ यदा तावन्मया स्वामिन्नागतं नगतं वैकुण्ठमन्दिरम् ॥ तदास नर रूपेण स्थितो नारायणो मुदा ॥ ९ ॥ रमामालिङ्ग्य सायाह्ने शिव पूजा पराङ्मुखः ॥ स्थितः पृष्टो मया पृष्टः को ऽसीति सजगाद माम् ॥ १० ॥ त्वं को ऽसीत्यपि वेगेन त्यक्त्वा लज्जान्तपासह ॥ नग्नाकारमया भूतः तदालिङ्गन तत्परः ॥ ११ ॥

शिवरह०
२८३

अयं
ततः परं स विस्मितो यमं दुर्जन इत्यपि ॥ जनार्दनः सन्त्यक्तः शक्तेनापि प्रपातने ॥ १२ ॥ इदमेतादृशं नृत्यमपू र्वेममरेष्वपि ॥ क्वा गतिर्ओ विमीतस्य वद महं विशेषतः ॥ १३ ॥ इत्युक्तं तद्वचः श्रुत्वा नान्दिकेशो ऽपि विस्मितः ॥ प्राहार्बुदाक्षमक्षेण वचनेन विचक्षणः ॥ १४ ॥ नान्दिकेश्वर उवाच ॥ स नरो भविता लोके राम नाम भविष्यति ॥ असुरहृतभार्योऽपि भविष्यति न संशयः ॥ १५ ॥ पुनः पुनः सजन्मानि सम्प्राप्यातिवदुःखितः ॥ अनुतप्तो लिङ्गपूजां करिष्यति विशेषतः ॥ १६ ॥ भृगुरुवाच ॥ इति तद्वचनं श्रुत्वा स्मृत्वा शंकर मव्ययम् ॥ प्रभावं शांकरं श्रुत्वा प्रहृष्टः कालसादरम् ॥ १७ ॥ को वा विजानाति महेश शक्तिं तदर्चकानां च शिवार्चनस्य ॥ महेश्वरो वेद शिवापि वेद स्कन्दो गणेशो ऽपि स नन्दिकेशः ॥ १८ ॥ शिव प्रसाद लेशेन सुरत्वं प्राप्य ते सुराः ॥ शं करावक्तयातायन्नरत्वं प्राप्नुवन्ति ते ॥ १९ ॥ मे ते नराः शंकर पूजनेन नित्यं कृतार्थाः, कृतकृत्य धन्याः ॥ सुरासुराणामपि ते ऽतिपूज्याः पूज्याः भवन्त्येव मुनीश्वरैश्च ॥ २० ॥ अहो महद्भाग्यमुमासहायः सहायभूतो ऽपि न [illegible] रेषु यस्य ॥ तस्याद्भुतं पदं [illegible] दृष्टादिनयं विशेषतः किल मुकुन्द धन्यम् ॥ ॥ २१ ॥ शार्दूल उवाच ॥ इति तद्वचनं श्रुत्वा तत्प्रणम्य भयं [illegible] यमः ॥ मामकृत्वा निर्भीर्दृश्य प्राहमू

ह० त० ३
अ० ४३

~~वानराणां वने तेन महापस्तेन संमतः ॥ ७० ॥ इति तद्वचनं श्रुत्वा सर्वे विस्मितमानसाः ॥ कथं शांत इति प्राहुर्नन्दि केशोत केशव ॥ ७१ ॥ पुराशिव प्रसादेन वैकुण्ठं प्राप्य माधवः ॥~~ तामनुस्मरन् ॥ २२ ॥ यम उवाच ॥ कागति भाविनी तस्य भार्यया भर्त्तितस्य च ॥ चेरीकरि तदा घात पीडितस्य दुरात्मनः ॥ २३ ॥ कस्मिन्वा नरके तस्य प्रवेशः संमतो भवेत ॥ गति नरकभोगान्ते काभविष्यति तद्वद ॥ २४ ॥ भृगुरुवाच ॥ भूताव्रत त्यागत एव यद्यप्ययं महापातक संघराशिः तथापि ध्यने न श्रुतमेव मद्य माहात्म्य मीशान पदार्चकानाम् ॥ २५ ॥ किन्त्वस्य भार्या शिवपूजनान्ते सस्मार भर्त्तारममुं कथं वा ॥ नाराधितोऽयं गिरिजासहाय स्तेनेत्याति स्नेह वशेन दैवात् ॥ २६ ॥ तत्तस्मरण गोचरो नृपः ॥ पापराशि कलितोऽपि यातनाम् ॥ नैव यास्यति परन्तु दुर्दशां व्याघ्र योनिमभियास्यति ध्रुवम् ॥ २७ ॥ जातिस्मरोऽयं भविता यमातः शार्दूल देहेऽपि शिवार्चनानि ॥ कृत्वा प्रभासस्थलमराभि वन्द्यः कैलास नाथं गिरिजा सनाथम् ॥ २८ ॥ तच्चोरिकालिङ्गन निन्दकं च चकार भार्याङ्ग विचिन्तनेन ॥ तदङ्ग संगेन च चेरिकापि जातिस्मरत्वं समुपेष्यतीति ॥ २९ ॥ तदुत्पन्नाः सुताः सर्वे तदङ्गालिङ्गनादिभिः ॥ जातिस्मरत्वमभ्येत्य करिष्यन्ति शिवार्चनम् ॥ ३० ॥ याभवीतस्य या भार्या तस्याः शापेन केवलम् ॥ शार्दूलो भविता सोऽयं रेवातीर

७६

नने यम ॥ ३१ ॥ रेवाजल स्नान कृतार्थ देहः तल्लिङ्ग पूजा निरतोऽपि नित्यम् ॥ तत्तीर संत्यक्त तनुर्यमान्ते मुक्तो भविष्यत्यपि नात्र चित्रम् ॥ ३२ ॥ इति तद्वचनं श्रुत्वा मामाहूयान्तिकं यमः ॥ आह गम्भीरया वाचा सन्तोषं जनयन्मुहुः ॥ ३३ ॥ यम उवाच ॥ भृगु मुनि वचनेन मोचितस्त्वं पटु भट दण्ड विघट्टनादि दुःखैः ॥ परिहर हर चिन्तनेन दुःखं भज भज शंकर मद्य सावधानम् ॥ ३४ ॥ प्राप्याप्यपारैः सुकृतैर्नरत्वमप्याहृतैश्वर्य मनाम यत्वम् ॥ हा रत्न मप्यर्थ शशांक मौलिं पुण्य स्वरूपाः पामर्चयन्ति ॥ ३५ ॥ यः प्राप्यापि नरत्वमास्तिक वरो माहेश्वरः केवलम् ॥ नस्यादिन्दु कलावतंस भजना सक्तोऽपि शक्तः परम् ॥ तं त्वाकल्परसा समं विदुरहो दुर्वीर्यजं दुर्जनं दुर्जाति नरकालयं च स पुनः स्याद्रासभो भूरिशः ॥ १३६ ॥ इति मामाह स यमः पुण्यापुण्यानियामकः ॥ अन्यदप्याह मामेव तद्धकुम्नैव शक्यते ॥ १३७ ॥ एवं संभाषणेनैव कालो भूयान्गतस्ततः ॥ दूराद्दृष्टं यमेनापि विमानमति सुन्दरम् ॥ १३८ ॥ कोटि सूर्य्य प्रतीकाशं प्रभामण्डल मण्डितम् ॥ रत्न छत्र पताकाढ्यं मुक्तामाल विराजितम् ॥ १३९ ॥ रत्न दण्डैः स्फारैश्च चामरै राभि मण्डितम् ॥ ~~रत्न छत्र पताकाढ्यं मुक्तामालाविराजितम् ॥ १४० ॥~~ चन्द्र मण्डल संकाशैर्दर्पणैः परिवेष्टितम् ॥ १४० ॥ चन्द्र मण्डल मालाभिस्तारामालाभिरावृतम् ॥ पुण्या-

सार समाक्रान्तं नवमेव प्रतिक्षणम् ॥ ४१ ॥ रुद्रवीणा गानविद्या विशारद वरैरपि ॥ समलन्तमुत्कृष्टं नास्यनारि गणैरपि ॥ ४२ ॥ तादृशा न्तद्विलोक्याथ सभृगुं प्राहाविस्मितः ॥ कृतान्तः, किमिदन्दृष्टं मपूर्वं पुण्यकं मुने ॥ ४३ ॥ विमानमीदृशं पूर्वं नमल्लयनगोचरम् ॥ किमिदं रत्नराशीनां नभोमण्डलमण्डनम् ॥ ४४ ॥ यस्य प्रभाभि भानुभ्यः खद्योतानिभ एव सः ॥ तस्य प्रभाः समुत्पन्नास्तावद्दिग्मण्डले ॥ ४५ ॥ नचनारायणस्येदं विमेन्द्र स्य वा प्रभो ॥ भृगो ॥ न गणानां च नान्येषामिदं शांभवमेवाकिम् ॥ ४६ ॥ अशांभवविमानस्य किमेवं कान्ति रद्भुता ॥ एवं विचारसम्पन्ने तद्विमानमुपागतम् ॥ ४७ ॥ गण कोटि महादेवैः ध्वनयो ऽपि श्रुतास्तदा ॥ तानितूर्याण्यपाराणि दृष्टानि विमलान्यपि ॥ ४८ ॥ तद्ध्वनि श्रवणादेव ब्रह्मनारायणादयः ॥ समागताः सम्भ्रमेण किमेतदिति विस्मिताः ॥ ४९ ॥ नारदाद्याश्च मुनयो गन्धर्वा अथ किन्नराः ॥ समागताः स- म्भ्रमेण तदालोकन कौतुकाः ॥ ५० ॥ तदा दिव्यविमानस्थाशिवार्चन परायणा ॥ दृष्टा सा राजमहिला का लकालानुवादिनी ॥ ५१ ॥ तदा तां प्रणताः सर्वे सुरनारायणादयः ॥ तेस्तु तासा तदा सर्वैः शिवपूजन तत्परा ॥ ५२ ॥ देवा ऊचुः ॥ धन्यासि धन्यवर पूजित पादुकासि ॥ भूता महानिशि महेश्वर पूजनेन ॥ योऽस्त्त

शिवरहस्य २४५ २४५

यः खलु महेश्वरलिङ्गपूजा बिल्वीदलाभिरपारनवप्रसूनैः ॥५३॥ हस्तौ ते शिवलिङ्गपूजनपरौ धन्यौ च मान्यौ मुहुः ॥ नेत्रे ते शिवबीक्षणेन विमले धन्यं मनस्ते यतः ॥ ५४ ॥ त्वं मान्यासि जगत्त्रयेऽपि धरणी जाता त्वया पावना त्वत्पादाम्बुजवीक्षणेन यमपि याति धन्या खलु ॥ ५५ ॥ इति संस्तुता देवैर्यमेनाभ्यर्चिता ततः ॥ इन्द्रलोकं ययौ पश्चादिन्द्रेणापि समर्चिता ॥ ५६ ॥ ततः परं हरं प्राप त्वरया हरमन्दिरे ॥ गिरिजानिकटे स्थित्वा चकार शिवपूजनम् ॥ ५७ ॥ परमानन्दमग्ना सा सदा गिरिजया सह ॥ वासं चकार कैलासे शिवपार्श्वे सुधारसे ॥ ५८ ॥ इन्द्रलोकादिगमनं तत्कृताभ्यर्चनादिकम् ॥ सुश्राव स यमस्तत्र पश्चादिरवच ? श्चर्यैः ॥ ५९ ॥ तं विस्मयावहं दृष्ट्वा यमोऽपृच्छत्स मादरात् ॥ भृगुमाह विनीतांगो विस्मयाविष्टमानसम् ॥ ६० ॥ यम उवाच ॥ केयं स्तुता नता देवैर्ब्रह्मनारायणादिभिः ॥ किं तया वा कृतं पुण्यमीदृशोत्सवसाधनम् ॥ ६१ ॥ भृगुरुवाच ॥ किं वक्तव्यमतः परं यम मया सा पुण्यराशिः परं लेयत्ता खलु तत्कृतामितमहापुण्याम्बुराशेरपि ॥ ६२ ॥ सा भूता निशि लिङ्गपूजनरता तत्पुण्यमेतादृशं येनोपेन्द्रपुरःसरा अपि सुरास्तत्पादुकाराधकाः ॥ ६३ ॥ अस्यैव राज्ञो महिला विमला सा शिवार्चनैः ॥ भूता

ह० त० ३ अ० ४३

निधिर्महेशाय तया देहस्समर्पितः ॥ ६४ ॥ इति तद्वचनं श्रुत्वा यमः प्राहाति विस्मितः ॥ कथं देहस्त्वया स्त्रि-
याद्त्तो महेशायेति सादरम् ॥ ६५ ॥ भृगुरुवाच ॥ रत्नानि सर्वाणि समर्पितानि ॥ तया महेशाय शिवार्चने-
न ॥ नीतं वयः सर्वमनाकुलेन चित्तेन तत्पुण्यसमर्जितेन ॥ ६६ ॥ यावन्ति रत्नजातानि सुवर्णाभरणान्यपि
॥ विविधानि विचित्राणि तानि दत्तानि शम्भवे ॥ ६७ ॥ प्राज्यं राज्यन्तया दत्तं शिवपूजार्थमादरात्
मातङ्गाश्च तुरङ्गाश्च दासादास्यश्च कोटिशः ॥ ६८ ॥ पुत्राश्च दत्ताः शर्वाय शिवसेवार्थमादरात् ॥ ना-
नाविधानि धान्यानि दत्तान्येव तया यम ॥ ६९ ॥ दत्तान्यमन्द गोवृन्दान्यपार महिषीगणाः ॥ भक्त्या शंक-
रपूजार्थं तया रत्नगृहा अपि ॥ ७० ॥ ततः परं स्वदेहोऽपि शंकराय समर्पितः ॥ भूता महानिशी प्रीत्या
विल्वपल्लवसन्निभः ॥ ७१ ॥ ततः प्रीतो महादेवः स च साम्बस्तत्कृतपूजया ॥ विमानं प्रेषयामास गण-
कोटि समन्वितम् ॥ ७२ ॥ तेनैव स शरीरेण विमानवरमाश्रिता ॥ ययौ कैलासनगरं सुराणामपि
दुर्लभम् ॥ ७३ ॥ एतादृशं महद्भाग्यं शंकराराधनां विना ॥ दुर्लभं देहिनां मन्ये संसारभयनाशकम् ॥
॥ ७४ ॥ संसारागारलहरीपरिवेष्टितविग्रहाः ॥ नाराधयन्ति गिरिशं तदिदं महदद्भुतम् ॥ ७५ ॥

शिवरहस्य एकेन जन्मना पुण्यं यत्कृतं जननाधापि ॥ तेनामरणमीशाने भक्त्यंशः कोऽपि लभ्यते ॥७६॥ तादृशान्ये
२४५ व जन्मानि यथपाराणि मानवः ॥ प्राप्नोति तर्हि गौरीशे भक्तिः क्वापि प्रवर्धते ॥७७॥ तया भक्त्या
२४६ महादेवं नव बिल्व दलैरपि ॥ छिन्नैः समर्चयन्नेव मुक्तो भवति मानवः ॥७८॥ रत्नैर्वा मणिभूषणैरपि मणि
छत्रैर्वितानादिभिर्मुक्ताल ङ्कृत चामरैरगणितैस्स्वाम्भिस्तथा चन्दनैः ॥ तृप्तो न त्रिपुरान्तकः खलु न-
वैर्बिल्वीदलैः कोमलैर्गौरि हरि समर्पितैः परमयं तुष्टो भवानीपतीः ॥७९॥ आनन्दांबुधिरेव शंकर
इति जातस्ततः किन्नरैस्तस्मै देयमदेयमेव सकलं देयन्तदीयं यतः ॥ धना स्वर्ण तस्य धनेषु
तिष्ठति, धनं कस्यास्ति लोकत्रये गौरी कामुक एव कालनाथिकः कालान्तकः केवलम् ॥८०॥ अपार
मैश्वर्यमुमासहाय पादारविन्दार्चन लभ्यमेव ॥ ऐश्वर्यदानेन कथं स देव स्तुष्टो भवेद्भक्ति लवं वि
नापि ॥८१॥ अपारमैश्वर्यमुमा सहाय पादारविन्दार्चन लभ्यमेव ॥ ऐश्वर्य दानेन कथं स देवः
तुष्टो भवेद्भक्ति लवं विनापि ॥८२॥ भालाक्षे सति कोऽन्यदेव भजना सक्तो भवेद्भूतले ॥ त्यक्त्वा
आरजमेव केवलमजोपेन्द्रादि देवार्चिते ॥ रत्नं किं परिहत्य काच शकलं वाञ्छन् जनो जीवन

म् धन्यं किं मनुते जनैरभिनुतः किन्तादृशो जायते ॥ ८३ ॥ आपन्ने जननादि दुःख निधयस्त्यक्त्वा शिवाराधनम्
दुःखाम्बोधि परम्भवाय वसुधाभाव प्रसक्तो मुहुः ॥ वेरीशाल्मय बिल्व कोमल दलै रभ्यर्चयन्सा [illegible] ॥ ८४
दरं हाराहार विशेष भूषित [illegible] वपुः प्रापुस्तत्समर्था अपि ॥ ८४ ॥ लक्ष्मीकान्त चतुर्मुखादिक सुरान्वीरेश्व
राधकः प्रायः कारुणिकः करोति यवस प्राधान्यमानामयः ॥ तत्तुल्यस्तु स एव तेन विदितं तत्त्वं कथञ्चिद्विभ
भोः शम्भोः कस्तदपार दिव्य महिमा पारङ्गतो भूतले ॥ ८५ ॥ इति श्रीशिवरहस्ये हराख्ये तृतीयांशे
उत्तरार्धे पुण्यमूर्त्ति रत्नाकर संवादो नाम त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ श्री काशी विश्वेशार्पणमस्तु
सत्यव्रत उवाच ॥ इति कालो भृगो र्वाक्यमाकर्ण्य ससुधामयम् ॥ अवापपरमानन्दमानन्दाश्रु समाकुलः
॥ १ ॥ यम उवाच ॥ भूतं भव्यं भविष्यञ्च येन ज्ञातन्त्वया भृगो ॥ शिव तत्त्वं विशेषेण तन्मे ब्रूहि विशेष
तः ॥ २ ॥ रहस्यमपि तन्मह्यं वद सादरमास्तिक ॥ तत्कौतुकानां निलयं सर्वथेत्यवगम्यते ॥ ३ ॥ भृगुरुवा
च ॥ गोपनीयम्प्रयत्नेन यदेतदधुनोच्यते ॥ अभक्ताय न वक्तव्यमश्रद्धानिलयाय च ॥ ४ ॥ शांकराया
तिशुद्धाय भूतिरुद्राक्षधारिणे ॥ वक्तव्यं तद्रहस्येषु शिवस्थानेषु केवलम् ॥ ५ ॥ यस्माल्लिङ्गात्समु

स्वलं ब्रह्म नारायणादिकम् ॥ चराचरात्मकं विश्वं तत्पूजा सर्वसिद्धिदा ॥ ६ ॥ लिङ्गादेव समुत्पन्नाः सर्वे देवाः पिनाकिनः ॥ वेदाश्च यज्ञा ऋषयो गन्धर्वाः किन्नरा अपि ॥ ७ ॥ पृष्ठाङ्कुरेण किन्तेन कोटिशः प्रभवन्त्यपि ॥ तस्मादेव विलीयन्ते तस्मिन्नारायणादयः ॥ ८ ॥ लिङ्गाराधनमेव केवलमुमाकान्तं प्रियं तत्सुरैः गन्धर्वैरपि किन्नरैरपि कृतं सिद्धैर्मुनीन्द्रैरपि ॥ ९ ॥ तत्यागात्पतिता भवन्ति तदविज्ञाततं न हारैर्विनातस्मिन्नैस्तत्पार पुण्यनिधिभिस्तावत्परं लभ्यते ॥ १० ॥ व्रतं पूर्वाराधनमेव येषान्तेषां न संसारभयानि काल ॥ १० ॥ तेन व्रतेनैव विमुक्तिरन्ते भुक्ते षु भोगेषु चाखिलेषु मतेषु ॥ अन्यो धर्मो न स्फुरत्येव नूनम् वेदे धर्मः शांकरः केवलोयः ॥ ११ ॥ तेनैव स्यान्मुक्तिरित्येवमन्ये कोऽन्यो धर्मस्तादृशो वेदवेद्यः ॥ रहस्यमन्यत्तव वच्मि काल यः कालकालार्चनतत्परोन ॥ १२ ॥ तं जारजं विद्धि विशेषतस्त्वं सत्यं मयोक्तं शपथः शिवेऽपि ॥ अत्रैवोदाहरन्तीमामितिहासं पुरातनम् ॥ १३ ॥ कौतुकं शृणु वक्ष्यामि कालकालान्तकप्रिय ॥ आर्यावर्ते पुरा कश्चिद्ब्राह्मणो वेदपारगः ॥ १४ ॥ सर्वशास्त्रार्थतत्त्वज्ञः शिवध्यानपरायणः ॥ सत्यमूर्त्तिरिति ख्यातः सत्यप्रवणमानसः ॥ १५ ॥ ऋतं सत्यमिति ज्ञात न्तेन तत्त्वं शिवात्म

कम् ॥ वेदार्थ निश्चयस्तेन शास्त्रैरादौ कृतो मुहुः ॥ १६ ॥ ततः परं शिवस्तेन सर्वाराध्य इतिस्मृतः ॥ सर्वेऽप्यारा
ध्यका एव शंकरस्यामराः परम् ॥ १७ ॥ सुराराध्यः स एवेति सर्वदाप्यवधारितः ॥ अध्यापितानि शास्त्राणि
शांकराणि मनीषिणा ॥ १८ ॥ तेनैव शिव विद्यायां निपुणेन महात्मना ॥ तस्य पुत्राः समुत्पन्नाः शतन्तेष्वेक
मन्तिमम् ॥ १९ ॥ पुत्रं विहाय ते सर्वे पुत्राः शिवपरायणाः ॥ भूतिरुद्राक्ष भूतांगाः शिवलिङ्गार्चनाप्रियाः ॥
॥ २० ॥ शिवशास्त्र प्रवीणाश्च शिव व्रतपरायणाः ॥ सर्वे भूतव्रतप्रीताः ते सर्वे भूतिभूषणाः ॥ २१ ॥ शंकरारा
धनन्तेषां व्रतत्वान्यदूर्त यम ॥ नियमः शिवपूजायां तेषामाजन्मनिश्चितः ॥ २२ ॥ निरता एव ते सर्वे शिव
धर्मे विलक्षणे ॥ शिव व्रतव्रतान्तेषा न्तत्तारिणां विशेषतः ॥ २३ ॥ कालः शिवार्चनेनैव नीयते ताभिरादरा
त् ॥ स विप्रस्तान्सुतान्दृष्ट्वा शिवनामाङ्कितान्मुहुः ॥ २४ ॥ सन्तोषं परमं प्राप मुक्तितुल्यमनामयम् ॥ शिव
लिङ्गार्चनोद्युक्तान भूतिरुद्राक्षभूषणान् ॥ २५ ॥ पुत्रानालोक्य सन्तुष्टो नर्त्तनं स करोत्यपि ॥ मत्तुल्यो
भुवि को वास्त्यात्कुमाराः शांकराः परम् ॥ २६ ॥ तद्दारा अपि ते नित्यं शिवध्यानपरायणाः ॥ सकृदाचि
त्समाहूय पुत्रानालिंग्य सादरम् ॥ २७ ॥ प्राह सन्तुष्टहृदयः सन्तोषञ्जनयन्परम् ॥ सत्यमूर्तिरुवाच ॥

मत्प्रार्थितं चिन्तितमेव नूनम् महेश्वराराधनमेव धर्मः ॥ धर्मान्तरत्यागमतिर्ममाभूदतोऽस्मि धन्यो
भुवनत्रयेऽपि ॥ २८ ॥ धर्मो ममायं परिपालनीयो भवद्भिरत्यादरपूर्वकं मे ॥ श्रोतव्यमेतद्वचनं ममान्य
न्न प्रार्थनीयं भुवनत्रयेऽपि ॥ २९ ॥ शिवार्चनेनैव सदा विनेयः कालः सदा तेन स कालकालः ॥ तुष्टो भव
त्येव स मुक्तिदाता भोगप्रदाताऽपि स एव पुत्राः ॥ ३० ॥ नान्यः शरण्यो जगतां कुमाराः शिवः शरण्येषु वरे
ण्य एव ॥ केऽमुं विहायान्यमुपाश्रयन्ति तान्नैव जाने जगतीतलेऽस्मिन् ॥ ३१ ॥ शिवार्थमेव प्रयता भव
न्ति शिवार्चनेनैव तदाप्तिरिष्टा ॥ शिवप्रदाता न शिवेतरः स्यादतः शिवाराधनमेव कार्य्यम् ॥ ३२ ॥ को वा
शिवाराधनकेन तुल्यो वेदेषु शास्त्रेष्वपि धर्मवर्य्यः ॥ स एव तेनैव भवन्त्यभीष्टास्तस्मात्तमेवोत्तम-
मामनन्ति ॥ ३३ ॥ को वा न स्याच्छ्रान्तभवो भूरिपुण्यैस्तेषां तावत्तत्फलं प्राप्यमत्वम् ॥ तच्चेन स्यात्तेषु
पुण्येषु तावत्पुण्यत्वं वा दुर्लभं सर्वथाऽपि ॥ ३४ ॥ त्यक्त्वा जास्जमेकमेव कुमतिं सर्वेऽपरं शांकराः ॥ तत्र
स्थाश्च सुरार्चकाश्च सुतरां लिङ्गार्चनात्युत्सुकाः ॥ एतत्पुण्यसमं न पुण्यमिति मे पुण्येन पुण्यात्मना
जाता बुद्धिरतः परं शिवपरैः स्थेयं गृहे सादरम् ॥ ३५ ॥ शरीरमेतत्खलु जातमेव जीर्णं न तूर्णं गिरिजास

४ पृ-११ – श्रोतव्या पुनरादरेण बहुधा संसेवनीया मया ॥ नेदं स्याद्भविष्टमस्य च वयः कायव्ययाम स्तुता ॥

हायः ॥ अनुग्रहं मे न करोति मुक्तिः शिवार्चनादेव धुनाति दूरम् ॥ ३६ ॥ अतः परं यन्मदनान्तकस्य पुरं पुराणं प्रवरं तदेव ॥ संसेवनीयं सुरवाहिनी सा यत्रोत्तरं सा प्रवहत्यपारा ॥ ३७ ॥ तत्रैव नित्यं मणिकर्णिकायाम् स्नात्वा नवैर्बिल्वदलैर्जलैर्वा ॥ विश्वेश्वराभ्यर्चनमस्य कार्यं कार्यान्तरं नास्य विशेषतस्तु ॥ ३८ शिवप्रसादेन कुमाररूपं भागयन्तादन्यच्चाविशेषतस्तु ॥ प्राप्तं किमन्यं मम साध्यमेकं काशीपुरीनाथमुपाश्रयामि ॥ ३९ ॥ तामन्नपूर्णां शरणागतार्तिं प्रहाण दक्षां शरणं व्रजामि ॥ तं ढुण्ढिराजं शरणं व्रजामि तच्चाविमुक्तं शरणं व्रजामि ॥ ४० ॥ वीरेश्वरं तं शरणं व्रजामि बिल्वीदलैः सादरमर्चयामि ॥ नृत्यं करोमि प्रणतः शिवाग्रे स्मराधुना मां स्मरणं करोति ॥ भजामि विकटागौरी चरणाम्बुरुहं मुदा ॥ भजामि संकटागौरीं वन्दे सिद्धेश्वरीमपि ॥ ४२ ॥ श्रीकालभैरवं वन्दे सर्वाभीष्टप्रदमादरात् ॥ वन्दे मुहुर्मुहुर्वन्दे वन्दे वक्रतुण्डविनायकम् ॥ ४३ ॥ कृत्तिवासेश्वरादीनि यानि लिङ्गानि कोटिशः ॥ काश्यान्तानि प्रणमामि कृत्यमन्यन्न मे सुताः ॥ ४४ ॥ यारम्या गिरिराजराजतनयाकान्तप्रिया सा पुरी ॥ काशीति प्रार्थिता तथैव कथिता वेदैरपारैरपि ॥ ४५ ॥ कः काशीमगणीयलोकनरतो न स्यात्तपस्या फलम् ॥

काशीवासमितिब्रुवन्ति मुनयो वेदाश्च सिद्धा अपि ॥ तं वासं प्रवदन्ति वासवमुखा प्राप्यन्तमीडे परङ्कृतं
यच्च न मुह्यते खलु मया संसारविच्छेदकम् ॥ ४६ ॥ जातः शंकरपूजनेन वहुधा संसारदुःखक्षयः ॥
कालान्मेन भयं शिवार्चनरतः किं कालभीतो भवेत् ॥ ४७ ॥ यद्यप्येवमथापि मे शिवपुरी मल्लोचनागोच
रा जाता वा कथमिष्यपारविविध क्लेशप्राप्तिर्तं मानसम् ॥ ४७ ॥ भृगुरुवाच ॥ इत्युक्तं तद्वचः श्रुत्वा कु
मारास्तातमादरात् ॥ ~~इत्युक्ताः प्रार्थिताः सर्वे पुनाः काशीपुरीं प्रति ॥ ४८~~ ॥ प्रणम्य दण्डवद्भूमौ कृतु
रानतकन्धराः ॥ ४८ ॥ अस्माकं किमिहास्ति कृत्यमधुना काशीपुरीनाथकालोकालोकनलोलमान
सयुते नेत्रैः पवित्रैः परम् ॥ दृष्ट्वा खलु काशिकां ऽपि कमले विल्वीदलैः कोमलैः काशीनाथकपूजनम्
प्रतिदिनं कर्तव्यमत्यादरात् ॥ ४९ ॥ इत्युक्ताः [कृता] प्रार्थिताः सर्वे पुनाः काशीपुरीं प्रति ॥ पित्रा मात्रापि संयु
क्तास्ते युक्ताः पुण्यकोटिभिः ॥ ५० ॥ तदानीं यः कनिष्ठोऽभूत्तत्कुलः सतु दुर्जनः ॥ नागन्तुमुद्यतः सा
कन्तैः सहातिविदुष्टधीः ॥ ५१ ॥ नाशिवास्थनासक्तः सशालोऽप्यतिदुष्टधीः ॥ तां विलोक्य पिता
प्राह दूरादाहूय दुःखितः ॥ ५२ ॥ सत्यमूर्तिरुवाच ॥ रे रे बालक दुष्टात्मन् का गतिर्भाविनी तव ॥ सर्व

घा बिमुखस्त्वं तु भवानीरमणार्चने ॥५२॥ यः शंभुलिङ्गार्चन तत्परः स्यात्सएव धन्योऽपिसएव मान्यः ॥ मन्ये तदन्यं खलु जारजं वा श्वपाकजं वा शपथः शिवेऽपि ॥५३॥ इत्युक्तन्तद्वचः श्रुत्वासोऽपिनिर्विण्ण मानसः प्राह तं पितरं नत्वा खिन्नचित्तः कृताञ्जलिः ॥५४॥ पुत्र उवाच ॥ नरतिर्जायते नूनं शंकराराधने मम ॥ न काशी नगरीं गन्तुं तद्वीजम्मे वदाधुना ॥५५॥ शंकराग्रे सरस्यापि पुत्रः खल्वाश्मिते तथा ॥ भ्रातरः शंकर एव दौर्भाग्यं किं ममेदृशम् ॥५६॥ किमनेन शरीरेण किं कुलेन धनेन वा ॥ किं विद्ययापि तपसा यदि भक्ति र्न शंकरे ॥५७॥ रुद्राध्यायेनाधुनाप्यस्य भक्तिस्तेनैव शाराधनेनास्य भक्तिः ॥ किं कर्तव्यं किल कर्तव्यमेव म् का वार्ता का वा भामिनी मे गतिर्वा ॥५८॥ चिन्तानैतज्जीवने तावदस्मिन्काये वा मे कायना शोत्तरं मे ॥ कावा का वा यातना दुर्दशा स्यादित्त्येवार्त्तं मानसं किं करोमि ॥५९॥ इत्युक्तन्तद्वचः श्रुत्वा सत्यमूर्त्तिः सुदुःखितः ॥ पत्नीमाहूय तामाह रहस्ये सत्यभाषिणीं ॥६०॥ सत्यमूर्त्तिरुवाच ॥ जारजं प्राह वेदोऽपि मृत्युञ्जय पराङ्मुखम् ॥ शिवाचाररतम्प्राहुरजारजमिति प्रिये ॥६१॥ सदा नवासो मम मन्दिरेषु दुष्टञ्च नारी हृदयं विशिष्य ॥ त्वदीय पापानि नवोदितानि ज्ञेयानि तावत्खलु कार्यहेतोः ॥६२॥ दुर्दैवत्

द्यास्तुविनिर्णयोऽस्य पापञ्च काधुरी गमनञ्च मास्तु ॥ चिन्ताममेयं महती प्रवृत्ता प्राण य प्रयाणाव
धिसर्वथापि ॥ ६३ ॥ इत्याकर्ण्य वचस्तस्य साऽपि पापानुतापतः ॥ कम्पने तम्पतिं प्राह सम्पन्नं शिवनि
ष्ठया ॥ ६४ ॥ नारदोवाच ॥ न यत्नेन कृतं पापं सत्यमद्योच्यते मया ॥ स्वप्ने कोऽपि समालिङ्ग्य स्थि
तो मां दुष्टधीः पुरा ॥ ६५ ॥ ततः पुरुषकृत्यञ्च स्वप्ने वृत्तं ममाद्भुतम् ॥ सस्वप्नो लज्जयानोक्तस्तेन गर्भोऽप्य
भून्मम ॥ ६६ ॥ ततः परमयञ्जातः सुतः शिवपराङ्मुखः ॥ इतोऽन्यन्नाधिकं पापं स्मर्यते न कृत-
म्मया ॥ ६७ ॥ इत्युक्तं तद्वचः श्रुत्वा सत्यमूर्त्तिः सदुःखितः ॥ अशक्यमर्थं विज्ञाय किंकर्तव्यं मयेत्य-
पि ॥ ६८ ॥ ततः परं समाहूय तं सुतं शिवविद्यया ॥ पूतञ्चकार सोऽप्यासीत्तया सप्रतिभस्तदा ॥ ६९
एवं साधिक्षयन्पुत्रान्सत्यमूर्त्ति महामुनिः ॥ उवास सुचिरं गेहे शिवपूजापरायणः ॥ ७० ॥ ततः कदा
चित्सुतः शिवपूजापरायणः ॥ आमध्याह्नं वने स्थित्वा गृहं गन्तुं समुद्यतः ॥ ७१ ॥ तदानीमुक्तः
कोऽपि पतङ्गः समुपागतः ॥ पतङ्गमण्डलं भित्त्वा पतङ्गाच्छादनक्षमः ॥ ७२ ॥ पतङ्गमस्तंगतमेव मेने
प्रदोषकालीयमिति भ्रमेण ॥ संकल्प्य पूजां स चकार तीव्रं गतः स्वगेहं प्रति शैववर्यः ॥ ७३ ॥ तस्मिन्न

तेसमुत्थायनासनं प्रददौ सती ॥ तस्मै मध्याह्नपूजायां निरता तस्य भामिनी ॥ ७४ ॥ तदानीन्तांविलो
क्याह सायङ्कालोऽयमागतः ॥ विधेयं पूजनं शम्भो सम्पाद्य जलादिकम् ॥ ७५ ॥ इति तद्वचनं श्रुत्वा
साध्वीशिवार्चनतत्परा ॥ नोत्थितानन्नभावे च विभूति परिभूषिता ॥ ७६ ॥ तदानीं प्राह तांकुद्धः शापंदा-
स्यामिसत्वरम् ॥ गृहाणेति तदा प्राह तत्पिता तांविलोकयन् ॥ ७७ ॥ सत्यमूर्त्तिरुवाच ॥ इदं मध्याह्नस
मयोऽशिवार्चनपरा सती ॥ त्यक्त्वा शिवार्चनंतुभ्यमभ्युत्थानरतापि न ॥ ७८ ॥ न सायङ्काल पूजायाः समयो
यमुपागतः ॥ भ्रान्त्यासमागतन्तावदधुना तव विभ्रमः ॥ ७९ ॥ इयंशिवार्चनेयुक्ता तद्विघ्नाचरणेधमे ॥
पापं प्रत्युत ते भावि शापशक्तिः कुतेवद ॥ ८० ॥ शिवार्चनात्परो धर्मो नास्ति न भूयते ऽपि च ॥ तदर्च
नपराः सर्वे माननीयाः विशेषतः ॥ ८१ ॥ पति पूजाव्रतन्तस्याः पतिर्विश्वपतिस्ततः ॥ पतिव्रताव्रत-
त्यागं कथं वा कर्त्तुमिच्छति ॥ ८२ ॥ पतिव्रतायां शापोऽपि दत्तः स्याद्विफलः सुत ॥ सशापः स्वापकारा
य प्रत्युतस्यादध्रुवं संशयम् ॥ ८३ ॥ इति तद्वचनं श्रुत्वा तम्प्रणम्य गुरुं सुतः ॥ सायंकालः कथन्नाय
मित्याहान्यदपि स्मरन् ॥ ८४ ॥ सत्यमूर्त्तिरुवाच ॥ पतङ्गोऽयम्पतङ्गस्य छायया परमारतः ॥ पश्यपश्

य पतङ्गं त्वंयेनाभूत्त्वं विभ्रमः ॥ ८५ ॥ एतावदपि नाबुद्धं तात त्वया पुंभ्रमादिह ॥ कथं शापप्रदानार्थमु
द्यतोऽस्याविवेकतः ॥ ८६ ॥ इति तद्वचनं श्रुत्वा साश्चर्यः पितरं सुतः ॥ कः पतङ्गोयमित्याह सतमाह
पुनर्द्विजः ॥ ८७ ॥ अयं पूर्वभवेराजा सर्वभूमण्डलाधिपः ॥ महदैश्वर्यसम्पन्नः सर्वसौभाग्यसंयुतः ॥
॥ ८८ ॥ कलत्राणां सहस्रेण सोऽयंसंसेवितो नृपः ॥ शिवार्चनरतास्तस्य सर्वे दाराः प्रयत्नतः ॥ ८९ ॥
नृपः कामातुरोनित्यं दाराभोगार्थमुद्यतः ॥ सतु धर्ममधर्मं वा न जानाति विशेषतः ॥ ९० ॥ तदानी
म्मुद्गलोनाम कश्चिदभ्यागतोमुनिः ॥ तं दृष्ट्वा स नृपस्तूष्णीं स्थितः शिवपराङ्मुखः ॥ ९१ ॥
ततस्तस्य कलत्राणि तं दृष्ट्वा मुनि पुंगवम् ॥ शाम्भवत्वं विदित्वापि प्रणताः शिवतत्परम् ॥ ९२ ॥
राजदारान्विलोक्यायं हारान्हारविभूषणान् ॥ रुद्राक्षभूति पूताङ्गान प्रणतः परयामुदा ॥ ९३ ॥ अ-
हो भाग्यमिदं दृष्टं नारीणामपि शंकरे ॥ कथं प्रीतिरुमाकान्ताराधनायोद्यता अमी ॥ ९४ ॥ इति तद्व
चनं श्रुत्वा तं मुनिं ता नृपाङ्गनाः ॥ अर्घपाद्यादिभिस्तुष्टं चक्रुरादर पूर्वकम् ॥ ९५ ॥ ततस्तमूचुस्ताः
सर्वाः शिवपूजापरायणम् ॥ धर्मः कोवा वदास्मभ्यमिति वेदाविनोश्चितः ॥ ९६ ॥ मुद्गल उवाच

पति पूजापरो धर्मो दाराणान्तु विशेषतः ॥ पुरुषाणाञ्च सर्वेषां पतिर्विश्वपतिः शिवः ॥ ९७ ॥ तं विश्वप
तिमेवेशं पतिं मत्वा पतिव्रताः ॥ पूजयन्ति प्रयत्नेन स्तुवन्त्यनिशं मुदा ॥ ९८ ॥ शिवपूजापरो धर्मः त-
त्यागादेव सर्वथा ॥ बहुपापालयो भूत्वा नरो नरकमश्नुते ॥ ९९ ॥ योयं पतिव्रताधर्मो महेशार्चनलक्ष
णः ॥ तस्यागालरक्षकाणासो भवत्येव न संशयः ॥ १०० ॥ शिवापतिः पतिर्भर्त्ता माता बन्धुः सखा सुहृ
त ॥ अतस्तत्पूजनं धर्मः परमः परिकीर्त्तितः ॥ १ ॥ येये पतिव्रताधर्माः श्रुतास्ते शाम्भवाः परम् ॥
यतः परः पतिः शम्भुः ॥ तद्व्रतं शिवपूजनम् ॥ २ ॥ केचित्कान्तं पतिम्प्राहुः सतावदति लौकिकः ॥ न त
स्य सेवया मुक्तिः स यतः पामरो नरः ॥ ३ ॥ न पामरनरप्रीत्या परलोको भविष्यति ॥ परन्तु पुत्र सम्पत्ति
र्मात्र सामान्यकारणम् ॥ ४ ॥ पुत्रोत्पादकता प्राप्तिरपि तस्य न सर्वथा ॥ साप्राप्तिः शंकरस्यैव ततः
स पतिरुच्यते ॥ ५ ॥ तदुत्पादक सामान्यं पतिं यदि वदन्ति ते ॥ तद्योनिस्तत्पतिः किं न तद्भोपि पति
र्नो किम् ॥ ६ ॥ तस्मात्पुत्रोत्पादकः शंकरोऽतः भर्त्ता सोऽयं विश्वभर्त्ता महेशः ॥ तत्पादाब्जाराधनन्तद्व्रतं स्या
त्पातिव्रत्यं तेन सिद्धं व्रतेन ॥ ७ ॥ इदन्तत्त्वमविज्ञाय या नारी धवसेवनम् ॥ करोति पति बुद्ध्या सा

२२१

शिवरह० २५२

नाश्नुते सुखमक्षयम् ॥ ८ ॥ अक्षयस्य सुखस्याशु दाता शंकर एव सः ॥ तस्मात्तद्दर्शनं कार्य्यं तद्व्रतं परम-व्रतम् ॥ ९ ॥ तेनैवाहि व्रतेनाशु संसारविषशोषणम् ॥ अतस्तद्व्रतमुत्कृष्टं नारीणाञ्च विशेषतः ॥ १० ॥ इति तद्वचनं श्रुत्वा राजदाराः परं मुनिम् ॥ पूजयामासुरर्घाद्यैः सुवर्णैरपि कोटिशः ॥ ११ ॥ ततः परं मुनिः सोऽपि पतिव्रतपरायणान् ॥ दारान्दृष्ट्वा प्रहृष्टः सन् प्रययावाश्रमं स्वकम् ॥ १२ ॥ ततः परं स राजापि तं गतं मुनिपुंगवम् ॥ श्रुत्वा समागतो गेहन्दारानाह स शांकरान् ॥ १३ ॥ राजोवाच ॥ किमेतेन कृतम्प्रेष्या मुनिनापरिभाषणम् ॥ तस्मै किमर्थं रत्नानि दत्तानि विविधान्यपि ॥ १४ ॥ एतादृशाः समायान्ति बहवोऽपि वनात्परम् ॥ तेभ्यः किं रत्नकोशोऽपि देयस्त्व निजेच्छया ॥ १५ ॥ अतः सुरतकालोपि भवद्भिर्लिङ्गपूजया ॥ कालो विनीयते सर्वः किमेवमुचितं प्रियाः ॥ १६ ॥ इति तद्वचनं श्रुत्वा ते सर्वाः प्येकदा परम् ॥ दारास्तमूचुर्धिग्धिक्ते जन्म शर्वपराङ्मुखम् ॥ १७ ॥ मध्याह्नसमयः सोऽयमधुना शिवपूजनम् ॥ कर्त्तव्यमतियत्नेन किन्त्वेन सुरतेन नः ॥ १८ ॥ पतङ्गोऽपि न मध्याह्ने करोति सुरतं खलु ॥ ततोऽप्यधम एवत्वं कोवा तत्र रसस्तव ॥ १९ ॥ गच्छ गच्छ त्वमधुना पातङ्गत्वं प्राप्य क्वापि यथेच्छया ॥ इति शप्तो दारैःप्रतो तस्य

ह०त०उ० अ०४४

तज्ज्ञात्व मुख मुपागतः ॥१२०॥ स सञ्चरति सर्वत्र लोकानां मोहमावहन् ॥ सायंकालभ्रमो व्यर्थ तस्मादीय क्रियया तव ॥१२१॥ अस्मिन्सन्ध्याह्नसमये शीलयुजां पतिव्रता ॥ करोत्येषा क्व ते शापो लगत्यस्यां विशेषतः ॥२२॥ पतिव्रतां व्रतोद्युक्तां यदि शप्तुं समुद्यतः ॥ तदा तवैव शापो ऽसौ वृथा भवति पुत्रक ॥२३॥ पतिव्रताना म्व्रतसाधनानि सम्पादनीयानि मनोहराणि ॥ देयानि तैरेव पतिः पतीनां प्रीतो भवेद्विश्वपतिः प्रभूतः ॥२४॥ अहो न जानाति विमूढ चित्तः पतिं पतीनाम्परमेश्वरं तम् ॥ अज्ञातवेदान्तविचारशाखिः सपापशाखिः खलु दुःखशाखिः ॥२५॥ अपतिञ्च पतित्वेन मत्वा काश्चित् भजन्ति तम् ॥ न तेन सौख्य वार्तापि परलोके विशेषतः ॥२६॥ भूलोकेऽपि सुखानि तावदनिशं दास्यत्युमावल्लभो भक्त्या पूजित एव भूति निचितैः भावैः परं भावितः ॥ भर्गो भाग्यदमादुरन्तक रिपुं मोक्ष प्रदाता मुहुः ॥ ततः सर्वेषाम्पतिरित्यवैमि सपतिः सर्वस्वचूडामणिः ॥२७॥ निमित्तसामान्यमिदं वपुस्ते भर्तापरं शङ्कर एव सत्यम् ॥ त्वत्तः सुखांशोऽपि न तावदस्याः सम्भावितः सत्यमिदं वदामि ॥२८॥ एवं सत्यपि नारीणाम स्वातन्त्र्यं प्रकल्पितम् ॥ एकाधीनतया स्थेयामिती शेन महात्मना ॥२९॥ तदप्यलौकिक

न्नैव किन्तु लौकिकमित्यतः ॥ तूष्णींय स न पूजापस्ते तस्यां लगति सर्वथा ॥ ३०॥ विश्वेश्वराज्ञाविरहे
कथं वा प्रवृत्तिलेशोऽपि तवाधुना स्यात् ॥ ततस्तमीशं शरणं प्रयाहि विहाय मोहं मुहुरादरेण ॥ ३१॥
शिवव्रतघ्नो नरकं प्रयाति तथा च सा तद्व्रतमालमिष्टा ॥ ३२॥ श्रेष्ठेति मत्वा विहितस्त्वकृत्वा वसाधुना
शंकरमन्दिरे स्मिन् ॥ अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥ ३३॥ वेदविण्डिरवाकारं कुमारश्रृणुसादर
म् ॥ पुरानिवध्य देशेषु कुण्डिनं नाम पत्तनम् ॥ तद्विप्रजन संकीर्णं राजमण्डलमण्डितम् ॥ ३४॥ निवध्येवास्य
येदारास्तेषु केचन शांकराः ॥ ३५॥ ते शांकरा राधनेन नयन्ति समयं मुहुः ॥ यावदेव स्वभोगार्हं वसना
न्नादिकल्पनम् ॥ ३६॥ तत्सर्वमीश पूजार्थं कुर्वन्त्यत्य न्तयत्नतः ॥ तदर्पितं महेशायतद्भुक्त्वा के
वलं सुखम् ॥ ३७॥ सम्प्राप्य कालनयनं कुर्वन्ति शिवपूजया ॥ सुरते नरतिस्तेषां यथा शंकरपूजने
॥ ३८॥ भोगान्तरेऽपि न रतिस्तद्वति शिवपूजने ॥ पुष्पाण्यपाराणि पि चन्दनानि समर्पितान्ये
व महेश्वराय ॥ गृह्णन्ति निर्माल्यधिया गृहीत्वा धृत्वा शिरस्येव वसन्ति नित्यम् ॥ ४०॥ तेषान्न
कार्यान्तरमस्ति किञ्चित्प्रातः समारभ्य शिवार्चनेन ॥ कालो विनीतः सनिशावसानं यावत्पुनः

एवं शैवाचार रतान् विलोक्य ॥ दारान् स राजाऽध्याति विस्मयेन ॥

शंकर पूजनं स्यात् ॥ ४१ ॥ तच्चित्तवृत्त्या परिवर्तमानो ह्यौ सस्र्वस मुदार बुद्धिः ॥ यद्दत्तं तेन राज्ञा प्रसूनं रत्नं

दिव्यं भूषणं वा दुकूलम् ॥ ४२ ॥ तत्तद्दत्वा शंकराया ति भक्त्या दत्तन्ताभिः शांभवेभ्यो विशेषात् ॥ तद्दत्ता-

नि वसूनि यानि विविधान्यास स्याद्यते शांकराः ॥ ४३ ॥ सर्वे यान्ति गृहान्युदास नृपति ईक्ष्याति हृष्टस्तदा

मङ्गाग्यन्त दिदं महत्तरमिति ज्ञात्वा तद्दात्याददरात् ॥ ४४ ॥ दारेभ्यः स वसूनि शंकरपदांभोजार्चकेभ्यः

परम् ॥ अथ शांकराश्च तद्दाराः केचित्से तत्सेवयापरम् ॥ ४५ ॥ वर्जयन्त्यापि ते तावद्भर्तारं शंकरार्चकैः

॥ ४५ ॥ सुरतादि प्रदानेन नयान्ति समयं मुहुः ॥ ४५ ॥ एतत्सुरति दानेन पादसंवाहनादिना ॥

नेयः काल इति ज्ञात्वा तिष्ठत्येवाति पामराः ॥ ४६ ॥ वर्जयन्त्यपि ते तावद्भर्तारं शंकरार्चकैः ॥ दारैः

प्रीतिर्न कार्येति धनव्यभिचयापरम् ॥ ४७ ॥ यद्दत्तं धनमस्मभ्यं तद्दागारेषु तिष्ठति ॥ हारदारधनं

सर्वं हारैर्नीतं परन्तप ॥ ४८ ॥ इति तद्वचनं श्रुत्वा स राजा परिवर्जयन् ॥ तांस्तथा नैव नत्कुर्यामिति ताव

दुदारधीः ॥ ४९ ॥ एवन्नीतः कियान्कालस्तेन राज्ञा कदाचन ॥ हारदारानुपागत्य प्राह मंद विनोदतः ॥

॥ १५० ॥ राजोवाच ॥ प्रष्टव्यमेकमधुना प्रियास्तावद्वदन्तु मे ॥ संगोपनं विना सर्वं भक्तिश्चास्तु भवत्सु मे ॥

शिवरह०
२५४

॥५१॥ भवतां किं प्रियन्तावद्धक्तव्यं निर्विघ्नेपतः॥ तत्सर्वमपि कर्तव्यमत्र नास्त्यापि डम्बना ॥५२॥ यद्देवशि वपूजार्थे यदास्यात्समपेक्षितम्॥ तत्सर्वमपि दातव्यन्दुर्लभं वा भवेद्यदि ॥५३॥ न स्वर्गलोकपर्यन्त मप्राप्यं मम सर्वथा॥ यद्देवापेक्षितं वस्तु तदानीय दीयते ॥५४॥ विनीत एव कालोऽपि भूयाच्छङ्क रपूजया॥ विरतिर्नकदाप्यत्र भवतामुपजायते ॥५५॥ दाराणां प्रायशः पुत्रेष्वपेक्षा भवतीत्यपि श्रूयते तदुपासा किं भवतां लोपजायते ॥५६॥ किञ्चाङ्गेष्वतिरम्येषु शिवनिर्माल्यचन्दनम्॥ शिवार्पितम्भूषणं वा नकदापि हि दृश्यते ॥५७॥ न पुष्पमालिका दृष्टा शिवलिङ्गसमर्पिता॥ कं कु च तटे हारो न रत्नमणिमण्डितः॥५८॥ भूत्यापरं भूषितानि दिव्यान्यंगानि सर्वथा॥ रुद्राक्षमालिका भिश्च किमेवमुचितम्भवेत् ॥५९॥ चन्दनं मे मीयते भूतिः शिवलिङ्गसमर्पणे॥ तेनाङ्गानि नलिप्तानि कथं किं दूषणन्तदा ॥६०॥ नाशिवार्चनकालेषु युक्तं चन्दनलेपनम्॥ पूजान्ते लेपने दोषो नश्रुतः श्रुतिभिः खलु ॥६१॥ नरत्नाभरणानां च धारणे दूषणं स्मृतम्॥ शिवार्पितानि धार्याणि भूषणान्यपि तानि किम् ॥६२॥ भुज्यते शिवनैवेद्यमिति बुद्ध्या शिवार्पितम्॥ इदानिं भंतादिच्छा-

ह०त०३
अ०५४

मि प्रायशो न भविष्यति ॥ ६३ ॥ वृत्तं महद्भाग्यमिदं शिवेन कस्योपभोगाय मयैवम् ॥ कर्तुं कथं स्यादुचि
तं कदा वा भोगो भवेद्रत्नविभूषणानाम् ॥ ६४ ॥ इति तद्वचनं श्रुत्वा मन्दहास पुरःसरम् ॥ मन्दमाहुर्विचार्यै
व विनोदै रत्नमित्यपि ॥ ६५ ॥ जन्म प्राप्तं भूरिपुण्यैर्भवेऽपि भक्तिर्जाता यस्यापि भाग्यानि सन्ति ॥ नूनं किं
वा पूंकराराधनेन नेय स्तावत्काल इत्येव मन्ये ॥ ६६ ॥ किं रत्नाभरणैर्विचित्रवसनैः किंचन्दनैर्वा फलैः ॥
स्रग्भिर्वा शिव पूजनेन तु परं स्वान्तं प्रशान्तं मुहुः ॥ ६७ ॥ सन्तुष्टं खलु सन्ततं शिवपदांभोजार्चनैः केवल
म् ॥ नेयंमेव इत्यवैमि न सुतैः कृत्यं क्वचिद्दृश्यते ॥ ६८ ॥ अस्माकं परलोकसाधनमिदं भूतिः परं भूषण
म् ॥ रुद्राक्षामल कंकणादि कलिता तावत्तनुस्तावता ॥ श्रीपञ्चाक्षरकीर्तनेन रसना पीयूषवा
र्त्तामपि त्यक्त्वा तिष्ठति निष्ठुरस्य हृदयं शंगान्यदेवेष्वपि ॥ ६९ ॥
अस्माभिः पतिरिन्दुशेखर इति ज्ञातः पतीनां पतिः ॥ देवानामपि देव एव स महादेवो धवो माधवः
पूज्यः स्यादनिशं शिवार्चनमिदं तावद्व्रतं देहिनाम् ॥ अस्माभिश्च पतिव्रताभिरधुना शर्वः पतिः
पूज्यते ॥ ७० ॥ अतः परलोकस्यापि जन्मवार्त्ता कृतान्तवार्त्ता व्यातिदूरतः स्यात् ॥ कायव्यपायोऽपि-

२२

शिवर० २५५
२५५

शिवार्चनेन सम्भावनीयो नियमेन नूनम् ॥ १७१ ॥ भ्रान्तिं मा कुरु सर्वथापि महिला देहेषु गेहेषु वा
दोषा नेव विचिन्त्य सन्तत मुमा कान्तं प्रशान्तं भज ॥ १७२ ॥ तत्पादाम्बुज चिन्तनेन तु सुखं प्राप्त
यमेवाक्षयं द्राक्षा नीरमवाप्य न क्षणमपि क्षारञ्जलं वाञ्छति ॥ १७२ ॥ धन्यस्त्वं रिपु मौलि म
लालित पदांभोजोऽसि हारोस्यतः शम्भुः पूर्वभवेषु तावदसकृत्वावत्वदाराधितः ॥ जन्म प्राप्तमिदं
समस्त विभव प्राप्त्यै परं हारताम् ॥ प्राप्यार्धेन्दु शिखामणिं भज निजोपायैरपारै विना ॥ १७३ ॥
ऐश्वर्यं यदिहास्ति तेन गिरिशं भक्त्या समभ्यर्चय प्रीत्या शंकर पूजनं कुरु धनैरीशार्पितैः
केवलम् ॥ १७४ ॥ शम्भुस्तमभ्यनुमेत्य स्वयं सकलं गृह्णाति रत्नादिकं [illegible] चरालिङ्गमित्यपि पर
न्तं शाम्भवं शंकरम् ॥ उत्पन्नास्तव ते सुता अपि तथा तिष्ठन्तु किं तैः फलं यावत्ते सुदृढं शरीरम
सकृत्तावच्छिवाराधनम् ॥ १७५ ॥ कर्तव्य न तव राज्य भार विगमापायोऽपि शर्वार्चनं तत्सर्वार्थ [illegible]
त्यैनेभि बहुधा सत्यं हितं चोदितम् ॥ १७६ ॥ शरीरमपि नायाति मरणानन्तरम्परम् ॥ शिवार्चना
र्जितम्पुण्यं सहायास्यति केवलम् ॥ १७७ ॥ न पुत्रैर्वा कलत्रै र्वा तव कृत्यं नराधिप ॥ परलोकहितन्त्वा

ह० त० अ० ४

वत्सततं चिन्तयाधुना ॥ ७८ ॥ मृत्युञ्जयाराधनमेव कार्य्यमतः परं मृत्युजयाय राजन् ॥ जन्मान्यतीतानि बहूनि भूवान्ति तावज्जितो न मृत्युः स कदापि नूनम् ॥ ७९ ॥ शौर्य्यञ्च तावत्सफलं तवस्यात् मृत्युर्यदि स्यात्साजितस्त्वयापि ॥ जेयः सशूरो नाजितोऽपि लोके ॥ केनापि तेनापि समो न लोके ॥ ८० ॥ दृष्टव्यन्तव शौर्यमप्यतितरां शूरः समृत्युर्यतो दुर्जेयो यदि वाजितस्तव तदा शौर्य्योत्सवो दृश्यते ॥ किं शौर्य्यमशक्क्षयेण सफलं सिंहोरु देहक्षये ॥ शुल्कञ्चेत्सफलं तदित्यभिमतं नोचेद्वृथा तत्खलु ॥ ८१ ॥ मृत्योरप्यधुना जयाय विमलं बिल्वीदलं साधनम् ॥ गङ्गातुङ्गतरङ्गभंगकमलं दूर्वाङ्कुरैर्वा मुदा ॥ शङ्करायाद्य समर्पितं गिरिशिमहाभूतापिमाध्वीः कुहुः भोक्तव्यं तदनन्तरं खलु महामृत्युः सभीतो भवेत ॥ ८२ ॥ पुण्यैरेवसमागता शिवतिथिः सेयञ्जलं वात्वया पेयन्नाद्य शिवार्चनं कुरु मुहुर्हारैः परं संवृतः ॥ भाग्यन्ते बहुदेयमद्य धनमप्यन्नादिकं सर्वथा हारेभ्यस्तवतावदुत्तमधुना सर्वं हितं केवलम् ॥ ८३ ॥ एतास्मिन्वररत्न मण्डलगृहे लिङ्गे गतितुङ्गे मुदा रत्नैः पूजय नूतनैरगणितैर्हीरैरपारैरपि ॥ रत्नालंकृतभूषणैरपि मुदा कस्तूरिका कर्दमैः पाटीर द्रवसागरैरपि मुहुः पुष्यैरपारै

रपि ॥ १८२ ॥ इति श्रीशिवरहस्ये हरारव्ये तृतीयांशे उत्तरार्द्धे पुण्यमूर्त्ति रत्नाकर संवादोनाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ भृगुरुवाच ॥ इत्यापारनिजोदारदार वाक्य सुधांमुहुः ॥ पीत्वा प्रीतिं परां प्राप प्रपामिव तृषातुरः ॥ १ ॥ ततः परं सभूलायां भूति रुद्राक्ष भूषणः ॥ चकारपूजनं शंभोर्लिङ्गे बहुविधै र्धनैः ॥ २ ॥ यावत्तेनार्जित द्रव्यं तावत्सर्वं समर्पितम् ॥ लिङ्गे तच्छंभवेभ्यश्च दत्तं बहुविधन्धनम् ॥ ३ ॥ अपारैः शिव नैवेद्यै रपाराः शांकरा अपि ॥ भूषितास्तेन भूपेन तोषिताश्चन्दनादिभिः ॥ ४ ॥ ततः परन्दारहारमान्दिरे सुन्दरेनृपः शिवोपहारै रुदरं पूजयामास सादरम् ॥ ५ ॥ हारदारैश्च तैर्भुक्तं शिवनैवेद्यमादरात् ॥ शिवापि तं बिल्वपत्रं भक्षितम्पुण्यसाधनम् ॥ ६ ॥ तदानीन्तत्कृतन्दृष्ट्वा हारदारान्वितन्नृपम् ॥ नन्दिकेशं समाहूय प्राह गौरीमनोहरः ॥ ७ ॥ शिव उवाच ॥ नन्दिन्निषध्यदेशे शोमहाभूताव्रतादरः ॥ सदारः सममानेयो विमानेनाति सत्वरम् ॥ ८ ॥ इत्युक्तं शांकरापारं व्याहारकलनान्मुदा ॥ जगाम सत्वरन्नन्दी विमानवरमाश्रितः ॥ ९ ॥ गत्वा सनन्दी भूपाल नगरं सुमनोहरम् ॥ विवेश मन्दिरन्तस्य रत्नम

४ पृ.४— नन्दी तत्कृत पूजयाति मुदितो राजानमाह्वादरात्॥ "ततस्तत्र विमानमध्य भवते शंगेन संशोभितं॥

ण्डलमण्डितम् ॥१०॥ लिङ्ग कोटि समाकीर्णं रत्नतोरण संयुतम्॥ हारद्वार समाकीर्णं ~~हारद्वार समायुतम्~~॥ राज्ञा पि समलङ्कृतम् ॥११॥ ततः परं सा लिङ्गानि पूजयित्वा प्रयत्नतः॥ पञ्चपञ्चलिङ्गान्यपूर्वाणि स्थितः सम्पूज्यतानि सः॥ ततः परं स राजापि हारद्वारसमावृतः॥ प्रणतोऽपि कृतार्थोऽस्मि धन्योस्मीति वदन्मुहुः ॥१३॥ ततः परं रत्नरम्ये स्वर्णसिंहासने नृपः॥ उपविष्टो नन्दिकेशं पूजयामास सादरम् ॥१४॥ आरूढो भव हारद्वारसहितो तुष्टस्तदभ्यर्चितो भूतायां गिरिराजराज तनया कान्तोऽनेतान्तन्नृप ॥१५॥ इत्याकर्ण्य सहारदारसहितो राजाति तुष्टस्तदा॥ तत्रारुह्य ययौ तदा समभवत् मन्दारवर्षैर्मुहुः ॥१६॥ तूर्याणां ध्वनयोऽपि तावदसकृत वृत्ताः प्रवृत्ताः सुरैः॥ उत्साहोऽपि कृतोऽहि दुन्दुभिरवै देवाङ्गना नर्तनैः ॥१७॥ तत्र प्रस्थितं समालोक्य विमानवरसंस्थितम्॥ अश्वीवदारास्तम्प्राहुः तस्यैवातिमनोहराः ॥१८॥ अश्वीवदारा ऊचुः॥ सेवाकृताप्यबुधिया बहुधा तव सादरम् ॥ अतः परं गतिः का वा वदास्मभ्यन्नृपोत्तम ॥१९॥ पतिव्रतानां पतिरेव देवस्त्वत्सेवया सर्वनिवासासिद्धिः॥ इति श्रुतं तेन शिवार्चनेन प्रीतिर्नजाने विफलञ्च जन्म ॥२०॥ पतिः पतीनां गिरिजापतिर्यः सना-

र्चितोनानु विलोकितोऽपि ॥ नाकर्णितो वा नकथा श्रुता वा त्वत्सेवनात्यादरतोऽपिमोहात् ॥ २१ ॥
प्रतारितास्मो द्विज भामिनीभि भ्रान्ताभिरीशान पराङ्मुखाभिः ॥ भर्तर्नरश्रेष्ठमसेवतीति"हा हा हता
स्मः किमतः परं वा ॥ २२ ॥ स्वंप्रलपमाना सुमहिलासु सम्भूपतिः ॥ जहौ रत्नमयीं रज्जुन्तदाकर्षण
तत्परः ॥ २३ ॥ रज्जुं तां समुपादाय महिलास्तस्य तास्तदा ॥ बध्वा कण्ठे दृढं वाते विहता स्ता ययुस्त
तः ॥ २४ ॥ दृष्ट्वा तद्रज्जुसम्बन्धाश्चालिताश्च्यातिवाततः ॥ यमो विलोक्य बलेन द्वारेण चित्र
गुप्तमुवाच सः ॥ २५ ॥ यम उवाच ॥ यमन्तराले चालिताः सूक्ष्मरज्जु समाश्रयाः ॥ तासां किमास्ति वृत्ता
न्तामिति प्राहातिविस्मितः ॥ २६ ॥ चित्रगुप्त उवाच ॥ यः पारिभाषिको भर्ता नरस्तस्य परं कृता ॥
सेवा ताभिर्विभ्रभर्त्ता न कदाप्यर्चितो यम ॥ २७ ॥ हारश्च दारा बहवो नृपस्य"तैरान्वितो याति विमान
मध्यम ॥ आराधितः शंकरलिङ्ग पूजा प्रभावतः शंकर मन्दिराय" ॥ २८ ॥ इति तद्वचनं श्रुत्वा प्रे
षयामास किंकरान ॥ यमस्तद्वारणायाशु ताडनायापि वाउवान ॥ २९ ॥ ततः परन्तु तैरूर्ध्वं गतं वेगेन
वाडवैः ॥ छिन्नारज्जुर्निपातितास्ताः सर्वाः भ्रम मन्दिरे ॥ ३० ॥ अतिप्रलपमानास्ताः सर्वा विला

ननास्तथा ॥ यमकोपाग्निना तावन्मेचका इव संस्थिताः ॥ ३१ ॥ तद्दुर्दशां विलोक्यैव हारदारसमन्वितः ॥
नन्दिकेशमुवाचेदं वचनं भूपतिस्तदा ॥ ३२ ॥ निषध उवाच ॥ पश्य पश्य मदीयास्ते यमदूतनिवारि
ताः ॥ विच्छिन्नरज्जुबन्धाः किं यमान्तिकमुप मुपागताः ॥ ३३ ॥ नन्दिकेश्वर उवाच ॥ विश्वभर्त्ता महा
देवो यदि नाराधितस्तदा ॥ कुथं वा सुखलेशोऽपि वद राजन् विचार्य माम् ॥ ३४ ॥ तवापि नात्रागम
नं प्रभूस्त्वं तद्योगतो यद्यपि सर्वथापि ॥ तथापि भूता व्रततस्त्वादभ्यागतोऽसि त्रिपुरारिमार्गम् ॥
॥ ३५ ॥ एतैः सुहृद्भिर्हारदारैः समेतैर्दैवादेतत्साधुसम्भाषणेन ॥ भूतानीता शंकराराधनाद्यैरेतैरासी
दुत्तमा ते गतिश्च ॥ ३६ ॥ अशांकराभ्यागमनं कदाचित्कैलासमार्गे नृप भर्ग मार्गः ॥ स्वर्गापवर्गा
वति दुर्गरूपो यतः सुराणामपि दुर्गमोऽयम् ॥ ३७ ॥ नान्यैर्धर्मैर्याति कैलासमार्गं धर्मा
भासैस्तैरिदं भाग्यमेव ॥ किम्प्रातव्यं शंकराराधनेन प्राप्यं भाग्यं केवलं दुर्लभत्वात् ॥ ३८ ॥
रज्जुर्दत्ता यात्वयातन्निरासः कर्तुन्तावन्नाभवद्बुद्धिरस्य ॥ दृष्टव्यं किं कौतुकं भावि तावन्मार्गे
तस्मिँल्लिप्यवैहि त्वमाद्ये ॥ ३९ ॥ तत्किन्दृष्टं कौतुकं पश्य पश्य लक्ष्यार्थीणां दुर्भगाणां विशि-

ष्य ॥ कालक्रोधान्मेचकारतान्ता: ॥ प्राप्ता: सर्वा: शर्वपूजाविहीना: ॥ ४० ॥ येनार्चयन्ति भगवन्तमशा
न्ताचित्ता: स्वान्ते निधाय विधिना गिरिजासहायम् ॥ मृत्युञ्जयं सदयमागमवृन्दमेयं तेषां कथम्भव
ति शोभनवृन्दवार्त्ता ॥ ४१ ॥ ममापि शक्ति: कथमिन्दुमौलि प्रसादलेशेन विनापि तासाम् ॥ श्रीभर्गमा
र्गेष्ववलोकनेन वार्त्तापि तावत्सहदूरत: स्यात् ॥ ४२ ॥ तासान्न तावन्नयनं विमानवरेण नूनं कुपि
त: प्रभु: स्यात् ॥ प्राप्नु: स्वतन्त्रो न भयामि ताभि: कार्यन्न किञ्चित्तव याममापि ॥ अपारजन्मार्जित
पुण्यराशिर्य एव लोके स परं महेशम् ॥ प्राप्नोति नान्य: खलु ताभिरीशो नाराधितो नो नयनं कथं वा
॥ ४४ ॥ कदापि नाराधितमेव लिङ्गम् दृष्टञ्च भक्त्या न नतञ्च ताभि: ॥ अत: कथं वा नयनञ्च तासां कै
लासदेशे श्रुविनातिदेशे: ॥ ४५ ॥ शिवातिदेशेन विना न कार्यं कृतङ्कदापि त्वरयाम याऽपि ॥ अत:
परं सा नमतापि वार्त्ता नेतुं प्रयत्नोऽपि वृथा तदा स्यात् ॥ ४६ ॥ यमोऽपि तावत्कठिनो वचो मे दूरान्निराकृत्य
निजाधिकारे: ॥ तद्यातनामेव करिष्यतीति न तेन वक्तव्यमति प्रियं वा ॥ ४७ ॥ प्रियोक्तिभि: किं सवशी
कृत: स्यान्महेश वराज्ञापरिपालनेन ॥ यमो न कस्यापि वशो वशीच तस्माद्वशीवाशनिरेव काल: ॥

॥४८॥ इति तद्वचनं श्रुत्वा स राजाप्यतिविस्मितः ॥ तं प्रणम्य मुहुर्भक्त्या नन्दिकेशमुवाच ह ॥४९

॥ राजोवाच ॥ आहूय कालो वक्तव्यः तासां मास्त्विति यातना ॥ यद्यप्येवं तथा युक्तिस्त्वदीया श्रूयते
नंदिकेश्वर उवाच ॥
मया ॥५०॥ आहूयते यमः पश्य तदुक्तिं शृणु सादरम् ॥ सत्यमूर्त्तिरुवाच ॥ इत्युक्त्वा प्रेषयामास
नन्दिकेशः स्वकिंकरम् ॥ स कृतान्तान्तिकं कालः समानेय इति स्फुटम् ॥५१॥ स गत्वा प्राह तङ्का
लं कालागमनमिच्छति ॥ नन्दिकेशो विमानस्थः ॥ पश्य पश्याधुनायम ॥५२॥ इति तद्वचनं
श्रुत्वा यमोऽभ्युत्थाय वेगतः ॥ चित्रगुप्तादिभिः सार्कं नन्दिकेशान्तिकं ययौ ॥५३॥ गत्वा
प्रणम्य तं भक्त्या यमः प्राह कृताञ्जलिः ॥ आज्ञापयाशु मां स्वामिन् वद कार्यं ममेत्यपि ॥५४॥
नन्दिकेश्वर उवाच ॥ राज्ञः किलास्य महिला तास्त्वत्क्रोधानलाहताः ॥ तासामतः परं मास्तु
यातना मयि चेत्कृपा ॥५५॥ इति तद्वचनं श्रुत्वा यमः क्रोधाकुलोऽपितम् ॥ प्राहाति विस्मया
पन्नो वचनं विस्मयापहम् ॥५६॥ यमोवाच ॥ किमेवमाज्ञाप्युचिता तवाद्य कालान्तकारान्त
मन्तराकिम् ॥ सम्भावितं स्यात्सुखमन्तरायः तस्येश पूजाविरहो महान्हि ॥५७॥ इन्द्रादिका-

शिवरह० २५९

नाङ्गणे ना नयस्य यमस्य मे शंकर भक्तवर्य ॥ नकोपि लोके गणनीय एव विनाशिवाचाररतं प्रकृ
ष्टम् ॥ ५८ ॥ महेश्वराज्ञा वचनैस्तदुक्तैः ॥ वेदस्वरूपैरमितैः स्मृतैर्मे ॥ अत्रैव लोके प्रलयानलस्य
किमस्त्यकार्य्यं वद मे विचार्य्य ॥ ५९ ॥ कल्पावसाने ऽपि न मुक्तिरेव लिङ्गार्चनत्याग विदूषितानाम् ॥
तदर्थमेवाशु नि सृष्टि रादावग्नि प्रवाहोदक दुष्कसृष्टिः ॥ ६० ॥ कष्टानि सृष्टानि बहूनि नूनम् अत्रैव
भोगाय महेश्वरेण ॥ तेष्वेव तावत्खलु यातनीयास्ते शांकराज्ञा विमुखाः सदुःखाः ॥ ६१ ॥ कः शृ
ङ्गपूजाविमुखोऽपि लोके सुखी सशोकाक एव घोरः ॥ घोराण्यघोराण्यपि यातनानां स्था
लानि यात्येव सदुष्टबुद्धिः ॥ ६२ ॥ एताभिर्नाशिवार्चनं कृतममुमा कान्तार्चकाराधनम् ॥ तद्भक्ता
ङ्घ्रिनिषेवणं च न कृतं तत्पादुकाराधनम् ॥ तन्मन्दिरमार्जनञ्च न कृतं तच्चेटिकासेवनम् ॥
तद्दासीपतिसेवनं च न कृतं तद्दाससंसेवनम् ॥ ६३ ॥ नालोकितं शंकरकिङ्कराणां पादार
विन्दप्रभवं रजोऽपि ॥ येनादरात्तस्य कथं सुखं स्यात्स्वप्नेन तन्मे वद सावधानम् ॥ ६४ ॥ न भूत
लोकोपि विलोकितोऽपि पराङ्मुखः शंकरपूजनेषु ॥ सुखी विपाशी सुखमेति किंवा नरो-

ह०त०उ० अ०४५

विशेषेण महोरगार्त्तः ॥ ६५ ॥ वदन्ति तावद्गिरिपूर्जनेन हीनं विहीनं कमलासनानाम् ॥ कस्तूरि-
का चन्दन वासनापि तस्माद्दृशैवस्य सुसंस्कृतः स्यात् ॥ ६६ ॥ आज्ञापनीयो न तथा त्वयाहं न धर्म
हानिश्च त्वयाति सह्या ॥ विशेषतः शांकरपूजकस्याप्यशैव वार्त्ता सुरुचिः कथं वा ॥ ६७ ॥ वाक्ये
नैकेनैव तावत्त्वयोक्तं शैवाः सर्वे पूजनीयास्त्वयेति ॥ अन्ये घोरे पातनीयाः प्रयत्नैः कुम्भीपाके सर्व
थेति स्मृतं किम् ॥ ६८ ॥ मा कौतुकेनाऽपि महेश्वरोऽपि कदाचिदीशान पराङ्मुखानाम् ॥ न यातना
स्यादिति तद्वचोऽपि श्रीनन्दिकेशार्यन रोचते मे ॥ ६९ ॥ सत्यमूर्त्तिरुवाच ॥ इत्युक्त्वा नन्दिकेशाय
नत्वा विनयपूर्वकम् ॥ यमोऽपि स्वालयं प्राप चित्रगुप्तादिभिः सह ॥ ७० ॥ ततः परं स नन्दीशाः
कैलासभुवनं ययौ ॥ प्रहृष्टो यमवाक्यानि स्मृत्वा विस्मितमानसः ॥ ७१ ॥ अतः कुमारनारीणां
मुख्यो विश्वपतिः पतिः ॥ तत्पूजनादभीष्टार्थाः सिद्ध्यन्तीत्यवधारय ॥ ७२ ॥ पाति यो लोके
कः सोऽपि शांकरत्वेनानिश्चितः ॥ यदि तर्हि प्रयत्नेन कर्त्तव्यन्तस्य पूजनम् ॥ ७३ ॥ तत्सेवने
न सुप्रीतो भवत्येव महेश्वरः ॥ अतस्तस्यापि कर्तव्यं शैवत्वेनैव सेवनम् ॥ ७४ ॥ अशैवो

यदि
भर्तास्य तन्त्यजेन्मद्यपं यथा ॥ नमद्यपाराधनार्थं मुद्यतापि पतिव्रता ॥ ७५ ॥ ब्रह्मस्वहर्त्ता गुरुदारगामी यो
ब्रह्महा मद्यप एव वास्यात् ॥ यस्यादशैवोपि सुदूरतोपि त्याज्यः कुलस्त्रीभिरिति स्मरामि ॥ ७६
दैवान्महादेवपरायणः स्यात्पतिस्तदाराधनतः सुखानि ॥ प्राप्नोति नारी निरयं नयाति सा तेन सार्ध
म धुविमेति नूनम् ॥ ७७ ॥ अशैवपाते कार्य्याणि न कार्य्याणि कदाचन ॥ अशैवभर्तृत्यागेन स्वर्गमे
ति सतीपरम् ॥ ७८ ॥ मद्याम्पिबति चेद्भर्त्ता तेन सार्धं कथं सती ॥ स्थास्यति ॥ शिवाचारवर्जितो वर्जि
र्ज्यतामभात ॥ ७९ ॥ नभाग्येन विना नारी भर्गभक्तपतिं व्रजेत ॥ सर्वभाग्यप्रदोमूलं भर्गभक्तपतिः
स्वतः ॥ ८० ॥ भर्त्ता भर्गार्चको यः स्यात्तदासौ लंघ्य [illegible] दपि ॥ नरकं याति सा नारी याव
दाभूतसंप्लवम् ॥ ८१ ॥ भृगुरुवाच ॥ इति तद्वचनं श्रुत्वा दृष्ट्वा दूरे [illegible] सशंकरः ॥ पित्रा सहास्थितः
श्रुत्वा शिवधर्मान्विधूपतः ॥ ८२ ॥ श्राद्धानाम तन्नारी समाप्याशिवपूजनम् ॥ पतिसुश्रू
षणो द्युक्ता सोपि शांकर इत्यपि ॥ ८३ ॥ शंकराराधनं कृत्वा शाङ्करस्यापि सेवनम् ॥ कर्त्तव्य
मिति बुद्ध्वा सा चकार पतिसेवनम् ॥ ८४ ॥ सोऽपि तां श्री [illegible] यत्त्वेवा शिवार्चनरतोतिसः

न निष्ठुरं वदत्येवं सतां मति विशेषतः ॥ ८५ ॥ शार्दूल उवाच ॥ इत्युक्तं भृगुवाग्वृन्दममन्दानन्ददं मुदा ॥ हृष्टः शिवकथामेव पुनः श्रुत्वा स्थितो यमः ॥ ८६ ॥ तत्तत्कथाऽऽकर्णन वर्णनेन । कालेऽविनीत स्तदनन्तरं मे ॥ वने जनि र्व्याघ्रकुले किलासीत् ॥ जातिस्मरत्वं त्वसतोप्रसादात् ॥ ८७ ॥ सत्यव्रत उवाच ॥ इति व्याघ्र वचः श्रुत्वा स राजा शैवपुंगवः ॥ ब्राह्मण श्चाति सन्तुष्टः शिवाराधन तत्परः ॥ ८८ ॥ ततः परं नारदोऽपि तदुक्त वचनाम्बुधिं ॥ श्रुत्वा प्रीत्वा प्रहृष्टोऽभूत् स राजा शैवपुंगवः ॥ सत्यमुक्तमिति प्रिये ॥ सा राज्ञी परमं प्राप सुखं शैवपतिप्रियम ॥ अतो मम महद्भाग्यं भर्गदत्त मिति प्रिये ॥ ९० ॥ स्वस्वस्थानं ततः प्रापुस्ते सर्वे शिवपूजकाः ॥ शिवार्चनप्रभावाणां कुर्वन्तस्ते प्रसंशनं ॥ ९१ ॥ इयं पुण्यकथा तावत्तुभ्यमद्य समीरिता ॥ सर्व पापहरा नित्यं श्रवणात्सर्व कामदा ॥ ९२ ॥ अतस्त्वयाऽपि यत्नेन कर्तव्यं ~~कुर्वेसं~~ शिवपूजनं ॥ शिवार्चनं परो धर्मो नारीणामपि सर्वथा ॥ ९३ ॥ रत्नाकर उवाच ॥ इति तद्वचनं श्रुत्वा (= शुकवाणी = सत्यव्रतस्य पत्नी) सा चकार शिवार्चनं । भर्ता तेन शिवाचार निरतो न सहादरात् ॥ ९४ ॥ तस्यां पुत्राः समुत्पन्नाः शांभवा एव ते सदा ॥ शिवार्चनपराः सर्वे गुरुशुश्रूषणे रताः ॥ ९५ ॥ शैवः पिता य मस्माकं जननी शिवतत्परा ॥ वयंच शांभवास्तेन भाग्य

मित्यूचुरादरात् ॥ ९६॥ ते सर्वे नर्मदातीरे कृत्वा विल्ववनं वनं ॥ सन्तुष्टास्तत्र लिंगानि स्थापयित्वापि कोटिशः॥
॥९७॥ तस्मिन्नेव वने स्थितं शिवरतैः कृत्वा शिवाराधनं ॥ भस्मोद्धूलित विग्रहै रपि तथा रुद्राक्ष मालावृतैः
॥ तै रेवामल विल्व कोमल दलै रभ्यर्चयन्तो मुहुः ॥ तत्रोवास महेश्वरोऽपि सततं तत्पूजया लालसः॥
९८॥ तन्माता स्वसुतान् विलोक्य परया प्रीत्या शिवाराधकान् ॥ तत्पुत्रानपि शांकरानतिमुदा तत्पुत्रपौत्रानपि ॥
शर्वाराधन तत्परानति लसद्भूति त्रिपुण्ड्रांकितान् ॥ मेने धन्यतमं कुलं, कुलमिदं श्रीशूलपाणेरिति ॥ ९९॥
एवं शिवाराधन तत्परं तं सत्यव्रतं विल्व वने सपुत्रं ॥ दृष्ट्वा प्रहृष्टा मुनयोऽपि चित्रं ॥ तत्सन्तते र्वृद्धिमति
प्रसिद्धां ॥ १०० ॥ इन्द्रादयोऽप्यादरतस्तमेत्य ॥ महेश्वराराधन सक्तचित्तं ॥ नमन्ति गन्धर्व नराश्च सर्वे नित्यं शिवा
ऽऽराधन सक्तचित्तं ॥१०१॥ तद्देश राजा तं दृष्ट्वा महारथ इति श्रुतः ॥ रेवातीरे चरन् पश्यन् लिंगान्यपि विशेषतः॥
॥१०२॥ तत्पुत्र पौत्रादि समर्चितानि ॥ लिंगानि रेवाजल विल्वपत्रैः ॥ कुन्दादिभिश्चादरतोऽति भक्त्या ॥ सत्यव्रतं
प्राह स भूपतिस्तं ॥ १०३ ॥ महारथ उवाच ॥ मुनीन्द्र पुत्र पौत्रादि सन्तति र्महती तव ॥ शंकराराधनोद्यु
क्ता वृद्धिमेति पुनः पुनः ॥ १०४ ॥ स्तनंधयोऽपि त्रिपुरान्तकं तं समर्चयत्यत्र कथं प्रवृत्तिः ॥ अनेननाधीत मपि श्रुतं

वा ॥ माहात्म्यमीशस्य, किमत्र चित्रं ॥ १०५ ॥ अच्छिन्न नाभिनालोऽपि जटामण्डलमण्डितः ॥ उद्धूलनत्रिपुण्ड्राभ्यां तथा क्षैरप्यलंकृतः ॥ १०६ ॥ अयं को वा तव प्रीतिस्तस्मिन्नतितरां खलु ॥ इदं न कौतुकं क्वापि श्रुतं दृष्टं च न ध्रुवम् ॥ १०७ ॥ तत्रापि खलु तारुण्यं, तरुणस्यापि सन्ततिः ॥ कथमेवं प्रवृद्धा ते, किं वा तद् वृद्धिकारणं ॥ १०८ ॥ किंच सर्वेऽपि पुत्राँगाः सुन्दराश्च विशेषतः ॥ शंकराऽराधनोद्युक्ताः सर्वेऽपि खलु सर्वदा ॥ १०९ ॥ त्वत्पुत्रपौत्रपौत्रादि दारा अथ विशेषतः ॥ शिवार्चनानि कुर्वन्ति गृहकृत्य विवर्जिताः ॥ ११० ॥ नचास्मिन्नाश्रमे दृष्टमन्नं क्षीरघृतादिकं ॥ एवं च कथमेतेषां जीवनं प्रत्यहं मुने ॥ ॥ १११ ॥ इति तद्वचनं श्रुत्वा मुनिः सत्यव्रतस्तदा ॥ तमाह संस्मरन् भक्त्या देवदेवं महेश्वरम् ॥ ११२ ॥ अस्माकमस्त्यन्नपतिप्रसादः ॥ इन्नं दधि क्षीर घृतादिकं च ॥ ब्रह्मादयः कर्मकराश्च गेहे ॥ पूर्णं गृहं मे सुरगोकुलेन ॥ ११३ ॥ तिष्ठन्त्यपाराः सुरभूरुहाश्च ॥ चिन्तामणिस्तिष्ठति गेहमध्ये ॥ महेश्वराराधनलब्धमेव ॥ संपूर्णमैश्वर्यमिदं ममेह ॥ ११४ ॥ मत्संततिस्तिष्ठति कोटिशोऽत्र ॥ रेवातटं पुण्यमिति प्रसिद्धम् ॥ न स्वर्गलोकेऽपि ममास्ति वाँछा ॥ न सत्यलोकेऽपि ममास्ति वांछा ॥ न सत्यलोकेऽपि न विष्णुलोके ॥ ११५ ॥ मया स्तुतः प्राङ् नमकेन शंभुः ॥ ततः परं मे चमकोक्तमर्थम् ॥ तदा उदारः स हरः परं मे ॥ किमस्ति दुष्प्रापमपीह लोके ॥ ११६ ॥ यद्यन्ममास्मिन् समपेक्षितं स्यात् ॥ तत्प्राप्तमीशाँघ्रिरजः

781

प्रसादात् ॥ किमस्त्यशक्यं जगतीतलेऽस्मिन् ॥ त्रिलोचनश्चेन्मम सुप्रसन्नः ॥११७॥ त्रिलोचनाकारम चिन्त्यमेकं ध्यात्वापि धैर्येण विभूतिपूतः ॥ प्राप्नोति सौभाग्यसमृद्धिमाद्यो ॥ मुक्तो भवत्येव परान्तकाले ॥११८॥ न जानन्ति महादेवस्वरूपं मतिदुर्भगाः ॥ क्लेशसागरमग्नास्ते पुनः पुनरनेकधा ॥ ११९॥ यस्त्वेकान्त मुमाकान्तं स्वान्ते सन्ततमर्चयेत् ॥ तस्य भाग्यस्य नेयत्ता स एव सुभगोत्तमः ॥ १२०॥ येन नाराधितं लिंगं शांगं मंगलदायकम् ॥ स दरिद्री दुर्भगश्च जायते प्रतिजन्मनि ॥१२१॥ अशिवाराधनोद्युक्ताः शिवार्चनपराङ्मुखाः ॥ अशिवं प्राप्नुवन्त्येव कुंभीपाकादिलक्षणं ॥ १२२॥ नरत्वमपि संप्राप्य यो नार्चयति शंकरं ॥ संसारमेव तं प्राप्नोत्यवश्यमिति निश्चयः ॥ १२३॥ चण्डालजाताः परमादरेण ॥ ना राधयन्त्येव मृडं मृडानीं ॥ अतो भवन्त्येव विमूढचित्ताः ॥ पुनः पुनर्दुःखभवाब्धिमग्नाः ॥ १२४॥ यश्चा ण्डालाद्य मद्यपाद्रासभाद्वा ॥ जातो जात्या जन्मकोटिष्वघौघः ॥ व्याप्तो घोरैस्तं विहायापरः स्यात् ॥ पुण्यैः शै वः शंकरध्यानपूतः ॥ १२५॥ न शांकराणां यमभीतिवार्ता ॥ यमः स्वतः किंकर एव तेषां ॥ यमस्य का वा गणना गणानां ॥ ते शांकरा एव गणा भवन्ति ॥१२६॥ कालेकाले स कालोऽपि कालकालार्चकान् मुहुः ॥ कालकालभया

देव पूजयत्यति भक्तितः ॥१२७॥ शंकराराधनं धर्मः कालस्यैवावधारितः ॥ शिवाराधन तुल्यं हि शंकरारा धनं नृप ॥ १२८॥ सन्तुष्टे विषमेक्षणोऽपि बहुधा सम्यक् समाराधिते ॥ शैवे, शैवहृदंबुजान्तरगतः कष्टापहारोद्यतः ॥ गौरीवल्लभमन्दिरं परतरं तत्सुन्दरं मेनिरे ॥ हारान्तःकरणं प्रमाणविषयं तत्किं भवेद् भूपते ॥१२९॥ जातिर्वा न विचार्यते, शिवरते जाते, भवानीपतिर् ॥ दृष्ट्वा तद्धृदयारविन्दमगजा कान्तः स्वकं मन्दिरं ॥ मत्वा, तिष्ठति तत्र तस्य वसतिस्तावत्परं रोचते ॥ कैलासेऽपि रुचिस्तथा भगवतः शंभोर्न नूनं नृप ॥ १३०॥ पूजयन्त्यति यत्नेन शंकरानमरा अपि ॥ शिवमन्दिरमित्येव मत्वा शंकरमानसं ॥ १३१॥ अहो पुण्यवतामेव महादेवार्चने रतिः ॥ सा मति दुर्लभा लोके दुर्लभा दुर्लभा नृणां ॥ ॥१३२॥ शिवभक्त्यङ्कुरापार शंकरापारचेतसा ॥ धर्मादि फलपूर्णानामियत्ता वर्जितं सुखं ॥ १३३ ॥ पदे पदेऽपि कल्याणं शंकरस्य महात्मनः ॥ शंकराराधने प्रीति बहुजन्म तपःफलं ॥ १३४॥ या पिनाकिन मायाति नमस्या कल्मलीकिनं ॥ सैव तावन्नमस्कार्यं करोति नरमप्यहो ॥ १३५॥ कल्मलीकी स संप्रीतः कृतया स्वनमस्यया ॥ सुरवन्द्यं करोत्येव नरं विगतकल्मषम् ॥ १३६ ॥ अत्रैवोदाहरन्तीममितिहासं

पुरातनं ॥ भक्त्युद्रेको भवत्येव यस्य श्रवणमात्रतः ॥ १३७ ॥ शृणु तत्सावधानेन विश्वासं कुरु सादरं ॥ विश्वासः
खलु धर्मेषु सर्वदा सुखदायकः ॥ १३८ ॥ अविश्वासेन दुःखानि भवन्त्येव पदेपदे ॥ अतस्त्वविश्वासः परित्याज्योऽ
ति दूरतः ॥ १३९ ॥ तत्र शांभवधर्मेषु विश्वासश्चेद्विशेषतः ॥ तदा तरन्ति संसारं शोकसागरमादरात् ॥ १४० ॥ अविश्वा
सो यदि भवेच्छिवधर्मे कदाचन ॥ तदा तद्ध्वंशनाशः स्यात्स एवाशनिहतस्थितः ॥ १४१ ॥ कस्यचिद्भूरिभाग्यस्य शिवधर्मे
रतिर्भवेत् ॥ अभाग्यानां न तद्धर्मे रतिर्भवति सर्वथा ॥ १४२ ॥ अतस्त्वमपि विश्वासं कुरु मद्वचने नृप ॥ यदि भाग्याभिवृद्धि
स्ते सर्वदा समपेक्षिता ॥ १४३ ॥ भक्त्या क्षणं क्षणार्धं वा विश्वासेन सदाशिवं ॥ यः पूजयति तं तावद्वन्द्यमित्याहुरास्तिकाः ॥
१४४ ॥ महादेवकथालापे सुधाबुद्धिर्भवेद्यदि ॥ तदा भवति संसारशोकराशिविनाशनं ॥ १४५ ॥ संसाररोगनाशाय शिव
पूजनमौषधं ॥ कल्पितं तेन तत्सेवा कर्तव्याऽतिप्रयत्नतः ॥ १४६ ॥ पुरा पुल्कस एवासीज्जात्या कोऽपि हिमालये ॥
तस्य भाग्यवशाद्भक्तिः फालाक्षे समभून्नृप ॥ १४७ ॥ तेन बिल्ववने तत्र निवासोऽपि कृतः पुरा ॥ तत्फलानि समानीय
क्रीत्वा जीवति सर्वदा ॥ १४८ ॥ तत्फलार्थं वनस्यापि कृतं तेनैव रक्षणं ॥ वृत्तिः संपादिता तेन कण्टकै
रतिदारुणैः ॥ १४९ ॥ वनद्विपप्रपीडाऽपि तेन तस्य न जायते ॥ न व्याघ्राणां प्रवेशोऽपि तस्मिन्बिल्ववने नृप ॥

१५०॥ तेन संपादिता कुतुल्या तद्वनेन वने नवं॥ नव बिल्वाङ्कुराक्रान्तं सर्वदापि मनोहरं॥ १५१॥ तस्याद्दूरे वनेस्यैव ऋषीणामाश्रमः स्थितः॥ ते सर्वेऽपि समायान्ति तद्वनं प्रति सादरं॥ १५२॥ ते तत्प्रदक्षिणीकृत्य नत्वा प्रत्यहमादरात्॥ तद्वनाद् बहिरासाद्य तिष्ठन्ति शिव तत्पराः॥ १५३॥ सांद्र बिल्व वनच्छाया निवारित महाश्रमाः॥ तद्वात पोत संवीताः पूतास्ते भूति भूषिताः॥ १५४॥ नित्यं वनाद्बहिः स्थित्वा धृत्वा शाखां प्रयत्नतः॥ छित्वा न गृह्णन्ति मुनयोऽप्यरुणान् बिल्वपल्लवान्॥ १५५॥ स बिल्व पल्लवच्छेदं सहतेऽपि न पुल्कसः॥ तद्भीत्या न परं छित्वा न गृह्णन्ति वन पल्लवान्॥ १५६॥ तेषु कश्चिन्मुनिश्रेष्ठो युवा बलसमन्वितः॥ विलोक्य बिल्वानमलान् चिन्तयामास चेतसि॥ १५७॥ इदं बिल्व वनं रम्यं अत्रैव नव पल्लवं॥ एतादृशं वनं क्वापि नादूरे लभ्यते खलु॥ १५८॥ स्थित्वाऽप्यरण्ये तपसा निराहारैरिहाधुना॥ न बिल्व पल्लवैरीशो बहुभिर्नार्चितो भवः॥ १५९॥ भवाम्बुराशिनाशोऽपि न शिवाराधनं विना॥ शिवाराधन सामग्री केवलं बिल्वपल्लवाः॥ १६०॥ न बिल्वपल्लवाभावे सांगं शांगार्चनं कृतं॥ शांग लिंगार्चनाभावे परलोके सुखं कुतः॥ १६१॥ इहामुत्र सुखं तावच्छांग लिंगार्चनाद् भवेत्॥ तदभावे सुखं तावद्दुर्लभं सर्व देहिनाम्॥ १६२॥ अहो न जानन्ति विमूढचित्ताः॥ शैलेन्द्रजा कान्त

७८६

समर्चनानि ॥ संसारदुःखातिभयापहानि ॥ मोक्षप्रदानीति विशेषतस्ते ॥ १६३ ॥ रहस्यमेतद् गिरिशार्चने हि ॥ गौरीसहायस्य तदस्मदीयैः ॥ भाग्यैः प्रसिध्दं कथमद्य कार्यं ॥ बिल्वैर्विना केवलं मुक्तिहेतुः ॥ १६४ ॥ वरं वनं निर्मितमीश्वरेण ॥ महावने दुर्लभमेतदद्य ॥ भूतोऽपि पुण्यः समुपागतोऽयं ॥ बिल्वैर्विना किं भवतीश पूजा ॥ १६५ ॥ सायं यास्यत्ययं भ्राथः स्वगृहं वनपालकः ॥ वनमध्ये मया गत्वा स्थातव्यमति यत्नतः ॥ १६६ ॥ तत्रैव पूजा कर्तव्या निशि जागरणे मया ॥ आरक्तैः कोमलैर्बिल्वैस्तथा बिल्वफलैरपि ॥ १६७ ॥ अनेन जन्मना तावदेतावत्कार्यमेव ते ॥ सचेन्निरोधकस्तर्हि प्राणास्त्याज्या न संशयः ॥ १६८ ॥ यद्वा तद्दास्यमभ्येत्य कर्तव्यं वनपालनं ॥ तेन व्याजेन कर्तव्यं बिल्वपत्रैः शिवार्चनं ॥ १६९ ॥ न तद्दास्यत्वमात्रेण हानिः कापि भविष्यति ॥ येनकेनापि रूपेण कर्तव्यं शंकरार्चनं ॥ १७० ॥ किंचातिपावनो नूनं स बिल्ववनपालकः ॥ सबिल्ववनवातेन वीतः किं नातिपावनः ॥ १७१ ॥ धन्योऽयमेव मान्योऽपि बिल्वभूरुहपालकः ॥ बिल्वानां वनदो नित्यमतः पूज्यो न संशयः ॥ १७२ ॥ ते बिल्वतरवः सर्वे शर्वाकारास्तथा सति ॥ सतद्वनप्रदानेन शंकरार्चक एव हि ॥ १७३ ॥ कुल्याः प्रकल्पितास्तेन कर्तुं तद्वनवर्धनं ॥ ततोऽपि नाधिकः कोऽपि, स शिवाराधको यतः ॥ १७४ ॥ बिल्वालबाल जलबिन्दुकणाः संख्यातुल्यानि पातककुलानि लयं गतानि ॥ तस्येति

धन्यतम एव स नून मद्य। वन्द्योऽपि तेन सकलाघ विनाशनं स्यात्॥ १७५॥ अयं महान् मुनिः प्रायो वेषान्तर समन्वितः॥
करोति पालनं तावद् बिल्वानां पुण्यसागरः॥ १७६॥ बिल्व भूरुहमेकं वा योऽभिषिंचति पाथसा॥ अल्पेनापि, सयात्येव नरः
शंकर मन्दिरं॥ १७७॥ अनेन तावदेतस्य वनस्य परिपालनं॥ क्रियते, भाग्यमेतस्य पारेण परिवर्जितम्॥ १७८॥ एतस्य
दर्शनेनापि पापराशिलयो भवेत्॥ एतद्वन्दनमात्रेण शंकरो वन्दितो भवेत्॥ १७९॥ मया त्ववश्यमेतस्य सर्वदा परिचर्य
या॥ कालो नेयो विशेषेण बिल्ववृक्षावलोकनैः॥ १८०॥ सत्यमूर्तिरुवाच॥ इति निश्चित्य मनसा स एव शिव
पूजकः॥ शिवढुण्ढिरितिख्यातो बभाषे वनपालकं॥ १८१॥ "कः, बिल्ववनं पालक प्रवर, सद्म ते, केनवा," महानिशि
वनस्य वा भवति पालनं, घातुक॥ वनद्विपवैरिदं वनमिदं प्रसन्नं कथं॥ न नाशमुपयास्यति प्रबलकण्टकोच्छेदकैः॥
॥१८२॥ इति तद्वचनं श्रुत्वा तमाह वनपालकः॥ कृतांजलिपुटो भूत्वा विनयेन नतो मुदा॥ १८३॥ वनपालक
उवाच॥ एतावत्काल पर्यन्तं रक्षितं वनमादरात्॥ प्रबलास्तरवो जाताः तैर्गतं जीवनं मम॥१८४॥ अरुणोदय
मारभ्य क्रियते वनपालनं॥ सायंकालोत्तरं तावत् स्वगृहं प्रतिगम्यते॥ १८५॥ अभ्रंकषा वृतिस्तावदत्र संपादिता
मया॥ एते हि कण्टकाः क्रूराः प्रायः कुलिश सन्निभाः॥ १८६॥ बिल्वशाखाग्रमात्राणां ग्रहणं वनदन्तिभिः॥ क्रियते,

१०२

वनमध्ये तु तत्प्रवेशो न सर्वथा ॥ १८७॥ नान्येषामत्र मार्गोऽस्ति प्रवेशे कण्टकावृते ॥ मयाऽपि सूक्ष्ममार्गेण जलस्नानाय गम्यते ॥ १८८॥ न जम्बुक प्रवेशोऽपि दृष्ट कण्टकसंगमात् ॥ शार्दूलानां प्रवेशस्तु तत्र संभावितोऽपि न ॥ १८९॥ इतोऽधिक प्रयत्नोऽपि न ममात्र भवत्यतः ॥ एवमेव मयानीतो भूयान् कालो मया द्विज ॥ १९०॥ ॥ सत्यव्रत उवाच ॥ इति तद्वचनं श्रुत्वा द्विजश्चिन्तापरोऽभवत् ॥ केन मार्गेण गन्तव्यं वनमध्ये मयेत्यपि ॥ १९१॥ ततः सोऽपि गतो भिक्षुः सायंकाले गृहं प्रति ॥ स तत्रैव स्थितो विप्रश्चिन्ता व्याकुलमानसः ॥ १९२॥ अन्धकारोऽपि संवृत्तस्ततो गाढतरस्ततः ॥ हस्ती समागतः कोऽपि मदोन्मत्तो विशेषतः ॥ १९३॥ मदधारापरिक्रान्तः श्रान्तोऽपि वनलीलया ॥ दूरात्तं द्विजमालोक्य, स्थितः सोऽपि ददर्श तं, ॥ १९४॥ ततः सत्वरमादाय शुण्डादण्डेन तं द्विजं ॥ दधारोर्ध्वं पुष्कराग्रे चालयन् करिलीलया ॥ १९५॥ अन्तरिक्षं गतो विप्रस्तदा चिन्तासमाकुलः ॥ किं कर्तव्यं मया किं वा चिन्तितं किमतः परं ॥ १९६॥ सा चिन्ता विफला जाता, पुष्कराग्रस्थितेन मे ॥ किं कर्तव्यं, भक्षणार्थमयं तावत् ~~[illegible]~~ समुद्यतः ॥ १९७॥ अतः परं क्व वा नेष्यत्ययं हस्ती तनुं मम ॥ न बिल्वतरुलेशो वा

मरणं किं भजायते ॥ १९८॥ बिल्वशातोऽप्यन्तकाले पतिष्यति ॥ तदा पूतो ब्रह्मलोकं प्रयास्यामि न संशय: ॥१९९॥
किमयं सकृदादाय भक्षयिष्यति सत्वरं ॥ यद्वा वनान्तरे दूरे पातयिष्यति मृत्तकैः ॥ २००॥ हा हा महेश करुणाकर
बिल्वपत्रैर् ॥ नाराधितोऽसि शिवरात्रि महानिशायां ॥ व्यर्थगता जनिरियं, धिगियं जनिर्मे ॥ धिग्धिग्ललाट लिखितं
च विदुष्टमेव ॥ २०१॥ पाहि त्रिलोचन महापदियं त्वयाऽपि ॥ दूरीकृता न तर्हि कृपासमुद्र ॥ का वा तवापि करुणा तरुणे
न्दुमौले ॥ गौरी विलास निलया नलजाल भाल ॥ २०२॥ भूति त्रिपुण्ड्र ललितामल फाल देश ॥ वीरेश शोकविनिवारक
लोक हेतो ॥ का ते दयाऽपि दयनीयतमे मयीश ॥ शम्भ द्विलोकय विलोकय शूलपाणे ॥ २०३॥ इतिश्री शिव
रहस्ये हराख्ये तृतीयांशे उत्तरार्धे पुण्यमूर्ति रत्नाकर संवादे नाम पंचचत्वारिंशोऽध्याय: ॥ श्रीविश्वेश्वरार्पणमस्तु ॥
॥ रत्नाकर उवाच ॥ इति तद्वचनं श्रुत्वा सत्यमूर्ति सभूपतिः ॥ अति विस्मयमापन्नः प्राह मन्दं कृताञ्जलिः ॥ १॥
॥ महारथ उवाच ॥ अति कौतुकमद्योक्तं मीदृशं न श्रुतं मया ॥ कदापि. का गतिस्तस्य जाता तद्वद सादरं ॥ २॥
॥ सत्यव्रत उवाच ॥ स करी पुष्कराग्रेण तं धृत्वा गगनान्तरे ॥ भ्रामयित्वा, वने तस्मिन् पातयामास सत्वरं ॥ ३॥
विप्रो बिल्वतरुस्कन्धे पतितः सत्वरं तदा ॥ शाखां गृहीत्वा हस्ताभ्यां सन्तोषं परमं ययौ ॥ ४॥ अति सन्तुष्टहृदयः

स बिल्वतरु संश्रितः ॥ मन्ये कृतार्थमात्मानं करिणंच महोद्धतं ॥ ५ ॥ शिवदुण्डिरुवाच ॥ किं देयं करिणे मया, करुणया तावत् करी प्रेरितो विश्वेशेन कृपालुना, शिवपदे बिल्वी दत्तं दीयते ॥ सन्तोषः खलु तावतैव गिरिजाभर्तुः महर्तुः परं ॥ दुष्टानामधमः किलाहमधुना भूतोपकाराक्षमः ॥ ६ ॥ न करी चरणाघात पीडितं मां चकार सः ॥ न वा संताडयामास, स तावदुपकारकः ॥ नान्यत्र पातयामास, न चक्रे गिलनं मम, ॥ मदभीष्टं कृतं तेन बिल्व मध्ये निवेशनात् ॥ ८ ॥ उन्मत्त करिणोऽप्यस्य करुणा शंकराज्ञया ॥ जाता. सोऽप्युपकर्तव्यः किं वा तदुपकारकं ॥ ९ ॥ सत्यव्रत उवाच ॥ इत्युक्त्वा भूरुहात्तस्मादवतीर्यावनीतलं ॥ प्राप्य, कुल्यां ददर्शाथ गंगायाः पाप नाशिनीं ॥ १० ॥ तत्तीर बिल्वमूलेषु लिंगानि विमलान्यपि ॥ अति तुंगानि शांगानि विमलानि ददर्श सः ॥ ११ ॥ ततः स्नात्वा स कुल्यायां, भस्म नास्तीति चिन्तया ॥ व्याकुलो, भस्म राशिं च स ददर्श मुनीश्वरः ॥ १२ ॥ स पश्चाद् भस्मनोद्धूल्य सर्वमंगं प्रयत्नतः ॥ शिवपूजार्थमुद्युक्तः प्रापानन्दं स विस्मितः ॥ १३ ॥ बिल्वशाखां समादाय, जलं लिंगेषु निक्षिपत् ॥ पूजयामास विश्वेशं तल्लिंगे बिल्व पल्लवैः ॥ १४ ॥ समुनिर्हस्तलाघवाभिः शाखाभि बिल्वपल्लवैः ॥ मनोज्ञैः पूजयामास शिवलिंगानि शांकरः ॥ १५ ॥ एवं बिल्वार्चनेनैव नीता भूता शिवप्रिया ॥

अरुणोदयपर्यन्तं चकार शिवसेवनं ॥ १६ ॥ सन्तोषं परमं प्राप बिल्वपल्लवपूजया ॥ सफलं जन्म संप्राप्तमति दुर्लभमित्यपि ॥१७॥ कुलं पवित्रं मम बिल्वपल्लवैः ॥ कृतं यतः शाँग समर्चनं मया ॥ लिंगेषु तुंगेषु मनोहरेषु ॥ विभूति युक्तेषु विभूतिदेषु ॥ १८ ॥ अतः परं कालभयं न मे स्यात् ॥ संसार भीति र्न मम प्रभूता ॥ पापानि तावत् प्रलयं गतानि ॥ शिवार्चनेनैव विशेषतोऽद्य ॥ १९ ॥ शिवार्चनाकारमहाऽनलेन ॥ दग्धानि पापामित कोटराणि ॥ जितं जगत्सर्वमतः परं मे ॥ कर्तव्यमन्यं न विभाति नूनं ॥ २० ॥ अतः परं लौकिकमेकमस्ति ॥ भिल्लाद्भयं भूरुहरक्षकान्मे ॥ तद्वारणं केन भविष्यतीति ॥ चिन्तां कृतान्तादिव सोऽप्यवाप ॥ २१ ॥ ततः परं तद्वनपालकोऽपि ॥ प्रातः समुत्थाय ययौ वनाय ॥ वनं प्रविष्टोऽपि जलं प्रदातुं ॥ स बालबिल्वाँकुर पोषणाय ॥ २२ ॥ ततः परं स दूरेण दृष्ट्वा तं मुनिपुंगवं ॥ पूजितान्यपि लिंगानि, बभाषे वचनं मुदा ॥ २३ ॥ वनपाल उवाच ॥ आगतं केन मार्गेण वनेऽस्मिन् कण्टकावृते ॥ मया यश्चिन्हितो मार्गः स तथैवास्थितः खलु ॥ २४ ॥ मार्गान्तरं तु नास्त्यत्र प्रवेशः कठिणः खलु ॥ मनुष्याणां पशूनां वा प्रमत्तवनदन्तिनां ॥ २५ ॥ इदमत्यद्भुतं दृष्टं कुल्यातीरे मनोहरे ॥ बिल्वपल्लवसंक्रान्तं तदिदं लिंगमण्डलं ॥ २६ ॥ सेयं सुरसरित्कुल्या शिवलिंगसमाकुला ॥ एतेषां पूजनं केनाप्यत्र नैव कृतं पुरा ॥ २७ ॥

७८९

विशीर्णैरेव बिल्वानां पाण्डुपत्रैरिदं परं ॥ लिंगमण्डलमाक्रान्तं दवभूतिकणैरपि ॥ २८ ॥ इयं विभूतिरानीता दवपावकजा मया ॥ बालबिल्वप्ररोहाणां वृध्यर्थं केवलं खलु ॥ २९ ॥ तवेरण्यनया भूत्या तव पूतेति मन्महे ॥ हस्तप्रक्षेप चिह्नं च दृश्यते भस्मराशिषु ॥ ३० ॥ तव स्वरूपं किं वा मे वद किं किन्नरः सुरः ॥ प्रवेशस्तावदन्येषामत्र नास्तीति मे मतिः ॥ ३१ ॥ इति तद्वचनं श्रुत्वा, पूर्ववृत्तान्तमादितः ॥ स तस्मै प्राह. तेनैव विस्मितो वनपालकः ॥ ३२ ॥

. . . . ॥ ३३ ॥

इति तद्वचनं श्रुत्वा मुनिर्गतभयस्तदा ॥ चकार परमप्रीत्या तत्प्रभावानुवर्णनं ॥ ३४ ॥ शिवकुण्डिरुवाच ॥ शिवस्वरूपाणि किलामलानि ॥ लिंगानि सर्वाणि. शिवार्चनं च ॥ लिंगे कृतं सर्वदमित्यवैमि ॥ लिंगार्चनेनापि समो न धर्मः ॥ ३५ ॥ अपारपुण्यैः शिवपूजनेषु ॥ भक्तिर्भवाम्भोधि विनाशनाय ॥ भविष्यतीति स्फुटमेव मन्ये ॥ न तेन धर्मेण समोऽस्ति धर्मः ॥ ३६ ॥ संसाराघकुलाम्बुराशिरसकृत् कंपं विधत्ते मुहुः ॥ कालोऽपि त्रिपुरारिपूजनरतो बिल्वीदलैः कोमलैः ॥ लिंगे तुंगसरित्तरंगनिकरव्याप्ते सकृद्वा सुराः ॥ सर्वे तत्पदपूजनाय सततं कुर्वन्ति यत्नानपि ॥ ३७ ॥ लिंगाराधनमेव केवलमुमाकान्तप्रियं मुक्तिदं ॥ मन्ये पापहरं च सन्ततमिदं बिल्वीदलैः कोमलैः ॥ कर्तव्यं सकृदेव ना सभसितैर्जेतुं यमं, शांभवं ॥ संप्राप्तुं

परमपारविभवं सत्यं त्रिसत्यं परं ॥ ३८॥ भस्मालंकृतदेहमन्वहमुमाकान्तस्य बिल्वीदलैः॥ दृष्ट्वा पापमहाम्बुराशिकुल मप्यालूनं भवेत् ॥ दुःखाब्धिःप्रलयं प्रयात्यपि भयाः कालस्य दूरं परं ॥यान्त्येवाशु शिवार्चनोद्यतमति. तस्मात्सुरैः पूज्यते॥ ३९॥ लिंगाराधनपुण्यराशिज फलं वक्तुं न शक्ताः सुराः॥ सेन्द्रोपेन्द्रपुरोगमा अपि तथा सिद्धाः प्रसिद्धा अपि॥ गन्धर्वा अपि किन्नरा; अपि गणो शैयो न वाऽयं त्वया॥ वेदैर्वा गिरिशः. परं सुरवरो जानाति तत्वं परं ॥ ४०॥ अन्यार्चितानि वा दृष्ट्वा लिंगानि परया मुदा॥ देहान्ते शांकरस्थानं प्राप्नुवन्ति न संशयः॥ ४१॥ प्रातः पूजितमालोक्य शिवलिंगं शिवात्मकं,॥ भवेद्रात्रिकृतैः पापै विमुक्तो विविधैरपि॥ ४२॥ लिंगं मध्याह्न कालेऽपि पूजितं यस्तु पश्यति॥ स पूर्वाह्णकृतैः पापैः सर्वैरेव प्रमुच्यते॥ ४३॥ प्रदोषकाले यः पश्येच्छिवलिंगं समार्चितं॥ स सप्तकल्प पर्यन्तैः कृतैः पापै विमुच्यते !! ४४॥ यत्पुण्यं जायते भक्त्या शिवलिंगावलोकने॥ तत्पुण्यंमनन्तरहितं भुक्तिमुक्तिप्रदं नृणां॥ ४५॥ अत्रैवोदाहरन्तीममितिहासं पुरातनं॥ शृणु त्वं सावधानेन महापापविनाशकं॥ ४६॥ पुरा कश्चिद्भूराजा विन्ध्यशैल समाश्रितः॥ स सर्वभाग्यसंपन्नः सुन्दरश्च विशेषतः॥ ४७॥ तस्यासीद्यावदैश्वर्यं तावन्नान्यस्य भूतले॥ तस्य कन्या

४१०

ऽप्यभूत्कापि सा नाम्ना वरवर्णिनी ॥ ४८॥ सा यौवनं समासाद्य रंभाधिक्कारकारिणी ॥ सौन्दर्यवाहिनी रूपा रूपेणाप्रतिमेव सा ॥ ४९ ॥ तां कदाचित्समालोक्य रत्नप्रासादमण्डपे ॥ राजा सह तया प्रीत्या रेमे रतिविशा रदः ॥ ५० ॥ स सर्वदाऽपि तत्रैव कार्यैत्तिरविवर्जितः ॥ चक्रे तया सह क्रीडां व्रीडामात्रविवर्जितः ॥ ५१ ॥ तस्मिन् विन्ध्याचले लिंगं तस्य शृंगे मनोहरे ॥ उत्तुंग तुंगमुत्कृष्टं स्थितं गन्धर्वपूजितं ॥ ५२॥ तत्पश्यति प्रगे राजा तत्प्रासादवराश्रितः ॥ मध्याह्नेऽपि, विशेषेण प्रदोषेऽपि समर्चितं ॥ ५३॥ कालान्तरे रतिं कृत्वा सर्वदा निजकन्यया ॥ स्थितः पापसमुत्पन्नो भयमात्रविवर्जितः ॥ ५४॥ तस्यै प्रदर्शयत्यादौ शिवलिंगं मनोहरं ॥ कुचाकारमिदं पश्य लिंगमित्यतिसादरं ॥ ५५ ॥ तल्लिंगं कुचसंकाशमिति प्रीत्या स चन्दनं ॥ द्रापयत्यति यत्नेन कस्तूरीकर्दमान्वितं ॥ ५६॥ पुष्पमाला परीवृतं कारयत्यपि भूपतिः ॥ विनोदं च करोत्येव पश्य पश्येति तन्मुहुः ॥ ५७॥ तेन पापान्यपाराणि तदन्यानि कृतान्यपि ॥ तत्संख्याकरणं तावदशक्यमिति निश्चितं ॥ ५८ ॥ ततः सा दैवयोगेन कदाचिद् वरवर्णिनी ॥ मृता, तां स समालोक्य मग्नो दुःखाम्बुधौ नृपः ॥ ५९ ॥ ततः स तेन दुःखेन मृतो राजाऽपि तत्क्षणे ॥ तदानीमागताः क्रूराः प्रबलाः कालकिंकराः ॥ ६०॥ तया सह मृतं दृष्ट्वा धर्मलेशविवर्जितं ॥ नेतुं समुद्यताः सर्वे मत्वा भ्रान्त्या प्रयत्नतः॥

६१ ॥ तदानीमागता एव कोटिशः शिवकिंकराः ॥ विमाने तं समारोप्य सत्वरं चलिताश्च ते ॥ ६२ ॥ हत्वा तान् यम
दूतांश्च पूर्वं तं नेतुमुद्यतान् ॥ तद्विमानं यमो दृष्ट्वा विस्मयं परमं गतः ॥ ६३ ॥ ततः परं चित्रगुप्तं विलोक्याह यमो
मुदा ॥ कः पुण्यवान् प्रयात्यत्र विमानेनेति सादरं ॥ ६४ ॥ चित्रगुप्त उवाच ॥ यमाधमरिवलाधोघ राशिरेव तथा
ऽपि सः ॥ लिंगावलोकनाद्याति विमानेन शिवालयं ॥ ६५ ॥ दृष्टा शंकर लिंग पूजन फलं यत्ता न वेदैर्न वा ॥ देवै र्वा मुनिपुं
गवैरपि तथा सिद्धादिभि र्वा ध्रुवं ॥ एवं शंकर लिंग दर्शन फलं वक्तुं न शक्यं परं ॥ तत्तत्वं शिव एव वेद, गिरिजा,
स्कन्दो, गणेशोऽपि, वा ॥ ६६ ॥ रतिं दुहित्रा सह तेन तावत् ॥ कृतैव, यावन्मरणं, नृपेण ॥ तथापि लिंगं खलु
तुंगमेकं ॥ शांगं विलोक्यास्थित मादरेण ॥ ६७ ॥ सायं प्रगेऽपि प्रमुदेव तेन ॥ मध्याह्न कालेऽपि सचन्दनाद्यैः ॥ अलंकृतं
कारयति ~~प्रयत्नात् कारयति~~ प्रयत्नाद् ॥ लिंगं स शांगं कुच सन्निकाशं ॥ ६८ ॥ इदं कुचाकारमिदं मनोज्ञं ॥ इदं प्रपश्येति
मुहुः प्रपश्यन् ॥ रतिं दुहित्रा स चकार राजा ॥ तत्पुण्य तो याति विमान रत्नात् ॥ ६९ ॥ कृतानि पापान्यमितानि, तानि
॥ दग्धानि तल्लिंग विलोकनेन ॥ जातानि पुण्यान्यमितानि काले ॥ तैरद्य यास्यत्यगजासहायं ॥ ७० ॥ सत्यव्रत उवाच
॥ ॥इति तद्वचनं श्रुत्वा यमोऽपि प्रीतमानसः ॥ दूरात्प्रणम्य तं दृष्ट्वा विस्मयं परमं गतः ॥ ७१ ॥ ततः परं

विमानेन स यथा विरंचपूजितः ॥ ब्रह्मलोके ब्रह्मणाऽपि पूजितः स नृपाधमः ॥ ७२ ॥ पश्चाद्वैकुण्ठमासाद्य नारायण समन्वित ॥ लक्ष्म्याऽपि पूजितः, पश्चाद् गरुडाद्यैश्च पूजितः ॥ ७३ ॥ ततस्तैरर्चितः प्राप कैलासं शिवमन्दिरं ॥ तत्रोवास गणैः साकं महादेवं विलोकयन् ॥ ७४ ॥ तस्माल्लिंग विलोकनेन सदृशं पुण्यं न लोकत्रये ॥ लिंगाराधनमुत्तमोत्तममिति ज्ञातं सुरैरप्यलं ॥ लिंगं मंगलदायकं, यदि मुहुर्दृष्टं, तदा मंगला ॥ न्यायान्त्येव मुहुर्मुहुः खलु पुरा लिंगोत्सवालोकने ॥ ॥ ७५ ॥ एतानि लिंगानि मनोहराणि ॥ बिल्वीदलालंकृतमस्तकानि ॥ विलोकितान्याशु शुभानि दातुं ॥ सद्यः प्रवृत्तानि न संशयोऽत्र ॥ ७६ ॥ यो बिल्वमूललिंगे स्थित लिंगपूजां ॥ करोति भक्त्या नवबिल्वपत्रैः ॥ तत्पुण्यराशिं गणना मतीतः ॥ स एव कैलासपतिप्रियोऽपि ॥ ७७ ॥ बिल्वमूले स्थिते लिंगे शिवः सन्निहितः स्वयं ॥ बिल्वपत्राणि गृह्णाति शिवभक्तार्पितानि सः ॥ ७८ ॥ न रत्नानि गृह्णाति गौरीसहायो ॥ यथा बिल्वपत्राणि गृह्णाति मूर्ध्ना ॥ स्वभक्तार्पितानि प्रियाणीति मत्वा ॥ ददात्येव मुक्तिं स तैरर्चितोऽपि ॥ ७९ ॥ किमन्यन्महादेवलिंगार्पितेन ॥ परिच्छिन्नबिल्वीदलेनाऽपि तुल्यं ॥ तदेकं महापातकापारशैल ॥ प्रदाहाय शक्तं महापावकाभं ॥ ८० ॥ किमन्यन्महेशाय देयं प्रियं वा ॥ न बिल्वीदलान्यत् प्रियं भूतलेऽस्मिन् ॥ पुरा बिल्वपत्रैः समाराध्य धीराः ॥ सुरत्वं च लब्ध्वा शिवं ते प्रपन्नाः ॥ ८१ ॥ अहो बिल्व

मूलस्थ लिंगार्चनेन ॥ प्रयान्त्येव सर्वेऽपि शार्वं महार्हं ॥ पदं प्राप्य तुष्टा भवन्त्येव सत्यं ॥ न तेनास्ति तुल्योऽत्र लोके पत्र
॥ ८२ ॥ यः कल्मलौकिकमनुत्तम बिल्वमूले ॥ बिल्वीदलेन कमलैर्विमलेन भक्त्या ॥ संपूजयत्यति सदाऽऽदरतो विलो
क्य ॥ संपूजयन्ति बहुधा बहुधा मुनीन्द्राः ॥ ८३ ॥ न बिल्वपत्रार्पण पुण्य तुल्यं ॥ पुण्यं, न देवेषु यतस्तदेव ॥ सर्वार्थ
सिद्ध्यै भवतीति मन्ये ॥ धन्येन मान्येन शिवार्चनेन ॥ ८४ ॥ पापानि तावत् प्रबलानि यावत् ॥ नाबिल्वमूले शिवलिंग
मूर्ध्नि ॥ बिल्वी दलान्याशु समर्पितानि ॥ दत्तेषु नष्टानि भवन्ति तानि ॥ ८५ ॥ नीरै बिल्वतरु प्रवृद्धि जनकै स्तद्वि
ल्वमूल स्थितं ॥ लिंगं पश्यति बिल्वपल्लव युतं बिल्वैः समभ्यर्चयन् ॥ तद्बिल्वीतरु संभवै राभिनवैः शंभुप्रियो जायते ॥
साम्बस्तेन समर्चितोऽपि सदयो गौरी सहायो मुहुः ॥ ८६ ॥ एकं बिल्वतरुं स्वहस्त गालितै नीरैः प्रवृद्धं परं ॥ कुर्यात्तस्य
कुलं प्रवृद्धमसकृद् भुक्त्वापि भोगान्बहून् ॥ भुक्त्वा शंकरमेव याति ससुराध्यत्वमाप्नोत्यतः ॥ धर्मो बिल्ववनानु
पालन समुत्पन्नोऽमितोऽत्यद्भुतः ॥ ८७ ॥ कृतेन बिल्वीवनपालनेन ॥ पुण्याम्बुराशिः खलु ते प्रवृद्धः ॥ तत्पुण्य
तुल्यं किमिहास्ति पुण्यं ॥ प्रीतो भवत्येव शिवोऽपि तेन ॥ ८८ ॥ अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥ तमति प्रीति
दं तावद्दशमाघविनाशकम् ॥ ८९ ॥ रेवातीरे पुरा नारी कापि भिल्लस्य सुंदरी ॥ स्वकुटी निकटे धूर्ती बिल्वीबीजं ददर्श ह ॥

७१२

॥ ९०॥ आलवालं कल्पयित्वा जलं दत्वा प्रयत्नतः॥ चकार बिल्वबीजस्य तस्मिन् गर्ते प्रपातनं ॥ ९१ ॥ ततः सा जलदानेन कुर्वती तस्य पोषणं ॥ वृत्तिं चकार तस्यैव कण्टकाद्यै विशेषतः॥ ९२ ॥ तस्पोषितस्ततरुजातः शाखाभिरभितो वृतः॥ तद्बिल्वतरुमूले सा चकार शयनस्थलं ॥ ९३॥ सा बाणलिंगमादाय सततं बालिको यथा ॥ वाता हति भया तत्र स्थापयामास सुन्दरी ॥ ९४॥ बिल्वमूले वेष्टिते च सवृते बिल्वभूरुहे॥ तत्तथैव स्थितं तत्र रेवालिंगं मनोहरम्॥ ९५॥ तल्लिंगं च करःकारं तल्लिंगोदरपूजितं ॥ कुंभमात्रं जलं तत्र तिष्ठत्येवातिशीतलं ॥ ९६॥ सा तल्लिंगजलं पीत्वा प्रत्यहं शीतलं प्रगे॥ प्रक्षाल्य लिंगममलं प्रयच्छति जलं पुनः॥ ९७॥ पतन्ति जीर्णपर्णानि तस्य बिल्वतरोः स्वतः॥ तैः पत्रैः पूजितं लिंगं रेवातीरे मनोहरे॥ ९८॥ सा रात्रौ स्वोपभोगार्थं पदार्थानां प्रकाशनं ॥ बिल्वमूलस्थदीपेन कृत्वा कृत्वा स्थिता मुहुः॥ ९९ ॥ सा जारिणी तया तत्र कृतं विटविडंबनं ॥ नग्नया नर्तनेनापि गानैरपि विशेषतः॥ १०० ॥ ततः पंचत्वमापन्ना कालेन यमकिंकरैः॥ समावृता तदा तत्र यमोऽपि स्वयमागतः॥ १०१॥ तामेव नेतुमुद्युक्तान् किंकरानाह सत्वरं ॥ स्प्रष्टव्या पुण्यमूर्तिः सा न कदाऽपीति विस्मितः॥ १०२॥ तदानीमागतस्तत्र पुलोम इति विश्रुतः॥ राजाऽप्यसौ वरके कृता श्रान्तः स्वेदलवाकुलः॥ १०३॥ स राजा शिवपूजायां निरतः शिवतत्परैः॥ समावृतो बिल्ववृक्षे ददर्श यममागतं ॥ १०४॥ चित्रगुप्तादिसंयुक्तं मृताळोकनतत्परं॥ तमागतं यमं दृष्ट्वा

विनतः प्रणयान्वितः ॥ १०५ ॥ यममाह तदा राजा श्रान्तोऽपि स शनैः परं ॥ तोषं संजनयन्नेव यमाय शिवपूजकः ॥१०६॥
पुलोम उवाच ॥ कुतः समागतं कालं क्वचागमनमीप्सितं ॥ अत्रावस्थाव कृत्यं च किमस्ति वद तन्मम ॥१०७॥
सत्यवृत उवाच ॥ इत्युक्तस्तमुवाचाथ सकृतान्तो नृपोत्तमम् ॥ अत्रैवागतमस्माभिः कौतुकं दृष्टमादरात् ॥१०८॥
पुण्यपुंजस्वरूपेयं राजन् विगतकल्मषा ॥ एतद्दर्शनमात्रेण कृतकृत्योऽस्म्यसंशयं ॥ १०९ ॥ पुलोमा उवाच ॥
इयं चिरगणाक्रान्ता चेटी प्रेष्या कथं त्वया ?॥११०॥ सत्यवृत उवाच ॥ इति तद्वचनं श्रुत्वा यमः प्राह नृपं प्रति ॥
॥ यम उवाच ॥ इयं पुण्यस्वरूपेति ज्ञाता राजन् मया खलु ॥१११ ॥ चित्रगुप्तोऽपि जानाति किमेनां पावनामिति ॥
नदी नाम पि जानाति नदीमिति विनिश्चितम् ॥११२॥ अनया खलु रेवाऽपि पुण्यपुण्येति विश्रुता ॥ एतत्पुण्यप्रभावस्तु
वक्तुमेव न शक्यते ॥११३ ॥ लिंगार्चनपरा सेयं जलैर्बिल्वदलैरपि ॥ पश्य पश्योत्तमं लिंगं नार्मदं कुंभसन्निभं ॥११४॥
बिल्वमूले समाक्रान्तं दीपशोभा विराजितं ॥ अनुलिप्तं बिल्वमूलं पश्य बिल्वदलावृतं ॥११५॥ अनेन बिल्वतरुणा लिंग
पूजा निरन्तरा। कल्पिता. शीर्णपर्णानि पतन्ति शिवमस्तके ॥११६॥ सदाऽऽस्तरणभूतानि जीर्णपर्णानि भूतले ॥ पश्य पश्या
ऽधुना राजन् मरणे समुपस्थिते ॥११७॥ बिल्वपल्लवसंवीते भूतले यस्तनुं त्यजेत् ॥ सयाति परमं स्थानं देवानामपि दुर्लभं ॥११८॥

वृ.पं.२ उद्यता पुण्यभारेण भोगवाँऽऽपि तिष्ठति ॥१२१॥ कन्या तव भाविनीचं सेयं शंकरपूजक॥ इयं सौन्दर्यं धाराभिराश्रिताऽपि भविष्यति॥१२२॥

अनया वाधितः सोऽयममरो बिल्वभूरुहः॥ बिल्वभूरुहवातेन पूतं रेवाजलं परं॥११९॥ ईदृशी पुण्यसामग्री लोके कस्यास्ति भूतले॥ इयं पुण्यवती मान्या नरकं नाभियास्यति॥१२०॥ पुनर्लिंगार्चनं कर्तुं मानुषीं तनुमाश्रिता॥ इन्द्रोऽपि ब्रह्मचर्येण दाराकाङ्क्षां करिष्यति॥ तस्मै देया त्वया कन्या सर्वसौभाग्यसंयुता॥१२३॥ शिवदृष्टिरुवाच॥ इत्युक्त्वा सययौ कालः; स राजाऽपि गृहं ययौ॥ तदुक्तां तां कथां स्मृत्वा विस्मितः परया मुदा॥१२४॥ ततः परं पुलोमस्य पत्नीगर्भं दधार सा॥ गर्भेऽपि सा शिवध्याननिरता समभूत्सदा॥१२५॥ ततः प्रजाता तद्गर्भात् प्राप्य जातिस्मृतिं परां॥ शिवार्चनरताजाता पूर्वपुण्यगणैः परैः॥१२६॥ सा नालछेदनात् पूर्वं, प्राह मातरमादरात्॥ सर्वेषां विस्मयं तावज्जनयन्ती मुहुर्मुहुः॥१२७॥ पुलोमजा उवाच॥ श्रीबिल्वतरुरस्त्येको रेवातीरे मनोहरे॥ तत्रास्ति लिंगमप्येकं कुम्भाकारं मनोहरं॥१२८॥ तन्मध्ये यज्जलं तेन गर्भक्लेश निवारणं॥ कर्तव्यं; यानमारुह्य गन्तव्यं सत्वरं मया॥१२९॥ विभूतिरधुना देया ललाटे तिर्यगादरात्॥ तिर्यक् त्रिपुण्ड्रं कर्तव्यं इति वाणीं वदत्यपि॥१३०॥ सत्यव्रत उवाच॥ इति तद्वचनं श्रुत्वा राजानं प्राहुरास्तिकं॥ तदुक्तं सर्वमत्यन्तमाश्चर्यकरमद्भुतम्॥१३१॥ तद्गिरं नृपतिः श्रुत्वा, स्मृत्वा यम वचः परं॥ तथा कर्तव्यमित्याह महोत्साहसमन्वितः॥१३२॥ ततः परं समादाय बालां कुसुमसंवृते॥ याने संस्थाप्य

राजाऽपि ययौ रेवातटं प्रति ॥ १३३ ॥ स्वसमारोपितं साऽपि दूरात्तं बिल्वभूरुहं ॥ दृष्ट्वा लिंगंच सुप्रीता प्रणताऽपि कृ
ताँजलिः ॥ १३४ ॥ ततस्तत्रगता स्थित्वा बिल्वमूले मनोहरे ॥ लिंगमालिंग्य सन्तुष्टा स्नात्वा लिंगजलैः परैः ॥ १३५
॥ तत्र भूत्या समुद्धूल्य स्वाँगानि विमलान्यपि ॥ रराज चन्द्ररेखेव भूतिरुद्राक्षभूषणा ॥ १३६ ॥ स्वहस्तलभ्यानादाय
कोमलान् बिल्वपल्लवान् ॥ तल्लिंगे पूजयामास शंकरं लोकशंकरं ॥ १३७ ॥ दृष्ट्वा तां विस्मितो राजा स्वामात्यगण
संवृतः ॥ धन्यां मेने शिवरतां तां कन्यां कमलाननां ॥ १३८ ॥ ततः प्रोवाच राजानं सा कन्या वरवर्णिनी ॥ कर्णभू
षण रूपाभि र्वाग्भिरादर पूर्वकम् ॥ १३९ ॥ कन्यकोवाच ॥ राजन्नत्रैव नगरं कर्तव्यमति सुन्दरं ॥ रत्नप्राकार संकीर्णं रत्नमंदिर सुन्दरं ॥
॥ १४० ॥ अस्य लिंगस्य कर्तव्यं सदनं मणिकोटिभिः ॥ रत्नप्रासादरचना कर्तव्यापि प्रयत्नतः ॥ १४१ ॥ अस्यालिंग
स्य पूजाऽपि कर्तव्या सादरं मया ॥ अहोरात्रमिह स्थेयमितः क्वापि न गम्यते ॥ १४२ ॥ लिंगावलोकनेनैव कालो
नेयः कियान्मया ॥ इन्द्रोऽप्यत्र समायास्यत्यतः परमसंशयं ॥ १४३ ॥ समे परिणयं कृत्वा गमिष्यति महोत्सवैः ॥
एतल्लिंगार्चनफलं ममैवं हि भविष्यति ॥ १४४ ॥ सत्यव्रत उवाच ॥ इत्याकर्ण्य वचस्तस्याः कुमार्याः कर्णभूषणं ॥ त
थैव नगरं तत्र कारयामास भूपतिः ॥ १४५ ॥ ततो यौवनमासाद्य स्थिता सापि पुलोमजा ॥ इन्द्रोऽप्यभ्यागतस्तत्र

८११

देवैरन्यैः समावृतः ॥ १४६ ॥ तमागतं नृपो दृष्ट्वा सन्तोषैरिन्द्रमादरात् ॥ तद् बिल्वमूल संविष्टं तल्लिंगार्चन तत्परं ॥ १४७ ॥ तद्बिल्वतरुपत्रैस्तं पूजयन्तं महेश्वरं ॥ प्राह सन्तोष वचनैः पुलोमस्तमवारकेः ॥ पुलोमोवाच ॥ १४८ ॥ धन्योऽस्मि कृतकृत्योऽस्मि यस्मादिन्द्र त्वयाऽधुना ॥ समागतं मे सदनं सदनं शुभसंपदां ॥ १४९ ॥ किमस्त्यपेक्षितं मत्तस्तद्देयं तुभ्यमादरात् ॥ तवाप्यवाप्तकामस्य कामना कुत्र वा वद ॥ १५० ॥ सत्यव्रत उवाच ॥ इति तद्वचनं श्रुत्वा तमिन्द्रः प्राह सादरं ॥ "किमस्त्यपेक्षितं राजन् लिंग दर्शनमन्तरा ॥ १५१ ॥ एतल्लिंग प्रभावस्तु मह्यमुक्तो यमेन सः ॥ स्मृतोऽपि तोषदः सोऽयं सर्वदोषनिवारकः ॥" तदा शचीमाह तं भूपं गुरुराहूय सादरं ॥ १५२ ॥ "विवाहापेक्षयाऽत्रेन्द्रः समागत इति स्मर" ॥ १५३ ॥ ततः परं तद्वचनामृतेन पीतेन राजा परितुष्ट देहः ॥ तथास्त्विति प्राह ततश्चकार ॥ विवाह यत्नं स कृतार्थबुद्धिः ॥ १५४ ॥ ततः परं मण्डितमेव सर्वं ॥ पुरं महार्हैर्मणितोरणाद्यैः ॥ पुलोमजा रत्न विभूषणाद्यैः ॥ सा भूषिता पुण्यवरेण्यपुंजा ॥ १५५ ॥ संपूर्ण नगरं तस्य देव दुन्दुभिनिःस्वनैः ॥ मन्दार पुष्प वृष्ट्यापि तूर्यैरन्यै विशेषितः ॥ १५६ ॥ सुमुहूर्ते ददौ कन्यां मंगल स्नान पूर्वकम् ॥ तजाऽप्यलंकृतो राज्ञीसहितो दिव्य भूषणैः ॥ १५७ ॥ भोजिताः शांभवास्तेन कोटिशो रत्न भूषणैः ॥ तोषितास्च महादानैः

रधारै रमितोत्सवैः ॥ १५८ ॥ तत्र विवाहोत्सवसंयुतोऽभूत् ॥ ... ना यथा विन्द्रपुरी स्वकन्यां ॥ इन्द्रं पुरस्कृत्य महो
त्सवेन ॥ तूर्यैश्च संपन्नमतिप्रयत्नैः ॥ १५९ ॥ ग्रहप्रवेशोत्तरमिन्द्रदत्तैः ॥ कल्पद्रुमाद्यैः सनृपोति हृष्टः ॥ अ
भ्यागतः सन्नगरं मनोज्ञं ॥ स्वकन्यया साकममात्ययुक्तः ॥ १६० ॥ पुलोमजा लिंगविलोकनेन ॥ तत्पूजनेनापि पुनः
प्रहृष्टा ॥ तं बिल्वमालिंग्य तदीयपत्रैः ॥ अभ्यर्चयामास शिवासहायं ॥ १६१ ॥ सा तल्लिंगं पूजयित्वा यथेष्टं ॥
स्वर्गं गत्वा यानमारुह्य दिव्यं ॥ आयात्येव प्रत्यहं लिंगपूजां ॥ कर्तुं भर्त्रा साकमेवाति हृष्टा ॥ १६२ ॥ शंकरः
प्रेरयत्येव बिल्वाराधनकामुकः ॥ स्वार्चनाय पुनर्नित्यं कृपालुर्बोधसागरः ॥ १६३ ॥ — इति तद्व
चनं श्रुत्वा सादरं भक्तिपूर्वकं ॥ प्रणतः प्रांजलिः प्राह तं मुनिं वनपालकः ॥ १६४ ॥ वनपालक उवाच ॥
इतिहासः श्रुतः सोऽयं कृपया तव केवलं ॥ धन्योऽस्म्यतः परं कृत्यं हितं मम वदाधुना ॥ १६५ ॥ शिवदु
ष्टिरुवाच ॥ कृतार्थोऽसि न संदेहः बिल्वभूरुहपालनैः ॥ तव भाग्यस्य नान्तोऽस्ति जीवन्मुक्तोऽसि सर्वथा
॥ १६६ ॥ किंचात्र मुनयो नित्यमायास्यन्ति यथा तथा ॥ कर्तव्यं द्वारमप्येकं वनस्यास्य विशेषतः ॥ १६७ ॥ मुनयोऽपि
समागत्य कुल्यातीरे मनोहरे ॥ लिंगार्चनं करिष्यन्ति कोमलैर्बिल्वपल्लवैः ॥ १६८ ॥ अपूजितानि लिंगानि न

दृष्टव्यानि केवलं ॥ पूजितान्येव लिंगानि दृष्टानि फलदानि च ॥ १६९ ॥ शिवार्चकोपकारेण शिवस्तुष्टो भविष्यति
॥ शिवार्चकापकारेण रुद्रो रुष्टो भविष्यति ॥ १७० ॥ क्रोधं यदि महारुद्रः करिष्यति कदाचन ॥ तदा ब्रह्माण्डविल
यो जात इत्यवधारय ॥ १७१ ॥ येनकेनापि रूपेण कर्तव्यं शिवतोषणं ॥ शिवार्चकोपकारोऽपि परमानन्दसा
धनं ॥ १७२ ॥ न कुर्वन्ति, महादेवमज्ञात्वा, शिवतोषणं ॥ अतः प्रयान्ति नरके यावदाचन्द्रतारकम् ॥ १७३ ॥
धन्याः कृतार्थाः शिवतोषणार्थं ॥ कुर्वन्ति यत्नं विविधैरुपायैः ॥ प्रमाददीनां शिवभक्तपूजां कुर्वन्ति विश्वेश्वर ~~तोषणा~~
तोषणाय ॥ १७४ ॥ धन्यः स एव भुवनेषु य एव नित्यं ॥ गौरीपतिप्रियकराणि करोति भक्त्या ॥ कर्माणि वेदविहिता
नि विभूतिपूतो रुद्राक्षलिंगसहितः शिवतुंगलिंगे ॥ १७५ ॥ सत्यमूर्तिरुवाच ॥ इति तद्वचनं श्रुत्वा फलानि
विमलान्यपि ॥ तस्मै ददौ मुनीन्द्राय स एव वनपालकः ॥ १७६ ॥ ततः परं मुनिस्तुष्टः स्नात्वा भूतिविभूषणः ॥ चकार लिंग
पूजां च बहुभिर्बिल्वपल्लवैः ॥ १७७ ॥ तद्दत्तैः परिपक्वैस्तैः स्थूलबिल्वफलैः शिवं ॥ पूजयित्वोपहारं च कल्पयामास
सादरं ॥ १७८ ॥ हारो हारोपहारेण क्षुधामुपनिवार्य सः ॥ तल्लिंगालोकनं कृत्वा स्थितस्तेनाभिवन्दितः ॥ १७९ ॥
ततः परं वनस्यापि द्वारमेकं चकार सः ॥ येन प्रविष्टा मुनयो भवन्त्यपि वने मुदा ॥ १८० ॥ तदा प्रभृति तत्रैव मुनय

५ प.८ – तुषारगिरिशृंगाग्रे स्थितोऽपि तृषितोऽपि सः ॥ १८० ॥

स्तत्समीपगाः ॥ प्रविश्य बिल्वकान्तारं तुरगं प्रापुर्निजेच्छया ॥ १८१ ॥ शिवदुण्ढिप्रसादेन तस्मिन् बिल्ववने मुहुः ॥ आयान्ति बिल्वपत्रार्थं पूजयन्ति महेश्वरं ॥ १८२ ॥ शिवदुण्ढिं विलोक्यापि वार्तां श्रुत्वाऽपि तस्य तां ॥ हृष्टाः करिकान्तशरीरकान्तिगोचरं ॥ १८३ ॥ रत्नाकर उवाच ॥ इति सत्यव्रतोक्तानि वचनानि स भूपतिः ॥ श्रुत्वा हृष्टः पुनः ~~मुने~~ प्राह तं मुनिं स महारथः ॥ १८४ ॥ "स गजः क्व गतस्तस्य का गतिः समभून्मुने ॥ शिवदुण्ढेः पुलकसस्य ह्येतन्मे वद सादरं" ॥ १८५ ॥ सत्यमूर्तिरुवाच ॥ कौतुकं शृणु राजेन्द्र तत्सर्वं विस्मयावहं ॥ पापप्रणाशकं पुण्यं शिवभक्तिप्रवर्धकं ॥ १८६ ॥ स दन्ती संचरन् तस्मिन् वने मृगवराश्रिते ॥ दैवाद्दाहाररहितः क्षुधयाऽपि समावृतः ॥ १८७ ॥ तत्र मृगेन्द्रः क्षुधया पीडितस्तं ददर्श सः ॥ मत्तेभभक्षणोद्युक्तस्तं मा हन्यो मृगेश्वरः ॥ "त्वरा न कार्या सहसा कर्तुं तद्भक्षणं त्वया ॥ १८८ ॥ स तावत् पुण्यपूतांगः शिवानुग्रहभाजनं ॥ उपोषितोऽपि भूतायां पूर्वेद्युः शंकरप्रियः ॥ १९० ॥ प्रक्षिप्तः शांकरस्तेन त्वरया बिल्वभूरुहे ॥ ततः स पूजयामास शंकरं बिल्वपल्लवैः ॥ १९१ ॥ ततः करी करिवरः शांकरस्योपकारकः ॥ सर्वथा स न हन्तव्यः, पापं तद्धननाद्भवेत् ॥ १९२ ॥ शैवोपकारको यः स्यात् स तावत् पूज्यते सुरैः ॥ पूज्यस्य मारणे तावन्नरकं याति सत्वरं ॥ १९३ ॥

हितोपदेशः कृत एव तावत् ॥ स शैव एवेति न तस्य हिंसा ॥ कार्या. तथा तावदवश्यमेव ॥ यमो न धावत्याहिताय तुभ्यं
॥ विशेषतः शांकरोऽयं तुषारगिरिसंश्रितः ॥ तुषारगीरिरप्यत्र शैवहिंसा हिताय न ॥ १९५ ॥ अशांकराः करिवराः
प्रभूताः पापकर्मिणः ॥ ते हन्तव्याः प्रयत्नेन करिणः किं नु दुर्लभाः ॥ १९६ ॥" इति तद्वचनं श्रुत्वा समृगेन्द्रः स्थितस्तदा ॥
अन्यो मृगेन्द्रस्तं हत्वा दन्ताघातैर्हतोऽपि सः ॥ १९७ ॥ तदानीमागताः क्रूराः कोटिशो यमकिंकराः ॥ आगताश्च
महेशस्य किंकरा अपि कोटिशः ॥ १९८ ॥ समृगेन्द्रो यमभटैर्बद्धो युद्धोद्यतैर्भृशं ॥ शस्त्राघातैः पीडितोऽपि तप्तायस
जलैरपि ॥ १९९ ॥ तदानीं स करी त्यक्त्वा करिदेहं विलक्षणं ॥ रम्यं शिवगणाकारं प्राप सन्तोषपूर्वकं ॥ २०० ॥
ततो विमानमारुह्य, दयया शिवकिंकरान् ॥ प्राह विस्मयमापन्नस्तं मृगेन्द्रं विलोकयन् ॥ २०१ ॥ "अयं यद्यपि शत्रुर्मे वधार्हो
ऽपि तथापि किं ॥ मोचनीयः प्रयत्नेन यमकिंकरबन्धनात् ॥ २०२ ॥ मयि प्रीतिर्महेशस्य जाता शांकरसेवया ॥ तथा
शंकर एवाहं कृतकृत्यो न संशयः ॥ २०३ ॥ अयं मदंगसंगेन पावनेनातिपावनः ॥ कथं वा नरकोऽस्य स्याद्यातनाऽप्य
तिदारुणा ॥ २०४ ॥ यथा शैवांगसंगेन कृतकृत्योऽस्म्यहं, तथा ॥ शैवांगसंगेसंगेन कथं पूतो न तद्वद ॥" २०५ ॥
— इत्याकर्ण्य वचस्तस्य मोचितो (अधम) दूतबन्धनात् ॥ समृगेन्द्रो ययौ स्वर्गं, करी शंकरमन्दिरं ॥ २०६ ॥ तौ मृगेन्द्रौ विलोक्या

पि तं मृगेन्द्रं च तं करिं ॥ विस्मयं परमं प्राप्य शैलाग्रे संस्थितौ मुदा ॥ २०७ ॥ नीत्वा तद्वार्तया कालं स्मृत्वा शांभव वैभवं ॥ एतादृशं महद्भाग्यं प्राप्तव्यमिति तौ स्थितौ ॥ २०८ ॥ प्रभावमीशार्चनतत्पराणां ॥ वक्तुं न शक्तोऽस्मि नवेदशाशिः ॥ श्रान्ताश्च वेदान्त विचारतान्ताः ॥ ते शांकराराधक सेवकास्तु ॥ २०९ ॥ अयं प्रभावो गिरिजा प्रसादात् ॥ यथाकथंचित्कथितो मयाऽपि ॥ तत्तत्कथाशेष विशेषलेशः ॥ श्रुतोऽपि मुक्तिं वितनोति नूनं ॥ २१० ॥ धन्यं तदेतद्दिनमित्यवैमि ॥ यस्मिन्दिने शांभव पुंगवानां ॥ कथा स्मृता, सा सुरवाहिनीव ॥ पुनाति चित्तं समुदं करोति ॥ २११ ॥ धन्यं चित्तं शंकरध्यानलीनं ॥ धन्ये नेत्रे लिंगसन्दर्शनेन ॥ धन्यौ हस्तौ लिंगसंपूजनाद्यैर् ॥ धन्या जिह्वा लिंग संकीर्तनेन ॥ २१२ ॥ विश्वेशः कुलदैवतं मम महादेवः प्रभुर्मे पिता ॥ दाता शंकर एव, वेदविनता माता भवानी मम ॥ तेनेदं मम भाग्यमिन्दुविनुतं मत्सन्ततिः शांभवी ॥ सौभाग्यं महदेतमिन्दुशकलालंकार पूजार्जितम् ॥ २१३ ॥ इति श्री शिवरहस्ये हराख्ये तृतीयांशे उत्तरार्धे पुण्यमूर्ति रत्नाकर संवादो नाम षट्चत्वारिंशोऽध्यायः ॥ श्रीकाशी विश्वेश्वरार्पणमस्तु ॥ ॥ रत्नाकर उवाच ॥ इति तद्वचनं श्रुत्वा राजा विगतकल्मषः ॥ शिवदुण्ढि गतिं वक्तुं सस्मार गिरिजापतिं ॥ १ ॥ "भगवन् पुण्यरूपेयं श्रुता शिवकथा मया ॥ शिवदुण्ढिगतिं ब्रूहि किं चकार तदा

२९८

परं ॥ २॥ सत्यमूर्तिरुवाच ॥ शिवदुण्ढिर्वनं प्राप्य बिल्वानीतं महत्तरं ॥ सुखं संप्राप तत्रैव निवासं च चकार सः॥
॥ ३॥ यावन्ति हस्तलभ्यानि बिल्वपत्राणि भूपते ॥ तावद्भिः पूजयामास मासमात्रेण शंकरं ॥४॥ पश्चाद् बिल्वं समारुह्य
गृहीत्वा बिल्वपल्लवान् ॥ तैरीशमर्चयामास लिंगरूपिणमास्तिकः॥ ५॥ एवं वत्सरमात्रेण स वने बिल्वपल्लवैः॥
लिंगेषु पूजयामास शिवं सर्ववनोद्भवैः॥ ६॥ पुनरभ्यागता माघी सिता न्या च चतुर्दशी ॥ तां प्राप्य स मुनिस्तुष्टः
प्राप्ता भूतेति सत्त्वया ॥ ७॥ तदानीं विल्वपत्राणि न दृष्टान्येव तद्वने ॥ अपत्रमेव तज्जातं वनं तत्कृतपूजया
॥ ८॥ ततश्चिन्तापरो जातो वने तस्मिन् महामुनिः॥ अलाभाद्बिल्वपत्राणां किं कर्तव्यं मयेत्यपि ॥ ९॥
तदानीमागताः शैवाः शिवपूजापरायणाः॥ आदातुं बिल्वपत्राणि शिवपूजार्थमादरात् ॥ १०॥ ततः परं च ते खि
न्नाः पत्रहीनं वनं पुनः॥ दृष्ट्वा तं मुनिशार्दूलं शिवदुण्ढिं च शांभवं ॥ ११॥ समागत्य ततः शैवं ते सर्वे प्रणताः परं॥
ऊचुः खिन्नाननं राजन् अत्याश्चर्यसमन्विताः॥१२॥ स्वामिन् किमेवं म्लाननं ते मुखं शिव महोत्सवे॥ अद्य ध्येयो
महादेवो विशेषेण तपोधन ॥ १३॥ शिवार्चनधनस्यापि तव खिन्नं मनो यदि ॥ अन्येषां तत्र का वार्ता वद संसा
रिणां मुने ॥ १४॥ दुःखामां विलयो भवत्यबुद्धिं विश्वेश्वराराधन ध्यानाद्यैः कोटिकोटि विलये दुःखं कुतः स्यात्तव॥

शंगाराधनमेव ते धनमिति ज्ञातं, तदन्यै धनं। नेतुं शक्यमपीति तैः कथमिदं खिन्नं मनस्त्वद्य ॥ १५ ॥ सत्यमूर्त्तिरुवाच ॥ इति तद्वचनं श्रुत्वा तानाह मुनिपुंगवान् ॥ शिवढुण्ढिः स्मरन्नेव शंकरं करुणाकरं ॥ १६ ॥ शिवढुण्ढिरुवाच ॥ शिवप्रसादेन न दुःखमस्य। सर्वात्मना सत्यमिदं वदामि ॥ शिवार्चनं मे धनमेतदन्यै ॥ नेयं कथं वा शिवतत्परस्य ॥ १७ ॥ न चोरनेयं न च राजनेयं ॥ न शत्रुनेयं न तदन्यनेयं ॥ शिवार्चिका रत्नमिदं धनं मे ॥ वृद्धिं प्रयात्येव दिने दिनेऽपि ॥ १८ ॥ न कालादपि भीतिर्मे नान्यस्मादपि सर्वथा ॥ शिवप्रसादसंबन्धात् कथं भीतो भवेन्नरः ॥ १९ ॥ यद्यप्यन्यधनापेक्षा नास्त्यथाऽपि ममाधुना ॥ सुबिल्वपल्लवाभावात् खिन्नमद्य मनः खलु ॥ २० ॥ इयं खलु महाभृता लिंग बिल्वदलान्यपि ॥ दुर्लभानीति मे बुद्धिः सत्संगोऽप्यति दुर्लभः ॥ २१ ॥ मयाऽपि श्वः परश्वो वा भावि किं वा ममेत्यपि ॥ बिल्वपत्राणि दत्तानि सर्वाणि शिवमस्तके ॥ २२ ॥ न बिल्वभूरुहाग्रेऽपि दृश्यन्ते पल्लवाः खलु ॥ अतः परं महाभृता वृथा स्यात्तैर्विना खलु ॥ २३ ॥ यदर्थे करिपीडाऽपि सह्या जाता पुरा मम ॥ तदभावे कथं प्रीतं मनो मम भविष्यति ॥ २४ ॥ तद्बिल्वपत्रग्रहणोद्यतानां ॥ निवारणं वा न कृतं मया तु ॥ अतः कुतो वा नव बिल्वपत्रम् ॥ न क्वापि दृष्टं खलु भूरुहेषु ॥ २५ ॥ भवद्भिरागत्य नवानि नीता ॥ न्यपारपत्राणि; मयापि दैवात् ॥ निवारणे भीतिमु

२९८

पेत्य तूष्णीं ॥ स्थितं मनो मे स्थगितं किलाद्य ॥ २६ ॥ न चादूरे वनं किंचिद् बिल्वानां मत्र दृश्यते ॥ अतिदूरे वनं ति
ष्ठत्येकं व्याघ्रकुलाकुलं ॥ २७ ॥ अत्राद्य गमने मध्ये मध्याह्ने शिवपूजनं ॥ कर्तुं न स्थावरं लिंगं बिल्ववार्ताऽपि दूरतः ॥२८॥
अद्याहोरात्रमीशाय बिल्वपत्रसमर्चनैः ॥ नेयमित्यपि बुद्धिर्या सा जाता विफला खलु ॥ २९ ॥ एकः संस्थापितो बिल्वो
बहुपल्लवसंकुलः ॥ भृता पूजार्थमित्येव नीतास्तत्पल्लवा अपि ॥ ३० ॥ केन प्रविष्टं न ज्ञातं वनमद्यारुणोदये ॥ रिक्तो
बिल्वतरुर्दृष्टः किं कर्तव्यमतः परं ॥ ३१ ॥ धिग्जीवितं बिल्वदलार्चनेन ॥ विना,ऽपि भूतानि शिवलिंगमूर्ध्नि ॥ ततो वरं
मृत्युमुखे प्रवेशो॥ न जीवनं बिल्वदलैर्विनाऽपि ॥ ३२ ॥ बिल्वीदलं कोमलमीश्वराय ॥ भृतार्धरात्रे शिवलिंगमूर्ध्नि ॥
ददाति यस्तं प्रणमन्ति देवाः ॥ स एव वन्द्यो भवतीति सर्वे ॥ ३३ ॥ इन्द्रादिकापारसुरैः समर्च्यः ॥ स एव यः शंकर
मूर्ध्नि बिल्वं ॥ प्रयच्छति स्वच्छमति र्विभूत्या ॥ लिंगस्वरूपे सुकृतार्थरूपे ॥ ३४ ॥ सत्यव्रत उवाच ॥ इति तद्व
चनं श्रुत्वा तमूचुर्मुनिपुंगवाः ॥ अत्यास्तिकं मुनिश्रेष्ठं शिवलिंगार्चने रतम् ॥ ३५ ॥ ऋषय ऊचुः ॥ आसायमपि
गन्तव्यं यत्र बिल्ववनं महत् ॥ लिंगान्यपि समादाय नार्मदानि गृहात्परं ॥ ३६ ॥ तत्र तिष्ठन्तु शार्दूलाः प्रबला अपि
दन्तिनः ॥ मृगेन्द्रा अपि तिष्ठन्तु बिल्वभूरुहकानने ॥ ३७ ॥ अतः परं जीवनेन किं कृत्यमधुना वद ॥ तत्र चेन्

मरणं तेन मुक्ति बिल्वावलोकनात् ॥ ३८ ॥ कोटिशो मुनयः सर्वे वयं यावत्तदा यमः ॥ भीतः स्यादेव शार्दूलप्रभृतीनां तु का कथा ॥ ३९ ॥ अस्माभिरुच्चैः शिवनाम भक्त्या ॥ वक्तव्यमेवोरुवनप्रवेशे ॥ तदा कथं तद्ध्वनयः प्रवृद्धाः ॥ तद्भूति भूत्यै न भवन्ति सन्तः ॥ ४० ॥ एव भस्म समादाय लिंगं चादाय सत्वरं ॥ गन्तव्यं, न विलंबोऽत्रसाध्यः खलु महात्मनां ॥ ४१ ॥ भूताधामपि कोवा स्यान्निशि लिंगार्चने रतः ॥ अयमेतादृशः कालः कदा वा समुपेष्यति ॥ ४२ ॥ सदा शिवार्चनोद्योगो भविष्यति न विद्महे ॥ सकुटुंबै बीलकैश्च पुत्रपौत्रादिभिः सह ॥ ॥ ४३ ॥ अद्य प्राप्तव्यमस्माभि बिल्वभूरुह काननं ॥ इत्युक्त्वा चालिताः सर्वे कोटिशो मुनिपुंगवाः ॥ ४४ ॥ पुत्रपौत्रादिसंयुक्ताः कलत्रैरपि संयुताः ॥ ते यदा प्रस्थिताः सर्वे सहैव शिवढुण्ढिना ॥ ४५ ॥ तदा रिक्तमभूत्सर्वमृषिस्थानं मनोहरं ॥ ततो गताः परिश्रान्ता मुनयो बालकैः सह ॥ ४६ ॥ प्रविष्टास्तद्वनं यत्र बहवो बिल्वभूरुहाः ॥ तदानीं कोटिशो दृष्टाः शार्दूला विवृताननाः ॥ ४७ ॥ मृगेन्द्राः शैलसंकाशाश्चन्द्रमण्डलसन्निभाः ॥ तदानीं मुनिदारास्ता गृहीत्वा स्तन्यपान् शिशून् ॥ ४८ ॥ सगर्भाश्च भयत्रस्ताः किं कर्तव्यमिहेत्यपि ॥ हा महादेव गौरीश महादेवेति वादिनः ॥ [illegible] ॥ अत्युच्चै, मरणं प्राप्तमित्येव भयसंकुलाः ॥ ४९ ॥ प्रदोषसमये परं हराविहारयोग्यं वनं ॥

विलोकित मघापहं वृतमपार बिल्वद्रुमैः ॥ अतः परमघैर्भयं न भवतीति निश्चित्यते ॥ शिवस्मरण तत्पराः परमुदार दारैः सह
॥ ५० ॥ व्याघ्रान् विलोक्य सितभस्म विभूषितांगाः ॥ सर्वेऽपि ते मुनिवराः शिवपूजनार्थं ॥ जातो विलंब इति सत्वर
मेव तावत् ॥ प्राप्तास्तदेव वनमुद्धत सत्व युक्तं ॥ ५१ ॥ तानागतान् विलोक्याशु सदारान्मुनिपुंगवान् ॥ विस्मयं परम
मापुर्मृगेन्द्रा अपि कोटिशः ॥ ५२ ॥ किन्नराणां सुराणां वा प्रवेशो नात्र सर्वथा ॥ नराः कथमिहायान्ति इति विस्मितमानसाः ॥
॥ ५३ ॥ अस्मद्रक्षार्थमेवात्र ते सर्वे समुपागताः ॥ यद्यप्यथापि भूलायामुपवासः कृतोऽधुना ॥ ५४ ॥ न जीव हत्या
षे
कर्तव्या विशेषेणाद्य शंकरः ॥ पूजनीयः प्रयत्नेन नवबिल्व दलादिभिः ॥ ५५ ॥ अद्य येये समायान्ति ते सर्वे यान्ति पावनाः ॥
इति बिल्ववनं दृष्टं लिंगं चेदं शिवात्मकं ॥ ५६ ॥ किंचाद्य स्यात्परो लाभो मुनि सन्दर्शनादिह ॥ ते शांभवाः शिवाचार
तत्पराः परमादरात् ॥ ५७ ॥ दशाध्यायं पठिष्यन्ति मुनयः शिवपूजने ॥ सश्रोतव्यः पापराशि विनाशाय शिवालये
॥ ५८ ॥ शिवनाम स्मरद्भक्तो विधिरेव यतो महान् ॥ दशाध्यायः श्रुतो मुक्तिं दास्यत्येव न संशयः ॥ ५९ ॥
अद्य शांभव योगेन भूतानिशि शिवार्चने ॥ पशुजन्म विनाशः स्यादस्माकं नात्र संशयः ॥ ६० ॥ शिवेन प्रेरिताः
सर्वे मुनयोऽत्र समागताः ॥ शांकराग्रेसराः सर्वे तद्दर्शनमघापहं ॥ ६१ ॥ कृतकृत्याः परं सर्वे वयमद्य महानिशि ॥

शिवार्चने शिवाचार निरते सह सादरं ॥ ६२ ॥ दुष्टव्यापार विरतैस्समाभिर्न्यायमादरात् ॥ अन्यथा तेऽपि भीताः स्युर्मृगेभ्यो भीरवो नराः ॥ ६३ ॥ बालका अपि ये सिंहा युवानश्च महत्तराः ॥ सदा मौनेन तिष्ठन्तु दुर्व्यापार विवर्जिताः ॥ ६४ ॥ अद्य चेद् गजयूथानि समायास्यन्ति कोटिशः ॥ न तेषां हननं कार्यं भूतायां व्रततत्परैः ॥ ६५ ॥ – इति सर्वे विचार्यैव ते मृगेन्द्राः परस्परं ॥ भूति रुद्राक्ष वलयास्ते वनं समुपाश्रिताः ॥ ६६ ॥ आदायादाय बिल्वेभ्यो नवकोमलपल्लवान् ॥ राशीकृत्य स्थिताः सर्वे शिवपूजार्थमादरात् ॥ ६७ ॥ ते मृगेन्द्राश्च ते दृष्टाः सर्वे मुनिवरै नृप ॥ स्वकरोपार्जितापार बिल्वराशि समन्विताः ॥ ६८ ॥ तान् दृष्ट्वा मुनयः सर्वे प्रहृष्टाः शिष्टसंमताः ॥ एतेऽपि मुनयः केऽपि, न मृगा इति निश्चयः ॥ ६९ ॥ ततः प्रविष्टाः सर्वेऽपि वनं बिल्ववनाश्रितं ॥ प्रशान्त सिंह संकीर्णं, संकिर्णं शिवमण्डपैः ॥ ७० ॥ तत्र लिंगानि दृष्टानि तुंगानि विमलान्यपि ॥ काश्मीरमणिरूपाणि मुनिभिस्तैर्महात्मभिः ॥ ७१ ॥ तल्लिंग दर्शनादेव तुष्टास्ते मुनिपुंगवाः ॥ धन्यं दिनमिमं जातं श्रमोऽपिगत इत्यपि ॥ ७२ ॥ ततः परं मुनिवरै दृष्टा सा सुरवाहिनी ॥ तत्र स्नात्वा च तैः सर्वैः सकुटुंबैः सबालकैः ॥ ७३ ॥ भस्म संछन्न सर्वांगास्ते रुद्राक्ष विभूषणाः ॥ धन्यत्वं मेनिरे सर्वे शिवलिंगार्चनोत्सुकाः ॥ ७४ ॥ ततःसुरसरित्तीरे

बिल्वेभ्यो बिल्वपल्लवान् ॥ समादाय ययुः सर्वे गौरीलिंगालयं प्रति ॥ ७५ ॥ मणिदीप समाक्रान्तं दृष्ट्वा शंकरमंदिरं ॥ प्रहृष्टास्ते मुनिवराः प्रदोष समये नृप ॥ ७६ ॥ गंगाजलं समादाय रुद्राध्ययन पूर्वकं ॥ कृत्वाऽभिषेकं बिल्वैश्च पूजयामासुरादरात् ॥ ७७ ॥ मृगेन्द्राश्च समागत्य दृष्ट्वा श्रीरुद्रजापकान् ॥ श्रुत्वा रुद्रमन्त्रन् भक्त्या प्रापुः सन्तोषमद्भुतम् ॥ ७८ ॥ ते बिल्वपत्रैरीशानं पूजयित्वा स्थिता मृगाः ॥ तान् दृष्ट्वा विस्मयं प्राप्तास्ते सर्वे शांभवोत्तमाः ॥ ७९ ॥ मृगेन्द्र महिलाः सर्वाः स्वस्व बालकसंवृताः ॥ समागत्यार्चयामासुरीशानं बिल्वपल्लवैः ॥ ८० ॥ खर्जूर नारिकेलैश्च बीजपुरादिभिः फलैः ॥ पूजयामासुरीशानं शिव स्मरण पूर्वकम् ॥ ८१ ॥ ततः परं दन्तियूथः कोऽपि भस्मविभूषितः ॥ बिल्व शाखाकरो दृष्टः करान्तर जलान्वितः ॥ ८२ ॥ तं दृष्ट्वा विस्मयं प्राप्तास्ते सर्वे मुनिपुंगवाः ॥ ते शिवं पूजयामासुः करिणो बिल्वपल्लवैः ॥ ८३ ॥ करान्तराल संभूतै गंगावारिभिरादरात् ॥ अभिषिंचन्महादेवं स्मरन्तः पार्वतीपतिम् ॥ ८४ ॥ व्याघ्राः समागताः पश्चाच्छिवपूजार्थमुन्नताः ॥ तैश्च संपूजितो भक्त्या शंकरो बिल्वपल्लवैः ॥ ८५ ॥ ततः परं वनगावः प्रहर्षेण समागताः ॥ ताभिः क्षीराभिषेकेण कृतं

शंकर पूजनं ॥ ८६॥ क्षीर प्रवाह संक्रान्तं तत्सर्वं शिवमन्दिरम् ॥ बिल्व राशि समाक्रान्तं तत्सर्वं शिव
मन्दिरं ॥ बिल्वराशि समाक्रान्तं फलराशि विजृंभितं ॥ ८७ ॥ बिल्व शाखाः समानीताः कोटिशो वन
हस्तिभिः ॥ ताभिः समर्चितो भक्त्या मध्यरात्रे महेश्वरः ॥ ८८॥ बिल्व भूरुह महोन्नत शाखा ॥
भंग जात रव संकुल मासीत् ॥ तद्वनं, स तु रवोऽपि कृतार्थं ॥ जातमद्य वनमित्यपि जातः ॥ ८९॥
तान् शिवाराधकान् दृष्ट्वा ते सर्वे मुनिपुंगवाः ॥ शिवलिंगार्चनं चक्रु निशि जागरणं मुदा ॥ ९०॥
अरुणोदय वेलायां पुनः स्नात्वा प्रयत्नतः ॥ चक्रुः शिवार्चनं सर्वे भूतिरुद्राक्ष भूषणाः ॥ ९१॥
ततः सूर्योदये जाते मृगेन्द्रः शांभवोत्तमान् ॥ प्रणम्य दण्डवद्भूमौ कृतांजलिपुटो मुदा ॥ ९२॥
प्राह क्षुधासमाक्रान्तान् मुनि दारान् विलोक्य सः ॥ इति यूथान् विलोक्यापि शार्दूलानपि कोटिशः ॥ ९३॥
॥ मृगेन्द्र उवाच ॥ इयं पुण्यतमा शिष्टा भूता स्वल्पीयसा खलु ॥ अधुना पारणा कार्या फलैः शिव
निवेदितैः ॥ ९४॥ अन्यैश्च विविधैर्भक्ष्यैः कृत्वा शंकर पूजनं ॥ अतः परं विलंबोऽपि कर्तुमेव न शक्यते ॥ ९५॥
कृत्वोपवासं भूतायां चतुर्दश्यां परे हनि ॥ पारणायां महत्पुण्यं मन्त्रैः शिव निवेदितैः ॥ ९६ ॥ त्वरया खलु

४०/

कार्याणि नैवेद्यान्युत्तमान्यपि ॥ परमान्नानि कार्याणि गोक्षीरै मधुरैरपि ॥ ९७ ॥ फलैरपारैर्विविधैः क्षुधाऽप्यद्य प्रवर्धते ॥ अतः परं विलंबोऽपि न कार्यः सर्वथा खलु ॥ ९८ ॥ बालकाश्च क्षुधाक्रान्ताः सर्वे वृद्धास्तदा तथा ॥ पाकः संपादनीयोऽपि तण्डुलाद्यै मनोहरैः ॥ ९९ ॥ सत्यव्रतउवाच ॥ इत्युक्तं तद्वचः श्रुत्वा मुनयो विस्मयावृताः ॥ स्वदारानूचुरधुना पाकः कार्यः प्रियानिति ॥ १०० ॥ मुनिदाराः प्रहृष्टास्ते चक्रुः पाकान् यथेच्छया ॥ अन्नराशिभिराक्रान्तं तत्सर्वं शिवमन्दिरं ॥ १०१ ॥ ततः समर्चयित्वेशं दत्वा नैवेद्यमास्तिकाः ॥ ते सर्वे पारणां चक्रुः शिवस्मरणपूर्वकम् ॥ १०२ ॥ अन्नानि बहुभिः सर्वैः भक्षितानि मृगैरपि ॥ व्याघ्रैर्गोभिर्दन्तिभिश्च तदन्यैरपि भक्षितः ॥ १०३ ॥ तुष्टाः पारणया सर्वे पुष्टाँगास्त दसैरपि ॥ उपविष्टाः प्रहृष्टास्तान् मुनीन् दृष्ट्वा शिवार्चकान् ॥ १०४ ॥ ततो मृगेन्द्रो बहुधा स्तुत्वा शंकरमादरात् ॥ शिवढुण्ढिं विलोक्याह शिवधर्मान् वदेति मे ॥ १०५ ॥ शिवभूताव्रतप्रीतः शिवभक्तिसमन्वितः ॥ तमाह मृगराजानं शिवनामजपोत्सुकम् ॥ १०६ ॥ शिवढुण्ढिरुवाच ॥ ज्ञातं सर्वैः शांकरं धर्मजालं ॥ नन्दीशाद्यैरुक्तमत्यादरेण ॥ तत तावन्मे किंचिदद्यास्ति पुण्यैः ॥ वक्तव्यं स्याच्छंकरस्य प्रसादात् ॥ १०७ ॥

केन शांकर धर्मोणा महिमा पुण्यसाधनं ॥ वक्तुं वा शक्यते सर्वमपराध विनाशनम् ॥ १०८ ॥ भवत्यपार
पुण्याब्धिः प्रवृद्धिरपि जायते ॥ शिव पुण्य प्रवाहेण नेयं सुरनदी समा ॥ १०९ ॥ अन्येषां तत्र का
वार्ता स सर्वोत्कृष्टतावहे ॥ सर्वधर्मोत्तमं प्राहुः शांकरंधर्म मास्तिकाः ॥ ११० ॥ अतस्तच्छ्रवणादे
व मुक्तिः करतलाश्रया ॥ धन्यानां शांकरे धर्मे भक्तिः कामदुघेव सा ॥ १११ ॥ साभक्ति र्यस्य भाग्येन
स एव शिवसंमतः ॥ ११२ ॥ धर्मोत्तमत्वमतिगोचरमेकमेव ॥ धर्मं वदन्ति मुनयः शिवधर्ममार्याः ॥ तं ता
वदद्य श्रुणु वेदशिरोमणिं तं ॥ स्वर्गापवर्गदममोघमघक्षयाय ॥ ११३ ॥ धर्मं शिवार्चनमिदं परम पवित्रं ॥
धन्यंच मंगलकरं, करणंच मुक्तेः ॥ एतस्य तावदमितो महिमा स तावद् ॥ ब्रह्मादिभिश्च विदितो न विशेषत
८०२
स्तु ॥ ११४ ॥ सत्यव्रत उवाच ॥ इत्याकर्ण्य मुदा मुनीश्वर वचः सिंहः प्रहृष्टः परे ॥ नत्वा शांभवपुंग
वं भवपद्मांभोजार्चनैः सादरं ॥ श्रुता निर्णयमेव मे वद कथं श्रुतार्चने किं फलं ॥ बिल्वैः शंकर लिंग
मूर्ध्नि भगवन् तत्पारणाया फलं ॥११५ ॥ कस्याधिकारोऽपि वदाधुना मे ॥ तत्साधनान्यप्यखिलानि
विद्वन् ॥ इदं दिनं शंभुकथाप्रसंगैर् ॥ नेयं विशिष्टं दिनमीदृशं हि ॥ ११६ ॥ तवाप्यागमनं जातं दैवादत्र

महावने ॥ महेश्वरेण संगोऽयं जनितो मुक्तिदायकः ॥ ११८ ॥ इति तद्वचनं श्रुत्वा पुरस्कृत्य स शोभ वान् ॥ प्रणम्य, शंकरं स्मृत्वा, प्राह धर्मं स शाम्भवं ॥ ११९ ॥ भूता कामयुता निशार्धसमयव्याप्ता व्रती न त्यजेत् ॥ शुध्दां तामपि तादृशी यदि न सा पूर्वे परेद्युर्यदि ॥ सायंकालसमन्विता भवति सा ग्राह्या परा पेक्ष या ॥ पूर्वं सोमवदेव तत्प्रबलमित्याहुः शिवाराधकाः ॥ ११९+१२० ॥ ब्रह्मभूतं तपस्तेजो यशो भुवनमि त्यपि ॥ वदिष्ये सत्यमित्येव वदिष्ये तन्महद्व्रतं ॥ १२१ ॥ ब्रह्मभूतं व्रतं कृत्वा माघमासे विशेषतः ॥ संसारबन्धनिर्मुक्तः शिवं याति न संशयः ॥ १२२ ॥ तदिदं व्रतमुत्कृष्टं व्रतं वैदिकमित्यतः ॥ एतद्व्रतपरि त्यागाद्ब्राह्मणः पतितो भवेत् ॥ १23 ॥ विशिष्टभूतसंयुक्ता या रात्रिः सा शिवप्रिया ॥ तस्यामुपोषणं कार्यं, कर्त व्यं च शिवार्चनं ॥ १२४ ॥ शिवलिंगे बिल्वपत्रैर्जलैर्भूत्यापि भक्तितः ॥ निराहारेण यः स्थित्वा भूतायां शिव ~~[illegible]~~ पूजनं ॥१२५ ॥ कर्तव्यमिति यत्नेन कोमलैर्बिल्वपल्लवैः ॥ निशा जागरणेनैव नेया सर्वा प्रयत्नतः ॥ १२६ बिल्वपल्लवसंयुक्तं लिंगं कृत्वा शिवं स्मरन् ॥ नयन्ति ये महाभूतां ते मुक्ताः खलु सर्वथा ॥ १२७ ॥ भूरि पुण्यभरेण भूतायां शिवपूजने ॥ मतिर्भवति, सा सर्गं स्वर्गमपवर्गं च दास्यति ॥ १२८ ॥ तावद्धन्यं जीवनं यावदी

शा॥ भूता प्राप्ता शंकराराधनाय॥ तस्यां पूजां बिल्वपत्रैर्महेशे॥ कृत्वा मुक्तो जायते लिंगरूपे॥१२९॥
लिंगं दुर्लभमेव तावदमलं बिल्वीदलं दुर्लभं॥ सा भूता ऽप्यति दुर्लभा जनिरियं सर्वात्मना दुर्लभा॥
एतद्योगमपार पुण्यविभवैर्मन्ये स योगः परं॥ धन्यानां धनमेव तेन स शिवस्तुष्टो महेशः प्रभुः॥१३०+१३१॥
को वा बिल्वदलेन सापि गिरिजा कान्तस्य दले तथा॥ न प्रीतिर्न सरिद्वराम्भसि, न वा प्रीतिः सुधासागरे॥
एकं वा नव बिल्वपल्लवमुमाकान्तः कपर्दे मुदा॥ धत्ते चन्द्रकलामिवाति विमलो स्वर्गापवर्गप्रदः॥१३२॥
अजारजा एव किलाधिकारं॥ संप्राप्नुवन्तीश्वर पूजनेषु॥ न जारजानां शिवभक्तिलेशो ऽप्यतः कथं ते शिवपूजकाः
स्युः॥१३३॥ न यस्य भक्तिर्गिरिशार्चने स्यात्॥ तं जारजं प्राहुरघांबुराशिं॥ तं सत्यजन्त्यन्त्यजसन्नि
भं, तं॥ सन्तो वदन्त्येव महाघराशिं॥१३४॥ भूति रुद्राक्ष पूताँगः शिवभक्तिपरायणः॥ शिवव्रताधि
कारी तु निर्णीतो वेदवित्तमैः॥१३५॥ अत्रैवोदाहरन्तीममितिहासं पुरातनं॥ शृणुध्वं मुनयः सर्वे
मृगेन्द्राः सावधानतः॥१३६॥ अत्रैव पूर्वमभवद्वने करिवरो मदैः॥ समाक्रान्तः सर्वदापि सर्वभूरुह
पीडकः॥१३७॥ उत्खाय मूलतो वृक्षान्, स्थित्वा तत्पत्र भक्षणं॥ कृत्वा, व्याघ्रकुलं हत्वा भक्षयत्येव सन्ततं॥१३८॥

८३

स सर्वेतरपीडकोऽप्यमल बिल्व संरक्षकः॥ शिवार्चनरतः प्रगे सुरसरिन्निमग्नो मुहुः॥ द्रवामल विभूतिभिः सिततरोरु गात्रो गजः॥ शिवस्मरण तत्परश्चरति तुंग लिंगालये॥ १३९॥ अभिषिच्य महेश्वरं मुदा॥ स्वकरानीत सरिद्वराम्भसा॥ नव कोमल बिल्व पल्लवैः॥ शिवलिंगानि समर्चयत्यपि॥ १४०॥ प्रदक्षिणी कृत्य महेश्वरं मुहुः॥ प्रणम्य, चाघ्राय स बिल्व पल्लवान्॥ प्रयाति, भक्त्या शिवशंकरेति॥ वदन्, वनं व्याघ्र कुल प्रकीर्णम्॥ १४१॥ हत्वा व्याघ्रकुलं तदीयममलं मांसं समादाय, तैर्॥ गंगावारिभिरादरेण विमलैः प्रक्षाल्य भूत्या युतं॥ दत्वेशाय स भक्षयत्यपि मुदा, रुद्रं मुहुः संस्मरन्॥ पक्वान्यत्यमलानि तद्वन फलान्यादाय लिंगे करी॥ १४२॥ एवं युगायुतं स्थित्वा शिवपूजापरायणः॥ योगेन विजहौ देहं संस्मरन्नेव शंकरं॥ १४३॥ ततः सपुष्पकारूढो ब्रह्मलोके ययौ मुदा॥ महादेवगणोपेतो यमादिभिरभिष्टुतः॥ १४४॥ ब्रह्मणा पूजितस्तत्र विधिवद्विधितत्परः॥ ब्रह्मरत्नासने विष्टस्तुष्टोऽपि मृगनायकः॥ १४५॥ तदा ब्रह्मसभासद्भिर्महात्मा कोऽयमित्यपि॥ पृष्टश्चतुर्मुखः प्राह तानीश्वर परायणान्॥ १४६॥ ब्रह्मोवाच॥ अयं शिवाराधन तत्परोऽभूद्॥ गन्धर्व एवामित गन्धपूर्णः॥ अयं प्रदोषे शिव पूजकोऽपि॥ जगाद नारायण नाम मोहात्॥ १४७॥ तेन पापेन स वने करी समभवत्ततः॥ शिव लिंगार्चनोत्कर्षाज्जातो जातिस्मरोऽपि सः॥ १४८॥

तेन पुण्यप्रभावेन स चकार शिवार्चनं ॥ मदान्धोऽपि महादेवं स्मरत्येव मुहुर्मुहुः ॥ १४९ ॥ सत्यमूर्तिरुवाच ॥
इति तद्वचनं श्रुत्वा मृगेन्द्रः प्राह तं मुनिं ॥ "तन्नामोच्चारणादेव कथं जातः करी वने ॥ १५० ॥ इदं तु कौतुकं
तावच्छ्रोतव्यमधुना मम ॥" इति तद्वचनं श्रुत्वा प्राह तं मुनिपुंगवः ॥ १५१ ॥ शिवदुण्ढिरुवाच ॥ पुरा
भृगुरिति ख्यातो मुनिः शांभवपुंगवः ॥ स गतो, लोकसंचारं कुर्वन्, वैकुण्ठमादरात् ॥ १५२ ॥ तस्मिन् का
ले द्वारभागे स्थितस्तं गरुडो मुनिं ॥ प्राहान्तिकसमापन्नो न गन्तव्यं त्वयेति सः ॥ १५३ ॥ तदानीं तद्
वचः श्रुत्वा मुनि विस्मितमानसः ॥ निरोधकः कथं जातो ममायमिति सत्वरं ॥ १५४ ॥ ततस्तं विस्मितं दृष्ट्वा
गरुडः प्राह तं भृगुं ॥ "रतिकालो हरेः सोयं प्रयाहि परतो मुने ॥" १५५ ॥ इति तद्वचनं श्रुत्वा निष्ठुरं मुनिपुंगवः ॥ गरु
८९ डं भस्मसात्कृत्वा कोपेन, स ययौ हरिं ॥ १५६ ॥ तदानीमुत्थितो विष्णुरसमाप्तमनोरथः ॥ अवदन् वार
यामास संज्ञया मुनिपुंगवं ॥ १५७ ॥ ततो भृगुरुवाचेदं वचो नारायणं मुहुः ॥ निष्ठुराणि वदन् एव वचना
नि मृगाधिप ॥ १५८ ॥ "धिग्धिग्धिगेतत्तव मौन मस्य ॥ सायं शिवाराधनवर्जितस्य ॥ प्रदोषकाले सुरतोत्सवे कथं ॥
वद्वापि तावद् अतिदुर्मतिस्ते ॥ १५९ ॥ सायंकालः शंगलिंगार्चनेन ॥ नेयः, सायं पूजयित्वाऽऽगतोऽस्मि किं पापिष्ठे

नाऽधुना संगतिर्मे ॥ मोहार्तेनापि त्वादृशेनाभयेन ॥ १६० ॥ भयमपि बहुजातं न स्मृतं तत्त्वयाकिं ॥
गिरिश भजन शून्याः सायमार्ति प्रपन्नाः ॥ अनुदिन विलयः स्यादीश पूजा वियोगे ॥ कथमपि लज्जा जायते नाधुना
वा ॥ १६१ ॥ सायं कालः कालकालार्चनार्यैर् ॥ नैयो धन्यैः पुण्यरूपैस्ततस्त्वं ॥ उन्मत्त वाक्किं प्रजालोऽसि विष्णो ॥
नायं कालः सर्वथा दारयोगे ॥ १६२ ॥ सायं विशेषेण तवार्चनं यः ॥ कर्तुं प्रवृत्तो भवति प्रमोहात् ॥ त्वं चाप
वक्तुं यतते स यातु ॥ संसारमादौ नरकं च पश्चात् ॥ १६३ ॥ शिवढुण्ढिरुवाच ॥ "इति शप्त्वा ततः
विष्णुं ययौ क्रोध समाकुलः ॥ तद्दर्शन समुद्भूत क्रोध नाशाय काशिकां ॥ १६४ ॥ स काशी यात्रया पापं विष्णुदर्शन
जं मुनिः ॥ नष्टं दृष्ट्वा प्रहृष्टोऽभूत् प्रविष्टः काशिकापुरीं" ॥ १६५ ॥ इति तद्वचनं श्रुत्वा समृगेन्द्रोऽपि वि
स्मितः ॥ "अन्यं धर्मं वरं ब्रूहि मह्यमित्याह सादरं ॥ १६६ ॥ शिवढुण्ढिरुवाच ॥ वेदे धर्मं वरत्वेन
श्रुतं शंकर पूजनं ॥ न तस्मादधिको धर्मः सत्यमद्योच्यते मया ॥ १६७ ॥ विहितं शिवलिंगपूजनं ॥ द्विज
वर्यैरितरैश्च सादरं ॥ १६८ ॥ लिंगार्चनेन विहितं, न समं, श्रुतं वा ॥ पुण्यं तदेव सकलेष्टदमित्यवैमि ॥
तेनैव मुक्तिमुपयान्ति मृगेन्द्र तस्माद् ॥ ईशार्चनं परमिति प्रवदन्ति धन्याः ॥ १६९ ॥ अज्ञानां पतिरिन्दुरनण्ड

विलसन् मौलिस्तदीयं मुदा ॥ दिव्यान्नं विनिवेदितं शिव महादेवेति तुभ्यं मया ॥ कृत्वैवोदरपोषणं मुहुरुमाकान्तेति शर्वेति वा तन्नाम स्मरणोद्यतो भव भवामीति स्मरानि ध्रुवं ॥ १७० ॥ एवं च सर्वभावेन ये भवं शरणं गताः ॥ ते धन्या इति विज्ञेया स्तदन्ये दुर्भगाः स्मृताः ॥ १७१ ॥ इति तद्वचनं श्रुत्वा मृगेन्द्रो हृष्टमानसः ॥ मुक्ताफलान्यपाराणि ददौ तस्मै नराधिप . १७२ ॥ उन्मत्तकुंभिकुंभेभ्यस्तानि जातानि भूपते ॥ संचितानि ददौ तस्मै समृगेन्द्रः प्रहृष्टधीः ॥ १७३ ॥ विलोक्य तानि रम्याणि शिवदुण्ढिः स विस्मितः ॥ मुक्ताफलैर्महादेवं पूजयामास सादरं ॥ १७४ ॥ ततः स मुनिदारेभ्यो ददौ तानि प्रयत्नतः ॥ सन्तोषं जनयन् तेषां शांभवानां विशेषतः ॥ १७५ ॥ स मृगेन्द्राज्ञया तत्र चकार वसतिं मुनिः ॥ सहैव मुनिभिः सर्वैः सकुटुंबैः समागतैः ॥ १७६ ॥ तानुवाच मृगेन्द्रोपि शिवभक्तान् विलोकयन् ॥ भूतिरुद्राक्षपूतांगान् शिवनामजपोत्सुकान् ॥ १७७ ॥ मृगेन्द्र उवाच ॥ बिल्वभूरुह संवीतमिदं वनमघापहं ॥ फलवृक्षाश्च सन्त्यत्र कोटिशोऽपि मनोहराः ॥ १७८ ॥ सरांसि विमलान्यत्र मधुद्रोण्यश्च कोटिशः ॥ वनगावः कोटिशोऽत्र धान्यानि विविधान्यपि ॥ स्वप्रकाशाश्च मणयः कोटिशः सन्ति ते निशि ॥ अतिप्रभा समाकीर्णास्ते दीपसदृशाः सदा ॥ १८० ॥ न चात्र

८०५

व्याघ्रपीडाऽपि कुंभीपीडाऽपि सर्वथा ॥ कुंभीनसानां पीडाऽपि चोरपीडा कथं भवेत् ॥ १८१ ॥ शिवार्चनार्हं वनमेतद्देव ॥ शंगानि लिंगान्यमलानि तानि ॥ तुंगानि बिल्वी तरुमूलभागे ॥ तिष्ठन्त्यपाराणि मुनीन्द्र पश्य ॥ १८२ ॥ इदं मह द्बिल्ववनं कदापि ॥ विवर्जितं बिल्वदलैर्न नूनं ॥ अखण्ड बिल्वीदलभूरुहास्ते ॥ पश्याधुना पर्वतसानुमध्ये ॥ १८३ ॥ गंगैयमुत्तुंग तरंग भंगा ॥ तान्येव तावत्कदलीवनानि ॥ पक्वान्यपाराणि फलानि तेषु ॥ कपित्थपीनानि वनानि पश्य ॥ १८४ ॥ खर्जूरसारैरपि बीजपूरैः ॥ तैर्नारिकेलैरपि संवृतानि ॥ वनानि जंबीर फलवृतानि ॥ सश्रृंगवेरैरपि संवृतानि ॥ १८५ ॥ एतादृशं नास्तिवनं मुनीशा ॥ क्वापीति मन्ये भुवनत्रयेऽपि ॥ न शांभवाग्रेसर वासयोग्यं ॥ स्थलं च लोके किल कामदं च ॥ १८६ ॥ वयं न तावन्मृगयोनिजाताः ॥ परन्तु गन्धर्व्वराः प्रसन्नाः ॥ अनेन वेषेण शिवालयेऽस्मिन् ॥ नित्यं वसामः शिव पूजनाय ॥ १८७ ॥ अन्यैस्तावज्ज्ञायते नास्मदीयं ॥ तत्वं तुभ्यं ज्ञापनीयं विशिष्य ॥ शैवोऽसीति श्रीमहादेव पूजां ॥ अस्मिंल्लिंगे सावधानं कुरुष्व ॥ १८८ ॥ – सत्यमूर्तिरुवाच ॥ इत्युक्तं तद्वचः श्रुत्वा प्रहृष्टास्ते मुनीश्वराः ॥ शिवदुण्ढिप्रभृतयश्चक्रुर्वासं महावने ॥ १८९ ॥ बहुकालमुषित्वा तु मृगेन्द्र वचनाद्वने ॥ सन्तोषं परमं प्रापुः कृत्वा बिल्वैः शिवार्चनं ॥ १९० ॥ सन्तोषं जनयन्तस्ते मृगेन्द्राय महात्मने ॥ महादेवकथालापैः पुत्रपौत्रादि

संयुता: ॥१९१॥ ततः परं महादेवं पूजयित्वा कदाचन ॥ शिवढुण्ढिरुवाचेदं वचनं शंकरालये॥ १९२॥
अग्रे कालः कथं भावि कालकालार्चने मतिः॥ भविष्यति मया तत्त्वं न मया ज्ञायते खलु॥ १९३॥ नारायणा
द्याः सर्वेऽपि यया शंकरमायया॥ मोहं प्राप्ताः सुराः सर्वे गणना तत्र का मम॥ १९४॥ शिवार्चनं परित्यज्य
स्थिताः पूर्वं सुरास्ततः॥ कुयोनिरपि संप्राप्ता दुःखं प्राप्तमनेकधा॥ १९५॥ नारायणोऽपि भृगुणा शप्तस्त्य
क्तशिवार्चनः॥ तस्मात्खाच्यो जातोऽपि प्रदोषेषु विशेषतः॥ १९६॥ शिवमाया मोहितानां सुराणामपि
दुर्गतिः॥ भवत्येव ततः सा तु शिवमाया बलीयसी॥ १९७॥ यावन्न मोहाकुलमस्य चित्तं॥ तावद्विशेषेण
वने विभूत्या॥ पूतैर्नवैर्बिल्वदलैर्महेशं॥ समर्चयित्वाऽभि जहामि देहं॥ १९८॥ सत्यमूर्तिरुवाच॥ इत्या
लोच्य स पूतात्मा पूजयामास शंकरं॥ बिल्वीदलैः फलैः पुष्पैर्धूपदीपादिभिर्मुहुः॥ १९९॥ ततः सर्वेषु पश्यत्सु
जहौ प्राणान् मुनीश्वरः॥ योगेनैते महेशाय प्राणा उच्चारयन् शिवं॥ २००॥ तदानीं प्रेषयामास विमानं परमे
श्वरः॥ तद्विमानं समारुह्य शिवढुण्ढिर्ययौ शिवं॥ २०१॥ मन्दारकुसुमासारस्तदा समभवन्नृप॥ देवदुंदुभ
यो नेदुर्जगुर्गन्धर्वनायकाः॥ २०२॥ सुराश्च दृष्ट्वा तं हृष्टाः सर्वे नारायणादयः॥ शिवढुण्ढिर्महापुण्य इति

ते नृपसत्तम ॥ २०२॥ ततः परं तद्वनपालकोऽपि ॥ श्रुत्वा कदाचिच्छिवदुण्ढिवार्ता ॥ स दुःखितस्तादृश पुण्य मूर्तिः ॥ न क्वापि दृष्टोऽस्ति मयेति राजन् ॥ २०४॥ ततः परं सोपि नु बिल्वमध्ये॥ लिंगानि दृष्ट्वाति मनोहराणि ॥ चकार पूजां नवबिल्वपत्रैः ॥ स्वारोपितापार वनप्रभूतैः॥ २०५ ॥ ततः स्वपुत्रानाहूय स एव वनपालकः॥ तानुवाच प्रयत्नेन भार्यां कन्यां च सोदरान्॥ २०६ ॥ वनपालक उवाच ॥ एते बिल्वाः पोषिताः प्रापुरेवं ॥ वृद्धिं, सिद्धिस्तावदेते ममापि ॥ एते सर्वे पोषणीयाः प्रयत्नैः॥ लिंगान्येतान्यर्चयेयानि नित्यं ॥ २०७॥ यद्यत्र मुनयः केऽपि बिल्वपत्रार्थमादरात् ॥ न तेषां वारणं कार्यं तद्वा सर्वात्मना खलु ॥ २०८ ॥ तेनावर्द्धयिष्यन्ति बिल्वपत्रैर्मनोहरैः॥ शांग लिंगानि तुंगानि गंगातीरे मनोहरे ॥ २०९ ॥ अद्यप्रभृति कस्यापि मा बिल्वस्यास्तु शोषणं ॥ कर्तव्यं पोषणं तेषां छेदनं मास्तु सर्वथा ॥ २१० ॥ बालबिल्वतरवोऽपि कोटिशः॥ पोषिताः खलु वने वनैर्मया ॥ ते सदाऽपि जलदानतः पुनर् ॥ वृद्धिमेवमुपयान्तु बालकाः ॥ २११ ॥ एतद्वियोगे न मतिर्ममापि ॥ संजायते जातु तनुव्ययेऽपि ॥ अत्रास्तु मे पावनमेतदेव ॥ वनं शिवाराधन साधनं मे ॥ २१२॥ इत्युक्त्वा तान् पुनर्दृष्ट्वा पोषितान् बिल्वभूरुहान् ॥ लिंगान्यपि विलोक्यैव जहौ प्राणान् स भूपते ॥ २१३ ॥

ततः परं रत्नविमानमेक ॥ मानीतमीशस्य गणै र्विचित्रं ॥ ययौ समारुह्य गणस्तुतोऽपि ॥ स्तुतः स कालेन सुपूजि
तोऽपि ॥ २१४ ॥ इन्द्रेणापि सपूजितो बहुविधैः पुष्पै र्विशेषस्तवैः ॥ इन्द्रेणापि समन्वितो विधिपुरं संप्राप,
तेनार्चितः ॥ तेनापि स्तुत एव तेन विधिना सम्यक् समाराधितो ॥ वैकुण्ठं प्रययौ गणैरपियुतो नारायणेना
र्चितः ॥ २१५ ॥ ततो महोत्सवैर्युक्तो ययौ कैलासमन्दिरं ॥ रत्नसुन्दरमुत्कृष्टं यत्र क्रीडति शंकरः ॥ २१६ ॥
न बिल्ववनपोषणप्रभवपुण्यतुल्यं परं ॥ श्रुतं सुकृतमित्यतः शिवमवाप सोऽपि श्रिया ॥ तदक्षयफलप्रदं
वनमपारपुण्यप्रदं ॥ शिवालयमिति श्रुतं गिरिशलिंगसंवेष्टितं ॥ २१७ ॥ ये ये शंकरपूजकाः सितलसद्
भस्मात्रिपुण्ड्रांकिताः ॥ ते रुद्राक्षविभूषणाः शिवमतास्तल्लिंगसंसेवकाः ॥ ते तावत् सुरवन्द्यतामुपगताः
प्राणात्यये शंकरं ॥ ध्यात्वा मुक्तिमवाप्नुवन्ति परमां ते ते नमस्याः सदा ॥ २१८ ॥ ज्ञेयं तत् खलु जन्मनः फल
मिति श्रीमन्महेशार्चनं ॥ तल्लिंगे नवबिल्वपल्लवलसन्मालाकुलै रुज्वलैः ॥ नीरैर्वा कुसुमै र्मनोहरवरै र्दूर्वां
कुरै र्वा शिवः ॥ सुप्रीतः स तनोति भाग्यमतुलं श्रीकालकालः खलु ॥ २१९ ॥ २२३ ॥ इति श्री शिवरहस्ये
हराख्ये तृतीयांशे पुण्यमूर्तिरत्नाकरसंवादो नाम सप्तचत्वारिंशोऽध्यायः ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ –

॥ रत्नाकर उवाच ॥ इति तद्वचनं श्रुत्वा स राजा प्रीतमानसः ॥ प्रणम्य तं मुनिं भक्त्या ययौ स्वनगरं प्रति
॥ १ ॥ स राजा स्वसुतान्सर्वान् आहूय शिवतत्परान् ॥ सत्यवृतोक्तेतिहासान् श्रावयामास सादरं ॥ २ ॥
श्रुत्वा तानितिहासान्स्ते प्रहृष्टाः शिव तत्पराः ॥ राजानमाहु रीशान महादेवेति वादिनं ॥ ३ ॥ राजपुत्रा ऊचुः ॥
शिव धर्मोपदेशेन कृतार्थाः स्मः परंतप ॥ अस्माकमधुना राज्ये तृष्णा भोगे विनिर्गता ॥ ४ ॥ आज्ञा देया स
दाराणां शंकराराधनाय नः ॥ रेवातीरे संवसामः कृत्वा बिल्व [illegible] वनं नवं ॥ ५ ॥ इत्युक्त्वा प्रणताः सर्वे पुत्रास्ते
गन्तुमुद्यताः ॥ तानाह सोऽपि भूपालः कृतार्थोऽस्मीति विस्मितः ॥ ६ ॥ वनमेकं तु कर्तव्यं सर्वैः बिल्वकुलोज्वलं ॥
तत्र स्थातव्य मस्माभिः अधुना क्वापि गम्यते ॥ ७ ॥ अभिषिक्तोऽपि कर्तव्यो ज्येष्ठो मृड इति श्रुतः ॥ सोऽयं शूरो राज्य
रक्षां कर्तुं दक्षो न संशयः ॥ ८ ॥ राज्ञां किलायं धर्मोऽपि राज्यस्य परिपालनं ॥ न तस्य पालनाभावे प्रजाः सन्तुष्टमा
नसाः ॥ ९ ॥ शिवार्चनं च चलति राज्यस्य परिपालने ॥ अन्यथा घातुकाक्रान्ते वने स्थातुं न शक्यते ॥ १० ॥ इत्यु
क्तं तद्वचः श्रुत्वा मृडोऽयं राज्यपालकः ॥ भवत्वस्माकमत्रास्ति किं वा कार्यं नृपोत्तम ॥ ११ ॥ ज्येष्ठेन राज्यं
कर्तव्यं यथार्हं तदनुज्ञया ॥ अस्माभिर्वनमाश्रित्य स्थातव्यं बिल्व संकुले ॥ १२ ॥ नव बिल्ववनारम्भः कर्तुं भवति तद्वनो

प्रवृद्धं च भवे तावदायुः केन विनिश्चितं ॥ १३ ॥ अतः परं न नगरे स्थातुं बुद्धिः प्रजायते ॥ त्वयापि नात्र स्थातव्यं
वृद्धेन नगरे नृप ॥ १४ ॥ भोगास्त्वया भुक्ताः, पलिताश्च शिरोरुहाः, राज्यतृष्णा परित्याज्या, मृत्युः
सन्निहितो यतः ॥ १५ ॥ न राज्यमायास्यति मृत्युकाले ॥ प्राप्ते, न रत्नाभरणानि दाराः ॥ सुराः कुमारी अपि,
शंकरत्वं प्राप्याऽधुना शंकरमर्चयाशु ॥ १६ ॥ रत्नै रपारै रमितै धनैश्च शर्वं समाराधय सावधाने ॥
तानि प्रयच्छाति मनोहराणि ॥ शैवेभ्य एवेति मुदा नृपेन्द्र ॥ १७ ॥ शैवार्चनं शंकरपूजनं हि ॥ तेनैव
मुक्तिर्भवतीति मन्ये ॥ राज्येषणां तावदिमां विहाय ॥ भजस्व शंभुं भवभीतिशान्त्यै ॥ १८ ॥ इत्युक्तं
तद्वचः श्रुत्वा तानालिंग्य सुतान्नृपः ॥ भवदुक्तिसुधा पीता धन्योऽस्मीत्याह सादरं ॥ १९ ॥
ततः परं मृडं प्राह ज्येष्ठं राज्याधिकारिणं ॥ राज्यस्य पालनं कार्यं त्वया तावदतः परं ॥ २० ॥ वृद्धस्य सद्मने
वासो नोचितो मम सर्वथा ॥ रेवातीरे वने स्थेयं बिल्वभूरुह शोभने ॥ २१ ॥ पुत्रकृत्यं त्वया कार्यं
ज्येष्ठेन पितृसेवनं ॥ कर्तव्यं तद्वनावाससंपादनमिति स्मर ॥ २२ ॥ न तथा शत्रवो राज्ये निष्कण्टक
महीतले ॥ स्थातव्यमधुना राज्ये परिपालय सादरं ॥ २३ ॥ प्रजापीडा न कर्तव्या, कर्तव्यं शंकरार्चनं ॥

शांकराः पोषणीयाश्च विशेषेण प्रयत्नतः॥ २४॥ यदि पीडा शांभवस्य यस्य कस्यापि सा परं॥ राज्यं नाशाय सहसा भविष्यति न संशयं॥ २५॥ रोगोद्रेकोऽपि दुर्भिक्षं मरणं च प्रतिक्षणे॥ भविष्यत्येव राज्येषु नूनं शांकरपीडया॥ २६॥ शांकराचार निरताश्चाण्डाला अपि ते सुताः॥ पालनीयाः प्रयत्नेन तत् पीडा न तवोचिता॥ २७॥ अशांकराणां विलये यत्नः कार्यो विशेषतः॥ अशांकर लये जाते न राज्ये मरणादिकं॥ २८॥ अशांकरो यदि भवेद्राज्ये राज्यं विनश्यति॥ दुर्भिक्ष रोग चोराद्यैः; अतस्तद्विलयं कुरु॥ २९॥ शिवपूजां प्रयत्नेन कुरु बिल्वादि साधनैः॥ श्रुणु श्राव्यां महादेव कथामेव मुहुर्मुहुः॥ ३०॥ भुंक्ष्वान्नानि महेशाय निवेद्य प्रत्यहं सुत॥ तान्यन्नपति दत्तानि भुक्त्वा सुखमवाप्स्यसि॥ ३१॥ भस्मनोद्धूलनं कृत्वा, कृत्वा रुद्राक्ष धारणं॥ पूजयस्व महादेवमप्रमादेन सादरं॥ ३२॥ कृतायां शिवपूजायां, राज्यवृद्धिर्भविष्यति॥ शत्रुहानि दुःखनाशो रोगनाशोऽपि सर्वथा॥ ३३॥ श्रुण्वन् शिवकथामेव पंचाक्षर जपं कुरु॥ तेन पातक संघातो, भयं च न भविष्यति॥ ३४॥ ऋतु काले स्वदारेषु रतिं कुरु कुमार ते॥ तत्रास्थाऽपि न कर्तव्या तदाऽपि स्मर शंकर॥ ३५॥ कुमारा

स्ते भविष्यन्ति तेषां शिक्षा त्वया मुहुः ॥ कर्तव्या, शिवपूजैव कर्तव्येति पुनःपुनः ॥ ३६ ॥ दासास्ते शिक्षणी यास्ते स्वतस्ते शांकरा अपि ॥ पुनः पुनः शिवाचारः कर्तव्य इति सादरं ॥ ३७ ॥ रेवातीरेष्वदूरेषु स्थातव्यं च मया सुत ॥ त्वया प्रत्यहमागत्य दृष्टव्योऽस्मि सबलाहकः ॥ ३८ ॥ — इति तद्वचनं श्रुत्वा राजानं तमुवाच ह ॥ विलोक्य जननीं वृद्धां भ्रातृनप्यति बालकान् ॥ ३९ ॥ मृड उवाच ॥ न राज्य तृष्णा मम सर्वथाऽपि ॥ न भोग तृष्णापि, परन्तु नित्यं ॥ महेश्वराराधनमेव कार्यं ॥ रेवासरित्तीर वने मयाऽपि ॥ ४० ॥ राज्यं विनश्वर मिति स्मर सर्वथाऽपि ॥ नूनं शरीरमपि नश्वरमेव राजन् ॥ राज्येषु कस्य चिरसंस्थिर नो मतिः स्यात् ॥ जातः स्वनाशसमयं समपेक्षते च ॥ ~~[illegible]~~ ४१ ॥ कालस्य तावत्करुणालवोऽपि ॥ नेति स्मरामि स्मर वैरि रूपम् ॥ अंतःपरं का तव राज्यचिन्ता ॥ न देहचिन्ताऽप्युचिता तवाद्य ॥ ४२ ॥ मृत्युः सन्निहितो भवेद्यदि तदा राज्यस्य वार्ता कदा ॥ भोगस्यापि धनस्य वाजिनिकरेष्वारोहभाग्यस्य च ॥ किं दन्तीप्रवरै रुदारचरितै र्दारैश्च, तस्मादिदं ॥ व्यर्थं सर्वमिति स्मर स्मरहरं वीरेश्वरं संस्मर ॥ ४३ ॥ अद्यापि भोगेषणया वयः किं ॥ नेयं मया मृत्युरुपागतश्चेत् ॥ तद्वारकः कोऽपि न लौकिकोऽपि ॥ नालौकिकोऽपीति हरं स्मरामि ॥ ४४ ॥ — इति तद्वचनं श्रुत्वा सराजाऽपि तथाऽस्त्विति ॥

८०९

तमुक्त्वा निर्गतो गेहात् सदारः स्वसुतैः सह ॥ ४५ ॥ तदानीमागतः कश्चिदमात्यस्तस्य भूपतेः॥ बलवानिति विज्ञातः प्राह राजानमास्तिकम्॥ ४६ ॥ बलवानुवाच ॥ राजन् किमिदमारब्धं? राज्यनाशे सति त्वया ॥ क्व स्थातव्यं पुत्रदारा परिवारैः सहाधुना ॥ ४७॥ चोराक्रान्ते वनेक्कापि स्थातुमेव न शक्यते ॥ तपोधनानां पीडा स्याद्देवातीर निवासिनां ॥ ४८॥ राज्यभ्रंशे क्व वाऽस्माकमन्नपानादिकं नृप॥ तदभावे कथं वा स्यात्तपस्या जीवनानि च ॥ ४९ ॥ यद्यप्यद्यापि वृद्धस्य वने युक्ता तवस्थितिः॥ बालकानामवस्थानं दाराणां च कथं भवेत्॥ ॥ ५० ॥ एतावत्कालपर्यन्तं कथं राज्यं कृतं त्वया ॥ अद्यैव सर्वनाशार्थं प्रवृत्तमुचितं कथं ॥ ५१ ॥ एते युवानः सर्वेऽपि कुमारास्तव भूपते ॥ अभुक्त भोगाः का वा स्यात्तपस्याऽपि विमुक्तये ॥ ५२ ॥ अयं ज्येष्ठः कुमारस्ते मृडो मृड इवापरः॥ करोतु पालनं राजन् राज्यस्यास्य विशेषतः॥ ५३ ॥ वार्धके समनुप्राप्ते तपस्याऽर्थं प्रयास्यतु॥ कृत्वा कुमारं राज्यस्य पालकं सकलस्य च ॥ ५४ ॥ अथवा भ्रातरः सन्ति ते वा तत्परिपालने॥ करिष्यन्त्यधुना तावत्सर्वेषां गमनं कथं ॥ ५५ ॥ — इत्यामात्यवचः श्रुत्वा स राजा मृडनामकं॥ पुत्रं प्राह शृणुष्वेतदमात्यवचनं सुत ॥ ५६ ॥ पुत्रकृत्यं त्वया कार्यं कियत्कालं ततः परं ॥ तपस्यार्थं समायाहि कृत्वा स

ज्यस्य रक्षकं ॥ ५७ ॥ किं चाधुनाऽपि नास्माकं वन्याहारेण जीवनं ॥ आदौ ममातिवृद्धस्य ग्राम्यमन्नमपेक्षितं ॥५८॥
राज्यनाशे कथं तत्स्याद्बालानामपि रक्षणं ॥ पितरावति वृद्धौ किं न पोष्यौ तव पुत्रक ॥ ५९ ॥ इति तद्
वचनं श्रुत्वा सिंहासनमाधिष्ठितः ॥ ज्येष्ठः कुमारस्तं दृष्ट्वा प्रहृष्टः सोऽपि भूपतिः ॥ ६० ॥ तद्राज्ये मुत्स
वं कृत्वा स्थित्वा तस्मिन्दिने नृपः ॥ तदधीनं चकाराशु राज्यं सामात्यमण्डलं ॥ ६१ ॥ कियत्कालं
गृहे स्थित्वा स भूपो महिलायुतः ॥ रेवातीरे वनेवासं चकार शिवतत्परः ॥ ६२ ॥ पित्रा सह कुमाराश्च
निर्गताः केचिद्दादरात् ॥ स्वस्व दारान्विता एव शिवपूजापरायणाः ॥ ६३ ॥ तत्र तेन स्थितं राज्ञा रेवातीरे
मनोहरे ॥ हराराधनसंपत्या सवृद्धः सुतसेवितः ॥ ६४ ॥ स पुत्रः प्रेषयामास ज्येष्ठपुत्रः स्वकं बलं ॥
वने तद्रक्षणं कर्तुं अन्नानि विविधान्यपि ॥ ६५ ॥ गोसहस्राणि बहूनि तस्मिन्नेव वने सदा ॥ दधिदुग्धादि
लाभाय तेन पुत्रेण धीमता ॥ ६६ ॥ राजा वनमुपाश्रित्य तिष्ठतीति मुनीश्वराः ॥ निर्भया एव ते सर्वे
तेन राज्ञा समर्चिताः ॥ ६७ ॥ संपूजयति गौरीशं दधिक्षीरघृतादिभिः ॥ रेवालिंगे स्वदारैश्च चन्दना
द्यैर्मनोहरैः ॥ ६८ ॥ अन्नराशिभिरीशानं पूजयामास सादरम् ॥ शिवार्पितान्ने विप्राश्च भोजितास्तेन

^पं-८ - पितृसेवापरोजातस्तद्भीष्टार्थदानतः ॥ ७३ ॥

कोटिशः ॥ ६९ ॥ कर्पूरदीपमालाभिर्नर्मदातीरसंकुलं ॥ सायंकालं समारभ्य यावत्सूर्योदयं कृतं ॥ ७० ॥ धूपानां पर्वता एव साग्नेयवनराजिभिः ॥ विराजमानाः सततं रेवातीरे विशेषतः ॥ ७१ ॥ प्रत्यहं स सुतस्तत्र समागत्य विलोक्य तौ ॥ पितरौ पूजनं कृत्वा प्रयाति निजमन्दिरं ॥ ७२ ॥ स राजा पालनोद्युक्तः शिवाराधनतत्परः ॥ ^स कृत्वा सर्वदा पूजां महादेवस्य, साधनैः ॥ अपारैरति सन्तुष्टः शृण्वन् शिवकथाः शुभाः ॥ ७४ ॥ एवं वने स्थितो राजा देवैरपि समर्चितः ॥ मुनिभिः संस्तुतो नित्यं गन्धर्वैरपि किन्नरैः ॥ ७५ ॥ ततः कदाचिदागत्य मुनयः शिवपूजकं ॥ तं दृष्ट्वा भूपतिं प्राहुः कृतार्थोऽसीति विस्मिताः ॥ ७६ ॥ तपस्या सेयमुत्कृष्टा शिवपूजनलक्षणा ॥ एतदन्या वृथा सर्वा देहशोषणकारणम् ॥ ७७ ॥ कोटिशः शांभवा एव शिवनैवेद्यभोजनैः ॥ तृप्ताः कृताः पवित्राश्च तव भाग्यमिदं महत् ॥ ७८ ॥ वने फलान्यपाराणि त्यक्त्वाऽपि मुनिपुंगवाः ॥ आयान्ति सततं कर्तुं शिवनैवेद्यभोजनं ॥ ७९ ॥ सापूपैः परमान्नैश्च घृतैरपि मनोहरैः ॥ भुक्तैः शिवार्पितैः पुष्टाः सर्वेऽपि मुनिपुंगवाः ॥ ८० ॥ अस्थिमात्रावशिष्टास्ते पूर्वमाहारवर्जिताः ॥ अधुना शिवनैवेद्यैः पुष्टास्तुष्टाश्च

ते नृप ॥ ८१॥ अरण्ये स्वेच्छया गत्वा बिल्वैरेव सुदुर्भरैः॥ आमध्याह्नं पूजयन्ति रेवालिंगानि शांकराः॥ ८२॥ पुनः पुनः पूजयन्ति कोमलैः बिल्वपल्लवैः॥ आसायं गिरिजाकान्तं प्रणमन्ति स्तुवन्ति च ॥ ८३ ॥ सायं शिवार्चनं कृत्वा समायान्त्यत्र कोटिशः ॥ मुनयः शिवनैवेद्य भोजनार्थं नृपोत्तम ॥ ८४ ॥ केन पुण्यवता पूर्वं उपादिष्टोऽसि भूपते ॥ येनैवं शिवपूजायां प्रवृत्तिरभवत्तव ॥ ८५॥ तुषार गिरि वद्धानि सर्वशः प्यन्नराशयः॥ रेवालिंगांगणे राजन् तदिदं भाग्यमुत्तमम् ॥ ८६॥ एतादृशः पुण्यमूर्तिर्भूपालो न श्रुतः पुरा ॥ महेशाराधनपरस्तपस्या फलपर्वतः॥ ८७ ॥ धन्यः पिता ते, जननी च धन्या, धन्याः सुतास्ते, महिलाश्च धन्याः, ॥ यतो महद्भाग्यमवाप्य, नित्यं समर्च्यते चन्द्रकलावतंसः॥ ८८॥ भाग्यानामिदमेव तावदधुना निर्णीतमेतत्फलं ॥ शर्वाराधनलक्षणं क्षणमपि प्रत्यक्षमावेक्षितं ॥ मोक्षं नो विषमेक्षणाक्षय कृपाभावेऽपि दक्षं क्षणात् ॥ एतत् प्रेक्षणमेव मोक्षजनकं फालेक्षणेनापि किं ॥ ८९॥ रत्नाकर उवाच ॥ – इति स्तुत्वा नृपं सर्वे रेवातीरनिवासिनः॥ मुनयः शान्तहृदयाः स्थिताः शिवपरायणाः ॥ ९० ॥ ज्येष्ठपुत्रोऽपि कालेन राज्यभोगपराङ्मुखः ॥

स्वकुमारं परं चक्रे राज्य पालनतत्परं ॥ ९१॥ ततः परं स रेवायां कुर्वन् लिंगार्चनं सदा ॥ पित्रासह स्थितो भक्त्या शृण्वन् शिवकथार्णवान् ॥ ९२ ॥ नीतः कालः पुण्यरूपस्तथा तैः ॥ पूतैर्भूत्या भूरि रुद्राक्ष भूषैः ॥ रेवातीरं तैरपारैः सदाऽपि ॥ व्याप्तं लिंगाराधनोद्युक्त चित्तैः ॥ ९३ ॥ ~~पुत्रेषु तेषु~~ पुत्रेषु तेषु बहुषु प्रस्थितेषु तस्मिन् ॥ दारेषु तेषु कृत्रु निविधेष्वपि संस्थितेषु ॥ रेवा तटेषु नव बिल्व वनानि चक्रे ॥ राजा महेश्वर समर्चन साधनानि ॥ ९४ ॥ पुत्रैः सह जलं दत्वा सुवर्ण कलशै र्नवैः ॥ पोषयामास स तत्तीरे भूपालो बिल्वभूरुहान् ॥ ९५ ॥ तैरेव रेवातट मावृतं च ॥ छन्नं च रेवा नव बिल्व वृक्षैः ॥ छत्रायमानाच सुखाय जाता ॥ लिंगेषु रेवा निलयेषु तेषु ॥ ९६ ॥ तान् दृष्ट्वा भूपति र्नित्यं हृष्टः शिवपरायणः ॥ तद् बिल्व भूरुह दलैः पूजयामास शंकरं ॥ ९७ ॥ बिल्व भूरुह मूलेषु रेवालिंगानि कोटिशः ॥ स्थापयामास भूपालः स कृत्वा रत्नमन्दिरं ॥ ९८ ॥ रत्नैः स भूपः शिव मन्दिराणि ॥ प्रासाद रम्याण्यमितानि तानि ॥ सकारयामास शिवार्चनानि ॥ चकार तेष्वेव मनोहराणि ॥ ९९ ॥ बिल्व पल्लव पूर्णानि कुसुमैरावृतान्यपि ॥ लिंगानि दृष्ट्वा सन्तुष्टः सकुमारः स भूपतिः ॥ १०० ॥ बिल्व पल्लव शाखाभिः आम्रशाभिः सपल्लवैः स

गृहीत्वा, गिरिशं भक्त्या पूजयामास भूपतिः॥ १०१॥ पंचामृत प्रवाहाद्यैः शिवलिंगार्चनैर्नवैः॥ रेवा क्षीरांबु
धि प्राया, घृतप्रायाऽपि सा बभौ॥ १०२॥ एवं भक्त्या समासाद्य महादेवं स भूपतिः॥ कदाचिद् विजहौ प्राणान्
पूजयन् गिरिजापतिं॥ १०३॥ लिंग मण्डप मध्यस्थं भूति रुद्राक्ष भूषणं॥ पृष्ठभागस्थ लिंगाग्र पतितं ददृशुः
सुताः॥ १०४॥ तदा गतासुं विज्ञाय कुमारास्तस्य शांकराः॥ स्नेहपाश वशाः सर्वे चुक्रुशु भूतिभूषणाः॥
१०५॥ तदानीमागतो नन्दी विमानवरमाश्रितः॥ गणैर्नारायणाद्यैश्च सेवितः शिवलोकया॥ १०६॥
नंदिकेश्वरमालोक्य कुमारास्तमुपागतं॥ प्राहुरश्रुपराक्रान्ताः शिवस्मरणपूर्वकम्॥ १०७॥ कुमारा ऊचुः॥
नन्दिन्नागतमद्य तावदधुना सम्यक् त्वया भूपतिः॥ दृष्टव्यः खलु शांभवोत्तम इति, ज्ञातः सुरैरप्ययं,॥ विघ्नः
किं समभूदुमापतिपदांभोजार्चकः किं नरो "मृत्युं याति, महेश्वरस्य विभवः कोवा, वदाद्याधुना॥ १०८॥
मृत्युंजयार्चनोद्युक्तो यदि मृत्युवशो भवेत्॥ तदा का शिवपूजायाः शक्तिरत्यद्भुता वद॥ १०९॥
यदि "क्षितायुरित्यादि" वेदोऽप्युक्तः शिवोऽपि यः॥ तस्मिन् तावदविश्वासो जातस्तेन सुखं कुतः॥ ११०॥
प्राणानामपिरक्षणे यदि महादेवार्चनस्याधुना" शक्तिर्नेत्यवधारणा भवति, सा तर्ह्यद्भुताघ क्षये,॥ संसारार्णव

तारणादिषु कथं सा स्यात् समर्था? तृणं॥ दग्धुं चेद्‌समर्थ एव; सद्द्वः किं वा गिरे र्नाशकः॥ १११ ॥ न समाप्ता लिंगपूजा धूपदीपादयोऽपिच ॥ ते नार्पिताः किलाद्यापि; कोऽयं विघ्नः समागतः॥ ११२ ॥ कोटिशः शांकरास्तावच्छिव नैवेद्य भोजनं ॥ कर्तुमेवागताः सन्ति, नैवेद्यं दातुमेव न ॥ ११३ ॥ पश्यान्न पर्वतान्, पश्य मोदकापूप पर्वतान् ॥ घृत पायस कुल्यानि कुरु तावद् विलोकनं ॥ ११४ ॥ अपार शाकगिरयः पतिताः सन्ति पश्य तान् ॥ दधि क्षीर प्रवाहाँश्च पश्य पश्य प्रयत्नतः॥ ११५ ॥ कर्पूर नीराजन पात्र कोटिं पश्याधुना धूपगिरि प्रधूमान् ॥ तांबूल वल्ली दल पर्वतांश्च ॥ पूगी फलानामपि तुंग शैलान् ॥ ११६ ॥ एला लवंग शैलाँश्च पश्य पश्य प्रयत्नतः॥ एते शिवोपहारार्हाः पश्यन्त्यवसरं मुहुः॥ ११७॥ अधुना मरणे नृपस्य, सर्वं कथमेतन्न वृथा भविष्यतीति ॥ तव बुद्धि रुपैति किं विमानैः ॥ फलमस्माकमिहास्ति सर्वनाशे॥ ११८॥ सर्वस्वं शिवपूजनं खलु महद् भाग्यं, तदेवाधुना ॥ सप्रत्यूहमतः परं वद परं निर्विघ्नमेकं पुनः॥ दुःखाम्भोधि लयाय तावदधुना लिंगार्चनं जायते ॥ लिंगाराधन साधनान्यपि मुदा संपादितान्यादरैः॥ ११९ ॥ रत्नाकर उवाच ॥ इति तद्वचनं श्रुत्वा नन्दिकेशोऽपि विस्मितः॥ शिवपूजन सामग्रीं दृष्ट्वा प्राह मनोहर ॥ १२०॥

॥ नन्दिकेश्वर उवाच ॥ अनित्यं शरीरं कदा तद्विनाशं ॥ भयास्यत्यवश्यं, ततस्तद्वियोगे ॥ न दुःखानि कानि तत्वावबोधः॥ कथं वो न चित्तं वदत्यादरेण ॥ १२१ ॥ रत्नाकर उवाच ॥ इति तद्वचनं श्रुत्वा कोपव्याकुल मानसाः॥ "धिग्धिक् तत्वावबोधोऽपि तवेत्याहु विचक्षणाः॥ १२२ ॥ ततः समुद्यताः पुत्राः पवित्राः शिवपूजया॥ छित्रास्ते मृत्युमानेतुं यमलोकं ययुस्ततः॥ १२३ ॥ तद्विमानं समारुह्य गत्वा ते यममन्दिरं ॥ बध्वा पाशैर्यमं तीव्रं प्राहुः शंकरपूजकाः॥ १२४ ॥ राजकुमारा ऊचुः॥ रेरे काल दुराचार कालकालार्चनप्रियः॥ मृतो महारथः केन कर्मणा तद्वदाधुना ॥ १२५ ॥ पूर्वजन्मार्जिताघानि नष्टानि शिवपूजया ॥ अधुना पापसंबन्धः तस्य नास्त्येव सर्वथा ॥ १२६ ॥ शिवार्चनान्तरायोऽपि कथं जातो वदाधुना ॥ रत्नाकर उवाच॥ इति तद्वचनं श्रुत्वा यमः प्राणान् प्रदर्शयन् ॥ १२७ ॥ प्राहास्माकं नापराधः कालमृत्यु नृपस्य सः॥ ततः परं नृपप्राणानानीयाहु नृपात्मजाः॥ १२८ तदा तान् कोपसंपन्नाः क्रोधारुणविलोचनाः॥ राजकुमारा ऊचुः॥ क्व गम्यते शिवाचारनिरताराधितं नृपं ॥ त्यक्त्वा, क्व तादृशं स्थानं भवतामपि वर्तते ॥१२९॥ त्वरया प्रविशत भूपकं॥ शिवपूजानिरतं महात्मकं ॥ शिवपूजकसाधकाश्च यूयं ॥ प्रियभूताः खलु तस्य सर्वथा॥

8/3

॥१३०॥ महामृत्युंजयस्याद्य विधिवत् पूजनं यदि ॥ भवत्कृतं तदा तावत् क्रुद्धः स्यादपि शंकरः ॥१३१॥ रत्नाकर उवाच ॥ इति तद्वचनं श्रुत्वा तमाहुः प्राणदेवताः ॥ नास्माकमपराधोऽस्ति महामृत्योरयं परं ॥१३२॥ महामृत्युः समागत्य प्रेरयामास सत्वरं ॥ इतो गन्तव्यमित्येव तेनास्माभिः समागतं ॥ १३३ ॥ इति तद्वचनं श्रुत्वा क्रुद्धास्तेऽपि नृपात्मजाः ॥ महामृत्युं पाशबद्धं चक्रुरत्यद्भुतास्ततः ॥ १३४॥ ततः प्रविष्टाः प्राणास्ते नृपमाशु शिवार्चकं ॥ राजा समुत्थितः पश्चात् पश्यन् स्वप्नमिवाद्भुतं ॥ १३५ ॥ ततः परं महामृत्युं कालमृत्युं च सत्वरं ॥ आनीय पातयामासु रगाधे नर्मदाह्रदे ॥ १३६ ॥ ततः परं स भूपालो भस्मोद्धूलितविग्रहः ॥ रुद्राक्षमालाभरणः पूजयामास शंकरं ॥ १३७ ॥ देवदुन्दुभयो नेदुः पुष्पवृष्टिरभूत्तदा ॥ उत्साहः परमो वृत्तः शांकराणां महात्मनां ॥ १३८ ॥ शिवाराधनविश्वासः प्रवृद्धो ह्यभवत्तदा ॥ तदा पुनः समारब्धं शांकरैः शंकरार्चनं ॥ १३९ ॥ राजदारैः कुमारैश्च कृतं शंकरपूजनं ॥ अमात्यैरपि वार्तेयं श्रुता सन्तोषवर्धिनी ॥१४०॥ राज्ञा राज्याभिषिक्तेन राजपुत्रेण च श्रुता ॥ सदाशिवाभिधानेन सा वार्ता परमाद्भुता ॥ १४१ ॥ अलंकृतं च नगरं तूर्यव्याप्तं च तत्परं ॥ श्रुता नागरिकैः सर्वैः सा वार्तातिमनोहरा ॥ १४२॥ मुक्तातोरणसंबद्धं सर्वं

नगरमण्डलं ॥ मण्डितं च वनं सर्वं मुक्तातोरणकोटिभिः ॥ १४३ ॥ ततः परं तत्र महारथोऽपि महोत्सवेनैव महेश्वरार्चा ॥ कृत्वाथ नन्दीश्वर पूजनं च जगाद तं सोत्सवमादरेण ॥ १४४ ॥ महारथ उवाच ॥ नन्दिकेश्वर समागतं त्वया ॥ शंकरानुचर चंद्रशेखरः ॥ अप्यपार करुणां करोति किं ॥ किं करोमि वद तस्य पूजनं ॥ १४५ ॥ यस्य प्रसादेन विरंचिरासीन्नारायणो नाकपतिश्च कालः ॥ तं कालकालं शरणं व्रजामि ॥ दारैः कुमारैरपि शांकरैस्तैः ॥ १४६ ॥ यस्य प्रभावो न मितोऽपि वेदैः ॥ ब्रह्मादिभिर्वा, स महेश्वरो मे ॥ पिताऽपि माताऽपि सखाऽपि दाता ॥ प्रभुश्च सर्वामर सार्वभौमः ॥ १४७ ॥ रत्नाकर उवाच ॥

इति तद्वचनं श्रुत्वा नन्दिकेशो महामतिः ॥ प्राह राजानमाजानु रुद्राक्ष कवचावृतं ॥ १४८ ॥ नन्दिकेश्वर उवाच ॥ धन्योऽसि राजन् शिवपूजनेन ॥ मृत्युर्जितः कालभयं कुतस्ते ॥ शिवप्रभावोऽयमुमासहायः ॥ सुप्रीत एवं त्वयि सर्वथाऽपि ॥ १४९ ॥ शिवः स सर्वज्ञशिरोमणिस्ते ॥ जानाति चित्तं स्वपदाब्जसक्तं ॥ महेश्वराराधनसक्तमेव ॥ तदामयत्वं शिवदत्तमेव ॥ १५० ॥ दाराः कुमारास्तव तेऽपि शूरा ॥ स्तैरुद्धतैरद्य यमो हतोऽपि ॥ रेवाह्रदे तैः स निपातितोऽपि ॥ राजन् महामृत्यु समन्वितोऽपि ॥ १५१ ॥ इदं बले

शंकरपूजनेन प्राप्तं महामृत्युविनाशदृक्षं ॥ को वा विरूपाक्षपदारविन्द पूजारतादप्यधिकस्त्रिलोक्यां ॥ १५२ ॥ धन्यं कुलं तेन च मृत्युमृत्युरा महेश्वरस्त्वत्कुलजार्चितोऽतः ॥ अतोऽति धन्योऽसि तवास्तु भक्तिः ॥ श्रीमन् महादेवपदार्चनेषु ॥ १५३ ॥ कौतुकं च महादेवः करोति निजलीलया ॥ भक्तप्रभावानुभवप्रदर्शनपरः परं ॥ १५४ ॥ रत्नसिंहासनासीनो रत्नमण्डपकान्तिभिः ॥ सेवितश्छत्रसंकाशैः महार्हैः (मामाई) गिरिजापतिः ॥ १५५ ॥ महारथः समानेयः पुष्पकेनेति सत्वरं ॥ पश्यत्स्वेव गणेष्वन्येष्वम्बया मनोहरः ॥ १५६ ॥ धृतावदात शिरसा पुष्पकेन समागतं ॥ मयाऽपि त्वरया राजन् सहैव गणकोटिभिः ॥ १५७ ॥ पश्य पश्य गणान् सर्वान् अर्थवादो न तत्र मे ॥ रेवातीरमभिव्याप्य तिष्ठन्ति शिवतत्पराः ॥ १५८ ॥ यद्विमानं समानीतं तदारुह्य सुतैस्तव ॥ महामृत्युश्च मृत्युश्च समानीतो यमालयात् ॥ १५९ ॥ चित्रगुप्तादिभिः साकं पातितोऽत्र महाह्रदे ॥ एतादृशं महद्भाग्यं फाललोचनपूजया ॥ १६० ॥ अतः परं मया गत्वा किं वक्तव्यं शिवान्तिके ॥ तद्वदाशु कुमाराणां मध्ये न जगत्त्रये ॥ १६१ ॥ इयता मय्यपि प्रीतिः क्रियते काऽपि तैरपि ॥ किमस्त्यत्राक्यं वद मे हतोणां

भुवि दुर्लभं ॥ १६२ ॥ गन्तव्यं शिवसन्निधानमधुना विश्वेश्वराराधनं ॥ रेवालिंगसमुच्चयेषु बहुधा कार्यं त्वया सादरं ॥ स्नेहः किं न विधेय एव मयि ते हारेषु संख्याऽस्तु मे ॥ प्रीतिवृद्धिमुपैति सांब चरणांभोजे ममाऽप्यन्वहं ॥ १६३ ॥ रत्नाकर उवाच ॥ इत्युक्तं तद्वचः श्रुत्वा कुमारानाह भूपतिः ॥ विनयावनतान् हारान् भूतिरुद्राक्षभूषणान् ॥ १६४ ॥ राजोवाच ॥ किमेवमुच्यते बालाः कोमलं किं न मानसं ॥ कथं ह्रदे महामृत्युः पातितः स यमान्वितः ॥ १६५ ॥ आनीय प्रीणनीयोऽपि द्रष्टव्यनीयः सशांभवः ॥ अशांभवानां निःकालो महामृत्युश्च बालकाः ॥ १६६ ॥ रत्नाकर उवाच ॥ इति राजवचः श्रुत्वा कुमारास्तेऽपि शांकराः ॥ तमानेतुं महामृत्युं द्रुतमाहुर्यमं च ते ॥ १६७ ॥ राजपुत्रा ऊचुः ॥ पतितोऽस्ति महामृत्युरगाधे नर्मदाह्रदे ॥ यमोऽपि स समानेयश्चित्रगुप्तादिभिः सह ॥ १६८ ॥ रत्नाकर उवाच ॥ इति तद्वचनं श्रुत्वा गत्वा ते तस्य किंकराः ॥ पाशबद्धान् समानीय ह्रदात्तीरमुपागताः ॥ १६९ ॥ ततः परं शंकरमन्दिरस्य पुरः समानीय तमूचुरेवं ॥ "राजन् यमो मृत्युसमेत एव सोऽयं समानीत" इतीह दूताः ॥ १७० ॥ ततः परं स राजाऽपि दृष्ट्वा तं विस्मयं गतः ॥ शांकराश्च यमं दृष्ट्वा महामृत्युसमन्वितं ॥ १७१ ॥

शिवरहस्य

हर.वृ.उ.

अ.४८

२६३

यमं दृष्ट्वा नंदिकेशो विस्मयं परमं गतः॥ पाशबद्धं बलात्कारं, प्रापुर्विस्मयमास्तिकाः॥ १७२ ॥ यः श्रुतः पर्वताकारो महामृत्यु र्यमः पुरा॥ स एव दृष्टः कथमिति त्याहु रत्यन्तमास्तिकाः॥ १७३ ॥ ततः परं राजविलोकनेन॥ विच्छिन्नपाशः स यमोऽपि मृत्युः॥ नन्दीश्वरं लज्जित एव दृष्ट्वा, राजानमालोक्य स विस्मितोऽपि॥ १७४॥ "अपारोरु हाराणि लिंगानि दृष्ट्वा,॥ लसद् बिल्वमालाप्रसूनाञ्चितानि,॥ प्रणम्याशु भक्त्या" न विज्ञातमेवं॥ स्वरूपं च राज्ञो ममेत्याह मृत्युः॥ १७५॥ "क्षन्तव्योऽपि ममापराध" इति तं हारं नराधीश्वरं॥ नत्वा हारकुमारवन्मम पिता शरानुशारानपि॥ एतद् भाग्य त्रिलोकनाथ मधुना प्राप्तं महेशाज्ञया॥ प्रायः प्राप्त मपारमेव सुकृतं हारोत्तमालोकनैः॥ १७६॥ जन्मेदं सफलं शिवार्चनरतं श्रीपादुकालोकनात्॥ लोके कोऽपि न दृश्यते शिवरतादन्यो न धन्यो जनः॥ न प्रागेव न भूतपूर्व विभवो भावो न संभावितो॥ भावं प्राप्तमिदं मनोरथकुटीरे वातटं धूर्जटेः॥ ॥१७७॥ रत्नाकर उवाच॥ इति तद्वचनं श्रुत्वा, राजा सन्तुष्टमानसः॥ नन्दिकेश्वरमालोक्य बभाषे वचनं मुदा॥ १७८॥ महारथ उवाच॥ श्रान्तः किलायं शिवपूजनमत्र कार्ये॥ हारोपहारनिकरे रुद्रं च पूर्णं॥ तूर्णं विधेय मधुना विधुरत्व मौलि" पूजा विलोकन पुरःसरमादरेण॥ १७९॥ रत्नाकर उवाच॥

8/6

इत्युक्त्वा स महादेवं पुनस्त्वादरं नवैः॥ बिल्वादिभिः प्रसूनाद्यैः पूजयामास भूपतिः॥ १८०॥ अपारस्वर्ण
पात्राणि परमान्नादि साधनैः॥ संपूर्णानि महेशाग्रे स्थापयामास राशिकाः॥ १८१॥ धूपप्रधूमैरपि दीपमाल
ऽऽकुलैरपि व्याप्तमथानुलिप्तं॥ तं नर्मदातीरमपारहारं दृष्ट्वा प्रहृष्टोऽपि स नन्दिकेशः॥ १८२॥ ततः परं दुग्ध
घृतादि कुल्याः॥ परिष्कृतापार नवान्न राशीन्॥ निवेद्य साम्बाय सदाशिवाय॥ नीराजनानि प्रददौ स भूपः॥१८३
॥ ततः पुष्पाँजलिं कृत्वा प्रणम्य च पुनः पुनः॥ नृत्यं कृत्वा पुनः पूजां चकार गिरिशाय सः॥ १८४॥ ततः परं हेम
विराजमान॥पात्रेषु हारान् परमान्नराशीन्॥ ददौ शिवाचारस्तेभ्य एव॥ स कोटिशो भूपतिरादरेण॥ १८५॥ हारो
पहारैस्स नन्दिकेशः॥ तुष्टो विपुष्टोऽपि यमोऽपि पुष्टः॥ पुष्टो महामृत्युरपि प्रपुष्टः॥ स चित्रगुप्तोऽपि तथा प्रहृष्टः॥
१८६॥ ततः परमपाराणि ददावाभरणान्यपि॥ ताम्बूलानि दुकूलानि भूपालस्तेभ्य एव सः॥ १८७॥ ततस्तादृश
सामग्रीं शंकराराधनोत्सवे॥ दृष्ट्वा स नन्दिकेशोऽपि राजानं प्राह शांभवं॥ १८८॥ श्रीनन्दिकेश्वर उवाच॥
शिवाज्ञापालको नाहं, प्रियो मृत्युंजयस्य च॥ न तवागमने तत्र, त्रिनेत्रः किं वदिष्यति॥ १८९॥ न जाने गिरिजा
कान्त प्रभावं भावमेव वा॥ भावं भावार्चनस्यापि प्रभावं भव सन्निभं॥ १९०॥ तत्रागत्य महेश्वराय सकलं विज्ञाप्य यद्यत्रतो॥

प्रीतिस्तर्हि शिवाज्ञया पुनरिदं प्राप्तव्यमेव स्थलं ॥ एतत्कामगमेव पुष्पकमतः ------ चित्तं वद ॥ व्यक्तं त्यक्तं शिवेतरा-
र्चने हरापारप्रभाव्दर ॥ १९१ ॥ रत्नाकर उवाच ॥ इत्युक्तं तद्वचः श्रुत्वा स्मृत्वा शंकरमादरात् ॥ प्रणम्य
नन्दिकेशं च प्राह हाराद्रेश्वरः ॥ १९२ ॥ राजोवाच ॥ दुष्प्रापं तपसाऽपि केवलमुमा कान्तांघ्रिपंकेरुहं ॥ ध्याने
वी शिवलिंग पूजनवरे हारेश्पारैरपि ॥ धर्मैर्वा शिव सन्निधानमिति मे भात्येव सत्यं परं ॥ त्वत्राप्यम्बिकया
सहाति विमले लिंगे शिवास्तिष्ठति ॥ १९३ ॥ अत्रापार महोत्सवै रनुदिनं लिंगार्चने नीयते ॥ कालः कोऽपि
सुधामयः स्वसमयः सर्वात्मना दुर्लभः ॥ एतत्तावदुमा सहाय निलयं त्यक्तुं न वांछाऽपि मे ॥ ब्रह्मादि प्रलये
ऽपि शंग निलये लिंगे वसामि ध्रुवम् ॥ १९४ ॥ पश्येदं नवबिल्वपल्लवकुलव्याप्तं मयेदं कृतं ॥ रेवातीर
समन्वितं वनमिदं लिंगैश्च तुंगैर्वृतं ॥ एतेनैव ममाक्षयं सुखमपि, प्रायः प्रवृद्धं भवेत् ॥ इत्येव स्फुरती
ति शंकर पद्माम्भोजे भजे निर्भयः ॥ १९५ ॥ रत्नाकर उवाच ॥ इत्याकर्ण्य वचस्तस्य सम्यगित्यभिनंदि
तं ॥ ययौ यमादि संयुक्तो नन्दिकेशः प्रहर्षितः ॥ १९६ ॥ प्रभावं संस्मरन्नेव भूपतेः स पुनः पुनः ॥ यममंदिर
पर्यन्तं ययौ नन्दीश्वरो मुदा ॥ १९७ ॥ तदानीं यममालोक्य प्राह नन्दी तमादरात् ॥ चित्रगुप्तादिकं दृष्ट्वा

महामृत्युं च शांभवः ॥ १९८॥ नन्दिकेश्वर उवाच ॥ दृष्टः किलायं महिमा शिवस्य॥ स शांभवो भूपतिरुद्धतोऽपि॥
कथं प्रबद्धो दुर्योरुपारी ॥ प्रपातितोऽसि प्रबले ह्रदेऽपि ॥ १९९ ॥ शिवपूजाबलं तेषां तत्तुल्यं न बले खलु ॥ शिवपूजाबले
नैव जितं लोकत्रयं च तैः ॥ २०० ॥ अतः परं शांभवानां मार्गे गन्तव्यमेव न ॥ तवायमुपदेशोऽद्य स्मर्तव्यः खलु सर्व
दा ॥ २०१॥ न तेषां गणनीयास्ते ब्रह्मनारायणादयः ॥ ते तान् त्वां यवसं कृत्वा धीरास्तिष्ठन्ति शांकराः ॥ २०२ ॥ कः
शांभवसमो लोके भाग्यवानमितप्रभः ॥ भवार्चनाद् भवत्येव भाग्यवान् भवपूजकः ॥ २०३ ॥ अद्यप्रभृति कस्यापि शांकरस्य
महात्मनः ॥ त्वया प्रतिभटत्वेन नस्थेयं मृत्युनाऽपि वा ॥ २०४ ॥ मया तत्र स्थितं, राजा बोधितोऽपि विशेषतः ॥ भवद्बन्धविमो
काय, मोक्षः स्यादन्यथा कथं ॥ २०५ ॥ ते शांकराश्च शूराश्च कुमारास्तस्य भूपतेः ॥ तेषां पराभवः क्वापि न कदापि भवि
ष्यति ॥ २०६॥ ह्रदे प्रपातिताः सर्वे भवन्त स्तत्सुतैर्यदा ॥ तदा कैरपि न ज्ञाता दुर्दशा भवतां खलु ॥ २०७॥ अतस्तन्नगरे
तावद् भवद्भिः किंकरैरपि ॥ न गन्तव्यं, न तद्देशेऽप्यतीव प्रबलाः किल ॥ २०८ ॥ कालकालार्चनबलात्प्रबला एव केवलं॥
ते नमस्याश्च सततं तथा तद्देशवासिनः ॥ २०९॥ स्वप्नेऽपि तत्र सहसा न गन्तव्यं भवादृशैः ॥ न विस्मर्तव्यमेवेदं वचनं
मदुदीरितं ॥ २१०॥ इत्युक्त्वा स, यमेनापि पूजितो, नन्दिकेश्वरः ॥ सत्यलोकं ययौ, तत्र ब्रह्मणापि समर्चितः ॥ २११ ॥

अपूर्वं राजवृत्तान्तं यत्पृष्टं ब्रह्मणा तदा ॥ तत्सर्वमुक्तं सन्तोषैर्ब्रह्मणे नन्दिना तदा ॥ २१२ ॥ तद्वृत्तान्तं समाकर्ण्य सर्वे ब्रह्मसभासदः ॥ पुलकांचित सर्वांगास्तुष्टुवुः शिव वैभवं ॥ २१३ ॥ ततः परं स वैकुण्ठं ययौ विधि समन्वितः ॥ अर्चितस्तत्र नन्दीशस्तेन नारायणेन सः ॥ २१४ ॥ तत्रापि तेन वृत्तान्तं श्रुतं तस्यैव भूपतेः ॥ तेन स्तुतोऽपि विनतो ययौ कैलासमन्दिरं ॥ २१५ ॥ तत्र गत्वा प्रणम्याशु महादेवं कृतांजलिः ॥ सर्वं निवेदयामास सर्वज्ञाधीश्वराय सः ॥ २१६ ॥ गणाश्च तस्य वृत्तान्तं श्रुत्वा हृष्टाः परस्परं ॥ तद्वार्तया परं नीत्वा समयं ते स्थिताः परं ॥ २१७ ॥ शंकरोऽप्याम्बिकां दृष्ट्वा स्वांकपंकेरुह स्थितां ॥ शृणु प्रभावमित्याह भावानां भाग्य मीदृशं ॥ २१८ ॥ रेवातीरवने वसामि सततं तल्लिंग पूजां मुहुः ॥ दृष्ट्वा भूपमहाप्रभावविभव प्रख्यापनार्थं परं ॥ नन्दीप्रेरित इत्यनेन न यतो भीति र्महामृत्युतो ॥ मद्भक्तस्य वरानने सकुशलो शैव श्चिरं जीवतु ॥ २१९ ॥ इत्याशीर्वचनै र्महेश्वरकृतै र्हराः परं सादराः तल्लिंगार्चन साधनेषु विविधे ष्वाहारमानाहराः ॥ रेवातीरमुपाश्रिताः शिवपरा ध्यानेन नीत्वा दिनं ॥ तिष्ठन्त्येव सुखेन शांकरवरैः साकं महाशांकराः ॥ २२० ॥ इति श्री शिवरहस्ये हराख्ये तृतीयांशे उत्तरखण्डे पुण्यमूर्तिरत्नाकर संवादो नाम अष्टचत्वारिंशोऽध्यायः ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ —

(=सा युवती - किन्नरं आह)

॥ ॥ राजकन्योवाच ॥ ॥ इति रत्नाकरेणोक्तां कथां पापप्रणाशिनीं ॥ शिवनाम्नां कितां श्रुत्वा प्रहृष्टाः पुण्यविग्रहाः ॥१॥ शांकरान्नसमुद्रो पित्तमाहुः पुनरादरात् पुण्यरूप शिवार्चने ॥ समुद्युक्तान्विलोक्याह धन्योस्मीति मुहुर्मुहुः ॥२॥ तेकृत्वा बिल्वपत्राद्यैः हाटकेश्वर पूजनं ॥ स्वस्थानं गंतु मुद्युक्ताः तमाहुः पुनरादरात् ॥३॥ अस्मदागमनस्याद्य कृत्य मासीन्महेत्तरं ॥ यतः शिवकथारूप सुधापानं कृतं मुहुः ॥४॥ धन्यास्म्यः कृत कृत्यास्म्यः शिवभक्तावलोकनात् ॥ शंकरानुग्रहाज्ञातमद्य शांकरदर्शनं ॥५॥ इति तद्वचनं श्रुत्वा सागरो निजमंदिरं ॥ तैः सहैव ययौ प्रीत्या शांभवाग्रेसर प्रियः ॥६॥ समुद्रमध्ये नगरं मनोहरं ॥ रत्नप्रभामंडलमंडितानि ॥ उत्तुंगलिंगामितमंदिराणि संदर्शयामास मनोहराणि ॥७॥ अपार रत्नकीर्णानि गोपुराण्यपिकोटिशः ॥ तेभ्यः प्रदर्शयामास सागरः शांकरप्रियः ॥८॥ ततश्च भवनं रम्यं लिंगकोटि विराजितं ॥ आपार भूषणोपेतं दर्शयामास भक्तितः ॥९॥ ततस्ते तानि लिंगानि दृष्ट्वा रत्नमयान्यपि ॥ अलंकृतानि पुष्पाद्यैः संदृष्टुः प्रियमानसाः ॥ १०॥ दृष्ट्वा प्रणम्य भक्त्या ततदृत्तमणिकोटिभिः ॥ पूजयामासुरीशानं प्रसन्नाद्यैश्च्यकोटिशः ॥ ११॥ पूजांते शंकरं दृष्टुं आगमुहुर्मुहुः ॥ रत्नासने सूप विष्टाः प्रहृष्टाः शिवपूजकाः ॥१२॥ तदानीं सागरस्यापि दाराः स्त्यन्मनोहराः ॥ अपाराः शंकरं द्रष्टुं आगतास्तुष्टुवुश्चतं ॥ १३॥ पश्चान्मनोहरैर्दीरैः अपारैः शंकरार्चनं ॥ कृत्वानाद्योद्यताः सर्वे तन्महेशं गणमदा ॥ १४॥ शिवनाम्नु वि-

स्मृत्वा नत्वा तेऽपि

शेषै स्ते तोष इत्वा प्रयत्नतः ॥ नीराजना निदत्वा पि ययु रंतः पुराजिरं ॥ १५॥ सौंदर्य वाहिनी रूपान पारा भरणा न्वितान् ॥ त्रि-
पुंड्र रुद्राक्ष धरान् दारान्द दृशु रादरात् ॥ १६॥ ततः परं ममूचु स्ते सागरं शांकरोत्तमाः ॥ अति विस्मय मापन्नाः कृतांजलि पुटं
मुदा ॥ हारदारास्तवो दाराः सहाराः शंकरादराः ॥ कस्मिन्काले समुत्पन्नाः किं वः पुण्यं पुरातनं ॥ १८॥ सौंदर्य धारा रूपास्ते
यौवनोन्माद मंथराः ॥ परमैश्वर्य संपन्नाः केन पुण्येन तद्वद ॥ १९॥ हारत्व म पा पाराणां पुण्यानां खलु तत्फलं ॥ सौंदर्य मह-
दैश्वर्यं यौवनं च नवं नवं ॥ २०॥ अलं कृतानि तैरेव मंदिराणि तवाधुना ॥ एतादृशं महद्भाग्यं केन लब्धं त्वया वद ॥ २१॥ तवापि
मद्दैश्वर्यं केन पुण्येन तद्वद ॥ विचार्य पूर्व वृत्तांत मप्रमोदेन सादरं ॥ २२॥ ॥ रत्नाकर उवाच ॥ साधु पृष्टमिदं तावदधुना साद
रं परं ॥ शृणुध्वं सावधानेन तद्वृत्तांतं यथा क्रमं ॥ २३॥ अहं पूर्व भवे विप्रः पिता मे काष्टकोटरः ॥ सशांभव वरस्तेन तुल्यः
शैवो न भूतले ॥ २४॥ शिवा पराधतुष्टो भ ऋस्यैव जनकः पुरा ॥ स हतः पाद घातेन तेनैव हि महात्मना ॥ २५॥ स्वयं शि-
वाराधन संभ्रमेण स्थितः पिता मे शिवलिंग मूर्ध्नि ॥ क्षिप्तं पदं गोमय लिंग रूपे पिता महेना शु मम भ्रमेण ॥ २६॥ तदा
कुठार मादाय छिन्नं तच्चरण द्वयं ॥ ततः परं मृतः सोपि तदृष्ट्वा हृष्टधीः पिता ॥ २७॥ शिवा पराधेन भवंति दुःखान्यपार दुःखा
कर कालगेहे ॥ अतः सतां शांकर हुःखबीज संपादनेन भ्रमतो पिदुःखं ॥ २८॥ तेन पित्रा शिक्षितोहं सर्वदा शिव पूजने ॥

ततः परं पिता प्राप विमानैः शिव मंदिरं ॥२९॥ मया यौवन मासाद्य दारो दार विहार भृः ॥ नत्यक्ता शंकरार्चापि न त्यक्ता सर्वथा मया
॥३०॥ प्रगे मध्याह्न कालेपि सायं काले विशेषतः ॥ शिवार्चनं कृतं पूर्वं बिल्व पत्रादि भिर्मया ॥३१॥ ततः कदाचिद्विपिने
बिल्व भूरुह संकुले ॥ प्रविष्टं बिल्व पत्रार्थं द्विजैः सह चौरेः सह ॥३२॥ तत्राद्भुतं दृष्ट मेकं सुंदरं शिवमंदिरं ॥ लिंगा-
नि तत्र दृष्टानि तुंगानि गिरि शालये ॥३३॥ बिल्व पल्लव पुष्पाद्यैः आक्रांतान्येव तान्यपि ॥ सरांसि तत्र दृष्टानि कमल व्या-
कुलान्यपि ॥३४॥ तत्र पुण्यवनं दृष्टं सदा वन समन्वितं ॥ कनकान्यपि दृष्टानि सुवर्णकमलान्यपि ॥३५॥ तत्र गंधर्व तन-
याः कोटिशः समुपागताः ॥ एकांतं शिव पूजार्थं तस्मिन्न भिनवे वने ॥३६॥ तासां सौंदर्य प्रभावस्तु वक्तुमेव न शक्यते ॥
महदैश्वर्य संपन्नाः ताः सर्वा भरणान्विताः ॥३७॥ ताः समागत्य वेगेन स्नात्वा सरसि निर्मले ॥ भूति रुद्राक्ष विमलाः
चक्रुः शंकर पूजनं ॥३८॥ रत्नैरपारैः पुष्पाद्यैः धूप दीपादि भिर्मुदा ॥ कृत्वा शिवार्चनं सर्वाः प्रहृष्टाः शिवतत्पराः ॥३९॥
ततः परं कृतं नाट्यं ताभिरत्यंतमादरात् ॥ शंकराग्रे शिवाचार निरता भिर्यथेच्छया ॥४०॥ तद्दर्शने मम प्रीतिर्जाता ता-
वत्तदा खलु ॥ तासामपि मयि प्रीतिः सुंदरे शिवतत्परे ॥४१॥ अहं ताभिः समाहूतः तदा तन्निकटं प्रति ॥ इत्थमुक्तं ताभि
रेव तच्छृणुध्वं प्रयत्नतः ॥४२॥ ॥ गंधर्वकन्यका ऊचुः ॥ ॥ सौंदर्य निधिरेवासि युवा शिव परायणः ॥ कस्मिन्वा-

नगरे वासः सदनं कुत्र वा तव ॥४३॥ कः पिता कापि वा माता संति किं भ्रातरस्तव ॥ किं ते कुलं च शीलं च बलं च विपुलं वद ॥४४॥
दाराः संति न वा भाग्यं किमस्ति वद शंकर ॥ इच्छा किमधुना कापि तव दारपरिग्रहे ॥४५॥ दारापेक्षा यदि तदा वयं गंधर्वकन्य-
काः ॥ योग्यः परिणयः कार्यः कार्यमन्यद्भविष्यति विशेषतः ॥ ~~शिवद्रोहरतो जातः स समुद्रो यतोधुना~~ ४६॥ रत्नाकर त्वमीशेन तु-
भ्यं देयमसंशयं ॥ अस्मत्सार्थतया शर्वः प्रसन्नोपि भविष्यति ॥४७॥ समुद्रस्याधिकारोद्य गमिष्यति विशेषतः ॥ शिव
द्रोहरतो जातः स समुद्रो यतोधुना ॥४८॥ इति तद्वचनं श्रुत्वा मयोक्तं किमभूत्तथा ॥ येनाधिकारविलयः समुद्रस्यापि
जायते ॥४९॥ ततः परं ताभिरुक्तं श्रोतव्यं तदिहादरात् ॥ तेनापि तावदधुना संतोषो वृद्धिमेष्यति ॥ गतः समुद्रः श्रीरुद्रो हा-
रान्द्रष्टुं मनोहरान् ॥ ततस्तमागतं दृष्ट्वा भ्रांतिमाप स सागरः ॥५१॥ वेषांतरेण संप्राप्तो महादेवो न पूजितः ॥ तेन हाराः
प्रार्थितोपि न दत्तः परं परमादरात् ॥५२॥ ततः परं महेशेन तं प्रत्युक्तं वचः किल ॥ तदप्यभिनवं वक्ष्ये शृणुध्वमति
सादरं ॥५३॥ ॥ श्रीसदाशिव उवाच ॥ ॥ अपारास्ते महोदार हाराः संति तवाधुना ॥ तत्रैको वा प्रदेयो मे हारो हाराय
सादरं ॥५४॥ हरो हारप्रदानेन हाराधाकरपूर्वकं ॥ संतुष्टो महतीं भूतिं तुभ्यं दास्यत्यसंशयं ॥५५॥ ऐश्वर्ये सति हार-
स्य यः पूजां न करिष्यति ॥ तदैश्वर्यं [illegible] लयं याति दरिद्रोपि स जायते ॥५६॥ किं तेन वद भाग्येन यद्यो दर्यं न ते
तदा ॥

पात्रं हारं सभामाद्य कोवास्यास्तदनादरः॥५७॥ किमैश्वर्यमदांधेन हारवीरपराभवः॥ क्रियते स कृतः प्रायः स पराभवमि-
च्छति॥५८॥ अत्रैवोदाहरंतीममितिहासं पुरातनं॥ तच्छृणु क्षितिपत्नेन भज भाग्यमिदं मुहुः॥५९॥ पुरा कश्चिदभून्नृजा
वरं तप इति श्रुतः॥ रिपवो विजितास्तेन शूरेणामिततेजसा॥६०॥ हतेष्वरिषु तद्राज्यं आक्रांतं तेन शत्रवः॥ बहुवारं ह-
ताः सर्वे रिपुसैन्यं महीतलं॥६१॥ यावद्रिपुधनं तावत्समानीय स्वमंदिरं॥ पूर्णं कृतं गजाश्वाद्याः कोटिशस्तस्य भूपतेः॥६२॥
तस्य प्रतिभटः कोपि न दृष्टः खलु भूतले॥ सुवर्णमंदिराण्येव तेन संपादितान्यपि॥६३॥ रत्नप्राकारसंवीतं पुरं तेन कृतं पुरा॥
सर्वदा रत्नमालाभिः नगरं तदलंकृतं॥६४॥ तस्मिन्प्रशासति भूपाले सभया एव सज्जनाः॥ अशांभवपरिक्रांतं तद्राष्ट्रमघसंकु-
लं॥६५॥ तस्मिन् राष्ट्रे वने कश्चित् ब्राह्मणः शिवतत्परः॥ स कुटुंबः स्थितस्तत्र कृत्वा पर्णकुटीं वटे॥६६॥ तत्र राजा गतो
दैवात्संचरन्विपिनं परं॥ तृषार्तोपि क्षुधार्तोपि हयमारुह्य केवलं॥६७॥ स्थितमन्यत्र तत्सैन्यं स्थितं च परिचारकैः॥ एका-
की स्वयमागत्य वटच्छायामुपाश्रितः॥ तदानीं तृषितो राजा ययाचे जलमादरात्॥ मुनिकन्यां समालोक्य वटमूलस्थितां
तदा॥६९॥ सा ददौ जलमानीय फलानि विमलान्यपि॥ स तत्पीत्वा जलं श्रांतो जगृहे स फलान्यपि॥७०॥ मूलानि परि-
पक्वानि तया दत्तानि कानिचित्॥ तेराशु पूरयामास स्वोदरं स नराधिपः॥७१॥ तदा तमाह सा कन्या तत्कंठे हार

मुत्तमं॥ दृष्ट्वा प्रहृष्टं राजानं जलमूलादिभिस्तदा॥७२॥ ॥कन्यको वाच॥ ॥ गौरीव्रतं समारभ्य गौरीमूर्तिरियं कृता॥ पुष्पैरलंकृतावन्यैः पांडुवर्णादिभिस्तथा॥७३॥ न धनं मुनिकन्यानां गौरीपूजार्थमुत्तमं॥ मुक्ताहारस्त्वया देयस्तारता रामलो नृप॥७४॥ वाजिस्कंधेपि तिष्ठंति मुक्ता गुच्छाः सहस्रशः॥ तेष्वेकोवा प्रदातव्यो मुक्तागुच्छो मनोहरः॥ मुक्ताफलालंकृता याः शिवा याऽश्च विलोकने॥ प्रवृत्तं मे मनो राजन् तत्फलं श्रूयते मया॥७६॥ मुक्ताहारादिभिर्गौरीयः पूजयति सादरं॥ स मुक्तो यानमासाद्य प्रयाति हरमंदिरं॥७७॥ रत्नाभरणसंयुक्ता मुमां शंकरवल्लभां॥ दृष्ट्वा राज्यमवाप्नोति भोगेच्छायामिति श्रुतं॥७८॥ अलंकृतां शिवां दृष्ट्वा गौरीं हारादिभिर्मुदा॥ विरक्तोपि विमुक्तः स्यात् घोरसंसारबंधनात्॥७९॥ हारैरभ्यर्चिता गौरी स्वरत्नाभीष्टफलप्रदा॥ सुवर्णाभरणप्रीता निर्वाणमपि दास्यति॥८०॥ सर्वसौभाग्यसंपन्ना सा गौरी भववल्लभा॥ गृह्णाति भक्तदत्तानि फलं दातुं हि केवलं॥८१॥ तस्याः प्रीतिर्भवेद्धार हारप्रदानेनैकापि स्याद्दिव्येव पांच्या कृतापि॥ अभ्यर्था चेत्तदा सार्थकं ते भाग्यं नो चेद्रत्नैः किं तेन कृत्यं॥८२॥ इति तद्वचनं श्रुत्वा कृत्वा तदवधीरणां॥ ययौ वाजिनमारुह्य तदा सर्पः समागतः॥८३॥ कोपि कोटरमार्गेण राज्ञ कंठमुपागतः॥ तेन दष्टः स भूपालो मृतः साश्वो महावने॥८४॥ ततः परं तु तद्राष्ट्रं तत्र तत्र लयं गतं॥ सैन्यं च तन्मृतं सर्वं गजाश्वादिकुलं तथा॥८५॥ तस्माद्भाग्यमपि प्राप्य दानपात्रमनुत्तमं॥

न ददाति धनं यस्तु स विनश्यति सर्वदा ॥८६॥ अत्युत्कृष्टस्य भाग्यस्य फलं खलु तदेव यत् ॥ श्रीः श्रीः श्रीः श्रीः श्रीः श्रीः श्रीः श्रीः
सत्पात्रदानमन्यत्तु विफलत्वेन कीर्तितं ॥८७॥ देयं दुर्लभमेवाहो दानपात्रं च दुर्लभं ॥ दातृत्वमपि लोकेस्मिन् सुतरामपि दुर्ल-
भं ॥८८॥ धने सति मया देयं धनमित्यपि किंचन ॥ प्राप्ते धनेन दानेच्छां कुर्वन्त्यत्यंत लोभतः ॥८९॥ भाग्यवंतः प्रयच्छंति धनं
पात्रे समागते ॥ अभाग्या न प्रयच्छंति तद्भाग्यमदानतः ॥९०॥ अदानाद्दरिद्रो भवत्येव हारं परं पात्रमासाद्य मृत्युं प्रया-
ति ॥ पुनस्याद्दरिद्रः पुनर्मृत्युमेतीत्यवश्यं दरिद्रो भवत्येव हीनः ॥९१॥ स्वशक्त्या देयमल्पं वा सं पात्रेपि स्वशक्तितः ॥
दुर्मुखास्ते भवंत्येव धनदानपराङ्मुखाः ॥९२॥ पुरा कश्चिदभूद्विप्रः कणयाचनतत्परः ॥ स जीवति कुटुंबेन कणैः
क्लेशसमर्जितैः ॥९३॥ स कदाचित्स्वदारेभ्यः कणान्दत्वा वनं गतः ॥ काष्ठाद्याहरणं कर्तुं तत्र दृष्टः शिवार्चकः ॥ तदा
वात्या समानीतः दवभस्मसमावृतः ॥ स काष्ठाहरणोद्युक्तो दृष्टः शैवेन सादरं ॥९५॥ स पृष्टः तेन शैवेन दवभस्म
कणावृतः ॥ शैवोयमिति बुध्येव भस्मभूषितविग्रहः ॥९६॥ ॥ शैव उवाच ॥ ॥ किमेवं खिन्नमधुना मुखं तव म-
हावने ॥ कथमभ्यागतं कृत्यं किं वा वद तवाधुना ॥९७॥ इति तद्वचनं श्रुत्वा संप्रणम्य शिवार्चकं ॥ स्वरूपं ज्ञापयामास
तस्मै तेन सदुःखितः ॥ तमुवाच ततः प्रीत्या कर्तव्यमिदमुच्यते ॥ त्वया यत्नेन दातव्यं शैवायान्नं विशेषतः ॥९९॥ य-

देवयाच्चयालअंतत्र किंचित्प्रयत्नतः॥ देयं तेन समृद्धिस्ते भविष्यति न संशयः॥१००॥ नैवान्नपतये दत्तं येनान्नं किंचिदाद-
रात्॥ स भवत्येव सहसा दरिद्रो नात्र संशयः॥१॥ अन्नं हारमुखे देयं ग्रासमात्रमपि प्रियं॥ तेन तुष्टो महादेवः दौर्भाग्यं तेन नश्यति
॥२॥ यदि हारमुखे दातुं न शक्तिः सर्वथा तदा॥ अन्नं शिवार्पणं कृत्वा भोक्तव्यं नित्यमादरात्॥३॥ अनर्पितं महेशाय भुंक्ते यो-
न्नं स पापधीः॥ प्रतिजन्मनि पापिष्ठो दरिद्रो भवति ध्रुवं॥४॥ अन्नानां पतये नमो नम इति स्मृत्वा प्रदेयं मुदा शर्वायान्न
मनादरं च परतः कृत्वा प्रणम्यादरात्॥ तेनान्नं निसमृद्धिमेत्य सदने तिष्ठति, यन्निक्षुरात्तद्देहाद्धि निवृत्य याति विपिनं यद्वातद
न्यालयं॥ इति तद्वचनं श्रुत्वा तमाह द्विजपुंगवं॥ किमन्नपतिरूपं मे वद देति प्रीतमानसः॥६॥ ॥ शांभव उवाच॥ ॥रुद्र
ध्यायेन तद्रूपं कथं चित्समुदीरितं॥ तद्देवरूपं विज्ञेयं त्वया गुरुमुखात्खलु॥७॥ शिवरूपमिति ज्ञानं यद्यप्यत्यंतदुर्ल-
भं॥ तथाप्यभ्यसनेनैव तज्ज्ञानं च भविष्यति॥८॥ हरो हारमुखे दत्तमाहारमति मादरं॥ गृण्हाति दातुमेवादौ सउदारः
सहस्रधा॥९॥ न तथा ग्राहको लोके दातापि न हरात्परः॥ न हर्तापि न भर्तापि न कर्तापीति मन्यतां॥११०॥ सर्वसौभाग्य
दातारं शंकरं लोकशंकरं॥ गौरीभर्तारमज्ञात्वा दुःखितो मानवो भवेत्॥११॥ न जानंत्येव गौरीशं मोहपाशसमावृ-
ताः॥ अत एव महद्दुःखं प्राप्नुवंति पदे पदे॥१२॥ किंचित्ताव्यधनोन्मादाद्धि स्मरंति महेश्वरं॥ विस्मरंति भ्रमा-

त्केचिन्महापातकराशिभिः ॥१३॥ ज्ञात्वाकथंचिदालस्यात्नाराधयतिकश्चन ॥ अधमाधमतां प्राप्य दुःखि तस्याद संशयं ॥
१४॥ जले बिल्वदले वापि पूजितो गिरिजापतिः ॥ ददाति परमां वृद्धिं इति धन्यैः परंमितः ॥१५॥ अतः प्रमाद मुत्सृज्य शांगं लिं-
गं समर्चय ॥ निवेद्यान्नानि तत्रैव भुंक्ष्व चिंतय शंकरं ॥१६॥ पाप नाशो भवत्येव भवानी वल्लभे स्मृते ॥ ततः परं भाग्य वृ-
द्धिः भवत्येव पदे पदे ॥१७॥ भक्त्या परं महेशस्य भजनं यदि जायते ॥ तदा न भयलेशोपि भव भस्म मुद्भवं ॥१८॥ यस्मा
द्भवंति भूतानि भूतान्यपि भवंत्यपि ॥ तं भवं भावनालब्धं भावयाशु भयापहं ॥१९॥ इति तद्वचनं श्रुत्वा नत्वा चैवोपका-
रिणं ॥ ययौ स्वमंदिरं विप्रः स्मरं स्तद्वचनान्यपि ॥१२०॥ ततः परं लिंगमेकं तेन संपादितं नवं ॥ तत्रार्चनं कृतं तेन बिल्व
पत्रादि साधनैः ॥ २१॥ यदन्नमर्जितं स्वेन तत्सर्वमपि सादरं ॥ निवेद्य शंभवे भुक्त्वा स्थितः स्मृत्वा महेश्वरं ॥ २२॥
एवं संवसता तेन रेवातीरे गतं क्वचित् ॥ ततो रेलिंगमभ्यर्च्य स्थितो बिल्वदलादिभिः ॥ २३॥ तदानीमागतः कश्चि-
त् राजा शिव परायणः ॥ तेन दृष्टः स विप्रोपि दिव्य भस्म विभूषणः ॥२४॥ ततः परं समागत्य राजा प्राह शिवार्चकं ॥ को-
सि कुत्र स्थितिस्तत्र क्व वा तव परिग्रहः ॥ २५॥ का वा विद्या समभ्यस्ता कथमभ्यर्च्यते शिवः ॥ कथं ध्येयो महादेवः तत्स्व-
रूपं च कीदृशं ॥ २६॥ किं तत्ज्ञान फलं वास्या तदज्ञान फलं च किं ॥ तत्सर्वं वद मे विद्वन् शांभवाग्रेसराधुना ॥२७॥

दुर्लभः शंभवो लोके शिवज्ञानपरायणः॥ रेवातीरं दुर्लभं च लिंगमत्यंतदुर्लभं॥२८॥ रेवालिंगस्य महिमा तदर्चने फलं च किं॥ लिंगबोधकदेवोपि तत्पूजाबोधकोपि वा॥२९॥ वेदागपं वा कथं ज्ञातं किं वा तस्य फलं वद॥ इति पृष्टः स राजानं प्राह विप्रः स चिंतया॥३०॥ ॥विप्र उवाच॥ ॥ महेशतत्वं निगमैर्नैबुद्धं वेदैर्मुनीन्द्रैरपि सिद्धसंघैः॥ तज्ज्ञानदेवस्य कथं वदाद्य प्रतारकत्वं च न युक्तमेव॥३१॥ अनंतवेदांतविचारतांताः शांताः प्रजानंति महेशतत्वं॥ यथा कथंचित्कणशो महेशप्रसादलेशे सति पुण्यलभ्ये॥३२॥ लिंगतत्वं विदुर्ज्ञेयं लिंगपूजाफलं तथा॥ रेवास्वरूपं ज्ञानं च दुर्लभं सुतरामपि॥३३॥ दुर्ज्ञेय एव गिरिजारमणप्रभावः तज्ज्ञानमस्य निगमाविषयं कथं वा॥ दुर्ज्ञेयवस्तु विषयानवगाहनेपि नास्या परा धइति मे प्रतिभाति राजन्॥३४॥ इत्याकर्ण्य वचस्तस्य तमुवाच स भूपतिः॥ पूजाक्रमं वद मे लिंगस्येति विशेषतः॥३५॥ ॥विप्र उवाच॥ ॥ न पूजापि परिज्ञाता न ज्ञातोपि क्रमो मया॥ ब्रह्मादीनां च तज्ज्ञानं दुर्लभं खलु वस्तुतः॥३६॥ तत्पूजाज्ञानविरहेप्येवं किंचिज्जलादिकं॥ देयं लिंगे प्रयत्नेन तावता पातकक्षयः॥३७॥ द्वित्राणि बिल्वपत्राणि क्षिप्तानि शिवमस्तके॥ अभक्त्यापि हरंत्येव पातकानि बहून्यपि॥३८॥ अग्निर्दाहक एव किं करतलस्पृष्टो न तद्वत्कथं लिंगाराधनमप्यघापहरणे दक्षं विरूपाक्षतां॥ दास्येत्येव तदक्षयं फल-

मितिज्ञातं कथं चिन्मया तल्लिङ्गं तु न तत्फलं किमधुना तल्लिङ्ग सांध्ये न वा ॥३९॥ अस्माभिर्दुरदृष्टनाशक मितिज्ञातं शिवाराध-
नं ते तत्साधनसाधितं धनमितिज्ञातं निधित्वेन च ॥ न त्वावत्सुलभं जलैरपि कृतं संसारदावानलव्यवस्थानं कुरुते ह्यु-
पारविभवं तत्केन वा ज्ञायते ॥१४०॥ रेवातीरे नीरमात्रेण लिंगं तुंगं बिल्वीपल्लवैर्वा फलैर्वा ॥ भक्त्यानित्यं पूजयन्या-
ति मुक्तिं संसाराब्धिव्याधिनाशेन सत्यं ॥४१॥ रेवातीरप्रापकं पुण्यमेकं नैकं किंतु प्रापकाणां सहस्रैः ॥ धर्मैः प्राप्तं धर्म
हेतुस्वरूपैः धर्मो वाप्तिस्तैः पुनर्जायते नः ॥४२॥ जानंति केचिद्द्विरिजासहायपूजाविधानानि तथापि तानि ॥ न भा-
वनायाः परिपूरकाणि काम्यानि नित्यान्यपि तानि नूनं ॥४३॥ कस्तत्र भावपरिभावनया महेश ध्यानप्रवृत्त इति
तं वद सावधानं ॥ अंगव्यपापनियमैर्नियमेन तेन सा भावनापि विकला खलु सत्यमेवं ॥४४॥ इत्याकर्ण्य वचस्तस्य पत
माहूय स्वकं गृहं ॥ ययौ यानवरस्थेन सहितेन महात्मना ॥४५॥ तेन तन्मंदिरं दृष्टं मणिमंडलमंडितं ॥ तुंगलिंगसमा
क्रांतं हारकोटिसमन्वितं ॥४६॥ तं दृष्ट्वा विस्मयाविष्टः प्रणतः शांकरानुगः ॥ पूजयामास लिंगानि नवबिल्वदलादि-
भिः ॥४७॥ ततः प्रदोषपूजां च स चकार महीपतिः ॥ ततस्तं भोजयामास पक्वान्नैर्हारसंयुतं ॥४८॥ भोजनांते महा
देवकथया प्रीतमानसः ॥ ददौ तस्मै महार्हाणि भूषणानि महीपतिः ॥४९॥ दुकूलान्यपि दिव्यानि वाहनान्युत्तमान्यपि ॥

शिवरहस्य

309

गोकुलान्यपि दत्तानि धनानि विविधान्यपि ॥१५०॥ तत्सर्वं समुपादाय स तावत्स्व गृहं ययौ ॥ तं दृष्ट्वा विस्मयाविष्टा
स्तद्दारास्तत्सुता अपि ॥ महदैश्वर्य संपन्नं दृष्ट्वा तद्ग्रामवासिनः ॥ तमूचुरादरान्नत्वा कस्येदं फलमित्यपि ॥ पूर्वं वैधुरेवा
गतमस्मदीय गेहे कणार्थं कणभक्षणं च ॥१५३॥ कृतं क्षुधार्तेन पिपासयापि पीतं जलं क्षारमलक्षितेन ॥ राज्ञा दत्तं
केन तुभ्यं धनं वा का वा विद्या ते धनावाप्तिहेतुः ॥१५४॥ मंत्रोप्येको ज्ञायते न त्वया तु व्याप्तो गेहो वाजिभिर्गोकुलैश्च ॥
दिव्यैराभरणैर्धनैश्च विविधैर्व्याप्तं कथं मंदिरं ॥ मत्तेभैरमितैर्मदद्रवजलैर्व्याप्तं गृहस्यांगणं ॥ एतेहि मदीयैरपार
बिभवैस्त्रैश्वर्य मत्ता फलव्याप्तेः सूर्यनिवारकैर्ध्वजपटैः कोयं प्रभावस्तव ॥१५६॥ इति पृष्टः सतैः सर्वैः सोपि
विस्मितमानसान् ॥ प्राह शंकरलीलेयमिति स्मेराननस्तदा ॥१५७॥ किं विद्यया किं तपसापि भाग्यं महेश्वरानुग्रह
मंतरेण ॥ अनुग्रहे तस्य भवंति मान्याः सामान्यतो धन्यतमाश्च सन्तं ॥१५८॥ विद्यातु कापि न मयाभ्यस्ता न तपश्च कृतं म-
या ॥ नाराधितोपि गिरिशः सम्यगित्थं वधारितं ॥१५९॥ छिन्नाणि बिल्वपत्राणि जलान्यपि मया परं ॥ लिंगे क्षिप्ता-
न्यभाग्येन विश्वासोपि न मे तदा ॥१६०॥ ज्ञातोपि न महादेवः स सर्वाराध्य इत्यपि ॥ न सर्ववेदवेदांतज्ञेय इत्यपि नार्चितः ॥
१६१॥ आकर्णितापि न महेशकथा सुधापि तत्पानपीनहृदयोपि न तदा तथापि ॥ दत्तं शिवेन धनमेतदपारमेव वामी भिशयु
तमपार वल्लावृताभिः ॥१६२

स. तृ. उ.
अ. ४९

१६३

रत्नाभरणमालानां अमल्यानामनेकधा॥ कांतिराक्षादयत्येव मंदिराण्यमितान्यपि॥ नदानानि कृतान्येव नवाग्रादिकान्यपि॥ तथा
पि शंभुर्भगवान् सुप्रीतो बिल्वपल्लवैः॥६४॥ को वा रसः कोमलबिल्वपल्लवैर्महेश्वरस्यापि सतन्न विद्मः॥ सतं यथा तेन सम-
र्चितोपि ददाति भाग्यान्यमितानि शंभुः॥६५॥ श्रीसोमेश्वरकुंडमध्यविविधापारानुसर्पींकितायत्नात्तुंगतरंगसंगतमह
लिंगेषु तुंगेषु यः॥ बिल्वान्यपि अमलानि दास्यति जलाभक्तानि भक्त्या मुदा तस्मै दास्यति शंकरः करुणया देवत्वमप्यंततः
॥६६॥ संतुष्टो गिरिशो ददात्यमितमप्यैश्वर्यमंते स्वकं स्थानं दास्यति शंकरः खलु महादाता स देवोत्तमः॥ तस्मादेवमिहापि
किं यदि भवेत्तुष्टः स रुष्टोपि वा कष्टं नष्टमिदं जगत्त्रयमिति ज्ञेयं समृत्युंजयः॥६७॥ इति ग्रामजनैः सार्कं कृत्वा वार्त्तां महोत्स-
वं॥ ययौ वनं सयत्र आसीत् शांभवः स्वोपदेशकः॥६८॥ तदा तन्मार्गगमने कुंभिकुंभस्थलागतेः॥ मदधारागंधवाहे व्योममेवहि
तद्वनं॥६९॥ तदा तद्गंधमाघ्राय मृगेंद्रास्समुपास्थिताः॥ तत्कुंभिकुंभिदलनं कर्त्तुमेव मदोद्धताः॥७०॥ करियूथं वि-
लोक्याग्रे पश्चात् सिंहवरानपि॥ कालकालं स सस्मार निःशंकोपि स शांकरः॥७१॥ आनीलगिरिसंकाशकरिपोषण
तत्परः॥ सिंहानभिमुखान्दृष्ट्वा प्राह शांकरसत्तमः॥७२॥ इदं बिल्ववनं तावत्पावनं कालशासकः॥ लिंगरूपं समासाद्य
तिष्ठतीत्यवगम्यते॥७३॥ न चात्र गमनं युक्तं वैरेण करिवैरिणां॥ अवैरेण यथाकामं अत्रापि आगमनं मतं॥७४॥ नवबि

लब्धवता पार्श्वनोतीव पावनः॥ यावत्स्मरति स्वैरं तावद्देरे रत्नं खलु॥ इति तद्वचनं श्रुत्वा तत्रत्याः सिंहाः परस्परं॥ प्रभावं शंभवं स्मृत्वा तदा तस्मिन्महावने॥७६॥ ततः परं स विप्रोपि रत्नयान मुपाश्रितः॥ शांभवाश्रम मागत्य संतोषं प्राप शांकरः॥७७॥ ततस्तं गुरुमालोक्य प्रणम्य च पुनः पुनः॥ कथयामास वृत्तान्तं स्वकं सर्वमशेषतः॥७८॥ तदाकर्ण्य स शैवोपि तमाह प्रीतमानसं॥ उत्साहं जनयन्नेव पुनः शंकरपूजने॥७९॥ ॥शिव उवाच॥ ॥ यत्या दुष्काराधक पादुकाची प्प पारमैश्वर्यमपत्नलभ्यं॥ करोति तल्लिंग समर्चनेन किमेवमैश्वर्यमिति स्मरामि॥८०॥ इंद्रोपेंद्र चतुर्मुखादिकसुराराध्यं परार्ध्यं परं यल्लिंगं तद्वेक्षितं सकृदपि प्रारब्धलब्धान्यपि॥ पापानि प्रहरत्य पार सुकृतांभोधिप्रवृद्धिं करोत्यैश्वर्याण्यतुलानि भक्तिरिति मे तावत्स्म भजायते॥८१॥ भूति भूषित सर्वांगो लिंगार्चनपरो भव॥ इतोपि कोटि गुणितं तवैश्वर्यं भविष्यति॥८२॥ इंद्रोपेंद्रादयः सर्वे कारिष्यंति तदर्चनं॥ पुत्रपौत्रादिवृद्धिश्च भविष्यति शिवार्चनात्॥८३॥ मुक्तिर्भविष्यति च पापनाशः संसाररोगव्यसनक्षयेपि॥ अंतो विरूपाक्षसमर्चनेन नेयस्त्वया यं समयो भपेन॥८४॥ अतः परं जन्मजरादिभीतिं विहाय मृत्युंजयमादरेण॥ भजस्व भाग्यानि लभस्व भोग्यान्यनुक्षणं श्रीफलवृक्षमूले॥८५॥ इत्युक्तः स ययौ नत्वा तं गुरुं शांकरोत्तमं॥ तदा प्रभृति तस्यासीद्धिश्वासः शिवपूजने॥८६॥ ततः सकारयामास सदनान्यमितान्यपि॥ गजवाजिमहोक्षादिवासयोग्यानि भूरिशः॥८७॥

प्रातःकालं समारभ्य शिवलिंगार्चनोद्यतः ॥ वनानि कारयामास शिवपूजार्थमादरात् ॥ ८८ ॥ बिल्वभूरुहमूलेषु शंगलिंगानि को-
टिशः ॥ तुंगानि स्थापयामास स एव शिवपूजकः ॥ ८९ ॥ पंचामृतप्रवाहाद्यैः पूजयामास शंकरं ॥ कुमाराः शांकरास्तस्य जाता
एव सहस्रशः ॥ १९० ॥ तेर्चितानि लिंगानि कोटिशः कुसुमादिभिः ॥ शिवलिंगार्चनं त्यक्त्वा नान्यत्कुर्वंति तत्सुताः ॥ ९१ ॥ त-
त्प्रभावानुकथनं कर्तुमेव न शक्यते ॥ शिवार्चनेन ते लब्धः प्रभावस्तादृशः खलु ॥ ९२ ॥ इंद्रलोकादि लोकेषु गत्वा ते
कुसुमान्यपि ॥ समानीय महादेवं पूजयंति प्रयत्नतः ॥ ९३ ॥ तेनंदनवनं गत्वा तत्र मंदारसंभवैः ॥ लिंगानि पूजयामासुः
प्रसवैरमितैरपि ॥ ९४ ॥ प्रसूनमात्ररहितं तद्वनं समभूत्तदा ॥ तत्पल्लवैश्च कुः शाखाभिरपि पूजितं ॥ ९५ ॥ तदानीमाग
तैर्दूतैरपारैर्वनपालकैः ॥ निवारिताः कुमारास्ते शाखादिछेदनादपि ॥ ९६ ॥ ततस्तान्नागताहत्वा ते सर्वे वनपालका-
न् ॥ शाखाभिरपि लिंगानि पूजयामासुरादरात् ॥ ९७ ॥ तेषु दूतेषु यः कश्चिद्धते हतोपि शनैः शनैः ॥ गत्वा जयंतं वृत्ता
तं वनस्याहातिदुःखितः ॥ ९८ ॥ ततो जयंतः क्रोधेन निर्गतस्तद्वनं प्रति ॥ गत्वा तानाह दुष्टात्मा वचनं क्रोधसाध-
नं ॥ ९९ ॥ तेतद्वचनमाकर्ण्य शिवाराधनतत्पराः ॥ क्रोधानलेन संदग्धं जयंतं चक्रुरद्भुताः ॥ २०० ॥ ततः परं तमाकर्ण्य
जयंतं दग्धमद्भुतैः ॥ इंद्रः समाययौ तत्र तानाहातीव दुःखितः ॥ १ ॥ निष्ठुरं वचनं तेन युक्तमतिदुःसहं ॥ तदाकर्णनमा-

त्रेणतेपि क्रोधसमाकुलाः ॥२॥ ततस्तमिंद्रं ते सर्वे स्वपादतलघातनैः ॥ अस्थिमात्रावशिष्टं च चक्रुः क्रोधानले मुहुः ३॥
इंद्रेपि निहिते तस्मिन्तत्क्रोधः शांतिमापसः ॥ ततः समागताः सर्वे सुराः सूर्योदये ततः ॥ ४॥ ते समागत्य तानाहुः पुरस्कृ-
त्य गुरुं सुराः ॥ क्षमध्वं च क्षमध्वं च क्षमध्वमिति संस्तुतान् ॥ ५॥ ततो गुरुरुवाचेदं वचनं शैवपुंगवान् ॥ प्रणम्य विन
येनैव कृतांजलिपुटो मुहुः ॥ ६॥ शिवाज्ञयाजातमिदं समस्तं यद्धा वितद्धा विनसंशयोत्र ॥ अतः परं कोत्र शचीपतिः स्या-
त् सिंहासनस्याधिपतिः स एव ॥ ७॥ इदं वनं शंकरपूजनाय विनिर्मितं नंदननामकं च ॥ इंद्रेण पूर्वं स हतोधुनास्य कः
पालकः स्यात्क्वि पूजकोपि ॥ अनायकं चेद्वनमेतदद्य शिवार्चनाय प्रसवाः कुतः स्युः ॥ एतानि लिंगानि नवप्रसूनैः पूज्या
नि सर्वैरमरैः प्रयत्नैः ॥ इतितद्वचनं श्रुत्वा ते सर्वे हृष्टमानसाः ॥ ज्येष्ठं भ्रातरमूचुस्ते फाललोचननामकं ॥ १०॥ ॥ फाललोचन उवाच ॥
कुमारा ऊचुः ॥ ॥ इंद्रो हतो देवगणे गतः इंद्रस्थाने भवान्भव ॥ अन्यथास्य वनस्यापि पालनं न भविष्यति ॥ बा-
लकानां तथा वांछा कदाचित्खलु जायते ॥ १३॥ अयं कनिष्ठ एवेंद्रो भविता भवनामकः ॥ बालकत्वाद्बालकोयं स्याच्छ
चीनायकः खलु ॥ अयं लिंगार्चनं नित्यं सादरं नंदनोद्भवैः ॥ पुष्पैर्लिंगार्चनं कृत्वा स्थास्यत्यत्र न संशयं ॥ १५॥ नित्यं
लिंगशतप्रपूजनरतः सोयं युवा नंदने स्थित्वा शक्रपदं मनोहरमिदं सिंहासनं स्वासनं ॥ [illegible] कृत्वा प्राप्य शचीपति

त्वमधुना तिष्ठत्व पारं सुखं प्राप्यांते शिवमंदिरं प्रतिसमायास्यत्युमावल्लभं ॥१६॥ इत्युक्त्वा भ्रातरं ज्येष्ठं तमुमावल्लभाभिधं ॥
पुनः शिवार्चनोद्युक्तस्तत्र दूर्वांकुरादिभिः ॥ ततः सूर्योदये सर्वंतमेव भवनामकं ॥ इंद्रं चक्रुः स एवासीच्छचीकांतः शिवा-
र्चकः ॥१८॥ ॥श्रीसदाशिव उवाच॥ ॥ शिवार्चनाद्यैः कुरु शंकरतोषणं ॥ २२०॥ इत्युक्तोपि महेशेन विप्रवेषेण सादरं ॥
हारं मनोहरं तस्मै न ददौ ॥ शिवार्चनाद्यैः संप्राप्तमैश्वर्यं शिवपूजकैः ॥ तादृशं तत्फलं तावत्ततोप्यधिकमेव हि ॥१९॥
अतः समर्च्य प्रीत्या शंकरं शांकरानपि ॥ धीरहारादिदानाद्यैः कुरु शंकरतोषणं ॥ २२०॥ इत्युक्तोपि महेशेन विप्रवेषे-
ण सादरं ॥ हारं मनोहरं तस्मै न ददौ दृढमतिस्तदा ॥२१॥ ततः स कुपितः शंभुस्तत्कोपेन स रसागरः ॥ निहितो दुःखितो वि-
प्रसदारः ससुहृद्गणः ॥२२॥ अस्मभ्यमधुना शंभुः प्रसन्नोपि भविष्यति ॥ तुभ्यं रत्नाकरत्वं च दास्यत्यस्त्वद्भीप्सितं ॥
२३॥ ॥ रत्नाकर उवाच ॥ ॥ इति तद्वचनं श्रुत्वा तथास्त्वित्युक्तमादरात् ॥ महं रत्नाकरत्वं च ददौ तत्रार्पितः शिवः
॥२४॥ वृतस्ताभिरहं तत्र जातो भूयान्महोत्सवः ॥ एताः सर्वाः शिवार्चायां निरताः शांकरार्चकाः ॥२५॥ मम दारा म-
नोहाराः शिवभक्त्यैकतत्पराः ॥ एतादृशं महद्भाग्यं प्राप्तं शंकरपूजया ॥२६॥ संप्राप्तं महदैश्वर्यं पूर्वैः सर्वैः सुरासुरैः ॥ शि-
वलिंगार्चनेनैव वेदोक्तेन मुनीश्वरैः ॥२७॥ लिंगार्चनेनापि समं न पुण्यं ततोपि नैवाधिकमस्ति पुण्यं ॥ अतस्त्वं देवा-

मित पुण्य पुंजाः कुर्वंति नित्यं खलु साव धानं ॥ २८॥ नित्यं शंकर पूजनेन सुधियः कालं न यंत्यादरा द्भूति व्या वृत काल भाग ललिताः पंचा क्षरात्युत्सवाः ॥ रुद्रा क्षा भरणाः क्षणा र्धमपि ते माला क्ष पूजां विना तिष्ठंत्येव न सर्वथा शिव कथा पीयूष पानोद्धताः॥ २२९॥ इतिश्री शिवरहस्ये हराख्ये तृतीयांशे उत्तरार्धे पुण्यकीर्ति रत्नाकर संवादो नाम एकोन पंचाशो ऽध्यायः ॥ ४९ ॥

(=युवती रे किंनरमाह)

॥श्रीगणेशायनमः॥ धर्मसेनकुमारिकोवाच॥ ॥इत्थंकथानारदेन प्रोक्ता पापविनाशिनी॥ मया श्रुता तया भक्तिः शिव
लिंगार्चनेमम॥ अतः शंकर पूजा मे कर्त्तव्या जन्मनः फलं॥ शिवार्चनं परं मन्ये तदन्यं नाधिकं फलं॥२॥ इति तद्वच-
(=किन्नरः)
नं श्रुत्वा स गंधर्वोपि विस्मितः॥ तामेवाह पुनः प्रोच्य शिव पूजन लालसां॥३॥ गंधर्व उवाच॥ ॥तव भर्ता यदि
भवेद्गिरिशाराधनप्रियः॥ तदा तत्सदने वासः तवास्तु कमलानने॥४॥ तस्य प्रीतिर्यथा वत्से महादेवे भविष्यति॥
तथोद्योगो मया कार्यः त्वया कार्यं शिवार्चनं॥५॥ ॥रविरुवाच॥ ॥इत्युक्त्वा सोपि गंधर्वस्तद्भर्तुर्निकटं
ययौ॥ तदा शकट भागस्थं तं ददर्श नृपात्मजं॥६॥ दृष्ट्वा तमाह गंधर्वो राजानमतिसुंदरं॥ हारं कर्त्तुं महोदा-
र हारोहार वरार्चकः॥७॥ ॥गंधर्व उवाच॥ ॥रे रे भूपाल ते बाल निमीलित विलोचन॥ किमुपेक्षि-
तमत्रास्ति वद तावन्निशामुखे॥ ॥राजोवाच॥ ॥बाला मे महिला सापि कालकालार्चनप्रिया॥ श्रीकालका-
827
लसदनं प्रविष्टा राज्ञ संयुता॥९॥ मम तावन्न गमने शक्तिरस्य(स्त्य)धुना खलु॥ मत्कृताकृत्य दोषेण प्रतिब-
द्धोस्मि सत्वरं॥१०॥ तया संगः कथं भावि सासौ दैव्य निधिः खलु॥ तद्देहवातपातेन प्रेतस्य खलु जी-
वनं॥११॥ इति तद्वचनं श्रुत्वा गंधर्वः प्राह तं नृपं॥ मदुक्तं कुरु सा तेन नृप त्वद्वशमेष्यति॥१२॥

शैवीं दीक्षां गृहाणाद्य शिवव्रतरतो भव ॥ शपथं कुरु गौरीशे तथा शंकरपूजने ॥ शिवपूजैव कर्त्तव्या यावज्जीवं मयेत्यपि ॥ प्रतिज्ञा सा प्रतिज्ञैव तव स्यात्सुखदायिनी ॥ रत्नैरपारैर्विविधैः प्रसूनैरपि कोटिशः ॥ पूजय स्व महादेवं तेनेष्टं तव सिध्यति ॥१५॥ यदि मध्ये परित्यक्ता शिवपूजा त्वया तदा ॥ हानिस्तावद्भवत्येव धनधान्यादि कस्यते ॥१६॥ ॥रविरुवाच॥ ॥इति तद्वचनं श्रुत्वा स राजा प्रीतमानसः ॥ चकार शपथं प्रीत्या महादेवपदाम्बुजे ॥१७॥ यावज्जीवं शंकराराधनं मे" काले काले कार्यमेवादरेण ॥ दत्तं सर्वं रत्नकोशादिकं च" विश्वेशार्चासाधनं तत्समस्तं ॥१८॥ इति प्रतिज्ञां कृत्वैव तमुवाच स भूपतिः ॥ शिवदीक्षा कथं प्राप्या मयेति प्रीतमानसः ॥१९॥ (किन्नरः (गन्धर्व) उवाच) तुभ्यं मयैव दातव्या शिवदीक्षेति सादरं ॥ (रविरुवाच) ययौ तेन सरस्तीरं महालिंगसमन्वितं ॥२०॥ ततः परं स गंधर्वः स्नातः शिवसरोवरे ॥ विभाति भूषितां गंच नृपमाहातिविस्मितः ॥ शिवसन्निधिमाया हि दीक्षा तत्र भविष्यति ॥ संपादनीया सामग्री ममेत्याह विचक्षणः ॥२१॥ ततो गत्वा कालकालमंदिरं लिंगसंनिधौ ॥ दीक्षां ददौ महाशैवीं सर्वार्थफलसिद्धिदां ॥२२॥ ततस्ते देहनिलयाः पापशैलाः परस्परं ॥ निलयं गत मित्युच्चैः उच्चरंतो गतास्ततः ॥२४॥ धूम्राकारान् गिरीन्दृष्ट्वा

पापरूपान्नृपात्मनः ॥ विस्मयं परमं प्राप्य कृतार्थोस्मीति सादरं ॥२५॥ ततः सपूतः पुण्यात्मा तदानीं शिवविद्यया ॥
चकार पूजनं शंभोरपारैः साधनैर्नृपः ॥२६॥ तदा प्रतिज्ञापि कृता नृपेण शंभोः पदांभोरुहपूजनं मे ॥ कर्त्तव्यमन्य
त्परिहृत्य कार्यमितः किमन्यन्नृपहार्यमिष्टं ॥२७॥ अपारापराधान् क्षमस्वाद्य शंभो मदीयान्मया नृदेयोपि दे-
यः ॥ वरोयं वरो मे स संसारबंधः प्रतिछिन्न एवास्तु तुभ्यं नमो मे ॥२८॥ इति स्तुत्वा महादेवं लिंगार्चनरतो नृपः ॥
ततस्तमाह गंधर्वो निमीलितविलोचनं ॥२९॥ राजन् प्रदोषकाले सुजातः शंकरपूजनं ॥ जातं च मंदिरं याहित-
या महिलयासह ॥३०॥ इति तद्वचनं श्रुत्वा गंधर्वं प्राह भूपतिः ॥ शिवलिंगं समालिंग्य कामुकः कामिनीमिव-
॥३१॥ ॥राजोवाच॥ ॥ अतः परं लिंगसमर्चनेन नेयं वयो मे, शिवलिंगपूजा ॥ कृतान पूर्वं दूरदृष्टयोगात् कं-
ष्टानि भुक्तान्यमितानि तानि ॥३२॥ संसारवांछापि किलातितुच्छा स्वच्छस्य सा किं भवति प्रबोधे ॥ भ्रमा-
न्धकारो नरविप्रकाशस्ते मंदिरे रम्यफलेमेव भोगे; ॥३३॥ रत्नैरपारैर्विविधैः प्रकामं पुनः पुनः शंकरमं-
दिराणि ॥ कार्याणि यत्नेन शिवार्चनानि बिल्वप्रसूनादिभिरादरेण ॥३४॥ शिवाधीनं मत्वा सकल
मति पुण्यैः शिवजनः करोति व्यासंगं किमपि खलु हित्वैव सततं ॥ महादेवध्यानं नवनिधिसमानानि ब-

हुधा फलानित्यत्वात: शिव भजनमेवास्य शरणं ॥३५॥ सदनं मदनांतकालयो वसनं भूति रिदं ममाशनं॥ शिव लिंगसम-
र्पितं नवं कमलं बिल्व सप ल्लव माला ॥३६॥ इति तद्वचनं श्रुत्वा विमला महिलाधिपा ॥ तस्य भूपस्य सस्मेरा स्मि
ते रानंदमापच ॥३७॥ एतावत्तस्य वृत्तांतं धर्म धेनुः शिवार्चक:॥ श्रुत्वा विस्मय मापन्न: सप्राप शिव मंदिरं ॥३८॥
ततस्तं भूति पूतांगं रुद्राक्षा भरणान्वितं ॥ लिंगा लिंगित शांगां गंदद्द्शे प्रीत मानस: ॥३९॥ तं दृष्ट्वा कन्यकां
दृष्ट्वा गंधर्वंच शिवार्चकं॥ प्राह गंभीर वचनैश्चतुर: सनराधिप: ॥४०॥ ॥धर्मधेनुरुवाच॥ ॥केनोपदिष्ट: शिवलिंग
पूजां कर्त्तुं प्रवृत्तो पि निवृत्त काम: ॥ प्रवृत्त मेतस्यन भावनीव कामो ति मन्यु शिव पूजनेन ॥४१॥ ॥धन्योपदेशेनभ-
वंति धन्या: सर्वे पि मान्याश्च शिवार्चनेन॥ किमेतदाश्चर्यकरं करोति सशंकर: सुंदर लीलयापि ॥४२॥
अहो महद्भाग्य मिदं ममापि मत्कन्य कायाश्च विशेषतस्तु॥ यतो महादेव पदारविंद मानंद कंदं परमाश्रितोयं॥
४३॥ संसार सागर रुत्तीर्ण मेतेन शंकर:॥ प्राय:पूर्व भवे प्येवं सोयं शिवपरायण: ॥४४॥ अन्यथा कथमेतस्य शि-
व भक्तिर्द्दृढाधुना ॥ कथं वास मभूद्देव मन्या लभ्या विशेषत: ॥४५॥ एवं भक्ति: शंकरे यस्य तस्य भागपं
न्नंतं तावदुत्कृष्टमेव ॥ नष्टं कष्टं शंकरा राधनेन पुष्टं स्पष्टं मानसं शांकराणां ॥४६॥ जन्मांतरार्जित महा-

*स्त्तीर्ण

घलया त्किलायं मृत्युंजयार्चनरतो विरतोपि भोगात्॥ भाग्यं तदेतदनुवासरमेव मत्र संप्रार्थनीय मतिमे मतिरध्यजाता-
॥४७॥ इत्युक्त्वा प्राह गंधर्वं सचित्ररथनामकः॥ त्वदाज्ञया गृहं यातु सोयं महिष्या सह॥४८॥ ततः परं गंधर्वः त-
माह शिवपूजकं॥ मंदिरं सुंदरं प्राप्य स्थातव्यमिति सादरं॥४९॥ भोक्तव्यं शिवनैवेद्यं कर्त्तव्यं च शिवार्चनं॥
शिवोपहारममृतं वृद्धिसिद्धिकरं परं॥५०॥ इति तद्वचनं श्रुत्वा चित्राश्व इति भूपतिः॥ तमाह लिंग-
मालिंग्य गाढं दृढमतिर्दृढः॥५१॥ ॥ चित्राश्व उवाच॥ ॥ अमोघाघसंधानलालोलशैलप्रभावाभिभावाय
भावार्चनांबु॥ महेशाभिषेकांबु पीतं, धृतं वा स्वमूर्ध्ना, भवत्येतदेवामृतं मे॥५२॥ शिवाराधनानंदसंदोहविघ्नो॥
न कार्यस्त्वया तावदस्मान्निवृत्तिः॥ तवास्तु प्रशस्तं यदेवास्ति वस्तु स्वतः स्वस्ति ते नैव तन्मे प्रशस्तं॥५३॥ दा-
रैषणादि विषपानविमूढचित्तैः नाराधितं गिरीशपादपयोजमब्जे॥ ते तावदंधतमसं समवाप्य शोकैः
लोकेन संति कलिकालभयाब्धिमग्नाः॥५४॥ इति तद्वचनं श्रुत्वा सराजा प्राह तं नृपं॥ अश्वमेधादिकं का-
र्यं तत्कर्त्तव्यं शिवार्पणं॥५५॥ अश्वमेधाः कृताः पूर्वं पूर्वजैस्तव भूपते॥ इंद्रत्वमपि संप्राप्तं भुक्ता भोगा-
ननेकधा॥५६॥ संपादिताः कुमाराश्च शूराः परपुरंजयाः॥ सर्वात्मना न संसारस्त्याज्यो पि खलु भूपते॥५७॥

त्वदीयमपि यद्राज्यं तद्राज्यं रिपुसंकुलं॥ उपेक्षितं भवत्येव तदुपेक्षापि नोचिता॥ ५८॥ इतिकर्णकठोराणि श्रुत्वा वाक्यानि भूपतिः॥ धर्मधेनुमुवाचेदं वचनं सोपि भूपतिः॥ ५९॥ किमर्थं मे धाव भूमौ वृथैते स्तीर्थाटनैर्वासवेशाटवीषु॥ मुदा जटाजूटतटेंदु खंडं खंडावतंसं भज शैलजासं॥ ६॥ अलं वृथा लोपेरलमलमलं व्याकुलबलैः॥ खले व्याले वालं प्रबल महिला लोकनरसैः॥ असारे संसारे विरतिरधुना साधुजनितां शिवेनातः कृत्यं किमपि न विभाति प्रतिभयात्॥ ६१॥ ॥ रविरुवाच॥ ॥ एवं संभाषणेनैव गता रात्रिस्ततः परं॥ प्रातरुत्थाय च स्नात्वा शिवपूजारतो भवत्॥ ६२॥ सा तस्य महिला दृष्ट्वा तं पतिं शिवपूजकं॥ स्वयम[illegible] पचे यामास सह तेन महेश्वरं॥ ६३॥ ततस्तमाह महिला चित्राश्चं तस्य कोमलैः॥ वचनैः सविलासैश्च मंदहासपुरःसरं॥ ६४॥ सुलोचनोवाच॥ ॥ राजन्किं व प्रसादेन शिवपूजारतिस्तव॥ जाता मह मिदं भाग्यं इतः किमधिकं सुखं॥ ६५॥ परंतु रत्नकोशस्य हेमकोशस्य चाधुना॥ हेमप्रासादकरणैः व्ययास्तु शिवपूजया॥ ६६॥ गजवाजिसहस्राणां गोकोटीनां च किं फलं॥ शांकरेभ्यः प्रदातव्या स्तेन स्यात्पुण्यमक्षयं॥ ६७॥ धान्यानां गिरयो गेहे तिष्ठंत्येव नृपोत्तम॥ तदन्नैः शिवनैवेद्यं कर्त्तव्यमतियत्नतः॥ ६८॥ भोजनीयाः प्रयत्नेन शां-

(रविरुवाच)

कराः सर्वदा त्वया ॥ शिव पूजैव कर्त्तव्या सर्वदा विविधै र्धनैः ६९ ॥ इति तद्वचनं श्रुत्वा गंधर्वेणाभिनंदितः ॥
राजापि स्वगृहं प्राप नृपो महिलया सह ॥ ७० ॥ तत्र लिंगानि तुंगानि नार्मदानि स भूपतिः ॥ स्थापयामास यत्नेन
रत्नागारेषु कोटिशः ॥ ७१ ॥ नित्यं शिवार्चनरतः शृण्वन् शिवकथां मुहुः ॥ पुत्रानुत्पादयामास तस्यां शंकरपूजकान् ॥ ७२ ॥ तं तादृशं नृपो दृष्ट्वा धर्म धेनुर्नृपात्मजं ॥ गंधर्वोपि स संतुष्टो ययौ स्वनगरं प्रति ॥ ७३ ॥ ॥ भानुरुवाच ॥
इति स्वप्नो महान् दृष्टस्त्वया चारणभार्यया ॥ ततः समुत्थिता सापि ददर्श शिवकिंकरान् ॥ ७४ ॥ ततस्ते तां विलोक्याहुः विनयेनैव सुंदरीं ॥ विमानं वरमानीतं तुभ्यं चारण सुंदरि ॥ आयाहि यामः कैलासं दुर्लभं योनिनामपि ॥
शिव प्रसादलभ्यं ते विद्धि बुद्धिविशारदे ॥ ७६ ॥ इति द्वचनं श्रुत्वा स्मृत्वा स्वप्नं महारथं ॥ प्राह स्मेराननामंदं भंगीश्वर मनाकुला ॥ ७७ ॥ हीनवत्सलता तावल्लोलया प्रकटीकृता ॥ शंकरेणेति विज्ञातमनाथायामपि ध्रुवं ॥
नार्पितानि महेशाय नव बिल्वदलानि वा ॥ छिन्नाणि भक्त्या दत्तं वा नंदं सुरसरिज्जलं ॥ ७९ ॥ न चंदनादिभिर्भक्त्या लिंगमेतत्समर्चितं ॥ यद्यप्यथाह भगवान् मामद्योद्धर्तुमिच्छति ॥ ८० ॥ न श्रांतो शिवपूजनेन विमलो हस्तो प्रसूनार्चितं ॥ लिंगं नानिमिषेण लोचनयुगेनाद्यापि संवीक्षितं ॥ ८१ ॥ न ध्यातं शिवलिंगमिंदु

शकलालंकारपूजालयं व्यर्थं जन्म गतं ममेदमधुना कैलासवासेन किं ॥ ८२ ॥ नश्रांता रसनापि शंकरपदांभोजस्तवैः मौनसं नश्रांतं शिवचिंतने रनुदिनं भूरि प्रमोदैरपि ॥ रम्यं तावदिदं शरीरमपि मे श्रांतिं न मे पादयोः श्रीकाशीगमनेन हंत वद मे कैलासवासेन किं ॥ ८३ ॥ कर्णाभ्यां करुणारसार्णव शिवाकांताति कांतामितं स्वांतानंदकरातिशोभनकथा पीयूषधारापरा ॥ पीतानापि पुरा पुरारिनगरे वीरेश्वराराधनैर्नीतं नैव वयो मया च वद मे कैलासवासेन किं ॥ ८४ ॥ नाभूत्फालतले त्रिपुंड्ररुचिरं रुद्राक्षमालालयः कायो नाथ मुमासहाय बिल्वैर्न वे--
घपुष्पैरधुना ॥ तुष्टं वा हृदयं शिवांगणमहानाद्यैः स नाद्यैः स्तवैः जप्तः शैवषडक्षरोपि न मया कैलासवासेन किं ॥ ८५ ॥ तीर्थे शोपि न पूजितो न बिल्वसद्दल्वैर्दलैः कोमलैः श्रीशैलोपि न वीक्षितः क्षणमुमासार्धेंदुलाने क्षिता ॥ दृष्टा नाक्षमरांबिकापि कमलेनाराधिता सादरं मंदं भाग्यमतः परं तदधुना कैलासवासेन किं ॥ ८६ ॥ कर्तव्यं गिरिशार्चनं सुरसरिन्नीरोरुधारामरैर्बिल्वीकोमलपल्लवैः सुगमैदैः पाटीरसारैरपि ॥ गोक्षीराद्युपहारकारिभिरतः ~~कैलास~~ कैलासवासेन किं ॥ वक्तव्यः स महेश्वरोपि वचनैरेवं कृपासागरः ॥ ८७ ॥ अत्रैवामितरत्नगोपुरपुरप्राकारधीरस्फुरत्प्रासा-

दामितमंदिरे रुरुतरे लिंगं गणस्थैरलं॥ कर्तव्यं विमलं महारमपरो मेरुर्यथा सुंदरं तद्वन्मंदिरमत्र चित्रमधुना कर्तव्यमेव ध्रुवं॥ ८८॥ नब्रह्मकल्पोपशमेपि शांगं तुंगं न लिंगं परिहार्यमस्याः॥ लिंगार्चने मे मतिरस्तु नित्यं कैलासवासेन मतिर्ममाद्य॥ ८९॥ ॥ रविरुवाच॥ ॥ इत्युक्तं तद्वचः श्रुत्वा भृंगी शो विस्मयान्वितः॥ ययौ कैलासनिलयं स्मरन् शंकरवैभवं॥ ९०॥ गतेषु तेषु सर्वेषु गणेषु विमलाननः॥ देवेष्वपि महाशैवं सादरं शांति विस्मितं॥ ९१॥ तं विलोक्य प्रणम्यापि तमेव शिवपूजकं॥ कृतांजलिपुटः प्राह चारणेन स्महादरात्॥ ९२॥ शिव विद्यां प्रयच्छाद्य यद्यस्ति करुणा मयि॥ अनवद्यानवद्यां मे सिद्धविद्याधरेप्सितां॥ ९३॥ शिवपूजाप्रकारोपि कर्तव्यं शिक्षयाधुना॥ अदेयमपि ते देयं यदस्ति मम शांभव॥ ९४॥ अतः परं न संसारे रतिरस्याः प्रजायते॥ शिवार्चन रतिर्जाता शंकरानुग्रहान्मम॥ ९५॥ इदं सुरसरित्तीरे लिंगं तुंगं मनोहरं॥ सोयं बिल्वतरुश्चेति दुर्लभं तदिदं त्रयं॥ ९६॥ तदेतत्कामदं लिंगं अकामैरपि पूजितं ददाति परमैश्वर्यं सुरवंद्य मनामयं॥ ९७॥ दृष्ट्वा विमानमधुना गणकोटिवीतं मां नेतुमागतमुमापतिरक्षितं च॥ त्यक्तुं तदेतदधुना शिवलिंगपूजां कर्तुं शिवार्चनरतास्मि न संशयोत्र॥ ९८॥ ॥ रविरुवाच॥ ॥ इत्युक्तं तद्वचः श्रुत्वा ददौ तस्यै स शांभवः॥ पंचाक्षरं परं शैवमशेषाघविनाशकं॥ ९९॥

स्नातेन रुचिरे तत्र विधुदाभा महोत्सवैः ॥ ततश्चकार सा पूजां शंगलिंगे ति निर्मला ॥१००॥ नगरं कल्पितं तत्र रत्नराजि विराजितं ॥ मंदिरं शंकरस्यापि चित्रं रत्न विजृंभितं ॥ १॥ अपोरे रूप चोरैः सा पूजया मास शंकरं ॥ (=पद्मावती) श्रुत्वा शिवकथामेव स्मृत्वा च गिरिजा पतिं ॥ २॥ ॥ भानुरुवाच ॥ ॥ अतस्त्वमपि यत्नेन कुरु शंकर पूजनं ॥ भज मृत्युंजयं नित्यं जप पंचाक्षरं शुभं ॥३॥ याव... सौभाग्य मारोग्यं तावदाशु शिवं भज ॥ शिवार्चनं परं भाग्यं सूते कल्पतरुर्यथा ॥ ४॥ आलस्येन विना शिवार्चन रति लिंगेषु तुंगेषु ते जाता चेदधुना परं नवनिधि प्राप्तिः करे संततं ॥ एतत्ताव दिहानुषंगि कमिति ज्ञेयं फलं तत्फलं यत्तत्कुमपार वेद शिखरैर्वक्तुं न शक्यं खलु ॥ ५॥ याचन्ते धनमस्ति तावदधुना सांबाय भक्त्या परं देयं तत्तु सहस्र कोटि गुणितं दास्यत्यवश्य धनं ॥ तच्चास्मद्वचने तवापि बहुधा विश्वास एवास्त्वतः पापाब्धि प्रलयो भविष्यति शुभांभोधिश्च संभावितः ॥ ६॥ काश्यं लक्ष्म उवाच ॥ ॥ इति भानुवचः श्रुत्वा सापि पद्मावती शुभा ॥ शुभं संभावितं सर्वं भविष्यति भवद्गिरा ॥ ७॥ इत्युक्त्वा सा महोत्साहे कृत्साह जनकं शिवं ॥ पूजयामा स रत्नाढ्ये रपारे नृप भामिनी ॥ ८॥ शिवार्चनादन्य मयत्नतो वा यत्नेन वा सा न चकार धीरं ॥ परात्परं शंकर मेकमेव मत्वा तदाराधनतत्परा भूत् ॥

कोवा नार्चयति प्रभावमतुलं भावं भवाराधकः श्रुत्वा पातककंचुकानि बहुधा भुक्त्वापि मुक्तिप्रदं ॥ गोविंदांबुजस-
रोजपूजितपदं मंदारकुंदादिभिर्माकंदे रतिसुंदरे रपि मुदा मंदेर्मरंदे रपि ॥ ११०॥ मनोभव मनोभव
प्रभव भूत भक्तिं यतो न वेद तत एव तद्विपुललीलानले ॥ विदग्धमपि दग्धमित्यपि वदंति वृंदारकाः ॥
शिवार्चगणनाफलेर शिवलक्षणैः दुःखितं ॥ १११॥ विवेकविगमे कथं गिरिश तुंगलिंगार्चनं ॥ तदक्षय
सुखप्रदं विदितवेदतत्वो बुधः ॥ जहाति न तदादराः परमुदारहाराः पुरा पुरारिपदपूजनादखिलसिद्धिमा-
पुर्नृप ॥ १३॥ ॥ नंदिकेश्वर उवाच ॥ ॥ इत्युक्तो याज्ञवल्क्येन मुदा जनकभूपतिः ॥ प्रणम्यतं मुनिं भक्त्या प्रा-
ह देवाः कृतांजलिः ॥ १४॥ ॥ जनक उवाच ॥ ॥ त्वदुक्तरीत्या शिवपूजनेषु ममाधिकारः शिवदीक्षितस्य ॥ स्या-
दित्यवेमि त्वरया ममाद्य पंचाक्षरं शैवमिह प्रयच्छ ॥ १५॥ सेयं गंगातुंगरंगत्तरंगा लिंगं तुंगं शांगमेतेपि बि-
४३२
ल्वाः ॥ कालः पुण्यः कार्तिकः पुष्ययुक्तः मासः सोमः सोमपूजोपयुक्तः ॥ १६॥ गुरुरपि न ममान्यो मान्यधन्याग्रगण्य-
स्त्वमसि गुरुरपारासारसंसारबंधात् ॥ कुरु कुरु कुरु मुक्तं मुक्तिलाभाय शैवं दिश दिश मह्यं मंत्रमप्राप्ततंत्रं
॥ १७॥ ॥ नंदिकेश्वर उवाच ॥ ॥ इति तद्वचनं श्रुत्वा याज्ञवल्क्यो यथाविधि ॥ ददौ पंचाक्षरं तस्मै सकुटुंबाय धी-

मते ॥१८॥ ततस्तया बभौ देवाः शुभया शैव विद्यया ॥ नैवं दुरिव वृंदार वृद्धिहेतुः स भूपतिः ॥१९॥ पंचाक्षर जपं कुर्वन्
कुर्वन् लिंगार्चनं मुहुः ॥ पिबन् शिवकथा रूपां सुधां सुख मवाप सः ॥१२०॥ यस्माद्दैवं द्विरभया शुभाय नित्यमेवं
महेश्वर पदांबुज मादरेण ॥ उक्ता कथापि मुहुरादरतोनुवारं भक्त्या स्मृतापि सुखदा भवतीति मन्ये ॥२१॥ यः कंटकादि

१

प्रसवोपि लिंगे निपातितस्तेन गताघसंघः ॥ अयं शिशुः शंकर मंदिरायनेयो मयोनैव मयाद्य सद्यः ॥२२॥ ॥श्री-
व्यासउवाच ॥ ॥ इति तद्वचनं श्रुत्वा पुनरूचुः सुरास्तदा ॥ नंदिकेश्वरमाश्चर्यकैरेरेव कैरेर्नताः ॥२३॥ ॥देवाउचुः
॥ अयत्नलभ्यः कथमेवमासीत् कैलास वासः सविलास हेतुः ॥ सांबस्य संसार विमोचकस्य तत्वं च दुर्ज्ञेयमिदं शिव
स्य ॥२४॥ जन्माभिल्लकुले तस्य बालकस्यातिकुत्सिते ॥ धर्मवार्ता परिज्ञान शून्यास्तत्कुलजाः खलुः ॥२५॥ योगिनो
पिन विदुः शिवरूपं संततेन तपसातिकृशास्ते ॥ तद्विचार विरतिः कथमासीत् अस्य पुण्य मधिकं कथमेवं ॥२६॥ दृ-
ष्टं पूर्वं तेन काशीपुरी वा पीतं नगाल्पं ज्ञानवापीजं लंवा ॥ लिंगं तुंगं विश्वनाथस्य विल्वैरुत्फुल्लैर्वा पूजितं तेन पुष्पैः ॥
२७॥ नचाविमुक्तेश्वर लिंग पूजा कृता कृतांतांतक तोषहेतुः ॥ नचान्नपूर्णापि विलोकिता सा नचार्चितं तत्पद
पंकजं वा ॥२८॥ न ढुंढिराजांघ्रि सरोज पूजा प्रत्यूह हन्ता शायकृता चतुर्थ्यां ॥ दूर्वांकुरैर्वा घृत लड्डुकैर्वा न पूरिकैर्वा
पिन पुंडरीकैः ॥२९॥

न साक्षिश्च विघ्नेश्वरपादपूजा कृता प्रसूनैर्न च बिल्वपत्रैः ॥ ढुंढिर्न चैः पवित्रैर्न कृताति भक्त्या वीरेश्वरस्यार्चनमद्य तेन ॥ ३०
विकटाचरणारविंदयोररविंदैर्न च बिल्वपल्लवैः ॥ न कृतं खलु पूजनं मुदा न च तेन प्रणतापि मा शिवा ॥ ३१ ॥ सेनाविना-
यकः पुष्पैः चिंतामणिविनायकः ॥ मंगलेशो नार्चितोपि यमेशो नार्चितस्तथा ॥ ३२ ॥ बृहस्पतीश्वरस्यापि विश्वकर्मेश्व
रस्य वा ॥ विश्वेश्वरस्य वा पूजा न कृता बिल्वपल्लवैः ॥ ३३ ॥ चंद्रेश्वरो नार्चित एव तेन सिद्धेश्वरी मान समर्चितापि ॥
आमर्दकेशो न समर्चितोपि न पापभक्षोपि समर्चितो भूत् ॥ ३४ ॥ श्रीकालभैरवपदांबुजपूजनं च बिल्वादिभिर्न कृतमेव कदापि
तेन ॥ काशीपुरामित शिवालयलिंगपूजासंजातपुण्यफलमप्यमलं श्रुतं न ॥ ३५ ॥ भवदागमनाज्ज्ञातं रूपमस्य विशेषतः ॥
अन्यथा पूज्यता भक्तिः ईदृशेषु कथं भवेत् ॥ ३६ ॥ महेशार्चकचिन्हानि दृश्यन्ते यान्यपि लेशतः ॥ जायंते कानि चिन्हेषु तानि सं-
त्यवने दृशे ॥ ३७ ॥ एवं सति कथं वा स्यादधिकारस्य लक्षणं ॥ अलमेवाधिकारेण जीवनेनाप्यलं खलु ॥ ३८ ॥ योगाभ्यासेना-
पि सर्वज्ञता न सर्वज्ञत्वं दुर्लभं मादृशेषु ॥ ततस्तानाह नंदीशो महेश्वरमनुस्मरन् ॥ १४० ॥ बुध्या ज्ञेयं शांभवं चिन्हमादौ
पश्चात्कृत्यं कार्यमन्यद् बुद्धिः ॥ धर्माधर्मज्ञानसिद्धिः फलं किं विद्यानां वा स्वाश्रितानां विशेषात् ॥ ४१ ॥ महेश्वरश्चेदधिकार
मन्यं प्रदातुमिच्छत्यति शोभनेच्छः ॥ तदा प्रसंगोयमपीति मन्ये महेश्वरस्तावदति स्वतंत्रः ॥ महेश्वराज्ञावशगस्त्वमेव
पं०३ - नै तस्मादस्मिंस्तावदस्माकमिच्छा यच्छान्यस्मै स्वकमस्माधिकारं ॥ ३९ ॥ ॥ व्यास उवाच ॥ ॥ इत्युक्त्वा प्रणताः सर्वे मुद्रिकां च निवेदयते ॥ ..

१९३

संप्रार्थनीयं तदिदं हि भाग्यं ॥ एतत्परित्यागमतिः कुबुध्या मोहादभूदेवमिति प्रबुद्धं ॥ ४३ ॥ ॥ व्यास उवाच ॥ ॥ इत्युक्तास्ते सुराः सर्वे नंदिकेशेन धीमता ॥ तदाज्ञां शिरसा धृत्वा कृतांजलिपुटा स्थिताः ॥ ४४ ॥ ततः परं तैः प्रणतोपि भक्त्या स नंदिकेशोपि चतुर्मुखाद्यैः ॥ विमानमारुह्य ययौ गृहीत्वा तं बालकं शंकरमंदिराय ॥ ४५ ॥ गाणपत्यं ददौ तस्मै बालकाय कृपानिधिः ॥ तत्रैव प्राज्यराज्यानि ददौ पूजामनुस्मरन् ॥ ४६ ॥ तस्मादपारकरुणारससागरस्य विश्वेश्वरस्य महिमा समहानतोमे ॥ तद्वर्णनाय सहसा न मनः प्रवृत्तं निःशेषतद्गुणविशेषणवर्णनाय ॥ ४७ ॥ चित्तं शंकरसद्गुणार्णवलसत्कल्लोलमालास्फुरल्लोकस्वं शांशविशेयभूरिमहिमासंदोहमानंददं ॥ स्मृत्वा प्यंतकभीतिमात्ररहितं पापाब्धिसंशोषणं मत्वातिघृतिनीलकंठचरणांभोजार्चनात्याकरं ॥ ४८ ॥ भूत्या संवलयन् ललाटमकुटं रुद्राक्षमालां वहन् तुंगं लिंगमुपस्पृशन् अभिनवैर्बिल्वीदलैरर्चयन् ॥ वारं वारमुमामनोहरहरापारस्वरूपं स्मरन् कुर्वन् पातकपावकाचललयं शैवः शिवं वांछति ॥ ४९ ॥ हाराचारपरान्हरानुस्मरन् श्रीरुद्रमावर्तयन् श्रीपंचाक्षरमक्षरं गुरु जपन् लिंगानि पश्यन्मुहुः ॥ श्रीविश्वेश्वर पाहि मामिति वदन् वीरेश्वरं संस्तुवन् कुर्वन् पातकपावकाचललयं शैवः शिवं वांछति ॥ ५० ॥ ध्यायन्मारहरं सुमेरुशिखरापारस्फुरन्मंदिराकारस्वांतसरोजकेसरवरासाराकरं शंकरं ॥ रोमांचोच्चयमंचयन् प्रस-

रयास्नानंदज्ञा श्रुद्रवं कुर्वन्पातकपावकाचलत्वं शैवः शिवं वांछति ॥५१॥ दुर्दिनानि सुदिनानि नरे वा तीरनीरजनि

रं तरबिल्वे: ॥ बिल्वमूलकमलामललिंगे शं गमंगलकरां गकरांगे: ॥५२॥ इयं शिवकथासुधा मुहुरुमामनोहा

रिणी शिवेन कथिता पुरा त्रिपुरवैरिणा सादरं ॥ अपार सुकृतार्णवैः परमवाप भूमंडलं महाघलयकारणं करस्त्रा

शुमुक्तेःपरं ॥ रहस्यमेतद्रहसि श्रुतं पुरा पुरारिवक्त्रांबुरुहेण गौर्या ॥ अनेककल्पावधिसावधानमाम्रेडितं

साधुसुधारसेन ॥ ततः कदाचिद्गणनायकेन श्रुतं शिवावक्त्रसरोरुहेण ॥ स्कंदेन तस्मात् श्रुतमादरेण श्रीनंदिके-

शेन ततः श्रुतं च ॥५५॥ ततः सुरैरेतदतिप्रयत्नैः प्राप्तं रहस्यं मुनयो मयेदं ॥ नारायणेनोक्तमतिप्रयत्नादाराधितेनै-

व मुहुर्ममापि ॥ इदं रहस्यं खलु गोपनीयं रत्नस्वरूपं खलु रत्नरत्नं ॥ भक्ताय देयं खलु शंभाय ज्ञात्वा स्वरूपं पुनरा

दरेण ॥५७॥ अत्रैवोदाहरंतीममितिहासं बुधोत्तमाः ॥ श्रृणुध्वं सावधानेन सर्वदुःखविनाशकं ॥५९॥ पुरा रेवास-

रितीरे शौनकः शिवतत्परः ॥ शिवलिंगार्चनं कुर्वन् उवास कमलादिभिः ॥१६०॥ ~~कुमार~~ ततः परं बिल्वपत्राण्यादातुं वि-

पिनं ययौ ॥ भार्यया सह लिंगं च समादाय स नार्मदं ॥१६१॥ वनजैः कुसुमैरेव पूजयन् गिरिजापतिं ॥ शिवलिंगे

शिवाकारे सर्वसिद्धिप्रदायके ॥ ६२ ॥ ततः परं स शुश्राव रहस्यं दूरतः स्थितः ॥ जीयमानं शुकेनैव कुमारेण ममादरात्

पृ-४ १ एतद्यथाककर्णपथं प्रयाति शैवं रहस्यं परमं पवित्रं ॥ करोति तावत्सकलाघनाशं संसारघोराद्भुतराशिनाशं ॥५८॥

कुमारस्य रहस्ये स्मिन् प्रीतिरप्य क्षता सदा॥ सर्वो पनिषदां सारं परमानंद सागरे॥ ६४॥ ततः श्रुत्वा शौनकोपि रहस्यं शैव मादरात्॥ शिष्यान ध्याप यामास वेद सारत्व निर्णयात्॥ ततस्ते ष्वेव शिष्येषु केप्यभ्यस्त विशेषतः॥ गर्गाख्यः प्रययो स्वीयं देशं हिमगिरेः परः॥ ६६॥ स्वकलत्रेण संयुक्तः पथ्यभ्यासेन तस्य सः॥ सूर्य मंडल संकाशः पिशाचैरव लोकितः॥ ६७॥ ततस्ते समुपागत्य प्राहुरत्यंत मादरात्॥ परिवृत्य कलत्रेण सहितं भीति संयुतं॥ ६८॥ ॥

पिशाचा ऊचुः॥ मनुष्यो हितवाकारः सूर्य मंडल संनिभः॥ कथमासीत्कुतः प्राप्तमिदं परम पावनं॥ ६९॥ भव दर्शन मात्रेण तृषितानां तृषागता॥ क्षुधापि शांता बहुधा वदास्म भ्यं विशेषतः॥ ७०॥ सत्यं चेदुच्यते तर्हि बहु देयं धनं मुदा॥ यत्राप्यगणितं द्रव्य मस्माभिरिह पालितं॥ ७१॥ अस्माभिः पाप भारेण पिशाचत्व मुपागतं॥ अस्मत्कृतानां पापानां क्वापि तापि न दृश्यते॥ ७२॥ अपार जन्मार्जित पाप संघैरशांकरत्वेन कृतानि भूयः॥ पापान्यपाराणि पिशाच योनिः प्राप्ता मुहुर्दुःख विशेष भोगैः॥ ७३॥ पिपासया पि क्षुधयापि नित्यं प्रति क्षणं नो मरणोपमानि॥ दिनानि यांत्येव न तद्विनाशः संभाविता पीत्यति दुःखमेव॥ ७४॥ तव प्रभावो प्यघनाशकोयं तमेव तावद्वद सत्यमत्र॥ तेनास्मदीयानि किल्बिषाणि नाशं प्रयास्यंति न संशयोत्र॥ ७५॥ पिशाचत्व बिनाशार्थं त्वत्प्रभावोपयोगिनं॥ वदान्यथा वधो

मायश्चिंतनीयो न संशयः॥७६॥ इति तद्वचनं श्रुत्वा तद्भार्या भयविह्वला॥ प्राह भर्त्तारमत्यार्त्ता दृष्ट्वा तानुद्यतान्वधे॥
७७॥ रहस्यश्रवणाद्देव तेन मुक्ता भवं त्वतः॥ तावता तद्वचनं श्रुत्वा धात्रीति निर्भविष्यति सर्वथा॥७८॥ इति तद्वचनं श्रुत्वा
सम्यगित्येव धार्यच॥ रहस्यमादितो वक्तुं चकारोपक्रमं मुनिः॥७९॥ तमेच का चलाकाराः शृण्वंतः सादरं कथां॥
पूर्णां हिरण्यरूपत्वमवापुर्मंदमास्तिकाः॥१८०॥ ततस्तानपि दृष्ट्वायं गर्गो विस्मयसंयुतः॥ मेने शिवरहस्यस्य प्रभावम-
तुलं तदा॥८१॥ तन्मुखप्रमुखांगेभ्यः शनैर्मेचकवर्णता॥ निर्गता तत्कथालापश्रवणान्मुनिपुंगवाः॥८२॥ संतुष्टा
स्ततः सर्वे प्रणम्य मुनिपुंगवं॥ तत्त्न्निक्षेपदानेन चक्रुः प्रीतमनुत्तमं॥८३॥ ततस्तानाह स मुनिः केन पापेन दुर्दशा॥
प्राप्तेयमिति संप्राहुः स्वकीयाघकुलं तदा॥ श्रुत्वा तदीयाचकुलानि दृष्ट्वा तदंगकांतिं च मनोत्सवं च॥ उवास तत्रैव मतो
निधाने रनंतधा प्राप्य सुखानि नित्यं॥८४॥ ते संत्यक्तपिशाचदेहनिकराः सर्वेपि गंधर्वतां प्राप्ताः पुण्यगणान्विताः शिव
कथालापानुसंसेवनात्॥ तस्मात्पुण्यकर प्रसादमसकृच्छ्रोतव्यमत्यादरात् एवं शैवरहस्यमीश्वरपदांभोजार्चकैः केव-
लं॥८६॥ एतत्पुस्तकमादरेण लिखितं यः पूजयेत्संततं तत्संतानसमृद्धिरक्षयसुखावाप्तिर्महाघक्षयः॥ स्यादेवेति शि-
वप्रसादद मिदं शैवं रहस्यं परं श्रोतव्यं शिवपूजनादररसैः मोहश्वैरेन्वहं॥८७॥ कः कर्पूरपरागभासुरगि-

रिस्फार स्फुर च्चंद्रिका" तारापार सुधाकराचिररुचिव्याहार हीराकरात् ॥ दूरीकर्त्तुमनंग हर्तुरपरः शक्तोस्त्य भिख्या-
कुले:" सोहं मोह समूह वाहति मिरा मार प्रकारा करा ॥८८॥ पारक्रूर करो रुरूरं निकराकाराकरं शंकरं ॥ वारंवार
मनुस्मरामि सपरं गौरी विहारादरः" संसार ज्वर सागर ज्वर करो ध्येयो दया सागरः ॥८९॥ धन्यं भालतलं विभू-
तिललितं रुद्राक्ष मालांकितं" धन्यं कंठतलं चनेत्र युगलं धन्यं शिवालोकनैः ॥ धन्यं श्रोत्र युगं च शंकर कथा पीयूष-
धारा वृतं" धन्यं मानसमंबिकापति पद ध्यानानुरक्तं सदा ॥१९०॥ धन्यं मंदिर मिंदुशेखरपदा चारा दरात्यादरं व्याहार व्यव
हार धीर रुचिर व्यापार दाराकरं ॥ हारापार कुमार वीर सुकरा मार प्रसारा चिरं" प्राकार प्रवरं परं परमिदं किं धन्यमन्य-
द्भवेत् ॥१९१॥ श्रीकाल काल महि लावल्ल काल काल" हाला हला मल गला मला जाल भाल ॥ कल्लोल लोलकमला
मल पत्रनाल" मूल त्रिशूल ममलं कलयेनु वेलं ॥९२॥ श्रीगौरीरमण प्रभाव कथनानंदेन मन्मानसं" व्याप्तं प्राप्तमतः परं
शिव पदांभोजार्चनानां फलं ॥ स्कंदानंदमनेत देव परमं शैवं रहस्यं मुहुः" मोहाग्नि प्रलयांबुवाह इतिमे बुद्धिः
प्रवृद्धा मुदे ॥ ९३॥ ॥ श्री सदाशिव उवाच ॥ ॥ इतितद्वचनं श्रुत्वा नत्वा व्यासं पुनः पुनः ॥ सूतात्रमं
ययुः सर्वे शौनकाद्याः शिवे शुभे ॥ ९४॥ तत्र सूतं पुन र्नत्वा ते सर्वे मुनि पुंगवाः ॥ तुष्टुवुर्विविधैस्तो-

त्रैः मङ्क्तं रोम हर्षणं॥१९६॥ ॥ ऋषय ऊचुः॥ ॥व्यासस्त्वया प्रेरित एव सूत श्रीमन्महादेव कथा सुधायां॥ अतो वयं धन्य
तमाः कृतार्थाः कृताः कृतांतांतक सेवयाच॥श्रुत्वात्रैव महेश्वरामित कथा भूयो वसामो वयं सत्संगः खलु शांग इत्यभिमतः संगोऽ
यमत्युत्तमः॥ अस्माकं धनमेतदेव बहुधा तावद्द्विधेया दया शैवाग्रेसरपाद पद्म भजनात् धन्यं परं जीवनं॥१९७॥ श्री वि-
श्वेश्वर नाम कीर्तन सुधासिंधु प्रवृद्धो धुना तत्कल्लोल परंपरा वितनुते कल्याण राशीं मुहुः॥ उत्प्रेक्षं समवाप्-
तावदधुना पुण्यांबु राशिः परं ब्रह्मानंद रसेव शोभन कुलं दास्यत्ययं सर्वथा॥१९८॥ इत्याकर्ण्य शिव प्रसाद कथनोद्भूतानं-
दजापारा श्रु प्रगलासुधोन्मुख शुकाद्यास्यास्य संगान्मुनीन्॥ दृष्ट्वा शंकर पूजनोत्सव रसाविर्भाव संभावनां सं-
सारर्णव राव बोधक कथा सामर्थ्य महास्तिकः॥१९९॥ वेदांता अपिता वदंतराहिता: शांताः शिवाराधन ध्यानापार
कथा फलानुकथने स्यादत्र का वा कथा॥ देवानामुर गेंद्र किंनर गुरु व्यासादिकानां कथा दूरे धूर्जटि वाग् विशे-
षरचना विज्ञेयमेतत्फलं॥२००॥ ये वांछंति शिवं शिवामित कथा रूप स्फुरत्स्व धुर्नी निर्धूता खिल पातकात्म
कमला श्रीला सुशीलाः कलौ॥ ते सर्वे शिवमेव संततमुमाकांत प्रसादात्परं संप्राप्यात्र शिवं करं शिवमिति ज्ञात्वा
शिवं यांत्यपि॥२०१॥ आज्ञानोरुतरांधकार लहरी पूरारुणः कोप्ययं विज्ञानामृत सागरः शिव कथा रूपो विरूपं-
परं॥

१६

र्वं सर्वं शर्व स्वरूप मेव कुरुते गृज्ञा न मुक्ता न्नहो तद्बिंदुः स्मर मंदिरा कर करं कर्तुं समर्थः श्रुतः ॥२०२॥ योगाभ्यास रता
भवंतु न हे वसी थां रत्ना त्पुद्धिता स्तीर्थवास रता श्च निष्ठुर गिरिद्वारांधकारा दराः॥ तत्रास्या मम मास्त्व हं शिवरहस्या पा-
र वर्ण स्फुर न्निश्रेणी शिखरेण शंकर करालंबे शिवं प्रार्थये ॥२०३॥ कंठे तिष्ठति यस्य वा शिवरहस्यानंत चिंतामणिः॥
नित्यं तद्वशतां प्रयांति विबुधाः काला न्विताः स्वा न्विताः॥ तद्गेहां गण मेत्य तिष्ठति रमा वाणी शची संयुता तद्भाग्या
वधि मिंदु खंड विलसन्मौलिः परं वेत्यहो ॥४॥ आरुह्या हमहं मुहुः शिवरहस्यानंद रं स्यंदनं ऋग्वेदादिकवेद
चक्र घटितं व्यासादिकाश्वाश्रितं ॥ हारा पार वर ध्वजं शिवकथा शय्या वितानान्वितं शर्वाधीष्ठित मंतरा परिहितं
व्यापार मानंदये ॥२०५॥ पश्यामः शतशः शिवं कर शिवा कांता [struck] ति कांता मिता नंतानंद कथा सुधाकर कर व्यापार
सारा करं ॥ हार श्री कर तारकं शिवरहस्यानंद मत्यद्भुतं हारा-चार चिरा चिर द्युति हर व्याहार गुंजावृतं ॥६॥ अत्यल्पं फ
ल मिंदिरा रमणता रूपं विधित्वात्मकं त्रैलोक्याधिपतित्व मप्यगमुता [struck] कांता च कस्ये त्यतः॥ अन्यं तावदभूत
पूर्व ममरा प्राप्यं किमप्यं बिका कांता नंत कथोत्थ कस्य च परं कल्प्यं फलं तद्विधेः॥७॥ श्रुत्वापि प्रपतो द्विजः शिवर-
हस्यार्थो र्ध्व भाग्याक्षरा पार श्री कर धीर वीर रव मपर स्तात्र कोटि र्भवेत्॥ गृज्ञो पीति शपामि शंकर पदांभोजं

भुग्नावुन्नतो कृत्वा देवगण स्तुतां शिवकथां मत्वापि नत्वा शिवो ॥८॥ सत्यं तावदिहो च्यते शिवरहस्यानंद मंदाकिनी ॥
कल्लोलानिल पोतपूत हृदयां भोजे शुमृत्युंजयः ॥ नृत्यं त्यं विकल्पा स हामृत रसैः कैलास वासेन वा कृत्यं नेति मुहु-
र्मुहुः शिवरहस्यानंद कंदा धरः ॥९॥ श्रुत्यंत प्रमथाधिनायक कथा पूतास्ततः स्तत्कथा मध्यस्था क्षररूप मप्य घगि-
रि प्रध्वंसवज्रायुधं ॥ यत्पादांबुधि वाडवो प्य घकुला पारांधकारा मितान भ्राको मितरा शिकुंडल मिदं किं वा सुधा सागरः ॥
॥१०॥ कस्तूरी स्वल्प खिल्या मिव सुकृत वरकरा पार रत्नाकरो रुश्री युक्तानंत मुक्ता फल मिव विमलं शैवमेतद्रहस्यं ॥
धृत्वा भावोपि भाति प्रभुरिव जगतां शंभु भक्त प्रभावो भावो भाग्यांबुराशिः शिव पद कमला राधकः कोपि लोके ॥११॥
किं तस्याव भृथाप्लवैः सुर सरिद्रेवादि तीर्थाप्लवैः किं गोकोटि तुलादि दान निकरैः किं दिव्य तीर्थाटनैः ॥ भक्तिश्चेद्गि-
रिशार्चने शिवरहस्यानंद सिंधु स्फुरत्धीरा पारतरं गमंगल कथा भागार्ध भागोपि वा ॥१२॥ संसाराद्भुत सागरं शिव-
रहस्योत्कृष्ट नौका श्रितः श्री विश्वेश्वर कर्ण धार कृपया तीर्त्वा घन क्लेशभयं ॥ त्यक्त्वा तत्पर पाररूप परमानंद स्वरूपां
बिकां कांतानंद दपाद पद्म पुलिना सीनोन मी सम्य हो ॥१३॥ पाया दन्य हमेव वः शिव रहस्यां भोरुहं कंदति स्कंदो
नालति तन्मनः शिव पदांभोजः प्रभावो सति ॥ पत्रं तीरा गुणाः शिवांघ्रि कमलं तत्कर्णिका रूपति श्रांतं मे भ्रमरत्पु

मापतिकथातल्केसरं तिस्वतः॥२१४॥ पायादंक गतांबिकांक विलसत्पर्यंक लोला लता" पारानंद द सिंधु रानन सुधा दाना करः शंकरः॥ स्कंदा लोकन सागरो गिरि सुता स्मेरा धर स्वादना" नंदा लोलित विग्रहो मुहु रुमा दिव्यांग संग प्रियः॥१५॥ पायाद व्यय भव्य भू रि वि भवो भू भृत्कु मारीकरा" पार श्रीकरतार हार रुचिरा लंकार शंकाकरः॥ किं गौरी करजा चिराति रुचिरा श्री पद्म रागा धरा" धार श्री रिय मित्यु मापु रिवृढो गाढं शिवा लिंगितः॥ पाया दर्धेंदु मौलिःश्रुतिकथितकथाकल्पवृक्षोति दक्षो" दिक्षु व्याप्तः क्षणं वा भव भव भवजा पारता पापहारं॥ स्मृत्या रूढो पि यो वि त्सरि वृढ गिरिजा रक्षितो वेद शाखो॥ नंदी शादि प्रसूनो मुनि जनम धुपो मोक्ष ल क्ष्मी फला ढ्यः॥१७॥ पाया दर्धांगि गौरी कर कमल कथा रत्न सिंधु र्य-तो भू" तत्व ज्ञाना मृतां शुः शिव भजन सुधा शैव कल्प द्रुमोपि॥ शंग श्री लिंग पूजा व्रत नियम मणि र्भ क्ति भू काम धेनुः वैराग्ये रावृतोपि त्रिनयन चरण ध्यान रूपा पि ल क्ष्मीः॥१८॥ पाया दर्धश शांक शेखर कथा श्रीकाम धेनुर्यया" लिं-गारा धन पुण्य लक्षण म भूत्क्षीरं तद प्य क्षरं॥ आमी क्षापि वि ल क्षणाशिव यशो रूपा शिवा धिक्यता" धी रूपं दधि शंकरांघ्रि कमल स्नेहा त्म कं त द्घृतं॥१९॥ कल्याणनद निम्न गाब्धि सिकता नीरांश भू भृद्द्रुमां" पारां शांश घनांश भाग गणना काले न काले न वा॥ ब्रह्माद्यै रपि सादरैः शिव रहस्योक्ता क्षरा र्धाक्षर" व्याख्या कर्णन पुण्य शैल गणना कर्तुं न-शक्या द्विजाः
॥२२०॥

स्वस्त्यस्तु प्रियमस्तु शं शिवरहस्याकर्णने संततं विश्वासोऽस्तु शिवार्चने शिवजने भूतित्रिपुंड्रे शिवे॥ रुद्राक्षाभरणे शिवार्चनरताः पुत्राः पवित्रास्तथा पौत्राद्या अपि संतु शोभनकुलान्याकल्पमायुश्च वः॥२२१॥ भो भो भवाद्भुतदवानलजालमालासंतापभीः शिवरहस्यकथातिवृष्ट्या॥ शांताः प्रशांतहृदयाः सदया भवंतः स्वात्मन्युमारमणपादरजो भजध्वं॥२२२॥ संसारोरुवसंतसूरकिरणव्यापारतापातुरापारं भ्रांतिविनाशिनी शिवरहस्याभ्रं तु पूर्वप्रपां॥ कोवा नेच्छति वां छितं यदि भवे दिष्टं परं जीवनं त्यक्त्वा स्वात्मविघातकं कलिमलाक्रांतं कलौ केवलं॥२२३॥ ॥स्कंद उवाच॥ ॥इत्युच्चैर्गिरिशार्चनोत्सवरतान् कर्तुं प्रवृत्तस्तदा सूतो भूतिविभूषितः शितलसद्भालत्रिपुंड्रांकितः॥ सायंकालशिवार्चनोद्यतमतिः स्तरोस्तशृंगं यथावत्तुंगोन्नतशंगलिंगममलं दृष्ट्वैव दूरान्मुने॥२२४॥ सायंकालशिवार्चनोत्सवरतान् दृष्ट्वा मुनीन् तान्मुतांस्तद्द्वारान्तरवः शुका अपि पिकाः काला मराला अपि॥ शार्दूलातरुवोऽपि गोकुलयुताश्चक्रुः शिवाराधने यत्नं भूतिविभूषिताः शिवमहादेवेत्युदीर्योच्चकैः॥२२५॥ एवं शंकरशंकरामृतकथापीयूषधारामृताः सर्वे ते मुनयः प्रदोषसमयं संवीक्ष्य फाले क्षणं लिंगे पूजयितुं त्रयीमपि गृहुः स्मृत्वा प्रवृत्तास्ततः॥ प्राज्ञं स्तुतमुमासहायकलने कालोयमित्यूचिरे॥२२६॥ इत्याकर्ण्य वचो विलोकरविमप्युद्धूलिता भूतिभिः बिल्वैर्द्रोः शि-

व पूजनो त्सव रताः सिद्धेश्वरं वीक्ष्य च ॥ धृत्वा मौन मुमा सहाय शिव इत्युक्त्वा शिवाराधनं" चक्रुस्ते क्रतु कोटि पुण्य फलदं लिंगार्चनं कुंभज ॥२२७॥ श्री काल भैरव षडानन ढुंढि तुंडि" नंदीश भृंगि वृष भेश्वर वीर भद्रैः ॥ ब्रह्मादिभिश्च कनकांचितवेत्र हस्तैः" आराधितोस्तु पुरतः सशिवः शिवोनः ॥२२८॥ आचंद्रार्क मिदं रहस्य मनिशं शैवं शिवार्थमदः" श्रोतव्यं श्रुति सुख संतति प्रद मुमा कांतं प्रियं सादरं ॥ एतत्पुस्तक दान मप्यघ हरं पुण्यांबु राशि प्रदं" सर्वाभीष्टदमप्यतः शिवरतैः श्राव्यं श्रुतिव्यापृतं ॥२२९॥ ॥ इति श्री शिवरहस्ये हराख्ये तृतीयांशे उत्तरार्धे श्री याज्ञवल्क्य जनक संवादे नाम पंचाशोध्यायः ॥५०॥ ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ ॥ श्री शिवाय नमः ॥ ~~श्री वीरेश्वराय नमः~~ ॥ श्री वीरेश्वराय नमः ॥ श्री अंनपूर्णा गंगा विश्वेश्वरेभ्यो नमः ॥ श्री सिद्धेश्वराय नमः ॥ हराय नमः ॥ मृडाय नमः ॥ शंभवे नमः ॥ तृतीयांश पूर्वार्ध अध्याय ॥ ५०॥ उत्तरार्ध अध्याय ५० ॥

इतिश्रीशिवरहस्ये तृतीयांशः समाप्तः.